९३२

धर्मो विश्वस्य जगतः प्रतिष्ठा

प्राज्ञपाठशालामण्डलग्रन्थमाला

मीमांसाकोषः

चतुर्थो भागः

(ज – न)

संपादकः

ब्रह्मीभूतः केवलानन्दसरस्वती

फाल्गुनः शुक्लः ७ सोमवासरः शकः १८७७.

नि६२१

धर्मो विश्वस्य जगतः प्रतिष्ठा

प्राज्ञपाठशालामण्डलग्रन्थमाला

मीमांसाकोषः

चतुर्थो भागः

(ज – न)

संपादकः

ब्रह्मीभूतः केवलानन्दसरस्वती

पुस्तकालय

फाल्गुनः शुक्लः ७ सोमवासरः शकः १८७७.

आ॰ सङ्॰ ३८
~~१ ६२९~~

Prājña Pāṭhashālā Maṇḍala Grantha Mālā

MĪMĀṂSĀKOṢAḤ

Part IV

~~पुर्ण आरादीत~~

Dic. 41

Edited by

The Late Kevalānandasaraswatī

1956] [Rs. 30

(All rights reserved)

Printed by M. S. Sathe, at the Prajna Press, 315 Gangapuri, Wai
&
Published by V. G. Joshi, for Prajna Pathashala Mandal,
Wai, Dist. N. Satara.

Price Rs. 30

आ· सं· २४

प्रकाशकस्य निवेदनम्

अस्य मीमांसाकोषस्य प्रणेतारो गुरुचरणाः केवलानन्दस्वामिनो मुद्रणं प्रकाशनं चापरिसमापय्यैव इममशाश्वतं लोकं विहाय ब्रह्मभावं गताः। परन्तु कोशरचना च स्वहस्तेनैव तैः परिसमाप्तिं नीता करुणापरवशैः। मुद्रणं प्रकाशनं च निर्वर्तनीयमस्माभिस्तदनुगृहीतैरेव। चतुर्थोऽयं भागस्तेषां समक्षमेव प्रारब्धमुद्रणस्तेषां प्रथमवार्षिक्यां पुण्यतिथावद्य प्रकाश्यते। ये के चावशिष्टा भागाः सन्ति तान् प्रतिवर्षं क्रमेण मुद्रयित्वा प्रकाशयितुमिच्छामः। एतेषां संपादनं मुद्रणं प्रकाशनं च प्रादेशिकराज्यानां भारतीयसंघराज्यस्य च तथा जनानां च द्रव्यसाहाय्येनैव संपन्नं भवेत्, नान्यथा। गुरुचरणैस्तु अन्तिमोच्छ्वासपर्यन्तं जनकारुण्यवशादिदं कार्यं स्वतपःप्रभावेण संपादितमस्ति। तदेतदृणमस्यर्षेरपाकर्तव्यं भवति विद्यावृद्धिकामैः। प्रादेशिकराज्यानि भारतीयसंघराज्यं च विद्याप्रणयिनो जनाश्च ऋणस्यापाकरणे द्रव्यादिसाहाय्यं करिष्यन्तीत्याशास्महे।

अस्मत्संपादनकार्यधुरीणैः श्रीरङ्गनाथशास्त्रिभिर्गुरुचरणपरिचर्यापरैरेतत्संपादनं निर्वर्तितमिति सप्रमोदमत्र निर्दिशामः।

अधिकरणादिसंख्या— चतुर्थेऽस्मिन् भागे भाष्याधिकरणानि १४३, संकर्षाधिकरणानि ३७, केवलानन्दीवृत्त्यधिकरणानि १७३, तौताततिताधिकरणानि १६, न्यायाः २७९, लघुसिद्धान्ताश्च ३८४० भवन्ति।

अथ प्रथमभागमारभ्य भाष्याधिकरणानि ५९९, संकर्षाधिकरणानि १८४, केवलानन्दीवृत्त्यधिकरणानि ४५६, तौताततिताधिकरणानि ३६, न्यायाः ९०५, लघुसिद्धान्ताश्च १३१६३ इति।

फाल्गुनः शुक्लः ७
शकः १८७७

लक्ष्मणशास्त्री जोशी, तर्कतीर्थः
अध्यक्षः प्राज्ञपाठशालामण्डलस्य
मुख्यसंपादकश्च धर्मकोशस्य

(१५)

अनुक्रमणिका

प्रकाशकस्य निवेदनम् ... ...
ग्रन्थादिसंक्षेपाक्षराणि तद्विवरणं च १–५
शुद्धिपत्रकम् ७
मीमांसाकोषः १८०१–२४०७

ग्रन्थादिसंक्षेपाक्षराणि तद्विवरणं च ।

अद्वैत— अद्वैतसिद्धिः श्रीमधुसूदनसरस्वतीप्रणीता मोहमय्यां निर्णयसागरे १९१७ सने मुद्रिता ।

आचारमयूखः— श्री. ज. र. घारपुरेसंपादितः, मुंबई ।

आभरणम्— शांकरशारीरकभाष्यस्य टीका । अध्याय-पाद-सूत्राङ्काः । क्वचित् तृतीयोऽङ्कः अधिकरणस्य ।

उद्योतः— व्याकरणमहाभाष्यस्य टीका ।

उपदेशसाहस्री— श्रीशंकराचार्यप्रणीता । रामतीर्थः टीकाकारः । प्रकरणश्लोकाङ्कौ । गद्यं पद्यं च ।

ऋजु— ऋजुविमला नाम शाबरभाष्यव्याख्यानरूपायाः प्राभाकरीयबृहत्याः टीका श्रीशालिकनाथप्रणीता । चौखम्बासीरीज् १९२९ सने मुद्रिता ।

ऋसं— ऋग्वेदसंहिता । मण्डलम्, सूक्तम्, ऋक् इत्यङ्कत्रयम् ।

ऐआसा— ऐतरेयारण्यकस्य सायणभाष्यम् ।

ऐब्रा— ऐतरेयब्राह्मणम् । पुण्यपत्तनस्थानन्दाश्रमे १९३० सने मुद्रितम् । अध्यायः, खण्डः, सूत्रं इत्यङ्कत्रयम् ।

ऐब्रासा— ऐतरेयब्राह्मणस्य सायणभाष्यम् । अध्याय–खण्ड-सूत्राणामङ्काः । आनन्दाश्रमे १९३० सने मुद्रितम् ।

कणिका— न्यायकणिका विधिविवेकस्य टीका वाचस्पतिमिश्रप्रणीता । काशी मेडिकल्हॉल-मुद्रणालये १९०७ सने मुद्रिता ।

कल्पतरुः— भामत्याः टीका । अमलानन्दसरस्वतीप्रणीतः, १९१७ सने मोहमय्यां निर्णयसागरे मुद्रितः । अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम् ।

कस्तूरि— कस्तूरिरङ्गाचार्यविरचिता जैमिनिसूत्रवृत्तिः । सन १९०८ सने मैसूरनगरे मुद्रिता । सा च भाट्टदीपिकापुस्तके एव मुद्रिता ।

कासं— काठकसंहिता ।

कु., कुतूहलम्— अध्वरमीमांसाकुतूहलवृत्तिः श्रीवासुदेवदीक्षितविरचिता । श्रीरङ्ग–वाणीविलासे मुद्रिता । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

के— केवलानन्दसरस्वती । तत्कृता जैमिनिसूत्रवृत्तिश्च ।

कै. उ— कैवल्योपनिषत् ।

कैयटः— व्याकरणमहाभाष्यस्य टीका प्रदीपः नाम । काश्यां मुद्रितः ।

कौ., कौस्तुभः— मीमांसाकौस्तुभः खण्डदेवप्रणीतः । चौखम्बाया १९३९ सने मुद्रितः । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम्, पृष्ठाङ्कश्च ।

कौषीतकिब्राह्मणम्-- पुण्यपत्तने आनन्दाश्रमे १९११ सने मुद्रितम् ।

चतुर्ग्रन्थी-- महामहोपाध्यायश्रीअनन्तकृष्णशास्त्रिभिः प्रणीता न्यायामृत– अद्वतसिद्धि– न्यायामृततरङ्गिणी– लघुचन्द्रिकाणां चतुर्णां ग्रन्थानां निष्कर्षरूपा ।

चन्द्रिका-- अद्वैतासिद्धेः टीका ब्रह्मानन्दी नाम । निर्णयसागरे मुद्रिता ।

जै— जैमिनिकृतद्वादशलक्षणी । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

जैब्रा-- जैमिनीयब्राह्मणम् ।

टुप्— टुप्टीका नाम वार्तिकं कुमारिलभट्टप्रणीतम्, पुण्यपत्तने आनन्दाश्रमे शाबरभाष्येण सह १९३३ सनादौ मुद्रितम् ।

तत्त्वप्रकाशिका— परिभाषेन्दुशेखरटीकायाः भूतेः टीका । २००२ संवति काश्यां मुद्रिता ।

तन्त्ररत्नम्-- टुप्टीकायाः पार्थसारथिप्रणीता टीका । लिखिता । अध्यायः, पादः, अधिकरणम्, सूत्रं चेति अङ्कचतुष्टयम् ।

तैसं— तैत्तिरीयसंहिता । काण्डम्, प्रपाठकः, अनुवाकः इत्यङ्कत्रयम् ।

तौता— तौतातितमततिलकः भवदेवप्रणीतः मीमांसासूत्रवृत्तिरूपः अधिकरणरचनात्मकः । काश्यां मुद्रितः ।

दमी— दत्तकमीमांसा श्रीनन्दपण्डितकृता ।

द्र०— द्रष्टव्यम् ।

धर्मसिन्धुः— श्रीकाशीनाथोपाध्यायविरचितः ।

निर्णयसिन्धुः— श्रीकमलाकरभट्टविरचितः ।

न्या. माला— न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता, चौखम्बायां मुद्रिता ।

न्यायनि-- न्यायनिर्णयः नाम शांकरशारीरकभाष्यस्य टीका आनन्दगिरिप्रणीता । अध्याय– पाद– सूत्राङ्काः ।

पराक्रमः— उपक्रमपराक्रमः अप्पय्यदीक्षितप्रणीतः । लिखितः । पत्रम्, पृष्ठं इत्यङ्कद्वयम् ।

परि— परिभाषा । क्रमाङ्कः ।

परिभाषेन्दुः-- परिभाषेन्दुशेखरः नागेशप्रणीतः । काश्यां २००२ संवति मुद्रितः ।

परिमलः— भामत्याष्टीकायाः कल्पतरोः टीका । अप्पय्यदीक्षितविरचितः । मोहमय्यां निर्णयसागरे १९१७ सने मुद्रितः ।

पा०— पाणिनिः व्याकरणाचार्यः प्रसिद्धः । अध्यायः, पादः, सूत्रं चेति अङ्कत्रयम् ।

पुरुषार्थचिन्तामणिः— श्रीविष्णुभट्टविरचितः । मोहमय्यां मुद्रितः ।

पृ— पृष्ठम् ।

प्र. पञ्चिका— प्रकरणपञ्चिका श्रीशालिकनाथप्रणीता। काश्यां विद्याविलासयन्त्रालये १९०४ सने मुद्रिता।

प्र. वि— प्रभाकरविजयः नन्दीश्वरविरचितः। कलकत्तायां १९२६ सने मुद्रितः।

बाल— बालमीमांसाप्रकाशः शंकरभट्टप्रणीतः। काश्यां विद्याविलासमुद्रणालये १९०२ सने मुद्रितः।

बिन्दुः— न्यायबिन्दुः तत्सदुपाख्यवैद्यनाथप्रणीतः, मुंबई गुजरातीमुद्रणालये १९१५ सने मुद्रितः।

बृहती— शाबरभाष्यस्य प्रभाकरमतानुसारिणी टीका। नव्यप्राभाकरमतमत्र। चौखम्बायां १९२९ सने मुद्रिता।

ब्रसू— ब्रह्मसूत्रम्। अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम्। अङ्कचतुष्टये सति तृतीयोऽङ्कः अधिकरणस्य।

भा— शाबरभाष्यं आनन्दाश्रमे मुद्रितम्। अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम्। क्वचित् पृष्ठाङ्कः अधिकः।

भाट्ट— भाट्टदीपिका नव्यमीमांसकखण्डदेवप्रणीता। मैसूर १९०८ सने मुद्रिता। अध्यायः, पादः, अधिकरणमिति अङ्कत्रयम्।

भाट्टालङ्कारः— मीमांसान्यायप्रकाशस्य अनन्तदेवविरचिता टीका।

भामती— श्रीवाचस्पतिमिश्रप्रणीता शांकरशारीरकभाष्यस्य टीका। मुंबई निर्णयसागरे १९१७ सने मुद्रिता।

भाष्यम्— शाबरभाष्यम्।

भूतिः— परिभाषेन्दुशेखरस्य टीका श्रीतात्याशास्त्रीपटवर्धनप्रणीता। काश्यां २००२ संवति मुद्रिता।

मणि— भाट्टचिन्तामणिः गागाभट्टविरचितः। तर्कपादमात्रम्। चौखम्बायां १९०० सने मुद्रितः।

मण्डन— मण्डनमिश्रकृता मीमांसाऽनुक्रमणी चाखम्बायां १९२९ सने मुद्रिता, मण्डनाचार्यश्च।

मिताक्षरा— याज्ञवल्क्यस्मृतिटीका श्रीविज्ञानेश्वरविरचिता।

मीको— मीमांसाकोषः।

मीन्या— मीमांसान्यायप्रकाशः श्रीआपदेवप्रणीतः। चौखम्बायां १९२० सने मुद्रितः।

मुरारिः— अङ्कत्वनिरुक्तिकर्ता। आनन्दाश्रमीये मीमांसादर्शने तृतीये भागे अन्ते १९३१ सने मुद्रिता।

याज्ञ— याज्ञवल्क्यस्मृतिः। अध्यायः, श्लोकः इति द्वौ अङ्कौ।

रत्न— तन्त्ररत्नम् । पार्थसारथिमिश्रप्रणीतम् । टुप्टीकावार्तिकस्य टीका । लिखिता । अध्यायः, पादः, अधिकरणम्, सूत्रं इत्यङ्कचतुष्टयम् ।

रत्नमाला— न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता । चौखम्बायां मुद्रिता ।

रत्नाकरः— न्यायरत्नाकरः श्लोकवार्तिकस्य टीका पार्थसारथिमिश्रप्रणीता । चौखम्बायां १८९८ सने मुद्रितः ।

रसायनम्— विधिरसायनं अप्पय्यदीक्षितप्रणीतम् । चौखम्बायां १९०१ सने मुद्रितम् ।

रहस्य— भाट्टरहस्यं श्रीखण्डदेवप्रणीतम् । शाब्दबोधविषयकम् । काञ्चीनगरे मुद्रितम् ।

वा— तन्त्रवार्तिकं आचार्यकुमारिलभट्टविरचितं शाबरभाष्यस्य विवरणात्मकम् । पुण्यपत्तने आनन्दाश्रमे भाष्येण सह १९३१ सने मुद्रितम् ।

वि— जैमिनीयन्यायमालाविस्तरः सायणमाधवाचार्यप्रणीतः । पुण्यपत्तने आनन्दाश्रमे १९१६ सने मुद्रितः । अध्यायः, पादः, अधिकरणं चेति अङ्कत्रयम् ।

विवि— विधिविवेकः मण्डनाचार्यप्रणीतः । काश्यां मेडिकल्हॉलमुद्रणालये १९०७ सने मुद्रितः ।

वृ— मीमांसासूत्रवृत्तिः सुबोधिनी नाम रामेश्वरसूरिविरचिता । काश्यां मेडिकल्हॉलमुद्रणालये १९२३ सने मुद्रिता ।

वैजयन्ती— महादेवकृता सत्याषाढश्रौतसूत्रवृत्तिः । पुण्यपत्तने आनन्दाश्रमे १९०७ सने मुद्रिता ।

वैद्यनाथः— शाबरभाष्यीयतर्कपादस्य टीकाकारः । आनन्दाश्रमे १९२९ सने मुद्रिता वैद्यनाथी नाम ।

वैद्यनाथी— वैद्यनाथकृता शाबरभाष्यस्य टीका ।

वैया. भू— वैयाकरणभूषणसारः ।

वै. सार. कारिका— वैयाकरणभूषणसारस्था कारिका ।

व्यवहारमयूखः— श्री. ज. र. घारपुरेप्रकाशितः ।

शंकर— शंकरभट्टकृतः मीमांसासारसंग्रहः । काश्यां विद्याविलासमुद्रणालये प्रकरणपञ्चिकापुस्तकान्ते १९०४ सने मुद्रितः ।

शब्दकौस्तुभः— भट्टोजीदीक्षितप्रणीतः ।

शांभा— शांकरं भाष्यम् । अध्यायः, पादः, सूत्रं इत्यङ्कत्रयम् । चतुरङ्कत्वे तु तृतीयोऽङ्कः अधिकरणस्य ।

शा— शास्त्रदीपिका पार्थसारथिमिश्रप्रणीता । निर्णयसागरे १९१५ सने मुद्रिता । अध्यायः, पादः, अधिकरणं चेति अङ्कत्रयम् ।

शेखर— परिभाषेन्दुशेखरः नागेशप्रणीतः । काश्यां २००२ संवति मुद्रितः भूत्यादिसहितः ।

श्राद्धमयूखः— श्री ज. र. घारपुरेप्रकाशितः ।

श्रीकर— ब्रह्मसूत्रभाष्यकारः शैवमतानुसारी ।

श्लोवा— श्लोकवार्तिकं आचार्यकुमारिलभट्टविरचितम् । तर्कपादः । चौखम्बायां १८९८ सने मुद्रितम् ।

संस्कारकौस्तुभ— श्रीअनन्तदेवविरचितः निर्णयसागरे मुद्रितः ।

संकर्ष— संकर्षकाण्डम् । भास्करभट्टप्रणीता भाट्टचन्द्रिका भाट्टदीपिका वा वृत्तिः । काश्यां मेडिकल्हॉलमुद्रणालये १८९४ सने मुद्रिता ।

संक्षेपशारीरकम्— रामतीर्थकृतटीकासहितम् । अध्यायः, श्लोकः इति अङ्कद्वयम् ।

संग्रहः— न्यायसंग्रहः । लिखितः ।

सत्या. श्रौ— सत्याषाढीयं श्रौतसूत्रम् । आनन्दाश्रमे १९०७ सने मुद्रितम् ।

सना. ध. प्र.— सनातनधर्मप्रदीपः । श्रीकुकरमुण्डेकरमहाराजप्रेरितैः म. म. अनन्तकृष्णशास्त्रिभिः प्रणीतः ।

समयमयूखः— श्री ज. र. घारपुरेसंपादितः, मुंबई ।

साहस्री— भुवनेशलौकिकन्यायसाहस्री । मुंबई वेङ्कटेश्वरे १८३० शके मुद्रिता । साहस्र्यां यो न्यायक्रमाङ्को निवेशितः स एवास्माभिः प्रदर्श्यते ।

सि. कौ.— सिद्धान्तकौमुदी ।

सिद्धान्तदर्शनम्— निरञ्जनभाष्यसमेतम् । आनन्दाश्रमे १९०७ सने मुद्रितम् ।

सिद्धिव्याख्या— अद्वैतसिद्धेः टीका ।

सु., सुधा— न्यायसुधा तन्त्रवार्तिकस्य टीका । भट्टसोमेश्वरविरचिता राणकापरपर्याया चौखम्बायां मुद्रिता ।

सोम— मयूखमालिका नाम शास्त्रदीपिकायाः टीका अर्थवादाधिकरणमारभ्य संपूर्णा ।

शुद्धिपत्रकम्

पृष्ठम्	स्तम्भः	पङ्क्तिः	अशुद्धम्	शुद्धम्
१८०७	२	शीर्षणि	पवित्रण	पवित्रेण
१८०८	१	,,	ष्टोम दिगवि	ष्टोमे दिग्वि
१८२४	२	५	श्रयाणर्थेषु	श्रयणार्थेषु
१८५१	१	१	। १७ ॥	। १८ ॥
१८६३	,,	२२	श्रुतिभता	श्रुतिभूता
१८७२	२	२८	। १३ ॥	। १२ ॥
१९०७	१	७	दुरादामा	दुरादानमा
१९२७	,,	२९	तार्निर्देशः	तानिर्देशः
,,	२	३०	ममत्वात्	समत्वात्
१९३९	,,	२१	णास्याम्	णाभ्याम्
२०००	१	१७	* दण्ड	⧗ दण्ड
,,	,,	२६	रुवण	वरुण
२०१३	२	१४	हौमौ	होमौ
२०२९	१	१२	राति	सति
२०६६	२	११	समिधे	सामिधे
२०६९	१	३४	हविक्र	हविष्क्र
२०७७	२	१	रात्रिवत्स्य	रात्रित्वस्य
२०९३	१	२०	⧗ अयनेषु	अयनेषु
२१३७	,,	१२	भौंजनं	भोंजनं
२१४६	२	८	ु रुषा	पुरुषा
,,	,,	१६	व ऽन्य	वाऽन्य
२१५३	१	१	द्रव्यं	* द्रव्यं
२२०५	,,	९	ष्ठाभेदः	ष्ठानमेदः
२२८४	,,	११	प्रयोगचन	प्रयोगवचन
२२९५	२	३१	निलो	नीलो
२३१९	१	२५	प्रदुताय	प्रद्रुताय
२३३६	२	१६	परत्व	परत्व
२३६७	१	१	कथकारं	कथंकारं
२३७१	,,	८	चद्रोदये	चन्द्रोदये

मीमांसाकोषः

⧗ ज्योतिष्टोमे तृतीयसवने एव आज्येन व्याघारणम् ॥

' धिष्ण्यान् व्याघारयति ' इति विधाय ' तृतीय आज्येन ' इति विधिनोपसंहारात् तृतीयसवने एव व्याघारणम् । **इति प्राप्ते,** सामान्यविधिना अनुसवनं व्याघारणं विहितम् । तत्र तार्तीयमेव ' तृतीये ' इत्यनूद्य आज्यलक्षणगुणमात्रविधिः । कालद्रव्योभयनियमे वाक्यभेदापत्तेः । **संकर्ष.** ३।२।१७.

⧗ ज्योतिष्टोमे तृतीयसवने एव षोडशिनो ग्रहणम् ॥ अन्तरागर्भिणी ।

तृतीयसवने वचनात् स्यात् । १०।५।११। ४४ ॥

भाष्यम्— अथेदानीमेतत् चिन्त्यते । अस्ति ज्योतिष्टोमः । तत्र श्रूयते ' यः षोडशी गृह्यते, इन्द्रियमेव वीर्यमात्मन् धत्ते ' इति । तत्र संशयः किं सवनेसवने ग्रहीतव्यः, उत तृतीयसवने इति । किं प्राप्तम् ? सवनेसवने इति । कुतः ? प्रतिसवनं हि श्रूयते गृह्णाति षोडशिनमिति । शब्दलक्षणे च कर्मणि शब्दो नः प्रमाणम् । तस्मात् सवनेसवने षोडशी गृह्यते इति । **एवं प्राप्ते, ब्रूमः** । तृतीयसवने स्यादस्य ग्रहणमिति । कुतः ? वचनात् । भवति हि वचनम् । ' तृतीयसवने आग्रयणाद् गृह्णाति षोडशिनम् ' इति । वचनं नः प्रमाणम् । तस्मात्तृतीयसवने ग्रहीतव्यः इति । अथ यदुक्तम्, प्रतिसवनं षोडशिग्रहणमिति । तृतीयसवनग्रहणस्तुत्यर्थं तत् । कथम् ? ' प्रातःसवने ग्राह्यः । तेजो वै प्रातःसवनम् । तेजस एव वज्रं निर्मिमीते । माध्यंदिने सवने ग्राह्यः । ओजो वै माध्यंदिनं सवनम् । ओजस एव वज्रं निर्मिमीते । तृतीयसवने ग्राह्यः । पशवो वै तृतीयसवनम् । पशुभ्य एव वज्रं निर्मिमीते । यत् प्रातःसवने गृह्णीयाद्वज्र उत्तरे सवने व्यतिरिच्येत । यन्माध्यंदिने, मध्यतो वज्रं निहन्यात् । तृतीयसवने ग्राह्यः । तत् सर्वेषु सवनेषु गृह्णाति, न पूर्वे सवने आर्तिं नीतः ' इति ।

शा— किं पुनः कारणम् अन्तराचिन्तायाः ? (प्राभाकरोक्तं कारणमाशङ्क्य निरस्यति–) मूलाधिकरणसिद्धान्ते कालोपलक्षणत्वम् उक्थ्यस्य स्थास्यति, स्थिते च तस्मिन् पूर्वयोः सवनयोः ग्रहणमाशङ्कितुमशक्यम्, तयोरुक्थ्याभावात् । तस्मात् मध्ये चिन्तितम् इति केचित् । तदयुक्तम् । एवमपि पूर्वपक्षं समाप्य कर्तव्येयं चिन्ता स्यात्, न मध्ये । किञ्च 'प्रातःसवने ग्रहीतव्यः' इत्यादिवचनात् अस्य सवनत्रये ग्रहणमाशङ्क्यते । न च वचनस्य परिपन्थी संभवति । तस्मात् यद्यपि पूर्वयोः सवनयोः उक्थ्याभावात् तदुत्तरकालता न संभवति, तथापि वचनबलात् ग्रहीतव्यः । कालवचनं तु तार्तीयसवनग्रहणाभिप्रायं भविष्यति । (पराभिमानं खण्डयति–) विद्यते च पूर्वयोरपि सवनयोः उक्थ्यम् (पूर्वयोरपि सवनयोः क्रत्वर्थोक्थ्यस्य सद्भावः । स्वमतेन अन्तराचिन्ताप्रयोजकमाह–) तस्मात् विचित्रगतिः सूत्रकारः चिन्तान्तरमध्येऽपि प्रसङ्गात् चिन्ताऽन्तरं कृतवान् इत्येव वक्तव्यम् ।

वि— ' सवनेषु तृतीये वा स, त्रयोक्त्या भवेत् त्रिषु ।, द्वे निन्दित्वा तृतीयस्य विधेस्तत्रैव गृह्यताम् ॥'

भाट्ट— इदमधिकरणं सूत्रकारेण पूर्वाधिकरणपूर्वपक्षमध्ये कृतमपि व्याख्यासौकर्यार्थं पृथङ् निरूप्यते । षोडशियागाभ्यासः किं नियमेन सवनत्रये स्यात्, उत पक्षे तृतीयसवने एवेति चिन्तायाम्, ' सवनेसवने गृह्णाति' इति शाखाऽन्तरवचनेन अनन्यशेषभूतेन सवनत्रयेऽपि तावत् ग्राह्यः इत्यविवादमेव । अतश्च तदेकवाक्यतया ' प्रातःसवने ग्राह्यः तेजो वै प्रातःसवनं तेजस

एव वज्रं निर्मिमीते, माध्यंदिने सवने ग्राह्यः तेजो वै माध्यंदिनं सवनं तेजस एव वज्रं निर्मिमीते, तृतीयसवने ग्राह्यः पशवो वै तृतीयसवनं पशुभ्य एव वज्रं निर्मिमीते । यत् प्रातःसवने गृह्णीयात् उत्तरे सवने व्यतिरिच्येत, यन्माध्यंदिने तन्मध्यतो वज्रं निहन्यात्, तृतीयसवने ग्राह्यः तत्सर्वेषु सवनेषु संगृह्णाति, न पूर्वे सवने आर्तिं नीतः' इति शाखाऽन्तरवचनेऽपि सवनत्रये एव विधीयते । ग्राह्यः इति कृत्यप्रत्ययस्य सर्वत्र श्रवणेन 'साम्ना स्तुवीत' इतिवत् नावमिकन्यायाभावात्, त्र्यम्बकवाक्ये इव मीमांसापदाश्रवणेन तस्यार्थवादत्वकल्पनाऽनुपपत्तेश्च । जर्तिलयवागून्यायेन एकवाक्यतालाभार्थं पूर्वस्य विधेरर्थवादत्वं प्रकल्प्य तार्तीयसवनिकस्यैव विधित्वकल्पना तु विधिभेदेऽपि शाखाऽन्तरैकवाक्यतालाभस्य अविशिष्टत्वात् कल्पापादकत्वाच्च न शङ्क्या । **इति प्राप्ते,** पूर्वसवननिन्दापूर्वकतृतीयस्तुतेः तन्मात्रविधिपरत्वावसायात्, पूर्वविधिद्वयस्यापि जर्तिलयवागून्यायेन पदैकवाक्यतालाभार्थं तच्छेषत्वस्यैव कल्पनात्, शाखाऽन्तरैकवाक्यत्वाभावेऽपि क्षतिविरहात्, विकल्पस्य फलमुखत्वेन अदोषत्वात् । अस्यां शाखायां तार्तीयसवनिकः एव विधिः, सवनत्रयग्रहणाच्च फलाधिक्यम् । न च पूर्वयोः सवनयोः उक्थ्यपरभावस्याभावः, सवनत्रयेऽपि उक्थ्यानां सत्त्वात् ।

मण्डन— 'ग्राह्यस्तृतीये सवने स नूनम् ।' सः षोडशी ।

शंकर— 'तृतीयसवने स च ।' १०.

ज्योतिष्टोमे तृतीयसवने द्विर्धिष्ण्यविहरणम् ॥

धिष्ण्यानां सवनभेदेन त्रीणि विहरणानि । तान्युद्दिश्य 'अङ्गारैर्द्वे सवने विहरन्ति शलाकाभिस्तृतीयम्' इति गुणविधयः । चतुर्थस्य गुणविधेरभावान्नास्ति चतुर्थं विहरणम् । **इति प्राप्ते,** अग्निष्टोमसाम प्रकृत्य 'धिष्ण्यान् ज्योतिष्मतः कुर्यात्' इति विधेश्चतुर्थविहरणसिद्धिः । **न च** 'अग्नीन् ज्योतिष्मतः कुरुत' इति प्रैषोत्तरमिव तृतीयसवने विहृतानामेवाग्नीनां भस्मापनयनेन समिन्धनरूपमेव ज्योतिष्मत्त्वमिति **वाच्यम्** । धिष्ण्याग्नीनां महाग्नीनामिव जागरणाभावेन तदनुपपत्तेः । अत एव 'एतावतीर्वा अग्नेस्तनूः' इत्यादिना त्रिचत्वारिंशत्तनुसंख्याकथनं संगच्छते । चतुर्थविहरणाभावे सप्तन्यूनताऽऽपत्तेः । तच्चेत्थम् । षड्धिष्ण्यानां मार्जालीयस्य च चतुर्वारं विहरणात् अष्टाविंशतिः । शामित्रा औपयजाश्च पशुभेदात् त्रयस्त्रयः । निर्मन्थ्याश्चत्वारः । आग्नीध्रीयेण सह महाग्नयः पञ्चेति । **संकर्ष.** ३।२।१६.

* ज्योतिष्टोमे तृतीयसवने सौम्यचर्वादौ हविष्कृदाह्वानं पुनर्न कर्तव्यम् । पत्नीसंयाजपर्यन्तं पत्न्याः निवृत्त्यभावात् । **वि.** १२।२।४. * ज्योतिष्टोमे त्रिवृद्बहिष्पवमानमिति बहिष्पवमानशब्दः नामधेयम्, न गुणविधिः। **भा.** १।४।२।३.

ज्योतिष्टोमे दक्षिणाऽन्तर्गतगोष्वेव द्वादशशतसंख्यानिवेशः । दक्षिणाऽधिकरणम् ॥

द्रव्यविधिसंनिधौ संख्या तेषां गुणत्वात् स्यात्। १०।३।११।३९ ॥

भाष्यम्— अस्ति ज्योतिष्टोमः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति । तत्र एवमाम्नायते 'गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च, तस्य द्वादशशतं (११२) दक्षिणा' इति । तत्र संशयः किमेकैकस्य गवादेर्द्रव्यस्य द्वादशशतम्, उत एकस्य द्रव्यस्य । यदा एकस्य तदा किमनियमः यस्यकस्यचित्, उत माषाणाम् । अथवा सर्वसंपादनीया संख्या, उत एकजातीयस्य । यदा एकजातीयस्य तदा किमनियमः यस्यकस्यचित्, उत पशूनाम्। यदा पशूनां तदा किमनियमो येषाकेषांचित्, उत गवाम् । इत्येते पक्षा भविष्यन्ति ।

किं तावत् प्राप्तम् ? द्रव्याणां विधीयमानानां संनिधौ केषां द्रव्याणाम् ? गवादीनाम् । क्व विधीयमानानाम् ? दक्षिणासंबन्धे । संख्या समाम्नाता, 'तस्य द्वादशशतं दक्षिणा' इति । तेषां गवादीनामेकैकस्य संख्या स्यात् । कुतः ? गुणतः संख्या विधीयते, गवादीनि प्रधानतः । कथम् ? नैवमभिसंबन्धः क्रियते, द्वादशशतं स्यादिति । कथं तर्हि ? द्वादशशतं तस्येति । एवं तस्यग्रहणमर्थवद्भवति । इतरथा तदनर्थकं वा अनुवादो वा स्यात् ।

एकवचनमपि प्रकृतापेक्षं लक्षणया अनूद्येत । प्रधानसंनिधौ च गुणः शिष्यमाणः प्रतिप्रधानं भिद्येतेति । अस्ति च एतया संख्यया प्रयोजनम् । गवादीनि द्रव्याणि तत्संख्यानि कर्तव्यानि । तत्र न गम्यते विशेषः । किमेतत्संख्यं कर्तव्यम्, किं नेति । यदेव द्रव्यं नैतत्संख्यं स्यात्, तत् प्रति श्रुतिर्बाध्येत । तस्मादेकैकमेतया संबद्धव्यमिति ।

टुप्— दक्षिणाप्रसङ्गेन इदम् (अधिकरणम्) आयातम् । (तेन प्रासङ्गिकी संगतिः) । अथवा प्रकृतौ निर्णीतायां विकृतौ दक्षिणाविचारः (दक्षिणाबाधप्रकारविचारः) सुखं वर्तिष्यते [उदाहरणमाक्षिपति–] ननु ‘ तस्य नवतिशतं स्तोत्रीयाः ’ इत्यस्य (वाक्यस्य) अर्थवादत्वेन शेषभूता गवादयः । कथम् ? ‘ तस्य नवतिशतम् (१९०) स्तोत्रीयाः’ इत्यभिधाय आह (तासां मध्ये) याः अशीतिशतम् (स्तोत्रीयाः) ताः षट्त्रिंशिन्यः [षट्त्रिंशदक्षराः] विराजः, षट् ऋतवः, ऋतुष्वेव विराजः प्रतितिष्ठन्ति [६×६ = ३६] इत्येवं विराट्संस्तुतिस्तासाम् (स्तोत्रीयाणाम्) । ततः पश्चादाह ‘ अथ याः (परिशिष्टाः) दश (स्तोत्रीयाः), एषा वा आत्मन्या (आत्मप्रतिष्ठापनी) विराट् ’ इति ता दश (स्तोत्रीयाः) गवादिभिः (दशभिर्द्रव्यैः) स्तूयन्ते । तस्मात् (अर्थवादत्वात्) इदम् (छान्दोग्यस्थम्) अनुदाहरणम् । किं तत् (तर्हि उदाहरणम् ?), आध्वर्यवे यदि ईदृशं वाक्यम्, तत् द्रष्टव्यम् । कृत्वाचिन्ता वा । अथवा उदाहरणमेवेदम् [छान्दोग्यस्थम्] । ‘ तस्य द्वादशशतम् ’ इति (वाक्ये) यदि तस्य इति क्रतुविशेषणं स्यात् अप्रवृत्तिविशेषकरमनर्थकं स्यात् । गवादयस्तु यद्यपि अर्थवादत्वेनोक्ताः, तथापि विपरिवर्तमानाः, त एव तस्यशब्देन संबध्यन्ते (तस्य द्रव्यस्य द्वादशशतं दक्षिणा इति । यदेव तच्छब्दनिर्दिष्टं तस्य संख्या । तच्छब्दपरामर्शस्तु कस्येति चिन्त्यते । पूर्वपक्षमाह–) एकैकस्य गवादेर्द्रव्यस्य संख्यया संबन्धः । कुतः ? तच्छब्देन गवादयः सर्वे परामृश्यन्ते, षष्ठ्या तेषामेव गुणभूता संख्या विधीयते । ननु गवादिभिः (बहुभिः) संबन्धे तेषाम् इति बहुवचनं प्राप्नोति । उच्यते । गवादयोऽत्र (संख्यां प्रति) प्रधानभूताः (तच्छब्देन) उद्दिश्यन्ते, उद्दिश्यमानस्य च संख्या न विवक्ष्यते ग्रहस्येव । अथवा तन्त्रसंबन्धोऽयम्, सा दक्षिणा, तस्य द्वादशशतमिति । एवमपि (यद्यपि दक्षिणां प्रति गवादेर्विधानम्, तथापि) संख्या गुणभूता द्रव्याणि प्रति (षष्ठ्यन्तस्य) शब्दस्य सामर्थ्यात् ।

समत्वात्तु गुणानामेकस्य, श्रुतिसंयोगात् । ४० ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । तस्यतस्य द्वादशशतमिति, नैतदेवम् । एकस्य कस्य चित् द्वादशशतं स्यात् । कुतः ? समत्वाद् गुणानाम् । गवादयोऽपि हि दक्षिणासंबद्धाः, संख्याऽपि । न गवादीनां संख्या विधीयते । दक्षिणा तु संख्याविशिष्टा चोद्यते, न गवादयः । कुतः ? संख्याया दाक्षिण्येन अनभिसंबन्धे सति अनियतसंख्यानां गवादीनां दक्षिणासंबन्धेन आनर्थक्यमेव संख्यायाः स्यात् । संख्येयसामानाधिकरण्याच्च तच्छब्दस्य बहुवचनं प्रसज्येत । गवादिषु तस्य द्वादशशतमिति चैकवचनं न स्यात् । तस्माद्यस्यकस्यचित् परिक्रयसाधनस्य द्रव्यस्य एतस्यां संख्यायां कृतायाम् एतत्संख्यः परिक्रयः कृतो भवति । तस्मादेकस्य संख्या, नैकैकस्य । एवम् एकवचनश्रवणं युक्तरूपं भविष्यति । ननु लक्षणत्वात् तस्यशब्दस्य अविवक्षितं वचनम् । उच्यते । अविवक्षितेऽपि वचने या संख्याऽनूद्यते, तेन वचनेन भवितव्यम् । यथा लक्षणत्वेनापि उच्यमाने ब्राह्मणजातीयो न हन्तव्य इति, न द्विवचनान्तेन निर्देशो भवति ‘ ब्राह्मणौ न हन्तव्यौ ’ इति । आह । जात्याख्यायामेकस्मिन् बहुवचनं भवति । बहुषु वा एकवचनं भवति, न तु एकस्मिन् बहुषु च द्विवचनं भवति । तेन अत्र बहुवचनान्तेन निर्देशः, एकवचनान्तेन वा बहुषु निर्देशो भवति । अत्रोच्यते । जात्याख्यायामेतदेवं भवति । न च तच्छब्देन जातिरभिधीयते । संनिहितव्यक्तिवचन एष भवति । तस्मादेकस्य कस्य चित् संख्येति ।

टुप्—– ननु गुणभूता संख्या द्रव्याणि प्रति । कुतः ? वाक्यभेदप्रसङ्गात् । (तथाहि,) सकृदुच्चरितः तस्ये-

तिशब्दः यदि दक्षिणायां विधीयेत, तं प्रति संख्या च (षष्ठ्या) विधीयेत, ततो वाक्यभेदः। अथापि वाक्यभेदमङ्गीकृत्य तच्छब्दस्य (तदुद्देशेन) संख्या विधीयते, तथापि दक्षिणायाः (संख्या) अनङ्गम् (स्यात्, तां प्रति) अविधीयमानत्वात् 'तत्रैकत्वमयज्ञाङ्गमिति चेत्' (४।१।५।११) (इत्युक्तत्वात्। कथम् ?) तन्त्रसंबन्धेऽपि गवादयः (स्वरूपेणैव) संख्यानुरक्ताः (न तु संख्या दक्षिणाऽनुरक्ता)। तत्र वाक्यभेदादयो दोषाः (तत्रैकत्वम् इत्यत्र) उक्ताः, ते इहापि भवेयुः। तस्मात् गवादयः, संख्या, तच्छब्दश्च (इति त्रितयमपि दक्षिणां प्रति विधीयते)। तच्छब्दस्य द्रव्यपरत्वात् जात्याख्यायाम् इत्येतदपि न लभ्यते।

यस्य वा संनिधाने स्याद्, वाक्यतो ह्यभिसंबन्धः। ४१ ॥

भाष्यम्—इदं पदोत्तरं सूत्रम्। यदा एकस्य संख्यासंबन्धः, तदा अनियमः, यः कश्चित्, विशेषाश्रवणादिति। एवं प्राप्ते, ब्रूमः। यस्य वा संनिधाने स्यात्। यस्य शब्दस्य संनिधाने संख्याशब्द उच्चरितः, सोऽर्थः संख्याविशिष्टः प्रतीयेत। अनन्तरमुच्चरितेन हि सह एकवाक्यता भवति। कुतः ? अनन्तरसंबद्धं हि विशेषणं विज्ञानं विशेष्टुं शक्नोति, नहि व्यवहितम्। व्यवहिताश्च गवादयो माषैः। वाक्यं च प्रकरणाद्बलीयः। तस्मात् माषाः संख्यया संबध्येरन्निति।

टुप्—**यस्य वा संनिधाने**। (गृह्णीम एतत् एकस्य संख्येति। यत्तु) यस्यकस्यचिदिति, तन्न, माषा दक्षिणाया अनन्तरम् (पूर्वाव्यवधानेन) विपरिवर्तन्ते। (अतः) ते एव ग्राह्याः। गवादयस्तु न विपरिवर्तन्ते व्यवहितत्वात्।

असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते, तस्मात् सर्वाधिकारः स्यात्। ४२ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति। माषाः संख्यायुक्ता इति, नैतदेवम्। सर्वव्यापिनी संख्या स्यात्। सर्वैर्गवादिभिः संपाद्येत। असंयुक्ता केवलैर्माषैः संख्या। तुल्यवत् इतराभिर्द्रव्यश्रुतिभिः माषाः श्रूयन्ते। कथम् ? तिलाश्च माषाश्चेति चशब्देन तिलैः सहिता माषा इति गम्यते। गवादिभिः सहितानां संख्यासंबन्धः। चशब्दश्रुतिः अर्थान्तरसंबन्धमेषामाह। चशब्दश्रवणस्य एतत् सामर्थ्यम्। यस्मात् चशब्दः पर उच्चार्यते, तस्य अर्थान्तरसंबन्धं श्रुत्यैवाह, न वाक्येन। यदि हि वाक्येन स्यात् पुरस्तादपि उच्चार्यमाणः एतमर्थं कुर्यात्। संख्या तु वाक्येन संबध्यते। यदि च पूर्वं न चार्थः अवकल्पेत, चशब्दश्रवणमनर्थकं स्यात्। नहि असौ उत्तरकाले संबध्यते संख्यासंबन्धे अभिनिर्वृत्ते। 'तस्य द्वादशशतं च' इति अन्य एव अवगम्येत 'द्वादशशतम् अन्यच्च किञ्चित्' इति। न च तत् अन्यत् किञ्चित् उच्चार्यते। तस्मात् पूर्वं चयोगः, पश्चात् संख्यासंबन्धः। समर्थतराणि समानविभक्तीनि, दुर्बलो विविभक्तिः (भिन्नविभक्तिकः) अपिच समानविभक्तीनि समर्थतराणि। तेषां हि आशुतरा वृत्तिः, विलम्बिता विविभक्तीनाम्। स्वार्थे समानविभक्तीनि समर्थतराणि प्रथमाऽन्तानि भवन्ति। परपदार्थे षष्ठ्यन्तो विशिनष्टि। तस्मात् समुच्चितानि वा इतरेतरयुक्तानि वा संख्येयानि संख्यया संबध्यन्ते। समाहारो वा एषां संख्यया युक्तः। तस्मात् सर्वैः संख्या संपादयितव्या। किमेवं भविष्यति ? संख्यासंबन्धे न कश्चित् वर्जितो भविष्यति। विनिगमनायां हेत्वभावे यमेव संख्यासंबन्धो वर्जयेत्, तत्रैव प्रत्ययो बाध्येत। तस्मात् गवादिराशिः संख्यया एतया संबध्येतेति।

टुप्— (न केवलं माषैः संबन्धः, किन्तु) सर्वसंपादिनी संख्या। कुतः ? चशब्दश्रवणात् [तिलाश्च माषाश्च तस्य इति]। चशब्दो माषाणां परः श्रूयमाणः द्रव्यान्तरसहितान् माषान् गमयति। यथा प्रकृतिप्रत्यययोः भिन्नार्थयोरपि सतोः पूर्वं प्रत्ययोच्चारणं यदि प्रकृतेः (सकाशात्) स्यात्, ततो न किञ्चित् प्रत्यायितं भवेत्। विशिष्टक्रमकौ तु तौ प्रत्याययतः, एवमिहापि (चशब्दः परस्तादेवोच्चार्यमाणः स्वार्थमर्थान्तरसंबन्धित्वेन प्रतिपादयति)। अपिच प्रथमाविभक्तियुक्तानि स्वार्थे एवोच्चार्यमाणानि सामानाधिकरण्यं प्रतिपद्यन्ते (तस्मात् चशब्दश्रुतेः सामानाधिकरण्याच्च मिथःसंयुक्तानां गवादीनां पश्चात् संख्यायोगः इति सर्वसंपादिनी संख्या)।

असंयोगाद् विधिश्रुतावेकजाताधिकारः स्यात्, श्रुत्याकोपात् क्रतोः । ४३ ॥

भाष्यम्— नैतदस्ति सर्वसंपादनीया संख्येति । असंयोगात् विधिश्रुतौ, सर्वसंपादने संबन्धो नास्ति । न श्रूयते गवादिराशेः संख्या भवतीति । न गवादिराशिः शब्देन निर्दिश्यते, यः सर्वनाम्ना प्रतिनिर्दिश्येत । गवादयस्तु शब्देनोक्ताः । तेन ते सर्वनाम्ना प्रतिनिर्देशमर्हन्ति । न चात्र गवादीनां प्राधान्यमित्युक्तम् । दाक्षिण्येन हि संख्या संबध्यते, इति संख्याविशेषणं सर्वनामशब्दः संख्यां विशेष्टुमुपादीयते । तत्रैकवचनं विवक्षितमेव । तत्रैषां नानाजातीयानां निर्दिष्टानाम् अन्यतममेकं प्रति निर्देशेन संख्याविशेषणमुपादीयते । तस्मान्नानाजातीयानां निर्दिष्टानामेकं स्यात् । स एकजातीय एव भवति । तस्मात् एकजाताधिकारः इति सूत्रितम् । किमेवं भविष्यति ? एवमेकश्रुतिर्न कोपिता भविष्यति । इतरथा वाक्येन द्रव्यस्य भवन्ती प्रवृत्तिविशेषमकुर्वती, अप्रवृत्तिविशेषकरी प्रकरणवशेन क्रतोः कल्पिता भविष्यति, तस्य क्रतोर्द्वादशशतं दक्षिणा, इति । तस्मादेकजातीयस्य द्वादशशतं दक्षिणेति ।

टुप्— एकेन (द्रव्येण) संख्या संबध्यते । कुतः ? संख्या दक्षिणां प्रति विधीयते, गवादयस्तच्छब्दश्च । ततः किम् ? तस्यशब्देन प्रकृतं (द्रव्यं संख्याविशेषणतया) संबद्धमेकजातीयम् , एकसंख्याविशिष्टम् (द्रव्यम्) दक्षिणां प्रति विधीयते । तेन द्वादशशतसंख्याविशिष्टमेकसंख्याकम् (कृत्वा दक्षिणायाम्) ग्रहीतव्यम् । न च गवादीनां वस्त्वन्तरभूतं किञ्चिद्विद्यते, यत् सर्वनाम्ना प्रतिनिर्दिश्येत । ननु विद्यते एव समुदायः । भवत्वसौ वस्तुतः, तथापि न गवादीनां समुदायः शब्देनोच्यते गवादिशब्दव्यतिरिक्तेन, यः सर्वनाम्ना प्रतिनिर्दिश्येत । (तस्मात् गवादीनामेव परामर्शः, तत्रापि नियमो वक्तव्यः । तत्र महोपकारत्वात् अप्रतिषिद्धत्वात् मुख्यत्वाच्च गवामेव परामर्शः इति तासामेव संख्या) ।

शब्दार्थश्चापि लोकवत् । ४४ ॥

भाष्यम्— अपिच लोकवदेतद् द्रष्टव्यम् । लोके हि निर्विशेषिते संख्याशब्दे उच्चरिते, एकजातीये प्रत्ययो भवति । कुतः ? अन्यथा व्यवहारानुपपत्तेः । असति एकस्मिन् जातिविशेषे, सर्वत्रान्यैः सह परार्धसंख्या निविष्टा । परार्धस्य च अवान्तरसंख्याभिः संव्यवहारः क्रियते । येषामेकेन केनचित् संबन्धः, तेषां तमेकं संबन्धिनमपेक्ष्य संख्या निविशते । स तत्रैकः संबन्धी वक्तव्यः, प्रकृतो वा ग्रहीतव्यः । अर्थाद्वा य आपद्येत, स उपादेयः । इह च प्रकृता नानाजातीयाः । तेषामन्यतमः संख्यया संबद्धः स्यादिति । यथा शतमाभ्यां दीयतामिति, एकजातीयानां शतम्, न भिन्नजातीयानाम् । यथा द्रव्यं गुणः कर्म अवयव इत्येवमादीनाम् ।

सा पशूनामुत्पत्तितो विभागात् । ४५ ॥

भाष्यम्— एकजातीयस्य संख्या इत्येतत् समधिगतम् । सा पशूनाम्, उत माषाणामिति । अनियमे प्राप्ते, उच्यते । सा पशूनामिति । कुतः? उत्पत्तितो विभागात् । औत्पत्तिकेन विभागेन पशवः संव्यवहारेषु संख्यायन्ते । पञ्चभिरश्वैः क्रीतः, पञ्चभिर्गोभिः क्रीत इति । न व्रीह्यादीनाम् औत्पत्तिकेन विभागेन संव्यवहारेषु संख्या संकीर्त्यते । निगदाभिप्राया मानाभिप्राया वा भवति । नहि भवति पञ्चभिर्माषैः क्रीत इति । पञ्चभिर्माषाणामाढकैर्द्रोणैर्वा कुडवैर्वा खारीभिर्वेति भवति । तत्र, आढकादिभिरनुच्चार्यमाणैः साकाङ्क्षमेव वाक्यमपरिपूर्णमप्रमाणम् अर्थस्य कस्य चित् । अथ माषाणामपि औत्पत्तिकेन विभागेन कस्मादिह परिक्रयो न क्रियते इति । अत्रोच्यते । मूल्यस्य सतः परिक्रये विशेष उच्यते, द्वादशशतं दक्षिणेति । न च द्वादशशतं व्रीह्यादिबीजानां भृतित्वेन ऋत्विजाम् अवकल्पते । त्रिभिः प्रकारैर्भृतिर्भवति, व्यापारतः फलतो वचनत इति । व्यापारतस्तावन्न माषबीजानां द्वादशशतं भृतिः । कर्म कुर्वाणा हि कर्मकराः पादिकमपि अहर्लभन्ते । फलानुरूप्यं नैव ज्ञायते । वचनं तु भृतौ सत्यां परिमाणविशेषपरं भवति । यत्र हि पादिकमपि अहर्न लभ्यते, न सा दक्षिणा भवति । नहि सा तस्मिन् कर्मणि दक्षं करोति । स्नेहाद्वा अन्येन वा प्रकारेण कृत्स्नमहः कर्म कुर्यात्, न व्रीहीणां द्वादशशतेन प्रोत्साहितः । आह । यः कश्चित् कस्यां चिदवस्थायां

व्रीहीणां द्वादशशतेन प्रोत्साह्यते, तस्य किं सा दक्षिणा भवेत्। **नेति ब्रूमः**। दक्षकरणी हि दक्षिणा। दक्षश्च बलम्। या नाशितंभवं करोति, नासौ बलकरणी। तस्माद्या नाशितंभवा, नासौ दक्षिणा। आशितंभवाया आधिक्यं वचनस्य विषयः। **आह**। व्रीहिबीजानामपि द्वादशशतं यां च यावतीं बलमात्रां करोति। **अत्रोच्यते**। आपेक्षिकमिदं बलं नाम। स एव हि पुरुषः कं चित् प्रति बलीयान्, कं चित् प्रति अबलः। तत्र यावदाशितंभवं नास्ति, तावदबलता। बलवत्तरो हि आशितेन भवतीत्याशितंभवादूर्ध्वं बलकरणम्। तस्मादाशितंभवं यत् द्रव्यम्, सा भृतिः, सा दक्षिणा। ततोऽधिकं दक्षिणात्वे सिद्धे वचनप्रामाण्याद्भवति। विकृतौ ऋतपेये वचनप्रामाण्यात् अल्पबलकरणमपि दक्षिणायाः स्थाने विधीयते सोमचमसः। स आश्रयात् सिध्यति। पशवस्तु सर्वे मुख्यबलकरणे समर्थाः। तेषु सत्सु न व्रीह्यादिबीजानि संख्यया संभन्त्स्यन्ते इति।

अनियमोऽविशेषात्। ४६॥

भाष्यम्— यदा पशूनां द्वादशशतम्, तदा अनियमः, गवादीनामन्यतमस्य कस्य चित् द्वादशशतम्। एवमनियमे लाघवं भविष्यति, प्रयोगप्राशुभावश्च। तत्र अधिकारशास्त्रं महाविषयं भविष्यतीति।

भागित्वाद्वा गवां स्यात्। ४७॥

भाष्यम्— वाशब्दः अनियमं व्यावर्तयति। गवां द्वादशशतं स्यात्। कुतः? भागित्वात्। भागवत्यो हि गावो महाभागाः। महत्युपकारे वर्तन्ते इत्यर्थः। एवमृत्विजामुपकारभूयस्त्वं भविष्यति। ऋत्विजां चोपकारः कर्तव्यः। महत्तमे हि ते उपकारे वर्तन्ते। उपकुर्वतां चोपकर्तव्यमिति सदाचारः। एवं सदाचारोऽनुगृहीतो भविष्यति, यदि महाभागानां भूयसी संख्या दीयते। गावश्च महाभागाः। तस्मात्तासां द्वादशशतम्। अश्वा उपकारकतरा भवेयुः, यद्येषां दानप्रतिग्रहविक्रया न प्रतिषिध्येरन्। ‘न केसरिणो ददाति, नोभयतोदतः प्रतिगृह्णाति’ इति श्रुतिः। स्मर्यते च ‘नाश्वं विक्रीणीते’ इति। तस्मात् द्वादशशतं गवां स्यात्।

प्रत्ययात्। ४८॥

भाष्यम्— अतश्च गवां संख्या। कुतः। प्रत्ययात्। संख्यासंपादनार्थमुपादीयमानेषु प्रकृतेषु ग्रन्थेनोपायेन स्मर्यमाणेषु पूर्वं गावः प्रतीयन्ते। अतस्ताः संख्यया संबध्यन्ते। न च तत्र विरोधः कश्चिदस्ति। गोषु संबद्धासु न पुनरश्वादयः संबध्यन्ते। एकजातीयो हि संबद्धव्यः। स च संबद्ध इति। तस्माद्गवां संख्या।

लिङ्गदर्शनाच्च। ४९॥

भाष्यम्— लिङ्गं खल्वेतमर्थं दर्शयति। किं लिङ्गं भवति? एवमाह ‘सहस्रं दक्षिणाः, सहस्रं स्तोत्रीयाः, यावदस्य सहस्रस्योत्तराधरा गौर्गवि प्रतिष्ठिता; तावदस्माल्लोकादसौ लोकः’ इति गाः प्राप्ता दर्शयति। तथा ‘तां वा एतां शबलीं समामनन्ति। इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतिरदिति सरस्वति महि विश्रुति, एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं कृतात्’ इदि गवामेतानि नामानि। सहस्रतमीं च दक्षिणामेवमाह ‘एतानि ते नामानि’ इति। यदि सा गौः, एवमेतदवकल्पते। तस्मादपि गवां संख्येति। (अत्र कलिकातामुद्रितयोः शाबरभाष्यपुस्तकयोः ४५–४९ सूत्रैः पृथगधिकरणं स्वीकृतम्, सुबोधिनीवृत्तौ च ४५ सूत्रेण द्वादशम्, ४६–४९ सूत्रैश्च त्रयोदशमधिकरणं स्वीकृतम्। तन्न युक्तम्। द्रव्यविधिसूत्रस्यैव अधिकरणादौ विद्यमानात् संशयभाष्यात् ३९–४९ सूत्रैरेकाधिकरणस्यैव स्पष्टं समवबोधात्। एतेन एतदधिकरणविस्तरस्था दाधीचशिवदत्तशर्मटिप्पण्यपि प्रत्युक्ता वेदितव्या। **के.**)।

सोम— यदि आनतौ आधिक्याभावात् वासोवत्से अभिघारणनिवृत्तिः, तर्हि तदाधिक्यबलात् प्रतिद्रव्यं द्वादशसंख्याऽन्वयः इत्युत्थितेः **संगतिः** इत्याहुः। **सूत्रार्थस्तु**- गवादिद्रव्यविधिसंनिधौ श्रूयमाणा संख्या तेषां प्रत्येकं स्यात्, संख्याया गुणत्वात् इति।

वि— ‘दक्षिणा द्वादशशतं तस्येत्येतद् गवादिषु। सर्वेषु केषुचिद्वाऽऽद्ये प्रत्येकं मिलितेषु वा॥, संख्यागुणस्य प्रत्येकं गवाद्यन्वयतोऽग्रिमः। वाक्यभेदान्न तत् किन्तु मिलितेषु समुच्चयः॥ संख्यानौचित्यतो धान्ये सर्वेषां न समुच्चयः। असर्वेष्विति पक्षेऽपि पशवो वैकमेव वा॥

संख्यौचित्येन पशवो नैतत् तस्येत्यनन्वयात् । एकत्वेऽप्यत्र यत्किञ्चिन्माषा वा गाव एव वा ॥ यत्किञ्चिन्नियमाभावान्माषाः सन्ति हि, तत्त्वतः । माषा निराकृता गावः प्राथम्याच्चोपकारतः ॥ तस्येतिवाक्याद् गोद्रव्यं न युक्तः प्रकृतः क्रतुः । संख्याऽन्तरं चेद् विकृतौ स्याद् गवां बाध्यतामियम् ॥ ' विकृतिषु यत्र गोदक्षिणायाः संख्याऽन्तरं श्रुतम्, तत्र अस्याः संख्यायाः बाधो **विचारफलम्** ।

भाट्ट— ज्योतिष्टोमे ' गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा ' इति श्रुतम् । तत्र द्वादशशतसंख्या कुत्र निविशते इति चिन्तायाम् ' ऋत्विग्भ्यो दक्षिणां ददाति ' इत्यनेन विहितं दक्षिणादानमनूद्य ' तस्य द्वादशशतम् ' इत्यनेन तच्छब्दोपस्थापितगवादिसर्वद्रव्योद्देशेन ' पयो व्रतं ब्राह्मणस्य ' इतिवत् द्वादशशतसंख्याविधानात् उद्देश्यसाहित्यस्य चाविवक्षितत्वात् प्रत्येकं सर्वद्रव्येषु निवेशः । गवादिद्रव्याणां च दक्षिणात्वम् ' गौश्चाश्वश्च ' इतिवाक्ये दक्षिणापदानुषङ्गेण बोध्यम् । यद्यपि च **तन्त्ररत्नकारो**क्तरीत्या छान्दोग्यस्थम् ' गौश्चाश्वश्च ' इति वाक्यम् ' तस्य नवतिशतम् (१९०) स्तोत्रीयाः ' इत्येतदर्थवादान्तर्गततया अन्यपरत्वावसायात् न गवादीनां दक्षिणात्वविधायकम्, तथापि आध्वर्यवे अनन्यशेषतया समाम्नातेन ईदृशेनैव षोडशद्रव्ययुक्तवाक्येन (उक्तवाक्ये पञ्चदशैव सन्ति) गवादिविधानं द्रष्टव्यम् । अथवा अस्तु दक्षिणादानानुवादेनैव संख्याविधिः, तस्याश्च सर्वेष्वेव 'वारणो यज्ञावचरः' इतिवत् दक्षिणाद्रव्येषु निवेशः । ' तस्य ' इति प्रकरणप्राप्तक्रतुसंबन्धानुवादकमिति **प्रथमः पक्षः** । **द्वितीयस्तु** न तावत् दक्षिणोद्देशेन संख्याविधिः, तस्येत्यस्य वैयर्थ्यापत्तेः । नापि द्रव्योद्देशेन, द्रव्याणां बहुत्वेन बहुवचनापत्तेः । पक्षद्वयेऽपि ' गौश्चाश्वश्च ' इत्यनेन दक्षिणापदानुषङ्गेण गवादीनां दक्षिणात्वविधाने वाक्यभेदापत्तेश्च । तद्वरमेकवाक्यत्वाभ्युपगमेन गवादिद्रव्याणि द्वादशशतसंख्या चेत्युभयविशिष्टदक्षिणादानविधानम् । ' ऋत्विग्भ्यो दक्षिणां ददाति ' इत्यनेन च ऋत्विगुद्देशेन विनियोगः । ततश्च संख्यायाः पार्ष्ठिकान्वयवेलायां द्रव्यवृत्तित्वबोधे समुच्चितानामेव द्रव्याणां चशब्दयोगेन दक्षिणादाने करणत्वप्रतीतेः समुच्चितद्रव्यवृत्तित्वावसायात् सर्वसंपाद्या संख्येति पक्षः । एवं सति तस्येत्येकवचनान्तपदवैयर्थ्यापत्तेः एकद्रव्यवृत्तित्वविशिष्टा संख्या गवादिसमुच्चितद्रव्याणि चेत्युभयविशिष्टदक्षिणादानविधानावगतेः एकद्रव्यवृत्तित्वमेव तस्याः । अत एव तस्येत्येकवचनं गवादिद्रव्यसमाहाराभिप्रायमित्यपि **अपास्तम्**, समाहारवृत्तित्वस्य न्यायादेव प्राप्तौ तस्येत्यस्य वैयर्थ्यापत्तेः, समाहारस्य अशाब्दत्वेन परामर्शानुपपत्तेश्च । षष्ठ्यन्तस्य प्राचां मते सुबन्तान्वयव्युत्पत्तेश्च न संख्याऽन्वयविरोधः । स्वमते तु पार्ष्ठिकः, पदद्वये लक्षणया वा संख्याऽन्वयो बोध्यः । तदपि चैकं द्रव्यम् आनन्तर्यान्माषा एवेति **तृतीयः** । माषादिधान्यानां लोके आढकादिपरिमाणान्तरापेक्षयैव संख्याव्यवहारदर्शनात् तावताऽपि भृतित्वाभावाच्च पशुरूपद्रव्यस्यैव तच्छब्देन परामर्शावगतेः तत्रापि मौल्याधिक्यात् अश्वानामेवेति **चतुर्थः** । **सिद्धान्तस्तु**– ' न केसरिणो ददाति ' इत्यनारभ्याधीतवचनेन लौकिकाश्वदानवत् सामान्यतो विहितेऽपि यत्राश्वविषये स्वेच्छाप्रवृत्तिः, तत्रापि निषेधावगतेः, अस्य चानिषिद्धगवादिविषयत्वेनाप्युपपत्तेः, अस्य महोपकारकमुख्यगोमात्रविषयत्वमेव । अत एवैकोऽश्वादिर्देय एव । अजादयस्तु कपिञ्जलाधिकरणन्यायेन त्रयः । माषादीनां परिमाणं प्रमाणान्तरात् स्वेच्छया वा अवधेयम् । सर्वथा गवामेव द्वादशशतम् । अत एव विकृतौ तद्बाधिकायां सहस्रसंख्यायाम् ' यावदष्टसहस्रस्य गौः ' इति निर्देशोऽपि संगच्छते । अत एव सहस्रादीनां गोवृत्तिसंख्याबाधकत्वस्यैव सिद्धेरध्यायसंगतिरपि संगच्छते ।

मण्डन— ' शतं गवामेव तु दक्षिणासु । '

शंकर–– ' स्याद् द्वादशशतं गवाम् । '

* ज्योतिष्टोमे दधिग्रहो नित्यः । दधिग्रहाधिकरणम् । **भा.** ४।४।५।८–११. * ज्योतिष्टोमे दर्शपूर्णमासविकारेषु यजमानमन्त्राणामतिदेशः । **संकर्ष.** २।२।४. * ज्योतिष्टोमे ' दशापवित्रेण ग्रहं संमार्ष्टि ' अयं संमार्गः ग्रहेष्वेव, न चमसेषु प्रसज्यते । **भा.** ३।१।८।१६–१७, * ज्योति-

ष्टोमे ‘ दशापवित्रेण ग्रहं संमार्ष्टि ’ इति । तत्र सर्वेषामेव ग्रहाणां संमार्जनं कर्तव्यं नैकस्यैव । ग्रहम् इत्येकत्वमविवक्षितम् । ३।१।७।१३–१५. * ज्योतिष्टोमे दिग्विभागः श्रुतः प्राचीनवंशविधेः अर्थवादः । वि. ३।४।६, * ज्योतिष्टोमे दीक्षणीयाऽऽदीष्टीनाम् आदौ आरम्भणीयेष्टिर्न कर्तव्या, आरम्भाख्यद्वारलोपात् । १०।१।२.

ज्योतिष्टोमे दीक्षणीयेष्ट्या दीक्षासिद्धिः, न तु दण्डादिमात्रेण, अतः दीक्षणीयाऽन्ते दीक्षितधर्मानुष्ठानम् ॥

परेणावेदनाद् दीक्षितः स्यात्, सर्वैर्दीक्षाऽभिसंबन्धात् । ५।३।११।२९॥

भाष्यम्-- ज्योतिष्टोमे श्रूयते ‘ आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः ’ इति । तथा ‘ दण्डेन दीक्षयति, मेखलया दीक्षयति, कृष्णाजिनेन दीक्षयति ’ इत्येवमादि । तत्र संदेहः किं सर्वैर्दीक्षितो भवति, अथवा इष्ट्यन्ते दीक्षितः इति । किं तावत् प्राप्तम् ? सर्वैरिति । कुतः? दीक्षाऽभिसंबन्धात् । दीक्षासंबन्धो भवति, दण्डेन दीक्षयति, दीक्षामस्य करोतीत्यर्थः । यदीष्ट्यन्ते दीक्षितः स्यात् कथमस्य दण्डेन दीक्षां कुर्यात् । तेन इष्ट्या न दीक्षितः । न चास्य इष्ट्यन्ते दीक्षितशब्दं पश्यामः । आवेदने तु तस्य दीक्षितशब्दः । तस्मान्न तावति दीक्षितः स्यात् । न च संभवति समुच्चये विकल्पो न्याय्यः । पक्षे बाधः स्यात् । तत्र प्रयोगवचनो बाध्येत । तस्माद्भिन्नेष्वपि दीक्षासंबन्धवाक्येषु प्रयोगवचनेन सह एकवाक्यता इत्यावेदनकाले दीक्षितः स्यात् ।

टुप्-- ‘दण्डेन दीक्षयति’ दण्डेन दीक्षां निर्वर्तयति इति (तृतीयानिर्देशात्) दीक्षाऽर्थः (दण्डः) । आग्नावैष्णवोऽपि वाक्येन (दीक्षिष्यमाणपदसमभिव्याहारेण दीक्षाऽर्थः । तस्मात् सर्वान्ते दीक्षितः) । यदि हि आग्नावैष्णवेन दीक्षितः स्यात् (ततः) ‘दण्डेन दीक्षयति’ इति नोच्येत । तस्मात् न स तावता दीक्षितः (किन्तु सर्वान्ते) । न च (दण्डादीनां) विकल्पः । (कुतः ?) दीक्षितत्वं नाम न दृष्टम् । तत्र यावत् (साधनम्) आम्नायते, तावता दीक्षितो भवति (नैकदेशेन) । आह, करणविभक्तिनिर्देशात् इतरेतरनिरपेक्षाणां दीक्षाकरणता अवगम्यते यथा व्रीहीणां (यवनिरपेक्षाणां पुरोडाशकरणता) । तेषां (व्रीहीणां) दृष्टोपकारित्वात् विकल्प इति चेत् तन्न, व्रीहियवसमुच्चयेन (अपि) शक्यते पुरोडाशो निर्वर्तयितुम् । (तेन दृष्टोपकारित्वं विकल्पे कारणम् । किं तर्हि ?) करणविभक्तिस्तु यवनिरपेक्षाणां पुरोडाशप्रकृतिद्रव्यत्वं प्रतिपादयति । सा बाध्येत समुच्चये (सति, इति विकल्पः) । एवमिहापि (दण्डादीनां प्रत्येकं करणविभक्तिनिर्देशात् विकल्पः स्यात्) । उच्यते (विषम उपन्यासः) । अत्र पुरोडाशप्रकृति– (द्रव्य–) त्वेन एकं (प्रकृति–) द्रव्यम् आकाङ्क्षितम् । तस्य (व्रीहिभिः इति) करणविभक्त्या नियतता कृता (व्रीहिभिरेव यवैरेव वा इति) । दण्डादीनां तु अनवगतं तादर्थ्यम् (दण्डेन इत्याद्यया) करणविभक्त्या (अपूर्वम्) क्रियते । तच्च तादर्थ्यम् अदृष्टविषयमिति सर्वैः क्रियते । (तथापि कथं समुच्चयः, तत्राह–) अतः प्रयोगवचनेन सर्वे उपसंह्रियन्ते (समुच्चिताः) ।

इष्ट्यन्ते वा, तदर्था ह्यविशेषार्थसंबन्धात् । ३० ॥

भाष्यम्-- इष्ट्यन्ते वा दीक्षितः स्यात् । तदर्था हि सा, दीक्षाऽर्था । कथम् ? दीक्षिष्यमाणस्य अदीक्षितस्य सा भवति । यदि तस्या उत्तरकाले दीक्षितः, एवं सा दीक्षिष्यमाणस्य । तस्माद्वाक्यादवगम्यते भवति तदा दीक्षितः इति । दीक्षाकारणे पदार्थे निर्वृत्ते किमिति न दीक्षितः स्यात् । वाक्यं हि निरपेक्षं दीक्षितः इति ज्ञापयति । यत्तु दीक्षासंबन्धो दण्डेन दीक्षयतीति, कथं स दीक्षितत्वे स्यादिति । दण्डेनैनं दीक्षितं संपादयतीत्यवगच्छामः । यत्तु, अनन्तरं दीक्षितशब्दो नास्तीति, न शब्दस्य अप्रयोगः अर्थाभावे हेतुः । सत्यपि अर्थे तदवसराभावान्न प्रयुज्यते शब्दः । अन्येन च दीक्षितः इत्यवगम्यते वाक्येन ‘ आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः ’ इति । यच्च आवेदनकाले दीक्षितशब्द इति, इष्ट्यन्तेऽपि दीक्षितस्यासौ अविरुद्धः । प्रयोगवचनश्च अविरुद्धः । यतः एकं दीक्षाकारणमन्यैर्दीक्षितं संपादयति इति गम्यते ।

टुप्-- दीक्षितत्वं नाम संस्कारः । संस्कारश्च क्रियाजन्यः । न च दण्डादीनां क्रियात्वम् । अथोच्येत, क्रियां साधयन्तो दण्डादयः संस्कारार्थाः (भवन्तु । उत्तरमाह-) समर्पणादिकायाः क्रियायाः अश्रवणात् न ज्ञायते कां क्रियां साधयन्तः संस्कारार्थतां प्रतिपद्यन्ते (दण्डादयः इति) । अतो द्रव्यरूपत्वात् (क्रियारूपाज्ञानात्) अनध्यवसानमेव (वाक्यार्थस्य) स्यात् । (किञ्च) दीक्षिष्यमाणः इति यो दीक्षामाप्तुमिच्छति, तस्य दीक्षणीया उपायत्वेन विधीयते (नान्यथा) । यथा स्वर्गस्य अग्निहोत्रम् । (समाख्यानं च तद्वत् इति सूत्रार्थमाह-) यदि च अनयैव दीक्षा क्रियते, ततः अस्याः (दीक्षणीया इति) समाख्या युज्यते (नान्यथा) । तस्मात् (निरपेक्ष-) वाक्यसंयोगात् (समाख्यानाच्च) दीक्षणीययैव दीक्षितत्वं जन्यते । (इष्ट्यन्ते वा इति सूत्रार्थं संक्षिपन् लक्षणसंबन्धं चिन्तायाः दर्शयति-) इष्ट्यन्ते अग्निहोत्रादीनि न कार्याणि इत्ययं क्रमलक्षणसंबन्धः ।

समाख्यानं च तद्वत् । ३१ ॥

भाष्यम्-- इतश्च पश्यामः इष्टिर्दीक्षणार्था, इष्ट्यन्ते च प्रवृत्तिरिति । कस्मात् ? समाख्यानं च तद्वदिति यद्वत् न्याय उपदिष्टः । कथम् ? दीक्षणीयेति तादर्थ्यकरी समाख्या भवति यथा स्नानीयम्, भोजनीयं चेति । तस्माच्च पश्यामः इष्टिर्दीक्षणार्था, इष्ट्यन्ते च प्रवृत्तिरिति ।

शा-- ‘ निरपेक्षैव वाक्येन दीक्षाऽर्थेष्टिर्विधीयते । दण्डादित्वक्रियारूपं (दण्डादि तु अक्रियारूपं इति पदच्छेदः) तद्व्यञ्जनतयोच्यते ॥ ’(इति सिद्धान्तः) ।

सोम—यथा चयनमात्रात् नाग्निचित्त्वम् एवमिष्टिमात्रात् न दीक्षितत्वमिति प्रत्यवस्थानात् संगतिः । सूत्रार्थस्तु- सर्वैः इष्टिदण्डादिभिः दीक्षाऽभिसंबन्धात् आवेदनात् परेण आवेदनादनन्तरं दीक्षितः स्यात् । ‘ एनपा द्वितीया ’ (पा० २।३।३१) इत्यत्र ‘ पञ्चम्यपि दृश्यते ’ इति वक्तव्यं कल्पयित्वा ‘ परेण आवेदनात् ’ इति प्रयोगः समर्थनीयः इति तन्त्ररत्ने । प्रयोजनं तु- दीक्षामात्रनिर्वृत्त्यैव दीक्षितधर्माः प्रवर्तेरन् इति पूर्वपक्षे । दण्डादिसर्वान्ते दीक्षितधर्माः इति सिद्धान्ते इति ।

वि-- ‘ इष्टिदण्डादिभिर्दीक्षा किं वेष्ट्यैवो, क्तितोऽग्रिमः । , (किंवा इष्ट्यैव इत्यन्तेन संशयः । उक्तितोऽग्रिमः इति पूर्वः पक्षः) । युक्तः संस्कार इष्ट्यैत्र दण्डादेर्व्यञ्जकत्वतः ॥ ’

भाट्ट-- ‘ आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणः’ इति दीक्षणीयेष्टेस्तावद्दीक्षाऽर्थत्वं लट्प्रत्ययस्य क्रियाऽर्थायां क्रियायामुपपदे विहितस्य श्रवणादवगम्यते । ‘ दण्डेन दीक्षयति , मेखलया दीक्षयति , कृष्णविषाणया दीक्षयति ’ इत्यादिना तृतीययैव दण्डादीनां दीक्षार्थत्वम् । न च दण्डादीनामभिव्यक्त्यर्थत्वम्, दीक्षाऽभिव्यक्तेरश्रुतत्वात् अनेकेषु दीक्षयतिपदेषु तल्लक्षणायां प्रमाणाभावाच्च । किञ्च अदृष्टरूपयमनियमपरिग्रहानुकूलयोग्यतारूपायाः दीक्षायाः अभिव्यक्तिर्न तावदनुमित्यात्मिका, दण्डादीनां व्यभिचरितत्वात् । नापि स्मरणात्मिका, संबन्धित्वस्य प्रागज्ञानात् । अस्तु वा दीक्षणीयाया एव दीक्षोत्पादकत्वम्, तथापि न तदन्ते दीक्षितधर्मा यमनियमादयः । तत्र ‘ दीक्षितोऽसि , दीक्षितवादं वद , सत्यमेव वद माऽनृतम् ’ इत्याद्यावेदनप्रेषणदण्डादिदानोत्तरमेव यमनियमपरिग्रहविधानात् । इतरथा आवेदनस्य अदृष्टार्थत्वापत्तेः । अत एव यमनियमपरिग्रह एव दीक्षेति पार्थसारथिलेखनमप्यपास्तम् । आवेदनप्रैषे दीक्षासंबन्धोत्तरकालं यमनियमपरिग्रहाभिधानात् स्वयमेव दीक्षाया अदृष्टरूपत्वाभिधानाच्च । अतो दण्डादीनामपि दीक्षाऽर्थत्वात् सर्वान्ते सा । न चैवं नैरपेक्ष्यश्रवणात् विकल्पापत्तिः, अदृष्टार्थतया एकप्रयोगविधिपरिग्रहेण समुच्चयावगतौ अवान्तरकार्ये नैरपेक्ष्योपपत्तेः । इति प्राप्ते, दीक्षणीयावाक्ये ‘ दीक्षिष्यमाणः ’ इति लट्प्रत्ययश्रवणेन तस्या दीक्षाऽर्थत्वं तावदवगतम् । दण्डादीनां हि णिजन्तदीक्षयतिपदश्रवणान्न दीक्षाऽर्थत्वमवगम्यते, अपितु तदनुकूलव्यापारार्थत्वमेव प्रथममवगम्यते, पश्चात्तु तत्संबन्धात् प्रयोज्यव्यापाररूपदीक्षाऽर्थत्वं दण्डेन घटं कारयतीत्यादिवत् कथञ्चित्कल्प्येत । न च शीघ्रावगतदीक्षणीययैव कृतार्थत्वात् न दीक्षायाः दण्डादिजन्यत्वकल्पना-

ऽवसरः । सिद्धरूपत्वाच्च दण्डादीनां न क्रियाव्याप्यत्वज्ञानमन्तरेण दीक्षाऽर्थत्वज्ञानसंभवः । **न च** प्रथमावगतप्रयोजकव्यापारार्थत्वमेव 'वचसैव कारयति' इत्यादिवत् तर्ह्यस्तु इति **वाच्यम्** । तथात्वे साक्षाद्दीक्षणीयाऽर्थत्वाङ्गीकारे अदृष्टार्थत्वापत्तेः । तद्वरं दीक्षायाः फलीभूतयमनियमपरिग्रहोपयोगिदीक्षितत्वज्ञानजनकतयैव दीक्षणीयाऽर्थत्वं दीक्षाऽर्थत्वमेव वा अङ्गीकर्तुमुचितम्, 'अगन्म' इति मन्त्रस्य यागफलप्रकाशकतया यागाङ्गत्वमिव । अत एव परम्परासंबन्धस्य संबन्धिविधयैव बोधोपपत्तेर्न लक्षणाऽपि । ज्ञानजनकत्वं च स्मारकविधया । संबन्धस्य च मानान्तरादनवगमेऽपि विध्यन्यथाऽनुपपत्त्यैवावगमात् स्मारकत्वोपपत्तिः । तत्तद्विध्यन्तरैरेव च दण्डादीनां धारणकण्डूयनादिरूपक्रियाविधानात् नाक्रियाऽऽविष्टानां स्मारकत्वसंभव इति शङ्कनीयम् । अत एव तत्तत्क्रियाऽर्थानामपि एषां दीक्षाऽभिव्यञ्जकत्वमपि आनुषङ्गिकम् । अत एव दण्डादीनां दीक्षाऽभिव्यक्तौ समुच्चयः । अत इष्ट्यन्ते एव दीक्षा, तदन्ते एव दीक्षितधर्माः 'दीक्षितो न जुहोति, न दीक्षितस्यान्नमश्नीयात्' इत्यादयः । **न चैवम्** आवेदनवैयर्थ्यमभिव्यक्तिवैयर्थ्यं चेति **वाच्यम्** । तद्विध्याम्नानबलेन तत्प्रैषपठितधर्माणामेव तदुत्तरत्वप्रतीतेः ।

मण्डन—'दीक्षितो दीक्षणीयाऽन्ते ।'

शंकर—'इष्ट्यन्ते दीक्षितस्य ते ।' धर्माः ।

* ज्योतिष्टोमे दीक्षा अपर्वणि कर्तव्या, सुत्या पर्वणि । अङ्गगुणविरोधन्यायः । भा. १२।२।९।२५, * ज्योतिष्टोमे दीक्षा दक्षिणाश्च प्रधानार्था एव । दीक्षादक्षिणन्यायः । ३।७।५।११. * ज्योतिष्टोमे दीक्षासु पावनमन्त्रेषु अन्यतराकाङ्क्षया अनुषङ्गेण पूरणम् । वि. २।१।१७. * ज्योतिष्टोमे 'दीक्षासु यूपं छिनत्ति क्रीते वा राजनि' । भा. ११।३।३।३, * ज्योतिष्टोमे दीक्षासु यूपमात्रापकर्षः । ५।१।१४।२७, * ज्योतिष्टोमे दीक्षाकालं रात्रिजागरणमाम्नातम् । तत् यज्ञाङ्गानां रक्षणाय अप्रमादार्थं किंवा अदृष्टार्थम् । १२।१।८।१७.

❀ **ज्योतिष्टोमे दीक्षापरिमाणविचारः** । अत्र कुतूहलम् । भाष्यकारोक्तरीत्या द्वादशाहपरिमाणस्यैव ज्योतिष्टोमे नित्यत्वेन प्राप्तत्वे सिद्धान्तसूत्रमिदम् 'दीक्षापरिमाणे याथाकाम्यमविशेषात्' इति । प्रकरणाविशेषात् अन्यतमेन अन्यतमोत्कर्षासंभवात् दीक्षापरिमाणे याथाकाम्यं कामचारः स्यात् । सूत्रान्तरं च अधिकरणान्तरसिद्धान्तपरं व्याख्येयम् । तथाहि 'द्वादशाहस्तु लिङ्गात् स्यात्' द्वादशाहे किं दीक्षापरिमाणानां विकल्पः, किंवा द्वादश दीक्षा एव नियताः इति विशये प्रकृतिवत् विकल्पे प्राप्ते, ब्रूमः । लिङ्गात् द्वादशाहपरिमाणमेव स्यात् । तत्र हि एवं श्रूयते 'षट्त्रिंशदहो वा एष यद् द्वादशाहः' इति । द्वादशाहे उपसदः सुत्याश्च द्वादश । तद्यदि दीक्षाश्च द्वादश स्युः, तदा षट्त्रिंशत् इत्यनुवादोऽवकल्पेत । तस्मात् द्वादशाहपरिमाणमेव तत्र नियम्यते । तथा दीक्षाभिः इति दीक्षाबहुत्वमुक्त्वा तद्वाक्यशेषे 'द्वाभ्यां लोमावद्यति, द्वाभ्यां त्वचम्, द्वाभ्यामसृक्, द्वाभ्यां मांसम्, द्वाभ्यामस्थि, द्वाभ्यां मज्जानम्' इति षण्णां द्विकानाम् अनुक्रमणात् उपक्रमगतं बहुत्वं द्वादशत्वे व्यवस्थाप्यते ; तस्मात् द्वादशैव द्वादशाहे दीक्षा इति । **वस्तुतस्तु** द्वादशाहे 'द्वादश रात्रीर्दीक्षितः स्यात्' इति वचने जाग्रति पूर्वपक्षानुत्थितेः यथाभाष्यमेकाधिकरणतयैव व्याख्येयम् । **न च** प्रकृतौ द्वादशाहपरिमाणस्य नित्यत्वे 'द्वादश रात्रीः' इत्यतिदेशप्राप्तानुवादः, न वचनात् इति **वाच्यम्** । वार्तिककृन्मते प्रकृतौ विकल्पेन प्राप्तत्वात् द्वादशाहपरिमाणे नियमविधित्वात् । भाष्यकृन्मतेऽपि अत एव 'दीक्षाभिः' इत्यर्थवादार्थतया प्राप्तार्थकस्याप्यस्य विधित्वाविरोधात् । **न च** भाष्यकारमतमयुक्तमिति **वाच्यम्** । सत्यम् । यदि 'एका दीक्षा' इत्यादयोऽपि विधेयाः स्युः । तेषु हि न विधिः श्रूयते । किन्तु कल्प्यः । तत्रापि एकत्रैव कल्पयितुमुचिते नानेकत्र, वाक्यभेदप्रसङ्गात् । अतो 'द्वादश दीक्षाः' इत्यत्रैव स कल्प्यते । तथा सति वैश्वानरद्वादशकपालेषु अष्टत्वादिश्रवणवत् एकादिश्रवणानाम् अवयुत्यानुवादतया स्तावकत्वसंभवात् न एकादिवाक्ये स कल्प्यते, द्वादशत्वश्रवणानर्थक्यप्रसङ्गात् । अत एव 'एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते' इति वाक्ये 'त्रीन् वृणीते' इत्यत्रैव विधिः कल्प्यते इत्युक्तम् । ततश्च द्वादशाह-

परिमाणमेव नित्यम् इति भाष्यकारमतमनवद्यमित्याहुः। कल्पसूत्रेषु तु एकादिदीक्षाविधयः शाखाऽन्तरमूलकाः। इति। कु. ६।५।८।२८–२९.

* ज्योतिष्टोमे 'दीक्षितो न ददाति' इत्यादिवाक्यं पुरुषार्थदानादेः प्रतिषेधकं पर्युदासो वा। भा. १०।८।७।१२–१५.

⧗ ज्योतिष्टोमे दीक्षितस्य संकल्पितप्रयाणसमाप्तिपर्यन्तम् आदौ सकृदेव प्रयाणमन्त्रपाठः॥

प्रयाणे त्वाऽर्थनिर्वृत्तेः। ११।४।१८।५१॥

भाष्यम्––दीक्षितस्य प्रस्थितस्य प्रयाणमन्त्रः 'भद्रादभि श्रेयः प्रेहि' इति। तत्र विचार्यते किं विश्रामेविश्रामे पुनःपुनः प्रतिष्ठमानो मन्त्रं प्रयुञ्जीत, उत सकृदेव आदाविति। विशेषग्रहणात् प्रतिप्रस्थानम्। इति प्राप्ते, उच्यते। प्रयाणे तु आ अर्थनिर्वृत्तेः। अर्थमसावुद्दिश्य प्रतिष्ठते। आ अर्थनिर्वृत्तेः तस्य प्रस्थानाभिसंबन्धः। तस्मात् सकृदेव प्रयोक्तव्यः।

सोम––विशेषाशङ्कया उत्थानात् संगतिः। सूत्रे आ अर्थनिर्वृत्तेः इति च्छेदः।

वि–– 'प्रयाणे प्रत्यहं मन्त्रो भिन्नो नो वा, ऽत्र विश्रमैः। प्रयाणभेदाद् भिन्नो, नो गत्यैक्यादा निवृत्तितः॥' १९.

भाट्ट–– तत्रैव दीक्षितस्य यज्ञदेशतः भूतिवननप्रयाणार्थः 'भद्रादभि श्रेयः प्रेहि' इति मन्त्रोऽपि मध्येमध्ये विश्रम्य पुनःपुनः प्रयाणेऽपि नावर्तनीयः। अधिकाशङ्का तु पूर्वं स्वापादिभेदनिश्चयाभावात् युक्तं तन्त्रत्वम्, प्रकृते तु तन्निश्चयसत्त्वे भेदोऽस्त्विति।

मण्डन––'प्रयाणे च सकृन्मन्त्रः।' १९.

शंकर–– 'प्रयाणाङ्गं मनुस्तद्वत्।' सकृत्। १९.

* ज्योतिष्टोमे 'दीर्घसोमे संतृद्येत् धृत्यै' इति। अग्निष्टोमभिन्नेषु उक्थ्यादिषु अधिषवणफलकयोः संतर्दनं कार्यम्। अग्निष्टोमश्च न दीर्घसोमः। संतर्दनाधिकरणम्। वि. ३।३।१६, * ज्योतिष्टोमे 'देवमनुष्या दिशो व्यभजन्त' इत्ययं दिग्विभागः प्राचीनवंशस्तुतये अर्थवादः। ३।४।६, ज्योतिष्टोमे द्वादशोपसत्ता श्रुता अहीनस्यैव, न ज्योतिष्टोमस्य साह्नस्य। ३।३।१३.

⧗ ज्योतिष्टोमे द्वादशशतगोरूपदक्षिणा सदस्यसहितेभ्यः षोडशभ्यः ऋत्विग्भ्यो विभज्य देया॥

तत्र दानं विभागेन, प्रदानानां पृथक्त्वात्। १०।३।१२।५०॥

भाष्यम्— ज्योतिष्टोमे गवादयो दक्षिणा। तत्रैषोऽर्थः समधिगतः गवां संख्येति। अथेदानीमिदं संदिह्यते किं यस्य यावान् भाग आभजति, स्वयमेव यजमानेन विभज्य तस्य तावान् कल्पयितव्यः, उत परिषदैव विभज्यते इति। किं प्राप्तम् ? अनियमः, विभज्याविभज्य वा दातव्यम्। एतावद्धि श्रूयते दातव्यमिति। न विभज्याविभज्य वेति। तस्मादनियम इति। एवं प्राप्ते, ब्रूमः। विभज्य दातव्यमिति। दातव्यस्यैव तत् रूपं यत् सत्वपरित्यागेन परस्वत्वापादनम्। तच्च यजमानेन स्वयं कर्तव्यम्। तस्मात् स्वयं प्रयोगे स्यादिति। यो यस्यांश आभजति, स तस्मै अनिर्दिष्टो, न शक्यते तेन संबन्धयितुम्। तेन यस्तं निर्दिशति स दानमभिनिर्वर्तयति। यजमानेन च दानं निर्वर्तयितव्यम्। तस्मात् यजमानो विभज्य निर्दिशेत्। प्रदानानां पृथक्त्वात्। असति विभागे न शक्यः स्वेन भागेन संबन्धः कर्तुम्। तस्मात् विभज्य दक्षिणा दातव्येति।

टुप्— 'तत्र दानं विभागेन, प्रदानानां पृथक्त्वात्'। इदमपि (अधिकरणम्) उत्तरविवक्षाऽर्थम्। स्थिते एतस्मिन् विभागे नियमादयो भविष्यन्ति। (पूर्वपक्षमाह–) 'ऋत्विग्भ्यो दक्षिणां ददाति' इति सर्वविशेषणविशिष्टो ददातिर्विधीयते। ऋत्विग्भ्य इति चतुर्थ्यन्तः शब्दः। चतुर्थी च संप्रदाने। संप्रदानं च कारकम्। कारकं च क्रियायां गुणभूतम्। तत्र (गुणभूतानामृत्विज्ञां विवक्षितबहुसंख्यत्वात् सर्वप्रदानकमेकं दानं कर्तव्यमिति) अविभज्य दानं प्राप्नोति, विभागस्य अचोदितत्वात्। (अतश्च अनियमः इति)। उच्यते। ददातिरयम् (विधीयते)। ददातेश्च स्वस्वत्वनिवृत्तिः परस्वत्वापादनं च रूपम्। तेन एकैकं प्रति स्वस्वत्वनिवृत्तिः परस्वत्वापादनं च कर्तव्यम्। यदि समुदायमङ्गीकृत्य परित्यजेत्, तथा सति त्याग एव (केवलः) कृतो भवति, न ददातिः। तस्मात् विभज्य दानम्।

(एवं च ‘ तुथो वो विश्ववेदा विभजतु ’ इति मन्त्रवर्णो न पाक्षिको भवति । यत्र तु एकमेव द्रव्यं दक्षिणा, यथा ‘ धेनुर्दक्षिणा ’ इत्यादि, तत्र अविभज्यैव दानं गत्यभावात् । द्रव्यभेदे तु विभज्यैवेति) ।

परिक्रयाच्च लोकवत् । ५१ ॥

भाष्यम्-- अस्ति च परिक्रयार्थं दानम्, न धर्ममात्रम् । परिक्रयार्थं च भर्त्रा भृत्येन सह पणितव्यम् । यदि च परिषदं प्रति उच्येत, परिषच्च विभजेत, न स्वामिना सह अपणिष्यत । तत्र परिक्रय एव नाभविष्यत् । यथा लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तत्र काष्ठवाहाः स्वामिना सह पणन्ते । तेभ्यः स्वामी विभज्य निर्दिशति, इदं तुभ्यमिदं तुभ्यमिति । तद्वदिहापि द्रष्टव्यम् । तस्माद्विभज्य दक्षिणा दातव्येति ।

विभागं चापि दर्शयति । ५२ ॥

भाष्यम्-- अपिच दर्शयति विभागम्, यद् विभागाभिधायिनं मन्त्रमामनन्ति । ‘ तुथो वो विश्ववेदा विभजतु ’ इति । ‘ कृष्णाजिनेन वित्रास्य दक्षिणां ददाति ’ इति । तथा ‘ अग्नीधेऽग्रे ददाति, अग्निमुखानेव पितॄन् प्रीणाति । ब्रह्मणे ददाति, प्रस्तोतृभ्यो ददाति प्रसृत्यै । होत्रे ददाति । नेष्ट्रे ददाति । हविर्धाने आसीनेभ्य अध्वर्युभ्यो ददाति । उद्गातृभ्यो ददाति । अन्तःसदसि आसीनेभ्यो यथाश्रद्धं प्रासर्पकेभ्यो ददाति’ इति । एवं विभागदर्शनमुपपद्यते । तस्माद्विभज्य दातव्यमिति ।

शा-- ‘ **ऋत्विक्परिक्रयार्थेन दानमेतदिति स्थितम् (१०।२।८।२२-२८) । तेन तेषां प्रधानत्वाद् बहुत्वं न विवक्षितम् ॥** ’ अतः प्रतिप्रधानावृत्तेः एकैकस्यैव दानम् ।

सोम-- पूर्वत्रैव विशेषचिन्तनात् संगतिः । **सूत्रार्थस्तु**-- तत्र गवादिषु दानं विभागेन स्यात् प्रदानानाम् ऋत्विग्भ्यो देयानां विभागानां भिन्नत्वात् विभज्य दानं विना तेनतेन ऋत्विजा तस्यतस्य भागस्य संबन्धयितुमशक्यत्वात् इति । अत्र (मूले) परिषदः उद्देशेन क्रियमाणस्य दानत्वं मुख्यमेव अङ्गीकृत्य तस्य आनत्यर्थत्वम् ऋत्विगुपयोगक्षमत्वं विना न निर्वहति इति तन्निर्वाहाय प्रत्येकं दानमुपपादितम् । प्रभाकरैस्तु परोपकारक्षमत्वाभावेन परस्वत्वापत्तिपर्यन्तत्वाभावात् परिषदि दानं त्यागमात्रम्, न तु मुख्यं दानमित्युक्तम् ।

वि-- ‘ गोदाने विहिते स्वेच्छा नियतिर्वाऽन्तिमेऽपि किम् । अविभागो विभागो वा, नियमानुक्तितोऽग्रिमः । अविभागो बहुत्वोक्तेर्, बहुत्वं न विवक्षितम् । विभागे स्वामिभिः स्वत्वसिद्धेर्लिङ्गं च दृश्यते ॥ ’ ‘ तुथो वो विश्ववेदा विभजतु ’ इति मन्त्रे विभागलिङ्गम् । (भो गावः, वः युष्मान् तुथो नाम देवः विभजतु इति मन्त्रार्थः) ।

भाट्ट-- सेयं दक्षिणा ऋत्विग्भ्यो दीयमाना विभज्य देया, न वेति चिन्तायाम् । ‘ ऋत्विग्भ्यो दक्षिणां ददाति ’ इति दानाङ्गत्वेन ऋत्विग्बहुत्वस्य विवक्षितत्वात् समुदितेभ्यः अविभज्यैव देया । न चाविभज्यदाने परस्वत्वानुत्पत्तेर्दानपदार्थानापत्तिः ‘ धेनुर्दक्षिणा ’ इत्यादौ अविभाज्यद्रव्यैकत्वे संसृष्टपरस्वत्वोत्पत्तिवत् इहापि तथोत्पत्तिसंभवेन तदुपपत्तेः । अतस्तद्वदेव तत्कर्तृकविभागेनैव प्रत्येकस्वत्वोत्पत्तावपि न क्षतिः । वस्तुतस्तु ऋत्विजामिह उद्देश्यत्वेन तद्गतबहुत्वसाहित्ययोः अविवक्षितत्वात् ‘ पृषदाज्येनानूयाजान् यजति ’ इतिवत् प्रतिप्रधानं गुणवृत्तिन्यायेन प्रत्येकमेकैकस्य समस्तदक्षिणासंबन्धावगतेः न विभागप्रसक्तिः । इति प्राप्ते, नात्र ऋत्विजां चतुर्थ्याभावत्वरूपोद्देश्यत्वावगतिः, तस्याः संप्रदानकारकत्वाचित्वेन लक्षणायां प्रमाणाभावात् । अतो ‘ वेदविदे गां ददाति ’ इत्यत्र गोसंप्रदानोभयविशिष्टदानस्य स्वर्गार्थत्ववत् ऋत्विग्द्रव्योभयविशिष्टदक्षिणादानस्य वैमृधादिवत् पदान्तरकल्पनया ऋत्विगानमनार्थत्वप्रतीतेः ऋत्विग्गतबहुत्वसाहित्यादेर्विवक्षितत्वान्न प्रत्येकं समस्तदक्षिणाऽऽवृत्तिः । अत एवोभयत्रापि गवादिद्रव्यस्य द्विकर्मकत्वभियासक्तुवत् करणत्वलक्षणैव । किञ्च, दक्षिणाया वाक्यान्तरे जौहवौपभृदादिवत् उत्पन्नाया एकस्या एव प्रयाजाद्युद्देशेनेव ऋत्विगुद्देशेन विनियोगात् अवयवश एव प्रत्येकान्वयः इति न प्रत्येकं समस्तदक्षिणाऽऽवृत्तिः । अतः समुदितेभ्य एव ऋत्विग्भ्यः सर्वत्र दक्षिणादानम् । अत एव अन्वाहार्योऽपि अविभज्यैव दीयते । नहि ‘ धेनुर्दक्षिणा ’ इत्यादौ एकधेन्वादौ अविभाज्यत्ववत् अन्वाहार्यादौ

तदस्ति । येन अन्वाहार्याविभागे समुदितत्वयुक्तिर्न पुरस्क्रियेत । एवं च सर्वत्र बहुवचनबलात् समुदितेभ्य एव दाने प्रसक्ते ‘तुथो वो विश्ववेदा विभजतु’ इति मन्त्रवर्णबलात् ‘ अग्नीधे ददाति, होत्रे उद्गात्रे ’ इत्यादिप्रमाणबलाच्च गमकसत्त्वे विभज्यैव दानम् ।

मण्डन— ‘विभज्य दानं खलु दक्षिणायाः । ’

शंकर-- ‘ विभज्य दक्षिणा देया । ’

⌛ ज्योतिष्टोमे द्वादशशतदंक्षिणायाः अर्धिनः तृतीयिनः पादिनः इति समाख्याऽनुरोधेन विभागः कर्तव्यः ॥

समं स्यादश्रुतत्वात् । १०।३।१३।५३ ॥

भाष्यम्-- ज्योतिष्टोमे समाम्नायते ‘ गौश्चाश्वश्चाश्वतरश्च ’ इति । तत्रायमर्थः समधिगतः विभज्य दातव्यमिति । इदमिदानीं सांशयिकं किं समो विभागः, उत कर्मकृतं वैषम्यम्, उत शब्दकृतमिति । किं प्राप्तम् ? समो भागः स्यात्, अश्रुतित्वाद्विशेषस्य । यत्र विशेषो न श्रूयते, तत्र समो विभागो भवितुमर्हति । कथमिव ? एकस्मै सर्वं दातव्यं प्राप्नोति, यदि अपरस्मै दातव्यं न भवति । तत्र यावति एकस्मै दीयमाने नान्यः संविभज्यते, तावत्तस्मै एकस्मै न दातव्यम् । अविशिष्टं दातव्यम् । एवमेकैकस्मै । तस्मात् विशेषाश्रवणात् समं देयमिति ।

टुप्-- समं स्यादश्रुतत्वात् इति प्रसक्तानुप्रसक्तेन विभागोपोद्बलकं च ।

अपिवा कर्मवैषम्यात् । ५४ ॥

भाष्यम्-- अपिवेति पक्षव्यावृत्तिः । न समं स्यात् । कर्मकृतं वैषम्यं भवेत् । यो बहु कर्म करोति, तस्मै बह्वी भृतिर्दीयते । तस्मात् कर्मानुरूप्येण वैषम्यमिति ।

अतुल्याः स्युः परिक्रये, विषमाऽऽख्या विधिश्रुतौ, परिक्रयान्न कर्मण्युपपद्यते, दर्शनाद् विशेषस्य तथाऽभ्युदये । ५५ ॥

भाष्यम्—न चैतदस्ति कर्मकृतं वैषम्यमिति । किं तर्हि ? उपकारकृतम् । स उपकारः श्रुत्या विज्ञायते । तस्माच्छ्रुतिकृतं वैषम्यम् । तेन अतुल्याः परिक्रये भवेयुः । विषमा हि एषामाख्या । के चिदर्धिनः, के चित् तृतीयिनः, के चित् पादिनः । येषामर्धं ते अर्धिनः । कथं च तेषामर्धं भवति । यदि तेभ्योऽर्धं दीयते । एवं तृतीयिनः पादिन इति च दीक्षाविधिश्रुतौ समाख्यायन्ते । सा परिक्रयात् कर्मकृते वैषम्ये नोपपद्यते । क्व पुनरयं विशेषो दृश्यते । अभ्युदये । अभ्युदयः इति अभ्युदयफलम् । ऋद्धिफलं द्वादशाहं ब्रूमः । ‘ अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारम्, ततो होतारम् । ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीधं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो दीक्षयति, ब्रह्मचारी वाऽऽचार्यप्रेषितः इति अर्धिनः, तृतीयिनः, पादिनः इति द्वादशाहे अनुवादः । यदि प्रकृतौ यथासमाख्यम् अमीषामिमे भागाः, ततो द्वादशाहे दर्शनमुपपद्यते । तस्मात् अध्वर्यादिभिः समाख्यानात् समाख्याश्रुतिकृतं वैषम्यं भवितुमर्हतीति ।

सोम-- पूर्वाधिकरणे विभागे प्रतिपादिते तन्निर्वाहकत्वेन इदं चिन्त्यते इति संगतिः ।

वि-- ‘ स विभागः समो नो वा, विशेषाश्रवणात् समः । वैषम्यं स्याद् यथाऽऽयासम्, मैवं तत् स्यात् समाख्यया ॥ ’

भाट्ट-- विभागोऽपि असति नियामके सर्वत्र समानः एव । प्रयासानुरूप्यादिनियामकसत्त्वे तदानुरूप्येण । सोमे तु सत्रस्थदीक्षाक्रमविधायके वाक्ये ‘ अर्धिनस्तृतीयिनः पादिनः ’ इति श्रुतसमाख्याबलकल्प्यविध्यन्तरेण प्रतिप्रस्थात्रादिसाधारण्येन अध्वर्यादिसमाख्यायाः याज्ञिकप्रसिद्धत्वाच्च महर्त्विजां यो विभागः (१२-१२ गावः), तदर्धं प्रतिप्रस्थात्रादीनामर्धिनाम् (६-६ गावः), तृतीयांशः तृतीयिनां नेष्ट्रादीनाम् (४-४ गावः), तच्चतुर्थांशः (३-३ गावः) पादिनामुन्नेत्रादीनामित्येवं क्रमेण बोध्यः । अयं च द्वादशशता-

दावेव, तत्रैव विभागविधानात् । अश्वादौ तु समुदितेभ्यो दानम्, तैः स्वेच्छया साम्येन प्रयासानुरूप्येण वा विभागः कार्यः । एवमन्वाहार्यादावपि । अधिकरणद्वयेन विभागकथनं च वक्ष्यमाणाध्वर्य्वादिभागबाधोपयोगितया ।

मण्डन-- ‘ भागं समाख्याऽनुगुणं प्रकुर्यात् । ’

शंकर— ‘ स विभागोऽसमो मतः । ’

❋ ज्योतिष्टोमे धाराग्रहाः । ‘ धारया गृह्णाति ’ । इमे ग्रहा ऐन्द्रवायवादयः । वि. १०।५।१७.

ज्योतिष्टोमे धिष्ण्यविहरणम् आग्नीध्रीयादेव ॥

‘ अङ्गारैर्द्वे सवने विहरन्ति ’ इत्यादिना विहितं धिष्ण्यानां विहरणमौत्तरवेदिकादेव स्यात् । तदग्नीनामपि होमार्थत्वात् । इति प्राप्ते, ‘अग्नीद् धिष्ण्यान् विहरति’ इति नियमनादाग्नीध्रीयस्यापि आहवनीयैकदेशत्वेन होमसंयोगोपपत्तेः तत एव विहरणम् । संकर्ष. ३।२।१५.

❋ ज्योतिष्टोमे नदीतरणार्थो मन्त्रः ‘देवीरापः ’ इति । यदा अनेकस्रोतसं नदीं तरति, तदा मन्त्रस्य नावृत्तिः आदौ एव सकृन्मन्त्रः । भा. ११।४।१७।५० (५३). ❋ ज्योतिष्टोमे नवनीतेनाभ्यङ्गो दीक्षायाम् । वि. १०।४।७, ❋ ज्योतिष्टोमे ‘पदे जुहोति’ ‘वर्त्मनि जुहोति’ । अनारभ्य ‘ यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतः ’ । राजसूये ‘ वल्मीकवपायामुत्सृज्य जुहोति ’ । अत्र आहवनीयः पदादिभिर्विशेषविहितैः बाध्यते । आहवनीयः सामान्यः । १०।८।८, ❋ ज्योतिष्टोमे पयोव्रतम् अपररात्रादौ अजीर्णसंभवे न कर्तव्यम् । ६।८।८, ❋ ज्योतिष्टोमे ‘ पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य ’ इति । १०।४।१ । क्रतुधर्मोऽयम्, न पुरुषस्य । भा. ४।३।४।८–९ । इदं नियमादृष्टाय । तेन अन्यत् न भक्षणीयम् । वि. ६।८।७. ❋ ज्योतिष्टोमे पशुः अग्नीषोमीयः । तस्य पशोः हृदयादिभिरवदानैः इज्या प्रयोजिका, न तु शकृत्संप्रव्याधः लोहितनिरसनं वा । भा. ४।१।१२।२७, ❋ ज्योतिष्टोमे पशवः अग्नीषोमीयसवनीयानुबन्ध्याः । ११।३।३।३–४, ❋ ज्योतिष्टोमे पशूनां यूपः श्रुतः खादिरे बध्नाति, पालाशे बध्नाति, रौहितके बध्नाति इति । अग्नीषोमीये तावत् प्रयोगवचनेन गृह्यते यूपः । उत्तरयोरपि चोदकेन प्राप्यते । ११।३।३।३. ❋ ज्योतिष्टोमे पश्वर्था अनुयाजाः आग्निमारुतशस्त्रोत्तरम् इति कालार्थः संयोगः । वि. ४।३।१५, ❋ ज्योतिष्टोमे पशुत्रये यूपः तन्त्रम् । यूपन्यायः । ११।३।३. ❋ ज्योतिष्टोमे पशुत्रये यूपसंस्कारास्तन्त्रम् । भा. ११।३।४।५–७, ❋ ज्योतिष्टोमे पशुत्रये स्वरुस्तन्तम् । ११।३।५।८–१२, ❋ ज्योतिष्टोमे पशुपुरोडाशः अदृष्टार्थः न तु देवतासंस्कारार्थः । ४।१।७। १८–२०, ❋ ज्योतिष्टोमे पशुपुरोडाशस्य श्रपणं शालामुखीये, न शामित्रे । १२!१।५।१२, ❋ ज्योतिष्टोमे पशुपुरोडाशस्य सवनीयपुरोडाशानां सौम्यचरोश्च निर्वापः हविर्धानशकटाभ्यां भिन्ने शकटे कर्तव्यः । न तु हविर्धानशकटयोरन्यतरस्मिन् । १२।१।७।१४–१६, ❋ ज्योतिष्टोमे पात्नीवतग्रहशेषे भक्ष्यमाणे इन्द्रवाय्वादयः पूर्वदेवता भक्षमन्त्रे नोपलक्षणीयाः । ३।२।१३। ३३–३४. ❋ ज्योतिष्टोमे पात्नीवतभक्षमन्त्रे त्वष्टा नोपलक्षणीयः । क्त्वाचिन्ता । वि. ३।२।१४. ❋ ज्योतिष्टोमे पात्नीवतभक्षमन्त्रे पत्नीवानग्निरेवोपलक्षयितव्यः, न तु याज्यामन्त्रस्थाः त्रयस्त्रिंशद्देवताः । भा. ३।२।१५।३७. ❋ ज्योतिष्टोमे पाशुकहविष्कृदाह्वानेन सवनीयपुरोडाशादिषु हविष्कृदाह्वानस्य प्रसङ्गसिद्धिः । क्त्वाचिन्ता । वि. १२।२।३. ❋ ज्योतिष्टोमे पुनरभ्युन्नीतचमसेषु इन्द्रस्य मित्रावरुणादीनां चेति सर्वेषामुपलक्षणं भक्षमन्त्रे कर्तव्यम्, न तु इन्द्रस्य अनुपलक्षणम् । भा. ३।२।१२।३०–३१, ❋ ज्योतिष्टोमे ‘ पुरोडाशशकलम् ऐन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे’ इति । सवनीयपुरोडाशेषु विद्यमानानामेव अयम् एकदेशस्य संयोगो नान्यस्य । ३।८।१८।३३.

ज्योतिष्टोमे पूर्वयोः सवनयोः आज्येन सोमेन वा व्याघारणम् ॥

‘ तेषां ये नेदिष्ठं पर्यविशन्ते सोमपीथं प्राप्नुवन् आहवनीय आग्नीध्रीयो होत्रीयो मार्जालीयः ’ इति प्रकृत्य ‘तस्मात्तेषु जुह्वति’ इति विधानात् तेषामेव सोमेन व्याघारणमन्येषां त्वाज्येन । इति प्राप्ते, ‘ अतिहाय

वषट् करोति वि ह्येते सोमपीथेन ऋध्यन्ते' इति निन्दाऽर्थवादेन सोमनिषेधस्यापि उन्नयनादाज्येन सह विकल्पः। तृतीयसवने त्वाज्यविधिर्नियमार्थः। संकर्ष. ३।२।१८.

* ज्योतिष्टोमे पृष्ठानि सप्तदशानि इति पृष्ठशब्दः नामधेयम्, न गुणविधिः। भा. १।४।२।३. * ज्योतिष्टोमे 'प्रउगं शंसति, निष्केवल्यं शंसति, आज्यैः स्तुवते, पृष्ठैः स्तुवते' इति स्तुतशस्त्रयोः प्रधानकर्मत्वमेव, न गुणकर्मत्वम्। प्रधानकर्मत्वेऽपि अपूर्वजनकत्वमस्त्येव। स्तुतशस्त्राधिकरणम्। वि. २।१।५. * ज्योतिष्टोमे प्रतिपदोः 'युवं हि स्थः, एते असृग्रम्' इत्यनयोः यजमानद्वित्वबहुत्वसंबन्धिन्योः कुलाययागे सत्रे च उत्कर्षः। द्वित्वबहुत्वाधिकरणम्। भा. ३।३।९। १७–१९. * ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य श्रूयते 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति। अयं प्रवर्ग्यनिषेधः अनूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे एव। प्रथमयज्ञः अग्निष्टोमः। 'अग्निष्टोमे प्रवृणक्ति' इति विधिः। विधिनिषेधयोरधिकारिभेदेन व्यवस्था। तथा च श्रूयते 'कामं तु योऽनूचानः स्यात् तस्य प्रवृञ्ज्यात्' इति। वि. ३।३।१७, * ज्योतिष्टोमे प्रातःसवने ऐन्द्रवायवादयो ग्रहाः, माध्यंदिने मरुत्वतीयादयः, तृतीयसवने च आदित्यादयः। ग्रहधर्मास्तु सवनत्रयेऽपि कर्तव्याः। ३।६।९, * ज्योतिष्टोमे प्रातःसवने गायत्रं साम। बहिष्पवमाने त्रिवृत् स्तोमः, आज्येषु पञ्चदशः स्तोमः, ऐन्द्रवायवादयो ग्रहाः। माध्यंदिने च पवमानसूक्तानि त्रीणि, तदुत्तरं पृष्ठस्तोत्राणि चत्वारि। तेषु सप्तदशः स्तोमः। १।४।३, * ज्योतिष्टोमे प्रातःसवने बहिष्पवमानेन स्तोष्यमाणाः ऋत्विजः शालायाः बहिः प्रसर्पन्ति 'अध्वर्युं प्रस्तोता संतनुयात्, प्रस्तोतारमुद्गाता, उद्गातारं प्रतिहर्ता, प्रतिहर्तारं ब्रह्मा, ब्रह्माणं यजमानः, यजमानं प्रशास्ता' इति पुरतो गन्तुः कच्छं गृहीत्वैव (इयं तु याज्ञिकानां रूढिः। स्पर्श एव तु विहितः) पृष्ठतोऽन्यो गच्छति इति पिपीलिकापङ्क्तिवत् प्रसर्पणम्। तत्रापच्छेदः स्पर्शनाशः विच्छेदः न केनापि कर्तव्यः। ६।५।१७. * ज्योतिष्टोमे 'प्रायणीयस्य निष्कासे उदयनीयमनुनिर्वपति' निष्कासे निर्वापोऽयमर्थकर्म न कर्मान्तरं नापि प्रतिपत्तिः। भा. ११।२।१६।६६–६८. * ज्योतिष्टोमे प्रायणीये अदितिदेवताकचरुपयसि प्रदेयधर्मा न कर्तव्याः। आदित्यपयोऽधिकरणम्। वि. ९।४।१०.

⧗ ज्योतिष्टोमे प्रायणीया पूर्वशंय्वन्ता, आतिथ्या च पूर्वेडाऽन्ता ॥

प्रतिषेधार्थवत्त्वाच्चोत्तरस्य परस्तात् प्रतिषेधः स्यात्। १०।७।१३।४० ॥

भाष्यम्— इदमेवोदाहरणम् 'शंय्वन्ता प्रायणीया संतिष्ठते, न पत्नीः संयाजयन्ति' इति। 'इडाऽन्ता आतिथ्या संतिष्ठते, नानुयाजान् यजति' इति। तत्र द्वौ शंयू, द्वे इडे इति। तत्रायमर्थः सांशयिकः किं परेण शंयुना शंय्वन्ता संतिष्ठते, उत पूर्वेण। एवं किं परया इडया इडाऽन्ता संतिष्ठते, उत पूर्वेणेति। किं प्राप्तम्? पूर्वाभ्यां शंय्विडाभ्यामिति। कुतः? पूर्वाभ्यामपि संस्थापयता श्रुत्यर्थः कृतो भवतीति। कृते च शब्दार्थे कस्मादुत्तरान् पदार्थान् कुर्यादिति। उच्यते। उत्तराभ्यामपि संस्थापयन् शब्दार्थमेव करोति। तत्र श्रमात् पूर्वाभ्यां संस्थापयन्न शब्दार्थे परिच्छिन्द्यात्। शब्दार्थे परिच्छेत्स्यामः। यदि उत्तराभ्यामपि संस्थापनं शब्दो वक्ष्यति, ततस्ताभ्यां संस्थापयन् भूयांसमुपकारं लप्स्यते। तस्मादनियमः, पूर्वाभ्यामुत्तराभ्यां वेति। एवं प्राप्ते, ब्रूमः। उत्तराभ्यामिति। कुतः? प्रतिषेधार्थवत्त्वात्। तदैव पत्नीसंयाजस्य अनुयाजस्य च प्रतिषेधोऽर्थवान् भवति, यदि उत्तराभ्यां न संस्थाप्येत, नैव पत्नीसंयाजानुयाजौ प्राप्नुतः। तस्मादुत्तराभ्यामिति। ननु च प्रतिषेधस्य नित्यानुवादत्वमुक्तम्। उच्यते। न सत्यां गतौ तत् न्याय्यम्। तस्मान्न पूर्वाभ्यामिति। उच्यते। लिङ्गमेतदुपदिष्टम्। न च लिङ्गं साधकं भवति। प्राप्तिरुच्यतामिति। पक्षेऽपि हि लिङ्गस्य अर्थवत्ता स्यात्। अत्रोच्यते। इयं प्राप्तिः, यदा विशेषो नावगम्यते, शंयुरन्ते यस्या अङ्गरीतेः, सा शंय्वन्ता। एवम् इडाऽन्ता। सैषा अङ्गरीतिर्विधीयते शंय्वन्ता, इडाऽन्ता च। सा च विधीयमाना अन्यान्यङ्गानि परिसंचष्टे। कथम्? शंय्वन्तया अङ्गरीत्या, इडाऽन्तया च संकीर्त्य-

मानया एकवाक्यतायां च सत्याम् अन्यान्यङ्गानि नाकाङ्क्ष्यन्ते। अनाकाङ्क्ष्यमाणानि च नैकवाक्यतां यान्ति। अतः अप्राप्तानीति गम्यते। ननु एवं सति पूर्वाभ्यां शंय्विडाऽन्तता न कंचिदर्थम् अभ्यधिकं साधयतीति। उच्यते। नैष दोषः। नहि तस्यार्थे पृथग् वाक्यम्, यस्यानर्थक्यं परिजिहीर्ष्यते। अस्य वाक्यस्य उत्तरान्तता प्रयोजनम्। तस्मात् उत्तराभ्यां संस्था स्यादिति।

टुप्-- शंय्वन्ता अङ्गरीतिर्विधीयते। सा च (क्लृप्तोपकारा विधीयमाना) आज्यभागवत् निराकाङ्क्षीकरोति प्रायणीयाम्। तस्यां च (विधीयमानायाम्) द्वे शंय्वन्ते (अविशेषेण) परिप्लवेते। तत्र पूर्वस्याम् (शंय्वन्ततायाम्) गृह्यमाणायामुत्तरस्य शंयोः प्राक् ये पदार्थाः कर्तव्या अवगताः, ते बाध्येरन्। उत्तरस्यां तु (गृह्यमाणायां) न किञ्चित् बाधितं भवति, शब्दार्थश्च संपादित एव। पत्न्यनुयाजप्रतिषेधार्थवत्त्वं च (एवं सति भविष्यति। इतरथा अनुवादमात्रमनर्थकं स्यात्) संतिष्ठतिश्चानुवादः।

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात्। ४१ ॥

भाष्यम्-- नैतदस्ति, उत्तराभ्यां शंय्विडाभ्यां संतिष्ठते इति। पूर्वाभ्यामेव। कुतः ? नेह शंय्वन्ताया अङ्गरीतेर्भावो विधीयते, इडाऽन्तायाश्च। किं तर्हि ? संस्था विधीयते। शंय्विडाऽन्ता संतिष्ठते। प्रवर्तमाना शंय्विडाऽन्ता च जाता संतिष्ठते, न प्रवर्तते। तिष्ठत्स्वेव कर्तृषु संतिष्ठतीत्युच्यते। तत्र पूर्वाभ्यामुत्तराभ्यामिति विशेषे अवगम्यमाने पूर्वाभ्यां च न प्रवर्तेत उत्तराभ्यां च। तदेव तत्र पूर्वाभ्यामेव संस्थाने कृतं भवति। प्रतिषेधश्च नित्यानुवाद इत्युक्तम्।

टुप्-- 'प्राप्तेर्वा पूर्वस्य वचनादतिक्रमे स्यात्' (इति लिखितं सूत्रम्)। नात्र अङ्गरीतिर्विधीयते। किं तर्हि ? संपूर्वस्तिष्ठतिः। एवं (धात्वर्थविधानात्) श्रुत्यर्थः अनुगृहीतो भविष्यति। इतरथा शंय्वन्ततायाः प्रायणीयायाश्च संबन्धं कर्तुं संतिष्ठतिरुच्चार्येत, तत्र अत्यन्तं वाक्यं स्यात्, त्रिविधाऽपि श्रुतिः उत्सृज्येत (नहि तदा धात्वर्थस्य विधानम्, न च तस्य अन्यत्र, नापि तत्र अन्यस्य। तेन संतिष्ठतिरेव उपरमात्मको विधीयते)। संतिष्ठतिविधाने (च) चोदकः अङ्गानि प्रापयति (एव)। तत्र (एवं सति) पूर्वां शंय्वन्ततां अतिलङ्घ्य यो गच्छेत्, तेन आगमो बाधितः स्यात् (तस्मात् पूर्वेणैव शंयुना शंय्वन्तता, ततः परेषां बाधः)।

प्रतिषेधस्य त्वरायुक्तत्वात्, तस्य च नान्यदेशत्वम्। ४२ ॥

भाष्यम्— इतश्च पूर्वाभ्यां (शंय्विडाभ्यां) परं न कर्तव्यमिति। कुतः ? त्वरायुक्तो हि प्रतिषेधोऽयं कृतः। कथम् ? 'देवासुराः सत्यमभजन्त। अर्धं देवाः सत्यस्याभजन्त, अर्धमसुराः। तदसुरैः सत्यमनूच्यमानं देवानपाक्रामत्। ते प्रायणीयं निरवपन्। तत् शंय्वन्तमासीत्, अथासुरा यज्ञमायन्, ततो यज्ञस्तत्वरे इति। तमेवं कृत्वा त्वरितमाद्रियन्ते' इति। तथा 'आतिथ्यं निरवपन्, तदिडाऽन्तमासीत्, अथासुरा यज्ञमायन्, ततो यज्ञस्तत्वरे इति। तदिडाऽन्तमेव कृत्वा त्वरितमाद्रियन्ते' इति। त्वराकृतश्च पूर्वमपेक्षन्ते नोत्तरम्। तस्मात् नान्यो देशः प्रतिषेधस्य। तस्माच्च पूर्वाभ्यामेव शंय्विडाभ्यां परं न कर्तव्यमिति।

सोम— पूर्वोक्तस्तुत्यर्थत्वाक्षेपात् संगतिः। **सूत्रार्थस्तु**-- पत्नीसंयाजानूयाजप्रतिषेधार्थत्वात् उत्तरस्य शंय्विडस्य परस्तात् यत् कर्तव्यं तस्य प्रतिषेधः स्यात् इति।

वि--'तत्रैव शंय्विडे पूर्वे परे वा स्वेच्छयाऽथवा।
परे एवाऽथवा पूर्वे एवा, ऽऽद्यो द्विविधश्रुतेः॥ निषेधस्यार्थवत्त्वाय परे एवा, ऽनुवादगीः। पूर्वोक्तवाक्यतां याति पूर्वे एवाविरोधतः॥'

भाट्ट— प्रकृतौ द्वौ शंयू पत्नीसंयाजानां पुरस्तादेकः परस्तादपरः। तथा इडे अपि अनूयाजानां पुरस्तादेका पश्चादपरा। तत्र पूर्वाभ्यां प्रायणीयातिथ्ययोः शंय्विडाऽन्तता, उतोत्तराभ्यामिति संदेहे, 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इतिवत् अत्र प्रायणीयाऽऽद्यनुवादेन शंय्विडाऽन्ताङ्गरीतिमात्रविधानात् तस्याश्च क्लृप्तोपकारकतया आज्यभागवत् चोदकपरिलोपकतया तदुपरितनाङ्गनिवृत्तिरार्थिकी। अत एव संतिष्ठतिरर्थप्राप्तानुवादः साधुत्वार्थः। तत्र च तद्गुणसंविज्ञानबहुव्रीहिणा शंय्विडा-

ऽन्तपदार्थविधानात् पूर्वशंय्विडोत्तरपदार्थानामपि उत्तरशंय्विडाऽन्तत्वाविशेषेण विधानावगतेः तदुत्तरभाविनामेव निवृत्तिः। अत एव पत्नीसंयाजादीनामपि उत्तरशंय्विडापूर्वभाविपदार्थत्वात् करणप्रसक्तौ 'न पत्नीः संयाजयन्ति' इत्यादिः तत्पर्युदासविधया शंय्विडाऽन्तत्वविध्येकवाक्यताऽऽपन्नः सन् अर्थवान्। अतः पत्नीसंयाजानूयाजवर्जम् उत्तरशंय्विडाऽन्तं सर्वं कार्यम्। इति प्राप्ते, नात्र शंय्विडाऽन्ताङ्गरीतिविधिः। तथात्वे धातोः अत्यन्तपारार्थ्यापत्तेः। अपितु शंय्विडाऽन्तत्वे निमित्ते प्रायणीयाऽऽद्युद्देशेन प्रयोगोपरमरूपा संस्थैव धात्वर्थो विधीयते। पात्नीवतवाक्येषु तु पर्यग्निकरणे निमित्ते प्रयोगोपरमरूपोत्सर्गविधाने यागस्यापि अकरणापत्तेः तत्र त्यागरूपोत्सर्गानुवादेन पर्यग्निकरणान्ताङ्गरीतिविधानमेवाश्रितम्। प्रकृते तु धात्वर्थविधिलिप्सया प्रयोगोपरमस्यैव शंय्विडाऽन्तत्वे निमित्ते विधानात् पूर्वयोरपि शंय्विडयोः कृतयोर्निमित्तस्य संजातत्वेन कर्तव्य एवोपरमः। पत्नीसंयाजादिप्रतिषेधस्तु नित्यानुवादत्वेन अर्थवादमात्रम्, औचित्येन शंय्विडाऽन्तत्वस्तुत्यर्थे न विरुध्यते। अतः पूर्वाभ्यामेव शंय्विडाऽन्तता।

मण्डन-- 'पूर्वेडयैवोपरमो यजेः स्यात्।'

शंकर-- 'साऽन्तता पूर्वतो भवेत्।'

ज्योतिष्टोमे प्रायणीया शंय्वन्तैव आतिथ्या च इडाऽन्तैव ॥

शंय्विडान्तत्वे विकल्पः स्यात्, परेषु पत्न्यनुयाजप्रतिषेधोऽनर्थको हि स्यात्। १०।७।१२।३८॥

भाष्यम्-- ज्योतिष्टोमे श्रूयते 'शंय्वन्ता प्रायणीया संतिष्ठते, न पत्नीः संयाजयन्ति' इति। 'इडान्ता आतिथ्या संतिष्ठते, नानुयाजान् यजति' इति। तत्र संशयः प्रायणीया किं शंय्वन्ता कृत्स्नसंस्था वा, उत शंय्वन्तैव। तथा आतिथ्या किमिडान्ता कृत्स्नसंस्था वा, उत इडान्तैव। किं प्राप्तम्? शंय्विडान्तत्वे विकल्पः स्यादिति। कुतः? पत्न्यनुयाजस्य प्रतिषेधात्। 'शंय्वन्ता संतिष्ठते' इति तावत् व्यक्तमेव वचनम्। अपरमपि वचनम्, न पत्नीः संयाजयन्ति इति। यदि शंय्वन्तैव नित्यम्, पत्न्यनुयाजप्रतिषेधोऽनर्थकः स्यात्। तस्मात् पत्न्यनुयाजप्रतिषेधेन कृत्स्नसंस्थानमुच्यते। कथम्? प्रायणीयायां पत्नीसंयाजान् केवलान् न करोति, नान्यं न करोतीति। तथा आतिथ्यायामनुयाजान् केवलान् न करोति, नान्यं न करोतीति; अकर्तव्यपरिसंख्यानार्थमेव इदं भिन्नमेव वाक्यद्वयं पूर्वाभ्यां वाक्याभ्यामिति।

नित्यानुवादो वा कर्मणः स्यादशब्दत्वात्। ३९॥

भाष्यम्-- न त्वेतदस्ति, विकल्प इति। एक एव कल्पः शंय्विडाऽन्तत्वम्। तत्र हि विस्पष्टं वचनम्। द्वितीयः कल्पो नास्त्येव। नहि तस्य वचनमस्ति। न च पत्न्यनुयाजप्रतिषेधकं कृत्स्नसंस्थानवाचकम्। किं तर्हि? तन्नित्यानुवादः। नित्यप्राप्तमनुवदति। यथा 'नान्तरिक्षे न दिवि अग्निश्चेतव्यः' इति। पूर्वाभ्यां सह एकवाक्यतैव अनयोः 'शंय्वन्ता प्रायणीया संतिष्ठते, न पत्नीः संयाजयन्ति' इति। तथा 'इडाऽन्ता आतिथ्या संतिष्ठते, नानुयाजान् यजति' इति। अत्र यत्नलाघवेन स्तुतिः। ननु प्रतिषेधवचनः कृत्स्नसंस्थानं वदेत्, य एव हि श्रुतस्यार्थस्योत्सर्गे दोषः, स एव अश्रुतकल्पनायाम्। तस्मात् शंय्विडाऽन्ततैव स्यादिति।

शा-- 'वाक्यभेदो हि न न्याय्यो विकल्पश्चाष्टदोषभाक्। त्रिदोषा परिसंख्या च तस्मात् स्तुत्यैकवाक्यता॥' तस्मात् नियमेन शंय्विडाऽन्ते एव प्रायणीयाऽऽतिथ्ये।

सोम-- यथा अनुवादस्य आनर्थक्यात् स्विष्टकृद्वचनं परिसंख्यापकम्, एवम् 'न पत्नीः संयाजयन्ति' इत्यादिकमपि इत्युत्थानात् संगतिः। सूत्रे आनर्थक्यं स्यात् कृत्स्नसंस्थाविध्यभावे पत्नीसंयाजनिषेधवचनम् अनुवादमात्रमनर्थकं स्यात् इत्यर्थः।

वि--'प्रायणीयाऽऽतिथ्ययोः किं विकल्पः शंय्विडाऽन्तयोः। नियमो वा, विकल्पः स्यान्निषेधपरिसंख्यया॥, शंय्विडाऽन्तत्ववाक्याच्च नियमो विधिमात्रतः। नित्यानुवादो नञ्वाक्यं दोषबाहुल्यमन्यथा॥'

भाट्ट-- ज्योतिष्टोमे 'शंय्वन्ता प्रायणीया संतिष्ठते, न पत्नीः संयाजयन्ति' 'इडाऽन्ता आतिथ्या संतिष्ठते, नानुयाजान् यजति' इति श्रुतम्। तत्र किं प्रायणीयाऽऽतिथ्ययोः शंय्विडाऽन्तत्वं नियतम्, उत पक्षे पत्नीसंयाजा-

नुयाजवर्जे कृत्स्नसंस्थत्वमपीति चिन्तायाम्, आद्यवाक्याभ्यां शंय्विडाऽन्तत्वे विहिते तदुत्तरभाव्यङ्गपरिसंख्याऽवगतेः सर्वेषां तेषामकरणे प्राप्ते, पत्नीसंयाजानुयाजमात्रे अकरणपुनःश्रवणं तद्भिन्नाङ्गेषु सूक्तवाकसमिष्टयजुरादिषु अकरणपरिसंख्याऽर्थम्। अतश्च तेषामपि पक्षे करणम्। इति प्राप्ते, अकरणबोधकशास्त्रस्य प्रत्यक्षत्वेन अप्राप्तपरिसंख्यात्वायोगात् प्राप्तपरिसंख्यायां च त्रैदोष्यापत्तेः अष्टदोषदुष्टविकल्पापत्तेश्च शंय्विडाऽन्तत्वमेव नियतम्। एवं च 'न पत्नीः संयाजयन्ति' इत्यादेर्नित्यानुवादत्वादिना तदेकवाक्यतयैव उपपत्तेर्न वाक्यभेदाङ्गीकारोऽपि।

मण्डन-- 'कर्तव्यमातिथ्यमिडाऽन्तमेव।' १२.

शंकर-- 'शंय्विडाऽन्तादि नित्यं स्यात्।' १२.

* ज्योतिष्टोमे प्रायणीयाऽऽदिषु ऐष्टिकं जागरणं दीक्षाजागरणादन्यकाले पृथक् कर्तव्यम्। जागरणन्यायः। वि. १२।१।८.

ज्योतिष्टोमे प्रायणीयाऽऽदिषु दार्शिकं व्रतं नानुष्ठेयं प्रसङ्गात् सिद्धेः ॥

तथा व्रतमुपेतत्वात्। १२।१।११।२०॥

भाष्यम्-- तत्रैव दार्शपौर्णमासिकं व्रतं चोदकप्राप्तं तथैव न क्रियते, यथा अग्न्यन्वाधानम्, उपेतत्वात्। न ह्युपेतमनपवृक्तं सत् शक्यमुपेतुम्। अप्राप्तस्य हि प्रापणमुपगमनम्। तत् प्राप्तस्य न शक्यम्।

विप्रतिषेधाच्च। २१॥

भाष्यम्— 'अग्ने व्रतपते व्रतं चरिष्यामि' इति चरतो वचनं विप्रतिषिद्धं वर्तमानस्य भविष्यद्वचः।

सत्यवदिति चेत्। २२॥

भाष्यम्-- अथ सत्यवत् कस्मान्न भवति। यथा सत्यवचनं व्रतं पुरुषधर्मत्वादनुवर्तमानमपि दर्शपूर्णमासयोः पुनरुपेयते इति। स्थितायां प्रतिज्ञायां सूत्रेण चोदयति।

न, संयोगपृथक्त्वात्। २३॥

भाष्यम्— नैतत्तेन तुल्यम्, संयोगपृथक्त्वात्। तत्र पुरुषसंयोगः कर्मसंयोगश्च। पुरुषार्थमुपेतं कर्मार्थे पुनरुपेयते। नन्विहापि संयोगपृथक्त्वात् सोमार्थमुपेतमैष्टिकार्थे पुनरुपेयते इति। नेह पुनरुपगमनेनार्थः। यत् सोमार्थे तदेवेतरत्र प्रसङ्गात् कार्यं साधयति। नन्विहापि तद्वदेव साधयिष्यति। साधयेत्, यदि कर्मार्थिता तस्य ज्ञाता भवेत्। सा त्विहैव ज्ञाप्यते। ऐष्टिकानां तु प्रकृतौ ज्ञाता। तस्मात् सत्यवदित्यदृष्टान्तः। कर्मार्थत्वज्ञानस्य तु प्रयोजनं प्रायश्चित्तविशेषस्तृतीयेऽध्याये व्याख्यातः।

शा-- प्राकृतं व्रतोपायनं कर्तव्यं नेति विचारे, कर्तव्यमिति प्राप्ते, सोमार्थेऽपि तेनैव व्रतेन सत्यवदनब्रह्मचर्यादिसंकल्परूपेण आ समाप्तेः अविसृष्टेन प्रसङ्गात् सिद्धेः, न पुनरुपायनं कर्तव्यम्।

सोम-- अन्वाधानस्य दृष्टार्थत्वात् अकर्तव्यत्वेऽपि व्रतोपायनस्य अदृष्टार्थत्वात् कर्तव्यम्, इत्युत्थितेः संगतिः।

वि-- 'व्रतोपायनमेष्वस्ति न वा, चोदकतोऽस्ति तत्।, उपेतस्यापरित्यागे विरोधान्नास्ति तत् पुनः॥'

भाट्ट-- दर्शपूर्णमासयोरेव 'अग्ने व्रतपते' इतिमन्त्रेण व्रतग्रहणमाम्नातम्। व्रतं नाम सत्यवदनब्रह्मचर्यादिसंकल्परूपम्। सत्यवदनं हि 'स वै सत्यमेव वदेत्' इति शतपथे विहितम्, स इति क्रतूपादानेन क्रतूपयुक्तपुरुषधर्मः। अत एव 'नानृतं वदेत्' इति शुद्धक्रतुधर्मत्वात् संयोगान्तरम्। अन्यतरेणान्यतरस्य वैयर्थ्यशङ्का तु शाखाऽन्तरीयत्वादपास्ता। एवम् 'स ब्रह्मचारी अमधुमांसाशी स्यात्' इति ब्रह्मचर्यविधावपि ज्ञेयम्। स्त्र्युपगमनमांसप्रतिषेधस्तु शाखाऽन्तरीयः इति न विरोधः। तदिदमपि व्रतं सोमाङ्गेष्टिपश्वादिषु न कार्यम्, दीक्षणीयोत्तरं सोमार्थे कृतेनैव दीक्षारूपव्रतग्रहणेन आऽवभृथमविसृष्टेन प्रसङ्गसिद्धेः। न चैष्टिकसौमिकव्रतकरणयोः विजातीयादृष्टजनकयोः कथं प्रसङ्गः, विजातीययोरपि तन्त्रेण परिपालितयोः विजातीयादृष्टजनकत्वोपपत्तेः। अत एव सत्यवदननियमादिपरिपालनस्य तन्त्रत्वेऽपि सोमार्थे कृतेनैव तत्संकल्पेन तत्कार्यसिद्धेः न पृथक्संकल्पकरणम्, सकृत् संकल्पितस्य पुनःसंकल्पवैयर्थ्यात्, व्रतवर्तमानदशायां 'व्रतं चरिष्यामि' इति मन्त्रलिङ्गानुपपत्तेश्च। न च यावज्जीवं पुरुषार्थे सत्यवदननियमसंकल्पे कृतेऽपि यथा दर्शपूर्णमासज्योतिष्टोमादौ पुनस्तत्संकल्पकरणम्, तथा

सोमार्थतया कृतेऽपि तत्संकल्पे तदङ्गेष्ट्यादिषु पुनस्तत्संकल्पकरणं न विरुध्यते इति **वाच्यम्** । पुरुषार्थतया कृतस्यापि संकल्पस्य क्रत्वर्थतया पुनःकरणे बाधकाभावात्, सत्यवदननियमसत्त्वेऽपि ब्रह्मचर्यादिसाधारणव्रतसामान्यसंकल्पे बाधकाभावाच्च । प्रकृते तु सामान्यसंकल्पस्यैव कृतत्वात् इष्ट्याद्यर्थे पुनःकरणं विरुद्धमिति विशेषः । **न च** एवमपि सोमार्थस्य व्रतस्य कर्तृसंस्कारद्वारा अङ्गप्रधानसाधारणतया इष्ट्याद्यर्थत्वस्यापि सत्त्वात् महावेदिवदौपदेशिकेन व्रतसंकल्पेन ऐष्टिकस्य बाध एव स्यात् न प्रसङ्गः इति **वाच्यम्** । 'दीक्षाः सोमस्य' इति वचनेन यमनियमपरिग्रहरूपव्रतसंकल्परूपायाः दीक्षायाः प्रधानमात्रार्थत्वेन अङ्गसाधारणत्वाभावात् । अतो युक्त एव प्रायणीयाऽऽदिषु प्रसङ्गः । दीक्षणीयायां तु सोमार्थव्रतसंकल्पस्य दीक्षणीयोत्तरत्वात् प्रसङ्गानुपपत्तेर्युक्तौ ऐष्टिकव्रतग्रहणतद्विसर्गौ । **बोधायनादयस्तु** तस्यामपि तौ नेच्छन्ति ।

मण्डन-- 'सोमाङ्ग इष्टौ न पुनर्व्रतग्रहः ।'

शंकर-- 'तथा व्रतोपायनं च ।' १२.

* ज्योतिष्टोमे फलचमसः (क्षत्रियवैश्ययोः) । फलचमसाधिकरणम् । **भा.** ३।५।१९।४०-५१. * ज्योतिष्टोमे बहिष्पवमानं नाम स्तोत्रं प्रातःसवने । वि.१।४।३.

* ज्योतिष्टोमे बहिष्पवमाने (उद्गात्रादेः) अपच्छेदे प्रायश्चित्तम् । अपच्छेदः विश्लेषः । **भा.** ६।५।१७-२१। ४९-५६, * ज्योतिष्टोमे 'बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य'। अत्र अभीवर्तो ब्रह्मसाम इति नित्यार्थम् । इतराणि तु नैमित्तिकानि । (ब्रह्मसाम ब्राह्मणाच्छंसिशस्त्रार्थे साम) । ४।३।२।४.

⧗ ज्योतिष्टोमे बृहतीविष्टारपङ्क्त्योरेव प्रग्रथनेन संपादिते बार्हते तृचे रौरवयौधाजयसाम्नोर्गानम् ॥

प्रागाथिकं तु । ९।२।६।२५ वर्णकं २ ॥

भाष्यम्-- एवं वा । अस्ति ज्योतिष्टोमः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति । तत्र 'त्रिच्छन्दा आवापो माध्यंदिनः पवमानः पञ्चसामा, गायत्रामहीयवे गायत्रे तृचे भवतः, रौरवयौधाजये बार्हते तृचे, औशनमन्त्यं त्रिष्टुप्सु' इति । यदेतत् रौरवं यौधाजयं च द्वे सामनी, तयोः पूर्वा बृहती 'पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥' इति । उत्तरा विष्टारपङ्क्तिः 'दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् । आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥' (इति) तदत्र संशयः किमन्ययोः उत्पत्तिबृहत्योः आगमं कृत्वा समासु गानं कर्तव्यम्, उत याऽसौ पूर्वा बृहती उत्तरा च विष्टारपङ्क्तिः, तयोः प्रग्रथनेन तृचकर्म कृत्वा बृहतीकारं गानं कर्तव्यमिति । किं प्राप्तम् ? अन्ये बृहत्यौ आगमयितव्ये इति । कुतः ? एवमृचामुत्पत्तिरर्थवती भविष्यतीति । एवं प्राप्ते ब्रूमः । प्रागाथिकं तु । तुशब्दः पक्षं व्यावर्तयति । प्रागाथिकं सामगानं कर्तव्यं नोत्पत्तिबृहत्यौ आगमयितव्ये । प्रकृतयोरेव प्रग्रथनं कर्तव्यम् । एवं हि स्मरन्ति 'बार्हतः प्रगाथः' इति । उत्पत्तिबृहत्योरानीयमानयोः प्रगाथो न स्यात् । तत्र स्मृतिर्बाध्येत । तस्मात् प्रकृतयोः प्रग्रथनं कर्तव्यमिति ।

स्वे च । २६ ॥

भाष्यम्-- एवं च स्वे छन्दसि प्रकृते गानं भविष्यति । न प्रकृतहानम् अप्रकृतप्रक्रिया । तस्मादपि नान्ये बृहत्यौ आगमयितव्ये इति ।

प्रगाथे च । २७ ॥

भाष्यम्— एवं च प्रगाथशब्द उपपन्नो भविष्यति । स हि प्रकर्षे गानस्य भवति । प्रकर्षश्चेह पुनः पादे उपादीयमाने भवति । तस्मादपि नान्यबृहत्यौ उपादातव्ये इति ।

लिङ्गदर्शनाव्यतिरेकाच्च । २८ ॥

भाष्यम्-- अव्यतिरेकेण च लिङ्गं दर्शयति । किं लिङ्गं भवति ? एवमाह, 'षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति । कथं कृत्वा लिङ्गम् ? यदि प्रग्रथनेन बृहतीकारं गानं क्रियते, ततः सर्वस्मिन् सवने या ऋचः समाम्नाताः, ताः षष्टिर्भवन्ति । इतरथा उत्पत्तिबृहत्योः आनीयमानयोः अभ्यधिका भवेयुः । तदिदं निर्दिश्यते 'गायत्रामहीयवे गायत्रे तृचे भवतः' ताः षड् गायत्र्यः । 'रौरवयौधाजये बार्हते' ता अपि षड् बृहत्यः । 'औशनमन्त्यं त्रिष्टुप्सु'

ता अपि तिस्रस्त्रिष्टुभः । अथ होतुः पृष्ठे बृहति रथंतरे वा सप्तदशस्तोमे क्रियमाणे पञ्च बृहत्यो भवन्ति । द्वादश च ककुभः । कथम् ? एषा हि तत्र विष्टुतिः 'पञ्चभ्यो हिं करोति स तिसृभिः, स एकया, स एकया । पञ्चभ्यो हिं करोति स एकया, स तिसृभिः, स एकया । सप्तभ्यो हिं करोति स एकया, स तिसृभिः, स तिसृभिः' इति । तत्र बृहतीभिस्तिसृभिः प्रथमम् एकया च ककुभा पुनश्च एकया ककुभा । ततः पुनरेकया बृहत्या तिसृभिः ककुब्भिः, एकया च ककुभा । एवं चतस्रो बृहत्यः षट्ककुभः । ततः पुनरेकया बृहत्या, पुनश्च तिसृभिः ककुब्भिः, पुनश्च तिसृभिः ककुब्भिः इति । एवं पञ्च बृहत्यः द्वादश ककुभः इति । ताभिश्च बृहतीभिः सह एकादश बृहत्यो भवन्ति । ततः षण्णां गायत्रीणां चतस्रो गायत्र्यः द्वादशभिः ककुब्भिः द्वादश बृहत्यो भवन्ति, एवं त्रयोविंशतिर्बृहत्यः । ततो वामदेव्ये सप्तदशका गायत्र्यः, पावमानीभ्यां द्वाभ्यां गायत्रीभ्याम् अवशिष्टाभ्यां सह एकोनविंशतिगायत्र्यो भवन्ति । ततो नौधसकालेययोः एकत्र सप्तदश बृहत्यः, एकत्र सप्तदश, ततश्चतुस्त्रिंशत् । पूर्वसंकलिताभिः त्रयोविंशत्या बृहतीभिः सप्तपञ्चाशत् बृहत्यो भवन्ति । यास्ता एकोनविंशतिगायत्र्यः, तासां सप्तपञ्चाशता गायत्रीपादैः सह सप्तपञ्चाशत् बृहत्यः सप्तपञ्चाशत् त्रिष्टुभो भवन्ति । पावमानीभिः त्रिष्टुब्भिः सह षष्टिस्त्रिष्टुभः इति सिद्धं भवति ।

अथ बृहद्रथंतरयोः उत्पत्तिककुभोरागमः क्रियते, ततो याः सवने समाम्नाताः, न ताः षष्टिर्भवन्ति । ये ते द्वे सवने ककुभौ असमाम्नाते आनीयेते तयोर्द्वादशकृत्वः प्रयोगः । तेन सा षष्टिः पूर्यते । यास्ता ऋचः सवने समाम्नाताः, ता इह सवनशब्देनोच्यन्ते, न कर्मणि सवनशब्दप्रयोगः । तत्र हि त्रिषु सवनेषु बह्व्यः त्रिष्टुभो भवेयुः । न षष्टिस्त्रिष्टुभो माध्यंदिनं सवनमिति । तस्मात् याऽसौ पूर्वा बृहती उत्तरा च विष्टारपङ्क्तिः, तत्र प्रग्रथनं कृत्वा गातव्यमिति ।

टुप्— 'षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्, (इत्येतत् दर्शनं प्रग्रथने अवकल्पते, नोत्पत्तिबृहत्योः आनयने) । 'न अत्र कर्मणि सवनशब्दः' ('न कर्मणि सवनशब्दप्रयोगः' इति तु भाष्यवाक्यं दूरस्थम् । तत् व्याचष्टे–) यदि कर्मणि (कर्माङ्गभूतासु ऋक्षु) सवनशब्दः (वर्तेत) तथा सति (सवनशब्दस्य सवनत्रयवाचित्वात्) ज्योतिष्टोममात्रे प्रवृत्तः न माध्यंदिनेन (शब्देन) विशेष्टुं शक्यते । तत्र अयं प्रयोगः (एव) न स्यात् ('षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति, बह्वीनां त्रिष्टुभां भावात्) । यदि सवनशब्दो न कर्मणि (वर्तते किन्तु लक्षणया सवनाङ्गभूतासु ऋक्षु), तथा सति (त्रिष्टुप्शब्दस्य सवनशब्देन) सामानाधिकरण्यमुपपद्यते । यदि च (त्रिष्टुप्शब्दस्य) लक्षणया कर्मणि सवनशब्दः (वर्तेत षष्टित्रिष्टुप्संबन्धि माध्यंदिनं सवनमिति) तथा सति आध्वर्यवे हौत्रे औद्गात्रे च बह्व्यः त्रिष्टुभो भवेयुः (माध्यंदिने सवने), तथा सति 'षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति (प्रयोगः) न स्यात् । (तस्मात् याः सामवेदे माध्यंदिनप्रकरणे समाम्नाता ऋचः तदभिप्रायमिदं वचनम्) । अपिच 'षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति सवनशब्दः (कर्माङ्गभूतासु) ऋक्षु श्रूयमाणः आम्नातासु (एव) वर्तते । यदि च उत्पत्तिबृहत्यौ आनीयेयाताम्, (ततः) दाशतयीभ्यः आगमः स्यात्, (तत्र) तयोः प्रकरणसंबन्धः कर्तव्यः । न च प्रमाणमस्ति । प्रगाथसामर्थ्याच्च अवश्यं प्रग्रथनं कार्यम् । तच्च उत्पत्तिबृहत्योः आनीयमानयोः 'षष्टिस्त्रिष्टुभः' इति असंबद्धम् (स्यात्,) प्रगाथवचनं च (असंबद्धं स्यात्) ।

सोम— माध्यंदिनसवने पवमानस्तोत्रमेकं, चत्वारि पृष्ठानि इत्येवं पञ्च स्तोत्राणि । तत्र पवमानः पञ्चदशस्तोमः, पृष्ठानि सप्तदशस्तोमकानि । तथाच त्र्यशीतिस्तोत्रीयाः । तासां काश्चित् पठिताः, काश्चित् प्रग्रथनलब्धाः काश्चिदभ्यासलब्धाः । तत्र द्वादश ककुभः अष्टाविंशत्यक्षराः, त्रयोविंशतिर्गायत्र्यः चतुर्विंशत्यक्षराः, पञ्चचत्वारिंशत् बृहत्यः षट्त्रिंशदक्षराः, तिस्रः त्रिष्टुभः चतुश्चत्वारिंशदक्षराः । तत्र द्वादशापि ककुभः द्वादशभिर्गायत्र्यर्धैः संयोजिताः सत्यः द्वादश त्रिष्टुभः संपद्यन्ते । एवं च त्रिपदा अष्टौ गायत्र्यः व्यतीताः । अवशिष्टाः पञ्चदश गायत्र्यः, तासां पञ्चचत्वारिंशत् पादाः ।

तावद्भिः पादैः पञ्चचत्वारिंशत् बृहत्यः संयोजिताः पञ्चचत्वारिंशत् त्रिष्टुभः संपद्यन्ते । आम्नाताश्च तिस्रः इत्येवं षष्टिः त्रिष्टुभः संपन्नाः ।

वि— ' यौधाजये रौरवे च बृहत्योरागमोऽथवा । ग्रथनम्, पूर्ववत् पक्षौ, षष्टिर्लिङ्गमिहोच्यते ॥ ' माध्यंदिनपवमाने त्रीणि सूक्तानि ' उच्चा ते जातम् ' इत्येकम्, तत्र तिस्रो गायत्र्यः । ' पुनानः सोम ' इति द्वितीयम्, तच्च प्रगाथरूपम् । तत्र पूर्वा बृहती उत्तरा विष्टारपङ्क्तिः । ' प्र तु द्रव परिकोशम् ' इति तृतीयम्, तत्र तिस्रस्त्रिष्टुभः । पृष्ठस्तोत्रेषु ' अभि त्वा शूर ' इति प्रगाथरूपं प्रथमं सूक्तम्, तत्र पूर्वा बृहती, उत्तरा पङ्क्तिः (सतोबृहती) । ' कया नश्चित्र ' इति द्वितीयम् । तत्र तिस्रो गायत्र्यः । ' तं वो दस्ममृतीषहम् ' इति तृतीयं प्रगाथरूपम्, तत्र बृहतीसतोबृहत्यौ । ' तरोभिर्वो विदद्वसुम् ' इति प्रगाथरूपं चतुर्थम् । एतस्मिन् सवने सप्त सूक्तानि । तेषु नव सामानि गेयानि । प्रथमे सूक्ते गायत्रम् आमहीयवं चेति द्वे सामनी । द्वितीये रौरवं यौधाजयं च । तृतीये औशनम् । चतुर्थे रथंतरम् । पञ्चमे वामदेव्यम् । षष्ठे नौधसम् । सप्तमे कालेयम् ।

भाट्ट— एवं वा । ज्योतिष्टोमे एव माध्यंदिनपवमाने ' त्रिच्छन्दा आवापो माध्यंदिनः पवमानः पञ्चसामा ' इति श्रुतम् । तदर्थविवरणानि च ' गायत्रामहीयवे गायत्रतृचे भवतः, रौरवयौधाजये बार्हते तृचे भवतः, औशनमन्त्यं त्रिष्टुप् (त्रिष्टुप्सु) ' इति । तत्र रौरवयौधाजययोः पूर्वा बृहती उत्तरा विष्टारपङ्क्तिः समाम्नाता । तदिह विशिष्यैव ' बार्हते तृचे ' इति बार्हततृचत्वाम्नानात् उत्तरे द्वे बृहतीछन्दस्के एव समानेतव्ये । इति प्राप्ते, नात्र रौरवयौधाजयोद्देशेन बार्हतविधिः, योनेस्तादृश्याः प्राप्तत्वात् । नापि तृचाधिकरणत्वविधिः, प्राप्तत्वादेव । नापि बार्हततृचाधिकरणत्वविधिः, विशिष्टस्य अव्युत्पन्नत्वात् । अत एव न विशिष्टोद्देशेन सामद्वयविधिः । तत्र तृचोद्देशेन बृहतीछन्दस्कत्वविधिः परं भवेत्, सोऽपि अवच्छेदकावच्छेदेन वा सामानाधिकरण्येन वा उभयथाऽप्यसंभवः । अवच्छेदकावच्छेदेन आश्रीयमाणे प्रगाथस्मरणसमाख्योत्तरापाठादिबाधप्रसङ्गाऽऽपत्तेः । तदनुरोधेन सामानाधिकरण्येनैव आश्रीयते । एवं च वस्तुतस्तस्य प्राप्तत्वात् एतानि वाक्यानि पूर्ववाक्यार्थविवरणार्थानि अनुवादकानि इत्येव ध्येयम् । नहि एतानि उत्तरासु सामप्राप्त्यर्थानि इति केषांचिदुक्तं युक्तम्, ' यद्योन्याम् ' इत्यनेनैव तत्प्राप्तेः । सर्वथा सिद्धमत्रापि प्रग्रथनम् । न चैवं ' बार्हते ' इति वचनस्य योनिबृहतीवत्त्वेनैव उपपत्तेः प्रग्रथने प्रमाणाभावः, तृचसंपत्तिप्रग्रथनस्मरणादिनैव तत्सिद्धेः । एवं च प्रग्रथितबृहतीवत्त्वस्य अवच्छेदकावच्छेदेन विशेषणत्वोपपत्तावपि लक्षणाऽऽपत्तेः तथा नाश्रितमिति ध्येयम् । तत्र आद्यां बृहतीं षट्त्रिंशदक्षरां पठित्वा तदन्त्यपादस्य द्विरावृत्त्या उत्तरायाः विष्टारपङ्क्तेः चत्वारिंशदक्षरायाः आद्यार्धर्चेन एका बृहती, तदन्त्यपादस्य द्विरावृत्त्या द्वितीयार्धर्चेन अपरा, इत्येवंरूपं प्रग्रथनं बोध्यम् । अत्र सर्वत्र अल्पान्तरत्वात् किञ्चिदक्षरन्यूनत्वेऽपि न तच्छन्दस्कत्वविघातः ।

यत्तु भाष्यकारेण (इत्युक्तम् इति दूरमन्वयः) “ षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम् ’ इति लिङ्गमपि प्रग्रथने एवोपपद्यते । तथाहि, माध्यंदिने सवने पञ्च स्तोत्राणि एको माध्यंदिनः पवमानः पञ्चदशस्तोमकः, सप्तदशानि चत्वारि पृष्ठानि । तत्र पवमाने गायत्र–आमहीयवसाम्नोः षड् गायत्र्यः, रौरवयौधाजययोः षड् बृहत्यः, औशनसाम्नः तिस्रः त्रिष्टुभः । होतुः पृष्ठे पञ्च बृहत्यः द्वादश ककुभः, विष्टुतिप्रकारे तथैवाम्नानेन तृचस्य तावद्वारमभ्यासात् । मैत्रावरुणपृष्ठे सप्तदश गायत्र्यः, ब्राह्मणाच्छंस्यच्छावाकपृष्ठयोरपि सप्तदशसप्तदश बृहत्यः एकैकतृचाभ्यासेनैव । एवं पञ्चचत्वारिंशद् बृहत्यो मुख्याः, षण्णां गायत्रीणां चतुर्विंशत्यक्षराणां त्रिपदानां मध्ये चतसृणां गायत्रीणां द्वादशभिरष्टाक्षरैः पादैः सहिता द्वादश । पूर्वोक्ता अष्टाविंशत्यक्षराः ककुभो द्वादश षट्त्रिंशदक्षरात्मिका बृहत्यो भवन्ति । तदेवं सप्तपञ्चाशत् बृहत्यः । ता एताः षण्णां गायत्रीणां मध्ये अवशिष्टाभ्यां द्वाभ्यां गायत्रीभ्यां सह सप्तदशभिः गायत्रीभिः एकैकेन पादेन मिलिताः सप्तपञ्चाशत् बृहत्यः चतुश्चत्वारिंशदक्षरात्मिकाः सप्तपञ्चाशत् त्रिष्टुभो भवन्ति ।

एवमाद्याभिः तिसृभिः त्रिष्टुब्भिः षष्टिस्त्रिष्टुभः । तदेतत् लिङ्गं प्रग्रथने एवोपपद्यते । अन्यथा पवमाने अन्यासां बृहतीनाम्, होतुः पृष्ठे च अन्यासां ककुभां दाशतयीभ्यः समानयने षष्टिसंख्यानुपपत्तेः । अत्र हि न 'षष्टिस्त्रिष्टुभो माध्यंदिनं सवनम्' इति यथाश्रुतं सामानाधिकरण्यमुपपद्यते , बाधात् । अतो जघन्यमाध्यंदिनसवनपदे एव लक्षणामङ्गीकृत्य माध्यंदिनसवनाङ्गभूता याः सामवेदे समाम्नाताः, ताः षष्टिः इत्यर्थावगतेः दाशतयीभ्यः समानयने लिङ्गानुपपत्तिः " इत्युक्तं तत् लक्षणाया आवश्यकत्वे लाघवात् माध्यंदिनसवनस्तोत्रीयाणामेव लक्षणात् आनीतानामपि तत्त्वोपपत्तेः उपेक्षितम् ।

मण्डन--' नोत्तरोत्पत्तिबृहती । ' ९.

शंकर-- 'यौधाजयमुखेषु च । ' प्रगाथः स्यात् । ९.

ज्योतिष्टोमे बृहद्रथंतरयोः स्वयोन्युत्तराप्रग्रथनेन संपादितयोः ककुभोरेव गानम् ॥

प्रागाथिकं तु । ९।२।६।२५ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'बृहत् पृष्ठं भवति' 'रथंतरं पृष्ठं भवति' इति । रथंतरस्यं योनिर्बृहती ' अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥' (इति) । उत्तरा पङ्क्तिः ' न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ' (इति) । बृहतो योनिर्बृहत्ये 'त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्ववर्वतः ॥ ' (इति) । उत्तरा पङ्क्तिरेव 'स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः । गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ' इति । तयोर्वैच्छन्दस्कं (भिन्नच्छन्दस्कं) गानमाम्नायते ' न वै बृहद्रथंतरमेकच्छन्दो यत् तयोः पूर्वा बृहती ककुभावुत्तरे ' इति । तत्रायमर्थः सांशयिकः किमन्ये उत्पत्तिककुभौ आगमय्य गातव्यम् , उत याऽसौ पूर्वा बृहती उत्तरा च पङ्क्तिः, तयोः प्रग्रथनेन तृचकर्म कृत्वा ककुबुत्तराकारं गानं कर्तव्यमिति । किं प्राप्तम् ? उत्पत्तिककुभौ आगमयितव्ये इति । कुतः ? एवमन्यासां ककुभाम् उत्पत्तिरर्थवती भविष्यति , यदि ताः ककुप्कार्ये प्रयुज्यन्ते । आह , ननु वाचःस्तोमे तासामर्थवत्ता भविष्यति । उच्यते । सत्यम् अर्थवत्ता तत्र भविष्यति, ककुप्कार्यार्थताऽपि तु गम्यते । सा नापह्नोतव्येति । **एवं प्राप्ते, ब्रूमः ।** प्रागाथिकं तु । तुशब्दः पक्षं व्यावर्तयति । प्रागाथिकं सामगानं कर्तव्यमिति । याऽसौ पूर्वा बृहती उत्तरा च पङ्क्तिः, तयोः प्रग्रथनं कर्तव्यम् । एवं हि स्मरन्ति । ' काकुभः प्रगाथः ' इति । आह, ननु ककुभि अनाद्यायां ' काकुभः ' इति न प्राप्नोतीति । उच्यते । ' तस्येदम् ' इति, ' तत्र भवः ' इति वा न दोषः ।

टुप्— **' एवं हि स्मरन्ति काकुभः प्रगाथः '** इति । एतदयुक्तम् । बार्हत एवायं प्रगाथः छन्दोगैः स्मर्यते । अतो भ्रान्त्या परिचोदनापरिहारौ ।

स्वे च । २६ ॥

भाष्यम्— एवं च स्वे छन्दसि गानं कृतं भवति । उत्तरापाठेन हि अत्रैषा पङ्क्तिरुपदर्शिता तृचकर्मणि । तत्र प्रकृतहानमप्रकृतप्रक्रिया च न कृता भविष्यति । तस्मादपि तयोः प्रग्रथनं कर्तव्यमिति ।

प्रगाथे च । २७ ॥

भाष्यम्-- एवं चात्र प्रगाथशब्द उपपन्नो भवति । प्रकर्षं हि प्रशब्दो द्योतयति । प्रकर्षेण यत्र गानं स प्रगाथः । कश्च प्रकर्षः ? यत् किञ्चित् पुनर्गायति । तस्मादपि प्रकृतयोः प्रग्रथनं कर्तव्यमिति ।

लिङ्गदर्शनाव्यतिरेकाच्च । २८ ॥

भाष्यम्-- अव्यतिरेकेण च सर्वत्र लिङ्गं दर्शयति । कथमिदम् अव्यतिरेकेणेति । यत् प्रकृतयोरेव प्रग्रथनमुपपद्यते, न प्रकृतव्यतिरेकेणेति । किं लिङ्गं भवति ? एवमाह, ' एषा वै प्रतिष्ठिता बृहती या पुनःपदा, तद्यत् पादं पुनरारभते , तस्माद्वत्सो मातरमभि हिं करोति ' इति । पुनःपादारम्भः प्रग्रथने उपपद्यते, नान्यथा । तस्मात् याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिः, तयोः प्रग्रथनेन तृचकर्म कृत्वा ककुबुत्तराकारं गानं कर्तव्यमिति ।

सोम—प्रग्रथनप्रकारस्तु, 'अभि त्वा...तस्थुषः' इति पठितायां बृहत्यां प्रथमतो रथंतरं गेयम् । सैका स्तोत्रीया । ततः ' ईशानमिन्द्र तस्थुषः ' इति पादं पुनरादाय ' न

स्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ' इत्युत्तरस्या अर्धेन सह गातव्यम्, सा त्रिपदा अष्टाविंशत्यक्षरा ककुप् द्वितीया स्तोत्रीया । ततः ' न जातो न जनिष्यते ' इति पादं पुनरादाय ' अश्वावन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ' इति उत्तरस्या अवशिष्टार्धेन सह गाने अपरा ककुप् संपद्यते, सा तृतीया स्तोत्रीया । एवं बृहत्यपि योज्यम् ।

वि— ' रथंतरे ककुब् ग्राह्या ग्रथ्या वा, ऽऽद्योऽर्थवत्त्वतः । , पुनःपदाप्रसिद्ध्यादेरन्योऽर्थोऽन्यत्र वीक्ष्यताम् ॥ '

भाट्ट— ज्योतिष्टोमे बृहद्रथंतरे सामनी बृहत्योरुत्पन्ने । तयोरुत्तराग्रन्थे एकैकस्य एकैका पङ्क्तिच्छन्दस्का उत्तरा । तत्रेदं वचनम् ' न वै बृहद्रथंतरमेकं छन्दः, यत् तयोः पूर्वा बृहती, ककुभावुत्तरे' इति । तत्र किं पङ्क्तिच्छन्दस्कामुत्तरां परित्यज्य द्वे द्वे ककुभौ दाशतयीभ्यः समानेतव्ये, उत बृहतो योनिम् उत्तरां च पङ्क्तिं प्रग्रथ्य ककुभावुत्तरे संपादनीये इति चिन्तायाम्, प्रग्रथनेन मुख्यककुप्संपत्त्यभावात् अक्षरसाम्यमात्रेण मुख्यककुप्–शब्दस्य गौणत्वापत्तेः जघन्योत्तराशब्दस्यैव असंबन्धिशब्दत्वं परित्यज्य कार्यलक्षणां योन्युत्तरकाललक्षणां वा अङ्गीकृत्य ककुब्–विध्यङ्गीकारात् स्वाभाविकककुभोरेव आनयनम् । एवं च मुख्यतृचगानसंपत्तिरपि । इति प्राप्ते, तथात्वे ' पादं पुनरारभते ' इत्यस्य वैयर्थ्यापत्तेः । ककुप्पदमेव गौणमङ्गीकृत्य उत्तरोद्देशेन ककुप्त्वविधानात् तयोरेव प्रग्रथनेन ककुप्त्वसंपादनम् । एवं वैदिकानां प्रग्रथनस्मरणं बार्हतप्रगाथसमाख्या उत्तराग्रन्थे पङ्क्तेः पाठश्च उपपन्नो भवति । तृचत्वोपपत्तिः सामान्यविधित्वात् तथा अनुपपन्नाऽपि न दुष्यति । प्रग्रथनं च आद्यां बृहतीं सकृत् पठित्वा तस्या अन्त्यपादेन सह द्वितीयाया अर्धर्चं पठित्वा तदन्त्यपादेन सह द्वितीयान्त्यार्धर्चपठनरूपं बोध्यम् । तेन द्वितीया ककुप् अष्टाविंशत्यक्षरैव । आद्यायाः सप्तविंशत्यक्षरत्वेऽपि अल्पान्तरत्वान्न दोषः ।

मण्डन— ' प्रग्रन्थेनोत्तरा ककुप् । ' ८.

शंकर— 'पृष्ठसाम्नोः प्रगाथः स्यात् । ' ८.

* ज्योतिष्टोमे भक्षानुवाकः ग्रहणावेक्षणसम्यग्जरणेषु यथालिङ्गं विनियोक्तव्यः, न तु कृत्स्नो भक्षणे एव । भा. ३।२।९।२५–२६, * ज्योतिष्टोमे भक्षानुवाके गायत्रच्छन्दसः इत्युच्यते । स मन्त्रांशः अनेकच्छन्दस्केऽपि स्यात् । ३।२।१८।४२–४३, * ज्योतिष्टोमे भक्षानुवाके मन्द्रादिः भक्षयाम्यन्तः एक एव मन्त्रः, न तु तृप्यतु इत्येवमन्तः । स च भक्षणे । ३।२।१०।२७, * ज्योतिष्टोमे भक्षमन्त्रः ऐन्द्रेषु अनैन्द्रेषु च, न तु अनैन्द्राणाममन्त्रकं भक्षणम्, नापि यथादेवतमूहः । इन्द्रपीतपदं सवनविशेषणम् । १०।३।११।२८–२९, ३९, ४४.

⧗ ज्योतिष्टोमे भृतिवननं सोमक्रयश्च नित्यौ ॥

याच्ञाक्रयणमविद्यमाने लोकवत् । ६।८।७।२६ ॥

भाष्यम्— इदं समाम्नायते ज्योतिष्टोमे ' द्वादश रात्रीर्दीक्षितो भृतिं वन्वीत ' इति (द्वादशदिनानि सोमयागोपयुक्तं नानाविधं द्रव्यं याचनेन संपादनीयम् इति) । तथा ' सोमं क्रीणाति ' इति । तत्र संदेहः किं यस्य न विद्यते भृतिः, तेन वनितव्या, यस्य च न विद्यते सोमः तेन क्रेतव्यः, उत उभयथाऽपि सति च असति च । किं प्राप्तम् ? याच्ञाक्रयणम् अविद्यमाने भृतिधने सोमे च स्यात् । कस्मात् ? द्रव्यसंभवार्थं याच्ञाक्रयणमर्थवत् भविष्यति । तत् विद्यमाने अनर्थकम् । अनर्थकं च उक्तमपि न कर्तव्यम् । तस्मात् अविद्यमाने भवेत् । लोकवत् । यथा यस्य लोके नास्ति द्रव्यम्, स याचते क्रीणाति च । एवमिहापि द्रष्टव्यम् ।

टुप्–– ' यैस्तु द्रव्यं चिकीर्ष्यते ' (इत्यनेन न्यायेन याच्ञायाः) द्रव्योपादानार्थत्वात् द्रव्यं चिकीर्षितम् । तत् तत्प्रयुक्तं तन्निमित्तं च । इति पूर्वपक्षः ।

नियतं वाऽर्थवत्त्वात् स्यात् । २७ ॥

भाष्यम्— नियतं वा याच्ञाक्रयणम् । तत् विद्यमाने अविद्यमाने च द्रव्ये स्यात् । एवं याच्ञाक्रयणमर्थवत् भवति । ज्योतिष्टोमप्रयुक्तं हि तत् श्रूयते, न द्रव्यप्रयुक्तम् । तच्च नित्यं ज्योतिष्टोमस्य । नैवं वचनं भवति ' यदा द्रव्यं नास्ति तदा कर्तव्यम् ' इति । ज्योतिष्टोमस्य च नित्यमङ्गमुक्तम्, द्रव्याभावो निमित्त-

मुक्तम् इति परिकल्प्येत । कल्पनायां शब्दो बाध्येत । अतो याच्ञाक्रयणसंस्कृतं द्रव्यम् इहोपयोक्तव्यम् । अन्यथा वैगुण्यं भवति । तस्मात् सति च असति च द्रव्ये याच्ञाक्रयणमनुष्ठातव्यमिति । अथ यदुक्तं लोकवदिति, लोके कर्म अर्थलक्षणं भवति, न शब्दलक्षणम् । यथा अर्थः, तथा क्रियते, न यथा शब्दः । वेदे तु शब्देनैव अर्थः अवगम्यते, तथैव अनुष्ठेयमिति । तस्मात् विद्यमानेऽपि कर्तव्यम् ।

टुप्-- प्रकरणाम्नानात् अपूर्वप्रयुक्तं तन्निमित्तं च इति उत्तरः (पक्षः) ।

सोम—इहापि सामान्यश्रुतेः विशेषेषु अविरोधात् विशेषविषयत्वम् इति प्रत्यवस्थानात् संगतिः । इत्थमर्जितमेव द्रव्यमपूर्वं साधयति, नान्यत् इति नियमः ।

वि— ‘ याच्ञाक्रयावभावे स्तो विद्यमानेऽपि वा, ऽग्रिमः । द्रव्यार्थत्वा, दपूर्वार्थे कुर्यात् तौ द्रव्यवानपि ।।’ (क्रयौ अभावे इति च्छेदः) ।

भाट्ट— ‘ दीक्षितो भृतिं वन्वीत ’ इति याच्ञा यस्यापि दक्षिणादानार्थं द्रव्यमस्ति तेनापि कार्या, न त्वविद्यमानद्रव्येणैव । नित्यवच्छ्रवणेन सर्वदैव क्रतुना अपूर्वेण च प्रयुक्तत्वात् । न च अस्याः द्रव्यप्राप्तिद्वारा द्रव्यसंस्कारकत्वात् द्रव्यसत्त्वे च तत्प्रापणोपायवैयर्थ्यात् असत्यपि निमित्तत्वश्रवणे प्रयोजनवशादेव आकाङ्क्षितविधिन्यायेन नियमविधित्वोपपत्तिरिति वाच्यम् । अनाकाङ्क्षितविधानस्य फलकल्पकत्वेन दोषत्वात् प्रकृते चाविद्यमानद्रव्यस्थले द्रव्यप्राप्तिरूपफलवत् विद्यमानद्रव्यस्थलेऽपि तत्फलत्वाविशेषात् कल्पनाऽभावेन दोषत्वाभावात्, याच्ञाप्राप्तद्रव्यस्यैव क्रत्वपूर्वेण ग्रहणात् नित्यत्वोपपत्तेः । एवं विद्यमानेऽपि सोमे क्रयस्यावश्यकत्वम् । ६.

मण्डन—‘ याच्ञाक्रीती द्रव्यभावेऽपि कार्ये । ’ ८.

शंकर—‘ नित्यौ याच्ञाक्रयौ सोमे । ’ ८.

* ज्योतिष्टोमे ‘ मन्द्रं प्रात:सवनम् ’ इतिस्वरेण तत्प्रधानमवरुद्धम् । सु. पृ. ११८०. * ज्योतिष्टोमे माध्यंदिनपवमानोत्तरं चत्वारि पृष्ठस्तोत्राणि भवन्ति अभि त्वा शूर, कया नश्चित्र, तं वो दस्म, तरोभिर्वो इति । तानि च क्रमेण रथंतर–वामदेव्य–नौधस–कालेयसामभिः गीयन्ते । वि. १।४।३, * ज्योतिष्टोमे मुष्टीकरणवाङ्नियमौ सर्वयागाङ्गम् । आनन्तर्याधिकरणम् । ३।१।१४. * ज्योतिष्टोमे मैत्रावरुणाय दण्डदानं संस्कारकमर्थकर्म, न प्रतिपत्तिः । दण्डदानन्यायः । भा. ४।२।६।१६–१८.

ज्योतिष्टोमे मैत्रावरुणादिग्रहेषु श्रयाणर्थेषु पयआदिषु प्रदेयधर्माः न कर्तव्याः ॥

श्रयणानां त्वपूर्वत्वात् प्रदानार्थे विधानं स्यात् । ९।४।१२।४५ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते ‘ पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनम्, धानाभिर्हारियोजनम्, हिरण्येन शुक्रम्, आज्येन पात्नीवतम् ’ । तत्र संशयः किं श्रयणानां प्रदेयधर्मा भवन्ति, उत नेति । कुतः संशयः ? यदि प्रदेयानि श्रयणानि, तत एषु प्रदेयधर्मा भवन्ति, अथ न प्रदेयानि, न भवन्तीति । किं प्राप्तम् ? प्रदेयानि प्रदेयधर्मैः संबध्येरन्निति । श्रयणाद्धि द्रव्यं जायते पयोमिश्रश्च सोमो भवति, संमिश्रे च हूयमाने पयोऽपि होमेन संबध्यते । यदि पयोमिश्रश्च सोमो भवति, तत्र सोमस्य पयसा मिश्र्यमाणस्य न कंचिदुपकारं पश्यामः । यागस्य तूपकारो भवति निर्वृत्तिर्नाम । यदि होमेन संभन्त्स्यते इति मिश्रणाभिप्रायः, तत उपकारकं मिश्रणं दृष्टेनोपकारेण । श्रुतो हि गुणवान् यागः प्रत्यक्षः पयसा निर्वर्त्यते इति । सोमोपकारः कल्प्यः स्यात् । तस्मात् पयसा सोमो मिश्र्यते । स मिश्रितः प्रयोगवचनेन कथं संबध्यते इति । न च प्राकृतं मिश्रणं केनचित् द्रव्येण प्राप्तम्, यत्रेदं द्रव्यान्तरं पयो विधीयते इति अपूर्वत्वात् सोमस्य । तस्मात् प्रदानार्थस्य पयसो विधानं स्यात् । प्रदेयपयोधर्माश्चात्र कर्तव्या इति ।

गुणो वा, श्रयणार्थत्वात् । ४६ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । गुणभूतं पयः स्यात् सोमस्य, न प्रदेयद्रव्यम् । प्रदेयत्वेन अश्रवणात् । सोमार्थेन च श्रुतत्वात् ।

अनिर्देशाच्च । ४७ ॥

भाष्यम्—न होमेन प्रयोगवचनेन वा अस्य संबन्धः । अनिर्देशः परार्थत्वात् । न च प्रत्यक्षेणापि पयस्त्यागे यागनिर्वृत्तिः पयसा । प्रत्यक्षदेवतासंबद्धो हि त्यागो

यागः । न चात्र पयसो देवतासंबन्धः । मैत्रावरुणं ग्रहं गृह्णातीति वचनम्, न मैत्रावरुणं पय इति । तस्मात् दृष्टोपकाराभावात् अदृष्टः सोममिश्रणे सोमसंस्कारोऽभ्युपगम्यते । तस्मान्न प्रदेयधर्मैः संबध्यते इति ।

श्रुतेश्च तत्प्रधानत्वात् । ४८ ॥

भाष्यम्— इतश्च सोमार्थं पयः । कुतः ? श्रुतिर्हि सोमप्रधाना भवति । द्वितीयाविभक्तिः श्रूयते । तस्मात् श्रयणेन सोमः एवेप्स्यते इति ।

अर्थवादश्च तदर्थवत् । ४९ ॥

भाष्यम्— अर्थवादश्च श्रयणस्य सोमार्थस्य भवति । ‘ स मित्रोऽब्रवीत्, पयसैव मे सोमं श्रीणन् ’ इति । नहि भवति पयो मे दद्युरिति । कथं तर्हि ? सोमं पयसा संस्कुर्युरिति । तस्मादपि सोमार्थं श्रयणम् ।

संस्कारं प्रति भावाच्च तस्मादप्यप्रधानं स्यात् । ५० ॥

भाष्यम्-- संस्कारं प्रति श्रयणवचनं भवति । यत्र संस्काराः श्रूयन्ते, तत्रेदं श्रूयते पयसा मैत्रावरुणं श्रीणातीत्येवमादि । तस्मात् संस्कारप्राये श्रवणात् अयमपि संस्कार एवेति गम्यते । भवति हि प्रायोवृत्त्या तद्बुद्धिः । यथा अग्न्यप्राये लिखितः अग्रयः इति गम्यते । तस्मात् प्रदेयधर्मैर्न संबध्यते इति ।

शा-- ‘ द्वितीयया प्रधानत्वं सोमस्यात्रावगम्यते । तृतीयया च तादर्थ्यं पयसः प्रतिपाद्यते ॥ श्रुते चादृष्टसंस्कारकल्पना नैव दुष्यति । तस्मात् प्रदेयधर्माणां न पयःप्रभृतौ क्रिया ॥ ’ १३.

सोम-- पशुकामस्थले पयसि प्रदेयधर्माभावेऽपि श्रयणेषु तद्धर्मप्राप्तिः इत्युत्थितेः संगतिः । सूत्रार्थस्तु– श्रयणानां पयःप्रभृतीनां प्रदानार्थं विधानं स्यात् । न चात्र प्रकृतितः प्राप्तं श्रयणमनूद्य पयःप्रभृतेर्द्रव्यस्य विधानमित्युपपत्तिरस्ति सोमयागस्यापूर्वत्वात् इति ।

वि—‘ मिश्रणे पयआदीनां सोमधर्मा न वा, ऽग्रिमः । प्रदातुं मेलना, न्मैवं संस्कारार्थत्वतः श्रुतेः ॥ ’ १३.

भाट्ट-- सोमे ‘पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनम् ’ इत्यादौ तृतीयया पयःप्रभृतीनां श्रयणं प्रति गुणत्वावगमात् सत्यपि सोमसंसर्गे देवतासंबन्धाभावेन प्रदेयत्वानुपपत्तेः, न प्रदेयधर्माः क्रयादयः । न च प्रयाजशेषन्यायेन श्रयणस्य सोमसंस्कारकत्वे अदृष्टार्थत्वप्रसङ्गात् पयःसंस्कारकत्वावगतेः, तदन्यथाऽनुपपत्त्या यागे तस्य विनियोगकल्पनेन प्रदेयत्वावगतिः । पयःसंस्कारकत्वेऽपि अदृष्टार्थत्वस्य तुल्यत्वात् उत्पत्तिशिष्टसोमावरोधे पयसो निवेशनानुपपत्तेश्च । निषादस्थपत्यधिकरणन्यायेन तृतीयाऽऽदौ लक्षणायां प्रमाणाभावाच्च । प्रयाजशेषवत् उपयुक्तत्वाभावेन अस्मदुक्तप्रयाजशेषन्यायाभावाच्च । तस्मान्नात्र प्रदेयधर्माः । ११.

मण्डन-- ‘ श्रयणं स्यादधर्मकम् । ’

शंकर-- ‘ ग्रहेषु श्रयणे तथा । ’ न प्रदेयता । १३.

* ज्योतिष्टोमे ‘ य एवं विद्वान् षोडशिनं गृह्णाति ’ । अयं षोडशी ग्रहः राजन्यार्थं प्रकृतौ एव । ‘ अग्निष्टोमे राजन्यस्य गृह्णीयात् ’ । स चायम् अत्यग्निष्टोमः इत्युच्यते । ब्राह्मणस्य अग्निष्टोमः अत्यग्निष्टोमश्चापि । वि. १०।५।९। स च उक्थ्यग्रहणोत्तरमाग्रयणपात्राद् ग्राह्यः । १०।५।१०। स च तृतीयसवने एव ग्राह्यः, न पूर्वसवनयोः । १०।५।११, * ज्योतिष्टोमे यजमान एक एव । सत्रे तु नाना । ३।३।१४, * ज्योतिष्टोमे यजमानस्य संस्कारा वपनादयो नाङ्गार्थाः, किन्तु ग्रहैः सोमहोमरूपमुख्यार्थाः । ३।७।२. * ज्योतिष्टोमे यज्ञायज्ञीये गिरापदस्य इरापदेन बाधः । भा. ९।१।१८।५०–५३, * ज्योतिष्टोमे यज्ञायज्ञीये गिरापदस्थानापन्ने इरापदे गानं कर्तव्यम् । ९।१।१९।५४–५८. * ज्योतिष्टोमे ‘यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य च ’ इति । तत्र आतिथ्योपसदग्नीषोमीयास्त्रयोऽपि बर्हिषः प्रयोजकाः । वि. ४।२।१३. * ज्योतिष्टोमे ‘ यदि कामयेत वर्षेत् पर्जन्यः इति, नीचैः सदो मिनुयात् ’ इति कामः याजमानः एव, नार्त्विजः । वचनात्तु ऋत्विजामपि स्यात् यथा ‘ उद्गाता आत्मने वा यजमानाय वा यं कामं कामयते, तमागायति’ (बृउ. १।३।२८) इति । भा. ३।८।५।१३–१४. * ज्योतिष्टोमे ‘ यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रान् ’ अनेन ज्योतिष्टोमे एव पृष्ठस्तोत्रे रथंतरसामत्वे ऐन्द्रवायवाग्रत्वम्, बृहत्सामत्वे

शुक्राग्रत्वम्, जगत्सामत्वे चाग्रयणाग्रत्वं गुणो विधीयते। तत्र जगत्सामत्वे आग्रयणाग्रत्वं विषुवति द्रष्टव्यम्। **वि.** २।३।१. ⁕ ज्योतिष्टोमे याजमानाः धर्माः भोक्तृत्वांशेन केवलप्रधानार्थाः; न तु कर्तृत्वांशेन अङ्गप्रधानार्थाः। **वा.** ३।७।२।६ पृ. १०७७.

ज्योतिष्टोमे याजमानमन्त्राणां न परिसंख्या॥

ज्योतिष्टोमे ये दर्शपूर्णमासविकाराः, तेषु याजमानमन्त्राणां नातिदेशः, 'यज्ञो बभूव स आ बभूव' इति याजमानमन्त्रस्य पुनर्विधानेन गृहमेधीयाज्यभागन्यायेन तदितरपरिसंख्यासिद्धेः। इति प्राप्ते, स्तुतशस्त्रानुमन्त्रणार्थत्वेन तस्य पुनर्विधानेऽपि आज्यभागयोरिव प्रकृतिक्लृप्तोपकारार्थत्वेन तदभावान्न परिसंख्यात्वम्। **संकर्ष.** २।२।४.

⁕ ज्योतिष्टोमे 'युवं हि स्थः स्वर्पती' इति 'द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः' इति। ज्योतिष्टोमात् उत्कृष्टव्ये एते प्रतिपदौ, न तु ज्योतिष्टोमे एव निविशेते। **भा.** ३।३।९।१७–१९, ⁕ ज्योतिष्टोमे यूपस्य स्वरुं करोति। स च पशुत्रयस्य तन्त्रेण। ११।३।५।८–१२, ⁕ ज्योतिष्टोमे यूपैकादशिन्यां चोदकप्राप्ता यूपाहुतिस्तन्त्रम्। ११।२।७।२६–२९.

ज्योतिष्टोमे यूपैकादशिनीपक्षे अञ्जनादिपरिव्याणान्तेन काण्डेन अनुसमयः कर्तव्यः॥

वचनात्तु परिव्याणान्तमञ्जनादि स्यात्। ५।२।५।७॥

भाष्यम्— ज्योतिष्टोमे अग्नीषोमीयपशौ यूपस्याञ्जनाद्याः पदार्थाः श्रूयन्ते। तेषु यूपैकादशिन्यां प्राप्तेषु संशयः किम् अञ्जनादीनामेकैकेनानुसमयः, उत अञ्जनादिना परिव्याणान्तेनेति। किं प्राप्तम्? परिव्याणान्तम् अञ्जनादि स्यात्। कुतः? वचनात्। वचनमिदं भवति। 'अञ्जनादि यजमानो यूपं नावसृजेदापरिव्याणात्' इति। न च शक्यं बहुषु अञ्जनादिना अनुसमयः कुर्तुम्, न चानवस्रष्टुम्। तस्मात् परिव्याणान्तेन अनुसमयः।

कारणाद्वाऽनवसर्गः स्याद्, यथा पात्रविवृद्धिः। ८॥

भाष्यम्-- सहत्वस्य प्रापकः प्रयोगवचनः अनुग्रहीष्यते इति पदार्थेन अनुसमयः। अनवसर्गश्च प्रकृतौ अर्थात् कृतः साहाय्यं यजमानेन अध्वर्योः। एवं दृष्टार्थता अनवसर्गस्य। (अवसर्गः त्यागः स्पर्शाभावः, तदभावः अनवसर्गः)। इतरथा अदृष्टार्थता स्यात्। न च अर्थात् कृतं चोदकः प्रापयति। तस्मात् यूपान्तरेण उच्छ्रयितव्येन कारणेन अवसृजेत्। यथा 'पृषदाज्येन अनुयाजान् यजति' इति अर्थात् तस्य धारणार्थं पात्रं भिद्यते।

न वा, शब्दकृतत्वात्, न्यायमात्रमितरदर्थात् पात्रविवृद्धिः। ९॥

भाष्यम्-- न वा एतत् पदार्थेनानुसमयः इति। परिव्याणान्तेन पदार्थकाण्डेन अनुसमयः स्यात्। शब्दकृतं हि प्रकृतौ अनवसर्जनम्। शक्नोति हि ऋतेऽपि यजमानात् अध्वर्युः यूपमुच्छ्रयितुम्। सौकर्यमिति चेत्, विधिशब्दो बाध्येत। दृष्टार्थता एवं हि नियम्येत भोजने प्राङ्मुखतेव। अतः असंभवात् पदार्थकाण्डेन अनुसमयः। प्रयोगवचनस्य च न्यायमात्रत्वम्। चोदकस्ततो बलीयान्। पात्रविवृद्धिस्तु अर्थात् कर्तव्या।

शा-- पूर्वेण न्यायेन पदार्थानुसमये प्राप्ते, 'नैवं नियमतोऽप्राप्तेरनुत्सर्गो विधीयते। वाक्यं चार्थवदेवं स्याद् वादमात्रं त्वनर्थकम्॥ गणेऽपि चोदकेनातः प्राप्यतेऽनवसर्जनम्। तेनाञ्जनादिसंघोऽत्र संघेनानुसमीयते॥'

वि— 'यूपाञ्जनादिरेवैकः संघो वाऽनुसमीयते।, एकैकः पूर्वव, न्मैवं वचनात् काण्डसंगतेः॥'

भाट्ट-- यूपधर्मा अञ्जनोच्छ्रयणसंमानपरिव्याणादयो यूपगणे अतिदेशप्राप्ताः पृथक्पदार्था अपि न प्रत्येकमनुसमेयाः 'अञ्जनादिपरिव्याणान्तं यजमानो यूपं नावसृजेत्' इति प्रकृतौ अनवसर्गस्य विहितस्य इहापि अतिदेशात्। न चानेन रागप्राप्ते कादाचित्के यूपसंयोगे सति त्यागनिषेधविधिः, पाक्षिकत्वाद्यापत्तेः। अपितु संयोगाभावरूपसंयोगाख्यस्य अनवसर्गस्यैव सहायार्थं नियमविधिः। अतश्च तदनुरोधेन सत्रातिरिक्ते यूपगणे तावत् काण्डस्यानुसमयः। सत्रे तु येनकेनापि

यजमानेन धारणसंभवात् पदार्थानुसमय एव । अन्यत्रापि तावत् अतिरिक्तपदार्थानां प्रत्येकमेवानुसमयः ।

मण्डन-- ' क्रमः परिव्याणयुतेऽञ्जनादौ । '

शंकर— ' यूपानैक्येऽञ्जनादिषु । ' काण्डानुसमयः ।

* ज्योतिष्टोमे रशना द्वितीयाऽपि यूपार्था । वि. ४।४।९, * ज्योतिष्टोमे राजन्यार्थं गृह्यमाणः षोडशिग्रहः उक्थ्येभ्यः परस्तात् अस्तमयकाले गृह्यते ' समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति ' । ५।१।१८, * ज्योतिष्टोमे राजन्यवैश्ययोः फलचमसः होमभक्षयोः । फलचमसाधिकरणम् । ३।५।१९.

ज्योतिष्टोमे रात्रिगतकृत्स्ननिद्रार्थम् आदौ सुकृदेव मन्त्रः अवान्तरनिद्राभेदेऽपि , एवं नदीतरणे अभिवर्षणे अमेध्यदर्शने च ॥

स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् । ११।४।१७।५० ॥

भाष्यम्-- ज्योतिष्टोमे स्वप्नार्थो मन्त्रः ' त्वमग्ने व्रतपा असि ' इति । तत्रैव नदीतरणार्थः ' देवीरापः ' इति । तथा अभिवृष्टस्य ' उन्दतीरोजो धत्ते ' इति । अमेध्यप्रतिमन्त्रणश्च ' अब्रद्धं चक्षुः ' (अब्रद्धं मनो दरिद्रं चक्षुः) इति । स यदा पुनः प्रतिबुद्धः स्वपिति, अनेकस्रोतसं वा नदीं तरति, संतानेन वा अभिवृष्यते, अनेकं वा अमेध्यमेककालं पश्यति, तत्र चिन्ता किं मन्त्रस्यावृत्तिः, अथवा सकृदेव प्रयोगः इति । तत्र विशेषग्रहणात् आवृत्तौ प्राप्तायामुच्यते । स्वप्नादिषु चैवम् , यथा कण्डूयने सकृत् प्रयोगः इत्यर्थः । कृत्स्नां रात्रिमसौ उद्दिश्य स्वप्नमन्त्रं प्रयुङ्क्ते , नैकां निद्राम् । तथा सर्वस्रोतांसि तितीर्षुः, सर्वाभिवर्षणानि, सर्वामेध्यानि च । युगपत् सर्वेषामुपगमात् तत्र न गृह्यते विशेषः । तस्मात् अनावृत्तिर्मन्त्रस्य ।

सोम— स्वप्नादीनां भेदात् आनन्तर्येण विशेषग्रहणात् भेदः इति मन्वानं प्रति पूर्वोक्तातिदेशात् संगतिः । एकस्मिन् देशे अनेकामेध्यदर्शने ' अब्रद्धं मनः ' इति नावर्तते , देशान्तरे तु आवृत्तिः इति कपर्द्युक्तिः चिन्त्या ।

वि-- ' स्वप्नादिमन्त्र आवर्त्यो नो वा, ऽऽद्योऽस्त्वन्तरायतः । , कृत्स्नोद्देशप्रवृत्तत्वान्निमित्ताभेदतः सकृत् ॥ ' १८.

भाट्ट— सोमे स्वापार्थो मन्त्रः ' त्वमग्ने व्रतपा असि ' इति । संपूर्णां रात्रिं निद्रामुद्दिश्यैव मन्त्रपाठात् , सकृत्पठितमन्त्रजन्यस्मृत्यविच्छेदाच्च मध्येमध्ये प्रतिबुध्य पुनःपुनः स्वापेऽपि सकृदेव मन्त्रः । तथा ' देवीरापः ' इति नदीतरणमन्त्रोऽपि स्रोतोभेदेऽपि सकृदेव । तथा अभिवृष्टे ' उन्दतीः ' इति मन्त्रः वर्षधाराभेदेऽपि सकृदेव । तथा ' अब्रद्धं मनो दरिद्रं चक्षुः ' इत्यमेध्यदर्शने प्रतिमन्त्रणमन्त्रोऽपि युगपदनेकामेध्यदर्शने न भिद्यते ।

मण्डन— ' मन्त्रः स्वप्नादिके सकृत् । ' १८.

शंकर— ' स्वप्नादावेवमेव च । ' सकृत् । १८.

* ज्योतिष्टोमे वपनादिसंस्काराः याजमानाः, वचनविशेषात्तु ऋत्विजामपि । वपनाधिकरणम् । भा. ३।८।२।३–८. * ज्योतिष्टोमे वरणकाले ' कच्चित् कल्याण्यो दक्षिणाः ' इति ऋत्विजां प्रश्नः । वि. १०।२।१०, * ज्योतिष्टोमे वरणकाले सोमाभिधानं क्रियते ' ज्योतिष्टोमेनाग्निष्टोमेन सोमेन रथंतरपृष्ठेन गवां द्वादशशतदक्षिणेनाहं यक्ष्ये, तत्र त्वमुद्गाता भव ' इत्यादि । १०।२।११. * ज्योतिष्टोमे वर्त्महोमो वर्त्मन्येव । भा. १०।८।८।१६, * ज्योतिष्टोमे वषट्कर्तुः प्रथमभक्षः एकपात्रे । ३।५।१३।३६–३९.

ज्योतिष्टोमे वषट्कारोऽपि पृथक् सोमभक्षकारणम् ॥

वषट्काराच्च भक्षयेत् । ३।५।१०।३१ ॥

भाष्यम्-- अथ किं समाख्यैव एका भक्षकारणम् ? नेति ब्रूमः । वषट्काराच्च भक्षयेत् । वषट्कारश्च भक्षणे निमित्तम् । कथम् ? वचनात् । एवं हि श्रूयते ' वषट्कर्तुः प्रथमभक्षः ' इति । भक्षणस्य अप्राप्तत्वात् न प्राथम्यविधानार्थं एष शब्दः प्राथम्यविशिष्टं भक्षणमेव विदधाति इति ।

वा— इदमपरं वचनम् ' वषट्कर्तुः प्रथमभक्षः ' इति । तत् किं वषट्कारं निमित्तीकृत्य प्राथम्यविशिष्टं

भक्षणं विधत्ते, उत भक्षणमनूद्य प्राथम्यमात्रं विधत्ते इति विचारः । किं प्राप्तम् ? ‘न चेदन्येन शिष्टाः’ (१।४।६।९) इति (न्यायेन) कथञ्चित् अनुवाद्यत्वे संभवति विशिष्टविधानानुपपत्तेः, प्राथम्यस्य च अप्राप्तत्वात् तदनुवादेन भक्षविधानासंभवात्, एवं वचनं व्यज्यते ‘ यो वषट्कर्तुर्भक्षः, स प्रथमः ’ इति । ननु च अप्राप्तत्वात् भक्षोऽपि अनुवदितुं न शक्यते (उत्तरम्–) समाख्यया प्राप्तत्वात् अनुवादो गम्यते । अस्ति हि तस्य (वषट्कर्तुः) समाख्यया चमसेषु भक्षः, स शक्यः अनुवदितुम् । तेषां च (चमसिनां मध्ये) यो यदा वषट् करोति, स तदा प्रथमो भक्षयेत् । **तत्र एतत् स्यात्**, ग्रहेषु चमसान्तरेषु च प्राप्त्यभावात् अनुवादो नोपपद्यते इति । **नैष दोषः** । नहि अवश्यं यदेव सर्वत्र प्राप्तम्, तदेव अनुवदितव्यम्, सर्वानुवादानां यथासंभवं प्राप्त्यपेक्षत्वात् । न च ग्रहचमसान्तराणां वषट्कर्तृभिः अभक्ष्यमाणानां किञ्चिन्न सिध्यति । प्रतिपत्तिरिति चेत् (प्रतिपत्तिर्न सिध्यति इति शङ्का), वेदविहितप्रतिपत्त्यभावे लौकिकप्रतिपत्तिसिद्धेः । वक्ष्यमाणनिमित्तद्वारेण (अनन्तराधिकरणे, होमाभिषवरूपेण) वा भक्षणोपपत्तिः । **अथोच्यते**, समाख्यया विप्रकृष्टा प्राप्तिः न शक्यते शीघ्रप्रवर्तिन्या श्रुत्या अनुवदितुम् । अतः प्राप्त्यभाववेलायां श्रुतिः प्रवर्तमाना यत्रयत्र वषट्कृतम्, तत्रतत्र अविशेषेण विधास्यति इति । **तदयुक्तम्** । तत्र हि संनिकर्षविप्रकर्षौ अपेक्ष्येते, यत्र विरोधः कश्चित् । इयं तु श्रुतिः अनेकार्थविधिक्लेशभयात् (श्रूयमाणविधिना प्राथम्यविशिष्टभक्षणान्तरविधाने विशेषणविधानार्थं विध्यन्तरकल्पनात् क्लेशः) यथाकथञ्चिदपि प्राप्नुवन्तं भक्षं प्रतीक्षते । यदा ‘ केन चिदपि प्रमाणेन नास्ति प्राप्तिः ’ इति अवगम्यते, तदा विशिष्टविधानमङ्गीकरोति । तथाच प्रकरणादिप्राप्तार्थानुवादेन श्रुतयो गुणानां विधात्र्यः इष्टाः । तस्मात् प्राथम्यमात्रनिमित्तत्वात् न वषट्कारो भक्षकारणम् । **इति प्राप्ते, उच्यते** ।

‘ समसार्थाद् विनिष्कृष्य नैकांशोऽनूद्यते यतः ।
त्र्यङ्गवत् तेन सर्वोऽयमपूर्वोऽर्थो विधीयते ॥ ’

यथैव ‘ त्र्यङ्गैः स्विष्टकृतं यजति ’ इत्यत्र न अङ्गानि अनूद्य त्रित्वं विधीयते, किं तर्हि पूर्वनिष्पन्नः समासार्थो विधेयो भवति, तथा इहापि परिपूर्णस्य पदस्य पदान्तरयोगात् एकदेशनिष्कर्षे च सामर्थ्याभावात् अशक्यमेव अनुवदितुम् ‘ यो वषट्कर्तुर्भक्षः ’ इति । नहि प्राक् समासात् भक्षस्य वषट्कर्तृसंबन्धो युक्तः, सापेक्षत्वे सति समासानुपपत्तेः । **ननु च** ‘ भवति वै प्रधानस्य सापेक्षस्यापि समासः ’ इति सत्यपि वषट्कर्तृसंबन्धे समासः अवकल्पिष्यते । **भवेदेतदेवम्**, यदि भक्षः एवैकः सापेक्षः स्यात्, इह तु प्राथम्यमपि वषट्कर्तृसंबन्धित्वात् सापेक्षम् । नहि प्राथम्यस्य भक्षो निमित्तम्, किं तर्हि वषट्कर्तृत्वम्, अतो ‘ वषट्कर्तुः प्रथमः ’ इत्येवं संबन्ध आपद्येत । ततश्च विस्पष्टमसामञ्जस्यं स्यात् । ‘ यो वषट्कर्तुर्भक्षः ’ इति चानूद्यमाने विशिष्टानुवाददोषः, भक्षमात्रेण वषट्कर्तुरनाक्षेपात् । वषट्कर्तृत्वस्य च क्रियाऽन्तरेष्वपि अनैकान्त्यात् । अन्यतरानुवादे तु सर्वभक्षाणां प्राथम्यं विधीयेत, सर्ववषट्कर्तृव्यापाराणां च । तच्चाशक्यं कर्तुम् । अतो वषट्कर्तृप्राथम्यविशिष्टापूर्वभक्षविधानमेतत् । तयोश्च परस्परनियमात् अत्यन्तसमानविषयत्वम् । अतो यावति विषये वषट्कारः, तावत्येव प्रथमभक्षः । **कथं पुनः** वषट्कारो निमित्तभूतः सन् उपादीयते, कथं च अनुपादीयमानस्य नियमः अवकल्पते ? **उच्यते** । **‘ नियमः सर्वथा तावदेककर्मनिमित्तकः । उपादानानुपादाने न विशेषः प्रतीयते ॥ ’** न च वषट्कर्तृत्वमनुपादेयम् । नहि अत्र यदिशब्दसप्तम्यादिकृतं निमित्तत्वम् । किं तर्हि वषट्कर्तरि क्रियाऽङ्गत्वेन उपादीयमाने अर्थात् निमित्तत्वं भवति । तस्माददोषः । **ननु च** ‘ तस्मादेकं साम तृचे क्रियते स्तोत्रीयम् ’ इति समासस्थामपि ऋचमनूद्य त्रित्वविधानं दृष्टम्, तथा प्राथम्यविधानमपि सेत्स्यति । **न** । तत्रापि समासार्थस्यैव विधानाभ्युपगमात् । सर्वस्तोत्रसाम्नां हि तृचा एवोपादीयन्ते । तत्र यदि सकलः समसार्थो न प्राप्तः स्यात्, ततः सर्वविधिर्भवेत् । सर्वत्र च ऋचः सामचोदनयैव पाठक्रमेण च प्राप्ता दृश्यन्ते । तेन ‘ न चेदन्येन शिष्टाः ’ (१।४।६।९) इत्येवं न विधीयन्ते । ‘ वषट्कर्तुः

प्रथमभक्षः’ इत्यत्रापि यावद्वषट्कारं समासार्थो विधीयते। तत्र यदि ऋग्वदेव सर्वत्र भक्षः प्राप्तः स्यात्, ततो विधिशक्त्या मुच्येत। स तु नवसु चमसेषु ग्रहेषु चाप्राप्तो निमित्तत्वेन चोपनीतो न ह्यातुमनुवदितुं वा शक्यते। यदि तु ऋचामपि क्वचिदप्राप्तिर्भवेत्, ततः समासे विशेषाभावात् भवेदेव विधिः। सर्वस्तोत्रसामसु तु ताः प्राप्ताः। अपिच त्रित्वं ऋचां विधीयते। ताश्च प्रधानत्वात् सापेक्षत्वेऽपि समस्यन्ते। न तु इह प्राथम्यं भक्षमात्रसंबन्धि इत्युक्तम्। तस्मात् वषट्कारनिमित्तं भक्षं पूर्वं कृत्वा भूयः समाख्याभक्षः कर्तव्यः, न तस्यैव प्राथम्यम् इति सिद्धम्।

वि--‘आद्यभक्षे वषट्कर्तुर्विधिः प्राथम्य एव किम्। किंवा तद्युक्तभक्षे स्याद्, वषट्कारनिमित्तके॥ अप्राप्तेरग्रिमो, मैवं समासस्थित्यसंभवात्। विशिष्टस्य विधिस्तस्माद् वषट्कारोऽपि कारणम्॥’

भाट्ट--सोमे एव ‘वषट्कर्तुः प्रथमभक्षः’ इति श्रुतम्। तत् किं भक्षान्तरवचनम्, किंवा समाख्याऽऽदिप्राप्तभक्षानुवादेन प्राथम्यमात्रविधिरिति चिन्तायाम्, भक्षान्तरत्वे प्रमाणाभावात् प्राथम्यमात्रविधिः। न च वषट्कर्तुरपि विधेयत्वे वाक्यभेदः, वषट्कारे निमित्ते भक्षोद्देशेन प्राथम्यविधानात्, रथंतरे निमित्ते ग्रहोद्देशेन ऐन्द्रवायवाग्रत्वविधिवच्च विजातीयानेकोद्देशे वाक्यभेदाभावात्। अतश्च यत्र चमसे हारियोजने वा अध्वर्य्वादेरन्यस्य वषट्कर्तुश्च समाख्यया होमाभिषवाभ्यां लिप्सावचनेन वा भक्षप्राप्तिः, तत्र वषट्कर्तुः प्रथमं भक्षः ततोऽन्यस्येति वचनार्थः। इति प्राप्ते, ‘प्रथमभक्षः’ इति समासरूपे एकस्मिन् पदे एकांशेनोद्देश्यत्वे एकांशेन विधेयत्वे च अङ्गीक्रियमाणे एकप्रसरताभङ्गापत्तेः कर्मान्तरमेवेदम्। न च तस्मिन् दूषकताबीजाभावः, सामर्थ्यभङ्गस्यैव तद्बीजत्वात्। तथाहि सर्वत्रोद्देश्यविधेयभावस्थले उद्देश्ये विधेयान्वयात् पूर्वमुद्देश्यस्योद्देश्यत्वेन क्रियाऽन्वयोऽवश्यं वक्तव्यः। अत एव ‘यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्’ इत्यपि संगच्छते। प्राथम्यं तत्त्वेन प्रथमं क्रियाऽन्वयः, अन्यस्य अतिप्रसक्तत्वात्। तदत्र यत्र भिन्नपदस्थले यागेन स्वर्गं भावयेदित्यादौ तत्तत्पदात् पदार्थोपस्थित्यनन्तरं स्वर्गस्योद्देश्यत्वेन यागस्य च विधेयत्वेन क्रियाऽन्वये प्रथमावगते, पश्चादेव विधेयस्य यागस्योद्देश्ये स्वर्गे अन्वय इति स्थितिः। तद्वच्च इहापि एकपदस्थले भक्षे प्राथम्यान्वयात् पूर्वं भक्षस्य क्रियाऽन्वयोऽभ्युपगन्तव्यः। ततश्च क्रियाऽन्वयात् पूर्वं भक्षप्राथम्ययोर्विशेषणविशेष्यभावानवगमात् एकार्थीभावलक्षणसामर्थ्यभङ्गात् अपरिपूर्णस्य समासपदस्य पदान्तरेण आख्यातेनापि अन्वयायोगात्। यद्यपि च अस्मन्मते वैयाकरणवत् विशिष्टार्थवाचकत्वं न सामर्थ्यम्, तथापि क्रियाऽन्वयात् पूर्वं विशिष्टार्थबोधकत्वमेव तदिति बोध्यम्। अत्र च क्रियाभिन्नं विधेयं बोध्यम्। क्रियाऽऽत्मके विधेये तदन्वयात् पूर्वमुद्देश्यस्य तत्त्वेन क्रियाऽन्वयस्य वक्तुमशक्यत्वात्। अत एव ‘विविदिषन्ति यज्ञेन’ इत्यादौ विविदिषोद्देशेन यज्ञादिभावनाविधानेऽपि न क्षतिः। अतश्च एकप्रसरताभङ्गभिया भक्षान्तरमेव विधेयम्। अत एव ‘लोहितोष्णीषाः’ इत्यादौ अतिदेशात् पूर्वमेव लोहितोष्णीषविशिष्टकर्तार एव प्रचारोद्देशेन विधीयन्ते विशेषणमात्रविधिफलका इति तत्रतत्र एकप्रसरताभङ्गपरिहारप्रकारो वक्ष्यते। अतश्च प्रकृते एकप्रसरताभङ्गभिया प्राथम्यस्य पूर्वकर्मणि अनिवेशात् गुणादेव वषट्कर्तृप्राथम्योभयविशिष्टं भक्षान्तरमेव विधीयते सोमसंस्कारार्थम्। तत्र च यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात् कर्तुः उपलक्षणमात्रत्वेन अर्थान्निमित्तत्वावगतेः वषट्कारनिमित्तकमिदं भक्षणं ग्रहेषु चमसेषु वा अविशेषात् सिद्धं भवति।

मण्डन—‘वषट्कर्ता च भक्षयेत्।’ १०.

शंकर—‘वषट्कारो भक्षहेतुः।’ १०.

* **ज्योतिष्टोमे** वाग्यमः। स च अङ्गप्रधानोभयाङ्गम्। तेन जिह्वाचापल्यनिवारणम्। वि. ३।१।१४, * ज्योतिष्टोमे वाग्विसर्गः हविष्कृदाह्वानकाले श्रुतः। वाङ्नियमश्च प्रणीताप्रणयनकाले। राजसूये नानाबीजेषु तु चरमे काले कर्तव्यः। ११।३।७. * ज्योतिष्टोमे ‘वाससि मिनोति’ ‘वाससोपावहरति’ इति वचनात् सोममानोपावहरणे वासःसाधनके। भाट्ट. १०।६।१९. * ज्योतिष्टोमे वेदिः प्रधानहविषामङ्गहविषां च कृते, न

प्रधानहविषामेव कृते । **भा.** ३।७।३।७,९, * ज्योतिष्टोमे वैश्वदेवो ग्रहयजिर्वर्तते । तत्र सर्वदेवता इज्यन्ते । तन्मध्ये अङ्गदेवता अपि । १२।१।१२।२६.

⧗ ज्योतिष्टोमे वैसर्जनादिहोमेषु आज्यमेव, न सोमः ॥

'वैसर्जनानि जुहोति' इत्यादिभिर्विहितानां सौमिकानां दर्विहोमाणां द्रव्याकाङ्क्षत्वात् प्रकृतः सोम एव बह्वर्थत्वात् नियम्यते । **इति प्राप्ते**, सोमद्रव्यस्य कतिपयकार्येषु आहत्यविधानेन तदितरेषु तदभावध्वननात् आज्यस्यैव कोशादौ हविःपदेन निर्देशेन तस्य अनादिष्टद्रव्ये प्रवृत्तेः, 'आज्यं हविरनादेशे' इति स्मृत्या अनुमतेराज्येनैव ते होमा भवेयुः । अत एव धिष्ण्यव्याघारणसंतापेन 'आज्येन पात्नीवतं श्रीणाति' इत्यत्र आज्यस्य सिद्धवत्कृत्य अनुवाद उपपन्नः । **संकर्ष.** ३।२।२०.

* ज्योतिष्टोमे 'व्रतं कृणुत' इति मन्त्रः पयःपानरूपव्रतसंपादनप्रैषे अन्वितः, न तु वाग्विमोके । 'व्रतं कृणुतेति वाचं विसृजति' इति तु वाग्विसर्गकाले प्रैषपाठः इति कालो विधीयते । **वि.** ३।२।४.

⧗ ज्योतिष्टोमे शालामुखीयादेव आग्नीध्रप्रणयनम् ॥

आग्नीध्रीयाग्नेरपि यज्ञतन्वादिहोमाधिकरणत्वेन आहवनीयत्वावश्यम्भावात् औत्तरवेदिकादेव तस्य प्रणयनम् । **इति प्राप्ते**, शालामुखीयादेव प्रणयनम् । 'अग्निप्रथमाः प्राञ्चोऽभिप्रव्रजन्ति सोमप्रथमा वा' इति श्रुतौ प्राञ्च इति प्रागाभिमुख्येन गमनविधानात् । 'अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहि' इत्यत्र द्वंद्वावगतस्य अग्निप्रणयनसोमराजप्रणयनयोः साहित्यस्य चानुरोधेन शालामुखीयसमीपवर्तिसोमलताया इव तदन्तर्वर्तिन एव अग्नेः प्रणयनं गार्हपत्यापादानकत्वादेव आग्नीध्रीयस्यापि आहवनीयैकदेशत्वमेवेति न तस्य होमाधिकरणत्वभङ्गः । औत्तरवेदिकाग्निप्रणयनोत्तरमपि आग्नीध्रीयप्रणयनपर्यन्तम् आहवनीयांशस्य इह सत्त्वादेव आहवनीयात् इत्यपादानत्वेनोक्तिः । 'एषोऽत ऊर्ध्वम्' इति स्मृतिरपि आग्नीध्रीयप्रणयनोत्तरकालपरेति तु भाष्यम् । **संकर्ष.** ३।२।१४.

* ज्योतिष्टोमे 'शुक्राग्रान् ग्रहान् गृह्णीयादभिचरतः, मन्थ्यग्रान् गृह्णीयादभिचर्यमाणस्य' अत्र शुक्रादीनां न धाराग्रहत्वम् । तथा चापकर्ष एव शुक्रादीनाम् । **वि.** १०।५।१९ । स चापकर्षो धाराग्रहादौ न तु सर्वादौ । १०।५।२० । ग्रहणापकर्षवत् सादनस्याप्यपकर्षः । १०।५।२१ । सादनापकर्षेऽपि प्रदानस्य नापकर्षः । १०।५।२२, * ज्योतिष्टोमे शुक्राग्रत्वं बृहत्सामत्वे 'यदि बृहत्सामा शुक्राग्रान्' ग्रहान् गृह्णीयात् । २।३।१. * ज्योतिष्टोमे षोडश कर्तारो वरीतव्याः । तावत्कर्तृकश्च सोमः स्यात् । **भा.** ३।७।९।२१–२४, * ज्योतिष्टोमे षोडशी तृतीयसवने एव ग्राह्यः । १०।५।११।४४. * ज्योतिष्टोमे षोडशी श्रुतः अग्निष्टोमे एव निविशते, न विकृतौ । **वि.** १०।५।९, * ज्योतिष्टोमे षोडशिसंस्थे प्रातरग्निहोत्रप्रभृति प्रतिहोमानामनुष्ठानम् । ६।५।१४. * ज्योतिष्टोमे संतर्दनं श्रुतं संस्थासु अहीनेषु सत्रेषु च निविशते, न प्रकृतौ । **वा.** ३।३।११।२४–३१

⧗ ज्योतिष्टोमे 'स वैव स्यात्' इति प्राजहितवादः ॥

'यस्यैष धिष्णियो विह्रियते सोऽनुध्यायति' इत्यादिना 'यजमानं वा एतद्विकर्षन्ते यदाहवनीयात् पशुश्रपणं हरन्ति, स वैव स्यान्निर्मन्थ्यं वा कुर्याद् यजमानस्य सात्मत्वाय' इत्यन्तेन पशुश्रपणार्थोऽग्निर्नियम्यते । तत्र स वैव स्यात् इत्यनेन आहवनीय एवोच्यते । 'यजमानो वा आहवनीयः' इत्युपक्रान्तत्वेन तस्यैव बुद्धिस्थत्वात् । **इति प्राप्ते**, प्राजहित एव तत्पदेनोच्यते, निर्मन्थ्येन सह तुल्यकोटिकविकल्पोक्तिसामर्थ्यात् । सर्वत्र कोटिद्वये साधारणधर्मावश्यकत्वात् । प्राजहितस्यापि मन्थनजन्यत्वेन लौकिकनिर्मन्थ्यसाम्यात् । वैदिकनिर्मन्थ्य एव वा स्याल्लौकिकनिर्मन्थ्यो वेति तदर्थात् । आहवनीयहरणे यजमानस्यैव विकर्षणं स्यादिति विनिन्द्य यजमानस्य आत्मलाभाय विधीयमानस्य अग्नेः आहवनीयातिरिक्तत्वावश्यम्भावाच्च । अन्येनान्यस्य सात्मत्वसंभवात् । तस्मात् प्राजहितस्यैवायं वादः । **संकर्ष.** ३।२।२१.

* ज्योतिष्टोमे सत्यवचनादिव्रतेन दार्शिकं व्रतं प्रसङ्गसिद्धम् । वि. ११।१।११, * ज्योतिष्टोमे सदसो नीचमानादौ वृष्ट्यादिकामना याजमानी , न तु आर्त्विजी । काण्डाधिकरणम् । तथाकामाधिकरणम् । ३।८।६, * ज्योतिष्टोमे सदोमण्डपोपस्थानं प्रकृतया ऐन्द्या ऋचा कर्तव्यम्, न तु दाशतयीस्थया कयाचित् । आग्नेयीन्यायः । ३।२।८, * ज्योतिष्टोमे सप्तमपदग्रहणादि सोमक्रयण्यानयनस्य न प्रयोजकम् । अक्षाभ्यञ्जनन्यायः । ४।१।१०, * ज्योतिष्टोमे सर्वस्वदक्षिणाऽपि द्वादशशतेनानमनाभावे दातव्या । ६।७।९, * ज्योतिष्टोमे सवनीयपशौ अनुयाजाः पश्वङ्गम् । तेषां च ‘ आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति ’ इति उत्कर्षः । ४।३।१५, * ज्योतिष्टोमे सवनीयपशुपुरोडाशानां सवनीयपशुतन्त्रमध्यपातित्वात् पशुः तन्त्री, पुरोडाशस्तु प्रसङ्गी । तेन आग्निमारुतादूर्ध्वमुत्कृष्टैरपि पश्वर्थानूयाजैः प्रातःसवनिकपुरोडाशार्थानूयाजानामपि प्रसङ्गसिद्धिः । १२।२।१२. * ज्योतिष्टोमे सवनीयपुरोडाशानां पाशुकतन्त्रेण प्रसङ्गसिद्धिः । सवनीयादिन्यायः । भा. १२।२।१२। ३०–३२. * ज्योतिष्टोमे सवनीयपुरोडाशानां सवनत्रयगतानां कालभेदेनानुष्ठानभेदात् तदीयहविष्कृदाह्वानमन्त्रस्य आवृत्तिः । वि. ११।४।२१, * ज्योतिष्टोमे सवनीयपुरोडाशेषु अनूयाजैः सह पिष्टलेपफलीकरणहोमयोर्नोत्कर्षः । ५।१।१५.

* ज्योतिष्टोमे सादनसंमार्गादयो ग्रहधर्माः सवनत्रयेऽपि कर्तव्याः । ग्रहधर्माधिकरणम् । वि. ३।६।९. * ज्योतिष्टोमे सुत्या पर्वणि, दीक्षणीयेष्टिस्तु ततः पूर्वम् अपर्वणि कर्तव्या । अङ्गगुणविरोधन्यायः । भा. १२।२।९।२९, * ज्योतिष्टोमे सुब्रह्मण्याऽऽह्वानार्थे निगदे ‘ इन्द्रागच्छ , हरिव आगच्छ , मेधातिथेर्मेष, वृषणश्वस्य मेने, गौरावस्कन्दिन् ,अहल्यायै जार’ इत्यादिर्मन्त्रः ऐन्द्रः । विकृतौ तु अग्निष्टुति आग्नेयी सुब्रह्मण्या भवति । तेन तत्र ‘अग्न आगच्छ’ इति ऊहः कर्तव्यः समवेतार्थत्वात् । ‘ हरिवः, मेधातिथेर्मेष० ’ इत्यादौ तु नोहः असमवेतार्थत्वेऽपि स्तुतिपरत्वात् । याज्ञिकास्तु ‘ अग्न आगच्छ रोहिताश्व बृहद्भानो धूमकेतो जातवेदो विचर्षणे ’ इति ऊहं कुर्वन्ति । ९।१।१६।४४.

⧗ ज्योतिष्टोमे सोमेन धिष्ण्यव्याघारणं परिप्लुपात्रेण ॥

‘ शूर्पेण जुहोति ’ इत्यत्र प्रकृतशूर्पस्येव धिष्ण्यानां व्याघारणेऽपि प्रकृतत्वात् ग्रहचमसान्यतरस्मिन् करणत्वेन प्राप्ते, ‘द्रोणकलशात् परिप्लवया राजानमादाय प्रत्यङ्ङासीनो धिष्ण्यान् व्याघारयति ’ इति श्रुतौ आदानकरणत्वेन उपस्थितायाः परिप्लवाया एव व्याघारणेऽपि करणत्वम् । अन्यथा परिप्लवायामादानस्य अदृष्टार्थत्वापत्तेः । संकर्ष. ३।२।१९.

* ज्योतिष्टोमे ‘ सोमेन यजेत ’ अत्र यजतिः अपूर्वस्य कर्मणो विधायकः न तु ‘ ऐन्द्रवायवं गृह्णाति ’ ‘ मैत्रावरुणं गृह्णाति ’ इत्यादीनां कर्मणां समुदायस्यानुवादकः । भा. २।२।६।१७–२०, * ज्योतिष्टोमे ‘ सोमेन यजेत ’ ‘ दाक्षिणानि जुहोति ’ ‘ हिरण्यमात्रेयाय ददाति ’ इत्यत्र प्रतिशब्दम् अपूर्वभेदः । २।२।१।१.

⧗ ज्योतिष्टोमे सोमस्य मानमुपावहरणं च वाससा कर्तव्ये ॥

वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात् । १०।६।२०।७७ ॥

भाष्यम्–– ज्योतिष्टोमे मानोपावहरणे समाम्नाते । तत्र संशयः किं यत्रक्वचित् मानं येनकेनचित् उपावहरणं कार्यम्, उत वाससि मानं वाससा च उपावहरणमिति । किं प्राप्तम् ? अर्थात् यत्रक्वचित् मानम्, येनकेनचित् उपावहरणम् । एवं चानियमे लाघवं प्रयोगप्राशुभावश्च भविष्यतीति । एवं प्राप्ते, ब्रूमः । वाससि मानम्, वससा चोपावहरणं कार्यम् । कुतः ? वचनात् । वचनमिदं भवति । ‘ वाससि मिनोति, वाससा चोपावहरति ’ इति । वचनस्य सामर्थ्यान्नियम्येत । अथवा , नैवात्र संशयः । वचनात् वाससि मानम्, वाससा चोपावहरणम् । एवं प्राप्तमुत्तरविवक्षया कीर्त्यते विशेषं चिन्तयितुम् । यच्च प्राप्तमुत्तरविवक्षया कीर्त्यते , न तत्र पूर्वोत्तरपक्षाभ्यां प्रयोजनमिति ।

सोम–– प्राप्तिसूत्रत्वादेव न पृथक् संगतिः ।

वि— ‘ उपावहरणं मानमपि क्काप्युत वाससि ।, क्कापि स्यात् प्रांशुताभावाद्, वचनाद् वाससोभयम् ॥ ’

भाट्ट-- (२०-२१-२३ इति त्रीण्यपि भाष्यस्थानि अधिकरणानि अत्र एकीकृतानि इति ज्ञेयम्) ज्योतिष्टोमे ‘ वाससि मिनोति, वाससा चोपावहरति ’ इति वचनात् सोममानोपावहरणे वासःसाधनके । अहर्गणे च प्रत्यहं सोमोपावहरणार्थं वासोभेदः स्यात् । हविर्धानशकटे हि स्थापितः सोमः यावान् एकस्याह्नः पर्याप्तः, तावान् प्रत्यहं वाससा उपावहर्तव्यः । अवशिष्टश्च शकटे एव वाससा उपनद्धः स्थाप्यः । तस्मात् इह अर्थात् वासोऽन्तरं प्रागुत्तमात् उत्पादितव्यम्, उत्तमे तु प्रकृतिवत् मानवस्त्रेणैव । न च प्रागुत्तममपि एकमेव मानवस्त्रात् भिन्नं वस्त्रमुपादाय तेनैव प्रत्यहमुपावहरणं कर्तव्यमिति वाच्यम् । उपावहरणवस्त्रस्य ग्रावस्तुते दानविधानात् । तस्य च मैत्रावरुणदण्डदानन्यायेन (४।२।६) ग्रावस्तोत्रीयाऽनुब्रुवाणग्रावस्तुदुत्साहजनकत्वेन प्रात्यहिकत्वावश्यम्भावात् । वस्त्रान्तराण्यपि च न मानकाले एव उपादेयानि । प्रकृतौ हि सौकर्यात् क्रयकालीनमानवाससैव उपनद्धस्य अभिषववेलायां तेनैव वाससा उपावहरणं कृतम्, न तु स एव शास्त्रार्थः अतश्चेह मानकाले तावद्वस्त्रग्रहणे प्रमाणाभावात् उपावहरणकाले एव तदुपादानम् । आर्थिकस्यापि वस्त्रैकत्वस्य बाधात् अध्यायोपयोगिता ।

मण्डन— ‘ मानोपावहरणे वस्त्रे । ’

शंकर-- ‘ मानाहृती वाससा स्तः । ’ २९.

* ज्योतिष्टोमे सोमालाभे पूतीकाः आदाराः फाल्गुनानि वा प्रतिनिधिः । तत्र सोमस्य पूतीकादीनां च न वैकल्पिकत्वम् । किंतु प्रतिनिधित्वनियमः पूतीकादीनाम् । वि. ६।३।१३, * ज्योतिष्टोमे सोमक्रयः अजाहिरण्यादिभिः दशभिर्द्रव्यैः क्रियते । १२।४।३, * ज्योतिष्टोमे सोमद्रव्यस्य अर्थापत्त्या पाक्षिकप्राप्तस्य ‘ सोमेन यजेत ’ इति नियमविधिः । ४।२।९. * ज्योतिष्टोमे सोमप्रवहणे ‘ अनड्वाहौ युनक्ति ’ इति द्विवचनं विवक्षितमेव । भा. ४।१।५।११-१६.

⧗ ज्योतिष्टोमे सोमभक्षः अनुज्ञापूर्वकः एकपात्राणामेव ॥

तदेकपात्राणां समवायात् । ३।५।१७।४३ ॥

भाष्यम्— इदं संदिह्यते किं यःकश्चित् अनुज्ञापयितव्यः, उत समानपात्रः इति । अविशेषाभिधानात् यःकश्चित् । इति प्राप्ते, उच्यते । तत् खलु अनुज्ञापनमेकपात्राणां स्यात् । कुतः ? अनुज्ञापनमिह अङ्गम् । अनुज्ञापनस्य च एतत् रूपम्, यत्र अन्येन कर्तव्यम् अन्यश्चिकीर्षेत्, सः ‘ अनुमन्यस्व ’ इति ब्रूते, सहभोजनादि वा आचरितुकामः चित्तमन्यस्य अनुकूलयति (इति) । तदेतत् नानापात्रेषु नैव संभवति । नहि तत्र अन्येन कर्तव्यम् अन्यो वा चिकीर्षति, सहभोजनादौ वा पदार्थें संमानयति । एकपात्रे तु सोमे साधारणे संस्कर्तव्ये, न्यायेन समो विभागः प्राप्नोति । तत्र अविभज्य पीयमाने कदाचित् अन्येन पातव्यम् अन्यः पिबेत् । तत्र अनुज्ञापनं संभवति ‘ त्वया अर्धं पातव्यं मया अर्धम्, कदाचित् अहम् अभ्यधिकं न्यूनं वा पिबेयम्, तत् अनुज्ञातुमर्हसि ’ इति । ‘ एकपात्रे वा पानं त्वया सह आचरन् अहं तव चित्तप्रसादनं व्याहन्याम् ’ । इति संभवति अनुज्ञापना । तस्मात् एकपात्रेष्वेव एतत् स्यादिति ।

वा-- यदि एतदत्यन्ताप्राप्तं विधीयेत, ततो यतःकुतश्चित् प्रार्थ्येत । लौकिकमेव तु एतन्नियम्यते । तस्य यादृशे विषये प्राप्तिः, सा न निवार्यते । समानपात्राणां तु ‘ समं स्यादश्रुतत्वात् ’ इत्यनेन न्यायेन समविभागे सति वैषम्यप्रसक्तौ अनुज्ञाप्य कार्यम् । सत्यपि सोमेन अनुच्छिष्टत्वे तत्कृते चादृष्टदोषाभावे, प्रत्यक्षेणैव सहभोजनात् व्यलीकोत्पत्तेरुपपत्तेः । अतोऽनुज्ञाऽवसरो भवति । तस्मादेकपात्राणामिति ।

सोम-- प्रकृतानुज्ञानविषयत्वात् संगतिः । सूत्रार्थस्तु- तत् अनुज्ञानम् एकपात्राणमिव स्यात् । तत्रैव प्रयोजनसमवायात् इति ।

वि— ‘ उपह्वानमशेषाणामुत स्यादेकपात्रिणाम् ।, अदृष्टहेतोराद्यः स्याद्, दृष्टाधिक्यादितोऽन्तिमः ॥ ’

भाट्ट—सेयमनुज्ञा यस्य एकस्मिन्नेव पात्रे भक्षप्रसक्तिः तस्यैव ग्राह्या दृष्टार्थतालाभात्, भागाधिक्यादिप्रसङ्गनिमित्तकलहशङ्कानिवृत्त्यर्थत्वात्। उपायान्तरेणापि तन्निवृत्तौ अस्य नियमविधित्वात्। अन्यस्यानुज्ञाने तु अदृष्टार्थत्वमपूर्वविधित्वं दोषः। अत एव यत्र एकस्मिन् पात्रे एक एव भक्षयिता, तत्र नैव अनुज्ञाग्रहणम्। एवं अन्तिमस्यापि भक्षयितुर्न अनुज्ञाग्रहणं प्रयोजनाभावात्। याज्ञिकास्तु आचरन्ति। १३.

मण्डन-- ‘ समपात्रस्त्वनुज्ञाप्यः। ’

शंकर-- ‘ पात्रैक्ये चोपहूतता। ’

ज्योतिष्टोमे सोमभक्षे अनुज्ञायाः याचने दाने च अर्थानुसारेण मन्त्रक्रमः ॥

तत्रार्थात् प्रतिवचनम्। ३।५।१६।४२ ॥

भाष्यम्— एतदवगतम् ‘ तदुपहूत उपह्वयस्व ’ इत्यनेन अनुज्ञापयेत् इति। अथ प्रतिवचने संदेहः किं लौकिकं प्रतिवचनम्, उत एतदेवेति। किं प्राप्तम् ? एतत् वैदिकं प्रश्ने विनियुक्तम्। लौकिकमन्यत् प्रतिवचनं भवितुमर्हति। एवं प्राप्ते, ब्रूमः। तत्र एतदेव प्रतिवचनमिति। ननु प्रश्नलिङ्गमेतत् उपह्वयस्व इति। उच्यते। यत् अस्य पूर्वम् ‘ उपहूतः ’ इति प्रतिवचनस्य समर्थम्, तत् प्रतिवचनकार्ये भविष्यति। आह, विपरीतमेतत् समाम्नानम्। पूर्वं हि प्रश्नेन भवितव्यम्, ततः प्रतिवचनेन। उच्यते। अर्थात् पूर्वं प्रतिवचनकार्ये भविष्यति। अर्थो हि क्रमात् बलीयान् इति।

वा— वदनम् इति वा पाठः (सूत्रे)। समस्तमेव, प्रश्नप्रतिवचनयोरेकत्र वा लौकिकः प्रयोगः। इति प्राप्तौ, उच्यते। अर्थक्रमेण पाठक्रमं बाधित्वा ‘ उपहूतः ’ इत्येवम् अभ्यनुज्ञायां प्रयोक्तव्यः।

सोम— मन्त्रेण अनुज्ञाने उक्ते तत्र मन्त्रनियमविचारात् संगतिः। **सूत्रार्थस्तु**-- तत्र ‘ उपहूत उपह्वयस्व ’ इत्यत्र। प्रतिवचनं अर्थात् सामर्थ्यानुसारात् ‘ उपहूतः ’ इत्यनेन कर्तव्यमिति।

वि— ‘ उपह्वयस्वोपहूत इत्यशेषो द्वयोर्भवेत्। अनुज्ञाऽनुज्ञपनयोरथवाऽसौ विभज्यते ॥, विभागकरणाभावादशेषश्चे, न्न लिङ्गतः। उपह्वयेत्यनुज्ञप्तावनुज्ञाने तथेतरः ॥ ’

भाट्टग्रन्थो गतः पूर्वाधिकरणे।

मण्डन— ‘ प्रत्युक्तिः पूर्वमन्त्रभाक्। ’

शंकर-- ‘ तन्मन्त्रस्य विभागः स्यात्। ’

ज्योतिष्टोमे सोमभक्षे होमाभिषवौ समुच्चितौ कारणम् ॥

होमाभिषवाभ्यां च। ३।५।११।३२ ॥

भाष्यम्— अपरमपि कारणं होमाभिषवौ। कथम् ? ‘ हविर्धाने ग्रावभिरभिषुत्य आहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति ’ इति। न तावदेष क्रमो विधीयते होमे निर्वृत्ते ततो भक्षणमिति। भक्षणस्य अप्राप्तत्वात्। द्वयोश्च क्रमयोर्विधानात्, अभिषुत्य हुत्वेति वाक्यं भिद्येत। अर्थेन च प्राप्तत्वादस्य क्रमस्य। नहि अकृते प्रयोजने कश्चित् प्रतिपादनमर्हति। न च भक्षणाङ्गभावेन होमाभिषवौ चोद्येते अभिषवस्य होमार्थत्वात्, होमस्य च फलार्थत्वात्। तस्मात् होमाभिषवयोः कर्तॄणां भक्षणं विधीयते। ये अभिषुण्वति जुह्वति च, ते भक्षयन्तीति।

वा-- किं एतावद्भिरेव निमित्तैर्भक्षः ? नेत्युच्यते। होमाभिषवाभ्यामपरो भक्षः। कथम् ? एवं हि आह ‘ हविर्धाने ग्रावभिरभिषुत्य आहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति ’ इति। तत्र होमाभिषवौ तावत् सगुणौ प्राप्तौ न विधीयेते। दीक्षावाक्यवत् (‘ अध्वर्युर्यजमानं दीक्षयित्वा ब्रह्माणं दीक्षयति ’ इत्यादिवाक्यवत्) क्रमार्था श्रुतिः इति चेत्, तच्च नास्ति। अर्थादेव अस्य क्रमस्य सिद्धत्वात्। नहि हुतस्य अभिषवः संभवति, न च भक्षितस्य होमः। आहवनीयदेशाच्च सदः (द्वितीयान्तमिदम्) आगच्छन्तः प्रत्यञ्चः एव प्रतिपद्यन्ते। होत्रादीनां च सदसि कर्मप्रवृत्तेः अवश्यं वषट्कारसमाख्यानिमित्तभक्षार्थं सदः (सदसि इत्यर्थः) सोमा आनेतव्याः। अध्वर्युणा च उपहवो दातव्यः। तेन सदसि इत्यनूद्यते।

केवलं तु भक्षणमप्राप्तं विधीयते। तत्र हुत्वा अभिषुत्य इत्येतदुपादानस्य एतत् प्रयोजनम्, कथं नाम तत्समानकर्तृको भक्षः सिध्येदिति। नहि निर्ज्ञातप्रयोजनयोः होमाभिषवयोः भक्षणाङ्गत्वं संभवति। भक्षस्य च सोमसंस्कारत्वमवगतमेव इति नाङ्गत्वार्थमितरसंबन्धश्रवणम्। अतश्च अर्थात् होमाभिषवयोः निमित्तत्वं ज्ञातम्। अतो होमाभिषवकारी अपि सोमं भक्षयेदिति।

वि—'आख्या-वचो-वषट्कारा एव किं भक्षहेतवः। किंवाऽभिषवहोमौ च, तत्राद्योऽस्तूक्तया दिशा ॥, हविर्धानेऽभिषुत्याथ हुत्वा सदसि भक्षयेत्। इति श्रुतत्वतस्तौ च भक्षहेतू यथेतरे ॥' (हेतुः इत्येकवचनमावश्यकम् 'इति हेतुस्तदुद्भवे' इति काव्यप्रकाशवत्)।

भाट्ट-- इदमपरं भक्षस्य निमित्तम् 'हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति' इति। अत्र हविर्धानादीनां सर्वेषां गुणानां विध्यन्तरात् अर्थाच्च प्राप्तत्वात् केवलं होमाभिषवसमानकर्तृकत्वं भक्षमात्रे अप्राप्तं विधेयम्। यद्यपि च हारियोजनादौ होमाभिषवसमानकर्तुरपि भक्षणं प्राप्तम्, तथापि अवयुत्यानुवादे वाक्यवैयर्थ्यापत्तेः तस्य विधेयता। सा च न पूर्वविहितभक्षेषु, सर्वत्र उत्पत्तिशिष्टविशेषविहितकर्त्रन्तरावरोधात्। अतश्च होमाभिषवसमानकर्तृकं भक्षणान्तरमेवेह विधीयते, कर्तृरूपगुणानुरोधेन वा अवेष्टिवत् वषट्कारभक्षस्यैव प्रयोगभेदमात्रम्। न च उत्पत्तौ नियामकाभावः, प्राथम्यस्यैव उत्पत्त्यन्वयिनो वषट्कारवाक्ये नियामकत्वात्। प्राथम्यस्यापि प्रयोगान्वये तु कर्मान्तरमेव इति ध्येयम्। अत्र च होमे अभिषवसमानकर्तृकत्वस्य आध्वर्यवसमाख्याबलादेव प्राप्ते प्रधानान्वयस्य अभ्यर्हितत्वाच्च भक्षे एव अभिषवसमानकर्तृकत्वं होमसमानकर्तृकत्ववत् विधीयते। होमाभिषवयोश्च क्लृप्तफलकत्वात् वषट्कारवदेव अर्थान्निमित्तत्वम्। तयोः समुच्चितयोर्निमित्तता इति षष्ठे (६।४।७) वक्ष्यते। अतश्च यो यदभ्यासे होमाभिषवोभयकर्ता अध्वर्युः प्रतिप्रस्थाता अन्यो वा ग्रहे चमसे वा, स तत्र भक्षयेत्।

मण्डन--'होमाभिषवकर्ता च।' भक्षयेत्।

शंकर--'होमश्चाभिषवस्तथा।' भक्षहेतुः।

❀ ज्योतिष्टोमे सोमभक्षनिमित्तानां समुच्चयः ॥

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे। ३।५। १२।३३ ॥

भाष्यम्-- इदं श्रूयते 'प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातॄणाम्' इति। तत्र संदेहः चमसेषु होमाभिषवयोः कर्तारो वषट्कर्तारश्च किं भक्षयेयुः, उत नेति। किं प्राप्तम्? न भक्षयेयुः। प्रत्यक्षोपदेशाच्चमसानां चमसिनः प्रति 'प्रैतु होतुश्चमसः' इत्येवमादिभिर्विशेषवचनैः, होमाभिषवादिकारिणां सामान्यवाक्येन 'यः सोमो भक्षणेन संस्कर्तव्यः, स चमसेषु चमसिभिः' इति। अथेदानीमन्यन्निमित्तं क्व भविष्यति। अव्यक्तः सामान्यनिमित्तः। क्व, शेषे भविष्यति, यत्र न चमसिनः।

वा— अथ यत्र निमित्तसंपातो भवति, तत्र किमन्यनिमित्तको भक्षः समुच्चीयते, अथ विकल्प्यते, अथवा बाध्यते इति। तुल्यार्थत्वात् विकल्पप्राप्तौ अभिधीयते। प्रैतु होतुरित्यादिना विशेषसंयोगात् अविशेषशास्त्रं होमाभिषवसंबद्धं ग्रहेषु चरितार्थं शक्यं बाधितुम्। अतः शेषे तत् स्यादिति। (अनेन भाष्यं व्याख्यातम्)।

स्याद्वा, कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात्। ३४ ॥

भाष्यम्— स्याद्वा चमसेषु वषट्कर्त्रादीनां भक्षः। प्राप्यते हि तेषां तत्र कारणम्। न च प्रतिषिध्यते। ननु चमसिनां प्रत्यक्षोपदेशात् निवर्तेरन्। उच्यते। अनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात्। प्रैतु होतुश्चमसः इत्येवमाद्यः शब्दा न शक्नुवन्ति वषट्कर्त्रादीन् प्रतिषेद्धुम्। उपदेष्टारो हि ते, न प्रतिषेद्धारः। तस्मात् वषट्कर्त्रादयोऽपि चमसेषु भक्षयेयुः।

वा— स्याद्वा प्राप्तिर्निमित्तत्वात्। वषट्करणादिनिमित्ते सति प्रत्यक्षोपदेशेनैव वषट्कारादिसंबन्धेन प्राप्तिः। न च तस्य सामान्येन प्रवृत्तिः। वषट्कृतेषु सोमेषु विशेषरूपेणैव प्रत्यक्षशिष्टत्वात्। कामं वा समाख्या विप्रकृष्टत्वात् दुर्बला स्यात्। साऽपि तु अनवकाशत्वात् अवश्यमङ्गीकर्तव्या। तथा सति च प्राप्तिमात्रेऽसौ व्याप्रियते, नान्यन्निवर्तते। संभवति हि सावयवस्य द्रव्यस्य अनेकेनापि

भक्षणम्, विशेषतस्तिक्तकटुकस्य सोमस्य । श्रूयते च 'अल्पं भक्षयेत्' इति । न च निःशेषभक्षणे अल्पत्वमवकल्पते । सशेषे च प्रतिपत्त्यपेक्षिणि, भवति भक्षान्तरस्यावकाशः । तस्मात् समावेशः कर्तव्य इति ।

चमसे चान्यदर्शनात् । ३५ ॥

भाष्यम्-- चमसे च अन्यांश्चमसिनो दर्शयति । 'चमसांश्चमसाध्वर्यवे प्रयच्छति । तान् स वषट्कर्त्रे हरति' इति । एको हि स्वश्चमसो वषट्कर्त्रे ह्रियते । तेन बहुहरणदर्शनं नावकल्पते, यदि वषट्कर्त्रादयो न चमसेषु भक्षयेयुः । तस्मात् भक्षयन्तीति ।

सोम-- प्रासङ्गिकी संगतिः । **सूत्रार्थस्तु**-- चमसानां चमसिनः प्रत्यक्षतो विशेषतः उपदेशात् तेन बाधितः अव्यक्तः सामान्यविषयत्वात् चमसविषयत्वेन अस्फुटः वषट्कारादिनिमित्तको भक्षः चमसव्यतिरिक्ते स्यात् इति ।

वि—'हेतुसङ्घे विकल्पः किं बाधो वाऽथ समुच्चयः।, साम्याद् विकल्पो बाध्यन्तां सावकाशाः समाख्यया ॥, नैव वाचनिकं बाध्यं भक्षणेऽत्र विभागशः । सिद्धे विकल्पो नो युक्तः स्वीकार्योऽतः समुच्चयः ॥'

भाट्ट-- अथ यत्र एकस्मिन् पात्रे अनेकेषां भक्षकर्तॄणाम्, एकस्मिन् कर्तरि वा अनेकेषां वषट्कारहोमाभिषवसमाख्याऽऽदिकारणानां समवायः, तत्रैकशेषप्रतिपत्त्यर्थत्वाद्भक्षाणां विकल्पे, प्रत्यक्षशिष्टानामपि वषट्कारादिभक्षाणां सामान्यविहितत्वात् कल्प्ययाऽपि समाख्यया विशेषनिष्ठया प्रमेयबलाबलन्यायेन बाधात् ग्रहविषयत्वावगतेर्भिन्नविषयत्वे वा प्राप्ते, 'अल्पं भक्षयति' इति वचनेन कृत्स्नस्य शेषस्य एकभक्षणप्रतिपाद्यत्वासंभवात् एकेन भक्षणेन प्रतिपादितेऽपि शेषे अवशिष्टशेषस्य भक्षणान्तरेण प्रतिपत्तिसंभवात्, प्राथम्यविधेश्च समुच्चयः । ननु एवं कर्तृभेदेन अनेकेषां भक्षाणां पृथगनुष्ठानेन समुच्चयोपपत्तावपि, यत्र एकस्मिन्नेव कर्तरि कारणानेकत्वम्, तत्र प्रयोगविध्यवगतसाहित्यसंपत्त्यर्थं तन्त्रत्वोपपत्तेर्न पृथगनुष्ठानेन समुच्चयः । वस्तुतस्तु समाख्यायाः ब्रह्मोद्गातृयजमानसदस्यचमसेषु कारणान्तरेण एतत्कर्तृकभक्षस्य अप्राप्तत्वात् विधायकश्रुतिकल्पकत्वेऽपि होत्रकचमसेषु वषट्कर्तृकत्वेनैव तेषां तत्र भक्षस्य प्राप्तत्वात् क्लृप्तप्रवृत्तिनिमित्ततया न विधिकल्पकत्वावकाशः । एवं हारियोजनेऽपि येषां कारणान्तरेण न भक्षप्राप्तिः, तत्प्राप्तिफलक एव सर्वत्वविधिरिति न तत्रापि कारणद्वयस्य एकस्मिन् कर्तरि समवायः इति चेन्न, मैत्रावरुणादिहोत्रकचमसेषु वषट्कारात् तेषामिव होतुरपि वषट्कर्तृत्वात् होतृचमससाधारण्येन च अध्वर्योरपि होमाभिषवकर्तृत्वात् होत्रादीनामपि तद्भक्षणप्राप्तेः, विशिष्य तत्तच्चमसः इत्येवंविधसमाख्यायाः तत्तत्कर्तृकभक्षणान्तरविधिमन्तरेण अनुपपत्तेः । अत एव तन्त्रानुष्ठाने विधिफलाभावेन तन्त्रत्वमपि न । न चैवमपि एकस्मिन्नेव कस्मिंश्चिदभ्यासे समाख्यानिमित्तभक्षकरणमात्रेण समाख्योपपत्तौ न चमससाध्याभ्यासमात्रे तदापत्तिः, समाख्याकल्प्यश्रुतौ अविशेषात् प्रकृतापूर्वसाधनचमसस्थसोमसंस्कारार्थत्वेन तत्तत्कर्तृकभक्षणस्य विधेयत्वेन सर्वत्रैव चमससाध्याभ्यासे तत्प्राप्तेः । अतः सर्वत्रैव एकपात्रे कर्तृभेदे इव एककर्तरि कारणभेदेऽपि युक्तो भक्षणस्य पृथगनुष्ठानेन समुच्चयः । हारियोजने तु माऽस्तु समुच्चयः । याज्ञिकानुष्ठानं चेत्तर्हि तेनास्तु सः । १०.

मण्डन— 'परस्य चमसेऽपि तौ ।' होमाभिषवकर्तारौ ।

शंकर — 'समुच्चयो भक्षणानाम् ।'

* ज्योतिष्टोमे सोमभक्षमन्त्रे अनुवषट्कारदेवता अग्निः नोपलक्षणीयः । अनुवषट्काराधिकरणम् । वि. ३।२।१६.

ज्योतिष्टोमे सोमविक्रयी ऋत्विग्भ्यो भिन्नः ॥

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् । ३।७।१५।३१ ॥

भाष्यम्— अस्ति सोमविक्रयी । तत्र संदेहः स किम् अध्वर्य्वादीनामन्यतमः, उत एभ्योऽन्यः इति । किं प्राप्तम् ? तेषां संकीर्तनात् तेषामन्यतमः । इति प्राप्ते, ब्रूमः । विक्रयी त्वन्यः स्यादिति । विक्रयो न चोद्यते, क्रयश्चोद्यते, तत्र अर्थात् विक्रयः । ज्योतिष्टोमस्य च

पदार्थान् कर्तुम् अध्वर्य्वादयः उत्पाद्यन्ते । न तु विक्रयो ज्योतिष्टोमस्य श्रूयते । तस्मात् नाध्वर्य्वादीनां अन्यतमः इति ।

वि-- ‘ सोमविक्रय्येक एषु न वा , वरणवर्जनात् । एकः, क्रत्वर्थता नास्ति विक्रयस्येति भिद्यते ॥ ’

भाट्ट-- सोमविक्रयी तु अन्य एव । वरणादिकं हि क्रत्वर्थत्वात् तदङ्गपदार्थकरणाय पुरुषानुपादातुं क्रियते । विक्रयस्तु अविहितत्वात् विहितक्रयान्यथाऽनुपपत्त्या आवश्यकोऽपि दोषस्वीकारेण रागतः प्रवृत्तपुरुषकर्तृकविक्रयोपजीवनेनापि क्रयसिद्धेः नाक्षेपाच्च अनङ्गम् । अतस्तत्र वृतानामप्राप्तेः अन्य एवेति ।

मण्डन— ‘ विक्रयी प्रकृतेभ्योऽन्यः । ’

शंकर— ‘ सोमविक्रय्यन्य इष्टः । ’

⧗ ज्योतिष्टोमे सोमशेषभक्षविधानात् अस्ति सोमभक्षः ॥

सोमेऽवचनाद् भक्षो न विद्यते। ३।५।६।१९॥

भाष्यम्-- ज्योतिष्टोमे समामनन्ति सोमान् । तेषु संदेहः किं तेषां शेषो भक्षयितव्यः, उत नेति । किं प्राप्तम् ? सोमे भक्षो न विद्यते । कस्मात् ? अवचनात् । न शक्यमसति वचने अध्यवसातुं भक्षणम् । तस्मात् सोमशेषो न भक्षयितव्यः इति ।

वा—ऐन्द्रवायवे तावत् विशिष्टविधानादपि भक्षो भवेत् । अथेतरग्रहगते चमसस्थे च सोमे संदेहः किं भक्षोऽस्ति नेति । तत्रापि ‘ सर्वतः परिहारमाश्विनं भक्षयति ’ इत्यादिषु ऐन्द्रवायवन्याय एव स्यात् । इदं तु सर्वथा तत्रापि विचार्यते, किं प्राप्ते भक्षे विशेषणमात्रं वचनेन विधीयते, उत विशिष्टविधानमेतदिति । कश्चात्र विशेषः । स यदि वाचनिकः, ततो यावद्वचनमेव कर्तव्यः, अथ तु अन्यतः कुतश्चित्, तत् एकदेशस्थमपि लिङ्गं स्थालीपुलाकन्यायेन समस्तद्योतकं भविष्यति । त्रयश्चेह पक्षाः संभवन्ति । किमन्यार्थदर्शनानां प्राप्त्यपेक्षत्वात् अविधानाच्च नैव भक्षः, उत प्राप्त्यभावात् अन्यार्थदर्शनान्येव वचनीकृत्य यावद्वचनं भक्षः, उत समाख्यावषट्कारहोमाभिषवनिमित्तोऽपि भक्ष इति । किं प्राप्तम् ? आज्यसाकंप्रस्थायीयसौत्रामणीग्रहणवत् समस्तहोमसंयोगात् शेष एव नास्ति, कुतः पुनर्भक्ष इति । न चात्र प्रकृतितः प्राप्तिः, न च प्रत्यक्षोपदेशः । योऽप्युपदेश इव, सोऽपि अन्यपरत्वात् असमर्थः । तस्मान्नास्ति भक्ष इति ।

स्याद्वाऽन्यार्थदर्शनात् । २० ॥

भाष्यम्— भवेद्वा भक्षः । अन्यार्थं हि वचनं (सर्वतः परिहारविधानार्थम् । सर्वतः परिहारो नाम स्वमस्तकस्य समन्तात् चमसस्य प्रदक्षिणीकरणम्) भक्षं दर्शयति । ‘ सर्वतः परिहारमाश्विनं (ग्रहं) भक्षयति ’ ‘ भक्षिताप्यायितान् (भक्षितान् आप्यायितांश्च) चमसान् दक्षिणस्यानसोऽवलम्बे (अनसः ईजधस्तात्) सादयन्ति ’ इति । नासति भक्षणे एवंजातीयका भक्षविशेषाः संभवन्ति ।

वा— यदि अन्यार्थदर्शनानि भवेयुः, ततोऽन्यत्रापि प्राप्तिः स्यात् वचनानि त्वेतानि । तस्माद्यथोपदेशं भक्षोऽयं नान्यत्रेति ।

वचनानि त्वपूर्वत्वात्, तस्माद् यथोपदेशं स्युः । २१ ॥

भाष्यम्-- ननु दर्शनमिदम् , प्राप्तिर्वक्तव्या । उच्यते । वचनानि तर्हि भविष्यन्ति । ‘ सर्वतः परिहारमाश्विनं भक्षयति । तस्मात् सर्वा दिशः शृणोति ’ इति विशिष्टं भक्षणं विधीयते । अपूर्वत्वात् भक्षानुवादो नावकल्पते । अपिचैवम् अपूर्वमर्थं विदधतः अर्थवत्ता भविष्यति । तस्मात् यत्रैव विशिष्टं भक्षणं श्रूयते तत्रैव भवति , नातिप्रसज्यते ।

शा-- तदिदं अतःप्रभृति होमाभिषवाभ्यां च इत्येवमन्तम् एकमधिकरणम् (१९-३२ सू.) । तत्र

‘ भक्षणं नास्ति सोमस्य निःशेषं हूयते यतः ।
शेषे सत्यपि नैवात्र भक्षणं विध्यभावतः ॥ ’

इति पूर्वः पक्षः । (प्राभाकरमतमनूद्य निरस्यति-) यस्तु अग्रबिन्दुनिपातमात्रेण शास्त्रार्थस्य कृतत्वात् न अशेषहोमः इत्याह, तस्य सौत्रामण्यादावपि तथैव स्यात् , उपांशुयाजे च जौहवस्य शेषः स्यात् । अथ शेषकार्यवशात् शिष्येत , ततः तेषामपि प्रयोजकत्वात् शेषनाशदोषापहारादावपि स्विष्टकृदादावपि हविरन्तरागमः स्यात् । तस्मात् अशेषत्वादभक्षणम् (पूर्वपक्षे) ।

सोम— वचनात् ऐन्द्रवायवस्य द्विर्भक्षणम् इत्युपवर्णनापरिहार: अनुपपन्नः, सोमभक्षणस्यैव अभावात् इति प्रत्यवस्थानात् संगतिः। सूत्रे अवचनात् इति छेदः।

वि—'सोमेष्वभक्षो भक्षो वा, न भक्षो ग्रहहोमतः।, अल्पोक्तेरस्ति शेषोऽस्य भक्षोऽपूर्ववचोबलात्॥'

भाट्ट— ज्योतिष्टोमे उत्पत्तिशिष्टोऽपि सोमः अभिषवादिसंस्कारविधिबलात् रसप्रकृतिः। रस एव तु ग्रहचमसादिपात्रवृत्तिः इन्द्रवाय्वादिदेवतासंबन्धात् हविः इति सर्व एव त्यज्यते। अस्य च 'अल्पं जुहोति' इति वचनेन अल्पोद्देशेन प्रक्षेपरूपप्रतिपत्तिविधिः द्यवदानवत्। तत्र च 'ग्रहैर्जुहोति' इत्यादिना पात्रविधिरिति स्थितिः। अत: शेषसत्त्वात् भक्षणं तत्प्रतिपत्तिः। तत्प्रमाणं च समाख्या वचनं च। तत्र समाख्या तावत् 'प्रैतु होतुश्चमस: प्र ब्रह्मणः' इत्यादिका वेदे, याज्ञिकानां सोमचमसः इत्यादिका। अदनार्थस्य चमेर्धातोः अधिकरणवाचके औणादिके असच्प्रत्यये कृते चमसशब्दनिष्पत्तिः। सोमश्चम्यते अस्मिन् इति व्युत्पत्त्या सोमभक्षणसाधनत्वावगतेः तत्समाख्याकल्पितश्रुत्या होत्रादिकर्तृकभक्षणस्य सोमप्रतिपत्त्यर्थत्वसिद्धिः। यदि तु उणादयः अव्युत्पन्ना इति पक्षाश्रयणम्, तदा चमसशब्दस्य पात्रे रूढत्वेन योग्यतयैव होतृचमसादिसंबन्धो भक्ष्यभक्षकत्वादिसंबन्धेनैवेति तया भक्षणसिद्धिरविकला। अतश्च होतृब्रह्मोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणां स्वस्वचमसेषु समाख्यया भक्षः। सदस्यपक्षे तस्यापि स्वचमसे। वचनं तु अग्रे निरूपयिष्यते।

मण्डन— 'ज्योतिष्टोमेऽस्ति भक्षणम्।'

शंकर— 'सोमे भक्षो भवत्येव।'

* ज्योतिष्टोमे सौत्येऽहनि वैकल्पिकी पश्वेकादशिनी समाम्नाता। भाट्ट. ७।४।२. * ज्योतिष्टोमे सौभरं साम नित्यं नैमित्तिकं काम्यं चेति त्रेधा। तत्र षोडशिसंस्थायां 'सौभरमुक्थ्यानां ब्रह्मसाम भवति' इति नित्यतया विहितम्। उक्थ्यस्तोत्राणां मध्यमं ब्रह्मसाम। अतिरात्रसंस्थायां नैमित्तिकम्। षोडशिसंस्थायामेव च पुनः काम्यमपि। वि. २।२।१३, * ज्योतिष्टोमे सौमिकवेदिः सर्वाङ्गप्रधानार्था, न तु प्रधानार्थैव। चिकीर्षाऽधिकरणम्। ३।७।३, * ज्योतिष्टोमे सौम्यचरोः सवनीयपुरोडाशानां च ऐष्टिकैः पात्रैर्होमः, सौमिकैः पात्रैर्न प्रसङ्गसिद्धिः। 'प्रसङ्गो न' इति विन्दौ अधिकरणम्। १२।१।४, * ज्योतिष्टोमे सौम्यचर्वादिषु हविष्कृदाह्वानं न कर्तव्यम्। १२।२।४, * ज्योतिष्टोमे स्तोत्रशस्त्रे प्रधानकर्मणी, न देवतासंस्कारके। स्तुतशस्त्राधिकरणम्। २।१।५, * ज्योतिष्टोमे स्तोमाश्चत्वारः– 'त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंशः' इति। ४।४।१२. * ज्योतिष्टोमे स्त्रीसद्वितीयस्य एकस्यैव पुंसः अधिकारः न तु द्वयोः पुंसोः। द्व्याधानाधिकरणम्। भा. ६। १।५।२२–२३, * ज्योतिष्टोमे स्वप्नार्थो मन्त्रः 'त्वमग्ने व्रतपा असि' इति। स यदा पुनः प्रतिबुद्धः स्वपिति तदापि नावृत्तिर्मन्त्रस्य। कृत्स्नां रात्रिमुद्दिश्य असौ स्वप्नमन्त्रं प्रयुङ्क्ते। ११।४।१७।५०. * ज्योतिष्टोमे हविर्धानमण्डपादेरुपस्थाने प्रकृता का चित् वैष्णव्यादिः ऋक् ग्राह्या। वि. ३।२।८. * ज्योतिष्टोमे हविष्कृत्–अध्रिगुप्रैष–पुरोऽनुवाक्या–मनोतानां प्रतिपशु कालभेदे आवृत्तिः। भा. ११।४।२०।५७–५९, * ज्योतिष्टोमे 'हस्ताववनेनिक्ते' इति हस्तावनेजनं कृत्स्नप्रकरणार्थम्, न तु उलपराजिस्तरणार्थमेव। ३।१।१४।२४–२५. * ज्योतिष्टोमे होत्रकचमसभक्षमन्त्रेषु मित्रावरुणादिभिः सह इन्द्रोऽपि उपलक्षणीयः। वि. ३।२।१२.

ज्योतिष्टोमे होमाभिषवौ सहितौ एकं भक्षनिमित्तम्॥

होमाभिषवभक्षणं च तद्वत्। ६।४।७।२४॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति' इति। तत्र अन्येन वचनेन अभिषव उक्तो यजतिना होम:। तौ तावन्न विधीयेते। न च तयो: क्रमः। अर्थादेव हि स प्राप्तः। तस्मादेककर्तृकं होमाभिषवाभ्यां भक्षणं विधीयते। अभिषवे कृते होमे च तत्कर्तृभिर्भक्षणं कर्तव्यमिति। तत्र एष संदेहः किमुभयं यः कुर्यात् स एव भक्षयेत्, उतान्यतरेणापि भक्षणमिति। किं प्राप्तम्? होमाभिषवभक्षणं च तद्वत्। तद्वदेव स्यात्, यद्वत् हविष

आर्तिः । कथम् ? नैतदेवं संबध्यते, अभिषुत्य ततो हुत्वा ततो भक्षयेदिति । नानेन अभिषवस्य होमस्य च क्रमः कीर्त्यते, अभिषुत्य ये जुह्वति, ते भक्षयन्तीति । वाक्यं ह्येवं भिद्येत, अभिषुत्य भक्षयन्ति, हुत्वा भक्षयन्तीति । तस्मात् होमाभिषवयोः परस्परेण संबन्धो नास्तीति एकेनापि भक्षणं संबध्येत, अपरेणापि अभिषुत्य भक्षयन्तीति । तस्मादन्यतरेण निमित्तेन भक्षणं भवतीति ।

टुप्— (हविर्धाने ग्रावभिरभिषुत्य इत्यादि वाक्यम् अभिषवहोमसमानकर्तृकभक्षणविधायकमिति तृतीये [३।५।११।३२] साधितम्, इह च तदेव उपोद्घातत्वेन स्मारयति–) सत्यपि पदार्थाभिधाने (यद्यपि बहवः पदार्थाः होमाभिषवतत्क्रमप्रत्यग्गमनादयः अभिधीयन्ते तथापि) होमाभिषवयोः क्रमो न विधीयते (होमाभिषवौ तत्क्रमश्च न विधीयन्ते इत्यर्थः), अर्थप्राप्तत्वात् । (यजतिना होमः इति भाष्यम् आक्षिपति–) ननु यागहोमयोर्भिन्नत्वात् होमो विधीयते । उच्यते । वाक्यान्तरेण (यद् ग्रहान् जुहोति इत्यादिना) विहितत्वात् अविधेयः। सदसि भक्षयन्ति इत्यपि अविधेयम् अर्थप्राप्तत्वात् देशस्य (सदोरूपस्य), प्रत्यक्त्वमपि (अविधेयम् अर्थप्राप्तत्वात् । यदि ‘ हुत्वा प्रत्यञ्चः परेत्य ’ इति क्रमो विधीयेत, तत्राह–) होमोत्तरकालं भक्षणम्, होमोत्तरकालम् (एव) प्रत्यक् गमनम् । उभयस्य (अभिषवस्य होमस्य प्रत्यग्गमनस्य च) क्रमो न विधीयते । (पारिशेष्यात्) भक्षः अभिषवकर्तुः होमकर्तुश्च विधीयते । (पूर्वपक्षमाह–) कर्तृसंस्कारत्वात् भक्षस्य (कर्तृगतं) साहित्यम् अविवक्षितम् (उद्देश्याङ्गत्वात्)। ननु अभिषुत्य इति (अपि) साकाङ्क्षत्वात् उत्तरेण (हुत्वा इत्यनेन) क्त्वाऽन्तेन सह संबध्यते (एवं च हुत्वा इत्यनेनापि अभिषवसमानकर्तृकहोमाभिधानात्) उभयविशिष्टेन कर्त्रा संबन्धात् भक्षस्य न एकक्रियाकर्तुर्भक्षः । उच्यते । नास्ति क्त्वाऽन्तानां परस्परसंबन्धः । कुतः ? यतः अभिषुत्य इति (अपि) साकाङ्क्षम्, उत्तरमपि क्ताऽन्तत्वादेव साकाङ्क्षम् (न च साकाङ्क्षयोर्मिथः संबन्धो युक्तः) । तस्मात् यत् निराकाङ्क्षीकरणसमर्थम् (आख्यातम्) तदेव (द्वयमपि) अभिलषति (इति) सर्वान्त्येन (भक्षयन्ति इत्यनेन द्वयोरपि) संबन्धः । एवं (उभयोरपि आख्यातेन) चेत् (संबन्धः, तथा सति) अभिषुत्य (भक्षयन्ति) हुत्वा भक्षयन्ति इति नास्ति (होमाभिषवयोः परस्परं) संबन्धः । प्रत्ययेन (परस्परं) संबन्धे क्रियमाणे वाक्यभेदः (स्यात्) । तस्मात् एकैकेन भक्षणम् इति पूर्वः पक्षः ।

उभाभ्यां वा, नहि तयोर्धर्मशास्त्रम् । २५ ॥

भाष्यम्—– उभाभ्यां वा निमित्ताभ्यां भक्षयेत् । न भक्षणं होमाभिषवयोर्धर्मो विधीयते । किं हि स्यात् ? यदि तयोर्धर्मो विधीयेत, ततो होमाभिषवौ प्रधानमिति भक्षणं गुणः प्रतिप्रधानं भिद्येत । अथ पुनरुभाभ्यां निमित्ताभ्यां भक्षणं विधीयते, तस्मिन् विहिते एकोऽर्थो विहितो भवति, तेनैकं वाक्यम् । तदेतावति पर्यवसितं भवति, अभिषुत्य हुत्वा भक्षयन्तीति । तत्रैतदवान्तरं वाक्यं हुत्वा भक्षयन्तीति । न च महावाक्ये सति अवान्तरवाक्यं प्रमाणं भवति, पदान्तरस्य बाधनात् । यथा ‘ नोद्यन्तमादित्यमीक्षेत ’ इति प्रतिषेधो गम्यते महावाक्यात्, अवान्तरवाक्यात् ईक्षणविधानम् । तस्मात् अन्यतरनिमित्तं भक्षणमश्रुतम् । महावाक्यात् इदमवगम्यते, द्वे निमित्ते भक्षणस्येति । भक्षणं चान्यथा कुर्वन् श्रुतं परित्यजेत् । तस्मादुभाभ्यां निमित्ताभ्यां भक्षणमिति ।

टुप्—– भक्षस्य द्रव्यसंस्कारत्वेन विधिना कर्तुर्गुणभावः । तस्मात् (कर्तुः गुणभूतत्वेन उपादेयत्वात्) उभयक्रियासंयुक्तता विवक्षिता । अत उभयनिमित्तो भक्षः ।

शा— ‘ उद्देश्यत्वान्न साहित्यं तयोः शक्यं विवक्षितुम् । ततः प्रत्येकमेवाभ्यां भक्षणं प्रतिभूयते ॥ ’ अतः प्रत्येकमेव निमित्तम् । उच्यते । ‘ निमित्तत्वे भवेदेवमेकैकस्य निमित्तता । होमाभिषवकर्ता तु भक्षाङ्गत्वेन चोद्यते ॥ ’ अतो येन उभयमनुष्ठितम्, स एव भक्षयेत् ।

सोम— हविष उभयत्वेनेव होमाभिषवयोरपि न परस्परेण विशेषणम्, इति प्रत्यवस्थानात् संगतिः । **सूत्रे** – तद्वत् आर्तिवत् इत्यर्थः ।

वि— ‘ अभिषुत्य ततो हुत्वा खादेदेकैकहेतुता । संहत्य वा निमित्तोक्तौ, साहित्यविधितोऽग्रिमः ।।, होमाभिषवकर्ताऽत्र भक्षाङ्गत्वेन चोद्यते । निमित्तताऽऽर्थिकी तस्मात् साहित्यं हेतुगं मतम् ।। ’

भाट्ट—सोमे ‘हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति ’ इत्यत्र हविर्धानाधिकरणकग्रावकरणकाभिषवस्य आहवनीयाधिकरणकहोमस्य प्रत्यग्गमनस्य सदोऽधिकरणत्वस्य च प्राप्तत्वात् होमाभिषवसमानकर्तृकं भक्षान्तरमेवेदं गुणात् विधीयते इत्युक्तम् । तत्र च होमाभिषवयोः क्लृप्तप्रयोजनयोरेव कर्त्रुपलक्षणत्वात् निमित्तत्वमिति तद्विशेषणस्य एकवाक्योपादानलभ्यसाहित्यस्य अविवक्षितत्वम् । यदि तु अत्रार्थिकं निमित्तत्वं होमाभिषवकर्तुरेव तु उपादेयत्वात् तद्विशेषणं साहित्यं विवक्षितमित्याशङ्क्येत, तथापि प्रयाजशेषाभिघारणन्यायेन भक्षस्य तद्गतकर्तृनियमस्य वा कर्तृसंस्कारकत्वात् हविर्विशेषणस्येव तद्विशेषणस्यापि अविवक्षा । अभिषवमात्रकर्त्रा नेष्टृनेत्रादिना होममात्रकर्तृभिश्चमसाध्वर्य्वादिभिरपि स भक्षः कर्तव्यः । इति प्राप्ते, नियमं प्रति कर्तुः संस्कार्यत्ववादिनः पार्थसारथेर्मते तदापत्तावपि आर्थिकेन विधिना भक्षं प्रति संस्कार्यत्वे उच्यमाने श्रूयमाणेऽपि विधौ कर्तृणामुपादेयत्वात् विशेषणविवक्षोपपत्तौ आर्थिकेन विधिना विशेषणविशिष्टस्यैव कर्तुरुद्देश्यत्वाङ्गीकारेण साहित्याविवक्षाऽनापत्तिः । अतोऽत्र मिलितयोरेव होमाभिषवयोरार्थिकं निमित्तत्वम् । यदि तु क्त्वाप्रत्ययस्य द्वितीयक्त्वाप्रत्ययान्तपदोपात्तक्रियायामपि अन्वयो नाभ्युत्पन्नः, इत्यभिषवसमानकर्तृकत्वं होमे एव विशेषणम्, विशिष्टहोमसमानकर्तृकत्वस्य च भक्षभावनायामन्वय इत्युच्यते, तदा सुतरां विशेषणविवक्षा । इतरथा अभिषवस्यापि अविवक्षाऽऽपत्तेः ।

मण्डन— होतुस्तु भक्षोऽभिषवे सहोमे । ’

शंकर— ‘ होमाभिषवयोर्न सा । ’ अविवक्षा ।

* **ज्योतिष्टोमातिरात्रः** (ज्योतिरतिरात्रः) ऋद्धिकामस्य कातीये । बाल. पृ. ३४. * ज्योतिष्टोमादिः अनिषिद्धफलः अर्थः । ऋजु. पृ. २९. * ज्योतिष्टोमादिः प्रतिनियतजन्मान्तरफलः । वि.१।१।५. * ज्योतिष्टोमादौ उपगातारः ऋत्विग्यजमानेभ्यो न भिन्नाः । भा. ३।७।१४।३०, * ज्योतिष्टोमादौ दक्षिणादानम् ऋत्विगानत्यर्थम् । दक्षिणान्यायः अयम् । १०।२।८।२३-२९. * ज्योतिष्टोमादौ ‘ यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयात् ’ इति वृष्ट्यादिफलं याजमानमेव । तादृशी कामना तु ऋत्विजाम् । क्व चित्तु वाचनिकम् ऋत्विजां फलम् । वि. ३।८।६.

⌛ **ज्योतिष्टोमादौ वर्त्मादिना विशेषविहितेन आहवनीयस्य सामान्यविहितस्य बाधः ॥**

अविशेषेण यच्छास्त्रमन्याय्यत्वाद् विकल्पस्य, तत् संदिग्धमाराद् विशेषशिष्टं स्यात् । १०।८।८।१६ ॥

भाष्यम्— इदं समामनन्ति ज्योतिष्टोमे ‘वर्त्मनि जुहोति ’ इति (वर्त्मनि हविर्धानशकटस्य) । राजसूये ‘ वल्मीकवपामुपगृह्य जुहुयात् ’ इति । इदमपि श्रूयते ‘ यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतो भवति’ इति । तत्र एषोऽर्थः सांशयिकः किं ज्योतिष्टोमे वर्त्मनि होतव्यम्, राजसूये वल्मीकवपायाम्, उत विकल्प एतयोः आहवनीयेन इति । किं प्राप्तम् ? होमार्थत्वात् तावत् वर्त्मवल्मीकवपयोः समुच्चयो न प्राप्तः, अन्यतरेण होमनिर्वृत्तेः कृतत्वात् । होमार्थता चैतयोः प्रतिज्ञायेत । कुतः ? भूतभव्यसमुच्चारणे भूतं भव्यार्थं भवति । न च बाधः अत्यन्तमेव वर्त्मविषयः । आहवनीयहोमः अपह्नुतो भवति विकल्पे, पक्षे तावदनुगृह्यते इति । एवं प्राप्ते, ब्रूमः । अविशेषेण यच्छास्त्रं तस्य आरात् विशेषशिष्टं स्यात् । यत् विशेषेण शिष्यते, तदस्य दूरं स्यात् असंबद्धमित्यर्थः । संदिग्धं हि तत् । कथमिव ? यदि सामान्यं विशेषलक्षणार्थम्, ततो विशेषेऽपि प्राप्तम् । अथ न लक्षणार्थम्, ततो न प्राप्तम् । एवं संदिग्धम् । अथवा सामान्यं विशेषेण विरुध्यते, न विरुध्यते इत्येवं

संदिग्धम् । अथवा सामान्यं तस्मिंश्च विशेषे अन्यस्मिंश्च इत्येवं संदिग्धम् । तत् सामान्यविधानं विशेषविधौ न स्यात् । किं कारणम् ? अन्याय्यत्वाद् विकल्पस्य । कथमन्याय्यो विकल्पः ? **अत्रोच्यते** । यदि वर्त्माद्यधिकरणता एषु होमेषु श्रूयते, सा पक्षे न भवति इति विकल्पमाश्रयता प्रमाणापेक्षा कल्पयितव्या । अथ वर्त्माद्यधिकरणता एषु न श्रूयते, ततः पक्षे सा भवति इति प्रमाणापेतैव । वर्त्मग्रहणं च श्रूयमाणमविवक्षितं स्यात् । अथोच्येत अर्थात् पक्षे भावः, स चार्थो होमनिर्वृत्तिः आहवनीयेनेति, तन्न । यदि होमनिर्वृत्तिमात्रं कर्तव्यम्, तत आहवनीयेनापि अर्थात् सिध्येत् । इह तु वर्त्माद्यधिकरणताऽपि विधीयते । सा आहवनीये उपादीयमाने नोपसंह्रियेत । अनुपसंहारे च प्रयोगवचनो बाध्येत ।

अत्रोच्यते । यद्यपि वर्त्माद्यधिकरणताऽपि विधीयते होमे, गुणभूतत्वात् होमं समीचीनं करोतीति । तत्रानुपसंहारेऽपि न दोषः । अधिकरणान्तरेण समीचीनो भविष्यतीति । तस्मात् विकल्प एवेति । **नेत्युच्यते** । वर्त्मादिहोमसंबन्धोऽत्र विधीयते । स च प्रधानभूतः, न होमः । तस्मिन् अनुपसंह्रियमाणे, न यथाश्रुतं कृतं स्यात् । **अत्रोच्यते** । संबन्धेऽपि विधीयमाने द्वयं विधीयते एकं साध्यम्, एकं साधनम् । यत् साध्यम्, तत् प्रधानम् । स च होमः । तस्मात् विकल्पः । संबन्धेऽपि च श्रूयमाणे अवश्योपादातव्यो भवति होमः । होमश्चेत्, आहवनीयः प्राप्नोत्येवेति । **तन्न** । आहवनीयस्य अनङ्गत्वात् । कथमनङ्गत्वम् ? विशेषेषु अप्राप्तेः । कथमप्राप्तिः ? वर्त्माद्यधिकरणतायां सत्याम् आहवनीयाधिकरणताया ज्ञानं करणं च प्रति असंभवात् । यद्धि वर्त्माद्यधिकरणमिति ज्ञायते, न तदाहवनीयाधिकरणं शक्यं ज्ञातुं कर्तुं वा । **आह** । यथा शक्यते तथा कर्तव्यम्, इत्याख्यातार्थो भविष्यति । तस्मात् वर्त्मादि बाधित्वा आहवनीयो भविष्यतीति । **उच्यते** । स्यादेतदेवं यदि वर्त्मादिबाधामन्तरेण आहवनीयोपदेशो नावकल्पेत । द्वेधा हि शक्यते कर्तुं वर्त्मादि बाधित्वा, परिहृत्य वा । तत्र बाधायां ‘ वर्त्मनि ’ इति प्रत्ययः अपह्नोतव्यो भवति । तस्मात् परिहारः श्रेयानिति । **आह**, परिहारेऽपि ‘ आहवनीये भवति ’ इति प्रत्ययः अपह्नूयेत । अपह्नोष्यामहे, भवति आहवनीयप्रत्ययः । अशक्योऽसौ कर्तुमित्यपि किं न भवति । अशक्यं न करिष्यते । **आह**, योऽयं सामान्यप्रत्यय उच्यते स सर्वेषु विशेषेषु कार्यमासञ्जति । एवं चेत् वर्त्मादिहोमेषु चान्यत्र च तेन आहवनीयो विहितः । तत्र यो वर्त्मादिहोमे आहवनीयप्रत्ययः, स न शक्यः परिहर्तुम् । अतो वर्त्मादिहोमं बाधित्वा अवतिष्ठेतेति । **अत्रोच्यते** । नैतदेवम् । नहि सामान्यवाची शब्दो विशेषानभिवदति । यदि चाभिवदेत्, अद्यजाते गवि नावकल्पेत, पूर्वदर्शनाभावात् । सामान्ये च दृष्टपूर्वत्वात् अवकल्पते । तस्मान्न सामान्यं विशेषानभिवदति । तस्मान्न वर्त्मादिहोमे आहवनीयप्रत्ययः । अभिवदन् वा न मुख्यया वृत्त्या अभिवदेत् । कथं तर्हि ? लक्षणया । लक्षणा च श्रुत्या बाध्येत । तस्मात् वर्त्मादिहोमे श्रुत्या वर्त्मादिषु प्राप्तेषु अशक्य आहवनीयो विज्ञातुं कर्तुं चेति । **आह** । ननु विपरीतमपि एतत् स्यात्, आहवनीये प्राप्ते वर्त्मादिप्रत्ययो न शक्य इति । भवेदेवम्, किन्तु विशेषे वर्त्मादिप्रत्ययः श्रौतः, आहवनीयप्रत्ययो लक्षणया । तत्र श्रुतिप्रत्ययो बलीयानित्युक्तम् । ननु सामान्येऽपि आहवनीयप्रत्ययः श्रौतः । **उच्यते** । वर्त्मादिप्रत्ययोऽपि सामान्ये श्रौतः । होमे हि स विशिष्टे विधीयते, न अहोमे एतत् विशेषयति । तस्माद्वर्त्मादिहोमं वर्जयित्वा अन्येषु होमेषु आहवनीयः करिष्यते इति ।

टुप्–– (गतो नञ्प्रसङ्गः । इदानीं प्राप्तबाधसामान्यात् सामान्यस्य विशेषेण बाधश्चिन्त्यते) ननु अदृष्टार्थत्वात् पदाहवनीययोः न विकल्पः, न बाध्यबाधकभावः (किन्तु समुच्चय एव विरोधाभावात् तेन अनारभ्यमधिकरणम्) । कथम् (अदृष्टार्थता ? उत्तरम्–) याग आधारं नाक्षिपति, विनाऽप्याधारेण सिध्यमानत्वात् । यदि च (आधारम्) आक्षिपेत्, (तथा सति) आहवनीयो नियम्येत । यथा ‘ आग्नेयोऽष्टाकपालो भवति ’ इति (अष्टाकपालेन यत्किञ्चित् प्रकृति-) द्रव्यमाक्षिप्तम्, तत्र व्रीहयो नियम्यन्ते । इह (तु) आधारः वचनसामर्थ्यात् विधीयते (न तु आक्षिप्तो

नियम्यते । तेन अदृष्टार्थता) । तस्मात् यथा प्रायाजाः (अदृष्टेन उपकुर्वन्तः) नोपहोमादिभिः (सह) विकल्प्यन्ते, न च बाध्यबाधकभावः । एवमिहापि (पदाहवनीययोः) । तथा च न देवताऽग्निशब्दक्रियाणां प्रतिनिधिः इत्युक्तम् (६।३।५।१०) । (दृष्टार्थत्वे हि स्यादेव प्रतिनिधिः) । तेन प्रतिनिधिकाण्डन्याये स्थिते (६।३।४।१३–१७) (समुच्चयस्यैव युक्तत्वात्) कथमिदम् (अधिकरणं) आरभ्यते ? उच्यते , सत्यम् । ‘ आग्नेयोऽष्टाकपालो भवति ’ इति (अनेन) यथा द्रव्याक्षेपः, तथा न (यागेन) आक्षिप्त आहवनीयः, तथापि न अनाकाङ्क्षितः संबध्यते । (तथाहि) ‘ यदाहवनीये ’ इति (सप्तम्यन्तम्) साकाङ्क्षम् ‘ जुहोति ’ इति (अनेन) निराकाङ्क्षीक्रियते, जुहोति इत्यपि (साकाङ्क्षम्) आहवनीयेन (निराकाङ्क्षीक्रियते) । यदि (हि अत्र) आकाङ्क्षा न स्यात् (तथा सति ‘ यदाहवनीये जुहोति ’ इति) संबन्ध एव न स्यात् (तेन आधाराधेयत्वेन आकाङ्क्षावशात् संबन्धः । ततः) स च (आहवनीयः) विधीयमानः (होमस्य) दृष्टेनैव उपकरोति, द्व्यवदानस्य आधारतां प्रतिपद्यते । (तेन दृष्टार्थयोरपि पदाहवनीययोः आधारत्वात् तस्य च दृष्टत्वात् न समुच्चयः इति । दृष्टार्थतां मत्वा चोदयति) एवं वर्ण्यमाने सिध्यतो बाधविकल्पौ, प्रतिनिधिस्तु प्राप्नोति (दृष्टार्थत्वात्) द्रव्यान्तरवदिति । उच्यते । युक्तं द्रव्यान्तरेषु । तत्र (हि) ‘ आग्नेयोऽष्टाकपालो भवति ’ इति यागः फले चोदितः । (तत्र) यदा व्रीहयो न सन्ति प्रक्रान्ते कर्मणि, तदाऽपि यागचोदना (तन्निर्वृत्त्यर्थम्) द्रव्यमाक्षिपति । (सति चाक्षेपे युक्तः प्रतिनिधिः) । यदा तु (प्रक्रान्ते कर्मणि) आहवनीयो नास्ति, तदा (यागचोदना) नाक्षिपत्याहवनीयम् (विनाऽपि तेन यागस्योपपत्तेः) । तेन नाहवनीयस्य प्रतिनिधिः । ननु अनेन न्यायेन (यागचोदनया अनाक्षिप्तत्वात् न प्रतिनिधिः इति) देवतायाः प्रतिनिधिः प्राप्नोति (यागेन आक्षिप्तत्वात्) । तत्र (के चित्) वर्णयन्ति । सादृश्येन प्रतिनिधिः । यदि (मुख्य-)देवताशब्दो न स्मर्यते (ततस्तस्य) सादृश्यमेव न ज्ञायते (इत्यशक्यत्वान्न प्रतिनिधिः) । अथ (तु) स्मर्यते (तथा सति लब्धे मुख्ये) स एवोच्चारणीयः (न प्रतिनिधिरिति । इदं मतं दूषयति–) एवं वर्ण्यमाने यदा व्रीहयो नष्टाः प्रक्रान्ते कर्मणि (तत्र) वचनसामर्थ्यात् यागः अवश्यं समापनीयः, न च व्रीहीन् स्मरति, तेषां चास्मरणात् न शक्नोति सादृश्यं संपादयितुम्, ईदृश्यामवस्थायां यागो नैव कार्यः । न च ईदृशी अवस्था नास्ति इति (प्रत्यवस्थातव्यम् ।) कदा चित् विद्यते (चित्तभ्रमेण) । तस्मात् (सादृश्याभावात् देवतायाः प्रतिनिधिर्नास्ति इति-) एतदयुक्तम् । तेन अन्या उपपत्तिः (देवतायाः प्रतिनिध्यभावे) वक्तव्या । सा च षष्ठे वर्णिता (६।३।५ अधिकरणे) । (प्रकृतमुपसंहरति–) तेन (अदृष्टार्थत्वात्) आहवनीयस्य (यागचोदनया) अनाक्षेपात् प्रतिनिधिकाण्डेन नेदं विरुद्धम् । अपिच आहवनीयः पदनिरपेक्षः सप्तम्या आधारत्वं प्रतिपद्यते, पदमपि आहवनीयनिरपेक्षम् , (तस्मादपि असमुच्चयः) । यथा ‘ व्रीहिभिः ’ इति (करण-)विभक्तिः व्रीहीन् यवनिरपेक्षान् प्रतिपादयति यागसाधनत्वेन, तथा ‘यवैः’ इति । तत्र यः समुच्चयं कुर्यात्, नासौ पुरोडाशं न निर्वर्तयति (शक्यो हि मिश्रैरपि पुरोडाशो निर्वर्तयितुम्) किन्तु वाक्येन योऽर्थः प्रतिपादितः (नैरपेक्ष्यरूपः) तं बाधेत (तेन शब्दादेव तत्र विकल्पः, न वस्तुस्वभावात्) । एवमिहापि । अपिच व्रीहियवाभ्याम् (मिश्राभ्यामपि) पुरोडाशो निर्वर्तते (एव), न (तु) प्रत्यक्षविरोधः (कश्चिदस्ति) । पदाहवनीययोस्तु समुच्चये (सति) पदे वा आहवनीयो निक्षिप्येत, आहवनीये वा पदम् । यदा आहवनीयः (पदे निक्षिप्तः होमस्य) अधिकरणम् (भवति) तदा पदमधिकरणं न स्यात् । एवं पदेऽपि (होमाधारे वक्तव्यम्) तस्मात् न वस्तुतो न शब्देन पदाहवनीययोः समुच्चयो घटते ।

उदाहरणे तु चोद्यते । ‘पदे जुहोति’ ‘वर्त्मनि जुहोति’ इति जुहोतिश्रवणं तुल्यमाहवनीयपदयोः । एवमत्रापि होमसामान्यमेव अन्यत्रापि तदेव । तस्मादत्र (सामान्यविशेषभावाभावात्) बाध्यबाधकभावो न घटते । अन्यत्तु

उदाहरणं मृग्यम् । तत् उच्यते । 'गार्हपत्ये पत्नीसंयाजान् जुहोति ' अत्र पत्नीसंयाजशब्दो (याग–) विशेषं ब्रूते । ' यदाहवनीये जुहोति ' इत्यत्र सामान्यमेव श्रुत्या (न विशेषः । तेन) अत्र बाध्यबाधकभावो घटते । यथा ' दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय ' इति । (न्यायं दृष्टान्ते तावत् दर्शयति–) तत्र ब्राह्मणशब्देन (ब्राह्मण–)जातिः वर्णैरुपात्ता (व्यक्तयस्तु लक्ष्यन्ते) कौण्डिन्ये व्यक्तिरेव (वर्णैरुपात्ता) । न च कौण्डिन्ये (किञ्चित्) सामान्यं विद्यते । यथा गोत्वम् अश्वादिभ्यो व्यतिरिच्यते शाबलेयादीन् अन्वेति । (नैवमत्रास्ति इति वैधर्म्योपन्यासः । कथमित्यत आह–) तच्च (गोत्वं) प्रत्यक्षेणोपलभ्यते । न च (ईदृशम्) कौण्डिन्ये वस्तु विद्यते (अवान्तरसामान्यम्,) यत् प्रत्यक्षेण गृहीत्वा शब्दः प्रवर्तेत । तस्मात् कौण्डिन्यशब्देन विशेष एवोच्यते । अपिच वाक्यार्थे पदवचनमिदं (' कुण्डिनस्यापत्यं गोत्रम् ' इति) वाक्यार्थश्चेत् (पदस्य वाच्यः, तथा सति) न (इदं) सामान्यं प्रतिपादयति । (वाक्यार्थस्य विशेषरूपत्वात् । नहि जातिः कुण्डिनस्यापत्यं भवति) तस्मात् विशेष एव (अनेन) शब्देनोच्यते। तत्र च अनन्तरमेव कार्यम् (अभिधेयं हि शब्दस्य अनन्तरमव्यवहितम्) । इतरस्मिन् (सामान्यशास्त्रे) सामान्येन (कार्ययोगी) विशेषः (पश्चात् लक्षणया) प्रकरणादिभिः (सहायैः) अवच्छेत्तव्यः । तस्मात् तत्र विप्रकर्षः, इह तु संनिकर्षः। (दार्ष्टान्तिके न्यायं योजयति–) अनेन न्यायेन (पत्नीसंयाजेषु विशेषश्रुतेन) गार्हपत्येन आहवनीयो बाध्यते । अथवा इदमेवोदाहरणम् (संभवति, अत्रापि अस्त्येव बाध्यबाधकभावः असत्यपि सामान्यविशेषशब्दे)। आहवनीयः (हि) पवमानेष्ट्यादिभिः उत्पादितः प्रयोजनमपेक्षते । तस्य अनारभ्यवादेन अधिकरणभावः होमेषु विधीयते (सामान्येन)। इह तु पदविशिष्टः (एव) होमः उत्पद्यते । तत्र आहवनीयो न शक्यते विधातुम्, पदेन होमस्य व्याप्तत्वात् । आहवनीयो विधीयमानः उत्पत्तिवाक्येन यादृशा होमा अवगताः,ताननूद्य विधीयते । तत्र शुद्धेषु (आधारविधुरेषु होमेषु) विधातुं आहवनीयो युज्यते, योग्यत्वात् । अधिकरणोत्पन्नेषु (ये साधिकरणा एवोत्पन्नाः, तेषु) न घटते अयोग्यत्वात् । तस्मात् अत्रापि अस्त्येव बाधः, इति आहवनीयशास्त्रं विषयान्तरपरं भवति ।

शा— ' **सामान्यस्यापि लब्धत्वात् प्रत्यक्षेण विशेषवत् । नास्ति लिङ्गादिवद् बाधो नापि बाधोऽतिदेशवत् ॥**' इति (पदाहवनीययोस्तुल्यबलत्वात् विकल्प एव युक्तः । इति प्राप्ते, ब्रूमः । ' **प्राप्तिः सामान्यशिष्टस्य विशेषे लक्षणावशात् । श्रुत्या विशेषे शिष्टस्य तस्मादस्ति बलाबलम् ॥** ' पत्नीसंयाजादिषु श्रुत्या शीघ्रप्राप्तं गार्हपत्यादिकम्, लक्षणया मन्थरप्राप्तमाहवनीयं निरुणद्धि इति बाधः ।

सोम— सूत्रार्थस्तु– अविशेषेण यच्छास्त्रं तस्य आरात् दूरे विशेषशिष्टं स्यात्, विशेषविषये सामान्यशास्त्रं न प्रवर्तते इति यावत् । यतः सामान्यशास्त्रं किं यावद्विशेषविषयम् इत्येवं संदिग्धत्वेन विलम्बितम्, विकल्पस्यान्याय्यत्वाच्च इति ।

वि— ' विकल्पितो बाध्यते वाऽऽहवनीयः पदादिभिः ।, सामान्यस्य विशेषेण प्रत्यक्षोक्तित्वसाम्यतः ॥ लिङ्गचोदकवद् बाधो नास्ति तेन विकल्पितः ।, विशेषार्थे लक्षणा स्यादतो मुख्येन बाध्यते ॥ '

भाट्ट—सामान्यशास्त्रस्य क्लृप्तत्वेऽपि तद्विहिताहवनीयाद्यपेक्षया विशेषशास्त्रविहितपदादेः प्राबल्यमेव । न च होमस्याधारं विनाऽपि प्रक्षेपमात्रतया उपपत्तेः पदाहवनीयादीनामदृष्टार्थत्वात् समुच्चयोपपत्तौ बाधानापत्तिः, सत्यपि अदृष्टार्थत्वे सप्तम्यन्तत्वेन अधिकरणतयैव तज्जननात् उभयोश्च निरपेक्षयोः प्रमितहोमाधिकरणत्वान्यथाऽनुपपत्त्या विरोधस्यावश्यकत्वेन सामान्यशास्त्रस्य तद्विषये बाधोपपत्तेः । सामान्यशास्त्रं हि जुहोतेः होमत्वसामान्यवाचित्वात् व्यक्तिलक्षणया तदवच्छिन्नव्यक्तिमात्रे आहवनीयं विदधत् शक्यसंबन्धालोचनेन निर्ज्ञातसंबन्धसकलव्यक्तिलक्षणापूर्वकं यावत् पदहोमव्यक्तिं लक्षयेत् तावत् विजातीयहोमे पदस्य विहितत्वात् तेनैव निराकाङ्क्षः पदहोमो नाहवनीयं गृह्णाति । यद्यपि च विजातीयहोमोऽपि जुहोतिना लक्ष्य एव, लक्ष्यताऽवच्छेदकवैजात्यस्यापि तत्र लक्षणा, जुहोतेः व्यापकीभूतहोमत्वसामान्यवाचित्वात्

इत्यधिकं गौरवम् । **तथापि** तस्य विधिबलेनैव झटित्युपस्थितत्वात् प्राबल्यम् । अत्र हि पदविशिष्टो विजातीयहोमः एव विधीयते । अतश्च पदस्य उत्पत्तिशिष्टत्वादपि प्राबल्यम् । यद्यपि च वाक्यान्तरेण होमप्राप्तिर्भवेत् तथापि तन्मात्रानुवादेन प्राकरणिकवाक्येन पदविधानात्, प्राकरणिकत्वादपि तस्य प्राबल्यम्, निरवकाशत्वादपि च तत् । अतश्च आहवनीयः सामान्यविहितः उत्पन्नशिष्टः अनारभ्यविहितः सावकाशश्चेति दुर्बलः । अतो वस्तुतः तच्छास्त्रं पदहोमातिरिक्तविषयमेव । भ्रान्तिमात्रं तु एतत् वाक्यादर्शनजनितम्, तद्वाक्यदर्शने सति बाध्यते इत्यसकृदापादितः ।

एवं विशेषविधिना सामान्यविधिवत् सामान्यनिषेधोऽपि बाध्यते इति बोध्यम् । अत एव 'न हिंस्यात्' इति निषेधो विहितहिंसायां न प्रवर्तते, तस्य विहितातिरिक्ते सावकाशत्वात् । **ननु** निषेधस्य संकोचे प्रमाणाभावः, तेन हिंसामात्रस्य पापसाधनत्वावगतावपि विधिना वैधहिंसायां सर्वत्र उपकारात् हि साधनत्वावगतौ बाधकाभावात् । नहि अनर्थसाधनत्वावगतौ प्रवर्तनाविषयत्वं विरुध्यते । तादृशानर्थे बलवद्द्वेषाभावदशायां स्वर्गादौ रागमात्रेण प्रवृत्त्युपपत्तेः । अत एव लौकिकहिंसायामपि तादृशानर्थे च बलवद्द्वेषाभावदशायां तात्कालिकेष्टे रागौत्कट्यमात्रेण दृश्यते एव प्रवृत्तिः । सर्वत्रैव हि प्रवर्तनायास्तद्विषये यागादौ वस्तुतो यो रागौत्कट्यविषयः स्वर्गादिः तत्साधनत्वमात्रमनुमीयते । निषेधेन च स्वविषये हिंसादौ वस्तुतो यो द्वेषौत्कट्यविषयः पापादिः, तत्साधनत्वमात्रमनुमीयते । रागद्वेषयोरौत्कट्यं तु जन्मान्तरीयकर्मवशात् कादाचित्कमिति न तत्र विधिनिषेधयोर्व्यापारः । तद्व्यापारभूतयोश्च पापसाधनत्वस्वर्गसाधनत्वयोः तात्कालिकसुखदुःखसाधनत्ववत् नैव कश्चिद्विरोधः । अतो दैक्षवायव्यादिपशुहिंसायाः सत्यपि प्रत्यवायसाधनत्वे क्रतूपकारभूत्यादिसाधनत्वाविरोधात् न निषेधस्य तद्व्यतिरिक्तविषयत्वम् । यत्रापि नित्यपशुयागस्थले अकरणे प्रत्यवायश्रवणम्, तत्रापि करणे स्वल्पः प्रत्यवायः अकरणे भूयान्, इत्येवं कल्पनात् प्रवृत्त्युपपत्तेः न कोऽपि विरोधः । अत एव 'जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥' इति मनुस्मृतौ (२।८७) जपादिप्रशंसाऽप्युपपद्यते । मैत्रः हिंसादिरहितः । अत एव **साङ्ख्यानाम्** अयमेव सिद्धान्त इति **चेत्** । **सत्यम्** अयमभिप्रायो जैमिनिव्यासप्रभृतीनाम्, 'धर्मेण पापमपनुदति' 'प्रवृत्तिसंज्ञके धर्मे फलमभ्युदयः परः । न हि धर्माद्भवेत् किञ्चित् पापं नरकदं क चित् ॥' 'नहि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति ।' 'धर्मः प्रज्ञां वर्धयति क्रियमाणः पुनःपुनः ॥ वृद्धप्रज्ञस्ततः पश्चात् पापं नारभते नरः । धर्मनिर्धूतपापानां संसिध्यन्ति मनोरथाः ॥ अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम् ॥' इत्याद्यसंकुचद्वृत्तिश्रुतिस्मृतिपुराणेतिहासवशात् पापाजनकत्वव्याप्यं धर्मत्वम्, पापजनकत्वव्याप्यं चाधर्मत्वं प्रतीयते । अत एव कैश्चिन्नैयायिकैः यथाक्रमं विधिनिषेधस्थले तस्य लिङ्वाच्यत्वमपि अङ्गीक्रियते । अतश्च विधिस्थले प्रवर्तनया इष्टसाधनत्वानुमानवत् तेन पापाजनकत्वस्याप्यनुमानात्, तद्विरोधेन निषेधः तद्व्यतिरिक्तविषयः एव पापजनकत्वं कल्पयन् तदतिरिक्तविषयः संपद्यते, इति सिद्धोऽत्रापि विशेषविधिना सामान्यनिषेधस्य संकोचात्मको बाधः । विशेषनिषेधेन परं सामान्यविधेर्न संकोचः, अपितु विकल्पः इत्युक्तम्, न तु वैपरीत्येऽपि । अत एव व्याससूत्रं 'अशुद्धमिति चेन्न शब्दात्' (३।१।२५ ब्रसू.) इति ।

मण्डन--'होमेऽग्निं बाधते वर्त्म ।' ९.

शंकर--'बाधो विशेषात् सामान्यस्य ।' १०.

* ज्योतिष्टोमादौ साग्निचित्ये 'अग्नीषोमीयस्य पशुपुरोडाशमनु देवसुवां हवींषि निर्वपति' एषामष्टानां हविषां पुरोडाशधर्मैः प्रसङ्गसिद्धिः, न तु हविषां स्वधर्मानुष्ठानम् । वि. १२।३।२.

⌛ ज्योतिष्टोमादिषु पयोव्रतादीनि नित्यानि ॥ तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम् । ६।८।८। २८॥

भाष्यम्-- ज्योतिष्टोमे श्रूयते 'पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य' इति । तथा दर्शपूर्णमासयोः प्रैषः 'प्रोक्षणीरासादय, इध्माबर्हिरुपसादय,

स्रुवं च स्रुचश्च समृड्ढि, पत्नीं संनह्याज्येनोदेहि’ (आज्येन उदेहि) इति । तथा वाजपेये श्रूयते, ‘दर्भमयं वासो भवति’ इति । पशौ संज्ञप्तहोमः, ‘यत्पशुर्मायुमकृतोरो (अकृत उरः) वा पद्भिराहते, अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः’ इति । तथा ‘योऽस्मान् द्वेष्टि यं च वयं द्विष्मः’ इति वचनम् । एतान्युदाहरणवचनानि । तेषु संदेहः किं यस्यापरं भोजनं न विद्यते, स पयो व्रतयेत् यवागूमामिक्षां वा, उत विद्यमानेऽपीति । तथा, यः अप्रेषितः प्रैषार्थं न प्रतिपद्यते, स प्रेषितव्यः, उत प्रतिपद्यमानोऽपीति । तथा, यस्य सूत्रमयं वासो नास्ति, स दर्भमयं परिदधीत, उत विद्यमानेऽपीति । तथा यस्य पशुर्मायुं कुर्यात्, उरो वा पद्भिर्हन्यात्, स एतेन मन्त्रेण जुहुयात्, उतान्योऽपीति । तथा यो द्वेष्टि कं चिदन्येन च द्विष्यते, स एव मन्त्रं ब्रूयात् योऽस्मान् द्वेष्टीति, उताद्विषन् अद्विष्यमाणश्चापीति । तत्राधिकरणातिदेशोऽयम् । तत्र यः पूर्वस्मिन्नधिकरणे पूर्वः पक्षः, स इह पूर्वः पक्षः । यस्तत्र सिद्धान्तः, स इह सिद्धान्तः । अविद्यमाने कुर्यादिति पूर्वः पक्षः । नियतं वाऽर्थवत्त्वादित्युत्तरः । स एवात्र न्यायः यः पूर्वत्र ।

वि— ‘अन्याभावेऽथ भावेऽपि पयोभक्षादयो, ऽग्रिमः । निमित्ते सत्यनुष्ठानात्, नियमाद्दृष्टतोऽन्तिमः ॥’ ७.

भाट्ट— एवं पयोव्रताद्यपि विद्यमाने अविद्यमानेऽपि भक्षान्तरे स्यात् । ‘अग्नीदग्नीन् विहर’ इति च प्रैषः अन्यतोऽनवबुद्धे अवबुद्धेऽपि स्यात् । बुद्धेऽप्यर्थे एतद्बोधजन्यनियमादृष्टसिद्ध्यर्थं प्रैषावश्यकत्वात् । अत एव प्रैषजन्यबोधानुष्ठितेनैव फलसिद्धिरिति कल्पनमपि प्रामाणिकम् । प्रैषग्रहणं च मन्त्रमात्रोपलक्षणम् । तथा दर्भमयं वासो वाजपेये वासोऽन्तरसत्त्वेऽपि परिधेयमेव ; तथा ‘यत् पशुर्मायुमकृतोरो वा पद्भिराहते । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥’ इति मन्त्रेण विहितस्य संज्ञप्तहोमस्यापि पशुयागे नित्यं करणम् । न च संज्ञप्तहोमस्य मान्त्रवर्णिकशब्दकरणादिजन्यदोषनिर्घातार्थत्वप्रतीतेः तदनुरोधेन मायुपदवाच्यशब्दकरणादावेव होम इति वाच्यम् । शब्दादिकरणस्य दोषजनकत्वे प्रमाणाभावेन मान्त्रवर्णिकफलकल्पनाऽनुपपत्तेः । एतद्बलेनैव दोषकल्पने गौरवाच्च । किञ्च नात्र शब्दादिकरणादेव दोषः, अपितु तदनुकूलप्रयत्नरूपात् आख्यातार्थात्, तस्य च प्रतिबन्धकवशात् शब्दाद्यनुत्पत्तावपि उत्पत्त्यावश्यकत्वेन संज्ञप्तहोमस्य नित्यत्वम् । तथा ‘योऽस्मान् द्वेष्टि यं च वयं द्विष्मः’ इति मन्त्रोऽपि द्वेष्यनिश्चयसत्त्वे असत्त्वे वा सर्वदैव प्रयोक्तव्यः । न च मन्त्रलिङ्गवशेन प्रकरणसंकोचः, परकर्तृकद्वेषस्य अयोग्यत्वेन तदभावनिश्चयायोगात् । स्वनिष्ठद्वेषविषयस्य अन्ततः पापादेरपि संभवेन मन्त्रलिङ्गाविरोधात् । ७.

मण्डन—‘भक्षप्रैषाच्छादनाद्यं च नित्यम् ।’ ९.

शंकर—‘द्वेषप्रैषव्रतादि च ।’ नित्यम् । ९.

* ज्योतिष्टोमादिषु ‘य एवं विद्वान् अग्निं चिनुते’ इत्यनेन गुणविधिः । अग्निशब्दश्च ज्वलनद्रव्यवचनः, न तु यागवचनः । न चेदं यागान्तरम् । भा. २।३।१०।२१–२३.

ज्योतिष्टोमोत्कर्षे प्रतिहोमा नानुष्ठेयाः ।

विस्तरे तु ज्योतिष्टोमे अवभृथोत्कर्षे दीक्षाया अनुवृत्तत्वात् होमादिनिषेधानुवृत्त्या प्रतिहोमाभावः ॥

तत्र प्रतिहोमो न विद्यते, यथा पूर्वेषाम् । ६।५।११।४० ॥

भाष्यम्-- तत्र उत्कृष्यमाणे ज्योतिष्टोमे, अकृतेषु होमेषु किं परिसंख्याय होमाः कर्तव्याः, उत नेति । किं प्राप्तम् ? परिसंख्याय होमाः क्रियेरन् । किं कारणम् ? अवश्यकर्तव्यतया हि ते विहिता होमाः। अतिपन्ना अपि कर्तव्या एव । तथाहि एषामवश्यकर्तव्यता अनुगृहीता भविष्यति । प्रधानमात्रं तु नियतम्, नात्र कालानुरोधः कर्तव्यः, नदीवेगस्थानीयत्वात् । यद्यपि अतिक्रान्ताः कालाः, (तथापि) अतिक्रान्तानां परिसंख्याय प्रधानमात्राणि कर्तव्यानि । यथा अवश्यकर्तव्यं भुक्तिभृतकदानादि यदि अतिक्रान्तं भवति, तत् परिसंख्याय क्रियते, एवमिदमपीति । एवं प्राप्ते, ब्रूमः । तत्र प्रतिहोमो न विद्यते, यथा पूर्वेषाम् । कर्तव्यमकृत्वा कुर्यात्, नाकर्तव्यम् । अकर्तव्याश्चैते, प्रतिषिद्धित्वात् । यथा

पूर्वेषामसति कालातिक्रमे अकृतानां न प्रतिहोमः, एवमेषामपीति ।

कालप्राधान्याच्च । ४१ ॥

भाष्यम्-- कालप्राधान्यं च भवति, निमित्तत्वेन तस्य श्रुतत्वात् । तदभावे विहितमेव न भवति । प्रधानमात्रं यद्यपि नियम्येत, तथापि निमित्ते काले । स च नदीवेगस्थानीयः कालः अतिक्रान्तः । अतो न प्रतिहोमः कर्तव्य इति ।

सोम— अवभृथोत्कर्षे माऽस्तु अग्निहोत्रानुष्ठानम्, तथापि प्रतिहोमः कर्तव्यः इति प्रत्यवस्थानात् संगतिः । अतिपन्नस्य प्रतिकृष्य होमः प्रतिहोमः । **भवनाथस्तु** प्रतिहोमो वा प्रायश्चित्तं वा यथाश्रुति कर्तव्यमिति पूर्वपक्षतात्पर्यमाह । **सूत्रार्थस्तु**– तत्र पुरुषापराधात् अवभृथोत्कर्षे पुरुषापराधप्रभृति अवभृथपर्यन्तकालेषु प्रतिहोमो न विद्यते यथा पुरुषापराधात् पूर्वेषां दीक्षाकालानां तद्वत् इति ।

वि— 'दीक्षाऽनुवृत्तौ कर्तव्यः प्रतिहोमो न वाऽग्रिमः । पुंदोषात्, न तथाप्यस्य दीक्षायां शास्त्रवारणात् ॥'

भाट्ट— दीक्षायां सत्यां सोमाङ्गत्वेन अग्निहोत्रप्रतिषेधेऽपि अग्निहोत्रवाक्ये दीक्षितभिन्नस्य कर्तृत्वाश्रुतेः काले तदकरणनिमित्तप्रत्यवायस्य आवश्यकत्वात्, तत्परिहारार्थं गौणकाले प्रायश्चित्तपूर्वकं कार्यः एव अग्निहोत्रहोमः । दैवापराधकृतदीक्षोत्कर्षे तु सुतराम् । इति प्राप्ते, यावज्जीवादिवाक्ये कालावच्छिन्नस्य जीवनादेर्निमित्तत्वम्, इत्यविवादम् । तेषां च न सायंकालत्वशुचित्वादिना तत्त्वेनावच्छेदकत्वं गौरवात्, अपितु शब्दतोऽर्थतो वा यो निषिद्धः कालः, तद्भिन्नकालत्वेन । सायमादिकालविधेर्हि नियमविधित्वात् तदितरकालनिवृत्त्यर्थिकी । एवं शुचित्वादिना अशुचिकालादिनिवृत्तिरपि । निषेधोऽपि चात्र न विधेयक्रियाङ्गभूत एव विवक्षितः, अपितु अन्याङ्गभूतोऽपि, अविशेषात्, तस्मिन् सति विधेयक्रियाया अकरणस्य तत्रापि आवश्यकत्वाच्च । अतश्च यथैव पश्वर्थेनापि गोदोहनेन अवरुद्धस्य न प्रणयनस्य चमसप्रयोजकत्वम्, तस्मिन् सति तस्य कर्तुमशक्यत्वात् । अत एव न तदभावकृतं वैगुण्यमपि । एवं सोमाङ्गभूतेनापि निषेधेन अवरुद्धस्य दीक्षाकालावच्छिन्नजीवनस्य नैमित्तिकानुष्ठापकत्वानुपपत्तेः न तदकरणे प्रत्यवायादि । अतः अपशुकामस्यैव चमसे अधिकारवत् अदीक्षितस्यैव अग्निहोत्रादौ अधिकारो निषेधपक्षेऽपि फलितो भवति । **यदा तु** 'दीक्षितो न जुहोति' इत्यस्य अग्निहोत्रादिविध्येकवाक्यतया पर्युदासत्वमङ्गीक्रियते, **तदा** स्पष्ट एव दीक्षितस्य तत्र अनधिकारः । अतश्च मुख्यकाले अनधिकारात् गौणकाले करणमनाशङ्क्यम् । एवं दैवादिना अवभृथोत्कर्षेऽपि दीक्षावत्त्वस्य कथमपि अविशेषात् मुख्यकाले अनधिकारस्य तुल्यत्वेन गौणकाले न प्रतिहोमकरणम् । १२.

मण्डन— 'नात्र लोपे पुनः क्रिया ।' अत्र अवभृथोत्कर्षे दीक्षानियमानुवृत्तौ ।

शंकर— 'प्रतिहोमस्तत्र नास्ति ।'

* **ज्योतिष्टोमगतोक्थ्यादिस्तोत्राणामतिदेशः** शतोक्थ्यादिषु संस्थागणेषु । भा. ८।३।५।१०-११.

* **ज्योतिष्टोमगतौदुम्बरीसर्ववेष्टनस्मृतिः न सर्वांशे प्रमाणम्** । वि. १।३।२.

* **ज्योतिष्टोमगतपयोव्रतादीनां** क्रत्वर्थता । पयोव्रताधिकरणम् । भा. ४।३।४।८-९. * **ज्योतिष्टोमधर्मातिदेशः** विश्वजिति अभिजिति द्वादशाहे च । वि. ८।१।९. * **ज्योतिष्टोमपश्वाद्भावित्वं** सर्वसोमानाम् । सु. पृ. ९९९. * **ज्योतिष्टोमप्रकरणम्** अग्निष्टोमस्यैवासाधारणम्, नोक्थ्यादिसर्वसंस्थासाधारणम् । वि. ३।६।१६, * **ज्योतिष्टोमप्रकरणे** दीक्षणीयाऽऽदय उपदिष्टाः, ते तदङ्गम् । ७।१।१, * **ज्योतिष्टोमविकारो** वाजपेयः । ३।७।२३, * **ज्योतिष्टोमशब्दः** ऐन्द्रवायवादिसोमयाग-दीक्षणीयाऽऽदीष्टि-अग्नीषोमीयादिपशुरूपसर्वयागसाधारणोऽपि ज्योतिष्टोमनाम्ना सोमयागानामेव फलसंबन्धावगमात् सोमयागानामेव प्राधान्यम्, इष्टयः पशवश्चाङ्गानि । ४।४।१२. * **ज्योतिष्टोमशब्दस्य** सोमयागपरत्वम् अर्थवादप्रामाण्याधीनम् । सु. पृ. ६६, * **ज्योतिष्टोमसमाप्तिः** उदवसानीयया । पृ. १५३९. * **ज्योतिष्टोमीयकर्मसु**

स्वरनिवेशक्रमः । प्रथमं तावत् दीक्षणीयायाः याजुर्वेदिकत्वात् साङ्गाया उपांशुत्वं प्राप्तम्, तच्च चोदकप्राप्तेन प्राक् स्विष्टकृतः प्रथमस्थानेन, मध्यमेन इडायाः, शेषं तृतीयस्थानेन इत्यनेन बाध्यते । तदपि 'यावत्या वाचा कामयेत' इत्यनेन बाध्यते । यद्यपि उभयोरपि वाचनिकत्वं विशेषविषयत्वं च तुल्यं यत्किञ्चिच्छब्दस्य प्रातिस्विकरूपेणैव अशेषपदार्थवाचित्वात्, तथापि यत्किञ्चिदित्यस्य सावकाशत्वात् निरवकाशेन 'यावत्या' इत्यादिस्वरेणैव बाधो युक्तः । तथाच दीक्षणीयादिशब्दानां प्रधानमात्रवाचकतया तन्मात्रे एव 'यावत्या' इति स्वरः, अङ्गेषु तु यत्किञ्चिच्छब्दप्रापितोपांशुत्वमेव भवति । 'उच्चैः प्रवर्ग्येण' इति स्वरस्तु तृतीयानिर्देशात् प्रवर्ग्यकरणकभावनाऽन्वयितया साङ्गप्रवर्ग्यार्थः, न तु दीक्षणीयावाङ्नियमवत् प्रधानमात्रार्थः । एवं च यत्किञ्चिदित्यनेनैव उपांशुत्वे प्राप्ते 'उपांशूपसत्सु' इति दीक्षणीयास्वरस्तुत्यर्थो नित्यानुवादः इति । सोम. ९।१।६ पृ. ५८६.

ज्योतिष्मतीष्ट्यधिकरणम् । दर्शपूर्णमासार्थोद्धृताग्निनाशे ज्योतिष्मतीष्टेर्नानुष्ठानम् ॥

प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात् तदर्थे हि विधीयते । ९।४।६।२८ ॥

भाष्यम्— अस्त्यग्निहोत्रं 'य एवं विद्वानग्निहोत्रं जुहोति' इति । तत्रेदमाम्नायते 'अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत् यस्याग्निरुद्धृतः अहुतेऽग्निहोत्रे उद्वायेत्' इति । यदि तु दर्शार्थेन पौर्णमासार्थेन वा अग्निरुद्धृतः अहुते अग्निहोत्रे उद्वायेत् किं ज्योतिष्मती कर्तव्या नेति । किं प्राप्तम् ? कर्तव्येति । कुतः ? उपसंप्राप्तं हि निमित्तम्, भवितव्यं नैमित्तिकेनेति । अग्निरसौ उद्धृतः, अहुते अग्निहोत्रे उद्वातः, एतावच्च निमित्तं ज्योतिष्मत्याः । तस्मात् सा कर्तव्येति । न चात्र शब्दोऽस्ति, अग्निहोत्रार्थम् उद्धृते उद्वाते कार्येति । तस्मादपि कर्तव्या । एवं प्राप्ते, ब्रूमः । प्रासङ्गिके एवंलक्षणके अग्नौ अनुगते प्रायश्चित्तं न कर्तव्यम् । परार्थं हि तदुद्धरणं कृतं दर्शपूर्णमासार्थम् । अग्निहोत्रार्थे चोद्धृते व्यापन्ने तदाम्नातम् । तस्मान्न कर्तव्यम् । आह, ननूक्तं नास्त्यत्र शब्दः अग्निहोत्रार्थमुद्धृते अनुगते प्रायश्चित्तमिति । अत्रोच्यते । यद्यपि नास्ति एवंजातीयकः शब्दः तथापि अग्निहोत्रार्थमेव उद्धृते अनुगते प्रायश्चित्तं गम्यते । कथम् ? अग्निहोत्रप्रकरणे एतदाम्नातमिति । आह, अग्निहोत्रप्रकरणे आम्नानात् तस्योपकारकमिति गम्यते, नाग्निहोत्रविशिष्टमुद्धरणम् । स्वार्थे हि सर्वं क्रियते न परविशेषणार्थेन । अत्रोच्यते । अग्निसंबद्धमेतत् प्रायश्चित्तमुच्यते नोद्वानसंबद्धम् । किमतो यद्येवम् ? यदि उद्वानसंबद्धं भवेत् उद्वानस्यानङ्गत्वात् नैतदुद्वानार्थमिति गम्यते । प्रकृतेनाग्निहोत्रेण प्रयोजनेन संबध्यते । अग्निसंबन्धे पुनः गुणत्वादग्नेः तेनैव प्रायश्चित्तस्य प्रयोजनसंबन्धः । तत्रैवम् उद्धृतो व्यापन्नो भवति, यदि स प्रयोजनं नाभिनिर्वर्तयति । तत्र अग्निहोत्रार्थस्योद्धरणस्य अग्निहोत्रनिर्वृत्तिः प्रयोजनम् । दर्शपूर्णमासार्थस्य दर्शपूर्णमासनिर्वृत्तिः । उद्धृतं चानुगतं स्वस्मै प्रयोजनाय अयोग्यं प्रायश्चित्तेन योग्यं क्रियते । तच्च योग्यं कुर्वत् प्रायश्चित्तम्, अग्निहोत्रस्योपकरोति । यस्तु उद्धृतः दर्शपूर्णमासप्रयोजनः, तं योग्यं कुर्वन् नाग्निहोत्रस्योपकुर्यात् । यस्तु अग्निहोत्रार्थमुद्धृतः तं योग्यं कुर्वत् अग्निहोत्रायोपकरोति । तस्मादग्निहोत्रार्थमुद्धृते प्रायश्चित्तम् । कथं पुनर्ज्ञायते अग्निना प्रायश्चित्तस्य संबन्धः, नोद्वानेनेति । अग्निविशिष्टेन उद्वानेन संबन्धः इति श्रुत्या गम्यते । उद्वानपरीतेन अग्निना इति वाक्येन । श्रुतेः वाक्याद् बलीयस्त्वात् उद्वानसंबन्धः प्राप्नोतीति । उच्यते । उद्वानसंबन्धस्य अपरिहार्यत्वात्, यस्योद्वायात् इति अविवक्षितमेव प्राप्नोति । अदृष्टार्थत्वान्न अनाकाङ्क्षितेन संबन्धः । तत् उद्वानपरीतेऽग्नौ प्रायश्चित्तेन संबध्यमाने व्यापत्तौ सत्याम् आकाङ्क्षितेन संबन्धो दृष्टार्थता च । तस्मात् उद्वानपरीतोऽग्निः प्रायश्चित्तेन संबध्यते इति । दर्शपूर्णमासार्थमुद्धृतः यत्रानुगच्छति तत्राग्निहोत्रस्य परकीयोऽग्निर्व्यापन्नः, परकीयं चोद्धरणमिति तत्र प्रायश्चित्तं न स्यात् । अपि च लिङ्गं भवति । किमिति ? यस्याग्निरुद्धृतः अग्निहोत्रे इत्यनुवादः । विधौ हि एतस्मिन् सति वाक्यभेदप्रसङ्गः । यदि अग्निहोत्रप्रयोजनमुद्धरणम्, ततः अकृतप्रयोजनमिति विवक्षायाम् अहुते अग्निहोत्रे

इति वचनमनुवदितुमुपपद्यते । तस्मादपि अग्निहोत्रप्रयोजने उद्धृते अनुगते प्रायश्चित्तं भवितुमर्हति इति । किं तर्हि तदा कर्तव्यम् ? अविशेषविहितम् अग्नेरुपशमे प्रसज्यात् इति ।

टुप्— दर्शार्थे अग्नौ उद्धृते अनुगते (ज्योतिष्मती) इष्टिः कर्तव्या न वेति (चिन्त्यते)। कुतः संशयः ? (उत्तरम्–) वाक्यात् पदाद्वा । (वाक्यशब्देन निमित्तसंबन्धिनैमित्तिकविधायकं कृत्स्नं वाक्यमुच्यते, तदेकदेशो निमित्तप्रतिपादकं पदमुच्यते । तत्र वाक्यात् संशयमाह–) किमुद्दानम् अग्निविशिष्टं निमित्तम्, अथवा अग्निः उद्दानविशिष्टः इति । (अत्रैव उद्दानमेव निमित्तम् इति पूर्वपक्षमाशङ्क्य सिद्धान्तमाह–) तत्र उद्दाने निमित्ते आश्रीयमाणे सत्तया (अग्नौ सद्भावमात्रेण उद्दान–) क्रिया निमित्तं स्यात् । अग्न्येकदेशे (अपि) वर्तमाना (क्रिया निमित्तं स्यात्) पटदाहवत् । न च काष्ठावयवेषु अग्नियुक्तेषु कदाचित् (अपि) उद्दानं नास्ति इति अविशेषणमेव (उद्दानं स्यात्) । अग्निस्तु (भवति) निमित्तम् (उद्दान–) विशेष्यः । स कदाचित् (एव उद्दानक्रियया व्याप्यते) इति युक्ता निमित्तता । (एवं पदात् संदेहं तत्र सिद्धान्तश्चोक्तः । अथ वाक्यात् संदेहमाह–) वाक्येनापि (संशयः । तथाहि,) अफलं चेदं कर्म, (तत् किं) प्रकरणात् अग्निहोत्रस्य उपकुर्वत् (अग्निविशिष्ट–) उद्दाननिमित्तकम् आरादुपकारकं प्रयाजवत् स्यात् । (किमिति आरादुपकारकमित्यत आह–) नहि विशेषणस्य अग्नेः तत् (संस्कारकं) भवितुमर्हति । सामवायिकं वा स्विष्टकृद्वत् वाक्येन अग्न्यर्थम् । (कथं तादर्थ्यमित्याह–) विशेष्यः प्रधानं तदा अग्निः, (अतः) शक्यः (उभयेनापि) संबन्धयितुम् उद्दानेन इष्ट्या च । (किमुद्दानं निमित्तम् आरादुपकारिका इष्टिः, उत अग्निः उद्दानविशिष्टो निमित्तम्, तदुत्पादिका इष्टिः इति) एवं संदेहे, उद्दानं निमित्तमाराद्वृत्तिः । दर्शार्थेन कर्मवत् इति पूर्वः पक्षः । (एवं संदेहे इत्यारभ्य एवं पाठः आनन्दाश्रमीये । लिखितं तु अस्मदीयं नवमतृतीयचतुर्थपादयोर्गलितमेव । तन्त्ररत्ने तु ' एवं संदेहे उद्दानं निमित्तं श्रौतत्वात् नैमित्तिकम् आराद्वृत्ति आरादुपकारकम् । अतो दर्शार्थेऽपि उद्वृत्ते अग्नौ कर्म इदं भवेत् इति पूर्वः पक्षः' इति पाठः)। 'आरादुपकारकेभ्यः सामवायिकानि गरीयांसि' इति उद्दानव्याप्तस्य अग्निहोत्रार्थस्य आहवनीयस्य उत्पत्त्यर्थम् इति सिद्धान्तः ।

शा— किं प्राप्तम् ? 'उद्वायेदिति लिङ्श्रुत्या धात्वर्थस्य निमित्तताम् । वदत्यग्नेस्तु वाक्येन तस्मादाराद्उपक्रिया ॥' इति प्राप्ते, ब्रूमः । 'उद्दानस्याग्नियुक्तस्य नित्यत्वान्न निमित्तता । न च तत्राग्निना व्याप्तिः कदाचिदपि विद्यते ॥' तस्मात् दर्शार्थेन अग्नौ उद्धृते उद्दाने नैतत् प्रायश्चित्तम् । ९।४।७.

सोम— ऊहसिद्ध्यर्थमध्रिगुप्रैषगतपदानां अवान्तरकार्यं प्रस्तुतमिति तत्प्रसङ्गात् इष्टेः किमपूर्वं कार्यम्, उत अग्निसंस्कारः इति निरूपणात् संगतिः इति तन्त्ररत्ने ।

वि––'ज्योतिष्मती भवेन्नो वा दर्शार्थोद्धृतलोपने।, निमित्तसत्त्वात्स्या, न्नाग्निहोत्रार्थोद्धृतिवर्जनात् ॥' इति ।

भाट्ट— अग्निहोत्रे 'अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेत् यस्याग्निद्रुधृतः अहुते अग्निहोत्रे उद्वायेत्' इति श्रुतम् । तत्र किमिदं प्रायश्चित्तं दर्शाद्यर्थं प्रणीतस्याग्नेः अग्निहोत्रकाले उद्दाने भवति, नेति चिन्तायाम्, यच्छब्दसमभिव्याहृतेन लिङा पदश्रुत्या निमित्तत्वमुद्दानस्य प्रतीयते । न च तदुद्दानमात्रस्य नाशापरपर्यायस्य संभवति, यत्किञ्चिन्नाशस्य सर्वदा सत्त्वेन कादाचित्कत्वव्याप्यनिमित्तत्वस्यासंभवात् । अतो हविरार्तिन्यायेन (६।४।६) प्रतियोगितासंबन्धेन अग्निविशेषणम् । तत्रापि च अग्नेरवयवशो नाशस्य सर्वदा सत्त्वात्, अग्नित्वावच्छिन्नजगतीतलवर्तिसर्वाग्निनाशस्य च कदाऽप्यसंभवात् अवश्यं करिष्यमाणाग्निहोत्रप्रयोगोपयोग्यग्नित्वावच्छिन्नप्रतियोगिताकनाशस्यैव प्रकरणादिना निमित्तत्वावसायात् उक्तप्रयोगोपयोग्यवयविनाशे एव इदम् । अवश्यं चायमर्थो भेदनहोमादावपि वक्तव्यः एव, प्रकृतप्रयोगोपयोगिकपालनाशस्यैव निमित्तत्वात् । अतस्तद्वदेव इदं आरादुपकारकं अग्निहोत्राङ्गम् । अस्तु वा नष्टस्याग्नेः उत्पादकाकाङ्क्षायां वैमृधन्यायेन पदा-

न्तरकल्पनया अस्य अग्निहोत्रापेक्षितादृष्टरूपाग्न्युत्पादकत्वकल्पनया संनिपत्योपकारकत्वमेव । भेदनहोमस्य दृष्टरूपकपालजनकत्वस्य बाधितत्वात् आरादुपकारकत्वमिति विशेषः । अत एव अग्न्युत्पादनप्रयोजनाभावात् अग्निहोत्रे हुते एतत्प्रायश्चित्तवैयर्थ्यापत्तेः ‘ अहुते अग्निहोत्रे ’ इत्यनुवादः । भेदनहोमस्तु कपालकार्ये निष्पन्नेऽपि उद्वासनात् पूर्वं भवत्येवेति विशेषः । सर्वथा दर्शार्थं प्रणीतस्यापि अग्नेः अग्निहोत्रोपयोगित्वात् निमित्तसंस्कार्ययोः उभयोरपि सत्त्वेन तदर्थं कर्तव्यैव इष्टिः । न च तथापि दर्शादौ वैधसमन्त्रकोद्धरणाभावात् उद्धृताग्निनाशाभावेन निमित्ताभावः, उद्धृतत्वस्य हविरुभयत्ववत् अग्निविशेषणत्वेन अविवक्षितत्वात् । **इति प्राप्ते**, नात्र उद्धृतत्वं उद्देश्यविशेषणम् , करिष्यमाणप्रयोगोपयोग्युद्धृतत्वावच्छिन्नप्रतियोगिताकविनाशस्यैव निमित्तत्वात् । वैधस्येवोद्धरणस्य निमित्तकोटिप्रवेशाच्च नातिप्रसङ्गः । उद्धृतश्चाग्निरेव इति अग्निपदं नित्यानुवादः । इतरथा अजस्रपक्षे उद्धृतत्वाभावात् उद्धृतः इत्यस्य पाक्षिकानुवादत्वापत्तेः । गार्हपत्याग्निनाशेऽपि ज्योतिष्मतीष्ट्यापत्तेश्च । अतश्च दर्शार्थं प्रणीतेनैव अग्निहोत्रानुष्ठानात् उद्धरणस्य प्रसङ्गसिद्धकार्यतया लोपेन निमित्ताभावादेव न नैमित्तिकानुष्ठानम् । अपितु अन्वाहिताग्निनाशप्रायश्चित्तमेव । अत्र च पूर्वपक्षे उद्धृताग्न्यभावमात्रेण अन्यथात्वात् भाक्तोहप्रसक्तेः, सिद्धान्ते तदपवादात् **संगतिः** ।

मण्डन-- ‘ अग्निहोत्रार्थोद्धृते यजिः । ’

शंकर— ‘ ज्योतिष्मत्यग्निसंस्क्रिया । ’

* **ज्यौतिषस्य** वैदिककर्मप्रयोगोपयोगितिथ्यादिज्ञानद्वारा वेदोपकारकत्वम् । **मणि. पृ. ५.**

⧗ **ज्वलितं न हिरण्यरेतसम्, चयमास्कन्दति भस्मनां जनः । ’ इति न्यायः** । (भारविः २।३०) जनः प्रदीप्तमग्निं नास्कन्दितुं शक्नोति भस्मनां चयं कामं आस्कन्दति । तस्मात् पुरुषेण तेजस्विना भाव्यम्, न मृदुनेति न्यायार्थः । **साहस्री. ९६८.**

* ‘ **ज्वालादेरपि** नाशित्वं नैव सिद्धं प्रतिक्षणम् । लघवोऽवयवास्तत्र यान्ति देशान्तरं लघु ॥ **श्लो. वा.** शब्दाधिकरणे (१।१।६) ४३४ ॥ प्रभूतं वर्तिदेशे हि तेजस्तिष्ठति पिण्डितम् । तत्र यावद् व्रजत्यूर्ध्वं तावज्ज्वालेति गम्यते । ४३५ ॥ ततोऽपि यदतिक्रम्य याति तत् स्यात् प्रभात्मकम् । ततः परं तु यद् याति, तत् सौक्ष्म्यान्नावधार्यते । ४३६ ॥ उत्तरावयवै रुद्धे मार्गे, पूर्वे न यान्ति च । यथोत्तरे विमुञ्चन्ति पूर्वे यान्ति तथातथा । ४३७ ॥ ’ * **ज्वालादीनां** नित्यत्वे स्थिरत्वे अङ्गीक्रियमाणे अनुमानविरोधः । ज्वालायां प्रभामण्डलवितत्या तेजोऽवयवानां विशरणमवगम्यते । विशीर्णावयवश्च अवयवी विनष्टः पुनरुपलब्धिश्च ज्वालान्तरस्य उत्पन्नत्वात् इत्यनुमानेन ज्वालादीनां अन्यत्वमवसीयते इत्यनुमानविरोधात् भेदाग्रहणनिबन्धन एव एकावगमभ्रमः, न प्रत्यभिज्ञा । **ऋजु. पृ. १९३**

ट.

⧗ **टिट्टिभन्यायः** । अयं पञ्चतन्त्रे विवृतः । तथाहि, कस्य चित् टिट्टिभाख्यपक्षिणोऽण्डानि स्वतटस्थानि समुद्रः स्ववीचिना अपजहार । स च पक्षी स्वसाहसेनैनं शोषयिष्यामीति प्रवृत्तो भार्यादिभिर्बहुधा वार्यमाणोऽपि नोपरराम, प्रत्युत तानपि वव्रे । तांश्च पतनोत्पतनाभ्यां बहुधा क्लिश्यतः सर्वानवलोक्य कृपालुर्नारदस्तत्समीपे गरुडं प्रेषयामास । ततस्तत्पक्षवातेन शुष्यन् समुद्रो भीतोऽण्डान्यानीय पक्षिणे ददाविति । तथा च यथा दृढाध्यवसायस्य पक्षिणो गरुडसाहाय्यादण्डलाभः, तथा दृढबुद्धेर्जिज्ञासोः अतिदुर्लभस्यापि तत्त्वज्ञानस्य ईशानुग्रहात् सुखेन लाभो भविष्यतीति । **साहस्री . ३९०.**

⧗ **टिट्टिभाण्डन्यायः** । टिट्टिभन्यायार्थक एवायम् । **संग्रहः.**

ण.

* **णमुल्** धातुसंबन्धविहितः ‘ अभिक्रामं जुहोति ’ इत्यादौ विनियोक्त्री श्रुतिः भट्टसोमेश्वरमते । क्रियाऽन्तरसमभिव्याहारे एव णमुलादेः साधुता , यथा क्रियायोगे एव प्रादेरुपसर्गता । अभिक्रमणाधिकरणवार्तिकेऽपि (३।१।१०।१९-२०) अभिक्रमणं प्रकृतक्रियामात्राङ्गं होमाङ्गमेव वा इति भाष्यकृन्मते संशयमुक्त्वा

संयुक्तश्रवणात् तमाक्षिप्य तद्धेतुं वदता ‘कर्मणः अमूर्तत्वात् वाक्येन च संबन्धोपादानात्’ इति वाक्यीयमङ्गत्वमुक्तम्, न श्रौतम्। तत्रत्यसिद्धान्तेऽपि ‘सर्वथा तावत् अभिक्रामं न क्रियाऽन्तरमन्तरेण निराकाङ्क्षीभवति’ इत्येवोक्तम्, न ‘क्रियासंबन्धं ब्रवीति’ इति। तथा यावज्जीवाधिकरणवार्तिके (२।४।१।१–७) यावत्पदाख्यातश्रुतिवृत्तत्वसंभवो मत्पक्षे, भवतस्तु अत्र लक्षणावृत्तता भवेत् इति यावदव्ययजीवधातुश्रुतिभ्यामेव निमित्तत्वसिद्धान्तः उपपादितः, न तु णमुल्श्रुत्येति। **बाल.** पृ. ४५,४६. * **णमुलादिवत्** शतृप्रत्ययेन निमित्तत्वाभिधानात्। **भाट्ट.** ४।१।३. * **णमुल्प्रत्ययार्थो** भावनान्वयी। **मणि.** पृ. ११३.

* **णिच्प्रत्ययः**। स्वतन्त्रस्य कर्तुः प्रयोजके हेतुसंज्ञकेऽपि कर्तरि प्रयोजकव्यापारं प्रति स्वातन्त्र्यलक्षणकर्तृत्वसद्भावात्, तत्र च हेतुत्वविवक्षायां प्रयोजकत्वलक्षणत्वाद्धेतुत्वस्य, प्रयोजकव्यापाराख्यं च तत्समर्थाचरणं विना प्रयोजकत्वायोगात्, हेतुमन्तं तत्समर्थाचरणाख्यं प्रयोजकव्यापारं वक्तुम् ‘हेतुमति च’ इतिसूत्रविहितः णिच्–प्रत्यय उत्पद्यते। **सु.** पृ. १५०४.

* **ण्वुल्प्रत्ययः** ‘तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्’ (पा० ३।३।१०) इति विहितः विनियोक्त्री श्रुतिः ‘याजको याति’ इत्यादौ इति भट्टसोमेश्वरः। पार्थसारथिमते तु तत्र वाक्यीयो विनियोगो न श्रौतः। **बाल.** पृ. ४५,४७.

त.

⧗ **तक्रकौण्डिन्यन्यायः**। अन्यथा ‘ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय’ इत्यत्र तक्रदानेन दधिदानस्य बाधो न स्यात्, तद्दानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसंभवात् (शेखर. पृ. २४१)। “नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति’ ‘अपवादैः उत्सर्गाः बाध्यन्ताम्’ इति। तद्यथा ‘सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय’ इति सत्यपि संभवे तक्रदानं दधिदानस्य निवर्तकं भवति” इत्युक्तम् (‘मिदचोऽन्त्यात्’ इति सूत्रे भाष्ये) (भूतिः २४१)। ‘इकारोच्चारणसामर्थ्यात्’ इत्यस्य तक्रकौण्डिन्यन्यायेन तद्बाधात् इत्यर्थात्। (भूतिः पृ. १७६)। वार्तिककारमते तक्रन्यायासत्त्वेन। भाष्यमते तक्रन्यायेन अपवादत्वेऽपि। (भूतिः पृ. २०२)। तत्र (अनड्वान् इत्यत्र) आत् इत्यधिकारसामर्थ्यात् (नुमा आमः) बाधाभावः। उपजीव्यविरोधाच्च आकारमुपजीव्य जायमानो नुम् कथं तद्बाधकः स्यात्। एवं च सामर्थ्यादत्र तक्रकौण्डिन्यन्यायाप्रवृत्त्या न विरोधः, नापि लक्ष्यविसंवादः। (तत्त्वप्रकाशिका पृ. २०२).

तक्रकौण्डिन्यन्यायेन द्वितीयबाधबीजेन तदप्राप्तियोग्ये अचारितार्थ्ये सति कृते चारितार्थ्ये इत्यनेन बाधस्वीकारे (एकाचः इत्यस्य) ‘ई घ्राध्मोः’ ‘हन्तेर्हिंसायाम्’ इत्यादिभिर्द्वित्वबाधापत्तिः। (भूतिः पृ. २३९)।

तक्रन्यायेन हि विशेष्यविशेषणदलप्रविष्टयावत्पदार्थसंकुचितव्याप्यताऽवच्छेदकरूपावच्छिन्नातिरिक्तत्वेन संकोचः (अनचि चेत्यस्य) आवश्यकः। (भूतिः पृ. २३९)।

‘क्वचिदपवादविषयेऽपि०’ इत्यत्र अपवादशब्दस्य बाधकपरत्वेऽपि अन्यत्र अपवादशब्दः तक्रकौण्डिन्यन्यायरूपयेननाप्राप्तेति न्यायपर एव इति केचित्। तन्न शोभनम्। (भूतिः पृ. २४४)।

तक्रकौण्डिन्यन्यायस्य अनित्यत्वेन। (तत्त्वप्रकाशिका पृ. ७६).

* **तक्रकौण्डिन्यन्यायः**। अयं सामान्यशास्त्रस्य विशेषशास्त्रेण बाधे एव प्रवर्तते। यथा ‘ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय’ इत्यत्र कौण्डिन्यस्यापि ब्राह्मणत्वात्। **साहस्री.** २२२. * **तक्रकौण्डिन्यन्यायः**। क्तस्य मत्याद्यर्थेभ्यो विशिष्य वर्तमानार्थे वार्तिकविधानात् तक्रकौण्डिन्यन्यायेन भूतार्थत्वबाधः स्यात् इति न च वाच्यम्। **परिमल.** १।१।१ पृ. २. * **तक्रकौण्डिन्यन्यायः**। ‘दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय’ इति। अत्र ब्राह्मणजातिर्वर्णैरुपात्ता तदुपलक्षिता तु व्यक्तिर्न वर्णोपात्ता कौण्डिन्ये तूपात्ता व्यक्तिः। तत्र यद् दधिदानं अवर्णे (ब्राह्मणपदवाच्यजातिलक्षितव्यक्त्युद्देशेन विधीयमानं लाक्षणिकम्) कौण्डिन्ये प्राप्नोति तत् वर्णेन

(व्यक्तिविशेषोद्देशेन विधीयमानेन श्रौतेन) तक्रदानेन विरोधात् बाध्यते । टुप्. १०।८।१।१ पृ. २०५७. * तक्रकौण्डिन्यन्यायः । ‘ **ननु चाकृतिपक्षेऽपि व्यक्तावेव क्रियाक्रिये । शब्दार्थे संभवात्तेन किमर्थैषा विचारणा ॥ यद्यप्येवं न भेदोऽस्ति वेदार्थकरणे नृणाम् । दधि विप्रेभ्य इत्यादौ फलं लोके भविष्यति ॥ व्यक्तिपक्षे विकल्पः स्यात् कौण्डिन्ये दधितक्रयोः । सामान्यवाक्यदौर्बल्यात् तक्रमेवेतरत्र तु ॥** ’ वा. १।३।९।३३ पृ. ३०७, * तक्रकौण्डिन्यन्यायः । नहि एकस्यैव शास्त्रस्य किञ्चित् प्रति सद्भावः, किञ्चित् प्रति असत्त्वमिति युज्यते । तेन ‘ दधि ब्राह्मणेभ्यो दीयतां तक्रं कोण्डिन्याय ’ इत्यादौ प्रतिब्राह्मणं शास्त्राभावात् एकं शास्त्रम् । तद्यदि तक्रालोचनेन कौण्डिन्ये नास्ति इत्यवधार्यते, ततो माठरादिष्वपि अप्रवृत्तिः । अथ तेष्वस्ति, ततः कौण्डिन्येऽपि भवितव्यम् । अथ ‘ तं प्रति नास्ति, इतरान् प्रति अस्ति ’ इत्येतदपि एकवस्तुनि विप्रतिषेधान्निष्प्रमाणकम् । न चात्र प्रतिपत्तृभेदो विद्यते, येन संबन्धग्रहणाग्रहणवत् अविरोधः स्यात् । न च सकृद्गृह्यमाणत्वात् शास्त्रभेदोऽवगम्यते, येन ‘ अन्यस्यैव सत्त्वम् अन्यस्य चासत्त्वम् ’ इत्यभिधीयेत । व्यक्तिपक्षे च कदाचिदेतद्भवेत्, आकृतिपक्षे तु विषयैकत्वात् युगपदेकमेव शास्त्रं प्रवर्तते । तस्मात् शास्त्रान्तरं अनन्यगति दृष्ट्वा मृगतृष्णाऽऽदिवदेव सामान्यापहृतबुद्धेः ‘ ममेयं भ्रान्तिः पूर्वमेतद्विषयपरिकल्पनया जाता ’ इत्यध्यवस्यति । तस्मात् माठरादिप्राप्तिवेलायामुपजाताऽपि कौण्डिण्यबुद्धिः भ्रान्तिरिति निश्चित्य फलविमुक्तत्वानुबद्धमर्थं बाधितं मन्यते । ३।३।७।१४ पृ. ८६०–६१. * तक्रकौण्डिन्यन्यायः । यतो भवतु एवंविधिषु ‘ ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय ’ इति । तत्र तक्रविधिर्न दधिविधिमपेक्षते प्रवर्तितुम्, इह तु (यजतिषु येयजामहं करोति नानुयाजेषु इत्यत्र) प्राप्तिपूर्वकत्वात् प्रतिषेधस्य येयजामहस्य चान्यतोऽप्राप्तेः तन्निषेधेन निषेध्यप्राप्तौ तद्विधिरपेक्षणीयः । भामती. ३।३।१५।२६ ब्र. सू. * तक्रकौण्डिन्यन्यायः । यथा ‘ दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय ’ इति । तत्र ब्राह्मणशब्देन ब्राह्मणजातिः वर्णैरुपात्ता, कौण्डिन्ये व्यक्तिरेव । न च कौण्डिन्ये सामान्यं विद्यते । (तदेवाह–) न च कौण्डिन्ये वस्तु विद्यते अवान्तरसामान्यम्, यत् प्रत्यक्षेण गृहीत्वा शब्दः प्रवर्तेत । तस्मात् कौण्डिन्यशब्देन विशेष एवोच्यते । अपिच वाक्यार्थे पदवचनमिदम् (कुण्डिनस्यापत्यं गोत्रं इति) । वाक्यार्थश्चेत् न सामान्यं प्रत्याययति । तस्माद्विशेष एव शब्देनोच्यते । तत्र चानन्तरे एव कार्यम्, इतरस्मिन् सामान्येन । विशेषः प्रकरणादिभिरवच्छेत्तव्यः । तस्मात्तत्र विप्रकर्षः । इह तु संनिकर्षः । अनेन न्यायेन विशेषश्रुतेन गार्हपत्येन (पत्नीसंयाजेषु) आहवनीयो बाध्यते । टुप्. १०।८।८।१६ पृ. २०७२–७३. * तक्रकौण्डिन्यन्यायः । ‘ **व्यवहारा हि दृश्यन्ते सामान्यार्थनिबन्धनाः । दधितक्रादिदानादौ कौण्डिन्यब्राह्मणादिषु ॥** ’ विशेषेण हि सामान्यस्य बाधमाश्रयन्तो ब्राह्मणशब्दस्य सामान्यवाचित्वं मन्यन्ते । रत्नाकर. श्लोवा. वनवादे १५.

⧗ **तक्षाधिकरणम्** । तक्षस्मृतिः । तक्षशास्त्रम् । गृहनिर्माणादि लौकिकं कर्म प्रारब्धं सत् समापनीयमेवेति न नियमः ॥

लोके कर्माणि वेदवत् ततोऽधिपुरुषज्ञानम् । ६।२।४।१७ ॥

भाष्यम्— केन चित् गृहमुपक्रान्तं भवति शकटं रथो वा । वीता अस्य फलेच्छा, अवाप्नोति वा फलम् । तत्र संदेहः किं तेन नियोगतः परिसमापयितव्यम्, उत इच्छया उत्स्रष्टव्यमपीति । किं प्राप्तम् ? लोके कर्माणि एवंजातीयकानि उपक्रम्य परिसमापयितव्यानि । यथैव वैदिकानि, तथैव तानि नियोगतः परिसमापनीयानि । कुतः ?' ततोऽधिपुरुषज्ञानम् । ततः तत्पुरुषज्ञानं भवितुमर्हति । कुतः ? शास्त्रात् । आम्नायते हि तक्ष्णां शास्त्रम् । अत्रापि देवताव्यापारः अङ्गीक्रियते पूर्वस्यां दिशि एता देवताः इतरासु एता इति । यथा शास्त्रकृते देवताव्यापारे उपक्रम्य अपरिसमाप्यमाने शिष्टविगर्हणम्, एवमिहापि भवितुमर्हति ।

अपराधेऽपि च तैः शास्त्रम् । १७ ॥

भाष्यम्— तेषां च लौकिकानामपराधे तैस्तक्षभिः प्रायश्चित्तशास्त्रमाम्नायते । 'आरे भग्ने इन्द्रबाहुर्बद्धव्यः । पायसं च ब्राह्मणो भोजयितव्यः' इति । प्रायश्चित्तं च यदि अदृष्टार्थम्, न शास्त्रादृते । अथ प्रसङ्गपरिहारार्थम्, ततोऽपि आदृतमेव तदिति गम्यते ।

अशास्त्रा तूपसंप्राप्तिः, शास्त्रं स्यान्न प्रकल्पकं, तस्मादर्थेन गम्येताप्राप्ते वा शास्त्रमर्थवत् । १९ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । अशास्त्रा तु एषामुपसंप्राप्तिरिति ब्रूमः । स्मृतेरस्याः शास्त्रं भवता अनुमीयते । न शास्त्रमन्तरेण स्मृतिः । न च स्मृतिमन्तरेण तक्षणां ग्रन्थ उपपद्यते इति । अत उच्यते, भवत्यत्र स्मृतिः, एवमिदं गृहादिकर्म रमणीयं भवतीति । नास्मात् कर्मणः अदृष्टं किंचिदिति । या चासौ रमणीयता, सा अन्तरेणापि शास्त्रं शक्या ज्ञातुम् । ज्ञात्वा च स्मर्यते । तस्मान्नास्याः स्मृतेः शास्त्रं प्रकल्प्यम् । यदि अन्तरेण शास्त्रं न प्राप्येत, ततः शास्त्रमत्र अर्थवदिति प्रकल्प्येत । तस्मान्नेदं शास्त्रोक्तम् । शास्त्रोक्ते च सामिकृते त्यक्ते अत्यन्तं शिष्टा गर्हन्ते, देवताश्रये च । ननु अत्रापि देवताः परिगृहीताः, अस्यां दिशीयं देवता यक्ष्यते, अस्यामियमिति । उच्यते । पुरुषमनु देवताः शिष्टाः स्मर्यन्ते, न गृहमनु । तस्माददोष इति ।

शा—(सिद्धान्तस्तु-) **'अशास्त्रादेव हि प्राप्तिर्दृष्टार्थेषु गृहादिषु । तेन शास्त्रं न कल्प्येत पुरुषार्था हि देवता ॥'** तस्मान्न समाप्तिनियमः ।

सोम—पूर्वत्र प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**— लोके कर्माणि गृहादीनि वेदवत् समाप्यानि । पुरुषमधिकुर्वन्ति इति अधिपुरुषाणि लौकिककर्माणि, तेषां ज्ञानं तत एव शास्त्रादेव इति हेतोः इति ।

वि— 'समाप्यमसमाप्यं वा लौकिकं, शास्त्रकल्पनात् । आद्यो, नो गृहकृष्यादौ शास्त्रकल्पकवर्जनात् ॥' तस्मात् अवश्यं समापनीयमिति नास्ति नियमः ।

भाट्ट— लौकिकस्य तु गृहरथकर्मादेः अशास्त्रीयत्वात् अशास्त्रीयासमापने च शिष्टविगर्हणाभावात् प्रयोजकाभावेन असमापनम् । न च तस्यापि शिल्पश्रुतिमूलत्वात् शास्त्रीयत्वम्, तस्याः अर्थसुखादिवशवर्तितया लोकमूलकत्वेन श्रुतिमूलकत्वाभावात् । यत्तु गृहकरणाद्याश्रितं पुरुषार्थं नैमित्तिकं वास्तुशान्त्यादिकं 'आरे भग्ने इन्द्रबाहुर्बद्धव्यः, पायसं ब्राह्मणो भोजयितव्यः' इत्यादि च, तस्य शास्त्रीयत्वादिष्टमेव समापनम् ।

मण्डन— 'न लौकिकानां नियमः समाप्तौ ।'

शंकर— 'लौकिके नैष नियमः ।'

* **तक्षरजकादिभृतिदाने मन्त्रो न भवति** । ऋत्विग्भ्यो दाने तु मन्त्रोऽस्ति । के.

* **तक्षशास्त्रम्** (६।२।४।१६–१८) । गृहादिकर्मणः तक्षशास्त्रप्रतिपाद्यस्य तक्षशास्त्रानुमितवेदविहितत्वात् प्रक्रान्तानामावश्यकं समापनं इति पूर्वपक्षः । अदृष्टार्थवास्तुपूजायाः दृष्टार्थगृहकर्मार्थत्वायोगात् तदाश्रित्य पुरुषार्थतैव इति वास्तुपूजामुखेनापि गृहकर्मणो न देवताऽऽश्रयत्वम् । गृहस्यादौ आरे भग्ने इन्द्रबाहुर्बद्धव्यः इति प्रायश्चित्तविधानमपि पुरुषार्थमेव इति तद्बलादपि गृहकर्मणो न शास्त्रीयत्वं इति सिद्धान्तः । **सोम. ६।२।४.**

* **तक्षसूत्रं** (तक्ष्णः सूत्रं शास्त्रं) न वेदमूलकम्, किन्तु अन्वयव्यतिरेककुशलपुरुषोत्प्रेक्षितमूलकम् । तदुक्तं किंचिदारब्धं तदवश्यं समापनीयमेवेति न नियमः, दृष्टदोषाभावात् । **वि. ६।२।४.** * **तक्षस्मृतेः** । भवत्यत्र स्मृतिः, एवमिदं गृहादिकर्म रमणीयं भवतीति । नास्मात् कर्मणोऽदृष्टं किंचिदिति । या चासौ रमणीयता सा अन्तरेणापि शास्त्रं शक्या ज्ञातुं ज्ञात्वा च स्मर्यते । तस्मान्नास्याः स्मृतेः शास्त्रं प्रकल्प्यम् । **भा. ६।२।४।१८.**

* **तक्षस्मृतौ** रथगृहनिर्माणादिरूपं लौकिकं कर्म प्रतिपादितम् । सा च स्मृतिर्न वेदमूला रथादौ कार्यक्षमत्वस्य रमणीयत्वादेश्च दृष्टप्रयोजनस्य अन्वयव्यतिरेकाभ्यामेव सिध्युपायावगमात् । ऊहापोहकुशलपुरुषोत्प्रेक्षामूला तु तक्षस्मृतिः । तक्षस्मृत्युक्तं च कर्म अवश्यं समापनीयमेवेति न नियमः । **वि. ६।२।४.**

* **तक्षणं** गुणकर्म यूप उत्पाद्यः । **वि. २।१।४.**

* **तक्षणं** यूपधर्मः । **भा. १२।२।११।२७.** * **तक्षणं** यूपसंस्कारः पशुभेदेऽपि तन्त्रेण कर्तव्यो यूपकाले एव ज्योतिष्टोमे । 'दीक्षासु यूपं छिनत्ति क्रीते वा राजनि' ।

वि. ११।३।४. * **तक्षणादीना**मनुष्ठानं नास्ति साद्यस्क्रे खलेवाल्याम् । **भा.** १०।२।३२।७१–७२.

* **तडागं** खनितव्यं इत्यादिस्मृतिः धर्मे प्रमाणम् । **भा.** १।३।१।१–२ पृ. १६०, * **तडागानि** परोपकाराय, न धर्मायेत्यवगम्यते (परोपकारस्य न धर्मत्वं वा ? के.) । १।३।२।२ पृ. १६६.

* ' **तण्डुलान्** पिनष्टि ' इति पेषणस्य नियमविधिः, नानुवादः दर्शपूर्णमासयोः । **भा.** ४।२।११।२६, * **तण्डुलेषु** प्राकृतव्रीहियवान्यतरनियमस्य चित्रेष्टौ बाधः । १०।२।३१।७०. * **तण्डुलावापमन्त्रे** धान्यशब्दस्योहः (शाक्यानामयने) । मांसस्य पेषणार्थमधिवापोऽस्तीति । क्त्वाचिन्तेयम् । **वृ.** ९।१।१३।३७–३८ वर्णकं २. * **तण्डुलनिर्वृत्तिपर्यन्तमवहननमभ्यसितव्यम्** । यदि सकृदेव मुसलस्य उद्यमननिपतने कृत्वा उत्सृज्येत, यत् कार्यं तन्नैव निर्वर्त्येत । **भा.** ११।१।५।२७. * **तण्डुलपेषणं** गुणकर्म, तण्डुलाः संस्कार्याः । वि. २।१।४. * **तण्डुलप्रक्षालन**निनयनान्तेन कृष्णाजिनास्तरणादिना अनुसमयः नानाबीजेषु । **भा.** ५।२।७।१३–१५.

⌛ **तण्डुलभक्षणन्यायः** । **साहस्री.** ११६ । दिव्यविशेषोऽयम् । तत्राह मिताक्षरायां पितामहः (२।११३) 'तण्डुलानां प्रवक्ष्यामि विधिं भक्षणनोदितम् । चौरे तु तण्डुला देया नान्यस्येति विनिश्चयः ॥ तण्डुलान् कारयेत् शुक्लान् शालेर्नान्यस्य कस्यचित् । मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥ (देव–) स्नानोदकेन संमिश्रान् रात्रौ तत्रैव स्थापयेत् । प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् । (देवप्रार्थनापत्रं यस्य शिरसि स्थापितं तादृशम्) । तण्डुलान् भक्षयित्वा (ण्यन्तात् णिच्) तु पत्रे निष्ठीवयेत् ततः । पिप्पलस्य तु नान्यस्य अभावे भूर्ज एव तु । लोहितं यस्य दृश्येत हनुस्तालु च शीर्यते । गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥ ' इति । **के.**

⌛ **तदापीतेः संसारव्यपदेशात्** (४।२।८ ब्र. सू.) इति **न्यायात्** करणसमुदायरूपं आत्मनः उत्क्रान्त्युपाधिभूतं लिङ्गं शरीरान्तरसंचारि अङ्गीकर्तव्यम् । (तत् तेजआदि भूतसूक्ष्मं आ अपीतेः आ संसारमोक्षात् अवतिष्ठते, ' योनिमन्ये प्रपद्यन्ते ' इत्यादिना संसारस्य मोक्षात् प्राक् व्यपदेशात् इति न्यायसूत्राक्षरार्थः) । **पञ्चीकरणवार्तिकाभरणं** ६.

⌛ **तदिष्टं विदुषां लोके समासव्यासधारणम्** । संक्षेपप्रदर्शनपूर्वकविस्तरवचने व्याख्यातुः प्रतिपादनसौकर्यं श्रोतुश्च प्रतिपत्तिसौकर्यं प्रयोजनं ' तदिष्टं विदुषां॰ ' इति न्यायेन स्पष्टम् । **सु. पृ.** ५४१.

⌛ **तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात्** । ३।५।१५।४१ ॥

सिद्धान्तसूत्रम् । ज्योतिष्टोमे सोमशेषः अनुज्ञातेन भक्षयितव्य इत्युक्तं पूर्वाधिकरणे । तत् अनुज्ञापनं किं लौकिकेन वाक्येन वैदिकेन वा इति संदेहे उच्यते । ' उपहूतः, उपह्वयस्व ' इत्यनेन वैदिकमन्त्रेण तत् सोमभक्षणं अनुज्ञापयेत् । लिङ्गात् मन्त्रलिङ्गात् । मन्त्रे अनुज्ञापनलिङ्गं स्पष्टम् । **के.**

⌛ **तदेकपात्राणां समवायात्** । ३।५।१७।४३ ॥

सिद्धान्तसूत्रम् । ज्योतिष्टोमे सोमभक्षणे अनुज्ञापनं अनुज्ञानं च कर्तव्यमित्युक्तं प्राक् । तत् अनुज्ञापनं एकपात्राणामेव स्यात् । एकेनैव पात्रेण यदा अनेके भक्षयन्ति तदैव कर्तव्यमापतति । समवायात् अनेकेषां एकत्र सहसंबन्धात् । लोके सहभोजनादि आचरितुकामः चित्तमन्यस्यानुकूलयति । अत्रापि एकपात्रे सोमे पीयमाने कदाचिदन्येन पातव्यमन्यः पिबेत् । तत्रानुज्ञापनं संभवति । त्वया अर्धं पातव्यं मया अर्धम्, कदाचिदहं अभ्यधिकं न्यूनं वा पिबेयं तदनुज्ञातुमर्हसीति । एकपात्रे वा पानं त्वया सह आचरन्नहं तव चित्तप्रसादनं व्याहन्यां इति संभवति अनुज्ञापनम् । तस्मात् एकपात्रेष्वेव पिबत्सु एतत् स्यात्, न भिन्नपात्रेषु । एकं पात्रं येषां पिबतां ते एकपात्राः ऋत्विज इति बहुव्रीहिः । **के.**

⌛ **तद् गुणास्तु विधीयेरन्नविभागाद् विधानार्थे, न चेदन्येन शिष्टाः** । १।४।६।९ ॥ (इति **न्यायः**) ।

" यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति ' इति उक्त आग्नेयः किं गुणविधिः,

कर्मनामधेयं वेति विचारे सिद्धान्तमाह । तत् इति पृथक् पदम् । तुशब्दश्चार्थे । तत् यागादि कर्म गुणाश्च यागविशेषणभूता देवताऽऽदयः युगपत् विधीयेरन् उपदिश्येरन् । कुतः ? विधानार्थे लिङ्प्रत्यये अविभागात् विशेष्यविशेषणविधिविभागाभावात् द्रव्यविधिः देवताविधिः इति वा विशेषाभावात् । कस्य चिदन्येन विधाने तु अविभागेन विधानं न स्यात् । तदाह न चेत् अन्येन शिष्टाः विहिताः स्युः इति । अन्येन विधानाभावे तु एकेनैव लिङा अविभागेन विधानं स्यात् । तस्मात् आग्नेयशब्दः अग्निदेवतारूपगुणविशिष्टकर्मविधानार्थत्वात् गुणविधिरेव न कर्मनामधेयम् । अविभागात् इत्यनेन आवृत्तिलक्षणवाक्यभेदपरिहार उक्तः । न चेत् इत्यादि तु गौरवलक्षणवाक्यभेदपरिहारः । तथाच वार्तिकम्– ‘ न चेदन्येन शिष्टाः स्युर्यागाः शब्देन केनचित् । ते गुणाश्चोपदिश्येरन् विधिना ह्यविभागतः ॥ ’ इति । के.

* तद् गुणास्तु इत्यगुणविधिपरे वाक्ये भवति अनेकगुणविधानमित्युक्तम् । भा. २।३।३।४ पृ. ५९३.

*** तद् गुणास्तु विधीयेरन्० इत्यनेन न्यायेन** देवतातद्धितेनैव देवतोद्देशपूर्वकद्रव्यत्यागरूपोत्सर्गविधिसिद्धिः । सु. पृ. ९४१.

तद् गुणास्तु विधीयेरन्नविभागाद् विधानार्थे, न चेदन्येन शिष्टाः । १।४।७९ ॥

‘ यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति ’ इत्येवमादयः श्रूयन्ते । तत्र संदेहः किं आग्नेयः अग्नीषोमीयः इत्येवमादयः गुणविधयः, कर्मनामधेयानि इति । अत्र **प्रभाकरेण** संगतिलोभादित्थमधिकरणमुपवर्णितम्, ‘ यदाग्नेयोऽष्टाकपालो भवति’ इत्यत्र भवत्यर्थः प्रतीयते । न चासौ विधिविषयः, पुंव्यापाररूपत्वाभावात् । विधिविषयश्च नामावच्छिन्नो गुणावच्छिन्नो वा विधीयते, अतो गुणविधिनामधेयत्वयोरसंभवात् तृतीयप्रकाराभावाच्च अप्रतिपादकतया अप्रामाण्यं आग्नेयादिचोदनानामिति पूर्वपक्षः । सिद्धान्तस्तु यथाभाष्यमेवेति । **तदिदमसंगतम्**, वक्ष्यमाणपूर्वपक्षन्यायेन नामधेयत्वेनैव प्रामाण्योपपत्तेः । अप्रामाण्यपक्षोऽयं पक्षग्रहणमात्रेणैवेति यथावार्तिकमेवाधिकरणं प्रस्तूयते । सिद्धेषु नामधेयेषु इदानीं तदपवादः क्रियते । अत्रायं पूर्वपक्षिणोऽभिसंधिः ; ‘ यदाग्नेयोऽष्टाकपालो भवति ’ इत्यत्र अष्टाकपालः स्वतो भवति इति वाक्यार्थासंभवात् भावना तावदवश्यं कल्पनीया । अष्टाकपालस्य च अपुरुषार्थत्वेन भाव्यत्वानर्हत्वात् अक्रियारूपत्वेन च फलसाधनत्वासंभवात् फलभावनाऽनुरञ्जकक्रियाकल्पनायां क्रमपठितयाज्याऽनुवाक्यासमर्पिताग्निदेवतावशेन अष्टाकपालद्रव्यकयागरूपैव क्रिया कल्प्यते । सा च द्रव्यदेवताविशिष्टा पञ्चमलकारेण विधीयते । न च स्ववाक्योपात्ताग्नेयतद्धितस्यैव देवतासमर्पकत्वम्, अग्निर्देवता, अग्नेर्जातः, अग्नये हितः इति विनिगमनाऽभावेन तस्य संदिग्धार्थत्वात् । मन्त्रस्य त्वनुष्ठेयार्थप्रकाशकत्वेनासंदिग्धार्थत्वात् मन्त्रादेव देवताप्राप्तिः । तथा च आग्नेयपदं तत्प्रख्यन्यायेन नामधेयमेवेति ।

तथा ‘ अग्निहोत्रं जुहोति ’ इत्यत्राग्निहोत्रपदम् । इत्येवं प्राप्तेऽभिधीयते । भवेदेवं यदि अत्र आग्नेयपदं अष्टाकपालपुरोडाशसमानाधिकरणं असंदिग्धदेवताऽभिधायितद्धितान्तं प्रथममेव न श्रूयेत । न चास्य संदिग्धार्थत्वम्, विधेयीभूताकाङ्क्षितदेवतापरत्वे सति अनाकाङ्क्षितानुवाद्यार्थत्वस्यासंभवात् । ततो देवतातद्धितान्ताग्नेयपदादेव प्रथमं द्रव्यदेवतासंबन्धानुमितयागविधेः सिद्धत्वात् न तदवधीरणेन चरमभाविजघन्यतरमान्त्रवर्णिकदेवताकल्पनया यागविधानमाश्रित्य अनन्यथासिद्धस्य आग्नेयपदस्य नामधेयत्वाश्रयणमयुक्तमिति । अग्निहोत्रपदे तु यथा चतुर्थीसमासस्य विधेयीभूतदेवतापरत्वम्, तथा सप्तमीसमासस्यापि विधेयीभूतहोमाधारपरत्वात् संदिग्धत्वमेव । न चात्रापि ‘ यदाहवनीये जुहोति ’ इत्यनारभ्यश्रुतवाक्येनैव आधारप्राप्तेः असंदिग्ध एव चतुर्थीसमास इति वक्तव्यम् । आहवनीयाग्निमात्राङ्गत्वप्रतिपादनेनैव विध्युपपत्तौ तेनात्रावश्यं संदेहव्युदासार्थे प्रकरणानुसंधानं वक्तव्यम् । तत्र च मन्त्रवर्णादेव देवतायाः प्राप्तत्वात् भवतु अग्निहोत्रपदं नामधेयम् । न त्विह प्रथममेव देवतावाचितद्धितबलेन निःसंदिग्धदेवताभावावगमादिति । **प्रयोजनम्**– पूर्वपक्षे आग्नेयशब्दस्य कर्मवचनत्वात् ‘ आग्नेयं चतुर्धा करोति ’

इत्याग्नेयकर्मण एव चतुरावृत्तत्वम् । सिद्धान्ते तु आग्नेयपदस्य गुणवचनत्वात् आग्नेयपुरोडाशस्यैव चतुर्धाकरणमिति । सूत्रं तु विधानार्थे तद्धितान्ते आग्नेयपदे अविभागात् तदविनाभूतत्वात् द्रव्यदेवतासंबन्धाक्षिप्तयागाख्यं कर्म गुणाश्च अग्निपुरोडाशादयो विशिष्टविधिना विधीयन्ते । तत् कर्म गुणाः (च) न चेदन्येन शिष्टाः विहिता इत्यर्थः । तौता.

* 'तन्नित्यं तच्चिकीर्षा हि' (तत् नित्यम्) (६।३।४।१७) । यत् सकलसोमधर्मासंभवे विकलान् सोमधर्मानुत्पादयेत्, तत् पूतीकगतान् इति । वक्ष्यति हि 'तन्नित्यम्' इति । वा. ३।६।१५।४०.

* तत् प्रकरणे यत् तत्संयुक्तमविप्रतिषेधात् । ३।४।१।६ ॥ प्रकरणे यत् मनुष्यसंयुक्तं कर्म तत्र निवीतं निविशते, न शुद्धे प्रकृते कर्मणि, सर्वेषां श्रुतिप्रकरणसमाख्यानामविरोधात् शुद्धप्रकृतकर्मनिवेशे श्रुतिविरोधापत्तेः इत्येवं सप्तम्यर्थे तत् इत्यव्ययाङ्गीकारेण सूत्रव्याख्या । सु. पृ. १३४८ । तत्संयुक्तशब्देन मनुष्यप्राधान्यमुक्तम् । पृ. १३४९.

⧗ तत् प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः । ३।६।५।१४ ॥

अनारभ्य विहितमाधानं किं प्रकृत्यर्थम्, किंवा सर्वकर्मार्थम् इति संदेहे पूर्वपक्षं सूत्रेणाह । तत् आधानं प्रकृत्यर्थं दर्शपूर्णमासार्थमेव । कर्मान्तरे तु पुनःपुनः कार्यम् । यथा अन्ये अनारभ्यवादाः 'यस्य पर्णमयी जुहूर्भवति' इत्येवमादयः प्रकृत्यर्थाः, तथा अनारभ्य विहितमाधानमपि प्रकृत्यर्थमेव ।

सर्वार्थं वाऽऽधानस्य स्वकालत्वात् । १५ ॥

पूर्वपक्षस्य निरासार्थो वाशब्दः । न प्रकृत्यर्थमेव आधानम्, किन्तु सर्वार्थं सर्वकर्मार्थम् । आधानस्य स्वकालत्वात् । स्वः स्वीयः कालो यस्य तत् स्वकालम् । आधानस्य स्वातन्त्र्येण कालो विहितः वसन्तादिः ऋतुः कृत्तिकाऽऽदीनि च नक्षत्राणीति । यदि प्रकृत्यर्थं स्यादाधानम्, तदा यः प्रकृतेः कालः स एवास्यापि कालः स्यादिति न स्वातन्त्र्येण विहितः स्यात् । स्वकालत्वात्तु नेदं प्रकृत्यर्थम् । तस्मात् सर्वार्थम् । आधानमग्न्यर्थम्, अग्निश्च सर्वार्थः इति आधानस्यैव सर्वार्थत्वमुक्तं वेदितव्यम् । के.

⧗ 'तद्यथा आम्रे फलार्थे निमित्ते छाया गन्ध इत्यनूत्पद्येते एवं धर्मं चर्यमाणं अर्था अनूत्पद्यन्ते' इत्यापस्तम्बोक्तन्यायात् स्वर्गाद्यर्थमनुष्ठीयमानेषु क्रतुषु, तत्प्रयोगमध्ये समुच्चित्यानुष्ठेयैः कैश्चन पदार्थैः अयत्नेन नान्तरीयकतया सिध्यत्सु फलेषु । परिमलः. ३।३।३६।६१ ब्र. सू.

* 'तद्योऽहं सोऽसौ, योऽसौ सोहम्' इत्युपनिषच्छ्रुतेः ब्रह्मणः सवित्रधिष्ठातृत्वावगतिः । सु. पृ.१०१०.

⧗ तत् सर्वार्थमनादेशात् । ४।३।६।१३ ॥

'पितृभ्यः पूर्वेद्युः करोति' 'यः सत्रायागुरते स विश्वजिता यजेत' इत्यादिकं कर्म किं सर्वं फलं साधयति एकमेव वा किञ्चित् साधयति इति विचारे पूर्वपक्षमाह । तत् पितृकर्म विश्वजिच्च कर्म सर्वार्थं सर्वं च तं अर्थं च सर्वार्थं स्वर्गप्रतिष्ठाप्रजास्वाराज्यादिकं साधयति अनादेशात् फलविशेषादेशाभावात् । विशेषाभावे च सामान्यपक्षपातात् ।

एकं वा चोदनैकत्वात् । १४ ॥

सूत्रेण पूर्वपक्षे प्राप्ते सिद्धान्तयति । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । न सर्वं फलं साधयति विश्वजिदादि कर्म । किन्तु एकं फलं किञ्चित्साधयति । चोदनैकत्वात् 'यजेत' 'करोति' इति चोदनाया एकत्वात् । एकेन फलेन एकस्याश्चोदनाया निराकाङ्क्षत्वे सति न सा अपरेण फलेन संबन्धमर्हति । तस्मात् एकदा नियतमेकमेव फलं साधयति । के.

⧗ तत् सर्वार्थमविशेषात् । ३।३।१४।३५ ॥

पौष्णं पेषणं प्रकृतौ श्रूयमाणं विकृतौ नेयमित्युक्तम् । तत् पेषणं च पूषदेवताकं सर्वार्थं चरौ पशौ पुरोडाशे च स्यात् । अविशेषात् पौष्णे चरौ एव इत्यादि विशेषस्य अनुक्तत्वात् । अथ वा 'अदन्तको हि' इति हेतुवादस्य सर्वत्र अविशेषात् । तस्मात् सर्वत्र पेषणं कर्तव्यम् इति पूर्वः पक्षः ।

चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात् पशौ न स्यात् । ३६ ॥

पूर्वपक्षं वाशब्देन व्यावर्तयन् सिद्धान्तमाह । पौष्णं पेषणं चरौ एव विधीयते । पुरोडाशे तु अर्थोक्तं अर्थेन प्रयोजनेन पुरोडाशनिष्पादनेन उक्तं प्राप्तमेव । नहि पेषणं विना पुरोडाशस्य निष्पत्तिर्भवति, इति न तत्र विधातव्यम् । अर्थसिद्धं तत् तत्र । अथ पशौ यद्यपि न अर्थसिद्धम्, तथापि पशौ पेषणं न स्यात् । अर्थविप्रतिषेधात् हृदयाद्याकाररूपस्य अर्थस्य विप्रतिषेधात् पेषणेन विनाशप्रसङ्गात् । तस्मात् पेषणं चर्वर्थमेव, न सर्वार्थम् ।

चरावपीति चेत् । ३७ ॥

पौष्णं पेषणं हृदयाकाराद्यर्थविनाशप्रसङ्गात् पशौ न कर्तव्यं चेत् तर्हि चरौ अपि न स्यात् । नेत्यनुवर्तते । अन्योन्यालग्नकत्वरूपविशदपाको हि चरुर्भवति, पेषणे तु तन्नाशः प्राप्तः । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, पक्तिनामत्वात् । ३८ ॥

पौष्णे चरौ पेषणे कृतेऽपि न अर्थविप्रतिषेधः । चरुशब्दस्य पक्तिनामत्वात् । तण्डुलप्रकृतिकत्व– अनवस्रावितत्वोभयविशिष्ट–अन्तरूष्मपक्वत्वरूपा या पक्तिः तस्याः नाम चरुरिति । पूष्णश्च अदन्तकत्वात् पेषणेन विशदत्वस्य बाधेऽपि न दोषः । तस्मान्नार्थविप्रतिषेधः । तस्मात् पौष्णचर्वर्थं पेषणम्, न सर्वार्थमिति सिद्धान्तः । के.

⧗ तत् सर्वत्राविशेषात् । ३।४।१३।३४ ॥

तत् सोमेन्द्रचरुरूपं कर्म सोमपानव्यापदि क्रियमाणं सर्वत्र आर्त्विजे याजमाने च वमने स्यात् । अविशेषात् विशेषस्य 'अमुष्य वमने प्रायश्चित्तम्' इति अश्रवणात् । इति पूर्वः पक्षः ।

स्वामिनो वा, तदर्थत्वात् । ३५ ॥

पूर्वपक्षव्यावृत्त्यर्थो वाशब्दः । स्वामिनो यजमानस्य सोमवमने सोमेन्द्रश्चरुः स्यात् न ऋत्विजो वमने । तदर्थत्वात् यजमानार्थत्वात् कर्मणो यत्र सोमो वम्यते । तस्मात् याजमाने वमने सोमेन्द्रश्चरुः इति सिद्धान्तः ।

लिङ्गदर्शनाच्च । ३६ ॥

'सोमपीथेन वा एष व्यृध्यते यः सोमं वमति' इति लिङ्गस्य दर्शनात् याजमाने सोमवमने सोमेन्द्रश्चरुः स्यात् । व्यृध्यते इति स वक्तव्यो यस्य सोमपानात् ऋद्धिः समृद्धिः प्रार्थनीया । तद्वैगुण्याच्च व्यृद्धिराशङ्क्यते । विगता ऋद्धिः व्यृद्धिः ऋध्यभावः हानिः । स्वामिन एव च तदुभयमपि, इति तस्यैवेष्टिः । के.

⧗ तानि द्वैधं गुणप्रधानभूतानि । २।१।३।६॥

अवगतमेतत् भावशब्दाः प्रधानकर्मणो वाचका इति । बहुप्रकाराश्च भावशब्दाः यजति ददाति जुहोति इत्येवंप्रकाराः, अवहन्ति दोग्धि पिनष्टि विलापयति इत्येवमादयश्च । तेषु संदेहः किं सर्वे प्रधानकर्मणः अभिधायकाः, उत केचित् गुणकर्मणः इति । भावार्थेभ्यः अपूर्वमिति व्युत्पादिते सर्वेषामेव आख्यातपदानां भावार्थत्वाविशेषात् सर्वेभ्य एव अपूर्वप्रसक्तौ इदानीं तदपवादार्थं गुणप्रधानविवेकः क्रियते । तत्रायं पूर्वपक्षिणोऽभिसन्धिः— यथा यजति ददाति जुहोतीत्यादिषु भावना भाव्यं अपूर्वमेव धात्वर्थस्य संनिधिवशाद् गृह्णाति प्रयोजनतया साध्यम्, तथा अवहन्ति दोग्धि पिनष्टि विलापयतीत्यादिष्वपि भावनाभाव्यम् अपूर्वमेव धात्वर्थस्य प्रयोजनतया साध्यं युक्तम् । अतः सर्वेषामेव प्रधानकर्मत्वमविशेषात् । ननु 'व्रीहीनवहन्ति' इत्यादिषु द्वितीयाश्रुत्या व्रीह्यादीनामेव समभिव्याहृतावघातादिक्रियाऽपेक्षया प्राधान्यमवगम्यते । अतः कथं कर्मणः प्राधान्यमेव । मैवम्, लोकवेदयोर्द्वितीयायाः प्राधान्याभिधानव्यभिचारात् । तथाहि, लोके तावत् 'उपाध्यायाय गां ददाति' इत्यादिषु अनीप्सितकर्मण्यपि द्वितीया दृश्यते एव । तथा वेदेऽपि सक्तुमारुतैककपालादिषु, 'सक्तून् जुहोति' 'एककपालं जुहोति' इत्यादिषु द्वितीया श्रूयते एव । न च सक्त्वादीनां प्राधान्यमस्ति । अतो नात्र द्वितीयाश्रुत्या व्रीह्यादीनां प्राधान्यमवगम्यते इति । न च वाच्यम्, वैतुष्यरूपदृष्टोपकारद्वारेण सामवायिकत्वे संभवति यागादिवत् अपूर्वद्वारेण आरादुपकारकत्वमयुक्तमिति । यतो वैतुष्यार्थत्वेन अवघातविधौ सति दृष्टार्थत्वं सामवायिकत्वं च भवति, विधेश्च अप्राप्तविषयत्वात् । न च प्रमाणा-

न्तरविषयवैतुष्योपायो विधिः संभवति इति दृष्टार्थत्वमेव। **न च** नियमस्य अप्राप्तत्वात् नियमार्थोऽयं विधिरिति वक्तव्यम्, नियमस्याश्रुतत्वात्। नहि अत्र नियमाभिधायकः कश्चिच्छब्दः श्रूयते। किञ्च वैतुष्योपायत्वेन अवघातस्य प्राप्तत्वात् उपायान्तरनिवृत्तिरूपो नियमो वक्तव्यः। तथा च सति शब्दान्तरेण परिसंख्यैव उक्ता भवेत्। सा च त्रिदोषत्वात् अयुक्तेति प्रधानकर्मत्वमेव। अथोच्यते, न वयं नियमस्य शाब्दत्वं अन्यनिवृत्तिरूपत्वं वा ब्रूमः। किं तर्हि ? लोकप्राप्तस्यैव अपूर्वसाधनताज्ञापनम्। तच्च अस्य निवृत्तिफलत्वात् नियम इत्युच्यते। तदत्र अवघातस्य अपूर्वसाधनत्वमभिमतं यत् विधिज्ञाप्यं किं प्रयाजादिवत् साक्षादेव अपूर्वजनकत्वम्, अपूर्वाय वैतुष्यजनकत्वं वा ? न तावत् साक्षात्, सिद्धान्तिना तदनभ्युपगमात्। नापि अपूर्वाय व्रीहिवैतुष्यजनकत्वम्, तस्यापि लोकत एव प्राप्तत्वात्। अथैवं सति लोकानुसारेण दलनादेरपि अपूर्वसाधनत्वप्राप्त्यै विधिरिति चेत् नैतत्, तथा सति परिसंख्याऽऽपत्तेर्न नियमविधित्वम्। तस्मात् प्रयाजादिवत् अपूर्वार्थत्वमेव अवघातादीनामिति। एवं च सति 'यदेकस्मादपूर्वं तदेतरत् तदर्थम्' इति न्यायेन व्रीह्यादिद्रव्याणां अवघातार्थत्वात् सर्वेषामेव आख्यातानां प्रधानकर्माभिधायित्वम्, ततश्च अपूर्वभेद एवेति। **एवं प्राप्ते, अभिधीयते।** भवेदेतदेवं यदि उभयमत्र द्रव्यं क्रिया च विधीयते। तदा हि द्वयोरेव प्रयोजनाकाङ्क्षायां द्रव्यस्य दृष्टक्रियानिष्पादकत्वेनैव प्रयोजनाकाङ्क्षानिवृत्तिः। कर्मणस्तु दृष्टासंभवात् अदृष्टार्थत्वमेव कल्प्यते इति प्रयुक्तम्। यदा तु वाक्यान्तरप्रतिपादितप्रयोजनं द्रव्यमुपात्तम्, तदा कर्मणोऽपि तदपेक्षितदृष्टोपकारनिर्वर्तनेनैव प्रयोजनत्वात् नादृष्टकल्पनायां प्रमाणमस्ति। इहापि 'व्रीहीनवहन्ति' इत्यादौ 'व्रीहिभिर्यजेत' इत्यादिवाक्यप्रतिपादितप्रयोजनमेव व्रीह्यादिद्रव्यमुपात्तम्, तथा विधीयमानस्य अवघातादिकर्मणोऽपि तदपेक्षिततण्डुलादिरूपदृष्टोपकारनिर्वर्तनेनैव प्रयोजनत्वात् नादृष्टकल्पनायां प्रमाणमस्ति। तदुक्तम्—'नामाख्यातार्थसंबन्धे यदक्लृप्तं प्रयोजनम्। तस्यादृष्टार्थता युक्ता, नेतरस्याप्रमाणिका॥' इति॥ (वा. पृ. ४०६)। **न च** एवं सति अवघातादेर्दृष्टवैतुष्योपायत्वस्य प्राप्तत्वात् न तदर्थतया विधेर्वैयर्थ्यमिति वक्तव्यम्। यतो व्रीहीणां तण्डुलादिनिर्वृत्तिद्वारेण यागसाधनत्वात् तण्डुलनिर्वृत्तिरूपार्थाक्षेपेण अवघातप्राप्तिर्वक्तव्या। न च श्रौते विधौ सति आक्षेपः संभवति। तेन आक्षेपात् प्रागेव श्रौतस्य विधेः प्राप्तविषयत्वम्। न च विनापि विधिना प्राप्स्यतः किं विधिनेति विधिवैयर्थ्यम्, अप्राप्तांशपूरणेनैव अर्थवत्त्वात्। तथाहि, नित्यभूता खलु प्राप्तिः विधितोऽवगम्यते, आक्षेपतश्च पाक्षिकी। अन्यस्यापि वैतुष्योपायस्य आक्षेपाविशेषात्। तेन यस्मिन् पक्षे नावघातप्राप्तिः तत्पक्षपूरणेन अपूर्वोपयोगितया विधेः साफल्यमिति। अयमेव च नियमपरिसंख्ययोर्भेदः यत् पक्षप्राप्तविषयत्वात् नियमविधेः अप्राप्तांशपूरणमेव फलम्, अर्थादन्यनिवृत्तिः। परिसंख्यायां तु युगपदुभयप्राप्तेः अप्राप्तांशपूरणाभावात् अन्यनिवृत्तिरेव विधेः फलमिति। एष च नियमविधिप्रकारः 'व्रीहिभिर्यजेत' इत्यत्र द्रव्यविधावपि ऊहनीयः। **ननु** अत्र किम् अवघातादिजन्यं अदृष्टमस्ति न वा ? न तावन्नास्ति, अदृष्टमन्तरेण नियमानुपपत्तेः। अथास्ति, तदा संमार्गादिवत् अवघातादेरपि अदृष्टार्थत्वात् नास्त्यधिकरणभेद इति। **नहि** अवघातादेः अदृष्टार्थत्वे विधानमनुष्ठानं वा, किंतु दृष्टलोलुपत्वात् विधिः अपेक्षितव्रीहिवैतुष्यार्थमेव। तस्य च अप्राप्तांशपूरणेन यत् अवघातादेर्नियमानुष्ठानप्रतिपादनम्, तदुपपत्तये तण्डुलादिगतमदृष्टं कल्प्यमानम् 'न निमित्तं विधिरपबाधते' इति न्यायेन न दृष्टार्थत्वं अबाधितमधिकरोति। संमार्गादिषु तु विध्यपेक्षितदृष्टाभावात् अदृष्टार्थमेव विधानमिति भेदः। यत्तु द्वितीया प्राधान्यं व्यभिचरतीत्युक्तम्, तदनन्तराधिकरणे परिहरिष्यामः। इह पुनः अद्वितीयान्तानामपि बहूनाम् 'प्रयाजशेषेण हवींष्यभिघारयति' 'मैत्रावरुणाय दण्डं प्रयच्छति' 'अग्नेस्तृणान्यपचिनोति' 'तप्ते पयसि दध्यानयति' इत्येवमादीनामपि उदाहरणत्वात् वाक्यान्तरक्लृप्तप्रयोजनद्रव्यसंबन्धेन दृष्टोपकारदर्शनमेव प्रमाणमिति। तदुक्तम् 'यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात्' 'यैस्तु द्रव्यं चिकीर्ष्यते

गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात्' (सू.२।१।७-८) इति। अतो द्रव्यगुणत्वात् एवमादीनां नापूर्वमेद इति। **प्रयोजनम्-** विकृतौ प्रैयङ्गवे चरौ अतिदेशप्राप्तः अवघातो व्रीहिद्रव्ये एव कर्तव्यः, प्रधानश्रुतद्रव्याङ्गद्रव्यस्य अबाधकत्वात्। अतिदिष्टप्रयाजाज्यवदिति पूर्वः पक्षः। तदुक्तम् '**प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकम्। प्रयाजेष्वाज्यवत् तेन हन्तौ स्याद् व्रीह्यबाधनम्॥**' इति। ('प्रयाजेज्याज्यवत्तेन' इति मूले वा. पृ. ४०७)। सिद्धान्ते तु (प्रयोजनं-) प्रियङ्गूणामेव कार्यान्तरोपयुक्तत्वेन संस्कार्यत्वात् तासामेवावघातः इति। तदुक्तम् '**प्रधानौपयिकं द्रव्यं संस्कारैरपि युज्यते। तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः पियङ्गवः॥**' इति। (वा. पृ. ४०७)। तथा प्रकृतावपि प्रयोजनानि, अदृष्टार्थत्वे सति सर्वौषधिके कृष्णलावघातवत् सकृदेवावघातः कर्तव्यः। एवं यवप्रयोगेऽपि अवघातार्थं व्रीहय एवोत्पादयितव्याः। तथा प्रधानद्रव्यवैतुष्यं उपायान्तरेणापि कर्तव्यं यदि पूर्वः पक्षः। सिद्धान्ते तु तण्डुलनिर्वृत्तिपर्यन्तं अवघातोऽभ्यसितव्यः। यवप्रयोगे तु यवा एव अवहन्तव्याः। प्रकृतद्रव्यवैतुष्यं च नोपायान्तरेण कर्तव्यमिति। सूत्रं तु-आख्यातानि द्वैधं द्विप्रकारं विधायकानि कानि चित् गुणकर्मणः, कानि चित् प्रधानकर्मण इति।

यत्तु केनापि गुरुमतमजानता तन्मतमसम्यगुपन्यस्य दूषितम्, तदुपहासास्पदम्। तथाहि, स खलु एवमाह 'अन्यनिष्ठो हि भावार्थो न विधिविषयः, नापूर्वविषय इत्यर्थः। अन्यनिष्ठत्वं च भावार्थस्य अवगतापूर्वसाधनद्रव्यप्रयोजनत्वम्। तथा अवघातप्रोक्षणादिषु विद्यते इति तेषामपूर्वविषयत्वाभावात् गुणकर्मत्वमेव। अनन्यनिष्ठस्तु भावार्थोऽपूर्वविषय एव। अनन्यनिष्ठत्वं च भावार्थस्य अवगतापूर्वसाधनद्रव्यप्रयोजनत्वमेव। तच्च प्रयाजानुयाजादिषु विद्यते इति तेषां प्रधानकर्मत्वमेव।' इति। न चैवम्भूते प्रधानकर्मत्वे सुवर्णभरणदानाध्ययनादीनि व्यभिचारस्थानानि भवन्ति, सर्वेषामेव अनारभ्याधीतत्वेन अपूर्वसाधनद्रव्यप्रयोजनत्वानवगमात्। नापि 'यस्य पर्णमयी जुहूर्भवति' इतिवत् अपूर्वसंबन्धिद्रव्यप्रयोजनत्वावगतिः, सुवर्णादीनां व्यभिचरितक्रतुसंबन्धित्वात् अपूर्वोपायत्वानुपस्थितेः, द्वितीयाद्यनीप्सितकर्मण्यपि नानुपपन्ना। एवं च सति अवघातादिषु अन्यनिष्ठत्वेन भावार्थस्य अपूर्वविषयत्वासंभवात् विषयस्य च पूर्वविशेषावगतिहेतुत्वात् विधिशब्देन अपूर्वे प्रतीयमानं कृतमेव अनूद्यते इति युक्तम्। प्रयाजादिषु तु अपूर्वसाधनद्रव्यप्रयोजनत्वानवगमे विषयभावस्य उक्तत्वात् युक्ता प्रयाजादिविषयापूर्वान्तरावगतिरिति। न चैवं सति अवघातादीनां अपूर्वाविषयत्वात् अविधेयत्वमिति वाच्यम्। नहि अपूर्वविषयत्वं विधेयत्वम्, किंतु अपूर्वसिद्ध्यर्थमुपादीयमानत्वम्। तच्च अवघातादिष्वपि अविशिष्टमेवेति। यदा यत् तत्सिद्ध्यर्थमुपादीयते, तत् विधेयमिति तन्त्रे व्यवहारः इति। सर्वं चैतत् अवहितमतिभिः तत्त्वतो निरूप्यमाणं असन्मताभिन्नमेव। अपूर्वाभिधानाभिधेययोः परं विशेषः। अपूर्वाभिधानं च अपूर्वाधिकरणे एव निराकृतम्। अलं अतिपरपक्षप्रतिक्षेपमात्रपरतयेति। **तौता.**

⧖ तानि द्वैधं गुणप्रधानभूतानि। २।१।३।६।।

तानि अपूर्वबोधकानि आख्यातानि द्वैधं द्वेधा द्विप्रकाराणि। कानिचित् गुणभूतानि कानिचित् प्रधानभूतानि चेति। विहितकर्मणां गुणत्वप्रधानत्वद्वारा आख्यातानां द्विविधत्वं ज्ञेयम्।

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात्। ७॥

प्रधानकर्मणां लक्षणमुक्त्वा तद्वाचकानां प्रधानभूतानामाख्यातानां लक्षणमर्थादाह। यैः प्रयाजादिभिः आज्यादि द्रव्यं दृष्टधर्मवत्तया न चिकीर्ष्यते नोत्पादयितुमिष्यते, तानि कर्माणि प्रधानभूतानि। द्रव्यस्य आज्यादेः प्रयाजादिदृष्टकार्यनिर्वर्तकतया गुणभूतत्वात् प्रयाजादिनिरूपितं गुणत्वं प्राप्तत्वात्। तथा च तादृशप्रधानकर्मविधायकानि आख्यातानि प्रधानभूतानि इत्यर्थः।

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात्। ८॥

गुणकर्मणां लक्षणमुक्त्वा तद्द्वारा गुणभूतानामाख्यातानां लक्षणं बोधयति। तुशब्दः प्रधानकर्मादिवैलक्ष-

ण्यार्थः। यैः आधानावहननादिकर्मभिः द्रव्यं अग्निव्रीह्यादि चिकीर्ष्यते उत्पादयितुं संस्कर्तुं विकर्तुं आप्तुं वा इष्यते, तत्र कर्मणि गुणः गुणभावः प्रतीयेत। तस्य कर्मणः द्रव्यप्रधानत्वात् द्रव्यसंस्कारार्थत्वात्। तत्र हि द्रव्यं संस्कार्यतया प्रधानम्। अर्थात् तादृशानां गुणकर्मणां बोधकानि आदधीत अवहन्ति इत्यादीनि आख्यातानि गुणभूतानि। यैर्द्रव्यमुत्पाद्यते यथा आधानेन अग्नयः क्रियन्ते, वरणेन ऋत्विजः संस्क्रियन्ते, अवहन्तिना व्रीहयः पेषणेन वा तण्डुला विक्रियन्ते तानि गुणभूतानि प्रयोजनवद्द्रव्यसंस्कृतेरीप्सितत्वात्। **के.**

* 'तानि द्वैधं' इति (न्यायेन) अभ्याधानेन द्रव्यं चिकीर्ष्यते। दृष्ट एव संस्कारः अग्नेः ('आष्ट्राद्दाहृत्य अवदध्यात्' इत्यादौ)। **टुप्.** १२।४।७।२०. * उपादेयस्थले प्रकृतग्रहणस्य 'तानि द्वैधम्' इत्यत्र निराकृतत्वात्। **भाट्ट.** ४।१।११. * एतेन दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात् इति न्यायस्य **तानिद्वैधादौ** व्युत्पादनेऽपि अकर्मकाले प्रयोगबलात् अवश्यमदृष्टार्थत्वमिति शङ्कानिराकरणार्थत्वेन अस्य (गानस्य) अवैयर्थ्यं इति सूचितम्। **के.**

⧗ **तानिद्वैधाधिकरणम्**। कानिचित् कर्माणि प्रधानभूतानि, कानिचिच्च गुणभूतानि। तेषां लक्षणमुच्यते॥

तानि द्वैधं गुणप्रधानभूतानि। २।१।३।६॥

भाष्यम्— अवगतमेतद् भावशब्दाः कर्मणो वाचका इति। बहुप्रकाराश्च भावशब्दाः यजति, जुहोति, ददाति इत्येवंप्रकाराः, दोग्धि, पिनष्टि, विलापयति इत्येवमादयश्च। तेषु संदेहः किं सर्वे प्रधानकर्मणो विधायकाः, उत केचित् संस्कारकर्मणः इति। भावार्थत्वाविशेषात् सर्वे प्रधानकर्मणो वाचका इति प्राप्तम्, ततो ब्रूमः। तानि द्वैधं भवितुमर्हन्तीति। द्विप्रकाराणि, कानिचित् प्रधानकर्मणो वाचकानि, कानिचित् संस्कारकर्मणः। एवमपि सर्वाणि अर्थवन्ति, अर्थवत्त्वे सति सर्वेभ्यो न शक्यमपूर्वं कल्पयितुम्। अतो न सर्वाणि प्रधानकर्मणो वाचकानि।

वा— एवमाख्यातभेदानुसारेण अपूर्वभेदानुगमे सर्वत्र प्राप्ते तदपवादार्थं गुणप्रधानविवेकारम्भः। तत्र तावत् '**आख्यातत्वाविशेषेण भूतैर्भव्यार्थजन्मनः। सिद्धे च साध्यताशक्तेः सर्वाख्यातप्रधानता॥**' यावद्धि प्रयोजनकल्पनं तत् सर्वं धात्वर्थात् न्याय्यं प्रयोजनवच्च प्रधानमपूर्वसाधनं च। तेन यज्यादिवदेव अवहन्त्यादीनामपि व्रीह्यादिभिर्निष्पाद्योऽर्थः। अतश्च तेऽपि अपूर्वसाधनमिति। अत्रोच्यते '**नामाख्यातार्थसंबन्धे यदक्लृप्तप्रयोजनम्। तस्यादृष्टार्थता युक्ता नेतरस्याप्रमाणिका॥**' सर्वत्रैव द्रव्यकर्मसंबन्धे कर्मणां द्रव्येण विना अनुत्पत्तेः प्रथमं तावत् द्रव्यं कर्म उत्पादयत्, दृष्टोपकारित्वात् तदर्थमाभासते। तत्र क्वचिद् भूयः कर्म परावृत्त्य द्रव्यस्योपकरोति क्वचिदात्मलाभमात्रमनुभवति। तद्यदा आत्मलाभमात्रं तस्य दृश्यते, तदा साकाङ्क्षत्वात् अदृष्टं कल्पयितुं शक्यते। यदा तु कार्यान्तरौपयिकेन दृष्टेनैव तण्डुलनिर्वृत्त्यादिना द्रव्योपकारेण निराकाङ्क्षीभवति, तदानीं अदृष्टकल्पनाऽवसराभावात् अन्यथैव विधानार्थवत्त्वोपपत्तेः नादृष्टसाधनत्वं प्रतीयते।

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात्। ७॥

भाष्यम्— एवं सति अल्पीयसी अदृष्टकल्पना न्याय्या। ननु न विनिगमनायां हेतुमवगच्छामः, कुतोऽपूर्वं कुतो नेति। तदुच्यते। यैर्भावकर्मभिः न द्रव्यं संस्कर्तुमिष्यते, उत्पादयितुं वा, तानि प्रधानभूतानि प्रधानकर्मणो वाचकानि। द्रव्यस्य गुणभूतत्वात्। द्रव्यं हि गुणभूतम्, कर्मनिर्वृत्तेः ईप्सिततमत्वात्।

वा— यैः कर्मभिर्द्रव्यं स्वरूपतो धर्मतो वा न कर्तुमिष्यते, यथा प्रयाजादिभिः, तानि स्वसाधनानि प्रति प्रधानभूतत्वात् अदृष्टार्थानि भवन्ति।

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात्। ८॥

भाष्यम्— यैस्तु द्रव्यं चिकीर्ष्यते, गुणस्तत्र प्रतीयेत कर्म। कुतः? तस्य द्रव्यप्रधानत्वात्। प्रत्यक्षं यजेत इत्येवमादिभिः द्रव्यं न चिकीर्ष्यते। तस्मात् तानि प्रधानकर्मणो वाचकानि, द्रव्यस्य गुणभूतत्वात्। पिनष्टि इत्येवमादिभिर्द्रव्यं संस्क्रियते। तस्मात् तानि गुणकर्मवचनानि। एष एव विनिगमनायां हेतुः।

प्रयोजनं तु पूर्वस्मिन् पक्षे प्रैयङ्गवेऽपि चरौ व्रीहयः उत्पाद्या अवघातार्थत्वेन, सिद्धान्ते नोत्पाद्याः ।

वा—यैः पुनः द्रव्यं उत्पाद्यते यथा आधानेन अग्नयः अवाप्यन्ते क्रियन्ते वा, यथा वरणेन ऋत्विजः संस्क्रियन्ते, यथा अवहन्तिना व्रीहयः, पेषणेन तण्डुलाः (तण्डुलपिष्टानि) । तानि गुणभूतानि प्रयोजनवद्द्रव्यसंस्कृतेः ईप्सितत्वात् । यदा (तु) दृष्टार्थमदृष्टार्थं च उभयथाऽपि तुल्यवत् अनुष्ठीयेत, तदा किं प्रयोजनं चिन्तायाः । तदुच्यते । प्रैयङ्गवेऽपि चरौ अतिदेशप्राप्तो व्रीहिसाधनक एव अवहन्तिः कर्तव्यः पूर्वपक्षे । कुतः ? **'प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकम् । प्रयाजेज्याज्यवत् तेन हन्तौ स्याद् व्रीह्यबाधनम् ॥'** सिद्धान्ते तु बाध्यन्ते । कुतः ? **'प्रधानौपयिकं द्रव्यं संस्कारैरपि युज्यते । तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः प्रियङ्गवः ॥'** ननु च पूर्वपक्षेऽपि प्रधानप्रयुक्तव्रीह्याश्रयत्वेन प्रकृतौ अप्रयोजकत्वात् प्रैयङ्गवे चरौ प्रधानेन अगृह्यमाणान् व्रीहीन् अवघातो न लभते । नैतदेवम् । **'तुल्यो हि व्रीहिसंबन्धः शास्त्राद् यागावघातयोः । वाजिनेज्यादि तुल्यं च नाप्रयोजकलक्षणम् ॥'** 'व्रीहिभिर्यजेत' 'व्रीहीनवहन्ति' इति तुल्ये चोदने, तत्र इयं प्रयोजिका इयं न इति नास्ति विशेषहेतुः । न च वाजिनादिवत् अवहन्तेः अनुनिष्पादित्वम् । न च पदकर्मवत् (एकहायन्याः सप्तमपदवत्) परप्रयुक्तप्रकृतैकहायन्यधीननिराकाङ्क्षत्वम् । न च एकदेशद्रव्यत्वमुत्तरार्धादिवत् । नापि 'पुरोडाशकपालेन' इतिवत् अर्थाभिधानकर्मत्वम् । तस्मात् अवहन्तिरपि प्रयोजकः । न च अस्मिन् पक्षे नियोगतो यागार्था एव व्रीहयः अवहन्तव्याः, लौकिकैरपि कर्मसिद्ध्यविशेषात् । न चात्र प्रकृतग्रहणे प्रमाणम्, प्रकरणस्य अविशेषकत्वात् । न च अधिकारात् विशेषः 'तुल्येषु नाधिकारः स्यात्' इति न्यायात् । (नैराकाङ्क्ष्ये अधिकारस्य नवमाधिकरणसूत्रे विशेषकत्वनिरासात् न प्रकृतग्रहणे प्रमाणमित्यर्थः । सु. पृ. ६२६) । संस्कारपक्षे तु लौकिकानामानर्थक्येन (आनन्दाश्रमीये तु आनर्थक्ये न इति मुद्रितम् । वयं तु तृतीयान्तं मन्यामहे) असंस्कार्यत्वात् अपूर्वसाधनविशेषणत्वेन कथञ्चित् प्रकृतग्रहणं क्लेशेन भविष्यति । न च आरादुपकारकत्वे अवहन्तेः यागस्येव लौकिकैः साध्यमानस्य किञ्चिदानर्थक्यं इति श्रौतत्वात् व्रीहिमात्रग्रहणमेव युक्तम् । (स्वयं प्रयोजनान्तराण्याह–) धर्ममात्रं च तदा अवहन्तिः सर्वौषधावहन्तिवत् सकृदेव च कर्तव्यः, न आ तण्डुलनिर्वृत्तेः । प्रधानव्रीहीणां च दलनादिभिरपि तण्डुलीभावः स्यात् । सांनाय्योपांशुयाजाङ्गत्वमपि चास्य प्रकरणाविशेषात् तथा भवति, इति तद्विकारेष्वपि प्रयोक्तव्यः इत्यादीनि प्रयोजनानि । (त्रीणि प्रयोजनान्युक्तानि । आदिशब्दात् यवपक्षेऽपि व्रीहीणामेव अवघातः, त्रयाणामेव च इति प्रयोजनद्वयम् । सु. पृ. ६२६) ।

शा— आख्यातभेदानुसार्यपूर्वभेदानुसरणं कर्तव्यं इति स्थितम् । तस्यापवादः क्रियते ।

सोम— भावार्थाधिकरणेनैव अस्य संगतिः । **सूत्रार्थस्तु**— तानि आख्यातानि गुणकर्मप्रतिपादकानि प्रधानकर्मप्रतिपादकानि इत्येवं द्वैधं द्विधा इति ।

वि— 'अवघातादिनाऽपूर्वमुत्पाद्यं विद्यते न वा ।, यजत्यादिवदस्त्येव वाक्यवैयर्थ्यमन्यथा ॥, दृष्टे तुषविमोके तु नापूर्वं द्रव्यतन्त्रतः । स्याद् यजत्यादिवैषम्यं नियमापूर्वकृद् वचः ॥'

भाट्ट— 'व्रीहीनवहन्ति' इत्यादौ पूर्ववदेव अवघातस्य फलभावनाकरणत्वमविवादम् । तच्च फलं न व्रीहयः, अजन्यत्वात् । नापि वैतुष्यम्, तज्जनकत्वस्य लोकसिद्धत्वेन अविधेयत्वात् । नापि पक्षे दलनादेरपि अर्थप्राप्तत्वेन तद्व्यावृत्तिफलको नियमः, तस्यापि वैफल्यात् । न च तस्यादृष्टार्थत्वम्, अदृष्टस्य अवश्यकल्पनीयत्वे शाब्दावघातादेव तत्कल्पनौचित्यात् । अतोऽदृष्टार्थमेव अवघातः । तदपि चादृष्टं न व्रीहिनिष्ठम्, तत्त्वावच्छिन्नं प्रति आत्मत्वेन समवायिकारणत्वात् । अतः पूर्ववदेव व्रीहय एव अवघातार्था इति व्रीहिविशिष्टोऽवघात एव अदृष्टार्थमारादुपकारकत्वेन विधीयते । इति प्राप्ते, दृष्टे संभवति अदृष्टस्य अन्याय्यत्वात् वितुषीभावः एव अवघातफलम् । न च तस्याक्षेपादेव प्राप्तत्वेन विधिवैयर्थ्यम्, दलनाद्युपायान्तरव्यावृत्तिफलक-

नियमस्यैव अवघाताश्रितस्य अदृष्टार्थे विधेयत्वात् । अत एव कृष्णलचरौ अवघाताभावे तस्य लोपः । वस्तुतस्तु श्रौतस्य अवघातस्यैवाक्षेपतः पूर्वप्रवृत्त्या वितुषीभावार्थे विधेयत्वम् । अतश्च आक्षेपप्रतिबन्धात् दलनादिव्यावृत्तिफलको नियमः फलम् । वैतुष्यस्य च दलनेनापि जायमानत्वात् । वैयर्थ्यशङ्का तु अवघातादेव व्रीहिनिष्ठादृष्टस्यापि उत्पत्तिकल्पनान्निराकर्तव्या । तददृष्टस्य च जन्यत्वमात्रं लाघवात् कल्प्यते, न तु प्रयोजकत्वमपि, दृष्टरूपे वैतुष्ये एव तत्कल्पनात् । अतः कृष्णलचरौ वैतुष्याभावे तल्लोपः । आर्थिकविध्यन्तरकल्पनात् एकया द्वितीययैव वा जन्यद्वयोक्तेः नानेकोद्देश्यता । तत्तददृष्टस्य च द्वितीयादिधर्मिग्राहकप्रमाणेन व्रीह्यादिनिष्ठत्वस्यैव अवगतेः तत्त्वेनैव समवायिकारणता, नात्मत्वेन । अतश्च अवघातस्य अदृष्टवितुषीभावोभयद्वारा अपूर्वसाधनीभूतव्रीह्युद्देशेन विधानात् सिद्धं संस्कारकर्मत्वम् । प्रयोजनं यागार्थव्रीह्यपेक्षया व्रीह्यन्तरमवघातार्थमुपादेयं पूर्वपक्षे, सिद्धान्ते नेति ।

मण्डन-- ' संस्कारकर्मैव किलावघातः ।'

शंकर— ' आख्यातद्वैधमिष्टं नः । ' ४. ' प्रधानं कर्म वक्ति तत् । ' ५. ' गुणकर्मापरं वक्ति । ' ६. (पञ्चमषष्ठाभ्यां द्विविधाख्यातस्वरूपलक्षणमुक्तम्) ।

* भावार्थाधिकरणे अपूर्वं सिद्धम्, धात्वर्थस्य अपूर्वजनकत्वे द्रव्यादेस्तदर्थत्वमिति च, तदपवादार्थं तानिद्वैधाधिकरणम् । कौ. २।१।४।७. * तानिद्वैधाधिकरणे दृष्टोपकारकं गुणकर्म, अदृष्टोपकारकं प्रधानकर्म इत्युक्तम् । कु. * सत्यपि अपूर्वप्रयुक्तत्वे अपूर्वार्थत्वमवघातादेर्मन्त्राणां च न प्रयाजादिवददृष्टद्वारा, तानिद्वैधमन्त्राधिकरणादौ निरस्तत्वात्, किन्तु व्रीह्यग्न्यादिद्वारा । सोम. ९।१।१.

⧗ ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् । ३।७।१९।३९ ॥

भाट्टदीपिकायां कुतूहले च ' अग्नयश्च स्वकालत्वात् ' इति सूत्रं पृथक्त्वेन गृहीत्वा अन्तरागर्भिणीन्यायेन अधिकरणान्तरमेव कृतम् । पूर्वपक्षं उत्सूत्रं गृहीत्वा सिद्धान्तपरत्वेनैव च तत् स्वीकृतम् । वार्तिककारैरपि ' अधिकरणान्तरसूत्रोक्तन्यायप्रतिपादितानुमितपूर्वपक्षः सिद्धान्त एवायं सूत्रवाक्यभेदेनोच्यते ' इत्युक्तम् । परन्तु सूत्रभेदेन इत्यनुक्त्वा सूत्रवाक्यभेदेन इत्येवोक्तम् । तेन भाट्ट-कु-वत् भिन्नं सूत्रं वार्तिककारा न मन्यन्ते । भाष्येऽपि ' अग्नयश्च सर्वार्था इति समधिगतमेतत् ' इत्युक्त्या सिद्धान्तत्वमेव तस्य सूत्रवाक्यस्य स्वीकृतम् । उत्तरसूत्रेण अग्निविषये किमपि नोक्तं इत्यपि च तदनुसारेण युक्तमेव । परंतु ' अग्नयश्च स्वकालत्वात् ' इति वाक्यस्य भिन्नसूत्रत्वं भाष्यवार्तिककारौ नानुमन्येते ।

ज्योतिष्टोमे ये ऋत्विजः स्वामिसप्तदशाः इत्युक्ताः ते सर्वे सर्वार्थाः स्युः । यागकर्मसु यो यत् कर्तुमिच्छति शक्नोति च, स तत् कुर्यात् । न तु तत्र काचिद् व्यवस्था । कुतः ? प्रयुक्तत्वात् प्ररिक्रयेण यागकर्मसु योजितत्वात् । इति पूर्वः पक्षः । अत्र सिद्धान्तः उत्तरसूत्रे भविष्यति ' तत्संयोगात् कर्मणः ' इत्यत्र । अथ अन्तरागर्भिणीन्यायेन अग्निविषयं सिद्धान्तमाह- ' अग्नयश्च स्वकालत्वात् ' इति । अत्र उत्सूत्रः पर्वपक्षः-' अग्नयः आहवनीयादयः न सर्वार्थाः, किन्तु प्रकृत्यर्था एव । विकृत्यर्थत्वस्यापि स्वीकारे तु प्रकृतिवद्विकृतिः इति चोदकेनापि प्राप्त्या द्विरुक्तत्वदोषः ' इति । एवं प्राप्ते, उच्यते । अग्नयश्च सर्वार्थाः प्रकृतिविकृतिरूपसर्वकर्मार्थाः । कुतः ? स्वकालत्वात् वसन्तादिः ऋतुः कृत्तिकादीनि नक्षत्राणि च अग्नीनां स्वः कालः । स्वीयः कालो येषामाधानार्थे विहितः ते स्वकाला अग्नयः । नहि तेषामाधानं कंचित् यागकालमधिकृत्य विहितम् । स्वकालत्वात् अग्नयः सर्वार्थाः इति सिद्धान्तः ।

तत्संयोगात् कर्मणो व्यवस्था स्यात् संयोगस्यार्थवत्त्वात् । ४० ॥

पूर्वसूत्रेण पूर्वपक्षे प्राप्ते सिद्धान्तसूत्रमिदम् । तत्संयोगात् अध्वर्युहोत्रादिविशिष्टपुरुषैः विशिष्टकर्मणः संयोगात्, समाख्याऽऽदिभिः तादृशस्य संयोगस्य ज्ञातत्वात् व्यवस्थैव, नाव्यवस्था । एवं संयोगस्य कर्मपुरुषसंयोगस्य अर्थवत्त्वात् सफलत्वसिद्धेर्व्यवस्थैव । अव्यवस्थायां हि संयोगो निष्फलः स्यात् । आध्वर्यवसमाख्यं

कर्म अध्वर्युणैव कर्तव्यम्, न होत्रा नोद्गात्रा। हौत्रसमाख्यं शस्त्रानुवचनादि कर्म होत्रैव कर्तव्यम्, नाध्वर्युणा नोद्गात्रा। स्तोत्रगानरूपमौद्गात्रसमाख्यं कर्म उद्गात्रा कर्तव्यम्, नाध्वर्युणा न होत्रा इति सा व्यवस्था।

अत्र सुधा— तैः ऋत्विग्भिः कर्मणः संयोगात् यथासमाख्यं व्यवस्था स्यात्। व्यवस्थितसंभवे विकल्पापादकाव्यवस्थितशास्त्रार्थायोगेन लिङ्गप्रकरणापेक्षितव्यवस्थासमर्पकतया हौत्रादिसमाख्याऽऽख्यस्य हौत्रर्त्विक्संयोगस्य तद्विरोधाभावेन श्रुतिकल्पकत्वोपपत्तेः विनियोगाख्यार्थवत्त्वात्—इति। के.

* 'तमध्यापयीत' इति संनिधिसिद्धोपनीतकर्तृकत्वानुवादः। यद्वा उपनयनाध्यापनवाक्ययोः प्रयोजकव्यापाराविवक्षया उपगमनाध्ययनविधिः। मणि. पृ. ४.

⧗ 'तं यथायथोपासते तदेव भवति' इति न्यायेन उत्कृष्टब्रह्मोपासनात् उत्कृष्टमेव फलं मोक्षाख्यं भवत्येव। श्वेताश्व०भाष्यम् १।७.

⧗ 'तेनोत्पद्यविनष्टत्वान्नास्यारम्भक्षणोऽपि हि' इति न्यायः। ननु आत्माश्रितत्वेऽपि क्रियायाः क्षणिकत्वेन उत्पन्नमात्रविनाशिन्याः 'तेनोत्पद्य०' इति न्यायेन अपूर्वारम्भकत्वं न संभवति इत्याशङ्क्य। सु. पृ. ६०५.

* 'तेन ह्यन्नं क्रियते' इति 'शूर्पेण जुहोति' इति विधेः अर्थवादः। वि. १।२।३. * 'तस्मात् एकं साम तृचे क्रियते स्तोत्रीयम्' इत्यत्र ननु समासस्थामपि ऋचमनूद्य त्रित्वविधानं दृष्टम्। न। तत्रापि समासार्थस्यैव विधानाभ्युपगमात्। के. * 'तस्मात् काले एव दद्यात् काले न दद्यात्' अयं अभ्यनुज्ञारूपः प्रतिषेधः। (समृद्धिकाले दातव्यम्। दारिद्र्ये तु न दातव्यम् इत्यर्थः।) बाल. पृ. ३३ * 'तस्मात् स्वाध्यायोऽध्येतव्यः' इति अनारभ्य विधीयते। वा. ३।८।८।१८.

⧗ **तस्याऽऽग्रयणाद् ग्रहणम्। १०।५।१०।४२॥**

षोडशी ग्रहः उक्थ्याग्रयणाभ्यां पात्राभ्यां सकाशात् ग्रहीतव्यः, उत आग्रयणादेव इति विचारे सिद्धान्तेनोपक्रमते। तस्य षोडशिनो नाम ग्रहस्य आग्रयणात् पात्रात् ग्रहणं कर्तव्यम्। 'आग्रयणाद् गृह्णाति षोडशिनम्' इति वचनात्। वचनात् इति पदं उत्तरसूत्रात् आवृत्त्या अपकृष्यते।

उक्थ्याच्च वचनात्। ४३॥

षोडशिनो ग्रहस्य आग्रयणात् पात्रात् उक्थ्याच्च पात्रात् ग्रहणं कर्तव्यम्। 'आग्रयणाद् गृह्णाति षोडशिनम्' इति 'उक्थ्याद् गृह्णाति षोडशिनम्' इति च वचनात्। इति पूर्वः पक्षः।

अनभ्यासे पराक्शब्दस्तादर्थ्यात्। ४५॥

ननु तर्हि आग्रयणात् उक्थ्याच्च पात्रात् अभ्यासेन षोडशी ग्रहः पृथक् ग्राह्यः इति चेन्नेत्याह। कुतः? 'यत् पराञ्चमुक्थ्यान्निगृह्णाति षोडशिनम्' इति वचनात्। पराक्शब्दः अनभ्यासे वर्तते। तादर्थ्यात् पराक्शब्दस्य तदर्थत्वावगमात् 'पराचीः सामिधेनीरन्वाह' अनभ्यस्ता इति गम्यते। एवं पराक्शब्दात् पात्रद्वयात् अभ्यासेन पृथक् ग्रहणं नोपपद्यते। तस्मात् उक्थ्याग्रयणाभ्यां पात्राभ्यां सकाशात् सकृदेव षोडशी ग्राह्यः। इति पूर्वपक्षः।

उक्थ्यविच्छेदवचनत्वात्। ४६॥

इतश्च षोडशी ग्रहः उक्थ्यात् आग्रयणाच्च ग्राह्यः। 'विच्छिन्दन्ति ह वा एतदुक्थ्यम्, यदुक्थ्यानि षोडशिनं च ततः प्रणयन्ति' ततः उक्थ्यात् प्रणयन्ति इति प्रणयतिना संबन्धात् विस्पष्टं उक्थ्यस्य पात्रस्य अपादानत्वं दर्शयति। तस्मात् उक्थ्यात् आग्रयणाच्चेति उभाभ्यां षोडशी ग्रहीतव्यः।

आग्रयणाद्वा, पराक्शब्दस्य देशवाचित्वात् पुनराधेयवत्। ४७॥

वाशब्दः पूर्वपक्षं व्यावर्तयति। षोडशी ग्रहः आग्रयणादेव पात्रात् ग्राह्यः, न उक्थ्यपात्रात्। 'यत् पराञ्चमुक्थ्यान्निगृह्णाति षोडशिनम्' इति पराक्शब्दस्य देशवाचित्वात् कालवाचित्वात् इत्यर्थः। उक्थ्यादनन्तरं षोडशी ग्राह्यः इत्युक्ते उक्थ्यस्य अपादानत्वं नास्ति। तस्मात् उक्थ्यादनन्तरं आग्रयणात् षोडशी ग्राह्य इत्येव। पुनराधेयवत्, यथा 'पराञ्चमग्न्याधेयात् पुनरादधाति' इति कालसंयोगे पञ्चमी नापादाने, एव-

मिहापि । तस्मात् षोडशी आग्रयणादेव ग्राह्यः इति सिद्धान्तः ।

विच्छेदः स्तोमसामान्यात् । ४८ ॥

यदुक्तं पूर्वपक्षिणा ‘ विच्छिन्दन्ति ह वा एतदुक्थ्यम्, यदुक्थ्यानि षोडशिनं च ततः प्रणयन्ति’ इति विच्छेदवचनात् उक्थ्यस्य अपादानत्वमिति , तन्न । विच्छेदः स्तोमसामान्यात् उक्तः । उक्थ्यग्रहास्त्रयोऽपि एकविंशस्तोमकाः षोडशिग्रहोऽपि तादृशः । एवमेकविंशस्तोमसामान्यात् षोडशिग्रहस्यापि उक्थ्यविच्छेदत्वेन उत्प्रेक्षा कृता । उक्थ्यविच्छेदो नाम प्रचारकाले त्रीन् उक्थ्यग्रहान् प्रणयन्ति तदनन्तरं षोडशिनं प्रणयन्ति इति । ‘ ततः प्रणयन्ति ’ इत्यपि पञ्चमी नापादाने, किन्तु कालसंबन्धे एव , ततः उक्थ्यप्रणयनादनन्तरं षोडशिनं प्रणयन्ति इति । तस्मात् आग्रयणादेव षोडशिनो ग्रहणं नोक्थ्यादपि इति सिद्धान्तः । के.

⧗ तस्योपदेशसमाख्यानेन निर्देशः । ३।७। २०।४१ ॥

पूर्वाधिकरणे स्वामिसप्तदशानामृत्विजां समाख्याऽऽदिना तत्तेषु यागकर्मसु संयुक्तत्वज्ञानात् व्यवस्था इत्युक्तम् । तदपवादार्थमिदं सिद्धान्तसूत्रम् । तस्य आध्वर्यवादिसमाख्यातस्य कर्मणोऽपि । उपदेशसमाख्यानेन उपदेशेन ‘ तस्मान्मैत्रावरुणः प्रेष्यति च अनु चाह (अन्वाह च) ’ ‘ प्रतिप्रस्थाता मन्थिनं जुहोति ’ इत्यादिना, नेष्ट्रीया पोत्रीया इत्यादिना समाख्यानेन च निर्देशो भवति । तेनापि विशेषव्यवस्था ज्ञातव्या । सौत्रस्य निर्देशपदस्य अपवादार्थकता कुतूहले-उक्ता ।

अत्र **सुधा**—‘कर्मसमूहस्य आध्वर्यवादिसमाख्यानात् क्वचिदपि बाधे समाख्यैक्यात् सर्वत्र अप्रामाण्यापत्तेः विशेषसमाख्यया बाधायोगमाशङ्क्य मैत्रावरुणादिवाक्येन बाधस्य अवश्याङ्गीकार्यत्वात् स्रुष्टीरुपदधाति इतिवत् भूम्ना आध्वर्यवादिसमाख्याप्रवृत्त्यङ्गीकारेण परिहर्तुं तस्य आध्वर्यवादिसमाख्यातस्यापि कर्मणः यथा मैत्रावरुणोपदेशेन कर्त्रन्तरोपदेशशून्येभ्यः कर्मभ्यः निष्कृष्य कर्त्रन्तरदेशना, तथा विशेषविषयत्वात् संकोचवृत्तिना आख्यानेन विशेषाख्या शून्येभ्यः कर्मभ्यः निष्कृष्य कर्त्रन्तरदेशना इत्येवं उपदेशोक्तिः इति । अत्र **वार्तिकं** (३।३।७।१४ सूत्रे) समाख्ययोस्तु विरोधे सामान्यविशेषसमाख्ययोः सूत्रबद्ध एव बाधो भविष्यति ‘ तस्योपदेशसमाख्यानेन निर्देशः ’ इति । अत्र **सोमनाथी**– तस्योपदेशेन वचनेन विशेषसमाख्यानेन निर्देशो निष्कर्षः अपवाद इति यावत् । प्राभाकरैरिदं सूत्रं सामान्यसमाख्यायाः वचनविशेषसमाख्याभ्यां बाधव्युत्पादनार्थं अधिकरणान्तरत्वेन व्याख्यातम् । तदनुपपन्नम् । समाख्यायाः वचनापेक्षया सामान्यस्य विशेषापेक्षया च दुर्बलत्वस्य अन्यत्र सिद्धत्वेन पूर्वपक्षानुन्मेषात् । तस्मात् प्रकृताधिकरणशेषभूतमेवेदम् । **सोम.** ३।७।१९.

तद्वच्च लिङ्गदर्शनम् । ४२ ॥

यागीयकर्मसु आध्वर्यवादिसमाख्यया अध्वर्य्वादीनां व्यवस्थया नियम इत्युक्ते तदपवादतया उपदेशसमाख्यानाभ्यां विशेषनियमः इति उक्ते सिद्धान्ते हेत्वन्तरपरं सूत्रम् । तद्वत् आध्वर्यवादिसामान्यसमाख्यावत् पोत्रीयादिविशेषसमाख्यावच्च ‘ यत्र होतुः प्रातरनुवाकमनुब्रुवतः उपशृणुयात् ’ इति लिङ्गं हौत्रे प्रातरनुवाके समाख्यया प्राप्तं होतारं दर्शयति । तथा ‘ उद्गीथ उद्गातॄणाम्, ऋचः प्रणव उक्थशंसिनाम् (होतॄणां उद्गीथः), प्रतिगरोऽध्वर्यूणाम् (उद्गीथः)’ । तथा ‘ यो वाऽध्वर्योः स्वं वेद स्ववानेव भवति, एतद्वा अध्वर्योः स्वं, यदाश्रावयति’ इति च लिङ्गं तत्रतत्र कर्मणि तंतमृत्विजं विशेषतो दर्शयति । तस्मात् विशेषसमाख्यया विशेषतो ऋत्विजां कर्मसु व्यवस्थया नियमः ।

अत्र **सुधा** — यथा आध्वर्यवादिसमाख्यानात् कर्मणः अध्वर्य्वादिकर्तृव्यवस्था , यथा च विशेषसमाख्यानेन कर्त्रन्तरदेशना तथा लिङ्गदर्शनं (विशेषतो नियामकम्) इति । के.

* ०तस्यतस्योपदिश्येत (२।२।३।६) । यद्यपि ‘ आश्विनं ग्रहं गृहीत्वा ’ इत्यनेन द्वयमपि प्रातःसवनं आश्विनग्रहोत्तरकालत्वं च विधीयेत, तथापि विधायकस्य एकपदानुसारात् ‘ तस्यतस्योपदिश्येत ’ इत्येतदापत्तिर्नास्ति । वा. ३।६।७।२२ पृ. १०४७.

तस्य धेनुरिति गवां प्रकृतौ विभक्तं चोदितत्वात् तत्सामान्यात् तद्विकारः स्याद् यथेष्टिर्गुणशब्देन । १०।३।१४।५६ ॥

'अथैष भूर्वैश्वदेवः त्रिवृदेव सर्वः, तस्य विश्ववत्यः स्तोत्रीया धेनुर्दक्षिणा' इति भूर्नाम एकाहः क्रतुः श्रुतः । तत्र 'तस्य धेनुर्दक्षिणा' इत्यनुषङ्गः । येयं 'तस्य धेनुः' इति धेनुः श्रुता, सा प्राकृतीनां दक्षिणानां मध्ये गवामेव निवर्तिका, नाश्वादीनाम् । प्रकृतौ दक्षिणानां विभक्तं यथा स्यात्तथा चोदितत्वात् गौर्दक्षिणा, अश्वो दक्षिणा, अश्वतरो दक्षिणा इति प्रत्येकं दक्षिणात्वमुक्तम् । अत्र भूनाम्नि क्रतौ तु गवामेव धेनुत्वं विशेष उच्यते गौरेव धेनुर्नान्या । एवं च तत्सामान्यात् गोत्वसामान्यात् धेनुः तद्विकारः गोविकारः स्यात् अधेनूनां गवां बाधः स्यात् । यथा इष्टिः ऐष्टिको विध्यन्तः गुणशब्देन 'सौर्यं चरुं निर्वपेत्' इति निर्वापशब्देन नियम्यते तद्वत् । तस्मात् ज्योतिष्टोमगताः सर्वा दक्षिणाः भूनाम्नि क्रतौ स्युः, गावस्तु धेनवः दुग्धदाः स्युः इति विशेषः । इति पूर्व पक्षः । अथवा 'तस्य धेनुः' इत्येकवचनात् ज्यौतिष्टोमिकीनां सर्वासां गवां स्थाने एका धेनुर्गौर्दक्षिणा अश्वादयस्तु यथाप्रकृति इति पूर्वः पक्षः ।

सर्वस्य वा क्रतुसंयोगादेकत्वाद् दक्षिणार्थस्य, गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभता स्यात्, तया समवायाद्धि कर्मभिः । ५७ ॥

भूनाम्नि क्रतौ विहिता या धेनुर्दक्षिणा, सा सर्वस्य क्रतुदाक्षिण्यस्य निवर्तिका । क्रतुसंयोगात् 'तस्य धेनुर्दक्षिणा' इति अनुषङ्गयुक्तवाक्ये तत्पदोक्तस्य कृत्स्नस्य क्रतोः धेनुदक्षिणया संबन्धात् । ज्योतिष्टोमे तावत् गवाश्वादीनां तिलमाषान्तानां दशानां द्रव्याणां समुदाये एव एकं दक्षिणात्वम्, न तु प्रत्येकं पृथक् दक्षिणात्वम्., गौश्च अश्वश्च इति दशभिश्चशब्दैः सर्वेषां समुदायमुद्दिश्य एकदक्षिणात्वविधानात् । तादृश्याः दक्षिणायाः प्राकृत्याः भूनाम्नि विकृतौ विहितया एकया धेन्वा बाधः । एकत्वं दक्षिणार्थस्य, दक्षिणाया योऽर्थः प्रयोजनं ऋत्विगानमनं तस्य एकत्वम्, न नानात्वम् । गुणानां च कार्यैकत्वात्, दक्षिणाया ये गुणाः गवाश्वादयः तिलमाषान्ताः तेषामपि कार्यैकत्वात्, दक्षिणात्वरूपकार्यैकत्वात् विकृतौ भनाम्नि क्रतौ अर्थे ऋत्विगानमनरूपे श्रुतिभूतम् 'तस्य धेनुर्दक्षिणा' इतिश्रुतिविहितं धेन्वेकत्वं समर्थं स्यात् । तया धेनुदक्षिणया हि यस्मात् कर्मभिः साकमृत्विजां समवायात् संबन्धात् तस्मात् धेनुः सर्वस्य क्रतुदाक्षिण्यस्य बाधिका ।

चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् । ५८ ॥

'तस्य धेनुः' इति सूत्रे 'यथेष्टिर्गुणशब्देन' इति विकृतीष्टिदृष्टान्तः पूर्वपक्षिणा प्रदर्शितः तस्य वैषम्यमाह सिद्धान्ती । चोदनानां सौर्यादिविकृतीष्टिचोदनानां अनाश्रयात् अनाश्रयणात् अस्वीकारात् प्रत्यक्षोपदिष्टधर्मविशेषाभावात् निर्वापलिङ्गेन प्रकृतीष्टिविध्यन्तस्य नियमः स्यात् इति युक्तम् । भूनाम्नि क्रतौ तु गवादीनामेकं कार्यं दक्षिणात्वम्, तस्मिंश्च श्रुतिभूता एका धेनुः चोदकप्राप्तां सर्वां दक्षिणां निवर्तयितुमर्हति । तस्मात् एका धेनुः कृत्स्नां प्राकृतीं दक्षिणां निवर्तयति इति सिद्धान्तः । के.

* 'तस्य धेनुरिति गवां प्रकृतौ विभक्त-(क्तं) चोदितत्वात् सामान्यात् (तत्सामान्यात्) तद्विकारः स्याद् यथेष्टिर्गुणशब्देन ।' 'एष भूर्वैश्वदेवः त्रिवृदेव सर्वः तस्य विश्ववत्यः स्तोत्रीया धेनुर्दक्षिणा' इत्युदाहृत्य किं धेनुर्गवां निवर्तिका, उत कृत्स्नाया दक्षिणायाः इति संदेहे 'यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्' इत्यनेन न्यायेन दक्षिणासंबन्धे प्रथमं गवादीनामुपादानेन उद्देश्यत्वावगमात् उद्देश्यगतस्य च शब्दोक्तस्यापि साहित्यस्य अविवक्षितत्वात् प्रत्येकं दक्षिणात्वावगतेः गोत्वैकार्थसमवेतदोग्ध्रीत्ववाचिना धेनुशब्देन गवामेव दोग्ध्रीणां निवृत्तिप्रतीतेः एकवचनेन च द्वादशशतसंख्यानिवृत्तिप्रतीतेः यथा 'सौर्यं चरुं निर्वपेत्' इति निर्वापलक्षणगुणशब्देन ऐष्टिको विध्यन्तो नियम्यते, तथा धेनुशब्देन गोमात्रनिवृत्तेः नाश्वादिनिवृत्तिः इति पूर्वपक्षयित्वा कृत्स्नाया दक्षिणाया निवृत्तिः इति सिद्धान्तितम् । सु. पृ. ४३५.

* तस्य निमित्तपरीष्टिः । १।१।३।३ ॥

चोदनालक्षणसूत्रेण श्रुत्यर्थाभ्यां वेदार्थस्वरूपम्, तत्र च प्रमाणं प्रतिज्ञातम् । तत्र किं स्वरूपं तावत् भेदाभेदरूपेण कथ्यताम्, उत प्रमाणप्रतिज्ञायां हेतुः इति संशये प्रधानत्वात् स्वरूपस्य, तदेव भेदाभेदाभ्यां कथनीयम् । इति प्राप्ते, भेदाभेदनिर्णयस्य अनपेक्षत्वसव्यपेक्षत्वात् प्रामाण्ये हेत्वनपेक्षत्वं अधुना कथनीयमिति सूत्रेण कथ्यते । तस्मात् अनपेक्षत्वरूपप्रामाण्यहेत्वभिधानावसरकथनं सूत्रेण क्रियते । ऋजु. पृ. ३३.

⧗ तस्य निमित्तपरीष्टिः । १।१।३।३ ॥

अनेन सूत्रेण धर्मप्रमाणपरीक्षाप्रतिज्ञा कृता । तस्य धर्मस्य यानि निमित्तानि ज्ञापकानि प्रमाणानि, तेषां परीष्टिः पर्येषणा सम्यक् परीक्षा ‘करिष्यते’ इति शेषः । के.

* तस्य निमित्तपरीष्टिः । धर्मे वेदः प्रमाणं इत्युक्तम् । तत् संभवति न वा इति परीक्षा प्रत्यक्षादीनां धर्मप्रामाण्यासंभवनिरूपणद्वारा क्रियते इत्यर्थः । मणि. पृ. ११.

* ‘तस्य व्रतम्’ इत्युपक्रम्य ‘नोद्यन्तमादित्यमीक्षेत’ इति श्रूयते । व्रतमिति कर्मनाम । टुप्. ६।२।५।२०.

⧗ तेषामर्थेन संबन्धः । ३।१।४।७ ॥

दर्शपूर्णमासयोः निर्वापप्रोक्षणावहननादयः औषधधर्माः, उत्पवनविलापनग्रहणासादनादयः आज्यधर्माः, शाखाऽऽहरणं वत्सापाकरणं गवां प्रस्थापनं इत्यादयः सांनाय्यधर्माः श्रुताः । ते किं सर्वे सर्वत्र कर्तव्याः, उत ये यत्रार्थवन्तः ते तत्र कर्तव्याः इति विचारे सिद्धान्तमाह । तेषां अवहननादीनां धर्माणां अर्थेन प्रयोजनेन संबन्धः स्यात् । यस्य यत्र प्रयोजनसाधकत्वं स तत्र कर्तव्यः इति ।

विहितस्तु सर्वधर्मः स्यात्, संयोगतोऽविशेषात् प्रकरणाविशेषाच्च । ८ ॥

उक्तं सिद्धान्तं तुशब्देन व्यावर्तयन् पूर्वपक्षमाह । अपूर्वसाधनोद्देशेन यः कश्चित् धर्मो विहितः, स सर्वोऽपि सर्वधर्मः औषधाज्यसांनाय्यानां सर्वेषामेव धर्मः स्यात् । संयोगतः अपूर्वसंयोगस्य अविशेषात् समानत्वात्, प्रकरणाविशेषाच्च दर्शपूर्णमासप्रकरणपाठस्य समानत्वाच्च ।

अर्थलोपादकर्म स्यात् । ९ ॥

एतं पूर्वपक्षं निराचष्टे । आज्यधर्माणामुत्पवनादीनां औषधे सांनाय्ये च, औषधधर्माणां अवहननादीनां आज्ये सांनाय्ये च, सांनाय्यधर्माणां वत्सापाकरणादीनां आज्ये औषधे च अर्थलोपात् अर्थस्य दृष्टस्य फलस्य लोपात् अभावात् अकर्म अक्रिया स्यात् । सर्वे सर्वत्र न कर्तव्याः । किन्तु यत्र यस्य दृष्टं फलं तत्रैव स कर्तव्यः ।

फलं तु सह चेष्टया, शब्दार्थोऽभावाद् विप्रयोगे स्यात् । १० ॥

ननु अवघातादीनां आज्यादौ विधिवशात् अदृष्टं प्रयोजनं कल्प्यतां इति चेत् तत्राह । तुशब्दः शङ्कानिरासं सूचयति । चेष्टया अनुष्ठानेन सह सहितं तदव्यवहितोत्तरकालं फलं वैतुष्यादि उपलभ्यते । यद्वा चेष्टया अवघातादिक्रियया सह श्रुतेषु व्रीह्यादिषु वैतुष्यादि फलं दृष्टकार्यं उपलभ्यते । तथाच दृष्टे संभवति नादृष्टकल्पना । दृष्टस्य फलस्य विप्रयोगे अनुपलब्धौ अभावात् दृष्टफलस्य अभावनिश्चयात् शब्दार्थः विधिबलकल्प्यः अदृष्टोपकारः स्यात् । प्रकृते तु दृष्टस्य सत्त्वात् नादृष्टकल्पना । ननु प्रकरणाविशेषात् सकलावान्तरापूर्वाणां धर्मप्रयोजकत्वं स्यात् इति चेत् तत्राप्याह । ‘विप्रयोगे अवान्तरापूर्वस्याभावे सति, परमापूर्वस्य च धर्मस्य व्यवस्थापकत्वाभावात् शब्दार्थः व्रीह्यादिशब्दस्य आज्यादिरपि अर्थः स्यात् संभाव्येत परमापूर्वसाधनत्वाविशेषात् । न चैवमस्ति । किन्तु चेष्टया अवघातादिक्रियया सह श्रुतेषु व्रीह्यादिषु तण्डुलपिष्टादिप्रणाड्या, तत्तद्यागजन्यमवान्तरापूर्वं नाम फलमस्ति ।’ इति कुतूहलम् । के.

* तेषामर्थाधिकरणम् । व्रीहीनवहन्तीत्यत्र व्रीहिपदस्य अपूर्वसाधनमात्रपरत्वेऽपि नावघातस्य आज्यसांनाय्यसाधारण्यम्, तत्रावघातस्य पक्षेऽपि प्राप्त्यभावेन अत्यन्ताप्राप्तविधानतो विधिगौरवापत्तेः इति व्रीहियवमात्रविषयत्वं नियमविधिबलीयस्त्वादाश्रितम् । किञ्च तत्रैवाधिकरणे व्रीहियवाभ्यां वैतुष्यार्थे अवघातः

अपेक्षितः नाज्यसांनाय्याभ्यां इत्यपेक्षितविधेः अनपेक्षितविधानदौर्बल्यन्यायेनापि अवघातस्य औषधद्रव्यमात्रशेषत्वं दर्शितम् । वाक्यशेषानुग्रहः अभ्युच्चयमात्रं इति तत्रैव स्फुटम् । **पराक्रमः.** ४०।२–४१।१.

⧗ **तेषामर्थाधिकरणम्** । व्रीहिन्यायः । दर्शपूर्णमासयोः व्रीहि–आज्य–सांनाय्यधर्माः व्यवस्थिता एव, न संकीर्णा भवन्ति ॥

तेषामर्थेन संबन्धः । ३।१।४।७ ॥

भाष्यम्-- स्तो दर्शपूर्णमासौ 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति । तत्र श्रूयन्ते धर्माः निर्वपणं प्रोक्षणं अवहननमित्येवमादय औषधधर्माः । तथा उत्पवनविलापनग्रहणासादनादय आज्यधर्माः । तथा शाखाऽऽहरणम्, गवां प्रस्थापनम्, गवां प्रस्नावनमित्येवमादयोऽपि सांनाय्यस्य । तेषु संदेहः किं सर्वे, औषधे आज्ये सांनाय्ये च कर्तव्याः, उत ये यत्र क्रियमाणा अर्थवन्तः ते तत्र कर्तव्या इति । ननु संयुक्ताः (उद्देश्यविशेषसंयुक्ताः) एवैते श्रूयन्ते । यथा 'व्रीहीनवहन्ति' 'तण्डुलान् पिनष्टि' इति । बाढं संयुक्ताः । अवघातादयस्तु पदार्था विधीयन्ते श्रुत्या । वाक्येन एषां व्रीह्यादिसंयोगः । अतोऽस्ति संशयः । किं तावत् प्राप्तम् ? तेषामर्थेन संबन्धः । अर्थेन प्रयोजनेन । ये यत्र क्रियमाणाः प्रयोजनवन्तः, ते तत्र कर्तव्याः । प्रथनादय आज्यसांनाय्ययोः अनुपकारका इति न तत्र करणीयाः । एवमुत्पवनादय औषधसांनाय्ययोः, शाखाऽऽहरणादय आज्यौषधयोः । ननु श्रूयन्ते सर्वे सर्वत्र । एतदेव न जानीमः श्रूयन्ते, न श्रूयन्ते इति । तत् विचारयितव्यम् । यद्यपि श्रूयेरन् तथापि अनुपकारकत्वान्नैव कर्तव्या भवेयुः ।

वा—उक्तः सहेतुः सविषयश्च शेषः । इदानीं 'कथं च विनियुज्यन्ते' इत्ययमंशो विचार्यते । तत्र त्रिषु अधिकरणेषु क्रमेण संस्कारद्रव्यगुणानां विनियोगः कथ्यते । तत्रापि किल प्रथमे लिङ्गेन, द्वितीये वाक्येन, तृतीये श्रुत्या विनियोग इति केचित् । तत्तु आचार्या नेच्छन्ति । यद्यपि अत्र विचित्रप्रमाणव्यापारपरामर्शः, तथापि श्रुतिविनियोगः एवात्र पादे, लिङ्गादिविनियोगस्तु द्वितीयपादात् प्रभृति भविष्यतीत्युक्तम् । औषधधर्मा इत्याद्यपि एतदधिकरणसाध्यमपि सिद्धान्ताभिप्रायेणोक्तम् । **'ननु संयुक्ता एवैते'** इति सिद्धान्तवादी श्रुतिबलेन संशयमाक्षिपति । परः पुनः पदान्तरसंबन्धकृतं व्रीह्यादिसंबन्धं शुद्धावघातविधिना बाध्यमानं मन्यमानः आह– **'अवघातादयस्तु पदार्था विधीयन्ते श्रुत्या'** इति तच्चैतदयुक्तमिव । कुतः ? **'प्रयुज्यते पदं किञ्चिद् विना नहि पदान्तरात् । वाक्याधिकरणे चोक्ता श्रुतिबाधप्रतिक्रिया ॥'** नहि व्रीह्यादिभिः संबध्यमाना अवघातादयः नावघातादयो भवन्ति । यदि हि एवं भवेयुः, ततः श्रुतिविरुद्धत्वात् वाक्यं बाध्येत । अत्र पुनः केवलानामेव अवघातादीनामनुष्ठातुमशक्यत्वात् अवश्यमेव संबन्ध्यन्तरे कार्याः । नहि भवत्पक्षेऽपि अवघातादयः केवलाः क्रियन्ते । तत्र प्रकरणलभ्यद्रव्यमात्रसंबन्धः क्लेशान्तरेण कल्प्येत । अथापि किञ्चिदध्याहृत्य संबन्धः क्रियते, तथापि क्लेशः । अथ आरादुपकारकत्वेन प्रधानसंबन्धः इष्यते, तत्रापि विप्रकर्षः । अथ तु नैव केनचित् संबध्यते, ततो विध्यानर्थक्यप्रसङ्गः । तस्मात् असदेतत् । तेन एवं व्याख्येयम्–**'वाक्यभेदतदेकत्वसंदेहान्नात्र सशयः । परमावान्तरापूर्वप्रयुक्तत्वकृतो ह्यसौ ॥'** नैव अत्र अयं पूर्वपक्षहेतुः 'अवघातादयः पदार्थाः स्वतन्त्राः श्रुत्या विधीयन्ते, वाक्येन व्रीह्यादिभिः संबध्यन्ते, तच्च श्रुत्या बाध्यते । तस्मात् केवलविधानात् किं सर्वार्थाः, किंवा दृष्टोपकारसामर्थ्येन यथासंयोगमेव भवन्ति' इति । किं तर्हि ? **'विधीयतेऽवघातादिः श्रुत्या व्रीह्यादिसंगतः । व्रीहित्वाद्यर्थता चास्य निष्फलत्वेन नेष्यते ॥'** यदि हि एषां यथाश्रुतव्रीह्याद्यर्थत्वमध्यवसीयते, ततः संयुक्तत्वात् सर्वे सर्वत्र न प्राप्नुयुः । एते पुनः नवमाद्यधिकरणन्यायेन ('व्रीह्यादिस्वरूपस्य अवघातादिव्यतिरेकेणापि सिद्धत्वात् तदर्थत्वे विध्यानर्थक्यापत्तेः लक्षणया अपूर्वसाधनत्वावच्छिन्नोद्देशेन विधीयन्ते' इत्यनेन) श्रौतं व्रीहित्वं उल्लङ्घ्य अपूर्वसाधनत्वेन संबध्यन्ते । तच्च प्रकरणापेक्षापूर्वसाधनांशलक्षणागम्यत्वात् वाक्यगम्यमिति मन्यमानः आह (भाष्यकारः)

‘वाक्येन एषां व्रीह्यादि’संबन्धः, न श्रुत्या । यच्च तत् अपूर्वसाधनांशलक्षणात्मकं वाक्यम्, तत् प्रकरणविशेषात् यथा औषधे, तथा आज्यसांनाय्ययोरपि अविशिष्टम् । एवं उत्पवनविलापनशाखाऽऽहरणादीनां लक्षणयैव अश्रुतहविरन्तरसंबन्धो दर्शयितव्यः । तत्र किमेकं दर्शपूर्णमासापूर्वं धर्माणां प्रयोजकम्, उत अनेकम् । यदाऽपि अनेकम्, तदाऽपि किमपूर्वमात्रम्, उत किञ्चिदेव इति । यदि एकमपूर्वं सर्वाणि वा सर्वेषां प्रयोजकानि, ततः संकरो धर्माणाम् । अथ तु अनेकमपूर्वं किञ्चिदेव प्रयोजकम्, ततः प्रत्येकं व्यवस्था इति । तत्र सिद्धान्तेनैव तावत् उपक्रमते ‘तेषामर्थेन संबन्धः’ (इति) । यद्यपि तावत् केवल–(प्रोक्षति इत्यादि–)पदवाच्याः श्रूयेरन्, तथापि क्व क्रियेरन् इत्यपेक्षिते, **‘यत्र क्रियमाणाः प्रयोजनवन्तः’** भवन्ति, तत्र कर्तव्याः । न चैते संकीर्यमाणाः सर्वत्र प्रयोजनवन्तो दृश्यन्ते । सत्यपि च अपूर्वप्रयुक्तत्वे दृष्टप्रयोजनद्वार एव संबन्धः अवकल्पते । **अथवा** शास्त्रेणैव यत्र क्रियमाणाः प्रयोजनवन्तो विज्ञायन्ते, यदपूर्वसाधनं व्रीह्यादिशब्दैः स्वाभिधेयजात्येकार्थसमवायि (स्वाभिधेयया जात्या सह एकस्मिन् अर्थे समवैति इति) लक्षितम्, तदर्थत्वेन अवघातादयो विज्ञायमानाः संबन्धाभावात् अपूर्वान्तरसाधने अलक्षिते, न भविष्यन्ति । **‘ननु श्रूयन्ते सर्वे सर्वत्र’** इति; अपूर्वैकत्वात् भेदे चासति लक्षणानियमापरिज्ञानात्, प्रयोजनस्य च विध्युत्तरकाललभ्यत्वात् न तद्दर्शनद्वारेण व्यवस्था इति मत्वा परिचोदना । **‘एतदेव न जानीमः’** इति नावश्यमेकमेव अपूर्वं प्रयोजकं, अपूर्वमात्रं वा इत्यभिप्रायः । सत्यपि हि अविशेषश्रवणे ‘अर्थाद्वा कल्पनैकदेशत्वात्’ (अर्थात् सामर्थ्यात् प्रयोजनानुसारात् कल्पना व्यवस्था । शक्तेः विधिसहकारित्वेन विध्येकदेशत्वात् इति सूत्रार्थः) इति अविरुद्धैव व्यवस्था । **अथवा** एकापूर्व–अपूर्वमात्र–प्रयुक्तत्वपक्षयोः (एकापूर्वं च अपूर्वमात्रं च एकापूर्वापूर्वमात्रे । प्रयुक्तत्वं च प्रयुक्तत्वं च प्रयुक्तत्वे । एकापूर्वापूर्वमात्राभ्यां प्रयुक्तत्वे । एका॰प्रयुक्तत्वे इति पक्षौ, तयोः । इति विग्रहः । संभावनापूर्वपदः अवधारणापूर्वपदो वा कर्मधारयः । के.) संकरः, नानाऽपूर्वप्रयुक्तव्रीह्यादिजातिलक्षितसाधनसंबन्धे तु व्यवस्था । न च एतयोः अन्यतरस्य अवधारणम् । अतो न जानीमः सर्वे सर्वत्र श्रूयन्ते, न इति ।

विहितस्तु सर्वधर्मः स्यात्, संयोगतोऽविशेषात् प्रकरणाविशेषाच्च । ८ ॥

भाष्यम्–– उच्यते । यः अर्थात् प्राप्तः स्यात्, सः यत्र प्रयोजनम्, तत्रैव क्रियेत । शब्देन तु सर्वे अमी पदार्थाः विहिताः । तेन न यत्र केवलं प्रयोजनं प्रत्यक्षं दृश्यते, तत्रैव कर्तव्याः । क्व तर्हि ? यत्रयत्र विहिताः । ते च अमी सर्वत्र विहिताः गम्यन्ते । कुतः ? संयोगतः अविशेषात्, प्रकरणाविशेषाच्च । सर्वेषां तावत् आज्यौषधसांनाय्यानां अपूर्वेण साध्यसाधनसंयोगः अविशिष्टः । यत्र क्रियमाणाः अपूर्वस्य कृता भवन्ति इति विज्ञायते । तथा प्रकरणमविशिष्टम्, यस्मिन् विहिताः । सर्वेषां विहिता भवन्ति इति गम्यते । अतः सर्वे सर्वत्र कर्तव्याः । यत्तु अमी न सर्वत्र उपकुर्वन्ति इति, विधानसामर्थ्यात् सर्वत्र उपकारकाः इति गम्यते । स चायं अदृष्ट उपकारो भविष्यति ।

वा–– परः स्वाभिप्रायं विवृणोति । फलस्य हि सूक्ष्मसामर्थ्यरूपावस्था अङ्कुरस्थानीया पूर्वानुत्पन्नोत्पत्तेः (पूर्वं अनुत्पन्नस्य उत्पत्तेः हेतोः) अपूर्वं इत्युक्तं प्राक् (अपूर्वाधिकरणे ‘सूक्ष्मशक्त्यात्मकं वा तत् फलमेवोपजायते’ इत्यादिना) । तच्च फलैकत्वात् एकमेव अध्यवसीयते । तत्साधनत्वं च आज्यौषधसांनाय्यानां सर्वेषामविशिष्टम् । अतः तदुद्देशेन विहितानां सर्वधर्मत्वं विज्ञायते । यद्यपि च आग्नेयादीनां अवान्तरापूर्वाणि प्रात्यात्मिकानि भवेयुः, तथापि तेषां निष्फलत्वात् यागादिस्वरूपवदेव प्रयोजकशक्तिर्नास्ति इति परमापूर्वमेव प्रयोजकमवधार्यते । भिन्नापूर्वप्रयुक्तत्वेऽपि प्रकरणगतापूर्वसाधनमात्रोद्देशेन विधीयमानानां शेषाणां विशेषेण अनुपादानात्, उपादाने च वाक्यभेदप्रसङ्गात् सार्वत्रिकविधानमस्ति इति सर्वधर्मत्वे हेतुः । तत्सिद्ध्यर्थं च ‘संयोगतोऽविशेषात् प्रकरणाविशेषाच्च’ इत्युक्तम् । यत् एकस्य अपूर्वसाधनत्वं धर्मसंबन्धकारणम्, तत् इतर-

त्रापि अविशिष्टम्। यत्तु विशिष्टं व्रीहित्वादि, तत् लक्षणामात्रौपयिकत्वात् अनियामकम् । यदपि कारकत्वं लक्ष्यते, तदपि सर्वेषां प्रदेयत्वात् अविशिष्टम् । तस्मात् अपूर्वासंबद्धं अप्रदेयं अप्रकृतापूर्वसाधनं च वर्जयित्वा सर्वे सर्वत्र कर्तव्याः। यो हि अर्थात् प्राप्नोति इति, अचोदितः सन् सामर्थ्येन, लौकिकप्रयोजनेन वा यः प्राप्नोति, स तद्वशेन व्यवतिष्ठते। अथवा यत्र पूर्वतरप्राप्तप्रयोजनद्वारेण धर्माः प्राप्नुवन्ति, न च धर्मेभ्य एव प्रयोजनकल्पना यथा विकृतिषु, तत्र यावदर्थत्वं भवेत्। अत्र पुनः प्रकृतौ उपदेशेन प्राक् प्रयोजनेभ्यः स्वरूपमात्रेण कल्पयिष्यमाणप्रयोजनाः सन्तो विधीयन्ते । तेन नैषा वचनव्यक्तिः ‘ यत्र प्रयोजनं तत्रैते ’ (इति)। किं तर्हि ? ‘यत्रैते तत्र दृष्टमदृष्टं वा प्रयोजनम् ’ इति। तस्मात् सर्वधर्माः।

अर्थलोपादकर्म स्यात् । ९ ॥

भाष्यम्— नैतत्, सर्वे सर्वत्र करणीया इति। ये यत्र नोपकुर्वन्ति, न ते तत्र क्रियामर्हन्ति इत्युक्तमेव। ननु विधानसामर्थ्यात् सर्वे सर्वत्रोपकरिष्यन्ति । नेति ब्रूमः।

वा-- दृष्टार्थलोपात् शास्त्रगम्यार्थलोपाद्वा इति निगदव्याख्यातं भाष्यम्।

फलं तु सह चेष्टया, शब्दार्थोऽभावाद् विप्रयोगे स्यात् । १० ॥

भाष्यम्— नास्ति विधानम्, येन सर्वे सर्वत्र उपकुर्वन्ति। न च प्रत्यक्षादिभिः उपकारमवगच्छामः। अर्थापत्तिरपि नियोगतः तत्रैव भवेत्, यत्रैव शब्देन चोदना भवति, नान्यथा। यदि च प्रथनादीनां आज्यसांनाय्ययोः अनुपकुर्वतामपि तत्प्रकरणे समाम्नायः अनुपपन्नो भवेत्, ततः अर्थात् अदृष्ट उपकारः कल्प्येत। ते तु अवश्यं समाम्नानीयाः औषधार्थम्। फलं हि सह चेष्टया अवहननादिकया अवगम्यते तुषविमोचनादि। प्रयोजनं च तेन, न तस्मात् ऋते पुरोडाशः सिध्यति। सति चास्मिन् अर्थवान् प्रकरणे समाम्नायः। अर्थवति च तस्मिन् नादृष्टकल्पनायां प्रमाणमस्ति इत्यतो न शक्यं कल्पयितुम्। यदि च तत्र तण्डुलादिनिष्पादनं दृष्टं नाभविष्यत्, ततो विप्रयोगे तण्डुलादीनामभावात् उपकारस्य शब्दार्थमात्रं दृष्टोपकारानपेक्षं कर्तव्यम्, इति आज्यसांनाय्ययोरपि क्रियमाणानां अदृष्टमभविष्यत् । तस्मात् न प्रथनादयः सर्वत्र। एवं उत्पवनादयः शाखाऽऽहरणादयश्च। तस्मान्न सर्वे सर्वत्र कर्तव्याः। प्रथनादयो नाज्यसांनाय्ययोः, औषधे एव ते। उत्पवनादयः आज्यस्य, नौषधसांनाय्ययोः । शाखाऽऽहरणादयश्च सांनाय्यस्य, नाज्यौषधयोः इति सिद्धम्।

वा-- यदुक्तं अदृष्टकल्पनात् नैव इतरत्रापि अर्थलोप इति, तत्राभिधीयते । **‘यद्याहत्य विधीयेरन्नाज्येऽपि प्रथनादयः। अदृष्टार्था अगत्या स्युर्दृष्टं वा न भवेद्यदि॥’** आम्नानान्यथाऽनुपपत्त्या हि अदृष्टं कल्प्यते । तच्च आम्नानमन्यथैव दृष्टार्थतया उपपन्नमित्यर्थापत्तेरसंभवः। तत् दर्शयति । अवघातादीनां अनुष्ठानसहितं फलं व्रीहिषु दृश्यते, अन्यत्र तु चेष्टामात्रम्। न च सफलचेष्टाऽनुष्ठानसंभवे विफलानुष्ठाने विधिः पुरुषं नियोक्तुं शक्नोति, न च तेन अनियुज्यमानः फलकल्पनानिमित्तं लभते। तत् इतरेतराश्रयं भवति फलात् विधिः, विधेश्च फलमित्यभ्युपगमात्। **‘नह्यत्रैकमपि स्पष्टं प्रसिद्धं व्रीहिषु द्वयम्। अन्योन्यनिरपेक्षं च प्रत्यक्षमुपलभ्यते॥’** तथा उत्पवनादीनामाज्यसांनाय्ययोः इति योजनीयम्। तथाहि, **‘योऽर्थः प्रत्यक्षदृष्टोऽपि क्रतुना पुरुषेण वा। नापेक्ष्येतोपकाराय सोऽग्राह्यो, न त्वयं तथा॥’** अवघातादिनिर्वर्त्यो हि तुषकणविप्रमोचनादिः अर्थः पुरोडाशसिद्धिं प्रति षड्भिरपि व्रीहि–पुरोडाश–क्रतु–अपूर्व–अध्वर्यु–यजमानैः अपेक्षितः। नहि तस्मादृते व्रीहिभिः यष्टुं पुरोडाशो वा निर्वर्तयितुं शक्येतेति। तत् दर्शयति (भाष्यम्,) ‘प्रयोजनं च तेन’ इति । **‘विप्रयोगे तु दृष्टस्य फलस्य तदभावजा। तेषां शब्दार्थमात्रत्वात् स्याददृष्टार्थकल्पना ॥’** ततश्च अवघातः आज्यसांनाय्ययोरपि स्यात्। सति तु दृष्टे काल्पनिकासंभवात् यथार्थमेव व्यवस्थासिद्धिः। तथाहि; **‘क्व चिद् दृष्टनिराकाङ्क्षः क्षीणार्थापत्तिशक्तिकः।**

नादृष्टार्थोऽपि सोऽन्यत्र शक्यः कल्पयितुं विधिः ॥'

अथवा, तत एते सर्वत्र विहिता भवेयुः, यदि परमापूर्वप्रयुक्ताः सर्वापूर्वप्रयुक्ता वा स्युः। तदा च एवं ते भवेयुः, यदि भिन्नानि व्रीह्यादिकर्मापूर्वाणि (आग्नेयादिजन्योत्पत्त्यपूर्वाणि) न स्युः, यदि च एषाम् (उत्पत्त्यपूर्वाणाम्) प्रयोजकशक्तिर्न स्यात्। तानि तु प्रयोजकशक्तिमन्ति प्रतिकर्मभिन्नानि विद्यन्ते। तत्र भेदस्तावत् अपूर्वाधिकरणे (२।१।२।२) साधितः। यद्यपि च एषां साक्षादफलत्वम्, तथापि स्वरूपसिद्ध्यन्यथाऽनुपपत्त्यैव प्रयोजकत्वं भविष्यति। न च निष्फलानि। तन्नाम निष्फलत्वात् अप्रयोजकं भवति, यत् अत्यन्तनिष्फलं तन्निरपेक्षम् (अङ्गनिरपेक्षम्) वा द्रव्ययागादि स्वरूपवत् लब्धात्मकम्। आग्नेयाद्यवान्तरापूर्वाणि तु परमापूर्वसिद्ध्यङ्गत्वात् पारंपर्येण फलवन्ति। न च धर्मेभ्यः प्राक् सिद्धानि निर्ज्ञातोपायपरिमाणानि वा। तस्मात् आत्मलाभार्थमेव प्रयुज्यन्ते। यच्च येषु धर्मेषु विधीयमानेषु अपूर्वमुपतिष्ठते, तत् तेषां प्रयोजकं भवति, न यावत्किञ्चित्। व्रीह्यादिशब्दैश्च स्वकर्मसाध्यमेव केवलं अपूर्वमुपस्थाप्यते नान्यत्, असंबन्धात्। अतश्च अवघातादयः तदेव एकमपूर्वं प्राप्य अर्थवन्तो जाताः न परमापूर्वं कर्मान्तरापूर्वं वा अपेक्षन्ते। तत् दर्शयति। यस्मात् अवहननादि चेष्टया सह श्रुतेषु व्रीह्यादिष्वेव स्वापूर्वसाधनद्वारेण विधेः फलं दृश्यते। तस्मात् नान्यत्र संक्रान्तिः। यदि तु तत्र अपूर्वं न स्यात्, ततः अर्थात् अदृष्टं कल्प्येत, व्रीह्यादिशब्दैः अनुपस्थापितोऽपि उपकारः प्रयोजकः कल्प्येत। अस्ति तु तत्।

सूत्रमपि एवम्— विप्रयोगे तण्डुलादिनिष्पाद्यस्य अपूर्वस्य प्रयोजनाभावात् सांनाय्यादिसंबन्धोऽपि व्यवहितपरमापूर्वद्वारेण कर्मान्तरापूर्वद्वारेण वा शब्दार्थः स्यात्। प्रत्यासन्नापूर्वसद्भावे तु न शब्दः तावन्तं खेदं सहते। तस्मात् अप्रमाणकः सांनाय्यादिसंबन्धः। एवं तर्हि आग्नेयाद्यपूर्वसंबन्धाविशेषात् स्रुगादीनामवघातादयः प्राप्नुवन्ति। नैष दोषः, कारकान्तरत्वेन तेषामलक्षितत्वात्। यथैव हि प्रदेयत्वाविशेषेऽपि सांनाय्यादेः अपूर्वान्तरसाधनत्वात् अप्रतीतिः, एवं एकापूर्वसंबन्धेऽपि व्रीहित्वैकार्थसमवेतप्रदेयरूपकारकत्वाभावात् स्रुगादीनामग्रहणम्। यत्तु तस्मिन्नेव अपूर्वे समानकारकत्वेन उपकरिष्यति, तस्य भविष्यन्त्येव धर्माः यथा यवानाम्। सर्वं चैतत् नवमे विस्तरेण वक्ष्यामः।

शा--'एकमेव फलापूर्वं फलस्यैकस्य सिद्धये।
कल्प्यं नान्यानि धर्माणां तादर्थ्यात् संकरो भवेत्॥'

अत्राभिधीयते। सन्ति तावत् अवान्तरापूर्वाणि। कुतः? **'नह्याग्नेयादिकर्माणि विशरारूणि, तैर्विना। संहत्य परमापूर्वं जनयन्ति स्वरूपतः॥'** तस्मात् यथासंयोगं व्यवस्था।

सोम— स्वरूपज्ञानानन्तरं प्राप्तावसरोऽयं विचारः। **सूत्रार्थस्तु--** तेषां संस्काराणां अर्थेन दृष्टप्रयोजनवशेन व्यवस्थया संबन्धः इति।

वि— 'श्रुता व्रीह्याज्यसांनाय्यधर्माः सांकर्यगामिनः। व्यवस्थिता वा, सांकर्यं फलापूर्वेण संगतेः॥, अवान्तरापूर्वसत्त्वात् साक्षात् तेनैव संगतौ। श्रुत्या व्यवस्थापितास्ते सा हि प्रकरणोत्तमा॥' सा श्रुतिः प्रकरणात् उत्तमा बलिष्ठा।

भाट्ट-- तदेवमङ्गत्वे निरूपिते श्रुत्यादीनि षट् प्रमाणानीत्युक्तम्। तत्र श्रुतिर्नाम अङ्गत्वघटकीभूतोद्देश्यत्वकृतिकारकत्वयोरन्यतरस्य प्राधान्येन वाचकः शब्दः। स च द्वितीयातृतीयाविभक्तिरूपः। कृदन्तस्थले निष्ठातृजादिव्यावृत्त्यर्थं प्राधान्येनेति। तस्य कारकत्वविशिष्टद्रव्यवाचित्वेन प्राधान्येन कारकत्ववाचित्वाभावात्। अत एव 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' 'वारणो यज्ञावचरः' इत्यादौ वाक्यीयः एव विनियोगः, न श्रौतः। अत्र द्वितीया उद्देश्यत्वपरा सती प्रोक्षणादेरङ्गत्वे हेतुः। वस्तुतस्तु ईप्सितत्वाख्याया उद्देश्यतायाः साध्यतामात्रवाचिद्वितीयावाच्यत्वाभावात् तत्रापि न मुख्या श्रुतिः। अपितु भाक्त एव तत्र श्रुतिव्यवहारः, ईप्सितत्वांशे लक्षणाऽङ्गीकारात्। अतश्चोद्देश्यतापदमपि नैव लक्षणे देयम्। एवं षष्ठ्यादावपि कारकत्वशक्तत्वाभावात्

श्रुतित्वव्यवहारो भाक्त एव। एवं यत्रापि विभक्त्या लक्षणयैव कारकान्तरप्रतिपादनम्, तत्रापि वाक्यीय एव विनियोगः, न श्रौतः। एवं समानपदश्रुत्यादिष्वपि द्रष्टव्यम्। तदेवं श्रुतेर्विनियोजकत्वे तद्भूताधिकरणेनैव सिद्धे अधुना गौणमुख्यसाधारणश्रुतिविनियोगोपयोग्यङ्गाङ्गित्वयोः अवच्छेदकविचारः क्रियते।

दर्शपूर्णमासयोः ‘व्रीहीनवहन्ति’ ‘आज्यमुत्पुनाति’ इत्यादयः आज्यौषधसान्नायसंबन्धिनः संस्काराः श्रुताः। तेषु किं सर्वसाधारणमवघातविधौ उद्देश्यताऽवच्छेदकम्, उत आज्यादिव्यावृत्तम्? एवमन्यत्रापीति विचारः। तत्र न तावत् श्रुतं व्रीहित्वादिकमेव उद्देश्यताऽवच्छेदकम्, आनर्थक्यापत्तेः। अवघातप्रोक्षणादिव्यतिरेकेणापि व्रीहित्वावच्छिन्नादेर्जायमानत्वात् यवेषु अनापत्तेश्च। अतो नवमाद्याधिकरणन्यायेन व्रीहित्वाविवक्षया अपूर्वसाधनत्वलक्षणाया आवश्यकत्वात्। तत्र फलप्रत्यासन्नत्वात् एकत्वात् आरादुपकारकेषु क्लृप्तप्रयोजकशक्तिमत्त्वाच्च परमापूर्वस्य तत्साधनत्वमेव प्रदेयघटकत्वसंबन्धेन लक्ष्यते। अस्ति च आग्नेयादेः तत्प्रत्यपि साधनता। अत एव न वाङ्नियमन्यायोऽपि। अतश्च उद्देश्यताऽवच्छेदकस्य सर्वसाधारणत्वात् आज्यादिष्वपि अवघातादेः संकरः। न च प्रतिनियतनिर्देशात् व्यवस्था। तथात्वे व्रीहित्वादिविवक्षाया आवश्यकत्वेन नीवारादिषु अनापत्तेः। इति प्राप्ते, यद्यपि विधिः अविशेषप्रवृत्तः स्यात्, तथापि दृष्टार्थत्वे नियमविधिलाघवाद्यनुरोधेन विशेषे व्यवस्थाप्यते, किमुत यदा सोऽपि विशेषप्रवृत्तः एव। व्रीह्यादिपदे प्रत्यासत्त्या आग्नेयाद्युत्पत्त्यपूर्वसाधनत्वस्यैव लक्ष्यत्वात्। तस्यापि अनिर्ज्ञातप्रकारत्वेन धर्मप्रयोजकत्वोपपत्तेः आनर्थक्याभावेन तदतिक्रमकारणाभावात्, परंपरया फलवत्त्वाच्च। अतो व्रीहिपदेन व्रीहिसाध्यानि यानि आग्नेयाग्नीषोमीयैन्द्राग्नोत्पत्त्यपूर्वाणि, तन्निष्ठकार्यतानिरूपितयागादिनिष्ठकारणतासमानाधिकरणकार्यतानिरूपितप्रदेयप्रकृतिभूततण्डुलरूपव्यापारकसाधनतासामान्याश्रयत्वस्यैव उद्देश्यताऽवच्छेदकत्वेन विवक्षितत्वात् नाज्यादिषु अतिप्रसङ्गः। अत्र च अपूर्वत्रयस्य एकानुगमकाभावेऽपि एकपदोपादानात् वाक्यभेदः। तत्तद्व्यापारकसाधनता एव च विवक्ष्यन्ते, न तु साधनताऽवच्छेदकादीन्यपि। तेन यागत्वपुरोडाशत्वव्रीहित्वाद्यभावेपि न क्षतिः। यथा च व्रीहियवयोः कारणताभेदेऽपि यवसाधारण्यम्, तथा कौस्तुभे विस्तरः। तत्रतत्र नवमादौ चोपपादयिष्यते।

मण्डन—‘व्रीह्यादेरवघातादि।’

शंकर—‘अवघातादेर्न संकरः।’

* आज्य–ओषधि–सांनाय्यधर्माणामुत्पत्त्यपूर्वप्रयुक्ततया यथायोगं व्यवस्थां तृतीय-(३।१।४)सिद्धामङ्गीकृत्य, उत्पत्त्यपूर्वसाधनत्वस्य स्रुवादिष्वपि सत्त्वात् अतिप्रसङ्गमाशङ्क्य निराक्रियते इति ‘**तेषामर्थाधिकरणेन**’ अपि अगतार्थत्वं सूचितम्। **सोम.** ९।१।५. * ‘तेषामर्थेन संबन्धः’ इत्यादिभिः त्रिभिरधिकरणैः संस्कारद्रव्यगुणानां श्रुतशेषिसंयोगेन व्यवस्था अभिहिता। **कु.** ३।१।७।१३. * **तेषामर्थाधिकरणे** (३।१।४।७–१०) संस्कारविनियोगः कथ्यते। स च लिङ्गेन इति केचित्। वस्तुतस्तु श्रुत्यैव। **वा.** ३।१।४।७ पृ. ६६५. * आरुण्यस्यामूर्तत्वेन क्रयं प्रति करणत्वासंभवेन, ‘तेषामर्थेन संबन्धः’ **इत्यधिकरणे** ‘विहितस्तु सर्वधर्मः स्यात् संयोगतोऽविशेषात्’ इति पूर्वपक्षसूत्रोक्तन्यायेन (प्रकृतापूर्वसाधनं वर्जयित्वा सर्वत्र सर्वे धर्माः संबध्यन्ते) प्रकृतापूर्वसाधनद्रव्यमात्रे निवेशो युज्यते; **कु.** ३।१।६।१२ पृ. २५२. * यत्र तु व्रीहियवादिवाक्ये कारणताद्वयं प्रमाणसिद्धम्, तत्रैव परं आग्नेयादौ वैजात्यकल्पनं इति तेषामर्थाधिकरणे वक्ष्यते। **कौ.** २।१।४।९ पृ. ६७. * व्रीहियवादिवैकल्पिकसाधनस्थले व्यभिचारपरिहाराय आग्नेयत्वोपांशुयाजत्वादिव्याप्यो धर्मोऽस्तीति तेषामर्थाधिकरणे (३।१।४।७–१०) कौस्तुभे उक्तम्। **भाट्ट.** ५।४।४. * व्रीहिभिर्यजेत इति शास्त्रावगतं यद्धविः प्रकृतितया अपूर्वसाधनम्, तत्र अवघातपर्यवसानेन असाङ्कर्यं **तेषामर्थाधिकरणोक्तरीत्या** प्रत्यासत्तिबलेन अवान्तरापूर्वप्रयुक्तत्वाद्वा न साङ्कर्यम्। **सोम.** ९।१।१. * न तावत् सर्वेषामवघातादीनां अपूर्वार्थत्वमपहाय स्वर्गार्थत्वं शङ्कितुं शक्यम्, व्रीह्यादिपदेन प्रत्यासन्नतया **तेषामर्थाधिकरण**-

न्यायेन आग्नेयाद्युत्पत्त्यपूर्वसाधनत्वस्यैव लक्षणात् । भाट्ट. ९।१।३. * तेषामर्थाधिकरणवक्ष्यमाणा धर्मेव्यवस्था । सु. पृ. ७३०.

तेषामृग् यत्रार्थवशेन पादव्यवस्था । २।१।१०।३५ ॥

ऋच इत्यस्ति वेदे ‘ अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि ’ इति । कथंलक्षणिका ऋचः इति प्रासङ्गिकमन्त्रविचारं परिसमाप्य इदानीं मन्त्रविशेषश्रुतऋग्यजुःसामपदार्थनिरूपणं अनुप्रसङ्गेन क्रियते । अत्रायं पूर्वपक्षिणोऽभिसन्धिः, यत्रार्थेन पादव्यवस्था सा ऋगिति ऋग्लक्षणमुक्तम् । न चैतत्संभवति । ‘ अग्निः पूर्वेभिः ’ इत्यत्र क्रियापदाभावेन अर्थावच्छेदनिबन्धनपादव्यवस्थाव्यतिरेकेणापि ऋग्दर्शनात् । अतः अनिरूपणमेव ऋक्पदार्थस्य इत्येवं प्राप्ते, अभिधीयते। भवेदेवं यदि पादबद्धो मन्त्रः ऋक्त्वं व्यभिचरति । तथाहि पादबद्धे मन्त्रे अभियुक्ता ऋक्शब्दं प्रयुञ्जते, न लौकिकपदबन्धमात्रे। अत्र पादबद्धत्वं मन्त्रोपलक्षणार्थमेव । तेन ‘ अग्निः पूर्वेभिर्ऋषिभिः ’ इत्यत्र क्रियापदानुपादानात् अर्थवशेन पादव्यवस्थाया अभावेऽपि गायत्र्यादिच्छन्दोवशेन पादव्यवस्थायां अविरुद्धमृक्त्वमिति । **प्रयोजनम्**– पूर्ववदेव प्रतिपत्तिलाघवमिति । सूत्रं तु अर्थवशेनेत्युपलक्षणम् । वृत्तवशेनापि यत्र गायत्र्यादिपादव्यवस्था सा ऋगिति । **तौता.**

तेषामृग् यत्रार्थवशेन पादव्यवस्था । २।१।१०।३५ ॥

ऋचः सामानि यजूंषि मन्त्रा इत्युक्तम् । तत्र ऋग्लक्षणमाह । तेषां त्रिविधानां मन्त्राणां मध्ये ऋक् नाम सा, यत्र अर्थवशेन अर्थानुसारेण पादानां चरणानां व्यवस्था अक्षरेयत्ताविशेषो भवति । तथा च विशिष्टैकार्थप्रतिपादकत्वे सति पादबद्धमन्त्रत्वं ऋक्त्वम् । **के.**

तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत । ६।२।८।२८ ॥

अग्निहोत्रं सकृत् प्रदोषकाले सकृच्च प्रातःकाले होतव्यम्, न तु प्रातःप्रातः प्रदोषेप्रदोषे च । एवं सकृत् पौर्णमास्यां पौर्णमासयागः सकृच्च अमावास्यायां दर्शयागः, न तु पौर्णमास्यांपौर्णमास्यां अमावास्यायाममावास्यायां च । सकृत्कृतेन कृतार्थं शास्त्रम् । इति उत्सूत्रे पूर्वपक्षे प्राप्ते वाशब्देन पूर्वपक्षनिरासं सूचयन् सिद्धान्तमाह । तेषामग्निहोत्रादीनां कर्मणां औत्पत्तिकत्वात् कालसंयुक्तानामेव उत्पद्यमानत्वात्, निमित्ते प्राप्ते नैमित्तिकस्य कर्तव्यत्वाच्च आगमेन सायमादिकालस्य आगमेनआगमेन प्रवर्तेत होमं कर्तुम्। आगतेआगते विहिते काले प्रयोगः कर्तव्यः इति असकृत् प्रयोगः इति सिद्धान्तः । ‘तेषां सर्वसायमादिकालजीवनानां औत्पत्तिकत्वात् उत्पत्तौ प्रयोगे निमित्तत्वात् आगमेन तृतीयानिमित्ततायाम्, सर्वसायमादिकालावच्छिन्नजीवनानां निमित्तानां प्राप्तौ सत्यां नैमित्तिकाः प्रयोगाः प्रवर्तेरन् ’ । इति **कुतूहलम्।**

तथाहि लिङ्गदर्शनम् । २९ ॥

सिद्धान्ते लिङ्गं दर्शयति । ‘अथ वा एष स्वर्गाल्लोकाच्छिद्यते, यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वाऽतिपातयेत् ’ इति आगतेआगते काले प्रयोगं दर्शयति । सकृत्करणे तु क्वातिपत्तिः ? तस्मात् असकृदेवानुष्ठानं स्वस्वकाले इति सिद्धान्तः । **के.**

तेषामौत्पत्तिकत्वाधिकरणम् । अग्निहोत्रादिकर्मणां निमित्तानुरोधेन आवृत्तिः ॥

तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत । ६।२।८।२८ ॥

भाष्यम्— ‘प्रदोषमग्निहोत्रं होतव्यम्, व्युष्टायां प्रातः’ इति (प्रदोषं प्रदोषकाले, व्युष्टायां रात्रौ प्रातः)। तथा ‘पौर्णमास्यां पौर्णमास्या यजेत’ ‘अमावास्यायाममावास्यया यजेत’ तत्र संदेहः किं सकृत् प्रदोषे होतव्यम्, उत प्रदोषेप्रदोषे इति । तथा सकृत् व्युष्टायां प्रातः, उत व्युष्टायांव्युष्टायां इति । तथा किं सकृत् पौर्णमास्याममावास्यायां वा, उत आगतेआगते काले इति । किं प्राप्तम् ? सकृत् कृत्वा कृतार्थः शब्दो न नियमः पौनःपुन्ये इति । एवं प्राप्ते, ब्रूमः । आगमेन प्रवर्तेत । आगतेआगते काले प्रयोगः कर्तव्य इति । कुतः ? तेषामौत्पत्तिकत्वात् । उत्पद्यमानं कर्म कालसंयुक्तमेवोत्पद्यते । तदुक्तम्, ‘निमित्तार्थाः कालश्रुतयः’

इति। निमित्ते च संप्राप्ते नैमित्तिकोऽर्थः कर्तव्यो भवति। तस्मादागतेआगते काले प्रयोगः कर्तव्यः।

तथाहि लिङ्गदर्शनम्। २९॥

भाष्यम्-- 'अप वा एष स्वर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वाऽतिपातयेत्' इति (लिङ्गम्) आगतेअगते काले प्रयोगं दर्शयति।

सोम-- **सूत्रार्थस्तु**- तेषां कालानामौत्पत्तिकत्वात् कर्मोत्पत्तिनिमित्तत्वात् कालस्य पुनःपुनरागमेन कर्माणि प्रवर्तेरन् इति।

वि— 'सकृत्कृतिरुतावृत्तिर्दर्शादेः, शास्त्रसार्थ्यतः। सकृत् स्यात्, कालसंयुक्तजीवनावृत्तितोऽन्तिमः॥'

भाट्ट— कालशास्त्रेण निमित्तशास्त्रस्य संकोचेऽपि यदा कालावच्छिन्नस्य निमित्तस्य पुनःसंनिपातः, तत्र नैमित्तिकावृत्तिः, इतरथा स्वोत्पत्तौ अवश्यानुष्ठापकत्वरूपनिमित्तत्वानुपपत्तेः। अत एव यत्र तस्मिन्नेव निमित्ते कालमात्रस्यावृत्तिः, तत्र न नैमित्तिकावृत्तिः, यथा एकस्मिन्नेव वसन्ते पर्वावृत्तौ। अत्र च पूर्वपक्षस्य अतितुच्छत्वात् सुहृद् भूत्वोपदेशः इति मन्तव्यम्।

मण्डन-- 'दर्शादिकाले च पुनःपुनः स्यात्।'

शंकर— 'जीवनेजीवने कर्म।'

✱ 'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यत्र जीवनं सायंप्रातःपौर्णमास्यादिकालावच्छिन्नं निमित्तं इति 'तेषामौत्पत्तिकत्वात्' इत्यधिकरणे स्पष्टीभविष्यति। कु. २।४।१।२.

✱ तेषामौत्पत्तिकत्वाधिकरणन्यायस्तु 'निमित्तावृत्तौ नैमित्तिकानामपि आवृत्तिः' इति। शा.

✱ तेषाम् (त्रयोदशानामतिरात्राणां मध्ये) 'चत्वारः अषोडशिकाः प्रथमाः'। अयं कर्मतो व्यवस्थारूपः प्रतिषेधः। बाल. पृ. ३४-३५.

⧗ तेषां तु वचनाद् द्वियज्ञवत् सहप्रयोगः स्यात्। १०।२।१३।४२॥

'सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्' इति श्रुतम्। तेषां सत्रकर्तॄणामुदवसानीयकर्तॄणां वा उदवसानीयस्य प्रयोगः सहप्रयोगः स्यात्, संहत्य संभूय प्रयोगः स्यात्, 'यजेरन्' इति बहुवचनात्। द्वियज्ञवत् यथा 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इति द्विवचनात् द्वाभ्यां संहत्य कुलाययज्ञः क्रियते तद्वत्। द्वयोः यज्ञः द्वियज्ञः। तस्मात् पृष्ठशमनीयः सर्वैः संभूय कर्तव्य इति पूर्वः पक्षः।

एकैकशस्त्वविप्रतिषेधात् प्रकृतेश्चैकसंयोगात्। ४४॥

तुशब्दः पूर्वपक्षं व्यावर्तयति। उदवसानीयं सोमं न संहत्य प्रयुञ्जीरन् किन्तु एकैकशः। अविप्रतिषेधात्। उदवसानेन हि पुरुषा लक्ष्यन्ते ये सत्रादुदवस्यन्ति। तत्र च एकोऽपि उदवसाता भवति। ये चोदवसानलक्षिताः तेषां यागः, इति एकैकस्यापि यागो विहितो भवति। न च केनचित् प्रतिषिध्यते। प्रकृतेश्च प्रकृतिभूतस्य ज्योतिष्टोमस्य च एकेनैव कर्त्रा संयोगात् एककर्तृकत्वात् विकृतिभूतस्य उदवसानीयस्यापि एककर्तृकत्वनिश्चयात्। तस्मादुदवसानीयः सोमः एकैकेनैव कर्तव्यः न सर्वैः न द्व्यादिभिर्वा संहत्य इति सिद्धान्तः। ४२ सूत्रं पूर्वपक्षः, ४४ सूत्रं सिद्धान्तः। ४३ सूत्रेण तु अन्तरागर्भिणी इति ज्ञेयम्। के.

✱ **तेषां यतो विशेषः स्यात्। ३।८।१०।२२॥**

न च आत्मनैवात्मानं (मैत्रावरुणः) नियोक्तुमर्हति इति परेण विनियोक्तव्यः। स च 'तेषां यतो॰' इत्येवं विज्ञायते। वा. ३।३।७।१४ पृ. ८४७, ✱ सोमयागेष्वपि 'प्रैषेषु पराधिकारात्' इत्येवं निवर्तमानः (यजेतिशब्दः) 'तेषां यतो॰' इत्येवं मैत्रावरुणस्यैव। ३।७।२१।४४.

⧗ तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्। ६।२।६।२२॥

'गुरुरनुगन्तव्यः अभिवादयितव्यश्च' 'वृद्धवयाः प्रत्युत्थेयः संमन्तव्यश्च' इत्यादयः स्मार्ताः पदार्थाः प्रत्युपस्थितनियमाश्च आचाराः इत्येतानि तस्मिन् पुरुषसामान्ये शिष्यमाणानि विधीयमानानि, जननेन जन्मनैव निमित्तेन प्रवर्तेरन्। तत्र जातमात्रस्याधिकारः, न तु उपनयनप्रतीक्षा। उपनयात् प्रागपि एते पदार्था अनुष्ठेयाः

इति पूर्वः पक्षः । तुशब्दः पक्षान्तरव्यावृत्त्यर्थः । तस्मिन् मन्वादिग्रन्थे इति तु सुबोधिनी ।

अपिवा वेदतुल्यत्वादुपायेन प्रवर्तेरन् । २३ ॥

पूर्वपक्षं सूत्रेण प्राप्तं अपिवा इतिशब्देन निरस्यन् सिद्धान्तमाह । उपायेन उपनयनेन सह एते धर्माः प्रवर्तेरन्, वेदतुल्यत्वात् विधायिकायाः स्मृतेः । वैदिकाश्च पदार्था उपनयनोत्तरकाला भवन्ति । स्मार्ताश्चैते वैदिका एव । तस्मात् उपनीतस्यैते धर्माः, नानुपनीतस्य । के.

⧗ तस्मिन् पेषणमनर्थलोपात् स्यात् । १०। १।१२।५२ ॥

तस्मिन् पूर्वसूत्रोक्ते सौर्ये चरौ पेषणं स्यात् । अनर्थलोपात् अर्थलोपाभावात् देवतासंप्रदानात्मकप्रयोजनलोपाभावात्, पेषणे कृतेऽपि देवतायै दातुं शक्यत्वात् । इति पूर्वः पक्षः ।

अक्रिया वाऽपूपहेतुत्वात् । ५३ ॥

सौर्ये चरौ पेषणस्य अक्रिया न क्रिया न कर्तव्यता । पेषणस्य अपूपहेतुत्वात् । अपूपे पुरोडाशे कर्तव्ये तस्य हेतुः पेषणम् । चरौ तु न स्यात् । अन्तरूष्मपक्वविशदतण्डुलरूपो हि चरुः । पेषणे कृते तु विशदता न स्यात्, खलतिः स्यात् । तस्मात् चरौ कर्तव्ये न पेषणमिति सिद्धान्तः । के.

⧗ तस्मिन् विदिते सर्वं विदितं भवतीति न्यायः । अयं श्रीमद्वल्लभाचार्यैः श्रीमद्भागवतस्य सुबोधिनीटीकायामुदाहृतः । अयमर्थः–‘विदुरो मैत्रेयसमीपे गत्वा स्वस्य सर्वज्ञतासिद्ध्यै बहु पृष्टवान् । तत्र, तस्मिन्विदिते सर्वं विदितं भवतीति न्यायेन भगवच्चरित्रे ज्ञाते सर्वं ज्ञातं भवति ’ इत्युक्तमिति । साहस्री. ५८९.

⧗ तस्मिन् संस्कारकर्म शिष्टत्वात् । १२।४।९। २८ ॥

तस्मिन् पूर्वसूत्रोक्ते ज्वलतो वृक्षाग्रात् भ्राष्ट्रात् चणकादिभर्जनपात्रात् सुतप्तान्, प्रादाव्यात् दावाग्नेर्वा आहृत्य उखायां स्थापिते अग्नौ संस्कारकर्म आधानादयः संस्काराः कर्तव्याः । यतः सर्वकर्मार्थाः संस्काराः शिष्टाः विहिताः, इदानीं च उख्ये एवाग्नौ सर्वकर्माणि क्रियन्ते । तस्मात् उख्ये आधानिकाः संस्काराः कर्तव्याः इति पूर्वः पक्षः ।

स्थानात्तु परिलुप्येरन् । २९ ॥

आधानसंस्कृतस्य नित्यस्याग्नेः स्थाने अयमसंस्कृतः उख्योऽग्निः श्रुतः । एतस्मात् स्थानात् उख्येऽग्नौ संस्काराः परिलुप्येरन् । न कर्तव्याः । इति सिद्धान्तः । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । के.

⧗ तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् । ८। ४।४।१० ॥

दर्विहोमः सोमविकारो वा अपूर्वो वेति विचारे पूर्वपक्षमाह । तस्मिन् दर्विहोमे सोमः प्रवर्तेत सौमिको विध्यन्तः स्यात् । अव्यक्तत्वात् । अव्यक्तचोदनः सोमः, ‘ भिन्ने जुहोति ’ इत्यादिर्दर्विहोमोऽपि अव्यक्तचोदनः । चोदनासामान्यात् सौमिको विध्यन्तः । अव्यक्तत्वं च विधिवाक्ये द्रव्यदेवताराहित्यम् ।

न वा स्वाहाकारेण संयोगाद् वषट्कारस्य च निर्देशात्, तन्त्रे तेन विप्रतिषेधात् । ११ ॥

वाशब्दः पूर्वपक्षं व्यावर्तयति । न दर्विहोमे सौमिको विध्यन्तः । ‘पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा ’ इति स्वाहाकारेण संयोगात् । सौमिके तु तन्त्रे वषट्कारस्य निर्देशात् । सोमे हि वषट्कारो भवति, दर्विहोमे तु स्वाहाकारो विद्यते । एवं सति सौमिके तन्त्रे स्वीकृते तेन वषट्कारेण स्वाहाकारस्य विप्रतिषेधात् विप्रतिषेधप्रसङ्गात् न सौमिको विध्यन्तो दर्विहोमे । किन्तु अपूर्वोऽयम् । ‘ तत्रैतेन विप्रतिषेधात् ’ इति कुतूहले पाठः । एतेन स्वाहाकारेण वषट्कारस्य विप्रतिषेधात् न तत्र सौमिको विध्यन्त इति तत्रार्थः ।

शब्दान्तरत्वात् । १३ ॥

दर्विहोमः अपूर्व एव न सोमविकार इति सिद्धान्ते हेत्वन्तरमाह । शब्दोऽत्र यजतिशब्दः सोमगतः । शब्दान्तरं अन्यः शब्दः जुहोतिः । यजतिचोदनः सोमः, जुहोतिचोदनो दर्विहोमः । तस्मात् अपूर्वो दर्विहोमः ।

लिङ्गदर्शनाच्च । १३ ॥

दर्विहोमे न सौमिको विध्यन्तः, किन्तु अपूर्वत्वमित्यत्र लिङ्गस्य दर्शनं भवति । औदुम्बरीहोमे स्वाहाकारं

विधाय आज्यविधिपरे वाक्ये ‘ घृतेन द्यावापृथिवी आपृणेथामिति अन्तरा कर्णौ जुहोति आ मूलादन्ववस्रावयति, भूमिगते स्वाहा करोति ’ इति । सौमिको यदि विध्यन्तो वषट्कारस्ततो भवेत् , न स्वाहाकारः । तस्मादपूर्वत्वम् । चशब्दः पूर्वहेतुसमुच्चयार्थः । औदुम्बरीशाखायाः कर्णयोर्मध्ये आज्यं होतव्यम् । हुतमाज्यं यथा शाखाद्वारा भूमौ गतं स्यात् , तथा भूयो होतव्यम् । भूमिगते चाज्ये सति स्वाहाकारः पठनीयः, न तु प्रागेव होमकाले इति श्रुत्यर्थः ।

उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं , तत्राविप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात् पशुवत् । १४ ॥

दर्विहोमे सोमविध्यन्तो नास्तीत्यत्र सिद्धान्तिना लिङ्गदर्शनमुक्तम्, तत्परिहरति पूर्वपक्षी । तुशब्दः सिद्धान्तपक्षव्यावृत्त्यर्थः । स्वाहाकारः उत्तरार्थः वषट्कारशून्यौदुम्बरीहोमादिप्रदानार्थः विकृत्यर्थः । यथा साप्तदश्यमनारभ्याधीतं सामिधेनीसाप्तदश्यं प्रकृतिं गच्छति । तत्र प्राकरणिकेन पाञ्चदश्येन बाधितं सत् विकृतिषु गतम् । तथैव ‘स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते’ इति अनारभ्याधीतः स्वाहाकारः दर्शपूर्णमासौ सोमं च प्रकृतिं निविविक्षुः वषट्कारेणोपरुद्धः तद्वर्जं सोमवर्जे अन्यानि प्रदानानि उपसंक्रामति । तत्र एवं सति औदुम्बरीहोमादौ सौमिकविध्यन्तस्य प्रवृत्तिः अविप्रतिषिद्धा न विरुद्धा । पुनःशब्दः अनर्थकोऽत्र इति भाष्यम् । लिङ्गदर्शनात् पशुवत् । यथा श्रुतसामिधेनीसाप्तदश्ये पशौ प्रयाजादिलिङ्गदर्शनात् दर्शपूर्णमासधर्मप्रवृत्तिः न विरुद्धा , साप्तदश्यस्य वाचनिकत्वात् । तद्वत् औदुम्बरीहोमे वाचनिकत्वात् स्वाहाकारं प्रति लिङ्गदर्शनात् न सौमिकधर्मप्रवृत्तिर्विप्रतिषिध्यते ।

अनुत्तरार्थो वाऽर्थवत्त्वादनर्थकत्वाद्धि प्राकृतस्योपरोधः स्यात् । १५ ॥

दर्विहोमे सोमविध्यन्तः, स्वाहाकारस्तु उत्तरार्थः इति पूर्वपक्षी यदाह तन्नेत्याह । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । स्वाहाकारः अनुत्तरार्थः न उत्तरार्थः न वषट्कारशून्यप्रदानार्थः । प्रकृतावेव नारिष्ठहोमेषु पार्वणहोमयोश्च अर्थवत्त्वात् सफलत्वात् स्वाहाकारस्य । यदि प्रकृतौ स्वाहाकारः सार्थको न स्यात् तदा तेन अनर्थकत्वात् निरवकाशत्वेन बलवत्त्वात् प्राकृतस्य सौमिकस्य वषट्कारस्य सावकाशस्य उपरोधः स्यात् बाधः स्यात् । परन्तु न स्वाहाकारस्य आनर्थक्यम् । तस्मान्नोत्तरार्थः । अनुत्तरार्थत्वाच्च दर्विहोमानां सोमपूर्वत्वाभावे ‘ भूमिगते स्वाहा करोति ’ इति लिङ्गं भवत्येव ।

न प्रकृतावपीति चेत् । १६ ॥

पूर्वपक्षी आह । प्रकृतावपि दर्शपूर्णमासयोरपि विकृताविव नारिष्ठहोमादौ निवेशो न संभवति । तत्रापि अविशेषेण विहितो वषट्कार एव प्राप्नोति । स्वाहाकारः पाठप्राप्तः वषट्कारस्तु विहितः । विधिश्च पाठात् प्रबलः । तस्मात् स्वाहाकार उत्तरार्थ एव भवति विकृत्यर्थः ।

उक्तं समवाये पारदौर्बल्यम् । १७ ॥

तत्राह सिद्धान्ती । स्वाहाकारस्य नारिष्ठहोमादौ वषट्कारेण न बाधः । अत्र हि वाक्यप्रकरणयोः संनिपातः । प्रकरणेन नारिष्ठहोमेषु वषट्कारः प्राप्तः, नारिष्ठहोममन्त्रैः एकवाक्यत्वात् स्वाहाकारो वाक्येन प्राप्तः । एवं वाक्यप्रकरणयोः संनिपाते प्राप्ते उक्तं समवाये पारदौर्बल्यं श्रुतिलिङ्गसूत्रे तृतीयाध्याये । वाक्यं प्रकरणात् बलीय इति तत्रोक्तम् । तस्मात् स्वाहाकारस्य प्रकृतौ निवेशात् स न विकृत्यर्थः । ततश्च दर्विहोमो न सोमविकृतिः ।

तच्चोदना वेष्टेः प्रवृत्तत्वात् तद् विधिः स्यात् । १८ ॥

दर्विहोमेषु नारिष्ठहोमविध्यन्तः अस्तु इति पक्षान्तरमाह । वाशब्दः सोमविध्यन्तपक्षं अपूर्वत्वपक्षं च व्यावर्तयति । इष्टेः दर्शपूर्णमासयोः संबन्धिनी तच्चोदना जुहोतिचोदना नारिष्ठचोदना , सर्वेष्टिषु सर्वपशुबन्धेषु च प्रवृत्तत्वात् तत् तत्र वास्तुहोमे विधिः स्यात् , विधीयते इति विधिः, विधीयमाना स्यात् विहिता स्यात् । वास्तुहोमे दर्शपूर्णमासगतनारिष्ठचोदना प्रवर्तेत अन्यत्र प्रवृत्तत्वादित्यर्थः ।

शब्दसामर्थ्याच्च । १९ ॥

दर्विहोमेषु नारिष्ठहोमविध्यन्तः स्यात् इति पक्षान्तरे हेत्वन्तरमाह । चकारः समुच्चये । शब्दस्य सामर्थ्ये

चोदनासामान्यम् । 'यदेकया जुहुयात् दर्विहोमं कुर्यात्' इति जुहोतिचोदना वास्तुहोमे, 'नारिष्ठान् जुहोति' इति जुहोतिचोदना नारिष्ठेषु । इति चोदनासामान्यरूपात् शब्दसामर्थ्यात् नारिष्ठधर्मप्राप्तिः दर्विहोमेषु ।

लिङ्गदर्शनाच्च । २० ॥

दर्विहोमेषु नारिष्ठविध्यन्तः स्यात् इति पक्षे हेत्वन्तरमाह । चकारः समुच्चये । नारिष्ठहोमप्रकृतिकत्वं दर्विहोमानामित्यत्र लिङ्गं दृश्यते । अग्निहोत्रे श्रूयते 'यदि कीटोऽवपद्येत अन्तःपरिधि निनयेत्' इति । तथा चयने श्रूयते 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति । परिधयो वेदिश्च अङ्गप्रधानार्थत्वात् नारिष्ठहोमाङ्गम् । यदि नारिष्ठधर्माः दर्विहोमेषु प्रवर्तेरन् ततः एतत् लिङ्गदर्शनमुपपद्येत । तस्मात् नारिष्ठविध्यन्तो दर्विहोमेषु स्यात् ।

तत्राभावस्य हेतुत्वाद् गुणार्थे स्याददर्शनम् । २१ ॥

दर्विहोमेषु नारिष्ठविध्यन्तः इति पक्षान्तरं सूत्रैः प्राप्तं परिहरति । तत्रेति बुद्धिस्थाः त्र्यम्बकाः प्रतिनिर्दिश्यन्ते । तत्र त्र्यम्बकेषु नारिष्ठधर्माणां इध्माबर्हिःप्रयाजादीनां अभावः अप्रतिष्ठितत्वस्य हेतुत्वेन उपदिश्यते, 'अप्रतिष्ठिता वै त्र्यम्बका इत्याहुः, नेध्माबर्हिः संनह्यते, न प्रयाजा इज्यन्ते, नानुयाजा इज्यन्ते, न सामिधेनीरन्वाह' इति । यदि च नारिष्ठहोमाः प्रवर्तेरन् ततः इध्माबर्हिषोः सामिधेनीनां च त्र्यम्बकेषु भाव एव स्यात् तत्रायं तदभावः असत्त्वात् हेतुत्वेन न युज्येत । त्र्यम्बकाश्च दर्विहोमाः । तस्मात् अभावस्य हेतुत्वात् गुणार्थे नारिष्ठहोमार्थे नारिष्ठधर्मप्राप्त्यर्थे यदुक्तं लिङ्गदर्शनम्, तत् अदर्शनं स्यात् । अयुक्तं दर्शनं अदर्शनम् । असिद्धं वा दर्शनं अदर्शनम् । 'यदि कीटोऽवपद्येत अन्तःपरिधि निनयेत्' इति अग्निहोत्रे परिधिः, 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति सावित्रहोमे वेदिः इति दर्विहोमे नारिष्ठधर्मप्राप्तौ लिङ्गमुक्तं तन्न युज्यते इत्यर्थः । तस्मात् नारिष्ठहोमविध्यन्तो दर्विहोमेषु नास्ति ।

विधिरिति चेत् । २२ ॥

अग्निहोत्रादौ अन्तःपरिधिनिनयनादि यत् लिङ्गदर्शनमुक्तं तन्नासिद्धम् । त्र्यम्बकेषु इध्माबर्हिःप्रयाजादीनां यः प्रतिषेधः सः नारिष्ठहोमप्रकृतिकत्वात् त्र्यम्बकेषु प्राप्तानां इध्मादीनां प्रतिषेधको विधिः स्यात् । प्रतिषेधश्च प्राप्तिं दर्शयन् नारिष्ठविकृतित्वमेव त्र्यम्बकानां साधयति । तस्मात् दर्विहोमेषु नारिष्ठधर्मप्राप्तौ यत् लिङ्गमुक्तम् 'यदि कीटोऽवपद्येत' 'अन्तःपरिधि निनयेत् 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इत्यादि, तत् युक्तमेव ।

न वाक्यशेषत्वाद्, गुणार्थे च समाधानं, नानात्वे नोपपद्यते । २३ ॥

त्र्यम्बकेषु 'नेध्माबर्हिः संनह्यते, न प्रयाजा इज्यन्ते' इत्यादिः नारिष्ठहोमविकृतित्वेन प्राप्तानामिध्माबर्हिरादीनां प्रतिषेधको विधिरिति शङ्कां तृतीयपक्षोक्तां परिहरति । न प्रतिषेधको विधिर्युज्यते, वाक्यशेषत्वात् । 'आदित्यं घृते चरुं निर्वपेत् पुनरेत्य गृहेषु' इत्यस्य विधेः 'अप्रतिष्ठिता वै त्र्यम्बका नेध्माबर्हिः संनह्यते' इत्यादिवाक्यं वाक्यशेषः अर्थवादः । त्र्यम्बकेषु उत्पन्नस्य दोषस्य परिहारार्था 'आदित्यं घृते चरुम्' इति अदितीष्टिः इति विज्ञायते । एवं अदितिचरोः गुणार्थे स्तुत्यर्थे इध्माबर्हिरादिवाक्ये सति उत्पन्नदोषस्य समाधानं निरासः उपपद्यते । नानात्वे वाक्यभेदे स्वीकृते तु नोपपद्यते प्रतिषेधवाक्यम् । तस्मात् इध्माबर्हिरादिप्रतिषेधवाक्यस्य अदितिचरुवाक्येन एकवाक्यतैव स्वीकार्या । तस्मात् नासौ विधिः । सर्वथाऽपि दर्विहोमेषु नारिष्ठविध्यन्तो नोपपद्यते ।

सुबोधिन्यां तु– न विधिः, किन्तु आदित्ययागस्तावकवाक्यशेषत्वात् अर्थवादत्वात् । गुणार्थे उक्तवाक्यस्य गुणविध्यर्थत्वे तत्पक्षदूषकं समाधानं नानात्वेन नानावाक्यत्वेन वक्तुमुपपद्यते शक्यते । यदि इध्माबर्हिषोः अभावरूपगुणविध्यर्थमेव इदं वाक्यमिति वदेत्, तर्हि इध्माबर्हिर्निषेधकवाक्यमेकम्, 'न प्रयाजाः' इत्येकम्, 'नानुयाजाः' इत्येकम्, 'आदित्यं चरुं निर्वपेत्' इत्येकं इति नानावाक्यानि स्युः । इति व्याख्यातम् ।

कुतूहले तु 'न वाक्यशेषत्वाद् गुणार्थेऽर्थसमापनं नानार्थे नोपपद्यते' इति सूत्रपाठः । व्याख्या च–– 'नेध्माबर्हिः' इत्यादि न प्रतिषेधविधिपरम्, आदित्यचरुविधेर्वाक्यशेषत्वात् । अतो गुणार्थे नारिष्ठहोमार्थे चोदकप्राप्तेध्माबर्हिरादौ प्रतिषेधविधौ इति यावत् । अर्थ-

समापनं नेध्माबर्हिरिति वाक्यार्थपर्यवसानं नोपपद्यते । तथात्वे च नानार्थे आदित्यचरुस्तुतौ प्रतिषेधविधौ च अर्थसमापनं स्यात्, तच्च नोपपद्यते अनेकार्थतादोषात् इति ।

येषां वाऽपरयोर्होमस्तेषां स्यादविरोधात् । २४ ॥

दर्विहोमेषु कस्य विध्यन्तः इति विचारे चतुर्थं पञ्चमं च पक्षमाह । वाशब्दः पक्षत्रयं व्यावर्तयति । न सोमविध्यन्तः नापूर्वत्वं न नारिष्ठहोमविध्यन्तः किन्तु येषां यागानां अपरयोः अग्न्योः गार्हपत्यदक्षिणाग्न्योः होमः, तेषां यागानां पत्नीसंयाजानां पिष्टलेपफलीकरणहोमयोर्वा विध्यन्तः स्यात् दर्विहोमेषु । अविरोधात् नारिष्ठहोमप्रवृत्तौ यो विरोधः उक्तः, स नास्ति । अपरयोर्होमाश्च जुहोतिचोदना एव । तस्मात् संपत्नीयहोमः प्रकृतिर्दर्विहोमानाम् ।

तत्रौषधानि चोद्यन्ते, तानि स्थानेन गम्येरन् । २५ ॥

दर्विहोमे संपत्नीयहोमविध्यन्तः इत्युक्तं चतुर्थं पक्षं प्रतिषेधति । न संपत्नीयविध्यन्तः संभवति । कस्मात् तत्र दर्विहोमे क्वचित् औषधानि चोद्यन्ते । त्र्यम्बकेषु तावत् पुरोडाशाः, करम्भपात्राणि तण्डुलाः इत्येवमादीनि । तानि स्थानेन गम्येरन् आज्यस्थानापत्त्या आज्यधर्माः प्राप्येरन्, ते च न शक्यास्तत्रानुष्ठातुम् । याज्यानुवाक्ये अपि मन्त्रान्तरेण निवर्त्येते, वषट्कारश्च स्वाहाकारेण । तस्मान्न संपत्नीयविध्यन्तः । 'तत्स्थानेन' इति कुतूहलपाठेऽपि आज्यस्थानापत्त्या इत्येवार्थः ।

लिङ्गाद्वा शेषहोमयोः । २६ ॥

'येषां वाऽपरयोर्होमः०' (८।४।४।२४) इत्यत्र द्वौ पक्षावुक्तौ । तत्र चतुर्थः पक्षः 'तत्रौषधानि०' इति पूर्वाव्यवहितेन सूत्रेण परिहृतः । इदानीं पञ्चमं पक्षं स्वातन्त्र्येण उपक्षिपति । शेषहोमयोः दाक्षिणाग्निकयोः पिष्टलेपफलीकरणहोमयोः प्रवृत्तिः स्यात् दर्विहोमेषु । लिङ्गात् औषधसामान्यरूपात् प्रकृतिलिङ्गात्, विरोधस्य चाभावात् । तस्मात् शेषहोमविध्यन्तो दर्विहोमेषु । वाशब्दस्य शेषहोमयोर्वा इत्यन्वयः । तेन च चतुर्थपक्षनिरासः ।

प्रतिपत्ती तु तौ भवतस्तस्मादतद्विकारत्वम् । २७ ॥

दर्विहोमेषु शेषहोमविध्यन्तः स्यात् इति पञ्चमं पक्षं प्राप्तं निरस्यति । तुशब्देन पक्षव्यावर्तनम् । तौ पिष्टलेपफलीकरणहोमौ शेषहोमौ प्रतिपत्ती भवतः प्रतिपत्तिकर्मरूपौ प्रज्ञायेते । दर्विहोमास्तु प्रधानकर्माणि । यद्यपि औषधधर्माः शक्याः कर्तुम्, तथापि प्रतिपत्तित्वात् अप्रयोजकास्ते निर्वपणादीनाम् । तस्मान्न शेषहोमविध्यन्तः । एवं च न सोमविध्यन्तः, न नारिष्ठहोमविध्यन्तः, न संपत्नीयहोमविध्यन्तः, नापि शेषहोमविध्यन्तः किन्तु दर्विहोमा अपूर्वा इति सिद्धान्तः ।

संनिपाते विरोधिनामप्रवृत्तिः प्रतीयेत, विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद्, वचनादतिदेशः स्यात् । २८ ॥

दर्विहोमेषु अपूर्वत्वपक्षः सिद्धान्तितः । तत्र सामान्यतो न्यायं प्रतिपादयन् उपसंहरति । विरोधिनां प्रवृत्तिसाधकानां लिङ्गानां संनिपाते समवाये सति नारिष्ठधर्मादीनां अप्रवृत्तिः न प्रवृत्तिः प्रतीयेत । विध्युत्पत्तिव्यवस्थानात् । विधीनामुत्पत्तिः पाठः । स च व्यवस्थितः । केचित् दर्शपूर्णमासयोः पठ्यन्ते केचित् सोमे । तादृशस्य व्यवस्थितस्य अर्थस्य अपरिणेयत्वात् । यत्र पठिताः ततोऽन्यत्र परिणेतुं न शक्यन्ते, प्रकरणबाधप्रसङ्गात् । एवं विध्युत्पत्तिव्यवस्थानात् अर्थस्य अपरिणेयत्वात् विरोधिनामप्रवृत्तिः प्रतीयेत । क्वचित् तु वचनात् अतिदेशः स्यात् दर्विहोमानाम् । यथा राष्ट्रभृतामुद्वाहकर्मसु । वचनाभावे तु अपूर्वत्वमेव दर्विहोमानाम् । इति सिद्धान्तः । के.

* 'तेष्वदर्शनात् विरोधस्य' तेषु लौकिकेषु पदार्थेषु विरोधस्य अदर्शनात् (वैदिकी पदार्थप्रसिद्धिः) 'लोकसिद्धिं व्यतिक्रम्य साऽऽत्मानं नैव विन्दति'। वा. १।३।४।९ पृ. २२२. * तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् । १।३।४।८ ॥ तेषु आचारेषु स्मृतिमूलश्रुत्यनुमानात् प्राक् विरोधस्य अदर्शनात् प्रतिष्ठितेषु बाधासंभवात् आचाराणां बलीयस्त्वमेव तावद्युक्तम् । तदनङ्गीकरणे परं समा (तुल्या) विप्रति-

पत्तिः (विकल्पः) स्मृत्याचारयोः स्यात्, न तु आचारस्य दौर्बल्यम् । सु. पृ. २१२.

⧗ तेष्वदर्शनाद् विरोधस्य समा विप्रतिपत्तिः स्यात् । १।३।४।८ ॥

'यवमयश्चरुः' 'वाराही उपानहौ' 'वैतसे कटे प्राजापत्यान् संचिनोति' इति तत्रतत्र श्रुतम् । तत्र यवशब्दं केचित् दीर्घशूकेषु सक्तुषु प्रयुञ्जते, केचित् प्रियङ्गुषु । वराहशब्दं केचित् सूकरे, केचित् कृष्णशकुनौ काके । वेतसशब्दं केचित् वञ्जुलके प्रयुञ्जते, केचित् जम्ब्वाम् । तत्र अनुष्ठाने निश्चितं किं ग्राह्यमिति विचारे पूर्वपक्षमाह । तेषु यवादिशब्दार्थेषु उभयत्र प्रयोगस्य प्रामाणिकत्वेन विरोधस्य अदर्शनात् समैव विप्रतिपत्तिः विकल्पः स्यात् । विकल्पेन उभावपि अर्थौ ग्राह्यौ ।

शास्त्रस्था वा, तन्निमित्तत्वात् । ९ ॥

पूर्वपक्षं वाशब्देन निरस्यन् सिद्धान्तमाह । शास्त्रस्था शास्त्रे वर्तमाना या विशिष्टा प्रतिपत्तिः प्रतीतिः सैव स्वीकार्या स्यात् । तन्निमित्तत्वात् वैदिकशब्दार्थज्ञानस्य निमित्तं यस्मात् वेद एव । तन्निमित्तत्वात् वेदनिमित्तकत्वात् वैदिकशब्दार्थज्ञानस्य । वेदश्च वारुणप्राघासिकयवमयकरम्भपात्रवाक्यशेषत्वेन उपलब्धः 'यत्रान्या ओषधयो म्लायन्ते, अथैते मोदमाना इवोत्तिष्ठन्ति' इति दीर्घशूकान् यवान् दर्शयति । तस्मात् यवा दीर्घशूका एव । 'तस्माद् वराहं गावोऽनुधावन्ति' इति सूकरे वराहशब्दं दर्शयति । न किल कृष्णशकुनौ गवामनुधावनं संभवति इति । 'अप्सुजो वेतसः' इति वेतसं वञ्जुलं दर्शयति । जम्बूस्तु स्थले गिरिनदीषु वा । तस्मात् न विकल्पः । अथवा ये शास्त्रस्थाः तेषां प्रतिपत्तिः प्रमाणम् । के शास्त्रस्थाः ? शिष्टाः । श्रुतिस्मृत्यर्थावधारणे शिष्टाः निमित्तम् । अत्र पक्षे शास्त्रस्थाः इति पुंलिङ्गं बहुवचनान्तं पदम् । पूर्वत्र तु स्त्रीलिङ्गमेकवचनं इति भेदः, शेषं समानम् । के.

⧗ तेष्वदर्शनाद् विरोधस्य समा विप्रतिपत्तिः स्यात् । १।३।४।८ ॥

'यवमयश्चरुः' 'वाराही उपानहौ' 'वैतसे कटे प्राजापत्यान् संचिनोति' इति यववराहवेतसशब्दानु समामनन्ति । तत्र केचित् दीर्घशूके यवशब्दं प्रयुञ्जते, केचित् प्रियङ्गुषु । वराहशब्दं केचित् सूकरे, केचित् कृष्णशकुनौ (काके) । वेतसशब्दं केचित् वञ्जुले, केचित् जम्ब्वाम् । तत्र उभयथा शब्दार्थावगामत् विकल्पः इति । अत्र संगतिलोभात् **प्रभाकरेण** भाष्यकारीयो विकल्पशब्दः अनध्यवसायपरो व्याख्यातः । एवं हि मन्यते, निरपेक्षशास्त्रद्वयविहितयोर्हि व्रीहियवयोर्विकल्पो भवति । इह तु 'यवमयश्चरुर्भवति' इत्येकमिदं वाक्यं न अनावृत्तं दीर्घशूकप्रियङ्गुरूपोभयार्थविधायकं संभवति । आवृत्तौ च वाक्यभेदापत्तिः । न चैकस्य मुख्यत्वम्, अपरस्य गौणत्वमिति निर्धारयितुं शक्यते, विनिगमनाप्रमाणाभावात् । न च वाक्यशेषो विनिगमनाप्रमाणम्, 'यवमयश्चरुर्भवति' इत्यत्र वाक्यशेषस्य अश्रवणात् । किन्तु भाष्यकारमते वारुणप्राघासिकयवमयकरम्भपात्रविधिशेषोऽयं अर्थवादः । वार्तिककारमते तु यवमतीभिरद्भिः औदुम्बर्याः प्रोक्षणे विधीयमाने 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इति । तेन यस्मिन्नेव अयं श्रूयते, तस्मिन्नेव यागे वाक्यशेषोऽयं यवशब्दस्य दीर्घशूकपरत्वे विनिगमनाप्रमाणम्, न तु अन्यत्रापि । इत्यतः अत्र अनध्यवसायात् अप्रामाण्यमिति । (प्राभाकरव्याख्यानं दूषयति–) तदयुक्तम् । वक्ष्यमाणपूर्वपक्षन्यायेन विकल्पेनैव प्रामाण्योपपत्तौ अप्रामाण्यापादकस्य अनध्यवसायस्य असंभवात् । इति यत्किञ्चिदेतत् । इति यथाभाष्यमेव तावदधिकरणं प्रस्तूयते ।

श्रुतिविरोधाविरोधयोः स्मृतीनामप्रामाण्यं प्रामाण्यं च निरूप्य इदानीं देशभेदेन आर्यम्लेच्छयोः नानाऽर्थविषयकैकशब्दप्रयोगरूपाचारविप्रतिपत्तौ कथमिति निरूप्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । यववराहवेतसशब्देषु देशभेदेन नानाऽर्थप्रसिद्धेषु उक्तन्यायेन विनिगमनाप्रमाणाभावात् विकल्प एवेति । न च यवादिपदावृत्तिरूपवाक्यभेदप्रसङ्गात् न विकल्पः संभवति इति वक्तव्यम् । अगत्या वाक्यभेदस्यापि अध्ययनविध्यनुमतत्वात् । यथा 'यस्य हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येन ता देवताः परिसंख्याय यजेत' इति प्रतिनिमित्तं आज्यविध्यावृत्ति-

रूपवाक्यभेदः अध्ययनविध्यनुमत एव । तदुक्तम् 'गौणे लाक्षणिके वाऽपि वाक्यभेदेन वा स्वयम् । वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥' इति (वा. पृ. २२३) । अतो विकल्पेनैव पूर्वपक्षो युक्त इति । एवं प्राप्ते , अभिधीयते ।

शास्त्रस्था वा, तन्निमित्तत्वात् । ९ ॥

अयमभिप्रायः । भवेत् अष्टदोषदुष्टोऽपि विकल्पः, यदि उभयाभिधानं भवेत् । इह पुनः अन्यतराभिधानेनैव अन्यतरस्य सादृश्यात् गौण्याश्रयणेन प्रतीत्युपपत्तौ नोभयाभिधानम्, शब्द– (शक्ति इति पाठः)द्वयकल्पनाप्रमाणाभावात् । अस्तिच अन्यतराभिधाने सति अन्यत्र गौणत्वनिमित्तम् । यतः सदृशास्तम्ब्राः प्रियङ्गवो दीर्घशूकाश्च । न च अन्यतराभिधाने विनिगमनाप्रमाणं नास्ति , वाक्यशेषस्यैव विनिगमनाप्रमाणत्वात् । ननु वाक्यशेषो यत्र श्रूयते , तत्रैव विनिगमनाप्रमाणं इत्युक्तम् । सत्यम् । यत्र अक्षादिपदस्येव निरूपितैव अनेकत्र शक्तिः, तत्रैव । इह वाक्ये कुत्र अस्य तात्पर्यमिति संदेहे यत्रैव वाक्यशेषः श्रूयते, तत्रैव विनिगमनाप्रमाणं भवति । इह पुनः शक्तिकल्पनाऽवसरे एकत्र शक्तिकल्पनेनैव अन्यत्र प्रतीतिप्रयोगयोः उपपत्तौ शक्तिकल्पनानिर्णायकत्वमेव वाक्यशेषस्य, इति नानुपपन्नम् । तथा ' वराहं गावोऽनुधावन्ति ' इत्यर्थवादात् वराहशब्दस्य पशुविशेषाभिधाने । एवम् ' अप्सुजो वेतसः ' इत्यर्थवादात् वेतसशब्दस्य वृक्षविशेषाभिधाने निर्णायकत्वमिति ।

प्रयोजनम्— यदि पूर्वः पक्षः, तदा विकल्पेन अनुष्ठानम् । अथ सिद्धान्तः, तदा दीर्घशूकादीनामेवेति । **सूत्रं तु**– शास्त्रस्था प्रसिद्धिर्बलीयसी अनादिशास्त्रनिमित्तत्वात् इति ।

(अथ वार्तिककारमतेन–) तदेतत् यथाभाष्यमधिकरणं वार्तिककारपादा नानुमन्यन्ते । यववराहवेतसशब्देषु सर्वदेशेषु अभिधानविप्रतिपत्त्यनुपलम्भात् । तदुक्तम् 'नैवोच्यन्ते क्वचिद्देशे यवश्रुत्या प्रियङ्गवः । जम्बूं न वेतसं प्राहुर्वराहं नैव वायसम् ॥ ' इति (वा. पृ. २१८) । (नैव वायसं इत्यत्र नापि वायसं इति मूले पाठः) । किञ्च ' संदिग्धेषु वाक्यशेषान्निर्णयः' इत्यनेनैव लभ्यमानत्वात् अनुपपन्न एवायं विचारः । तदुक्तम् ' संदिग्धेषु च सर्वेषु वाक्यशेषेण निर्णयम् । वक्ष्यत्येव न तेनापि पृथक् कार्या विचारणा ॥ ' इति (वा. पृ. २१८) । अथोच्येत, न वयमुदाहरणभेदात् अधिकरणभेदं ब्रूमः, किन्तु प्रतिपाद्यभेदादेव । तथाहि, ' अक्ताः शर्कराः ' इत्यत्र किं अञ्जनसाधनमुपादेयं इत्युपपादनगतस्य संदेहस्य ' तेजो वै घृतम् ' इत्यर्थवादबलेन निर्णयः क्रियमाणः तद्वाक्यगताक्तपदस्यैव क्रियते, न तु वाक्यान्तरगतस्य अक्तपदस्य । तेन उपादानसंदेहे समभिव्याहृतविध्युद्देशगतसंदेहनिर्णायकत्वमेव वाक्यशेषस्य , इति तदधिकरणप्रतिपाद्यम् । इह पुनः ' किमत्र यवशब्दस्याभिधेयम् ' इत्यभिधानसंदेहे वाक्यशेषात् निर्णयः क्रियमाणः यावद्वाक्यगतयवशब्दगोचरामेव अभिधानशक्तिं व्यवस्थापयति, इति प्रतिपाद्यभेदात् अधिकरणभेदो युक्त एवेति । तदयुक्तम् । न्यायतुल्यत्वात् । तत्र उपादानसंदेहनिर्णये खलु अयं न्यायः ' विधिस्तुत्योः समानविषयत्वात् स्तुत्यस्यैव विधेयत्वम् ' इति । तथा अभिधानसंदेहेऽपि दीर्घशूकस्तुतिदर्शनात् दीर्घशूकस्यैव विधेयत्वम् । तच्च अशाब्दस्य न संभवति इति अनधिगतमुख्यभूतार्थान्तरस्य शब्दस्य वाचकशक्तिमेव अवलम्ब्यावतिष्ठते । सर्वस्यैव संशयस्य एकतरपक्षानुग्राहिनिमित्तदर्शनेनैव निवर्तनीयत्वात् । न च उदाहरणभेदेन किञ्चिद्वैलक्षण्ये सति अधिकरणभेदो भवति, तथा सति ' यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्साऽर्थलक्षणाविभक्तत्वात् ' इत्यत्रापि फलयागयोः पुरुषार्थत्वप्रतिपादने अवान्तरहेतुवैलक्षण्यात् अधिकरणभेदप्रसङ्गः । स्वर्गस्य हि पुरुषार्थत्वं स्वभावादेव , यागस्य तु तत्साधनत्वेन । अथ तत्र एकन्यायविषयत्वम् , तदा इहापि उपादानसंदेहे स्तुतिसंबन्धमात्रादेव घृतादीनां विधेयत्वनिर्णयः । अभिधानसंदेहे तु त्रिकालनिरस्तमुख्यभूतार्थान्तरादर्शनानुगृहीतादेव स्तुतिसंबन्धात् अभिधेयं निश्चित्य विधेयनिर्णयः । इति यत्किञ्चिदेतत् इति । तदुक्तम् ' तथापि न्यायतुल्यत्वाद् यथा घृतपरिग्रहः । वाक्यशेषात् तथैव स्याद् यवाद्यर्थविनिर्णयः ॥' इति (वा. पृ. २१९) । न च एवं

-प्रियङ्गावपि प्रयोगदर्शनात् अर्थापत्त्या तत्रापि शक्तिः कल्पनीया इति वक्तव्यम् । यतः तत्सिद्धिन्यायेनैव (१।४।१२।२३-१) गौणत्वाश्रयणेनैव प्रियङ्गौ प्रयोगस्य अन्यथासिद्धत्वेन अर्थापत्तेः परिक्षयादिति । तौता.

* **तस्यै शृतं** इति मन्त्रे 'तस्मै शृतं' इत्यादिः ऊहः न कर्तव्यः साद्यस्क्रे त्रिवत्ससाण्डमन्त्रे । भा. ९।१।१५। ४२-४४ वर्णकं २.

⧗ तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात् । ६।१।६।२४ ॥

स्त्रीपुंसयोः कर्मणि सहाधिकारः इत्यवगतम् । तत्र यावत् यागे समन्त्रकं कर्म याजमानं नाम, तत् सर्वं पत्न्याः न भवति । न तत्राधिकारः पत्न्याः । किन्तु आशीः आशीर्वाचका मन्त्राः (वार्तिके तु आशीः-शब्देन केशश्मश्रुवपनादयः संस्कारा लक्ष्यन्ते इत्युक्तम्) 'आयुर्दा अग्नेऽस्यायुर्मे देहि' इत्यादयः, ब्रह्मचर्यं च, यच्च 'पत्नीं संनह्यति' 'पत्नीं वाचयति' इत्यादि पत्नीमधिकृत्य यावदुक्तम्, तत् सर्वं पत्न्या कर्तव्यम्, नेतरत् । पत्न्याः यजमानेन अतुल्यत्वात् । अतुल्या हि स्त्री पुंसा । यजमानः पुमान् विद्वांश्च । पत्नी स्त्री विद्यारहिता च । तस्मात् तस्याः पत्न्याः यावदुक्तं आशीः ब्रह्मचर्यं च, तत्रैवाधिकारः । इति सिद्धान्तः । के.

⧗ तासामग्निः प्रकृतितः प्रयाजवत् स्यात् । ३।६।६।१६ ॥

पवमानेष्ट्यर्थः अग्निः किमाधानपवमानेष्टिसंस्कृतः स्यात्, केवलाधानसंस्कृतो वा इति संदेहे पूर्वः पक्षः । एकादशसूत्रस्थस्य इष्टिपदार्थस्य दर्शकं तासामिति सर्वनाम । तासां पवमानेष्टीनामधिकरणं योऽग्निः, स प्रकृतितः स्यात् । दर्शपूर्णमासरूपप्रकृतौ तावत् अग्निः केवलेन आधानेन पवमानेष्टिभिश्च संस्कृत एव भवति । विकृतिश्च प्रकृतिवत् भवति इति, प्रकृतौ यादृशोऽग्निः, तादृश एव प्रकृतितः प्राप्तोऽग्निः तासामिष्टीनां स्यात् । प्रयाजवत्, यथा प्रकृतौ प्रयाजा भवन्ति इति पवमानेष्टिष्वपि प्रकृतिवद्भावात् प्रयाजाः भवन्ति, तद्वत् अग्निरपि इति । प्रयाजा इव प्रयाजवत् प्रथमान्तात् वतिरत्र ।

न वा तासां तदर्थत्वात् । १७ ॥

आधानस्थपवमानेष्टीनामग्निः पवमानेष्टिसंस्कृतः स्यात् इतिपूर्वपक्षस्य निराकरणार्थो वाशब्दः । न पवमानेष्टीनामग्निः पवमानेष्टिसंस्कृतो भवति, किन्तु केवलाधानसंस्कृत एवाग्निः तासाम् । कुतः ? तासां पवमानेष्टीनां तदर्थत्वात् अग्न्यर्थत्वात् अग्निसंस्कारार्थत्वात् । पवमानेष्ट्यर्थं पवमानेष्टिकरणे तु अनवस्था स्यात् । तस्मात् पवमानेष्टीनामग्निः केवलाधानसंस्कृत एव स्यात् इति सिद्धान्तः । के.

* **'तस्यां तु स्यात् प्रयाजवत्' इत्येतदधिकरण-न्यायेन** पवमानहविःसंस्कृताग्निसाध्यत्वं तासां (पवमानेष्टीनां) अस्ति नास्ति इति विचारः । वा. ३।६।६।१६.

⧗ तस्यां तु स्यात् प्रयाजवत् । १०।१।४।६ ॥

तस्यामारम्भणीयायां आरम्भणीया भवितुमर्हति । तुशब्दस्य असंशयमित्यर्थः । आरम्भणीयायां यथा प्रयाजा भवन्ति तद्वत् । आरम्भणीयाऽर्थं आरम्भणीया स्यात् । यथाशक्ति आवृत्तिः इति नानवस्था । इति पूर्वः पक्षः ।

न वाऽङ्गभूतत्वात् । ७ ॥

न वा इति पूर्वपक्षः प्रतिषिध्यते । न स्यात् आरम्भणीयाऽर्थं आरम्भणीया । अङ्गभूतत्वात् दर्शपूर्णमासयोरङ्गभूता हि सा । अङ्गभूतस्य च प्रधानारम्भेणैव सिद्धिः (दर्शपूर्णमासप्रयोगात् बहिर्भूतेयमारम्भणीया इति स्थितिः) । तस्मात् आरम्भणीयाऽर्थं नारम्भणीया इति सिद्धान्तः ।

एकवाक्यत्वाच्च । ८ ॥

दर्शपूर्णमासयोरङ्गत्वेन विहितारम्भाङ्गत्वेन विधायकमेकमेव वाक्यम् 'आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारप्स्यमानः' इति । न द्वितीयमस्ति । तस्मात् आरम्भणीयाऽर्थं आरम्भणीया न कर्तव्या इति सिद्धान्तः । के.

⧗ तदन्तमपकर्षे स्यात् इत्यनेन न्यायेन प्रयाजापकर्षे आघारादीनां यथा अपकर्षः, (अनेन न्यायाक्षरार्थः उक्तः । तदन्तं प्रयाजान्तम् ।) तथा अभिषेकापकर्षे विदेवनादीनामपकर्षः इति पूर्वः पक्षः । रत्न. ५।२।१०।२१.

* **तदन्तानां** प्रयाजान्तानां सामिधेन्याघारसहितानामपकर्षः अग्नीषोमीये पशौ । (एवं अनुयाजानां स्वोत्तरसूक्तवाकादिसहितानामुत्कर्षः सवनीये पशौ) । **भा.** ५।१।१२।२३–२४.

⧗ **तदन्तापकर्षन्यायः** । तदादितदन्तन्याय एवायम् । ५।१।१२।२३–२४.

* अध्वरकल्पायाम् ‘ पुरा वाचः प्रवदितोर्निर्वपेत् ’ अत्र सर्वनिर्वापापकर्षे **तदन्तापकर्षन्यायेन** निर्वापान्तपदार्थानां सर्वप्रयोगीयाणां तन्त्रेण करणम्, इति प्राप्ते ... । **भाट्ट.** ११।२।३. * ‘ दीक्षासु यूपं छिनत्ति ’ इत्यपकृष्यमाणं अग्नीषोमीयादीन् अपकर्षति **तदन्तापकर्षन्यायात्** इति प्राप्ते । **बिन्दु.** ५।१।१४. * राजसूये अभिषेचनीयदशपेयौ । तत्र अभिषेचनीयसोमक्रयकाले दशपेयसोमक्रयः प्रतिकृष्यते । स च प्रतिकृष्यमाणः तदन्तापकर्षन्यायात् ततः प्राचोऽपि पदार्थानपकर्षति इति आरम्भस्तावत् उभयोः समानतन्त्रः, इत्यादि प्राप्ते । **भाट्ट.** ११।२।१३. * **तदन्तत्वतदादित्वनियामकः** पूर्वोत्तरपदार्थयोः क्रम एव । तेन ज्योतिष्टोमे अग्नीषोमीयपशौ प्रयाजान्तानामपकर्षः, सवनीये च अनुयाजान्तानामुत्कर्षः । **सोम.** ५।१।१२.

⧗ **तदभावो नाडीषु तच्छ्रुतेरात्मनि च । (३।२।२।७ ब्र.) इति न्यायेन** समर्थ्यमाना प्रत्यगात्मनो विशुद्धिः । (तदभावः तयोः जाग्रत्स्वप्नयोरभावः नाडीषु चकारात् पुरीतति आत्मनि च जीवे संपन्ने भवति । कुतः ? तच्छ्रुतेः ‘ आसु तदा नाडीषु सुप्तो भवति ’ ‘पुरीतति शेते ’ ‘ य एषोऽन्तर्हृदय आकाशः, तस्मिन् शेते ’ इति श्रुतिभ्यः इति अक्षरार्थः ।) सं. शारीरके रामतीर्थः अध्यायः ३ श्लो. १२०.

⧗ **तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायः ।** यथा सर्वेषां ब्रह्मादिदेवानामीश्वरांशत्वात् तदभिन्नत्वे अन्योन्यमप्यभेद इति भावः । **साहस्री.** ७१.

⧗ **तदभ्यासः समासु स्यात् । ९।२।४।२१ ॥**

अग्निष्टोमे एकं साम तृचे प्रत्यृचं परिसमाप्तं गेयं इत्यवगतम् । अथ समानच्छन्दस्के एव तृचे गेयम्, अनियमो वेति विचारे सिद्धान्तमाह । तदभ्यासः प्रत्यृचं तस्य साम्नः अभ्यासः समासु समानच्छन्दस्कासु तिसृषु ऋक्षु कर्तव्यः स्यात्, न समासु विषमासु वा अनियमेन । तृचे इति हि त्रित्वसंख्याव्यवहारः । संख्याव्यवहारश्च समाने कस्मिंश्चिदाश्रीयमाणे भवति । तस्मात् समानच्छन्दस्के तृचे अभ्यासः ।

लिङ्गदर्शनाच्च । २२ ॥

अग्निष्टोमे प्रत्यृचं परिसमाप्य गेयं साम समानच्छन्दस्कास्वेव तिसृषु ऋक्षु गेयं इत्यत्र लिङ्गस्य दर्शनं भवति ‘ स्थाल्यां सक्थि अवधीयते इत्याहुः, यद् बृहत् गायत्रीषु क्रियते ’ इति । ‘ त्वामिद्धि हवामहे ’ इति एकत्रिंशदक्षरायामृचि उत्पन्नं बृहत् साम गायत्रीषु चतुर्विंशत्यक्षरासु गातव्यं इति यत्, तत् स्थाल्यां अल्पपरिमाणायां सक्थि ऊरुः अधिकपरिमाणः पाकाद्यर्थं अवहितः स्यात् तद्वत् भवेत् । नहि अल्पे महान् अवस्थातुं शक्नोति इति हि तत्रोक्तम् । तस्मात् विषमच्छन्दस्कासु साम न गेयमिति सिद्धं भवति । **के.**

⧗ **तदभ्यासः समासु स्यात् । ९।२।४।२१ ॥**

अथ अत्रैव ‘ तदभ्यासः ’ इत्यादिभिश्चतुर्भिः सूत्रैर्वर्णकान्तरम् । भाष्यीयं वर्णकान्तरं तु ‘ त्रैशोकाधिकरणम् ’ इत्यत्र द्रष्टव्यम् । द्वादशाहे चतुर्थेऽहनि त्रैशोकं नाम साम ‘ विश्वाः पृतना अभिभूतरं नरम् ’ इत्येतस्यां अतिजगत्यामुत्पन्नम् । उत्तरे द्वे ऋचौ तु ‘ नेमिं नमन्ति चक्षसा ’ इति ‘ सर्मी रेभासो अस्वरन् ’ इति च बृहत्यौ । अयं तृचो विषमच्छन्दस्को भवति । तत्र विचार्यते किमन्ये द्वे अतिजगत्यौ कुतश्चिदुपादाय समास्वेव त्रैशोकं गातव्यम्, किंवा विषमास्वेवेति । तत्र पूर्वपक्षमाह । तदभ्यासः तस्य त्रैशोकसाम्नः अभ्यासः समासु स्यात् । विश्वाः पृतना इत्येका स्वीया अतिजगती, अन्ये च द्वे अतिजगत्यावेव दाशतयीभ्य आगमय्य तासु तिसृषु समासु त्रैशोकं गातव्यमिति ।

लिङ्गदर्शनाच्च । २२ ॥

‘ अतिजगतीषु स्तुवन्ति ’ इति बहुवचनरूपस्य लिङ्गस्य दर्शनात् समास्वेव । इति पूर्वः पक्षः ।

नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत । २३ ॥

तुशब्देन पूर्वपक्षं निरस्य सिद्धान्तमाह । उत्तराग्रन्थे पाठनिमित्तात् आनन्तर्यात् बृहत्योरेव उत्तरात्वं स्यात्, तच्च श्रौतपाठनिमित्तेन नैमित्तिकम् । तदेव प्रतीयेत । नात्र द्वे अतिजगत्यौ कुतश्चित् आगमयितव्ये, पाठश्रुतेर्बलीयस्त्वात् । तस्मात् त्रैशोकस्य विषमास्वेव गानम् ।

ऐकार्थ्याच्च तदभ्यासः । २४ ॥

ननु यदि त्रैशोकं विषमच्छन्दके तृचे गीयेत, तदा तृचे इति संख्यावाचकः शब्दः अनुपपन्नः स्यात् इति चेन्न । ऐकार्थ्यात् एकदेवताकत्वरूपात् एकार्थकत्वात् छन्दोभेदेऽपि तृचशब्दस्योपपत्तिः । ननु तथापि 'अतिजगतीषु स्तुवन्ति' इति अतिजगतीशब्दस्य बहुवचनं नोपपद्यते इति चेत्, तत्राह तदभ्यासः इति । 'एकविंशः षोडशी' इति षोडशिनि सर्वाण्येव स्तोत्राणि एकविंशानि भवन्ति, तत्र त्रैशोकेऽपि सामनि सप्तकृत्वः अभ्यस्यमाने योनिभूता एकाऽपि सती अतीजगती सप्तसंख्यामापद्यते । एवं सति अतिजगतीषु इति बहुवचनमुपपद्यते एव । तस्मात् अतिजगत्योः अन्यतो नागमः । किन्तु त्रैशोकं विषमास्वेव गेयमिति सिद्धान्तः । के.

⧗ तदर्थशास्त्रात् । १।२।४।३१ ॥

अथेदानीं किं विवक्षितवचना मन्त्राः, उत अविवक्षितवचना इति किमर्थप्रकाशनेन यागे उपकुर्वन्ति, उत उच्चारणमात्रेणेति । अत्र प्रभाकरेण संगतिलोभात् इत्थमुपवर्णितमधिकरणम्—' उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयदि ' इत्यत्र ' उरु प्रथा उरु प्रथस्व ' इति मन्त्रस्य यदि अर्थो विवक्षितः, तदा तत्सामर्थ्यादेव लिङ्गात् पुरोडाशप्रथने तस्य विनियोगसिद्धेः ' पुरोडाशं प्रथयति ' इति तदर्थशास्त्रमविवक्षितार्थे स्यात् । अथ तदर्थशास्त्रं विवक्षितार्थम्, तदा मन्त्रस्य अविवक्षितार्थता, इति परस्परव्याघातात् अप्रामाण्यं चोदनायाः । इति पूर्वः पक्षः । सिद्धान्तस्तु, किञ्चित्करस्य किञ्चित्कार्ये किञ्चित्-क्रियाद्वारेण विनियोगो भवति । यथा अवघातस्य किञ्चित्करस्य किञ्चित्कार्ये व्रीहौ द्वितीयाऽभिधेयफलभागितारूपक्रियाद्वारेण । तेन यत्र एतत् त्रितयं श्रुतितोऽवगम्यते, तत्र श्रुतित एव विनियोगावगमो भवति । इह पुनः ' इति पुरोडाशं प्रथयति ' इति श्रुतौ इतिकरणेन किञ्चित्करो मन्त्रः प्रतीयते । पुरोडाशं प्रथयेत् इति पुरोडाशप्रथनं किञ्चित्कार्यं प्रकाशनं च किञ्चित्-क्रियाविशेषः श्रुतेः । प्रतीयते तु मन्त्रस्य अभिधानसामर्थ्यरूपात् लिङ्गात् अभिधायकस्य मन्त्रस्य किञ्चित्करता । अभिधेयस्य च प्रथनस्य किञ्चित्कार्यता, अभिधानस्य च प्रकाशनरूपस्य किञ्चित्क्रियात्वमिति । तेन मन्त्रलिङ्गादेव त्रितयोपस्थितेः मन्त्रलिङ्गमेव पुरोडाशप्रथने मन्त्रविनियोजकम् । तथा च सति 'पुरोडाशं प्रथयति' इति श्रुतिः अनुवादिकैव । यत्र तु श्रुत्यैव त्रितयोपस्थितिः यथा ' ऐन्द्र्या गार्हपत्यमुपतिष्ठते ' इति ऐन्द्रीमन्त्रस्य किञ्चित्कार्यता, उपपूर्वस्य तिष्ठतेः प्रकाशनार्थत्वात् प्रकाशनस्य किञ्चित्क्रियात्वमिति, तत्र श्रुतिरेव विनियोजिका । न च इह मन्त्रलिङ्गस्य विनियोजकत्वात् श्रुतेर्वैयर्थ्यम्, अन्वितकार्यप्रतिपादनेनैव प्रयोजनवत्त्वात् । नहि सर्वत्रैव अन्वितकार्यप्रतिपादनात् अन्यत् प्रयोजनमस्ति । अनुवादेऽपि तत् अव्याहतमेव इति न परस्परव्याघातात् अप्रामाण्यं चोदनाया इति ।

तदेतदसंगतम् । परस्परव्याघातहेतोः अभावेन पूर्वपक्षाभावात् । तुल्यबलयोर्हि व्याघातो भवति । मन्त्रस्य तु सामर्थ्यानुसारेण कल्पनीयः श्रुत्या विनियोगः । तदर्थशास्त्रं तु श्रुतिरूपतया स्वत एव विनियोजकम् । तदेवं प्रत्यक्षश्रुतिवशात् मन्त्रस्य अविवक्षितार्थत्वमेव । पूर्वपक्षोक्तः परस्परव्याघातस्तु कुतः ? न च वाच्यम् ' यद्यपि अध्यापनविधिप्रयुक्तमध्ययनम्, तथापि नान्तरीयकतया गम्यमानस्यार्थस्यापि अन्तरङ्गतया अध्येत्रधिकारपर्यवसानार्थमपेक्षितस्य अध्ययनविधिना विवक्षितत्वात् कृत्स्नस्यैव मन्त्रस्य विवक्षितार्थत्वेन भवति व्याघातः ' इति, निर्वापमन्त्रे ' देवस्य त्वा सवितुः प्रसवे ' इत्यादीनामविवक्षितार्थानामपि दर्शनात् । न च तेषामर्थवादत्वम्, विध्येकवाक्यताया अभावात् । यथा च तेषामुच्चारणं हुमादिपदानां चोच्चारणं प्रयोगसमवेतार्था-

भावेन अदृष्टार्थम्, तथा तदर्थशास्त्रेण ताद्रूप्यपरिच्छेदात् अत्रापि अदृष्टार्थमेव मन्त्रोच्चारणमिति युक्तम् । भवतु वा मन्त्रस्य विवक्षितार्थत्वे तत्कारित एव मन्त्रविनियोगः, तथापि तदर्थशास्त्रस्य न अविवक्षितार्थत्वम् । यतः अर्थवादाधिकरणे एव एतन्निरूपितं यत् ‘ विधिप्राप्तप्राशस्त्यानुवादकस्यापि अर्थवादस्य अध्ययनविधिवशात् अनुवादकत्वेनैव विवक्षितार्थत्वम् ’ (इति) । अतः तुल्यन्यायतया तेनैव गतत्वात् तुल्यार्थयोः मन्त्रतदर्थशास्त्रयोः अन्यतरस्य अनुवादकत्वेन विवक्षितार्थत्वे सति यदेतत् व्याघाताभिधानम्, तत् पूर्वापरानवहितस्यैव इति यत्किञ्चित् एतत् । इति यथावार्तिकमेव इदमधिकरणं वर्णनीयम् ।

अर्थवादानां विधेयस्तुत्युपयोगद्वारेण प्रामाण्ये निरूपिते सति इदानीं मन्त्राणां विहितार्थप्रकाशनोपयोगद्वारेण प्रामाण्ये प्रतिपादयितव्ये किं विवक्षितार्था मन्त्राः, उत अविवक्षितार्था इति निरूप्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । न तावत् विहितार्थप्रकाशनेन मन्त्राणां क्रतूपयोगः संभवति, ध्यानादिभिरपि तदुपपत्तौ मन्त्रवैयर्थ्यात्, विपरीतत्वाच्च । अर्थे हि प्रथममवगते तद्वाचकशब्दस्मरणं भवति । स चेदर्थः प्रथममवगत एव, किं मन्त्रेण । न च ‘ मन्त्रस्मारितानुष्ठितेनैव क्रतूपकारः सिध्यति ’ इति नियमः संभवति, यतो विवक्षितार्थत्वे सति मन्त्राणां अवघातादिवत् नियमादृष्टकल्पनोपपत्तिः । न च एवमर्थो विवक्षितः, तदर्थशास्त्रविरोधात् । यदि हि ‘उरु प्रथा उरु प्रथस्व’ इति मन्त्रो विवक्षितार्थः स्यात्, तदा तदभिधानसामर्थ्यादेव पुरोडाशप्रथने विनियोगसिद्धेः ‘ अनेन मन्त्रेण पुरोडाशं प्रथयति ’ इति विनियोगश्रुतिः अनर्थिका भवेत् । तेन एतदवगम्यते ‘ नैव मन्त्रा विवक्षितार्थाः ’ इति । तदुक्तं भाष्ये (१।२।४।३१ पृ. १४५) ‘साक्षश्चेत् अन्येन नीयते, नूनमक्षिभ्यां न पश्यति ’ इति । किञ्च क्वचित् मन्त्रलिङ्गविपरीतेऽर्थे श्रुत्या विनियोगो दृश्यते यथा ऐन्द्रीमन्त्रस्य गार्हपत्ये । तदपि मन्त्रस्य विवक्षितार्थत्वे न घटेत । एवं निर्वापमन्त्रे देवस्यत्वाऽऽदिपदानां प्रयोगासमवेतार्थानां अवश्यमविवक्षितार्थत्वं वक्तव्यम् । तथा हुमादिपदानां च अर्थाभावात् अविवक्षितार्थत्वं सिद्धमेव । तेन यत्रापि अर्थोऽवगम्यते, तत्रापि अनुष्ठेयस्मृतेः अन्यतः सिद्धत्वेन उक्तत्वात् अविवक्षितार्थत्वं सिद्धमेव मन्त्राणामिति । अतः प्रकरणपठितानामनारभ्याधीतानां च मन्त्राणां यथासंभवं श्रुतिवाक्यप्रकरणादिभिर्विनियुक्तानां प्रधानविधिना स्वरूपमेव अङ्गीकृतम् । तच्च स्वरूपं अक्रियारूपत्वात् यद्यपि न इतिकर्तव्यतात्वमधिकुरुते, तथापि स्वरूपाङ्गत्वार्थं अवश्याभ्युपेतव्योच्चारणक्रियाद्वारेण कारकत्वेनैव स्वीक्रियते । उच्चारणं दृष्टासंभवात् अदृष्टार्थमेव प्रयाजादिवदिति । ननु अपेक्षितार्थावबोधार्थः अध्ययनविधिः कृत्स्नस्वाध्यायस्यैव विवक्षितार्थत्वमापादयन् मन्त्रस्य अविवक्षितार्थत्वे विरुध्येत । मैवम् । हुमादिवत् स्वाध्यायाविनाशसिद्ध्यर्थमेव अध्ययनोपपत्तेः । अथवा मन्त्राभागेऽपि अपेक्षितार्थावबोधार्थ एव अध्ययनविधिः । मुख्यार्थत्वं हि शब्दानामौत्सर्गिकम् । तदनुपपत्तौ लाक्षणिकस्यापि शाब्दत्वं भवति । तत् अत्रापि तदर्थशास्त्रादिभिः मुख्यार्थत्वानुपपत्तेः प्रतिपादकत्वेन मुख्यार्थसंबद्धं स्वरूपमेव मन्त्रा लक्षयन्ति । तच्च स्वरूपं दृष्टासंभवात् उच्चारणद्वारेण अदृष्टेन उपकारेण क्रतौ उपयुज्यते इति भवति अत्रापि अध्ययनविधेः अपेक्षितार्थावबोधपरत्वम् । ननु भिन्नयोर्हि लक्ष्यलक्षणभावो भवति यथा प्राशस्त्यार्थवादयोः । इह तु तदेव मन्त्रस्वरूपं लक्ष्यं लक्षकमिति स्वात्मनि वृत्तिविरोधात् न संभवति । मैवम् । मन्त्राणामपि उभयरूपस्वीकारात् । यथा हि अस्य प्रमाणत्वं रूपम्, तथा प्रमेयत्वमपि अस्य अस्त्येव । तेन प्रमाणत्वेन रूपेण लक्षकत्वम्, प्रमेयत्वेन च लक्ष्यत्वं इति किमनुपपन्नम् । एतेन ‘शाब्दाशाब्दयोः अनन्वयात् कथमशाब्दस्य मन्त्रस्य शाब्दक्रतुभावनाऽन्वयः’ इत्येतदपि प्रत्युक्तम् । एकस्यैव मन्त्रस्य प्रतिपाद्यप्रतिपादकरूपेण लक्षणया शाब्दत्वस्य उक्तत्वात् इत्येतत् तदर्थशास्त्रादिभिः अविवक्षितार्थत्वेन मन्त्राणामदृष्टार्थत्वमेव । इत्येवं प्राप्ते, अभिधीयते ।

अविशिष्टस्तु वाक्यार्थः । ३२ ॥

अयमभिप्रायः । भवेदेवं यदि मन्त्राणामविवक्षितार्थत्वं भवेत् । तथाहि, अध्ययनविधिना हि पृथगधीतानां

मन्त्राणां क्रतुमध्यगतं चाध्ययनं विधीयते ; न तत्र स्वरूपज्ञानार्थत्वम्, मन्त्रसमाम्नायगतेनैव पाठेन तस्य सिद्धत्वात् । तेन क्रतूपयोगज्ञापनार्थमेव तत् इति निश्चीयते । क्रतूपयोगश्च तेषां प्रयाजादिवाक्यवत् नार्थसमर्पणेन, निवृत्तव्यापाराणां तदर्थस्य विधिवाक्यादेवावगतेः । अतः स्वरूपेणैव तेषां क्रतूपयोगो वक्तव्यः । तच्च स्वरूपं स्वयमक्रियात्वात् यद्यपि नेतिकर्तव्यतारूपेण प्रकरणेन गृह्यते, तथापि कारकत्वेन रूपेण ग्रहीतुं शक्यते एव । किं कुर्वतस्तस्य कारकत्वमित्यपेक्षायाम्, 'यत् शक्नुयात्' इति दृष्टशक्त्यनुसंधाने वाक्यार्थप्रतीतिः तत्कार्यमुपलक्ष्यते । अनुष्ठेयविहितपदार्थस्मरणं च प्रयोगविधिरपेक्षते । मन्त्रवाक्यार्थश्च प्रतीतः सन् एकदेशद्वारेणापि शक्नोति तत् स्मारयितुम्, इति विहितपदार्थस्मरणफलवाक्यार्थज्ञानमेव कुर्वतां भवति प्रकरणेन कारकतया ग्रहणम् । तेन उच्चारणमेव एषां स्वरूपाभिव्यक्तये प्रयोगकाले अवश्यकरणीयम्, न तु प्रयाजादिवाक्यानामपि प्रकरणग्रहणम्, तेषां स्वरूपस्याग्रहणादिति विशेषः । यदि तु स्मृतिफलमपेक्षितं दृष्टमर्थज्ञानं नोपलभ्येत, तदा केवलादृष्टफलोच्चारणक्रिययैव अस्य कारकत्वं भवेदपि, सति तु परंपरयाऽपि दृष्टलाभे नादृष्टकल्पना उपपत्तिमती इति विवक्षितार्था एव मन्त्रा इति । न च ध्यानादिभिरपि स्मरणोपपत्तौ मन्त्रवैयर्थ्यम्, नियमादृष्टेनैव अर्थवत्त्वात् । यथा हि प्रकारान्तरेणापि वैतुष्यसिद्धौ नियमार्थः अवघातादिविधिः अर्थवान् भवति, तथा अयमपि इति नानुपपन्नम् । अतः विवक्षितार्थत्वान्मन्त्राणां न स्वाध्यायाविनाशार्थं मन्त्राध्ययनम् । नापि मुख्यार्थानुपपत्त्या लक्षणया स्वरूपपरत्वम् । किं तर्हि ? मन्त्राध्ययनं अपेक्षितवाक्यार्थावबोधार्थमेव । ननु कथं तर्हि सिद्धान्तेऽपि अशाब्दस्य मन्त्रस्य क्रतुभावनया समन्वयः ? तत्र केचित् शाब्दत्वसिद्ध्यर्थं सिद्धान्तेऽपि लक्षणया स्वरूपपरत्वं वदन्ति, तदयुक्तम् । मुख्यार्थपरित्यागेन तत्संबद्धोपपादकार्थान्तरकल्पना हि लक्षणा इति लक्षणातत्त्वम् । न चात्र पूर्वपक्षवादिमते इव सिद्धान्तेऽपि मुख्यार्थपरित्यागोऽस्ति, विवक्षितार्थत्वान्मन्त्राणाम् । किन्तु प्रयोगभावना अनुष्ठेयस्मृतिमन्तरेण अनुपपद्यमाना प्रकरणाम्नातमन्त्रार्थवत्त्वाय स्मृतिसमर्थं मन्त्रमेव स्मृतिहेतुतया अङ्गीकुरुते । तच्च मन्त्रस्य अशाब्दत्वे न संभवति इति तदर्थं श्रुतार्थापत्त्या तत्परशब्दकल्पनमेव उचितम् । विश्वजिदादौ इव उपपादकत्वेन तर्कितस्य स्वर्गस्य तत्परशब्दकल्पनेन, इति नानुपपन्नम् । न च तदर्थशास्त्रादिभिः अविवक्षितार्थत्वम्, तदर्थशास्त्रस्यैव अभावात् ; तत्र 'बर्हिर्देवसदनं दामि' इत्यादौ तावत् तत्संभावनैव न समस्ति । यत्रापि तत्संभावना समस्ति अभ्यादानमन्त्रेषु, तत्रापि न श्रुतेर्मन्त्रविनियोजकत्वम् । किं तर्हि ? सामर्थ्यतो मन्त्राः तदादाने प्राप्ताः 'तां चतुर्भिरादत्ते' इति श्रुत्या चतुःसंख्याऽपि आदाने विहिता । तयोश्च एकादानक्रियाऽन्वये सति अरुणैकहायनीन्यायेन परस्परनियमे सति 'समुच्चितैरेव चतुर्भिर्मन्त्रैः आदानं कर्तव्यम्' इति वाक्यार्थः संपद्यते । तेन चतुःसंख्याश्रवणं तत्र गुणार्थमेव । तदुक्तं सूत्रकारेण 'गुणार्थेन पुनःश्रुतिः' इति । एवम् 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यादौ च मन्त्रस्य सामर्थ्यतः गर्दभरशनायामपि प्राप्तिर्भवत्येव । तथापि लिङ्गविनियोगस्य श्रुत्यनुमानेन विप्रकृष्टत्वात् 'इत्यश्वाभिधानीमादत्ते' इति प्रत्यक्षश्रुतिवशादेव मन्त्रस्य अश्वरशनायां विनियोगात् मन्त्रप्रकरणिनोः नैराकाङ्क्ष्ये ज्ञाते न लिङ्गद्वारेण सामान्यश्रुतिकल्पनम् । अतः प्रत्यक्षश्रुतिरेव मन्त्रविनियोजिकेति । किन्तु विनाऽपि विधिना प्राप्स्यतः किं विधिना इति प्रयोजनगवेषणायां लिङ्गस्य रशनामात्रविषयत्वात् गर्दभरशनायामपि मन्त्रप्रसक्तौ तन्निवृत्तिरेव प्रयोजनम् । तदुक्तं ग्रहाधिकरणे 'रूपप्रकरणद्वारा श्रुतिर्यावत् प्रकल्प्यते (यावत्तु कल्प्यते इति मूले) । तावत् प्रत्यक्षया श्रुत्या विधिः शीघ्रं समाप्यते ॥ अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः । परिसंख्या फलेनोक्ता न विशेषपुनःश्रुतेः ॥ प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे । न गर्दभाभिधानीतः फलमन्यन्निवर्तनात् ॥' इति (वा. ३।१।७।१४ पृ. ७११) । तदुक्तं सूत्रकृता 'परिसंख्या' (इति) । 'उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति, यज्ञपतिमेव तत् प्रजया पशुभिः

प्रथयति' इत्यत्र तु पुरोडाशप्रथनमेव अप्राप्तं विधीयते। न च पुरोडाशान्यथाऽनुपपत्त्या प्राप्तत्वात् प्रथनमविधेयम्, अप्रथितेनापि त्वराविशेषवशात् पिष्टकनिष्पत्तिदर्शनात्। प्रथनविधौ तु तस्य अवश्यकर्तव्यत्वात् मन्त्रस्यापि लिङ्गतः तत्प्रकाशकत्वं भवति। उदाहरणान्तराणि भाष्यवार्तिकयोरेव सुगमानीति नेह प्रदर्श्यन्ते। यत्र पुनः श्रौतविनियोगवशादेव मन्त्रस्य तत्प्रकाशनसामर्थ्यं वृत्त्यन्तरेणापि कल्पनीयम्, तत्रैव श्रुतेर्विनियोजकत्वम्। यथा 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इति, 'धान्यमसि धिनुहि देवान् इति दृषदि तण्डुलानावपति' इत्यादौ। निर्वापमन्त्रादौ तु देवस्यत्वादिपदानां असमवेतार्थत्वेऽपि एकवाक्यभावबलेन एवंभूतार्थप्रकाशनेनैव स्मारितानां विधेयार्थानामनुष्ठानमभ्युदयाय इति नियमादृष्टमेव अत्रापि दृष्टानुरोधात् कल्पनीयम्। यथा प्रोक्षिताभ्यामेव उलूखलमुसलाभ्यामवहतैरेव वितुषैर्व्रीहिभिः निष्पादितः पुरोडाशः अपूर्वसाधनं इति प्रोक्षणमपि नियमादृष्टांशपतितम्, तथेहापि। तेन हुमादीनामेव परं अर्थाभावेन अविवक्षितार्थत्वात् अदृष्टार्थमेव विनियोगः स्वाध्यायरक्षणार्थं चाध्ययनविधिना पाठः न तु अन्यत्रापीति।

ननु भवतु विवक्षितार्थत्वम्, प्रामाण्यं तु कथम्, विध्युद्देशावगतार्थानुवादेन अनधिगतार्थगन्तृत्वाभावात्। **मैवम्**। नहि प्रतिवेदवाक्यं अनधिगतार्थगन्तृत्वलक्षणं प्रामाण्यं व्युत्पादनीयम्। 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इत्यादौ अनुवादरूपत्वेन तदभावात्। किं तर्हि ? धर्मप्रमित्युपयोगित्वम् (व्युत्पादनीयम्)। तच्च परंपरया विद्वद्वाक्यस्येव मन्त्रस्यास्ति इति किमनुपपन्नम्।

प्रयोजनम् — यदि अविवक्षितार्था मन्त्राः, तदा ध्यानादिभिरेव संस्मृतानामनुष्ठानम्। अथ विवक्षितार्थाः, तदा मन्त्रस्मारितानामेवेति। **सूत्रं तु** — नहि लौकिकवाक्यानां मन्त्रवाक्यानां च कश्चित् विशेषोऽस्ति, येन प्रतीयमानोऽप्यर्थो न विवक्ष्यते इति। 'यो नाम कश्चिदिह संकलितं प्रमेयं ग्रन्थान्तरे लिखति वा वदति स्वयं वा। मत्कर्तृतामननुकीर्त्य, स कीर्तिलोपात् निःसंततिर्जगति जन्मशतानि भूयात्॥' इति बालवलभीभुजङ्गापरनाम्नो भवदेवस्य कृतौ तौतातितमततिलके प्रथमस्याध्यायस्य द्वितीयः पादः। तौता.

⌛ तदर्थशास्त्रात्। १।२।४।३१–१, वि. ३१ ॥

मन्त्राः अविवक्षितवचनाः उच्चारणमात्रेण उपकुर्वन्ति इति पूर्वपक्षे प्रथमं हेतुमाह। तदर्थशास्त्रात् मन्त्रानर्थक्यम्। तस्य मन्त्रस्य योऽर्थः स तदर्थः। तदर्थे शास्त्रं तदर्थशास्त्रं तस्मात्। अग्निचयने अभ्र्यादानार्था मन्त्राश्चत्वारः पठिताः। ते च लिङ्गादेव आदाने प्राप्ताः वचनेन विधीयन्ते 'तां चतुर्भिरभ्रिमादत्ते' इति। वचनेन विशेषतो विधानात् मन्त्रा अविवक्षितार्था इति ज्ञाप्यते। एवम् 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रस्य 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति शास्त्रं विधायकम्। मन्त्रादेव प्राप्ते किं पुनर्विधानेन ?। एवम् 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्' इति मन्त्रस्य विनियोजकं शास्त्रम् 'उरु प्रथस्वेति पुरोडाशं प्रथयति, यज्ञपतिमेव तत् प्रथयति' इति। तदिदं मन्त्राणां विवक्षितार्थत्वे लिङ्गादेव विनियोगसिद्धेः अनर्थकम्। तस्मात् अविवक्षितार्था मन्त्रा इति पूर्वः पक्षः।

अत्र **सुधायाम्** 'तदर्थशास्त्रवाक्यनियमबुद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनार्थविप्रतिषेधस्वाध्यायवदवचनाविज्ञेयानित्यसंयोगान्मन्त्रानर्थक्यम्' इति सूत्रं निवेशितम्। 'ग्रन्थान्तरेष्वदर्श्यैकं सूत्रं तत्सिद्धिसूत्रवत् (१।४।२३)। व्याख्यायै खण्डशोऽकारि भाष्यकारादिभिस्त्विदम्॥' इति चोक्तम्। तेन आनन्दाश्रमीयभाष्यपुस्तकमुद्रणमनुसृत्य खण्डशो गृहीत्वा व्याख्यातमस्माभिः। सूत्रस्वरूपविषये अधिकं तु अस्मदीये मीमांसादर्शने प्रकृतप्रथमसूत्रप्रथमखण्डटिप्पण्यां द्रष्टव्यम्।

वाक्यनियमात्। ३१–२, वि. ३२ ॥

पूर्वपक्षे द्वितीयं हेतुमाह। पदसमूहात्मकमन्त्रवाक्यस्य पदक्रमनियमादपि लिङ्गात् नार्थप्रकाशनार्थत्वं मन्त्राणाम्। व्युत्क्रमेण पाठेऽपि अर्थप्रकाशनसंभवात्। अदृष्टार्थत्वे तु यथाक्रममेव प्रयुक्ता अदृष्टमादधते नान्यथा, इति क्रमनियमः अर्थवान्। वाक्यनियमान्मन्त्रानर्थक्यं इत्यन्वयः।

बुद्धशास्त्रात् । ३१-३, वि. ३३ ॥

तृतीयं हेतुमाह । बुद्धशास्त्रात् मन्त्रानर्थक्यम् । बुद्धस्य शास्त्रान्तरेण ज्ञातस्यैवार्थस्य विषये शास्त्रात् शासनात् संप्रैषविधानात् ‘ अग्नीदग्नीन् विहर ’ इति । बुद्धबोधनं च व्यर्थम् । तस्मादविवक्षितार्था मन्त्राः ।

अविद्यमानवचनात् । ३१-४, वि. ३४ ॥

चतुर्थं हेतुमाह । अविद्यमानवचनान्मन्त्रानर्थक्यं अविद्यमानस्य वचनात् प्रतिपादनात् यज्ञे साधनभूतः पदार्थः मन्त्रेण प्रकाशयितव्यः । न च क्वचित् तादृशोऽस्ति पदार्थः, यादृशं मन्त्रोऽभिदधाति ‘ चत्वारि शृङ्गा त्रयो अस्य पादा ’ इत्यादिः । नहि चतुःशृङ्गं त्रिपादं द्विशिरस्कं सप्तहस्तं किञ्चित् यज्ञसाधनमस्ति । तदत्र अभिधानार्थः किमभिदध्यात् । उच्चारणार्थत्वे तु अवकल्पते ।

अचेतनार्थबन्धनात् । ३१-५, वि. ३५ ॥

पञ्चमं हेतुमाह । अचेतनार्थबन्धनान्मन्त्रानर्थक्यम् । अचेतने अर्थस्य बन्धनात् संबन्धकरणात् प्रतिपादनात् ‘ओषधे त्रायस्वैनं’ इति ‘ शृणोत ग्रावाणः ’ इति च । ग्रावाणोऽचेतनाः कथं नाम शृणुयुः । उच्चारणार्थे तु नैष दोषो भवति ।

अर्थविप्रतिषेधात् । ३१-६, वि. ३६ ॥

षष्ठं हेतुमाह । अर्थविप्रतिषेधान्मन्त्रानर्थक्यम् । मन्त्रप्रतिपाद्यस्य अर्थस्य विप्रतिषेधात् विरोधात् । ‘ अदितिर्द्यौरदितिरन्तरिक्षम् ’ इति । अदितिरेव द्यौः सती सैव अन्तरिक्षं इति को जातु श्रद्दध्यात् । एवम् ‘ एको रुद्रो न द्वितीयोऽवतस्थे’ इत्युक्त्वा ‘सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ’ इत्याह । तदपि अश्रद्धेयम् ।

स्वाध्यायवदवचनात् । ३१-७, वि. ३७ ॥

सप्तमं हेतुमाह । स्वाध्याये इव स्वाध्यायवत् । अवचनात् वचनाभावात् । बटोः स्वाध्यायकाले संनिधौ काचित् अवहननं करोति । माणवकः अवहन्तिमन्त्रमधीते । नासौ तेन मन्त्रेण तदभिधानमभ्यस्यति । अक्षरानुपूर्व्या अवधारणे एव यतते । येन च नाम प्रयोजनं तदभ्यसितव्यम् । अत उच्चारणाभ्यासात् उच्चारणेन प्रयोजनं इत्यवगच्छामः ।

अविज्ञेयात् । ३१-८, वि. ३८ ॥

अष्टमं हेतुमाह । विज्ञातुं योग्यः शक्यो वा विज्ञेयः । विज्ञातुमशक्यः अविज्ञेयः । केषाञ्चिन्मन्त्राणां अर्थो विज्ञातुमेव न शक्यते । यथा ‘ सृण्येव जर्भरी तुर्फरीतू ’ ‘ इन्द्रः सोमस्य काणुका ’ ‘ आवृदूदात् क्षेत्रियध्वगद् वृषा ’ इत्यादिः । उच्चारणार्थत्वे तु न दोषः । अविज्ञेयान्मन्त्रानर्थक्यं इत्यन्वयः ।

अनित्यसंयोगान्मन्त्रानर्थक्यम् । ३१-९, वि. ३९ ॥

नवमं हेतुं प्रतिपादयन् पूर्वपक्षप्रतिज्ञामुक्त्वा उपसंहरति । केषुचिन्मन्त्रेषु अनित्यानां पदार्थानां संयोगः श्रूयते । यथा ‘ किं ते कृण्वन्ति कीकटेषु गावः ’ इति । कीकटा नाम जनपदाः । नैचाशाखं नाम नगरम् । प्रमगन्दो नाम राजा । यदि अभिधानार्थाः प्राक् प्रमगन्दात् नायं मन्त्रो भूतपूर्वः इति गम्येत । अविवक्षितार्थत्वे तु न दोषः । तस्मात् मन्त्रानर्थक्यं मन्त्राणामानर्थक्यं अर्थशून्यत्वम् । उच्चारणमात्रेण तु यागोपकारकत्वं तेषाम् । इति पूर्वपक्षः । संयोगोऽत्र प्रतिपाद्यप्रतिपादकभावरूपः संबन्धः ।

अविशिष्टस्तु वाक्यार्थः । ३२ ॥

उच्चारणमात्रेण यागस्योपकुर्वन्तो मन्त्राः अविवक्षितार्थाः इति नवभिर्हेतुभिः प्राप्तं पूर्वपक्षं तुशब्देन निरस्यन् आह सिद्धान्ती । वाक्यार्थः वाक्यतः प्रतीयमानः क्रियासंबन्धरूपः लोके वेदे च अविशिष्टः न भिन्नः, किन्तु समान एव । स यथैव लोके विवक्षितः तथैव वेदेऽपि भवितुमर्हति । मन्त्राणां यज्ञाङ्गप्रकाशनमेव प्रयोजनम् । तस्मान्नानर्थका मन्त्राः । इति सिद्धान्तः ।

गुणार्थेन पुनःश्रुतिः । ३३ ॥

अभ्यादानमन्त्रविषयकपूर्वपक्षशङ्कां सिद्धान्ती निराचष्टे । अभ्यादानमन्त्राणां चतुर्णां लिङ्गादेव विनियोगे सिद्धे ‘ तां चतुर्भिरादत्ते ’ इति पुनःश्रुतिः गुणार्थेन चतुष्ट्वसंख्यारूपगुणलाभप्रयोजनाय । पाठादेव चतुष्ट्वसिद्धौ ‘ चतुर्भिः ’ इति वचनं समुच्चयसिद्ध्यर्थम् । अन्यथा विकल्पः स्यात् । गुणार्था वा इत्यपि पाठः । अर्थस्तु न भिन्नः ।

परिसंख्या । ३४ ॥

अश्वाभिधानीमन्त्रविषयकपूर्वपक्षशङ्कां सिद्धान्ती निरस्यति । ‘ इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते ’ इति परिसंख्या । मन्त्रलिङ्गेनैव रशनाऽऽदाने प्राप्तस्य मन्त्रस्य विधानं गर्दभरशनातः मन्त्रस्य परिसंख्यार्थम् । इति न तदर्थशास्त्रवैयर्थ्यम् ।

अर्थवादो वा । ३५ ॥

‘ उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति ’ इति मन्त्रविधिवाक्ये पूर्वपक्षिणा पुनरुक्तता दोषो दत्तः, तन्निरासार्थे सिद्धान्तसूत्रमिदम् । ‘ यज्ञपतिमेव तत् प्रथयति ’ इत्यर्थवादः, तदर्थे पुनरुक्तिः । वाशब्दः शङ्कानिराससूचकः । तथा च न तदर्थशास्त्रवैयर्थ्यम् ।

अविरुद्धं परम् । ३६ ॥

मन्त्राणां नियताक्षरपदक्रमवत्त्वेन अनर्थकत्वं इति पूर्वपक्षिणा यदुक्तम्, तन्निरसनार्थे सूत्रम् । परं द्वितीयसूत्रोक्तं मन्त्रेषु क्रमविशिष्टाक्षरपदाम्नानं मन्त्राणां सार्थकमपि नियमादृष्टकल्पनया पूर्वपक्षिणाऽपि स्वीकर्तव्यतया अविरुद्धं न विरुद्धम् । तस्मात् नानर्थका मन्त्राः ।

संप्रैषे कर्मगर्हाऽनुपालम्भः संस्कारत्वात् ।३७॥

बुद्धशास्त्रात् इति सूत्रोक्तां पूर्वपक्षशङ्कां सिद्धान्ती निराकरोति । “ येयं संप्रैषे ‘ अग्नीदग्नीन् विहर ’ इत्यत्र बुद्धबोधनासंभवात् अभिधानकर्मगर्हा अभिहिता, साऽपि अनुपालम्भः । स्मरणसंस्कारार्थत्वात् ” (वा.) ।

ज्ञातविषयेऽपि ‘ अग्नीदग्नीन् विहर ’ इत्यत्र संप्रैषमन्त्रे पुनर्ज्ञापनरूपकर्मणः गर्हा निन्दा अभिहिता अनुपालम्भः अदोषः । संस्कारार्थत्वात् अदृष्टार्थत्वात् इति यावत् ।

अभिधानेऽर्थवादः । ३८ ॥

अविद्यमानवचनात् इति सूत्रेण अचेतनार्थबन्धनात् इति सूत्रेण च कृतस्य आक्षेपस्य निरासार्थे सिद्धान्तसूत्रम् । अभिधाने अभिधीयते अनेन इत्यभिधानम् ‘ चत्वारि शृङ्गा ’ इति मन्त्रः । तस्मिन् विद्यमानः पदसमूहः अर्थवादः, गौण्या वृत्त्या रूपकेण स्तुतिपरः । तस्मान्न तस्य अप्रामाण्यम् । एवम् ‘ ओषधे त्रायस्वैनम् ’ ‘ शृणोत ग्रावाणः ’ इत्यत्रापि अचेतनानां चैतन्यमारोप्य चेतनत्वस्य अभिधाने प्रतिपादने सति ते वाक्ये अर्थवादः यज्ञसाधनस्तुतिः । ‘ ओषधे त्रायस्वैनम् ’ इति, प्रातरनुवाकस्तुत्यर्थम् ‘ शृणोत ग्रावाणः ’ इति ।

गुणादविप्रतिषेधः स्यात् । ३९ ॥

अर्थविप्रतिषेधात् इति सूत्रोक्तां पूर्वपक्षशङ्कां सिद्धान्ती परिहरति । ‘ अदितिर्द्यौरदितिरन्तरिक्षम् ’ इत्यत्र अविप्रतिषेधः स्यात् विप्रतिषेधः विरोधो नास्ति । गुणात् गुणवादात् ‘ त्वमेव माता च पिता त्वमेव ’ इतिवत् स्तुत्यर्थत्वात् न दोषः ।

विद्याऽवचनमसंयोगात् । ४० ॥

स्वाध्यायवदवचनात् इति सूत्रोक्तां पूर्वपक्षशङ्कां सिद्धान्ती अपहस्तयति । विद्यायाः अर्थज्ञानस्य अवचनं अनभ्यासः मन्त्राणामविवक्षितार्थत्वे लिङ्गं न भवति । असंयोगात् लौकिकावघातादिक्रियायाः यज्ञसंयोगाभावात् । किंवा असंयोगात् अभ्यासरूपसंयोगं विनाऽपि कर्मकालिकस्य अर्थज्ञानस्य सुकरत्वात् । दुर्ग्रहत्वात्तु अक्षराभ्यासः । तस्मान्न दोषः ।

विद्याकाले संनिहितस्यापि लौकिकावहननरूपस्य अर्थस्य यत् मन्त्रेण अवचनं अनभिधानम्, तत् तस्य कर्मानङ्गत्वात् युक्तम् । (सु. पृ. ११०)

सतः परमविज्ञानम् । ४१ ॥

अविज्ञेयात् इति सूत्रोक्तां पूर्वपक्षशङ्कां निराकर्तुं सिद्धान्तसूत्रम् । परं इत्यव्ययं युक्तमित्यर्थे । ‘ सृण्येव जर्भरी तुर्फरीतू ’ इत्यादौ सतः विद्यमानस्यापि अर्थस्य शास्त्राभ्यासाभावात् अविज्ञानमल्पविदां युक्तम् । निगमनिरुक्तव्याकरणादिना तु तदर्थो ज्ञातुं शक्यः ।

उक्तश्चानित्यसंयोगः । ४२ ॥

अनित्यसंयोगात् इति सूत्रेणोक्तां पूर्वपक्षशङ्कां सिद्धान्ती दूषयति । योऽयं कीकटप्रमगन्दनैचाशाखादिभिः अनित्यैः संयोगः मन्त्रानर्थक्ये लिङ्गत्वेन शङ्कितः सः अस्माभिः उक्तः निरस्तः ‘ परं तु श्रुतिसामान्यमात्रम् ’ इत्यत्र ।

लिङ्गोपदेशश्च तदर्थवत् । ४३ ॥

मन्त्राणां विवक्षितार्थत्वे लिङ्गमाह सिद्धान्ती ! चकारः पूर्वपक्षबाधकैः समुच्चयार्थः । ‘ आग्नेय्या

आग्नीध्रमुपतिष्ठते ' इत्यादौ आग्नेयीत्वादिविशेषणोपादानेन मन्त्राणां अग्निदेवताप्रकाशकत्वेन लिङ्गेन उपदेशः विधिः तत् मन्त्रजातं अर्थवत् सार्थकं इति गमयति । अविवक्षितार्थत्वे तु तद्धितनिर्देशः अनुपपन्नः स्यात् । तस्मात् मन्त्राः विवक्षितार्थकाः इति सिद्धान्तः ।

तदर्थवत् । तेषामर्थः तदर्थः । सः अस्ति अस्य इति तदर्थवत् । इदं उपदेशस्य विशेषणम् । सामान्ये नपुंसकत्वम् । ' तेषां मन्त्राणां अर्थः यथा अस्ति तथा लिङ्गोपदेशो भवति ।' इति सुधा. पृ. ११२.

ऊहः । ४४ ।।

मन्त्रा विवक्षितार्था इत्यत्र सिद्धान्ती लिङ्गान्तरमाह । ऊहः तत् मन्त्रजातं अर्थवत् विवक्षितार्थकं इति गमयति । तत् अर्थवत् इति पूर्वसूत्रादनुवर्तते । ' न पिता वर्धते न माता ' इति द्विबहुपशुके अध्रिगुप्रैषे मातृपितृशब्दयोः द्विबहुवचनान्तत्वेन ऊहो निषिद्धः । तच्च मन्त्राणां सार्थकत्वे लिङ्गम् । निरर्थकत्वे तु ऊहस्य प्राप्त्यभावेन निषेधो व्यर्थ एव स्यात् ।

विधिशब्दाश्च । ४५ ।।

मन्त्रा विवक्षितार्था इति सिद्धान्ते लिङ्गान्तरमाह । विधिः ब्राह्मणाभिधः तत्रतत्र पर्यायैः अवयवान्वाख्याननिर्वचनादिभिश्च अर्थप्रकाशनपरत्वं दर्शयति इति वार्तिकम् । विधिशब्दाश्च विवक्षितार्थानेव मन्त्रान् अनुवदन्ति । ' शतं हिमाः, शतं वर्षाणि जीव्यासमित्येतदेवाह ' इत्यादयः । इति भाष्यम् । सर्वथा विवक्षितार्था मन्त्रा इति सिद्धान्तः । के.

✻ **तदर्थशास्त्रत्वलक्षणस्य** दोषस्य परिहारकं मन्त्राधिकरणे गुणविधिरूपं परिसंख्यारूपं अर्थवादरूपं चोक्तम् । सु. पृ. ७८५.

✻ **तदर्थशास्त्रन्यायः** । मन्त्राधिकरणमिदम् । भा. १।२।४।३१–४५. ✻ यदैव ' ऐन्द्या ' इत्युक्तम् , तदैव **तदर्थशास्त्रन्यायेन** इन्द्रव्यतिरिक्तः कोऽपि उपस्थातव्यः, स च लिङ्गगम्येन्द्रविरोधी इत्येतत् प्रतीयते । वा. ३।३।७।१४ पृ. ८२८.

⧗ **तदष्टसंख्यं श्रवणात् । ४।१।१७।४६ ।।**

दर्शपूर्णमासयोः 'अष्टावुपभृति गृह्णाति' इति श्रूयते। पूर्वपक्षसूत्रमिदम् । तच्छब्देन ' औपभृतं तथेति चेत् ' इति सूत्रस्थं औपभृतं निर्दिश्यते । तत् औपभृतमाज्यं अष्टसंख्यमेव हविः स्यात् , न तु चतुर्गृहीतद्वयम् । श्रवणात् अष्टौ इति अष्टत्वश्रवणात् ।

अनुग्रहाच्च जौहवस्य । ४७ ।।

पूर्वपक्षी शङ्काविशेषं निराचष्टे । जुह्वां भवं जौहवम्, तस्य जौहवस्य आज्यस्य औपभृतेन आज्येन अनुग्रहात् अनुग्रहकरणात् प्रयाजहोमेषु सहायकरणात् हेतोः चतुर्गृहीतत्वमपि उक्तम् । न च तावता अष्टत्वनिरासः शक्यः । तस्मात् उपभृति अष्टसंख्यमेव आज्यम् ।

द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने । ४८ ।।

सिद्धान्तयति । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । नेदमष्टसंख्यमेकं हविः, किन्तु एकं चतुर्गृहीतं हविः पुनरपरमपि चतुर्गृहीतम् । एवं द्वयोरेव चतुर्गृहीतयोः हेतुसामर्थ्यं भवति, एवं हेतुः समर्थितो भवति । आतिथ्यायां ' चतुर्गृहीतान्याज्यानि भवन्ति ' इत्युक्त्वा ' नह्यत्रानुयाजान् यक्ष्यन् भवति ' इति हेतुरुपन्यस्तः । असत्स्वपि अनुयाजेषु अष्टगृहीतमेवौपभृतं भवेत् , यदा अष्टसंख्या गुणभूता , न तदा द्वयोश्चतुर्गृहीतयोः सतोरपि ' चतुर्गृहीतान्याज्यानि ' इति आज्येषु बहुवचनमुपपद्येत । तस्यैतस्य हेतोः सामर्थ्यं द्वयोरेव चतुर्गृहीतयोर्भवति , न तु अष्टगृहीते एकस्मिन् ।

ननु तर्हि ' अष्टौ उपभृति ' इति अष्टत्वश्रवणं कथम् ? उच्यते । श्रवणं च समानयने । समानयने उपभृति आज्यग्रहणे अष्टत्वस्य श्रवणमुपपद्यते । अष्टगृहीतं हि ग्रहणे चतुर्गृहीतं च होमे । ' चतुर्गृहीतं जुहोति ' इति सर्वहोमेषु अनारभ्य उच्यते । तस्मादष्टशब्दश्रवणमदोषः । उपभृति द्वे चतुर्गृहीते एव, तत्र एकं चतुर्गृहीतं प्रयाजार्थम्, अपरमनुयाजार्थम् । के.

⧗ **तदागमे हि तद् दृश्यते इति न्यायः ।** पश्वेकत्वाधिकरणस्थं सूत्रम् । भा. ४।१।५।१५.

(हि यस्मात् तदागमे तस्य एकवचनाख्यस्य शब्दस्य आगमे सति तत् एकत्वं दृश्यते ' पशुमानय ' इत्यत्र ।

‘ पशू आनय ’ इत्यत्र तु एकवचनापगमे एकत्वं न दृश्यते । तस्मादेकवचनस्य एकत्वमर्थः । इत्यक्षरार्थः) ।

* ‘ न केवलं एतावेव अन्वयव्यतिरेकौ यौ परस्परपरित्यागेन लक्ष्येते, तस्मिन्नेव हि पदे ‘ तदागमे हि तद् दृश्यते ’ इत्यनेन न्यायेन विवेकोऽवधार्यते । वा. २।१।१।१ पृ. ३८१.

अत्र सुधा— धात्वपरित्यागेऽपि प्रत्ययश्रवणकाले धातुश्रवणाभावेऽपि भावनाप्रतीतेः, धातुश्रवणकाले च प्रत्ययश्रवणाभावे तदप्रतीतेः इत्येतत् ‘ तदागमे हि० ’ इति न्यायेन निर्णयो भविष्यति इति । पृ. ५६७. * तदागमे हि दृश्यते इति न्यायः । यथा दृश्यते हि तैलादौ अनुद्भूतरूपोद्भूतस्पर्शतेजोऽवयवागमे संतापोपलब्धिरिति तद्धर्म एव न तैलादिधर्मः, तथा जाग्रदादौ बुद्धौ सत्यां दुःखादयो दृश्यन्ते, सुषुप्त्यादौ तन्निवृत्तौ नोपलभ्यन्ते अतस्तद्धर्मा एव नात्मधर्माः, सुषुप्तावपि उपलब्धिप्रसङ्गात् इति । **साहस्री.** ३७९. * आख्यातवाच्यैव भावना, न धातुवाच्या, प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः ‘ तदागमे हि दृश्यते ’ इति न्यायविरुद्धत्वात् इति मीमांसकाः । **भूषणसारः** । अत्र दर्पणः ‘पशुना यजेत’ इति श्रूयते । तत्र एकवचनोपात्तमेकत्वं यागे विशेषणम् , उत प्रकृत्यर्थे इति संशये पशुपदार्थस्य यागं प्रति गुणत्वात् संभावितयावत्पशुकरणेन प्रधानावृत्तौ प्रधान(त्व)भङ्गापत्त्या यावद्गुणं प्रधानावृत्तेरयोगात् , एकत्वविशिष्टपशोर्विधाने तु एकत्वस्य पशुविशेषणतया यागाङ्गत्वाभावात् तदविवक्षितमेव स्यात् इत्यर्थकेन ‘ तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ’ इति सूत्रेण पूर्वपक्षिते ‘ शब्दवत्तूपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथाऽन्येषाम् ’ इति सिद्धान्तसूत्रम् । शब्दवत् शब्दवाच्यं यथा भवति तथोपलभ्यते । एकत्वं हि यतस्तदागमे एकवचनसमवधाने दृश्यते । अतस्तस्य प्राधान्येन प्रतीतिः । यथान्येषां अरुणादीनामित्यर्थः । इति । * तदागमन्यायः नाम अन्वयव्यतिरेकौ । यस्मिन् सति यत् ज्ञायते असति च न ज्ञायते स तस्यार्थः । रामौ इत्यत्र विसर्गो न श्रूयते एकत्वं च न ज्ञायते, रामः इत्यत्र विसर्गः श्रूयते एकत्वं च ज्ञायते इति सुप्रत्ययविसर्गस्य एकत्वमर्थः । रामौ इत्यत्र औकारस्य द्वित्वमर्थः । एवं यूपः कूपः सूपः इत्यादौ द्रष्टव्यम् । के. * तदागमन्यायः । पश्वेकत्वाधिकरणे । भा. ४।१।५।११-१६. * यत्र अनेकार्थप्रतीतिः, तत्र तदागमन्यायाविघातात् । सु. पृ. ५६८. * अनेकात्मकात् शब्दात् अनेकार्थबोधने सिद्धे ‘ यदागमे योऽर्थः, स तस्य इत्यवधार्यते ’ इत्यनेन अनेकशब्दोच्चारणात् अनेकार्थप्रतीतौ कस्य शब्दस्य कोऽर्थः इति विवेकमात्रस्य तदागमन्यायात्मकान्वयव्यतिरेकाधीनत्वात् । ‘ नान्वयव्यतिरेकाभ्यां स्वपूर्वोऽर्थोऽवगम्यते । संकीर्णेऽवगते स्वर्थे ताभ्यां शक्तिर्नियम्यते ॥ ’ सु. पृ. ५६८.

⧗ **‘ तदादि वाऽभिसंबन्धात् तदन्तमपकर्षे स्यात् ’** (५।१।१२।२४) इति न्यायेन ‘ स (निर्वापः) प्रतिकृष्यमाणः ततः प्राग्भाविनामङ्गानां प्रतिकर्षे वर्तेत’ (पूर्वपक्षे इदम्) । भा. ११।२।४।१९.

* ‘तदादि वा०’ इति पाञ्चमिकं सूत्रम् । तत्र ‘अङ्गानां मुख्यकालत्वाद् यथोक्तमुत्कर्षे स्यात् ’ इति पूर्वपक्षसूत्रात् उत्कर्षपदं अनुषञ्जनीयम् । ततश्च आग्निमारुतादूर्ध्वमित्यादौ उत्कर्षे तदादि स्यात् । तिष्ठन्तं पशुं प्रयजन्ति इत्यादौ अपकर्षे च तदन्तं स्यात् इति तदर्थः । सोम. ११।२।३. * ‘ तदादि वा० ’ इति ये वपाहोमोत्तरकालाः पदार्थाः तत्संनिपातिनो वा, तन्मात्रस्योत्कर्षो भवेत्, न प्राग्भाविनामुपाकरणादीनाम् । वा. ३।६।७।२२ पृ. १०४७. * ‘ आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति ’ इत्ययमपि पाशुकानामेव अनूयाजानामुत्कर्षः । तेषां हि ‘अङ्गैस्तृतीयसवने’ इत्यङ्गप्रचारोत्कर्षादेव तृतीयसवनसंबन्धे प्राप्ते (तदादि वाऽभिसंबन्धात् इति न्यायात्) प्रदेशविशेषमात्रं सुखेन विधीयते । शा. १२।२।१२. * केवलपरिव्याणोत्कर्षादेव तदादि वा० इत्येवं उपाकरणोत्कर्षसिद्धेः । वा. ३।६।७।२२ पृ. १०४८. * तदादिपदार्थानुष्ठानक्रमस्य क्लृप्तत्वात् सक्रमाणामेव पदार्थानां चोदकेन अतिदेशात् व्युत्क्रमे सति पूर्वपदार्थेनोत्तरस्य बुद्धौ अनुपस्थापितत्वात् तस्यानुष्ठानं न स्यात् । तस्मात् ‘ प्रयाजान्तस्य अङ्गसमूहस्य

अपकर्षः’ इति (तदादि वाऽभिसंबन्धादिति) न्यायशरीरम् । तस्मात् अल्पद्वादश्यां भोजनपूर्वभाव्यौपासनहोमदेवतार्चनवैश्वदेवाद्यपकर्षस्य भोजनापकर्षविधायकवाक्यविषयतामपि दर्शयति । **पुरुषार्थचिन्तामणौ** एकादश्याम् पृ. २११–१२. ❋ वाजपेये ‘ तान् पर्यग्निकृतानुत्सृजति, ब्रह्मसाम्नालभते ’ । अत्र आलम्भोत्कर्षमात्रं विधीयते । तदा च तदुत्तराङ्गानामुत्कर्षः ‘ तदादि वा० ’ इति न्यायादेव लभ्यते । तेनात्र आरण्यन्यायासंभवात् न पर्यग्निकरणान्तानामङ्गानामावृत्तिः । **भाट्ट.** ११।२।११.

❋ **तदादीनामुत्कर्षः** अनुयाजादीनामुत्कर्षः । ज्योतिष्टोमे सवनीये पशौ अनुयाजसूक्तवाकशंयुवाकादीनामुत्कर्षः । **भा.** ५।१।१२।२३–२४.

❋ प्रकृतिप्राप्तौ धर्म उत्कृष्यमाणः **तदाद्युत्कर्षं** करोति नापूर्वः इति केचित् । तदयुक्तम् । ‘ कृतदेशात्तु पूर्वेषाम् ’ (५।१।१०।३१) इत्यत्र अप्राकृतानामपि विदेवनादीनामपकर्षवर्णनेन ‘ तथाऽपूर्वं ’ (५।१।१६। २९) इत्यस्य विशिष्टविषयत्वव्याख्यानात् । **वा.** ३।६।७। २२ पृ. १०४८.

तदादितदन्तन्यायः । तदादितदन्तोत्कर्षापकर्षन्यायः । तदाद्युत्कर्षतदन्तापकर्षन्यायः । तदाद्युत्कर्षन्यायः । तदन्तापकर्षन्यायः । अनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम् । ‘ तदादि वाऽभिसंबन्धात् ’ इति न्यायः ॥

अङ्गानां मुख्यकालत्वाद् यथोक्तमुत्कर्षे स्यात् । ५।१।१२।२३ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते ‘ आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति ’ इत्युत्कर्षः । तथा अग्नीषोमीये पशौ ‘ तिष्ठन्तं पशुं प्रयजन्ति ’ इत्यपकर्षः । तत्र संदेहः किमुत्कर्षे अनुयाजमात्रमुत्कृष्यते अपकर्षे च प्रयाजमात्रम्, उतोत्कर्षेऽनुयाजादि अपकर्षे च प्रयाजान्तमिति । किं तावत् प्राप्तम् ? यावदुक्तमुत्कर्षापकर्षयोः स्यात् । कुतः ? अङ्गानां मुख्यकालत्वात् । एवमन्येषां प्रधानकालता भविष्यतीति । तत्र सहत्वस्य प्रापकः प्रयोगवचनोऽनुग्रहीष्यते ।

टुप्— प्रयाजानुयाजानाम् (यथासंख्यम्) अपकर्षोत्कर्षौ विहितौ । (‘तिष्ठन्तं पशुं प्रयजन्ति’ इति अपकर्षः । ‘आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति’ इति उत्कर्षो विहितः । तत्र) तावन्मात्रम् (प्रयाजमात्रमनुयाजमात्रं च) अपकृष्यते उत्कृष्यते च, उत तदन्तं तदादि वा (इति संदेहे) तावन्मात्रमिति प्राप्तम् । कुतः ? प्रधानासत्तिं हि अङ्गान्यपेक्षन्ते । तत्र वचनात् यस्यापकर्षः (कृतः, उत्कर्षो वा) तावन्मात्रमेव अपकृष्येत (उत्कृष्येत वा) । अवशिष्टं प्रधानासत्त्यैव (प्रधानासत्त्यनुग्रहायैव इति रत्ने) यथाऽवस्थितम् । (यथाप्राप्त्यैवावस्थितम् इति रत्ने) ।

तदादि वाऽभिसंबन्धात् तदन्तमपकर्षे स्यात् । २४ ॥

भाष्यम्— तदादि उत्कर्षे, तदन्तमपकर्षे गम्येत । कुतः ? अभिसंबन्धात् । यदनुयाजानां परस्तात् समाम्नायते, तत् प्रधानादनन्तरं प्रयोगवचनेन प्राप्तं बाधित्वा पाठसामर्थ्यादनुयाजेभ्यः परस्तात् क्रियते । तथा यस्ततः परः, स ततः परस्तात् । एवमेक उत्कृष्यमाणः सर्वं गुणकाण्डमुत्कर्षति । तथा अपकृष्यमाणोऽपकर्षतीति ।

टुप्— पूर्वः पदार्थः (आघारादिः) उत्तरस्य (प्रयाजादेः) उपस्थापकः प्रकृतौ (दृष्टः) । तेन इहापि (विकृतौ) तथैव प्राप्नोति (तेन कृत्वैव आघारं प्रयाजाः कार्याः । कृत्वैव अनुयाजान् सूक्तवाकप्रहरणम् । यत्तु प्रधानासत्तिः प्रयोगवचनात् प्राप्नोतीति, तत्राह–) प्रयोगवचनो हि यः प्रधानासत्तिं प्रापयति, सः (प्रकृतित एव प्रयाजेभ्यः पुरस्तात् अनुयाजेभ्यश्च परस्तात् कार्यत्वेन–) अवधृतस्वरूपाणाम् (आघारसूक्तवाकादीनाम्) यादृशी प्रधानासत्तिः, तादृश्यैव निराकाङ्क्षीभवति, न तु अन्यादृशीं (प्रधानासत्तिम्) शक्नोति कल्पयितुं प्राकृतबाधेन ।

शा—‘श्रुतोत्कर्षापकर्षाभ्यां वचनस्योपपत्तितः । न तदन्ततदादीनां भवेतामप्रमाणकौ ॥ प्रधानसंनिधिश्चैवं बाधितो न भविष्यति । ऊर्ध्वपूर्वपदार्थानामेवं प्राप्तेऽभिधीयते ॥ पूर्वेणोपस्थितं कार्यमुत्तरं कर्म चोदकात् । प्राप्तं तदन्यथाभावे क्रमलोपाद्विलुप्यते ॥ ’ तस्मात् तदादीनामुत्कर्षः, तदन्तानां चापकर्षः ।

सोम— यथा श्रुत्यनुग्रहात् एकदिनसंबन्धिप्रातरादौ साङ्गकर्मानुष्ठानम्, एवमिहापि श्रुत्यनुग्रहात् श्रुतमात्रोत्कर्षापकर्षौ इति प्रत्यवस्थानात् **संगतिः** । **सूत्रे** उत्कर्षग्रहणमपकर्षस्याप्युपलक्षणं न्यायसाम्यात् । स्वस्थानात् पूर्वत्वमपकर्षः, ततः परत्वं चोत्कर्षः । श्रुतिर्हि प्रयाजानूयाजयोः उत्कर्षापकर्षौ बोधयति, न तु पूर्वोत्तराणां वारयति । प्रधानप्रत्यासत्तिश्च प्रयोगवचनगम्या । प्रयोगवचनश्च चोदकापेक्षया दुर्बलत्वात् चोदकावगतक्रमाविरोधिनीमेव प्रधानप्रत्यासत्तिमङ्गानां बोधयति, न तु तद्विरोधिनीमत्यन्तसंनिकर्षलक्षणाम् । तस्मात् चोदकावगतक्रमानुरोधेन तदन्तापकर्षः तदाद्युत्कर्षश्च न्याय्यः ।

वि— 'प्रयाजेष्वपकर्षोऽनुयाजेषूत्कर्ष इत्यमू । श्रुतमात्रे तदन्तेषु तदाद्येषु च वा, ऽग्रिमः ॥ अन्येषां मुख्यकालत्वा, न्नैवं व्युत्क्रमशक्तितः । प्रयाजान्ते ह्यनूयाजादिके चैतौ समूहके ॥' (समूहकः समूह एव । एतौ अपकर्षोत्कर्षौ । प्रयाजान्ते समूहे अपकर्षः न तु केवलप्रयाजानाम्, एवं अनूयाजादिके समूहे उत्कर्षः न तु केवलानामनूयाजानाम्) ।

भाट्ट— दैक्षे पशौ प्रकृतितो हविरासादनोत्तरभाविनां प्रयाजानामपकर्षः 'तिष्ठन्तं पशुं प्रयजति' इति वचनेन श्रुतः । तथा सवनीये हविरुद्वासनोत्तरभाविनामनूयाजानामुत्कर्षः 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति श्रुतः । तौ किमुत्कर्षापकर्षौ तन्मात्रविषयौ, उत तदन्तस्यापकर्षस्तदादेश्चोत्कर्षः । इति चिन्तायाम्, प्रयाजादिग्रहणस्योपलक्षणत्वे प्रमाणाभावात् पूर्वोत्तरपदार्थानां च प्रयाजाद्यनङ्गत्वेन तदुत्कर्षापकर्षयोः उत्कर्षापकर्षशङ्काऽनुपपत्तेः, तत्तत्पदार्थानां प्रधानप्रत्यासत्तिबाधापत्तेश्च तन्मात्रस्यैव उत्कर्षापकर्षौ । इति प्राप्ते, प्रकृतौ पाठादिक्रमेण पदार्थानां क्लृप्तक्रमत्वात् पूर्वपदार्थोपस्थापितस्यैव चोत्तरपदार्थस्यानुष्ठेयत्वावगतेः श्रुतवचनयोस्तन्मात्रविषयत्वेऽपि अनूयाजोत्तरपदार्थस्य सूक्तवाकादेः अनूयाजानन्तर्यानूयाजोपस्थापितत्वादिधर्मानुग्रहलोभेनोत्कर्षः । न च प्रधानप्रत्यासत्त्यनुरोधेन तदभावः, तस्याः प्रयोगविधिना क्लृप्तप्रमाणगम्यक्रमानुरोधेनैव प्रकृताविव विकृतावपि कल्पनीयत्वात् । एवमपकर्षेऽपि प्रयाजादीनामाघारादिरूपपूर्वपदार्थानन्तर्यस्य तदुपस्थापितत्वस्य च बाधे प्रमाणाभावेन पूर्वभाविनामपि तदुपपत्तेः । न चापकर्षे पूर्वभाविनां काचित् क्षतिः, प्रधानप्रत्यासत्तेः प्रकृताविव अकिञ्चित्करत्वात् । न चापकर्षे हविरासादनानन्तरं क्रियमाणपदार्थस्य सामिधेन्यादेः तदानन्तर्यतदुपस्थापितत्वादिरूपधर्मबाधापत्तेः अपकर्षानुपपत्तिः, तद्बाधस्य उत्तरकालिकप्रतीतिकत्वेन अविरोधात् । सामिधेनीनां तु प्रयाजाङ्गत्वादपि हविरासादनानन्तर्यादिबाधेऽपि अदोषः ।

मण्डन— 'तदाद्युत्कर्ष इष्यते ।' १४.

शंकर—'उत्कर्षे च तदादिता ।' १५. 'तदन्तस्यापकर्षः स्यात् ।' १६.

⌛ **तदादिन्यायेन** । (सर्वनामन्यायेन इत्यर्थः) । न च नानार्थतापत्तिः तदादिन्यायेन बुद्धिविशेषादेः शक्यताऽवच्छेदकानामनुगमकस्य सत्त्वात् । **भूषणसारे** धात्वर्थनिर्णयः २.

* **तदादिपदानां** बुद्धिस्थत्वेन बुद्धित्वे शक्तिः । न च बुद्धिस्थमानय इति बोधापत्तिः, पदार्थस्मरणशाब्दबोधयोः समानप्रकारकत्वात् इति वाच्यम् । पदान्तरे तादृशनियमेऽपि तदादिपदेषु घटत्वादिरूपेणैव पदार्थोपस्थितेः । शाब्दबोधस्य कल्पनं फलानुरोधात् इति केचित् । अन्ये तु तदादेः घटत्वादिनैव शक्तिः इति नानाऽर्थतैव इत्याहुः । **मणि. पृ. १६३.**

* **तदादिसर्वनामार्थः** अनुगत एव । बुद्धिस्थत्वेन अनुगमे बुद्धेरपि अननुगमः । **मणि. पृ. ११६.**

⌛ **तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात् । ४।२।१३।२८ ॥**

अत्र सूत्रे होमलक्षणमुच्यते । तदुक्ते तया यजतिचोदनया उक्ते द्रव्यदेवतात्यागक्रियासमुदाये जुहोतेः हुधातोः श्रवणात् आसेचनाधिकः यजधात्वर्थः, जुहोतिः हुधात्वर्थः स्यात् । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यनेनोक्ते यागपदार्थे 'चतुरवत्तं जुहोति' इति जुहोतिः श्रुतः । तस्मात् द्रव्यं, देवता, आसेचनं अग्नौ प्रक्षेपः, त्यागश्चेति चतुर्णां समुदायो होमपदार्थः । आसेचनं अधिकं यस्मिन् स आसेचनाधिकः यागपदार्थः । **के.**

* ‘तदुक्ते श्रवणात्’ इति सूत्रकारेणोच्यमानं तत्रैव समर्थयिष्यामहे, यथा देवतोद्देशेन स्वत्वत्यागमात्रं यागः, देवतोद्दिष्टत्यज्यमानस्वत्वद्रव्यप्रक्षेपो जुहोतिः। इति। वा. ३।४।१४।४१ पृ. ९८१.

⧗ तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात् स्यात्। ९।२।१३।४० ॥

चातुर्मास्येषु पाशुकेषु मध्यमे पर्वणि ‘परिधौ पशुं नियुञ्जीत’ इति श्रूयते। तत्र परिधौ यूपधर्माः कर्तव्या न वेति विचारे पूर्वाधिकरणाक्षेपेण पूर्वपक्षमाह। तदुत्पत्तेः तस्य परिधेः आहवनीयपरिधानार्थत्वेन उत्पत्तेः परिधौ यूपधर्माणां निवृत्तिः स्यात् प्रवृत्तिर्न स्यात्। यूपधर्माणां तत्कृतत्वात् पशुबन्धनापूर्वप्रयुक्तत्वात् परिधेश्च अतादृशत्वात्। तस्मात् परिधौ यूपधर्मा न स्युः इति पूर्वः पक्षः।

आवेश्येरन् वाऽर्थवत्त्वात् संस्कारस्य तदर्थत्वात्। ४१ ॥

पूर्वपक्षं वाशब्देन निरस्यन् सिद्धान्तमाह। परिधौ यूपधर्माः आवेश्येरन् निवेश्येरन् क्रियेरन्। परिधौ यूपधर्माणामर्थवत्त्वात्। पशुबन्धनोपकारसाधने हि यूपधर्मा विधीयन्ते। मध्यमः स्थूलपरिधिरपि पशुबन्धनोपकारसाधनम्। पशुबन्धनरूपस्य अर्थस्य प्रयोजनस्य परिधौ अपि सत्त्वात्। संस्कारस्य यूपधर्मात्मकस्य परिधिसंस्कारस्य तदर्थत्वात् पशुबन्धनार्थत्वात्। तस्मात् परिधौ यूपधर्माः परिधित्वाविरोधिनः कर्तव्याः। उच्छ्रयणतक्षणादयस्तु न कर्तव्याः। इति सिद्धान्तः।

आख्या चैवं तदावेशाद् विकृतौ स्यादपूर्वत्वात्। ४२ ॥

परिधौ मध्यमे स्थूले यूपधर्माः कर्तव्या इत्युक्तम्। ननु एवं सति ‘यूपायाज्यमानायानुब्रूहि’ इत्यत्र ‘परिधयेऽज्यमानायानुब्रूहि’ इत्यूहोऽपि कर्तव्यः स्यात्। नेत्याह। नोहितव्यो भविष्यति। तदावेशात् यूपधर्मावेशात् परिधौ, एवं आख्या च यूप इत्येवं आख्याऽपि स्यात्। अपूर्वत्वात् यूपशब्दस्य संस्कारार्थत्वात् परिधावपि यूपशब्दो भवितुमर्हति। तथा च यथापठित एव प्रैषमन्त्रो भविष्यति नोहिष्यते। विकृतौ च विकृतावपि चातुर्मास्यपर्वणि प्रकृताविव परिधौ यूपशब्दो भविष्यति। अपूर्वत्वात् तदावेशात् एवं विकृतौ च आख्या स्यात् इत्यन्वयः। चकारो भिन्नक्रमः विकृतौ इत्यस्मादुपरिष्टात् संबध्यते विकृतौ अपि इत्यर्थः। तस्मात् परिधौ यूपधर्माः कर्तव्याः। इति सिद्धान्तः। के.

⧗ तदुत्सर्गे कर्माणि पुरुषार्थाय, शास्त्रस्यानतिशङ्क्यत्वान्न च द्रव्यं चिकीर्ष्यते, तेनार्थेनाभिसंबन्धात् क्रियायां पुरुषश्रुतिः। ४।१।३।३ ॥

‘नेक्षेतोद्यन्तमादित्यम्’ इत्यादीनि प्रजापतिव्रतरूपाणि कर्माणि क्रत्वर्थानि इति उत्सूत्रे पूर्वपक्षे सिद्धान्तसूत्रम्। तदुत्सर्गे इति तच्छब्देन पूर्वसूत्रोक्तायाः प्रीतेर्निर्देशः। नेक्षेत इत्यस्य नञः पर्युदासार्थकत्वं गृहीत्वा धातुना अन्वयः कर्तव्यः। एवं च नेक्षेत इत्यस्य अनीक्षणसंकल्पं कुर्यात् इत्यर्थः। तथा च तदुत्सर्गे तस्याः प्रीतेः उत्सर्गे अभावेऽपि कर्माणि अनीक्षणसंकल्पादीनि पुरुषार्थाय स्युः, न क्रत्वर्थाय। शास्त्रस्य पुरुषार्थताबोधकस्य ‘तस्य व्रतम्’ इत्यस्य अनतिशङ्क्यत्वात् अतिशङ्क्यत्वाभावात्। शास्त्रे शङ्कनीयत्वाभावादित्यर्थः। **ननु** एवं पुरुषार्थत्वे फलकल्पनागौरवं प्रसज्येत इति **चेन्न**। शास्त्रस्य अनतिशङ्क्यत्वात्। एतावता हैनसाऽयुक्तो भवति इति शास्त्रस्य ‘एतावता अनीक्षणसंकल्पादिना हेतुना, एनसा पापेन अयुक्तो वियुक्तो भवति’ इति पापक्षयलक्षणफलबोधकस्य वर्तमानापदेशयुक्तस्यापि अतिशङ्क्यत्वाभावात्। ननु अनीक्षणस्य पुरुषार्थत्वेऽपि क्रत्वर्थत्वमपि स्यादिति चेत् तत्राह– न च द्रव्यं चिकीर्ष्यते इति। द्रव्यं क्रतुसंबन्धि अनीक्षणादिभिः कर्मभिः न चिकीर्ष्यते न कर्तुमिष्यते न संस्क्रियते। ननु नेक्षेत इत्यस्य आख्यातस्य कर्तृवाचकत्वाभावेन पुरुषस्य उपस्थितेरभावात् कथमनीक्षणस्य पुरुषार्थत्वबोध इति चेत् तत्राह– तेनेत्यादि। यतः पुरुषार्थत्वं साधितं क्रत्वर्थत्वं च निराकृतम्, तेन हेतुना अर्थेन अनीक्षणेन पुरुषस्य भावनाऽऽक्षिप्तस्य अभिसंयोगात् कर्तृत्वेन संबन्धात् क्रियायामनीक्षणसंकल्परूपायां उपक्रमगता ‘तस्य व्रतम्’ इति तच्छब्दरूपा पुरुषस्य श्रुतिः उपपद्यते। तस्मात् प्रजापतिव्रतानि पुरुषार्थानि।

अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः । ४ ॥

पूर्वपक्षसूत्रम् । यदि प्रजापतिव्रतानि पुरुषार्थानि, तर्हि 'समिधो यजति' इत्यादेः शास्त्रस्य प्रजापतिव्रतशास्त्रेण अविशेषात् तद्वदेव समिदादौ अपि यथाश्रुति 'यत् प्रयाजानुयाजा इज्यन्ते वर्म वा एतत् क्रियते' इत्यादिश्रुत्यनुसारेण फलानि स्युः । न चेत्, न प्रजापतिव्रतान्यपि पुरुषार्थानि इति स्वीकार्यम् ।

अपिवा कारणाग्रहणे तदर्थमर्थस्यानभिसंबन्धात् । ५ ॥

'नोद्यन्तमादित्यमीक्षेत' इत्यादीनि प्रजापतिव्रतानि न क्रत्वर्थानि किंतु पुरुषार्थानि इति प्रतिपादनार्थं सिद्धान्तसूत्रमिदम् । अपिवा इति पूर्वपक्षव्यावृत्तिः । कारणाग्रहणे प्रजापतिव्रतानां क्रत्वर्थत्वे प्रकरणादिरूपस्य कारणस्य प्रमाणस्य अग्रहणे ग्रहणाभावे दर्शनाभावे सति तदर्थं पुरुषार्थमेव तत् व्रतजातं स्यात् । प्रमाणाभावाच्च प्रजापतिव्रतरूपस्य अर्थस्य क्रतुना अनभिसंबन्धात् संबन्धाभावात् । तस्मात् तानि पुरुषार्थान्येव, न क्रत्वर्थानि ।

तथा च लोकभूतेषु । ६ ॥

सिद्धान्तसाधकं सूत्रम् । लोकभूतेषु लोकसिद्धेषु कर्मसु प्रयोजनवत्सु उक्तेषु तत्संनिधौ यत् फलेन असंयुक्तं श्रूयते, तत् तदङ्गं विज्ञायते । 'स्नानं कुरु पाकं कुरु' इत्युक्ते स्नानं पाकार्थं इति ज्ञायते । केवलम् 'स्नानं कुरु' इत्युक्ते स्वतन्त्रफलकमेव स्नानं ज्ञायते । तथा च लोकभूतेषु कर्मसु तथा ज्ञानात् प्रजापतिव्रतानि पुरुषार्थान्येव । के.

* **तदेकदेशग्रहणे** आदितः प्रवृत्तिः । (द्यावापृथिव्याद्येककपाले अष्टाकपालस्य प्रथमकपालविध्यन्तस्य प्रवृत्तिः, आश्विनद्विकपाले आदिमकपालद्वयविध्यन्तस्य प्रवृत्तिः इतिरीत्या आदितः प्रवृत्तिः, अन्त्यस्य लोपः इत्यर्थः) । वि. १०।५।१.

⧗ **तदेकदेशभूतं तद्ग्रहणेन गृह्यते इति न्यायः।** तद्यथा– गङ्गा यमुनां प्रविष्टा, अनेका नद्यः गङ्गायमुनाग्रहणेन गृह्यन्ते, तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते । 'यस्मात् प्रत्ययविधिः' (पा० १।४।१३) इति सूत्रभाष्ये अयं न्याय उक्तः । साहस्री. ६२५.

* **'तत्कर्मोपार्जितैस्त्वेतैः क्रियमाणेषु कर्मसु । कर्तृता यजमानानामृत्विक् परशुकर्मवत् ॥'** इत्यात्मवादोक्तन्यायवार्तिकात् शरीरात्मनोः स्वस्वामिभावव्यवस्थानात् व्यवस्था । (श्लोवा. आत्मवादे ७९ । स्त्वेतैः इत्यत्र श्वैतैः इति मूले पाठः) । सु. पृ. ६२०.

⧗ **'तत्काला त्वावर्तेत, प्रयोगतो विशेषसंयोगात्'** (११।३।११।२२) इति न्यायेन पञ्चदशरात्रे, 'या तावत् वसतीवरीग्रहणोत्तरकाला सुब्रह्मण्या, सा प्रतिदिवसं क्रियते' । टुप्. १२।२।७।२२.

⧗ **तत्काला त्वावर्तेत, प्रयोगतो विशेषसंयोगात् । ११।३।११।२४ ॥**

पूर्वाधिकरणे उपसत्कालीनसुब्रह्मण्याविषये उक्तम्, तद्वैलक्षण्यार्थस्तुशब्दः । तत्काला प्रयोगकाला सुत्याकाला तु सुब्रह्मण्या प्रत्यहमावर्तेत द्वादशाहे । प्रयोगतः प्रयोगेण विशेषतः संयोगात् 'अद्य सुत्यामागच्छ' इति हि पठ्यते । तस्मात् आवृत्तिः इति सिद्धान्तः ।

अप्रयोगाङ्गमिति चेत् । २५ ॥

पूर्वपक्षी आह । सुत्याकालीना सुब्रह्मण्या अप्रयोगाङ्गं प्रयोगस्य अङ्गं न भवति । तस्मात् सा तन्त्रं स्यात् । 'अद्य सुत्यामागच्छ' इत्यत्र 'अद्य' इति अनङ्गम्, 'सुत्यामागच्छ' इति तु तन्त्रेऽपि अबाधितम् ।

स्यात् प्रयोगनिर्देशात्, कर्तृभेदवत् । २६ ॥

सिद्धान्ती आह । सुब्रह्मण्यायाः स्याद्भेदः । प्रयोगनिर्देशात् 'अद्य सुत्यामागच्छ.' इति सुब्रह्मण्यामन्त्रे प्रयोगस्य निर्देशात् । प्रयोगस्य च प्रत्यहं भेदात् । कर्तृभेदवत्, साकमेधेषु दक्षिणे उत्तरे च विहारे कर्तृभेदे सति उत्तरविहाराङ्गानि देशभेदात् दक्षिणे विहारे नोपकुर्वन्ति, एवं प्रकृतेऽपि कालभेदात् एकप्रयोगस्था सुब्रह्मण्या प्रयोगान्तरे नोपकरिष्यति । तस्मादावृत्तिः ।

तद्भूतस्थानादग्निवदिति चेत्, तदपवर्गस्तदर्थत्वात् । २७ ॥

पूर्वपक्षी शङ्कते । सुब्रह्मण्यायाः आवृत्तिर्न कर्तव्या । कुतः ? तद्भूतस्थानात् । तेन सकृत्कृतेनैव सुब्रह्मण्या-

ऽऽह्वानेन यत् भूतं सिद्धं संस्कृतं दैवतं इन्द्रस्वरूपम्, तस्यैव उत्तरेषु सर्वेष्वपि अहःसु स्थानात् विद्यमानत्वात्। संस्कृतस्य विद्यमानत्वात् नावृत्तिः । अग्निवत् अग्नेः स्थानात् यथा आधानस्य नावृत्तिः तद्वत् । षष्ठ्यन्तात् वतिप्रत्ययः । सकृत्कृतेन आधानेन संस्कृतस्यैव अग्नेः अग्निहोत्रादिकर्मसु विद्यमानत्वात् यथा नावर्त्यते तद्वत् सुब्रह्मण्याऽपि नावर्तनीया । इति चेत् पूर्वपक्षी ब्रूयात् तं प्रतिब्रूयात् तदपवर्गस्तदर्थत्वादिति । सकृदाह्वानजन्यसंस्कारसंस्कृतायाः विशिष्टायाः देवतायाः अपवर्गः समाप्तिर्भवति। प्रथमस्याह्नः अपवर्गे तदहःपठितसुब्रह्मण्याजन्यसंस्कारस्यापि अपवर्गे विशेषणापवर्गेण विशिष्टाया देवताया अपि अपवर्गो भवत्येव। तदुक्तं तदपवर्गः इति । कथं तदपवर्ग इति चेत् तदर्थत्वात् इत्याह । तच्छब्देन बुद्धिस्थस्य कर्मणः परामर्शः । तदर्थत्वात् कर्मार्थत्वात् सुब्रह्मण्यायाः । ततश्च कर्मापवर्गे अपवर्गः । तस्मात् दिनान्तरे तस्या आवृत्तिरेव स्यात् इत्येव सिद्धान्तः ।

अग्निवदिति चेत् । २८ ॥

पूर्वपक्षी आह । अग्नेः इव अग्निवत् । अग्नेः आधानं यथा सर्वकर्मसु तन्त्रं भवति, तथा उपसत्कालीनं सुब्रह्मण्याऽऽह्वानमपि सर्वाहार्थे तन्त्रं स्यात् । इति चेत् । पूर्वोक्तस्यैव दृष्टान्तस्यानुवादोऽयं उत्तरार्थः ।

न प्रयोगसाधारण्यात् । २९ ॥

सिद्धान्ती आह । न सुब्रह्मण्याऽऽह्वानं आधानेन तुल्यम् । आधानस्य इष्टिपश्वादीनां सर्वकर्मणां प्रयोगेषु साधारण्यात् साधारणत्वात् । सुब्रह्मण्याऽऽह्वानं तु तत्तत्प्रयोगार्थम् । तस्मादावृत्तिः आह्वानस्य ।

लिङ्गदर्शनाच्च । ३० ॥

सिद्धान्ती एव हेत्वन्तरमाह । 'संस्थितेसंस्थितेऽहनि आग्नीध्रागारं प्रविश्य सुब्रह्मण्य सुब्रह्मण्यामाह्वय इति प्रेष्यति' इति लिङ्गस्य दर्शनात् प्रत्यहं सुब्रह्मण्याऽऽह्वानमिति गम्यते ।

तद्धि तथेति चेत् । ३१ ॥

पूर्वपक्षी आह । तथाशब्देन बुद्धिस्थयूपाहुतिदृष्टान्त उपन्यस्तः, हिशब्देन तस्य बुद्धिस्थैव प्रसिद्धिः सूचिता । तत् सुब्रह्मण्याऽऽह्वानं तथा स्यात्, यथा यूपाहुतिकर्म यूपैकादशिन्यां तन्त्रं भवति, तथा प्रथमसुत्याकर्मणि क्रियमाणमाह्वानं सर्वार्थे तन्त्रं भविष्यति । इति चेत् । अथवा तत् यूपाहुतिकर्म यथा, तथा आह्वानमपि भविष्यति इति योजनीयम् ।

नाशिष्टत्वादितरन्यायत्वाच्च । ३२ ॥

सिद्धान्ती आह । न सुब्रह्मण्याऽऽह्वानं यूपाहुतिकर्मणा तुल्यम् । अशिष्टत्वात् यूपान्तिके होमस्य अविहितत्वात् आहवनीयप्रतिषेधार्थत्वात् । सुब्रह्मण्याऽऽह्वाने तु इतरन्यायत्वात् इतरः न्यायः 'कालभेदात् गृह्यमाणविशेषस्य आवृत्त्या भवितव्यम्' इति, अस्मिन् आह्वाने तादृशत्वात्। ततश्च यूपाहुतिदृष्टान्तो विषमः । तस्मात् आवृत्तिः ।

विध्येकत्वादिति चेत् । ३३ ॥

कश्चिदाह। वसतीवरीपर्यन्तस्य अङ्गजातस्य सुब्रह्मण्याऽऽह्वानस्य च विध्येकत्वात् विधेरेकत्वात् । एकत्वमत्र सादृश्यात् ज्ञेयम् । सादृश्यं च द्वादशाहिकत्वेन । आह्वानं सकृत् स्यात् द्वादशाहिकविधिबोध्यत्वात्, वसतीवरीपर्यन्ताङ्गजातवत् । इति चेत् ।

न, कृत्स्नस्य पुनःप्रयोगात्, प्रधानवत् । ३४ ॥

सिद्धान्ती आह । न वसतीवरीवत् तन्त्रम् । अभिषवपवमानग्रहचमसस्तोत्रशस्त्रादेः कृत्स्नस्य विधानस्य अहर्गणे प्रत्यहं पुनःप्रयोगात् सुब्रह्मण्याऽपि पुनःपुनः प्रयोज्या । प्रधानवत् यथा प्रधानानि प्रत्यहं क्रियन्ते तद्वत् । पूर्वपक्षानुमानं तु प्रबलप्रतिहेतुग्रस्तम् । तस्मात् अहर्गणे सुत्याकालीनसुब्रह्मण्याऽऽह्वानस्य प्रत्यहमावृत्तिः इति सिद्धान्तः । के.

* तत्कालास्तु० (११।३।४।६) । यूपसाधारण्येन 'तत्कालास्तु' इत्येवं अग्नीषोमीयकालकृतादेव (परिव्याणात् सवनीयार्थमपि) उपकारसिद्धेः । वा. ३।६। ७।२१ पृ. १०४६.

⌛ तत्काले वा लिङ्गदर्शनात् । ३।८।२१।४० ॥

श्येने 'दृतिनवनीतमाज्यं भवति' इति श्रूयमाणे नवनीते विचारः । दृति चर्मपुटकम्, तत्र चिरकालधृतं यन्नवनीतम्, तत् आज्यस्थाने भवति इति वाक्यार्थः । इदं नवनीतं अङ्गेष्वेव न प्रधाने इति साधितं पूर्वाधि-

करणे । इदानीं किं सुत्याकालानामङ्गानां नवनीतम्, उत सर्वेषामिति विचार्यते । तत्र पूर्वपक्षसूत्रमिदम् । अग्निष्टोमे तावत् अग्नीषोमीयसवनीयानुबन्ध्या: त्रयः पशवो भिन्नकालस्थिताः । ते च श्येने चोदकेन प्राप्ताः । परन्तु ‘ सह पशूनालभते ’ इति विशेषविधानात् तेषां साहित्यं भवति । तच्च साहित्यं सवनीयपशुकाले एव भवति । सवनीयपशुश्च सुत्यादिने भवति इति तत्रैव साहित्यम् । इदं साहित्यदर्शनमेव सूत्रोक्तं लिङ्गदर्शनम् । तत्काले श्येनकाले श्येनप्रधानकाले अर्थात् सुत्याकाले यानि श्येनाङ्गानि, तेष्वेव दृतिनववीतं स्यात् । यथा पशुसाहित्यं सुत्याकालीनम्, तथा नवनीतमपि सुत्याकालीनम् ।

सर्वेषां वाऽविशेषात् । ४१ ॥

सिद्धान्तयति । न सुत्याकालीनानामेव अङ्गानाम्, किन्तु सर्वेषां असुत्याकालीनानामपि अङ्गानां स्यात् । वाशब्दः पूर्वपक्षनिरासार्थः । सर्वेषां कुतः ? अविशेषात् विशेषप्रमाणाभावात् । सुत्याकालीनपशुसाहित्यरूपस्य सामान्यतोदृष्टरूपस्य लिङ्गस्य ‘दृतिनवनीतमाज्यं भवति’ इति वाक्येन बाधितत्वात् । तस्मात् श्येने सर्वेषामङ्गानां आज्यस्थाने दृतिनवनीतं स्यात् ।

न्यायोक्ते लिङ्गदर्शनम् । ४२ ॥

तत्र सिद्धान्ती ब्रूते । लिङ्गदर्शनं न्यायोक्ते न्यायगम्ये अर्थे साधकं भवति । प्रधानप्रत्यासत्तिवशात् पशुसाहित्यं सुत्याकालकृतं इति लिङ्गदर्शनं क्रमानुग्रहेण न्यायेन सिद्धे सति भवेत् । परन्तु नायं न्याय: दृतिनवनीते संभवति, प्रधानप्रत्यासत्तेरनपेक्षणात् । तस्मात् श्येने दृतिनवनीतं सुत्यातदितरकालीनसर्वाङ्गार्थमिति सिद्धान्तः । **के.**

तत्क्रतुस्तद्भवति इति न्यायस्य व्यभिचारं शङ्कते । (क्रतु: संकल्पः । स: क्रतुः यस्य सः । यो यस्य संकल्प सततं करोति सः तद्रूपः भवति इति तत्क्रतुन्यायवदेव शब्दार्थः ।) । ४।३।६।१५ ब्रसू.

तत्क्रतुन्याय: । (४।३।६।१५ ब्रसू.) एते च ह्रानोपायने सविशेषविद्यायामनुचिन्तनीये एव तत्क्रतुन्यायेन फलस्यापि सविशेषविद्यायां ध्येयत्वात् । निर्विशेषविद्यायां तु न ध्येये । (क्रतुः संकल्पो ध्यानमित्यर्थः । जीवः इह जन्मनि यादृशं संकल्पं तात्पर्येण करोति, जन्मान्तरे तादृशं फलं लभते इति न्यायार्थः) । **आभरणं.** ३।३।१५।२६ ब्रसू. * अध्यात्मं वागादीनाम्, अधिदैवतमग्न्यादीनां च सन्ति एकोपासनात् वह्न्यादिशरीरप्राप्तिफलकानि उपासनानि । तेषु यानि शरीरान्तरेऽप्यनुवर्तमानानि इन्द्रियाणि तान्येव तत्क्रतुन्यायादुपासनीयानि । **परिमलः.** २।४।२।६ ब्रसू. * सिद्धान्ते प्रतीकोपासनातिरिक्तेषु तत्क्रतुन्यायात् विशेषसिद्धिः । **न्यायनि.** ४।३।६।१५ ब्रसू. ।

तद्गुण उपलभ्यते इति न्यायः । अयं ‘ उच्चैरुदात्तः ’ (पा० १।२।२९) इति सूत्रमहाभाष्ये उक्तः । ‘तद्यथा द्वयोः रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते । बदरपिटके रिक्तको लोहकंसः तद्गुण उपलभ्यते’ इति । (तस्य गुण इव गुणो यस्य स तद्गुणः) । **साहस्री.** ६१७.

तद्गुणसारत्वात् इति न्यायः (२।३।२९ ब्रसू.) । प्राणं विहाय केवलस्य जीवस्य उत्क्रमणासंभवस्य तद्गुणसारत्वादितिन्यायसिद्धत्वात् । (तस्याः बुद्धेः गुणाः इच्छाद्वेषादयः सारः प्रधानं यस्य आत्मनः संसारित्वे संभवति, स तद्गुणसारः । आत्मनः तद्गुणसारत्वात् संसारित्वव्यपदेशः इति न्यायसूत्रार्थः) । **आभरणं.** ४।२।३।४ ब्रसू.

तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात् सहाङ्गैरव्यक्तः शेषे । ३।७।२३।५१ ॥ इति न्यायः ।

पूर्वसूत्रस्थपूर्ववच्छब्दनिर्दिष्टप्रत्युपस्थापितप्राकृतधर्मपरामर्शिनं तच्छब्दं चोदकप्राप्तानि अङ्गानि अधिकृत्य, वैकृतप्रयोगवचनप्रवृत्तेश्च अधिकारशब्दं चोदकवाचिनमभिप्रेत्य, प्रयोगवचनेन प्राकृतधर्मग्रहणात् प्राकृतानां च धर्माणां चोदकसामर्थ्येन नानर्त्विक्कर्तृकाणामेव प्राप्तेः स्वकीयचोदकप्राप्तनानर्त्विककर्तृकधर्मयुक्तः श्येनादिः स्यात् । यस्तु उद्गात्रादिः सामान्यसमाख्यानिमित्तत्वात् अव्यक्तः कर्ता, स शेषे प्राकृतधर्मव्यतिरिक्ते कण्टकवितोदनादौ अपूर्वे श्येनाङ्गे भविष्यति इति सिद्धान्तयिष्यते । **सु.**

पृ. ११७८, * तद्ग्रहणाद्वा इत्यत्र चोदकबलीयस्त्वं वक्ष्यते । पृ. ११७८.

* तद्ग्रहणाद्वा (३।७।२३।५१) इत्यधिकरणे वैकृतप्रधानं प्रयोगवचनं चोदकोपजीवकतया दुर्बलं इति वक्ष्यते । (सामवेदोत्पन्नोऽपि श्येनयागः न उद्गातृभिरेव कर्तव्यः, यजुर्वेदोत्पन्नोऽपि च वाजपेयः न अध्वर्युभिरेव कर्तव्यः, किन्तु स्वधर्मैः स्वैः चोदकप्राप्तैर्धर्मैः संयुक्तः स्यात् , तद्ग्रहणात् प्राकृतधर्मग्रहणात् । तस्मात् सर्वैर्ऋत्विग्भिर्मिलित्वा श्येनो वाजपेयश्च कर्तव्यः इति अक्षरार्थः) । कु. ३।३।२।८. * तद्ग्रहणाद्वा इत्येतत् बाधित्वा प्रधान-(वेद)समाख्यात एव प्रकृतौ विकृतौ च कर्ता प्राप्नोति । वा. ३।३।२।९ पृ. ८१४. * अधिकरोति इति व्युत्पत्त्या अधिकारशब्दोक्तस्य चोदकस्य बलीयस्त्वाख्यं समर्थत्वमुपपादयितुम् ‘ तद्ग्रहणाद्वा स्वधर्मः स्यात् ’ इत्यनेन न्यायेन प्रयोगवचनस्य चोदकापेक्षत्वेन दुर्बलत्वमुक्तम् । सु. ३।७ पृ. ४९. * इष्टिपशुबन्धादीनामेतस्मिन्नेव प्राकृते स्वरत्रये (मन्द्र–मध्यम–उत्तमरूपे) प्राप्नुवति प्रत्यक्षोपदेशवशेन प्रधानवेदस्वरप्रसक्तौ ‘ तद्ग्रहणाद्वा स्वधर्मः स्यात् ’ इत्यनेन न्यायेन प्रयोगवचनस्य चोदकापेक्षित्वेन दुर्बलत्वात् चोदकप्रापितस्वरग्रहणमेवेष्टम् । वा. ३।३।२।९ पृ. ८११, * क्व पुनरिदानीं नानावेदस्वरस्यावकाशो भविष्यति ? उच्यते, ‘ तद्ग्रहणाद्वा० ’ इतिवत् कल्पनीयः । यत् प्राकृतस्वराङ्गयुक्तायां विकृतौ वेदान्तरीयं अपूर्वमङ्गं चोद्यते इति । ३।३।२।९ पृ. ८१३.

⧗ **तच्चोदकेषु मन्त्राख्या । २।१।७।३२ ॥**

मन्त्रगतो भावशब्दो विधायको नेति परीक्षितुं कोऽयं मन्त्रो नामेति । वेदवाक्यगतभावशब्दानां गुणकर्मप्रधानद्वैविध्ये अवधारिते तत्प्रसङ्गेन कर्मप्रतिपादकत्वरूपं तृतीयं प्रकारं प्रतिपाद्य इदानीं प्रसङ्गेनैव वेदवाक्यगतमन्त्रपदस्यार्थो निरूप्यते , कोऽयं मन्त्रो नामेति । अत्रायं पूर्वपक्षिणोऽभिसंधिः— न तावत् मन्त्रसंहितायां पाठो मन्त्रलक्षणम्, ब्राह्मणमध्येऽपि मन्त्रपाठदर्शनात् । नापि ब्राह्मणविनियोज्यत्वलक्षणम्, लिङ्गप्रकरणविनियोज्यानामपि मन्त्रत्वात् । नापि अस्यन्तादिरूपता मन्त्रलक्षणम्, ब्राह्मणेऽपि तस्य भावात् , मन्त्रेषु च केषुचिदभावात् । तेन सर्वेषामेव तद्व्यभिचारात् अनेकार्थत्वमेव मन्त्रशब्दस्येति । एवं प्राप्ते , अभिधीयते । भवेदेवं यदि अत्र वृद्धोपदेशो न स्यात् । तथाहि, येषु वाक्येषु वृद्धाः प्रयुञ्जते ‘ मन्त्रानधीमहे ’ ‘ मत्रानध्यापयामः ’ ‘ मन्त्रा वर्तन्ते ’ इति । अभियुक्तमूलं च शब्दार्थावधारणम् । तेन मन्त्रसंहितापाठादीनां व्यभिचारेऽपि अध्यापकवृद्धा यत्र मन्त्रशब्दं प्रयुञ्जते , ते मन्त्रा इति भवति व्यवस्था । तदुक्तम्— ‘ **स्वाध्याये पठ्यमानेषु येषु मन्त्रपदं स्थितम् । ते मन्त्रा नाभिधानं हि मन्त्राणां लक्षणं स्थितम् ॥**’ इति । (‘पदं स्थितम्’ इत्यत्र ‘पदं स्मृतम्’ इति मूले पाठः।) (वा. पृ. ४३७) । प्रयोजनं चात्र लक्षणप्रतिपत्तिलाघवातिरिक्तमन्यन्नास्ति । तदुक्तं भाष्ये— ‘ आक्षेपे चापवादे च प्राप्त्यां लक्षणकर्मणि । प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते ॥ ’ इति । (आक्षेपेष्वपवादेषु इति प्रथमचरणपाठो मूले) (भा. पृ. ४३५) । सूत्रं तु— तदनुष्ठीयमानकर्माभिधानं प्रयोजनं येषां वाक्यानां तानि तथोक्तानि । तेषु मन्त्राख्या मन्त्रशब्दप्रयोग इत्यर्थः । एतदपि प्रायिकत्वात् स्वाध्यायकालाध्यापकत्वयोगलक्षणमेवेति । तौता.

⧗ **तच्चोदकेषु मन्त्राख्या । २।१।७।३२ ॥**

मन्त्रगतो भावशब्दो विधायको न वेति विचारितम् । तत्र कोऽयं मन्त्रो नाम । किञ्च ‘ अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयिविदा विदुः । ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम् ॥ ’ इत्यत्र मन्त्र उक्तः । कोऽयं मन्त्रो नामेति । उच्यते । तच्चोदकेषु तस्य अभिधानस्य अनुष्ठेयार्थप्रकाशनस्य चोदकेषु प्रयोजकेषु वाक्येषु मन्त्राख्या मन्त्र इति आख्या ज्ञातव्या । तथा च अनुष्ठेयार्थस्मारकवेदवाक्यत्वं मन्त्रत्वमिति मन्त्रलक्षणम् । मन्त्रत्वेन शिष्टैरुक्ता मन्त्राः इति तु सामान्यलक्षणम् । के.

⧗ **तत्तद्वचनसामर्थ्यन्यायः** । कार्यप्रवृत्तिवेलायां तत्तन्निमित्तस्य असंनिधानेऽपि तत्तद्वचनसामर्थ्यात् भूतपूर्वमपि तादृशधर्ममादाय तत्तत्कार्यं प्रवर्तनीयम् । (भूतिः पृ. २७४) । तत्तद्वचनसामर्थ्यन्यायसिद्धेयं

'सांप्रतिकाभावे भूतपूर्वगतिः' इति परिभाषा । (शेखर. पृ. २७४)

* **तत्त्वेन** अपरिज्ञातोऽर्थः अनुष्ठीयमानः विहन्ति अनुष्ठातारम् । ज्ञात्वा अनुष्ठितः निःश्रेयसेन संयुनक्ति । बृहती. पृ. १५.

* **तद्देशानां वा संघातस्याचोदितत्वात् । ९।१।६।२५ ॥**

'त्सरा वा एषा यज्ञस्य, तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति' इत्युदाहृत्य, यज्ञभागधर्मो वा एतदुपांशुत्वम्, पदार्थधर्मो वा इति संदिग्धे, यज्ञस्य फलवत्त्वेन धर्मप्रयुक्तसामर्थ्यात् 'यज्ञस्य यत् प्राचीनम्' इति व्यवहितेनापि यज्ञशब्देन प्राचीनशब्दस्य अन्वयप्रतीतेः श्रुत्या च प्राग्देशवाचिनः प्राचीनशब्दस्य लक्षणया तद्देशपदार्थपरत्वायोगात् यज्ञभागधर्मत्वम् (इति) पूर्वपक्षयित्वा, प्राचीनशब्दस्य वीप्सा किञ्चित्किञ्चिच्छब्दसमभिव्याहृतयच्छब्दान्वयात् वीप्सायाश्च बहुविषयत्वेन एकस्मिन् देशे अनुपपत्तेः लक्षणया अग्नीषोमीयप्राग्देशपदार्थपरत्वस्यैव न्याय्यत्वात् पदार्थधर्मता इति सिद्धान्तयितुम् 'तद्देशानाम्' इति सूत्रे अङ्गप्रधानसंघातस्य यज्ञशब्दवाच्यत्वाभावात् साङ्गप्रधानसंघातापेक्षया च प्राग्भाविनः अङ्गजातस्य यज्ञावयवत्वायोगेन प्राचीनयज्ञशब्दान्वयेऽपि अवयवव्यतिरेकजनितषष्ठ्यनुपपत्तेः तत्संबन्धितया उपांशुत्वस्य अचोदितत्वात् न यज्ञभागधर्मता इति वक्ष्यते । सु. पृ. ७३०.

* **तन्निर्धारणानियमाधिकरणे** (३।३।२७।४२) पुरुषार्थत्वमङ्गोपास्तीनामुक्तम् । इह सत्यपि पुरुषार्थत्वे समुच्चये मानं नेत्युच्यते । न्यायनि. ३।३।३६।६१ ब्रसू. * तन्निर्धारणानियमाधिकरणे रसतमत्वादिदृष्टीनां कर्माङ्गत्वाभावान्न कर्मसु नियम इत्युक्तम् । आभरणं. ३।३।३६।६१ ब्र. सू., * कर्माङ्गसमभिव्याहृतसर्वोपासनाविषयकमिदं वाक्यं (यदेव विद्यया करोति– इति वाक्यम्) तन्निर्धारणानियमाधिकरणे दर्शितम् । ४।१।५।६ ब्रसू.

⧗ सिद्धे चोपास्तीनामृत्विक्कर्मत्वे **तन्निर्धारणानियमन्यायेन** स्वतन्त्रफलत्वसिद्धिः । न्यायनि. ३।४।४६ ब्र. सू. । तन्निर्धारणानियमस्तद्दृष्टेः पृथग् ह्यप्रतिबन्धः फलम् । ३।३।४२ ब्रसू. । यानि उद्गीथादिकर्मगुणयाथात्म्यनिर्धारणानि प्रणवः रसतमः आप्तिः समृद्धिः इत्येवमादीनि, नैतानि नित्यवत् कर्मसु नियम्येरन् । तद्दृष्टेः तस्य अनियतत्वस्य दृष्टेः श्रुतौ दर्शनात् 'तेनोभौ कुरुतो यश्चैतदेवं वेद, यश्च न वेद' इति । उपासनस्य कर्मणः सकाशात् पृथक् फलं हि यस्मात् उपलभ्यते अप्रतिबन्धः कर्मफलसिद्धेः प्रतिबन्धाभावजननं तत्समृद्धिः अतिशयविशेषश्च कश्चित् । इति न्यायसूत्रार्थः । के.

⧗ **तन्न्यायत्वाददृष्टोऽप्येवम् । १२।३।९।२३ ॥**

यो मन्त्रो मन्त्रसमाम्नाये त्रैस्वर्येण दृष्टः तस्य तथैव प्रयोगः । यस्तु तत्र न दृष्टो ब्राह्मणेन च भाषिकेण स्वरेणोपदिष्टः, यथा 'तं दै प्रोहेद् वानस्पत्योऽसीति' इति तत्र कः स्वरः स्यात् ? उच्यते । तन्न्यायत्वात् योऽसौ न्याय उक्तः 'मन्त्रोपदेशोऽयं तद्रूपत्वाच्छब्दस्य' इति (२१ सूत्रे) तेनैव न्यायेन मन्त्राम्नाये अदृष्टोऽपि मन्त्रः मन्त्रोपदेशविषयत्वात् प्रावचनेनैव स्वरेण प्रयोज्यः । इति पूर्वः पक्षः ।

तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् । २४ ॥

नैतत् । तदुत्पत्तेः तस्मिन् ब्राह्मणे मन्त्रस्य उत्पत्तेः प्रवचनलक्षणत्वात् प्रवचनमेव लक्षणं यस्य मन्त्रस्य स प्रवचनलक्षणः, तादृशत्वात् । भाषिकस्वर एव तस्य प्रवचनस्वरः । तस्मात् ब्राह्मणोत्पन्नानां मन्त्राणां भाषिकेण स्वरेण कर्मणि प्रयोगः इति सिद्धान्तः । के.

⧗ **तत्परातत्परविरोधे तत्परं बलवत् ।** (सविशेषत्वसूचकानां निर्विशेषत्वसूचकानां च वचनानां बहुत्वेऽपि ब्रह्मणो निर्विशेषत्वमेवेत्यत्र) इति न्यायः नियामकः । (तत्परस्य अतत्परस्य च वाक्ययोर्विरोधे तत्परं बलवत् अतत्परस्य तु अन्यथा लापनम् इत्यर्थः) । न्यायनि. ३।२।५।१४ ब्रसू.

* **तत्पुरुषः** समासः अन्तोदात्तः । वि. ३।२।११.

* **तत्पुरुषात्** कर्मधारयो बलीयान् इति निषादस्थपत्यधिकरणन्यायः । बाल. पृ. ९३. * तत्पुरुषात् बहुव्रीहौ लाघवमङ्गीकृतमिन्द्रपीताधिकरणे इत्याचार्यादयः । मणि. पृ. १४९, * तत्पुरुषात् । व्यधिकरणतत्पुरुषात् समानाधिकरणतत्पुरुषो ज्यायान् यथा निषाद-

स्थपतिः इत्यत्र । पृ. १५०. * तत्पुरुषस्य स्वपदार्थे प्राधान्यात् अन्यपदार्थप्रधानबहुव्रीह्यपेक्षया बलीयस्त्वम् । सु. पृ. ११४१. * 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' (पा० ६।२।२ तुल्यार्थाः शब्दाः, तृतीया, सप्तमी, उपमानम्, अव्ययम्, द्वितीया, कृत्यप्रत्ययाश्च सप्त एते पूर्वपदभूताः तत्पुरुषे प्रकृत्या) । भाट्ट. ३।३।८. * निषादस्थपत्यधिकरणे लक्षणाऽऽपत्त्या तत्पुरुषापेक्षया कर्मधारयस्य प्राबल्यमुक्तम् । मणि. पृ. १४९. * तत्पुरुषलक्षणम्, तत्पुरुषार्थविचारश्च 'समासवादः' इति बिन्दौ मणिग्रन्थे द्रष्टव्यम् । के.

तत्प्रख्यं चान्यशास्त्रम् । १।४।४।४ ॥

'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'आघारमाघारयति' इति च समामनन्ति । तत्र संशयः किमग्निहोत्रशब्दः आघारशब्दश्च गुणविधिः, उत कर्मनामधेयमिति । उद्भिदधिकरणे यौगिकशब्दानां (रूढानां) चित्राऽधिकरणे च सांविज्ञायिकशब्दानां नामधेयत्वं निरूप्य इदानीं योगिकशब्देष्वेव केषुचित् केनचिद् विशेषेण गुणविधिमाशङ्क्य नामधेयत्वं व्युत्पाद्यते । तत्र च 'अग्निहोत्रं जुहोति' इत्युत्पत्तिवाक्यमेवोदाहरणम् । अधिकारवाक्यस्य फलसंबन्धपरस्य गुणपरत्वेऽपि उत्पत्तिवाक्यवैयर्थ्यप्रसङ्गात् भाष्यकारेण विचारविषयाग्निहोत्रपदसंनिधितामात्रेणोदाहृतम् । अत्रायं पूर्वपक्षिणोऽभिसंधिः । भवतु उद्भिदादिपदानां मत्वर्थलक्षणाभयात् नामधेयत्वम् । अग्निहोत्रपदस्य तु सिद्धान्तेऽपि अग्नये होत्रं अस्मिन् इति मत्वर्थीयसमानार्थबहुव्रीहिसमासव्युत्पत्तेः मत्वर्थलक्षणादोषाभावात् चतुर्थ्यभिहितदेवताविधित्वमेव । सति च गुणविधित्वे 'यदग्नये च प्रजापतये च सायं जुहोति' इति 'यत् सूर्याय च प्रजापतये च प्रातर्जुहोति' इति प्रकरणप्राप्तयोर्होमयोर्मध्ये सायंहोमे अग्नेः प्राप्तत्वात् प्रातर्होमे एव अग्निदेवताविधानमिदम् । न च प्रातर्होमवाक्यमेव गुणविधायकम्, अग्निहोत्रवाक्यं चोत्पत्तिपरं इति वक्तव्यम् । यतोऽत्र अनेकगुणानामुपादानं प्रतीयते, तेषां च प्राप्ते कर्मणि विधातुमशक्यत्वात् अत्रैव विशिष्टविधिना कर्मोत्पत्तिः, अग्निहोत्रवाक्ये एव च गुणविधानमिति । ननु प्रातर्होमस्यापि उत्पत्तिशिष्टसूर्यप्रजापतिदेवताऽवरुद्धत्वात् नाग्निदेवताविधानं संभवति । मैवम् । 'यत् सूर्याय च प्रजापतये च' इति चकारद्वयमत्र श्रूयते अन्यतरसमुच्चयस्य एकेनैव चकारेण सिद्धत्वात् अगत्या सायंहोमवाक्ये चकारद्वयस्य इतरेतरसमुच्चयपरत्वम्, इह पुनः अग्निदेवतोपनायकस्य वाक्यस्य संभवात् तत्समुच्चयार्थत्वमेव द्वितीयचकारश्रवणस्य, इति नानुपपन्नं देवतान्तरविधानम् । अथवा, 'यदेकया जुहुयाद्दार्विहोमं कुर्यात्' इत्येतद्वाक्यावगतदूरस्थदेवतारहितदार्विहोमेष्वेव अग्निदेवताविधानमिति ।

तथा 'आघारमाघारयति' इत्यत्र आघार्यते इत्यनया व्युत्पत्त्या क्षरणयोग्यद्रव्यमाज्यपयःप्रभृति 'आघारः' इति प्रतीयते । तच्च 'आघारम्' इति द्वितीयाश्रुत्या आघारणक्रियासंस्कार्यत्वेनावगम्यमानं भक्षणयुक्तफलचमसवत् अभिषवयुक्तपूतीकवच्च प्रयोजनमपेक्षते, प्रकरणे चाश्रुतद्रव्यमुपांशुयाजाख्यं कर्म साकाङ्क्षमस्ति । अतः श्रुतार्थापत्तिकल्पितविनियोगविधिना तत्रैव विधीयते इति । तदुक्तं 'श्रुतसंस्कारसंबन्धं मुख्यैर्यद्यप्यसंगतम् । अन्यथा तदयोग्यत्वात् प्रकृतैर्याति संगतिम् ॥' (वार्तिककारेणानूदितः प्राचीनः श्लोकः । वा. पृ. ३३३) । न च उपांशुयाजस्यापि 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इत्यनेनैव आज्यस्य प्राप्तेः निराकाङ्क्षत्वात् अनर्थकमाघारवाक्येन द्रव्यविधानमिति वाच्यम् । यतः 'सर्वस्मै वा एतद्यज्ञाय गृह्यते' इत्यस्य वाक्यस्य द्रव्यरहिताङ्गप्रधानविषयत्वेन सावकाशत्वात्, अस्य च प्रकरणेन अद्रव्यकप्रधानमात्रविषयत्वात् अनेनैव उपांशुयाजद्रव्यविधानमिति । न च वाच्यम्, द्वितीयाश्रुतिः सक्तुमारुतैककपालादिषु संस्कार्यत्वं व्यभिचरति, अतः कथं तद्बलेन आज्यपयःप्रभृतीनां संस्कार्यत्वम्, कथं च तदुपपत्त्यर्थं कार्यान्तरोपयोगित्वमिति, यतः तत्रैवैतत् द्रव्यं निरन्वयविनाशात् कार्यान्तरोपयोगि न संभवति । अत्र पुनः आघारणस्य द्रव्यैकदेशक्षारणरूपत्वात् क्षारितैकदेशस्य द्रव्यस्य कार्यान्तरोपयोगो नानुपपन्नः । दृष्टं चैतत् लौकिकेऽपि पानादौ उपयोक्ष्यमाणस्य द्रवद्रव्यस्य ईषत्क्षारणसंस्कारः, इत्युपांशुयाजे एव गुणविधानम् । एवं च सति प्रसिद्धार्थत्वं

अधिकार्यत्वं प्रवृत्तिविशेषकरत्वं चानुरुद्धं भवति इति गुणविधानमेवेति । **एवं प्राप्ते , अभिधीयते ।** भवेदेवं यदि अग्निहोत्रपदं अग्नये होत्रमस्मिन् इति व्युत्पत्त्या चतुर्थीसमासेनैव परिनिष्पाद्येत , किन्तु अग्नेर्होत्रम् , अग्नौ होत्रम् , इति षष्ठीसप्तमीसमासयोरपि संभावितत्वात् संदिग्धार्थमग्निहोत्रपदं न विधेयीभूताग्निदेवतासमर्पकं भवति । संभवति तु कुतश्चिद्वाक्यात् प्राप्तमग्निदेवताभूतं प्रवृत्तिनिमित्तीकृत्य होमविधौ नामधेयीभवितुम्, इति तदर्थं वाक्यान्तरमपेक्षते । अस्ति च मन्त्रवाक्यं वाक्यविनियुक्तम् ‘ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति ’ इत्यग्निदेवतासमर्पकम् । अतस्तल्लब्धमेवाग्निं निमित्तीकृत्य अग्निहोत्रपदं नामधेयमिति तदवच्छिन्न एव होमो विधीयते, न त्वन्यत्र गुणो विधीयते । **ननु** पूर्वपक्षी प्रातर्होमे गुणविधिं मन्यते दर्विहोमे वा । प्रातर्होमे तावत् मन्त्रवर्णादग्निदेवताप्राप्तिर्न सिद्धान्तिनोऽभिमता त्रिदेवताकत्वप्रसङ्गात् । नापि दर्विहोमे , तस्य दूरस्थत्वेन मन्त्रसंबन्धाभावात् । अतः कथं तत्प्रख्यशास्त्रवशेन अग्निहोत्रपदस्य नामत्वमिति । **उच्यते** । न ब्रूमो यत्र पूर्वपक्षवाद्यभिमतो गुणविधिः, तत्रासौ अन्येन प्राप्त इति , किन्तु यस्य गुणस्य उपादानसामर्थ्यात् धात्वर्थादुत्तार्यते विधिः, असौ श्रौतधात्वर्थविधावेव शास्त्रान्तरप्राप्तोऽग्निः नामप्रवृत्तिनिमित्तत्वेनानुवदितुं शक्यते , किं श्रुतिपरित्यागेनेति । अयमेव तत्प्रख्यशास्त्रार्थः । तदुक्तम् **‘ विधित्सितगुणप्राप्तिशास्त्रमन्यद् यतस्त्विह । तस्मात् तत्प्रापणं व्यर्थमिति नामत्वमिष्यते ॥’** इति (वा. पृ. ३३४ । ‘ प्रापि शास्त्र ’ इति वार्तिके पाठः) । अत एव नायं गुणविशिष्टहोमविधिः । तदुक्तम् **‘ विधीयतां विशिष्टं चेत् कर्मेत्येवं विकल्प्यते । न चेदन्येन शिष्टाः स्युस्तत्प्रख्यं चेति चोत्तरम् ॥’** (वा. पृ. ३३५) । अतः ‘ अग्निहोत्रं जुहोति ’ इत्येतद्वाक्यं नामावच्छिन्नकर्मोत्पादकमेव , न तु प्रातर्होमे , न च दूरस्थदर्विहोमे , नापि विशिष्टविधिना देवताविधायकमिति । **न च** ‘ यदग्नये च ’ इति वाक्यद्वयमेव होमविधायकमिति वाच्यम् । असंदिग्धानन्यलभ्यगुणविशिष्टत्वेन विशिष्टविधिगोचरहेतुहोमविधानसंभवात् । किन्तु अग्निहोत्रवाक्यप्राप्तहोमानुवादेन गुणविधायकमेव । तत्रापि प्राप्ते कर्मणि अनेकगुणविधानासंभवात् अग्निसूर्ययोश्च मन्त्रवाक्यप्राप्तत्वात् सायंप्रातःकालयोश्च ‘ सायं जुहोति ’ ‘ प्रातर्जुहोति ’ इति वाक्यद्वयलभ्यत्वात् प्रजापतिरेव एको देवतात्वेन वाक्यद्वये विधीयते , अन्यत् सर्वमनूद्यते इति ।

तथा ‘ आघारमाघारयति ’ इत्यत्रापि आघार्यते इति व्युत्पत्त्या आघारणयोग्यं अनिरूपितविशेषं पयआदि द्रवद्रव्यमेव प्रतीयते । अतः संदिग्धार्थमाघारपदं अग्निहोत्रपदमिव नोपांशुयाजविषयीभूताघारद्रव्यविशेषसमर्पकं संभवति । द्रव्यविशेषावगत्यर्थं च प्रकरणनिरीक्षणे ‘ उपस्तृणन् अभिघारयन् आज्यस्यैव यजन् ’ इति वाक्यबलेन ‘ सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यम् ’ इत्यनेन वा विशेषप्राप्तौ ताभ्यामेव असंदिग्धार्थाभ्यां सावकाशत्वेऽपि उपांशुयाजे द्रव्यविशेषप्राप्तेः एतद्विधानं व्यर्थमेव संदिग्धार्थत्वादेव चाघारपदस्य नाघार्यद्रव्यविशिष्टमाघारणं विधीयते इति संभवति । तथा ‘ चतुर्गृहीतं वा एतदभूत् तस्याघारमाघार्य ’ इत्यनेनैव आज्यद्रव्यप्राप्तेः तद्विधानवैयर्थ्यं च । तदुक्तम् **‘ विधित्सितगुणप्रापि ’** इति । संभवति च आघारणमाघारः इति भावव्युत्पत्त्या कर्मनामधेयत्वम् । अतः तदवच्छिन्नमत्रापि कर्मैव विधीयते । तच्च कर्म ‘ इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति ’ इति मन्त्रविनियोगसामर्थ्यात् लब्धेन्द्रदेवतासंबन्धम् । तथा चतुर्गृहीतवाक्यावगतद्रव्यसंबद्धं सत् समरूपमेव आघारनामधेयं दर्शपूर्णमासाङ्गमिति अवधार्यते इति ।

प्रयोजनम्—– पूर्वपक्षे प्रातर्होमस्य दर्विहोमस्य वा अग्निदेवतत्वम् । सिद्धान्ते नेति । सूत्रं तु—– तत्प्रख्यं तत्प्रापकं अग्निहोत्रपदेन आघारपदेन च यद्विधातव्यं तद्विधायकमिति यावत् । अन्यशास्त्रं शास्त्रान्तरं चेदस्ति तेनानयोर्नामधेयत्वमेवेति । तौता. १।४।४।४.

तत्प्रख्यं चान्यशास्त्रम् । १।४।३।४ ॥

‘ अग्निहोत्रं जुहोति ’ ‘ आघारमाघारयति ’ इति अग्निहोत्रशब्दः आघारशब्दश्च किं गुणविधिः, उत कर्मनामधेयमिति विचारे सिद्धान्तमाह । विधेयतया इष्टो

यो गुणः अग्निरूपः आज्यरूपो वा, तं गुणं प्रचष्टे विधत्ते इति तत्प्रख्यम्। 'आतश्चोपसर्गे' (पा. ३।३।१०६) इति कः। विधित्सितस्य अग्न्यादिगुणस्य प्रख्यापकं विधायकं अन्यत् शास्त्रमस्ति। 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति मन्त्रः 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यादि वाक्यं च अन्यत् शास्त्रम्। एवम् 'प्राञ्चमाघारयति संततमाघारयति' 'इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति' इति आघारविषयकमन्यत् शास्त्रम्। तस्मात् अग्निहोत्रं आघारः इति कर्मविशेषनामधेयमेव, न गुणविधायकम्, इति सिद्धान्तः। के.

* **तत्प्रख्याधिकरणे** वाक्यान्तरतो द्रव्यदेवतालाभस्य उक्तत्वात्। तत्प्रख्यन्यायः। सु. पृ. ७६३. * **तत्प्रख्याधिकरणोक्तमार्गेण** (अग्निहोत्रशब्दे) चतुर्थीसमासस्य व्याकरणलक्षणाननुगततया। कौ. २।२।५।१५, * 'यदग्नये च प्रजापतये च' इत्यत्र **तत्प्रख्याधिकरणोक्तमार्गेण** प्रजापतिमात्रविधानेन, सायंप्रातःकालीनदेवतासमुच्चयविशिष्टप्रजापतिमात्रविधानेन वा अग्निसूर्यादीनां मन्त्रवर्णैः प्राप्तिमभ्युपगम्य तृतीयविधिप्रकारोपपत्तेः। २।२।५।१६ पृ. १९९.

⌛ **तत्प्रख्यन्यायः** । अग्निहोत्राघारशब्दौ कर्मनामधेयम्॥

तत्प्रख्यं चान्यशास्त्रम्। १।४।३।४॥

भाष्यम्— 'अग्निहोत्रं जुहोति स्वर्गकामः' इति; 'आघारमाघारयति' इति च समामनन्ति। तत्र संशयः किमग्निहोत्रशब्दः आघारशब्दश्च गुणविधी, उत कर्मनामधेये इति। गुणविधी इति ब्रूमः। कुतः? गम्यते हि, अग्नये होत्रमस्मिन्निति। तथा क्षरणसमर्थं द्रव्यं घृतादि, आघारमाघारयति इति। प्रसिद्धिरेवमनुग्रहीष्यते। गुणविधिश्च दर्विहोमे, आघारश्चोपांशुयाजे। तत्र एतयोरर्थवत्ता प्रवृत्तिविशेषकरत्वं च। न च गुणविधिपक्षे लक्षणा भवति यथा उद्भिदा यजेत इति। अग्निहोत्रे समासेन अवगतं गुणविधानम्। आघारेऽपि, आघारं निर्वर्तयतीति श्रुत्यैव गुणो विधीयते। तस्मात् गुणविधी इति। एवं प्राप्ते, ब्रूमः। तत्प्रख्यं चान्यशास्त्रम्। यौ गुणौ एताभ्यां विधीयेते इत्याशङ्क्यते तौ अन्यत एवावगतौ। 'यदग्नये च प्रजापतये च सायं जुहोति' इति देवताविधानम्, 'चतुर्गृहीतं वा एतदभूत् तस्याऽऽघारमाघार्य' इत्याघारे च द्रव्यविधिः। अविदितवेदनं च विधिरित्युच्यते। विदितं चात्र अन्यतो गुणविधानम्। तस्मान्न गुणविधी, कर्मनामधेये तु संभवतः। यस्मिन् अग्नये होत्रं होमो भवति तदग्निहोत्रम्। दीर्घधारा क्षरणक्रिया प्रसिद्धः एव आघारः। तस्मात् कर्मनामधेये। प्रसिद्ध्यादयश्च उक्तोत्तराः। प्रजापतिनिवृत्त्यर्थमग्निविधानं भविष्यतीति चेत्, नैतदेवम्। अग्निं ह्येष विधातुं शक्नोति, न प्रजापतिं प्रतिषेद्धुं प्रतिषिध्यमानस्य च प्रजापतेर्विधानं अनर्थकं स्यात्। प्रजापतिर्देवतेति गम्यते। गम्यमानं च न शक्यं मिथ्येति कल्पयितुम्। अतोऽयमसमाधिः। उच्यते। 'आघारमाघारयति' इति द्रव्यपरा चोदना 'यैस्तु द्रव्यं चिकीर्ष्यते' इति। द्रव्यं हि अनया क्रियया क्षार्यते। क्षारितं च यागं साधयति। तत् कस्य प्रधानस्य कर्मणो नामधेयमिति? उच्यते। एतदेव आघारणं प्रधानकर्म। नन्वस्य द्रव्यदेवतं नास्ति। अस्तीति ब्रूमः। 'तस्याघारमाघार्य' इत्याज्यं द्रव्यम्, मान्त्रवर्णिकी देवता। 'इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति' इति मन्त्रो हि अभिदधत् कर्म तत्साधनं वा कर्मणि समवैति। एष च मन्त्र इन्द्रमभिधातुं शक्नोति। स यदि इन्द्रस्तत्साधनं भवेत् एवमनेन मन्त्रेण आघारः शक्यते कर्तुम्। तस्मादिन्द्रो देवता। द्रव्यदेवतासंयुक्तमाघारणम्। तस्माद्यजतिः, तस्य यजतेर्नामधेयमिति।

वा— ननु सर्वत्र द्विप्रकारमेव नामपदम्, सांविज्ञायिकम् (रूढम्) यौगिकं च। उभयमपि च अधिकरणद्वयेन प्रतिपादितम्। किमिदानीमवशिष्यते, येन पुनर्विचार्यते? उच्यते। यौगिकानामेव मत्वर्थलक्षणापरिहारेण अत्र चिन्ता। उत्तराधिकरणे तु सांविज्ञायिकानां वाक्यभेदासंभवात्। तत्र अग्नये होत्रं (होमः) अस्मिन् इति सिद्धान्तेऽपि अभ्युपगमात् अन्यसमासार्थानुपलब्धेश्च अन्तर्णीतमत्वर्थो बहुव्रीहिः अखेदेन गुणं विधत्ते। ते एव च प्रसिद्ध्यादयो हेतवः सत्यामपि च सायंहोमे अग्निप्राप्तौ तद्वर्जं प्रातर्होमे होममात्रानुवादाद्वा

सर्वदर्विहोमेषु अविहितदेवताकेषु विधास्यति वाक्यसामर्थ्यात् । तथा आघार्यते इति आघारः इति क्षारणसमर्थं द्रव्यं आज्यपयःप्रभृति अभिधीयते । तच्च द्वितीयानिर्देशात् क्षारणक्रियासंस्कार्यत्वेन अध्यवसीयमानं अनुपयुज्यमानसंस्कारानुपपत्तेः प्रयोजनमपेक्षते । धर्ममात्रं चास्य क्षारणं शब्दार्थमात्रापवर्गित्वात् नाशेषक्षारणं करोति । तत्क्षारितैकदेशेन किं कर्तव्यम् ? इति अस्त्यपेक्षा । लोकेऽपि च द्रवद्रव्याणां क्वचित् पानादौ उपयोक्ष्यमाणानां ईषत्क्षारणसंस्कारं कुर्वन्ति । तेन अभिषवयुक्तपूतीकवत् भक्षणयुक्तफलचमसवच्च संस्कार्यं द्रव्यं कर्ममात्राभिलाषि । प्रकरणवशेन दर्शपूर्णमासप्रधानानि उपसर्पति । तत्रापि च आग्नेयादीनां विहितद्रव्यकत्वात् उपांशुयाजः केवलः साकाङ्क्षः इति तादर्थ्यं प्रतिपद्यते । आह च 'श्रुतसंस्कारसंबन्धं मुख्यैर्यद्यप्यसंगतम् । अन्यथा तदयोग्यत्वात् प्रकृतैर्याति संगतिम् ॥' अथवा यत् 'करोति' इति प्रत्ययार्थमात्रं साकाङ्क्षत्वादेव उपांशुयाजभावनामनूद्य आघारद्रव्ये वाक्येन विधीयमाने तत्साध्यत्वादेव धात्वर्थः प्राप्तः अनूद्यते । ध्रौवप्राप्त्यैव वा तस्य क्षरणात्मकत्वे विज्ञाते क्षरणसमर्थमात्रपयःप्रभृतिविधिं मन्यते । न च धात्वर्थादेव सिद्धेः नाम्ना प्रयोजनम् । न च संस्कारकर्माणि क्वचित् नामवन्ति दृश्यन्ते ।

'श्रुत्यैव गुणो विधीयते' इति (भाष्यम्)। द्वितीयाश्रुत्यैव संस्कार्यत्वात् अवश्यं क्वचित् अस्य गुणत्वमित्यवगमाभिप्रायम् । अत्रोच्यते । 'विधित्सितगुणप्रापि शास्त्रमन्यद् यतस्त्विह । तस्मात् तत्प्रापणं व्यर्थमिति नामत्वमिष्यते ॥' (शङ्कते–) अत्र वदामः, 'सायंहोमे यदि ब्रूयादाघारे च परो विधिम् । ततः शास्त्रान्तरप्राप्तेर्विधिः स्यान्निष्प्रयोजनः ॥ यदा त्वदेवते होमे देवताविधिरुच्यते । द्रव्यं चोपांशुयाजस्य तदा तत्प्रख्यता कथम् ॥' उच्यते । 'विधिश्चेदग्निहोत्रं स्यात् ततोऽस्य विषयैषिणः । निवेशः प्रकृते वा स्याद् युक्तेरप्रकृतेऽपि वा ॥ अग्नेर्होत्रेण संबन्धे कृतेऽन्येन प्रवर्तनात् । अग्निहोत्रपदे स्पष्टमनुवादत्वलक्षणम् ॥ अनूद्य चापि धात्वर्थ गुणः सर्वो विधीयते । न चानुवादः प्रकृतात् कर्मणोऽन्यत्र लभ्यते ॥ प्रकृतं चेदनूद्यायं गुणो होमे विधीयते । तत्र तत्प्रख्यताऽन्यत्र न विधिस्तत्परिग्रहात् ॥ न च धात्वनुवादोऽत्र कथञ्चिदुपपद्यते । प्रकृताप्रकृताभावात् तस्मात् कर्म विधीयते ॥ सायमूर्ध्वादिसंयुक्तैर्गुणो वाक्यैर्विधीयते । शुद्धं न श्रूयते कर्म प्रकृतं नास्ति तेन तत् ॥ दूरस्थस्यानुवादश्च व्यवधानान्न युज्यते । तस्य बुद्धावनारोहात् कौण्डपायिनहोमवत् ॥ विधीयतां विशिष्टं चेत् कर्मेत्येवं विकल्प्यते (अन्यथा पूर्वपक्षो रच्यते इत्यर्थः) । न चेदन्येन शिष्टाः स्युस्तत्प्रख्यं चेति चोत्तरम् ॥ न चतुर्थीसमासस्य लक्षणं चात्र विद्यते । न च तेन विना शक्या देवताविधिकल्पना ॥ यः कश्चिदेव संबन्धः षष्ठीतत्पुरुषाद् भवेत् । अनुवादेऽन्यतः सिद्धे कथ्येताप्यश्वघासवत् ॥ विधातव्यश्च संबन्धो भवेत् परपदार्थयोः । प्रातर्होमेऽपि तेनैष वह्निर्नैव विधीयते ॥ एकदेशेऽपि च ज्ञानान्नानुवादोऽपगच्छति । आघारस्यापि संबन्धः क्लेशेनोपांशुकर्मणा ॥ सामानाधिकरण्यं च साध्यांशेनेह कर्मणः । विस्पष्टं द्रव्यनामत्वं न चाऽऽघारस्य गम्यते ॥'

शा-- अत्रोच्यते 'वाक्यार्थो न विधातव्यो धात्वर्थविधिसंभवे । पदान्तरं न चानन्यगतिनामत्वसंभवात् ॥' (प्राभाकरास्तु–"प्रवृत्तिहेतुभूतकार्याभिधानं लिङादीनां व्युत्पन्नम् । प्रवृत्तिहेतुत्वं च विलक्षणकार्यस्यैव, कार्यसामान्यज्ञाने प्रवृत्त्यदर्शनात् । एवं च विशेषतः कार्यप्रतिपत्त्यर्थं अवच्छेदकापेक्षायां धात्वर्थः अवच्छेदकतया संबध्यते । यद्यपि धात्वर्थः साक्षात् कार्यमवच्छेत्तुं न क्षमते, तथापि 'यागकृतिसाध्यमपूर्वम्' इत्येवं कृत्यवच्छेदद्वारा कार्यं अपूर्वमवच्छेत्तुं शक्नोति, इति धात्वर्थः अवच्छेदकत्वेन संबध्यते । अवच्छेदकत्वमेव विषयत्वम्, इति धात्वर्थस्य यागादेः लिङाद्यर्थे कार्ये प्रतिपत्त्यनुबन्धितया विषयत्वेनान्वयः । तथा कार्यं कृतिसाध्यं भाव्यं इति पर्यायः । ततश्च भाव्यरूपापूर्वोद्देशप्रवृत्ता या कृतिः, सा भावनेत्युच्यते ।

सा च क्रियात्वात् करणमन्तरेणानुपपन्ना, इति कृतिसाध्यलक्षणकार्यस्य स्वनिष्पत्त्यर्थे स्वसाधनार्थप्रवृत्तकृतिरूपभावनामुखेन करणापेक्षायां धात्वर्थ एव उत्पत्त्यनुबन्धित्वेन करणतयाऽपि संबध्यते । परोद्देशप्रवृत्तकृतिव्याप्यत्वं हि करणत्वम् । संभवति च धात्वर्थस्य अपूर्वोद्देशप्रवृत्तकृतिव्याप्यस्य करणत्वमिति । तस्मात् धात्वर्थो विषयतया करणतया च अन्वीयते " इति वदन्ति । तन्मतं निरस्यति–) एतेन (धात्वर्थस्य करणतया साध्यतया चान्वयनिरसनेन) ये धात्वर्थस्य विषयतया करणत्वेन चान्वयं मन्यन्ते, ते निराकृताः । विषयभूतेन हि कथं करणवाचिनां नामधेयानां सामानाधिकरण्यम् ? आर्थिकेन करणत्वेन सामानाधिकरण्यमिति चेत्, साध्यत्वमपि तर्हि आर्थिकमस्ति, इति गुणविधिरपि विनैव मत्वर्थलक्षणतया, विना च वैरूप्येण स्यात्, इति समस्तमेव नामधेयप्रतिपादनमनुपपन्नं स्यात् (यद्यपि तन्मते करणत्वमौपादानिकम्, न त्वार्थिकं इत्यस्ति वैषम्यम्, तथापि करणत्वं विना अनुपपद्यमानो विधिरेव साध्यत्वं विना करणत्वानुपपत्तेः साध्यत्वमपि आक्षिपेत्, इति साध्यत्वमपि औपादानिकं स्यात्, इति साम्यमिति भावः) । अथ विषयत्वद्वारेण करणत्वपर एव शब्दः ततः अन्यपरेण शास्त्रेण उपायमात्रत्वेनोपात्तं विषयत्वं न शास्त्रार्थः स्यात्, अतत्परत्वात् (शब्दान्तराधिकरणे तैर्विषयत्वस्य शास्त्रार्थत्वव्युत्पादनात् विरोधप्रसङ्गात्) ! अथ शब्द एव प्रथमं विषयतया अभिधाय पुनः करणतयाऽपि अभिधत्ते, कथं सकृदुच्चरितो द्विरभिदध्यात्, अभिधाने वा साध्यत्वमपि पुनरभिदधीत, नहि नियामकमस्ति 'द्विरेवाभिधत्ते, न त्रिः' इति, 'सकृत् प्रवृत्तायाः किमवगुण्ठनेन' इति न्यायात् । ततश्च गुणविधिरपि स्यात् इत्युक्तम् । अतः करणत्वेनैवान्वयो वाच्यः, न विषयत्वेन इत्यास्तां तावत् ।

कथं द्वितीयाश्रुतिनिर्देशः (' आघारमाघारयति ' ' अग्निहोत्रं जुहोति ' इत्यत्र) इति वक्तव्यम् । तदुच्यते । अस्ति तावदार्थिकं धात्वर्थस्य साध्यत्वम्, असाधितस्य करणत्वानुपपत्तेः । अतः साध्यत्वसाधनत्वयोर्द्वयोः एकार्थसमवायात् साध्याभिधायिनी द्वितीया साधनत्वमेव लक्षयन्ती धातुसामानाधिकरण्यं प्रतिपद्यते इत्यविरोधः ।

सोम— इह गुणविधित्वेऽपि न वाक्यभेदः इत्युत्थानात् संगतिः । **सूत्रार्थस्तु**– तस्य विधित्सितगुणस्य प्रख्यं प्रख्यापकं अन्यत् शास्त्रं यत्र, तदपि नामधेयं स्यात् इति ।

वि—'अग्निहोत्रं जुहोत्याघारमाघारयतीत्यमू । विधेयौ गुणसंस्कारावाहोस्वित् कर्मनामनी ।।, अग्नये होत्रमत्रेति वहुव्रीहिगतोऽनलः । गुणो विधेयो नामत्वे रूपं न स्यात् क्षरद्घृते ।।, संस्क्रियाऽऽघारमाघारयतीयुक्त्वा द्वितीयया । आघारेत्यग्निहोत्रेति यौगिके कर्मनामनी ।। अग्निर्ज्योतिरिति प्राप्तो मन्त्राद् देवस्तथा घृतम् । चतुर्गृहीतवाक्योक्तं द्वितीयायास्त्वियं गतिः ।। नासाधिते हि धात्वर्थे करणत्वं ततोऽस्य सा । साध्यतां वक्ति संस्कारो नैवाशङ्क्यः क्रियात्वतः ।। '

भाट्ट—इह रूढानां यौगिकानां वा संभवत्प्राप्तिकानाम् ' अग्निहोत्रं जुहोति ' 'आघारमाघारयति' 'समिधो यजति' इत्यादौ अग्निहोत्रादिपदानां गुणविधित्वम्, कर्मनामधेयत्वं वेति चिन्तायाम्, प्रसिद्धेर्गुणविधित्वमेव युक्तम् । न च वाक्यभेदः, विधेयानेकत्वाभावात् । अग्निहोत्रपदे ' अग्नये होत्रमस्मिन् ' इति व्युत्पत्त्या उपसर्जनार्थः अग्निर्देवता विधीयते । न च ' यदग्नये च प्रजापतये च सायं जुहोति ' इत्यनेन तस्याः प्राप्तत्वादविधानम्, तत्रानेकगुणोपादानेन विशिष्टकर्मान्तरविधेरावश्यकत्वात् एतद्वाक्यविहितकर्मणि तत्प्राप्तेरभावात् । अतो यत्र दर्वीहोमादौ आग्नेयो मन्त्रः पठितः,तादृशदर्वीहोमानुवादेन देवतामात्रमनेन विधीयते । न च तेन तत्प्राप्तिसंभवः, मान्त्रवर्णिकविधेः अकल्पनीयत्वात् । विशिष्टकर्मान्तरं वा । आघारपदेऽपि द्वितीयान्ताघारपदेन क्षरणसाधनाज्यादिद्रवद्रव्यमभिधीयते । धातुना क्षरणाख्यः संस्कारः तदुद्देशेन विधीयते, अविनियुक्तस्य संस्कारायोगात् । प्रकरणकल्पितवाक्येन उपांशुयागाङ्गतया द्रवद्रव्यं विधीयते । ' चतुर्गृहीतं वा एतदभूत्, तस्याघारमाघार्य ' इत्यनेन प्रयाजाङ्गभूतचतुर्गृहीतविशेषसमर्पणम् । सर्वथा आघारपदं द्रव्यपरम्, न नामधेयम् । इति प्राप्ते, मन्त्रवर्णकल्प्यविधिनैव प्राप्तिसंभवे अस्य पूर्वप्रवृत्तविधि-

वैफल्यापत्तेः । अभ्युदयशिरस्कत्वस्य च संभवति प्रथमविध्यापादकधात्वर्थविधौ अन्याय्यत्वात् न तावत् दर्वीहोमानुवादेन देवताविधिः । नापि विशिष्टकर्मान्तरविधिः 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा' इति वचनेन विनियुक्तमन्त्रवर्णेनैव देवताप्राप्तेः । 'यदग्नये च प्रजापतये च सायं जुहोति, यत् सूर्याय च प्रजापतये च प्रातः' इत्यत्र सायप्रातःकालीनदेवतासमुच्चयविशिष्टप्रजापतिमात्रविधानम् । अत एव यथैव केवलदेवत्यमन्त्रलिङ्गेन केवलयोर्देवतात्वम्, तथा 'अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेतिं सायं जुहोति, सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः' इति मिश्रलिङ्गकमन्त्रवर्णात् .मिश्राणामपि तत् (देवतात्वम्)। ततश्च 'यदग्नये च' इति वाक्यस्थाग्निसूर्यपदं सायंप्रातःकालीनदेवतालक्षकम् । सायंप्रातःकालपदं तात्पर्यग्राहकम् । चशब्दोपस्थितसमुच्चयस्य प्रजापतौ अन्वयस्य निपातोपसर्गार्थत्वेन व्युत्पन्नत्वात् न विधेयानेकता । अतश्च अग्नेर्देवतात्वादिना अग्निहोत्रहोमे प्राप्तत्वात् अग्निहोत्रहोमे 'अग्नेर्होमः' इति व्युत्पत्त्या नामधेयम् । एवमाघारेऽपि उपांशुयाजे 'सर्वस्मै वा एतद् यज्ञाय गृह्यते, यद् ध्रुवायामाज्यम्' इत्यनेनैव द्रवद्रव्यस्य प्राप्तत्वात् प्रयाजोद्देशेन संस्कारविधाने द्वितीयविधिप्रकारापत्तेः लाघवात् भावव्युत्पन्नमाघारपदं नामधेयम् । विधेयश्च धातुलक्ष्यो होम एव । 'इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति' इति मान्त्रवर्णिकेन्द्रदेवतायाः, 'चतुर्गृहीतं वै' इत्यनेन द्रव्यस्य च लाभात् । एवं समिदादिष्वपि वक्ष्यते । सर्वत्र द्वितीया करणत्वलक्षणार्था इति न विरोधः ।

मण्डन— 'अग्निहोत्रपदं नाम ।'

शंकर— 'तत्प्रख्यन्यायतो नाम ।' ४.

* **तत्प्रख्यन्यायस्तु** कर्मान्तरसिद्ध्युत्तरकालः संभवन्नपि ततः पूर्वमनुपस्थितेर्न नामधेयत्वबोधकः । कौ. २।२।८।२१ पृ. २५०, * एकदेशप्रवृत्तिनिमित्तेनापि **तत्प्रख्यन्यायेन** नामधेयत्वोपपत्तिः वैश्वदेवाधिकरणे वक्ष्यते । १।४।४।४ पृ. २१०, * 'न प्रवृत्तिनिमित्तमपि तत्प्रख्यन्यायेन संपादनीयम्' इति नियमः किन्तु तस्य सहकारिसहकृतस्य शुद्धस्य वा गुणविध्यसंभवसंपादकत्वमात्रम् । १।४।११।१४ पृ. २५१, * नामधेयत्वं च (वैश्वदेवशब्दस्य) उत्पत्तिशिष्टगुणावरोधसहकृतेन तत्प्रख्यन्यायेन गुणविध्यसंभवसंपादनद्वारा स्वापादितप्रकृतिनिमित्तसंपादनद्वारा वा अवगन्तव्या, न तु शुद्धेन तत्प्रख्यन्यायेनैव । १।४।११।१४ पृ. २५०, * ('विश्वदेवशब्दस्य क्लृप्तामपि देवताविशेषरूढिं परित्यज्य विश्वशब्दस्य सर्वशब्दपर्यायत्वाङ्गीकारेण प्रकृतसर्वविषयत्वमापाद्य देवशब्दस्य च देवतापरत्वमङ्गीकृत्य प्रकृताग्न्यादिसर्वदेवताकत्वस्यैव अष्टस्वपि यागेषु प्रवृत्तिनिमित्तत्वमङ्गीक्रियते' इति पक्षे) नावश्यं **तत्प्रख्यन्यायस्य** नामत्वपर्यन्तव्यापारोऽभ्युपगन्तव्यः । १।४।११।१४ पृ. २५१, * **न च** संज्ञाया अपि प्रकृते (समित् तनूनपात् इ०) तत्प्रख्यन्यायसिद्धत्वेन अभ्यासस्य यागविध्यधीनत्वाभावात् इति **वाच्यम्** । प्रकृतोदाहरणेऽपि तत्प्रख्यस्य **(तत्प्रख्यन्यायस्य)** गुणविधिमात्रप्रतिबन्धकत्वात् । २।२।२।२ पृ. १५०.

* **तत्प्रख्यन्यायस्वरूपम्-- 'वाक्यार्थो न विधातव्यो धात्वर्थविधिसंभवे'** इति । शा. १।४।४. * तत्प्रख्यन्यायस्वरूपं 'विधित्सितगुणप्रापि शास्त्रमन्यद् यतस्त्विह । तस्मात् तत्प्रापणं व्यर्थमिति नामत्वमिष्यते ॥' इति । **वा.** १।४।३।४ पृ. ३३४.

(अथ ये पदार्थाः तत्प्रख्यन्यायेन साध्यन्ते, ते पदार्थाः वर्णक्रमानुसारेण स्थूलाक्षरैर्निर्दिश्यन्ते । न तु बिन्दूनामाद्याक्षरगतक्रमेण) ।

* 'अथातोऽग्निमग्निष्टोमेनानुयन्ति' अत्र अग्नि**पदस्य** यागपरत्वं गम्यते । अस्ति च आहवनीयप्राप्त्या तत्प्रख्यन्यायः । पूर्वपक्षे । कौ. २।३।१०।२१ पृ. ६५, * **अग्निष्टुत्पदम्** 'आग्नेयीषु स्तुवते' इति वचनात् अग्निदेवत्यमन्त्रसाध्यस्तोत्राङ्गकत्वात् तत्प्रख्यन्यायेन नामधेयम् । २।२।१२।२६ पृ. २७८. * तत्प्रख्याधिकरणे **अग्निहोत्रस्य** अग्निसूर्यमात्रप्रधानदेवत्यत्वस्य निरूपितत्वात् । कु. ३।४।२।११, * तत्प्रख्यन्यायेन **अग्निहोत्रादिशब्दाः** नामधेयानि । १।४।१२।१५. * 'अग्निहोत्रं जुहोति' इत्यस्योत्पत्तिविधित्वम् 'दध्ना जुहोति' इत्यादीनां च गुणविधित्वमुक्तमिति चेत् सत्यम् । अग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं

नोपलभ्यते, तथापि **अग्निहोत्रशब्दस्य** तत्प्रख्यन्यायेन नामधेयत्वादित्युक्तमिति । **साहस्री.** ८५३. * चतुर्थीतत्पुरुषचतुर्थीगर्भबहुव्रीह्योरसंभवात् (**अग्निहोत्रशब्दे**) नैयमिके नामधेयत्वपक्षे तत्संभवः तत्प्रख्याधिकरणे प्रपञ्चितः । **सोम.** ७।३।१. * '**आग्नेयोऽ**ष्टाकपालः' इत्यत्र मान्त्रवर्णिकदेवताप्राप्तेरसंभवात् नेदम् (आग्नेयपदम्) तत्प्रख्यन्यायेन नामधेयम् । **कौ.** १।४।७।९ पृ. २३०. * **आग्नेयादीनां** अष्टानामपि यागानां नामधेयं वैश्वदेवशब्दः (चातुर्मास्येषु प्रथमे पर्वणि) उत्पत्तिशिष्टदेवताऽवरोधसहकृततत्प्रख्ययान्यात् । **भाट्ट.** १।४।११. * **आग्नेयादिशब्दस्य** 'चतुरवत्तं जुहोति' इति श्रुतहोमनामत्वेन पूर्वपक्षो भविष्यति । चतुरवत्तवाक्यात् होमनिष्पत्तावपि आग्नेयादिशब्दानां कथं तन्नामता इत्याशङ्क्य, क्रमविनियुक्तमन्त्रवशात् देवताप्राप्तेः तत्प्रख्यन्यायेनैव (तेषां तन्नामता) । **सु.** पृ. ४५८, * ननु **आघारकर्मणो** द्रव्यदेवताऽन्वयेन यागरूपतायाः तत्प्रख्याधिकरणे अभिहितत्वात् । पृ. ७६१. * तत्प्रख्याधिकरणे **आघारशब्दः** क्षारणशिरस्कयागात्मकहोमे वर्तते इत्यवोचाम । **कु.** २।३।९।२०. * संज्ञात्वं च **ग्रहणस्य** (अदाभ्यादिग्रहणस्य) ग्राह्यसंस्कारत्वप्रसिद्धेः ज्योतिष्टोमाङ्गताबलेन तदीयसोमसंस्कारार्थत्वप्रतीतेः शक्यार्थस्य तत्प्रख्यन्यायेन प्राप्तत्वात् । **कौ.** २।३।९।२० पृ. ६३. * ननु दक्षिणानयनोत्तरकालं एतद्होम–(दाक्षिणहोम–) विधानात् क्रमेणैव दक्षिणाकालत्वप्राप्तेः तत्प्रख्यन्यायेन **दक्षिणाशब्दस्य** नामत्वात् गुणविधित्वं नास्ति इत्याशङ्कते । **सु.** पृ. ७०३, * ननु अग्निहोत्रादिनामवत् **दधिपदस्यापि** वैकल्पिकदधिप्राप्तेः (दध्नेन्द्रियकामस्य इत्यत्र) तत्प्रख्यन्यायेन नामत्वोपपत्तेः विधातव्यार्थत्वायोगात् । पृ. ८४४. * **दर्विहोमशब्दस्य** तत्प्रख्यन्यायेन नामत्वं सिद्धम् । नामत्वस्य तत्प्रख्यन्यायसिद्धत्वादेव गुणविधित्वमुक्तम् । **सोम.** ८।४।१. * **नवरात्रपदमत्र** कर्मनामधेयं तत्प्रख्यन्यायात् । (आश्विने मासे देव्याः नवरात्रम्) । **व्रतराजः.** * **पौर्णमासी–अमावास्याशब्दः** 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति वाक्यद्वयप्राप्तपौर्णमास्यमावास्याकालयोगेन तत्प्रख्यन्यायेन नामधेयम् । **कौ.** २।२।३।३ पृ. १६३, * **बहिष्पवमानशब्दस्तु** सदसो बहिर्भावस्य आस्तावरूपदेशविधानादेव प्राप्तत्वात् तत्प्रख्यन्यायेनापि नामधेयं तत् । १।४।३।३ पृ. १८७, * तत्प्रख्यन्यायेन **वाजिनपदेन** आमिक्षायागमात्रमनूद्य वाजिदेवता उत्पन्नशिष्टाऽपि वचनाद् विधीयते (पूर्वपक्षे) । २।२।९।२२ पृ. २५८, **वैश्वदेव–दर्विहोमादि**पदानामपि तत्प्रख्यन्यायादेव नामधेयत्वम् । १।४।५।५ पृ.२१८,* न च **समिदादिदेवतानां** याज्यामन्त्रवर्णैरेव संभवत्प्राप्तिकत्वात् अग्निहोत्रं जुहोतीतिवत् तत्प्रख्यन्यायविषयत्वोपपत्तिः 'वसन्तमृतूनां प्रीणामि' इत्याद्यनुमन्त्रणमन्त्रैः वसन्तादिदेवतानामपि प्राप्तिसंभवेन समिदादीनां नित्यप्राप्त्यभावात् । २।२।२।२ पृ. १४४, * **समिदादिपदानां** तत्प्रख्यन्यायेन नामधेयत्वात् । २।२।२।२ पृ. १४८. * प्रयाजेऽपीति चेत् (९।२।२०।५८) इत्यधिकरणे श्रुत्यविनियुक्तानां मन्त्राणां स्वार्थसमवायकल्पकत्वासंभवात् मान्त्रवर्णिकदेवताप्राप्त्यभावेन तत्प्रख्यन्यायाभावात् नामधेयत्वानुपपत्तेः 'विष्णुं यजति' इतिवत् **समिदादिशब्दानां** द्वितीयान्तानां देवानां विधित्वं पूर्वपक्षयित्वा । **सु.** पृ. ७१९. * 'सोमेन यजेत' इत्यत्र **सोमशब्दः** 'सोमं क्रीणाति', 'सोममभिषुणोति' इत्यादिवाक्यप्राप्तार्थानुवादी भवन् तत्प्रख्यन्यायेन नामधेयं भवति । पूर्वपक्षः । **कु.** २।२।६।१६, * अभिषवादिवाक्यतः सोमप्राप्तिमुपजीव्य सोमवाक्ये **सोमशब्दस्य** तत्प्रख्यन्यायेन ऐन्द्रवायवादियागनामधेयत्वं निरस्तम् । २।२।६।१७. * **स्वाहाकारशब्दः** तत्प्रख्यन्यायेन नामधेयम् । **कौ.** २।२।२।२ पृ. १४५.

* **तत्प्रख्यशास्त्रार्थः**– यस्य गुणस्य उपादानसामर्थ्यात् धात्वर्थादुत्तार्यते विधिः, असौ श्रौतधात्वर्थविधावेव शास्त्रान्तरप्राप्तो नामप्रवृत्तिनिमित्तत्वेन अनुवदितुं शक्यते, किं श्रुतिपरित्यागेन–इति । **तौता.** तत्प्रख्ये ।

* '**तत्प्रधानानि अतत्प्रधानेभ्यो बलीयांसि भवन्ति**' एष विनिगमनायां हेतुः, येन उभयीष्वपि

श्रुतिषु सतीषु अनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति । शांभा. ३।२।५।१४ ब्रसू.

* **तत्प्रयुक्तत्वं** तत्प्रयोजनवत्त्वम् । सु. पृ. १३७९.

* **तत्प्रवृत्तिर्गणेषु स्यात्** (८।१।८।१५) इति अष्टमाधिकरणे प्राजापत्येषु एकादशिनीविध्यन्तातिदेशस्य वक्ष्यमाणत्वात् तस्य न्यायस्य भिन्नयागविषयत्वात् । सु. पृ. ८१३.

⧗ **तत्प्रवृत्तिर्गणेषु स्यात् प्रतिपशुयूपदर्शनात् । ८।१।८।१५ ॥**

ऐकादशिनेषु पशुषु प्रत्येकं भिन्नो यूपो भवति । गणाः अत्र पशुगणा विवक्षिताः । ‘ वसन्ते ललामान् त्रीन् वृषभानालभते ’ इति ‘ मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च संधौ अन्नाद्यकामः ’ इति चैवमादयः । अत्रापि ‘ यत् त्रिषु यूपेषु आलभेत बहिर्धा अस्मात् इन्द्रियं वीर्यं दध्यात्, भ्रातृव्यमस्य जनयेत्, एकयूपे आलभेत ’ इति यूपत्रित्वं प्रतिषिध्य एकं यूपं सौत्रामण्यां विदधाति । अन्यत्र तु पशुगणेषु प्रतिपशु यूपो भिद्यते । सौत्रामण्यामपि यूपभेदस्य प्राप्तिर्दर्शितैव । तथा च पशुगणेषु ऐकादशिनेषु च प्रतिपशु यूपभेदः समानं लिङ्गम् । एवं च प्रतिपशु ये यूपाः ते प्रतिपशुयूपाः । प्रतिपशुयूपानां दर्शनं प्रतिपशुयूपदर्शनम् । प्रतिपशुयूपदर्शनात् लिङ्गात् गणेषु पशुगणेषु तत्प्रवृत्तिः तस्य ऐकादशिनपशुविध्यन्तस्य प्रवृत्तिः स्यात् । एवं च पशुगणानां ऐकादशिनाः पशवः प्रकृतिः । के.

⧗ **तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद् , यथा पाशुकं सूक्तवाकेन । १२।२।१५।३५ ॥**

तस्य प्रवृत्त्या आग्रयणे द्यावापृथिव्यस्यैककपालस्य यत् प्रसूनं बर्हिः, तस्य प्रवृत्त्या वैश्वदेविकस्य तन्त्रस्य नियमः स्यात् । यथा पाशुकं तन्त्रं सूक्तवाकेन सूक्तवाकस्य प्रैषेण वैशेषिकेण ‘ अयं सुतासुती यजमानः ’ इत्यनेन नियतं तद्वत् । तस्मात् आग्रयणे द्यावापृथिव्यमेव तन्त्रं स्यात् इति पूर्वः पक्षः ।

न वा,ऽविरोधात् । ३६ ॥

आग्रयणे वैश्वदेविकस्य तन्त्रस्य द्यावापृथिव्येन तन्त्रेण न नियमः स्यात् । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अविरोधात् सपुष्पबर्हिस्तु धर्मः इतरेषामपि हविषां नैव विरुद्धः । तेन नासौ वैशेषिकः । तस्मान्न तेन इतरेषां नियमः इति सिद्धान्तः ।

अशास्त्रलक्षणाच्च । ३७ ॥

आग्रयणे द्यावापृथिव्ये एककपाले सपुष्पं बर्हिः न शास्त्रलक्षणं किन्तु चोदकप्राप्तम् । शास्त्रं लक्षणं प्रापकं प्रमाणं यस्य तत् शास्त्रलक्षणम् । तदभावः अशास्त्रलक्षणम् । अशास्त्रलक्षणत्वात् न तेन वैश्वदेविकैककपालतन्त्रस्य नियमः । चकारः समुच्चयार्थः । ऐन्द्राग्नैककपालतन्त्रस्यापि संभवात् इति । तस्मात् द्यावापृथिव्यानुरोधेन न वैश्वदेविकतन्त्रस्य नियमः इति सिद्धान्तः । के.

* **तद्भूतानामित्यत्र** (१।१।७।२५) न पदानां समुदायः प्रत्यायकः इत्युक्तम् । भा. ५।१।४।५, * तद्भूतानामित्यत्र पदार्थो वाक्यार्थस्य मूलम्, नास्य पृथक् सिद्धिरस्ति इत्युक्तम् । १०।७।९।२९. * तद्भूतानां क्रियाऽर्थेन समाम्नायः इत्यत्र यैरर्थैः येषां शब्दानामौत्पत्तिकः संबन्धः, तेष्वर्थेषु वर्तमानानां शब्दानां सर्वकारकान्वितक्रियारूपवाक्यार्थे प्रमाणत्वोक्त्या प्रत्येकश्रुतिरूपाणां पदकारकविभक्त्याख्यानां शब्दानां प्रकृतिप्रत्ययार्थान्वयरूपे क्रियाऽन्वितकारकरूपे चार्थे व्यापाराभिधानात् लिङ्गस्य विनियोगकारणत्वं सिद्धम् । सु. पृ. ११९०.

* **तद्भूताधिकरणम्** । वाक्याधिकरणमिदम् । भा. १।१।७।२४–२६. * **तद्भूताधिकरणेन** सूत्रत्रयघटितेन करणासंभवात् धर्मप्रमित्यशक्तिं चोदनानामाशङ्क्य पदार्थकरणत्वप्रतिपादनेन चोदनाप्रामाण्यमेवोपपादितम् । बाल. पृ. ७. * श्रुतेर्विनियोजकत्वे **तद्भूताधिकरणेनैव** सिद्धेः । भाट्ट. ३।१।४ पृ. १८६. * **तद्भूताधिकरणे** अंशत्रयविशिष्टभावनारूपक्रियाप्रतिपादकत्वेन प्रामाण्यस्य स्थापितत्वात् (आम्नायस्य) । कौ. १।२।१।१ पृ. ६. * तद्भूताधिकरणे आम्नायस्य वेदस्य क्रियाऽर्थत्वात् किं केन कथं इत्येवं फलतःसाधनतदितिकर्तव्यतात्मकांशत्रयविशिष्टपुरुषप्रवृत्तिरूपभावनाप्रतिपादनार्थत्वावधारणात् । कु. १।२।१।१. * तद्भूताधिकरणे

पदार्थानेकत्वात् पदसंघस्य च पदार्थातिरिक्तैकार्थवाचितायाः निरस्तत्वात् पदसंघस्यानुदाहार्यत्वशङ्का । सु. पृ. ६८४. * तद्भूताधिकरणे श्रुतिवाक्ययोः अविरुद्धत्वमुक्तम् (श्लोवा. १।१।७।३४७–३४८) (तथा श्रुतिप्रकरणयोरविरोधः) । वा. ३।२।८।२१ पृ. ७७५. * तद्भूताधिकरणे श्रुतिवाक्ययोः क्रियाऽन्वयबोधकत्वव्युत्पादनात् । कौ. ३।१।४।७. * यत्तु 'अस्त्यादिपरः प्रत्ययोऽपि भावनां जहाति ' इति, तुल्यं धातुसमुदायपक्षयोरप्येतत्, क्वचित् व्यभिचारस्य चोत्तरमुक्तं **तद्भूताधिकरणे**। वा. २।१।१।१ पृ. ३८१, * यतस्तु नित्यमेव व्यक्त्याकृत्योरविभागः तस्मात् व्यक्तिरभिहिता सती शक्नोत्येव आकृतिं गमयितुम् । तदुक्तं तद्भूताधिकरणे 'यस्य तु पदस्य योऽर्थोऽभिधेयत्वेन आश्रितः, तस्य तत्परिहारसंभवात् तत्रस्थस्यैवार्थान्तरं लाक्षणिकत्वेन अभ्युपगन्तव्यमिति ' (इदं पूर्वपक्षे) । १।३।९।३० पृ. ३०१, * श्रुतिवाक्ययोः तद्भूताधिकरणे स्वरूपेण विनियोजकत्वस्य उक्तत्वात् । कौ. ३।३।४।११ पृ. ३२९. * संबन्धग्रहणमनपेक्ष्यैव आकाङ्क्षादिमतां पदार्थानां वाक्यार्थप्रतीतिजनकत्वसंभवेन समूलत्वात् अस्ति प्रामाण्यं इत्येवं तद्भूताधिकरणे व्युत्पादिते... । **सोम.** १।२।१. * यत्तु ' संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् । माध्यंदिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥ ' इत्याद्यन्वाख्यानविधानम्, ' तत्र ब्रूमः पदात्मा नः सर्वेष्वेतेषु भिद्यते ' इति **तद्भूताधिकरणोक्तेन न्यायेन** लक्ष्याणां सान्तनान्तादिशब्दानां भेदात् अविरुद्धम् । सु. पृ. ३२३.

* यथा भावनाऽन्वयात् प्राक् कस्यचित् धात्वर्थान्वयो न संभवति, तथा ' **तद्भूताधिकरणोक्तेन मार्गेण** ' इत्यादिवार्तिकेन (२।२।५।१६ पृ. ५०२) उक्तम् । सु. पृ. ७७०.

* **तद्भूताधिकरणवार्तिके** ' अयमेव विशेषश्च कथ्यते पदवाक्ययोः। अर्थवद्भागतुल्यत्वे प्रकृतिप्रत्ययार्थतः। (वाक्याधिकरणे) ३५५ ॥ दृष्टा यथा हि साकाङ्क्षाः पदार्थाः केवलाः क्वचित् । स्वातन्त्र्येण गृहीताश्च विशिष्टार्थावबोधकाः । ३५६ ॥ प्रकृतिप्रत्ययौ नैवं कदाचिदुपलक्षितौ । (कदाचिदपि लक्षितौ इति मूले पाठः) ३५७ ॥ ' इति वैषम्यस्य उक्तत्वात् न वाक्यभागपदार्थवत् पदभागप्रकृतिप्रत्ययार्थानामपि साकाङ्क्षत्वदर्शनपूर्वकान्वयावगतिः । सु. पृ. १४०६, * तद्भूताधिकरणवार्तिके सर्वकारकाणां स्वव्यापारेषु कर्तृत्वस्य उक्तत्वात् । पृ. १४५३.

तद्भेदात् कर्मणोऽभ्यासः इति न्यायः । पशुसोमाधिकरणस्थं सूत्रमिदम् । भा. २।२।६।१९. * तद्भेदात् कर्मणोऽभ्यासः (२।२।६।१९) इत्यनेन **न्यायेन** यागाभ्यासमात्रात् ग्रहभेदोपपत्तिः। सु. पृ. ९४४.

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति न्यायः वैयाकरणानाम् । प्रत्याहारा उदाहरणम् । तथा दीक्षणीयायां आद्यन्तयोः अग्नाविष्णवोस्तृप्तौ मध्यस्थाः सर्वा देवतास्तृप्यन्ति । **ऐब्रासा.** १।१।३. * तन्मध्यपतितस्तद्ग्रहणेन गृह्यते । ९० परि० । ' तदेकदेशभूतं तद्ग्रहणेन गृह्यते ' इति येन विधिरितिसूत्रे भाष्ये पाठः । **शेखरः** । तन्मध्यपतितन्यायस्य तत्तद्धर्मारोपप्रयोजकत्वम् । तथापि लक्षणाग्राहकत्वाभावः । **भूतिः** परि० १२ । * **तन्मध्यपतितं तद्ग्रहणेन गृह्यते ।** सदर्थस्यैकवाक्यत्वावगमात् जीवपरमात्मपरत्वम् । तथा च तन्मध्यपतितं पिबन्तौ इत्येतदपि लाक्षणिकम् । **कल्पतरुः.** ३।३।२१।३४ ब्रसू. * स्थानिवद्भावेनैव **तन्मध्यपतितन्यायेन** तद्बुद्ध्यैव कार्यजननात् अकज्विषये नायं न्यायः (निर्दिश्यमानस्यादेशा भवन्ति इति) । **शेखरः** पृ. ७२ । (नेदमदसोरकोः इत्यत्र–) तन्मध्यपतितन्यायेन अकज्विशिष्टे एव शाब्दविषयतायाः पर्याप्तत्वबोधनेन तत्र निर्दिश्यमानत्वसत्त्वात् । (**भूतिः** पृ. ७२) । ' अन्तात्यन्ते'तिसूत्रे अन्तग्रहणेन तन्मध्यपतितन्यायेन अत्यन्तग्रहणे सिद्धे तद्वैयर्थ्यापत्तिः स्यात् । (**भूतिः** पृ. ७२) । तन्मध्यपतितन्यायबोधिते निर्दिश्यमानत्वमस्ति इत्यत्र ज्ञापकं तु ' किमः कः ' (पा० ७।२।१०३) इति कादेशविधानमेव । अत एव ' किमः कादेशविधानं साकच्कार्थं ' इति भाष्यं संगच्छते । **तत्त्वप्रकाशिका** पृ. ७४. * हिनसानि—अत्र श्नमः तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति **न्यायात्** धातुग्रहणे नकाराकारः

उदात्तः । ततः परस्य स्वरितत्वम् । सि. कौ. धातुस्वरेषु सुबोधिनी. * तन्निष्ठोद्देश्यतानिरूपितविधेयताऽऽश्रयतन्मध्यपतितस्यैव **तद्ग्रहणेन ग्रहणम्**, न तु तन्मध्यपतितत्वमात्रेण । अन्यथा जनं रातीति जनराः इत्यत्र नशब्दस्य जरा इत्येतदक्षरद्वयमध्यपातित्वेन जराशब्दग्रहणेन ग्रहणापत्तौ जरसादेशापत्तेः । अत एव 'अन्तात्यन्त' इति सूत्रे (पा० ३।२।४८) अत्यन्तग्रहणं चरितार्थम् । अन्यथा अन्तग्रहणेन तन्मध्यपतितन्यायेन अत्यन्तग्रहणे सिद्धे तद्वैयर्थ्यापत्तिः । भूतिः पृ. ७२. * **तन्मध्यपतितन्यायस्य** लोकसिद्धत्वप्रतिपादकेन गर्भिणीस्थो गर्भो गर्भिणीग्रहणेन गृह्यते, गङ्गास्थो घटो गङ्गाग्रहणेन गृह्यते इत्यादिलौकिकव्यवहारप्रदर्शनपरेण भाष्यग्रन्थेन पतितपदस्वारस्येन च उक्तन्यायेन तत्सत्तोत्तरसत्ताकः तन्मध्यपतित एव तद्ग्रहणेन गृह्यते, न तु तदुद्देश्यतानिरूपकोऽपि । भाष्योक्तलौकिकव्यवहारे उद्देश्यताया अप्रवेशात् । इत्यादि केचित् । भूतिः पृ. ७३–७४, * **तन्मध्यपतितन्याये** तन्निष्ठोद्देश्यताया अपर्याप्ताया उद्देश्यताऽवच्छेदकसाधारणविषयताया वा ग्रहणेन उक्तसूत्रस्य (अन्तात्यन्त० ३।२।४८) चारितार्थ्यात् । इत्यादि केचिदाहुः । पृ. ७३. * पूर्वोत्तरब्राह्मणयोर्विद्याप्राधान्यदर्शनात् तन्मध्यपातिनोऽस्यापि तत्प्राधान्यम् । न्यायनि. ३।३।२९ ब्रसू.

⧗ तद्युक्तं च कालभेदात् । १२।१।८।१७॥

सोमे दीक्षाकालं रात्रिजागरणमाम्नातं दर्शपूर्णमासयोरपि औपवसथ्ये अहनि एकेषामाम्नातम् । तत् प्रायणीयादिषु चोदकेन प्राप्यते । तेषां तन्त्रमध्यपातात् दीक्षाकालेन जागरणेन प्रसङ्गसिद्धौ प्राप्तायां सिद्धान्त उच्यते । तद्युक्तं दीक्षायुक्तं च जागरणं न दार्शिके प्रसज्जते । कालभेदात् । यदि तावत् यज्ञाङ्गानां रक्षणाय अप्रमादार्थं ततो दीक्षाकालेषु रक्षितेषु नेतराणि रक्षितानि भवन्ति इति तद्रक्षणार्थं प्रायणीयाऽऽदिषु उपवसथकाले भेदेन कर्तव्यम् । अथापि अदृष्टार्थम्, तथापि औपवसथी रात्रिर्भिन्ना, इति निमित्तप्राप्तौ नैमित्तिकं कर्तव्यम् । तस्माद्भेदेन कर्तव्यं इति सिद्धान्तः । के.

* तद्युक्ते तु फलश्रुतिस्तस्मात् सर्वचिकीर्षा स्यात् । (३।७।३।९) इत्यत्र 'षट्त्रिंशत्प्रक्रमा प्राची' इत्यादिवाक्यविहिता वेदिः साङ्गसोमयागार्थत्वेनोक्ता । सु. पृ. ६३६.

⧗ तद्वचनाद् विकृतौ यथाप्रधानं स्यात् । ५।१।१०।१७॥

अध्वरकल्पायामिष्टौ 'आग्नावैष्णवमेकादशकपालं निर्वपेत् अभिचरन्, सरस्वत्याज्यभागा स्यात्, बार्हस्पत्यश्चरुः' इति हविस्त्रयं श्रूयते । तत्र बार्हस्पत्यस्य आग्नेयविकारस्य धर्माः पूर्वं कर्तव्याः, उत उपांशुयाजविकारस्य सारस्वतस्य इति विचारे पूर्वपक्षमाह सूत्रम् । विकृतौ अध्वरकल्पायां धर्मानुष्ठानं यथाप्रधानं प्रधानक्रममनुसृत्य स्यात् । तद्वचनात् तस्य प्रधानक्रमस्य वचनात् । प्रत्यक्षः प्रयोगवचनः चोदकात् बलवान् इति भावः । तथा च आदौ सारस्वतस्य पश्चात् बार्हस्पत्यस्येति पूर्वः पक्षः ।

विप्रतिपत्तौ वा प्रकृत्यन्वयाद् यथाप्रकृति । १८॥

पूर्वपक्षं वाशब्देन निरस्य सिद्धान्तमाह । विप्रतिपत्तौ मुख्यक्रमस्य अङ्गक्रमस्य च विरोधे सति यथाप्रकृति प्रकृतिमनतिक्रम्य धर्माः कर्तव्याः । प्रकृत्यन्वयात् प्रकृतौ तथैव अन्वयात् क्लृप्तत्वात् । तस्मात् आदौ बार्हस्पत्यस्य आग्नेयविकारस्य, पश्चात् सारस्वतस्य उपांशुयाजाज्यविकारस्य । चोदकः प्रयोगवचनाद् बलवत्तर इति भावः । के.

⧗ तद्वच्च देवतायां स्यात् । १०।८।१६।४९ ॥

दर्शपूर्णमासयोः उपांशुयाजे तद्वत् हविर्द्रव्यवत् देवतायामपि यथाकामता स्यात् । 'तावब्रूतामग्नीषोमौ' इति वाक्यं तु पुराकल्पसरूपोऽर्थवादः न विधिसरूपः । इति पूर्वः पक्षः ।

तान्त्रीणां वा, प्रकरणात् । ५० ॥

उपांशुयाजे न देवताया अनियमः सर्वथा । किन्तु प्रकरणात् तान्त्रीणां दर्शपूर्णमासतन्त्रभवानां देवतानामन्यतमा स्यात् देवता । इति सिद्धान्तः । वाशब्देन पूर्वपक्षनिरासः । के.

* 'तद्वच्च देवतायां स्यात्' इत्यादि विचार्य 'विष्णुर्वा०' इत्यादिना मान्त्रवर्णिकत्वं जैमिनिराश्रयिष्यति । वा. २।२।४।१० पृ. ४९५.

⌛ **तद्वत् सवनान्तरे ग्रहाम्नानम् । ३।६।९।३० ॥**

अग्निष्टोमे प्रातःसवने ऐन्द्रवायवमैत्रावरुणादयः दश सोमग्रहा आम्नाताः, माध्यंदिने सवने शुक्रामन्थिनौ आग्रयणः इत्यादयः एकादश ग्रहाः, तृतीयसवने च आदित्यः आग्रयणः इत्यादयः पञ्चषाः ग्रहाः । ग्रहधर्माश्च खरे सादनं दशापवित्रेण संमार्जनमित्यादयः प्रातःसवने एव आम्नाताः । तत्र माध्यंदिनीयेषु तार्तीयसवनीयेषु ग्रहेषु ग्रहधर्मा भवन्ति न वा इति संदेहे, भवन्ति इति सिद्धान्तप्रतिपादनार्थं सूत्रमिदम् । सवनान्तरे प्रातःसवनात् अन्यत् यत् माध्यंदिनं तृतीयं च सवनम्, तत्रापि यत् ग्रहाणामाम्नानम्, तत् तद्वत् प्रातःसवनीयग्रहाम्नानवत् ग्रहधर्मविशिष्टमेव ज्ञेयम् । प्रकरणाविभागात् इति हेतुपदं पूर्वसूत्रादनुवर्तते । सवनत्रयगतानामेव ग्रहाणामग्निष्टोमप्रकरणं समानम् । तस्मात् ग्रहधर्माः सर्वग्रहार्थाः । 'तद्वत् दोहधर्मवत् सवनान्तरेऽपि ग्रहाम्नानं ग्रहधर्माम्नानं सर्वार्थम्' इति तु सुबोधिन्यां व्याख्यातम् । के.

* **तद्वर्जं तु वचनप्राप्तेः** (३।६।१।३) । अनारभ्यविधिना विकृतिष्वपि खादिरत्वादिप्राप्तेः तद्वर्जं प्रकृतिविकृत्यर्थत्वे द्विरुक्तत्वप्रसङ्गस्य असिद्धत्वमिति शङ्का । सु. पृ. १२७७.

* **तद्विकारत्वं** नाम तद्धर्मग्राहित्वम् । के.

* **तद्विशिष्टशाब्दे** तद्विशिष्टवृत्तिज्ञानं हेतुः । तेन लक्ष्यताऽवच्छेदकेऽपि लक्षणा इति नव्याः । मणि. पृ. ७६.

⌛ **तद्व्यपदेशं च । १।४।५।५ ॥**

'अथैष श्येनेनाभिचरन् यजेत' 'अथैष संदंशेनाभिचरन् यजेत' 'अथैष गवाऽभिचरन् यजेत' इति समाम्नायते । तत्र गुणविधिः कर्मनामधेयमिति संदेहः । उद्भिदधिकरणे यौगिकानां चित्राधिकरणे च सांविज्ञायिकानां नामधेयत्वं निरूप्य पुनः यौगिकानामेव उदाहरणविशेषे गुणविधित्वाशङ्कां निराकृत्य इदानीं सांविज्ञायिकानामुदाहरणविशेषे गुणविधित्वाशङ्का निराक्रियते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । भवतु 'पञ्चदशान्याज्यानि' इत्यत्र सांविज्ञायिकानामपि आज्यादिपदानां 'आज्यैः स्तुवते' इति प्राप्ते स्तोत्रे पञ्चदशसंख्याविधाने, तथा आज्यद्रव्यविधाने च वाक्यभेदापत्तिभिया नामधेयत्वम् । इह तु श्येनादिवाक्ये प्राप्ते कर्मणि अनेकगुणविधानाभावात् श्येनपक्षिविशिष्टमेव कर्म अभिचाररूपे फले विधीयते । न चैवं सति 'श्येनवता यागेन अभिचारं साधयेत्' इति वाक्यार्थाभिव्यक्तेः मत्वर्थलक्षणादोषः, यागनामधेयत्वेऽपि श्येनसादृश्यस्य प्रवृत्तिनिमित्तत्वात् वत्यर्थलक्षणादोषेण लक्षणादोषस्य समत्वात् । किञ्च वत्यर्थलक्षणा हि मत्वर्थलक्षणातोऽप्यतिजघन्या, यतो वाक्यवेलायां मत्वर्थलक्षणा भवन्ती न श्येनपदस्य श्रौतस्यैवार्थपरित्यागेन अर्थान्तरपरत्वमापादयति, किन्तु स्वार्थापरित्यागेनैव तद्वत्तामात्रं बोधयति । वत्यर्थलक्षणा तु पदार्थबोधवेलायामेव श्येनसादृश्येन सदृशे कर्मणि अर्थान्तरे पदं प्रवर्तयन्ती श्रौतार्थपरित्यागेन मत्वर्थलक्षणातो जघन्येति । तदुक्तम्

'मत्वर्थो वाक्यवेलायामेकवाक्यवशाद्भवेत् ।
इवार्थः पदवेलायां गृह्यमाणोऽतिदुर्बलः ॥'

(वा. पृ. ३३६) । एवं च सति प्रसिद्धार्थत्वं अधिकार्थत्वं प्रवृत्तिविशेषकरत्वं चानुरुद्धं भवति इति गुणविधानमेव । इत्येवं प्राप्ते, अभिधीयते । भवेदेवं विशिष्टविधिना श्येनरूपगुणविधानं यदि सादृश्यप्रतिपादकस्यार्थवादस्योपपत्तिर्भवेत् । एवं खलु अर्थवादः श्रूयते 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इति । अत्र हि विधेयस्य श्येनसादृश्येन स्तुतिरवगम्यते, भेदाधिष्ठानं च सादृश्यम् । न च पक्षिरूपश्येनविधाने भेदाभावात् सादृश्यनिबन्धना स्तुतिः संभवति । तदुक्तम् 'विधेयं स्तूयते वस्तु भिन्नयोपमया सदा। नहि तेनैव तस्यैव स्तुतिस्तद्वदितीष्यते ॥' इति । (वा. पृ. ३३६) । संभवति तु श्येननामधेययागविधाने पक्षिरूपश्येनसादृश्येन स्तुतिः । एतदेवार्थवादोपदर्शितं निपत्यादानरूपं सादृश्यं नामधेयप्रवृत्तिनिमित्तं च । अत एवात्र सादृश्यलक्षणा वेदानुमि(म)तत्वात् मत्वर्थलक्षणातः

स्वरूपतो जघन्याऽपि भवन्ती न दोषमावहति । किञ्च गुणविधाने सति न केवलं मत्वर्थलक्षणा, किन्तु अर्थवादोपदर्शितसादृश्यनिबन्धनस्तुतिसिद्धये काल्पनिकं भेदमाश्रित्य वत्यर्थलक्षणाऽपि अवश्याङ्गीकरणीया । अतो नामधेयत्वमेवेति ।

एवम् ‘संदंशेनाभिचरन् यजेत’ इत्यत्रापि सादृश्यप्रतिपादकोऽर्थवादः श्रूयते ‘यथा संदंशेन दुरादामादत्ते’ इति । एवम् ‘गवाऽभिचरन् यजेत’ इत्यत्रापि श्रूयते ‘यथा गावो गोपायन्ति’ इति तेन एतयोरपि कर्मनामधेयत्वमेवेति ।

प्रयोजनम्-- पूर्वपक्षे श्येनपक्षिणा यागो निर्वर्तयितव्यः, सिद्धान्ते तु अतिदिष्टसोमेनेति ।

सूत्रं तु ‘तद्व्यपदेशम्’ तेन प्रसिद्धेन श्येनादिना सादृश्यनिबन्धनोऽर्थवादे व्यपदेशो यस्य तदपि कर्मनामधेयमिति । तौता. १।४।५।५.

⧗ तद्व्यपदेशं च । १।४।४।५ ।।

‘श्येनेनाभिचरन् यजेत’ ‘संदंशेनाभिचरन् यजेत’ ‘गवाऽभिचर्यमाणो यजेत’ इति श्रूयते । श्येनः संदंशः गौः इति पदं किं गुणविधायकं कर्मनामधेयं वा इति विचारे सिद्धान्तमाह । ‘नामधेयं स्यात्’ इति ‘अन्यशास्त्रम्’ इति चानुवर्तते । यस्मात् तद्व्यपदेशं अन्यशास्त्रम्, तस्मात् नामधेयं स्यात् इत्यन्वयः । ‘यथा वै श्येनो निपत्याऽऽदत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन’ इत्यत्र ‘श्येनेन अभिचरन्’ इति निर्दिष्टस्य श्येनपदार्थस्य ‘यथा श्येनो निपत्य आदत्ते’ इति श्येनः पक्षी उपमानतया निर्दिष्टः । एवम् ‘संदंशेन यजेत’ इति निर्दिष्टस्य संदंशपदार्थस्य ‘संदंशेन दुरादानमादत्ते’ इति वाक्ये अङ्गारग्राहकः आयसः संदंशः (चिमटा इति भाषा) उपमानमुपात्तम् । एवम् ‘गवा यजेत’ इति गोपदार्थस्य ‘यथा गावो गोपायन्ति’ इति सास्नाशृङ्गवती गौः उपमानत्वेनोपात्ता । ‘सादृश्यमुपमा भेदे’ इति च आलंकारिकैः उपमा भेदघटिता उक्ता । तस्मात् उपमेयभूताः श्येनसंदंशगोपदानि कर्मनामधेयमेव न गुणविधायकम् । सूत्राक्षरार्थस्तु तस्मात् विधेयत्वेन अभिमतात् श्येनादेः व्यपदेशः भेदेनाभिधानं यस्मिन्, तत् तद्व्यपदेशं शास्त्रं अन्यत् विद्यते । तस्मात् श्येनादिपदं कर्मनामधेयम् । इति ।

अत्र सुधा– सौत्रं तच्छब्दं यस्मिन् गुणोपदेश इत्येतत्सूत्रनिर्दिष्टविधित्सितगुणपरामर्शिनमभिप्रेत्य विशब्दं च भेदवादिनमङ्गीकृत्य तेन विधित्सितेन श्येनादिरूपेण गुणेन भिन्नार्थतया व्यपदेशः संकीर्तनं न यस्य श्येनादिपदस्य तदपि नामधेयं इति नामधेयपदानुवृत्त्या सूत्रं योजितं इति ।

श्येननामधेयेन संदंशनामधेयेन गोनामधेयेन च यागेन भावयेत् इति श्रुतिवाक्यार्थः । के.

⧗ तद्व्यपदेशन्यायः । श्येनसंदंशादिपदं यागविशेषनामधेयम् ।।

तद्व्यपदेशं च । १।४।४।५ ।।

भाष्यम्—‘अथैष श्येनेनाभिचरन् यजेत’ ‘अथैष संदंशेनाभिचरन् यजेत’ ‘अथैष गवाऽभिचरन् यजेत’ इति समाम्नायन्ते । तत्र गुणविधिः, कर्मनामधेयमिति संदेहः । प्रसिद्ध्यादिभिः पूर्वपक्षः उद्भिदादीनामिव । ते तु उद्भिदादयः क्रियानिमित्ताः शक्नुवन्ति यागं वदितुम् । इमे पुनः जातिनिमित्ता न शक्नुवन्ति । तेन गुणविधयः इत्येवं प्राप्तम् । एवं प्राप्ते, ब्रूमः । तद्व्यपदेशं च । तेन श्येनादिना प्रसिद्धेन यस्य व्यपदेशः, तच्च कर्मनामधेयम् । श्रुतिर्हि नामधेयत्वे, लक्षणा गुणविधौ । यत्तु जातिशब्दा इमे न यागमभिवदन्तीति, सादृश्यव्यपदेशात् अभिवदिष्यन्ति । एवं हि व्यपदेशो भवति, ‘यथा वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरन्ति श्येनेन’ इति । निपत्य आदत्ते इत्यनेन सादृश्येन श्येनशब्दो यागे, यथा सिंहो देवदत्तः इति । तस्मात् कर्मनामधेयम् । संदंशे ‘संदंशेन यथा दुरादानमादत्ते’ इति, गवि ‘यथा गावो गोपायन्ति’ इति । तस्मात् संदंशशब्दोऽपि कर्मनामधेयं गोशब्दोऽपि ।

वा-- ‘अथैष ज्योतिः’ इत्यादिवर्जमुदाहरणम् । तेषां तृतीयानिर्देशाभावात् गुणविधित्वानुपपत्तेः । तेऽपि च वाक्यान्तरेषु यदा तृतीयानिर्देशं प्रतिपद्यन्ते, तदा

विचार्यन्ते। अथवा प्रथमानिर्देशेन द्रव्यमपि प्रस्तुत्य पश्चात् तत्साध्योपन्यासः संभवति, इति एतेऽपि उदाहरणमेव। तत्र तैरेव प्रसिद्ध्यादिभिर्गुणविधिः। न चात्र कर्मणि प्रवृत्तिनिमित्तं किञ्चिदस्ति। वत्यर्थोपादानेन कर्मणि प्रवृत्तौ च अत्यन्तविप्रकृष्टा गौणता स्यात्। तत्र वरं मत्वर्थलक्षणा। साधनं हि प्रतीतं अत्यन्तविनाभावात् स्वसाध्यां क्रियां अक्लेशेन प्रतिपादयति विनैव मतुब्लोपेन। किञ्च **'मत्वर्थो वाक्यवेलायामेकवाक्यवशाद् भवेत्। इवार्थः पदवेलायां गृह्यमाणोऽतिदुर्बलः॥'** गुणविधिपक्षे हि स्वार्थापरित्यागेनैव श्येनपदं तद्वन्तमुत्तरकालं लक्षयति। आत्मोच्चारणकाले तु स्वार्थमेव विनियुङ्क्ते। भवतस्तु श्येनार्थानुपयोगात् आदित एव सादृश्यविवक्षया पदं प्रवृत्तमित्युपगमात् श्रुतिबाधप्रसङ्गः। तदुच्यते **'विधेयं स्तूयते वस्तु भिन्नयोपमया सदा। नहि तेनैव तस्यैव स्तुतिस्तद्वदितीष्यते॥'** श्येनादिवाक्येषु हि 'यथा वै श्येनो निपत्य आदत्ते, एवमयमपि' इत्युपगमात् न स्तुतिर्दृश्यते। तथा च विधीयमानस्य भवितव्यम्। गुणविधाने च श्येनद्रव्यं विधीयते, इति तदेव स्तोतव्यम्। न च तस्य आत्मनैव उपमानं युक्तम्। अथोच्येत अनन्यत्वेन सुतरां स्तुतिर्भवति अनन्यसंभविचरितत्वात्। यथा 'रामरावणयोर्युद्धं रामरावणयोरिव' इति। भवति हि लोके काल्पनिकं अवस्थाऽऽदिगतभेदमाश्रित्य एवमपि स्तुतिः संभवति, भेदे न युक्ता। (श्रुतिर्हि नामधेयत्वे, लक्षणा गुणविधौ इति भाष्यं यथाश्रुतार्थमनुपपन्नमिति मत्वा अन्यथा व्याचष्टे–) नामधेयत्वे तु यागश्येनस्य द्रव्यश्येनोपमोपपत्तेः आञ्जस्यम्। इतरथा हि द्वौ मत्वर्थवत्यर्थौ लक्षयितव्यौ, काल्पनिकश्च भेदः इति गौरवम्। न च यागस्तुत्या तदाश्रितद्रव्यस्तवनमवकल्पते, यागविधेः अनिराकृतत्वात्। अभिधेयगता हि स्तुतिः अन्यत्र संचार्येत, यागस्तु स्वयमेव विधिभाक् अत्र इति न द्रव्यं स्तूयते विधीयते वा। पुनरपि च यागेन द्रव्यलक्षणात् विप्रकृष्टता, समभिव्याहाराच्च द्रव्यवदेव यागवचनत्वं मुख्यम्। विधौ च तव लक्षणा, ममानुवादे। गुणवचनेभ्यश्च मतुब्लोपः स्मर्यते (तदस्यास्त्यस्मिन् इति पाणिनिसूत्रे 'गुणवचनेभ्यो मतुपो लुक्' इति वार्तिकम्) न द्रव्यवचनेभ्यः। इवार्थस्तु परशब्दस्य परत्र प्रयोगात् स्वयमेवोपजायते। मत्वर्थलक्षणा च स्वयं कल्पनीया, क्लृप्तस्तु वत्यर्थः 'यथा वै श्येनः' इत्यादिना। पूर्वोक्ताश्च धातुपारार्थ्यप्रत्ययविप्रकर्षादयो दोषा वक्तव्याः।

शा— इह रूढशब्दा एव वाक्यभेदरहिताः तद्व्यपदेशवन्तः उदाहरणम्। (अत्र तद्व्यपदेशशब्दः सौत्रानुकरणम्। सूत्रे च तच्छब्देन 'यस्मिन् गुणोपदेशः' इति प्रकृतो गुणो निर्दिश्यते। वि–शब्दश्च भिन्नार्थकः। ततश्च तस्मात् विधेयत्वाभिमतात् गुणात् व्यपदेशः भेदेन निर्देशः)। ५.

सोम— सूत्रार्थस्तु— तस्य गुणस्य व्यपदेशो यस्मिन् श्येनादिपदे, तदपि नामधेयं स्यात् इति।

वि—–'श्येनेनाभिचरन् मर्त्यो यजेतेति श्रुतो गुणः। विधीयते पक्षिरूपो नाम वा तस्य कर्मणः॥', श्येनेनेति गुणः काम्यः सौमिकः सोमबाधया। न चित्रावद् वाक्यभेदो रूढेश्चैवमनुग्रहः॥, यथा वै श्येन इत्युक्ता ह्युपमानोपमेयता। नैकस्मिन् तेन गौण्याऽस्य वृत्त्या स्यात् कर्मनामता॥' ५.

भाट्ट— 'श्येनेनाभिचरन् यजेत' इत्यादौ पूर्वोक्तबाधकाभावात् प्रसिद्धेः श्येनादिपदानां गुणविधित्वमेव। प्रकृतसोमयागाश्रितो गुणः फलोद्देशेन विधीयते विशिष्टकर्मान्तरं वा। न चैवम् 'यथा वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इत्यर्थवादे स्वस्यैव स्वोपमानत्वानुपपत्तिः, उपक्रमनिर्णीतविध्यनुरोधेन उपसंहारस्थार्थवादस्य अन्यथा नेयत्वात्। 'ते तद्विलासा इव तद्विलासाः' इत्यादिवत् अनन्वयालङ्कारस्य अभेदे अनुगुणत्वात्। इति प्राप्ते, नायमनन्वयालङ्कारः। तथात्वे सर्वेषामर्थवादपदानामुपमानान्तराभावलक्षकत्वापत्तेः। तद्वरं भूयोऽनुग्रहस्यैव न्याय्यत्वात् उपक्रमस्थे एवैकस्मिन् पदे रूपकविधया लुप्तोपमानविधया वा गौणीं वृत्तिमङ्गीकृत्य नामधेयत्वं द्वितीयविधिप्रकारापादकं युक्तमाश्रयितुम्। अर्थवादस्तु रूपकाद्यपेक्षितसादृश्योपपादनार्थः सन् विनैव लक्षणां पूर्णोपमानविधया विधेययाग-

स्तुत्यर्थो न विरुध्यते । तत्सिद्धं चतुर्भिरेव प्रकारैः सर्वत्र नामत्वमिति । ५.

मण्डन— ‘ नाम श्येनपदं पुनः । ’

शंकर— ‘ एवं तद्व्यपदेशतः । ’ नाम । ५.

✻ तद्व्यपदेशं च इत्यधिकरणे ‘ यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन ’ इत्ययमुपमानार्थवादः इत्युक्तम् । बाल. पृ. ५८. ✻ अर्थवादानां अवयवार्थपरत्वाभावे ‘ तद्व्यपदेशं च ’ इत्यधिकरणविरोधः । तत्र वाक्यविशेषसिद्धां गौणीं वृत्तिमाश्रित्य नामधेयत्वव्यवस्थापनात् । कु. १।२।१।१८. ✻ ‘ आग्नेयोऽष्टाकपालोऽमावास्यायां ’ इत्यादौ विशिष्टविध्यङ्गीकारेण वाक्यभेदाभावात् तद्व्यपदेशन्यायस्य शङ्कितुमप्यशक्यत्वात् । कौ. १।४।७।९.

✻ **तच्छब्दः** । यच्छब्दतच्छब्दौ उद्देश्यप्रतिनिर्देशकौ । वा. ६।६।३।१६. ✻ **तच्छब्दस्य** पूर्वपरामर्शित्वम् । भाट्ट. ४।१।१०. ✻ **तच्छब्दार्थं** स्ववाक्योपस्थितं यच्छब्द एव नियमेन अपेक्षते ‘ येन कर्मणा ईर्त्सेत् तत्र जयान् जुहुयात् ’ इत्यादौ तथैव व्युत्पत्तिदर्शनात् । न तु तच्छब्दोऽपि । अतश्च तच्छब्दस्य स्ववाक्योपस्थितमात्रपरामर्शित्वनियमाभावः । कौ. ३।३।७।१४ पृ. ३५८.

✻ **तत्संनिधेर्गुणार्थेन पुनःश्रुतिः** (२।२।५।१६) । इत्यत्र उपपदश्रुतौ संभवदनुवादस्य कर्मणः विधेयत्वनिषेधात् (सोमेन यजेत इति) सोमवाक्ये यागविधिः । सु. पृ. ७९०. ✻ भाष्यान्तरकृद्भिः प्रकरणान्तरत्वात् विना फलादीनां भेदकत्वमुक्तमपि न दृष्टं ‘ तत्संनिधे संनिधौ त्वविभागात्, तत्संनिधेर्गुणार्थेन पुनःश्रुतिः ’ इत्यादौ । वा. २।३।१३।२६.

✻ ‘ **तत्संप्रयोगे** पुरुषस्येन्द्रियाणां बुद्धिजन्म सत् प्रत्यक्षम् ’ (१।१।४ सूत्रं) । यद्विषयं विज्ञानमुत्पद्यते तेनैव इन्द्रियसंप्रयोगे इन्द्रियाणां या पुरुषस्य बुद्धिर्जायते तत् सत् प्रत्यक्षम् । यथा ‘ इदम् ’ इति विज्ञानम् । यत्तु अन्यसंप्रयोगे शुक्तिकासंप्रयोगे अन्यविषयं रजतग्राहि विज्ञानमुत्पद्यते न तत् प्रत्यक्षम् । किं तर्हि स्मरणमेव । कथं पुनरवगम्यते ‘ इदमन्यसंप्रयोगे , इदं नान्यसंप्रयोगे ’ इति । शुक्तिका हि संप्रयुक्ता । अतः शुक्तिकाविषयमेव इदमपि ज्ञानम्, यतो रजतमिति शुक्तिकामेव व्यपदिशति । यस्मात् शुक्तिकासंप्रयुक्ते चक्षुषि ‘ रजतसंनिकृष्टं मे चक्षुः ’ इति मन्यते । (तत्संप्रयोगे—सत्संप्रयोगे इति , सत् प्रत्यक्षं—तत् प्रत्यक्षं इति मतभेदेन पाठभेदः) । ऋजु. पृ. ४६.

⧗ **तत्संयोगात् क्रतुस्तदाख्यः** (२।३।१०।२३) इति न्यायेन साग्निचित्यक्रतोरेव चिनोत्यर्थत्वात् (तेन चयनसंस्कृतेन ज्वलनेन संयोगात् क्रतुः यागः तदाख्यः अग्निशब्दवाच्यः इति न्यायसूत्राक्षरार्थः) । संकर्ष. ३।१।५.

✻ **तत्संस्तवाच्च** । ३।४।१७।४९ ॥ चतुर्धाकृतपुरोडाशविभागस्य परिक्रयत्वसंस्तवादपि परिक्रयार्थता । इति पूर्वपक्षः । सु. पृ. १५४४.

⧗ **तत्सामान्यादितरेषु तथात्वं इति न्यायः** । औदुम्बराधिकरणस्थसूत्रावयवोऽयं न्यायत्वेन व्यवह्रियते । तैः ‘ अप्सुजो वेतसः ’ इत्यादिभिः स्तुतिवादैः सामान्यात् सादृश्यात् ‘ औदुम्बरो यूपो भवति ’ इत्यादिष्वपि इतरेषु वाक्येषु तथात्वं स्तुतिवादत्वं प्रत्येतव्यं इति न्यायाक्षरार्थः । के. १।२।२।२३. ✻ ‘ तत्सामान्यादितरेषु तथात्वम् ’ इति न्यायेन तदितरेषां (मन्त्रभिन्नानां) ‘ वायुर्वै क्षेपिष्ठा ’ इत्याद्यर्थवादानां न स्वार्थपरत्वम्, किन्तु जहत्स्वार्थलक्षणया केवलविधेयस्तुतिपरत्वं इति प्रच्छन्नबौद्धाः केचिन्मीमांसकंमन्याः संगिरन्ते । कु. १।२।१।१८ पृ. ३०. ✻ चित्रेष्ट्यादौ सद्यः पश्वादिफलादर्शनेन, ‘ स एष यज्ञायुधी यजमानः अञ्जसा स्वर्गं लोकमेति ’ इत्यनेन सशरीरस्वर्गप्राप्तिकथनमपि प्रत्यक्षविरोधादप्रमाणम्, ततश्च ‘ तत्सामान्यात्० ’ इति न्यायेन सर्वासामेव चोदनानामप्रामाण्यमिति प्राप्ते । भाट्ट. १।१।४.

⧗ **तत्सामीप्यात्ताच्छब्द्यमिति न्यायः** । गङ्गायां घोषः, कूपे गर्गकुलमित्यादिषु स्पष्टोऽयं न्यायः । (तस्य गङ्गापदार्थस्य प्रवाहस्य सामीप्यात् तीरस्य ताच्छब्द्यं गङ्गापदबोध्यत्वम् । सः गङ्गाशब्दः यस्य तीरस्य, स तच्छब्दः, तस्य भावः ताच्छब्द्यम्) । साहस्री. ४८६.

⌛ **तत्साहचर्यात्ताच्छब्द्यमिति न्यायः** । कुन्तान् प्रवेशय, यष्टीः प्रवेशय इत्यादिषु स्पष्टोऽयं न्यायः । (पुरुषाणां कुन्त–यष्टिसाहचर्यात् ताच्छब्दयं कुन्त–यष्टिशब्दबोध्यत्वम् । **साहस्री.** ४८७

* **तत्सिद्धिः** कार्यसिद्धिः यजमानवत् कार्यसिद्धौ अभ्यर्हितः प्रस्तरः (तत्सिद्धिः इति सूत्रमेव सूत्रैकदेशो वा) । शा. १।४।१८ । तत्सिद्धिः मुख्यस्य सिद्धिः कार्यम्, तत्कार्यकरत्वमिति यावत् । **सोम.** * तत्सिद्धिः तत्साधनत्वं शब्दस्य क्वचित् प्रवृत्तिहेतुः । 'यजमानः प्रस्तरः' अत्र यागसाधनत्वं यजमानस्य गुणः, स च प्रस्तरे वर्तते इति प्रस्तरे यजमानपदस्य प्रवृत्तिः । **वि.** १।४।१८.

⌛ **तत्सिद्धिः** । १।४।१२।२३–१ ॥

' तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः ' इत्येकमेव सूत्रम् । तत्र व्याख्यासौकर्यार्थं प्रत्येकं प्रथमान्तसूत्रोपन्यासो भाष्ये कृतः इति कौस्तुभादौ उक्तम् । तत्र तत्सिद्धिः इति प्रथमोऽवयवः । 'यजमानः प्रस्तरः' 'यजमान एककपालः' इति श्रूयते । स किं गुणविधिः, उतार्थवादः इति विचारे सिद्धान्तः । तत्सिद्धिः तस्य यजमानगुणस्य यागसाधनत्वस्य प्रस्तरेण सिद्धिः जुहूधारणद्वारा भवति । इति यागसाधनत्वेन गुणेन यजमानशब्दः प्रस्तरे समानाधिकरणतया प्रवृत्तः । तत्र यजमानत्वेन प्रस्तरस्तुतिः । इति अर्थवादोऽयं इति सिद्धान्तः । एवं एककपालस्तुतिः द्रष्टव्या । अत्र स्तुतिरूपो गुणः गौण्या वृत्त्याः एकं निमित्तमुक्तम् । **के.**

⌛ **तत्सिद्ध्यधिकरणम्** । यजमानशब्देन प्रस्तरादेः स्तुतिः ॥

तत्सिद्धिः । १।४।१२।२३–१॥

भाष्यम्— ' यजमानः प्रस्तरः ' ' यजमान एककपालः ' इत्यादि समाम्नायते । तत्र संदेहः किं यजमानः प्रस्तर इत्येष गुणविधिः, किमर्थवाद इति । तथा यजमान एककपाल इति । किं तावत् प्राप्तम् ? गुणविधिरिति । किमेवं भविष्यति ? एवमपूर्वमर्थं विधास्यति । इतरथा अर्थवादोऽनर्थकः स्यात् । अर्थवत्त्वं च न्याय्यम् । तस्मात् विधिः । नैतदेवम् । यदि विधिः स्यात् प्रस्तरकार्ये यजमानो नियम्येत, यजमानकार्ये वा प्रस्तरः । 'प्रस्तरे जुहूमासादयति , सर्वा वा स्रुचः' इति यजमाने जुहूरासाद्येत सर्वा वा स्रुच इति । तथा सति न याजमानं शक्यते कर्तुम्, दक्षिणतो ब्रह्मयजमानौ आसाते कर्मणः क्रियमाणस्य, इति । न च प्रस्तरो याजमानं शक्नोति कर्तुम् । तथा यदि यजमानः एककपालकार्ये विनियुज्येत सर्वहुतः क्रियेत । तत्र सर्वतन्त्रपरिलोपः स्यात् । न चैककपालो याजमानं शक्नोति कर्तुम् । तस्मान्न विधिः । विध्यन्तरं चास्ति 'प्रस्तरमुत्तरं बर्हिषः सादयति' 'एककपालं सर्वहुतं करोति' इति । तस्मादपि न विधिः । किं तर्हि ? अर्थवादः ; यजमानो ज्ञायते एव ; प्रस्तरः एककपालः इति च (ज्ञायेते एव) । कथं पुनरनयोः सामानाधिकरण्यं ज्ञायते । नहि प्रस्तर एककपालो वा यजमानः, न च यजमानः एकस्मिन् कपाले संस्कृतः पुरोडाशः, प्रथमो वा कुशमुष्टिर्लूनः । कथं परशब्दः परत्र वर्तते । किमर्थं वा ज्ञायमानस्य संकीर्तनमिति । **उच्यते** । ज्ञायमानः संकीर्त्यते स्तोतुम् । प्रस्तरः उत्तरो बर्हिषः सादयितव्यो यजमानत्वात् । तथा यजमानः एककपालः सर्वहुतः कर्तव्यः, स्वर्गः आहवनीयः, तत्र प्रतिष्ठापितो भवति, इति । कथं परत्र वर्तते परशब्द इति । गुणवादस्तु । गुणादेष वादः । कथमगुणवचनो गुणं ब्रूयात् ? स्वार्थाभिधानेनेति ब्रूमः । सर्वे एवैते गौणाः शब्दा न स्वार्थं हित्वा गुणेषु वर्तन्ते । प्रसिद्धहानिर्हि तथा स्यात् अप्रसिद्धकल्पना च । न च सर्वे गुणसमुदायवचनाः, गुणहीनेऽपि दर्शनात् । अप्रसह्यकारी अदि हि कदाचित् रोगेणोपहतः सिंह्याः पुत्रः सिंह एव । समुदायवाची च नावयवे प्रवर्तितुमर्हति । सर्वसिंहव्यक्तिषु यत्सामान्यम्, तद्वचनः शब्द इति स्थितो न्यायः प्रत्युद्ध्रियेत । न चासति सिंहे परिकल्पनया प्रवर्तेत , कल्पनाया अशक्यत्वात् । कथं नु स्वार्थाभिधानेन प्रत्ययव्यवस्थेति चेत् । अर्थसंबन्धात् । सिंह इति निर्ज्ञायते, प्रसह्यकारिता तत्र प्रायेण , इति प्रसह्यकारीति गम्यते , अर्थप्रत्ययसामर्थ्यात् । यो हि मन्यते प्रसह्यकारिणं प्रत्याययेयमिति , स यदि सिंहशब्दमुच्चारयति सिध्यत्यस्य अभिप्रेतम् । सिंहार्थः प्रतीतः प्रसह्यकारीति संबन्धात् इतरमर्थं प्रत्याययति । एवं स्वार्थाभिधानेन

तद्गुणसंबन्धः प्रतीयते । इह तु यजमानः प्रस्तरः, यजमान एककपालः इति कीदृशो गुणसंबन्धः प्रतीयते ? तत्सिद्धिकर इति । सर्वो हि आत्मनः कार्यसिद्धिं करोति। अन्योऽपि यस्तस्य कार्यसिद्धिं करोति, स तस्मिन्नुच्चरिते हृदयमागच्छति यथा राजा पत्तिगणक इति । पत्तिगणको राज्ञः कार्यं साधयति । स राजशब्दे उच्चरिते प्रतीयते । एवमिहापि यजमानकार्यं प्रस्तरैककपालौ साधयतः, तौ यजमाने प्रतीते प्रतीयेते । तस्मात् तौ यजमानशब्देन प्रत्याय्येते, कथं स्तुतौ स्यातां बर्हिष उपरिसादने सर्वहोमे चेति । तस्मादेवंजातीयका अर्थवादाः, न विधय इति ।

वा-- तत्सिद्धिः । अर्थवादप्रसङ्गात् तदुपकारिगुणवादविधि(वादावधि)तल्लक्षणं तत्र नोक्तम्, इदानीमभिधीयते । ननु च तत्रैव 'रूपात् प्रायात्' 'दूरभूयस्त्वात्' (१।२।१।११-१२) इति निमित्तं कथितम्। सत्यं कथितम्, न तु लक्षणत्वेन । कथं तर्हि ? इह सिद्धम्, तत्र उदाहृतार्थवादलक्ष्यविषयव्यवहारार्थं नीतम्। अत्र तु सर्वगौणवृत्तीनां लक्षणमुच्यते। ननु च सहचरणस्थानादीनि अन्यान्यपि अक्षपादप्रभृतिभिः गौणनिमित्तानि उक्तानि (न्यायदर्शनं २।२।६० 'गौणवृत्तिनिमित्तानि' इति बिन्दौ द्रष्टव्यम्) । लोके च दृश्यते 'यष्टीः प्रवेशय' 'मञ्चाः क्रोशन्ति' 'अश्वसहस्रेण अमुको राजा जितः' इति । तानि उपसंहर्तव्यानि । लिङ्गसमवायेनैव उपसंहृतानि इति केचित् । छत्रिसमवेतेतरप्रत्ययवत् हि यष्टिसहचरितादिप्रत्ययो भवति । अथवा गौण्याः वृत्तेः इह निमित्तमभिधीयते, न लक्षणायाः । किञ्च अनयोः (गौणीलक्षणयोः) भेदोऽपि अस्ति ? बाढमस्ति । कुतः ? '**अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥**' तत्र यथैव आकृतिवचनः शब्दः तत्सहचरितां व्यक्तिं लक्षयति, तथैव यष्टिमञ्चाश्वादयः तत्संबद्धपुरुषलक्षणाऽर्था भवन्ति। 'अग्निर्माणवकः' इति तु न अग्नित्वाविनाभावेन माणवकः प्रतीयते, किं तर्हि ? '**वह्नित्वलक्षितादर्थाद् यत् पैङ्गल्यादि गम्यते । तेन माणवके बुद्धिः सादृश्यादुपजायते॥**' सर्वत्र च तत्सिद्धिकरादौ इयमेव प्रस्तरप्रभृतौ यजमानादिशब्दानां वृत्तिः, इति ते उदाहृताः । अत्रापि च सामानाधिकरण्यात् एकतरस्य नामधेयत्वम्, निमित्ताभावात् अनेकशक्तिकल्पनाभयाच्च तदनुपपत्त्या कार्यलक्षणाद्वारं प्रयोजनवत्तरत्वेन गुणविधित्वम्, अशक्तेर्वा तदसंभवात् अर्थवादत्वमिति त्रयः एव पक्षाः ।

तत्र गुणविधिवादी मन्यते । न काचित् प्रस्तरयजमानयोः इतरेतरसमभिव्याहारेण स्तुतिः प्रतीयते । न च स्तोतुमपि परशब्दः परत्र वर्तते । न च प्रवृत्तिनिमित्तमस्ति । न च प्रवृत्तस्य प्रयोजनं अन्यत् कार्यलक्षणातः । तस्मात् 'यो होता सोऽध्वर्युः' इत्यादिवत् अन्यतरः कार्यलक्षणाऽर्थः । तत्रापि 'मुख्यं वा पूर्वचोदनात्' (१२।२।८।२३) इति यजमानशब्दः स्वार्थवृत्तः, प्रस्तरशब्दः स्रुग्धारणादिकार्यलक्षणार्थः, इति गुणविधिः । अत्रोच्यते । '**न तावत् कार्ययोगित्वमेकस्याप्युपपद्यते । विरोधाद् यजमानस्य प्रस्तरादेरचोदना ॥**' एककपालवत् 'सूक्तवाकेन प्रस्तरं प्रहरति' इति यजमाने प्रह्रियमाणे (अग्नौ प्रक्षिप्ते) सर्वतन्त्रविलोपप्रसङ्गः । तस्मात् एकवाक्यगतोत्तरसादनसर्वहोमविधिस्तुत्यर्थः संवादः । कथं पुनः परशब्दस्य परत्र सामानाधिकरण्यम्, किमाकारा वा स्तुतिरिति । यजमानो हि सर्वाभ्यर्हितः, तदंशत्वात् बर्हिषः उपरि प्रस्तरः सादयितव्यः, स्वर्गत्वेन संस्तुते च आहवनीये सकलो यजमानः आरोपितो भवति एककपालेन अखण्डितेन इति स्तुतिः । गुणाच्च शब्दवृत्तिः । 'कथं अगुणवचनः' इति (भाष्ये) वाचकत्वं अभ्युपेतं मन्यमानस्य प्रश्नः । सिद्धान्तस्तु—अजहत्स्वार्थाः सर्वाः शब्दप्रवृत्तयः, पूर्वशक्त्यनुसारसंभवे शक्त्यन्तरकल्पने प्रमाणाभावात् । संभविष्यति चात्र सिंहत्वावगतव्यक्त्युपस्थापितप्रसह्यकारित्वाद्यनेकधर्मप्रत्ययात् देवदत्तप्रत्ययः, इति पूर्वैव शक्तिर्निमित्तम्, इति न संशयहेतुत्वेन व्यवहारोच्छेदकारणं प्रसिद्धहानाप्रसिद्धकल्पनं आश्रयणीयम् । अन्येषां तु दर्शनम्, सर्वे एव हि सिंहादिशब्दाः जातिगुणक्रियासमुदायवाचिनः समस्तार्थासंभवे देवदत्तादिषु कतिपयगुणक्रियायोगात् उपचर्यन्ते इति। तत्राभिधीयते । **समुदायार्थवाचित्वे नैकदेशे भवेद् गतिः** ! शतशब्दान्न पञ्चा-

शन्मुख्यरूपेण गम्यते ॥ ' भवति तु जातिमात्रे दृष्टे सर्वक्रियागुणप्रत्यस्तमयेऽपि प्रयोगः । प्रत्ययश्च मुख्यात्मनैव, न देवदत्तादिष्विव सिंहशब्दात् उपचरितः । सामान्यवाचिता च आकृत्यधिकरणसिद्धा बाध्येत । क्रियागुणानां च आनन्त्यात् न शक्यः प्रतिव्यक्ति संबन्धः अनुभवितुम् । ' एकस्यामेव च व्यक्तौ बाल्यादिषु गुणक्रियाः । अन्याश्चान्याश्च शक्यन्ते नाभिधातुमसंगतेः ॥ ' न च असामान्यात् सामान्यं शक्यते कल्पयितुम्, जात्यन्तरेऽपि क्वचित् कासांचित् सद्भावात् । ' तत्र सिंहत्वमेवासां व्यवच्छेदकरं भवेत् । तच्चानभिहितं नैवमुक्तं चेन्नान्यवाचिता ॥ ' नहि अनभिहितं सिंहत्वं गुणक्रियाणां व्यवच्छेदकरं भवति, अप्रतीतेः । अभिहितं चेत्तु प्रत्ययादेव अशेषगुणक्रियाऽवगमात् अभिधानशक्त्यनवसायः, इति समुदायवाचिनां एकदेशेषु न गौणत्वसंभवः ।

कश्चित् पुनराह ' समारोपितसद्भावो गौणः ' इति । तस्य एतन्मतम्, न कथंचन परशब्दः तया जात्या स्वनिबन्धनभूतया विना अत्यन्तानभिधेयक्रियागुणमात्रद्वारेण अन्यत्र वर्तितुमर्हति । न च सिंहशब्देन अप्रवर्तमानेन ' सिंहो देवदत्तः ' इति सामानाधिकरण्यप्रयोगो घटते । कथं तर्हि ? ' अर्थेष्वर्थान्तरात्मानमध्यारोप्योपपादितम् । वाच्यमासाद्य शब्दानां स्वयमेव प्रवर्तनम् ॥ ' सिंहादिसदृशक्रियागुणदर्शनेन हि देवदत्तादयः सामस्त्यपरिकल्पनया सारूप्यं आपद्यन्ते । ततश्च स्वार्थे एव शब्दः प्रयुज्यते । न चैतावता मुख्य– (मुख्यत्व–) प्रसङ्गोऽर्थस्य, अध्यारोपितत्वात् । यत्र तु स एव अर्थो न समारोप्यते, तत्र मुख्यः इत्यदोषः । तत्रेदमुच्यते ! न, एतत्कल्पनाया अशक्यत्वात् । तथाहि, ' असंकीर्णस्वभावं सद् वस्तु वस्त्वन्तरात्मना । आरोप्यतेऽभिधानार्थं कथं न भ्रान्तिवर्जितैः ॥ ' यदा तावत् भ्रान्त्या मृगतृष्णायां तोयमध्यारोप्य शब्दं प्रयुङ्क्ते, तदा उभयोः मुख्यार्थाध्यवसानरूपेण तोयप्रतीतेः भ्रान्तिमुख्यत्वम् । (भ्रान्त्या अध्यवसितो मुख्यः भ्रान्तिमुख्यः इति शाकपार्थिवादिवत् मध्यमपदलोपी समासः । सु. पृ. ५०१) । अथापि वक्ता विवेकी सन् इतरवञ्चनार्थं प्रयुङ्क्ते, (अत्र आनन्दाश्रमीये चौखम्बीये च ' इतरवचनार्थं ' इत्येव पाठः, तथापि सुधायां ' श्रोतृप्रतारणाय ' इति ' श्रोतृवञ्चनार्थेनैव ' इति च स्पष्टत्वात् ' इतरवञ्चनार्थं ' इत्येव पाठो निश्चीयते) श्रोता च न विविङ्क्ते (विचिर् पृथग्भावे रुधादिः) तदाऽपि एकस्य विवेकेन अध्यारोपाभावात्, इतरस्य भ्रान्त्या अध्यवसानात् (अत्र आनन्दाश्रमीये ' इतरस्यान्त्याध्यवसानात् ' इति, चौखम्बीयें च ' इतरस्य अन्त्याध्यवसानात् ' इति संधिमकृत्वा मुद्रितम् । तथापि सुधायां 'ननु द्वयोः श्रोतुरेव वा भ्रान्तौ आरोपाभावेऽपि भ्रान्त्या प्रतारणार्थेन वा परशब्दस्य परत्र प्रयोगोपपत्तेः ' इत्युत्तरावतरणलेखनात् ' इतरस्य भ्रान्त्या अध्यवसानात् ' इत्येव वार्तिकपाठो निश्चीयते) नैकमपि प्रति गौणत्वोपपत्तिः । यदा तु द्वावपि अभ्रान्तौ, तदा उभयोः सादृश्यादिनिमित्तान्तर्णीतवत्यर्थाध्यवसानात् आरोपाभावः । (सादृश्यं आदिपदोपात्तो वा सादृश्यहेतुः गुणयोगः निमित्तं यस्य वत्यर्थस्य [वतिप्रत्ययार्थस्य] तस्य परत्र परशब्दप्रवृत्तौ निमित्तत्वेन अध्यवसानात् नारोपकल्पना युक्ता इत्यर्थः । सु. पृ. ५०१) तथाहि ' द्वावपि प्रतिपद्येते सिंहपुंसोर्विविक्तताम् । नाध्यारोपयितुं शक्तिस्तेनैकस्यापि विद्यते ॥ ' यथैव हि असदृशानामर्थानां तिक्तमधुरादीनां न कथंचिदपि प्रतीत्यभावात् परस्पराध्यारोपणम्, एवं सदृशानामपि विवेकज्ञानं नोपपद्यते । नहि अर्थाध्यवसानात् अन्यादृशं नाम ज्ञानं व्यवहाराङ्गं भवतीति । किंच ' शब्द एव यदा तावदनिमित्तो न वर्तते । बुद्धिर्दुर्ललिता (स्वच्छदा) तत्र भवेन्निर्विषया कथम् ॥ ' ' न च अर्थरहिता बुद्धिः आत्माकारमात्रमनुभवन्ती जायते ' इत्युक्तं शून्यवादे । अपि च ' पूर्वानुभूत एवार्थः स्मर्यते प्रथमं पदात् । तेन मुख्ये प्रतीतेऽर्थे काध्यारोपो भविष्यति ॥ '

सर्वथा तावत् अयं गौणमुख्यविभागः श्रोतॄणामर्थविशेषावधारणे व्याप्रियते । ते च पदवेलायां अनध्यारोपितस्वार्थवृत्ति एव सिंहादिपदमध्यवसाय देवदत्तादिपदसामानाधिकरण्यान्यथाऽनुपपत्त्या गौणतां कल्पयन्ति ।

तत्र चैषां स्वयमनारोप्यैव सिंहत्वं तत्सादृश्यादिप्रतीतिर्भवति । सा च किं शब्दात् अथ अर्थात् इति अन्विच्छतां अन्वयव्यतिरेकाभ्यां आकृत्यधिकरणन्यायेन अर्थात् इति निश्चयो जायते । कथम् ? '**सिंहशब्दे ह्यनुक्तेऽपि सिंहार्थात् सदृशे मतिः । जायते, न त्वबुद्धेऽर्थे सिंहशब्दे श्रुतेऽपि नः ॥**' यदा च श्रोतॄणां स्वयमध्यारोपाभावः, तदा वक्तर्यपि नैव एषामेवं कल्पना भवति यथा 'नूनमनेन सिंहत्वं अध्यारोपितम्' इति । कथं तर्हि ? 'सिंहत्वाविनाभूतानेकक्रियागुणसमुदायः अनेन विवक्षितः, यत्नगौरवभयात् न स्वैरमिधानैर्ब्रवीति' । न चास्य समस्तस्य किंचिदेकं वाचकं पदमस्ति, तेन अविनाभावितया कथं नु सिंहत्वात् तत्प्रतीतिर्भवेत् इति तत् तावदभिधीयते । यतः स्थितया शब्दशक्त्या पुंसां व्यवहारः, न तद्वशेन शक्त्यन्तरोपजन इति । किंच '**यद्यध्यासेन वक्तॄणां गौणी वृत्तिः प्रकल्पते । वेदे सा न कथंचित् स्यादध्यारोपयितुर्विना ॥**' तस्मात् गुणप्रवृत्तिप्रयोजनः गौणः इत्येव लक्षणं न्याय्यं नान्यथा । (गुणयोगनिमित्तायाः शब्दप्रवृत्तेः गौणत्वेन इष्टत्वात् वाच्यगुणानां प्रभूतानामर्थान्तरे वृत्तियोंगः प्रयोजनं प्रवृत्तौ निमित्तं यस्य, स गौणः । प्रयोजनशब्देन प्रयुज्यते अनेन इति व्युत्पत्त्या निमित्तमुक्तम्) ।

ननु एवं सति खपुष्पादीनां स्वार्थाविनाभूतगुणाभावात् गौणप्रयोगाभावप्रसङ्गः (तथा च अव्याप्तिः) । सांख्यादिकल्पितप्रधानादिनिषेधे च बौद्धादेः विना अध्यारोपेण प्रयोगासंभवः । अनभ्युपगमे हि प्रतिषेधानर्थक्यम्, अभ्युपगते तद्विरोधः स्यात्, अध्यारोपितनिषेधे तु अदोषः इति । अत्राभिधीयते । तवैवायं दोषः । कुतः ? '**अध्यस्यते खपुष्पत्वमसत् कथमवस्तुनि । प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वा ॥**' (गुणो रूपं सत्ता च प्रज्ञाते यस्य इति विग्रहः) । यस्तावत् 'खपुष्पस्थानीय आत्मा' 'खपुष्पं भवत्सिद्धान्तः' इत्यादिप्रयोगः, तत्र कतरत् खपुष्पं अन्यत् त्वया सिंहत्ववत् अवधारितं यदध्यारोप्येत, तेन खपुष्पस्वरूपमेव तावत् अध्यारोपात्मकमभ्युपगन्तव्यम् । न च एतस्य लोके गौणत्वप्रतीतिः, मुख्यार्थान्तराभावात् । प्रथमप्रतीतत्वात् हि खपुष्पादिस्वरूपं न मुख्यत्वात् अपैति । कथमसतो मुख्यत्वमिति चेत्, तुल्यमिदं गौणत्वेऽपि । यत्र तु अध्यारोप्यते, स गौणः, न यः अध्यारोप्यते । खपुष्पं च आरोप्यमाणं विषयान्तराभावात् स्वयमेव अध्यारोप्यते वा । तत्र एतत् स्यात्, विद्यमानघटादिरूपं तत्र अध्यारोप्यते, (विद्यमानस्य घटादेः यत् सद्रूपम्, तत् तत्र खपुष्पादौ आरोप्यते) न गौणत्वमिति । तदयुक्तम्, खपुष्पादौ सद्रूपप्रत्ययानुत्पादात् । अवश्यं हि यादृक् संबन्धकाले अर्थः अनुभूतः, तादृक् उत्तरकालं ग्रहीतव्यम् । न च शशविषाणाद्यर्थः सद्रूपेण अनुभूतपूर्वः । न च अर्थान्तरसद्रूपग्रहणेन खपुष्पादेः संबन्धो गृह्यते । ययोः तदवयवयोः अर्थसंबन्धः अनुभूतः, तयोर्नैव गौणत्वम्, मुख्यात्मना अवबोधात् । कथं तर्हि 'शशविषाणं नास्ति' इत्युच्यते ? (सद्रूपत्वेन अप्रतीतस्य अप्रसक्तत्वात् निषेधो न युज्यते) । यदि सद्रूपेण, न प्रतीतपूर्वम् । सद्रूपप्रतीतस्य वा कथमत्यन्तप्रतिषेधोपपत्तिः । पश्य '**अन्यत्र ज्ञातसद्भावः पदार्थोऽन्यत्र वार्यते । न त्वेकत्रैव सद्रूपमसद्रूपं च गम्यते ॥**' तेनैव अध्यारोप्यते इति चेत् (येन कारणेन एकत्र वस्तुवृत्त्या सदसत्त्वे विरुध्येते, तेनैव कारणेन सद्रूपत्वं आरोप्यते), न। अध्यारोप्यस्यापि एवमेव प्रदेशान्तरसद्भावाधीनत्वात् । न च अन्यसद्भावेन अन्यस्य अध्यारोपः सिध्यति, असंबन्धात् । कथं ऊषरसद्भावेन तोयरूपाध्यारोपः इति चेत्, प्रदेशान्तरे तोयसद्भावप्रतीतेर्वैषम्यम् । कथं तर्हि शशविषाणं नास्तीति प्रयोगः ? पूर्वेणैव अभावे अवगते नास्तिशब्दः अनुवादकः इति केचित् (शशविषाणशब्देनैव अभावावगमात् नास्तिशब्दस्य अनुवादत्वोपपत्तिः इति) । अथवा सामान्येन प्रागभावादिषु नास्तिशब्दः प्रवर्तमानः शशविषाणशब्देन विशेष्यते, न शशविषाणम्, अव्यभिचारात् तेन इत्यदोषः । अथवा, येन अवयवार्थौ गृहीतौ, समासाच्च राजपुरुषादिवत् सामान्यतोदृष्टेन षष्ठ्यर्थस्मृतिः प्रसक्ता, न च कदाचित् शशः शृङ्गरहितत्वेन अवधारितपूर्वः, तस्य एतत्

संसर्गानुसंधानं वार्यते । (शशशृङ्गं नास्ति इत्यस्य शशस्य शृङ्गेण संसर्गो नास्ति इत्यर्थः इति । स्वमतेन समासार्थकथनार्थत्वं नास्तिशब्दस्य द्योतयितुमाह –) अथवा विनैव समासेन शशं अधिकरणत्वेन निर्दिश्य विषाणं च गवादिगतं विनैव अध्यारोपेण अनयोः संबन्धो नास्ति इति कथिते तेनैव अनुभूतसंबन्धस्य (पुरुषस्य) शशविषाणशब्दः तमेव अभावं गमयिष्यति ('इत्येतदर्थे नास्तिशब्दप्रयोगः । 'क्रियायां क्रियार्थायाम् ' इति लृटः क्रियार्थक्रियोपपदनिमित्तत्वात् 'गमयिष्यति' इति 'एतदर्थम्' इत्यर्थो लभ्यते । सु. पृ. ५१०) । अथवा शशमूर्धवर्तिनां पृथिव्यवयवानामुपर्युपरि चीयमानानां दृढदीर्घसंनिवेशरूपेण परिणतानां नीचैर्वृत्ताकारेण यत् अवस्थानम् , सोऽस्य वाक्यस्य (शशविषाणं नास्ति इत्यस्य) अध्यासमन्तरेण उक्तविषयः संभवति । ('कथं तर्हि शशविषाणं नास्ति इति प्रयोगः' इत्याशङ्कानिरासमुपसंहरति –) इति अविरोधः । तथा चाह 'यां निषेधाः क्रियामाहुर्न यातीत्येवमादयः । तिष्ठतीत्यादिभिः सैव वस्तुरूपा प्रतीयते ॥' (इति । गुणयोगनिमित्तवृत्तित्वस्य गौणलक्षणस्य अव्यापकत्वं परिहरति –) तेन लब्धमुख्यार्थानां शशविषाणादीनां (शब्दानां) अन्यत्रापि (आत्मादौ) प्रसिद्धि-अन्यथास्थायिनि अर्थे (सद्रूपत्वेन प्रसिद्धेः अन्यथा अन्येन प्रकारेण असद्रूपत्वेन स्थायिनि अर्थे) सिद्धो गौणप्रयोगः । तत्र तु मुख्याभावात् दूरीभूतो गौणः । यदि च स्वार्थे एव गौणता , ततः अर्थान्तरेणैव वृत्तेः अत्यन्ताभावः स्यात् । नहि अग्निशब्दः माणवके गौणीभूतः तद्द्वारेण पुनरन्यत्र गौणतां प्रतिपद्यते । तथा च वक्ष्यति 'न प्रतिनिधौ समत्वात्' (६।३।१४।३२) इति । येऽपि प्रधानत्वादीनां प्रतिषेधाः, तेऽपि नाध्यारोपनिमित्ताः । किं तर्हि ? 'परमाणुशरीरादिकारणात्मादिवादिभिः । ततोऽन्यादृक् प्रधानात्मरूपं नास्तीति वर्ण्यते ॥' प्रधानादिशब्दाः जगत्कारणादिविषयाः, तत्रैव बौद्धादिभिः परमाण्वाद्यात्मककारणाभ्युपगमात् , शरीरसंतानाद्यात्मककल्पनाच्च तद्व्यतिरिक्तकारणादिनिषेधः क्रियते, परमाणुशरीरादिष्वेव प्रधानात्मादिशब्दवृत्तिः इति यावत् । तस्मात् स्वार्थाभिधानेनैव गौणत्वमित्यदुष्टम् । अतश्च यजमानः प्रतीतः स्वार्थसिद्धिकरत्वं लक्षयति । प्रस्तरैककपालौ अपिच पारंपर्येण यजमानार्थसिद्धिं कुरुतः, इति कार्यापत्तेः तच्छब्देन स्तूयेते । जातिसारूप्यादीनि व्याख्यातानि ।

सोम—– पूर्ववैषम्येण प्रत्यवस्थानात् संगतिः । इहाधिकरणे गुणयोगनिमित्तवृत्तित्वं गौणवृत्तिलक्षणं प्रतिपाद्यते , गौणमुख्याधिकरणे तु (३।२।१) गौणवृत्तिसद्भावमात्रं प्रतिपादयिष्यते इति भेदः । १३.

वि—'यजमानः प्रस्तरोऽत्र गुणो वा नाम वा स्तुतिः ।, सामानाधिकरण्येन स्यादेकस्यान्यनामता ॥ गुणो वा यजमानोऽस्तु कार्ये प्रस्तरलक्षिते । अंशांशित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः ॥, अर्थभेदादनामत्वं गुणश्चेत् प्रह्वियेत सः (यजमानः) । (तस्मात्) यागसाधनताद्वारा विधेयप्रस्तरस्तुतिः ॥' स्तुतिरिति सिद्धान्तः । एवं 'यजमान एककपालः' इत्यादिषु द्रष्टव्यम् । १३.

भाट्ट—– 'यजमानः प्रस्तरः' इत्यादावपि सामानाधिकरण्यात् एकमितरस्य नामधेयम् । रूढत्वेन तदसंभवाद्वा जघन्यप्रस्तरपदलक्षितप्रस्तरकार्यस्रुग्धारणोद्देशेन यजमानोऽधिकरणत्वेन विधीयते । इति प्राप्ते , प्रत्यक्षविध्यश्रवणात् 'उत्तरं बर्हिषः प्रस्तरं सादयति' इति विध्यन्तरैकवाक्यत्वाच्च तदर्थवादत्वमौदुम्बराधिकरणसिद्धमेव । यजमानपदं तु गौण्या वृत्त्या प्रस्तरस्तावकम् ।

ननु अध्यारोपितार्थवृत्तित्वं गौणत्वं लोके प्रसिद्धम् ; सिंहत्वस्य देवदत्ते आहार्यारोपात् । न च तत् वेदे संभवति । आरोपकपुरुषाभावादिति चेन्न । विनाऽप्यारोपं सिंहशब्दस्य सादृश्यमात्रविवक्षया देवदत्ते काव्यलोकयोः प्रयोगदर्शनात् । अतः स्वशक्यगुणसमानजातीयगुणयोगनिमित्तत्वं गौणत्वम् । सिंहनिष्ठक्रूरत्वसमानजातीयक्रूरत्वयोगाच्च सिंहपदस्य देवदत्ते प्रवृत्तेः 'सिंहो देवदत्तः' इत्यत्र लक्षणसमन्वयः । पुष्पादौ खसंबन्धित्वाध्यारोपेण चारोपितं खपुष्पशब्दार्थमङ्गीकृत्य तद्वृत्तिगुणानामसत्त्वादीनां सिद्धान्ते सत्त्वाच्च न 'खपुष्पं भवत्सिद्धान्तः' इत्यादावव्याप्तिः । अतश्च एतादृशगौणत्वस्य वेदेऽप्यस्त्येव संभवः । यद्यपि च रूपकादिस्थले 'सौन्दर्यस्य तरङ्गिणी'

इत्यादौ आरोपेणापि गौणी दृष्टा, तथापि सादृश्यमात्रेणापि उपमालङ्कारस्थले सा अनुभूयमाना नापह्नोतुं शक्या । अतश्चोभयसाधारण्येन स्वशक्यसमवेतवत्ता गौणी वृत्तिः । समवेतवत्त्वं च क्वचिदारोपितत्वसंबन्धेन, क्वचिच्च स्वसमानजातीयगुणवत्तासंबन्धेनेति भेदः । अत्र सिंहपदेन शक्त्या सिंहोपस्थित्यनन्तरं लक्षणया क्रूरत्वोपस्थितिरिति प्राञ्चः । वस्तुतस्तु – एकसंबन्धिस्मरणेन अपरसंबन्धिस्मारकविधयैव तदुपस्थितिः । गौणीज्ञानकार्यतावच्छेदकं च निरुक्तोभयविधसंबन्धान्यतरसंबन्धेन स्वशक्यसमवेतधर्मप्रकारकदेवदत्तविशेष्यकशाब्दत्वमिति न क्रूरत्वादीनामशाब्दत्वप्रसङ्गः । न च गौण्या लक्षणातो न भेदः, स्वशक्यवृत्तिगुणानामेव यत्र संबन्धत्वेन रूपेण बोधः तत्र लक्षणा, क्रूरत्वत्वादिना बोधे तु गौणीति तयोर्भेदात् । ते च गुणाः षड्विधाः— क्वचित्तत्सिद्धिः तत्कार्यकारित्वं यथा यजमानपदे । यजमानो यथा स्वकार्यकर्ता, तथा प्रस्तरोऽपीति । एवं च गौणीगर्भलक्षणया प्रस्तरस्तुतिः । एवमन्येऽपि पञ्च गुणा अग्रिमसूत्रैः द्रष्टव्याः । १३.

मण्डन–– ‘ प्रस्तरे यष्टृवाग् गुणात् । ’

शंकर–– ‘ तत्सिद्धेर्गौणता क्वचित् । ’ १३.

* अर्थवादानामवयवार्थपरत्वाभावे तत्सिद्ध्यधिकरणविरोधः, तत्र यजमानशब्दस्य क्रतुनिर्वर्तकत्वगुणयोगात् गौण्या वृत्त्या प्रस्तरे वृत्तेर्व्यवस्थापनात् । कु. १।२।१।१८ पृ. ३१.

तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः । १।४।१३।२३ ॥

(तत्रादौ तत्सिद्ध्यधिकरणम् ।) ‘यजमानः प्रस्तरः’ ‘ यजमान एककपालः ’ इत्येवमादि समाम्नायते । तत्र संदेहः ‘ यजमानः प्रस्तरः ’ इति किमेष गुणविधिः किमर्थवादः इति । तथा ‘ यजमान एककपालः ’ इति । अत्र प्रभाकरेण संगतिलोभात् सर्वेष्वेवार्थवादोदाहरणेषु इत्थमधिकरणमुपवर्णितम्– ‘यजमानः प्रस्तरः’ इत्यादिषु न तावत् यजमानकार्ये प्रस्तरविधिः, चेतनकार्येषु अचेतनस्यायोग्यत्वात् । नापि प्रस्तरकार्ये यजमानविधिः, जुह्वादिपदार्थासादनावरुद्धे तस्मिन् सकलयजमानकार्यलोपप्रसङ्गात् । अतो नायं गुणविधिः । नाप्यर्थवादः, यजमानशब्दस्य प्रस्तरे प्रस्तरशब्दस्य च यजमाने प्रवृत्तिनिमित्ताभावेन स्तुत्यर्थासंभवात् । न च गुणयोगः प्रवृत्तिनिमित्तम्, एतदधिकरणपूर्वपक्षे गौणशब्दप्रयोगाक्षेपात् । अतः प्रतिभामात्रहेतुत्वात् एवमादेरप्रामाण्यमेव इति पूर्वपक्षः । सिद्धान्तस्तु यथाभाष्यमेवेति । **तदिदमनुपपन्नम्**, वक्ष्यमाणपूर्वपक्षप्रकारेण गुणविधित्वेन प्रामाण्योपपत्तेः, इति यत्किंचिदेतत् । इति यथावार्तिकमेवाधिकरणं प्रस्तूयते । पूर्वमर्थवादपादे स्तुत्यर्थे परत्र परशब्दप्रयोगस्य प्रवृत्तिनिमित्तं अर्थवादप्रामाण्यप्रतिपादनपरतयाऽभिहितम् । इदानीं पूर्वाधिकरणोक्तगुणविधिप्रतियोगिकार्थवादप्रतिपादनप्रसङ्गेनाभिधीयते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । ‘ यजमानः प्रस्तरः ’ इति सामानाधिकरण्यं तावदत्र प्रतीयते । न चैतन्नामधेयत्वेनोपपद्यते, उद्भिदादिपदवत् प्रवृत्तिनिमित्ताभावात् । नाप्यर्थवादत्वेन, नहि प्रवृत्तिनिमित्तं विना परत्र परशब्दः आम्नातुं प्रयुज्यते । नापि गुणयोगः प्रवृत्तिनिमित्तम्, यजमानशब्दस्य गुणानभिधायकत्वात् । न च गुणानभिधानेऽपि अग्निशब्दस्येव माणवके गौणत्वमिति वाच्यम् । सर्वगौणशब्दानामेव गौणत्वस्य एतदधिकरणव्युत्पाद्यत्वात् । अतः सामानाधिकरण्योपपत्तये अन्यतरस्य कार्यलक्षणापरत्वं वक्तव्यम् । तत्र ‘ मुख्यं वा पूर्वचोदनाल्लोकवत् ’ (१२।२।८।२३) इति न्यायेन ‘ यो होता सोऽध्वर्युः ’ इतिवत् यजमानशब्दस्य मुख्यत्वात् अनुपजातविरोधित्वाच्च स्वार्थपरत्वम्, प्रस्तरशब्दस्य जघन्यत्वात् विरोधाच्च कार्यलक्षणापरत्वम् । तथा सति अर्थवत्त्वात् प्रवृत्तिविशेषकरत्वाच्च प्रस्तरशब्दलक्षितकार्ये यजमानो विधीयते एव, होतेवाध्वर्युकार्ये । न चैवं सति सकलयजमानकार्योच्छेदप्रसङ्गः, सदस्यादिप्रतिपुरुषद्वारेणैव यजमानकार्योपपत्तेः । **इत्येवं प्राप्ते, अभिधीयते ।** भवेदेवं यदि प्रस्तरकार्ये यजमानविधिरुपपद्येत । न चासौ उपपद्यते, सकलयजमानकर्मलोपप्रसङ्गात् । नापि सदस्यादिप्रतिपुरुषद्वारेण यजमानकर्माविरोध इति वाच्यम् । ‘ सूक्तवाकेन प्रस्तरं प्रहरति ’ ‘ एककपालं सर्वहुतं करोति ’ इति प्रस्तरैककपालयोः आहवनीये प्रक्षेपश्रुतेः यजमानस्य आहवनीये प्रक्षेपे सति यजमानकर्मलोपस्य तदवस्थत्वात् । किंच ‘ यजमानः प्रस्तरः ’

इत्यत्र न तावद्विधिः श्रूयते, न च 'यो होता सोऽध्वर्युः' इत्यादिष्विव गत्यन्तरासंभवेन कल्पयितुं शक्यते, 'प्रस्तरमुत्तरं बर्हिषः सादयति' 'एककपालं सर्वहुतं करोति' इत्येतद्विधिशेषत्वेन अर्थवादत्वेनैव गतिसंभवात् । एवं च सति एकवाक्यत्वेनैवोपपत्तेः वाक्यभेदोऽपि न भविष्यति । न च प्रवृत्तिनिमित्तं विना परशब्दः परत्र कथं प्रयुज्यते इति वाच्यम् । गुणयोगस्यैव प्रवृत्तिनिमित्तत्वात् । ननु गुणोऽपि न कश्चित् साधारणो यजमानशब्देनाभिधीयते इत्युक्तम् । सत्यम् । लक्षणया स्वाभिधेयार्थसंबन्धोपस्थितमेवार्थं शब्दो विषयीकरोति, यथा गङ्गाशब्दः स्वार्थसंबद्धमेव तीरम् । गौणः पुनः अभिधेयार्थसंबन्धलक्षितगुणयोगेनैवार्थान्तरं यथा 'अग्निर्माणवकः' इति । तदुक्तम् 'अभिधेयाविनाभूते प्रतीतिर्लक्षणोच्यते (प्रवृत्तिर्लक्षणेष्यते इति मूले पाठः)। लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥' (वा. पृ. ३५४) इति । गुणश्चात्र यजमानप्रस्तरैककपालानां यागप्रयोगसिद्धिकरत्वमेव । अनेन गुणयोगेन प्रस्तरैककपालयोः स्तुतिरित्यर्थवादत्वमेवेति । तदुक्तं सूत्रे 'तत्सिद्धिः' इति ।

तथा 'आग्नेयो वै ब्राह्मणः' 'ऐन्द्रो राजन्यः' 'वैश्यो वैश्वदेवः' इत्यत्र तद्धितान्तस्य आग्नेयादिपदस्य यथाकथंचिन्मुख्यभावेनापि (पुस्तकान्तरे पाठान्तरम्—न्मुख्या भावनाऽपि) ब्राह्मणादिपदसामानाधिकरण्यसंभवात् । 'अग्निर्ब्राह्मणः, इन्द्रो राजन्यः, वैश्यो विश्वे देवाः' इत्यादयोऽप्युदाहरणम् । न तु तद्धितान्तपदानि । अत्रापि पूर्ववदेव लक्षितब्राह्मणादिकार्ये गुणविधानं इति पूर्वः पक्षः । सिद्धान्तस्तु अग्नेरचेतनस्य ब्राह्मणादिकार्यकरणासंभवात् अर्थवादत्वेनैवोपपत्तेः ब्राह्मणादिसंबन्धिविध्येकवाक्यतया गुणवादेनार्थवादत्वमेव । प्रवृत्तिनिमित्तं च गुणः अग्निब्राह्मणयोरर्थवादावगतैकब्रह्ममुखोत्पत्तिः, इन्द्रराजन्ययोः ब्रह्मबाहुभ्यामुत्पत्तिः, विश्वदेववैश्ययोः ब्रह्ममध्यदेशादुत्पत्तिः । तदुक्तं सूत्रे 'जातिः' इति ।

तथा 'यजमानो यूपः' 'आदित्यो यूपः' इत्यत्रापि उक्तन्यायेन न लक्षितकार्ये गुणविधिः, किन्तु यूपविध्येकवाक्यतया गुणवादेनार्थवादत्वमेव । प्रवृत्तिनिमित्तं च गुणः यूपस्य यजमानेन सहोर्ध्वत्वं आदित्येन सह तेजस्वित्वमिति । तदुक्तं सूत्रे 'सारूप्यम्' इति ।

तथा 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः' 'अयज्ञो वा एष योऽसामा' 'असत्रं वा एतद् यदच्छन्दोमम्' इति । अत्र पश्वादिशब्दलक्षितं कार्यं नञा निषिध्यते इति पूर्वपक्षी मन्यते । तदयुक्तम्, पशुकार्यस्य निषेद्धुमशक्यत्वात् । द्विविधं हि तस्य कार्यम्, प्रमाणान्तरसिद्धं दोहनादि वैधं च यागादि । तत्र प्रमाणान्तरसिद्धं तद्विरोधादेव न निषेध्यम् । नापि वैधम्, आख्यातयोगिनञ्शब्दाश्रवणात् । आख्यातयोगे हि नञ् निषेधको भवति । न च 'अपशवः' इत्यत्र आख्यातं श्रूयते, येन षोडशिग्रहणाग्रहणवत् विकल्पो भवेत् । तेन गवाश्वविध्येकवाक्यतया अर्थवाद एवायम् । तथा च सति 'पशवो गोअश्वाः' इत्यत्र पशुशब्दः प्राशस्त्यं तद्गतं लक्षयित्वा प्राशस्त्यलक्षितगुणयोगेन गवाश्वसमानाधिकरणो भवति 'पशवो गोअश्वाः' इति । तादृशमेव च पशुशब्दं पश्वन्तरेषु सामानाधिकरण्येन तथैव गवाश्वप्राशस्त्यावगमहेतुं प्रयुज्य गवाश्वयोः प्रशस्ततरत्वज्ञापनार्थं नञा तदभावः प्रतिपाद्यते 'अपशवो वा अन्ये गोअश्वेभ्यः' इति अप्रशस्ताः इत्यर्थः । तदुक्तम् 'गवाश्वादिगतां पूर्वमुपादाय प्रशस्तताम् । तदभावोऽन्यपश्वादौ नञ्समासेन कथ्यते ॥' (वा. पृ. ३६२) इति ।

इदं त्विह विवेक्तव्यम् । द्विविधो हि गौणः शब्दो भवति, यत्र परशब्दः परत्र प्रयुज्यते तत्र साधारणमेव गुणं निमित्तीकृत्य प्रवर्तते यथा 'अग्निर्माणवकः' इति । यत्र पुनः सामान्यवाची शब्दो विशेषशब्दसमानाधिकरणः प्रयुक्तः सन् अनर्थको भवति, तत्र तद्गतमेव गुणं लक्षयित्वा तत्सामानाधिकरण्यं प्रतिपद्यते यथा 'वसिष्ठो ब्राह्मणः' इति । तद्वदिहापि पशुशब्द इति । किंचान्यत्र प्रशंसाफलं तत्सिद्ध्यादयो गुणाः प्रवृत्तिनिमित्तानि, इह तु प्रशंसैव गुणः प्रवृत्तिनिमित्तम् । फलं च तदेवेत्येतदपि विवेक्तव्यमिति । तदुक्तं सूत्रे 'प्रशंसा' इति ।

(तथा) 'सृष्टीरुपदधाति' इति विधिरनुवाद इति संदेहः । 'इष्टकाभिरग्निं चिनुते' इत्यग्निस्थापनार्थे-

ष्टकाचयनं प्रकृत्य श्रूयते 'सृष्टीरुपदधाति' इति। अत्र यद्यपि 'उपदधाति' इत्युपधाने विधिः श्रूयते, तथापि तस्येष्टकारोपणरूपस्योपधानस्य चयनाक्षेपलब्धत्वात् सृष्टिपदार्थसंक्रान्तो विधिः सृष्टिपदेन च 'तद्वानासामुपधानो मन्त्रः' (पा० ४।४।१२५) इत्यनुशासनात् सृष्टिपदवन्मन्त्रोपधेया इष्टका उच्यन्ते। न च तासां मन्त्रसंबन्धात् प्राक् सृष्टिपदवाच्यत्वेन प्रसिद्धिरस्ति, ततश्च प्राप्ताप्राप्तविवेकेन विशेषणीभूतमन्त्रविधिरेवायमिति पूर्वः पक्षः। सिद्धान्तस्तु—न चैतत् संभवति, तथा सति इष्टकोपधानमात्रोद्देशेन सृष्टिपदवन्मन्त्रविधाने लिङ्गप्रकरणविनियोज्यानां सृष्टिपदरहितानां मन्त्राणामानर्थक्यप्रसङ्गात्। न च गत्यन्तरं नास्ति, बहवो हि मन्त्राः सृष्टिपदवन्तः एव श्रूयन्ते, तत्रान्येषामपि तदन्तर्गतत्वात् सृष्टिशब्देन सृष्ट्यसृष्टिपदवन्मन्त्रोपधेयेष्टकानुवादेन अर्थवादत्वेनैवोपपत्तेः। दृश्यते चैवं लोकेऽपि ब्राह्मणभूयस्त्वेन ब्राह्मणाब्राह्मणग्रामस्य ब्राह्मणग्राम इति श्रुतिः।

तदेतत् यथाभाष्यमधिकरणं वार्तिककारपादा नानुमन्यन्ते। विध्येकदेशो हि अर्थवादो भवति। न चात्र विधिः कश्चित् संनिहितोऽस्ति। प्रकृतचयनविधेरपि अनेकवाक्यान्तरव्यवहितत्वेन अस्य तदेकदेशत्वाभावात्। तेनोपधानमेवात्र विधीयते। सृष्टिपदेन च सृष्ट्यसृष्टिपदवन्मन्त्रोपधेयेष्टकाप्रतिपादनं तु स्तुत्यर्थं प्रथनविधाविव 'उरु प्रथा उरु प्रथस्व' इति मन्त्रकीर्तनम्। न च चयनार्थाक्षिप्तोपधानं न विधीयते इति वाच्यम्। आक्षेपात् प्रागेव शीघ्रप्रवृत्तेन प्रत्यक्षविधिना तद्विधानात्। न च विनापि विधिना प्रसिध्यतः किं विधिनेति वाच्यम्। यतो विधाने सति आध्वर्यववेदविहितत्वेन अध्वर्युकर्तृकत्वनियमसिद्धेः। तदुक्तम् 'प्राप्नुवन्त्यपि वक्तव्या पुनरेवंविधा क्रिया। आध्वर्यवसमाख्यानं तथाहि प्रतिपद्यते॥' (वा. पृ. ३६४)। अन्यच्च विस्तरभिया नाभिहितम्। तदुक्तं सूत्रे 'भूमा' इति।

तथा 'प्राणभृत उपदधाति' 'अज्यानीरुपदधाति' इति। अत्रापि पूर्ववत् इष्टकाचयनमेव प्रकृत्य श्रूयते 'प्राणभृत उपदधाति' इति। तत्र किमयं विधिरुतार्थवाद इति संशय्यते। तत्र पूर्वपक्षी मन्यते, 'सृष्टीरुपदधाति' इत्यत्र सृष्टिपदवन्मन्त्राणां बहुत्वात् तन्मध्यवर्तिनामसृष्टिपदवतामपि भवतु स्तुत्यर्थमुपादानम्, इह तु एकस्यैव मन्त्रस्य स्तुत्यर्थमुपादानं इति पूर्वोक्तेन पूर्वपक्षन्यायेन मन्त्ररूपगुणविधानमेव इति पूर्वपक्षः। सिद्धान्तस्तु पूर्ववदेव। तत्र लिङ्गप्रकरणविनियोज्यानां बहूनां मन्त्राणामानर्थक्यप्रसङ्गात् न गुणविधित्वम्, किन्तु छत्रिन्यायेन एकदेशसंबन्धिनाऽपि लक्षितसमुदायगुणयोगेनैव समुदायिषु प्राणभृच्छब्दप्रवृत्त्युपपत्तेः पूर्ववदर्थवादत्वमेव इति। तदेतदपि वार्तिककारपादा नानुमन्यन्ते। संनिहितविध्यभावेनार्थवादत्वाभावादेव। तेनात्रापि उपधानमेव विधीयते, मन्त्रकीर्तनं प्रथनन्यायेन अर्थवादार्थमेवेति।

इदं त्विह वक्तव्यम्— 'सृष्टीरुपदधाति' 'प्राणभृत उपदधाति' इत्युदाहरणद्वयेऽपि लक्षितसमुदायगुणयोगेन समुदायिप्रतीत्यविशेषान्न सृष्टिप्राणभृच्छब्दार्थयोः भूयस्त्वाल्पत्वेन समुदायिषु प्रवृत्तिनिमित्तकृतः कश्चित् विशेषोऽस्ति इति विचारद्वयमनर्थकमेवेति। अत्रोच्यते। गौणो हि शब्दः परत्र वर्तितुं यल्लक्षयति, स एव गुणस्तत्प्रवृत्तौ निमित्तम्। 'सृष्टीः' इति चात्र बहुत्वान्वयाक्षेपादेव समुदायोऽवगम्यते, एकदेशकालक्रियाऽवच्छेदेन समुदायापन्नानामेव द्वित्वबहुत्वादिसंख्यायोगात्। अतोऽत्र नार्थान्तरे वर्तितुं लक्षितः समुदायो निमित्तम्, किन्तु समुदायगतं सृष्टीनां बाहुल्यमेव। तच्च यथा केवलसृष्टिसमुदाये समस्ति, तथा सृष्ट्यसृष्टिसमुदायेऽपीति। तेन तत्पदवतामन्येषां च समुदायगतं बाहुल्यं लक्षितं समुदायान्तरे प्रवृत्तौ निमित्तमिति। बहुवचनं चात्र 'सृष्टीः' इति समुदायस्यैकत्वेऽपि समुदायान्तर्गतसृष्ट्यसृष्टिसमुदायिबहुत्वापेक्षया, यथा दर्शपूर्णमासशब्दयोः समुदायिवचनत्वेऽपि तदन्तर्गतसमुदायद्वयापेक्षया 'दर्शपूर्णमासाभ्यां यजेत' इति द्विवचनान्तत्वम्। 'प्राणभृत उपदधाति' इत्यत्र (बहुवचनं) तु प्राणभृन्मन्त्रस्यैकत्वात् एकस्मिन् बहुवचनानुपपत्त्या स्वसमवेतं समुदायं लक्षयति, स च समुदायः प्राणभृदप्राणभृत्समुदायिषु अविशिष्टः इति समुदायमेव निमित्तीकृत्य समुदायिषु प्रवर्तते, इति प्रवृत्तिनिमित्तभेदादेवोदाहरणद्वयार्थवत्त्वमिति। अत्र च प्राणभृ-

च्छब्दस्य समुदायद्वारेण समुदायिविषयत्वात् समुदायस्य च प्राणभृदप्राणभृत्साधारणत्वात् प्राणभृच्छब्दस्य गौणत्वेऽपि स्वार्थापरित्यागः । एवं सृष्टिपदस्यापि समुदायविषयत्वात् स्वार्थापरित्याग एव ।

प्रयोजनं-- सृष्टिप्राणभृल्लिङ्गैरेवोपधानं कर्तव्यं यदि पूर्वः पक्षः, यदि सिद्धान्तः सृष्ट्यसृष्टिप्राणभृदप्राणभृन्मन्त्रैरिति । तत्सिद्ध्यादिषु पक्षोक्तमेव प्रयोजनमूहनीयमिति । तदुक्तं सूत्रे '**लिङ्गसमवायाः**' इति । प्राणभृदप्राणभृन्मन्त्रलिङ्गसमवायात् समुदायिप्रतीतिरित्यर्थः । **तौता.**

* **तत्सिद्धिपदेनैव (सूत्रेण)** अष्टाकपालादिशब्दानां गुणप्रवृत्तिनिमित्तत्वकथनात् । **कौ.** १।४।१४। २४ पृ. २८०.

* **तत्सिद्धिपेटिका** पारिभाषिकार्थविशेषपरः शब्दोऽयम् । 'तत्सिद्धि–जाति–सारूप्य–प्रशंसा–भूम–लिङ्गसमवाया इति गुणाश्रयाः' इत्येकं सूत्रं (१।४।२३) 'तत्सिद्धिपेटिका' इत्युच्यते । अत्र योगविभागं कृत्वा षडधिकरणेषु षट् गौणवृत्तिनिमित्तानि उक्तानि इति पेटिका इत्युच्यते । **के.**

* गौण्याः वृत्तेर्निमित्तप्रतिपादनद्वारा गौणीवृत्तिलक्षणं अनेन (**तत्सिद्धि**–) सूत्रेण अभिधीयते । **कौ.** १।४।१३।२३ पृ. २६८, * वैश्वानराधिकरणव्युत्पादितगुणवृत्तेः आक्षेपसमाधानार्थत्वं अस्य सूत्रस्य (**तत्सिद्धिसूत्रस्य**) । १।४।१३।२३ पृ. २६८. * **तत्सिद्धिसूत्रे** सिद्धे गौणे तन्निमित्तभेदः स्वार्थापरित्यागवृत्तित्वं च व्याख्यातं इति अयं (३।२।१।१–२) अर्थात् विचारः पूर्वं प्रत्येतव्यः । **वा.** ३।२।१।१ पृ. ७४६. * लक्षणागौण्योः **तत्सिद्धिसूत्रे** अर्थान्तरशक्तिपूर्वकस्य वक्ष्यमाणत्वेन । **कौ.** १।३।८।२४ पृ. ११०. * **तत्सिद्धिसूत्रोक्तैः** सह नव गौणपक्षा द्रष्टव्याः । (**गौणीवृत्तिः** इतिशब्दे द्रष्टव्यम्) । **वा.** ३।२।१।१ पृ. ७४९.

* **तत्सिद्धिसूत्रसिद्धाया** गौण्याः वृत्तेः गुणवादसूत्रे स्तुत्युपयोगमात्रकथनात् न पौनरुक्त्यम् (गुणवादसूत्रेण तत्सिद्धिसूत्रस्य) । **कौ.** १।४।१३।२३ पृ.२६९.

⧗ **तत्स्थानापन्नः तत्कार्यं लभते इति न्यायः ।** अयं 'स्थानिवदादेशोऽनल्विधौ' (पा० १।१।५६) इतिसूत्रस्थमहाभाष्ये ध्वनितः । तद्यथा– 'लोके यो यस्य प्रसङ्गे भवति, लभतेऽसौ तत्कृतानि कार्याणि । तद्यथा उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते' इति । **साहस्री.** ४१८.

* **तत्स्थानापन्नः तद्धर्मं लभते**' इतिन्यायेन गवामयने द्वादशाहधर्मस्य द्वादशोपसत्तायाः लाभः, न चोदकशास्त्रेण । **वृ.** ७।४।३।१६. * **तत्स्थानापन्ने तद्धर्मलाभः** । इतिन्यायसिद्धं स्थानिवत्सूत्रम् । **भूतिः** पृ. ३३१.

⧗ **'तद्धेतोरेव अस्तु (तत् मध्ये किं तेन) इति न्यायः ।** इष्टसाधनत्वादिज्ञानानां कार्यताज्ञानहेतुत्वकल्पने 'तद्धेतोरेवास्तु' इतिन्यायात् प्रवृत्तिं प्रति तेषामेव कारणत्वं युक्तम् । इति चेत् न । **मणि.** पृ. ८४. * **'तद्धेतोरेव अस्तु हेतुत्वं मध्ये किं तेन'** । अनुभवस्मरणाभ्यामेव अविविक्ताभ्यां 'इदं रजतम्' इति विशिष्टाभिलापादिव्यवहारो जायते, न विशिष्टज्ञानात् 'तद्धेतोरेव०' इतिन्यायात् । **शारीरकभाष्यवार्तिकम्** ११९, * **'तद्धेतोरेव अस्तु हेतुत्वं मध्ये किं तेन'** इतिन्यायात् प्रवृत्त्यादिव्यवहारसिद्धौ न तदर्थं अधिष्ठानज्ञानेनैव विशिष्टज्ञानकल्पने प्रमाणमस्ति इति अख्यातिवादिनः । पृ. २०. * **तद्धेतोरेव तदस्तु किं तेनेति न्यायः** । तस्य कपालादेर्हेतोर्मृदादेरेव तद् घटादिकारणत्वमस्तु किं तेन अन्तर्गडुना कपालादिरूपकार्येणेत्यर्थः । **साहस्री.** ३९. * परे तु तात्पर्यज्ञानस्य न हेतुत्वं संभवति तज्ज्ञानासंभवात् । आवश्यकप्रकरणसमभिव्याहारादिना तज्ज्ञानसंभवे '**तद्धेतोः**' इति **न्यायेन** तस्य वैयर्थ्यात्... इत्याहुः । **मणि.** पृ. ६९.

⧗ **ततोऽपि यावदुक्तं स्यात् । १०।७।१०।३४॥**
गृहमेधीये ततः आज्यभागविधानानन्तरं यावत् उक्तम् 'अग्नये समवद्यति' 'इडामुपह्वयति' इति तावदपि स्यात्, न केवलं आज्यभागमात्रम् । इति सिद्धान्तः । **के.**

❋ **ततश्चावचनं तेषामितरार्थे प्रयुज्यते** । ९।१।१२।३७ ॥ भक्षस्य चोदितत्वात् भक्षयामिपदस्य च तत्प्रकाशनसामर्थ्यात् आद्यन्तपदसंदंशगृहीतेतरपदानामनन्यगामित्वात् ' ततश्चा० ' इतिवत् ग्रहणादीनामपि चोदितभक्षविशेषणत्वेन एकप्रधानार्थानामेकवाक्यत्वात् तत्रैव विनियोगः । वा. ३।२।९।२५.

❋ ततःशब्दोऽपि परभावमात्रमाह, नानन्तर्यम् । वा. ५।१।१।१ पृ. १२८९.

⧗ **' तत्राचोदितमप्राप्तं चोदिताभिधानात् '** (अर्थाभिधान० ९।१।१२।३६) इत्यनेन न्यायेन ' सध्यासं ' इत्यादीनामपि चोदितभक्षविशेषणीभूतग्रहणाद्यभिधानद्वारा भक्षाभिधानार्थत्वावगमः । सु. पृ. ११३४। न्यायरूपस्य सूत्रांशस्यार्थस्तु — दर्शपूर्णमासयोः ' देवस्य त्वा ' इत्यादौ निर्वापमन्त्रे वर्तमानाः सवितृश्विपूषशब्दाः किं कर्मसमवेतार्थाभिधायकाः ततश्च विकृतौ ऊहितव्याः, अथवा न इति संदेहे पूर्वपक्षत्वेन विधिपक्षे प्राप्ते सिद्धान्तकथनार्थः सूत्रांशोऽयम् । तत्र दर्शपूर्णमासयोः सवित्रादिदेवताकं यजनं अचोदितं न चोदितम्, तस्मात् अप्राप्तम्, मन्त्रे चोदितस्य अर्थस्य अभिधानात् । कर्मसमवेतो हि मन्त्रः कर्मसमवेतार्थस्यैवाभिधायकः । दर्शादौ च सवित्रादिशब्दाः न तादृशाः इति । के.

⧗ **तत्रान्यानृत्विजो वृणीरन्** । १०।२।१४।४३॥

' सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन् ' इति विहिते तत्र उदवसानीये सोमे सत्रगतेभ्यः अन्यान् ऋत्विजः वृणीरन् वृणीत । एकयजमानक एवायं यागः तत्र ये केऽपि ऋत्विजो वरीतव्याः न कश्चित्तत्र नियमः । इदं अन्तर्गर्भिणी अधिकरणम् । सिद्धान्तः उक्तः । के.

⧗ **तत्रार्थात् कर्तृपरिमाणं स्यादनियमोऽविशेषात्** । ३।७।९।२१॥

यागकरणार्थे ऋत्विजः परिक्रेतव्या इत्युक्तम् । ते कति परिक्रेतव्या इति विचारे पूर्वपक्षसूत्रम् । द्रव्योत्सर्गादन्यत् कर्म अन्येन कर्तव्यं इति सिद्धे सति इति तत्रशब्दार्थः । अर्थात् कर्तव्यार्थानुसारेण कर्तॄणां परिमाणं संख्या निश्चेया स्यात् । किंवा अविशेषात् संख्याविशेषस्य अनुक्तत्वात् अनियमः स्यात् न कश्चित्तत्र नियमः । द्वौ वा एक एव वा परिक्रेतव्यः इति । अत्र **सोमनाथी**— तत्र कर्त्रन्तरसद्भावे सति यावद्भिर्यत्र प्रयोगकार्ये निर्वर्त्येत तत्र तावन्तः इति कार्यतः कर्तॄणां परिमाणं स्यात्, न तु एतावन्तः इति नियमः, विशेषानवगमात् इति । अत्र **कुतूहलम्**— तत्र कर्त्रन्तरसमावेशे सिद्धे सति, अर्थात् इतिकर्तव्यताऽल्पत्वबहुत्ववशात् कर्तृसंख्या, विशेषस्य अनवगमात् । इत्येकः पूर्वपक्षः । अथ द्वितीयः पक्षः— अविशेषादनियमः स्यात् । एकस्यैव कर्त्रन्तरस्य समावेशेऽपि परिक्रयविधिसिद्धेः एकमेव कर्त्रन्तरमिति ।

अपिवा श्रुतिभेदात् प्रतिनामधेयं स्युः । २२ ॥

पूर्वपक्षनिरासार्थः अपिवाशब्दः । ऋत्विजां श्रुतिभेदात् नामधेयभेदात् प्रतिनामधेयं ऋत्विजः स्युः । नामधेयंनामधेयं प्रति प्रतिनामधेयम् । यावन्ति नामधेयानि तावन्तो वरीतव्याः तत्रतत्र यागे यथायथम् । तत्र सर्वाणि नामधेयानि तावदित्थम्, तान् पुरोऽध्वर्युर्विभजति, प्रतिप्रस्थाता मन्थिनं जुहोति, नेष्टा पत्नीमभ्युदानयति, उन्नेता चमसानुन्नयति, प्रस्तोता प्रस्तौति, उद्गातोद्गायति, प्रतिहर्ता प्रतिहरति, सुब्रह्मण्यः सुब्रह्मण्यामाह, होता प्रातरनुवाकमनुब्रूते, मैत्रावरुणः प्रेष्यति चानुचाह, अच्छावाको यजति, ग्रावस्तुत् ग्रावस्तोत्रीयामन्वाह । एवं ब्रह्मा ब्राह्मणाच्छंसी पोता आग्नीध्रः सदस्यश्च । एवं सप्तदश नामधेयानि । तेन सप्तदश ऋत्विजः सोमे वरीतव्याः । अग्निहोत्रे एकः, दर्शपूर्णमासयोश्चत्वारः, चातुर्मास्येषु पञ्च इत्यादि । तथा च ऋत्विजां वरणे नियमोऽस्ति ।

एकस्य कर्मभेदादिति चेत् । २३ ॥

ननु एक एव अन्यः परिक्रेतव्यः । अध्वर्य्वादिनामधेयभेदस्तु हविर्विभजनं मन्थिहोमः इत्यादीनां कर्मणां भेदात् उपपद्यते । तथा च एकस्यापि कर्मभेदेन भिन्ननामधेयत्वात् एक एव परिक्रेतव्यः इति चेत् ।

नोत्पत्तौ पुरुषाणाम् । २४ ॥

पूर्वसूत्रोक्तशङ्कानिरासार्थं सिद्धान्तसूत्रमिदम् । न एकस्य अनेकनामधेयसंबन्धः । कुतः ? उत्पत्तौ उत्पत्तिविधौ एव हि यस्मात् पुरुषाणां कर्तॄणां अध्वर्युः होता

इत्यादीनि नामधेयानि भवन्ति । उत्पत्तिशिष्टानि हि तानि । तस्मान्नैकस्य कर्मभेदनिमित्तानि तानि । तस्मात् अर्थानुसारेणैव षोडश ऋत्विजः वरीतव्याः इति सिद्धान्तः ।

अत्र **सुधा**-- न आध्वर्यवादिकर्मभेदनिमित्तः अध्वर्य्वादि संज्ञाभेदः, यस्मात् उत्पत्तौ कर्तुरुपादानार्थे वरणे असौ संज्ञाभेद आम्नातः इति सूत्रार्थः । इति ।

पुनश्च सुधा- एकस्य पुनःपुनर्वरणायोगेऽपि ‘ ऋत्विजो वृणीते ’ इत्यस्य वरणोत्पत्तिविधित्वेन वरणभेदाभावात् एकस्मिंश्च वरणे अध्वर्य्वादिवाक्यविहितानां वरणीयानां समुच्चयायोगात्, ‘ ऋत्विजः ’ इति बहुत्वस्य च उद्देश्यविशेषणत्वेन अविवक्षितत्वात्, परिक्रयान्यथाऽनुपपत्त्या च ऋत्विक्प्राप्तेः चमसाध्वर्युबहुत्ववत् अप्राप्तोद्देश्यविशेषणत्वाभावात् अध्वर्य्वादिशब्दानां भिन्नपुरुषसमर्पकत्वेन एकस्य कस्यचित् धर्मनिमित्तत्वात् भिन्नपुरुषसमर्पकत्वाभावे वा यावत्कर्तव्यं एकस्य सकृद्वरणं भविष्यति इत्याशङ्कायां ऋत्विग्वाक्येन वरणमात्रविधौ ऋत्विक्पदानर्थक्यापत्तेः ऋत्विग्विशिष्टवरणविधिप्रसङ्गेन अध्वर्य्वादिवाक्यानर्थक्यप्रसङ्गात् अध्वर्य्वादिवाक्यानामेव वरणोत्पत्तिविधित्वावगतेः, तत्र च अध्वर्य्वादिशब्दानां कर्मनिमित्तत्वेऽपि आध्वर्यवादिकर्मकरणत्वेन वरीतव्यस्य उत्पत्तिवाक्यशिष्टस्य होत्रादिकर्मकरतया वरीतव्येन वाक्यान्तरशिष्टस्य बाधविकल्पासंभवात् अन्योन्यनैरपेक्ष्येण समुच्चयस्याप्यसंभवात् न शक्यः सकृत्कृतेन एकेन वरणेन अनेककर्मकरत्वेन व्रियमाणः पुरुषः यजमानेन आत्मना संबन्धुम् । ततश्च समुच्चयायोगादपि वरणानि भिद्यन्ते इति परिहारः । इति । के.

तत्रार्थात् प्रतिवचनम् । ३।५।१६।४२ ॥

‘ उपहूतः उपह्वयस्व ’ इति मन्त्रे होतरुपह्वयस्व, ब्रह्मन्नुपह्वयस्व, यजमान उपह्वयस्व इत्यादिरूपेण मन्त्रेण अनुज्ञापनं कर्तव्यम् । अनुज्ञापनं नाम संमतियाचनम् । एवं तत्र अनुज्ञापने कृते प्रतिवचनं देयम् । तत्तु अर्थात् अर्थानुसारेण ‘उपहूतः’ इति मन्त्रेण स्यात् । अध्वर्युणा होतरि ‘होतरुपह्वयस्व’ इति याचिते, होता अध्वर्युं प्रति ‘उपहूतः’ इति प्रतिवचनं ब्रूयात् । एवं सर्वत्र । के.

तत्राहर्गणेऽर्थाद् वासःप्रक्लृप्तिः स्यात् । १०।६।२१।७८ ॥

अहर्गणे तत्र तस्मिन् वाससा सोमोपावहरणे कर्तव्ये सति अर्थात् अन्येनान्येन वाससा विना प्रत्यहं उपावहरणानुपपत्त्या वासःप्रक्लृप्तिः अन्यस्यान्यस्य वाससः वस्त्रस्य प्रक्लृप्तिः प्रकल्पनं उत्पादनं स्यात् । तस्मात् सोमोपावहरणार्थे प्रत्यहं भिन्नं वासः उत्पादयितव्यम् । इति सिद्धान्तः । उपावहरणं नाम सोमासन्द्यां स्थापितात् सोमात् कियतश्चित् सोमस्य निष्कृष्य ग्रहणम् । के.

तत्रोत्पत्तिरविभक्ता स्यात् । ४।१।१६।४२ ॥

दर्शपूर्णमासयोः ‘ चतुर्जुह्वां गृह्णाति, अष्टावुपभृति ’ इति श्रुतम् । तत्र विचारः । तत्र पूर्वाधिकरणोक्ते आज्ये या उत्पत्तिः (विधानं) ‘ चतुर्जुह्वां ’ इत्यादिना कृता सा अविभक्ता स्यात् । जौहवं औपभृतं चोभयमाज्यं प्रयाजानुयाजोभयार्थं स्यात् । प्रयाजार्थमेव अनुयाजार्थमेव वा इति विशेषो नोक्तः । तस्मादुभयमुभयार्थम् । इति पूर्वः पक्षः ।

तत्र जौहवमनुयाजप्रतिषेधार्थम् । ४३ ॥

सिद्धान्तयति । नोभयमुभयार्थम्, किन्तु जौहवं प्रयाजार्थम्, औपभृतं च प्रयाजानुयाजार्थम् । तत्र जौहवौपभृतयोर्मध्ये जौहवं जौहवाज्यविषयं ‘ प्रयाजेभ्यस्तत् ’ इति वचनं अनुयाजप्रतिषेधार्थं प्रयाजान् संकीर्तयति । ‘ चतुर्जुह्वां गृह्णाति ’ इति उत्पद्यमानं जौहवम् ‘ किं मया कर्तव्यम् ’ इत्यभिलषति । प्रयाजाश्चोत्पद्यमाना एव द्रव्याभिलाषिणः । तयोः श्रुतेन वाक्येन संबन्धे द्वयोरपि परस्परनियमात् अन्यत्र प्रसङ्ग एव नास्ति । एवं चेत् प्रतिषेधफलत्वात् प्रतिषेध उक्तः, न तु साक्षात् वचनं प्रतिषेधति । तस्मात् जौहवं प्रयाजार्थमेव । जुह्वां भवं जौहवम् । ओर्गुणः, आदिवृद्धिश्च ।

औपभृतं तथेति चेत् । ४४ ॥

दर्शपूर्णमासयोः जौहवमाज्यं प्रयाजार्थमेवेत्युक्तम् । तत्रेयमाशङ्का । यथा जौहवं प्रयाजार्थमेव तथा औपभृतं अनुयाजार्थमेव स्यात् ‘ यदुपभृति गृह्णाति, अनुयाजेभ्यस्तत् ’ इत्यस्य प्रयाजप्रतिषेधार्थत्वात् । अत्रापि

अर्थात् प्रयाजप्रतिषेधः स्यात् । तस्मात् औपभृतं नोभयार्थम् । इति चेत् । उपभृति भवं औपभृतम् ।

स्याज्जुहूप्रतिषेधान्नित्यानुवादः । ४५ ॥

सिद्धान्ती आह । स्यात् औपभृतं प्रयाजानुयाजोभयार्थमेव । 'यदुपभृति गृह्णाति, अनुयाजेभ्यस्तत्' इति तु नित्यानुवादः । जुहूप्रतिषेधात् । उभयस्मिन् औपभृते जौहवे च उभयार्थे प्राप्ते, जौहवम् 'प्रयाजेभ्यस्तत्' इत्यनेन अनुयाजेभ्यः अर्थात् प्रतिषिद्धम्, नौपभृतम् । तदा औपभृतस्य 'प्रयाजानुयाजेभ्यस्तत्' इति वाक्यान्तरेण उभयार्थतायां सत्याम् 'अनुयाजेभ्यस्तत्' इति अनुयाजार्थतावचनं नित्यानुवादो भवितुमर्हति, न शक्नोति प्रयाजार्थतां प्रतिषेद्धुम् । जुहूशब्देन सूत्रे लक्षणया जौहवाज्यं गृह्यते । तस्य अनुयाजेभ्यः सकाशात् अर्थात् प्रतिषेधः । तस्मादौपभृतमुभयार्थम् । के.

तत्रैकत्वमयज्ञाङ्गभूतमर्थस्य गुणभूतत्वात् । ४।१।५।११ ॥

'अग्नीषोमीयं पशुमालभते' इति पश्वालम्भो विहितः । तत्र उक्ते वाक्ये तत्र पशौ वा यत् एकत्वं श्रुतम्, तत् अयज्ञाङ्गभूतं यज्ञस्य आलम्भलक्षितस्य अङ्गभूतं न भवति । अविवक्षितमित्यर्थः । अर्थस्य प्रकृत्यर्थस्य पशोः आलम्भगुणभूतत्वात् एकत्वस्य च पश्वङ्गत्वात्, एकत्वं न आलम्भस्य आलम्भोपलक्षितस्य यज्ञस्य वा अङ्गम् । अतो न विवक्षितम् । तस्मात् द्वौ बहवो वा पशव आलब्धव्याः इति पूर्वः पक्षः ।

एकश्रुतित्वाच्च । १२ ॥

पूर्वपक्षे हेत्वन्तरपरं सूत्रम् । 'यदि सोमममपहरेयुः एकां गां दक्षिणां दद्यात्' इत्यत्र यदि प्रत्ययोक्तमेकत्वं विवक्षितं स्यात्, तदा 'एकाम्' इति विशेषणं व्यर्थं स्यात् । तेन ज्ञायते प्रत्ययोक्तमेकत्वं अविवक्षितमिति । अतः 'पशुम्' इत्यत्रापि प्रत्ययोक्तमेकत्वं अविवक्षितमिति । एका इति श्रुतिः विशेषणशब्दः यस्य सः 'गाम्' इति शब्दः । तस्य भावः एकश्रुतित्वम् । 'स्त्रियाः पुंवत्०' (पा० ६।३।३४) इति पुंवद्भावः । 'एकां गाम्' इत्यत्र एकश्रुतित्वस्य विद्यमानत्वात् प्रकृते च तदभावात् एकत्वमविवक्षितमिति भावः । 'अश्रुतत्वाच्च' इति कुतूहलपाठे तु यथा 'एकां गाम्' इत्यत्र एकामिति विशेषणं श्रुतं तथा पशमित्यत्र न श्रुतं इति प्रत्ययोक्तमेकत्वं अविवक्षितमित्यर्थः ।

प्रतीयत इति चेत् । १३ ॥

सिद्धान्ती शङ्कते । 'गामानय' इत्युक्ते यथा एकैव गौरानीयते गामिति प्रत्ययेन हि एकत्वं प्रतीयते इति । तथा 'पशुम्' इत्यत्रापि एकत्वं प्रतीयते, प्रतीयमानत्वाच्च विवक्षितमिति मन्तव्यमिति चेत् ।

नाशब्दं तत्प्रमाणत्वात् पूर्ववत् । १४ ॥

पूर्वपक्षी उत्तरं ब्रूते । नासौ आपत्तिः । एकत्वस्य प्रतीयमानत्वेऽपि अशब्दमेकत्वम् । नास्ति तात्पर्येण प्रतिपादकः शब्दो यस्य तत् एकत्वमशब्दम् । यत्र तात्पर्यम्, स शब्दार्थः सशब्दो नाम ; न चेदमेकत्वं सशब्दं किन्तु अशब्दम् । तत्प्रमाणत्वात् सः शब्दः न्यायोपेतः प्रमाणं यस्य तादृशत्वात् । स शब्दार्थो विवक्षितो भवति यो न्यायोपेतशब्दप्रमाणकः । एकत्वं च न तथा । पूर्ववत् यथा लोके 'पूर्वो धावति' इत्युक्ते अपरोऽपि कश्चित् धावतीति प्रतीयते । प्रतीयमानोऽपि च नासौ अपरो विवक्षितो भवति । एवं 'पशुम्' इत्यत्र प्रतीयमानमपि एकत्वं न शब्दतात्पर्यविषयः इति प्रतीयमानमपि न विवक्षितम् । अशब्दं इत्यत्र अशाब्दं इति सुबोधिन्यां पाठः । अर्थस्तु न भिन्नः । शब्दस्य विषयः शाब्दम्, न शाब्दं अशाब्दमिति तु समासः ।

शब्दवत्तूपलभ्यते, तदागमे हि तद् दृश्यते तस्य ज्ञानं, यथाऽन्येषाम् । १५ ॥

'अग्नीषोमीयं पशुम्' इत्यत्र एकत्वमविवक्षितमिति सूत्रैः पूर्वपक्षे प्राप्ते सिद्धान्तयति । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । शब्दोऽस्यास्ति प्रतिपादकः इति शब्दवत् । उपलभ्यते प्रतीयते । एकत्वं पशौ शब्दवत् उपलभ्यते शब्देन प्रतीयते । हि यस्मात् तदागमे एकवचनाख्यस्य शब्दस्य आगमे सति तत् एकत्वं दृश्यते 'पशुमानय' इत्यत्र । 'पशू आनय' इत्यत्र तु एकवचनापगमे एकत्वं न दृश्यते । तस्मात् तस्य एकत्वस्य ज्ञानं एकवचनप्रत्ययात् भवत्येव । यथा अन्येषां शब्दानाम् । 'अश्वमानय' इत्युक्ते अश्वः प्रतीयते न गौर्वा उष्ट्रो वा ।

'गामनय' इत्युक्ते गौः प्रतीयते नाश्वो नोष्ट्रः इत्यादि। एकवचनश्रुत्या एकत्वं पशौ श्रूयते, वाक्येन तु तत् यज्ञे विधीयते इति न श्रुत्या वाक्यबाधो विरोधाभावात्। तस्मात् विवक्षितमेकत्वम्। तस्मात् अग्नीषोमीयः पशुः एक एवालब्धव्यः।

तद्वच्च लिङ्गदर्शनम्। १६॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम्। चकारः हेत्वन्तरसमुच्चयार्थः। यद्वत् शब्देन एकत्वोपलम्भः एकत्वविवक्षासाधकः, तद्वत् लिङ्गदर्शनमपि एकत्वविवक्षासाधकम्। तथाहि 'कर्णा याम्याः, अवलिप्ता रौद्राः, नभोरूपाः पार्जन्याः, तेषामैन्द्राग्नो दशमः' इति। कर्णाः छिन्नकर्णाः पशवः याम्या यमदेवताकाः। अवलिप्ताः गर्वयुक्ताः पशवः रुद्रदेवताकाः। नभोरूपाः नीलवर्णाः पशवः पर्जन्यदेवताकाः। तेषामुक्तानां पशूनां दशमः ऐन्द्राग्नः इन्द्राग्निदेवताको भवति। एवमेते दश पशवः अश्वमेधे विधीयन्ते। अत्र कर्णाः अवलिप्ताः इत्यादिबहुवचनं त्रित्वपर्यवसायि यदि विवक्षितं भवेत्, तदैव ऐन्द्राग्नस्य दशमत्वं सिध्येन्नान्यथा। तथा च यथा तत्र त्रित्वं विवक्षितम्, तथा अग्नीषोमीयेऽपि एकत्वं विवक्षितमिति भवति लिङ्गदर्शनं साधकम्।

तथा च लिङ्गम्। १७॥

यथा 'अग्नीषोमीयं पशुम्' इत्यत्र एकत्वं विवक्षितम्, तथा 'वसन्ते प्रातराग्नेयीं कृष्णग्रीवामालभते, ग्रीष्मे माध्यंदिने सिंहीमैन्द्रीम्, शरद्यपराह्णे श्वेतां बार्हस्पत्याम्' इत्युक्त्वा 'गर्भिण्यो भवन्ति' इत्युक्तम्। गर्भश्च स्त्रीणां गुणः। तथा च स्त्रीत्वरूपं लिङ्गं एकत्ववत् विवक्षितं भवति। एवम् 'अश्व ऋषभो वृष्णिर्बस्तः पुरुषः, ते प्राजापत्याः' इत्यत्र 'मुष्करा भवन्ति' इति मुष्करस्य पुंगुणस्य दर्शितत्वात् पुंस्त्वं विवक्षितम्। एवं एकत्वविवक्षायां स्त्रीत्वं पुंस्त्वं च दृष्टान्ततया लिङ्गदर्शनमेव। के.

* 'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्' इत्यधिकरणे परवेकत्वस्य विवक्षा व्यवस्थापयिष्यते। परवेकत्वाधिकरणम्। कु. ३।१।७।१५. * तत्रैकत्व०। न च विशिष्टद्रव्यविधिरुपपद्यते इति वक्ष्यते 'तत्रैकत्वमयज्ञाङ्गभूतम्' इति। वा. १।४।२।३ पृ. ३३०। द्रव्यविशेषणानां विध्यसंस्पर्शो वक्ष्यते। २।२।१२।२७ पृ. ५५९.

⌛ **तत्र तत्त्वमभियोगविशेषात् स्यात्।** (१।३।८।२७)। ये शास्त्रस्थाः शिष्टाः तेषां प्रतिपत्तिर्बलीयसी (शब्दे) नेतराऽपि। अनेकशक्तिकल्पनाऽऽदिदोषचतुष्टयप्रसङ्गात्। न च नियामकाभावः 'तत्र०' इतिन्यायेन अभियोगानभियोगयोः (यतमानत्व–अयतमानत्वयोः) एव नियामकत्वात्। कौ. १।३।४।९ पृ. ५९.

⌛ **तत्र दानं विभागेन प्रदानानां पृथक्त्वात्। १०।३।१२।५०॥**

ज्योतिष्टोमे द्वादशाधिकशतसंख्या गावो दक्षिणा दातव्या। तत्र यज्ञे विभागेन दानं स्यात् यजमानेन दक्षिणा विभज्य षोडशभ्य ऋत्विग्भ्यो दातव्या। असति विभागे न शक्यः ऋत्विजां स्वेन भागेन संबन्धः कर्तुम्। प्रदीयते येभ्यस्ते प्रदानाः प्रतिग्रहीतारः ऋत्विजः। तेषां पृथक्त्वात् दानमपि पृथक्पृथगेव विभज्य कर्तव्यम्। तस्मात् दक्षिणा विभज्य दातव्या।

परिक्रयाच्च लोकवत्। ५१॥

सिद्धान्ते हेत्वन्तरमाह। परिक्रयाच्च विभज्य दातव्यम्। परिक्रयार्थं दानं न धर्ममात्रम्। परिक्रयार्थं च भर्त्रा भृत्येन सह पणितव्यम्। लोकवत्। यथा लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तत्र काष्ठवाहाः स्वामिना सह पणन्ते, तेभ्यः स्वामी विभज्य निर्दिशति इदं तुभ्यम्, इदं तुभ्यमिति। तस्मात् यजमानेन स्वयं विभज्य दक्षिणा दातव्या, न तु परिषदा। इति सिद्धान्तः।

विभागं चापि दर्शयति। ५२॥

सिद्धान्ते अपरं हेतुमाह। अपिच विभागं दर्शयति श्रुतिः– 'तुथो वो विश्ववेदा विभजतु' इति विभागमन्त्रस्तावत् पठ्यते। किञ्च 'कृष्णाजिनेन वित्रास्य दक्षिणां ददाति' 'अग्नीधेऽग्रे ददाति' 'ब्रह्मणे ददाति' 'प्रस्तृतेभ्यो ददाति' 'होत्रे ददाति' 'नेष्ट्रे ददाति' 'हविर्धान आसीनेभ्योऽध्वर्युभ्यो ददाति' 'अन्तःसदसि आसीनेभ्यो यथाश्रद्धं प्रसर्पकेभ्यो ददाति'

इति । तस्मात् स्वयं विभज्य यजमानेन दातव्यम्, न परिषदा । इति सिद्धान्तः । के.

⧗ तत्र प्रतिहोमो न विद्यते, यथा पूर्वेषाम् । ६।५।११।४०॥

ज्योतिष्टोमे कुतश्चित् कारणात् दीक्षाकालवृद्धौ अग्निहोत्रहोमाकरणमपि वर्धनीयं इति पूर्वाधिकरणे उक्तम् । यावतां होमकालानामकरणस्य वृद्धिः तावतः परिसंख्याय दीक्षाविमोकानन्तरं होमकरणे प्राप्ते अन्तरिताः होमाः प्रतिहोमा नाम कर्तव्या न वा इति विचारे उच्यते । तत्र दीक्षाकाले उत्कृष्यमाणे प्रतिहोमो न विद्यते, प्रतिहोमाः न कर्तव्याः इत्यर्थः । यथा पूर्वेषां दीक्षाकालीनानां प्रतिषिद्धानां होमानां प्रतिहोमा न भवन्ति प्रतिषिद्धत्वात् तथा दीक्षावृद्धावपि अकृतानां होमानां प्रतिहोमा न भवन्ति । कर्तव्यं अकृत्वा तत्समाधानार्थं पुनःकरणम् । दीक्षाकाले तु अकर्तव्या एव होमाः । तस्मात् तेषां कर्तव्यता नास्त्येव इति सिद्धान्तः ।

कालप्राधान्याच्च । ४१ ॥

ज्योतिष्टोमे अवभृथानुत्कर्षकालीनानामग्निहोत्रहोमानां यथा प्रतिहोमा न भवन्ति तथा अवभृथोत्कर्षकालीनानामपि प्रतिहोमा न भवन्ति इति सिद्धान्ते युक्त्यन्तरमाह । 'सायं जुहोति, प्रातर्जुहोति' इति विहितस्य कालस्य प्राधान्यात् जीवतोऽपि सायंप्रातःकालातिरिक्ते काले नाधिकारः, एवमवभृथोत्कर्षेऽपि दीक्षितत्वात् अनधिकारः । तस्मात् दीक्षावृद्धिकालीनानामपि होमानां न प्रतिहोमाः इति । के.

⧗ 'तत्र प्रयोगबाहुल्यात् तद्विशेषेषु सत्स्वपि । प्रयोगात् परसामान्ये सति वाऽप्यप्रयोगतः ॥ सास्नाद्येकार्थसंबन्धिगोत्वमात्रस्य वाचकः । गोशब्द इति विज्ञानमन्वयव्यतिरेकजम् ॥' इत्यनेन न्यायेन अन्वयव्यतिरेकाभ्यामपि गोत्वस्यैव गोशब्दवाच्यता अवसीयते । सु. पृ. ३६४.

⧗ तत्र विप्रतिषेधाद् विकल्पः स्यात् । ६।५।१८।५१ ॥

'यदि उद्गाताऽपच्छिद्येत अदक्षिणो यज्ञः संस्थाप्यः । अथान्य आहृत्यः, तत्र तत् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात् । यदि प्रतिहर्ताऽपच्छिद्येत, सर्वस्वं दद्यात्' इति । यदि उद्गातुः अध्वर्युणा सह अपच्छेदः स्यात् तदा प्रवृत्तो यज्ञः दक्षिणादानरहित एव समापनीयः । पुनश्च सद्यः तमेव यज्ञं कुर्यात्, तत्र च सा दक्षिणा द्वादशशतरूपा दातव्या । अथ यदि प्रतिहर्त्रा प्रस्तोत्रा सह अपच्छेदः कृतः स्यात् तदा तस्मिन्नेव यज्ञे यजमानेन सर्वस्वदक्षिणा दातव्या न केवलं द्वादशशतपरिमाणा इति उदाहृतश्रुतेस्तात्पर्यम् । इमे द्वे प्रायश्चित्ते परस्परं विरुद्धे । अथ यस्मिन् यागे उद्गातुः प्रतिहर्तुश्च अपच्छेदौ युगपत्संजातौ तत्र तन्निमित्तकयोः प्रायश्चित्तयोः विप्रतिषेधात् परस्परं विरोधात् एकस्मिन् यागे कर्तुमशक्यत्वात् विकल्पः स्यात् । यजमानेच्छया अन्यतरत् कर्तव्यम् । इति सिद्धान्तः ।

प्रयोगान्तरे वोभयानुग्रहः स्यात् । ५२ ॥

पूर्वपक्षी सिद्धान्तपक्षं वाशब्देन निरस्यन् आह, विकल्पो न भवति । समुच्चय एव कर्तव्यः । परन्तु प्रायश्चित्तयोः परस्परं विरोधात् समुच्चयो न संभवति एकस्मिन् प्रयोगे, इति कृत्वा प्रयोगद्वयं कर्तव्यम् । एकस्मिन् प्रयोगे एकं प्रायश्चित्तम्, प्रयोगान्तरे च अपरं प्रायश्चित्तमिति उभयानुग्रहः उभयोः प्रायश्चित्तयोः अनुग्रहः स्यात् । तत्रापि प्रथमप्रयोगे द्वितीयप्रयोगोपयुक्तं द्रव्यं परिशेष्य सर्वस्वं देयम् । द्वितीये तु प्रयोगे द्वादशशतमिति । इति पूर्वः पक्षः ।

न वैकसंयोगात् । ५३ ॥

अग्निष्टोमे उद्गातृप्रतिहर्तृभ्यां द्वाभ्यामपि अपच्छेदे यौगपद्येन कृते परस्परविरुद्धमपि प्रायश्चित्तद्वयं प्रयोगभेदेन कर्तव्यं इति पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् तत्र हेतुमाह । न प्रयोगभेदेन प्रायश्चित्तद्वयं कर्तुं शक्यम् । एकसंयोगात् एकेनैव प्रयोगेण सह सर्वस्वदाक्षिण्यस्य अदक्षिणत्वस्य च संयोगात् संयोगस्य श्रवणात् । प्रयोगभेदे तु एकसंयोगो न स्यात् । तस्मात् न प्रयोगभेदेन प्रायश्चित्तद्वयानुष्ठानं संभवति । किन्तु ऐच्छिको विकल्प एवेति सिद्धान्तः । के.

⧗ **तत्र सर्वेऽविशेषात्** । ४।३।११।२७ ॥

'सर्वेभ्यो दर्शपूर्णमासौ' 'सर्वेभ्यो ज्योतिष्टोमः' इति यत् दर्शपूर्णमासादेः सर्वकामत्वमुक्तम्, तत् किं सकृत्प्रयोगे, उत पर्यायेण इति विचारे पूर्वपक्षसूत्रमिदम् । तत्र दर्शपूर्णमासाख्ये ज्योतिष्टोमाख्ये च कर्मणि सकृत् प्रयुक्ते सर्वे कामा भवेयुः यौगपद्येन । अविशेषात् विशेषस्य अनुक्तत्वात्, 'सर्वेभ्यः' इति सर्वशब्दप्रयोगात् ।

अथ द्वितीयं वर्णकम् । तत्रायं पूर्वपक्षसूत्रार्थः । सौर्यादिषु काम्येषु कर्मसु ये ब्रह्मवर्चसादयः कामाः श्रुताः ते सर्वे तत्र परलोके स्युः नेह लोके । स्वर्गेण अविशेषात् । यथा स्वर्गः इह लोके न लभ्यते तथा ब्रह्मवर्चसादयोऽपि इह नोपलभ्यन्ते । तस्मात् आमुष्मिकाः कामाः इति ।

योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगित्वात् । २८ ॥

सिद्धान्तयति । वाशब्दः पूर्वपक्षं व्यावर्तयति । सकृत्प्रयोगे न सर्वकामावाप्तिः किन्तु पर्यायेण । योगः संबन्धः, स च पौर्वापर्यरूपः पर्यायो विवक्षितः । योगेन पर्यायेण सिद्धिः तत्तत्फलस्य लाभः स्यात् । एकेन प्रयोगेण एकस्य फलस्य सिद्धिः, अपरेण अपरस्य एकस्य, इति पर्यायेण सर्वकामत्वम् । अर्थस्य फलस्य उत्पत्त्यसंयोगित्वात् । युगपत् सर्वे कामाः उत्पत्त्या असंयोगिनः, उत्पत्त्या संयोगः संबन्धः न संभवति । सर्वेषां युगपदुत्पत्तिर्न संभवतीत्यर्थः । उत्पत्त्या संयोगः उत्पत्तिसंयोगः, सोऽस्यास्ति इति उत्पत्तिसंयोगि, न उत्पत्तिसंयोगि, उत्पत्त्यसंयोगि, तस्य भावः, तस्मात् । अथवा उत्पत्तौ उत्पत्तिविधौ असंयोगित्वात् सर्वेषां कामानां संबन्धो नास्ति, न श्रुतः इत्यर्थः । तस्मान्न कामानां साहित्यम् ।

द्वितीयवर्णके तु एतत्सूत्रार्थ इत्थम् । काम्यानां कर्मणां ये ब्रह्मवर्चसादयः कामाः, ते स्वर्गवत् इह लोके नोपलभ्यन्ते तस्मात् मरणोत्तरमेव अन्यजन्मन्येव ते लप्स्यन्ते इति पूर्वसूत्रेण पूर्वपक्षे प्राप्ते सिद्धान्तः । योगस्य फलसंबन्धस्य प्रतिबन्धकाभावे इहैव सिद्धिः । अर्थस्य फलस्य तु उत्पत्त्या वर्तमानजन्मना असंयोगित्वात् संबन्धस्य अनुक्तत्वात् सति प्रतिबन्धे अन्यजन्मन्यपि काम्यं फलं लप्स्यते । इति । के.

⧗ **तथाऽन्तःक्रतुप्रयुक्तानि** । ६।२।९।३०॥

दर्शपूर्णमासयोः 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इति श्रुतम् । यथा सायंप्रातरादिकाले आगतेआगते अग्निहोत्रहोमादि आवर्तते, तथा अन्तःक्रतु क्रतुमध्ये प्रयुक्तानि भेदनहोमादीन्यपि प्राप्तेप्राप्ते भेदनच्छेदनादौ निमित्ते नैमित्तिको होमोऽपि आवर्तनीयः इति सिद्धान्तः । अतिदेशाधिकरणम् । अन्तःक्रतुयुक्तानि इति सुबोधिन्याम्, अन्तःक्रतुसंयुक्तानि इति कुतूहले च पाठः । अर्थस्तु न भिन्नः । के.

⧗ **तथाऽपूर्वं इति न्यायः** । वेदिकरणन्यायोऽयम् । अक्षरार्थस्तु अचिरादेव द्रष्टव्यः । भा. ५।१।१६।२९. * अभिषेकमात्रस्यापकर्षः, न तु तदन्यस्य 'तथाऽपूर्वं' इति न्यायात् । (विदेवनाद्युत्तरं राजसूये अभिषेचनीयाङ्गस्य अभिषेकस्य अपकर्ष उक्तोऽयम्) । रत्न. ५।२।१०।२१. * 'कृतदेशात्तु पूर्वेषाम्' इत्यत्र अप्राकृतानामपि विदेवनादीनां अपकर्षवर्णनेन 'तथाऽपूर्वम्' इत्यस्य विशिष्टविषयत्वव्याख्यानात् । वा. ३।६।७।२२ पृ. १०४८.

⧗ **तथाऽपूर्वम्** । ५।१।१६।२९ ॥

दर्शपूर्णमासयोः वेदिः हविरभिवासनोत्तरकाले समाम्नाता । सा अमावास्यायां प्रतिकृष्यते 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति । सा अपकृष्यमाणा ततोऽर्वाचीनान् पदार्थान् अपकर्षति न वेति विचारे प्रयोगसंबन्धात् अपकर्षति इति पूर्वः पक्षः । तत्र सिद्धान्तयति अतिदेशेन । पूर्वं उत्कर्षाभाव उक्तः, अत्र तु अपकर्षाभाव इति तु विशेषः । पूर्वं प्रकृतिपूर्वकं विकृतिरित्यर्थः । पूर्वं न भवति इति अपूर्वं प्रकृतिभूतं कर्म अमावास्या । लक्षणया अमावास्यागता वेदिः तथा पूर्वोक्तप्रासङ्गिकवत् अर्वाचीनान् पदार्थान् नापकर्षति । तस्मात् हविरभिवासनान्ताः पदार्था न प्रतिकृष्टव्याः । वेदिमात्रं अपकृष्टव्यम् । हविरभिवासनं हविषः पुरोडाशस्य दर्भैः अभितो ज्वलनं उल्मुकैः परितपनम्, उपरि साङ्गारस्य भस्मनः अभ्यूहनं च । ततो वेदिकरणम् । के.

⧗ तथाऽभिघारणस्य । १०।३।१०।३८ ॥

श्यामाकाग्रयणे ‘ वासो दक्षिणा ’ व्रीह्याग्रयणे च ‘ वत्सः प्रथमजो दक्षिणा ’ इति श्रूयते । तयोश्च वासोवत्सयोः अन्वाहार्यधर्माः कर्तव्याः , पाकस्तु न कर्तव्य इत्युक्तम् । तथा पाकवत् अभिघारणस्य अकर्तव्यता । अन्नकारितत्वात् अन्नेन कारितत्वात् अन्नप्रयुक्तत्वात् इति पूर्वसूत्रादनुवर्तनीयम् । भक्षणीयस्य स्वादुतासंपादनार्थे हि अभिघारणं भवति , वासोवत्सयोस्तु अन्नत्वमेव नास्तीति अभिघारणमपि न कर्तव्यमिति सिद्धान्तः । के.

⧗ तथाऽभिधानेन । ३।७।४।८ ॥

अन्तरागर्भिणीरूपाधिकरणस्य पूर्वपक्षसूत्रमिदम् । पूर्वसूत्रात् संयोगात् इतिपदम् , पूर्वतरसूत्रात् प्रधानस्य इति पदं चानुवर्तते । ‘ चतुर्होत्रा पौर्णमासीमभिमृशेत् , पञ्चहोत्रा अमावास्यायाम् ’ इति विषयवाक्यमत्र । ‘पृथिवी होता ’ इत्यादिर्मन्त्रः चतुर्होता नाम । ‘ अग्निर्होता । अश्विनाऽध्वर्यू ’ इत्यादिर्मन्त्रः पञ्चहोता नाम । पौर्णमास्यमावास्याशब्दाभ्यां तत्तद्यागगतं प्रधानहविर्गृह्यते । चतुर्होतृमन्त्रेण पौर्णमासीगतप्रधानहविषः अभिमर्शनं हस्तेन स्पर्शनं कर्तव्यम् । पञ्चहोतृमन्त्रेण अमावास्यायागगतप्रधानहविषः अभिमर्शनं कर्तव्यमिति विषयवाक्यार्थः । इदमभिमर्शनं किं प्रधानमात्रस्य, उत अङ्गप्रधानानामिति संशये अभिमर्शनं प्रधानस्यैव नाङ्गानाम् । तथाशब्देन पूर्वसूत्रसूचिता वेदिर्दृष्टान्तिता । वेदिवत् अभिमर्शनमपि प्रधानस्यैवेत्यर्थः । कुतः ? प्रधानस्येति पदं आवर्तनीयम् । प्रधानस्य अभिधानेन पौर्णमासी अमावास्या इति प्रधानस्यैवाभिधानात् इत्यर्थः ।

गुणाभिधानात् सर्वार्थमभिधानम् । १० ॥

अभिमर्शनं प्रधानस्यैवेति प्राप्ते सिद्धान्तयति । ‘ पौर्णमासीमभिमृशेत् , अमावास्यामभिमृशेत् ’ इति अभिधानं सर्वार्थे साङ्गप्रधानार्थम् , न प्रधानमात्रार्थम् । कुतः ? गुणाभिधानात् । ‘ पौर्णमासीम् , अमावास्याम् ’ इति द्वितीयाऽन्तेन साङ्गप्रधानानां संस्कार्यत्वमुक्त्वा अभिमृशेत् इति अभिमर्शनस्य गुणस्य अभिधानात् । तस्मात् अभिमर्शनं सर्वार्थमिति सिद्धान्तः । अत्र सप्तमनवमाभ्यां सूत्राभ्यां एकमधिकरणं तृतीयम् , अष्टमदशमाभ्यां च चतुर्थमधिकरणं इति विभागो द्रष्टव्यः । के.

⧗ तथाऽवज्वलनम् । १०।१।१९।६० ॥

दर्भपिञ्जूलैः अवज्वलनं पुरोडाशस्य उपरिपाकार्थत्वात् क्रियते । सौर्ये चरौ तु तथा अभ्यूहवत् न कर्तव्यम् । चरौ हि उपरि पाको नावश्यकः । इति सिद्धान्तः । के.

⧗ तथाऽवभृथः सोमात् (७।३।४।१३) इति न्यायः । सूत्रार्थस्तु अधुनैव भविष्यति । के. * ‘ तथाऽवभृथः सोमात् ’ इति सप्तमाधिकरणे वक्ष्यमाणसौमिकावभृथभावनाधर्मातिदेशाविरोधात् करणत्वेन वा अवभृथस्य अतिदेशायोगेऽपि स्वशब्देनोपदिष्टस्य स्वधर्मसंनिधापकत्वात् काम्यगुणाश्रयभूताग्निहोत्रादिवत् अतिदेशनिमित्तमभिप्रेत्य अवभृथनाम्नः अतिदेशकत्वोक्त्युपपत्तेः । सु. पृ. ९५५.

⧗ तथाऽवभृथः सोमात् । ७।३।४।१३ ॥

वरुणप्रघासेषु ‘ वारुण्या निष्कासेन तुषैश्च अवभृथं यन्ति ’ इति श्रूयते । अत्र दार्शपूर्णमासिके चोदकप्राप्ते अपां न्युत्सेके तुषनिष्कासविधिः, किंवा सौमिकादवभृथात् धर्मातिदेशः इति विचारे सिद्धान्तमाह । यथा षडहात् पृष्ठानामतिदेशः, तथा सोमात् अवभृथः अवभृथधर्मः वारुणप्राघासिके अवृभथे अवभृथनाम्ना अतिदिश्यते, अवभृथशब्दसामान्यात् ।

प्रकृतेरिति चेत् । १४ ॥

वरुणप्रघासेषु ‘ वारुण्या निष्कासेन तुषैश्च अवभृथं यन्ति ’ इत्यत्र प्रकृतेः दर्शपूर्णमासरूपायाः सकाशात् चोदकप्राप्ते अपां न्युत्सेके अवभृथाख्ये निष्कासतुषरूपस्य गुणस्य विधिः स्यात् इति पूर्वः पक्षः । इति चेत् ।

न , भक्तित्वात् । १५ ॥

पूर्वपक्षिणा यदुक्तं तन्न , भक्तित्वात् । दर्शपूर्णमासयोः योऽयमपां न्युत्सेकः प्रणीतानिनयनम् , तत्र अवभृथत्वं भक्त्या उक्तम् , प्रशंसावादोऽयम् ‘ एष वै दर्शपूर्णमासयोरवभृथः ’ इति । नास्ति तु दर्शपूर्णमासयोरवभृथः । तस्मात् सौमिकादेवावभृथात् वारुणप्राघासिके अवभृथे केषांचिद्धर्माणामतिदेशः ।

लिङ्गदर्शनाच्च । १६ ॥

वरुणप्रघासगतावभृथे सौमिकावभृथात् धर्मातिदेशः इत्यत्र ‘नायुर्दा जुहोति, न साम गायति, न वा गमनमन्त्रं जपति’ इति केषांचित् सौमिकावभृथधर्माणां प्रतिषेधं ब्रुवन् इतरधर्माणां प्राप्तिं दर्शयति । एतस्मात् लिङ्गदर्शनात् अवभृथनाम्ना सौमिकादवभृथात् धर्मप्राप्तिः वारुणप्राघासिकेऽवभृथे इति सिद्धान्तः । चकारो हेतुसमुच्चयार्थः । के.

⧗ तथाऽऽज्यभागाग्निरपीति चेत् । १०।१।८। १६ ॥

दर्शपूर्णमासयोः आज्यभागाभ्यामग्नीषोमौ इज्येते । तत्र आज्यभागाग्निः आज्यभागदेवतारूपः अग्निः, तथा पूर्वाधिकरणोक्तोत्तमप्रयाजवत् संस्कारकर्म स्यात् । प्रधानाग्नेः संस्कारः आग्नेय आज्यभागः । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, व्यपदेशाद् देवताऽन्तरम् । १७ ॥

आग्नेय आज्यभागः न प्रधानाग्नेः संस्कारकर्म, किन्तु आरादुपकारकं कर्म । प्रधानाग्नेः सकाशात् आज्यभागाग्निः देवताऽन्तरं स्यात् । व्यपदेशात् ‘अग्निमग्न आवह, सोममावह, अग्निमावह’ इति सोमेन व्यवहितं अग्निद्वयं व्यपदिशति । तस्मात् आग्नेय आज्यभागः आरादुपकारकः आज्यभागाग्निश्च प्रधानाग्नेर्देवताऽन्तरं इति सिद्धान्तः ।

समत्वाच्च । १८ ॥

दर्शपूर्णमासयोः अग्नीषोमौ इज्येते । तत्र सोमस्तावत् यागदेवता । अग्निरपि प्रधानाग्नेर्भिन्नः यागदेवतैव । समत्वात् यागदेवतात्वसाम्यात् । किंच आघारौ आज्यभागौ इति आरादुपकारकाणि कर्मण्यभिहितानि । तद्वतः आग्नेय आज्यभागोऽपि आरादुपकारक एव स्यात् । आरादुपकारकत्वस्य समत्वात् । तस्मात् आज्यभागाग्निः प्रधानाग्नेर्भिन्नः आग्नेय आज्यभागश्च न संस्कारकर्म किन्तु आरादुपकारकः इति सिद्धान्तः । पूर्वसूत्रे व्यपदेशो लिङ्गमुक्तम्, अत्र सूत्रे समत्वं न्याय उक्तः । के.

* तथाऽऽह्वानमपीति चेत् (३।२।३।५) इत्यत्राधिकरणे इतिकरणस्य श्रुतित्वं निरस्तं शास्त्रदीपिकायाम् । बाल. पृ. ४६. * तथाऽऽह्वानमपीति चेत् । यथा ऐन्द्री अयथार्थे विनियुज्यते तथा आह्वानं हविष्कृन्मन्त्रोऽपि अयथाऽर्थे विनियुज्यते इति पूर्वपक्षसूत्रार्थः । तथाशब्दानुकृष्टस्य वचनात् इति तृतीयसूत्रावयवस्य श्रुतेः इत्यर्थः । सु. पृ. १०९२.

⧗ तथाऽऽह्वानमपीति चेत् । ३।२।३।५ ॥

‘हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति’ इति दर्शपूर्णमासयोः श्रूयते । अत्र हविष्कृदेहि इति अवघ्नन् हविष्कृदेहि इति मन्त्रेण अवघातं कुर्वन् इत्यन्वयः, किंवा अवघ्नन् अवहननकाले हविष्कृदेहीति आह्वयति इत्यन्वयः । शतृप्रत्ययः काललक्षणार्थः । एवं मन्त्रः हन्तिं प्रति उपदिश्यते, अवघ्नन्निति कालं वा लक्षयति इति विचारे पूर्वपक्षमाह । यथा ऐन्द्री गार्हपत्यं प्रति उपदिश्यते तथा आह्वानमपि हविष्कृदेहि इति आह्वानमन्त्रोऽपि अवहननं प्रति उपदिश्यते । इति चेत् ।

न, कालविधिश्चोदितत्वात् । ६ ॥

पूर्वपक्षं निषिध्य सिद्धान्तमाह । नायं विधिः अवघाते मन्त्रविनियोजकः, किन्तु कालविधिः कालानुवादपूर्वकः त्रिरभ्यासविधिरयम् । कालस्य मन्त्रस्य च चोदितत्वात् अर्थत एव प्राप्तत्वात् । इति **कस्तूरिरङ्गाचार्याः** । न अवघाते मन्त्रविधिः, चोदितत्वात् त्रिरभ्यासस्यैवात्र वाक्ये विधानात् । कालविधिरपि न । आह्वाने अवघातकालो न विधातव्यः अवहननकाले एव सहायाह्वानस्य अपेक्षितस्य प्राप्तत्वेन अर्थसिद्धत्वात् । इति **कुतूहलम्** । न अवहननार्थो मन्त्रः । नञः आवृत्त्या अवघ्नन्नित्यनेन अवहननकालं लक्षयित्वा कालसंबन्धविधिरपि न, कालसंबन्धस्य त्रिरभ्यासस्य च विधाने वाक्यभेदात् । हविष्कर्तुः अवहननकाले आह्वानस्य लोकतः चोदितत्वात् ज्ञातत्वाच्च त्रिरभ्यासमात्रविधिः । इति **सुबोधिनी** ।

गुणाभावात् । ७ ॥

ननु यथा पत्नी हविः करोति, तथा अवहननक्रियाऽपि हविः करोति इति रूपादेव अवहनने मन्त्रे प्राप्ते केवलं त्रिरावृत्तिमेव वक्ष्यति ‘हविष्कृदेहीति त्रिरवघ्नन् आह्वयति’ इति वाक्यम् । इति चेन्न । एहि इति पर-

प्रेषणरूपमध्यमपुरुषस्य हविष्कृत् इतिसंबोधनस्य च अचेतने अवघाते असंभवेन मन्त्रस्य अवहनने असामर्थ्यात् । तस्मात् गुणाभावात् चेतनत्वस्य गुणस्य अवहनने अभावात् न अवहननमन्त्रोऽयम् ।

लिङ्गाच्च । ८ ॥

‘ वाग्वै हविष्कृत् वाचमेवैतदाह्वयति ’ इति स्त्रीलिङ्गशब्दवाच्यत्वात् लिङ्गादपि वाग्रूपतया हविष्कृत् स्तोतुं शक्या । तच्च मन्त्रस्य पत्न्याह्वानाङ्गत्वे घटते, न तु अवघातपरत्वे । ननु अवहन्तेरपि स्त्रीलिङ्गः शब्दोऽस्ति क्रियेति । अत्र ब्रूमः । न नियोगतः अवहन्तेः स्त्रीलिङ्गः, पुंलिङ्गोऽपि अवघात इति, नपुंसकलिङ्गोऽपि कर्म इति । अपिच पत्न्याः स्वरूपेण सादृश्यमवहन्तेः पररूपेण शब्देन । तस्मात् पत्न्यां लिङ्गं अनुरूपतरं भवति । तस्मान्न अवहननमन्त्रः ।

विधिकोपश्चोपदेशे स्यात् । ९ ॥

‘हविष्कृदेहीति त्रिरवघ्नन् आह्वयति’ इत्यनेन मन्त्रस्य अवघाताङ्गतया उपदेशे सति ‘ अव रक्षो दिवः सपत्नं वध्यासमित्यवहन्ति ’ ‘ अप हता यातुधाना इत्यवहन्ति ’ इति विधेः अन्यस्य विधेः कोपो विरोधः स्यात् । तत्र पक्षेऽभावात् नित्यवच्छ्रुतिरुपरुध्येत । तस्मात् अवघ्नन् इति काललक्षणार्थः, अवघातकाले हविष्कृदेहि इति मन्त्रेण पत्नीं त्रिराह्वयति इत्यर्थः । के.

⌛ तथोत्तरस्यां ततौ तत्प्रकृतित्वात् । १०।४। १३।२५ ॥

‘ सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः ’ इति श्रूयते । तत्र सूर्यो देवता चोदनायां श्रुता । सूर्य आदित्यो भास्करः सविता दिवाकर इति सूर्याभिधानानि प्रसिद्धानि । सौर्ये चरौ च सर्वे निगदाः प्राकृताः चोदकप्राप्ताः । तेषु केन शब्देन देवतानिर्देशः कर्तव्यः इति विचारे सिद्धान्तमाह । उत्तरस्यां ततौ सौर्ये तत्प्रकृतित्वात् आग्नेयप्रकृतिकत्वात् तथा स्यात् चोदनागतसूर्यशब्दोच्चारणं स्यात् । इति सिद्धान्तः । ततिः ‘ तनु विस्तारे ’ विततिः विस्तारः विकृतिरित्यर्थः । के.

⌛ तथोत्थानविसर्जने । ३।२।४।१० ॥

‘ उत्तिष्ठन्नन्वाह अग्नीदग्नीन् विहर ’ इति, ‘ व्रतं कृणुतेति वाचं विसृजति ’ इति च ज्योतिष्टोमे श्रूयते । अत्र उत्थाने वाग्विसर्जने च मन्त्रयोरुपदेशः, उत कालार्थः संयोगः इति विचारे ‘ अग्नीदग्नीन् विहर ’ इति मन्त्रेण उत्थातव्यम् । ‘ व्रतं कृणुत ’ इति मन्त्रेण वाग्विसर्गः कर्तव्यः इति पूर्वपक्षे सिद्धान्तं पूर्वाधिकरणातिदेशेनाह । यथा ‘ हविष्कृदेहि ’ इति मन्त्रस्य मुख्येऽर्थे आह्वाने विनियोगः, तथा अत्र ‘ अग्नीदग्नीन् विहर ’ इतिमन्त्रस्य मुख्ये अर्थे अग्निविहरणसंप्रैषे, ‘ व्रतं कृणुत ’ इतिमन्त्रस्य च व्रतकरणप्रैषे विनियोगः । उत्थानं च विसर्जनं च तयोः समाहारः तस्मिन् । उत्थाने उत्थानवाक्ये विसर्जने विसर्जनवाक्ये च श्रूयमाणो मन्त्रः मुख्येऽर्थे विनियुज्यते इत्यर्थः । उत्थानकाले ‘ अग्नीदग्नीन् विहर ’ इति प्रैषमाह, वाग्विसर्गकाले ‘ व्रतं कृणुत ’ इति प्रैषमाह । इति कालार्थः संयोगः इति सिद्धान्तः । के.

* तथोत्थानविसर्जने । यथा अवघातः, तथा उत्थानविसर्जने अपि पूर्वपक्षे मन्त्रप्रकाश्ये, सिद्धान्ते तु अप्रकाश्ये इत्येवमतिदेशः । नोत्थानविसर्जनाङ्गत्वेन अग्नीद्-व्रतमन्त्रो विधीयते, किन्तु अग्निविहरणे प्रेषणाङ्गत्वेन लिङ्गात् प्राप्तस्य अग्नीन्मन्त्रस्य उत्थानकालत्वम्, वाग्यमनियमसमाप्त्यङ्गत्वेन च प्राप्तस्य वाग्विसर्गस्य व्रतभक्षणप्रेषणाङ्गभूतमन्त्रोच्चारणकालत्वं विधीयते । विधिमन्त्रपाठक्रमाभ्यां च उत्थानव्रतमन्त्रयोः विशिष्टकालकत्वेन अवगतत्वरूपात् चोदितत्वात् अग्नीन्मन्त्रवाग्विसर्गलक्षकत्वशक्तिरस्ति इत्येवं सिद्धान्तसूत्रयोजना । पूर्वपक्षे श्रुत्या गौणे मन्त्रविनियोगः, सिद्धान्ते लिङ्गान्मुख्ये । सु. पृ. १०९७.

*** तथोत्पत्तिरितरेषां समत्वात् । ७।३।१२।३२ ॥**

यदपि वेदविहिताग्निकार्यसर्वार्थत्वं प्रकृतिविकृत्योः, तदपि ‘ अग्निमुपनिधाय स्तुवते ’ इत्युदाहृत्य ‘ विशये० न वैदिक० तथोत्पत्ति० ’ इति निर्णीतत्वात् अविचार्यम् । वा. ३।७।१९।३९.

तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः, प्रवृत्तौ हि विकल्पः स्यात् । १०।७।१८।६१ ॥

सोमापौष्णपशौ ‘ औदुम्बरो यूपो भवति ’ इति श्रूयते। तत्र एकार्थविकारे एकार्थश्चासौ विकारश्च एकार्थविकारः, औदुम्बरस्य खादिरेण सह एकः समानोऽर्थः फलं पशुबन्धनम्, विकारश्च खादिरादिबाधकश्च औदुम्बरः । तस्मिन् एकार्थविकारे तथा पूर्वाधिकरणे यथा प्राकृतस्य द्रव्यदेवतस्य अप्रवृत्तिः , तद्वत् सोमापौष्णे औदुम्बरे प्रवृत्ते सति प्राकृतस्य खादिरादेः अप्रवृत्तिः न प्रवृत्तिः । प्रवृत्तौ हि यस्मात् विकल्पः स्यात् चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य च । न चैतन्न्याय्यम् । तस्मात् प्राकृतस्य न प्रवृत्तिः । इति सिद्धान्तः ।

यावच्छ्रुतीति चेत् । ६२ ॥

पूर्वपक्षी शङ्कते । यावच्छ्रुति स्यात् । ‘ औदुम्बरो यूपो भवति ’ इति वैकृती श्रुतिः, ‘ प्रकृतिवत् ’ इति च चोदकश्रुतिः । इति यावत्यः श्रुतयः, तावन्तो यूपाः इति अव्ययीभावः समासः । तथा च श्रुतिद्वयानुसारेण औदुम्बरखादिरयोः समुच्चयः स्यात् उभयस्मिन् सह नियुज्यतां पशुः । इति चेत् ।

न , प्रकृतावशब्दत्वात् । ६३ ॥

सिद्धान्ती आह । नैतदेवम् । प्रकृतौ औदुम्बरस्य अशब्दत्वात्, विकृतौ च खादिरस्य अशब्दत्वात् । न समुच्चयः । अविद्यमानो विधायकः शब्दो यस्य तत् अशब्दम् , तादृशत्वात् विधायकशब्दाभावात् । तस्मात् वैकृतेन औदुम्बरेण प्राकृतस्य यूपद्रव्यस्य बाधः । के.

तथा कामोऽर्थसंयोगात् । ३।८।५।१३ ॥

ज्योतिष्टोमे ‘ यदि कामयेत वर्षेत् पर्जन्य इति नीचैः सदो मिनुयात् ’ इति श्रूयते । पर्जन्यवर्षणेच्छायां सदोनामको मण्डपः शाला नीचैः कर्तव्या इति तत्रोक्तम् । सोऽयं वृष्टेः कामः ऋत्विजः स्यात्, कामयेत इत्यस्य कर्ता ऋत्विक् स्यात् आध्वर्यवसमाख्यानात् । अध्वर्युवेदे हि तदुक्तम् । इति उत्सूत्रे पूर्वपक्षे प्राप्ते , सिद्धान्तसूत्रमिदं अतिदेशकरम् । तथा तपोवत् कामोऽपि न ऋत्विग्गतः किन्तु याजमान एव स्यात् । कुतः ? अर्थसंयोगात् अर्थस्य फलस्य यजमानेन संबन्धात् । तथा च यदि कामयेत यजमानः, ततः अध्वर्युः नीचैर्मिनुयात् इति वैयधिकरण्येनापि उक्तश्रुतौ एकवाक्यत्वम् । स्वामिनि कामयमाने यदि अध्वर्युः स्वाम्यर्थं कामयेत इति सामानाधिकरण्येनापि एकवाक्यता संभवति । तस्मात् कामोऽपि याजमान एवेति सिद्धान्तः ।

अत्र सुधा— सदोमानस्य आध्वर्यवत्वेऽपि तदाश्रितगुणावच्छिन्नायाः भावनायाः स्वाम्युपकारार्थसदोमानाश्रितत्वसामर्थ्याख्यात् लिङ्गात् स्वाम्युपकारार्थत्वावगतेः तस्यैव कामित्वावगमात् समाख्यायाश्च प्रधानभूतकर्तृनियामकत्वायोगात् न भावनाकारी नियम्यते इति ।

व्यपदेशादितरेषां स्यात् । १४ ॥

ज्योतिष्टोमे ‘ यदि कामयेत ’ इत्यादिवाक्योक्तः कामः याजमानः इति पूर्वसूत्रेण सिद्धान्ते उक्ते क्वचित् तदपवादः अनेन सूत्रेण उच्यते । ‘ उद्गाता आत्मने वा यजमानाय वा यं कामं कामयते तमागायति ’ इति यजमानात् पृथक् ‘ आत्मने ’ इति पदेन ऋत्विजो व्यपदेशः । तत्र तादृशात् व्यपदेशात् इतरेषां यजमानादन्येषां ऋत्विजामेव कामः स्यात् । तादृशव्यपदेशाभावे तु याजमान एव कामः इति सिद्धान्तः । के.

* ‘**तथा कामः**’ **इत्यधिकरणे** अङ्गानामृत्विक्कर्तृकत्वं न चिन्तितं किन्तु तदाश्रितोपास्तीनामित्यर्थः । कल्पतरुः ३।४।१३।४४ ब्रसू. * **तथाकामाधिकरणम्** । आशीरधिकरणम् । काण्डाधिकरणं द्रष्टव्यम् । भा. ३।८।५।१३–१४.

तथा च लिङ्गम् । ४।१।६।१७॥

इदं सूत्रं पूर्वाधिकरणशेषत्वेन व्याख्याय अधिकरणान्तरत्वेनापि भाष्ये व्याख्यातम् । तत्र अधिकरणान्तरत्वेन अत्र व्याख्यायते । ग्रहैकत्वाधिकरणातिदेशोऽयम् । चशब्दः शङ्कानिरासार्थः । तथा एकत्ववत् लिङ्गमपि विवक्षितमेव । ‘ वसन्ते प्रातराग्नेयीं कृष्णग्रीवामालभते ’ एवं ग्रीष्मे शरदि चेति तिस्रो गा विधाय वाक्यशेषे ‘ गर्भिण्यो भवन्ति ’ इत्युक्तम् । गर्भश्च स्त्रीत्वलिङ्गम् । तथा ‘ अश्व ऋषभो वृष्णिर्बस्तः पुरुषस्ते प्राजापत्याः ’

इति विधाय वाक्यशेषे ‘ मुष्करा भवन्ति सेन्द्रियत्वाय ’ इत्युक्तम् । मुष्कश्च पुंस्त्वलिङ्गम् । (‘ऊष–सुषि–मुष्क–मधो रः ’ पा० ५।२।१०७ मत्वर्थीयो रः । ऊषरम् इ० । ‘ मुष्कः अण्डः मुष्करः ’ इति कौमुदी । मधोः रः इति पदच्छेदः । मधुरः ।) तेन तत्र स्त्रीत्वं पुंस्त्वं च विवक्षितमिति निश्चयः । के.

तथा च सोमचमसः । १०।३।१९।६८ ॥

ऋतपेये श्रूयते ‘औदुम्बरः सोमचमसो दक्षिणा, स प्रियाय सगोत्राय ब्रह्मणे देयः’ इति । अयं सोमचमसः ब्रह्मसंयोगात् ब्रह्मभागस्य निवर्तकः, न कृत्स्नक्रतुदक्षिणायाः । तथा यथा ‘ स्रजमुद्गात्रे ’ इति उद्गातृसंयोगात् स्रक् उद्गातृभागमात्रस्य निवर्तिका तद्वत् । इति पूर्वः पक्षः ।

सर्वविकारो वा, क्रत्वर्थे प्रतिषेधात् पशूनाम् । ६९ ॥

ऋतपेये दक्षिणात्वेन श्रूयमाणः सोमचमसः न केवलं ब्रह्मभागस्य निवर्तकः इति वाशब्देन पूर्वपक्षं व्यावर्तयति । सोमचमसः सर्वविकारः कृत्स्नायाः क्रतुदक्षिणायाः निवर्तकः । क्रत्वर्थे दाने पशूनां प्रतिषेधात् लिङ्गात् । एवमाम्नायते ‘ ऋतं वै सोमः अनृतं पशवः, यत् पशून् दद्यात् सोऽनृतं कुर्यात्, औदुम्बरः सोमचमसो दक्षिणा ’ । अत्र पशुदानमपोद्य सोमचमसो विधीयते । सोमचमसदानेन पशवो न दीयन्ते इति गम्यते । ब्रह्मदानमात्रस्य निवर्तकत्वे सति अन्येभ्यः पशवो दीयेरन् तेन अनृतं स्यात् । तस्मात् कृत्स्नायाः निवर्तकः ।

ब्रह्मदानेऽविशिष्टमिति चेत् । ७० ॥

ऋतपेये ‘ ऋतं वै सोमः पशवोऽनृतम्, यत् पशून् दद्यात् सोऽनृतं कुर्यात्, औदुम्बरः सोमचमसो दक्षिणा’ इत्यर्थवादे ‘ यत् ब्रह्मणे पशून् दद्यात् ’ इति पशूनां ब्रह्मदाने स्वीकृतेऽपि अविशिष्टं पशुप्रतिषेधानुवादः समान एव । तस्मात् ब्रह्मणे पशवो न देयाः किन्तु सोमचमस एव इति सोमचमसः ब्रह्मभागव्यावर्तकः इति स्वीकारेऽपि पशुप्रतिषेधोपपत्तेः । सोमचमसः ब्रह्मभागस्यैव निवर्तकः न तु कृत्स्नदक्षिणायाः इति चेत् पूर्वपक्षी ब्रूयात् ।

उत्सर्गस्य क्रत्वर्थत्वात्, प्रतिषिद्धस्य कर्म स्यान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् । ७१ ॥

क्रतौ माध्यंदिने सवने बर्हिषि यावद्दीयते सा सर्वा एका दक्षिणा । ‘ सोमचमसो दक्षिणा ’ इत्युक्तत्वात् ऋतपेये सा सर्वा दक्षिणा सोमचमस एव । तथाच उत्सर्गस्य दानस्य सोमचमसदानस्य क्रत्वर्थत्वात् सर्वक्रतुदक्षिणादानार्थत्वात् सोमचमसः कृत्स्नक्रतुदक्षिणाया निवर्तको भवति । यदि तु ब्रह्मणोऽन्येभ्यः पशवो दीयेरन् तदा ‘ यत् पशून् दद्यात्, सोऽनृतं कुर्यात् ’ इति प्रतिषिद्धस्य पशुदानस्य कर्म स्यात् तस्मात्तन्न कर्तव्यम् । किञ्च यो ब्रह्मभागो न सा दक्षिणा, किन्तु दक्षिणावयवः कश्चित् । अवयवे निविशमानो दक्षिणाशब्दो गौणः स्यात् । न च स गौणोऽर्थः दक्षिणानां प्रयोजनं स्यात् । सोमचमसस्य प्रयोजनं दक्षिणानिवृत्तिः । सर्वेषां ऋत्विजामानमनं दक्षिणानां प्रयोजनं न ब्रह्ममात्रानमनम् । तस्मात् सोमचमसः कृत्स्नक्रतुदक्षिणाया निवर्तकः न तु ब्रह्मभागमात्रस्य । इति सिद्धान्तः ।

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् । ७२ ॥

पूर्वपक्षस्य प्रयोजनमाह । यदि तु सोमचमसः ब्रह्मणः भागस्यैव निवर्तकः स्यात्, तदा तदूनं तेन ब्रह्मभागेन ऊनं न्यूनं दक्षिणाद्रव्यं तद्विकारः सर्वक्रतुदक्षिणायाः विकारः बाधकः स्यात् ब्रह्मभागं वर्जयित्वा इतरेभ्य ऋत्विग्भ्यः इतरा सर्वा दक्षिणा दातव्या स्यात् । ब्रह्मणे तु सोमचमसमात्रम् ।

सर्वं वा पुरुषापनयात्, तासां क्रतुप्रधानत्वात् । ७३ ॥

सिद्धान्तप्रयोजनमाह । सर्वं वा क्रतुदाक्षिण्यं सोमचमसेन निवर्त्यते, पुरुषापनयात् सर्वेभ्यः पुरुषेभ्यः दक्षिणायाः अपनयात् । कुतः ? तासां दक्षिणानां सर्वेषामृत्विजां आनमनेन क्रतुप्रधानत्वात् क्रतुसाधकत्वात् । आनता हि ऋत्विजः क्रतुं साधयन्ति । तस्मात् सर्वदक्षिणास्थाने एकः सोमचमस एव देयः । सोऽपि च ब्रह्मणे एव नान्यस्मै कस्मैचन । सर्वानतिस्तु लौकिक-

दानेन यजमानेन कर्तव्या । इदं सूत्रद्वयमधिकरणान्तरत्वेनापि अग्रे व्याख्यास्यते य–अक्षरप्रकरणे । के.

⧗ तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् । ४।२।१०।२५ ॥

अधिकरणातिदेशोऽयम् । 'वायव्यं श्वेतमालभेत' इत्यादौ वायव्यपश्वादिरूपेषु द्रव्येषु 'श्वेतम्' इत्यादिर्गुणश्रुतिः गुणस्य प्रतिपादिका श्रुतिः नियमार्था । वायव्यपशौ श्वेते श्वेतभिन्ने च गुणे प्राप्ते श्वेतश्रुतिः श्वेतं गुणं नियमयति । उत्पत्तिसंयोगात् उत्पत्तिविधावेव श्वेतगुणस्य विशेषणतया वायव्येन पशुना संबन्धात् संबद्धतया ज्ञानात् । 'उत्पद्यते कर्म अनेन इति बाहुलकात् करणे क्तिन् । तया उत्पत्त्या क्रियोत्पादकद्रव्येण गुणानां तत्परिच्छेदकतया संयोगात्' इति कुतूहलम् । श्वेतगुणः अनूद्यते इति पूर्वः पक्षः, विधिरिति सिद्धान्तः । के.

⧗ तथा निर्मन्थ्ये । १।४।९।१२ ॥

तथा प्रोक्षणीशब्दवत् निर्मन्थ्ये निर्मन्थ्यशब्देऽपि यौगिकत्वं ज्ञेयम् । निर्मथ्यते निर्मथ्य उत्पाद्यते सोऽग्निः निर्मन्थ्यः इति योगः । तथा च 'निर्मन्थ्येनेष्टकाः पचन्ति' इति निर्मन्थ्यशब्दः न संस्कारनिमित्तकः न जातिशब्दः, किन्तु यौगिक इति सिद्धान्तः । के.

⧗ तथा निर्मन्थ्ये । १।४।१०।१२ ॥

'निर्मन्थ्येनेष्टकाः पचन्ति' इति संस्कृते दर्शनात् संस्कारशब्दो निर्मन्थ्यः इति । असंस्कृतेऽपि दृश्यते 'निर्मन्थ्यमानय पक्ष्यामहे' इति । निर्मन्थनयोगात् पूर्ववत् यौगिकत्वमिति स्थितम् । अत्रायं पूर्वपक्षिणोऽभिसंधिः । निर्मन्थ्यशब्दोऽयं याज्ञिकैः संस्कृते प्रयुज्यते । न चायं संस्कारवचनः, असंस्कृतेऽपि क्वचिद्दर्शनात् । नापि यौगिकः । निर्मन्थनभवो हि निर्मन्थ्यः । स च नवनीतादावपि अविशिष्टः, तेषामपि निर्मन्थनभवत्वात् । न चात्र प्रोक्षणीतुल्यत्वम् । तत्र योगस्य घृतादिसाधारण्येऽपि ङीबन्तत्वात् प्रोक्षणीशब्दस्य स्त्रीलिङ्गनित्यबहुवचनान्ताप्शब्दसामानाधिकरण्ययोग्यतया भवतु तदर्थविषयत्वम् । इह तु तृतीयान्तस्य 'निर्मन्थ्येन' इति पदस्य अग्निनवनीतादिसाधारणत्वात् नाग्निवचनत्वनिर्णयः संभवति इति जातिवचनत्वमेव । इत्येवं प्राप्तेऽभिधीयते । भवेदेवं यदि अत्राग्निप्रतीतिरन्यतो न भवेत् । एवं हि श्रूयते 'निर्मन्थ्येनेष्टकाः पचन्ति' इति । तेन योगस्य साधारण्येऽपि पाकसमभिव्याहारात् अत्रापि अग्निविशेषप्राप्तौ यौगिकत्वमेव । **प्रयोजनं**– संस्कारवचनत्वे संस्कृतेनाग्निना इष्टकाः पक्तव्याः । जातिवचनत्वे अग्निमात्रेण । यौगिकत्वे तु अचिरनिर्मथितेन । अत्र यद्यपि सूर्यकान्तादिनिवर्तकतयाऽपि निर्मन्थ्यशब्दस्यार्थवत्त्वात् नाचिरनिर्मथिताग्निलाभः, तथापि पाकाक्षेपप्राप्तेऽग्नौ मथनस्य पाकाङ्गत्वेन लोहितोष्णीषवत् विधानेन अङ्गानां मुख्यदेशकालकर्तृकत्वात् अचिरनिर्मथितप्राप्तिरिति । तदुक्तम् '**पाकेनाग्नेरुपात्तत्वात् तद्विशेषपरा** (विशेषणपरा इति मूले पाठः) **श्रुतिः । तच्च पाकाङ्गभूतत्वात् तद्देशादौ करिष्यते ॥**' (वा. पृ. ३४५) इति । सूत्रं तु– यथा प्रोक्षणीशब्दस्य यौगिकत्वम्, तथा निर्मन्थ्येऽपीत्यर्थः । तौता.

⧗ 'तथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते । समानप्रत्ययश्रुत्या बलीयस्या क्रियाऽङ्गता ॥' इति न्यायात् चमसैकत्वं न चमसस्याङ्गं पश्वेकत्वमिव पशोः । तेन चमसाधर्मत्वात् न चमसैकत्वं चमसस्थानापन्नेऽपि गोदोहने प्राप्नोति । बाल. पृ. १६९.

⧗ तथाप्राप्त्यनुवादः इति न्यायः ॥ (तथापदं प्राप्तिपदेन समस्तम् ।) न च यत्रतत्र स्थितस्यापि मन्त्रस्य विधिप्रापितानुष्ठेयप्रकाशकतया तदनुवादकरूपतैव तदुपसंहारत्वम्, तथात्वे 'तथाप्राप्त्यनुवादः' इति न्यायेन पुरोवादानुवादयोः पुरोवादस्य प्रबलतया उपक्रमस्य प्राबल्यमापतेत् । (अत्र यथाप्राप्त्यनुवादः इति पाठः स्यादिति भाति । के.) । पराक्रमः ४३।२.

*** तथा फलाभावात् । १।२।१।३ ॥** यथाभूतं मुखशोभादि अनन्तरफलत्वेन कीर्त्यते तथाभूतस्य अभावात् ('शोभतेऽस्य मुखं य एवं वेद' इत्यस्याः श्रुतेः) आनर्थक्यं इति सूत्रयोजना । सु. पृ. १५.

⧗ तथा भक्ष–प्रैष–आच्छादन–संज्ञप्तहोम–द्वेषम् । ६।८।८।२८॥

अधिकरणातिदेशोऽयम् । यथा ज्योतिष्टोमे धनवताऽपि धनयाचना स्वीयसोमवताऽपि च सोमक्रयणं कर्तव्यम्,

तथा भक्षादिकमपि क्रत्वर्थत्वात् नियतं कर्तव्यम् । तत्र ज्योतिष्टोमे दीक्षासु ‘पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य’ इति विशिष्टं भक्षणमुक्तम् । यस्यापि अपरं भोजनं विद्यते, सोऽपि क्रत्वर्थत्वात् पयआद्येव भक्षयेत् । तथा दर्शपूर्णमासयोः ‘प्रोक्षणीरासादय इध्माबर्हिरुपसादय स्रुवं च स्रुचश्च समृड्ढि पत्नीं संनह्य आज्येन उदेहि’ इति प्रैषम्, प्रैषार्थं जानतोऽपि कृते उच्चार्यः । वाजपेये यस्य कार्पाससूत्रमयं वासो विद्यते सोऽपि आच्छादनं दर्भमयं वासः परिदधीत । पशौ यस्य पशुः शामित्रे शब्दं न कुर्यात् चरणैर्वा न हन्यात् तस्यापि ‘यत्पशुर्मायुमकृतोरो वा पद्भिराहते । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥’ इति मन्त्रेण संज्ञप्तहोमं जुहुयात् । तथा यो न द्वेष्टि कंचन, यं च न द्वेष्टि कश्चन, सोऽपि ‘योऽस्मान् द्वेष्टि यं च वयं द्विष्मः’ इति द्वेषमन्त्रं ब्रूयात् क्रत्वर्थत्वात् । इति सिद्धान्तः । भक्षश्च प्रैषश्च आच्छादनं च संज्ञप्तहोमश्च द्वेषश्च (द्वेषमन्त्रश्च) तेषां समाहारः । नपुंसकत्वमेकवद्भावश्च । के.

* ‘तथा भक्ष०’ इत्यधिकरणे मायुःकरणाद्यभावेऽपि ‘यत् पशुर्मायुरकृत०’ इतिमन्त्रेण संज्ञप्तहोमः नित्य एव कार्यः इत्युक्तम् । वाजसनेयिनां तु मते पशुना मायुःकरणे एव (दीनशब्दकरणे एव) नैमित्तिक एव होम इति । बाल. पृ. ६५.

* तथा युक्तं चानीप्सितम् । (पा० १।४।५० तथा ईप्सिततमवत् क्रियया युक्तं अनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ‘ग्रामं गच्छन् तृणं स्पृशति’) इति स्मृतिस्तु लाक्षणिकप्रयोगसाधुत्वान्वाख्यानार्था । अन्यथा लाघवात् ‘व्याप्यं कर्म’ इति स्मरणापत्तिः । सु. पृ. ६२९.

तथा यूपस्य वेदिः । ३।७।६।१३ ॥

ज्योतिष्टोमे अग्नीषोमीये पशौ यूपो यदा निखातव्यो भवति तत्रोक्तम् ‘अर्धमन्तर्वेदि मिनोति अर्धं बहिर्वेदि’ इति । यूपावटस्य अर्धो भागः महावेद्याः अन्तर्भागे, अर्धो भागश्च बहिर्भागे यथा स्यात् तथा खातव्यः, तत्र च यूपो निखातव्यः इति वाक्यस्य यथाश्रुतोऽर्थः । तत्र किं यूपाङ्गभावेन वेदेरुपदेशोऽयं किंवा देशलक्षणार्थं उपदेशः इति विचारे पूर्वः पक्षः । यथा दीक्षादक्षिणं प्रधानस्य इति पूर्वाधिकरणे उक्तम्, तथा वेदिर्महावेदिः यूपस्य अङ्गं वेदितव्यम् । तथाच यूपाङ्गभावेन वेदेरुपदेशोऽयमिति पूर्वः पक्षः ।

देशमात्रं वाऽशिष्येणैकवाक्यत्वात् । १४ ॥

पूर्वपक्षं निरस्य ‘अर्धमन्तर्वेदि, अर्धं बहिर्वेदि’ इति उभाभ्यामपि वाक्यांशाभ्यां मध्यदेशो लक्ष्यते नाङ्गाङ्गिभावो लक्ष्यते इति सिद्धान्तकथनार्थं सूत्रमिदम् । अत्र मात्रशब्दः अवधारणार्थः । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । शासु अनुशिष्टौ इति कर्मणि यप्रत्यये शिष्यते इति शिष्यं इति शिष्यपदं निष्पन्नम् । न शिष्यं विधेयं यस्य तत् अशिष्यम् ‘अर्धं बहिर्वेदि’ इति वाक्यम् । तेन अशिष्येण सह ‘अर्धमन्तर्वेदि’ इत्यस्य एकवाक्यत्वात् एकवाक्यत्वसंभवात् मध्यदेशविधानमेतत् इति गम्यते । अन्तर्बहिर्देशयोर्द्वयोरपि विधौ वाक्यभेदः स्यात् । संभवति चैकवाक्यत्वे वाक्यभेदस्य अन्याय्यत्वम् । तथा च संधिदेशविधानमेतत् । अशिष्येण इति सूत्रपदं गृहीत्वा व्याख्यानमिदम् । किंवा शिष्येण इत्येव पदच्छेदः । शिष्येण शासितव्येन विधेयेन देशेन ‘अर्धमन्तर्वेदि, अर्धं बहिर्वेदि’ इत्यस्य एकवाक्यत्वं भवति । तस्मात् देशलक्षणा इति व्याख्येयम् ।

अत्र सुधा—मातव्यदेशस्य लक्षणीयत्वात् कृत्स्नस्य च यूपस्य मातव्यत्वात् अन्तर्देशमात्रे बहिर्देशमात्रे वा कृत्स्नस्य अमेयत्वात् शब्दद्वयेन कृत्स्नमातव्यदेशस्य लक्षणा इति देशमात्रपदार्थः । पशुबन्धनकृतार्थतया अन्यार्थत्वेन अशिष्येण यूपेन सह वेद्याः, कर्त्रादिधारणकृतार्थतया च अन्यार्थत्वेन अशिष्यया वेद्या सह यूपस्य एकवाक्योपादानावगतात् संयोगात् इतिसिद्धान्तहेतूक्त्यर्थः अशिष्येणेति सूत्रावयवः । अत्र च उत्तराधिकरणसिद्धान्तसूत्रे वक्ष्यमाणः कृतार्थसंयोगाख्यः देशलक्षणहेतुः अत्रापि योजनीयः । ‘दर्शपूर्णमासौ इष्ट्वा सोमेन यजेत’ इत्यादिषु कृतार्थसंयोगेषु कैमर्थ्यानाकाङ्क्षणेन अङ्गोपदेशायोगात् कालोपदेशवत् अत्र देशोपलक्षणमपि युक्तम् । विधित्वस्य अनुवादत्वस्य च अनुपपत्तेः अवाच्येन ‘अर्धं बहिर्वेदि’ इत्यनेन एकवाक्यत्वस्य प्रतीयमानस्य अयोगप्रसङ्गात् इति अकारप्रश्लेषेण अशिष्येण इति सूत्रावयव-

व्याख्यार्थे अथेत्यादि भाष्यम् । पक्षद्वयदोषसाम्यनिरासार्थे देशलक्षणायां शिष्येण एकवाक्यत्वात् इति अकारप्रश्लेषशून्यसूत्रावयवव्याख्याऽर्थे 'अर्धमन्तर्वेदि' इत्यादि भाष्यं इति । के.

*'तथा यूपस्य वेदिः' **इत्यधिकरणे** 'अर्धमन्तर्वेदि अर्धे बहिर्वेदि' इति समुदायेन देशविशेषो लक्ष्यते इति भाष्यवार्तिकादिषु ध्वनितम् । (यूपवेदिन्यायः ।) कु. १।२।१।७.

⧗ **तथा व्रतमुपेतत्वात् । १२।१।११।२० ॥**

सोमे दीक्षणीयाऽऽदिषु दार्शपूर्णमासिकं व्रतं चोदकप्राप्तं न कर्तव्यं तथा अग्न्यन्वाधानवत् । उपेतत्वात् दीक्षार्थमुपेतमेव । उपेतस्य अनपवृक्तस्य पुनरुपादानं न शक्यम् । तस्मान्नास्ति पृथक् व्रतं इति सिद्धान्तः ।

विप्रतिषेधाच्च । २१ ॥

सोमे दीक्षणीयाऽऽदिषु दार्शिकं व्रतं न कर्तव्यम् । सोमार्थस्य व्रतस्य उपेतत्वात् । पुनरुपादाने सति 'अग्ने व्रतपते व्रतं चरिष्यामि' इति चरतो वचनं विप्रतिषिद्धम् । तथा च मन्त्रविप्रतिषेधात् पुनर्व्रतं न कर्तव्यम् ।

सत्यवदिति चेत् । २२ ॥

पूर्वपक्षी शङ्कते । सत्यवत् यथा सत्यवचनं व्रतं पुरुषधर्मत्वात् अनुवर्तमानमपि दर्शे पुनरुपेयते तद्वत् प्रायणीयाऽऽदिषु स्यात् इति चेत् ।

न, संयोगपृथक्त्वात् । २३ ॥

सिद्धान्ती दृष्टान्तवैषम्यमाह-- न तेनैतत् तुल्यम् । संयोगपृथक्त्वात् । तत्र पुरुषसंयोगः कर्मसंयोगश्च पृथक् भवति इति पुनरुपेयते । इह तु यत् सोमार्थे तदेव इतरत्र प्रसङ्गात् कार्यं साधयति । तस्मात् सत्यवत् इति दृष्टान्तो विषमः । ततश्च पुनर्व्रतं नानुष्ठेयं इति सिद्धान्तः । के.

⧗ **तथा स्यादध्वरकल्पायां, विशेषस्यैककालत्वात् । ११।२।४।२० ॥**

अध्वरकल्पायां नाम इष्टौ तथा अग्नीषोमीये पशौ इव अङ्गानां प्रयोगः तन्त्रेण स्यात् । विशेषस्य अङ्गविशेषस्य निर्वापस्य एककालत्वात् 'पुरा वाचः प्रवदितोः निर्वपेत्' इति एककाले श्रवणात् । तस्मात् सर्वेषामङ्गानां तन्त्रं इति पूर्वः पक्षः ।

इष्टिरिति चैकवच्छ्रुतिः । २१ ॥

अध्वरकल्पायां यद्यपि प्रातः मध्यंदिने सायं इति यागत्रयम्, तथापि 'सैषाऽध्वरकल्पा नामेष्टिः' इति एकवत् एकत्वेन श्रुतिः श्रवणं भवति । तत् अङ्गानां तन्त्रे उपपद्यते । तस्मात् तन्त्रम् । इति पूर्वपक्षे हेत्वन्तरमुक्तम् ।

अपिवा कर्मपृथक्त्वात्, तेषां च तन्त्रविधानात्, साङ्गानामुपदेशः स्यात् । २२ ॥

सिद्धान्तयति । अपिवाशब्देन पक्षव्यावृत्तिः । आग्नावैष्णवसारस्वतादीनां कर्मणां पृथक्त्वात्, तेषां च कर्मणां प्रातः मध्यंदिने सायं इति नानाकालेषु तन्त्रस्य अङ्गकलापस्य विधानात् साङ्गानामेव त्रयाणां यागानां उपदेशः स्यात् । तस्मान्न तन्त्रम् ।

समानानुपूर्वीकयोः षोडशद्वाविंशयोः सूत्रयोः समान एवाक्षरार्थः । विषयभेदात्तु भेदः ।

प्रथमस्य वा कालवचनम् । २३ ॥

यदुक्तं विशेषस्यैककालत्वात् इति तत्राह । प्रथमस्य प्रातःकालीनस्य कर्मणः यो निर्वापः, तस्यैतत् कालवचनं 'पुरा वाचः प्रवदितोर्निर्वपेत्' इति । न द्वितीयतृतीययोर्यागयोः । तस्मात् तन्त्रभेदः सिद्धान्तः ।

फलैकत्वादिष्टिशब्दो यथाऽन्यत्र । २४ ॥

यदुक्तं 'इष्टिरिति' इति तत्राह । इष्टिशब्दः एकवचनान्तः फलैकत्वात्, फलैकत्वेन कर्मैकत्वात् । यथा अन्यत्र सर्वपृष्ठेष्टिः मृगारेष्टिः इत्यादौ । यथा वा राजसूय इति । तस्मात् अध्वरकल्पायां प्रातरादिकालभेदेन कर्तव्यानां त्रयाणांत्रयाणामर्थे अङ्गानां भेदेनानुष्ठानम् । इति सिद्धान्तः । के.

⧗ **तथा स्वामिनः फलसमवायात्, फलस्य कर्मयोगित्वात् । ६।३।७।२१ ॥**

यथा देवताग्निशब्दक्रियाणां न प्रतिनिधिः तथा स्वामिनः यजमानस्यापि न प्रतिनिधिः । फलसमवायात् स्वामिन एव कर्मणः फलेन समवायात् संबन्धात्, फलस्य कर्मयोगित्वात् फलं कर्मणा युज्यते । यः कर्म

कुर्यात् तस्य फलम्। यदि च यजमानस्य फलसंबन्धः, तदा यजमानेनैव सर्वं याजमानं कर्तव्यम्। न प्रतिनिधिना। तस्मात् स्वामिनो न प्रतिनिधिः इति सिद्धान्तः। अत्र **कुतूहलम्**। वस्तुतस्तु प्रवासविधिसामर्थ्यादेव प्रवसति यजमाने भवति अन्यस्य प्रतिनिधानम्। हविस्त्यागो हि स्वाहाकारान्ते वषट्कारान्ते वा। तत्काले च हविस्त्यागो न प्रवसता यजमानेन स्वयं कर्तुं शक्यः। विदेशस्थस्य तस्य तत्कालज्ञानासंभवात्। अतः अन्येनैव कारयितव्यः। प्रतिनिधीयमानश्च यजमानाज्ञया शक्नोति हविस्त्यक्तुम् 'अग्नय इदं न मद्यजमानस्य' इति। यस्य च द्रव्यमुत्सृज्यते तस्यैव फलसंयोगः इति न प्रतिनिधीयमानस्य स्वामित्वमापाद्यम्। तदुक्तमभियुक्तैः 'संनिधौ यजमानः स्यादुद्देशत्यागकारकः। असंनिधौ तु पत्नी स्यात् पुत्रादिर्वा तदाज्ञया॥' इति। बोधायनश्चाह 'पुत्रो वाऽन्तेवासी वा योऽलं कर्मणे स्यात् तं तत्र प्रेष्येत्' इति। अधिकरणं तु कार्यान्तरव्यापृते यजमाने वेदितव्यमिति। अत एव टुप्टीकाऽपि (अस्मिन्नेव सूत्रे) 'यदा द्रव्यपरित्यागं कृत्वा अन्यत्र व्यापृतो भवति, तत्र यानि क्रत्वर्थानि, तेषु अध्वर्युरेव प्रतिनिधित्वेन कर्ता।' इति। के.

* **तद्धितः देवताविधाने चतुर्थीतः प्रबलः 'देवतासंगतिः श्रुत्या तद्धितान्तात् प्रतीयते। चतुर्थ्यन्तात्तु वाक्येन पदद्वयसमीपतः॥'** वैश्वदेवी इति हि श्रुत्यैव देवतासंबन्धः प्रतीयते, इतरत्र तु वाजिभ्यो वाजिनं इति पदद्वयसामीप्याद् गम्यते। वा. २।२।९।२३ पृ. ५३३. * तद्धितः साकाङ्क्षात् नोत्पद्यते। भा. ५।४।६।२१. * **तद्धितेन** चतुर्थी बाध्यते देवताविधौ, यथा वैश्वदेवी इति तद्धितेन आमिक्षाया विश्वैर्देवैः संबन्धं बोधयता वाजिभ्य इति चतुर्थी वाजिनस्य विश्वैर्देवैः संबन्धं बोधयन्ती। बाल. पृ. १४४. * 'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते। देवतासंगतिस्तत्र दुर्बलं तु परंपरम्॥' वा. २।२।९।२३ पृ. ५३३. * तद्धितेन देवताऽन्वयसंभवे तद्धितचतुर्थीमन्त्रवर्णानां देवताऽन्वयप्रमाणानां मध्ये जघन्येन मन्त्रवर्णेन देवताकल्पनं युक्तम्। सु. पृ. ४६१. * तद्धितेन देवतानिर्देशः इष्टिप्रकृतिलिङ्गम्। बाल. पृ. ११९. * तद्धितेन देवताविधिः अपूर्वविधिः। बाल. पृ. २२, * तद्धितेन द्वितीया बाध्यते। मृग्यमुदाहरणम्। पृ. १४४. * **देवतातद्धितेनैव** देवतोद्देशपूर्वकद्रव्यत्यागरूपोत्सर्गविधिसिद्धिः 'तद्गुणास्तु विधीयेरन्' (१।४।६।९) इत्यनेन न्यायेन। सु. पृ. ९४१, * **तद्धितस्य** मन्त्रवर्णाद्बलीयस्त्वं (देवताविधौ)। पृ. ४७२, * तद्धितस्य संनिहितत्वमात्राभिधाने न शक्तिः कल्प्या, संनिहितत्वस्य प्रकृत्यर्थेन अविशेषणात्, निर्विशेषणस्य च सर्वपदार्थसाधारण्येन अनुपयोगितया अनभिधेयत्वात्, अपत्यादिविशेषणवच्च उपपदार्थविशेषणफलत्वाभावात्। पृ. ८२९.

* समर्थानां हि स उच्यते सापेक्षं चासमर्थं तस्मान्न **तद्धितान्तेन** निरपेक्षाग्निदेवत्येन (आग्नेय) द्विदेवत्यस्याभिधानम्। (अग्नीषोमीयः ऐन्द्राग्नः)। भा. ३।१।१५।२७. * **तद्धितान्तात्** देवताशब्दात् परस्य भावप्रत्ययस्य संबन्धवाचित्वम्। सु. पृ. ८२८.

* **तद्धितान्तपदोपात्तविधिना** देवता, द्रव्यम्, संबन्धः, भावना, यागः इति– सर्वमन्यत् अर्थादाक्षिप्यमाणं न वाक्यं भिनत्ति। वा. १।४।६।९ पृ. ३४२.

* **तद्धितार्थः**। त्वतलादिभावप्रत्ययानां घटत्वं पटत्वं इत्यादौ घटत्वत्वेन घटत्वादिकमर्थः। घटत्वत्वं च घटेतरासमवेतत्वे सति घटनिष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वे सति समवेतत्वम्। संसर्गः समभिव्याहारलभ्यः। सत्त्वं इत्यादौ एकदेशे लक्षणा। तत्र तदितरासमवेतत्वस्याप्रसिद्धेः। एवं प्रमेयत्वं इत्यत्रापि। एवमन्यत्राप्यूह्यम्। **केचित्तु** भावप्रत्ययस्य धर्मत्वेन धर्मे शक्तिः। धर्मत्वं आधेयत्वं शक्यताऽवच्छेदकम्। शक्तताऽवच्छेदकं तु त्वतल्त्वादिकम्, न भावप्रत्ययत्वम्। घटत्वं इत्यादौ घटधर्मः इति बोधः। 'पटे घटत्वं नास्ति' इत्यत्र तु नञर्थस्य घटमात्रवृत्तित्वविशिष्टभावप्रत्ययार्थे धर्मे अन्वयः, भावप्रत्ययसमभिव्याहृतनञः प्रकृत्यर्थमात्रवृत्तित्वविशिष्टप्रतियोगिताकाभावबोधकत्वव्युत्पत्तेः। एवं समासाद्युत्तरभावप्रत्ययेऽपि नीलोत्पलत्वमित्यत्र नीलोत्पलधर्मः इति बोधः। समासोत्तरभावप्रत्ययस्य प्रकृत्यर्थवृत्तित्वविशिष्टधर्मबोधकत्वव्युत्पत्त्या न रक्तोत्पले नीलो-

त्पलत्वं इति बोध इत्याहुः । अन्ये तु कृत्तद्धितसमासोत्तरभावप्रत्ययस्य पदार्थताऽवच्छेदकद्वयसामानाधिकरण्ये शक्तिः, लोके पाचकत्वं औपगवत्वं नीलोत्पलत्वं इत्यादौ, वेदे च वैश्वदेवीत्वं निषादस्थपतित्वं इत्यादौ पाककृतिपुरुषत्वयोः, उपगुसंबन्धत्वापत्यत्वयोः, नीलत्वोत्पलत्वयोः, विश्वदेवदेवताकत्वामिक्षात्वयोः, निषादत्वस्थपतित्वयोश्च सामानाधिकरण्यस्य विशेषणतया भानात् इति आहुः । अन्ये तु सामानाधिकरण्यस्य उत्तरपदार्थताऽवच्छेदकविशेषणतया भानम् । सामानाधिकरण्यमात्रे शक्तिः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्, प्रत्ययार्थप्राधान्यनियमस्य भावप्रत्ययार्थातिरिक्तसमासाद्यतिरिक्तपरत्वात् । तेन नीलत्वसमानाधिकरणमुत्पलत्वं इति बोधः (नीलोत्पलत्वम् इत्यत्र) इत्याहुः । परे तु नीलादिपदस्य तत्समवायिनि लक्षणा, अभेदः संसर्गः, नीलत्वसमवाय्यभिन्नसमवेतोत्पलत्वं इति बोध इत्याहुः । वैश्वदेवी इत्यादितद्धितस्य देवतात्वविशिष्टे सर्वनामार्थे शक्तिः । सर्वनामार्थश्च बुद्धिस्थप्रकारविशेषावच्छिन्नं पयस्त्वादि । एवं च प्रातिपदिकार्थविश्वदेवानां देवतात्वे, देवतात्वस्य च निरूपकत्वेन सर्वनामार्थद्रव्यविशेषणत्वेन अन्वयः । ससंबन्धिकत्वादेकदेशान्वयेऽपि न दोषः । आमिक्षापदे तु प्रकारविशेषोपस्थापने तद्धितस्य तात्पर्यग्राहकत्वं इति प्राञ्चः । केचित्तु तद्धितस्य सर्वनामार्थे शक्तिः, देवतात्वे तु निरूढलक्षणा । कृत्प्रत्ययानां आश्रयवाचिनां कृताविव विश्वदेवप्रातिपदिकार्थस्य लक्षितदेवतात्वे अन्वयः व्युत्पत्तिवैचित्र्यात् इत्याहुः । अन्ये तु तद्धितार्थो द्रव्यविशेष एव । देवतात्वं तु प्रातिपदिकार्थतद्धितार्थयोः संसर्गः इत्याहुः । परे तु देवतात्वमेव तद्धितार्थः, सर्वनामार्थस्य व्यक्तिन्यायेन बाधः इत्याहुः । अपरे तु तद्धितेन अनिर्धारितविशेषद्रव्यसामान्यप्रतीतेः न द्रव्यविशेषवाचित्वम्, किंतु आमिक्षापदादेव विशेषनिर्णयः इत्याहुः । **मणि.** पृ. १६१-१६२. * **तद्धितार्थेन** साकाङ्क्षस्य असंबन्धः, एवं समासेऽपि । **भा.** ३।२।१७।४१.

* **तद्धितदेवताविधिः** सर्वज्येष्ठः । सर्वजघन्यश्चायं मान्त्रवर्णिकदेवताविधिः । **वा.** १।४।६।९ पृ. ३४१.

* **तद्धितद्वितीययोर्विप्रतिपत्तौ** तद्धितः समञ्जसो द्वितीया वा इति संदेहः ऐन्द्यधिकरणे (३।२।२।३) । **सु.** पृ. १०८७.

* **तद्धितनिर्देशेन** हि प्रातिपदिकार्थस्य संख्याविशेषाभिव्यक्तिर्भवति । तत्र प्रातिपदिकार्थानन्यथासंभवात् एकवचनान्तेन विग्रहो भवति । **वा.** ३।२।१५। ३७. * **तद्धितनिर्देशे** देवानां देवतात्वं श्रुत्या । **भा.** २।२।९।२३.

* **तद्धितप्रत्ययावृत्तिलक्षणो** वाक्यभेदः । **बाल.** पृ. १८१.

* **तद्धितवत्** समासस्य सापेक्षेषु अप्रवृत्तेः । **वा.** ३।२।१७।४१.

* ये हि विभक्तिवाच्या अर्था भवन्ति, तद्विभक्तिसमर्थेभ्य एव तेभ्यः **तद्धितविधानं** दृश्यते 'तदर्हति, तेन क्रीतं, तस्मै हितम्, तत आगतः, तस्यापत्यम्, तत्र भवः' इति । **वा.** २।२।४।१० पृ. ४९२.

* **तद्धितश्रुतेः** कारकश्रुतिर्बलीयसी इति 'ऐन्द्या गार्हपत्यम्' इत्यत्र मन्त्रस्य गार्हपत्याङ्गत्वमेव, नेन्द्राङ्गत्वम् । शेष्यनेकत्वे इदम् । **कौ.** ३।३।७।१४ पृ. ३५०.

* **तनुशिरा उष्णिक्** । पादेषु अक्षराणि ११।११।६ उदा० प्र या घोषे भृगवाणे (ऋसं. १।१२०।५) । **के.**

* **तनूनपात्कल्पाः** राजन्य–अत्रि–वध्र्यश्व–वसिष्ठ–वैश्य–शुनक–कण्व–कश्यप–संस्कृतिभिन्नाः । (एषां द्वितीयः प्रयाजः तनूनपात् । राजन्यादीनां तु नराशंसः) । **भा.** ६।६।१।१.

⌛ **तन्तुन्यायः** । अयं समुदायस्य कार्यसाधकत्वविवक्षया प्रवर्तते । यथा तन्तवः सूत्राणि बहूनि मिलितानि कार्यं साधयन्ति, तथा महान्तोऽपि मिलिताः स्वकार्यं साधयन्तीति भावः । **साहस्री.** ९९४.

⌛ **तन्तुपटन्यायः** । तार्किकमते तन्तुषु नष्टेष्वपि क्षणं पटस्तिष्ठति, तथा जीवन्मुक्तिः । अयं कारणनाशे कार्यनाशः इत्यस्यापवादः । **संग्रहः.**

* **(तन्त्रं नाम)** तन्त्रं तत्र, यत्र सकृत् कृतं सर्वेषामुपकरोति । यत्र तु अन्यार्थेन अङ्गेन अन्यस्योपकारः तत्र प्रसङ्गः । **रत्न.** १२।२।७।२४. * तन्त्रं

तन्यते विस्तार्यते बहूनामुपकारो येन सकृत्प्रवर्तनेन, तदिदम्। यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपस्तेषामुपकरोति। वि. ११।१।१. ✻ तन्त्रं द्विधा भवति प्रत्येकं वा समुदाये वा वाक्यपरिसमाप्तौ आख्यातगुणत्वप्राधान्यापेक्षया। के. ✻ तन्त्रं प्रसङ्गश्च। 'साधारणं भवेत् तन्त्रं परार्थे त्वप्रयोजकः। एवमेव प्रसङ्गः स्याद् विद्यमाने स्वके विधौ ॥' (इति भाष्योक्तलक्षणश्लोकस्यायमर्थः–) यत् अङ्गमनुष्ठीयमानं अगृह्यमाणविशेषत्वात् अनेकशेषिसाधारणम्, तत्र तन्त्रम्, यथा आग्नेयादिषु प्रयाजादेः। यत्तु अनुष्ठीयमानं परार्थत्वेन गृह्यमाणविशेषत्वेऽपि परस्योपकारकम्, तत्र परार्थोपजीवी प्रयोजकः यथा वाजिनतुषोपवापादिकं दध्यानयनकपालादेः। यत्र तु स्वविधेः प्रयोजकत्वशक्तिसद्भावेऽपि परार्थोपजीवनम्, तत्र प्रसङ्गः इत्यर्थः। एवं च 'परार्थे त्वप्रयोजकः' इत्यत्र स्वविधेः प्रयोजकत्वशक्त्यभावे इत्यर्थात् लभ्यते इति बोध्यम्। **सोम.** १२।३।४. ✻ तन्त्रं साधारणो धर्मग्रामः। यथा दर्शपूर्णमासयोः आज्यभागादिः पूर्वः, स्विष्टकृदादिः उत्तरः। भा. १२।१।१।१.

✻ तन्त्रं साधारणो धर्मग्रामः। स येषां प्रधानानां तानि तन्त्रीणि प्रधानानि। भा. १२।१।१।१.

(यत् तन्त्रेण क्रियते, यस्य वा तन्त्रं तत् वर्णक्रमेणोच्यते। तन्त्रं न इति तु ततः परं निवेक्ष्यते)।

✻ **तन्त्रं** अग्नेराधानं सर्वकर्मणि। भा. ११।३।११।२६. ✻ तन्त्रं अङ्गानि पौर्णमास्यां त्रयाणां प्रधानानां एककालसंयोगात्। टुप्. ११।४।४।११. ✻ तन्त्रं अभिवर्षणमन्त्रः 'उन्दतीरोजो धत्ते' इति ज्योतिष्टोमे संतानेनाभिवर्षणस्थले। भा. ११।४।१७।५०, ✻ तन्त्रं अमेध्यप्रतिमन्त्रणमन्त्रः ('अब्रद्धं चक्षुः' इति) ज्योतिष्टोमे एकदा अनेकामेध्यदर्शने। ११।४।१७।५०, ✻ तन्त्रं अवघातमन्त्रस्य 'अव रक्षो दिवः सपत्नं वध्यासम्' इति दर्शपूर्णमासयोः मुसलप्रहारानेकत्वेऽपि। ११।४।१२।४२, ✻ तन्त्रं आघारादीनामङ्गानां दर्शपूर्णमासयोः, न प्रतिप्रधानं भेदः। ११।१।१०।५४–६७, ✻ तन्त्रं उपसत्कालीनं सुब्रह्मण्याह्वानं अहर्गणे। ११।३।१०।२१, ✻ तन्त्रं उलूखलं राजसूये नानावीजेष्टौ। ५।२।६।१३–१५, ✻ तन्त्रं ऋत्विजां राजसूये एकस्मिन्। ११।४।२।४–७, ✻ तन्त्रं कण्डूयनमन्त्रः ('कृषिषु स्यामकृषे' इति) युगपद् अनेकाङ्गकण्डूयनेऽपि। ११।४।१६।४८–४९. ✻ तन्त्रं कर्तारः राजसूये इति भाष्यान्तरम्। सति संभवे त एव कर्तार इति वार्तिकम्। के. ११।४।२।४–७. ✻ तन्त्रं कर्तॄणां होतृ-आग्नीध्र-ब्रह्मणाम्। विहारद्वये वरुणप्रघासेषु, अध्वर्युप्रतिप्रस्थात्रोस्तु वचनाद्भेदः। भा. ११।२।१०।४४–४८, ✻ तन्त्रं कुम्भीशूलवपाश्रपणीनां ऐकादशिनेषु विभिन्नदेवताकेष्वपि पशुषु सजातीयेषु। ११।४।९।३१–३६.

⧗ तन्त्रं कुम्भीशूलवपाश्रपणीनां वाजपेयगतप्राजापत्यपश्वङ्गादिश्रपणार्थम् ॥

पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात् तन्त्रभावः स्यात्। ११।४।८।३३ ॥

भाष्यम्— वाजपेये प्राजापत्येषु पशुषु कुम्भ्याः शूलस्य वपाश्रपण्याश्च तन्त्रभावः स्यात्, विभुत्वात्। विभवत्येका कुम्भी सर्वपशूनामवदानानां श्रपणे, शूलं हृदयानाम्, वपाश्रपणी वपानाम्। तस्मात् तन्त्रं स्युः।

सोम— पाकसौकर्यसिद्धेः दृष्टार्थस्य कुम्भ्यादेर्नतन्त्रता इत्युत्थितेः संगतिः। न चैकदेवत्यत्वेऽपि अवदानादेः क्रमानुष्ठानाय असंकरस्यापेक्षितत्वात् कथं तन्त्रत्वमिति वाच्यम्। वक्ष्यमाणरीत्या चिह्नकरणेनापि तत्सिद्धेः।

वि— 'प्राजापत्येषु कुम्भ्यादेर्भेदो नो वा, ऽङ्गभेदतः। भेदो, मैवं विशेषाङ्गश्रपणादौ प्रभुत्वतः ॥'

भाट्ट-- एकदेवत्येषु एकजातीयेषु च प्राजापत्यादिपशुषु प्रयोगविध्यवगतश्रपणादियौगपद्यानुरोधेन कुम्भीशूलवपाश्रपणीनां महत्परिमाणाङ्गीकारेण तन्त्रमेव श्रपणादि। नहि तेषां प्रकृतौ कश्चित् परिमाणविशेष उपात्तः, येन तल्लिप्सया कुम्भ्यादिभेदोऽङ्गीक्रियेत।

मण्डन-- 'कुम्भ्येका पशुसंहतौ।'

शंकर-- 'कुम्भ्यादेश्च पशुष्विदम्।' तन्त्रम्।

✻ तन्त्रं दीक्षा पृथक्कालत्वात् द्वादशाहे। (दीक्षावत् इति भाष्यम्)। भा. ११।३।१०।२१, ✻ तन्त्रं देश-

कालकर्तारः दर्शपूर्णमासादिप्रधानेषु । ११।२।१।१–२, ४–७, * तन्त्रं देशकालकर्तारः दर्शपूर्णमासयोः अङ्गेषु। ११।२।२।३, ८–११, * तन्त्रं नदीतरणमन्त्रो 'देवीराप' इति ज्योतिष्टोमे अनेकस्रोतस्कनदीतरणस्थलेऽपि । ११।४।१७।५०, * तन्त्रं प्रयाणमन्त्रः 'भद्रादभि श्रेयः प्रेहि' इति एकार्थनिर्वृत्त्यर्थे। ११।४।१८।५१, * तन्त्रं (प्रयोगः) भिन्नं ब्राह्मणादिकर्तृकाया अवेष्टेः राजसूयात् । ११।४।३।९–१२, * तन्त्रं यूपः ज्योतिष्टोमे पशुत्रयार्थः । ११।३।३।३–४, * तन्त्रं यूपाहुतिः यूपैकादशिन्याम्, अन्तिकदेशस्य अविवक्षितत्वात् । ११।२।७।२६–२९, * तन्त्रं यूपसंस्काराणां पशुत्रयार्थे ज्योतिष्टोमे । ११।३।४।५–७, * तन्त्रं वरणं सर्वकर्तृणां राजसूये । इति भाष्यमतम् । प्रतिकर्म पृथक् वरणं इति वार्तिकमतम् । ११।४।२।४–७, * तन्त्रं वसाहोमस्य एकदेवताकपशुगणे । ११।२।५।२४, * तन्त्रं वेदिप्रोक्षणमन्त्रः ('वेदिरसि बर्हिषे त्वा' इति) त्रिः प्रोक्षणेऽपि । ११।४।१५।४६–४७, * तन्त्रं शेषकार्याणां सर्वपृष्ठायाम् । ३।५।४।१६–१७, * तन्त्रं (प्रयोगः) सवनीयपशोः सवनीयपुरोडाशेषु प्रसज्यते, न तु विकल्पः । १२।२।१२।३०–३२, * तन्त्रं स्वप्नार्थमन्त्रः ('त्वमग्ने व्रतपा असि' इति) एकस्यां रात्रौ अवान्तरनिद्राभेदेऽपि । ११।४।१७।५०, * तन्त्रं स्वरुः पशुत्रयार्थे अग्निष्टोमे । ११।३।५।८–१२.

(यत् वा यस्य वा यत्र न तन्त्रम्, तदिदानीं निवेश्यते)

* तन्त्रं न अङ्गानि अनुक्तदेशकालानां प्रधानानां त्रिसंयुक्तद्वये, राजसूये । भा. ११।४।१।१–३, * तन्त्रं न अङ्गानां चातुर्मास्यगतवरुणप्रघासेषु दक्षिणोत्तरविहारयोः क्रियमाणमेषमेष्योः, किंतु पृथगनुष्ठानम् । ११।२।९।३५–४३, * तन्त्रं न अङ्गानां दर्शपूर्णमासचातुर्मास्यादिषु तत्तद्व्याप्यप्रयोगानुरोधात् । ११।२।३।१२–१८, * तन्त्रं न अङ्गानां द्वादशाहे प्रधानैः अपृथक्कालानाम् । ११।४।६।२३–२६, * तन्त्रं न अङ्गानां प्रातरादिभेदेन क्रियमाणानां त्रयाणांत्रयाणां प्रधानानामर्थे कालभेदात् अध्वरकल्पायाम् । ११।२।४।१९–२३, * तन्त्रं न अङ्गानां राजसूये अवेष्टिषु । ११।४।३।८–१०, * तन्त्रं न अध्रिगुः वाजपेये क्रतुपशुषु प्राजापत्येषु च कालभेदात् । ११।४।२०।५४–५६, * तन्त्रं न अभिषेचनीयदशपेययोः राजसूये । ११।२।१४।५७–६२, * तन्त्रं न अवहननमन्त्रस्य नानाबीजेष्टौ प्रतिबीजं राजसूये । ११।४।१३।४३, तन्त्रं न आग्नेयपशुद्वयप्रदानयोः । ११।१।११।६८–७१, * तन्त्रं न आज्यग्रहणमन्त्रस्य आज्यग्रहणेषु प्रतिग्रहणम् । ११।४।१४।४४–४५, * तन्त्रं न उक्ष्णां पञ्चशारदीये अहीने पञ्चसु संवत्सरेषु, उक्षवाक्ये कर्मशेषप्रतिषेधविधानात् । ११।२।१३।५४–५६, * तन्त्रं न उपरवमन्त्रः, किंतु प्रत्युपरवखननमावृत्तिः ज्योतिष्टोमे । ११।४।१९।५२–५३, * तन्त्रं न ऐन्द्रवायवस्य भक्षे ज्योतिष्टोमे । ३।५।५।१८, * तन्त्रं न कपालचतुष्कस्य अश्वप्रतिग्रहेष्टयां प्रतिपुरोडाशम् । ११।४।११।३९–४१, * तन्त्रं न कर्मणां कालभेदात् । ११।२।४।२२.

तन्त्रं न कुम्भीशूलवपाश्रपणीनां नानाजातीयेषु पशुषु पाकवैषम्यात् ॥

जात्यन्तरेषु भेदः स्यात् पक्तिवैषम्यात् । ११।४।१०।४० ॥

भाष्यम्— ऐकादशिनेषु (पशुषु) नानाजातीयेषु कुम्भ्यादीनां भेदः स्यात् पक्तिवैषम्यात् । (अत्र पाठान्तरम्– अस्ति सौत्रामणी, तत्र आश्विनो धूम्रः, सारस्वतो मेषः, ऐन्द्र ऋषभः इत्येवंविधाः पशवः सन्ति । तेष्वपि तन्त्रभावः प्रभुत्वात् प्राप्तः अपोद्यते । सौत्रामण्यां एवंजातीयकेषु कुम्भ्यादीनां भेदः स्यात्, पक्तिवैषम्यात्– इति) । विषमा हि पक्तिः आजानां आविकानां च मांसानाम् । यावता कालेन आजानि पच्यन्ते, तावता आविकानि विलीयन्ते । तत्र अवदानसंभेदो भवति । तस्मात् पात्रभेदः स्यात् ।

वृद्धिदर्शनाच्च । ४१ ॥

भाष्यम्— वृद्धिश्च सौत्रामण्यां शूलानां गोऽजाविषु दृश्यते 'शूलैश्च मासरेण च अवभृथमभ्यवयन्ति' इति । तस्मादपि भेदः ।

सोम— एकस्यामपि जातौ बाल्ययौवनस्थाविरत्ववशेन यत्र पक्तिवैषम्यम्, तत्र कुम्भ्यादिभेद एव न्यायसाम्यादिति ध्येयम् ।

वि— ‘ भिन्नजातिषु कुम्भ्यादेस्तन्त्रं भेदोऽथवा, ऽग्रिमः । पूर्ववत्, पाकवैषम्ये साहित्यासंभवाद् भिदा ॥ ’

भाट्ट— एकदेवत्येष्वपि यत्र पाकवैलक्षण्यापादकं जात्यन्तरम्, तत्र सहश्रपणे शीघ्रपाकिनां विलीनत्वापत्तेः, चिरपाकिनां अपक्वत्वापत्तेः, पृथगेव कुम्भी श्रपणं च । एवं हृदयशूलेऽपि । अत एव सौत्रामण्यां ‘ शूलैर्मांसरेण चावभृथमभ्यवयन्ति ’ इति लिङ्गम् । वपाश्रपणी तु एकैव । यस्या एव वपायाः पाको वृत्तः तस्या एव उद्वासनोपपत्तेः । अस्तु वा तत्रापि भेदः । तेन पृथक्पक्वानां एकदेवतेषु सहप्रदानम्, भिन्नदेवतेषु तु भेदेन ।

मण्डन— ‘ जातिभेदे पृथक् कुम्भी । ’

शंकर— ‘ जातिभेदे पशोस्तद्भित् । ’ ११.

* तन्त्रं न निर्वापमन्त्रस्य दर्शपूर्णमासयोः प्रतिमुष्टि निर्वापे । भा. ११।४।१४।४४–४५, * तन्त्रं न पत्नीसंयाजानां चातुर्मास्यगतवरुणप्रघासेषु । ११।२।११।४९–५०, * तन्त्रं (प्रयोगः) न पवमानहविषां त्रयाणां आधाने, ब्रह्मवर्चसकामस्य तु सहप्रयोगः । ११।४।४।११–१४, * तन्त्रं न पुरोऽनुवाक्यायाः कृष्णग्रीवयोः प्रथमतृतीययोः । ११।४।२०।५४–५६, * तन्त्रं न प्रतिप्रस्थातृमन्त्राणां चातुर्मास्यगतवरुणप्रघासेषु अध्वर्युमन्त्रैः । १२।१।९।१८, * तन्त्रं न मनोतासूक्तस्य कृष्णग्रीवयोः । ११।४।२०।५४–५६, * तन्त्रं न राजसूयगताग्नावैष्णवादीनां पृथग्दक्षिणायुक्तानाम् । ११।४।१।१–३, * तन्त्रं न लवनमन्त्रस्य दर्शपूर्णमासयोः दर्भलवने । ११।४।१४।४४–४५, * तन्त्रं न वसाहोमानां भिन्नदेवताके पशुगणे । ११।२।६।२५, * तन्त्रं न सुब्रह्मण्याऽऽह्वानस्य सुत्याकालीनस्य अहर्गणे द्वादशाहादौ । ११।३।११।२२–३२, * तन्त्रं न स्तरणमन्त्रस्य दर्शपूर्णमासादौ वेदिस्तरणे प्रतिधातु । ११।४।१४।४४–४५, * तन्त्रं न हविष्कृदाह्वानस्य सवनीयपुरोडाशेषु ज्योतिष्टोमे । ११।४।२०।५४–५६.

* तन्त्रेण इतिकर्तव्यता भविष्यति एकस्मिन् फले चोदितानाम् । टुप्. ११।४।५।१७. * तन्त्रेण देवताहोमः स्विष्टकृदिडाभक्षणे च एकदैवत्यपशुगणे । भाट्ट. ५।२।६. * तन्त्रेण प्रयोगो दीक्षोपसदां दक्षिणैक्यात् । टुप्. ११।४।५।१८, * तन्त्रेण प्रयोगो योऽन्नाद्यं कामयमानः अवेष्टिं करिष्यति तस्य । ११।४।३।९. * तन्त्रस्य (प्रयोगस्य) पशुपुरोडाशीयस्यैव अनुनिर्वाप्येषु प्रसङ्गः अग्निचयनादौ । भा. १२।३।२।३–८.

* **तन्त्रावापौ** एकादशाध्यायार्थः । के.

* एकवाक्यचोदितानां एकदेशकालकर्तृकत्वे एकतन्त्रत्वं भवति । यथा दर्शपूर्णमासयोः, यथा च चित्रायामिष्टौ । भा. १२।१।१।१. * तन्त्रत्वे नास्ति आवृत्तिः, आवापस्तु आवृत्तिः । के.

⧗ **तन्त्रन्यायः** । दर्शपूर्णमासादिगताग्नेयादीनां समुच्चितानां एकः स्वर्गः फलम् ॥

प्रयोजनाभिसंबन्धात् पृथक् सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् । ११।१।१।१॥

भाष्यम्— दशमेऽध्याये बाधाभ्युच्चयलक्षणं वृत्तम् । इदानीमेकादशे तन्त्रावापलक्षणं निर्वर्तयिष्यामः । तत्र यत् सकृत्कृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः । यस्तु आवृत्त्योपकरोति स आवापः यथा तेषामेव ब्राह्मणानामनुलेपनम् । श्लोकमपि उदाहरन्ति ‘ साधारणं भवेत् तन्त्रम्, परार्थे त्वप्रयोजकः । एवमेव प्रसङ्गः स्याद् विद्यमाने स्वके विधौ ॥ ’ इति । साधारणं भवेत् तन्त्रं इति उक्तार्थम् । परार्थे त्वप्रयोजकः इति, यः परार्थमुत्पन्नः, तदर्थमेव च अनुष्ठीयमानः परस्य उपकरोति, स परः तस्य अप्रयोजकः, यथा पश्वालम्भो यागार्थमुत्पन्नः, तदर्थमेव च अनुष्ठीयमानः लोहितशकृत्कर्मणोरपि उपकरोति इति । एवमेव प्रसङ्गः स्यात् । अयं तु (प्रसङ्गे) विशेषः, विद्यमाने स्वके विधौ इति । यद्यपि अस्य अन्यो विधिर्विद्यते, परमविधिना तु कृतार्थत्वात् न क्रियते, यथा प्रयाजाः पशोरपि चोदकेन प्राप्ताः पशुपुरोडाशस्यापि । पश्वर्था एव तु कृताः पशुपुरोडाशस्य उपकुर्वन्ति इति न पुनः तदर्थं क्रियन्ते ।

प्रकृतमिदानीमुच्यते । तन्त्रावापलक्षणं प्रतिज्ञातम् । तदुच्यते । दर्शपूर्णमासयोः प्रधानानि आग्नेयादीनि । तेषां स्वर्गः फलं श्रूयते ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति । स किं तेषां तन्त्रेण भवति, उत भेदेनेति । एवं चातुर्मास्यादिष्वपि द्रष्टव्यम् । ननु च नैवात्र स्वर्गः फलं श्रूयते । स्वर्गकामपदेन तावत् पुरुषोऽभिधीयते, यजेतेत्यनेनापि यागानिर्वृत्तिः, तयोर्वाक्येन संबन्धः । केनेदानीं फलमुच्यते । अनेनैव स्वर्गकामपदेन इत्याह । ननु पुरुषस्यायं वक्ता । न खलु कश्चित् पुरुषः स्वर्गकामो नाम अस्ति । ननु च यस्य स्वर्गे कामः, स स्वर्गकाम इति । एतदेव न जानीमः, कस्य स्वर्गे काम इति । य एव हि स्वर्गकामः स एव अस्वर्गकामो भवतीति । एवं तर्हि कालोपदेशोऽयं भवति । यदा स्वर्गकामः, तदा यजेतेति । अत्रापि न कश्चित् कालविशेषोऽस्ति, यस्मिन् नियमेन स्वर्गकामः स्यात् । सर्वेषु कालेषु सर्वे कामा अनियमेन उत्पद्यन्ते । तत्र न कश्चित् कालविशेषः अनेन शक्यते व्यपदेष्टुम् । एवं तर्हि नैवायं पुरुषोपदेशः, नापि कालोपदेशः । किं खलु ? फलकामो निमित्तम् । स्वर्गविषये कामे उत्पन्ने यजेतेति । यथा कपाले नष्टे यजेतेति । अस्य पक्षस्य सूत्रेणैव परिहार उक्तः । ‘फलकामो निमित्तमिति चेत् न नित्यत्वात्’ (६।२।२।१०–११) इति । नित्यान्यग्निहोत्रादीनि कर्माणि । तानि यदि निमित्ते विधीयन्ते, नित्यत्वमेषां विहन्येत । तत्र नित्यत्वचोदना यावज्जीविकाद्या उपरुध्येरन् । लिङ्गानि च, ‘अप वा एष स्वर्गाल्लोकाच्च्यवते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वाऽतिपातयेत्’ इत्येवमादीनि । परिशेषात् फलसंयोगः एवायम् । कथं पुनरनेन शक्यते फलं विधातुम् । तदुच्यते । स्वर्गकामो यजेतेति, यदि वा स्वर्गकामो यागाय उपदिश्यते, यथा लोहितोष्णीषाः प्रचरन्ति । यदि वा यागः स्वर्गकामाय यथा मलिनः स्नायात्, बुभुक्षितोऽश्नीयादिति । तत्र यदि स्वर्गकामः कर्मणे उपदिश्यते, उपदिष्टोऽपि न प्रवर्तेत । को हि परार्थे प्रयासमातिष्ठेत् । तथा कर्मचोदना अनर्थिकैव भवति । अथ यागः स्वर्गकामार्थः, ततोऽसौ पुरुषस्योपकरोति, तं पुरुषः स्वार्थेन करोतीति । तथा कर्मचोदना अर्थवती भवति । अपिच यागविधौ श्रुत्यर्थः परिगृहीतो भविष्यति, स्वर्गकामविधौ वाक्यार्थः । तस्मात् यागः स्वर्गकामस्योपकारकः । स्वर्गकामस्य अनेक उपकारः पशुपुत्रग्रामान्नाद्यादिलाभः । स यदि पुत्रान्नाद्यादीनामन्यतमं करोति, ततः स्वर्गकामशब्दः अविवक्षितार्थः पुरुषमात्रवचनो भवति । तथा च आनर्थक्यमेव । अनन्तरेणापि हि तद्ववचनं पुरुषमात्रं आख्यातादेव गम्यते । तस्मात् यागात् स्वर्गो भवतीति ।

तत्र अनेककर्मसंनिपाते दर्शपूर्णमासादिषु भवति संशयः । किं तन्त्रं एषां फलम्, उत भेदेनेति । किं प्राप्तम् ? भेदेनेति । किं कारणम् ? इमानि आग्नेयादीनि प्रधानानि परस्परानपेक्षाभिः चोदनाभिः पृथग्भूतानि उत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति । तत्संनिधौ स्वर्गादि फलं श्रूयमाणं भेदेन आकाङ्क्षितत्वात् भेदेनैव संबध्यते । तस्मात् प्रतिप्रधानं फलभेदः इत्येवं प्राप्तम् । **एवं प्राप्ते, इदमारभ्यते** । प्रयोजनाभिसंबन्धात् पृथक् सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् । पृथग्भूतानामपि एतेषां आग्नेयादीनां ततः स्यात् ऐककर्म्यम् । कुतः ? प्रयोजनाभिसंबन्धात् । प्रयोजनं फलम् । तत् प्रति एतेषां समेतानां संबन्धात् संयोगात् इत्यर्थः । ऐककर्म्ये इति, कर्मशब्देन अत्र फलमुच्यते क्रियते इति । तत् येषामेकं तानि एककर्माणि, तेषां भावः ऐककर्म्यम्, एकफलमित्यर्थः । कथं पुनर्ज्ञायते समेतानामाग्नेयादीनां फलेन योगः इति, एकशब्दाभिसंयोगात् । य एषां समुदितानां एकः शब्दो वाचकः, तेन एतानि अभिधाय फलसंबन्धः कृतः ‘दर्शपूर्णमासाभ्यां स्वर्गकामः’ इति । अतः समुदितेभ्यः फलं गम्यते, न भेदेन । यथा ‘ग्रामेण उदपानः खेयः’ ‘ग्रामेण तडागः खेयः’ इति ग्रामशब्देन समुदायवचनेन संयुज्य कूपो विधीयमानः समुदितैः पुरुषैः एकः खन्यते, न प्रतिपुरुषं कूपभेदः, एवमिहापि ।

टुप्— दशमेऽध्याये बाधाभ्युच्चयौ वृत्तौ । तत्र अभ्युच्चयो नाम न किञ्चित् वस्तुस्वरूपं (शास्त्रप्रमेयम्) विद्यते । किंतु उपहोमैः अनूयाजा न बाध्यन्ते इति बाधाभावमात्रं अभ्युच्चयः इत्युच्यते । अस्मिंश्च दशमे

चोदकप्राप्तानां प्रत्यक्षविहितानां च पदार्थानां इयत्ता चिन्तिता। इह तु (इदानीम्) एकादशे इयत्ताविशेषश्चिन्त्यते। यत्र त्रयो यागाः (प्रधानभूताः) श्रूयन्ते, तत्र सेयमियत्ता किं तन्त्रेण (भवति), उत आवृत्त्या इति। ननु दशमानन्तरं अङ्गानां तन्त्रावापचिन्ता युक्ता, तेषां (एव दशमे) इयत्ताऽवधारणात्। प्रथमे अधिकरणे फलं चिन्त्यते, तच्च इयत्ता न भवति। तस्मात् तस्य दशमेन नास्ति संबन्धः। (तथाहि,) किं एकैकस्य फलं उत संहतानाम्, इति कीदृशः दशमसंबन्धः (स्यात्)। उच्यते। यदि समुदितानामेकं फलम्, ततः तन्त्रावापचिन्ता घटते। अथ एकैकस्य फलम्, ततः तन्त्रं नास्त्येव (क्रत्वन्तरवत् भेद एव स्यात्) तस्मात् (उपोद्घातरूपं) प्रथमाधिकरणमारभ्यते तन्त्रावापसिद्धये। द्वितीयादीन्यपि (तत्–) प्रसङ्गेन (आरभ्यन्ते) किं संहतानि अङ्गानि एकं क्रतूपकारं कुर्वन्ति, उत निरपेक्षाणि इति। अथवा तन्त्रावापसामान्येन प्रथममधिकरणं चिन्त्यते। (भाष्यकारेण सौत्रं विचारमुपन्यस्य चोदितं ननु नैवात्र स्वर्गः फलं श्रूयते इति, तस्यार्थमाह–) 'यजेत' इत्यनेन आक्षिप्तः कर्ता, स विशेष्यते स्वर्गकामशब्देन (पुरुषवचनेन), यथा 'राजा राजसूयेन यजेत' इति (राजा इति विशेषणम्)। विशेषणं च (कामः राजत्ववत्) कर्माङ्गं भवति इति। (उत्तरभाष्यस्यार्थमाह–) एवं च (कर्तृविशेषणत्वे अभ्युपगम्यमाने) यदि स्वर्गं (एव कश्चित्) नित्यं कामयते, नान्यानि ब्रह्मवर्चसादीनि, तथा सति असाधारणत्वात् विशेषणमवकल्पते (स्वर्गमेव यः कामयते इति)। न च ईदृशः कश्चिदस्ति। यदि वा (कश्चित्) स्वर्गं न कदाचित् कामयते, तथापि तं (अस्वर्गकामं) अपेक्ष्य विशेषणं घटते स्वर्गकाम एव यः इति। किंतु ईदृशोऽपि नास्ति, यो न कदाचित् स्वर्गं कामयते। अथोच्येत, (स एव) यस्यां वेलायां स्वर्गकामः (स्वर्गमेव कामयते) तस्यां वेलायां दर्शपूर्णमासादीनि करिष्यति (तेन कालद्वारेण विशेषणत्वं युज्यते)। एतदपि न घटते। यावत् (पुरुषः) साङ्गं प्रधानं निर्वर्तयति, तावत् अनेके कामा उत्पद्यन्ते (दीर्घकाले)। यदि च शुद्धमेव स्वर्गं कामयेत, तथा (सति भवन्मते) यथाश्रुतौ दर्शपूर्णमासौ कृतौ स्याताम्, नेतरथा। न च ईदृशः कश्चित् विद्यते (यो यावत्प्रयोगं स्वर्गमेव कामयते)। तस्मात् कालद्वारेण विशेषणं न घटते।

(भाष्यकारेण 'फलकामो निमित्तं भवतु इत्याशङ्क्य नित्यानित्यसंयोगविरोधात् परिहारोऽभिहितः, तमाक्षिपति–) योऽयं नित्यानित्यविरोधः उक्तः, स नोपपद्यते। कथम्? यस्यापि (मते) स्वर्गकामशब्देन फलमभिधीयते, तस्यापि नित्यानित्यविरोधो भवत्येव। (तथाहि,) दर्शपूर्णमासौ यावज्जीवं कर्तव्यौ ज्ञातौ, पुनः कामेन कर्तव्यौ इति (विरोधात्) न कश्चित् निमित्तेन (फलस्य) विशेषोऽस्ति। न च ईदृशो नित्यानित्यविरोधो भवति। (कथम्?) आग्नेयादय उत्पन्नाः, तेषामुत्पत्तिवचने न नित्यत्वमवगम्यते, न काम्यत्वम्। ते तु (स्वरूपमात्रेण) विपरिवर्तमानाः एकेन वाक्येन यावज्जीवं प्रति विधीयन्ते, अपरेण स्वर्गम्। न च यावज्जीव–स्वर्गकामचोदनयोः परस्परापेक्षा विद्यते। येन ये एव यावज्जीविके (प्रयोगे) कर्तव्याः, ते एव काम्येऽपि कर्तव्या इति (अवगमात् विरोधः स्यात्)। तस्मात् काम्यनित्याभ्याम् (अन्योन्यमनपेक्षमाणाभ्याम्) उत्पत्तिः अपेक्षितव्या (इत्यविरोधः। तस्मात् अयुक्तमिदं नैमित्तिकत्वनिराकरणम्)। तेन तर्हि अन्यथा (नैमित्तिकत्वनिराकरणं) वर्ण्यते। स्वर्गकामशब्देन निमित्तं नाभिधीयते। सप्तम्यन्तेन निमित्तमुच्यते यथा 'भिन्ने जुहोति' इति, यद्वृत्तेन वा 'यस्योभयम्' इति। न चायं सप्तम्यन्तः, न च यद्वृत्तेन युक्तः। तस्मात् (निमित्तानभिधायित्वात्) अनेन स्वर्गं कामयमानः पुरुषः अभिधीयते। (तत्रापि पूर्वोक्तेन न्यायेन पुरुषपरत्वानुपपत्तेः विशेषणपरत्वमेव)। स च पुरुषः किं साध्यत्वेन स्वर्गं कामयते, उत साधनत्वेन इति। द्विप्रकाराऽपि कामना अस्ति। यदि अयं साधनत्वेन स्वर्गमिच्छति, तथा सति (पूर्वोक्तेन न्यायेन विशेषणपरत्वे स्थिते स्वर्गकामाधिकरणपूर्वपक्षन्यायात्) प्रीतिविशिष्टेन द्रव्येण यागः साधनीयः (भवति) तदा च

न कश्चित् शब्दोऽस्ति, येन फलमभिधीयेत । यो हि अयं स्वर्गकामशब्दः, स साधनवचनः । (न फलवचनः इति–) अनेनापि प्रकारेण अनारब्धव्यमधिकरणम् (फलाभावेन तन्त्रावापचिन्ताऽनुपपत्तेः) ।

इदं तु षष्ठे निराकृतम् । स्वर्गस्य साधनत्वेन न कामना । किं कारणम् ? सर्वे ह्येवं कामयन्ते, स्वर्गो मे स्यादिति । साध्ये च मुख्या कामना, साधने तु नान्तरीयकी, साधनेन विना साध्यासंभवात् । तस्मात् साधने या कामना, सा गौणी । अपिच 'यजेत' इति भावनावचनः श्रुत्या पुरुषार्थमाक्षिपति । स च आक्षिप्तः किमंशं प्रथमं पूरयति । यदि च किमंशो यागेन पूर्येत, तदा चोदितमपि यागं न कश्चित् कुर्यात् । तत्र विधिर्व्याहन्येत । तस्माद्यः स्वर्गं साध्यत्वेन कामयते, तेन लक्षणयोपायः आक्षिप्तः । तत्रोपायत्वेन यागो विधीयते ।

अत्र (भाष्य–) ग्रन्थः **य एषां समुदितानां एकः शब्दो वाचकः, तेन एतानि अभिधाय फलसंबन्धः कृतः** दर्शपूर्णमासशब्देन इति । (भाष्यं विवृणोति–) "य एषां समुदितानां' इति, केषां ? आग्नेयादीनाम् । **एष शब्दो वाचकः** इति दर्शपूर्णमासशब्दः इत्यर्थः । **तेन एतानि अभिधाय** इति दर्शपूर्णमासशब्देन अभिधाय । **फलसंबन्धः कृतः** इति ।" तदयुक्तम् । स दर्शपूर्णमासशब्दः समुदायवचनः । यदि समुदायवचनः स्यात् तथा सति समुदायो न द्रव्यम्, न देवता, न क्रिया । किं तर्हि ? गुणोऽसौ । तस्य गुणत्वात् यागेन (क्रियास्वरूपेण) सामानाधिकरण्यं न स्यात् । अस्ति च सामानाधिकरण्यं 'दर्शपूर्णमासः यागः' इति । तस्मात् समुदायिवचनोऽयम् ।

'एकशब्दाभियोगात्' (सौत्रं पदम्) इत्येतदन्यथा वर्ण्यते । भावयेत् । किम् ? स्वर्गम् । केन ? यागेन करणेन दर्शपूर्णमाससंज्ञकेन । स्वर्गः प्रधानभूतः, यागः साधनं उपादीयमानश्च । तस्मात् तेषां इतरेतरयोगो विवक्षितः ।

शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत । २ ॥

भाष्यम्— नायमेकान्तः, यत् समुदायशब्देन संयुज्योच्यते तत् समुदितानामेव भवतीति । भेदेनापि किञ्चित् भवति । यथा 'गणाय स्नानम्, गणानुलेपनम्' इति, अनुलेपनादिशेषो गणशब्देन समुदायवचनेनापि संयोज्य उक्तो न समुदायेन संबध्यते । केन तर्हि ? समुदायिभिः । प्रतिपुरुषं हि स्नानादि आवर्तते । अतः शेषवद्वा फलं भिद्येत, कूपवद्वा तन्त्रं स्यादिति, अवैशेषिकोऽयं हेतुः समुदायशब्दसंयोगः । तस्माद्धेत्वन्तरं वक्तव्यम्, अत्रैष विशेष इति ।

अविधानात्तु नैवं स्यात् । ३ ॥

भाष्यम्— सोऽयमुच्यते । नात्र यागमुद्दिश्य फलं विधीयते, स्वर्गेण यागं कुर्यादिति । किं तर्हि ? फलमुद्दिश्य यागो विधीयते । स्वर्गं यागेन कुर्यादिति । किं कारणम् ? या अत्र विधायिका विभक्तिः यजेतेति, सा यागं श्रुत्या विदधाति, फलं वाक्येन विदध्यात् । न च श्रुत्यर्थे संभवति वाक्यार्थो ग्राह्यः, श्रुत्यर्थस्य मुख्यत्वात् । किं पुनः स्यात् यदि फलं विधीयते ? फले विधीयमाने यजत्यर्थोऽनूद्येत । नहि द्वयोर्विधीयमानयोः संबन्धोऽस्ति । अनुवादश्च संनिहितानां आग्नेयादीनां स्यात् । तानि च परस्परानपेक्षाणि मिथो विभक्तानि उत्पन्नानीति विभागेनैव तैः फलं संबध्यते । अथ पुनर्यजत्यर्थे विधीयमाने, आग्नेयादयो यागाः शब्देन समुदायवचनेन फलनिर्वृत्तौ उपादेयत्वेन चोद्यन्ते । चोदितानां समुदितत्वं गुणः संनिधानविशेषात् यो गम्यते, स विवक्षितो भवति । अविवक्षायां कारणाभावात् । यदि यागा विधीयन्ते, दर्शपूर्णमासशब्देन विशेष्टुं न शक्यन्ते । नहि विधीयमानस्य विशेषणं भवति । यत् कारणम् । विशेषणमपि अविधीयमानं न भवति । न च द्वयोर्विधीयमानयोः परस्परसंबन्धो भवति । किं पुनरत्र विशेषणेन कार्यम्, यावता रूपवतामाग्नेयादीनां संनिधौ अरूपो दर्शपूर्णमासाभ्यां यजेतेति यजतिशब्दः समुदायवचनः इति । किमर्थं तर्हि दर्शपूर्णमासशब्दः ? अनर्थकश्च नित्यानुवादमात्रम् । यथा, 'इन्द्रेण देवेन वृष्टम्' 'इडान्ताऽऽतिथ्या संतिष्ठते नानुयाजान् यजति' इति । अथवा, वाक्यार्थस्यैव अत्र विधानं न्याय्यम् । श्रुत्यर्थे हि विधीयमाने दर्शपूर्णमासशब्दोऽनर्थक एव आपद्यते । वाक्यार्थे तु दर्शपूर्णमासशब्दो विशेषणेन

अर्थवान् । यजतिरपि भावनाविधानार्थे प्राप्तोऽपि पुनः श्रूयते । प्राप्तिश्च दर्शपूर्णमासशब्दस्य यागवचनत्वादिति न किञ्चिदनर्थकम् । तस्मादेष पक्षो ज्यायान् ।

टुप्— अत्र (भाष्य–) ग्रन्थः । **विशेषणमपि अविधीयमानं न भवति । न च द्वयोर्विधीयमानयोः परस्परेण संबन्धो भवति** इति । अयुक्तमिदं दूषणं अरुणादीनामपि अयं दूषणप्रकारः स्यात् यथा भवता वर्णितम् । (अपि च अनवकाशमिदं चोद्यं इत्याह–) बलीयांश्च अयमेव न्यायः (सप्तमनवमाद्योक्तः) यत् 'भावनया सर्वेषां संबन्धः' इति । (कथं तर्हि यागविशेषणता अत आह–) इतरेतरसंबन्धस्तु (अरुणैकहायनीवत्) आर्थः । अत्र (योऽपि परिहार–) ग्रन्थः **किं पुनरत्र विशेषणेन कार्यं यावता रूपवतामाग्नेयादीनां संनिधौ अरूपः 'दर्शपूर्णमासाभ्यां यजेत' इति यजतिशब्दः समुदायवचनः** इति तत् (अपि) अयुक्तम् (एव) । यथैव आग्नेयादीनां द्रव्यदेवतेन रूपवत्त्वम्, एवं प्रयाजादीनामपि । तत्र (अपि हि) न कश्चित् रूपे विशेषो विद्यते, न च संनिधाने । तस्मात् (असति विशेषणे) प्रकृतत्वाविशेषात् सर्वेषामेव फले विधानं स्यात् । यदपि च (अत्र अपरितोषात् अथवा इत्यादिना परिहारान्तरमुक्तम्,) दर्शपूर्णमासाभ्यां स्वर्ग इति संबन्धः इति, एतदपि भावार्थाधिकरणे निराकृतं (तदीयन्यायेन) यागः एव फले विधीयते । तस्मात् भावना (एव) सर्वविशेषणविशिष्टा विधीयते ।

शेषस्य हि परार्थत्वाद् विधानात् प्रतिप्रधानभावः स्यात् । ४ ॥

भाष्यम्— यत्तु शेषवदिति, शेषस्यानुलेपनादेः परार्थेन विधानम्, पुरुषसंस्कारकत्वेन । एवं दृष्टार्थो भवति । अन्यथा, अदृष्टं कल्पयितव्यं स्यात् । तत्र गणः पुरुषलक्षणार्थो भवति । शक्नोति च संबन्धात् पुरुषान् लक्षयितुम् । अदृष्टं वा कल्प्यताम्, लक्षणा वेति । दृष्टा लक्षणा कल्पयितुं न्याय्या । तस्मात् पुरुषलक्षणार्थो गणः । न च लक्षणं कार्येण संबध्यते । किं तर्हि ? लक्षितः । तद्यथा शुक्लवाससमानयेति । यदा तु शुक्ले वाससी पुरुषलक्षणार्थमुच्येते, न तदा आनयनेन संबध्येते, इति । एवमिहापि न गणः कार्येण संबध्यते, किंतु पुरुषा एव कार्येण संबध्यन्ते । तस्मादनुलेपनादि प्रतिप्रधानं भिद्यते ।

शा— दशमेऽध्याये बाधाभ्युच्चयचिन्तया विकृतिषु अङ्गपरिमाणं चिन्तितम् । अतिदेशविचारश्च सप्तमादिभिः दशमपर्यन्तैः समाप्तः । संप्रति उपदेशातिदेशसाधारण्येन प्रयोगपरिमाणं परिमाणप्रसङ्गात् एकादशे तन्त्रावापचिन्तया चिन्त्यते । तदिह एकप्रयोगवचनचोदितानां एकफलानां संहत्यकारिणां बहूनां कर्मणां साधारणाङ्गभाजां अङ्गानुष्ठानं किं तन्त्रेण भवति, उत आवृत्त्या इति चिन्ता लक्षणार्थः । प्रथमं तावत् उपोद्घातत्वेन संहत्यकारित्वं प्रतिपाद्यते । तत्र **'परस्परानपेक्षाणामुत्पन्नानां फलार्थिनाम् । चोद्यमानं फलं तेषामेकैकस्यावधार्यते ॥ तेषां ह्युद्दिश्यमानत्वात् साहित्यं न विवक्षितम् । तस्मात् प्रत्येकमेव स्यादिति प्राप्तेऽभिधीयते ॥ आग्नेयादिकमुद्दिश्य फलं यद्युपदिश्यते । तत उद्दिश्यमानत्वात् तेषामेकैकशः फलम् ॥ कामिनं तु यदोद्दिश्य कर्मणां चोदना, तदा । तेषां विधीयमानानां सहभावो विवक्षितः ॥'**

सोम—**सूत्रार्थस्तु**– पृथुगुत्पन्नानामपि ततो हेतोः ऐककर्म्यें एककालत्वं स्यात् । कुतो हेतोः ? एक शब्दाभिसंयोगेन तन्त्राभिधाने युगपत् प्रयोजनान्वयात् इति ।

वि—'षड्यागानां फलं स्वर्गः प्रत्येकं तन्त्रतोऽथवा ।, आद्यः पृथक् फलार्थित्वात्, न सङ्घस्य फलोक्तितः ॥'

भाट्ट— तदेवं दशभिरध्यायैः प्रकृतौ विकृतौ च अनुष्ठेयपदार्थेषु अवगतेषु, अधुना तेषां प्रयोगविध्यवगतानुष्ठातन्त्रत्वं निरूप्यते । प्रयोगविधिर्हि साङ्गप्रधानभावनायाः फलार्थमेकेन वाक्येनानुष्ठानं बोधयन् एकवाक्योपादानात् साहित्यं बोधयति । तच्च असति बाधके एकक्षणवृत्त्येव कल्प्यते । अत एव अनेकोद्देशेन सकृदनुष्ठानं तन्त्रम् । अत एव न प्रसङ्गातिप्रसङ्गः, तत्र प्रयाजादीनां सकृत्करणेऽपि पशुपुरोडाशादीनामुद्देश्यत्वाभावात् । दधिपयोयागयोरपि अवान्तरकार्यस्यैव उद्देश्यस्य अनेकत्वान्नाव्याप्तिः । अत एव तत् विजातीयविषयं सजातीयविषयं वेत्यन्यदेतत् । एकजातीयसमिद्यागस्यैव

आग्नेयादित्रिकोद्देशेन सकृदनुष्ठानात्, विजातीययोर्दधिपयोयागयोरपि तत्त्वाच्च । तदुपोद्घातत्वेन च दर्शपूर्णमासाद्यनेकप्रधानस्थले किं षड्यागेभ्योऽप्येका फलव्यक्तिः, उत तत्तद्यागेभ्यो भिन्नंभिन्नं फलमिति चिन्तनीयम् । फलव्यक्तिभेदे हि तेषामेकप्रयोगविधिपरिग्रहासंभवात् न तन्त्रत्वसंभवः । तत्र तत्तदुत्पत्तिवाक्येषु तत्तद्यागानां निरपेक्षसाधनत्वेन विहितत्वात् तदनुवादेन विधीयमानः फलवाक्ये फलसंबन्धः अनुवाद्ययागगतसाहित्यस्य अविवक्षितत्वात् प्रत्येकमेव विज्ञायते । अतश्च तत्तदुत्पत्तिवाक्येष्वेव तेषां प्रयोगविधिः । 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादौ च पौर्णमास्येकत्वमात्रविधिः । तेन सामान्यविहितपूर्वाह्णादिकालबाधेन एकस्यामेव तस्यां इष्टित्रयं कार्यम् । इति प्राप्ते, उत्पत्तिवाक्येषु उत्पन्नानामपि फलवाक्ये फलसंबन्धित्वेन विनियोगविधिकरणात्, विनियोगविधिविषयतया फलोद्देशेन यागानामेव विधेयत्वावगतेः, तद्विशेषणीभूतस्य साहित्यस्य तन्त्राभिधानावगतस्य विवक्षितत्वात् सर्वेभ्य एकैव फलव्यक्तिः । सर्वेषां तस्यां दण्डचक्रादिवत् समुच्चयेन कारणत्वोपपत्तेः । अतश्च तेषां वक्ष्यमाणविधया एकप्रयोगविषयत्वस्यापि उपपत्तेर्युक्तं तन्त्रत्वम् । किंचैवं 'पौर्णमास्यां पौर्णमास्या' इत्यादिवाक्यवैयर्थ्यापत्त्या युगपत् तत्तद्यागसाध्यफलेच्छानैयत्ये प्रमाणाभावेन एकस्यां पौर्णमास्यां यागत्रयकरणानुपपत्तेः । अस्मन्मते तु अस्य एकप्रयोगविधानार्थत्वस्य वक्ष्यमाणत्वान्न वैयर्थ्यम् । अतः फलवाक्ये एकफलव्यक्तिं प्रति षण्णां दण्डचक्रादिवत् समुच्चयावगमात् वक्ष्यमाणरीत्या त्रयाणांत्रयाणां एकप्रयोगोपपत्तेर्युक्तमेव विजातीयदधिपयोयागादीनां तन्त्रत्वम् । सजातीयप्रयाजादीनां च आग्नेयादिभेदेऽपि तन्त्रत्वम् ।

मण्डन— 'षण्णां यजीनां फलमेकमेव ।'
शंकर— 'प्रकृतीष्टौ फलं सह ।'

* खण्डपर्वणि तु पूर्वदिने पितृयज्ञीयचरुश्रपणादिसकलेतिकर्तव्यताकं श्राद्धं परदिने तु पितृयज्ञः, कालभेदेन तन्त्रन्यायप्रवृत्तेः । समयमयूखः पृ. ७९.

* तन्त्रप्रसङ्गौ उपदेशातिदेशसाधारणौ । सोम. ७।१।१.

* तन्त्रविकल्पः यथा 'तन्त्रं वा वैश्वदेविकम्' मातामहश्राद्धे । (याज्ञ. १।२२८) । बाल. पृ. १६३.

* तन्त्रविषयकं अधिकं किञ्चित् 'एकादशाध्यायार्थः' इत्यत्र बाल–ग्रन्थे द्रष्टव्यम् । के.

* यदीयतन्त्रमध्ये अर्थान्तरं स तन्त्री । यथा सवनीयपशुतन्त्रे सवनीयपुरोडाशा भवन्ति इति सवनीयपशुस्तन्त्री । वि. १२।२।१२.

तन्त्रिसमवाये चोदनातः समानानामैकतन्त्र्यमतुल्येषु तु भेदो, विधिप्रक्रमतादर्थ्यात्, तादर्थ्यं श्रुतिकालनिर्देशात् । १२।१।१।१ ॥

'अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति' इत्युक्तस्य पशुपुरोडाशस्य अङ्गानि किं पशोः पृथक् कर्तव्यानि, उत पशोरङ्गान्येव तस्यापि उपकुर्वन्ति प्रसङ्गेनेति विचारे पूर्वपक्षमाह । तन्त्रं साधारणो धर्मः । स येषां ते तन्त्रिणः प्रधानानि । तन्त्रिसमवाये तन्त्रिणां प्रधानानां समवाये एककालकर्तृकत्वे, चोदनातः समानानां एकचोदनाचोदितानां ऐकतन्त्र्यं एकतन्त्रत्वं भवति । यथा दर्शपूर्णमासयोः । अतुल्येषु तु भिन्नचोदनाचोदितेषु तु भेदः स्यात् तन्त्रस्य । यथा प्रकृते 'अग्नीषोमीयं पशुमालभेत' इति पशुश्चोदितः, 'अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति' इति पुरोडाशो विहितः । तस्मादत्र न एकतन्त्रत्वम् । विधिप्रक्रमतादर्थ्यात् विधिः विधानं अङ्गानां प्रयोगः । तस्य प्रक्रमः तदर्था प्रवृत्तिः । विधिप्रक्रमस्य तादर्थ्यं विज्ञायते अयं पश्वर्थे विधिप्रक्रमः न पुरोडाशार्थ इति । कथं तादर्थ्यं श्रुतिकालनिर्देशात् श्रुत्या तत्र कालो निर्दिश्यते अग्नीषोमप्रणयनादनन्तरं पशोः कालः, वपाप्रचारादूर्ध्वं पुरोडाशस्य कालः इति । अतः तस्य पृथक् तन्त्रं कर्तव्यं इति पूर्वः पक्षः ।

गुणकालविकाराच्च तन्त्रभेदः स्यात् । २ ॥

अपिच पाशुकाः प्रयाजानुयाजाः गुणतः कालतश्च विकृताः । पशौ प्रयाजा एकादश पुरोडाशे पञ्च, पशौ अनुयाजा एकादश, ते च पृषदाज्येन इज्यन्ते । पुरोडाशे त्रयः, ते च आज्येन इज्यन्ते इति गुणेन विकारः । पशौ तिष्ठति पाशुकाः प्रयाजा इज्यन्ते 'तिष्ठन्तं पशुं प्रयजन्ति'

इति वचनात् । पुरोडाशे तु आसन्ने हविषि प्रयाजा इज्यन्ते । इति कालेनापि विकारः । एवं पशौ पशुपुरोडाशे च गुणेन कालेन च विकारः । तस्मात् तन्त्रस्य भेदः स्यात् । इति पूर्वपक्षे हेत्वन्तरमुक्तम् ।

तन्त्रमध्ये विधानाद् वा मुख्यतन्त्रेण सिद्धिः स्यात्, तन्त्रार्थस्याविशिष्टत्वात् । ३ ॥

पशुतत्पुरोडाशयोः तन्त्रभेदः स्यात् इति पूर्वपक्षं सूत्राभ्यां प्राप्तं वाशब्देन परिवर्तयन् सिद्धान्तमाह । मुख्यतन्त्रेण पशुतन्त्रेण पुरोडाशतन्त्रस्य सिद्धिः स्यात् । कुतः ? तन्त्रमध्ये विधानात् पाशुकस्य तन्त्रस्य मध्ये पुरोडाशस्य विधानात् । 'अग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपेत्' इति । तथा च तन्त्रार्थस्य अविशिष्टत्वं भवति । तन्त्रस्य अर्थः तन्त्रार्थः अङ्गकृत उपकारः । सोऽत्र अविशिष्टः अभिन्नः पशोः पुरोडाशस्य च । पशोरङ्गानि पुरोडाशस्य संनिहितानि । तस्मात् ऐकतन्त्र्यम् ।

विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् । ४ ॥

यदुक्तं पूर्वपक्षिणा गुणकालविकाराच्चेत्यादि तत्राह सिद्धान्ती । विकारात् भेदो न स्यात् । अर्थस्य अर्थः अङ्गजनित उपकारः, तस्य अविकृतत्वात् विकृतत्वाभावात् । पशोः पुरोडाशस्य च प्रकृतिवत् क्रियन्ते अङ्गानि । तस्मात् पशौ कृतान्येव पुरोडाशेऽपि उपकुर्वन्ति । गुणकालविकारेऽपि न तन्त्रभेदः इति सिद्धान्तः ।

एकेषां चाशक्यत्वात् । ५ ॥

पुरोडाशचोदकशास्त्रप्रापितानामङ्गानां मध्ये वेदेः अग्न्युद्धरणस्य व्रतोपायनस्य इति एकेषां केषांचित् अङ्गानां पुनः कर्तुमशक्यत्वात् प्रयाजादीनामपि एकतन्त्रत्वम् । इति सिद्धान्तपक्षः ।

एकाग्निवच्च दर्शनम् । ६ ॥

पशोः पशुपुरोडाशस्य च एकमग्निं दर्शयति 'मध्येऽग्नेराज्याहुतीर्जुहोति पुरोडाशाहुतीः पश्वाहुतीश्च' इति । तेन नाग्न्युद्धरणस्य भेदः । यथा एकाग्नेः एकस्य अग्नेः दर्शनं तथा प्रयाजादीनामपि दर्शनं प्रत्येतव्यम् । तस्मात् पाशुकं तन्त्रं पुरोडाशे प्रसज्यते इति सिद्धान्तः । के.

* तन्त्रीगानेऽपि गानशब्दः, शारीर्यां गीतौ च । भा. १०।४।५।८–९.

* तपः अनशनरूपं याजमानं ज्योतिष्टोमे । 'सर्वे ऋत्विज उपवसन्ति' इति वचनात् क्वचित् ऋत्विजामपि । भा. ३।८।३।९–११.

⧗ तपश्च फलसिद्धित्वाल्लोकवत् । ३।८।३।९ ॥

ज्योतिष्टोमादौ 'द्व्यहं नाश्नाति' 'त्र्यहं नाश्नाति' इति तपः श्रूयते । तत् तपः आध्वर्यवे वेदे उक्तत्वात् समाख्यया आध्वर्यवम्, इति उत्सूत्रे पूर्वपक्षे प्राप्ते सिद्धान्तयति । संस्कारवत् तपश्च याजमानमेव । कुतः ? फलसिद्धित्वात् । फलस्य सिद्धिर्यस्मात् तत् कायशोषणात्मकानशनरूपं तपः फलसिद्धि, तस्य भावः फलसिद्धित्वं तस्मात् । दुःखभोगदानद्वारा पापनाशनेन फलसाधकत्वात् फलस्य च यजमानगामित्वात् । लोकवत् लोके कृच्छ्राद्यनुष्ठानं यथा तद्वत् । लोके यथा दर्पणस्य मालिन्यनिरासेन प्रतिबिम्बदर्शनक्षमतां भस्मघर्षणमाधत्ते तद्वत् इति वा ।

वाक्यशेषश्च तद्वत् । १० ॥

कायशोषणार्थानशनरूपं तपः ज्योतिष्टोमे याजमानं नार्त्विजं इति सिद्धान्ते हेत्वन्तरपरं सूत्रम् । फलसिद्धिकत्वरूपो हेतुः यथा तपसो याजमानत्वसाधकः तद्वत् वाक्यशेषश्च तपसो याजमानत्वसाधकः । 'यदा वै पुरुषे न किंचन अन्तर्भवति, यदाऽस्य कृष्णं चक्षुषो नश्यति, अथ मेध्यतमः' इति तपोविधेर्वाक्यशेषः तपसो याजमानत्वं गमयति । मेध्यः यागार्हः, मेध्यतमः अतिशयेन यागं कर्तुमर्हः अनशनेन अर्हो भवति यजमानः । तस्मात् याजमानं तपः ।

वचनादितरेषां स्यात् । ११ ॥

अनशनरूपं तपः याजमानमेव इति पूर्वेण सूत्रद्वयेन उक्तम् । अत्र तृतीयसूत्रे तु क्वचित् तदपवाद उच्यते । 'ऋत्विज उपवसन्ति' इति वचनात् तु यजमानात् इतरेषां ऋत्विजामपि अनशनरूपं तपः स्यात् । वचनाभावे तु याजमानमेव तपः इति सिद्धान्तः ।

गुणत्वाच्च वेदेन न व्यवस्था स्यात् । १२ ॥

ज्योतिष्टोमे उक्तं अनशनरूपं तपः समाख्यानात् आध्वर्यवं इति यत् पूर्वपक्षिणा उक्तं तन्निरासार्थं तृतीयाधिकरणस्य इदमन्तिमं सूत्रम् । अध्वर्योः परिक्रीतत्वेन गुणत्वात् तपसश्च फलसाधनत्वेन प्रधानभूतयजमानगामित्वात् वेदेन अध्वर्युवेदेन आध्वर्यवसमाख्यया व्यवस्था न स्यात् । तस्मात् तपो नाध्वर्यवं किंतु याजमानमेव । (इदं सूत्रं अधिकरणान्तरपरमपि) । के.

* 'तपश्च फलसिद्धित्वात्' ३।८।३।९ इत्यधिकरणे ज्योतिष्टोमे 'द्यहं नाश्नाति' इत्यादि तपः कायशोषणं कर्म आध्वर्यवं इति पूर्वः पक्षः, याजमानं इति सिद्धान्तः । तपसः प्रतिबन्धनिवृत्तिरूपदृष्टफलार्थत्वे संभवति नापूर्वरूपादृष्टसंस्कारार्थत्वं कल्पनीयमिति । **परिमलः**, ३।४।१३।४४ ब्रसू. * तपः दोषनिर्घातं करोति । शक्यं हि दुःखदानात् अधर्मस्य कार्यविरोधिनः तपसा अपनयनम् । वा. ३।८।३।९. * तपः भाविसुखप्रतिबन्धकपापनाशकं कर्म । वि. ३।८।४. * तपः संस्कारवत् यजमानस्य फलप्रतिग्रहणयोग्यत्वं करोति । वा. ३।८।३।९.

⧗ **तपोऽधिकरणम्** । उपवासन्यायः । उपवासरूपं तपो याजमानं नार्त्विजम् ॥

तपश्च फलसिद्धित्वाल्लोकवत् । ३।८।३।९ ॥

भाष्यम्— तपः श्रूयते– 'द्व्यहं नाश्नाति, त्र्यहं नाश्नाति' इति । तत्र संदेहः किमार्त्विजं तपः, याजमानमिति । किं प्राप्तम् ? समाख्यानात् आर्त्विजं तपः इति प्राप्तम् । एवं प्राप्ते, ब्रूमः । याजमानं तपः इति । कुतः ? फलसिद्धित्वात् । फलसिद्ध्यर्थं तपः । तपःसिद्धस्य यागफलं सिध्यति । कथमेतदवगम्यते ? दुःखं हि तपः । दुःखं चाधर्मफलम् । अधर्मो यागफलस्य प्रतिबन्धको भवति । अश्रेयस्करो हि सः । तस्मिन् सति न श्रेयो भवितुमर्हति । तस्मात् सोऽपनेतव्यः । फलभोगेन च विरुध्येते धर्माधर्मौ । तस्मात् दुःखफलभोगाय अधर्मः श्रूयते । यत्तेन दुःखं उत्पादयितव्यमिदं तदिति एवं दृष्टार्थं भवति, नादृष्टं कल्पयितव्यम् । तेन फलोपभोगेन क्षीणे अधर्मे अप्रतिबद्धो यागः फलं दास्यतीति । फलसिद्धिश्च यजमानस्य कर्तव्या, नर्त्विजाम् । तस्माद्याजमानं तप इति ।

वा— तपसो दुःखकरत्वात् कर्ता गुणभूतः समाख्यया नियम्यते इत्याशङ्कां निवर्तयति । यस्मात् इदमपि संस्कारवत् फलप्रतिग्रहणयोग्यत्वं करोति । यजमानस्य च योग्यत्वं अप्रतिबद्धं कर्तव्यं न ऋत्विजः, तस्मात् याजमानम् । योग्यता च सर्वत्रैव द्विप्रकारा, दोषापनयेन गुणान्तरोपजननेन वा भवति । तत्र संस्काराः' गुणान्तरं उपजनयन्ति, तपश्च दोषनिर्घातं करोति । यो हि ज्योतिष्टोमादि करोति, तस्य एकान्तेन अस्मिन् अन्यस्मिन् वा जन्मनि विहिताकरणप्रतिषिद्धसेवानिमित्ता दोषाः सन्ति । ते च अनपनीताः क्रतुविपरीतस्वफलोपभोगदानात् अत्यन्ताविगुणस्यापि क्रतोः फलं प्रतिबध्नन्ति । सोऽयं क्रतुरप्रतिबद्धहेतुं कंचिदपेक्षते । तत्र प्रकरणश्रुतस्यैव तपसः अवश्यं क्रतुं प्रति कथंचित् उपकारकत्वं कल्पयितव्यम् । तत्र अपेक्षासंनिधियोग्यत्वैः दोषक्षपणकल्पनमेव ज्यायः । शक्यं हि दुःखदानात् अधर्मस्य कार्यविरोधिनः तपसा अपनयनम् । यथैव प्रायश्चित्तचरणात् दुःखेन अल्पेनापि सता महते दुःखान्तराय प्रवृत्तः सन् अधर्मः विनाश्यते इति वचनात् गम्यते, तथैवात्र द्रष्टव्यम् । यानि तु अकर्माङ्गभूतान्येव तपांसि श्रूयन्ते फलसंबद्धानि वा, तेषां फलसाधनस्य अपरस्य अभावात् प्रतिबन्धनिराकरणापेक्षा नास्ति, इति स्वर्गाद्येव कल्प्यते । यानि तु प्रायश्चित्ततपांसि, तेषां दोषापहारमात्रमेव फलम्, इति न सर्वत्र एकरूपत्वं अध्यवसातव्यम् ।

वाक्यशेषश्च तद्वत् । १० ॥

भाष्यम्— एतमेव अर्थं वाक्यशेषोऽपि द्योतयति 'यदा वै पुरुषे न किंचन अन्तर्भवति, यदा अस्य कृष्णं चक्षुषो नश्यति, अथ मेध्यतमः' इति । 'यदा अनशनः, तदा मेधार्हः' इति । मेधश्च यज्ञः । यज्ञश्च त्यागः । त्यागं कर्तुमर्हः तपसा क्रियते, इति वाक्यशेषो भवति । त्यागी च यजमानः । तस्मात् याजमानं तपः इति ।

वा— मेधार्हत्ववाक्यशेषश्च अमुमेवार्थं द्योतयति ।

वचनादितरेषां स्यात् । ११ ॥

भाष्यम्— किं एष एवोत्सर्गः सर्वे तपो याजमानमिति । वचनादितरेषाम् । यत्र वचनम्, तत्र ऋत्विजां यथा 'सर्वे ऋत्विजः उपवसन्ति' इति ।

वा-- वरदानवत् एतत् द्रष्टव्यम् 'ऋत्विजः उपवसन्ति' इति । (स्वयमातृण्णोपधाने वरप्रदानं यथा आर्त्विजं तद्वत्) ।

गुणत्वाच्च वेदेन न व्यवस्था स्यात् । १२ ॥

भाष्यम्— अथ यदुक्तं समाख्यानात् आर्त्विजं तप इति, गुणत्वात् न समाख्यया गृह्यते । यत्र पुरुषस्य गुणभावः, तत्र समाख्या नियामिका ।

वा— 'गुणत्वे तस्य निर्देशः' (३।८।२।६) इत्यनेन गतार्थं इति अन्यथा व्याचष्टे । (उत्तराधिकरणार्थत्वेन) ।

सोम— पूर्वापेक्षया विशेषशङ्कया प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**— तपश्च याजमानं फलोत्पत्तिप्रतिबन्धकदुरितनिवर्तनेन फलसिद्ध्यर्थत्वात् । यथा लोके स्वल्पेनापि प्रायश्चित्तेन महतो दुरितस्य निवृत्तिः । इहापि तथा स्वल्पेनापि तपसा महतोऽपि दुरितस्य निवृत्तिसंभवात् ।

वि— 'नाश्नाति द्व्यहमित्येतत् तपः कस्य, तयोर्द्वयोः । दुःखत्वाद्भोक्तृसंस्कारादध्वर्योर्युज्यते तपः ॥, फलान्तरायपापस्य नाशकत्वेन संस्कृतिः । लिङ्गात् ततः स्वामिगामि संस्कारान्तरवत् ततः ॥' वपनादि संस्कारान्तरम्, तद्वत् ।

भाट्ट-- सोमे 'द्व्यहं नाश्नाति, त्र्यहं नाश्नाति' इति श्रुतम् ! तत्रायमशनप्रतिषेधः अनृतवदनप्रतिषेधवदेव आराडुपकारको न फलिसंस्कारकः, आत्मनेपदाद्यभावात्, सत्त्वेऽपि वा स्वरितेत्त्वाद्यभावाच्च । अतश्च समाख्यानादध्वर्युकर्तृकत्वम् । वस्तुतस्तु अनृतवदनवदेव निषेध्याशनस्य अविहितत्वादभावस्य च अननुष्ठेयत्वान्न समाख्याविषयत्वम् । इति कर्तृमात्रविषयत्वे प्राप्ते, आराडुपकारकत्वपक्षे अशनस्य क्रतुवैगुण्यजनकत्वम्, तस्य च फलप्रतिबन्धकत्वं इत्यादि कल्पनापेक्षया लाघवेन अशनाभावस्य दुःखजनकतया क्लृप्तत्वात्, तद्दुःखस्य च स्वजनकीभूतपापनाशकत्वस्यापि क्लृप्ततया केवलं तत्पापस्य सोमफलप्रतिबन्धकत्वमात्रकल्पनया अशनाभावस्य यजमाननिष्ठफलप्रतिबन्धकाभावसंपादकत्वमेव 'यदाऽनशनस्तदा मेधार्हः' इति वाक्यशेषानुसारात् कल्पयितुमुचितम् । अतश्च तस्य लिङ्गादेव यजमानमात्रनिष्ठत्वम् । नहि अन्यसमवेतदुःखेन अन्यदीयं पापं नश्यति । न च ऋत्विग्गतपापस्य स्वामिगतफलप्रतिबन्धकत्वकल्पनम्, गौरवात् । अत एव यत्र 'ऋत्विज उपवसन्ति' इत्यादिवचनं तत्र **अनृतवदनन्यायेन** आराडुपकारकत्वकल्पनं व्यधिकरणस्यैव वा प्रतिबन्धकत्वादिकल्पनमिति द्रष्टव्यम् । अत एव न तत्र समाख्या नियामिका ।

मण्डन—'तपोऽपि दुःखं यजमानगामि ।' ४.

शंकर--'तपश्च याजमानं स्यात् ।' ५.

* '**तपोविशेषैर्विविधैर्व्रतैश्च** श्रुतिचोदितैः । वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥' (मस्मृ. २।१६५) इत्यादिना धर्मजातस्य संप्रदायार्थत्वस्मरणात् । सु. पृ. ५२.

* **तपःसिद्धस्य** यागफलं सिध्यति । कथमेतदवगम्यते, दुःखं हि तपः, दुःखं चाधर्मफलं अधर्मो यागफलस्य प्रतिबन्धको भवति । अश्रेयस्करो हि सः । तस्मिन् सति न श्रेयो भवितुमर्हति । तस्मात् सोऽपनेतव्यः । फलोपभोगेन क्षीणे अधर्मे अप्रतिबद्धो यागः फलं दास्यतीति । भा. ३।८।३।९.

* **तपस्विनामयनं** नाम सत्रम्, तत्र गवामयनधर्मातिदेशः । वि. ८।१।११.

⧗ **तप्तं तप्तेन संबध्यते** । सत्यपि संनिधाने आकाङ्क्षाऽभावादसंबन्धः । तथा **चाभाणकः** तप्तं तप्तेन संबध्यते इति (साकाङ्क्षं साकाङ्क्षेण संबध्यते) । भामती. ३।३।१४।२५ ब्रसू.

* '**तप्ते पयसि**' इति आमिक्षायां पयसो धर्मोऽतिदेष्टव्यः, नोभयधर्मः, नापि केवलदधिधर्मः । वि. ८।२।४, * 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र द्रव्यदेवतालक्षणरूपभेदात् कर्मभेदः चातुर्मास्यवैश्वदेवपर्वणि ।

२।२।९. ✱ तप्ते पयसि दध्यानयनं आमिक्षा प्रयोजयति, न वाजिनं चातुर्मास्येषु वैश्वदेवे। भा. ४।१।९।२२–२४.

⧗ **तप्तपरशुग्रहणन्यायः** । तप्तं परशुं अश्वत्थपत्रैः सप्तभिःसप्तभिः सहिताभ्यां हस्ताभ्यां उद्धृत्य सप्तपदानि गत्वा त्यजेत् । दाहस्फोटाद्यभावे शुद्धिः अन्यथा बन्धः इति व्यवहारे दिव्यविशेषः । तदिदं तप्तपरशुग्रहणं छान्दोग्योपनिषदि षष्ठाध्याये षोडशे खण्डे पठितम् । **के.**

⧗ **तप्तभ्राष्ट्रतिलन्यायः** । तद्यथा तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ताः मुहूर्तमपि नावतिष्ठन्ते, एवं प्रकृतान्तरेऽपि । अयं न्यायः ‘स्थानेऽन्तरतमः’ पा० १।१।५० इतिसूत्रमहाभाष्ये स्पष्टः । **साहस्री.** ५९८.

⧗ **तप्तमाषोद्धरणन्यायः** । दिव्यविशेषोऽयम् । तथाहि ‘सौवर्णं राजतं वाऽपि ताम्रं वा षोडशाङ्गुलम् । चतुरङ्गुलखातं तु मृन्मयं वाऽथ मण्डलम् ॥ (वर्तुलं पात्रम्) । पूरयेत् घृततैलाभ्यां विंशत्या तु पलैस्तु तत् । सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत् ततः ॥ अङ्गुष्ठाङ्गुलियोगेन उद्धरेत् तप्तमाषकम् । कराग्रं यो न धुनुयाद् विस्फोटो वा न जायते । शुद्धो भवति धर्मेण निर्विकल्पकराङ्गुलिः ॥’ उद्धरेत् इति पात्रादुत्क्षेपणमात्रम् । **मिताक्षरा.** २।११३.

✱ **तमः** द्रव्यं इति मीमांसकाः । **मणि.** पृ. २१.

⧗ **तमोदीपन्यायः** । तथाहि ‘अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः । स तु नूनं तमः पश्येद्दीपेनोत्तमतेजसा ॥’ इति वेदान्तसिद्धान्तमुक्तावली । **साहस्री.** ६६९.

⧗ **तमःप्रकाशन्यायः** । अयमुपमर्द्योपमर्दकभावे स्पष्टः । प्रकाशः तमसः उपमर्दकः । **साहस्री.** ४०१.

✱ **तमोवादः** न किल अन्धकारो नाम तत्त्वतोऽस्ति, तत्प्रत्ययो वा । तथाहि, तद् द्रव्यादीनामन्यतममेव भवेत् । तैरेव विश्वस्य संग्रहात् । तत्र द्रव्यत्वे तमः पृथिव्यादीनामन्यतममन्यद् वा ? न तावदन्यतमम् । क्षितिसलिलात्मसु चतुर्दशगुणेषु, तेजसि च एकादशगुणे, मातरिश्वनि च नवगुणे, मनसि च अष्टगुणे, नभसि च षड्गुणे दिक्कालयोश्च पञ्चगुणयोरविनाशिनोः अनन्तर्भावात् । अन्तर्भावे वा तावद्गुणत्वप्रसङ्गान्नित्यत्वापत्तेश्च । नापि द्रव्यान्तरम्, निर्गुणस्य तत्त्वानुपपत्तेः । नीलोत्पलपलाशश्यामलं उपलभ्यमानं महच्च तमो न निर्गुणम् । अतो द्रव्यान्तरमिति चेत् ? न । कृष्णरूपस्य गन्धाद्येकार्थसमवायिनः तद्व्याप्तस्य तदभावे अभावात् । तथा च निखिलगुणविरहिणो न द्रव्यत्वम् । गुणकर्मसामान्यभावोऽपि अनाश्रयस्य न संभवति । न च पृथिव्यादिद्रव्यमस्याश्रयः, तदाश्रयत्वे तद्गुणानां तत्सहचरितानां उपलब्धिप्रसङ्गात् । न चास्य तमसः उपलब्धिरुपपद्यते । उपलम्भकाभावात् । न चेन्द्रियाणामेतत्तमो लोचनं गोचरयति । तदभावे तदनुपलब्धिप्रसङ्गात् । अस्ति च निमीलितलोचनस्यापि ‘तमः पश्यामि’ इत्यभिमानः । घ्राणादीनां गोचरस्तमः इति स्थवीयः । मनोऽपि च आन्तरगोचरनियतं बहिरसति इन्द्रियलिङ्गादौ दवीय एव । न च कारणाभावे कार्यमुत्पत्तुमर्हति । तस्य आकस्मिकत्वेन कादाचित्कत्वानुपपत्तेः । तस्मान्न तमो नाम किंचिदस्ति वस्तु । नापि तज्ज्ञानम् । अथ च तमस्तमालनीलमुपलभामहे इत्यभिमानो लौकिकानां आलोकादर्शने । सोऽयं विप्लवः । एवमभावदर्शनं तद्व्यवहारश्च विप्लव एवेति भावः ।

प्रमीयते तावत्तमः तमालमालाश्यामम् । न चाप्रमितावेव प्रमितिविभ्रमसंभवः । न चास्य बाधकमस्ति प्रमाणम् । न च तदभावे प्रमीयमाणमपह्नवमर्हति, अतिप्रसङ्गात् । न च तमसि प्रमाणानुपलब्धेः प्रमा प्रथमा नाप्यपह्नोतुमुचिता, रूपाद्युपलब्धेरपि तत्प्रसङ्गात् । नहि तत्प्रमाणमिन्द्रियाद्युपलभ्यते । रूपाद्युपलब्धिलिङ्गकमनुमानं अस्योपलब्धिरिति चेत् ? न, इहापि समानत्वात् । ननु चक्षुरादिगोचरत्वमस्येत्युक्तम् । तर्हि वरमस्तु तमसि समस्तजनसाक्षात्कारास्पदे प्रमितिकार्यदर्शनात् प्रमाणान्तरमनुपलब्धपूर्वमपि, न पुनस्तस्य अन्यतोऽनुपलम्भात् स्पष्टदृष्टकार्यविपर्ययो युज्यते । अस्तु वा चक्षुरेवास्य कारणम् । न च निमीलिताक्षस्य पटलवतो वा तन्नास्ति, अपि तु पिहितम् । कथं तर्हि पिहितं घटादाविव बाह्ये तमसि प्रवर्तेत इति चेत् ? मा प्रवर्तिष्ट । किं नश्छिन्नम् ? परिच्छेत्स्यति हि तच्छायां पक्ष्मणोः पटलस्य वा अत्यासन्नामपि पिधातृणी पटलपक्ष्मणी पिदधतीं तामवेक्षते चक्षुः,

न तु पटलपक्ष्मणी। आलोकाप्यायितं तत् पृथिव्यादिग्रहे प्रभवति, न तु तच्छायायां तद्विरोधिन्यां केवलस्यैव तत्र सामर्थ्यात्। कार्यदर्शनोन्नेयत्वात्तस्य सूक्ष्ममपि चेषीकतूलादि चक्षुराच्छादकमासन्नं अनुभूयमानमतिमहत् अनवधि चकास्ति तथेयमपि। न च अन्धानामितरगात्रावयववत् गोलकाधिष्ठाने तत्कार्योपलम्भसंभवः। तद्भावे वा वरमुपलम्भकान्तरकल्पना इत्युक्तम्। कतमत्पुनर्द्रव्यादीनां तमः ? ननु द्रव्यमेव, कालिमगुणशालित्वात् स्पन्दवत्त्वाच्च। तथाहि, कालिमैव अस्य रूपमुपलभ्यते। अप्तेजसोरिव श्वेतिमा। एवं संख्या अपि एकत्वादिका परिमाणम्, तत् चतुर्विधम्। पृथिव्याद्यणूनामिव तमोऽणूनामप्यनुमानात्। पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराश्च पञ्चविधमपि कर्म अध्यक्षमीक्षते यथाह अत्रभगवान् वार्तिककारः। (कुमारिलाचार्यात् अन्ये) 'ननु नाभावमात्रस्य तमस्त्वं वृद्धसंमतम्। छायायाः कार्ष्ण्यमित्येवं पुराणे भूगुणश्रुतेः॥' भूगुणस्य कार्ष्ण्यस्य छायायां द्रव्यान्तरश्रुतेः इत्यर्थः। 'दूरासन्नप्रदीपादिदेहचेष्टाऽनुसारिणी। आसन्नदूरदीपादिमहदल्पचलाऽचला॥ देहानुवर्तिनी छाया न वस्तुत्वादिना भवेत्॥' इति। न च पृथिव्यादीनामन्यतमम्। न तावत् कृष्णरूपस्य तमसः तोयादिभावसंभवः। तोयतेजसोः सितत्वात्, एवं पवनादीनां चारूपत्वात्। न च परोपधानात् कालिन्दीसलिलस्येव तमसः कालिमेति साम्प्रतम्। अनुपहितस्य कदाचिदपि स्वाभाविकरूपान्तरशालिनोऽनुपलब्धेः, क्षेत्रसमुद्धृतस्येव कालिन्दीवारिणः स्वभावस्वच्छधवलस्य। नापि पार्थिवं तमः। तद्गुणानां गन्धादीनामभावात्। ननु तथैव गन्धादिव्याप्तं कृष्णमपि रूपं तन्निवृत्तौ असदित्युक्तम्। तत्किं पवने अनुष्णाशीतस्पर्शः असन्नेव ? गन्धादिव्याप्तस्य तस्य पृथिव्यामुपलब्धेः, पवने च तेषामभावात्, पाकजस्य स्पर्शस्य गन्धादिव्याप्तत्वम्। अयं तु अपाकजः स्पर्शो वायवीयः इति चेन्न, इहापि साम्यात्। नहि तमसोऽपि कालिमा पाकजः। प्रत्यक्षं चोभयत्रापि समानम्। तमःपरमाणवश्च पार्थिवादिपरमाणव इव द्व्यणुकादिक्रमेण महान्तं तमोऽवयविनं पार्थिवमिवारभन्ते। तच्च रूपविशेषे सति अनेकद्रव्यत्वात् महत्त्वाद्वा चाक्षुषमिति न तदुत्पत्त्यनवक्लृप्तिः। न च तस्य दिवारम्भसंभवः शाश्वतिकविरोधे सति तेजसि, न जातु स्पर्शवद्वेगवन्मुद्गरादिघाते परिपन्थिनि कुम्भारम्भाय भवन्ति मृदवयवाः बिभ्रति वा कुम्भमारब्धमिति। अत एव हि दिवाऽपि निरस्ततेजसि गिरिगुहायामारभन्ते एव।

स्यादेतत्। न तामसाः परमाणवोऽवयविनमारभन्ते, स्पर्शविरहादात्ममनोव्योमवत्। न च आरम्भे रूपवत्त्वं प्रयोजकम्, अरूपाणामपि पवनपरमाणूनां स्पर्शवद्द्रव्यारम्भदर्शनात् अस्पर्शानां च आत्ममनसां तदभावात्। तत् किमत्र भवतां तमःपरमाणवः सन्ति न वा ? सन्ति चेत् कथं तदवयविनामभावः ? तद्भावलक्षणत्वात् परमाणुभावस्य। असत्त्वे वा तमःपरमाणूनां कथं न हेतोराश्रयासिद्धिः ? हेतोरस्पर्शस्य असद्रूपत्वात्। असदाश्रयत्वमदोष इति चेन्न। तुच्छस्य अहेतुत्वात् कल्पनाऽऽरोपिततद्भावस्य च वस्तुनः असाधकत्वात्। न जातु समारोपितधूमभावा मिहिका कृशानुसाधनं भवति। प्रामाणिकस्य तु अभावस्य भावाधिकरणमन्तरेण अयोगात्। तमःपरमाणुषु असत्सु आश्रयासिद्धतया भवत्यसिद्धिः, न तु स्वतः अप्रसिद्धस्य सत्यामपि परप्रसिद्धौ साधनाङ्गत्वम्, स्वयमप्रतीतस्य परप्रत्यायनानर्हत्वात्। यथोक्तम् 'योऽपि तावत्पराऽसिद्धः स्वयंसिद्धोऽभिधीयते। भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया॥' इति। अपि च अस्पर्शस्य द्रव्यानारम्भकत्वेन न स्वाभाविकः संबन्धो मनसः शक्यो निश्चेतुम्, दैर्घ्यस्य उपाधेर्विद्यमानत्वात्, धर्माधर्मनिमित्तत्वाद्विश्वकार्यनिर्माणस्य। साक्षात् पारंपर्येण च सर्वं कार्यजातं भोगसाधनं सत् तन्निर्माणं स्यात्। न च मनोऽवयविनः शरीरतया विषयतया वा भोगसाधनता संभवति। इन्द्रियानधिष्ठानतया देहभावाऽभावात् अपार्थिवस्य च तद्भावानभ्युपगमात्। विषयभावस्तु अननुभूयमानतया अनुपपन्नः। इन्द्रियभावस्तु अणुत एव मनसः। तमसस्तु रूपवतो विषयभावेन भवति भोगसाधनत्वमिति न वैयर्थ्यम्। परममहतां पुनः असमवायिकारणसंयोगविरहात् अधिकपरिमाणकार्यद्रव्यानुपपत्तेश्च कारणसमानन्यूनपरिमाणकार्यादर्शनाच्च आधिक्या-

योगाच्च परममहत्त्वव्याघाताच्च न स्वसमवायिद्रव्यारम्भकत्वमिति सोऽयमुपाधिः । न चौपाधिकः संबन्धः अनुमानाङ्गम् । मा भूद् उपाध्यायदर्शनाद् असकृदवगतसहभावस्य अनुमानं शिष्यस्य । न च अनन्यथासिद्धे नीलान्धकारानुभवे परिपन्थिनि स्फुरति प्रत्यक्षे, बाधितविषयं अनुमानमुदेतुमुत्सहते । मा भूत् अनुष्णत्वं तेजसो द्रव्यत्वात् पृथिव्यादिवत् इत्यनुमानम् । द्रव्यान्तरस्य च द्रव्यान्तराश्रयत्वं दृष्टम्, तद्यथा आकरजस्य तेजसः सुवर्णादेः पार्थिवद्रव्योपष्टम्भः, अन्यथापतनादि न भवेत् गुरुत्वाभावात् । यथा च अभिजातमहानीलादिमणिसमाश्रयं तेजः । न च तद्वदेतत् भ्रमणतस्तेज इति सांप्रतम् । तेजसस्तदाश्रयस्यान्ततः खद्योतादिगतस्यापि कयाचिन्मात्रया रूपप्रकाशनव्याप्तत्वात्, तमसश्च तद्वैपरीत्यात् । तस्मात्तमो द्रव्यान्तरमपि पृथिव्याद्यनुविधास्यति, तेजसश्च विनङ्क्ष्यति । तदपगमे च पृथिव्यादिभ्यः पुनः प्रभविष्यति चतुष्कात् । अपवरकप्रविष्टस्य कतिपयालोकावयवसंभेदविरलेऽपि तमसि सान्द्रताऽवगमो भ्रमः, इन्द्रियोपहतेः कालपरिवासवशात् । उपहतिविगमे तु यथावत् पश्यति अपवरकवर्तिनः पदार्थान्, अल्पां च तत्र छायाम् । सा च सान्द्रा पिधत्ते पदार्थान्, न तेजसा विरलीकृता । न चालोकाभावमात्रं तम इति साम्प्रतम्, तस्य नीलत्वानुपपत्तेः अस्मृतानवलोकितालोकस्य च तमःप्रत्ययानुपपत्तिप्रसङ्गात् । तथा च परिस्पन्दादयस्तद्वर्तिनः अवगम्यमानाः कथंचित् क्लेशेन न व्याख्यामर्हन्ति । तस्मात् प्रत्यक्षसिद्धं असति बाधके द्रव्यान्तरमेकादशं तमो नवगुणं चेति सिद्धम् । '**नादृष्टौ दर्शनं छाया न चाभावोऽस्मृतौ गतेः । रूपादुपायसद्भावाद् द्रव्यं द्रव्यान्तरानुगम् ॥**' इति संग्रहश्लोकः । अलं वा नैयायिकैर्विवादेन । आलोकाभाव एव तमः । **कणिका. पृ. ७३–७९.**

⧗ **तरक्षडाकिनीन्यायः** । तरक्षः भाषायां 'तरस' इति व्याघ्रविशेषे डाकिनीवाहने प्रसिद्धः । तरक्षे डाकिनी तरक्षडाकिनी । डाकिनी तु श्रीमहाकालीगणविशेषः । यथा तरक्षस्था डाकिनी भयङ्कररूपिणी नानाविधभयंकरकार्याणि करोतीति प्रसिद्धम्, तथा प्रकृतेऽपि बोध्यमिति । **साहस्री. ७८९.**

⧗ **तरतमभावापन्नं फलं तरतमभावापन्नसाधनायत्तमिति न्यायः** । यथा विचारपाटवेन यावद्यावत् विवेकदार्ढ्यं भवति तावत्तावत् भ्रमशैथिल्यं जायते इति भावः । **साहस्री. ३८६.**

✻ **तरसमयाः** सवनीयपुरोडाशा एव, न तु सर्वे पुरोडाशाः शाक्यानामयने । **भा. ३।८।२२।४२–४४.**

⧗ **तरुबीजन्यायः** । तरोर्बीजं बीजाच्च अन्यस्तरुः इति जन्यजनकभावः सदातनः प्रसिद्धः, तद्वदन्यदपि । **के.**

✻ **तर्कः** क्वचित् व्याप्तिग्रहे व्यभिचारशङ्कानिवर्तकः । व्याप्यारोपेण व्यापकारोपद्वारा अनिष्टप्रसञ्जनं तर्कः । तथाहि, वह्निविरहेऽपि धूमः स्यात् इत्याशङ्का कार्यकारणभावप्रतिसंधानान्निवर्तते । तत्रापि 'अहेतुको भवतु' इत्याशङ्का तु 'धूमार्थं वह्नेर्नियमत उपादाने प्रवृत्तिर्न स्यात्' इति व्याघातेन निरसनीया । यत्र स्वत एव शङ्का नावतरति, न तत्र तर्कापेक्षा इति दिक् । **मणि. पृ. ३४.** ✻ **तर्कः** । विधिवाक्यवैयर्थ्यरूपो बाधकस्तर्कः क्वचित् । 'व्रीहीनवहन्ति' 'तण्डुलान् पिनष्टि' अत्र अवघातपेषणे अपूर्वजनके, विहितधात्वर्थत्वात् यजत्यादिधात्वर्थवत् । अत्रानुमाने तुषविमोकचूर्णत्वयोर्दृष्टप्रयोजनयोः लोकसिद्धत्वेन तादर्थ्ये अवघातपेषणयोर्विधिर्व्यर्थः स्यात् इति विपक्षे तर्कः । पूर्वपक्षोऽयम् । **वि. २।१।३.**

⧗ **तर्काप्रतिष्ठानात् इति न्यायः** । 'नाप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः' इति न्यायार्थः । यथा हि पुराणेषु पञ्चाशत्कोटियोजनं भूगोलपरिमाणं इत्यादि यदुक्तम्, तत् प्रकृतन्यायेन समाधेयं इति संभवासंभवमीमांसायां बोध्यमिति । (तर्काप्रदिष्ठानात् इति तु २।१।११ ब्रह्मसूत्रांशः इति बोध्यम्) । इदं च भीष्मपर्वणि ५।१२ टीकायाम् । **साहस्री. ७५५.**

✻ **तर्कपादः** नाम प्रथमाध्यायस्य प्रथमः पादः पूर्वमीमांसायाम् । उत्तरमीमांसायां तु द्वितीयाध्यायस्य द्वितीयः पादः । **के.** ✻ **तर्कपादे** विध्यर्थवादमन्त्रनामधेयात्मकवेदस्य सामान्यतः प्रामाण्यम्, विशिष्य च विधिभागस्य प्रामाण्यं वर्णितम् । **कु. १।२।१।१.**

* **तलवकारादिशाखाभेदाः** सामवेदे । तेषु गीतिहेतवः अक्षरविकारादयो विलक्षणाः । ते चानुष्ठाने विकल्प्यन्ते , न तु समुच्चीयन्ते । **वि.** ९।२।७.

* **तवै**प्रत्ययः कृत्यार्थः विधिः । यथा ‘ अन्वेतवै ’ अन्वेतव्यं इत्यर्थः । **बाल.** पृ. ४०.

* **तव्यः प्रत्ययः** शब्दभावनावाचकः तव्यत्वेन । **वि.** २।१।१ वर्णकं २. * तव्यः विधात्री श्रुतिः । **वा.** ३।१।७।१३ पृ. ७००.

* **तव्यान्** भोज्यान् पदार्थान् । इति सोमेश्वरः । ‘ पृणीयादिन्नाधमानाय तव्यान् ’ । **बाल.** पृ. ५८.

⧗ **तस्करस्य पुरस्तात्कक्षे स्वर्णमुपेत्य सर्वाङ्गोद्घाटनं प्रतिभातीति न्यायः ।** स्पष्टः । अयं स० द० सं० जैमिनीये विस्तृतः । **साहस्री.** ७२२.

* **ताण्डके** सर्वशाखागतज्योतिष्टोमानुवादेन प्राथम्यविधानात् नहि तत्रापरस्यापि ज्योतिष्टोमस्योत्पत्तिरस्ति यस्य नियमः स्यात् । **वा.** २।४।२।२५.

* **तात्पर्यं च** शब्दगत एव धर्मविशेषः । तद्ग्राहकश्च अध्ययनविध्यादिरेव । **भाट्ट.** १।१।७. * तात्पर्यं तु तत्प्रतीतीच्छया वक्त्रा अनुसंहितत्वम् । तत्र पदार्थतात्पर्यनिश्चयः संसर्गतात्पर्यनिश्चयश्च तादृशशाब्दबोधे हेतुः तत्संदेहे शाब्दबोधानुदयात्, तात्पर्यभ्रमे च आहार्यशाब्दबोधोदयात् । शुकवाक्ये वेदवाक्ये च ईश्वरतात्पर्यग्रहेण शाब्दबोधः अध्यापकतात्पर्यग्रहेण वा । **न च** प्रकरणादिकमेव तत्तच्छाब्दबोधे हेतुः, न तु तात्पर्यज्ञानं इति वाच्यम् । अननुगतप्रकरणादिज्ञानानां हेतुत्वे गौरवात् । **केचित्तु** तात्पर्यज्ञानं लाक्षणिकनानार्थस्थलीयशाब्दे हेतुः, न तु शाब्दबोधमात्रे गौरवात् । एवं च सैन्धवपदजन्यनानार्थोपस्थितिकालीनतत्पदजन्यलवणादिशाब्दबोधे तात्पर्यज्ञानं कारणम् । न चैवं गौरवम्, सर्वशाब्दे तत्तच्छाब्दत्वावच्छिन्ने तत्तत्तात्पर्यज्ञानानां अनन्तकार्यकारणभावापेक्षया लघुत्वात् इत्याहुः । **परे** तु तात्पर्यज्ञानस्य न हेतुत्वं संभवति तज्ज्ञानासंभवात् । आवश्यकप्रकरणसमभिव्याहारादिना तज्ज्ञानसंभवे ‘ तद्धेतोः ’ इतिन्यायेन (तद्धेतोरेव अस्तु हेतुत्वम्, मध्ये किं तेन) तस्य वैयर्थ्यात् । अतो वेदवाक्यार्थबोधे लौकिक–लाक्षणिक–नानार्थस्थलीयशाब्दबोधे च न तात्पर्यज्ञानं हेतुः इत्याहुः । **मणि.** पृ. ६९. * **तात्पर्येणा**भिधानं नाम प्राधान्येनाभिधानम्, न शेषित्वेन । **वा.** ३।४।४।१२ पृ. ९०३. * **तात्पर्यात्** लक्षणासिद्धिः । **शा.** १।२।१ पृ. ६. * तात्पर्याद्धि वृत्तिः, न वृत्तेस्तात्पर्यम् । गौणत्वाविशेषेऽपि (वारुण्या निष्कासेन तुषैश्चावभृथं चरन्ति इत्यत्र अवभृथपदे) तात्पर्यात्० इति कर्मान्ते गौणत्वं संभवति । **सोम.** ७।३।४. * **तात्पर्यावधारणं** विना लाक्षणिकशब्दप्रवृत्त्ययोगः । **सु.** पृ. ७३७. * **तात्पर्याख्यशब्दव्यापारस्य** सर्वत्र भावात् । **सु.** पृ. १४४५.

⧗ **तात्स्थ्यात् ताच्छब्द्यं इति न्यायः ।** अयं ‘पुंयोगादाख्यायाम्’ (पा० ४।१।४८) इतिसूत्रमहाभाष्ये अभिहितः । तद्यथा ‘मञ्चा हसन्ति , गिरिर्दह्यते ’ इति । (तस्मिन् तिष्ठति तत्स्थः, तस्य भावः तात्स्थ्यम् । सः शब्दः यस्य बोधकः सः तच्छब्दः, तस्य भावः ताच्छब्द्यम् । मञ्चस्थाः पुरुषाः मञ्चशब्देन बोध्यन्ते । गिरिशब्देन गिरिस्था वृक्षा बोध्यन्ते) । **साहस्री.** ४८४.

* **तादर्थ्यं** किंचित् कुर्वतः, नान्यथा । (तस्मै इति तदर्थः, तस्य भावः तादर्थ्यम् । यः यस्य किंचिदुपकरोति , स तदर्थः इति वक्तुं शक्यते इति ।) । **ऋजु.** पृ. २११. * तादर्थ्यं तदधीनविधिविषयत्वम् । **सु.** पृ. १३७९. * **तादर्थ्ये** चतुर्थी ‘धनलाभाय राजसेवा’ ‘ऊर्जोऽवरुध्यै’ इत्यादौ । तया च फलं गम्यते । (ऊर्जः गवादिरसस्य पयआदेः अवरुद्ध्यै प्राप्त्यै उदुम्बर उपयुज्यते इत्यर्थः) । **वि.** १।२।२. * तादर्थ्ये सति, यथा संभवति तथा कार्यं कल्पनीयम् । **बृहती.** पृ. २१३.

* **तादर्थ्योपकारयो**र्भेदोऽपि अस्ति ? बाढमस्ति । ‘ अपकुर्वन्नपीष्टो हि तादर्थ्यव्यपदेशभाक् । उपकुर्वन्नपि त्वन्यस्तदर्थ इति नोच्यते ।। ’ उद्देशमात्रेण तावत् तादर्थ्यसिद्धिः । सा चोपकारापकारयोस्तुल्या तद्यथा मशकार्थो धूमः इत्यपकारिण्यपि प्रयुज्यते । तथोपकुर्वन्नपि प्रसङ्गि–अप्रयोजकयोर्न तादर्थ्येन व्यपदिश्यते । नहि कश्चिदपि शालिकुल्यास्थमुदकं पिबन् मदर्थमेताः प्रणीता इत्यध्यवस्यति । तस्मादन्यत् तादर्थ्यं अन्यश्चोपकार इति

विज्ञायते । वा. ३।१।२।२ पृ. ६५७–५८, * **तादर्थ्यप्रतिपादनरूपेण** शेषस्य विनियोजकानि श्रुत्यादीन्येव इति तद्विवेकार्थं लक्षणमारब्धव्यम् । ३।१।२।२ पृ. ६५८.

⌛ **ताद्धर्म्यात्ताच्छब्द्यमिति न्यायः** । तद्यथा– जटिनं यान्तं ब्रह्मदत्त इत्याह । ब्रह्मदत्ते यानि कार्याणि, जटिन्यपि तानि क्रियन्ते अतो जटी ब्रह्मदत्तः इत्युच्यते इति । **साहस्री. ४८५.**

* **तानः** एकश्रुतिः प्रचयः इति पर्यायाः । उदात्तादिभ्यो भिन्न एवायं स्वरः । **वि.** ९।२।८ वर्णकं ३. * **तानस्वरेण** ऋग्यजुर्मन्त्राणां यज्ञकर्मणि प्रयोगः । तानः एकश्रुतिः । भा. ९।२।८।२९–३० वर्णकं ३.

* **तामरसशब्दस्य** अनार्येषु कश्चिदर्थः प्रसिद्धः । म्लेच्छेषु तु 'पद्मं' इत्यर्थः प्रसिद्धः, स ग्राह्यः । आर्यप्रसिद्धिविरोधस्य अदृष्टत्वेन ईदृशे विषये म्लेच्छप्रसिद्धेरपि आदरणीयत्वात् । **वि.** १।३।६.

* **ताम्बूलादनम्** । सर्ववर्णपरस्परस्पृष्टताम्बूलादनं उदीच्यानां दाक्षिणात्यानां च अनाचारः । **वा.** १।३।३।७ पृ. २०४.

* **तार्किकाः** ज्ञानस्य प्रामाण्यमप्रामाण्यं च परतः ज्ञायते इति वदन्ति । **वैद्यनाथः** १।१।२।२ पृ. १४.

* **तार्तीयसवनिकपुरोडाशेषु** पशोर्भेदेन हविष्कृदाह्वानाभावः (ज्योतिष्टोमे) । भा. १२।२।४।१२–१३.

* **तार्प्यं वासः** घृताक्तः कम्बलः । तन्महाव्रते यजमानः परिधत्ते, अहतं च वासो द्वितीयं परिधत्ते । **वि.** १०।४।८। घृताक्तं वासः तार्प्यं इति । **सोम.** १०।४।७. * **तार्प्यादिभिः** उपदिष्टैः सह महाव्रते प्राकृताहतवाससः समुच्चयः । भा. १०।४।७।१३–१५.

⌛ **तालसर्पन्यायः** । यथा अवरोहणसमये ऊर्ध्वमुखैस्तालग्रन्थिभिः सर्पोदरविदारणात्तालारोहणं सर्पस्य स्वनाशायेति प्रसिद्धमिति तथा प्रकृतेऽपि । **साहस्री. ३१३.**

* **तिङ्** । सुप्तिङ्भ्यां शक्तिमद्द्रव्यकारकपक्षेऽपि अवश्यं निष्कृष्य शक्तिमात्रं अभिधेयमेष्टव्यम् । **वा.** ३।४।४।१३ पृ. ९३४. * **तिङन्त** एव एकपदरूपा विनियोक्त्री श्रुतिः, उपश्लेषलक्षणा नाम । बाल. पृ. ४१. * **तिङन्तेन** क्रिया उच्यते । भा. २।२।५।१४. * **तिङ्निपातोभयाभिहितकर्तृत्वकर्मत्वयोः** प्रथमा । रहस्य. पृ. ६४–६६. * **तिङ्प्रत्ययावृत्तिलक्षणो** वाक्यभेदः । बाल. पृ. १८१.

* **तिथिर्नाम** (चन्द्रस्य एकैककलावर्धनावच्छेदकः कालः । चन्द्रस्य द्वादशांशभोगपर्याप्तः कालो वा । के.) । 'अमा षोडश' (मीको. भागः १ पृ. ५९१) इत्यत्र द्रष्टव्यम् । भाट्ट. ५।४।७.

* **तिमिरं नाम** नेत्ररोगविशेषः, येन एकः सन्नपि चन्द्रादिः अनेको दृश्यते । भाषायां असौ रोगः 'मोतिबिन्दु' इति उच्यते । **के.**

* **तिर्यञ्चोऽपि** कामयन्ते सुखम् । एवं हि दृश्यते, घर्मोपतप्ताः छायामुपसर्पन्ति, शीतेन पीडिता आतपम् । **भा.** ६।१।२।४–५, * तिर्यञ्चः आसन्नं फलं चेतयन्ते न कालान्तरफलं प्रार्थयन्ते । ६।१।२।४, * **तिरश्चां** वैदिके कर्मणि नाधिकारः । ६।१।२।४–५ । असमर्थत्वात् अविद्यत्वात् अद्रव्यत्वाच्च । **भाट्ट.** * तिरश्चां श्रुतार्थापत्तिः कदाचिदपि नास्ति शब्दव्युत्पत्तिनिबन्धनत्वात् तस्याः । ऋजु. पृ. ८९.

⌛ **तिर्यगधिकरणम्** । अधिकारो नास्ति तिरश्चां देवानामृषीणां वनस्पतीनां च कर्मसु ॥

फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात् । ६।१।२।४ ॥

भाष्यम्— इदमामनन्ति 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्येवमादि । तत्र संदेहः किं यावत् किंचित् सत्त्वं तत् सर्वमधिकृत्य एतदुच्यते, उत समर्थमधिकृत्येति । किं प्राप्तम् ? सर्वाधिकारः अविशेषात् । ननु वृक्षादयो न किंचित् कामयन्ते कथं तेषामधिकारः स्यात् । उच्यते । मा भूदचेतनानाम् । तिरश्चस्तु अधिकृत्य यजेत इति ब्रूयात् । ननु तिर्यञ्चोऽपि न किंचित् कामयन्ते । नेति ब्रूमः । कामयन्ते सुखम् । एवं हि दृश्यते घर्मोपतप्ताः छायामुपसर्पन्ति, शीतेन पीडिता आतपम् । आह, ननु तिर्यञ्चः आसन्नं फलं चेतयन्ते, न कालान्तरफलं प्रार्थयन्ते । कालान्तरफलानि च वैदिकानि कर्माणि । उच्यते ।

कालान्तरेऽपि फलं कामयमाना लक्ष्यन्ते । शुनः चतुर्दश्यामुपवसतः पश्यामः । श्येनांश्च अष्टम्याम् । न चैषां व्याध्याशङ्का, नियतनिमित्तत्वात् । नानाऽऽहाराणामपि तस्मिन् काले दर्शनात् । समानाहाराणामपि अन्यस्मिन् काले अदर्शनात् । लिङ्गानि च वेदे भवन्ति ‘ देवा वै सत्रमासत ’ इत्येवमादीनि देवतानां ऋषीणां वनस्पतीनां अधिकारं दर्शयन्ति । ननु कात्स्न्र्येन विधिमुपसंहर्तुं न शक्नुवन्ति इत्यनधिकृताः । उच्यते । यागं कर्तुं शक्नुवन्ति केचित् । तस्मात् यजेत इत्येवमादीनि अधिकरिष्यन्ति शक्नुवतः । विष्णुक्रमादिवचनानि तु अशक्तान् नाधिकरिष्यन्ति । तत्र यः अनुपदिष्टविष्णुक्रमादिकः स केवलं यागं करिष्यति, कस्तस्य दोषः । द्रव्यपरिग्रहोऽपि देवग्रामः, हस्तिग्रामः, ऋषभस्य ग्रामः इत्युपचारात् अस्त्येवेति । तस्मात् अमनुष्याणामपि शक्नुवतां अधिकार इति ।

कर्तुर्वा श्रुतिसंयोगाद् विधिः कात्स्न्र्येन गम्यते । ५ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । न चैतदस्ति तिर्यगादीनामपि अधिकार इति । कस्य तर्हि ? यः समर्थः कृत्स्नं कर्म अभिनिर्वर्तयितुम् । न चैते शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्तयितुम् । तस्मात् एषां न सुखस्याभ्युपायः कर्म इति । कथं यो न शक्यते कर्तुम्, सः अभ्युपायः स्यादिति ।

न देवानां देवतान्तराभावात् । नहि आत्मानमुद्दिश्य त्यागः संभवति । त्याग एवासौ न स्यात् ।

न ऋषीणां आर्षेयाभावात् । न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति । न चैषां सामर्थ्यं प्रत्यक्षम् ।

टुप्— द्रव्यपरित्यागाद्यभावात् असामर्थ्यात् देवादीनामनधिकारः । मनुष्येषु वाचनविष्णुक्रमणाज्यावेक्षणेषु असमर्थो नाधिक्रियते । कुतः ? इतिकर्तव्यतांशे वाचनादीनां गृह्यमाणत्वात् क्रत्वर्थता । तैर्विना फलमेव नास्ति । **न च भृग्वादयो भृग्वादिसगोत्राः** इति अयुक्तम् । अनादिर्हि कालः अस्माकम् । **न देवानां देवतान्तराभावात्** इति, येषां शब्द एव देवता तेषामपि अयुक्तो ग्रन्थः । (शक्यते हि इन्द्रेणापि इन्द्रशब्दोच्चारणेन हविस्त्यक्तुम् । तस्मादर्थमेव देवतामभिप्रेत्य एतत् भाष्यमिति) ।

भाष्यम्––अपिच तिर्यञ्चो न कालान्तरफलेनार्थिनः (जन्मान्तरीयफलेन इत्यर्थः) आसन्नं हि ते कामयन्ते । ननु च उक्तं कालान्तरफलार्थिनः तिरश्चः पश्यामः शुनः श्येनान् चतुर्दश्यामष्टम्यां चोपवसत इति । उच्यते । न जन्मान्तरफलार्थिनः उपवसन्ति । कथमवगम्यते ? वेदाध्ययनाभावात् । ये वेदमधीयते ते एतद्विदुः इदं कर्म कृत्वा इदं फलममुत्र प्राप्नोतीति । न चैते वेदमधीयते । नापि स्मृतिशास्त्राणि । नापि अन्येभ्योऽवगच्छन्ति । तस्मान्न विदन्ति धर्मम् । अविद्वांसः कथमनुतिष्ठेयुः । तस्मान्न धर्मायोपवसन्ति इति । किमर्थं तर्हि एषामुपवासः ? उच्यते । रोगादरुचिरेषाम् । कथं पुनर्नियते काले रोगो भवति ? उच्यते । नियतकाला अपि रोगा भवन्ति यथा तृतीयकाश्चातुर्थकाश्चेति । तस्मात् मनुष्याणामधिकारः इति । न च तिरश्चां द्रव्यपरिग्रहः । नहि एते द्रव्यं स्वेच्छया उपयुञ्जाना दृश्यन्ते । तस्मात् अनीशानाः धनस्य । यत्तु देवग्रामो हस्तिग्राम इति, उपचारमात्रं तत् । तस्मादपि न तिरश्चामधिकार इति । यानि पुनः लिङ्गानि ‘ देवा वै सत्रमासत ’ इत्येवमादीनि, अर्थवादास्ते विधिप्ररोचनार्थाः । विद्यते हि विधिरन्यस्तेषु सर्वेषु । न च विधेः विधिना एकवाक्यभावो भवति वचनव्यक्तिभेदात् । स्तुतिस्तु सा । इत्थं नाम सत्राण्यासितव्यानि, यत् कृतकृत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः । किमङ्ग पुनर्विद्वांसो मनुष्या इति । ननु विष्णुक्रमादिषु अनधिकृताः केवलं यागं करिष्यन्ति, नैवम् । गुणा यागं प्रति उपदिश्यन्ते, न कर्तारं प्रति । तेन यागमात्रे क्रियमाणे वैगुण्यं इति न फलसंबन्धः स्यात् । कथं पुनः यागं प्रति उपदिश्यते इति चेत्, इतिकर्तव्यताकाङ्क्षस्य यागवचनस्य अन्तिकात् उपनिपतिताः शक्नुवन्ति तं निराकाङ्क्षीकर्तुम् । इतरथा हि कर्तॄन् अधिकुर्वत्सु गुणवचनेषु अनिवृत्ताकाङ्क्षं फलवचनं अनर्थकमेव स्यात् । अनुषङ्गतश्च फलवचनमभविष्यत् । तत्र साकाङ्क्षत्वात् वाक्यमुपरोत्स्यते । अथ एतदेव वाक्यं समर्थानां सगुणं कर्म विधास्यति

असमर्थानां विगुणं इति, तन्न। सकृदुच्चारणे उभयशक्तिविरोधात् वाक्यं भिद्येत। साकाङ्क्षं हि तत् इतिकर्तव्यतां प्रति । तस्मात् साङ्गयागोपदेशः स इति निरङ्गयागोपदेशाभावः । तस्मात् मनुष्याणामेवाधिकारः इति । प्रयोजनं पक्षोक्तं केचिदाहुः। सहस्रसंवत्सरं कर्म न नियोगतो दिवसेषु कल्पयितव्यं इति पूर्वपक्षे तदायुषां देवतादीनां संभवात् इति, सिद्धान्ते तदसंभवात् इति दिवसेष्वेव कल्पयितव्यं इति । तत्तु उपरिष्टात् व्याख्यास्यामः (६।७।१३) ।

शा— 'तत्र प्रधानवाक्येन सर्वेषामधिकारधीः । जायते, तद्वशेनाङ्गवाक्यानामुपवर्णनम् ॥' अत्रोच्यते '**नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना। यतोऽसमर्थस्तच्छून्यं कर्म कृत्वाऽधिकारभाक् ॥ क्रतुं प्रति विधिस्तेषां तादृशं तं च शक्नुवन् । कृत्वा फलमवाप्नोति ततोऽन्यस्यानधिक्रिया ॥**' अतः समर्थानामेवाधिकारः ।

सोम— अन्धपङ्ग्वादिविचारवत् देवतातिर्यगधिकारविचारः तत्प्रवृत्तिसफलकत्वाभावात् अनुष्ठानविशेषफलकत्वरहितोऽपि न्यायसाम्यमात्रात् सह प्रवर्तितः इति ध्येयम् ।

वि-- 'अन्धादेरस्त्यसौ नो वा, स्वर्गेच्छुत्वात् स विद्यते । प्रधानोक्त्यनुसारेण यथाशक्त्यङ्गवर्णनम् ॥, नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना । क्रतुं प्रति विधिस्तस्मान्नाशक्तस्याधिकारिता ॥'

भाट्ट— सिद्धे अधिकारे स केषामिति चिन्त्यते । तत्र स्वर्गकामत्वाविशेषात् चेतनमात्रस्याधिकारः । न च तिरश्चां स्वर्गादिकामनाऽसंभवः, परकीयेच्छायाः अप्रत्यक्षत्वेन तदभावनिश्चयानुपपत्तेः। श्येनादीनां अष्टम्युपवासादिदर्शनेन तदनुमानाच्च । न च साङ्गकरणासामर्थ्यात् अनधिकारः, शक्यमात्रस्यैव करणोपपत्तेः । इति प्राप्ते, भावनाया अंशत्रयान्वयोत्तरं पश्चात् विधिबलेन अधिकारिकल्पनात् पूर्वावगतसाङ्गप्रधानानुष्ठानसमर्थ एवाधिकारी । अतश्च असमर्थत्वात् अविद्यत्वात् अद्रव्यत्वात् न तिरश्चामधिकारः । विष्णुक्रमणाद्यसमर्थत्वाच्च न पङ्ग्वन्धबधिरमूकादीनाम्। देवादीनां तु विग्रहाद्यभावादेव नाधिकारः । ऋष्यादीनां तु अनादित्वात् संसारस्य प्रवरवरणादौ ऋष्यन्तरस्यापि संभवात् अधिकारोऽस्त्येवेति भाष्योक्तं अनधिकारप्रतिपादनं अनादरणीयम् ।

मण्डन— 'मनुष्योऽत्राधिकारभाक् ।'

शंकर-- 'तिर्यगादेर्नाधिकारः ।'

* **तिर्यगधिकरणे** अङ्गानुसारेण प्रधानवाक्यसंकोचः आश्रितः । **कु.** ३।४।१३।३२. * तिर्यगधिकरणे गन्धर्वादीनां अधिकारो निराकृतोऽपि सहस्रसंवत्सरे सत्रे श्रुतिबलात् स्वीकार्यः इति पूर्वपक्षः । **भाट्ट.** ६।७।१२. * तिर्यगधिकरणे देवानां अनधिकारसाधनम् । **संकर्ष.** ४।३।७. * तिर्यगधिकरणे प्रधानवाक्यजनिताविशेषप्रत्ययबाधेन सर्वाङ्गोपसंहारसमर्थस्याधिकारः उक्तः । **सोम.** ६।३।२. * तिर्यगधिकरणे यथानुष्ठेयवर्गमधिकारः स्थास्यति । **रत्न.** ६।१।१।१. * नित्यनैमित्तिकानां कर्मणां काम्यवत् सर्वाङ्गोपसंहारेणैव प्रयोगः । एकादशे सर्वेषामङ्गानां साहित्येन क्रतूपकारजनकत्वस्य स्थापयिष्यमाणत्वात् **तिर्यगधिकरणे** यथाविनियोगं अधिकारकल्पनस्य स्थितत्वाच्च । **भाट्ट.** ६।३।१. * सूत्रकारस्य देवताविग्रहादिकमभिमतं वार्तिकाभिमतं चेति षष्ठे तिर्यगधिकरणे प्रपञ्चयिष्यते । **कु.** १।२।४।४३.

* **तिर्यगादिप्रतीतिषु** शब्दशून्यासु इन्द्रियस्य अर्थे एव सामर्थ्यमवधृतम् । **ऋजु.** पृ. ८९.

* '**तिरश्चीनो** विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ॥' ऋसं. १०।१२९।५ पूर्वार्धः। इति एषां कवयो मनीषा इति पूर्वस्यामृचि निर्दिष्टानां कवीनां रश्मिः तिरश्चीनो विततः । किं अधः आसीत्, उत उपरि इति स्विच्छब्दयोगात् प्लुत्या च संशयः । **सु.** पृ. ६७३.

⧗ **तिलतण्डुलन्यायः** । यथा तिलतण्डुलमानयेत्युक्ते असंसृष्टानि तिलानि तण्डुलानि चानीतानि भवन्ति, संसृष्टान्यपि तिलतण्डुलानि वा आनीतानि भवन्ति, तथा प्रकृतेऽपीति । **साहस्री.** १२६.

* **तिष्ठन्** याज्यामन्वाह अत्र स्थानगुणविधिः । **वि.** १०।४।२२.

* **'तिस्रः आहुतीर्जुहोति'** इत्यादौ संख्यया कर्मभेदः । संख्याऽधिकरणम् । भा. २।२।७।२१. * 'तिस्र एव साह्नस्योपसदः द्वादशाहीनस्य' इति वाक्ये त्रित्वमेव सर्वदोषरहितत्वात् विधीयते, द्वादशत्वं तु अहीनसंबन्धिवाक्यान्तरादेव प्राप्तं औचित्यरूपेण अस्य स्तुत्यर्थं निवीतादिवत् अनूद्यते । वा. ३।३।८।१६. * **तिसृषु** प्रत्येकं गीयमानं साम समास्वेव गेयम् । भाट्ट. ९।२।४. * **तिसृधन्वदानं** चयनस्यैवाङ्गं न क्रतोः । संकर्ष. १।१।६.

* **'तीर्थे स्नाति'** इति तीर्थविशेषणं सुखावतरत्वात् दुःखावतरह्रदादि व्यावर्तयति । वा. ३।४।५।१४. * 'तीर्थे स्नाति' इति धर्मः क्रत्वर्थः ज्योतिष्टोमे । भा. ३।४।५।१४–१५. * **तीर्थशब्दवत्**–– तद्यथा तीर्थशब्दः तीर्थमात्रवचनः सन् तीर्थविशेषं धर्मसाधनं कदाचित् ब्रूते 'तीर्थयात्रां गतः' इति । भा. ७।३।८।१९ । अत्र ब्रूमः । तीर्थशब्दोऽपि तीर्थमात्रमेव ब्रूते 'तीर्थयात्रां गतः' इति तु उक्त्वा कानिचित्तीर्थानि अनुक्रान्तानि, यतोऽसौ तद्विशिष्टार्थो विज्ञायते । यत्र तु केवलः प्रयुज्यते तत्र तीर्थमात्रमेव ब्रूते । यथा तीर्थे स्नाति, तीर्थमेव समानानां भवति इति । ७।३।८।२१.

* **'तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥'** ऋसं. १।११६।३ । अस्य एवमाख्यायिकासरूपत्वम् । हे अश्विनौ तुग्रो नाम कश्चित् राजा भुज्युनामानं स्वपुत्रं उदमेघे समुद्रे अवाहाः वाहयामास इति तिङां तिङो भवन्ति इति प्रथमपुरुषार्थमध्यमः । प्रसिद्धिद्योतनार्थो हकारः । नकारस्य उपमार्थत्वात् यथा कश्चित् ममृवान् आसन्नमरणः रयिं धनं समुद्रे वाहयति इति दृष्टान्तः । तं भुज्युं आत्मन्वतीभिः दृढाभिः अन्तरिक्षप्रुद्भिः आकाशगामिनीभिः अपोदकाभिः निर्जलाभिः नौभिः युवां ऊहथुः समुद्रात् उत्तारयामासथुः इति । सु. पृ. ६७२.

* **तुमुन्** प्रत्ययः 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति (पा० ३।३।१०) विहितः विनियोक्त्री श्रुतिः इति भट्टसोमेश्वरमते । पार्थसारथिमते तु नासौ श्रुतिः । (क्रियार्थायां क्रियायामुपपदे भविष्यति अर्थे धातोः एतौ स्तः । कृष्णं द्रष्टुं याति, कृष्णं दर्शको याति) । बाल. पृ. ४५–४६.

⧗ **तुलोन्नमनन्यायः** । एकस्य शिक्यस्य उन्नमनार्थेन व्यापारेण इतरशिक्यस्य अधोनयनमपि भवति । तद्वत् । संग्रहः.

⧗ **तुलायष्टिन्यायः** । यथा तुलायष्टिः स्तोकेनोन्नतिमायाति, स्तोकेनायात्यधोगतिम् । एवं खलजनोऽपि स्तोकेनोन्नतिमायाति, स्तोकेनाधोगतिं याति । साहस्री. ६३४.

* **तुल्यं च सांप्रदायिकम् । १।२।१।८ ॥**

प्रमादपाठत्वशङ्कानिराकरणार्थार्थवत्त्वावगमलक्षणहेत्वन्तरसमुच्चयार्थः चशब्दः । 'अथवा' इत्यादिना (वार्तिके) 'विधिना त्वेकवाक्यत्वात्' इत्येतदेव सूत्रं प्रमादपाठत्वशङ्कानिराकरणेऽपि योजितम् । विध्येकवाक्यत्वेन स्तुत्यर्थतया अर्थवत्त्वावगमात् प्रमादपाठत्वनिराकरणे एव हेत्वन्तरसमुच्चयार्थः तुल्यं च इति चशब्दः । सु. पृ. ५२.

⧗ **तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् । ३।६।७।१८ ॥**

अग्निष्टोमे त्रयः पशवः अग्नीषोमीयः सवनीयः अनुबन्ध्यश्चेति । तत्र सुत्यादिनात् अव्यवहिते प्राचीने औपवसथ्याख्ये दिने अग्नीषोमीयः पशुरनुष्ठीयते । तत्रैव च उपाकरणादयः पशुधर्मा अपि आम्नाताः । तत्रैव च धर्मोक्तेः प्राक् 'आग्नेयः पशुरग्निष्टोम आलभ्यः' इत्यादिना सवनीयाः पशवोऽपि आम्नाताः । सवनीयानुष्ठानं तु सुत्यादिने । अनुबन्ध्यस्तु अवभृथान्तेऽनुष्ठीयते । तत्र उपाकरणादयो ये पशुधर्मा विहिताः, ते किं त्रयाणामपि पशूनामर्थे विधीयन्ते, उत अग्नीषोमीयसवनीययोर्द्वयोरर्थे, किंवा अग्नीषोमीयस्य एकस्यैवार्थे इतरयोस्तु चोदकेनैव स्युः इति । तत्र प्रकृतेन प्रथमसूत्रेण आद्यः पक्षः उपन्यस्तः । प्रकरणाविशेषात् इति हेतोरावृत्त्या च द्वितीयोऽपि पक्ष उपन्यस्त इति केचित् । यथाश्रुतभाष्येण तु सूत्रेण प्रथमः पक्षः, उत्सूत्रं द्वितीयः पक्षश्च उपन्यस्त इति स्पष्टम् । वार्तिककारेण तु उत्सूत्रं प्रथमः पक्षः, सूत्रेण तु द्वितीयः पक्ष इति प्रतिपादितम् । वयं तु यथाश्रुतसूत्रानुसारेणैव उपन्यस्यामः । सूत्रस्थः पशुशब्दः

लक्षणया पशुधर्मान् बोधयति । अथवा विधिशब्देन पश्वर्थे विधीयते इति उपाकरणादिः पशुधर्मो बोध्यते । तथा च पशुविधिः उपाकरणादिः पशुधर्मः सर्वेषां त्रयाणामपि पशूनां तुल्यः स्यात् । प्रकरणाविशेषात् अग्निष्टोमप्रकरणस्य पशुत्रयेऽपि समानत्वात् । तस्मात् पशुत्रयार्थो धर्मविधिः इति प्रथमः पूर्वपक्षः ।

स्थानाच्च पूर्वस्य । १९ ॥

उपाकरणादयः पशुधर्माः त्रयाणामेव पशूनामर्थे स्युः इति प्रथमः पूर्वपक्षः पूर्वसूत्रेणोक्तः । तत्र विशेषमुक्त्वा द्वितीयः पक्षः अनेन सूत्रेणोच्यते । प्रकरणात् स्थानाच्च अनुष्ठानसादेश्याच्च पशुधर्माः पूर्वस्य प्रथमस्य अग्नीषोमीयस्यैव भवेयुः । अनुबन्ध्यस्य अग्निष्टोमप्रकरणसत्त्वेऽपि स्थानाभावात् न तस्य पशुधर्मा विधीयन्ते इति स्पष्टम् । यद्यपि सवनीयस्य समानदेशत्वं कथंचित् संभवति तथापि नानुष्ठानसादेश्यं इति न तस्यापि ते धर्माः, किंतु अग्नीषोमीयस्यैवेति । सिद्धान्तपक्षोऽयम् ।

श्वस्त्वेकेषां तत्र घुनःश्रुतिर्गुणार्था । २० ॥

उपाकरणादयः पशुधर्माः अग्नीषोमीयस्यैव न तु सवनीयस्यापि इति वक्तुं शक्यम् । कथम् ? श्वस्तु एकेषाम् । तुशब्दः अग्नीषोमीयात् विशेषद्योतनार्थः । एकेषां केषांचित् शाखिनां ग्रन्थे श्वः औपवसथ्यात् अग्नीषोमीयपशुदिनात् उत्तरदिने विधीयते ‘ आश्विनं ग्रहं गृहीत्वा, त्रिवृता (त्रिगुणया रशनया) यूपं परिवीय (वेष्टयित्वा) आग्नेयं सवनीयं पशुमुपाकरोति ’ इतिवचनेन । तस्मात् पशुधर्माः सवनीयस्य भवितुं नार्हन्ति । ननु तर्हि औपवसथ्ये अहनि सवनीयपश्वाम्नानश्रुतिः किमर्था ? उच्यते । तत्र सवनीयपशोः श्वोविधाने सति पुनःश्रुतिः, सवनीयस्य प्राक्श्रुतिः, औपवसथ्येऽहनि श्रुतिः, गुणार्था । निन्दाद्वारा ‘ वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यंदिने अङ्गैस्तृतीयसवने ’ इत्यनेन एकवाक्यतां गत्वा वपाप्रचाररूपगुणस्य विधानार्था भवति । निन्दाश्रुतिश्च सवनीयान् पशून् संकीर्त्य ‘ यथा वै मत्स्योऽविदितो जनमवधूनुते, एवमेतेऽप्रज्ञायमाना जनमवधून्वते ’ इति पठिता । यथा वै किल जलस्थश्चपलो मत्स्यः विचरन् जनैः अनवधारितगतिः प्रेक्षकजनमवधूनुते ‘ किमितो गतः किंवा ततः ’ इति संदेहे क्षिपति, तथा ‘ एते पशवः क्व क्रियन्ताम्, एभिः कथं सवनानि पशुमन्ति भवन्ति ’ इति निर्णयाभावेन संशयमुत्पादयन्ति इति निन्दाश्रुत्यर्थः । एषा निन्दाश्रुतिः औपवसथ्येऽहनि श्रुताऽपि ततः उत्कृष्टा सती ‘ वपया प्रातःसवने चरन्ति ’ इति श्रुत्या एकवाक्यतां गत्वा वपाप्रचाररूपगुणविधाने शेषभूता भवति । तेन ज्ञायते पशुधर्माः अग्नीषोमीयस्यैव न तु श्वोविहितस्य सवनीयस्येति । एकेषां शाखिनां सवनीयः पशुः श्वः विधीयते । तत्र एवं सति पुनःश्रुतिः गुणार्था वपाप्रचाररूपगुणविधानशेषः इति सूत्रस्य शब्दार्थः ।

तेनोत्कृष्टस्य कालविधिरिति चेत् । २१ ॥

एकोनविंशविंशसूत्राभ्यां सिद्धान्तपक्षः उक्तः । पुनः पूर्वपक्षोपन्यासार्थं सूत्रमिदम् । अग्निष्टोमे औपवसथ्येऽहनि सवनीयपशूनां आम्नानात् तत्रैव च उपाकरणादीनां पशुधर्माणामुक्तत्वात् ते पशुधर्माः सवनीयस्य पशोरेव स्युः, किंवा तत्रैव पठितस्य अग्नीषोमीयस्य सवनीयस्य चेति उभयोः स्युः । ननु तर्हि ‘ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति ’ इति वाक्यं किमर्थमिति चेत् । उच्यते । तेन गुणेन वपाप्रचाररूपेण सवनीयः पशुः द्वितीये सुत्यादिने उत्कृष्टः उत्कर्षं प्रापितः । तस्य च वपाप्रचारेण उत्कृष्टस्य पशोः कालस्य अनियमे प्राप्ते ‘ आश्विनं ग्रहं गृहीत्वा ’ इत्यादिना वाक्येन कालविधिः कालविशेषस्य विधानं क्रियते, तेन वाक्येन नियतः कालो विधीयते । तथा च कालविशेषविधानार्थं तद्वाक्यम्, न व्यर्थं इत्यर्थः । परंतु उपाकरणम्, यूपे नियोजनम्, शामित्रशालायां नयनम्, संज्ञपनम्, विशसनम्, वपोद्धरणं इत्यादयः पशुधर्माः सवनीयस्यैव । इति चेत् ।

नैकदेशत्वात् । २२ ॥

नायं कालविधिः । न वा वपाप्रचारस्य उत्कर्षः नापि तेन पशोरुत्कर्षः । वपाप्रचारस्य उत्कर्षेऽपि वपायाः एकदेशत्वात् वपाप्रचारादीनां उत्तरेषामङ्गानां उत्कर्षः स्यात्, तथापि वपाप्रचारात् प्राक्तनानां उपाकरणादिवपोद्धरणान्तानां उत्कर्षो नैव स्यात् । ‘आश्विनं ग्रहं गृहीत्वा’ इत्यादिना वाक्येन तु उपाकरणादीनां सर्वेषामेव

अङ्गानां सुत्यादिने अनुष्ठानं विहितम् । तस्मात् औपवसथ्ये अहनि आम्नाताः उपाकरणादयः पशुधर्माः न सवनीयस्य भवितुमर्हन्ति , किंतु अग्नीषोमीयस्यैव । सवनीये तु चोदकेन प्राप्नुवन्ति ।

अर्थेनेति चेत् । २३ ॥

पूर्वपक्षिणः शङ्का । ननु उपाकरणस्य 'आश्विनं ग्रहम्' इत्यनेन सुत्यादिने उत्कर्षे विहिते वपादिसहितस्य सर्वस्यैव सवनीयपशोः अर्थेन अर्थादेव उत्कर्षः सिद्धो भवति । एवं च 'आश्विनं ग्रहम्' इति सवनीयस्य पशोः कालविधिः संभवति । 'मुष्टिना पिधाय वपोद्धरणं आसीत आ वपाहोमात्' इति श्रूयते । न च पूर्वेद्युः वपोद्धरणं मुष्टिना पिधाय सुत्यादिने प्रातःसवनपर्यन्तं आसीनेन अवस्थातुं शक्यते । अवश्यमाहारविहारादयः ऋत्विजा कर्तव्याः । तथा च उपाकरणादयः सर्वे धर्मा उत्कर्षेण सुत्यादिनस्थस्य सवनीयपशोरेव धर्माः स्युः न पूर्वदिनस्थस्य अग्नीषोमीयस्य पशोः । इति चेत् ।

न, श्रुत्यविप्रतिषेधात् । २४ ॥

'मुष्टिना पिधाय वपोद्धरणं, आसीत आ वपाहोमात्' इति श्रुत्या यदि विरोधो भवेत् तदा अर्थेन उत्कृष्टस्य कालविधिः संभाव्येत, न तु श्रुत्या विप्रतिषेधोऽस्ति । श्रुत्यविप्रतिषेधात् तु न कालविधिः । श्रुत्या विप्रतिषेधः श्रुतिविप्रतिषेधः, न श्रुतिविप्रतिषेधः श्रुत्यविप्रतिषेधः । श्रुत्यविप्रतिषेधात् श्रुतिविप्रतिषेधाभावात् न कालविधिः । औपवसथ्येऽहनि उपाकरणादीनि विशसनपर्यन्तानि अङ्गानि कृतानि स्युः वपाप्रचारश्च श्वः सुत्यादिने प्रातःसवने करिष्यते तदा, यद्यपि पञ्चषप्रहरपर्यन्तं शमिता वपोद्धरणस्थानं मुष्टिना पिधाय आसितुं न शक्नुयात् ततश्च 'मुष्टिना पिधाय' इत्यनया श्रुत्या विप्रतिषेधः विरोधः स्यात् । परंतु तृणमुष्टिना पर्णमुष्टिना वा पिधाय शमिता श्वः वपाप्रचारपर्यन्तं उदासीनः स्यात् इति शक्यते वक्तुम्, तदा च न श्रुतिविरोधः । तथा च न अर्थेन उत्कृष्टस्य कालविधिः । ततश्च उपाकरणादीनि सर्वाण्येव अङ्गानि श्वः सुत्यादिने एव कर्तव्यानि । एवं च पशुधर्माः सर्वे न सवनीयस्य पशोः, किंतु अग्नीषोमीयस्यैव इति सिद्धान्ती ।

स्थानात्तु पूर्वस्य, संस्कारस्य तदर्थत्वात् । २५ ॥

सिद्धान्ती एव ब्रूते । तुशब्दः सवनीयार्थत्वनिरासाय । स्थानात् समानदेशात् उपाकरणादयो धर्माः पूर्वस्य अग्नीषोमीयस्यैव भवन्ति । उपाकरणादिरूपस्य संस्कारस्य तदर्थत्वात् पशुयागार्थत्वात् । एते धर्माः पशुयागप्रयुक्ताः न ज्योतिष्टोमप्रयुक्ताः । तस्मात् अग्नीषोमीयधर्मा इति पूर्वोक्तोपसंहारः ।

लिङ्गदर्शनाच्च । २६ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । अग्निष्टोमे औपवसथ्ये अहनि आम्नाताः पशुधर्माः तस्मिन्नेव अहनि आम्नातस्यापि सवनीयस्य पशोर्न भवन्ति किंतु अग्नीषोमीयस्यैव इत्यस्मिन्नर्थे 'वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने सवने, अङ्गैस्तृतीयसवने' इति सुत्यादिने पशुपुरोडाशरूपलिङ्गं दृश्यते । पुरोडाशयागो हि देवतासंस्कारार्थः । स च अग्नीषोमावेव संस्कर्तुं शक्नोति नाग्निम् । तस्मात् पुरोडाशदर्शनात् लिङ्गात् अग्नीषोमीयस्यैव पशुधर्माः सवनीयस्य तु अतिदेशेन स्युः ।

अचोदना गुणार्थेन । २७ ॥

ननु सवनीये पशौ पशुपुरोडाशदर्शनं उपाकरणादिधर्माणां अग्नीषोमीयार्थत्वे लिङ्गं भवितुं नार्हति पुरोडाशस्य छिद्रापिधानार्थत्वात् न्यूनतादोषनिरासार्थत्वात् इति । तत्राह गुणार्थेन छिद्रापिधानार्थेन पशुपुरोडाशस्य अचोदना न चोदना यतः । छिद्रापिधानवाक्यं तु अर्थवादः । तस्मात् पशुधर्मा अग्नीषोमीयार्था एव । के.

⧗ तुल्यो हि व्रीहिसंबन्धः शास्त्राद् यागावघातयोः (वा. २।१।३।८) इति वार्तिकोक्तन्यायेन आराादुपकारिणा अङ्गेन प्रधानप्रयुक्तद्रव्यग्रहणस्य निरस्तत्वात् । ('व्रीहिभिर्यजेत' 'व्रीहीनवहन्ति' इति तुल्ये चोदने, तत्र इयं प्रयोजिका, इयं न इति नास्ति विशेषहेतुः । इति वार्तिकेनैव न्यायाक्षरार्थो व्याख्यातः)। सु. पृ. ६३८.

⧗ **तुल्ययोः एकदेशे उत्कृष्टे** (अन्यत्र नीते) **नूनं अपरोऽपि एकदेशः उत्कृष्यते इति न्यायः ।** श्रुतिसंयोगः पौर्णमास्याः 'यदेवादः पौर्णमासं हविः' इति । यावद्वचनं वाचनिकम् । तत्र न न्यायः क्रमते 'तुल्ययोः एकदेशे०' इति । **भा.** ५।४।४।११.

* **तुल्यानां** च तुल्यवदनुक्रमणं भवति, यथा 'देवा ऋषयो गन्धर्वास्तेऽन्यत आसन्, असुरा रक्षांसि पिशाचास्तेऽन्यत आसन्' इति । **भा.** ४।४।७।१५ । अतुल्यानामपि तुल्यवदनुक्रमणं भवति, यथा 'देवा मनुष्या पितरस्तेऽन्यत आसन्' इति । ४।४।७।१८. * **तुल्यानां तु यौगपद्यं** इत्यधिकरणे अङ्गानुष्ठानतन्त्रता वक्ष्यते । तस्याश्च प्रधानप्रयोगतन्त्रत्वमन्तरेण असिद्धेः अर्थाक्षिप्ता प्रधानप्रयोगतन्त्रता । **सु. पृ.** ७३३.

* **तुल्येषु** नाधिकारः स्यात् (९।१।५।१९) इत्यत्र नैराकाङ्क्ष्ये सति असंकोचकत्वस्य वक्ष्यमाणत्वात् । **कौ.** २।१।४।८ पृ. ७०, * तुल्येषु नाधिकारः स्यात् इति गुणसूत्रे तुल्येषु एकत्र संनिधिः अपरत्र विशेषको न स्यात्, विनिगमनाविरहात् इति वक्ष्यते । **कु.** २।२।६।१७.

⧗ **तुल्येषु नाधिकारः स्यात् इति न्यायात् ।** न च (प्रकरणस्य) अधिकारात् विशेषः । (ये एव व्रीहयो भक्तार्थाः, ते एव कर्मार्थाः, न पृथक् केचित् कर्मार्था नाम । इति भाष्येण न्यायाक्षरार्थो व्याख्यातः) । **वा.** २।१।३।८. * नहि अग्निष्टोमपदस्य अविशेषप्रवृत्तस्य अनपेक्षत्वे सति अधिकाराख्यप्रकरणमात्रेण संकोचो युक्तः, **तुल्येषु नाधिकारः स्यात्** इति न्यायात् । **कौ.** २।२।१२।२६ पृ. २८६.

* **तुल्यार्थानां** समुच्चयो न क्वचित् दृष्टः । **वा.** ३।६।१६।४२ पृ. १०६४.

⧗ **तुल्यायव्ययन्यायः** । एकेन व्यापारेण आयवत् व्ययोऽपि तुल्यो भवति, तद्वत् एकेन व्यापारेण यत्र लाभालाभौ समौ प्रसक्तौ तत्रायं प्रवर्तते । **संग्रहः.**

* **तुल्यकार्यं** तुल्यजातीयं च तुल्यस्य बाधकं भवति । (परिभाषा) । **वा.** ३।५।२०।५२.

⧗ **तुल्यबलप्रेषणन्यायः** । तद्यथा लोके द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति । स तयोः पर्यायेण कार्यं करोति । यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतः, तत्र यद्यसौ अविरोधार्थी भवति, उभयोर्न करोति । किं पुनः कारणमुभयोर्न करोति, यौगपद्यासंभवादित्यादिकम् 'अन्तादिवच्च' पा० ६।१।८५ इति सूत्रभाष्ये स्पष्टम् । **साहस्री.** ८३५.

* **तुल्यसंख्याकानां** धर्मविरोधे प्रथमस्यैव धर्मा अनुष्ठेयाः । **वि.** १२।२।८.

* **तुषाः** वारुण्यामिक्षानिष्कासश्च चातुर्मास्यवरुणप्रघासावभृथस्य द्रव्यं न पुरोडाशः । **भा.** ७।३।५।१६.

* **तुषोपवापः** अवघातकालीनः न कपालोपादानासादनयोः प्रयोजकः, निनयनकालीनस्तु कपालधारणस्य प्रयोजकः, उपादानस्य तु न सोऽपि प्रयोजकः । कपालं तु न तुषोपवापप्रयुक्तम्, नापि श्रपणप्रयुक्तम् । **भाट्ट.** ४।१।११. * तुषोपवापः कपालस्य उत्पत्तेः उपादानस्य पालनस्य च अप्रयोजकः । **बाल. पृ.** १०६, * तुषोपवापः कपालस्य स्वाङ्गभूतस्यापि अप्रयोजकः । **पृ.** १०७. * तुषोपवापः पुरोडाशकपालेन कर्तव्यः 'रक्षसां भागोऽसि' इति मन्त्रेण । तत्र कपालस्य तुषोपवापो न प्रयोजकः, किंतु श्रपणमेव । तथा च पुरोडाशाभावेन कपालाभावेऽपि चरौ तुषोपवापः कर्तव्य एव केनचित् साधनेन, न तु कपालेन । **वि.** ४।४।१।११. * तुषोपवापः । 'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र तु पुरोडाशार्थतया उपादानमेवाश्रित्य भूतसंबन्धोपपत्तिः । **सोम.** १०।२।२७. * तुषोपवापः हस्तोपादानस्यैव प्रयोजकः, न तूत्पत्तिपालनयोः । **बाल. पृ.** १०७. * **तुषोपवापं** प्रति कपालस्य शेषत्वेऽपि प्रयुक्तत्वं नास्ति । **वि.** ३।१।२.

* **तुषोपवापन्यायः** । पुरोडाशकपालन्यायः । दर्शपूर्णमासयोः कपालं न तुषोपवापप्रयुक्तम् । **भा.** ४।१।११।२६.

* **तुषोपवापवाक्येऽपि** करणतानियमस्य कपालसंस्कारकत्वापत्तेः एकत्वाविवक्षापत्तिः । **भाट्ट.** ४।१।१४.

* **तुषोपवापविधिः** पुरोडाशकपालं न प्रयुङ्क्ते । **भाट्ट.** ४।१।११.

* **तुषकणविप्रमोचनादिरर्थः** अवघातादिनिर्वर्त्यः पुरोडाशसिद्धिं प्रति षड्भिरपि व्रीहि–पुरोडाश–क्रतु–

अपूर्व–अध्वर्यु–यजमानैः अपेक्षितः । नहि तस्माद्दते व्रीहिभिर्यष्टुं पुरोडाशो वा निर्वर्तयितुं शक्यते । **वा.** ३।१।४।१० पृ. ६६९

⧗ **तुषकण्डनन्यायः** । यथा तुषस्य धान्यत्वचः निस्तुषीकरणमुलूखलादिना व्यर्थम्, तथा प्रकृतेऽपि । **साहस्री.** ४०९.

* **तुषनिष्कासद्रव्यकत्वं** वरुणप्रघासावभृथस्य । निष्कासावभृथन्यायः । **भा.** ७।३।५।१७.

⧗ **तुष्यतु दुर्जनः इति न्यायः** । यत्र प्रतिवाद्युक्तपक्षं दुष्टमपि वादिना प्रौढवादेन अङ्गीकृत्यापि दूषणान्तरं दीयते, तत्रास्य प्रवृत्तिः । **साहस्री.** १८१. * तुष्यतु दुर्जनः इति **न्यायेन** अपशब्दज्ञानस्य विपरीतत्वमात्रेण अधर्मसाधनत्वमभ्युपगम्य । **उद्योतः.** पा० १।१।१ पृ. ३१.

* **तूपरः** अश्वमेधे सवनीयः पशुर्द्वितीयः । तस्य वङ्क्रयः षड्विंशतिः । **भा.** ९।४।२।१७.

* **तूष्णीं** अवशिष्टनिर्वापः अर्धनिरुप्ते चन्द्राभ्युदये सति । **भा.** ६।५।५।१८–२०.

* **तूष्णींहोमः**। अग्निषु आहितमात्रेषु पवमानेष्टिभ्यः प्राक् ये अग्निहोत्रहोमाः क्रियन्ते सायंप्रातः गौणाग्निहोत्ररूपाः स तूष्णीं होमः । **भा.** ५।३।९।२४. * तूष्णींहोमः अग्न्यर्थः पवमानहविर्वत् असत्याहवनीये एव प्रवर्तते । **रत्न.** ५।३।९।२१–२५. * तूष्णींहोमः आधानाङ्गभूतः । **भाट्ट.** ५।३।९. * तूष्णींहोमः न मुख्याग्निहोत्रम्, किंतु अपूर्वं कर्मान्तरम्। (आधाने द्वादशसु रात्रिषु मुख्याग्निहोत्रानुष्ठानात् प्राक् अयं क्रियते)। **सोम.** १०।२।२७. * **तूष्णींहोमे** अग्निहोत्रधर्मा नाम्ना प्राप्यन्ते यथा कुण्डपायिनामयने इति केचिदाहुः। तदयुक्तम् । 'तूष्णीं होतव्यं' इत्यनेन कर्म विधीयते । तस्मिंश्च विधिवाक्ये अग्निहोत्रशब्दो नास्ति येन धर्मातिदेशको भवेत् । तूष्णींहोमः अग्निसंधुक्षणार्थं क्रियते । एतदतो भवति, अग्न्यर्थो होम इत्यवगम्यते योऽग्निहोत्रशब्दः वाक्ये अर्थवादत्वेन प्रवृत्तः स योगेन प्रवर्तते अग्नये होत्रमिति । अतो योगस्य विद्यमानत्वात् नास्ति नामधेयम् । नामधेयाभावाच्च अतिदेशो नास्ति । **टुप्.** ५।३।९।२१. * तूष्णींहोमे अग्निहोत्रधर्माः प्राप्यन्ते न वेति विचारे न प्राप्यन्ते, अत्राग्निहोत्रशब्दस्य यौगिकत्वात् नामधेयत्वाभावेन अतिदेशकत्वाभावात् । **रत्न.** ५।३।९।२१–२५. * **तूष्णींहोमप्रशंसार्था** अग्निहोत्रमीमांसा । **भा.** १०।८।५।८.

* **तृचाः**– सर्वस्तोत्रसाम्नां हि तृचा एवोपादीयन्ते । **वा.** ३।५।१०।३१. * **तृचे** आद्ये एव गानं एकत्रिके क्रतौ माध्यंदिनपवमानस्तोत्रे । **भा.** १०।५।२।७-९, * तृचे आनुष्टुभे अनुष्टुप्गायत्रीद्वयप्रग्रथनेन संपादिते श्यावाश्वान्धीगवसाम्नोर्गानम्। ९।२।६।२५–२८ वर्णकं ३, * तृचे कर्तव्यमपि गानं प्रत्यृचं परिसमापयितव्यम् । ९।२।३।२०, * तृचे गानं रथंतरादिसाम्नाम् । १०।६। ११।१–२.

⧗ **तृचे गेयं साम प्रत्यृचं समापनीयम्** ॥

तृचे स्याच्छ्रुतिनिर्देशात् । ९।२।३।१४ ॥

भाष्यम्–– ज्योतिष्टोमे समाम्नायते 'तस्मादेकं साम तृचे क्रियते स्तोत्रीयम्' इति । अत्रायमर्थः सांशयिकः किं तिसृषु ऋक्षु व्यासज्य गानं कर्तव्यम्, उत प्रत्यृचं समाप्तं गानं कर्तव्यमिति । किं प्राप्तम् ? व्यासज्येति । कुतः ? श्रुतिनिर्देशात् । एवं श्रूयते 'एकं साम तृचे क्रियते' इति । साम्नि क्रियमाणे, तन्निर्वृत्तौ गुणभूता त्रिसंख्या ऋग्गता श्रूयते । तत्र यदि एकस्यामृचि उपक्रम्य तस्यामेव एतत् परिसमापयेयुः, न त्रिसंख्यया साधनं अस्य क्रियमाणस्य परिच्छिन्द्युः, एकसंख्यापरिच्छिन्नं क्रियमाणं स्यात्, तत्र श्रुतिर्बाध्येत । तद्यथा 'अयं घटः त्रिषु नागदन्तकेषु स्थाप्यताम्' इत्युक्ते व्यासज्य स्थाप्यते, न पर्यायेण, एवमिहापि द्रष्टव्यम् । ननु पर्यायेऽपि एवंजातीयकः शब्दो भवति यथा 'त्रिषु गृहेषु देवदत्तो भुङ्क्ते' इत्युक्ते न यौगपद्यमवगम्यते । पर्यायेणापि भुञ्जाने भवत्येष वादः, एवमिहापि पर्यायेण प्राप्नोतीति । **अत्रोच्यते** । न तत्र त्रिसंख्या भुजिं प्रति उपदिश्यते, येन एतदेवं भवति, तत्र गृहशब्देन संबध्यते, त्रिषु गृहेषु, न द्वयोः एकस्मिन् वा इति । यदा भुजिं प्रति उपदिश्यते (उपदिश्येत), तदा यौगपद्येनैव भोजयितव्यः । इह तु त्रिसंख्या क्रियते

इत्यनेन संबध्यते, एवं सति क्रियायां त्रिसंख्या विहिता भवति। तत्र स्वपदगतस्य किंचित् विधायकेन विहितं भवति। इतरथा ऋचः संख्यायाश्च संबन्धस्य पदान्तरगतेन शब्देन भावना उच्येत, तथा अर्थविप्रकर्षः स्यात्। तस्मात् सामनिर्वृत्तिं प्रति त्रिसंख्या उच्यते। **आह**, ननु त्रिसंख्या ऋक्शब्देनैव अत्र संबध्यते। अन्यथा असति सामर्थ्ये समासः एव न स्यादिति। **अत्रोच्यते**। न ब्रूमो न संबध्यते इति, संबध्यते एव, समासश्च भवति। स तु समासशब्दः सामनिर्वृत्तौ उपदिश्यते इति। तत्र त्रिशब्दस्य ऋक्शब्दस्य च अर्थौ निर्वृत्तौ उपदिष्टो भवति। ऋचि साम निर्वर्तयितव्यम्, एवं ताः तिस्र ऋचो भवन्ति, न न्यूनाः इति। इतरस्मिन् पक्षे अभ्यासः त्रिसंख्यया संबध्येत, तत्र साम क्रियते इति लक्षणा स्यात्, अभ्यासनिर्वृत्तौ सामनिर्वृत्तिशब्दो भवेत्। तस्मात् व्यासज्य गानं कर्तव्यम्।

टुप्—ननु 'तृचे वा लिङ्गदर्शनात्' (१०।६।१।२) इति दशमे तिसृषु ऋक्षु साम गेयं इत्येतत् स्थापितम्। आधस्त्ये चाधिकरणे संस्कारकर्म साम इति स्थितम्। प्रतिसंस्कारं च संस्कारावृत्तिः, इत्यतः व्यासज्य गानपक्षो नैवोत्तिष्ठति। **उच्यते**। दशमे हि एवं चिन्ता तृचे साम गेयम्, न द्वयोः एकस्यां वेति। इह (तु) तृचगाने स्थिते, किं प्रत्यृचम्, उत व्यासज्य इति। यदुक्तं प्रत्यृचं गानं सिद्धमिति (प्रतिप्रधानं गुणावृत्तिः इति न्यायात्) श्रुत्या न्यायबाधं मन्यमानः पूर्वपक्षमारभते। 'एकं साम तृचे क्रियते' इति अयं (कृञ्–) धातुः सामान्यवचनः विशेषधातुना निराकाङ्क्षीक्रियते। तस्मादयं निराकाङ्क्षीकर्तव्यः। साम चात्र द्वितीयासंयोगात् ईप्सितम्। तस्मात् तेन निराकाङ्क्षीक्रियते सामान्यम्। धातुविशेषस्थानीयं सामजातम्। तस्य धातुविशेषस्थानीयस्य निर्वर्तकत्वेन तृचो विधीयते। एवं करोतिः अभूतप्रादुर्भाववचनः अनुगृहीतो भविष्यति। इतरथा यत् साम ऋचं संस्कुर्यात्, तत् तृचे इति अभ्यासलक्षणा प्राप्नोति करोतेः। **अथवा** अन्यः श्रुतिप्रकारः। यदि ऋगनुवादेन तृचो विधीयते, तथा सति एकः (तृचः इत्यत्र त्रिशब्दोपात्तत्रित्वरूपः) विधीयमानत्वात् गुणभूतः, शब्दवृत्तेन च अप्रधानभूतः। अपरः (ऋक्शब्दार्थः) उद्दिश्यमानत्वात् प्रधानभूतः, शब्दवृत्तेन च अगुणभूतः। तयोः सापेक्षत्वात् असमासः स्यात्। तृचे इति च समासः। तस्मादपि च धात्वर्थे किंचित् विधेयम्। अपिच सप्तम्या आधारत्वं तृचस्य प्रतिपाद्यते। तत्र यदि एकस्यां साम आधीयेत, तथा सप्तमी बाध्येत तिसृषु श्रुता।

शब्दार्थत्वाद् विकारस्य। १५॥

भाष्यम्— इतश्च पश्यामः तृचे व्यासज्य साम गातव्यमिति। कुतः? शब्दार्थोऽयं सामसंज्ञको विकारः ऋचो गुणभूत इत्यर्थः। स यदि व्यासज्य क्रियते, बहून्यक्षराणि अविकृतानि भवन्ति। तत्रायं चोदकः अनुग्रहीष्यते। तस्मात् व्यासज्य गातव्यम्।

दर्शयति च। १६॥

भाष्यम्— 'ऋक् सामोवाच मिथुनी संभवावेति। सोऽब्रवीत्, न वै त्वं ममालमसि जायार्थे, वेदो मम महिमेति। ते द्वे भूत्वोचतुः। सोऽब्रवीत्। न युवां ममालं स्थो जायार्थे, वेदो मम महिमेति। तास्तिस्रो भूत्वोचुः, मिथुनी संभवामेति। सोऽब्रवीत्, संभवामेति। तस्मादेकं साम तृचे क्रियते स्तोत्रीयम्' इति। नैका स्तोत्रीया साम्नः संभवति, नापि द्वे तिस्रः संभवन्तीति व्यासज्य गानं दर्शयति।

वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिः स्यात्, संस्कारस्य तदर्थत्वात्। १७॥

भाष्यम्-- तुशब्दः पक्षं व्यावर्तयति। वाक्यानि विभक्तानि त्रीणि एतानि, याः तिस्रः ऋचः। तत्र एकैका ऋक् कृत्स्नेन पदग्रामेण कांचित् स्तुतिं अभिनिर्वर्तयति, न ऋगन्तरेण सह कंचिदर्थं संस्तौति। तत्र साम ऋचः संस्तवमभिनिर्वर्तयन्त्याः गुणभावं गच्छत् साहाय्यं करोति। तत्र यदि व्यासज्य गीयेत, न ऋचः स्तुतिं अभिनिर्वर्तयन्त्याः साम उपकारकं स्यात्। नहि सामावयवः साम भवतीति। न च ऋक्समुदायेन कश्चिदर्थः स्तूयते, यत्र सामसंबद्धा स्तुतिं कुर्यात्। ऋक् स्तुतिं करोति, सा न सामसंबद्धा। यः ऋक्समुदायः सामसंबद्धः, स स्तुतिं न करोति। तत्र प्रत्यृचं साम्नि परि-

समाप्ते क्रियमाणे सामवता शब्देन स्तुतिः कृता भवति। सामसंस्कारस्य स्तुतिभावनाऽर्थत्वात् प्रत्यृचं परिसमाप्तं गानं कर्तव्यं इति।

टुप्— प्रत्यृचं वा गेयम्। कुतः? सा स्तोत्रसाधनतया विहिता। सा स्वरं वर्णानां संस्कारं अनियमेन आकाङ्क्षति। तत्र साम नियम्यते संस्कारकत्वेन। तस्मात् साम ऋक्संस्कारद्वारेण स्तोत्रेण संबध्यते, यथा ऋग्गुणः। 'एकं साम तृचे क्रियते', इति निर्ज्ञाते साम्नि संस्कारके गुणवाक्यमिदम्। तत्र यः अप्राप्तो गुणः, स विधीयते। यत् साम्ना ऋचं संस्कुर्यात् इत्यनूद्यते 'तास्तिस्रः' इति विधीयते। व्यासज्य गाने (पुनः) साम्ना न (स्तोत्रसाधनं) ऋक् संस्क्रियेत ऋगेकदेशः संस्क्रियेत। न च ऋगेकदेशः स्तुतिं करोति। न च ऋगेकदेशस्य स्तोत्रीयेण संस्कारः अपेक्षितः, ऋचः एव स्तुतिसाधनत्वात्। तस्मात् व्यासज्य गाने (रथंतरं पृष्ठं भवति, यज्ञायज्ञीयेन स्तुवीत इत्यादि–) कृत्स्नं वाक्यं अनर्थकं स्यात्।

तथा चान्यार्थदर्शनम्। १८॥

भाष्यम्-- अन्यार्थमपि वाक्यं एतमर्थं दर्शयति। 'अष्टाक्षरेण प्रथमायामृचि प्रस्तौति, द्व्यक्षरेण उत्तरयोः' इति प्रस्तावभेदं दर्शयति। तथा च 'एका वाऽस्य उत्तमा स्तोत्रीया, तामुद्गृह्य उद्गायेत्' इति उद्गीथभेदं दर्शयति। तस्मादपि प्रत्यृचं गानं कर्तव्यमिति। अर्धर्चप्रगीतेष्वपि ऋच्येव गानं कर्तव्यम्। अपरिपूर्णं तत् वाक्यं अर्धर्चे भवति, ऋचि तु परिपूर्यते इति। पादप्रगीतेषु पादे एव गानं कर्तव्यमिति। पादे एव हि तत् परिपूर्णं वाक्यम्, यथा गोष्ठः वासिष्ठः इति। एवं यावति परिपूर्णं वाक्यम्, तावति साम परिसमापयितव्यम्। क्वचित् पादेऽपि पूर्णं वाक्यम्, ऋच्यपि, क्वचिदर्धर्चेऽपि परिपूर्णम्। यत्र यथा परिपूर्णम्, तत्र तथा गातव्यमिति।

टुप्— पादप्रगीतेषु पादे एव गानं कर्तव्यम्। पादे एव हि तत् परिपूर्णं वाक्यं यथा गोष्ठः वासिष्ठः इति। एतदयुक्तं भाष्यम्। कथम्? ऋचि एव एते सामनी (गोष्ठवासिष्ठे) उत्पन्ने, न पादे ('परीतो षिञ्चता सुतं' इत्यस्मिन्, न तु 'सोमो य उत्तमं हविः' इत्यादिपादान्तरेषु। इदं गोष्ठे सामनि)। समाना गीतिः इति लाघवात् त्रिषु पादेषु न गीयते। (किंतु प्रथमे पादे इव इतरेषु पादेषु गीयते)। यथा 'तेभ्यो दश प्राचीः' इति मन्त्रे ('नमो रुद्रेभ्यो ये पृथिव्यां' इत्यादिमन्त्रत्रये अनुषङ्गेण साधारणं 'तेभ्यो दश प्राचीः' इत्यादि सकृदेव आम्नायते तद्वत्)। अपिच पादोत्पन्नायाः (अपि गीतेः) पादे एव अनुक्रमणम्, छान्दोग्ये नैव दृश्यते ऊहे (ऊहग्रन्थे) इति।

अनवानोपदेशश्च तद्वत्। १९॥

भाष्यम्—अनवानोपदेशश्च तद्वत् युक्तो भविष्यति। यथा अस्माभिर्न्याय उपदिष्टः। अनवानं गायतीति शक्यते अनवानं प्रत्यृचं परिसमापयितुम्। न तु तिसृषु व्यासज्य शक्यते। अपिच, स्वाध्यायकाले प्रत्यृचं गानं परिसमापितम्। स्वाध्यायकाले चाभ्यासः, प्रयोगकाले कथं प्राप्तुता स्यादिति। तद्यदि प्रयोगकाले प्रत्यृचं गानं कर्तव्यम्, ततः स्वाध्यायकाले तदभ्यासो युक्तः। तस्मादपि प्रत्यृचं गेयमिति।

अभ्यासेनेतरा श्रुतिः। २०॥

भाष्यम्— अथ यदुक्तम् 'तस्मादेकं साम तृचे क्रियते' इति। तासु अभ्यासेन इतरा श्रुतिर्द्रष्टव्या। पर्यायेणेत्यर्थः। नहि अत्र ऋक् सामनिर्वृत्त्यर्थं उपादीयते। तस्मान्न शक्यमिदं वक्तुं सामनिर्वृत्तिसाधनीभूतामृचं त्रिशब्दः परिच्छेत्स्यतीति। साम स्तोत्रस्य गुणभूतं निर्दिश्यते, 'रथंतरं पृष्ठं भवति' 'बृहत् पृष्ठं भवति' इत्येवमादि। तत्र प्रत्यृचं न्यायेन गानं प्राप्तम्। न सामनिर्वृत्त्या संख्या संबध्यते। किं तर्हि? ऋग्भिः। तत्र अन्यथा नावकल्पते इत्यभ्यासो लक्ष्यते तिसृषु अभ्यसितव्यं सामेति। यथा त्रिषु कुलेषु देवदत्तो भोजयितव्यः इति। यदा त्रिसंख्या कुलैः संबध्यते, तदा अभ्यासो लक्ष्यते। एवमिहापि द्रष्टव्यम्। तस्मात् प्रत्यृचं परिसमाप्तं गानं कर्तव्यमिति।

शा— 'साम क्रियत इत्येवं सामनिर्वृत्तिरुच्यते। तामुद्दिश्य ऋचां त्रित्वमङ्गत्वेन विधीयते॥' तस्मात् व्यासज्य गेयम्। इति प्राप्ते, उच्यते। 'स्तोत्रीयस्य हि साम्नोऽत्र तृचसंबन्ध उच्यते।

स्तोत्रसाधनभूतं च स्तोत्रीयमिति भण्यते ॥
साम्नः स्तोत्राङ्गभावश्च स्तोत्रसाधनसंस्कृतेः ।,
स्तोत्रसाधनता चर्चा प्रत्येकं, न तु सङ्घः ॥'
तस्मात् प्रत्यृचं गेयम् ।

सोम— पूर्वाधिकरणोक्तं साम्नां ऋगभिव्यञ्जकत्वं उपजीव्य अत्र प्रत्यृचं परिसमाप्य गेयं इति सिद्धान्तप्रवृत्तेः (उपजीव्योपजीवकभावः) संगतिः । **सूत्रार्थस्तु—** तृचे व्यासज्य गानं स्यात् 'साम क्रियते' इति सामनिर्वृत्तेः श्रुतत्वात्, तत्रैव त्रित्वान्वयात् । यदा तृचे क्रियते इत्यनेन त्रिशब्दऋक्शब्दार्थयोः संबन्धविधाने परपदसंबन्धविधानात् वाक्यं स्यात्, क्रियते इति धात्वर्थसामकरणे त्रित्वविधाने तु श्रुत्यनुग्रहः इति ।

वि— 'अंशैः सामर्क्षु (साम ऋक्षु) कृत्स्नं वा प्रत्यृचं, तिसृभिः श्रुतेः । अंशै, मैवं स्तुतेरंशैरसिद्धेः प्रत्यृचं भवेत् ॥'

भाट्ट— तच्च साम योन्यामुत्पन्नमपि उत्तरयोरतिदिष्टत्वात् तृचे गेयमित्यविवादमेव । तत्रापि च यद्यपि ऋचां प्रधानत्वात् प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात् प्रत्यृचं परिसमापनीयमित्यपि सिद्धमेव । तथापि तदेवाक्षिप्य समाधीयते । 'एकं साम तृचे क्रियते स्तोत्रीयम्' इति वचनेन हि न तावदृगुद्देशेन सामविधिः, तस्य लिङ्गादेव प्राप्तेः । नापि त्रित्वविशिष्टऋगुद्देशेन, विशिष्टोद्देशे वाक्यभेदात् । नापि स्तोत्रीयऋगुद्देशेन त्रित्वविध्यनुपपत्तेश्च । अत एव स्तोत्रोद्देशेनापि न त्रित्वस्य ऋक्परिच्छेदद्वारा साक्षाद्वा विधिः, अस्य ज्योतिष्टोमप्रकरणे समाम्नानेऽपि स्तोत्रविशेषप्रकरणाभावात् । प्रकरणेन स्तोत्रस्य उद्देश्यत्वानुपपत्तेश्च । स्तोत्रस्य सामविशेषणत्वेनोपादानात् स्तोत्रीयपदेनापि तत्प्रतिपादनानुपपत्तेश्च । त्रित्वस्य ऋग्विशेषणत्वेनोपात्तस्य स्तोत्रोद्देशेन विध्यनुपपत्तेश्च । स्तोत्रोद्देशेन त्रित्वविशिष्टऋग्विधानं तु ऋचां प्रकरणादेव स्तोत्रे प्राप्तत्वात् पूर्वोक्तदूषणगणापत्तेश्चानुपपन्नम् । अतः सप्तमीबलात् त्रित्वविशिष्टऋचामेव सामोद्देशेन विधिः । उद्देश्यसमर्पकं च स्तोत्रीयपदम् । स्तोत्रीयं च योग्यताबलात् सामैवेति सामेत्यनुवादः । सामपदमेव वा तथा अस्तु । अवभृथाद्यङ्गसामस्वपि च तृचाधारत्वविधिरस्तु । स्तोत्रीयपदं चोपलक्षणम् । सर्वथा त्रित्वविशिष्टानां ऋचां साम प्रति गुणत्वात् गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् व्यासज्य गेयम् । एवं च 'यद्योन्यां' इति वाक्यं नातिदेशविधायकम्, अपि तु सामसाधारण्यानुवादः त्रित्वापेक्षितऋग्विशेषसमर्पकम् । **इति प्राप्ते**, सामाधारतया तृचविधौ पाठादेव योनिऋक्प्राप्तेः उत्तरयोरपि उत्तराग्रन्थपठितयोः क्रमप्रकरणादिना तत्तत्सामाधारत्वेन प्राप्तिसंभवात् । इतरथा तत्तत्सामाधारत्वेन तदुत्तराप्राप्तेः तत्रापि असंभवापत्तेः 'यद्योन्यां गायति तदुत्तरयोर्गायति' इत्यस्य वैयर्थ्यापत्तिः । अतोऽवश्यं क्रमप्रकरणादिना तत्तत्स्तोत्राङ्गतया प्राप्तानां योन्युत्तरादिरूपाणां ऋचां स्तोमविधिवशेन समुच्चयावगतौ उत्तरयोरपि स्तोत्राङ्गत्वनिर्वाहार्थं यत्किञ्चित्सामप्राप्तौ 'यद्योन्यां' इत्यतिदेशेन योनिसाम नियम्यते । यथाप्राप्तस्यैव च नियमः, इति साम्नो ऋगक्षराभिव्यक्त्यर्थत्वेनैव प्राप्तत्वात् ऋचां प्राधान्यावगतेः प्रतिप्रधानं गुणावृत्तिन्यायेन प्रत्येकमेव गेयम् । एवं च 'एकं साम तृचे क्रियते' इत्यनेन तृचोद्देशेन स्तोत्रीयविधानात् अवभृथाद्यङ्गभूतसाम्नां चयनाद्यङ्गभूतषाडहिकसाम्नां च नोत्तरासु गानम् । अत्र हि त्रित्वस्य ऋचि अन्वयव्युत्पत्तेर्न विशिष्टोद्देशे वाक्यभेदः ; 'यद्योन्यां' इत्यनेन उपसंहाराच्च स्तोत्रीयस्य सामरूपतासिद्धेः सामेत्यनुवादः । **वस्तुतस्तु** उत्तराणां अवान्तरप्रकरणात् तत्तत्स्तोत्राङ्गत्वेनैव प्राप्तेः अवभृथाद्यङ्गत्वे प्रमाणाभावात् तत्र तृचगानाप्रसक्तेः 'एकं साम' इत्यादेर्नोक्तप्रयोजनलाभः । अत एव तत्र सामविध्यन्यथाऽनुपपत्त्या तदाश्रययोनिमात्रस्यैव विनियोगात् तज्जन्यगुणाभिधानस्यैव अवभृथादौ उपयोगः । किंतु तृचोद्देशेन सामैकत्वविधिः, सामेति विशिष्टकारकविधानेऽपि सामैकत्वविधेस्तात्पर्यात् । एकपदं स्तोत्रीयपदं चानुवाद एव । सामैकत्वविधिप्रयोजनं च यत्र विकृतौ अग्निष्टुदादौ 'आग्नेयीषु स्तुवते' इति प्राकृतयोन्युत्तराबाधेन ऋगन्तरविधानम्, तासां च न विकृतिप्रकरणे पाठः अपितु दाशतयीभ्य आनयनम्, तत्र तु स्तोमसंख्याऽनुरोधेन आनीतासु ऋक्षु प्राकृतसामपाठे अनियमेन द्वित्रितावत्संख्याकसाम्नां त्रिणवादि-

संख्याकऋक्षु पाठप्रसक्तौ तृचे एव एकैकसाम्नां पाठः, ऋगन्तरेषु माध्यंदिनादिपवमाने सामान्तरागमः इति ।

मण्डन-- ‘ ऋचः संस्कारकं साम । ’

शंकर-- ‘ साम संस्कारकर्म च । ’

* तृचे बार्हते बृहतीविष्टारपङ्क्त्योरेव प्रग्रथनेन संपादिते रौरवयौधाजयसाम्नोर्गानं ज्योतिष्टोमे । भा. ९।२।६।२५–२८ वर्णकं २, * तृचे रथंतरादिसाम्नां गानम् । १०।६।१।१–२.

⧗ तृचे स्याच्छ्रुतिनिर्देशात् । ९।२।३।१४ ॥

अग्निष्टोमे ‘ तस्मादेकं साम तृचे क्रियते स्तोत्रीयम् ’ इति समाम्नायते । तत् साम किं तिसृषु ऋक्षु व्यासज्य गातव्यम्, उत प्रत्यृचं समाप्य गातव्यं इति विचारे पूर्वपक्षमाह । तृचे गानं व्यासज्य कर्तव्यं स्यात् श्रुतिनिर्देशात् ‘ एकं साम तृचे ’ इति श्रुत्या तथा निर्देशात् । तस्मात् तृचे व्यासज्य एकस्य साम्नो गानम् ।

शब्दार्थत्वाद् विकारस्य । १५ ॥

एकं साम तृचे व्यासज्य गातव्यं न प्रत्यृचं समापनीयं इति पूर्वपक्षे हेत्वन्तरमाह । विकारस्य सामसंज्ञकस्य शब्दार्थत्वात् ऋगर्थत्वात् ऋचो गुणभूतत्वात् व्यासज्य साम गातव्यम् । तथा सति बहूनि अक्षराणि अविकृतानि भवेयुः । प्रत्यृचं परिसमापने तु सर्वाण्येव अक्षराणि विकृतानि स्युः । तस्मात् तृचे व्यासज्य साम गातव्यम् ।

दर्शयति च । १६ ॥

अर्थवादश्च तृचे एकस्य साम्नो व्यासज्य गानं दर्शयति ‘ ऋक् सामोवाच मिथुनी संभवावेति, सोऽब्रवीत् न वै त्वं ममालमसि जायार्थे वेदो मम महिमेति । ते द्वे भूत्वोचतुः सोऽब्रवीत् न युवां ममालं स्थो जायार्थे वेदो मम महिमेति । तास्तिस्रो भूत्वोचुः मिथुनी संभवामेति, सोऽब्रवीत् संभवामेति तस्मादेकं साम तृचे क्रियते स्तोत्रीयम् ’ इति (अत्र वाक्ये कियांश्चित् पाठभेदः भाट्टदीपिकायां) स्तोत्रीयसाम्नः एका ऋक् न संभवति, न द्वे तिस्रस्तु संभवन्ति इति तृचे व्यासज्य गानं दर्शयति । इति पूर्वपक्षः ।

वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिः स्यात्, संस्कारस्य तदर्थत्वात् । १७ ॥

साम तृचे व्यासज्य गेयं इति पूर्वपक्षं तुशब्देन व्यावर्त्य सिद्धान्तमाह । साम्नः तृचे व्यासज्य न गानं किंतु प्रतिशब्दं प्रत्यृचं साम्नः समाप्तिः स्यात् । प्रत्यृचं समापनीयं गानम् । कुतः ? वाक्यानां विभक्तत्वात् । एकैका ऋक् एकैकं वाक्यम् । एकैका हि ऋक् कृत्स्नेन स्वगतपदग्रामेण कांचित् स्तुतिं अभिनिर्वर्तयति न ऋगन्तरेण सह कंचिदर्थं संस्तौति । न च ऋक्समुदायेन कश्चिदर्थः स्तूयते । यदि व्यासज्य गीयेत, न ऋचः स्तुतिं अभिनिर्वर्तयन्त्याः साम उपकारकं स्यात् । प्रत्यृचं साम्नि परिसमाप्ते तु सामवता शब्देन स्तुतिः कृता भवति । संस्कारस्य सामरूपस्य तदर्थत्वात् स्तुतिभावनार्थत्वात् स्तुत्यर्थत्वात् । तस्मात् प्रत्यृचं साम परिसमाप्तं गेयं इति सिद्धान्तः ।

तथा चान्यार्थदर्शनम् । १८ ॥

साम्नः प्रत्यृचं गानं परिसमापनीयं इति सिद्धान्ते लिङ्गमाह । तथा च साम प्रत्यृचं समापनीयं इतीममर्थं अन्यार्थमपि वाक्यं दर्शयति । ‘ अष्टाक्षरेण प्रथमायामृचि प्रस्तौति द्व्यक्षरेणोत्तरयोः ’ इति प्रस्तावभेदं दर्शयति । ‘ तथा एका या अस्योत्तमा स्तोत्रीया, तामुद्गृह्य उद्गायेत् ’ इति उद्गीथभेदं दर्शयति । तस्मादपि प्रत्यृचं गानं परिसमापनीयम् ।

अनवानोपदेशश्च तद्वत् । १९ ॥

प्रत्यृचं साम समापनीयं इति सिद्धान्ते हेत्वन्तरमाह । अनवानोपदेशः ‘ अनवानं गायति ’ इति वचनम् । तिसृषु ऋक्षु तु व्यासज्य गाने अनवानता न शक्या । एकैकस्यां ऋचि तु कथंचिच्छक्या । एवं प्रत्यृचं गानसमाप्तौ स्वीकृतायां अनवानस्य उपदेशः तद्वत् पूर्वोक्तान्यार्थदर्शनवत् युक्तो भविष्यति । चकारः हेत्वन्तरसमुच्चयार्थः ।

अभ्यासेनेतरा श्रुतिः । २० ॥

तिसृषु ऋक्षु व्यासज्य साम गातव्यं इत्यत्र पूर्वपक्षिणा ‘ एकं साम तृचे क्रियते ’ इति श्रुतिरुदाहृता । तस्या गतिमाह सिद्धान्ती । ‘ अनवानं गायति ’ इति श्रुतेः

इतरा ‘ एकं साम तृचे ’ इति श्रुतिः अभ्यासेन स्यात् । प्रत्यृचं समाप्यमानस्य समस्तस्य गानस्य अभ्यासो भवति, तेन पुनःपुनर्गानेन सा श्रुतिः उपपद्यते । अनवानश्रुतिस्तु बलीयसी , इतरा श्रुतिस्तु अभ्यासपरत्वेनापि उपपन्नत्वात् दुर्बला । तस्मात् प्रत्यृचं गानं परिसमाप्तं कर्तव्यं इति सिद्धान्तः । **के.**

* **तृचशब्दः** समानच्छन्दसि समानदेवताके च अविशेषतः भवति इत्युक्तम् । **भा.** १०।४।२३।४८, * **तृचशब्दं** एकं कंचित् सामान्यविशेषमाश्रित्य उपचरन्ति । ९।२।४।२४ वर्णकं १.

⧗ **तृणारणिमणिन्यायः** । तृणं प्रसिद्धम् , अरणिस्तु ‘ निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ’ इति कोशादग्निसिद्ध्यर्थे निर्मन्थनीये काष्ठविशेषे वर्तते , मणिस्तु अग्निगर्भात्मकसूर्यकान्तपदवाच्याश्मविशेषो गृह्यते अरणिपदसाहचर्यात् । यतस्तृणारणिमणिन्यायेन हेतुत्वान्न व्यभिचार इत्यादि । एवं तार्णवह्निं प्रति तृणस्य , आरणवह्निं प्रत्यरणेः, मणिजन्यवह्निं प्रति मणेश्च कारणत्वम् । न तु वह्नित्वावच्छिन्नं प्रति तृणादेः कारणत्वं परस्परव्यभिचारात् , एवं यत्र कार्यकारणभावबाहुल्यम् , कार्यतावच्छेदकं कारणतावच्छेदकं च नाना तत्रास्य प्रवृत्तिः । **साहस्री.** ४३३.

* **तृणारणिमणिन्यायेन** संनिपातिनामपि समुच्चयस्याविरोधात् । **संकर्ष.** २।३।३. * अङ्गानां प्रत्येकमुत्पन्नानां प्रत्येकमेव प्रयोजनाकाङ्क्षावशेन विनियोगविधिकल्पनात् सत्यपि एकस्य प्रधानस्य एकस्मिन्नेव क्रतूपकाराख्ये फले सर्वेषामङ्गानां तत्र साहित्यानवगमात् विकल्पेनैव **तृणारणिमणिन्यायेन** कारणता । **भाट्ट.** ११।१।२. * तत्तद्वाक्ये निरपेक्षतया तत्तद्धात्वर्थानां एकफलभावनाकरणत्वावगमेन विकल्पोपपत्तेः एकजातीयस्यैवापूर्वस्य तृणारणिमणिन्यायेन सकलजन्यत्वोपपत्तेः तद्वैजात्यकल्पनाऽभावात् अपि लाघवम् । **कौ.** २।२।१।१ पृ. १३९.

⧗ **तृणजलायुकान्यायः** । स्थूलदेहनाशेऽपि कर्मणा अवबद्धं सप्तदशात्मकं लिङ्गं न नश्यति , किंतु देहान्तरं प्रविशति तृणजलायुकान्यायेन । तथा च बृहदारण्यके– ‘ तद्यथा तृणजलायुका तृणस्यान्तं गत्वा अन्यमाक्रममाक्रम्यात्मानमुपसंहरति ’ इति । **मोक्षधर्मे** नीलकण्ठः अ. २०२ श्लो. १९.

* **तृणजलौकान्यायः** । यथा तृणजलौका तृणान्तरमाश्रित्य पूर्वतृणं त्यजति , तथा जीवः स्वाविद्यादिभिर्देहान्तरं निष्पाद्यैव पूर्वं देहं त्यजतीति भावः । **साहस्री.** १०.

* **तृणप्रत्ययस्य** बर्हिःशब्दो निमित्तं न तृणसदृशप्रत्ययस्य । **भा.** ३।२।१।१ पृ. ७४९.

* **तृणप्रासनेन** । अप्सु तृणप्रासनेन अवभृथे विहितेन प्राकृताङ्गान्तराणां न बाधः । **भा.** १०।३।१।११–१२.

* **तृतीये अध्याये** ‘ अङ्गलक्षणमेवेदमिहोक्तं शेषलक्षणम् । ’ **वा.** ३।१।१।१ पृ. ६४७. * तृतीये अध्याये कः शेषः केन हेतुना शेषः, कथं च विनियुज्यते इति , श्रुत्यादीनि च विनियोगे कारणानि इति वक्ष्यते । तेषां च बलवदबलवत्ता । एतत् तात्पर्येण अन्यत् उपोद्घातादिना । **भा.** ३।१।१।१. * तृतीये अध्याये गौणमुख्यसाधारण्येन अङ्गत्वमेव निरूप्यते (तृतीयाध्यायार्थः गौणमुख्यसाधारण्येन अङ्गत्वमेव) । **भाट्ट.** ३।४।८. * तृतीये अध्याये विनियोगरूपा विधेरवस्था निरूपिता । **कणिका.** पृ. ४१२. * तृतीये अध्याये शेषशेषिभावः अभिधीयते । **वि.** उपक्रमे ३।१।१.

* **तृतीये सवने** अंशुरेकः अभिषूयते । तस्य प्रमाणं च नाम्नातम् । तं अनेकपर्वाणं स्थूलपर्वाणं च ग्रहीष्यति (दीर्घसोमे) । **भा.** ३।३।११।३१, * तृतीये सवने अङ्गैश्चरन्ति सवनीयपशोः । ११।२। १३।१४. * तृतीये सवने आर्भवपवमानः । तत्र पञ्चसूक्तेषु सप्त सामानि गीयन्ते । ‘स्वादिष्ठया मदिष्ठया’ (सामसं. ६८९) इति तिस्रो गायत्र्यः, तत्र गायत्रं संहितं च साम गेयम् । ‘ पुरोजिती वो ’ (सामसं. ६९७) इति अनुष्टुप् गायत्र्यौ च, तत्र श्यावाश्वं आन्धीगवं च साम गेयम् । ‘ इन्द्रमच्छ सुता ’ (सामसं. ६९४) इति तिस्र उष्णिहः तत्र सफं साम गेयम् । ‘ पवस्व मधुमत्तमः ’ (सामसं. ६९२) इति ककुप्पङ्क्ती , तत्र पौष्कलं साम गेयम् । ‘ अभि प्रियाणि पवते ’ (सामसं. ७००) इति तिस्रो जगत्यः , तत्र कावं साम गेयम् ।

वि. ९।२।६ वर्णकं ३, * तृतीये सवने आर्भवपवमाने श्यावाश्व–भान्धीगवयोः साम्नोः अनुष्टुभा गायत्रीभ्यां च प्रग्रथिते तृचे गानम्, न तु उत्पत्त्यनुष्टुबानयनम्। ९।२।६ वर्णकं ३. * तृतीये सवने एव ज्योतिष्टोमे षोडशी ग्राह्यः, न सवनेसवने। **भा.** १०।५।११।४४, * तृतीये सवने द्वादशकपालः सवनीयपुरोडाशः व्यूढे तु एकादशकपालः। १०।५।२६।८८. * तृतीये सवने धिष्ण्यव्याघारणे आज्यविधिर्नियमार्थः सोमेन नेति। **संकर्ष.** ३।२।१८. * तृतीये सवने यज्ञायज्ञीयं नाम स्तोत्रम्। तस्याश्रयः यज्ञायज्ञा वो इत्यादिः बृहतीसतोबृहतीरूपः प्रगाथः। एकविंशः स्तोमः। **के.** * तृतीये सवने सवनीयपुरोडाशेषु सौम्ये चरौ आश्विने द्विकपाले च सवनीयपश्वर्था हविष्कृत् प्रसङ्गसिद्धा, भेदेन नाह्वातव्या। **भा.** १२।२।४।१२–१३. * तृतीये सवने सूर्यास्तमयात् प्रागेव उक्थ्यग्रहास्त्रयो गृह्यन्ते तेभ्यः परस्तात् षोडशी विहितः। षोडशिस्तोत्रोपाकरणे च ‘समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति’ इति कालविशेषो विहितः। परंतु दैवादुक्थ्योत्कर्षे जाते सस्तोत्रस्य षोडशिग्रहस्यापि उत्कर्ष एव कर्तव्यः। **वि.** ५।१।१८. * तृतीये सवने सौगन्धिकेन अभ्यञ्जते अञ्जनाभ्यञ्जने नाम सत्रे। **भा.** १०।४।६।१०.

* **तृतीयाध्यायार्थः** ‘श्रुतिर्लिङ्गं च वाक्यादिविरोधप्रतिपत्तयः। अनारभ्योक्ति, बह्वर्थस्वाम्यर्था अष्टपादगाः॥’ १ श्रुतिविचारः, २ लिङ्गविचारः, ३ वाक्यप्रकरणादिविचारः, ४ श्रुत्यादेः परस्परविरोधसदसद्भावः, ५ प्रतिपत्तिकर्माणि, ६ अनारभ्याधीतानि, ७ बहुप्रधानोपकारकप्रयाजादीनि, ८ याजमानानि इति। **वि.** प्रस्तावना १५. * **तृतीयाध्यायसिद्धं** क्रत्वर्थपुरूषार्थत्वं उदाहरणविशेषनिष्ठतया प्रयोज्यत्वसिद्ध्यर्थं चतुर्थे विचार्यते। **भाट्ट.** ४।१।१.

⌛ **तृतीयसवने वचनात् स्यात्। १०।५।११। ४४॥**

षोडशी ग्रहः तृतीयसवने एव ग्राह्यः स्यात् वचनात्, न सवनेसवने। एवं ह्याह, ‘यत् प्रातःसवने गृह्णीयात् वज्र उत्तरे सवने व्यतिरिच्येत, यन्माध्यंदिने मध्यतो वज्रं निहन्यात्, तृतीयसवने ग्राह्यः तत् सर्वेषु सवनेषु गृह्णाति, न पूर्वे सवन आर्तिं नीतः’ इति। तस्मात् तृतीयसवने एव षोडशी ग्राह्यः। इति सिद्धान्तः। “तैत्तिरीयके तु ‘सवनेसवनेऽभिगृह्णाति’ इति वचनात् विकल्पः” इति कुतूहलम्। इदमन्तरागार्भिण्यधिकरणम्। **के.**

* **तृतीया** करणवाचिनः प्रातिपदिकात् भवति। **भा.** १।४।१।२ पृ. ३२४. * **तृतीयायाः** करणत्वे एव शक्तिः। कर्मत्वे तु ‘तृतीया च होश्छन्दसि’ (पा० २।३।३ जुहोतेः कर्मणि तृतीया स्यात् द्वितीया च) इत्यानुशासनिकी लक्षणा। **भाट्ट.** ५।१।२.

* **तृतीयाऽर्थः**। कर्तृत्वं करणत्वं च तृतीयार्थः ‘कर्तृकरणयोस्तृतीया’ इति सूत्रात् (पा० २।३।१८) (कतृत्वविवरणं ‘कर्तृत्वं’ इति बिन्दौ दृष्टव्यम्। करणत्वविवरणं ‘करणत्वं’ इति बिन्दौ द्रष्टव्यम्)। अत्र कर्तृत्वकरणत्वयोः साक्षात् भावनायां संबन्धात् तदर्थकतृतीया कारकविभक्तिः। भावनाभिन्नपदार्थान्वय्यर्थिका (अन्वयी अर्थो यस्याः) उपपदविभक्तिः। **मणि.** पृ. १३२, १३३.

‘सहयुक्तेऽप्रधाने’ (पा० २।३।१९) साहित्ययुक्ताप्रधानवाचकशब्दसमभिव्याहृततृतीयायाः निरूपितत्वमर्थः। शिष्येण सहागतो गुरुः शिष्यनिरूपितसाहित्यविशिष्टगुरुकर्तृकं आगमनं इति बोधः। एवं च तृतीयार्थस्य भावनाऽन्वयाभावात् उपपदविभक्तिः। **मणि.** पृ. १३३. ‘सहयुक्तेऽप्रधाने’ एवं ‘साकं–सार्धं–समंयोगेऽपि’ इत्यनुशासनेन पुत्रेण सहागतः पिता इति तृतीया। अत्र च पुत्रस्य अप्राधान्यं न क्रियाऽनन्वयित्वेनैव ‘सहैव दशभिः पुत्रैर्भारं वहति गर्दभी’ इत्यादिवत्। अपि तु यस्य क्रियासंबन्धः शाब्दः तत् प्रधानम्, यस्य तु आर्थः तस्य अप्राधान्यम्। अत एव पुत्रेण सह इत्यत्र पुत्रस्यापि आगमनप्रतीतिः। अत्र न सहशब्दयोग एव विवक्षितः ‘वृद्धो यूना’ (पा० १।२।५५) इति तदभावेऽपि तृतीयादर्शनात्। अत एव सहत्वमत्र तृतीयाऽर्थः। सहशब्दः क्काचित्कः तात्पर्यग्राहकः। तदन्वयस्तु स्वनिरूपकपित्राश्रयकत्वसंबन्धेन क्रियायामेव। साहित्यं च ‘सहैव दशभिः पुत्रैः’ इत्यादौ

तत्काले विद्यमानत्वम् । पुत्रेण सहागतः इत्यादौ च एकक्रियाऽन्वयित्वं इत्यादि योग्यताऽनुसारेण बोध्यम् । **रहस्य. पृ. ९९–१००.**

'येनाङ्गविकारः' (पा० २।३।२०) विकारयुक्ताङ्गवाचकपदसमभिव्याहृततृतीया संबन्धे । यथा अक्ष्णा काणः इति । अत्र अक्षिसंबन्धिकाणत्वविशिष्ट इत्यर्थः । अत्र च अक्षिनिष्ठकाणत्वस्य परंपरासंबन्धेन चैत्रे प्रकारता । **मणि. पृ. १३३.** 'येनाङ्गविकारः' इत्यनुशासनात् येन अङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात् इत्यर्थकात् 'अक्ष्णा काणः' इत्यादौ तृतीया । अत्र च अक्षिपदं चक्षुर्गोलकपरम्, वृत्तित्वं तृतीयाऽर्थः, काणपदं चक्षुरुपघातवद्गोलकवत्परम् । चक्षुर्गोलकवृत्तिचक्षुरुपघातवद्गोलकवान् इति बोधः । तृतीयाऽर्थवृत्तित्वस्य तेन संबन्धेन भावनायामन्वयात् । **रहस्य. पृ. १००.**

'इत्थंभूतलक्षणे' (पा० २।३।२१) इथंभूतलक्षणे तृतीया । इत्थंभूतलक्षणत्वं ज्ञापकत्वम् । 'जटाभिस्तापसः' इत्यत्र जटाज्ञाप्यतपोवान् इत्यर्थः । अत्र ज्ञाप्यत्वस्य तपोविशिष्टे अन्वयः । अन्यथा एकदेशे अन्वयापत्तेः । **मणि. पृ. १३३.** 'इत्थंभूतलक्षणे' इत्यनुशासनात् जटाभिस्तापसः इत्यादौ तृतीया । अत्र लक्षणवत्त्वापरपर्यायं ज्ञाप्यत्वं तृतीयार्थः । जटाज्ञाप्यतापसत्ववान् इत्यर्थः । लक्षणत्वं च विशेषणोपलक्षणसाधारणम् । तेन, शमेन तापसः इत्यपि साधु । **रहस्य. पृ. १००.**

'संज्ञोऽन्यतरस्यां कर्मणि' (पा० २।३।२२) संपूर्वस्य ज्ञाधातोः कर्मणि तृतीया द्वितीया वा स्तः । मात्रा मातरं वा संजानीते । मातृविषयकपूज्यत्वादिप्रकारकज्ञानवान् इत्यर्थः । अत्र मातृपदार्थस्य पूज्यत्वप्रकारकज्ञानक्रियायां अन्वयात् पूज्यत्वरूपक्रियाऽन्वय आर्थिकः । फलजनकज्ञानान्वयो वा । तेनात्र उपपदविभक्तित्वम् । **मणि. पृ. १३३.**

'हेतौ' (पा० २।३।२३) हेत्वर्थे तृतीया । पुण्येन दृष्टो हरिः । अत्र तृतीयाऽर्थस्य सहकारित्वस्य दर्शने अन्वयः । पुण्यसहकृतेन्द्रियजन्यं दर्शनम् । **मणि. पृ. १३३.** तच्च (हेतुत्वं) यद्यपि कारणत्वरूपमेव, तथापि द्रव्यादिनिरूपितत्वघटितसंसर्गेण क्रियाऽन्वयि हेतुत्वं यथा दण्डेन घटः इत्यादौ । धात्वर्थनिरूपितत्वेन संसर्गेण क्रियाऽन्वयि तु करणत्वं इति विशेषः । अत एव हेतुत्वे लक्षणा । अथवा अखण्डोपाधिरूपकरणत्वे शक्तिः, तत्परिचायके सखण्डोपाधौ लक्षणा इति पृथगनुशासनम् । फलादिसाधारणं च तत् यथा अध्ययनेन वसति । तादर्थ्यमात्रं तृतीयाऽर्थः । **रहस्य. पृ. १००.**

'अकर्तर्यृणे पञ्चमी' (पा० २।३।२४ । कर्तृवर्जितं यत् ऋणं हेतुभूतं ततः पञ्चमी स्यात्) शतेन बद्धः शताद्वा बद्धः । अत्र शतस्य ऋणक्रियाद्वारा बन्धनक्रियायामन्वयात् उपपदविभक्तित्वम् । शताभिन्नऋणजन्यबन्धनवान् इति बोधः । **मणि. पृ. १३४.**

'षष्ठी हेतुप्रयोगे' (पा० २।३।२६ हेतुशब्दप्रयोगे) हेतौ द्योत्ये षष्ठी एव न तृतीया । अध्ययनस्य हेतोर्वसति । अध्ययनाभिन्नहेतुको निवासः । **मणि. पृ. १३४.**

'सर्वनाम्नस्तृतीया च' (पा० २।३।२७ सर्वनाम्नः हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया षष्ठी च) । कस्य हेतोः, केन हेतुना वसति । **मणि. पृ. १३४.**

'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या' इति वार्तिकात् तृतीया । यथा दास्या संयच्छते, ददातीत्यर्थः । शिष्टव्यवहारे तु 'भार्यायै संयच्छति' । **रहस्य. पृ. १०१.**

तृतीयायाः अनुशासनानुरोधेन लाक्षणिकार्था अनुसंधेयाः । तथाहि 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकात् प्रकृत्या चारुः, प्रायेण याज्ञिकः, गोत्रेण गार्ग्यः, समेन एति, द्विद्रोणेन धान्यं क्रीणाति, सुखेन याति इत्यादौ करणत्वातिरिक्तार्थान्तरलक्षणा । प्रकृतिपदेन हि स्वाभाविकी सामग्री उच्यते । तज्जन्यचारुत्ववानित्यर्थः । न चैवं करणत्वस्यैव तृतीयाऽर्थत्वात् पृथगनुशासनवैयर्थ्यम्, जन्यत्वस्य तत्त्वेन (स्वरूपेण) तृतीयार्थत्वमङ्गीकृत्य तत्सार्थक्यात् । अत एव तृतीयाऽर्थस्य जन्यत्वाश्रयचारुत्वाश्रयवृत्तित्वसंबन्धेन आक्षिप्तक्रियायामन्वयः ।

प्रायेण याज्ञिकः– प्रायःशब्दस्य अवच्छेदकावच्छिन्नत्वराहित्यविशिष्टबाहुल्यं अर्थः । तृतीयाया अवच्छिन्नत्वमर्थः । तथा च किंचिन्न्यूनबाहुल्यावच्छिन्नयज्ञविद्यासंबन्धवान् इत्यर्थः ।

गोत्रेण गार्ग्यः– गोत्रशब्दस्य संबन्धविशेषवाचित्वेन गोत्रत्वपरत्वमङ्गीकृत्य गोत्रत्वावच्छिन्नगर्गसंबन्धवान् इत्यर्थः। तृतीयाया वा अभेदार्थकत्वमङ्गीकृत्य गोत्राभिन्नगर्गसंबन्धवान् इत्यर्थः। अस्मिंश्च पक्षे गोत्रत्वं तृतीयाऽर्थः, अवच्छिन्नत्वं संसर्गः, गोत्रवृत्तिगोत्रत्वावच्छिन्नसंबन्धवान् इत्यर्थः। अनयैव च रीत्या समवायेन रूपवान् इत्यादिप्रयोगा उपपादनीयाः।

धान्येन धनी इत्यादौ तु तृतीयाऽर्थाभेदेन धान्यत्वस्य धने अन्वय इति विशेषः। धनसंबन्धं प्रति धान्यस्य करणत्वादेव वा तृतीया इति कौस्तुभे स्पष्टम्।

समेन याति इत्यत्र अवच्छिन्नत्वं तृतीयाऽर्थः। समदेशावच्छिन्ना गमनभावना इत्यर्थः।

द्विद्रोणेन धान्यं क्रीणाति– द्वयोर्द्रोणयोः समाहारः द्विद्रोणम्, पात्रादित्वात् स्त्रीत्वाभावः। परिमितत्वं तृतीयाऽर्थः। द्रोणद्वयपरिमितं धान्यं क्रीणाति इत्यर्थः। करणत्वेनापि अन्वयसंभवेऽपि परिमितत्वेन बोधार्थं पृथगनुशासनम्।

सुखेन याति– इत्यादौ सुखपदं दुःखाभावपरम्। तृतीयाऽर्थश्च प्रयोजकत्वम्। तच्च प्रतियोग्यनुत्पादकत्वरूपम्। तथा च दुःखाजनकं यानमित्यर्थः। रहस्य. पृ. ९७–९८.

'दिवः कर्म च' (पा॰ १।४।४३) इति सूत्रेण दिव्धात्वर्थस्य साधकतमं कर्मसंज्ञं स्यात्, लक्ष्यानुरोधेन स्वरितत्वानुगतेः पूर्वसूत्रस्थकरणशब्दानुवृत्त्या करणसंज्ञकं च इत्यर्थकेन साधकतमस्यैव संज्ञाद्वयकरणात् अक्षैः अक्षान् वा दीव्यति इति प्रयोगद्वयम्। अत्र पणपूर्वकाक्षसाध्यक्रियायाः धात्वर्थत्वात् तत्राक्षाणां मुख्यमेव करणत्वम्। तत्र च द्वितीया लाक्षणिकी। पृ. ९८,

'अपवर्गे तृतीया' (पा॰ २।३।६) इति सूत्रेण फलप्राप्तिरूपापवर्गे द्योत्ये कालाध्वनोः अत्यन्तसंयोगे तृतीया स्यात् अन्यथा द्वितीया इत्यर्थकेन 'मासेनाधीतोऽनुवाकः' इत्यत्र तृतीयया फलप्राप्तिर्द्योत्या। रहस्य. पृ. ९९.

* तृतीयाऽर्थः सर्वोऽपि शक्यलक्ष्यसाधारणः पूर्ववदेव लिङ्गानन्वयिपदोपात्तभावनायां श्रुतायां गम्यमानायां वा अन्वेति इति बोध्यम्। यथा शतेन वत्सान् पाययति पयः— शतेन परिच्छिन्नानित्यर्थः, परिच्छेदं प्रति तस्य करणत्वात्। अत्र गम्यमानत्वं अध्याहृतपदेन बोध्यम्। अलं श्रमेण इत्यत्र तु नानुमेया (क्रिया), अलं इति निपातेनैव 'साध्यं नास्ति' इत्यर्थकेन साधनक्रियाया उपात्तत्वात्। अयमर्थश्च विभक्तिमात्रे बोध्यः। रहस्य. पृ. १०१। नवीनतार्किकास्तु प्रकृत्यर्थनिरूपितजन्यत्वमेव तृतीयाऽर्थः। तस्य च आश्रयतया धात्वर्थान्वय इत्याहुः। तन्न। अनुशासनबाधे प्रमाणाभावात्। न च 'परशुना छिनत्ति न दात्रेण' इत्यादौ दात्रजन्यत्वाभावस्य क्रियायां बोधानापत्तिः, निरूपकतासंबन्धेन परशुनिष्ठकरणत्वस्य, निरूपकतासंबन्धावच्छिन्नप्रतियोगिताकदात्रनिष्ठकरणत्वाभावस्य च क्रियायां बोधेन अर्थात् जन्यत्वाभावबोधोपपत्तेः। अतः प्रचुरप्रयोगाविशेषात् कर्तृत्वकरणत्वयोः उभयोरपि तृतीयायाः शक्तिः। योग्यताऽऽदिरूपतात्पर्यग्राहकानुरोधेन च विशेषनिर्णयः। पृ. ९७.

* तृतीयाऽऽदौ (विभक्तौ) जातेरेव संख्याकारकान्वयः, अन्यत्र तु लक्षितव्यक्तेः जातिव्यक्त्योश्च न वैशिष्ट्यावगाही एको बोधः, किंतु बोधद्वयं शक्तिलक्षणाजन्यमिति आकृत्यधिकरणे अभिहितम्। कौ. २।१।२।५ पृ. २९.

* तृतीयाकृतमेव 'सूक्तवाकेन प्रस्तरम्' इत्यत्र उभयोः प्रयोजनवत्त्वाविशेषे केवलतृतीयाकृतमेव सूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वम्। वा. २।१।४।१२ पृ. ४१३.

* तृतीयाश्रुत्या ऐन्द्याः करणत्वम्। वा. ३।३।७।१४ पृ. ८२५.

* तृतीयिनः ऋत्विजः तृतीयांशभाजः। द्वादश गावः पूर्णा दक्षिणा, तत्तृतीयोंऽशः चतस्रो गावः। तृतीयोऽस्ति येषां दक्षिणायाः, ते तृतीयिनः। नेष्टा– अध्वर्युगणस्थः, अग्नीध्– ब्रह्मगणस्थः, अच्छावाकः– होतृगणस्थः, प्रतिहर्ता– उद्गातृगणस्थश्च इति चत्वारः तृतीयिनः। के. १०।३।१३।५५.

* तृप्यन्ते भक्षणे 'मन्द्राभिभूतिः' इत्यादिः भक्षयाम्यन्तः एक एव मन्त्रः न तु विभागः। ज्योतिष्टोमे। वि. ३।२।१०.

* ‘**तृप्तिकामः** पचेत्’ इत्यत्र प्रत्ययार्थकार्यत्वस्य प्रकृत्यर्थे पाके अन्वयः। इति गुरवः। **मणि.** पृ. ८४.

* **तृप्तिप्रकाशकमन्त्रस्य** भक्षमन्त्रैकवाक्यता। **वि.** ३।२।१०.

* **तृप्तिप्रसादौ** देवताऽस्तित्वसाधकौ ‘तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति’ इति, इति चेन्न। अर्थवादानां स्वार्थे तात्पर्याभावात्। **वि.** ९।१।४.

* **तेजस्कामेष्टिः** कर्मान्तरम् ‘आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः’। **वि.** २।३।१२.

* **तेजःसंस्तवो** ब्राह्मणस्य। (तेजसा संस्तवः तेजःसंस्तवः)। **भा.** ६।६।२।१४.

* **तेपानाः** तपः कुर्वन्तः। तप्ता इत्यर्थः। **के.**

* **तैत्तिरीयाः**, कारीरीवाक्यानि अधीयानाः भूमौ भोजनमाचरन्ति अपरे शाखिनो नाचरन्ति। **भा.** २।४।२।८ पृ. ६३२. * **तैत्तिरीयैरेव** आपस्तम्बीयबौधायनीये धर्मगृह्यसूत्रे प्रतिपन्ने। **वा.** १।३।७।१५ पृ. २४४.

* **तैत्तिरीयकं** शाखान्तरं यजुर्वेदगतम्। तैत्तिरीयकस्य अवान्तरभेदः षड्विधः सूत्रभेदस्य षट्संख्यत्वात् बौधायनीयं आपस्तम्बीयं सत्याषाढीयं वैखानसीयं भारद्वाजीयं वाधूलं चेति। **के.** * **तैत्तिरीयकवाक्यापेक्षया** समिष्टयजुः प्रतिपत्तिरेव। **वा.** ३।५।१।६, * **तैत्तिरीयशाखावाक्येन** अश्वप्रतिग्रहेष्टिः दातुः सिद्धा। मैत्रायणीयानां तु प्रतिग्रहीतुः। ३।४।११।२१ पृ. ९६९.

* **तैलपानवदेतद्भविष्यति**। यथा तैलपानं घृतपानं वा भङ्क्त्वेऽपि सति कालान्तरे मेधास्मृतिबलपुष्ट्यादीनि फलानि करोति। **भा.** ७।१।१।५। अत्र ब्रूमः तैलपानस्यापि न कालान्तरे फलं भवति। धातुसाम्यं तस्य फलं तच्च तत्कालमेव। यच्च फलं बलपुष्ट्यादि, तत् सम्यगाहारपरिणामाद्भवति। ७।१।१।७.

* **तोयशब्दः**। ‘बिन्दौ च समुदाये च तोयशब्दो यथेष्यते’। **वा.** ३।२।३।१९ पृ. ७७०.

* **त्यजेः** विभागानुकूलो व्यापारो वाच्यः। **रहस्य.** पृ. ११४.

⧗ **त्यजेदेकं कुलस्यार्थे इति न्यायः**। यत्रोभयकोटिकसंशये एकत्र बह्वर्थहानिः द्वितीयस्वीकारे तु एकार्थहानिः, तत्र द्वितीयः पक्षः स्वीकार्य इति भावः। **साहस्री.** १८८.

* ‘आकाशस्तल्लिङ्गात्’ इत्यधिकरणे बहूनामनुग्रहाय ‘**त्यजेदेकं कुलस्यार्थे**’ इति **न्यायेन** आकाशश्रुतिरेका अन्यथा नीयते, बहुबाधस्य अन्याय्यत्वात् इति साधितम्। **पराक्रमः.** ५५।१. * बहूनामह्नामनुग्रहाय ऐन्द्री सुब्रह्मण्या कार्या ‘त्यजेदेकं कुलस्यार्थे’ इति न्यायेन बहुत्वमपि प्राबल्यकारणम्। **वि.** १२।२।७. * यत्र तु द्वयसंनिपातः तत्र अन्यतरेण कृतार्थत्वात् अवश्यावहेये अन्यतरस्मिन् भूयसामनुग्रहो युक्तः ‘त्यजेदेकं कुलस्यार्थे’ इतिवत्, विधिप्रत्ययः परित्यज्यते। केवलप्रकृतिप्रयोगाभावात् तदनुग्रहार्थप्ररोचनालब्धविधित्वानुवादेन प्रवर्तते। **वा.** १।२।१।७ पृ. ११६.

* **त्यागः** च देवता च जुहोतिस्थले अदृष्टविधया आरादुपकारकौ प्रक्षेपेण सह समप्रधानौ वा। प्रक्षेपो होमाङ्गमेव। **भाट्ट.** ४।१।७. * **त्यागश्च** यज्ञः। **भा.** ३।८।३।१०, * **त्यागः** न मम इति शक्यते विदेशस्थेनापि कर्तुम्। ३।८।७।१६, * **त्यागः** नाम मनसा क्रियते। १०।२।१७।४७. * **त्यागः** यथेष्टविनियोज्यत्वरूपस्वत्वनिवृत्तिरूपः। **सु.** पृ. १५३४, * **त्यागः** होमकालीनः ‘न मम’ इति स्वार्थविनियोगार्हत्वाख्यस्वत्वनिवृत्त्यात्मकः। **सु.** पृ. १५२५. * **त्यागे** आवाहनादिनिगदेषु अग्नीषोमीयपशौ पशुपुरोडाशाङ्गस्विष्टकृद्यागे, निर्गुणस्यैवाग्नेरभिधानम्। **भा.** १०।४।१८।३६–३७.

* **त्यागांशः** प्रकरणात् प्रयाजादिवत् आरादुपकारकः। एतावान् विशेषः यत् परप्रयुक्तद्रव्यदेवतोपजीवित्वेन परप्रयुक्त्यभावे स्वातन्त्र्येण तत्तद्द्रव्यदेवताऽऽक्षेपकत्वं नास्ति। **भाट्ट.** ४।१।७, * **त्यागांशः** यागहोमादौ आरादुपकारकः, न तु द्रव्यदेवताऽऽदौ संनिपत्योपकारकः। ४।१।७, * **त्यागांशस्य** विशेष्यतया प्रतीतस्य प्रक्षेपाद्यङ्गत्वे प्रमाणाभावः। ४।१।७.

* **त्यागातिरिक्तं** ऋत्विक्कर्म। शास्त्रफलाधिकरणम्। **भा.** ३।७।८।१८–२०.

* **त्यागादौ** विधिगतस्यैव देवताशब्दस्य उच्चारणं नियतम्। विधिशब्दाधिकरणम्। **भा.** १०।४।१२।२३.

⧗ **त्याज्या दुस्तटिनी नदी इति न्यायः** । यथा दुस्तटिनी नदी पतनभयात् त्यज्यते तत्तीरस्थैः अन्यथा तत्पतनं भवत्येव, एवं दुष्टपुरुषसङ्गोऽपि अवश्यमेव त्याज्यः इति । **साहस्री.** १२२.

* **त्रयस्त्रिंशः** स्तोमः अतिरात्रे बहिष्पवमाने काम्यो विहितः 'त्रयस्त्रिंशेन प्रतिष्ठाकामम्' इति । वि. ५।३।४, * त्रयस्त्रिंशः स्तोमविशेषः अष्टरात्रे तृतीयेऽहनि । ७।३।१०. * '**त्रयस्त्रिंशेन** (अतिरात्रेण) प्रतिष्ठाकामम्' अत्रागमेन संख्यापूरणे समाम्नायपाठक्रमादेव ता ऋचः आगमयितव्याः, न त्वनियमेन । भा. ५।१।६।१३. * **त्रयस्त्रिंशे** अतिरात्रे विवृद्धानां अष्टानां तृचानां पर्यासोत्तरमेव निवेशो न प्राक् बहिष्पवमाने । वि. ५।३।४, * त्रयस्त्रिंशे अतिरात्रे विवृद्धस्तोमके साम्नामागमेन वृद्धिर्न त्वभ्यासेन । १०।५।६, * **त्रयस्त्रिंशान्तः** पृष्ठ्यः षडहः । त्रिवृत्–पञ्चदश–सप्तदश–एकविंश–त्रिणव– त्रयस्त्रिंशस्तोमैः क्रमेण युक्तानि षट् अहानि तत्र । अयं गवामयने पूर्वे पक्षसि कार्यः । १०।६।९.

* **त्रयस्त्रिंशतः** (देवतानां) पात्नीवतभक्षणे अनुपलक्षणम् । भा. ३।२।१५।३७.

* **त्रयी** इति चैष शब्दः ऋक्सामयजुःषु प्रसिद्धः । भा. ३।३।१।५. * त्रयी हि वैतानिककर्माधिकारे प्रवर्तते, तत्प्रसङ्गात् अवैतानिकं किंचिदुच्यते । शा. ७।४।२ पृ. ५४७. * '**त्रयीमार्गस्य** सिद्धस्य ये ह्यत्यन्तविरोधिनः । अनिराकृत्य तान् सर्वान् धर्मशुद्धिर्न लभ्यते ॥' वा. १।३।२।४ पृ. १९४. * **त्रयीविदः** । वेदत्रयविदि त्रयीविद्यशब्दप्रयोगात् त्रयीशब्दस्य च 'त्रयिविदो विदुः । ऋचः सामानि यजूंषि' इति समभिव्याहारात् ऋग्यजुःसामविषयत्वावगतेः । सु. पृ. १५०४. * **त्रयीविद्यः**, त्रयी यस्य विद्या स त्रयीविद्यः, यस्त्रीन् वेदानधीते स एवं प्रख्यायते । भा. ३।३।१।५.

* '**त्रयोदशरात्रमृद्धिकामा उपेयुः**' । सत्रमेतत् । तत्र सत्रभूतद्वादशाहधर्मातिदेशः । वि. ८।२।५. * **त्रयोदशरात्रादीनि** सत्राणि आसनोपायिचोदनत्वात् । तत्र सत्रभूतद्वादशाहधर्मातिदेशः । भा. ८।२।५।२७.

* **त्रायतेः** अपह्नवानुकूलरक्षणमर्थः । **मणि.** पृ. १४०.

⧗ **त्रिंशच्च परार्थत्वात् । ३।२।१५।३७॥**

ज्योतिष्टोमे पात्नीवतस्य ग्रहस्य याज्यायां 'ऐभिरग्ने सरथं' इत्यस्यां 'पत्नीवतस्त्रिंशतं त्रींश्च देवान्' इति तृतीयश्चरणः । एतदुक्तानां त्रयस्त्रिंशतो देवानां उपलक्षणं पात्नीवतग्रहशेषभक्षमन्त्रे कर्तव्यं इति पूर्वपक्षे उत्सूत्रे प्राप्ते सिद्धान्तमाह । त्रिंशत् च त्रयस्त्रिंशत् देवा अपि त्वष्टृवत् नोपलक्षयितव्याः । परार्थत्वात् याज्यायां त्रयस्त्रिंशतां निर्देशस्य स्तुत्यर्थत्वात् । अग्नेः स्तुत्यर्थः तन्निर्देशः । इत्थं महानग्निः सर्वान् देवान् स्वकीयेन भागेन मादयति इत्ति । तस्मात् पात्नीवतभक्षमन्त्रे त्रयस्त्रिंशतो नोपलक्षणीयाः । **के.**

⧗ **त्रिंशदधिकरणम्** । पात्नीवतभक्षणे त्रयस्त्रिंशतो नोपलक्षणं ज्योतिष्टोमे ॥

त्रिंशच्च परार्थत्वात् । ३।२।१५।३७ ॥

भाष्यम्— तस्मिन्नेव पात्नीवते मन्त्रः (याज्या) 'ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥' इति । तत्र संदेहः किं त्रयस्त्रिंशतो देवानामुपलक्षणं कर्तव्यम्, उत नेति । किं प्राप्तम् । त्रयस्त्रिंशतं देवान् उपलक्षयेत् । कथम् ? दीयते हि सोमः त्रयस्त्रिंशते देवेभ्यः । एवं हि अग्निं अग्नीत् अधीच्छति 'आ याहि अग्ने अर्वाचीनं त्रयस्त्रिंशता देवैः सह, समानं रथमधिष्ठाय नानारथैर्वा । विभवन्ति हि ते अश्वाः । तदिदं अनुष्वधं आवह, त्रयस्त्रिंशतं पत्नीवतो देवानागमय तर्पय च' इति । अत्र हि अग्निं अग्नीत् अधीच्छति त्रयस्त्रिंशतो देवानां तृप्तये, इति गम्यते । यत्प्रधानश्चात्र मन्त्रः तत्परः सोमः । तस्मादुच्यते त्रयस्त्रिंशद्देवा उपलक्षयितव्या इति । ननु चोदनायां पत्नीवान् केवलोऽग्निः देवतात्वेन श्रूयते । सत्यम्, चोदनायां पत्नीवान् देवतात्वेन श्रूयते, न तु देवताऽन्तरं निषिध्यते । किमतो यद्येवम् ? एतदतो भवति, मान्त्रवर्णिकाः त्रयस्त्रिंशद्देवाः अविरुद्धाः चोदनायां प्रतीयन्ते इति । एवं प्राप्ते, ब्रूमः । न त्रयस्त्रिंशद्देवा उपलक्षयितव्या इति । नात्र मन्त्रे अग्निराह्वाता परिवेष्टा वा तर्पयिता वा अध्येष्यते । नात्र

त्रयस्त्रिंशद्देवेषु इष्टेषु प्रयोजनं निर्वर्त्यते। कस्तर्हि यष्टव्यः ? पत्नीवान्। कुत एतत् ? स हि चोद्यते 'पात्नीवतं गृह्णामि (ति)' इति। ननु मान्त्रवर्णिकानां त्रयस्त्रिंशतो देवानां अत्र संकीर्तनम्। उच्यते। परार्थत्वेन ताः संकीर्त्यन्ते। कथम् ? न हि अप्रत्तं अग्नेस्तद्भवति। न च परकीयस्य दानमवकल्पते। तस्मात् त्वं अमूभ्यः त्रयत्रिंशद्देवताभ्यो देहि इत्यसमञ्जसं वचनम्। अग्नये तु अनेन दानमुक्तं भवति। कथम् ? ईशानो हि विलम्भयति द्रव्यम्। तदिह विलम्भनं (दानं) संकीर्तयन् त्वमस्य ईशानः इति प्रत्याययति। ननु मादयस्व इत्युच्यते, न विलम्भय इति। उच्यते। नहि माद्यन्ति देवताः। तस्मात् मदकरणसंकीर्तनं अदृष्टाय स्यात्। दृष्टाय तु त्यागसंकीर्तनं लक्षणया। लक्षणा हि अदृष्टकल्पनाया ज्यायसी। प्रमाणाद्धि सा भवति। ननु त्यागेऽपि लक्ष्यमाणे अग्निः कर्ता अधीष्यते। तदुच्यते। अग्नेरपि अध्येषणा अदृष्टायैव। तस्मात् अग्नेरैश्वर्यकरणमेतत् वाक्यं लक्षयति इति न्याय्यम्। अपिच पत्नीवते सोमश्चोद्यते 'पात्नीवतं गृह्णाति' इति। ननु उक्तं मान्त्रवर्णिकं न प्रतिषेधति चोदनेति। उच्यते। तदपि मान्त्रवर्णिकं नास्तीत्युक्तम्। अपि च सामर्थ्यात् प्रतिषेधति इति गम्यते। नहि सापेक्षः पत्नीवच्छब्दः तद्धितार्थेन संलक्ष्यते। तस्मात् केवलः पत्नीवान् देवतेति। एतच्चोदनावशेन मन्त्रो वर्णनीयः। तस्मात् यथैवास्माभिर्वर्णितो मन्त्रः तथैव भवितुमर्हति इति। पत्नीवांश्चाग्निः। अग्ने पत्नीवन् इति सामानाधिकरण्येन निर्दिश्यते। तस्मात् अग्निरुपलक्षयितव्यः, न त्रयस्त्रिंशद्देवताः इति।

वा—अधिकरणातिदेशोऽयम्। एतावता तु विशेषेण अतुल्यत्वाशङ्का, येन य एवासौ अग्निर्देवताभूतः, स एवात्र त्रयस्त्रिंशद्देवेषु भोक्तृषु परिवेष्टृत्वेन विनियुज्यते। तेन मन्त्रवर्णात् तेषामेव प्राधान्येन देवतात्वं विज्ञायते, गुणभूतोऽग्निः। पूर्वत्र च सहत्वमात्राभिधानात् अतुल्यत्वेन त्वष्टा निराकृतः। तदिह विपरीतमतुल्यत्वम्। पत्नीवत्त्वगुणमात्रदेवतात्वप्रतिपादनमात्रार्था च तद्धितचोदना (पत्नीवत्त्वस्य देवतागुणमात्रतया तद्धितयुक्ता चोदना इत्यर्थः)। सा यथा 'अग्नाऽऽऽइ पत्नीवाऽऽऽ' इति मन्त्रवर्णात् प्राप्नुवता अग्निना गुणिना न विरुध्यते, एवं त्रयस्त्रिंशताऽपि देवैः। अविशिष्टो हि तेषामपि मन्त्रवर्णः 'पत्नीवतस्त्रिंशतं त्रींश्च देवान्' इति। न च चोदनया देवताऽन्तरं प्रतिषिद्धम्, येन मन्त्रवर्णगम्यं नेष्यते। न च मान्त्रवर्णिक्यां चोदितापरित्यागेन गृह्यमाणायां कश्चित् विरोधः। न च प्रमाणान्तरगम्यायां तद्धितस्य सापेक्षत्वम्। यदि स एव त्रिंशदपेक्षं पात्नीवन्तं विदध्यात् ततः सापेक्षत्वदोषं प्रतिपद्येत। मन्त्रस्य तु सापेक्षमपि वदतो नैव कश्चिद्विरोधः। समुच्चयाश्रयणाच्च अविरोधित्वम्। कथं तुल्यार्थयोः समुच्चय इति चेत्। न स्यात् समुच्चयः, यदि मन्त्रेणोभयपरामर्शो न क्रियते। स तु चोदनाऽवगतमग्निं अपरित्यजन्नेव परिवेष्टृत्वेन च सिद्धं देवतात्वमभिदधत् त्रयस्त्रिंशतो देवतात्वमाह। तस्मात् समुच्चये सति सर्वेषामुपलक्षणम्। तन्मन्त्रव्याख्यानेन दर्शयति (भाष्यकारः)। याज्यामभिदधत् एवं हि अग्नेः अग्नीत् अध्येषणं करोति। संमानपूर्वको हि नियोगः अध्येषणम्। तदेवं क्रियते आ याहिं इति। छन्दसि 'व्यवहिताश्च' (पा० १।४।८२) इति व्यवहितस्य आङः प्रयोगः 'आ एभिः' इति। उपरिवक्ष्यमाणत्रयस्त्रिंशता देवैः सह एकरथारूढः अश्वविभवाद्वा नानारथारूढः। ततश्च अर्वाङागत्य तांश्च पत्नीवतः त्रिंशतं देवान्। अनुष्वधम्, स्वधां अन्नं सोमाख्यं अनु आ वह। ततश्च मादय संतर्पय इत्यर्थः। तेन स्फुटमेषां भोक्तृत्वमिति। एवं प्राप्ते, ब्रूमः। त्रयस्त्रिंशतो नोपलक्षणीया इति। कुतः ? '**चोदितार्थानुरोधेन मन्त्रः सर्वः प्रवर्तते। तेन त्वष्टृवदेवात्र त्रिंशताऽग्नेरभिष्टुतिः॥**' पात्नीवतचोदनार्थस्मरणहेतुना मन्त्रेण न शक्यं अचोदितं अग्नेः परिवेष्टृत्वं इतरेषां च भोक्तृत्वं प्रकाशयितुम्। अतो मन्त्रस्य परार्थत्वात् न चोदनामतिक्रम्य स्वातन्त्र्येण त्रयस्त्रिंशत्प्रकाशनसामर्थ्यं अवकल्पते। विधानसामर्थ्यं तु दूरभ्रष्टमेव। न च त्रिंशतो देवतात्वमेव स्मारयति, चोदिताग्न्यैश्वर्यप्रकाशनपरत्वेन त्रयस्त्रिंशत्प्रकीर्तनात्। कथम् ? '**अप्रसिद्धेश्वरत्वस्य दातृत्वं यस्य कीर्त्यते। तदसंभाव्य मुख्यार्थं ऐश्वर्यार्थं प्रतीयते॥**' यदि हि अप्रत्तावस्थमेव द्रव्यं 'त्वं देहि'

इति मुख्यमेवोच्येत, ततः प्रतारणमेव स्यात्। अथ तु त्वमेवात्र दाता स्वामी, न वयं स्वामिनः इत्येतत्परं भवति, यथा लोके कश्चित् उच्येत 'किं त्वयि भवति निमन्त्रिते, त्वयैवान्ये निमन्त्रणीयाः' इति ततो वाक्यं संबद्धं भवति। चोदितकरणाच्च दृष्टार्थे भवति। मादयस्व इत्यपि मुख्यस्य मदस्यासंभवात् एतेभ्यः इत्येतत् लक्षयति। दातृत्वमपि अग्नेः दृष्टार्थमेव इति संप्रदानलक्षणार्थे विज्ञायते। विस्पष्टं च तद्धितेन यत् अन्यनिरपेक्षमवगतं तत् मन्त्रानुरोधेन बाधितं न स्यात्। कथं पुनः 'पात्नीवतं' इति चोदिते अग्निर्देवता अवगम्यते, न पुनः त्रयस्त्रिंशद्देवता स्यात्? अत आह (भाष्यकारः) पत्नीवांश्च अग्निरिह गृह्यते न त्रयस्त्रिंशत्, अग्ने पत्नीवन् इति सामानाधिकरण्यदर्शनात्। ननु त्रिंशताऽपि सह सामानाधिकरण्यमस्ति, 'पत्नीवतस्त्रिंशतम्' इति। सत्यमस्ति। तथापि अत्र अग्निः पत्नीवान् गृह्यते। तद्धितनिर्देशेन हि प्रातिपदिकार्थस्य संख्याविशेषाभिव्यक्तिर्भवति। तत्र प्रातिपदिकार्थानन्यथासंभवात् एकवचनान्तेन विग्रहो भवति, पत्नीवान् देवता अस्य इति। त्रिंशच्च नित्यं बहुवचनान्तः। तस्मान्न तेभ्यस्तद्धितः इति देवतात्वाभाव इति।

सोम— पूर्वातिदेशात् संगतिः। प्रयोजनं– पूर्वपक्षे 'पत्नीवद्भ्य इदं न मम' इत्युद्देशत्यागः, सिद्धान्ते तु 'पत्नीवते इदं न मम' इति।

वि— 'पत्नीवन्तस्त्रयस्त्रिंशद्देवास्तान् मादयेत्यमी।
लक्ष्या न वा, याज्ययोक्तेर्देवत्वादुपलक्षणम्॥, एकोऽग्निर्यजमानेन मादितोऽन्ये तु वह्निना। अतोऽग्नेरेव देवत्वान्नान्येषामुपलक्षणम्॥'

भाट्ट-- याज्यामन्त्रे त्रयस्त्रिंशतां देवतानां पत्नीवच्छब्दसामानाधिकरण्यात् अग्निवत् विशेष्यत्वोपपत्तेः मदश्रवणाच्च पानोपपत्तेः देवतात्वावगमात् तेषामपि उपलक्षणं मन्यते। (सिद्धान्तस्तु) अग्नेर्मादयितृत्वश्रवणात् ते अग्निदत्तेन कामं माद्यन्तु, यजमानस्तु अग्नये एव ददाति इत्यवगमात् तस्यैव देवतात्वम्, न त्रयस्त्रिंशताम्। एवं च पात्नीवतं इति तद्धितोऽपि असति बहुवचनग्राहकप्रमाणे एकवचनेनैव विगृहीतो भवति इत्यपि लाघवम्। अतो नोपलक्षणीयास्ते।

मण्डन— 'नैव त्रयस्त्रिंशदिहोपलक्ष्याः।'

शंकर-- 'त्रयस्त्रिंशदपीदृशाः।' नोह्येरन् त्वष्टेव।

* त्रीणि आर्षेयाणि यः संपादयितुं शक्नोति सः अधिक्रियते। चतुरार्षेयस्यापि त्रित्वसंपादने अस्ति सामर्थ्यम्। टुप्. ६।१।११।४३. * 'त्रीन् परिधीन्' इति मन्त्रः अपूर्वप्रयुक्तः, न तु परिधित्रित्वप्रयुक्तः। इति सकृदेव पठनीयः दर्शपूर्णमासयोः। भा. ९।१।५।११–१९.

⧗ त्रयाणां द्रव्यसंपन्नः कर्मणो द्रव्यसिद्धत्वात्। ६।१।८।३९॥

शूद्रभिन्नानां त्रयाणां वर्णानां कर्माधिकारः इति पूर्वाधिकरणे साधितम्। तेषामपि त्रयाणां वर्णानां मध्ये यो द्रव्यसंपन्नः स्यात् तस्यैव कर्माधिकारः, न दरिद्रस्य। कर्मणः द्रव्यसिद्धत्वात्। कर्म हि द्रव्येण सिद्धं भवति। द्रव्यशून्यः कर्म कर्तुं न शक्नोति। इति पूर्वः पक्षः।

अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः। ४०॥

निर्धनस्य अग्निहोत्रादिकर्मसु नाधिकारः इति पूर्वपक्षं सूत्रेण प्राप्तं तुशब्देन निरस्यन् सिद्धान्तमाह। एवं अद्रव्यस्य नाधिकार इति यदुक्तं तन्न। कुतः? अनित्यत्वात् निर्धनत्वस्य। नहि जात्या कश्चित् अद्रव्यो नाम। अस्त्युपायो येन द्रव्यवान् भवति। हि यस्मात् अर्थात् जीवनार्थे द्रव्यसंयोगो भविष्यत्येव। तथा च जीवनार्थे द्रव्यलाभाय प्रयत्ने कृते तत्र पर्याप्तधनत्वे सति अग्निहोत्रादि कर्मापि करिष्यति। तस्मात् अद्रव्यस्यापि कर्माधिकारः। के.

* 'त्रयाणां हविषां स्विष्टकृते न समवद्यति' सोमे धर्मे वाजिने। संकर्ष. १।४।२.

* 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति त्रिरभ्यासः सामिधेन्यां प्रथमोत्तमस्थानधर्मः, न ऋग्धर्मः। (या काचित् प्रथमा सामिधेनी स्यात्, तां त्रिरनुब्रूयात्, न तु 'प्र वो वाजा' इतीमामेवेत्यर्थः)। भा. ९।१।९।३३.

⧗ **त्रिः प्रथमां त्रिरुत्तमामन्वाह** इति न्यायेन परिधानीयायास्त्रिरावृत्तिः (प्रथमां ऋचं त्रिवारं अनुवचनं कर्तव्यं उत्तमायाः अन्तिमायाश्च ऋचः त्रिः अनुवचनं कर्तव्यम् । इति वाक्यार्थः । परिधानं यया क्रियते सा अन्तिमा, ऋक् परिधानीया नाम) । ऐब्रासा. १७।५।१३.

⧗ **त्रिकस्तृचे धुर्ये स्यात् । १०।५।३।१०॥**

एकत्रिके ऋतुविशेषे त्रिकः स्तोमः धुर्ये धुरि साम्नि गायत्रगानविशेषात्मके तृचे स्यात्, न तु एकस्यामृचि । धुर्ये इत्येकवचनं सामान्याभिप्रायम् । सर्वाण्येव धूर्गानानि तृचेषु स्युः । इति पूर्वः पक्षः ।

एकस्यां वा, स्तोमस्यावृत्तिधर्मत्वात् । ११॥

एकत्रिके ऋतौ धूर्गानानि एकस्यां एकैकस्यां ऋचिं अभ्यासेन त्रित्वमापन्नायां स्यात्, न तृचेषु । स्तोमस्य आवृत्तिधर्मत्वात् । ‘ आवृत्तं धूर्षु स्तुवते ’ ‘ पुनरावृत्तं पृष्ठैरुपतिष्ठते ’ इति आवृत्तिर्धर्म उक्तः । तस्मात् धुरि साम ऋचि गेयम्, न तृचे । के.

✽ **त्रिकस्तोमधूर्गानं** एकत्रिके ऋतौ एकस्या एव ऋचस्त्रिरभ्यासेन । भा. १०।५।३।१०–११.

✽ **त्रिकपालं** वैष्णवम् । भा. १०।५।१।१, ✽ **त्रिकपाले** वैष्णवे आग्नेयाष्टाकपालगतप्रथमकपालत्रयविध्यन्तः । १०।५।१।१-६, ✽ त्रिकपाले वैष्णवे राजसूयगतपूर्वत्रिसंयुक्तगते सौमिकातिथ्येष्टिगतवैष्णवशब्दो धर्मान्नातिदिशति । ७।३।६।१७.

✽ **त्रिणवः** स्तोमः अतिरात्रे बहिष्पवमाने काम्यो विहितः ‘त्रिणवेनौजस्कामम्’ । वि. ५।३।४, ✽ त्रिणवः (त्रिः नव– ३×९ = २७) स्तोमविशेषः अष्टरात्रे पञ्चमेऽहनि । ७।३।१०. ✽ त्रिणवे अतिरात्रे आगमेन संख्यापूरणं पाठक्रमेणैव ऋच आगमयितव्याः । भा. ५।१।६।१३. ✽ त्रिणवे अतिरात्रे विवृद्धानां षण्णां तृचानां पर्यासोत्तरं निवेशो न प्राक्, बहिष्पवमाने । वि. ५।३।४, ✽ त्रिणवे अतिरात्रे विवृद्धस्तोमके साम्नामागमेन वृद्धिः न त्वभ्यासेन । १०।५।६.

⧗ **त्रिदशामरत्वन्यायः** । मरिष्यमाणानामपि त्रिदशानां (देवानां) दीर्घकालजीवित्वमात्रेण यथा अमराः निर्जराः इति व्यपदेशः तथारीत्या इत्यर्थः । संग्रहः. ✽ अन्तवत्त्येवं भूताकाशे वाय्वादिस्वकार्यापेक्षया अधिककालावस्थायित्वाभिप्रायेण अनन्तत्वव्यपदेशः इति त्रिदशामरत्वन्यायेन तदन्यथानयने उपक्रमसंकीर्तितान्तवत्त्वदोषपरिहाराला‌भात् । (आकाशस्तल्लिङ्गात् १।१।८।२२ ब्रसू.) । पराक्रमः.

✽ **त्रिपुटी** च ज्ञान–आत्म–विषयरूपा ज्ञाने । मणि. पृ. १८.

✽ **त्रिप्रवरस्यैव** दर्शपूर्णमासादिकर्माधिकारः । एकार्षेयस्य, द्व्यार्षेयस्य, पञ्चार्षेयस्य च नास्त्यधिकार इति जैमिनेर्मतम् । अस्ति तेषामप्यधिकारः इति ऋष्यन्तरमतम् । पञ्चार्षेयेणापि त्रय एव प्रवरा उच्चार्या इति मतान्तरम् । के. ६।१।११।४३.

✽ **त्रिरात्रः** अहीनविशेषः । तत्र अहीनद्वादशाहधर्मातिदेशः । वि. ८।२।५, ✽ **त्रिरात्रस्य** मध्यमेऽहनि षोडशी ग्रहो गृह्यते । ‘मध्यमेऽहंस्त्रिरात्रस्य’ । १०।५।९, स चाग्रयणपात्रात् उक्थ्यादनन्तरं ग्राह्यः । १०।५।१०, स च तृतीयसवने एव ग्राह्यो न पूर्वयोः सवनयोः । १०।५।११. ✽ **त्रिरात्रे**–गर्गत्रिरात्रे आज्यदोहसामगानकाले लौकिकाग्नेरेव उपनिधानम्, न वैदिकाग्नेः । भा. ७।३।१२।३०, ✽ त्रिरात्रे द्वादशाहस्य आद्यानामेव त्रयाणामह्नां विध्यन्तस्यातिदेशः, न तु केषांचित् त्रयाणाम् । १०।५।१।१–६.

⧗ **त्रिवत्सश्च । १०।३।१६।६०॥**

साद्यस्क्रे सोमे साण्डः त्रिवत्सः सोमक्रयणः । प्रकृतितश्च चोदकप्राप्तानि क्रयद्रव्याणि ‘ अजया क्रीणाति, हिरण्येन क्रीणाति, ऋषभेण क्रीणाति, अश्वशफेन क्रीणाति, वाससा क्रीणाति ’ इत्येवमादीनि । तत्र त्रिवत्सः प्रत्यक्षः क्रीणातिना संबध्यते चोदकप्राप्तं तु आनुमानिकम् । तस्मात् त्रिवत्सः चोदकप्राप्तस्य कृत्स्नस्य क्रयार्थस्य निवर्तकः । एकां पञ्च इतिवत् इति चकारार्थः । सिद्धान्त एवोक्तः ।

तथा च लिङ्गदर्शनम् । ६१ ॥

साद्यस्क्रे सोमे साण्डेन त्रिवत्सेन सोमक्रयणेन चोदकप्राप्तानि सर्वाणि सोमक्रयद्रव्याणि व्यावर्त्यन्ते इत्यत्र

लिङ्गदर्शनं तथा च भवति । अपरस्मिन् साद्यस्क्रे 'स्त्री गौः सोमक्रयणी, व्यावृत्ता ह्येषां स्पर्धा' इत्युक्तम् । तत्र यतः स्त्री गौः निखिलसोमक्रयसाधनं बाधित्वा सर्वस्थाने स्थिता, अतः स्पर्धा कलहो निवृत्तः इति तदर्थः । तथा च इतरसाद्यस्क्रे यथा स्त्री गौः सर्वबाधिका, तथा प्रथमे साद्यस्क्रे साण्डो गौः निखिलक्रयसाधनबाधकः इति लिङ्गदर्शनमुक्तम् । के.

* त्रिवत्साः त्रिहायन्यः । टुप्. ११।२।१३।५४.

* **त्रिवत्सेन** साण्डेन साद्यस्क्रे सोमक्रयार्थं विहितेन प्राकृतसर्वक्रयद्रव्यस्य बाधः । भा. १०।३।१६।६०–६१.

* त्रिवत्से सर्वक्रयद्रव्यस्थानापन्ने यथा आरुण्यस्य निवेशः तथा कौस्तुभे द्रष्टव्यम् । भाट्ट. ३।१।६ पृ. १९१.

⧗ **त्रिवत्साधिकरणम्** । साद्यस्क्रे त्रिवत्सेन साण्डेन सोमक्रयणेन प्राकृतस्य कृत्स्नस्य क्रयसाधनस्य बाधः ॥

त्रिवत्सश्च । १०।३।१६।६० ॥

भाष्यम्— इदं तावदपर्यवसितं तिष्ठतु । अथाधिकरणान्तरं प्रस्तूयते । अस्ति साद्यस्क्रे 'साण्डस्त्रिवत्सः सोमक्रयणः स्पर्धमानानाम्' इति । सन्ति क्रयार्थानि द्रव्याणि चोदकप्राप्तानि 'अजया क्रीणाति, हिरण्येन क्रीणाति, ऋषभेण क्रीणाति, अश्वशफेन क्रीणाति, वाससा क्रीणाति' इत्येवमादीनि । तत्र संशयः किं त्रिवत्सः ऋषभस्य निवर्तकः, अथवा सर्वेषां क्रयार्थानां द्रव्याणामिति । किं प्राप्तम् ? ऋषभस्य निवर्तक इति । कुतः ? पुंगवत्वात् । पुंगवत्वेन सामान्येन पुंगवोऽसौ विधीयते । कुतः पुंगवत्वम् ? साण्डश्रवणात् । तस्मात् ऋषभस्य निवर्तक इति ।

एवं प्राप्ते, ब्रूमः । त्रिवत्सश्च । किम् ? कृत्स्नस्य क्रयार्थस्य निवर्तकः इति । प्रत्यक्षः स क्रीणातिना संबध्यते, तेन चोदकप्राप्तं निवर्तयति । तस्मात् कृत्स्नस्य क्रयार्थस्य निवर्तक इति ।

तथा च लिङ्गदर्शनम् । ६१ ॥

भाष्यम्— एवं च कृत्वा लिङ्गं दर्शयति । किं लिङ्गं भवति ? एवमाह । अपरस्मिन् साद्यस्क्रे 'स्त्री गौः सोमक्रयणी व्यावृत्ता ह्येषां स्पर्धा' इति । यदि सर्वस्य क्रयार्थस्य निवर्तिका स्त्री गौः, ततः सैव एकाकिनी केन सह स्पर्धिष्यते इति । इतरथा सर्वस्य अनिवर्तिकायां सङ्घस्य स्पर्धा भवेत् । तत्रास्यां वर्तमानायां स्पर्धायाम्, व्यावृत्ता ह्येषां स्पर्धा, इति नोपपद्यते । तस्मात् सर्वस्य निवर्तिकेति । त्रिवत्सोऽपि तत्समानश्रुतिः । सोऽपि च सर्वस्य निवर्तक इति ।

एवं वा । यदि त्रिवत्सः सर्वेषां निवर्तकः, तदा तं अपबाधमाना साद्यस्क्रान्तरे स्त्रीगवी श्रूयमाणा केवला स्यात् । तत्र 'व्यावृत्ता ह्येषां स्पर्धा' इति दर्शनमुपपद्यते । इतरथा हि केवलस्य ऋषभस्य अपबाधितारं त्रिवत्सं निवर्तयन्ती सङ्घमध्यपतिता स्पर्धेतापि । तत्र 'व्यावृत्ता ह्येषां स्पर्धा' इति वचनं नावकल्पते । अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकस्त्रिवत्स इति ।

सोम — त्रिवत्सश्च कृत्स्नस्य निवर्तकः इति सूत्रार्थः ।

वि— 'त्रिवत्सेनर्षभो बाध्यः कृत्स्नं वा क्रयसाधनम् ।, ऋषभः पुंगवत्वात्, न क्रयोद्देशविधानतः ॥' क्रयसाधनं कृत्स्नं बाध्यम् ।

भाट्ट— साद्यस्क्रे 'त्रिवत्सः साण्डः सोमक्रयणः' इत्यत्र 'कर्तव्यः' इति क्रियापदाध्याहारावश्यम्भावे तदुपात्तभावनायां अप्राप्तस्य त्रिवत्सत्वस्य तावत् विधेयत्वमावश्यकम् । तच्च यदि तावत् क्रियोद्देशेन विधीयते, तदा ऋषभादिपुंसीव अजादिषु स्त्रीष्वपि प्रसक्तौ साण्डशब्दस्य अवयुत्यानुवादत्वापत्तेः, विशिष्टोद्देशे च वाक्यभेदात् साण्डानुवादेनैव त्रिवत्सत्वविधिः । तस्य च 'ऋषभेण क्रीणाति' इत्यनेन क्रये अपि प्राप्तत्वात् सोमक्रयणः इत्यनुवादमात्रम् । न च साण्डस्य अग्नीषोमीयादावपि सत्त्वेन तत्र त्रिवत्सत्वप्रसक्तेः तस्यापि अवयुत्यानुवादत्वापत्तिः, आवश्यके अन्यतरस्य अवयुत्यानुवादत्वे जघन्यस्यैव तदौचित्यात् । अतश्च सर्वत्रैव त्रिवत्सत्वविधानान्न कस्यापि द्रव्यस्य अनिवृत्तिः । इति प्राप्ते, न क्रियोद्देशेन त्रिवत्सत्वमात्रं विधीयते, येन साण्डादिपदस्य अवयुत्यानुवादत्वापत्तिः । अपि तु त्रिवत्सत्वपुंस्त्वैकत्वविशिष्टद्रव्यान्तरस्यैव क्रियोद्देशेन विधिः त्रिवत्सत्वादिक्रयकरणत्वानामेव वा एकप्रथमालक्षितानां द्रव्यपरिच्छेदद्वारा विधानात् अवाक्यभेदः । अतश्च पुंस्त्वेन स्त्रीत्वस्यापि बाधात्

साण्डपदं नित्यानुवादः, न तु अवयुत्यानुवादः। अत एव एकत्वस्यापि विधानात् सर्वक्रयद्रव्येषु प्रत्येकं न त्रिवत्सत्वादेर्निवेशः। न च एकत्वस्यापि प्रतिक्रियं निवेशापत्तेर्न सर्वक्रयेषु एकद्रव्यतासिद्धिः, तथात्वे द्रव्यबहुत्वात् बहुवचनप्रसङ्गेन एकत्वस्य क्रयसमुदाये एव प्रयाजैकादशत्वन्यायेन विधेयत्वात् एकद्रव्यत्वसिद्धेः। अत एव पुंस्त्वानुरोधेन हिरण्यादिव्यावृत्तावपि गोत्वाजत्वयोः द्वयोर्मध्ये गोत्वस्य अनेकक्रयसाधनत्वेन भूयोऽनुग्रहस्य न्याय्यत्वात् तेनैव क्रयान्तरे प्रसङ्गसिद्धौ अजत्वस्यापि बाधात् 'गोत्वावच्छिन्नः एव पुमान् त्रिवत्सः एकः सर्वक्रयेषु द्रष्टव्यः' इति कौस्तुभे व्यक्तम्। अतो द्रव्यान्तरनिवृत्तिः। अत एव 'स्त्री गौः सोमक्रयणी व्यावृत्ता ह्येषां स्पर्धता' इत्यादौ निकायभूते अग्रिमे यागे द्रव्यान्तराभावात् स्पर्धाऽभावानुवादोऽपि संगच्छते।

मण्डन— 'बाध्येत वत्सेन पुरोक्तसर्वम्।'

शंकर— 'त्रिवत्सोऽप्येवमेव स्यात्।' एवमेव प्राकृतकृत्स्नक्रयद्रव्यस्य बाधकः।

* त्रिवत्सः सर्वसोमक्रयानुवादेन विधीयमानः तदीयसर्वद्रव्यस्थानापन्न इति दशमे त्रिवत्साधिकरणे वक्ष्यते। **कौ.** ३।१।६।१२ पृ. १६७.

* त्रिविधं नामधेयं कर्मनामधेयं संस्कारनामधेयं यौगिकं चेति। तत्र यौगिकं नातिदेशकम्। कथम्? येनैव हि योगेन द्वादशाहे प्रायणीयशब्दः तेनैव गवामयनेऽपि इति। **वा.** ७।१।१।१२.

* त्रिवृत् एव सर्वः भूः नाम यागः वैश्वदेवः। तस्य विश्ववत्यः स्तोत्रीया धेनुर्दक्षिणा। धेनुश्च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिका। **भा.** १०।६।६।१५. * त्रिवृत् स्तोमः स्तोमेषु मुख्यः, प्रजापतेर्मुखतः सृष्टत्वात्। **वि.** १।४।१४, * त्रिवृति अग्निष्टुति स्तोमगतसंख्याविकारः। स्तोत्रीयाणां नवानामृचां स्तोमविषयमेव त्रिवृत्त्वम्। १०।६।७.

⧗ त्रिवृति संख्यात्वेन सर्वसंख्याविकारः स्यात्। १०।६।७।२२॥

त्रिवृदग्निष्टोमः इति श्रुते त्रिवृति अग्निष्टोमे क्रतौ त्रिवृत्त्वं संख्यात्वेन सामान्येन सर्वसंख्याविकारः येषुकेषुचिदङ्गेषु काचित् संख्या श्रुता, तासां सर्वासां संख्यानां विकारः स्यात् तांतां संख्यामपनीय त्रिवृत्त्वं (नवत्वं) ग्राह्यम्। इति पूर्वः पक्षः।

स्तोमस्य वा तल्लिङ्गत्वात्। २३॥

पूर्वपक्षं वाशब्दो व्यावर्तयति। न सर्वसंख्यानां विकारः त्रिवृत्त्वम्, किंतु स्तोमस्य संख्यानां विकारः। पञ्चदशसप्तदशैकविंशत्वं विकृत्य सर्वत्र स्तोमे तु त्रिवृत्त्वं स्यात्। तल्लिङ्गत्वात् स्तोमलिङ्गत्वात् यथा 'त्रिवृत् बहिष्पवमानः' इत्यत्र त्रिवृत्त्वेन नवत्वेन स्तोमविषयता परिच्छिन्ना, एवं त्रिवृदग्निष्टोमः इत्यत्रापि। तस्मात् अस्मिन् क्रतौ त्रिवृदेव सर्वे स्तोमाः न पञ्चदशादिरपरः। इति सिद्धान्तः। **के.**

* त्रिवृति संख्यात्वेन। 'त्रिवृद् बहिष्पवमानः' इति वाक्ये सति त्रिवृच्छब्दश्रवणे तृचत्रयाद्यनुक्रमणवशेन स्तोत्रीयानवके समुदायप्रसिद्धौ कल्पितायां अग्निष्टुत्यपि क्लृप्तया रूढ्या योगबाधात् सर्वस्तोत्रेषु स्तोत्रीयानवकमेव विधीयते इति दशमे वक्ष्यते। एतदधिकरण- (यववराह १।३।४) प्रयोजनकथनपरत्वेन तदधिकरणस्य (दाशमिकस्य) न पौनरुक्त्यम्। **कु.**

* त्रिवृत्सु अहःसु जनकसप्तरात्रीयेषु द्वादशाहधर्मातिदेशः। **भा.** ८।३।२।३–५.

* त्रिवृदग्निष्टोमः इति दशमे (१०।६।७।२२–२३) उदाहृत्य किं अग्निष्टोमसाधनमात्रगतसंख्याविकारिका इयं त्रिवृत्संख्या, स्तोमगतसंख्याविकारिका वेति संदिह्य त्रिवृत् रज्जुः इत्यादौ लोके त्रिवृच्छब्दस्य त्रैगुण्यमात्रवाचित्वदर्शनात् बहिष्पवमानवच्च संख्यात्वसामान्येन संख्यामात्रकार्ये विनियोगप्रतीतेः सर्वसंख्याविकारिका त्रिवृत्संख्या इति 'त्रिवृति संख्यात्वेन सर्वसंख्याविकारः स्यात्' इति सूत्रेण पूर्वपक्षयित्वा, त्रिवृद्बहिष्पवमानं इत्युक्त्वा स्तोत्रीयानवकाम्नानात् 'त्रयः त्रिकपालाः त्रिवृता स्तोमेन संमिताः' इति च नवानां कपालानां त्रिवृता स्तोमेन समानवचनात् त्रिवृच्छब्दस्य स्तोत्रीयानवकवाचित्वप्रतीतेः। अत्र उभयसंभवेऽपि वैदिकत्वसामान्येन स्तोत्रीयानवकविषयत्वावधारणात् स्तोमगतैव पञ्चदशत्वादिसंख्या त्रिवृत्संख्यया बाध्यते इति 'स्तोमस्य वा तल्लिङ्ग-

त्वात्’ इति सूत्रेण सिद्धान्तं वदता उपपादयिष्यते । सु. पृ. २१७. * ‘त्रिवृदग्निष्टोमः’ इत्यादौ स्तोत्रविशेषोपस्थापकप्रकृतिलिङ्गाभावात् अविशेषात् सर्वस्तोत्रेषु त्रिवृत्त्वान्वयः । **सोम.** १०।६।६. * त्रिवृदग्निष्टोमः । तत्र त्रिवृत्संख्या स्तोमविषया एव नियम्यते, न साधनमात्रे । **भा.** १०।६।७।२२-२३.

* त्रिवृदादयः चत्वारः स्तोमाः अग्निष्टोमे विद्यन्ते त्रिवृत् पञ्चदशः सप्तदशः एकविंश इति । **वि.** ५।३।१५.

त्रिवृच्चर्वश्ववालाधिकरणम् ॥

अथवा त्रिवृच्चर्वश्ववालादिशब्दा एवात्र लोकवेदयोर्विप्रतिपत्तौ निरूप्यन्ते । अत्रायं पूर्वपक्षिणोऽभिसन्धिः, त्रिवृच्छब्दो हि लोके ‘त्रिवृद्रज्जुः, त्रिवृद् ग्रन्थिः’ इति त्रिगुणरज्ज्वादौ प्रसिद्धः । वेदे तु ‘त्रिवृद्बहिष्पवमानम्’ इत्युक्त्वा तृचत्रयं समनुक्रान्तम् । तृचशब्दश्च स्तोत्रीयऋक्त्रयवचनः । तेन वेदे स्तोत्रीयानवकवचनस्त्रिवृच्छब्दः प्रतीयते । तथा चरुशब्दश्च लोके स्थालीवचनः प्रसिद्धः । वेदे तु ‘आदित्यः प्रायणीयश्चरुः’ इति विधाय ‘अदितिमोदनेन’ इति वचनात् याज्ञिकप्रसिद्धेश्च अनवस्रावितान्तरूष्मपक्वौदनवचनः चरुशब्दो विज्ञायते । एवं ‘आश्ववालः प्रस्तरः’ इत्यत्रापि लोकप्रसिद्ध्या अश्ववालः तुरगकेशः प्रतीयते । वेदे तु काशेषु अश्ववालशब्दप्रसिद्धिः । एवं हि श्रूयते ‘यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत्, सोऽपः प्राविशत्, स वालधौ गृहीतो वालानमोचत्, ते वालाः काशतां गताः’ इति । तेन लौकिकवैदिकप्रयोगविप्रतिपत्तौ विनिगमनाहेत्वभावात् विकल्प एवेति । न च लोकप्रसिद्धेर्धर्मं प्रति अनङ्गत्वात् वेदप्रसिद्धास्वीकारः एव युक्तः, पदार्थावधारणे विशेषाभावात् । तदुक्तं ‘नैतदेवं पदार्थेषु नहि वेदो विशिष्यते । अदृष्टार्थे तु वाक्यार्थे लोकात् स ह्यतिरिच्यते ॥’ इति । (वा. पृ. २२२) । अथवा लौकिक्येव बलीयसी । सा हि वेदनिरपेक्षैव प्रवर्तते । वेदप्रसिद्धिस्तु वाक्यशेषगतलोकप्रसिद्धपदसमभिव्याहारसापेक्षा । तेन लोकप्रसिद्धेर्बलीयस्त्वात् यत्र लोकाविरोधः, तत्र भवतु वैदिकार्थस्वीकारः, लोकविप्रतिपत्तौ तु लोकप्रसिद्धार्थस्वीकारः एव । तथा सति अर्थवादस्यापि ‘आदित्यो वै यूपः’ ‘यजमानः प्रस्तरः’ ‘स्वर्गो लोक आहवनीयः’ इतिवत् गौण्या वृत्त्या लौकिकार्थप्रशंसापरत्वमेवेति । तथा शास्त्रस्थमन्वादिप्रसिद्धिरपि एतत्पक्षानुगुणा । यदाह ‘कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत् ।’ (मनु. २।४४) ‘त्रिवृता ग्रन्थिनैकेन’ इति च ॥ (मनु. २।४३) न च लोकप्रसिद्धस्य त्रिवृच्छब्दस्य बहिष्पवमानसामानाधिकरण्यासंभवेन वैदिकार्थपरिग्रहः इति वाच्यम् । यतः स्तोत्रीयानवकवचनत्वेऽपि बहिष्पवमानस्तोत्रस्य तत्साध्यत्वात् सामानाधिकरण्यानुपपत्तेस्तदवस्थत्वात् । अथ तत्र कार्यकारणयोरेकत्वोपचारात् सामानाधिकरण्यम्, तदत्रापि त्रिगुणयज्ञोपवीतस्यापि ‘यज्ञोपवीतिना कर्म कर्तव्यम्’ इत्यधिकारहेतुत्वात् कार्यकारणभावोपपत्तेः नानुपपन्नम् । तेन उक्तन्यायेन लोकप्रसिद्धेर्बलीयस्त्वात् लौकिकार्थपरिग्रह एव । अथ प्रसिद्धितुल्यत्वम्, तदा लौकिकार्थेष्वपि वेदविरोधाभावेन विप्रतिपत्तौ समत्वात् विकल्प एवेति । एवं प्राप्ते, अभिधीयते । भवेदेवं यदि अत्र लौकिकवैदिकपदार्थयोस्तुल्यत्वं भवेत् । अपूर्वसिद्ध्यर्थे हि वेदार्थानुष्ठानम् । तत्र वाक्यार्थवत् पदार्थोऽपि यत्र वेदेनैव प्रतिपादितोऽस्ति, तत्र वैदिकपदार्थानुष्ठानादेव अपूर्वसिद्धिः । अन्यथा वेदस्य तत्पदार्थप्रतिपादनवैयर्थ्यप्रसङ्गात् । यत्र पुनर्वैदिकः पदार्थो नास्ति, तत्र लौकिकपदार्थानुष्ठानादेव अपूर्वसिद्धिर्वेदानुमतेति युक्तम् । तदत्र ‘त्रिवृद्बहिष्पवमानम्’ इत्युक्त्वा तृचत्रयानुक्रमणं तदैव अर्थवद्भवति, यदि लौकिकपदार्थपरित्यागेन स्तोत्रीयानवकवचनः त्रिवृच्छब्दः अत्र अध्ययनविध्यनुमतो भवेत् । तेन यत्रापि तृचत्रयानुक्रमणं नास्ति ‘त्रिवृदग्निष्टुदग्निष्टोमः’ इत्यादौ, तत्रापि स्तोत्रीयानवकवचनः त्रिवृच्छब्दो विज्ञायते । न चैतन्न संभवति ।

यद्यपि ‘ब्रह्मस्तोमः’ इत्यादौ समुदायवचनं स्तोमशब्दः, तथापि ‘पञ्चदशः स्तोमो भवति’ इति वेदे श्रवणात् डप्रत्ययान्तस्य च पञ्चदशशब्दस्य व्याकरणानुशासनेन याज्ञिकप्रसिद्धेश्च स्तोत्रीयासमुदायवचनत्वात् तत्समानाधिकरणोऽयं स्तोमशब्दः स्तोत्रीयासमुदायवचनो विज्ञायते । एवं ‘त्रिवृदग्निष्टुदग्निष्टोमः’ इत्यादौ त्रिवृत्समभिव्याहारात् स्तोत्रीयानवकार्थत्वमेवेति नानुपपन्नम् । न च मनुवचन-

विरोधः, मनुवचनस्यापि लौकिकप्रयोगान्तर्निविष्टत्वेन अविरोधकत्वादिति । तदुक्तं '**त्रिवृच्छब्दः प्रयुक्तो यः स्तोत्रीयानवकं प्रति । कस्तं शक्तस्ततोऽन्यत्र नेतुं जन्मशतैरपि ॥**' इति । (वा. पृ. २२३) । यत्र पुनर्वेदप्रसिद्धार्थपरिग्रहो न संभवत्येव, यथा 'त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति' इत्यादिषु; तत्र लोकप्रसिद्धार्थस्वीकारः एव न्याय्यः, न तु अन्यत्रापि इति । एवं चर्वश्ववालशब्दयोरपि उक्तन्यायेन वेदप्रसिद्धार्थस्यैव अपूर्वसिद्ध्युपायत्वम्, न लौकिकस्य । तथाच 'आदित्यः प्रायणीयश्चरुः' 'आश्ववालः प्रस्तरः' इति विधाय 'अदितिमोदनेन' इति, 'ते वालाः काशतां गताः' इति च ओदनकाशयोः स्तुत्यवगमात् विधिस्तुत्योश्च समानविषयत्वनियमात् तयोरेव चरु-अश्ववालशब्दार्थत्वम् । न च गौणत्वाश्रयणेन लोकप्रसिद्धस्थालीतुरगवालस्तुतिरेवेयम् 'आदित्यो वै यूपः' 'यजमानः प्रस्तरः' 'स्वर्गो लोक आहवनीयः' इतिवत् भविष्यतीति वक्तव्यम् । यतो गत्यन्तरासंभवेन हि तत्र तथा आश्रितम् । न हि आदित्यादीनां यूपादिरूपत्वं संभवति । इह पुनरोदनस्य यागसाधनत्वसंभवात्, काशस्य च प्रस्तररूपत्वसंभवात् वाक्यशेषात् तदर्थनिर्णय एवेति । तदुक्तं '**अर्थवादकृताऽप्यत्र प्रतिपत्तिर्बलीयसी । तद्ग्राह्यत्वादृते नास्य तस्याप्यस्ति प्रयोजनम् ॥**' इति । (वा. पृ. २२३) । न च 'संदिग्धेषु वाक्यशेषान्निर्णयः' इत्यनेन तुल्यार्थत्वम्, यतो यत्र हि शब्दार्थसंदेहे वाक्यशेषान्निर्णीयते, तत्र तन्न्यायविषयत्वमेव । इह पुनर्लोकवेदयोः त्रिवृदादिपदेषु अर्थद्वयस्य असंदिग्धत्वेन लौकिकस्यार्थस्य वैदिकेनार्थेन बाध एव, न विकल्प इति व्युत्पाद्यते । अतो न तुल्यार्थत्वमिति । तदुक्तं '**लौकिकी प्रतिपत्तिर्हि स्वार्थे निःसंशया स्थिता । वैदिक्यपि तथा स्वार्थे बाध्यते न विपर्ययात् ॥**' इति । (वा. पृ. २२४) । प्रयोजनम्— कर्मसु विकल्पेन लौकिकवैदिकार्थोपादानं यदि पूर्वपक्षः । सिद्धान्ते तु लौकिकार्थबाधेन वैदिकार्थोपादानमेवेति । सूत्रं तु शास्त्रस्यैव प्रतिपत्तिर्बलीयसी, धर्मस्य अपूर्वात्मनः तन्निमित्तत्वात् शास्त्रनिमित्तत्वादिति । तौता.

⧗ त्रिवृच्चर्वाश्ववालाधिकरणम् । (१।३।४।९ सूत्रे) लोकवाक्यशेषयोर्विरोधे बलाबलविचारः ॥

वा— '**त्रिवृच्चर्वाश्ववालादेर्लोकेऽन्योऽर्थः प्रतीयते । वेदे तदभियुक्तैश्च तस्मादन्यो विलक्षणः ॥ तत्र किं तुल्यकल्पत्वात् पदार्थे लोकवेदयोः । समा विप्रतिपत्तिः स्यादथवैका बलीयसी ॥ लोके तावत् त्रिवृच्छब्दस्त्रिगुणत्वस्य वाचकः । त्रिवृद्रज्जुस् त्रिवृद् ग्रन्थिर् वेदे तु नवके स्थितः ॥**' त्रिवृत् बहिष्पवमानं इत्युक्त्वा तृचत्रयमनुक्रान्तं इति स्तोत्रीयाऋङ्नवकवचनः एव त्रिवृच्छब्दो विज्ञायते ।

'**तथाऽयं चरुशब्दोऽपि लोके स्थालीनिबन्धनः । याज्ञिकानां च वेदे च प्रसिद्धस्त्वोदनं प्रति ॥**' अनवस्रावितान्तरूष्मपक्वौदनवचनो हि याज्ञिकानां चरुशब्दः प्रसिद्धः । तथा वेदेऽपि 'आदित्यः प्रायणीयः पयसि चरुः' इति विहिते पश्चादुक्तात् 'अदितिमोदनेन' इति वचनाच्च ओदनवचनत्वं ज्ञातम् ।

एवं 'आश्ववालः प्रस्तरः' इति अश्वजातीयवालमयः प्रस्तरः लोकप्रसिद्ध्या विज्ञायते । वैदिकवाक्यशेषात्तु काशेषु अश्ववालप्रसिद्धिः । एवं हि श्रूयते 'यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत् सोऽपः प्राविशत्' 'स वालधौ गृहीतः स वालान् मुक्त्वा विवेश ह । ते वालाः काशतां प्राप्ताः कार्योऽतः प्रस्तरस्तु तैः ॥'

'**ऐक्षव्यौ विधृती ये च ते इक्ष्ववयवात्मिके । लोके सिद्धे तथा वेदे काशानामेव मूलके ॥ एवमादिषु सर्वेषु प्रतिपत्तिविपर्यये । प्रतिपत्तेः समानत्वाद्विकल्पो हि प्रसज्यते ॥**' ननु च लोकप्रसिद्धेः धर्मं प्रति अनङ्गत्वात् वेदप्रसिद्धिरेव ज्यायसी । '**नैतदेवं पदार्थेषु नहि वेदो विशिष्यते । अदृष्टहेतुवाक्यार्थे लोकात् स ह्यतिरिच्यते ॥ तस्मादुभय्यपि त्वेषा प्रतिपत्तिः समा भवेत् । यदि वा पूर्वभावित्वात् लौकिक्येव बलीयसी ॥**' वेदनिरपेक्षा हि लोकप्रसिद्धिः आत्मानं लभते । वैदिकी पुनः लोकप्रसिद्धपदान्तरसामानाधिकरण्येन सिध्येत् '**तत्र लोकाविरुद्धा या वैदिकी सैव गृह्यते । लोकसिद्धिं व्यतिक्रम्य साऽऽत्मानं नैव विन्दति ॥**' '**तेष्वदर्शना-**

द्विरोधस्य ' इति च तेषु लौकिकेषु पदार्थेषु अदर्शनात् विरोधस्य अर्थवादानां च अन्यपरत्वेन गुणवादप्रायत्वात् । आदित्ययूप–यजमानप्रस्तर–स्वर्गाहवनीयादिवचनवत् कथमपि प्ररोचनाशेषत्वात्, संज्ञासंज्ञिसंबन्धकरणव्युत्पादनव्यापाररहितत्वाच्च न पदार्थप्रतिपत्त्यङ्गत्वमध्यवसीयते । तदाश्रयणे च विधिविरोधप्रसङ्गात् तेष्वेव वा दर्शनात् विरोधस्य इत्यभिप्रायः । तथा शास्त्रस्थमन्वादिप्रसिद्धिरपि अस्मत्पक्षानुगुणैव । यथा आह 'कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत् ।' (मनु. २।४४) 'त्रिवृता ग्रन्थिनैकेन' (मनु. २।४३) इति । तस्मात् समाऽपि तावत् भवतु । इति प्राप्तेऽभिधीयते । 'शास्त्रस्था प्रतिपत्तिर्या सैवात्र ज्यायसी भवेत् । धर्मस्य तन्निमित्तत्वात् ससाधनफलात्मनः ॥ अर्थवादकृताऽप्यर्थप्रतिपत्तिर्बलीयसी । तद्ग्राह्यत्वादृते नान्यत् तस्या ह्यस्ति प्रयोजनम् ॥ गौणो वा यदि वा मुख्यो वेदेनाश्रीयते हि यः । स धर्मसाधनत्वेन पदार्थोऽध्यवसीयते ॥ त्रिवृच्छब्दः प्रयुक्तो यः स्तोत्रीयानवकं प्रति । कस्तं शक्तस्ततोऽन्यत्र नेतुं जन्मशतैरपि ॥' तेन यत्र 'त्रिवृदग्निष्टोमः' इति श्रूयते, तत्र तेनैवार्थेन भवितव्यम् । एवं स्तोमशब्दो यद्यपि ब्राह्मणस्तोम इत्यादिषु समुदायमात्रवचनत्वेन प्रसिद्धः, तथापि 'त्रिवृदेव स्तोमो भवति' 'पञ्चदशः स्तोमो भवति' इति वेदे श्रवणात् 'स्तुतेश्च मानं स्तोमः' इति याज्ञिकस्मरणात्, तथा 'स्तोमे डविधिः पञ्चदशाद्यर्थः' (पा० ५।१।५७ सूत्रे वार्तिकं तदस्य परिमाणं इत्यनुवर्तते । स्तोमे स्तुतेः परिमाणे बोधे संख्याशब्दात् डप्रत्ययो भवति । डित्वं टिलोपार्थम्) इति व्याकरणशास्त्रप्रसिद्धेः अवश्यमेव त्रिवृदादिषु लोकप्रसिद्धिरतिक्रमणीया । यत्तु मनुवचनम्, तत् उभयाश्रयत्वात् समत्वेनापि युज्यते । यद्वा तत्रापि नवतन्तुकमेव त्रिवृच्छब्दात् प्रत्येष्यते । तथा रशनात्रिवृत्त्वमपि इति । यद्वा यथैवायं नवके दृष्टः, तथाऽयं स्तोत्रीयागतेऽपि, इति यत्रैव तत्संभवः तत्रैव तत्प्रसिद्धानुपाती भवति । यत्र तु संख्येयान्तरविषयत्वम्, तत्र 'वैदिकोऽर्थो गौणो गृह्यतां लौकिको वा मुख्यः' इति तादृशे विषये मुख्यार्थत्वात् लौकिकप्रसिद्धिरेव ग्रहीतव्या इत्युत्तरसूत्रे वक्ष्यामः 'चोदितं तु प्रतीयेताविरोधात्' इति ।

तथा चरुशब्दोऽपि अन्याय्यानेकार्थाभिधानप्रतिबद्धशक्तित्वात् एकत्र नियम्यमानो याज्ञिकवेदप्रसिद्धिभ्यां ओदनविषय एव भवति ।

आश्ववालैक्षवीशब्दौ तु यदि तावत् वैदिकप्रयोगलब्धसमुदायप्रसिद्धित्वेन लौकिकीं अवयवप्रसिद्धिं जहीतः, ततः सिद्धमेव शास्त्रस्थप्रतिपत्तिबलीयस्त्वम् । अथापि श्येनजात्युपमितप्रसिद्धश्येनयागे गौणत्वद्वारा वा आप्तप्रसिद्धिः 'समानमितरत् श्येनेन' इत्यादिष्विव आश्रीयते, तथापि शास्त्रकल्पितत्वात् धर्मं प्रति बलीयस्त्वम् । 'अथापि शब्दगौणत्वं तथापि बलवत्तरम् । स्वतन्त्रस्य हि वेदस्य दृष्टं चेन्न निवार्यते ॥ गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयम् । वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥' न चात्र 'संदिग्धेषु वाक्यशेषात्' इत्येतेन तुल्यार्थत्वम्, प्रतिपत्तिद्वयस्यापि असंदिग्धत्वात् । 'लौकिकी प्रतिपत्तिर्हि स्वार्थे निःसंशया स्थिता । वैदिक्यपि तथा स्वार्थे बाधतेऽतो विपर्ययात् ॥ तस्माच्छास्त्रस्थितैवैका प्रतिपत्तिर्बलीयसी । न समा मुक्तकाचारैर्विप्रकृष्टैः ससंकरैः ॥' इति ।

शा — 'पदार्थपदसंबन्धे तुल्यत्वं लोकवेदयोः ।
अदृष्टसाधनत्वे हि लोकाद् वेदोऽतिरिच्यते ॥
वाक्यैकत्वं विधिस्तुत्योर्विषयैक्यादृते नहि । तेनात्र
वाक्यशेषस्था प्रतिपत्तिर्बलीयसी ॥'

वि— 'लौकिको वाक्यगो वाऽर्थस्त्रिवृदादेः, समत्वतः । उभौ, विध्यर्थवादैकवाक्यत्वादस्त्विहान्तिमः ॥'

भाट्ट— त्रिवृच्चर्वश्ववालादिशब्देषु यत्र लोकवाक्यशेषयोः अर्थविप्रतिपत्तिः, तत्र पदपदार्थसंबन्धे लोकात् वेदस्याधिक्ये प्रमाणाभावात् तुल्यबलत्वम् । इति प्राप्ते, विषयैक्याभावेऽपि विधिस्तुत्योः एकवाक्यताऽनुपपत्तेः विधिः वाक्यशेषस्यैव शक्तिग्राहकत्वं अनुमन्यते । अतश्च लौकिकप्रमाणावगतेऽर्थे अनेकशक्तिकल्पनाभिया न शक्तिः, अपि तु लक्षणादिनैव बोधः । अत एव यत्र वाक्यशेषो नास्ति तत्रापि त्रिवृदादिपदार्थो वैदिक एव ग्रहीतव्यः

इति वक्ष्यते । अतश्च त्रिवृच्छब्दस्य स्तोत्रगतऋङ्नवकं शक्यम्, न तु त्रैगुण्यम् । चरुशब्दस्य ओदनः, न तु स्थाली । अश्ववालशब्दस्य काशाः नाश्वकेशाः । १।३।४ पृ. ४४.

शंकर-- ‘ त्रिवृच्चर्वादिचिन्तनम् । ’ कृतम् ।

* **त्रिवृच्चर्वाश्ववालाधिकरणे** चरुशब्दस्य ओदनवाचित्वं वाक्यशेषात् , न तु लोकप्रसिद्धया स्थालीवाचकत्वं लोकप्रसिद्धेर्लाक्षणिकत्वेनापि उपपत्तेः इत्यस्यार्थस्य विचारितस्य प्रयोजनं बाधोपयोगितया कथ्यते । **भाट्ट.** १०।१।१०. * त्रिवृच्छब्दस्तु तृचत्रयानुक्रमणात् स्तोत्रीयानवकवाचित्वेन **त्रिवृच्चर्वाश्ववालाधिकरणे** स्थापितः । **कौ.** १।४।३।३ पृ. १८१.

* **त्रिवृच्चर्वाश्ववालाधिकरणन्यायस्वरूपम्** ‘ लोकप्रसिद्धापेक्षया वाक्यशेषस्य बलवत्त्वम् ’ । इति । **भाट्ट.** १०।१।१०.

* अर्थवादानां अवयवार्थपरत्वाभावे **त्रिवृच्चर्वाद्यधिकरणविरोधः** । तत्र वाक्यशेषेण काशपरतायाः व्यवस्थापनात् । **कु.** १।२।१।१८.

* **त्रिवृत्त्वं** अग्निष्टुति श्रुतं स्तोत्रान्तरगतस्तोममात्रबाधकम् । **भा.** १०।६।७।२२–२३.

* **त्रिवृत्पञ्चदशादीनि** ज्योतिःशब्देन उक्तानि । वचनमात्रेणापि शब्दो भवति, विशेषतो लक्षणायाम् । **भा.** ४।४।१२।४०.

* **त्रिवृत्पानविरेकवत्** । ‘ प्रत्यक्षफलतैव स्यात् त्रिवृत्पानविरेकवत् ’ । (त्रिवृत् नाम ओषधिः तद्रसपाने तीव्रो विरेको भवति इति वैद्यकम् ।) । **श्लोवा.** चित्राक्षेपपरिहारे १९.

* **त्रिवृच्छब्दः** अन्यत्र स्तोमविषये दृश्यते । यथा ‘ त्रिवृद् बहिष्पवमानः ’ इति । अत्र स्तोमविषयता परिच्छिन्ना । एवं ‘ त्रिवृदग्निष्टोमः ’ इत्यत्रापि । **भा.** १०।६।७।२३, * त्रिवृच्छब्दः लोके त्रित्वसंबद्धे प्रयुक्तः । यथा त्रिवृत् रज्जुः, त्रिवृत् मणिः इति । १०।६।७।२२. * **त्रिवृच्छब्दस्य** त्रैगुण्यं लोकसिद्धोऽर्थः । ‘ त्रिवृद् बहिष्पवमानम् ’ इति श्रुतौ तु ऋक्त्रयात्मकेषु त्रिषु सूक्तेषु अवस्थितानां बहिष्पवमानात्मकस्तोत्रनिष्पादनक्षमाणां ‘ उपास्मै ’ इत्यादीनां ऋचां नवकमर्थः । **वि.** १।३।५ वर्णकं ३.

* **त्रिवृत्स्तोमः** त्रिवृदग्निष्टोमे कृत्स्ने क्रतौ भवति । **भा.** १०।६।६।१५. * **त्रिवृत्स्तोमस्य** उद्यती नाम विष्टुतिः । तत्र ब्राह्मणवाक्यमेवम्– ‘ तिसृभ्यो हिंकरोति स प्रथमया , तिसृभ्यो हिंकरोति स मध्यमया , तिसृभ्यो हिंकरोति स उत्तमया , उद्यती त्रिवृतो विष्टुतिः ’ इति । सूक्तत्रयपठितानां नवानामृचां गानं त्रिभिः पर्यायैः कर्तव्यम् । तत्र प्रथमे पर्याये त्रिषु सूक्तेषु आद्यास्तिस्रः ऋचः, द्वितीये पर्याये मध्यमाः, तृतीये पर्याये च अन्तिमाः । तिसृभ्य इति तृतीयार्थे पञ्चमी । हिंकरोति गायतीत्यर्थः । **वि.** १।४।३, * **त्रिवृत्स्तोमे** ऊर्ध्वगानम् । ऊर्ध्वगानं नाम आवृत्तिं विना ऋचां पाठक्रमेण गानम् । ५।३।४.

* ‘ **त्रिषाहस्रं** तृतीयम् ’ चिन्वानश्चिन्वीत इति अग्नौ नैमित्तिकमेव, न नित्यम् । **भा.** ४।३।२।४.

* **त्रिष्टुप्** । पादेषु अक्षराणि ११।११।११।११ उदा० कस्य नूनं कतमस्य । (ऋसं. १।२४।१) । **के.** * **त्रिष्टुप्शब्दो** द्रव्यवचनः (शब्दो द्रव्यमिति मीमांसकमतम्) । **संकर्ष.** ४।३।१३.

* **त्रिसंयुक्तं** पूर्वं वीरजननं तत् । यदुत्तरं पशुजननं तत् । राजसूये । तत्र ‘ आग्नावैष्णव एकादशकपालः, ऐन्द्रावैष्णवश्चरुः, वैष्णवस्त्रिकपालः, वामनो दक्षिणा ’ इति पूर्वम् । ‘ सोमापौष्ण एकादशकपालः, ऐन्द्रापौष्णश्चरुः, पौष्णश्चरुः, श्यामो दक्षिणा ’ इति उत्तरम् । **भा.** ११।४।१।३, * **त्रिसंयुक्तयोर्द्वयोः** अङ्गानि न तन्त्रम् । राजसूये । ११।४।१।१–३, * **त्रिसंयुक्ते** पूर्वे राजसूयगते यो वैष्णवस्त्रिकपालस्तत्र सौमिकातिथ्येष्टिगतवैष्णवशब्दो धर्मान्नातिदिशति । ७।३।६।१७.

* **त्रैधातवीयेन** । ‘ देवताभ्यो वा एष आवृश्च्यते यो यक्ष्ये इत्युक्त्वा न यजते , त्रैधातवीयेन यजेत ’ । इयमिष्टिः प्रायश्चित्तरूपा । **वि.** ६।२।३, * **त्रैधातवीये** ‘ यवमयो मध्यमः ’ पुरोडाशः । नात्र व्रीहियवयोर्विकल्पः । १०।७।१६.

* **त्रैधातवीया** दीक्षणीया अश्वमेधे । तत्र ज्योतिष्टोमीयदीक्षणीयाजन्यापूर्वाभावात् न तत्स्वरातिदेशः, किंतु उपांशुत्वमेव काम्यत्रैधातवीयाधर्मः अतिदिश्यते । **वि.** ९।१।२ वर्णकं २. * त्रैधातवीया द्विविधा स्वतन्त्रा काम्या, अश्वमेधगता च । उभयोरपि प्रयोगः समान एव । उपांशुत्वं तत्र स्वरः । **भाट्ट.** ९।१।२ पृ. ४६. * **त्रैधातवीयायां** अश्वमेधीयदीक्षणीयायां आग्नावैष्णवापूर्वसाधनत्वाभावात् 'यावत्या वाचा कामयेत तावत्या' इत्यादिधर्मः न प्रवर्तते इति भाष्यमतम् । वस्तुतस्तु उपांशुत्वं प्रवर्तते । **सोम.** ९।१।२. * त्रैधातवीयायां पुरोडाशभेदेऽपि सहैवावदानम् । **संकर्ष.** २।२।१४. * त्रैधातवीयायां सहस्रं दक्षिणा । **भा.** १०।२।८।२३, * **त्रैधातव्यायां** 'यवमयो मध्यमः' इति मध्यमपुरोडाशे यवमयत्वस्य नियमविधिः । १०।७।१६।५१–५७, * त्रैधातव्यायां सामिधेनीसप्तदश्यम् । १०।८।९।१७.

* **त्रैधातव्याविषयकं** अधिकरणं अश्वमेधीयत्रैधातव्याविषयकं इत्यादिविन्दौ (**मी. को.** ७४६ पृष्ठे) द्रष्टव्यम् । **क्रे.**

* **त्रैवर्णिकः** कश्चित् निषादानामधिपतिः संभवति; तथापि 'निषादस्थपतिं याजयेत्' इत्यत्र निषादस्थपतिर्न त्रैवर्णिकः । **वि.** ६।१।१३, * त्रैवर्णिकः कश्चित् 'रथं करोति' इति व्युत्पत्त्या रथकारः स्यात् । 'वर्षासु रथकार आदधीत' इत्यत्र तु रथकारः संकीर्णजातिविशेष एव गृह्यते । ६।१।१२. * **त्रैवर्णिकस्य** प्रतिषिद्धं शिल्पोपजीवित्वम् । **भा.** ६।१।१२।४६. * **त्रैवर्णिकानां** ऋणत्रयापाकरणं नित्यम्, न काम्यम् । वि. ६।२।११, * त्रैवर्णिकानामेव अध्ययनविधिः न शूद्रस्य । ६।१।७, * त्रैवर्णिकानामेव यागाधिकारः, न शूद्रस्य । ६।१।७. * त्रैवर्णिकानां सोम–विद्याप्रजं नियतं न ब्राह्मणानामेव ! **भा.** ६।२।११।३१. * **त्रैवर्णिकभिन्नस्य** निषादस्य रौद्रयागेऽधिकारः । **वृ.** ६।१।१२।५१–५२. * विद्याऽग्नीनां **त्रैवर्णिकविषयत्वनियमात्** तत्साध्यानां क्रतूनां त्रैवर्णिकविषयत्वनियमः । **सु. पृ.** ११४१.

* **त्रैशोकं साम** द्वादशाहे चतुर्थेऽहनि । तस्य योनिः 'विश्वाः पृतनाः' (सामसं. ३७०,९३०) इति अतिजगती । उत्तरे च ऋचौ 'नेमिं नमन्ति' (९३१) समु रेभासो (९३२) इति बृहत्यौ । एतास्वेव त्रैशोकं गातव्यं विषमास्वेव । वि. ९।२।५ वर्णकं २.

⧗ **त्रैशोकाधिकरणम्** । द्वादशाहगतपृष्ठ्यषडहे चतुर्थेऽहनि त्रैशोकं साम उत्तराग्रन्थपठितयोर्बृहत्योरेव गेयम्, न तु अतिजगत्यौ आनेये ॥

तदभ्यासः समासु स्यात् । ९।२।५।२१ वर्णकं २ ॥

भाष्यम्—एवं वा अस्ति द्वादशाहः, 'द्वादशाहेन प्रजाकामं याजयेत्' इति । तत्र चतुर्थेऽहनि त्रैशोकं नाम साम, अतिजगत्यामुत्पन्नम् । अतिजगती 'विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे । क्रत्वा वरिष्ठं वर आमुरीमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥' (सामसं. ९३०) । उत्तरे द्वे बृहत्यौ । तयोः पूर्वा 'नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा । सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥' (सामसं. ९३१) उत्तरा 'समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये । स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥' (सामसं. ९३२) इति । तत्र एषोऽर्थः सांशयिकः किमन्ये अतिजगत्यौ उपादाय समासु गेयम्, उत ये एव ते उत्तरे बृहत्यौ, एते एव उपादाय विषमास्वेव गातव्यमिति । किं प्राप्तम् ? संशरविलेशौ (संशरः हिंसा नाशः । आधिक्यम् । विलेशः अल्पत्वं न्यूनत्वम्) मा भूतां इति अन्ये उत्पत्तिजगत्यौ उपादाय एतत् साम समास्वेव अभ्यसितव्यं इति ।

लिङ्गदर्शनाच्च । २२ ॥

भाष्यम्— लिङ्गं खल्वपि अस्मिन्नर्थे दर्शयति 'अतिजगतीषु स्तुवन्ति' इति । किं लिङ्गम् । अतिजगतीषु इति बहुवचनम् । तस्मात् अन्ये अतिजगत्यौ उपादातव्ये इति ।

नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत । २३ ॥

भाष्यम्— नैमित्तिकं तु उत्तरात्वं आनन्तर्यात् उत्तरापाठनिमित्तं आनन्तर्ये सति प्रतीयेत । श्रुतिर्हि वाक्यात् बलीयसी इति । प्रकृतत्वात् उत्तरे बृहत्यौ एवं अनुग्रहीष्येते । तस्मात् नान्ये आदातव्ये इति ।

ऐकार्थ्याच्च तदभ्यासः । २४ ॥

भाष्यम्-- एवं च समानदेवताके त्रैशोके तृचे, इति तृचशब्दोपचारो युक्तो भविष्यति । तस्मादपि नान्ये उपादातव्ये इति । अत्राह, अथ यदुक्तम् ‘ अतिजगतीषु स्तुवन्ति ’ इति शब्दोपचारात् अतिजगती बहुत्वं दर्शयति इति, तत् परिहर्तव्यम् । अत्रोच्यते । तदभ्यासः एव द्रष्टव्यः षोडश्यभ्यासः । ‘ एकविंशः षोडशी ’ इति एकविंशतिकृत्वः षोडशिनि अभ्यस्यमाने त्रैशोकाभ्यासः । तत्र सप्तकृत्वः अतिजगत्यां अभ्यस्यमानायां ‘ अतिजगतीषु स्तुवन्ति ’ इति वचनं उपपत्स्यते इति ।

टुप्— (अत्र भाष्यं-) **‘ एकविंशतिकृत्वः षोडशिनि अभ्यस्यमाने त्रैशोकस्य अभ्यासः’** इति । एतदयुक्तम् । नहि द्वादशाहे षोडशिनः एकविंशतिकृत्वः प्रयोगः । किं तर्हि सकृदेव प्रयोगः । तस्मात् (अस्य भाष्यस्य) अन्यो वाच्योऽर्थः । ‘ एकविंशः षोडशी ’ इति (वचनात्) सर्वस्तोत्राणि षोडशिनि एकविंशानि भवन्ति । (तत्र आगमेन संख्यापूरणं पवमानेष्वेव । स्तोत्रान्तरेषु तु अभ्यासेनैव) तत्र एकविंशतित्वसंपत्तये (ब्रह्मसाम्नि अभ्यस्यमाने तत्साधनस्य) त्रैशोकस्य सप्तकृत्वः अभ्यासः । तस्मिन्नभ्यस्यमाने सप्त अतिजगत्यो भवन्ति । एवं सति अतिजगतीबहुत्वं भविष्यति ।

सोम— ‘ समासु गानम् ’ इत्यस्यात्र अपवादात् संगतिः ।

वि— ‘ त्रैशोकेऽतिजगत्यौ द्वे आनेये गीयतेऽथवा ।
बृहत्यो, रादिमः साम्या, न्नोत्तरात्वश्रुतेर्बलात् ॥ ’
(त्रैशोके साम्नि समासु गातव्ये सति द्वे अतिजगत्यौ दाशतयीभ्यः आनेये, अथवा तत् उत्तरयोर्बृहत्योरेव गीयते इति संशयः) ।

भाट्ट—एवं वा द्वादशाहे षडहगतं चतुर्थमहः ‘ एकविंशः षोडशी वैराजं साम ’ इत्याम्नातम् । अत्र प्रकृतिप्राप्तसर्वस्तोत्रेषु एकविंशः स्तोमः, षोडशिसंस्था, पृष्ठस्तोत्रे च वैराजं साम, इत्यनेकगुणविशिष्टं कर्म विहितम् । तत्र च ‘ त्रैशोकं नाम ब्रह्मसाम अतिजगतीषु स्तुवीत ’ इति ब्राह्मणाच्छंसिस्तोत्रे त्रैशोकं साम विहितम् । तच्चातिजगत्यामुत्पन्नम्, उत्तराग्रन्थे चोत्तरे द्वे बृहत्यौ, तत्र संशरपरिहारार्थमुत्तराग्रन्थपठितयोरपि उत्तरयोः वाचस्तोमादौ सार्थक्यमङ्गीकृत्य अतिजगत्यावेव द्वे दाशतयीभ्यः समानीय समास्वेव गानम् । न चानीतानामङ्गत्वे प्रमाणाभावः । न्यायसहकृततृचगानविधेरेव नियामकत्वात् । न च प्रकरणेन न्यायबाधः, ‘ अतिजगतीषु स्तुवीत ’ इति अतिजगतीबहुत्वविधिना न्यायस्योज्जीवनात् । न च प्राप्तस्तोत्रानुवादेन त्रैशोकातिजगतीबहुत्वयोर्विधाने वाक्यभेदः, अतिदेशप्रवृत्तेः पूर्वमस्य प्रवृत्त्या विशिष्टस्तोत्रविध्युपपत्तेः । अत एव ‘ यद्योन्याम् ’ इति सामान्यवचनं सामान्तरविषयम् । **इति प्राप्ते**, बहिष्पवमानातिरिक्तस्तोत्रे एकविंशस्तोमानुरोधेन ऋगभ्यासस्यावश्यकत्वात् एकस्या अप्यतिजगत्याः सप्तकृत्वः आवृत्तेर्बहुत्वस्य प्राप्ततयाऽनुवादोपपत्तेः अस्य साममात्रविधिपरत्वादुत्तराग्रन्थपठितबृहतीप्रकरणानुरोधेन न्यायस्यैव बाधात् संशरमपि स्वीकृत्य बृहत्योरेव गेयम् ।

मण्डन-- ‘ अभ्यासेनातिजगती । ’

शंकर— ‘ त्रैशोकं विषमासु तु । ’

* **त्रैशोकसामगानं** अभ्यस्यमानायामतिजगत्याम् । **वि.** ९।२।५ वर्णकं २.

* **त्रैस्वर्यादीनां** समाम्नानं अर्थावबोधनार्थम् । **भा.** ९।२।८।३१ वर्णकं ३.

* **त्र्यङ्गैः** अनिज्याशेषैः स्विष्टकृद्यागः ज्योतिष्टोमेऽग्नीषोमीये पशौ । **भा.** १०।७।३।१०-११. * ‘त्र्यङ्गैः स्विष्टकृतं यजति’ इत्यत्र नाङ्गानि अनूद्य त्रित्वं विधीयते । किं तर्हि पूर्वनिष्पन्नः समासार्थो विधेयो भवति । **वा.** ३।५।१०।३१ पृ. १००७.

* **त्र्यनीका** गवामयने चोदकेन प्राप्ता । त्रीणि अनीकानि अग्राणि ऐन्द्रवायव– शुक्र– आग्रयणरूपाणि यस्यां क्रियायां सा त्र्यनीका । तया संवत्सरसत्रे प्रायणीयोदयनीयमध्यवर्तीनि अहानि पूरयितव्यानि । पूरणं स्वस्थानविवृद्ध्या, न तु दण्डकलितवत् आवृत्त्या । **भा.** १०।५।२५।८३-८७. * त्र्यनीका गवामयने प्रत्यक्षेण वाक्येन विधीयते । यदि चोदकेन प्राप्यते तथा सत्येते दोषा भवेयुः । **टुप्.** १०।५।२५।८५ पृ. १९८१. * त्र्यनीका ज्योतिष्टोमे । तत्र ऐन्द्र-

वायवाग्रतायाः शुक्राग्रतायाश्च पुनःश्रवणं न परिसंख्यातुं नार्थवादार्थम्, किन्तु समानविध्यर्थम्। भा. १०।५।२३। ७७–७८. ⁕ त्र्यनीका । त्रयाणामनीकानां समाहारः त्र्यनीका । द्विगौ अजादेराकृतिगणत्वात् टाप् । यद्यपि नवसु अहःसु नव सन्ति अग्रत्वानि , तथापि त्रयाणां ऐन्द्रवायवाग्रत्वशुक्राग्रत्वाग्रयणाग्रत्वानां त्रिरभ्यासात् नवत्वं इति युक्तः त्र्यनीकाव्यवहारः । अनीकं अग्रम् । सोम. १०।५।२३. ⁕ त्र्यनीका द्वादशाहे समूढे । द्वितीये पञ्चमे अष्टमे चाहनि ऐन्द्रवायवाग्रत्वम् , तृतीये षष्ठे नवमे चाहनि शुक्राग्रत्वम्, चतुर्थे सप्तमे एकादशे चाहनि आग्रयणाग्रत्वं इति त्र्यनीका । वि. १०।५।२३.

⌛ त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् । १०।५।२३।७७ ॥

द्वादशाहे द्वितीयादिषु दशमवर्जे नवसु अहःसु त्र्यनीका उक्ता। द्वितीयेऽहनि च षडहप्रथमाहत्वात् रथंतरसामत्वेन ऐन्द्रवायवाग्रता प्रकृतितश्चोदकेन प्राप्ता । तृतीयेऽहनि च षडहद्वितीयाहत्वात् बृहत्सामत्वेन शुक्राग्रता प्रकृतित एव चोदकेन प्राप्ता । एवं सति पुनःश्रवणं किमर्थमिति विचारे पूर्वपक्षमाह । द्वादशाहे त्र्यनीकायां न्यायोक्तेषु चोदकप्राप्तेषु ऐन्द्रवायवाग्रत्वादिषु पुनः आम्नानं पुनःश्रवणं चतुर्थेऽहनि उक्तस्य आग्रयणाग्रत्वस्य गुणार्थे स्तुत्यर्थे स्यात् नानुवदितुं न परिसंख्यातुम् ।

अपिवाऽहर्गणेष्वग्निवत् समानविधानं स्यात् । ७८ ॥

पूर्वपक्षं व्यावर्तयितुं अपिवाशब्दः । अहर्गणेषु नवानामपि अह्नां समानविधानं प्रतिपादयितुं पुनःश्रवणं स्यात्, नार्थवादार्थम् । अग्निवत् । यथा अग्निचयनं अग्निष्टोमे वाक्यान्तरेण सिद्धेऽपि ‘अथातोऽग्निमग्निष्टोमेनैवानुयजति तमुक्थ्येन तमतिरात्रेण’ इत्यादिवाक्ये अग्निष्टोमग्रहणं उक्थ्यादिना समानविधानार्थम्, तद्वत् । तथाच गर्गत्रिरात्रादिषु द्वितीयाद्यहःसु बृहत्सामत्वाद्यभावेऽपि शुक्राग्रताद्यनुष्ठानं फलति । के.

⁕ त्र्यनीकायां प्रथमद्वितीययोः अह्नोः ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः पुनःश्रवणात् समानविधित्वम् । भा. १०। ५।२३।७७–७८, ⁕ त्र्यनीकायां प्रथमद्वितीययोः अह्नोः ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः पुनःश्रवणस्य अनैमित्तिकत्वार्थता (द्वादशाहे) । १०।५।२३।७७–७८.

⌛ त्र्यनीकाऽधिकरणम् । कर्मभूयस्त्वाधिकरणन्यायः । गवामयने त्र्यनीकायाः स्वस्थानविवृद्ध्या अभ्यासः ॥

ऐकादशिनवत् त्र्यनीकापरिवृत्तिः स्यात् । १०।५।२५।८३ ॥

भाष्यम्— द्वादशाहे समाम्नायते ‘ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाऽऽग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाऽऽग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाऽऽग्रयणाग्रम्’ इति । तत् गवामयने चोदकेन प्राप्तम् । तत्र बहूनि त्र्यनीकानि परिवर्तयितव्यानि । तत्रार्थप्राप्तोऽभ्यासः । अथेदानीमभ्यासे संदेहः किं दण्डकलितवदभ्यासः कर्तव्यः, उत स्वस्थानविवृद्धिरिति । कथं दण्डकलितवत् स्यात्, कथं वा स्वस्थानविवृद्धिरिति । यदि अह्नामधिकारः तत आद्येषु नवस्वहःसु परिसमाप्तेषु शिष्टेष्वपि त्र्यनीकां चोदकः प्रापयतीत्युपस्थितमिदं भवति ‘ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्’ इति । तेष्वपि नवसु परिसमाप्तेषु पुनरिदमेवोपतिष्ठते, ऐन्द्रवायवाग्रं प्रथममहरिति । एवं दण्डकलितवदावृत्तिः । अथ अहरधिकारो नास्ति, ततः प्रायणीयोदयनीययोरन्तरं नवभिरनीकैः पूरितमिति गवामयनेऽपि नवभिरनीकैः पूरयितव्यं स्यात् । तत्र पूर्णे पुनरावृत्तिर्नास्तीति दण्डकलितवन्न स्यात् । न च वृद्ध्या विना तदन्तरं पूर्यते इति स्वस्थानविवृद्धिरागतेति । किं पुनः प्राप्तम् ? दण्डकलितवदावृत्तिरिति । तत्रैतद्वर्ण्यते अहधिकारोऽत्रेति । एवं हि आम्नायते ‘ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्’। प्रकृतत्वादहरिति गम्यते । तस्मादहरधिकारः । अतोऽवगच्छामो दण्डकलितवदावृत्तिरिति । आवृत्तिन्यायानां दण्डकलितं न्याय्यम् । तथा क्रमानुग्रहो भवति । तद्यथा, कंश्चिदुच्यते अनुवाकस्त्रिः पठ्यतामिति । दण्डकलितवदसौ पठ्यते, क्रमानुग्रहाय । एवमिहापि द्रष्टव्यम् ।

यथा अस्मिन्नेव गवामयने एकादशिनी अभ्यस्यमाना दण्डकलितवदभ्यस्यते, न स्वस्थानविवृद्ध्येति ।

स्वस्थानविवृद्धिर्वाऽह्नामप्रत्यक्षसंख्यत्वात् ।८४॥

भाष्यम्-- स्वस्थानविवृद्धिर्वा, न दण्डकलितवदावृत्तिः । तत्रेदं वर्ण्यते, नाहरधिकार इति । कुतः ? अह्नामप्रत्यक्षसंख्यत्वात् । अप्रत्यक्षा अह्नां संख्या नवानामह्नामिति । ऐन्द्रवायवाग्रमिति च विधीयमानमिति । कथमहर्न विधीयते इति ? वाक्यभेदप्रसङ्गात् । ऐन्द्रवायवाग्रं प्रथमं भवति, तच्चाहः, नाहःसंघातः, इति वाक्यं भिद्येत । तस्मादनुवादमात्रमहर्ग्रहणम् । एवं चेत् क्रमानुग्रहाय स्वस्थानविवृद्धिराश्रयणीया । आग्रयणाग्रान् कृत्वा ऐन्द्रवायवाग्राः कर्तव्या इति ।

टुप्-- अतः परं त्र्यनीकाऽधिकरणं व्याख्यायते (इति मुद्रिते । 'अतः परं त्र्यनीकालिङ्गदर्शनाधिकरणं व्याख्यायते' इति तु लिखिते । तन्त्ररत्ने तु नैतत् किमपि गृहीतम् । 'त्र्यनीकाप्रसङ्गादिदमधिकरणं' इति तु तन्त्ररत्ने पङ्क्तिः) । प्रथमस्य यज्ञभागस्य ऐन्द्रवायवाग्रता विधीयते । कुतः ? यज्ञस्य फले चोदितत्वात् । अहनि इत्ययमर्थो लभ्यते एव (यज्ञभागो हि अहरात्मकः, इति तद्ग्रहणमनुवादः) । यदि च अहरिति विवक्ष्येत (ततो विशिष्टानुवादात्) वाक्यं भिद्येत । निष्फलानि च तानि (अहानि) ।

पृष्ठ्यावृत्तौ चाग्रयणस्य दर्शनात् त्रयस्त्रिंशे, परिवृत्तौ पुनरैन्द्रवायवः स्यात् । ८५ ॥

भाष्यम्— इतश्च पश्यामः, स्वस्थानविवृद्धिरिति । कुतः ? उत्तरस्मिन् पक्षसि पृष्ठ्यावृत्तौ आग्रयणाग्रताया दर्शनं भवति त्रयस्त्रिंशेऽहनि । कथम् ? 'जगतीं वै च्छन्दांसि प्रत्यवरोहन्ति, आग्रयणं वै ग्रहाः, बृहत् पृष्ठानि, त्रयस्त्रिंशं स्तोमाः' इति । तदेतत् स्वस्थानविवृद्धौ अवकल्पते, न दण्डकलितवदावृत्तौ । कथम् ? पूर्वस्मिन् पक्षसि त्र्यनीका त्रिः परिवर्तते । तस्मिन्ननावृत्तैव सा आग्रयणाग्रेषु परिसमाप्यते । उत्तरमपि पक्षो व्यावृत्तमिति कृत्वा आग्रयणाग्रेष्वारभ्यते । तत्र प्रथमे नवमभागे त्रयस्त्रिंशमहरिति कृत्वा तदाग्रयणाग्रं भवति । तत्रैतद्दर्शनमुपपद्यते । दण्डकलितवत्पुनरावृत्तौ सत्यां तदैन्द्रवायवाग्रं स्यात् । कथम् ? त्रिवृत आरभ्य नवकैरहःसु संकल्प्यमानेषु पूर्वस्मिन् पक्षसि सप्त परिशिष्यन्ते । तत्र सप्तमे ऐन्द्रवायवाग्रता, शुक्राग्रो विषुवान्, आग्रयणाग्रः प्रथमः स्वरसामा, ततो विश्वजिदिति त्र्यनीका समाप्ता । त्रयस्त्रिंशमहरैन्द्रवायवाग्रं प्राप्नोति । तत्रैतद्दर्शनं विरुध्यते । तस्मात् स्वस्थानविवृद्धिरिति ।

टुप्— यस्य दण्डकलितवत् आवृत्तिः, तस्य एतत् (त्रयस्त्रिंशे अहनि आग्रयणाग्रता—) दर्शनं नोपपद्यते । कथं ? अस्मिन् (हि) गवामयने अशीतिशतं (१८० अहानि) पूर्वं पक्षः । एवं उत्तरं (अपि पक्षः । मध्ये विषुवान् अधिकमहः) तत्र पूर्वपक्षसि (प्रथमं तावत्) त्र्यनीका निविशते । (त्रयाणामनीकानां समाहारः त्र्यनीका त्रिफलावत् । अजादेराकृतिगणत्वात् द्विगोरपि टाप् प्रत्ययः । अग्रवचनः अनीकशब्दः) । सा (च तत्र) निविशमाना आद्ये द्वे अहनी वर्जयित्वा भवति । (कुतः ?) तयोः ऐन्द्रवायवाग्रतायाः प्रत्यक्षाम्नानात् । शिष्टेषु (च) अहःसु निविशमानायाः (एकोनविंशतिवारमावृत्तायाः) सप्त (अहानि) परिशिष्यन्ते । तत्र सप्तमे ऐन्द्रवायवाग्रता (भवति) । तस्मिंश्च (सप्तमे अहनि) पूर्वं पक्षः समाप्तम् । त्र्यनीका तु अपरिसमाप्ता (द्वयोरवशिष्टत्वात्) । सा च (अवश्यं) परिसमापनीया । ततः (अष्टमः) विषुवान् शुक्राग्रः । ततः (नवमो भवति) प्रथमः स्वरसामा आग्रयणाग्रः, द्वितीयः स्वरसामा ऐन्द्रवायवाग्रः, तृतीयः स्वरसामा शुक्राग्रः, ततो विश्वजित् आग्रयणाग्रः, ततः (पृष्ठ्यः) षडहः आवृत्तः प्रयुज्यते । तस्य आवृत्तस्य प्रथमं त्रयस्त्रिंशमहः (भवति) तत् ऐन्द्रवायवाग्रं प्राप्नोति । (इति) एवं (इदं) दर्शनं नोपपद्यते (पूर्वपक्षसि) दण्डकलितवदावृत्तौ, (स्वस्थानविवृद्धौ तु उपपन्नमिति) ।

यदिदं व्याख्यानं भाष्यकारेण कृतम्, इदं नोपपद्यते । कथम् ? अस्मिन् (हि) गवामयने त्र्यनीका (प्राप्यमाणा) चोदकेन प्राप्यते (न नामधेयात्, नापि प्रत्यक्षवचनात् भाष्यकारमते । ततः—) विश्वजिति नामधेयेन आग्रयणाग्रता प्राप्नोति । 'पृष्ठ्यः षडहः' इति (अत्रापि) नामधेयेनैव (प्रसिद्ध—) षडहसंबन्धिनी (एव)

ग्रहाग्रता (प्राप्नोति । तथा) अभिप्लवे च (ज्योतिर्गौरायुः इत्येवमादि–) नामधेयेन ऐकाहिको विध्यन्तः प्राप्नोति । (ज्योतिर्गौरायुः गौरायुर्ज्योतिः इति हि अभिप्लवः षडहः । तत्र व्यतिषङ्गेण युग्मेषु बृहत् अयुग्मेषु रथंतरम् । तत्र ज्योतिराद्येकाहधर्मः प्रवर्तते । एकाहेषु च ज्योतिष्टोमात् रथंतरसामेषु ऐन्द्रवायवाग्रता बृहत्सामेषु च शुक्राग्रता । तेन अभिप्लवे षडहे तयोरेव व्यतिषङ्गेण प्रवृत्तिः, न त्र्यनीकायाः) । चोदकप्राप्तेश्च नामधेयप्राप्तिर्बलीयसी इत्युक्तम् । (तदेवमिह त्र्यनीकाऽभावात् अधिकरणं) एवमिदं नोपपद्यते । (अभ्युपेत्याप्यधिकरणोपपत्तिं लिङ्गानुपपत्तिमाह–) यद्यपि चोदकेन (त्र्यनीका–) प्राप्तिः स्यात्, तथापि दशरात्रस्य धर्माः (विकृतिषु) अतिदिश्यन्ते इयुक्तम् (१०।५।४।१२) । दशरात्रप्रवृत्तौ च पूर्वस्मिन् पक्षसि (भागधर्मपक्षेऽपि) दशधा विभागः प्राप्नोति । (नवरात्रप्रवृत्तौ हि नवधा विभागः प्राप्नुयात् नव नवरात्राः प्रवर्तन्ते । दशरात्रप्रवृत्तौ तु दशधाविभक्ते पूर्वस्मिन् पक्षसि) दशमे (भागे) ऐन्द्रवायवाग्रता (प्राप्नोति । ततश्च) उत्तरे पक्षसि (आवृत्ते क्रियमाणे) स एव अन्त्यः (भागः) प्रथममारभ्यते । तत्र ऐन्द्रवायवाग्रता प्राप्नोति त्रयस्त्रिंशे अहनि (सिद्धान्तेऽपि । ततश्च) पूर्वोत्तरपक्षयोः न कश्चित् विशेषः । यद्यपि नवरात्रः प्रवर्तते, तथापि कोऽयं विशेषः (भाष्यकारेण कृतः) । एकस्य (पूर्वपक्षिणः आद्यमहर्द्वयं वर्जयित्वा आभिप्लविकादाद्यात् अह्नः) त्रिवृतः आरभ्य गणना, अपरस्य (सिद्धान्तिनः) प्रायणीयात् आरभ्य, (सोऽयं निष्प्रमाणको विशेषः) । तस्मात् तुल्या गणना कर्तव्या । (यथा हि पूर्वपक्षे प्रायणीयचतुर्विंशयोः ऐन्द्रवायवाग्रतायाः प्रत्यक्षवचनविहितत्वात् त्रिवृतः आरभ्य गणना, तथा सिद्धान्तेऽपि । ततश्च) तुल्यायां च गणनायां लिङ्गदर्शनानुपपत्तिरेव । (तदा हि सिद्धान्तेऽपि त्र्यनीका न पूर्वस्मिन् पक्षसि समाप्यते, उत्तरस्मिन्नपि एकमहर्व्याप्नोति भागसाम्यार्थम्) । अयं च (अपरो) विशेषः (भाष्यकारेण लिङ्गं दर्शयता पक्षद्वयस्य) दर्शितः, एकस्य (पूर्वपक्षिणः आवृत्तिवचनं अतन्त्रीकृत्य) कृत्स्नं गवामयनमधिकृत्य गणना, अपरस्य (तु सिद्धान्तिनः) पूर्वस्मिन्नेव पक्षसि गणना ।

(एवं भाष्यमाक्षिप्य स्वयमिदानीं अधिकरणं लिङ्गं च समर्थयते–) अत्रोच्यते । यदि चोदकेन त्र्यनीका प्राप्यते, तथा सति एते दोषा भवेयुः । एषा तु गवामयने प्रत्यक्षेण वचनेन विधीयते । गवामयने च धर्मा विधीयमाना अवान्तरप्रकरणेन पूर्वस्मिन् पक्षसि निविशन्ते, न कृत्स्ने (गवामयने) । असंभवात् भवेयुः (कृत्स्ने गवामयने अवान्तरप्रकरणं बाधित्वा प्राप्नुयुः) । संभवति च (अत्र मत्पक्षे पूर्वस्मिन्नेव पक्षसि) अवान्तरप्रकरणेन (त्र्यनीकायाः) निवेशः । पूर्वपक्षवादिनस्तु दण्डकलितवदावृत्तिः पूर्वस्मिन् पक्षसि न समाप्यते । तस्य (हि आद्यमहर्द्वयं वर्जयित्वा) त्रिवृत आरभ्य गणना प्रवर्तते, आद्ययोः (प्रायणीयचतुर्विंशयोः अह्नोः) ऐन्द्रवायवाग्रतायाः प्रत्यक्षाम्नानात् । आदौ चारभमाणस्य द्वितीये (अहनि) शुक्राग्रता स्यात् । तस्याश्च प्रत्यक्षेण ऐन्द्रवायवाग्रत्वेन विरोधः स्यात् । ननु शुक्राग्रताऽपि प्रत्यक्षैव (त्र्यनीकायाः अत्रैवोपदिष्टत्वात्) । उच्यते । सामान्येन शुक्राग्रता (विहिता ‘ अथ शुक्राग्रम् ’ इति । तस्या द्वितीयायामपि आवृत्तौ सावकाशता) विशेषेण (तु स्वशब्देनैव) ऐन्द्रवायवाग्रता (विहिता), सामान्याच्च विशेषो बलवान् । तस्मात् तृतीयात् (अह्नः) आरभ्य तस्य गणना (तेन पूर्वस्मिन् पक्षसि न समाप्यते किंतु विषुवन्तं उत्तरे च पक्षसि आद्यमहर्व्याप्नोति) । सिद्धान्ते तु अविरोधात् प्रथमादेव (प्रायणीयादह्नः आरभ्य गणना घटते) ।

अत्र चोद्यते, ज्योतिरादय उत्पद्यमाना (एव) विशेषनामधेयेन धर्मान् गृह्णन्त एव उत्पद्यन्ते यथा कुण्डपायिनामयने अग्निहोत्रम् । त्र्यनीका तु अत्र सङ्घातधर्मत्वेन प्राप्नोति । सा च पश्चात्कालीनत्वात् दुर्बला उत्पन्नसंयोगित्वेन । (उत्पन्नसंयोगित्वेन पश्चात्कालीनत्वात् इत्यन्वयः । तेन नामधेयात् त्रयस्त्रिंशे अहनि पूर्वपक्षवादिनोऽपि आग्रयणाग्रता लभ्यते इति) । उच्यते । अत्र पौर्वापर्यबाधो भवति यथा विकृतौ दक्षिणाऽऽम्नानं चोदकेन प्राप्तं (प्राकृतं) बाधित्वा निविशते विरोधात्,

एवमिहापि त्र्यनीका नामधेयप्राप्तं बाधित्वैव निविशते यथा अपच्छेदे पूर्वनैमित्तिकं उत्तरेण (नैमित्तिकेन) विरोधे (सति) बाध्यते । **अथवा** (नास्याः पश्चात्कालीनत्वं) यदा (हि) यागः फले चोदितो भवति , तदा (एव) धर्मानाकाङ्क्षति (नोत्पत्तिसमये) एतस्यां (लब्धफलकत्वेन धर्माकाङ्क्षा–) अवस्थायां किं चोदकेन धर्माः , उत नामधेयेन इति चिन्तायां (प्रत्यक्षत्वेन) नामधेयेन धर्मप्राप्तिः (भवति) । तच्च (नामधेयं) लक्षणया धर्मप्राप्तिं करोति । त्र्यनीकां तु गृह्णन् न लक्षणया (आग्रयणाग्रताऽऽख्य–) धर्मप्राप्तिं करोति , (किंतु) उपदेशेनैव गृह्णाति । अतिदेशाच्च उपदेशो बलवान् (श्रौतत्वात्) ।

वचनात् परिवृत्तिरैकादशिनेषु । ८६ ॥

भाष्यम्— अथ यदुक्तम्, ऐकादशिनवदिति । युक्तं यदैकादशिनेषु दण्डकलितवदावृत्तिरिति । वचनं हि तद्भवति । ‘ वारुणमन्ततः , पुनःपर्यावृत्तेष्वाग्नेयमेव प्रथमेऽहन्यालभेत ’ इति । वचनाद्दण्डकलितवदावृत्तिः पुनःपर्यावृत्तेष्विति । सा द्वादशाहे असंभवन्ती गवामयनं विशति । किमिव वचनं न कुर्यात् । नहि वचनस्यातिभारोऽस्ति ।

लिङ्गदर्शनाच्च । ८७ ॥

भाष्यम्-- लिङ्गं खल्वपि एवमर्थं दर्शयति , यथा दण्डकलितवत् ऐकादशिना आवर्तन्ते इति । ‘ प्राणा वा ऐकादशिनाः, यदेकादशिनीभिरीयुः अहान्यतिरिच्यन्ते पशवो वा ’ इति । स्वस्थानविवृद्धौ नास्त्यतिरेकः, दण्डकलितवदावृत्तौ न्यूनता अतिरिक्तता वा भवति । तस्मादपि पश्यामः ऐकादशिनेषु दण्डकलितवदावृत्तिरिति ।

शा-- भाष्यकारेण प्रायणीयोदयनीयमध्यवर्तिनीं द्वादशाहिकीं त्र्यनीकां चोदकप्राप्तामाश्रित्य विचारितं किं दण्डकलितवत् आवर्तनीया , किंवा नवानामपि अनीकानां स्वेस्वे स्थाने विवृद्धिः इति । (तदर्थं किमिमे धर्माः प्रकृतौ अहरपूर्वप्रयुक्ताः, उत परमापूर्वप्रयुक्ताः । तदर्थं च किमहर्धर्माः , उत भागधर्माः । तदर्थं च किमहर्ग्रहणं विवक्षितम् , उत न इति संशयनिष्कर्षः । अहर्ग्रहणविवक्षायां द्वितीयादेरह्नः शुक्राग्रत्वादिर्धर्मः इति तत्सिद्ध्यर्थं दण्डकलितवदावृत्तिः, तदविवक्षायां तु कृत्स्नस्यैव प्रथमभागस्य ऐन्द्रवायवाग्रता धर्मः । एवं द्वितीयादिभागानामपि शुक्राग्रतादिः इति स्वस्थानविवृद्धिसिद्धिः इति फलफलिभावः । वार्तिकाधिकरणे तु–) संशयः किमेते दण्डकलितवदावर्तनीयाः, उत नवधा विभज्य नवस्वपि भागेषु नवानामनीकानां निवेशः इति ।

सोम — पूर्वाधिकरणोक्तसमूढनैसर्गिकत्वोपजीवनेन अस्य विचारस्य प्रवृत्तेः **संगतिः** । वार्तिककारपक्षे तु प्रासङ्गिकी **संगतिः** । **सूत्रार्थस्तु**– पश्वेकादशिन्या इव त्र्यनीकायाः दण्डकलितवदावृत्तिः स्यादिति ।

वि--‘ दण्डाकलितवत् सत्रे त्र्यनीकाऽऽवृत्तिरिष्यते । स्वस्थानवृद्धिरथवा , स्यादाद्योऽहर्विवक्षया ॥ , न विवक्षा वाक्यभेदात् नवानीकैस्तु पूरणम् । एकैकवृद्ध्या न विना तेनैकैकं विवर्धते ॥’ ‘ न त्र्यनीका चोदकाप्ता प्रत्यक्षविहिता तु सा । तस्यामुक्तो विचारः स्यादिति वार्तिक ईरितम् ॥’

भाट्ट-- गवामयने एकषष्ट्यधिकशतत्रयं सुत्याः । तत्राशीतिशतं पूर्वं पक्षः, तथोत्तरम्, मध्ये विषुवान् । तासां क्लृप्तिस्ताण्डकशाखिनां समाम्नाता ‘ प्रायणीयं प्रथममहः, चतुर्विंशं द्वितीयम्, ततश्चत्वारोऽभिप्लवाः षडहाः तानि चतुर्विंशत्यहानि, एकः पृष्ठ्यः षडहः, एवं मासः, तादृश एव द्वितीयस्तृतीयश्चतुर्थः पञ्चमः, ततस्त्रयोऽभिप्लवाः षडहाः तान्यष्टादशाहानि, एकः पृष्ठ्यः षडहः, अभिजिन्नामा एकाहः , त्रयः स्वरसामानः इत्यष्टाविंशत्यहानि , आद्याभ्यामहोभ्यां सह षण्मासाः , तदिदं पूर्वं पक्षः । मध्ये विषुवान् । अथोत्तरं पक्षः , त्रयः स्वरसामानः , विश्वजिन्नामा एकाहः , एकः पृष्ठ्यः षडहः त्रयस्त्रिंशारम्भणः , त्रयोऽभिप्लवाः षडहाः , तान्यष्टाविंशत्यहानि, पुनः पृष्ठ्यः षडहः त्रयस्त्रिंशारम्भणः, चत्वारोऽभिप्लवाः षडहाः , एवं मासः , तादृश एव द्वितीयस्तृतीयश्चतुर्थः । ततस्त्रयोऽभिप्लवाः षडहाः , आयुर्गौरिति द्वे अहनी , द्वादशाहस्य दशाहानि , महाव्रतं चातिरात्रश्चेति द्वात्रिंशदहानि, आद्यैरष्टाविंशत्यहोभिः सह षण्मासाः ’ । तदेवंविधसुत्यात्मके गवामयने पूर्वपक्षावान्तरप्रकरणे त्र्यनीका श्रुता ‘ ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रं अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रं अथ

शुक्राग्रं अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रं अथ शुक्राग्रं अथाग्रयणाग्रम् ’ इति । नवभिश्चाग्रताभिरनेकान्यहानि न पूर्यन्ते इति अवश्यकर्तव्यायामावृत्तौ किं नवसु दिनेषु नवाग्रताः कृत्वा पुनरन्येषु नवसु कर्तव्याः इत्येवं दण्डकलितवदावृत्तिः ? उत पूर्वस्य पक्षसो नवधा विभागं कृत्वा विंशतिसुत्यात्मके, (१८०÷२० = ९) एकैकस्मिन्भागे एकैकाग्रता ? इति स्वस्थानविवृद्धिः । **इति चिन्तायाम्**, अहःशब्दश्रवणात् तस्यैव च फलसाधनत्वात् तदुद्देशेनैव अग्रता विधीयते । न तु अहःसमुदायोद्देशेन । न चैवं सर्वासामग्रतानां सर्वेष्वहःसु प्राप्त्यापत्तिः, स्थानक्रमेण प्रथमसुत्यायां प्रथमाग्रताया एव प्राप्तेः । अत एव प्रथमादिपदानामनुवादत्वान्न विशिष्टानुवादोऽपि । अत एवाहरपूर्वप्रयुक्ता एवैता अग्रताः । अतश्च नवभिरग्रताभिः नवस्वहःसु अनुष्ठितेषु पुनरिदमेव वचनमुपतिष्ठते इत्यतो दण्डकलितवदावृत्तिः । **इति प्राप्ते**, स्थानक्रमेणोद्देश्यवाचकस्य अहःपदस्य प्रकरणस्य च संकोचे प्रमाणाभावात् । अन्यथा व्रीहीणामाग्नेयाङ्गत्वं यवानां चाग्नीषोमीयाङ्गत्वमिति व्यवस्थापत्तेः, सर्वेष्वहःसु एकैकाग्रता आपद्येत । न चेष्टापत्तिः, प्रथमशब्दाथशब्दयोर्विधिनवकस्य च वैयर्थ्यापत्तेः । अतो लाघवात् प्रथमपदं अथशब्दोन्नीतद्वितीयादिपदं च उद्देश्यसमर्पकम् । अतश्च पूर्वस्य पक्षसो नवधा विभागं कृत्वा एकैकस्मिन् विंशतिदिनात्मके भागे एकैकाग्रता विधीयते । अहःशब्दश्च अहःसंघाते लाक्षणिकोऽनुवादः । एवं द्वादशाहस्थत्र्यनीकावाक्ये प्रथमादिभागोद्देशेनैव अग्रताविधिः । भागः परं अहरात्मकः, इत्यहःशब्दोऽनुवादः । प्रकृते च भागधर्मत्वात् परमापूर्वप्रयुक्तत्वम्, अतः स्वस्थानविवृद्धिः । एवं चोत्तरे पक्षसि पञ्चमे षाडहिके त्रयस्त्रिंशेऽहनि आग्रयणाग्रतादर्शनं ‘जगतीं वै छन्दांसि प्रत्यवरोहन्ति, आग्रयणं ग्रहाः, बृहत् पृष्ठानि, त्रयस्त्रिंशं स्तोमाः’ इत्युपपन्नं भवति । तथाहि, स्वस्थानविवृद्धौ पूर्वस्मिन्नेव पक्षसि संपूर्णा त्र्यनीका समाप्यते । यच्च पूर्वस्मिन् पक्षसि आनुलोम्येनानुष्ठितं तदङ्गं तदुत्तरे पक्षसि प्रातिलोम्येन कर्तव्यतया आवृत्तं ‘पक्ष उपयन्ति’ इति वचनेन विहितम् । अत्र हि न पुनःकरणमात्ररूपा आवृत्तिर्विधीयते, अपितु ‘षड्भिरितो मासैरध्वानं यान्ति, षड्भिः पुनरायान्ति.’ इति वचनान्तरानुसारात् प्रातिलोम्यरूपा । अत एव पूर्वस्मिन् पक्षसि षडहे ‘गायत्रं त्रैष्टुभं जागतं गायत्रं त्रैष्टुभं जागतम्’ इत्येवङ्क्रमेण षडपि दिनानि, तेषां प्रातिलोम्ये षडहाद्यं दिनं जागतं संपद्यते । तथा पूर्वस्मिन् पक्षसि षडहे प्रथमदिने रथंतरम्, उत्तरदिने बृहदित्येवङ्क्रमेण षष्ठे बृहत्, तस्य प्रातिलोम्ये आद्ये बृहत् संपद्यते । तथा तस्मिन्नेव षडहे क्रमेण त्रिवृत्पञ्चदशसप्तदशएकविंशत्रिणवत्रयस्त्रिंशस्तोमके षष्ठमहः त्रयस्त्रिंशस्तोमकम्, तस्य प्रातिलोम्ये आद्यं तथा सपद्यते । अतश्च तद्वदेव त्र्यनीकाया अपि प्रातिलोम्येनानुष्ठाने उत्तरस्य पक्षसः पूर्वस्मिन् विंशतिदिनात्मके भागे आग्रयणाग्रता जायते इति लिङ्गमुपपद्यते । दण्डकलितवदावृत्तौ तु पूर्वस्मिन् पक्षसि आद्यदिनद्वये पुनर्विशिष्य ऐन्द्रवायवाग्रत्वस्य विधानात् त्र्यनीका तृतीयदिनमारभ्य प्रवर्तते । ततश्च तस्या एकोनविंशतिवारमावृत्तायाः पुनरपि सप्तदिनान्यवशिष्यन्ते इति न पूर्वस्मिन् पक्षसि त्र्यनीकासमाप्तिः । तेन सामर्थ्यात्मकेन लिङ्गेन पूर्वपक्षावान्तरप्रकरणं बाधित्वा महाप्रकरणादियं गवामयनाङ्गं संपद्यते । तदा च प्रातिलोम्यविधिः अस्यां न प्रवर्तते । पूर्वपक्षाङ्गस्यैव उत्तरे पक्षसि प्रातिलोम्यविधानात् । ततश्च विषुवन्तं स्वरसामाद्यं च गृहीत्वा त्र्यनीकासमाप्तिः । ततः पुनस्तथैव त्र्यनीकाऽनुष्ठाने द्वितीयमैन्द्रवायवाग्रं तृतीयं शुक्राग्रम्, विश्वजित्, आग्रयणाग्रं षडहाद्यमैन्द्रवायवाग्रं प्राप्नोतीति लिङ्गानुपपत्तिः । **न च एवं सिद्धान्ते** त्र्यनीकाविधिनैव पूर्वपक्षःप्रथमभागान्तर्गतयोराद्ययोः प्रायणीयचतुर्विंशयोरह्नोः ऐन्द्रवायवाग्रत्वप्राप्तिसिद्धेः पुनस्तयोरैन्द्रवायवाग्रत्वविधिः व्यर्थ इति वाच्यम् । त्र्यनीकाविधिना भागधर्मत्वेन परमापूर्वप्रयुक्तत्वेन प्राप्स्यमानाया अपि ऐन्द्रवायवाग्रतायाः तत्तदहरपूर्वप्रयुक्तत्वसिद्ध्यर्थं विधानात् । तत्फलं वाचनिकातिदेशादिना तन्मात्रविकारे एकाहादौ असत्यपि रथन्तरसामत्वे ऐन्द्रवायवाग्रत्वनियमसिद्धिः । अतः स्वस्थानविवृद्ध्या विंशत्यहरात्मके भागे ऐन्द्रवायवाग्रत्वस्य औपदेशिकस्य निवेशात् तत्तदहःसु आतिदेशिकतत्तदग्रताबाधः इति बाधोपयोगिताऽपि ।

यत्तु भाष्यकारेणौपदेशिकीं त्र्यनीकामनुक्त्वैव आतिदेशिकीं द्वादशाहिकीं नवाह:संबन्धिनीं त्र्यनीकां गावामयनिकपूर्वपक्षसि प्राप्तामुदाहृत्य दण्डकलितवदावृत्त्या पूर्वपक्षं कृत्वा पूर्ववदेव स्वस्थानविवृद्धिसिद्धान्तो लिङ्गदर्शनं च व्याख्यातम् । **तन्न** । द्वादशाहान्तर्गतदशाहप्रवृत्तेरेव सर्वविकृतिषु साधितत्वेन नवाह:संबन्धित्र्यनीकामात्रप्राप्तेरनुक्तिसहत्वात् । अत: दशानामग्रतानां पूर्वस्मिन् पक्षसि दशधा विभागे दशमो भाग: अष्टादशदिनात्मक: ऐन्द्रवायवाग्र: स्यात्, प्रकृतौ दशमस्य ऐन्द्रवायवाग्रत्वात् । ततश्चोत्तरस्मिन् पक्षसि प्रातिलोम्ये प्रथमो भाग ऐन्द्रवायवाग्र: प्राप्नोतीति सिद्धान्तेऽपि आग्रयणाग्रताऽनुपपत्ति: । वस्तुतस्तु आतिदेशिकत्र्यनीकाया: पूर्वपक्षस्येव प्राप्तौ प्रमाणाभाव: । कृत्स्ने हि गवामयने सा प्राप्येत । अतस्तस्य कृत्स्नस्य नवधा दशधा वा विभागे क्रियमाणे चत्वारिंशद्दिनात्मक: षट्त्रिंशद्दिनात्मको वा एकैको भाग: प्राप्नोति । ततश्च त्र्यनीका न पूर्वस्मिन् पक्षसि समाप्यते इति न तद्विषये प्रातिलोम्यविधिरपि प्रवर्तते । ततश्च नवधा विभागे त्रयस्त्रिंशस्य पञ्चमभागान्तर्गतत्वात् शुक्राग्रत्वप्राप्ते: आग्रयणाग्रतादर्शनानुपपत्ति: । दशधा विभागे तु तस्य षष्ठभागान्तर्गतत्वात् आग्रयणाग्रत्वप्राप्त्या लिङ्गदर्शनोपपत्तावपि भाष्यग्रन्थानुपपत्तिः दुरुद्धरा । किञ्च गवामयने न चोदकेन त्र्यनीका प्राप्यते, तत्र हि अभिप्लवषडहादौ बहुधा नामातिदेशेनैव धर्मप्राप्ति: । तथाहि, अभिप्लवे तावत् ‘ ज्योतिर्गौरायुर्ज्योतिर्गौरायुः ’ इत्येवं षडहा:, तेषु ज्योतिराद्येकाहधर्मप्राप्तिर्नामातिदेशेन । तेषु च नैमित्तिकं ऐन्द्रवायवाग्रत्वं शुक्राग्रत्वं च ज्योतिष्टोमात् । अतश्च अभिप्लवे षडहे प्रथमतृतीयपञ्चमानां रन्थन्तरसामत्वादैन्द्रवायवाग्रता, द्वितीयचतुर्थषष्ठानां बृहत्सामकत्वात् शुक्राग्रतेति न तेषु त्र्यनीकाप्राप्ति: । एवं विश्वजिदादिष्वपि नामातिदेशस्य आवश्यकत्वात् ऐन्द्रवायवाग्रत्वम्, न त्र्यनीकाप्राप्तिः । एतद्धर्भमेव बहुशो गवामयनमिति न तस्मिन् त्र्यनीकाप्राप्तिः । **न च** नामातिदेशेन प्रकृतौ ये विशिष्यौपदेशिका धर्मा: तेषामेव प्राप्ति:, न तु ये प्रकृतावपि आतिदेशिका:, तेषामव्यक्तत्वसादृश्येन ज्योतिष्टोमादेव तेष्विवाभिप्लवेष्वपि प्राप्त्युपपत्तेः । अतश्च तदतिदेशापेक्षया गणत्वसादृश्यकल्पितातिदेशस्य विशेषनिष्ठत्वेन बलवत्त्वात् तेन त्र्यनीकातिदेशो युक्त एवेति **वाच्यम्** । आवश्यकेन नाम्नैव यावदपेक्षितानां औपदेशिकानामातिदेशिकानां च धर्माणां प्राप्त्युपपत्तौ, तस्यां विकृतौ ज्यौतिष्टोमिकधर्मातिदेशस्यैव कल्पनात् । **न च** तथापि सुत्याऽन्तरार्थमवश्यकल्प्येन गणत्वसादृश्यातिदेशेनैव अग्रताप्राप्तिसंभवे नामातिदेशस्य तत्प्रापकत्वे मानाभाव इति **वाच्यम्** । श्रुतनाम्नस्तद्विषयत्वे संभवति अश्रुतस्य आनुमानिकातिदेशस्य तद्विषयत्वकल्पनाऽयोगात् । वस्तुतस्तु, न गवामयनादौ सकलसुत्यासाधारण्येन ‘ गवामयनं द्वादशाहवत् कुर्यात् ’ इत्येवमेकोऽतिदेश: । तत्तत्सुत्यानां प्रत्येकसाधनीभूतानां समुच्चयेन प्रत्येकमेवेतिकर्तव्यताकाङ्क्षत्वेन प्रत्येकमेवातिदेशकल्पनात् । अत एव ‘ गावामयनिकप्रथमदिनं द्वादशाहिकदशाहप्रथमदिनवत् कुर्यात् ’ इत्याद्याकारक एवातिदेश: । सर्वसाधारण्येन एकातिदेशकल्पनायां च द्वितीयादिष्वपि प्रथमाद्यहर्धर्मप्राप्त्यापत्ति: । तेन नामातिदेशाविषयसुत्यायां ‘ इयं सुत्या द्वादशाहिकतत्सुत्यावत् कार्या ’ इत्यतिदेशेन प्राकृततत्सुत्यावृत्त्यग्रताप्राप्तावपि नामातिदेशविषयाभिप्लवादौ द्वादशाहिकतत्स्थानापन्नसुत्यातिदेशाकल्पनेन प्राकृततत्सुत्यावृत्त्यग्रताप्राप्त्यनुपपत्ते: । नहि त्र्यनीका नाम अनेकसुत्यासाधारणमेकमङ्गम्, येनावयवश: एकस्मिन्नेव न प्राप्येत, अपितु तत्तद्विधिविहिता: तावत्योऽग्रता: तत्सुत्यानामङ्गम् । अतश्च गवामयने यैव सुत्या द्वादशाहिकयत्सुत्याविकार:, तद्गताग्रता तत्र प्राप्यते, नान्यगताऽन्यत्रेति नाभिप्लवादौ द्वादशाहत: अग्रताप्राप्तिः । **न च** एवमप्यग्रतानां प्रकृतौ भागधर्मत्वात् नामातिदेशाविषयसुत्यायां प्राकृततत्स्थानापन्नसुत्याधर्मप्राप्तावपि अग्रतानां कथं प्राप्तिरिति **वाच्यम्** । भागधर्मत्वेऽपि तत्सुत्याङ्गत्वानपायात् । धर्मविधिषु हि केषुचित् तदहरपूर्वसाधनत्वमुद्देश्यताऽवच्छेदकम्, केषुचित्तु परमापूर्वसाधनीभूतभागविशेषत्वमित्येतावान् भेद: । न त्वेतावता तत्सुत्याया उद्देश्यत्वे कश्चिद्विरोध: । अतश्च तन्मात्रविकारे उभयविधतद्धर्मप्राप्तिरविरुद्धैव । अत एव सौर्यादौ प्रोक्षण-

प्रयाजादीनां अतिदेशः । उक्तसुत्याविकारे एकाहादौ तु परमापूर्वप्रयुक्तप्रथमादिविभागाभावात् तत्प्रयुक्तधर्मलोपेऽपि अन्यत्रोभयप्राप्तिरविरुद्धव । एवं च गावामयनिकतृतीयाद्यहःसुः द्वादशाहिकदशाहान्तर्गततृतीयाहर्धर्माणामेव उभयविधानां प्राप्तेः, तत्र च भागधर्मभूताऽपि आग्रयणाग्रतैव, तस्या एवेह प्राप्तेर्न विंशत्यात्मकभागरूपतया ऐन्द्रवायवाग्रताप्राप्तिरूपो भाष्यकारीयः सिद्धान्तः संगच्छते इत्यपि ध्येयम् । अतो यथावार्तिकमौपदेशिकीं त्र्यनीकामादायैव अधिकरणं योज्यं इति सिद्धम् ।

एतावत्तु **वार्तिककारमतेऽपि** चिन्तनीयम् । यत्र प्रकृतौ न्यूनभागवृत्तिधर्मः, विकृतौ च स भागोऽधिकदिनघटितः । अधिकानि च दिनानि न प्राकृततद्भागप्रकृतिकानि यथा अत्रैवौपदेशिकत्र्यनीकाऽभावे कृत्वाचिन्तया, तत्र तद्भागधर्मप्राप्तिः कथमिति ।

मण्डन— ‘ स्वस्थानवृद्धिं लभते त्र्यनीका । ’ २६.

शंकर— ‘ त्र्यनीकाऽऽवृत्तिः स्वस्थानात् । ’ २७.

* **त्र्यम्बकाः** एककपालाः चातुर्मास्येषु । ‘ अप्रतिष्ठिता वै त्र्यम्बकाः ’ इति दोषमनुकीर्त्य इदं श्रूयते ‘ आदित्यं घृते चरुं निर्वपेत् पुनरेत्य गृहेषु, इयं वा अदितिः इयं प्रतिष्ठा ’ इति । भा. ८।४।५।२३.

त्र्यम्बकेषु चतुष्पथैकोल्मुकयोः समुच्चयः ॥

‘ चतुष्पथे एकोल्मुकमुपनिधाय जुहोति ’ इत्यपि प्रकरणान्तरे श्रूयते । तत्र चतुष्पथस्यैव अग्निपडबीशरूपत्वेन अग्न्यन्तरापेक्षत्वात् एकोल्मुके वा केवलचतुष्पथे वा होमः । इति विकल्पे प्राप्ते, अग्निवत्येवेति मतुपः प्रशंसार्थत्वेन वास्तविकाग्निमत्ताया अबोधनेन विहितस्योल्मुकस्य त्यागे प्रमाणाभावान्न विकल्पः । संकर्ष. २।४।१५.

* **त्र्यम्बकेषु** ‘ नेध्माबर्हिः संनह्यते, न प्रयाजा इज्यन्ते, नानुयाजा इज्यन्ते, न सामिधेनीरन्वाह ’ इति । भा. ८।४।५।२१, * त्र्यम्बकेषु पुरोडाशः करम्भपात्राणि तण्डुलाः इत्येवमादीनि औषधानि चोद्यन्ते । ८।४।५।२५. * त्र्यम्बकेषु पुरोडाशेषु चातुर्मास्यगतेषु अभिघारणानभिघारणमीमांसा अर्थवादः । वि. १०।८।५. * त्र्यम्बकेषु पुरोडाशेषु चातुर्मास्यगतेषु दर्विहोमत्वेन अपूर्वमेव अभिघारणं विधीयते । भाट्ट. १०।८।७.

त्र्यम्बकाधिकरणम् । त्र्यम्बकपुरोडाशादिविषयकं अभिघारणानभिघारणादिवाक्यमर्थवादः ॥

पर्वैश्च तुल्यकालत्वात् । १०।८।५।८ ॥

भाष्यम्— चातुर्मास्येषु त्रैयम्बकानधिकृत्य समामनन्ति ‘ अभिघार्या नाभिघार्या इति मीमांसन्ते, यदभिघारयेत्, रुद्रायाऽऽस्ये पशूनभिदध्यात्, यन्नाभिघारयेन्न रुद्रायाऽऽस्ये पशूनभिदध्यात् । अथो खल्वाहुरभिघार्या एव । न हि हविरनभिघृतमस्ति ’ इति । तथा ‘ होतव्यमग्निहोत्रं न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः, यदि जुहुयादयथापूर्वमाहुतीर्जुहुयात्, यन्न जुहुयादग्निः परा पतेत्, तूष्णीमेव होतव्यम्, यथापूर्वमाहुतीर्जुहोति, नाग्निः परा पतति ’ इति । अत्रायमर्थः सांशयिकः किमभिघारयितव्यास्त्रैयम्बकाः, उत नाभिघारयितव्या इति । होतव्यमग्निहोत्रम्, न होतव्यं वा विधिप्रतिषेधावेतौ इह, उत अर्थवादार्थमेतयोः संकीर्तनमिति । किं तावत् प्राप्तम् ? विधिप्रतिषेधाविति ब्रूमः, तद्रूपत्वात् । विधिप्रतिषेधयोर्हि प्रत्यक्षं रूपमुपलभ्यते । श्रुत्या चानुष्ठानार्थता प्रतिषेधार्थता चावगम्यते । वाक्यादर्थवादार्थता । श्रुतिश्च वाक्याद्बलीयसी । न च पर्युदासोऽवकल्पते । तस्मादग्निहोत्रं होतव्यं न होतव्यं वा, यदा होतव्यं तदा तूष्णीम् । त्र्यम्बका अभिघारयितव्याः, न वा अभिघारयितव्याः, यदा पुनरभिघारयितव्याः, तदा अभिघारयितव्यवचनमर्थवादार्थम्, प्रतिषेधसंकीर्तनात् अभावाशङ्कायां पुनरुच्यते इति । एवं प्राप्ते, ब्रूमः । पूर्वाधिकरणोदाहरणैः तुल्यकालानीमानि उदाहरणानि । का तुल्यकालता ? पूर्वं विधिप्रतिषेधौ अभिधाय उत्तरेण तयोरभिसंबन्धः क्रियते इति । तदेतत् पूर्वाधिकरणेनैव तुल्यम् । यौ विधिप्रतिषेधौ श्रूयेते, न तावनुष्ठातुम्, वर्जयितुं वा । किं तर्हि ? मीमांसितुम् । एवमाह ‘अभिघार्या नाभिघार्या इति मीमांसन्ते ’ । तथा ‘ होतव्यमग्निहोत्रम्, न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः ’ इति । मीमांसा चेतरविधिप्रशंसार्था । तथा प्रत्यक्षः शब्दार्थेन संबन्धः । न किंचित् कल्पनीयम् । विधिप्रतिषेधयोर्हि किंचित् कल्पनीयं स्यात् । ‘यदभिघारयेत्, रुद्रायाऽऽस्ये पशूनभिदध्यात्’ इति । इदमभिघारणं

गुणवत्तरम्, यदीदृशोऽपि दोषो नाऽऽद्रियते इति । तथा, 'यज्जुहुयादयथापूर्वमाहुतीर्जुहुयात्, यन्न जुहुयादग्निः परा पतेत्' इति । इत्थं तूष्णींहोमः प्रशस्तः, यदस्मिन् क्रियमाणे उभावपि दोषौ परिहृतौ भवतः इति ।

सोम-- पूर्ववदिह विकल्पस्यान्यतः सिद्धत्वाभावात् प्रतिषेधस्य नानर्थक्यं इत्युत्थिते: (प्रत्युदाहरण-) **संगतिः । माधवीये वेदभाष्ये** "अस्मिन् (तूष्णीं-) होमे अग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रधर्माः प्राप्नुवन्ति । तत्र यजुषा होमपक्षे क्रियमाणे 'सूर्यो ज्योतिः' इति मन्त्रः स्यात् । प्रसिद्धाग्निहोत्रस्य च सायमुपक्रमत्वात् तत्र प्राथमिकप्रयोगे 'अग्निर्ज्योतिः' इति मन्त्रेण सायं हुत्वा पश्चात् प्रातःकाले 'सूर्यो ज्योतिः' इति मन्त्रेण होमः इत्येवं क्रमः । इह तु आदावेव सूर्यो ज्योतिरित्यनेनानुष्ठाने प्रकृतिक्लृप्तक्रमाभावात् अयथापूर्वता स्यात्" इति व्याख्यातम् । तत् चिन्त्यम् । तूष्णींहोमे श्रूयमाणस्याग्निहोत्रशब्दस्य धर्मातिदेशकत्वाभावात् । नहि अत्र कुण्डपायिनामयनगताग्निहोत्रे इव विध्युद्देशे अग्निहोत्रशब्दः श्रूयते येन धर्मातिदेशकत्वं स्यात्, किन्तु अर्थवादे, अर्थवादगतस्य च नाम्नो नातिदेशकत्वं स्तुत्युपक्षीणत्वात् । यथा 'एष वै दर्शपूर्णमासयोरवभृथः' इत्यपां न्युत्सेके एवावभृथशब्दस्य न धर्मातिदेशकत्वम् । यथा वा 'सोमो वै वाजिनं सुरा सोमः' 'उपशयो यूपः' इत्यादीनाम् । किञ्च अयं तूष्णींहोमः अग्निसंस्कारार्थः, तथा च 'अग्नये होत्रमस्मिन्' इति यौगिकत्वाभावात् प्रायणीयादिवत् नातिदेशकत्वम् । अयं चार्थः पञ्चमे तन्त्ररत्ने व्यक्तः । एवं च प्राकृतहोमविकारत्वाश्रयणेन **याज्ञिकानां** तदीयधर्मानुष्ठानमपि चिन्त्यम् । **सूत्रार्थस्तु**- पूर्वैर्जर्तिलाद्युदाहरणैः होमाभिघारणवाक्ययोरपि तुल्यकालत्वात् तुल्यव्यापारत्वात् अन्यशेषत्वात् इति यावत् । तस्मात् इहाप्यर्थवादः स्यादिति ।

वि—'अभिघारनिषेधौ च होमाहोमौ विकल्पितौ । विधास्यमानशेषौ वा विकल्पः श्रुतिसाम्यतः ॥', निषेधस्य विधेश्चात्र मीमांस्यत्वेन वर्णनात् । समीमांसावुभावर्थवादोऽस्त्वर्थे विधित्सिते ॥' (अर्थे विधित्सिते उभौ मीमांसासहितौ अर्थवादः इति) ।

भाट्ट— आधाने 'होतव्यमग्निहोत्रं न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः । यद् यजुषा जुहुयादयथापूर्वमाहुतीर्जुहुयात्, यन्न जुहुयादग्निः परापतेत्, तूष्णीमेव जुहोति' इति श्रुतम् । तथा चातुर्मास्येषु त्र्यम्बकहोममधिकृत्य 'अभिघार्या अनभिघार्या इति मीमांसन्ते, यदभिघारयेत् रुद्रायास्ये पशून्निदध्यात् । यन्नाभिघारयेत्, न रुद्रायास्ये पशूनभिदध्यात् । अथो खल्वाहुरभिघार्या एव । न ह्यनभिघृतं हविर्भवति' इति श्रुतम् । तत्रापि अन्तिमस्यैव विधेः सर्वोऽयं शेषः । न तु होमतदभावयोः अभिघारणानभिघारणयोश्च । होतव्यं न होतव्यं अभिघार्या अनभिघार्या इति विधिप्रतिषेधश्रवणाद्विकल्पः । तयोर्मीमांसाविशेषणत्वेन विधिशक्तिप्रतिबन्धात् । **न च** विकल्पे पक्षद्वयावलम्बनेन प्रयोगकाले मीमांसोपपत्तेः अन्यतरस्यैव विधेयत्वे एकपक्षावलम्बितया मीमांसाऽनुपपत्तिरिति **वाच्यम्** । अन्तिमविधितः पूर्वं संदिग्धत्वेन मीमांसोपपत्तेः । अतश्च विचारपूर्वकस्य तस्यान्ते निश्चायकत्वात् स्तुत्युपपत्तिः । एतादृशोऽयं होमोऽभिघारणं च यद्दोषदुष्टमपि बहुतरगुणवत्त्वात् कर्तव्यमेव । होमे तु नैव कश्चिद्दोष इति स्तुतिः । अत्र च त्र्यम्बकहोमस्य दर्वीहोमत्वेन अपूर्वत्वादपूर्वमेवाभिघारणं विधीयते । तूष्णींहोमे हि नाग्निहोत्रहोमत्वं, प्रमाणाभावात् । नाप्यग्निहोत्रधर्मकत्वम्, अर्थवादगतस्य नाम्नोऽनतिदेशकत्वात् । **शास्त्रदीपिकोक्तरीत्या** विधिगतत्वेऽपि वा तस्यापि आधानद्वारा अग्निप्रयोजकत्वेन अग्निसंबन्धित्वाविशेषात् प्रायणीयादिवदनतिदेशकत्वाच्च । अतोऽपूर्व एवायं होमः आधानाङ्गत्वेन विधीयते । तत्र मन्त्रे प्रमाणाभावादेव तूष्णीमित्यनुवादः । देवता तु अनादिष्टे प्रजापतिः । **याज्ञिकास्तु** अग्निहोत्रधर्मातिदेशं मन्यन्ते । तदा तूष्णींत्वस्यापि विधिः । परंतु तदा कर्मान्तरत्वे प्रमाणं मृग्यम् ।

मण्डन-- 'त्र्यम्बकावधृतिः स्तुतिः ।'

शंकर— 'होमाभिघारणे नित्ये ।'

* **त्र्यार्षेयस्यैव** कर्माधिकारः, नान्यस्य । **भा.** ६।१।११।४३.

त्र्यार्षेयाधिकरणम् । दर्शपूर्णमासयोः त्र्यार्षेयत्वसंपादनसमर्थस्यैवाधिकारः ॥

अत्र्यार्षेयस्य हानं स्यात् । ६।१।११।४३ ॥

भाष्यम्—दर्शपूर्णमासयोः श्रूयते 'आर्षेयं वृणीते, एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चातिवृणीते' इति । तत्र संदेहः किं अत्र्यार्षेयस्य अधिकारः, उत नेति । किं प्राप्तम् ? अत्र्यार्षेयोऽपि अधिक्रियते इति । कुतः ? 'आर्षेयं वृणीते' इति सामान्यवचनम् । तस्मात् एकं वरिष्यति द्वौ वा । तच्च दर्शयति 'एकं वृणीते, द्वौ वृणीते' इति । तथा प्रतिषेधति 'न चतुरो वृणीते, न पञ्चातिवृणीते' इति । न हि अप्राप्तस्य प्रतिषेधोऽवकल्पते । तस्मात् अत्र्यार्षेयोऽपि अधिक्रियेत इति । एवं प्राप्ते, ब्रूमः । यो न त्र्यार्षेयः स नाधिक्रियेत । कुतः ? 'त्रीन् वृणीते' इति विशेषवचनात् । विधिश्च अप्राप्तत्वात् । ननु एकं वृणीते इत्यपि विशेषवचनमस्ति । नेत्युच्यते, विधायिकाया विभक्तेरभावात् । ननु स्तुत्या विधास्यते, यथा त्रीन् वृणीते इति । उच्यते । त्रयाणामेव स्तुतिः । सा त्रित्वं विधास्यति । एकं वृणीते इति अवयुत्यानुवादोऽयं त्रयाणामेव । तत्रापि त्रित्वमेव स्तूयते विधातुम् । एवं एकवाक्येन विधानं भविष्यति इति । 'न चतुरो वृणीते, न पञ्चातिवृणीते' इति नित्यानुवादो भविष्यति । तस्मात् त्र्यार्षेयस्याधिकारो नान्यस्येति ।

टुप्— 'आर्षेयं वृणीते' इति सामान्येन (आर्षेयवरणस्य) विधिः । एकत्वादयस्तु (सामान्येनैव) प्राप्तत्वात् स्तुत्यर्थाः । चतुरादिप्रतिषेधस्तु तस्मिन्नेव पक्षे उपपद्यते । अथवा सामान्येन विहिते (सति वरणे) एकत्वादिभिः विशेष्यते । एवं प्राप्ते, ब्रूमः । 'आर्षेयं वृणीते' (इति सामान्यं विशेषं प्रति-) साकाङ्क्षं त्रीन् वृणीते इति वाक्यात् त्रित्वेन विशेष्यते । एकत्वादयः (तु) अवयुत्यानुवादः । इतरथा (यदि एकत्वाद्यपि विधीयेत, ततः) वाक्यभेदः अदृष्टकल्पना अश्रुत- (विधि-) कल्पना च (प्रसज्येत) । सामान्येन विधिः एकत्वादयः अर्थवादाः इति चेत्, एवमपि चतुरादिप्रतिषेधात् वाक्यभेदः स्थित एव । अस्मत्पक्षे पुनः (आर्षेयं वृणीते, किं संख्यम् ? त्रीन्, इति) एकवाक्यत्वात् न कश्चित् दोषः । त्रीणि आर्षेयाणि यः संपादयितुं शक्नोति, सः अधिक्रियते । चतुरार्षेयस्य त्रित्वसंपादने अस्ति सामर्थ्यम् । न च ईदृक् वाक्यम् 'त्र्यार्षेय एव अधिक्रियते' इति । ननु इदमेवास्ति 'त्रीन् वृणीते' इति, (उत्तरम्-) त्रीणि यः संपादयितुं शक्नोति, तस्य वरणमुच्यते । न 'यस्य त्रीण्येव' इति गुरुवाक्यं भवति, अनपेक्षितश्च संबधः (स्यात्) । (चोदयति-) 'न पञ्चातिवृणीते' इति पञ्चातिक्रमणप्रतिषेधात् इदमवगम्यते अस्ति पञ्चानां वरणं इति । नैतदेवम् । अनुमानादेव तत् वरणं कल्प्यते । न च अनुमानेन शक्यः शास्त्रार्थः अनुष्ठातुम् । त्रिवरणे न पञ्च व्रियन्ते, नापि अतिक्रम्यन्ते । एवं लघुत्वेन च स्तुतौ एकवाक्यत्वं घटते । इतरथा वाक्यभेदादि स्थितमेव । तस्मात् त्रित्वसंपादनसमर्थः अधिक्रियते । 'भार्गव' इत्येतावन्मात्रं वरणं न कर्तव्यम् । मनुवत्पक्षे तु यस्यापि एकः, यस्यापि पञ्च, तस्यापि सकृदेव उच्चारणं 'मनुवत्' इति ।

शा—एकं द्वौ त्रीन् पञ्च वा वृणानः अधिक्रियेत इति प्राप्ते, अभिधीयते । '**असंख्याकविधौ तावत् प्रतिषेधद्वयाश्रयात् । वाक्यद्वयं प्रसज्येत त्रीनित्येतच्च पाक्षिकम्** (प्रसज्येत) ॥ **एकद्वित्रिविधानं च** (प्रसज्येत) **ततो वाक्यत्रयं भवेत् । विकल्पश्च भवेत् तस्मात् त्रित्वमेव विधीयते ॥**'

सोम— पञ्चार्षेयद्व्यार्षेययोः अप्रतिसमाधेयाङ्गवत् असामर्थ्याभावात् अस्ति अधिकारः इति प्रत्यवस्थानात् संगतिः । चतुःपञ्चार्षेयादीनां स्वीयऋषिमध्ये ऋषित्रयवरणे अधिकारः सिद्धान्ते संमतः ।

वि— 'विधिर्वरण एकादावपि स्यात् त्रिक एव वा । , अविशेषात् पक्ष आद्यो, वाक्याभेदाय तूत्तरः ॥' तस्मात् कर्मणि अधिकुर्वन् यजमानः त्रीनेव उच्चारयेत्, न न्यूनं नाप्यधिकं इति तात्पर्यार्थः ।

भाट्ट— दर्शपूर्णमासयोः 'आर्षेयं वृणीते, एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चाति वृणीते' इति श्रुतम् । तत्र तावत् एकं विधायकं अन्ये अनुवादाः इत्यविवादम् । अन्यथा सर्वेषां विधित्वे

वाक्यभेदविकल्पयोरापत्तः । अतः 'त्रीन् वृणीते' इत्येव विधिः । 'एकं वृणीते द्वौ वृणीते' इत्यवयुत्यानुवादः त्रित्वस्तुत्यर्थः । 'न चतुरो वृणीते' इत्याद्यपि नित्यानुवादः तदर्थ एव । अतश्च त्र्यार्षेयवत् पञ्चार्षेयोऽपि त्रीनेव वृणीयात् । एकद्व्यार्षेययोस्तु नास्मिन् पक्षे अधिकारः । अपि तु 'अथ हैके मनुवत् इत्येवैकार्षेयं सार्ववर्णिकं प्रतिदिशन्ति' इति वचनान्तरविहितमनुवत्पक्षाश्रयेणैव । तदेतद्भगवतो जैमिनेर्मतं ऋष्यन्तरैरभ्युपगतम् । तथा च **कात्यायनः** अनुवदति 'परस्तादर्वाञ्चि त्रीणि' इति । **आपस्तम्बोऽपि** 'त्रीन् यथर्षि मन्त्रकृतो वृणीते' इति । तैस्तु पक्षान्तराण्यपि उक्तानि । 'यावन्तो वा मन्त्रकृतः' इति **कात्यायनः** । 'अपिवा एकं द्वौ त्रीन् पञ्च वृणीते, न चतुरो वृणीते न पञ्चाति वृणीते' **इत्यापस्तम्बः** । 'यावन्तः स्युः परंपरं प्रथमम्' **इत्याश्वलायनोऽपि** । तेषां चायमभिप्रायः, 'आर्षेयं वृणीते' इत्ययं विधिः इतरे अनुवादाः तत्स्तुत्यर्थाः । अतश्च 'त्रीन् वृणीते' इत्यपि अनुवाद एव । ईदृशोऽयं वरणसामान्यविधिः, यत् तत्तदार्षेयं प्रति तत्तत्संख्याकवरणं प्राप्यते इति स्तुतिः । इतरथा भवन्मते सामान्यवाक्येनैव वरणविधिं अभ्युपगम्यापि एकवाक्यत्वलाभाय पञ्चार्षेयस्यैव अधिकारापत्तेः त्रयाणामपि एषां अवयुत्यानुवादत्वापत्तिः । न चैवं चतुःषडादीनामपि वरणप्रसक्तौ तन्निषेधेन वाक्यभेदापत्तिः, एकद्वित्रिपञ्चार्षेयाणामेव प्रवराध्याये समाम्नानेन चतुःषडादेः अप्रसक्तेः । अतः अस्मिन्नपि पक्षे वाक्यभेदाद्यनापत्तेः एकद्व्यार्षेययोः अधिकारः । पञ्चार्षेयस्य पञ्चानां वरणं न विरुद्धमिति । यत्तु द्व्यामुष्यायणानां उभयतः कुलद्वयेऽपि वरणविधानात् अस्ति चतुःषडादीनां प्राप्तिरिति, तन्न । **आश्वलायनेन** (१२।१३।४–५) द्व्यामुष्यायणाननुक्रम्य 'तेषामुभयतः प्रवृणीते एकमितरतः द्वावितरतः, द्वावेकतरतः त्रीनितरतः' (द्वौ वेतरतः त्रीनितरतः इति पाठः । अत्र वृत्तिः—त्र्यार्षेयवरणपक्षे एकमितरतः इत्यादि । द्वौ वा इत्यादि तु पञ्चार्षेयप्रवरणपक्षोऽयम्) इति आवश्यकश्रुत्यन्तरमूलकेनैव तन्निषेधात् । अतो भार्गवच्यावन इत्यादिविशेषरूपेण वरणपक्षेऽपि मनुवत्पक्षवदेव एकद्व्यार्षेययोरपि अधिकारः इति ऋष्यन्तरमतं बोध्यम् । ६।१।१०.

मण्डन—'विधिस्त्र्यार्षेयवरणे ।'

शंकर—'त्र्यार्षेयवरणात् सा स्यात् ।' सा अधिक्रिया ।

* **त्र्यार्षेयपादः** । संकर्षे तृतीयेऽध्याये चतुर्थः पादः अत्र चतुर्दश अधिकरणानि । **के.**

* **त्वगिन्द्रियं** स्पर्शमात्राभिव्यञ्जकतया स्पर्शवत्त्वानुमानेन वायुप्रकृतिकम् । **मणि. पृ. १९.** * **त्वक्सहितत्व**शयानत्वादयः परिधिधर्माः । **वि. १२।२।११.**

* **त्वन्** प्रत्ययः कृत्यार्थः प्रतिषेधे । **बाल. पृ. ४०,** * त्वन् प्रत्ययः कृत्यार्थः विधौ यथा– 'कर्त्वं हविः' कर्तव्यमित्यर्थः । पृ. ४०.

⧗ त्वष्टारं तूपलक्षयेत् पानात् ।३।२।१४।३५।।

ज्योतिष्टोमे अस्ति पात्नीवतः सोमः 'आग्रयणात् पात्नीवतं गृह्णाति' इति । तत्र होममन्त्रः 'अग्नाऽऽऽइ पत्नीवांऽऽऽः सजूर्देवेन त्वष्ट्रा सोमं पिब' इति । अस्य पात्नीवतस्य शेषभक्षमन्त्रे पत्नीवता सह त्वष्टाऽपि उपलक्षणीयो न वेति विचारे, पूर्वपक्षमाह । पत्नीवता सह त्वष्टारं उपलक्षयेत् । पानात् पत्नीवता सह त्वष्ट्राऽपि सोमस्य पानात् । तस्मात् त्वष्टृपत्नीवत्पीतस्य इति भक्षमन्त्रे ऊहः कर्तव्यः ।

अतुल्यत्वात्तु नैवं स्यात् । ३६ ॥

सिद्धान्तमाह । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । एवं न स्यात् पात्नीवतशेषभक्षणे त्वष्टुरुपलक्षणं न स्यात् । अतुल्यत्वात् पाने त्वष्टुः पत्नीवता तुल्यत्वाभावात् । पाने अन्वयाभावात् इत्यर्थः । एवं त्वष्टृसाहित्यबोधकस्य मन्त्रस्य देवतानिर्देशचोदकस्य च अतुल्यत्वात् । अग्नेः साहित्येन वर्तमानस्य च त्वष्टुः अतुल्यत्वात् मन्त्रलिङ्गकल्पितस्य त्वष्टुः देवतात्वविधेः अग्निदेवताविधेश्च अतुल्यत्वात् तुल्यबलत्वाभावात् । तस्मात् पात्नीवतभक्षमन्त्रे त्वष्टुः उपलक्षणं न स्यात् । इति सिद्धान्तः । **के.**

* 'त्वष्टारं तूपलक्षयेत् पानात्' (कु. ३।२।१४।३२) इत्यधिकरणे 'सजूर्देवेन त्वष्ट्रा सोमं पिब' इति त्वष्टुरुपलक्षणभूतत्वात् न पानान्वयः इति व्यवस्थाप-

यिष्यते । कु. ३।१।१५।२६. * त्वष्टुः अदेवतत्वात् पात्नीवतसोमभक्षमन्त्रे स नोपलक्षणीयः । वि. ३।२।१४.

⌛ **त्वष्ट्रधिकरणम्** । पात्नीवतभक्षणे त्वष्टा नोपलक्षणीयः, ज्योतिष्टोमे ॥

त्वष्टारं तूपलक्षयेत् पानात् । ३।२।१४।३५॥

भाष्यम्-- अस्ति पात्नीवतः सोमः । तत्र मन्त्रः 'अग्नाऽऽऽ इ पत्नीवाँऽऽऽः सजूर्देवेन त्वष्ट्रा सोमं पिब' इति । तत्र संदेहः किं त्वष्टा उपलक्षयितव्यो न वेति । किं प्राप्तम् ? उपलक्षयितव्यः । कुतः ? पानात् । पानं श्रूयते, 'सजूर्देवेन त्वष्ट्रा सोमं पिब' इति । तेनायं अग्नये पत्नीवते सह त्वष्ट्रा दीयते इति गम्यते । यस्मै च येन सह दीयते, उभाभ्यां तद्दीयते । एवं तत् सहदानं भवति । यथा देवदत्ताय यज्ञदत्तेन सह शतं दीयतां इत्युक्ते तत्रोभाभ्यामपि दीयते । तस्मात् त्वाष्ट्रोऽप्यसौ सोमः इति (भक्षमन्त्रे) त्वष्टा उपलक्षयितव्यः । असावपि इन्द्र इव पिबतीति ।

वा— तस्मिन्नेव पात्नीवते पत्नीवता सह पातृत्वनिर्देशात् मान्त्रवर्णिकं त्वष्टुर्देवतात्वं इति पूर्वपक्षः ।

अतुल्यत्वात्तु नैवं स्यात् । ३६ ॥

भाष्यम्— नैतदेवम् । शब्दप्रमाणका वयम् । यच्छब्द आह, तदस्माकं प्रमाणम् । शब्दश्च अग्नेः पत्नीवतः पानमाह, त्वष्टुः सहभावमात्रम् । नहि अननुष्ठीयमाने सहभावः सिध्यति इति त्वष्टरि पानमनुमीयते । ननु त्वष्ट्रे पानं चोदितम् । सत्यं चोदितं मन्त्रवर्णेन, न चोदनया । चोदना हि 'पात्नीवतं गृह्णाति' इति । लोके तु कार्यं दृष्ट्वा चोदितमचोदितमपि अनुष्ठीयते एव । लोकतश्चैतत् परिच्छिन्नम् । नैवंजातीयकेन वाक्येन त्वष्टुः सोमः कुतो भवतीति ।

वा-- नैवोपलक्षयितव्यस्त्वष्टा । कुतः ? '**मन्त्रचोदकयोस्तावदतुल्यत्वं बलाबले । पातृत्वेनाप्यतुल्यत्वं सहपात्राभिधानतः**' ॥ विधौ हि केवलः पत्नीवान् देवता नान्यसहितः । तद्धितेनासौ चोद्यते । न च तद्धितः अन्यसापेक्षादुत्पद्यते । तेनापि मान्त्रवर्णिकी दुर्बला । न च मन्त्रवर्णस्य तद्देवतात्वकल्पनया विना कर्मानङ्गत्वं पत्नीवदभिधानेन तत्सिद्धेः । न च त्वष्टुरभिधानं अन्यथा नोपपद्यते, स्तुत्यर्थमात्रत्वेन उपपद्यमानत्वात् । अत एव च मन्त्रार्थो भवति 'यस्त्वं त्वष्ट्रा सहितः, स सोमं पिब' इति । इतरथा पातृत्वेनैव तावत् कीदृशं देवताऽभिधानम् ? देवताया उद्देशमात्रोपकारित्वात् । किं पुनर्यदा तत्रापि साहित्यमात्रश्रवणात् केवलमुत्प्रेक्षा । न चासौ ऐकान्तिकी विनाऽपि कार्ययोगित्वेन सहशब्दप्रयोगात् । तद्यथा 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' तत्र हि एतावानेवार्थो विज्ञायते सत्स्वपि दशसु पुत्रेषु सैव वहति इति । तस्मान्न त्वष्टुर्देवतात्वमवगम्यते । अतो नोपलक्षयितव्यः ।

सोम-- पूर्वत्र इन्द्रवाय्वादीनां देवतात्वाभावात् अनुपलक्षणत्वेऽपि अत्र त्वष्टुर्देवतात्वात् उपलक्षणं इति प्रत्यवस्थानात् संगतिः ।

वि—'सह पत्नीवता त्वष्ट्रा तद्-ग्रहे लक्ष्यते न वा।, सह त्वष्ट्रा पिबेत्युक्तेर्देवत्वात् सोऽपि लक्ष्यते ॥, सहत्वमात्रं त्वष्टुः स्यान्न पातृत्वमशब्दनात् । चोदनाया अभावाच्च न देवोऽतोऽत्र लक्ष्यते ॥' इति ।

भाट्ट— पात्नीवते एव 'अग्ना इ पत्नीवाः सजूर्देवेन त्वष्ट्रा सोमं पिब' इति मन्त्रात् त्वष्टुरपि देवतात्वम् । अतः सोऽपि अग्निवदुपलक्षणीयः । इति प्राप्ते, युक्तमग्नौ पत्नीवच्छब्दस्य यौगिकत्वेन विशेष्यसाकाङ्क्षस्य सामानाधिकरण्येन विशेष्यग्राहकत्वम्, त्वष्टुस्तु तृतीयया सहभावमात्रं प्रतीयते । न चासौ पानक्रियान्वयाव्यभिचारी 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यादौ व्यभिचारात् । सत्यपि पाने देवतात्वस्य अप्रामाणिकत्वाच्च । अतः पात्नीवतं इति निरपेक्षतद्धितेन पत्नीवतोऽग्नेरेव देवतात्वं इति स एवोपलक्षणीयो न त्वष्टा ।

मण्डन— 'त्वष्टा न पात्नीवतदेवता स्यात् ।'

शंकर--'त्वष्टा नोह्येत तत्रैव ।' पात्नीवते ग्रहे ।

* **त्वाष्ट्रः** पशुः उपसदामन्तरा कर्तव्यः, परंतु न उपसदङ्गम् । इदं राजसूये संसृपां हविःषु । वि. ४।४।३, भा. ४।४।३।५-६. * '**त्वाष्ट्रं** पात्नीवतमालभेत' 'पर्यग्निकृतं पात्नीवतमुत्सृजन्ति' अत्र पर्यग्निकरणान्तत्वस्य गुणस्य विधिः, न तु यागविधिः । वि. २।३।८. * 'त्वाष्ट्रं पात्नीवतं पर्यग्निकृतं उत्सृजति' 'आज्येन

संस्थापयति’। अत्र आज्यसंस्था यागान्तरमेव, न तु त्वाष्ट्रस्य प्रतिनिधिः। **भा. ९।४।१४।५६–६०.**

त्वाष्ट्रपात्नीवताधिकरणम्। त्वाष्ट्रपात्नीवते उत्सर्गरूपगुणविधिः॥

पात्नीवते तु पूर्वत्वादवच्छेदः। २।३।८।१९॥

भाष्यम्-- त्वाष्ट्रं पात्नीवतं विधाय इदमुच्यते ‘यत्पर्यग्निकृतं पात्नीवतमुत्सृजन्ति’ इति। तत्र संदेहः किं त्वाष्ट्रस्य पर्यग्निकृतस्यैष उत्सर्गो विधीयते, उत तस्मात् यागान्तरमिति। यदि ‘पर्यग्निकृतमुत्सृजन्ति’ इति पदद्वयं परस्परेण संबद्धम्, ततः त्वाष्ट्रस्योत्सर्गः। अथ पात्नीवतशब्दः उत्सृजतिना संबध्येत, ततो यागान्तरम्। किं तावत् प्राप्तम्? यागान्तरमिति। कुतः? पूर्वस्त्वाष्ट्रः पात्नीवतश्च। उभयविशेषणविशिष्टः कथं पात्नीवतशब्देन अनूद्येत। अपि च त्वाष्ट्रस्य उत्सर्गे विधीयमाने पर्यग्निकृतमिति विशेषणं नावकल्पेत। अतो ब्रूमः पर्यग्निकृतस्य पात्नीवतता विधीयते, स एव याग इति। एवं प्राप्ते, ब्रूमः। न कर्मान्तरम्, पूर्वस्यैव उत्सृजतिशब्देन अवच्छेदो विधीयते। किमेवं भविष्यति? यजिमत्ता तावत् कल्पयितव्या न भविष्यति। उत्सृजतिशब्दश्च श्रुत्या उत्सर्गे विदधत् वाक्येन न बाधितो भविष्यति। कर्मान्तरपक्षे वाक्येन पात्नीवततायां विधीयमानायां अर्थात् प्राप्त उत्सर्गो धातुना अनूद्येत। अपिच पर्यग्निकृतस्य पात्नीवतता पूर्वस्य विदितैव, सा विधातुं न शक्यते। तस्मात् पूर्वस्य कर्मणः अवच्छेदः। यत्तूक्तं त्वाष्ट्रस्य उत्सर्गे विधीयमाने पर्यग्निकृतमिति विशेषणं तावत् नावकल्पेतेति। नैष दोषः। अतन्त्रमेव अत्र पात्नीवतशब्दः, नासौ विशेष्यते। अत एव त्वाष्ट्रः पात्नीवत उभयविशेषणविशिष्टः केवलेन पात्नीवतशब्देन लक्षणया अनूद्येत इति न दोषः। तस्मादवच्छेद इति सिद्धम्।

वा— एतेनैव अधिकारेण उत्सृजतिरपि यजिमदभिधानो न वेति विचार्यते। ‘त्वाष्ट्रं पात्नीवतमालभते’ इत्येवं यागं विधाय पुनराम्नायते ‘पर्यग्निकृतं पात्नीवतमुत्सृजन्ति’ इति। तत्र गुणविधिः, उत कर्मान्तरमिति वचनव्यक्तिद्वयप्रतिभानेन संदेहे सति, वायव्यश्वेतालम्भवदेव विधिशक्तेः द्रव्यदेवतासंबन्धविषयत्वेन कर्मान्तरत्वम्। किंच। ‘**न च त्वष्टुरभावेन प्रत्यभिज्ञायतेऽत्र सः। पर्यग्निकृतयोगाच्च वाक्यभेदः प्रसज्यते॥**’ यदि हि अत्रापि पूर्ववदेव उभे विशेषणे श्रूयेयातां ततस्तदेव कर्मेति विज्ञायेत। न तु अत्र महेन्द्रस्येव इन्द्रप्रगाथे कश्चिदपि प्रत्यभिज्ञानलेशोऽस्ति इति देवताऽन्तरसंयोगादपि वाजिनयागवत् भिद्यते। पात्नीवतोद्देशेन च उत्सृज्यमानार्थे विधीयमाने पर्यग्निकरणावस्थाविशेषणात् वाक्यं भिद्येत। व्यवहितकल्पनया च उत्सृजतिः संबध्येत। प्राप्तः एव च तस्य उत्पत्तिवाक्येन उत्सर्गः इति व्यर्था पुनःश्रुतिः भवेत्। न च पर्यग्निकरणविधानेन अत्रार्थः, तस्य अतिदेशेनैव प्राप्तत्वात्। न च केवलपात्नीवतताविधिः वैकल्पिकः शक्य आश्रयितुम्, उत्पत्तिवाक्यशिष्टत्वविरोधात्। न च प्राकृतक्लृप्तोपकारकेवलपर्यग्निकरणपुनःश्रुत्या गृहमेधीयवत् अपूर्वता शक्या दर्शयितुं सिद्धवदुपसर्जनीभूतपर्यग्निकरणनिर्देशात्। न च पर्यग्निकरणशब्दः तदन्ताया अङ्गरीतेर्वाचकः, येन तन्मात्रग्रहणाश्रयणात् उत्तरकर्मावच्छेदो विज्ञायते (येत) न चासौ कालस्य वक्ता, येन पर्यग्निकाले एव उत्सृजतिं इति कल्प्येत। न च लक्षणाऽऽश्रयणहेतुरस्ति, श्रुत्याऽपि वाक्यसमवायोपपत्तेः। सर्वाङ्गेषु चोदकप्राप्तेषु वचनान्तरेण अनिषिद्धेषु पर्यग्निकरणवेलायां समस्तेषु अनुष्ठीयमानेषु सत्सु, नैव ज्ञायते किं क्रियतामिति, सर्वकरणे काललोपात्, तत्कालकरणे च अङ्गान्तरलोपात्। एतेन अवस्थाविधिः प्रत्युक्तः। चोदकेनैव तावत् पर्यग्निकरणावस्थः उत्सृज्यते इति प्रापितम्। अथ उत्तरावस्थापरिसंख्या उच्यते, तत्र त्रिदोषत्वं उक्तमेव। तस्मात् न पूर्वकर्मणि किंचित् विधेयमस्य वाक्यस्य, इति कर्मान्तरमेव द्रव्यदेवतासंयुक्तम्, देवतागुणसामान्येन च पूर्वप्रकृतिकं अग्नीषोमीयप्रकृतिकमेव वा विधीयते। इति प्राप्ते, अभिधीयते। ‘**प्रकृतप्रत्यभिज्ञानान्न यागोऽन्योऽवगम्यते। पर्यग्निकरणात् तस्मिन्नङ्गरीतिर्विधीयते॥**’ पात्नीवतशब्दस्तावत् मनोतायामिव अग्निशब्दः (त्वं ह्यग्ने प्रथमो मनोता इत्यस्यामृचि यथा अग्निशब्देन अग्नीषोमीयपशौ अग्नीषोमौ उच्येते तद्वत्) सत्यपि उभयविशिष्टत्वे शक्नोति प्रकृतं यागं वक्तुम्। ‘पर्यग्निकृतमुत्सृजति’ इति प्रकरणात्

तस्यैव गुणविधिर्विज्ञायते । ननु च सर्वे गुणविधिप्रकारा निराकृताः । सत्यं शेषा निराकृताः, पर्यग्निकरणान्ताङ्गरीतिपक्षस्तु न निराक्रियते । यद्यपि एष शब्दः इडान्तादिवत् (इडाऽन्ता आतिथ्या संतिष्ठते इत्यत्रेव) तदन्तत्वं न ब्रवीति, तथापि गमयितुं शक्नोति । नहि निर्वृत्तपर्यग्निकरणता पूर्वाङ्गेषु अकृतेषु संभवति । तस्मात् तदुपादानादेव अनुक्ताऽपि तदन्तता अवगम्यते । कथम्भावापेक्षी च त्वाष्ट्रप्रयोगवचनः प्रकृतौ दृष्टसामर्थ्यपर्यग्निकरणान्ताङ्गकलापस्य अतिक्रमकारणाभावात् न प्रकृतिस्थानि सर्वाणि अङ्गानि अपेक्षते । ततश्च एतावन्ति एव अस्याङ्गानि इति अवधारणात् स्वरूपप्राप्तिमात्रस्य च चोदकेनापि सिद्धेः उत्तराङ्गावच्छेदार्थमेव इदं वाक्यं इति फलेन व्यपदिश्यते, तेन उच्यते ‘पूर्वत्वादवच्छेदः’ इति । एवं च सति यागान्तरापूर्वान्तरानुमानादिक्लेशो न भवतीति । न च परपदसंबन्धविधानविप्रकर्षः । पर्यग्निकरणान्तविशिष्टे तु उत्सर्गे विधीयमाने यद्यपि उत्सर्गस्वरूपं प्राप्तमेव, तथापि तदुद्देशेन अङ्गकलापविधानात् अनत्यन्तविप्रकर्षात् स एव विधेयत्वेन उक्तः । त्वत्पक्षे तु ‘ दध्नेन्द्रियकामस्य ’ इत्यादिष्विव धातोः अत्यन्तपारार्थ्यं स्यात् । तस्मादपि अकर्मान्तरत्वम् । प्रकरणादेव च पर्यग्निकरणान्ताङ्गग्रहणसिद्धेः पात्नीवतग्रहणं नित्यानुवादत्वात् अतन्त्रम्, इति विशिष्टानुवादैकदेशव्यपदेशोपालम्भपरिहारः (पर्यग्निकरणावस्थाविशिष्टपात्नीवतव्यपदेशलक्षणस्य, पात्नीवतत्वरूपेण च एकेनांशेन त्वाष्ट्रपात्नीवतव्यपदेशलक्षणस्य च उपालम्भस्य परिहारः इति समासार्थः) । तस्मात् गुणविधिः इति सिद्धम् ।

सोम— इह विधौ पात्नीवतमिति देवताश्रवणात् यागान्तरं इति प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु**— पात्नीवते ‘पर्यग्निकृतं पात्नीवतम्’ इति वाक्ये प्रत्यभिज्ञायमानपूर्वकर्मवत्त्वात् तदन्ताङ्गरीतिविधानेन इतरेषामभावः स्यात् इति ।

वि — ‘पर्यग्निकृतः पात्नीवत उत्सृज्यत इत्यसौ ।
यागो गुणो वा, यागः स्यादन्वयाव्यवधानतः ॥,
प्रत्यभिज्ञातमालभ्यमनूद्योत्सर्गशब्दतः । गुणं पर्यग्निकृत्याख्यं वक्त्युत्तरनिवृत्तये ॥ न दृष्टा परिसंख्याऽत्र चोदकात् प्राग् विधौ सति । पर्यग्निकरणान्ताङ्गरीतिः क्लृप्तोपकारतः ॥’

भाट्ट— ‘त्वाष्ट्रं पात्नीवतमालभेत’ इत्यनेन द्रव्यदेवताविशिष्टं यागं विधाय ‘पर्यग्निकृतं पात्नीवतमुत्सृजति’ इति श्रुतम् । तत्रोभयदेवत्यस्य पूर्वयागस्य ‘आग्नेयं चतुर्धा करोति’ इतिवत् केवलपात्नीवतपदेन अनुवादायोगात्, पर्यग्निकरणादेश्च विधेयस्य गुणस्य अतिदेशेनैव प्राप्तत्वात्, इतराङ्गपरिसंख्यायां च त्रैदोष्यापत्तेः, पर्यग्निकृतपदस्य अनुवादत्वमङ्गीकृत्य कर्मान्तरविधिरेवायम् । इति प्राप्ते, प्रत्यभिज्ञानात् न कर्मान्तरम् । न चानुवादाऽनुपपत्तिः, सत्यपि अग्नीषोमादिवत् त्वष्टृपत्नीवतोर्व्यासज्यवृत्तिदेवतात्वे मनोतास्थाग्निशब्दवत् लक्षणया अभिधानोपपत्तेः । वस्तुतस्तु पृथक्तद्धितश्रवणात् देवताद्वयमेवेदम् । एकवाक्योपादानाच्च समुच्चयः । अतो डित्थडपित्थयोर्माता डित्थमाता इतिवत् शक्यते एव केवलेन पात्नीवतपदेनानुवादः । अतः पूर्वकर्मानुवादेन गुण एव विधीयते । न च विधेयाभावः, वृत्तपर्यग्निकरणत्वस्यैव क्तप्रत्ययान्तार्थस्य विधेयत्वात् । तस्य च गृहमेधीयाज्यभागन्यायेन प्राकृतस्यैव अतिदेशतः पूर्वप्रवृत्त्या विधेयत्वात्, क्लृप्तोपकारकत्वेन च तेनैव नैराकाङ्क्ष्यात् अतिदेशाकल्पनेन उत्तराङ्गानामर्थादेव निवृत्तौ त्रैदोष्यानापत्तेः । वृत्तपर्यग्निकरणत्वस्य च पूर्वाङ्गेष्वकृतेषु असंभवात् तान्याक्षिप्यन्ते । न च क्तप्रत्ययबलेन प्रमाणान्तरप्रमितत्वावगमात् अतिदेशाप्रतिबन्धकत्वम् । ‘प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति’ इत्यादौ प्रमाणान्तराभावेऽपि एतद्विधिविधेयस्यापि क्तप्रत्ययेन उपात्तत्वेन बाधकाभावात् ।

मण्डन— ‘त्वाष्ट्रोत्सर्गो विधीयते ।’

शंकर— ‘पात्नीवतयजिर्न च ।’

त्वाष्ट्रपात्नीवतपशोः पर्यग्निकरणोत्तरमुत्सर्गे सति ‘आज्येन शेषम्’ इति पत्नीवद्देवताकं आज्यद्रव्यकं कर्मान्तरं विधीयते ॥

आज्यसंस्था प्रतिनिधिः स्याद् द्रव्योत्सर्गात् । ९।४।१४।५६॥

भाष्यम्-- ‘ पर्यग्निकृतं पात्नीवतमुत्सृजति ’ इति प्रकृत्य श्रूयते । ‘ आज्येन शेषं संस्थापयति ’ इति । तत्र

संदेहः किमाज्यं पूर्वस्मिन् प्रतिनिधीभूतम्, अथवा आज्यद्रव्यकं पूर्वस्मात् कर्मान्तरं विधीयते इति। किं प्राप्तम्? प्रतिनिधिरिति। कुतः? पात्नीवतमिति द्रव्यमुच्यते। उत्सृजतीति तत्रैव उत्सर्गः श्रूयते। शेषमिति उपयुक्तेतरत् विद्यमानं गम्यते। तत् आज्येन संस्थापयतीति पशोः कार्ये आज्यं श्रुतं भवतीति। ननु पूर्वकर्म परिसमाप्तमित्युक्तम्। अत्रोच्यते। द्रव्योत्सर्गवचने प्रत्यक्षे, शेषशब्दे वा अपरिहृते पुनरसमाप्तं पूर्वकर्म इत्याशङ्क्यते। तस्मात् प्रतिनिधीयते आज्यमित्याशङ्कामहे। संस्थापयतीति च अपूर्वे नोपपद्यते।

समाप्तिवचनात्। ५७॥

भाष्यम्-- इतश्च आशङ्कामहे। समाप्तिवचनमिदं भवति 'संस्थापयति' इति। तेन मन्यामहे यत् पूर्वं पशुना आरब्धम्, तत् उत्सृष्टे पशौ आज्येन परिसमाप्यते इति। अपूर्वस्य अत्र कर्मणः उच्यमानस्य आरम्भः एव वक्तव्यो भवति। यतस्तु अनभिधाय आरम्भं परिसमाप्तिरेव उच्यते, ततः अवगच्छामः, पूर्वस्यैव परिसमाप्तिः नापूर्वं कर्म चोद्यते इति।

चोदना वा, कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात्। ५८॥

भाष्यम्-- कर्मान्तरचोदना वा। कुतः? पूर्वस्य कर्मणः परिसमाप्तत्वात्। ननूक्तं द्रव्योत्सर्गे शेषवचने वा अपरिहृते पूर्वकर्मणः समाप्तिराशङ्किता भवति। अत्रोच्यते। इदं द्वयमपि परिह्रियते। संस्थापयतीति प्रकृतेन पात्नीवतशब्देन संबध्यते। तत्रायमर्थः पात्नीवतं संस्थापयति इति। स एष यागो विधीयते। संपूर्वश्च स्थापयतिः प्रयुज्यते। अवश्यं कश्चित् धातुः संपूर्वो भाववचनश्च प्रयोक्तव्य इति। तत्र अविरुद्धो भावनायामुच्यमानायां अर्थप्राप्तः संस्थापयतिः आलभतिरिव प्रयुज्यते। शेषशब्दैश्च एवं सादृश्यात् प्रयुज्यते। द्रव्योत्सर्गश्च अविरुद्ध एव यागे उच्यमाने। तस्मात् यथा अन्ये निर्वपत्यादयः कर्मान्तरविधानें भवन्ति, एवं तैः अविशिष्टत्वात् संस्थापयतिरपि भवितुमर्हतीति।

अनिज्यां च वनस्पतेः प्रसिद्धां तेन दर्शयति। ५९॥

भाष्यम्-- प्रसिद्धां वनस्पतेः अनिज्यां अत एव दर्शयति। कथम्? 'यत् त्वष्टारं च वनस्पतिमावाहयसि, अथवैतौ यक्ष्यसि, त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी, अत्रैव एताविष्टौ विद्यात्' इति अङ्गान्तरेण अनुग्रहं ब्रुवन् वनस्पतीज्यायाः अभावं दर्शयति। शेषपरिसमाप्तौ सत्यां 'वनस्पतिं जुहोति' इति वनस्पतीज्या क्रियते। अथ परिसमाप्तं पूर्वं कर्म, ततो लुप्ता स्यात्, तत्र अभावदर्शनमुपपद्यते। तस्मात् पूर्वकर्म परिसमाप्तम्। इदमपि कर्मान्तरमिति।

संस्था तद्देवतत्वात् स्यात्। ६०॥

भाष्यम्-- अथ यदुक्तं 'संस्थापयति इति च अपूर्वे नोपपद्यते' इति, तत् परिहर्तव्यम्। अत्रोच्यते। असंस्थायां संस्थावचनमेतत्, तदपि पूर्वं पात्नीवतमिति समानदेवतत्वात् समाप्तिसादृश्यं ज्ञायते। तत्र तत् पात्नीवतमारब्धम्, इह परिसमाप्तमिति। स एष सादृश्यात् संस्थापयतीति शब्दः अवकल्पते इति।

सोम-- पूर्वाधिकरणे 'आज्येन शेषं संस्थापयति' इति इदं लिङ्गदर्शनमेव प्रसक्तम्, तत्र च यागान्तरविधित्वे एव तस्य लिङ्गत्वमुपपद्यते इति तस्य यागान्तरविधित्वसमर्थनात् **संगतिः**। **सूत्रार्थस्तु**--आज्येन शेषं संस्थापयति इत्यत्र आज्यं प्रतिनिधिः स्यात् पशुद्रव्यस्य उत्सृष्टत्वेन कर्मणः द्रव्यापेक्षत्वात् इति। ९।४।१५.

वि-- 'आज्येन शेषमित्युक्तौ द्रव्यप्रतिनिधिर्भवेत्।
कर्मान्यद् वा, ऽग्निमस्त्यागशेषसंस्थापनोक्तिभिः॥,
अङ्गरीत्या समाप्तत्वाद् देवतोक्त्यनुवर्तनात्। साम्यात्
शेषः संस्थितिस्तु याग आलम्भनादिवत्॥' ९।४।१५.

भाट्ट—पात्नीवतवाक्ये पुनराक्षेपः। तत्र हि 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इत्युक्त्वा 'आज्येन शेषं संस्थापयति' इति श्रुतम्। अपूर्वत्वे हि शेषसंस्थाऽनुपपत्तेः पर्यग्निकरणवाक्ये पर्यग्निकरणाव्यवहितोत्तरमेव प्रधानयागकर्तव्यता अपकृष्य विधीयते। तत्करणे च विशसनादिपदार्थलोपेऽपि अन्याङ्गलोपे प्रमाणाभावात् शेषं यत् स्विष्टकृत्प्रयाजादि तत् आज्येन संस्थापयतीति विधीयते।

यद्यपि च प्रयाजादौ आज्यं प्राप्तमेव, तथापि स्विष्टकृद्वनस्पतियागादौ आज्यविधिर्न विरुध्यते । न च विशसनाभावादेव त्र्यङ्गासंभवात् 'यस्य सर्वाणि हवींषि' इत्यनेनैव स्विष्टकृत्यपि आज्यप्राप्तिः शङ्क्या, नाशादिनिमित्ताभावेन तदप्राप्तेः, विशसनस्य अङ्गप्रधानसाधारण्येन त्र्यङ्गार्थमपि प्राप्त्युपपत्तेश्च, वनस्पतियागादौ आज्यविधेरपि उपपत्तेश्च । नह्यत्र कर्मान्तरत्वे किञ्चित् प्रमाणमस्ति, प्रत्युत शेषसंस्थापदयोः अनुपपत्तिः । इति प्राप्ते, 'यत् त्वष्टारं च वनस्पतिमावाहयसि अथवैतौ यक्ष्यसि' इति पृष्टे 'त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी अत्रैवैतौ इष्टौ विद्यात्' इति वनस्पतियागस्य अङ्गान्तरेण अनुग्रहवचनेन अभावावगतेः, तस्य च अपूर्वत्वमन्तरेण अनुपपत्तेर्न पूर्ववाक्ये प्रधानापकर्षमात्रविधिः, अपि तु तदन्ताङ्गरीतिविधिरेव अपूर्वत्वफलकः । यद्यपि च अक्रियमाणस्य वनस्पतियागस्य देवताऽऽवाहनमपि नैव प्राप्यते, तथापि सिद्धवन्निर्देशान्यथाऽनुपपत्त्यैव आवाहनविधिकल्पना । त्वष्टुस्तु प्रधानदेवतात्वादेव आवाहनाविरोधः, प्रक्षेपाभावाभिप्रायेण च नवम्या अनुग्रहोक्तिः । अतश्च पूर्वकर्मणि शेषाभावेन आज्यविधानानुपपत्तेः गुणात् कर्मान्तरमेवेदं आज्यद्रव्यकं अनुषक्तपत्नीवद्देवत्यं उपांशुयाजप्रकृतिकम् । शेषसंस्थाशब्दौ तु पूर्वस्य कर्मणः असमाप्तप्रायतया कथंचित् अनुवादकौ इति । सिद्धत्रिविध ऊहः । १३.

मण्डन— 'संस्थाऽऽज्येन पृथग् यजिः !' १४.

शंकर-- 'आज्यशेषवचस्यपि ।' यागः । १५.

* त्वाष्ट्रपात्नीवतपशुयागाख्यस्य पूर्वस्य कर्मणः 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इत्यनेन पर्यग्निकरणान्तस्यैव पर्यवसानविधानात् प्रत्ययानुग्रहार्थं संस्थापयतिपरेण पञ्चमलकारेण 'आज्येन करोति' इत्याज्यविशिष्टकर्मान्तरविध्यवगतेः शेषशब्दस्य एकावयविगतोपयुक्तावयवान्यावयवत्वाख्यावशिष्टवाचित्वायोगात् तद्गतैकोपाध्यन्वितोपयुक्तपात्नीवतपशुयागान्याज्ययागाख्ये कर्मान्तरे त्वष्टृपत्नीवद्देवतात्वसाम्यात् तत्सदृशे वा शेषशब्दप्रयोगः इति नवमान्त्ये वक्ष्यते । सु. पृ. १५१५.

* त्सरा नाम छद्मगतिः । यथा शकुनिग्राहकस्य शकुनिं जिघृक्षतः छद्मना गतिर्भवति, शनैः पादन्यासः, दृष्टिप्रणिधानम्, अशब्दकरणं च कथमनवबुद्धः शकुनिर्गृह्येतेति । भा. ९।१।६।२२.

द.

* दंपती उभावपि स्ववन्तौ (द्रव्यवन्तौ) इत्येवं तावत् स्थितम् । वचनात् तयोः सहक्रिया । भा. ६।१।४।१७ * दंपत्योः कर्तृत्वं व्यासज्यवृत्ति । तस्मात् दंपत्योः सहाधिकारः कर्मसु । अन्यथा प्रत्येकस्य कर्मणि वैगुण्यप्रसङ्गः । वि. ६।१।४. * दंपत्योः कर्मसु सहाधिकारः । सहाधिकाराधिकरणं द्रष्टव्यम् । भा. ६।१।४।१७–२१, * दंपत्योः मध्यगं हीदं धनम् । अतः अवश्यं च सह पत्न्या यष्टव्यम् । ६।१।४।१७. * दंपत्योः सत्रिवत् कर्तृभेदः । यागाधिकारस्तु सहैव । रत्न.६।१।४।१७–१८.

* दक्षिणेऽग्नौ पत्न्याः व्रतस्य श्रपणमाम्नातम् । यदा आमयदोषात् मांसं व्रतकार्ये उपादीयते, तदा तन्न दक्षिणाग्नौ श्रपयितव्यम् । भा. १२।२।१।७.

⧗ दक्षिणेऽग्नौ वरुणप्रघासेषु देशभेदात् सर्वं क्रियते । ११।२।९।३५ ॥

वरुणप्रघासेषु द्वौ आहवनीयौ तत्र दक्षिणे अग्नौ उत्तरेऽग्नाविव सर्वं अङ्गजातं पृथक् क्रियते । देशभेदात् दक्षिणः उत्तरः इति देशयोर्भेदात् । इति सिद्धान्तः ।

अचोदनेति चेत् । ३६ ॥

पूर्वपक्षी आह । दक्षिणविहारे कर्तव्यायाः मारुत्या आमिक्षायाः फलं प्रति अचोदना, न चोदना, न विधानम् । किंतु वरुणप्रघासान् प्रति मारुत्याश्चोदना । तथा च कर्मणः अचोदनात् अङ्गानां प्राप्तिरेव नास्ति, कुतस्तन्त्रम् । इति चेत् ।

स्यात्, पौर्णमासीवत् । ३७ ॥

सिद्धान्ती आह । स्यात् दक्षिणविहारे अङ्गानां प्राप्तिः । पौर्णमासीवत् 'पौर्णमास्यां पौर्णमास्या यजेत' इति न तावत् कर्म फलं प्रति चोद्यते, अथ च साङ्गप्रधानं पौर्णमास्यां क्रियते, एवमिहापि ।

प्रयोगचोदनेति चेत् । ३८ ॥

पूर्वपक्षी पुनराह । पौर्णमास्यां युक्तम् । यजेत इत्याख्यातेन प्रयोगचोदना पौर्णमास्याः प्रयोगस्य चोदना कृता, प्रयोगश्च अङ्गप्रधानानां भवति । तस्मात् तत्र साङ्गं क्रियते । इति विषमो दृष्टान्तः । इति चेत् ।

तथेह । ३९ ॥

सिद्धान्ती आह । तथा पौर्णमासीवत् इह मारुत्यामपि 'अष्टावध्वर्युरुत्तरे विहारे हवींष्यासादयति, मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्' इति आसादयति-शब्देन निर्वपेत् आलभेत इतिवत् लक्षणया याग एव चोद्यते । तथा च प्राप्तानामङ्गानां भेदेन क्रिया ।

आसादनमिति चेत् । ४० ॥

आह पूर्वपक्षी । पौर्णमास्यां यजेत इति पदेन याग उच्यते । 'मारुतीं प्रतिप्रस्थाता आसादयति' इति आसादयति–पदेन न याग उच्यते किंतु आसादनं स्थापनम् । तथा च नाङ्गानां प्राप्तिः स्यात् । इति चेत् ।

नोत्तरेणैकवाक्यत्वात् । ४१ ॥

आह सिद्धान्ती । नैष दोषः । यद्यपि आसादयतिशब्देन आसादनमुच्यते तथापि तत् होमार्थमेव नादृष्टार्थम् । उत्तरेण 'अष्टावुत्तरे विहारे हवींष्यासादयति' इत्यनेन उत्तरविहारविषयकेण वाक्येन सह 'मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्' इति दक्षिणविहारविषयकवाक्यस्य एकवाक्यत्वात् । तथा च उभयत्रापि आसादयति-पदेन उक्तमासादनं होमार्थमेव । तस्मात् अङ्गानां प्राप्तिः ।

अवाच्यत्वाच्च । ४२ ॥

वस्तुतस्तु आसादयति-पदेन होमार्थस्य आसादनस्य अवाच्यत्वात् हविषां वेद्यामासादनस्य प्रकृतित एव प्राप्तत्वात् । तस्मात् आसादयति-पदेन निर्वपेत् आलभेत इतिवत् लक्षणया यागप्रयोग एवोच्यते । तथा च अङ्गानां प्राप्तिः । तस्मात् विहारयोस्तन्त्रभेदः ।

आम्नायवचनं तद्वत् । ४३ ॥

आसादयति-पदं लक्षणया यागप्रयोगपरं इत्यत्र तात्पर्यग्राहकमाह सिद्धान्ती । 'यदेवाध्वर्युः करोति, तत् प्रतिप्रस्थाता करोति' इति आम्नायस्य वेदस्य वचनं तद्वत् उत्तरविहारवत् दक्षिणे विहारेऽपि अनुष्ठानं ब्रूते । तस्मात् आसादयति-शब्दः लक्षणया यागप्रयोगमेव ब्रूते । ततश्च अङ्गानां प्राप्तिः । तस्मात् दक्षिणविहारेऽपि अङ्गानां पृथगनुष्ठानं इति सिद्धान्तः । के.

* **दक्षिणेऽग्नौ** सुराग्रहान् जुहति सौत्रामण्याम् । भा. ३।५।३।१४.

* **दक्षिणदेशान्निर्गतः** प्राक्षु वा उदक्षु वा अवस्थितः आह्नीनैबुकादीन् करोत्येव । भा. १।३।७।१९. * **दक्षिणदेशेषु** मातुलसुतापरिणयं कुर्वन्ति । तच्च स्मृतिविरुद्धम् । वि. १।३।५ वर्णकं २.

* **दक्षिणविहारे** क्रियमाणमारुत्यर्थं पृथगङ्गानुष्ठानं वरुणप्रघासेषु चातुर्मास्येषु । भा. ११।२।९।३५–४३, * दक्षिणविहारे प्रतिप्रस्थात्रा अध्वर्योः पृथक् मन्त्रोच्चारणं कार्यं वरुणप्रघासेषु चातुर्मास्यगतेषु । १२।१।९।१८, * दक्षिणविहारे मारुत्याख्यस्य हविषोऽर्थेन वरुणप्रघासेषु अग्निमन्थनादेः पुनर्विधानं चातुर्मास्येषु । ७।१।३।२१.

* **दक्षिणहविर्धानदेशः** सामिधेनीनामनुवचनार्थः ज्योतिष्टोमे । भा. ३।७।७।१५–१७. * **दक्षिणहविर्धानशकटसमीपे** सोमाभिषवः । वि. ३।७।७.

* **दक्षिणा** अध्वर्य्वादीनां परिक्रयार्था कर्मसंयोगात् । वा. ३।१।६।१२ पृ. ६९७. * दक्षिणा अयुतं अभिषेचनीये राजसूयान्तर्गते सोमयागे । वि. ११।४।२, * दक्षिणा अश्वमेधे 'हिरण्मयौ प्राकाशौ अध्वर्यवे ददाति' । प्राकाशौ दीपस्तम्भौ इत्येके, दर्पणौ इत्यपरे । ताभ्यां इतरस्य अध्वर्युभागस्य बाधः । अन्येभ्यस्तु ऋत्विग्भ्यः यथायथं देयमेव, न तस्य बाधः । ११।३।१७. * दक्षिणा आग्रयणे 'वासो दक्षिणा' 'वत्सः प्रथमजो दक्षिणा' । अनया प्राकृतस्य अन्वाहार्यस्य निवृत्तिः (अत्र श्यामाकाग्रयणे वासो दक्षिणा, व्रीह्याग्रयणे च वत्सः प्रथमजो दक्षिणा) । भा. १०।३।६।३४. * दक्षिणा आधाने 'एका (गौः) देया, षड् देयाः, द्वादश देयाः, चतुर्विंशतिर्देयाः, शतं देयं सहस्रं देयं अपरिमितं देयम्' (सहस्रादधिकम्) । इदं विकल्पेन । वि. ६।७।१०. * दक्षिणा उपहव्ये अग्निष्टोमसंस्थे अश्वः श्वेतः । उपहव्ये उक्थ्यसंस्थे अश्वः श्यावो दक्षिणा स ब्रह्मणे देयः । स च कृत्स्नक्रतुदाक्षिण्यनिवर्तकः । भा. १०।३।१८।६५–६७.

* दक्षिणा उपहव्ये एकाहे श्यावोऽश्वः। स ब्रह्मणे देयः, इतरेभ्यस्तु न किमपि शास्त्रीयम्। लौकिकेन तु दानेन तेषामानतिः। वि. १०।३।१८. * दक्षिणा ऋतपेये औदुम्बरः सोमचमसः। स प्रियाय सगोत्राय ब्रह्मणे देयः। स च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकः। भा. १०।३।१९।६८–७३. * दक्षिणा ऋत्विजां उत्साहकारिणी। परिक्रयस्य चैतद्रूपम्। वा. ३।४।१७।४९. * दक्षिणा ऋषभः द्वितीयायामवेष्टौ राजसूये। भाट्ट. ११।४।३. * दक्षिणा ज्योतिष्टोमे 'गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च, व्रीहयश्च यवाश्च तिलाश्च माषाश्च'। तत्र गाव एव द्वादशशतं (द्वादशाधिकं शतम्)। भा. १०।२।८।२२, * दक्षिणा ज्योतिष्टोमे साङ्गं कर्मराशिमङ्गीकृत्य दीयते। १०।६।१८।६५. * दक्षिणा ज्योतिष्टोमादौ प्रधानार्था, न तु अङ्गार्था। वि. ३।७।५. * दक्षिणा दर्शपूर्णमासयोः अन्वाहार्यः चरुः। भा. १०।३।६।३४, * दक्षिणा दीक्षा च प्रधानार्था ज्योतिष्टोमे। ३।७।५।११–१२. * दक्षिणा द्वादशशतगोरूपा ऋत्विग्भ्यो विभागेनैव विशिष्टेन देया, न तु स्वेच्छया वा समुदायार्थे वा। वि. १०।३।१२. * दक्षिणा द्वादशाहे प्रत्यक्षं वचनं 'अन्वहं द्वादशशतं ददाति' इति। भा. १०।६।१७।६६, * दक्षिणा धेनुः (एकैव) भूः नाम यागे। सा च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिका, न तु केवलं गवामेव। १०।३।१४।५६, * दक्षिणा नाम दक्षतेरुत्साहकर्मणः। दक्षिणा उत्साहिका इति। एकः स गुणः। स च प्राधान्येन विवक्षितः। १०।३।१४।५७. * दक्षिणा पिशङ्गी पष्ठौही तृतीयायामवेष्टौ राजसूये। भाट्ट. ११।४।३. * दक्षिणा पुनराधाने पुनरुत्स्यूतं वासो दक्षिणा, पुनरुत्सृष्टोऽनड्वान् (पुनर्निष्कृतो रथो दक्षिणा। वि.)। भा. १०।३।५।३०, * दक्षिणा पौण्डरीके एकादशाहे प्रत्यहं गवां सहस्रम्, दशमेऽहनि तु अश्वसहस्रम् इति पार्थसारथिः मानवसूत्रानुसारात्। भाट्ट. १०।६।१७. * दक्षिणा भूः नामकैकाहे एका धेनुः। धेन्वा चानया 'गौश्चाश्वश्च' इत्यादिनिखिलदक्षिणाबाधः। वि. १०।३।१४. * दक्षिणा। यत्र हि पादिकमपि अहः न लभ्यते न सा दक्षिणा भवति। न हि सा तस्मिन् कर्मणि दक्षं करोति। दक्षकरणी हि दक्षिणा। दक्षश्च बलम्। या न आशितम्भवं (अहोरात्रयोर्जठरपूर्तिपर्याप्तम्) करोति नासौ बलकरणी। तस्मात् या न आशितम्भवा नासौ दक्षिणा। आशितम्भवाया आधिक्यं वचनस्य विषयः। तस्मात् आशितम्भवं यद् द्रव्यम्, सा भृतिः सा दक्षिणा। भा. १०।३।११।४५. * दक्षिणा राजसूयगते प्रथमे त्रिके 'सौमापौष्ण एकादशकपालः ऐन्द्रापौष्णश्चरुः, पौष्णश्चरुः श्यामो दक्षिणा' इति। द्वितीये तु त्रिके 'आग्नावैष्णव एकादशकपालः, ऐन्द्रावैष्णवश्चरुः, वैष्णवस्त्रिकपालः, वामनो दक्षिणा' इति। वि. ११।४।१. * दक्षिणा वरुणप्रघासेषु 'प्रवयसमृषभं दक्षिणां ददाति'। भा. ११।२।१०।४६. * दक्षिणा वशा चतुर्थ्यामवेष्टौ राजसूये। भाट्ट. ११।४।३. * दक्षिणा वाजपेये 'यजुर्युक्तं रथमध्वर्यवे ददाति'। यजुर्युक्तरथेन कस्या अपि अतिदिष्टादिदक्षिणाया न बाधः। वि. १०।३।२०. * दक्षिणा शितिपृष्ठः पञ्चम्यामवेष्टौ राजसूये। भाट्ट. ११।४।३. * दक्षिणा शुनासीर्ये श्वेता गौः। के. * दक्षिणा श्येने दीक्षणीयायां द्वादशमानं हिरण्यम्, प्रायणीयायां चतुर्विंशतिमानम्। भा. ८।१।९।१६, * दक्षिणा सत्रेषु नास्ति। १०।२।११।३५–३८, * दक्षिणा समुदायाङ्गम्, नावयवाङ्गम्। १०।६।७।६३. * दक्षिणा सहस्ररूपा पृष्ठशमनीये परिक्रयार्थैव न त्वदृष्टार्था। वि. १०।२।१२, * दक्षिणा सोमापहारे एकैव गौः न तु द्वादशशतम्। अश्वाश्वतरादयस्तु सन्त्येव। गोविषये एवायं नियमः। १०।३।१५, * दक्षिणा सोमाभिदाहे पञ्चैव गावः, न तु द्वादशशतम्। गोविषय एवायं नियमः। अश्वाश्वतरादयस्तु सन्त्येव। १०।३।१५. * दक्षिणा हिरण्यं प्रथमायामवेष्टौ राजसूये। भाट्ट. ११।४।३. * दक्षिणाः ज्योतिष्टोमादौ माध्यंदिने सवने दीयन्ते। वि. १०।६।१८. * दक्षिणाः 'त्रिष्टुभो लोके माध्यंदिने सवने नीयन्ते' ज्योतिष्टोमे (दक्षिणदेशात् उत्तरदेशे नयनम्। ततो विभज्य दानम्)। भा. १०।६।१८।६९, * दक्षिणाः प्रधानार्थाः सत्यः प्रसङ्गादङ्गानामुपकुर्वन्ति इति वक्ष्यामः (१२।१।३१ इत्यत्र)। वा. ३।७।५।११. * दक्षिणया नैमित्तिके पुनराधाने श्रुतया आधानसामान्यविहितैकादि-

दक्षिणाया बाधः । **भा.** १०।३।५।३०–३३, ✻ दक्षिणया नैमित्तिक्या एकादिरूपया ज्योतिष्टोमे नित्यप्रयोगीयद्वादशशतसंख्यामात्रस्य बाधः यथा सोमापहारे । १०।३।१५।५९–६२. ✻ दक्षिणया परिक्रीतानामृत्विजां लोभदर्शनात् अध्वर्यवे वैसर्जनहोमीयवासोदानस्मृतिरप्रमाणम् । **वि.** १।३।३. ✻ दक्षिणया सौमिक्या सोमाङ्गेष्टिषु शेषभक्षाणां प्रसङ्गसिद्धिर्नास्ति । **भा.** १२।१।१७।३३–३४, ✻**दक्षिणाभिः** ऋत्विक्त्वनियमः । दीक्षादक्षिणवाक्यनिर्दिष्टा ऋत्विजः षोडशैव, न चमसाध्वर्यवः । ३।७।१७।३६–३७, ✻ **दक्षिणायाः** अन्वाहार्यरूपायाः दार्शिक्याः सोमाङ्गदीक्षणीयादीष्टिषु सौमिकदक्षिणया प्रसङ्गसिद्धिः । १२।१।१६।३२, ✻ दक्षिणायाः द्वादशशतगोरूपायाः विभज्य दानं ज्योतिष्टोमे (१२+६+४+३ = २५×४ = १०० +१२ = ११२) । १०।३।१२।५०–५२, ✻ दक्षिणायाः द्वादशशतसंख्यायाः अध्वर्य्वादिसमाख्याऽनुरोधेन विभागः । १०।३।१३।५३–५५. ✻ दक्षिणायाः भृतिरूपत्वं वेदवाक्यादेवावगम्यते ‘दीक्षितमदीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयेयुः’ इति । **वि.** १०।२।८. ✻ **दक्षिणानां** अपरिमितत्वं पूर्वोक्तात् संख्याऽन्तरं आधाने । **भा.** ६।७।१०।२२, ✻ दक्षिणानां अपरिमितत्वं सहस्राधिकत्वं आधाने । ६।७।११।२३–२५, ✻ दक्षिणानां उत्पत्तिविधौ विशिष्टकालसंबन्धः श्रूयते ‘तस्मात् त्रिष्टुभो लोके माध्यंदिने सवने दक्षिणा नीयन्ते’ इति । १०।६।१८।७१. ✻ दक्षिणानां ऋत्विगानमनार्थत्वात् । आनमनं च साहाय्योपादित्सया । **वा.** ३।७।५।११. ✻ दक्षिणानां दक्षिणदेशादुत्तरदेशे नयनं प्रत्यहं विभज्य पौण्डरीके । **भा.** १०।६।१८।६९–७२. ✻ दक्षिणानां द्वादशशतसंख्या गवामेव , न तु अश्व–अश्वतर–तिल–माषादिषु प्रत्येकं वा मिलित्वा वा । द्वादशाधिकं शतं द्वादशशतम् । **वि.** १०।३।११. ✻ दक्षिणानां नयनादिसंस्कारसंस्कृतानां प्रत्यर्पणं कार्यम् । **भा.** १०।६।१८।७०, ✻ दक्षिणानां संख्यासु विकल्पः आधाने । १२।४।५।९.

✻ द्वादशशतं गावः इत्युदाहृतश्रुतिवाक्ये गोशब्दाभावेऽपि तत्र निर्दिष्टा द्वादशसंख्या ‘गौश्चाश्वश्चाश्वतरश्च गर्दभश्च’ इत्यादि पूर्वसंदर्भप्रकृतगोविषया इति दक्षिणाऽधिकरणे निर्णीतत्वात् गावः इत्युक्तम् । **परिमलः.** ३।३।१।१ ब्रसू.

✻ **दक्षिणान्तर्गतगोष्वेव** द्वादशशतसंख्यानिवेशः न तु अश्वादौ ज्योतिष्टोमे । **भा.** १०।३।११।३९–४९.

✻ **दक्षिणार्थनिर्दिष्टभागस्यैव** सर्वस्य विश्वजिति देयता । **भा.** ६।७।७।८–१३.

✻ ‘**दक्षिणाचारेण** कर्तव्यम्’ इत्यादिस्मृतिः वेदाविरुद्धत्वात् प्रमाणम् । **भा.** १।३।३।५–७.

✻ **दक्षिणाम्नानं** विकृतौ चोदकेन प्राप्तं बाधित्वा निविशते विरोधात् । **टुप्.** १०।५।२५।८५.

✻ **दक्षिणैक्यात्** कर्तृभेदो नास्ति । **टुप्.** ११।४।५।१७, ✻ दक्षिणैक्यात् द्वादशाहस्य तन्त्रेण प्रयोगः । ११।४।५।१८.

⧗ **दक्षिणाकाले यत् स्वं, तत् प्रतीयेत तद्दानसंयोगात् । ६।७।६।७।।**

विश्वजिति अध्वरे दक्षिणाकाले दक्षिणादानकाले माध्यंदिने सवने यत् स्वं स्वीयं धनम्, तत् सर्वं सर्वस्वशब्देन प्रतीयेत । तदेव देयम् । तद्दानसंयोगात् तस्यैव स्वत्वविशिष्टस्य दानेन संयोगात् । ‘सर्वस्वं ददाति’ इति सर्वस्वशब्देन दक्षिणाकाले स्वत्वेन विद्यमानस्यैव देयत्वेन उक्तत्वात् । तेन भूतस्य भविष्यतो वा न देयता कथंचिदपि । इति सिद्धान्तः । **के.**

✻ दक्षिणाकाले विद्यमानस्यैव सर्वस्वस्य विश्वजिति दानम् । विश्वजित्प्रघट्टके अधिकरणं द्रष्टव्यम् । **भा.** ६।७।६।७.

✻ **दक्षिणादानं** अदृष्टार्थं सारस्वते सत्रे कामेष्टौ । **भा.** १०।२।१५।४५–४६, ✻ दक्षिणादानं ऋत्विक्परिक्रयार्थं उदवसानीये , तस्य सत्रानङ्गत्वात् । उदवसानीयन्यायः द्रष्टव्यः । १०।२।१२।३९–४०. ✻ दक्षिणादानं चयने क्रत्वङ्गम् । प्रीत्युत्पादकत्वात् गुणविधिरेव कल्पसूत्रमूलभूतश्रुतौ अधिकदक्षिणाविधानात् । उभयसमुच्चये सिद्धे, या अधिका दक्षिणा दीयते सा यथा प्रीतिजनिका स्यात्, तथा देया, ‘योऽग्निं चिनुते तं दक्षिणाभिः राधयेत्’ इति श्रुतेः । **संकर्ष.** १।१।८. ✻ **दक्षिणादानेन** कर्मकराणामृत्विजां परिक्रयः यजमानेन कर्तव्यः । **वि.**

३।८।१, * **दक्षिणादानस्य** यजमानकर्मत्वेऽपि वचनात् क्वचित् स्वयमातृण्णाख्येष्टकोपधाने गोत्रयदानमध्वर्योः कर्म । ३।८।२, * **दक्षिणादाने** द्वादशशतादिपरिमाणनियमः मन्त्रवत्त्वनियमश्च अदृष्टार्थः । १०।२।८, * **दक्षिणादानोत्तरं** चात्वाले कृष्णविषाणाप्रासनं प्रतिपत्तिः ज्योतिष्टोमे । ४।२।७.

* **दक्षिणानयनं** पौण्डरीके प्रत्यहं विभज्य । भा. १०।६।१८।६९–७२.

⧗ **दक्षिणान्यायः** ज्योतिष्टोमादौ दक्षिणादानं ऋत्विगानत्यर्थम् ॥

ऋत्विग्दानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् । १०।२।८।२३॥

भाष्यम्— अस्ति ज्योतिष्टोमः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति । तत्रेदं समामनन्ति 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' । इदं चापरं श्रूयते, 'ऋत्विग्भ्यो दक्षिणां ददाति' इति । तत्र संशयः किं दानं धर्ममात्रम्, उत ऋत्विगानमनमिति । किं प्राप्तम् ? ऋत्विग्दानं धर्ममात्रं स्यात् । तस्य हि कर्तव्यता श्रूयते । ददातिकर्तव्यता अस्माच्छब्दात् गम्यते । ऋत्विगानमनं कर्तव्यं वाक्याद्गम्यते । श्रुतिश्च वाक्याद्बलीयसी । लोकेऽपि अदृष्टार्थतैव ददातेर्गम्यते, इति सामर्थ्यादेव न आनमनादि । अपिच कर्माननुरूपमपि दाक्षिण्यं क्वचित् श्रूयते, त्रैधातवीयायां सहस्रम्, ऋतपेये सोमचमसः । अपिच यत्रोच्चनीचपण्यपणः क्रियते, स परिक्रयो भवति, न यत्र नियतपरिमाणं दानम् । तस्माद्धर्ममात्रं दानम् । अपिच नियमवत् मन्त्रवच्च क्रियते । तददृष्टार्थत्वेन अवकल्पते । क्वचिच्च श्रूयते 'दण्डः, उपानहौ, शुष्का दृतिः, सा हि दक्षिणा' इति । को हि दण्डेन आनमेत् । तस्माद्धर्ममात्रं दानमिति ।

परिक्रयार्थं वा, कर्मसंयोगाल्लोकवत् । २४ ॥

भाष्यम्— परिक्रयार्थं वा दानम् । कुतः ? कर्मसंयोगात् । कर्मसंयुक्तेभ्यः श्रूयते 'ऋत्विग्भ्यो दक्षिणां ददाति' इति । तत्र दृष्टं प्रयोजनमुत्सृज्य न शक्यमदृष्टं कल्पयितुम् । यदपि नियमाददृष्टम्, तदपि दृष्टद्वारमेव । अनेन नियतेन नियतगुणकेन दानेन आनम्यमाना ऋत्विजः अभ्युदयकारिणो भवन्ति । कथम् ? आनमने गुणभूतः त्यागश्चोद्यते, न प्रधानभूतः । वाक्यार्थश्च अवश्यं ग्रहीतव्यः । इतरथा ऋत्विग्भ्य इत्येतदेव पदमनर्थकं स्यात् । अगृह्यमाणे सुतरां श्रुतिर्बाध्येत । यच्च न कर्मानुरूपं दाक्षिण्यमिति । नैतावता दृष्टोऽर्थः सन् अपह्नूयेत । नियमात् दृष्टद्वारमदृष्टमित्युक्तमेव । वचनप्रामाण्याच्च दण्डोऽवगम्यते । अपिच भवति तत्र या च यावती च आनमनमात्रा । लोकेऽपि हि काष्ठवाहप्रभृतिभ्यो यद्दीयते, तदसंकीर्तितेऽपि परिक्रये, आनमनार्थमेव भवति । तस्मात् परिक्रयार्थं दक्षिणादानमिति ।

दक्षिणायुक्तवचनाच्च । २५ ॥

भाष्यम्-- दक्षिणायुक्तवचनाच्च लिङ्गात् परिक्रथार्थं दानमिति पश्यामः । दक्षिणायुक्ता वहन्ति ऋत्विज इति ।

न चान्येनानम्येत परिक्रयात् कर्मणः परार्थत्वात् । २६ ॥

भाष्यम्— इतश्च परिक्रयार्थं दानमिति । कुतः ? नान्तरेण परिक्रयं परार्थे परः प्रवर्तते । ननु सामादयोऽपि प्रवर्तनोपायाः । न ब्रूमो न प्रवर्तनोपाया इति । किं तर्हि ? परिक्रयः प्रत्यक्षमाम्नातः इदि । अतस्तेनैव परिक्रेतव्या नान्येनेति ।

परिक्रीतवचनाच्च । २७ ॥

भाष्यम्— परिक्रीतवचनं भवति, तेनायमर्थो द्योत्यते 'दीक्षितमदीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयन्ति' इति । तस्मादपि परिक्रयार्थं दानमिति ।

सनिवन्ये च भृतिवचनात् । २८ ॥

भाष्यम्— सनिवनिप्राप्तं सनिवन्यम्, याञ्चाप्राप्तमित्यर्थः । तस्मिन् भृतिवचनं भवति । 'यज्ञो वै देवतानां न समभवत्, तं भृत्या समभावयन् । यद्भृतिं वनुते, यज्ञस्य भृत्यै द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत' इति । यज्ञार्थे यद्भिक्षितं ऋन्विजः परिक्रेतुम्, अन्यच्च यज्ञार्थं साधयितुम्, तस्मिन्नेव भृतिवचनम् । भृतिश्च कर्मकरेभ्य आनत्यर्थं यद्दीयते । तस्मादपि परिक्रयार्थमृत्विग्भ्यो दानमिति ।

नैष्कर्तृकेण संस्तवाच्च । २९ ॥

भाष्यम्— नैष्कर्तृकेण च संस्तवो भवति । ‘ यथा वै दारुहारो नैष्कर्तृको निष्कर्तनभृतः कर्मयोगे वर्तते, एवं वा एते यज्ञस्य ऋत्विजः ’ इति । नैष्कर्तृको दारुहारः । यथाऽसौ, एवमृत्विज इति ब्रुवन् परिक्रयार्थं दानं दर्शयति ।

सोम— व्यादेशस्य बाधेऽपि ऋत्विग्दानस्य सत्रे न बाधः इत्युत्थितेः **संगतिः** । **सूत्रार्थस्तु**—ऋत्विग्भ्यो दानं धर्ममात्रमदृष्टार्थमेव स्यात्, ददातिसामर्थ्यात्, ददातीति समानपदलक्षणश्रुतिसामर्थ्येन दानस्यैव कर्तव्यत्वावगमादिति ।

वि— ‘ ऋत्विग्दानमदृष्टार्थमानत्यै वा, ऽग्रिमः श्रुतेः । वैरूप्यान्नियमा, न्मैवं दृष्टत्वादानतेः श्रुतिः ॥ भृतौ च नियमादेतददृष्टं स्याद् विरूपता । वचनात् तेन सत्रेषु स्वामिनां न भृतिः क्वचित् ॥ ’ एवं च सति सत्रे ऋत्विजां यजमानत्वात् भृतिरूपा दक्षिणा न काऽपि देया इत्येतत् विचारफलं द्रष्टव्यम् ।

भाट्ट— ‘ ऋत्विग्भ्यो दक्षिणां ददाति ’ इति तत्रतत्र श्रुतं दक्षिणादानं नारादुपकारकम्, अपि तु दृष्टार्थत्वलाभाय अपेक्षितानत्यर्थमेव । नियमादृष्टस्य कल्पनीयत्वाच्च न धर्मविधिवैयर्थ्यम् । अतः सत्रे स्वत एवानतत्वेन न तत्सिद्ध्यर्थं दक्षिणादानमिति सिद्धम् । अत एव ‘नात्र गौर्दीयते ’ इति नित्यानुवादोऽपि विध्यन्तरशेषत्वात् संगच्छते ।

मण्डन— ‘ दक्षिणा स्यात् परिक्रयः । ’

शंकर— ‘ आनत्यर्था दक्षिणर्त्विजाम् । ’

* **दक्षिणाभूयस्त्वाच्च** फलभूयस्त्वं भविष्यति । **भा.** १०।६।१७।६२.

* **दक्षिणाभेदेन** कर्तॄणां भेदात् अङ्गानि भिद्यन्ते । **वि.** ११।४।१ । उत्पत्तिगतेन दक्षिणाभेदेन प्रयोगभेदावगमात् अङ्गानां भेदः । ११।४।३. * **दक्षिणाभेदात्** प्रतिदक्षिणं कर्तृसंबन्धो (भिन्नो) भवति । वामनक्रीताः पूर्वस्य त्रिसंयुक्तस्य कर्तारः, अनङ्गं ते उत्तरस्य त्रिसंयुक्तस्य । श्यामपरिक्रीताः उत्तरस्य त्रिसंयुक्तस्य कर्तारः, तेऽपि अनङ्गं पूर्वस्य । **भा.** ११।४।१।२, * **दक्षिणाभेदभिन्नानां** आग्नावैष्णवादीनां भेदेनानुष्ठानं राजसूये । ११।४।१।१–३.

* **दक्षिणायोग्यानि** रथ–शकट–दासी–निष्क–इत्यादीनि सप्तदश द्रव्याणि । प्रतिद्रव्यं च सप्तदशसंख्या । वाजपेये । वि. १०।३।२० । अत्र आपस्तम्बसूत्रं (तै. सं. भाष्ये १।३।६) इत्थं – दक्षिणाकाले सप्तदश रथान् ददाति, सप्तदश अनांसि, सप्तदशाश्वान्, सप्तदश हस्तिनः, सप्तदश निष्कान् सप्तदश दासीः सप्तदशाजाः सप्तदशावीः सप्तदश वासांसि, सप्तदश गवां शतानि इति । अत्र दशैव द्रव्याण्युक्तानि । **के.**

* **दक्षिणारूपयोः** वासोवत्सयोः आग्रयणे अन्वाहार्यधर्मानुष्ठानम् । **भा.** १०।३।७।३५. * **दक्षिणारूपाणां** गवाश्वाश्वतरादिमाषान्तानां सङ्घ एका दक्षिणा ज्योतिष्टोमे । वि. १०।३।१४, * **दक्षिणारूपगोगतद्वादशाधिकशतसंख्याया** ज्योतिष्टोमगतायाः तद्विकृतिगतसंख्याऽन्तरेण बाधः । १०।३।११.

* **दक्षिणाविधाने** गोदानस्य विहितत्वात् । **भा.** २।१।६।३१.

* **दक्षिणाशब्दः** कर्मकरानतिसाधनवचनः । **भाट्ट.** ३।७।८. * दक्षिणाशब्दः गुणवचनः यदा द्रव्ये उपसर्जनीभूतः, तदा द्रव्यस्यैव यल्लिङ्गसंख्यं तदेव लभते । **टुप्.** १०।३।१४।५७. * दक्षिणाशब्दश्च परिक्रयार्थो भवति । **भा.** १०।२।११।३८, * दक्षिणाशब्दः दक्षिणाऽवयवे ब्रह्मभागे निविशमानो गौणः स्यात् । न च विद्यमाने मुख्ये गौण उपादीयते । १०।३।१९।७१.

* **दक्षिणाग्नेः** अजस्रपक्षे प्रत्युद्धरणमेव आधानम् । गतश्रियां तु कर्मकाले प्रादुष्करणमेव आधानम् । **संकर्ष.** ३।२।६, * दक्षिणाग्नेः कर्मकाले गार्हपत्यात् प्रत्युद्धरणमेव, न तु पुनःपुनराधानम् । ३।२।६, * दक्षिणाग्नेः निर्मन्थ्यात् गार्हपत्यादेव वा आधानम् । ३।२।४. * ‘ **दक्षिणाग्नौ** अन्वाहार्यं (नाम दक्षिणार्थं चरुं) पचन्ति ’ अत एवासौ ‘ अन्वाहार्यपचनः ’ इत्युच्यते । **वि.** १२।२।१. * दक्षिणाग्नौ कर्तव्यौ पिष्टलेपफलीकरणहोमौ स्वस्थानावेव ज्योतिष्टोमे आग्निमारुतादूर्ध्वमनुयाजो-

त्कर्षेऽपि । प्रकृतौ हि अनुयाजोत्तरं तौ भवतः । वा. ५।१।१५।२८.

दग्धेन्धनवह्निन्यायः । यथा दग्धानीन्धनानि येन सोऽग्निर्यथा स्वयमेव प्रशाम्यतीति । उक्तं च 'यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति । तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥' इति । **साहस्री.** २६१.

दग्धपटन्यायः । अग्निना दग्धेऽपि पटे यथा चिह्नं दग्धं न भवति, एवं नष्टेऽपि सर्वपदार्थे अभिमानो विद्यते एव, एवंविषयेऽयं प्रवर्तते इति । **साहस्री.** ५९३.

* अत एव अविद्या **दग्धपटन्यायेन** तावत् तिष्ठति इत्यपि निरस्तम् । निरवयवे एतन्न्यायासंभवात् इति चेन्न । **अद्वैत.** ४।५।२६. * न च दग्धपटन्यायेन जीवन्मुक्तस्य देहेन्द्रियादिभेदज्ञानसंबन्ध इति वाच्यम् । दग्धपटोऽपि पटवद्भासते शीतनिवारकत्वादिक्रियासिद्ध्यभावात् । **श्रीकर.** १।१।२ ब्रसू.

दग्धपत्रन्यायः यथा पत्रस्य दग्धत्वेऽपि पूर्वाकारेणावस्थानं गृह्यते, एवं यत्र वस्तुनो दाहेऽपि तदाकारप्रतीतिः, तत्रास्य प्रवृत्तिः । **साहस्री.** २८४.

दग्धबीजन्यायः । यथा दग्धस्य बीजस्य नाङ्कुरोत्पादकता, एवमविवेकनाशे न संसारवृक्षप्ररोहः इत्येवं यत्र विवक्षा, तत्रास्य प्रवृत्तिरिति । **साहस्री.** ४९७.

दग्धरशनान्यायः । रशना रज्जुः । दन्त्यमध्योऽपि रसनाशब्दः । यथा दग्धरज्जुः पूर्ववत् त्रिगुणत्वादिरूपेण प्रतीयमानाऽपि निःसारा बुध्यते बुधैः, तथा प्रपञ्चं संसारं प्रतीयमानमपि निःसारं वेत्ति बुध इति । **साहस्री.** २८३.

* **दण्डः** अपराधिनाम् । 'शारीरो निग्रहो यत्र, तत्र प्रत्येकभिन्नता । हिरण्यादानदण्डस्तु समुदाये समाप्यते ॥' यथा गर्गाः शतं दण्डयन्तामिति गर्गसमुदाये दण्डः । **वा.** ३।१।६।१२ पृ. ६९७. * दण्ड एक एव सत्रे प्रैषानुवचने । **भाट्ट.** ४।२।६ पृ. ११६. * दण्डः दीक्षासंस्कारव्यञ्जकः न तु यजमानस्य संस्कारकः । **वि.** ५।३।११. * दण्डः हस्तचतुष्टयम् । **सु.** पृ. १२८. * **दण्डस्य** उपयोगाः । यथा पूर्वं तमोऽवगाहते, अपः प्रविशति, गां च सर्पं च वारयति, अवलम्बनं च भवति । **भा.** ४।२।६।१७. * दण्डस्य भूतभाव्युपयोगित्वेन संभवत्यपि भाव्यत्वे मैत्रावरुणाय इति चतुर्थ्या 'दण्डी प्रैषानन्वाह' इति प्रैषानुवचनकर्तृत्वेन भाव्युपयोगित्वेन मैत्रावरुणस्यैव भाव्यत्वमुक्तम् । **व्यवहारमयूख.** पृ. ४८–४९. * **दण्डानां** सर्वेषां मैत्रावरुणाय दानं सत्रे । **भाट्ट.** ४।२।६ पृ. ११६. * न तु अप्रतीते दण्डे दण्डिप्रत्ययोऽस्ति । **भा.** १।३।९।३३ पृ. ३१८.

दण्डापूपन्यायः । यथा दण्डनद्धापूपानां दण्डानयनात् अवश्यमानयनम्, तथा युगनद्धवाहित्वादीनि इति केचिदाहुः । वस्तुतस्तु एकत्र स्थापितयोर्दण्डापूपयोः यदा अपूपो नास्ति दण्डस्तु मूषकैर्भक्षितो वर्तते। तत्र यथा मूषकाणां दुष्करदण्डभक्षणसिद्धौ तत्सहचरितापूपभक्षणमपि सिध्यति इति । तथा 'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥' इति स्मृतौ स्थावरग्रहणात् निबन्धद्विपदयोः दण्डापूपन्यायात् दानादिनिषेधसिद्धिरिति । **साहस्री.** १७२.

* तस्मात् लौकिकपरमार्थरजतमेव इदंपदास्पदे स्वरूपेण निषिध्यते इत्येव त्वत्प्राचामाचार्याणां वाचामर्थः । तत्र भ्रमबाधवैयधिकरण्यादिदोषस्तु **दण्डापूपन्यायेन** ममानुकूल एवेति । इति द्वैतिनां शङ्का । **सिद्धिव्याख्या.** पृ. १३०.

दण्डापूपिकन्यायः । 'अन्तरङ्गानपि विधीन्' इत्यत्र अपिशब्दः दण्डापूपिकन्यायद्योतनार्थः । दण्डापूपिकन्याये 'केसरिणमपि हन्यात्' इत्यादौ केसरिहन्तृत्वं, अन्येषामपि सत्त्वानां च हन्तृत्वं लभ्यते । कैमुतिकन्याये तु अन्यार्थे तात्पर्यं पर्यवसीयते स्वार्थे निषेधश्च भवति । **तत्त्वप्रकाशिका.** पृ. २००. * दण्डापूपिकन्यायः । दण्डाकर्षणेन तत्रावलम्बमानमध्वपूपस्यापि आकर्षणमर्थसिद्धम् । इति न्यायार्थः । **संग्रहः.**

* **दण्डकलितं** आवृत्तिन्यायानां न्याय्यम् । तथा क्रमानुग्रहो भवति । तद्यथा कश्चिदुच्यते अनुवाकः त्रिः पठ्यतां इति । दण्डकलितवदसौ पठ्यते क्रमानुग्रहाय ।

भा. १०।५।२५।८३. * **दण्डकलितवत्** अभ्यासः गवामयने द्वादशाहात् प्राप्तासु त्र्यनीकासु पूर्वपक्षे स्वस्थानविवृद्धया सिद्धान्ते । १०।५।२५।८३, * **दण्डकलितवत्** आवर्तनीयानां धर्मः । यो ह्युच्यते 'त्रिरनुवाकः पठ्यताम्' इति स आदित आरभ्य परिसमाप्य पुनरादित आरभते इति दडकलितवदावृत्तिः । ५।३।२।३ । यथा दण्डेन भूप्रदेशं संमिमानः पुरुषः आमूलाग्रं कृत्स्नं दण्डं पुनःपुनः पातयति, न तु दण्डस्य प्रत्यवयवं पृथगावृत्तिं करोति तद्वत् । वि. ५।३।२. * **दण्डकलितवत्** न उपसदां षट्त्वादिसंख्यासंपत्तिः, किंतु स्वस्थानविवृद्धया अग्निचयने । भा. ५।३।२।३.

* **दण्डकल्प्यः** प्रतिषेधो यथा कर्मप्रदीपे 'यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते । तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद् द्विजातये ॥' इति । नेयं दक्षिणा ऋत्विगभावात् । अत्र पूर्वदिने अन्वाधाने दण्डविधिरेव कल्प्यः, तेन तु निषेधः कल्प्यते । बाल. पृ. ३०.

* **दण्डचक्रन्यायः** । यथा दण्डचक्रसूत्रसलिलादेर्घटत्वाद्यनेकधर्मावच्छिन्नं प्रति कारणत्वम्, एवं विवक्षायामस्य प्रवृत्तिः । एतेन काव्यमात्रे अदृष्टस्य कारणता, अदृष्टाभ्यासप्रतिभानां च दण्डचक्रन्यायेन कारणतेति काव्यप्रकाशोक्तिः परास्तेति गागाभट्टाः । साहस्री. ४३४.

* **दण्डदानं** मैत्रावरुणाय अग्नीषोमीयविकारे निरुढपशौ असत्यपि दीक्षिते दण्डोत्पत्त्युपादानयोः प्रयोजकम्, तत्पालनस्य तु अप्रयोजकं तदभावात् । बाल. पृ. १०७. * दण्डदानं मैत्रारुवणसंस्काराय अर्थकर्म, न तु प्रतिपत्तिः । 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' 'दण्डी प्रैषानन्वाह' । वि. ४।२।६. * **दण्डदानस्य** प्रयोजकं प्रैषानुवचनम्, मैत्रावरुणाय । भाट्ट. ४।२।६.

⌛ **दण्डदानन्यायः** । दण्डन्यायः । दण्डप्रदानाधिकरणम् । मैत्रावरुणदण्डदानन्यायः । ज्योतिष्टोमे मैत्रावरुणाय दण्डदानं संस्कारकमर्थकर्म, न प्रतिपत्तिः ॥

प्रासनवन्मैत्रावरुणाय दण्डप्रदानं, कृतार्थत्वात् । ४।२।६।१६ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'वाग्वै देवेभ्योऽपाक्रामत् यज्ञायातिष्ठमाना । सा वनस्पतीन् प्राविशत् । सैषा वाग् वनस्पतिषु वदति । या दुन्दुभौ, या तूणवे, या वीणायाम् । यद्दीक्षितदण्डं प्रयच्छति वाचमेवावरुन्धे' इति । तथा 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति । मैत्रावरुणाय दण्डं प्रयच्छति, इत्येतदुदाहरणम् । तत्र संशयः किं दीक्षितधारणे शेषभूतस्य दण्डस्य मैत्रावरुणधारणं प्रतिपत्तिः अथवा अर्थकर्मेति । किं प्राप्तम् ? मैत्रावरुणाय दण्डदानं प्रतिपत्तिः । कुतः ? दीक्षितधारणे कृतार्थत्वात् । 'दण्डेन दीक्षयति' इति शेषभूतस्य अन्यत्र व्यापारे प्रतिपत्तिर्न्याय्या । यथा 'चात्वाले कृष्णविषाणां प्रास्यति' इति कण्डूयने शेषभूतायाः प्रासनं प्रतिपत्तिः । एवमत्रापि द्रष्टव्यम् । द्वितीया च दण्डे विभक्तिः । तस्मात् प्राधान्यमिति ।

टुप्— दानस्य मैत्रावरुणः प्रयोजकः, कृष्णविषाणा चात्वाले प्रतिपाद्या इति प्रतिपत्तिः । प्रसङ्गेन उपरितनी चिन्ता । किं सोमलिप्तानां अवभृथगमनं प्रतिपादनम्, उत अर्थकर्मेति (४।२।८ इत्यत्र) । देशार्था अवभृथश्रुतिः (इत्युक्ते) देशसंबन्धात् (देशप्रसङ्गात्) अन्योऽपि देशः (समादिः मनसि) विपरिवर्तमानः (कालः कर्ता च) चिन्त्यते किमनूद्यते, (उत) नियम्यते इति । नियमप्रसङ्गेन तथोत्तरे अधिकरणे अवतरतः गुणसंस्कारयोरपि नियम एवेति । करणद्रव्यं संस्कुर्वत् (अवघातादि) तेन (करणेन) संबध्यते । तस्य (करणस्य) स्वरूपमाख्यायते । कीदृशेन व्यापारेण करणमनुष्ठितं भवति इत्यनेन प्रसङ्गेन यागनिरूपणमायातम् । एवं जुहोतिरपि ।

अर्थकर्म वा, कर्तृसंयोगात् स्रग्वत् । १७ ॥

भाष्यम्— अर्थकर्म वा स्यात् । कर्तृसंयोगात् । कर्तृसंयोगो भवति 'मैत्रावरुणाय दण्डम्' इति । तस्मिंश्च दण्डो गुणभूतः, पुरुषः प्रधानभूतः पुरुषं हि स प्रचरितुं समर्थं करोति । कथम् ? यथा (दण्डसाहाय्येन) पूर्वं तमोऽवगाहते, अपः प्रविशति, गां च सर्पं च वारयति, अवलम्बनं च भवति । अतः पुरुषप्राधान्यान्न प्रतिपत्तिः । स्रग्वच्च द्रष्टव्यम् । यथा स्रजमुद्गात्रे ददाति, इति असत्यपि उपकारे पुरुषस्य प्रयोजनवत्त्वात् निष्प्रयोजनत्वाच्च स्रजो भवति पुरुषप्राधान्यम् । एवमिहापि द्रष्टव्यम् । तस्मान्न प्रतिपत्तिरिति । अथ यदुक्तं द्वितीया-

श्रवणात् दण्डप्राधान्यमिति । उच्यते । 'तथा युक्तं चानीप्सितम्' इति द्वितीया द्रष्टव्या । कुतः ? मैत्रावरुणे चतुर्थीनिर्देशात् । संप्रदाने हि चतुर्थी भवति । संप्रदानं च कर्मणा अभिप्रेयते । तत्र दण्डात् अभिप्रेततरो मैत्रावरुणः इति गम्यते ।

टुप्— दण्डो व्याप्यमानः क्रियया, शब्देनैव मैत्रावरुणार्थः उपदिश्यते । या च द्वितीया दण्डमिति, साऽपि न प्राधान्येन ईप्सितार्था, किं तर्हि, व्याप्यमानतया । मैत्रावरुणो हि तत्र प्रधानभूतः । अत आह **तथायुक्तं चानीप्सितम्** इति द्वितीया भविष्यतीति । तस्मान्न दण्डः प्रधानभूतः । न च दण्डदानमदृष्टाय । तमोऽवगाहनादिषु दृष्टायैव ।

कर्मयुक्ते च दर्शनात् । १८ ॥

भाष्यम्— 'दण्डी प्रैषानन्वाह' इत्यनूद्यते । तेन प्रचरतो दण्डं प्रदर्शयति । तदर्थकर्मणि सति उपपद्यते । प्रतिपत्तौ तु दण्डो मैत्रावरुणाय दत्तः ततोऽपवृज्येत । तत्कर्म कर्तव्यं च कृतम्, इति न तेन प्रयोजनमिति न धार्येत । तत्रैतद्दर्शनं नोपपद्यते । तथा अहिस्त्वां दशतीति मैत्रावरुणं ब्रूयात्, अहिरिव ह्येष द्रष्टव्य इति । तथा 'मुशल्यन्वाह' इति । मुशलशब्दश्च दण्डे प्रसिद्धः । यथा, कथं नु खलु मुशलिनो माणवका गङ्गां नावतरेयुरिति । तस्मादपि अर्थकर्म ।

टुप्—'दण्डी प्रैषानन्वाह' इत्यनूद्यते (दण्डित्वम्) तेन प्रचरतो दण्डं दर्शयति । प्रतिपत्तित्वे न तस्य धारणं भवेत् । अथ अर्थकर्म ततो ध्रियमाणस्य (दण्डस्य अनुवाददर्शनमुपपद्यते इति परेण संबन्धः), प्रकरणाविशेषात् यद्यत् कुर्यात् तत्तत् दण्डसंयुक्तेन (कर्तव्यं) इति, तस्मात् सर्वत्र दण्डभावात् अनुवाददर्शनमुपपद्यते। ननु अरुणाऽधिकरणे दण्डविधानमुक्तम् 'उपसर्जनार्थो विधीयते' इति (कदाचित् उपसर्जनीभूतोऽर्थो विधित्सितः प्रधानीभूतोऽनुवादः । तद्यथा दण्डी इति उपसर्जनीभूतदण्डकपुरुषप्रधानकः शब्दः अवगम्यते, कदाचित्तु निर्ज्ञाते पुरुषे दण्डगुणविधानार्थमुच्चार्यते 'दण्डी प्रैषानन्वाह' इति अनेन भाष्येण, तत् कथमिह दण्डानुवादोऽभिधीयते ?) उच्यते । प्रकरणात् सर्वार्थे (दण्डवत्त्वं) प्राप्तं प्रैषानुवचनयोर्निर्दिश्यते (उपसंह्रियते इत्यर्थः) । एवं सति नास्ति (पूर्वापर–) विरोधः । दण्डानुवादोऽपि घटते, (प्रकरणात् प्राप्ते) नियमविधानात् (तत्) उपसर्जनार्थे विधानमपि (अरुणाऽधिकरणोक्तं घटते एव । ततः सिद्धं मैत्रावरुणः प्रयोजकः इति)।

उत्पत्तौ येन संयुक्तं, तदर्थं तच्छ्रुतिहेतुत्वात्, तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् । १९॥

भाष्यम्— यदुक्तं यथा कृष्णविषाणाप्रासनमिति । तत्रोच्यते । युक्तं तत्र, उत्पद्यमानं यत् येन प्रयोजनेन संबद्धमुत्पद्यते, तत् तदर्थमेव न्याय्यम् । तस्यान्यत्र गमने प्रतिपत्तिः इत्येतदुपपद्यते, यदि न दृष्टं प्रयोजनं भवति । इह तु दृष्टं प्रयोजनं मैत्रावरुणस्य धारणम् । तस्मात् विषममेतत् ।

शा— दीक्षितस्य दण्डधारणं विधाय पुनराम्नातं 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति । किं मैत्रावरुणाय दण्डप्रदानं दण्डस्य प्रयोजकमर्थकर्म, उत प्रतिपत्तिकर्म अप्रयोजकमिति । तत्र '**द्वितीयाश्रुतिसंयोगात् कृतार्थत्वाच्च धारणे । मैत्रावरुणहस्तेऽस्य प्रक्षेपः प्रतिपादनम् ॥**' उच्यते । '**चतुर्थ्या संप्रदानत्वं प्रशास्तुरवगम्यते । कर्मणा यमभिप्रैति संप्रदानं तदुच्यते ॥**' द्वितीया तु 'तथायुक्तं चानीप्सितम्' (पा० १।४।५० । ईप्सिततमवत् क्रियया युक्तं अनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ग्रामं गच्छन् तृणं स्पृशति । तथायुक्तत्वं च समभिव्याहृतधात्वर्थप्रधानव्यापारप्रयोज्यफलाश्रयत्वम्) इति भविष्यति । '**उपयुक्तस्य संस्कारादुपयोक्तव्यसंस्क्रिया । गरीयसी, प्रशास्तुश्च दृष्टं तेन प्रयोजनम् ॥**' स्थित्वा हि प्रैषानुवचने कुर्वतः आलम्बनं भवन् दृष्टार्थ एव दण्डः । निरूढपशौ असत्यपि दीक्षिते मैत्रावरुणार्थेन दण्डोपादानसिद्धिः विचारप्रयोजनम् । (प्रैषानुवचनात् पूर्वं दण्डनाशे पुनस्तत्प्रयुक्तिश्च प्रयोजनम्)।

सोम— पूर्ववत् प्रत्यवस्थानात् संगतिः ।

वि— 'मैत्रावरुणके दण्डदानस्य प्रत्तिपत्तिता । उतार्थकर्मता, ऽऽद्योऽस्तु धारणे कृतकृत्यवः ॥, युक्तोप-

युक्तसंस्कारादुपयोक्तव्यसंस्क्रिया । स्थित्वा प्रैषानुवचने
दण्डोऽपेक्ष्योऽर्थकर्म तत् ॥ ’

भाट्ट— सोमे ‘ दण्डेन दीक्षयति ’ इत्यनेन दण्डस्य दीक्षाऽभिव्यञ्जकत्वं विधाय ‘ क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति ’ इति श्रुतम् । तत्र पूर्ववदेव द्वितीयासंयोगात् मैत्रावरुणसंबन्धिदानं दण्डप्रतिपत्तिः । चतुर्थी षष्ठ्यर्थलक्षिका, ‘ वेदविदे गां ददाति ’ इतिवद्वा प्राधान्याभावेऽपि संप्रदानत्वार्थिकैव । अत एव दीक्षितदण्डस्य दानमात्रेण प्रतिपत्तिसिद्धेर्नावश्यं स एव दण्डो ‘ दण्डी प्रैषानन्वाह ’ इत्यनेन प्रैषानुवचने विनियुज्यते । तेन न प्रैषानुवचनं दण्डदानस्य प्रयोजकमिति निरूढपश्वादावपि न तदनुष्ठेयम् । इति प्राप्ते, ‘ कर्मणा यमभिप्रैति स संप्रदानम् ’ इति स्मृत्या क्रियां प्रति व्याप्यमानं कर्मकारकं प्रत्यपि संप्रदानस्य व्याप्यमानत्वावगतेर्विधिबलेन कस्यचिद्व्याप्यमानस्य ईप्सितत्वे कल्प्यमाने **‘व्याप्यव्याप्यस्य सुतरां व्याप्यत्वम्’ इति न्यायेन** मैत्रावरुणे एव तदवगतेः तस्यैवोद्देश्यत्वम् । संभवति च मैत्रावरुणस्य उपयोगादुद्देश्यत्वम् । वेदविदादौ तु बाधात् स्वर्गादेरेव उद्देश्यता । दृष्टं चालम्बनं दण्डस्य प्रयोजनमिति नादृष्टार्थत्वमपि । न चैवं ‘ दण्डं ’ इति द्वितीयाऽनुपपत्तिः, सक्तुवत् करणत्वलक्षणार्थत्वात् । यत्तु मूले अनीप्सितकर्मत्वेन तदुपपत्तिरित्युक्तम्, तत् जुहोतेरपि ‘ तृतीया च होश्छन्दसि ’ इत्यादिस्मृत्या सकर्मकत्वावगतेः सक्तुष्वपि तदापत्तेः अनीप्सितकर्मत्वेऽपि च उद्देश्यानेकत्वनिमित्तकवाक्यभेदापरिहारस्य कौस्तुभे एवोक्तत्वादुपेक्षितम् । अस्तु वा दण्डस्य अनीप्सितकर्मत्वेनैव अन्वयः संप्रदानस्य तु सत्यपि प्राधान्ये संप्रदानत्वेनैव अन्वयान्न द्विकर्मकत्वापत्तिरित्यपि बोध्यम् । अतश्च दण्डविशिष्टदानस्य उपयोगापेक्षायां ‘ दण्डी प्रैषानन्वाह ’ इत्यादिना प्रैषानुवचनार्थत्वेन विनियुज्यते । अतो निरूढपश्वादौ दीक्षासोमक्रयाभावेऽपि दण्डदानानुष्ठानं तस्य प्रैषानुवचनप्रयुक्तत्वान्नानुपपन्नम् ।

इदं त्विह वक्तव्यम् । दानस्य दण्डं प्रति अर्थकर्मत्वेऽपि दीक्षादण्डस्य कथं दानाङ्गत्वम् । नहि स्वत्वत्यागे कृते यजमानेन स्वयं पुनर्व्यवहर्तुं शक्यम् । न चैतावदेव दण्डकार्यं दीक्षाऽभिव्यञ्जकालम्बनं न परप्राप्तिः, येनोपादानलाघवानुरोधेन प्रकृतः एव गृह्येत । न च दानविध्यनुरोधेन कार्यसंकोचः, तस्य लौकिकदण्डेनापि उपपत्तेः । प्रतिपत्तित्वे तु कृष्णविषाणावदेव युक्तस्तत्संकोच इति । **अत्र ब्रूमः ।** श्रौतविधेरर्थकर्मत्वेऽपि असदुक्तप्रयाजशेषाभिघारणन्यायेन आर्थिकदानप्रतिपत्तिविध्यन्तरकल्पनया प्रकृतेऽपि कार्यसंकोचोपपत्तिः । न चात्र मध्ये प्रतिपत्त्यपेक्षाऽभावेन कल्पकाभावात्तन्न्यायवैलक्षण्यम्, दानविधेर्दण्डान्तरप्रयोजकत्वशक्तिकल्पनाभिया कार्यसंकोचमङ्गीकृत्यापि मध्ये तदपेक्षोपपत्तेः । दृष्टश्च लोके अन्यानुरोधेनापि अवश्यापेक्षितविषये स्वकार्यसंकोचेन अकाले एव तदपकर्षः । शक्यते चात्र स्वस्वत्यागांशस्य मैत्रावरुणोपकारकत्वाभावात् तदंशे दण्डप्रतिपत्त्यर्थत्वं वक्तुम् । स्वस्वत्वात्यागेऽपि समर्पणमात्रेणापि प्रैषानुवचनोपपत्तेः । अतश्च प्रतिपत्त्यनुरोधेन दीक्षितदण्डस्य तद्विषयत्वसिद्धिः । अत एव सत्रे सर्वेषां दण्डानां दानम्, एवं च परप्रयुक्तदण्डोपजीवित्वान्न श्रौतदानविधेः प्रैषानुवचनादेर्वा दीक्षितदण्डसत्त्वे दण्डान्तरानाक्षेपकत्वम्, तन्नाशादौ तु दण्डान्तराक्षेपकत्वं अक्षाभ्यञ्जनन्यायेन (४।१।१०) इष्टमेव । श्रौतदानविधौ एकत्वश्रवणादेकदण्डदानमेव मैत्रावरुणोपकारकमिति सत्रे प्रैषानुवचने एक एव दण्ड इत्यपि बोध्यम् । इदं च दीक्षितदण्डप्रापकवचनस्य **पार्थसारथ्यादिमीमांसकै**रलिखितत्वात् तदभावमभिप्रेत्योक्तम् । वस्तुतस्तु तैत्तिरीयशाखायाम् ‘ यद्दीक्षितदण्डं प्रयच्छति ’ इति सार्थवादकवाक्यान्तरश्रवणात् ‘ क्रीते ’ इति दीक्षितपदरहितवाक्ये प्रतिपत्तिविध्यन्तराकल्पनेऽपि न क्षतिः, तैत्तिरीयवाक्येनैव मैत्रावरुणपदाश्रवणेन दानस्य प्रतिपत्तित्वसिद्धेः । क्रीतवाक्ये तु मैत्रावरुणपदश्रवणेन तत्प्राधान्यावगतेः तदुपकारार्थत्वमेव । अतश्च तैत्तिरीयवाक्ये यच्छतेः संप्रदानापेक्षायां क्रीतवाक्ये स्वतन्त्रदण्डाक्षेपशक्तिकल्पनागौरवपरिहारार्थं च परस्परापेक्षतया दीक्षितदण्डस्यैव मैत्रावरुणोपकारार्थत्वसिद्धिः । न च तैत्तिरीयवाक्ये क्रीतवाक्यविहितदण्डे एव दीक्षासंबन्धविधानोपपत्तेः न प्रतिपत्तिविधायकत्वमिति वाच्यम् । तथात्वे दण्डोद्देशेन दीक्षितत्वविधानेऽपि एकप्रसरता-

भङ्गापत्तेः दानस्य अर्थकर्मत्वे प्रमाणाभावः । प्राप्तदानानुवादेन कालमैत्रावरुणरूपोभयविधाने वाक्यभेदापत्तिः । अतः उभयत्रापि दानविधिः; तत्र च दीक्षितपदयुक्तवाक्ये प्रतिपत्तिविधिरेव, संप्रदानाश्रवणात् दीक्षितपदश्रवणाच्च । क्रीतवाक्ये तु उक्तयुक्त्या अर्थकर्मत्वमेव । उभयत्र प्रयोजनं पूर्ववत् । वस्तुतस्तु क्रीतवाक्येऽपि प्रैषानुवचनोपयोगिदण्डसंस्कारकत्वमेव दानस्य इति दण्डस्यापि ईप्सितकर्मत्वमेव । न त्वेतावता दण्डप्रतिपत्तित्वम्, उपयोक्ष्यमाणसंस्कारस्य न्याय्यत्वात् । मैत्रावरुणस्य तु संप्रदानत्वेनैवान्वय इति न कश्चिद्दोषः । सत्रे प्रैषादौ दण्डैकत्वं तु ‘दण्डी प्रैषानन्वाह’ इत्यत्र प्रथमातिक्रमे कारणाभावादेकवचनान्तेन व्युत्पत्तिमङ्गीकृत्य समर्थनीयमिति दिक् ।

मण्डन— ‘दण्डप्रदानं पुनरर्थकर्म ।’

शंकर--‘दण्डदानं त्वर्थकर्म ।’

* **दण्डमेखलादयः** दीक्षितस्य दीक्षितत्वाभिव्यञ्जनमात्रार्थाः । **भा.** ५।३।११।२९–३१.

⧗ **दण्डसर्पमारणन्यायः** । यत्रायासं विना साक्षात्सिद्ध्यन्तमर्थमुपेक्ष्य आयासेन परंपरया स एवार्थः साध्यते, तत्रायं न्यायोऽवतरतीति । यथा कश्चित्सर्पं दृष्ट्वा तन्मारणाय दण्डमिच्छन् तमलभमानश्च कुठारं गृहीत्वा तच्छेदाय प्रवर्तते । तस्य दण्डगवेषणायासो यथा वृथा, कुठारेणैव सर्पस्य शक्यवधत्वादिति । **साहस्री.** २५०.

* **दण्डी** इति उपसर्जनीभूतदण्डकपुरुषप्रधानकः शब्दः अवगम्यते, कदाचित्तु निर्ज्ञाते पुरुषे दण्डगुणविधानार्थं उच्चार्यते ‘दण्डी प्रैषानन्वाह’ इति । यथा ‘लोहितोष्णीषा ऋत्विजः प्रचरन्ति’ इति । **भा.** ३।१।६।१२ पृ. ६८७. * ‘दण्डी’ इति दण्डनिमित्तः पुरुषवचनः, दण्डोऽस्य निमित्तं नाभिधेयः । (एवं स्वर्गशब्दः प्रीतिसाधनवचनः, न प्रीतिवचनः) । **भा.** ६।१।१।१ पृ. १३४७ । यत्तूक्तं दण्डिशब्दवदिति, सोऽपि प्रतीते शब्दात् दण्डे, दण्डिनि प्रत्ययमादधाति, अन्तर्गतस्तत्र दण्डशब्दः, स दण्डस्य वाचकः । इह तु स्वर्गशब्द एव प्रीतेरभिधाता । पृ. १३५०, * ‘दण्डी प्रैषानन्वाह’ इति निर्ज्ञाते पुरुषे दण्डगुणविधानार्थे दण्डपदमुच्चार्यते । अत्र उपसर्जनीभूतोऽर्थो विधित्सितः, प्रधानीभूतश्च अनुवादः । **भा.** ३।१।६।१२ पृ. ६८७. * ‘दण्डी प्रैषानन्वाह’ इति प्रैषानुवचनार्थत्वेन दण्डदानं विनियुज्यते । **भाट्ट.** ४।२।६. * ‘दण्डी प्रैषानन्वाह’ मैत्रावरुणः दण्डमवलम्ब्य स्थित्वा प्रैषाननुब्रूयात् । **के.** ४।२।६.

* **दण्डिशब्दः** केवले दण्डे न प्रयुज्यते इति विशिष्टवचनोऽवधार्यते । **वा.** १।३।९।३३ पृ. ३१८. * दण्डिशब्दः विशेषणभूतं दण्डमनभिधायापि तं निमित्तीकृत्य पुरुषमेव वक्ति । **रत्न.** ६।१।१।१. * दण्डिशब्देन न तावत् दण्डोऽभिधीयते, अथ च दण्डविशिष्टोऽवगम्यते । **भा.** १।३।९।३३ पृ. ३१७. * दण्डिशब्दे हि प्रकृत्या दण्डोऽभिहितः प्रत्ययेन पुरुषः । **रत्न.** ६।१।१।२.

* **दतो धावते** इति ज्योतिष्टोमे दन्तधावनस्य मेधमेवमुपैति इति फलश्रुतिः फलार्थवादः, न तु फलविधिः । **भा.** ४।३।१।१–४.

⧗ **दत्ते तु** (दत्ते त्वर्धं प्रकल्पयेत्–याज्ञ. २।१४८) इति न्यायः । यथा जीवत्पितृकविभागे आद्यपक्षे, एवं अन्यपक्षद्वये ‘दत्ते तु’ इति न्यायेन निर्वाहवत्, पुत्रेच्छयैव पितृवत् निर्वाहो बोध्यः । **बालम्भट्टी.** २।११५.

⧗ **दत्ततिलाञ्जलिन्यायः** । यत्र पुत्रादिदत्ततिलाञ्जलिवत् वस्तु उत्सृज्यते, तत्रास्यावतार इति संक्षेपः । **साहस्री.** ५६६.

* **ददातिरुत्सर्गपूर्वकः परस्वत्वेन संबन्धः ।** इदं सुबोधिनीवृत्तौ अधिकं सूत्रम् । ४।२।१४।२९ ॥ मण्डनाचार्यैश्च मीमांसानुक्रमण्यां इदमधिकरणं दानलक्षणप्रतिपादकं पृथक् गृहीतम् । ‘अथ ददातिः किंलक्षणकः इति । आत्मनः स्वत्वव्यावृत्तिः परस्य स्वत्वेन संबन्धः । ... ददातिरुत्सर्गपूर्वकः परस्वत्वेन संबन्धः इति’ इति च भाष्यम् । ‘स्वीयं द्रव्यं परित्यज्य परकीयं यथा भवेत् । तथा संपादनं दानम्’ इति विस्तरः । **के.**

* **ददातिः** परस्वत्वमात्ररूपफलवाची । संकल्पितस्वीकरणपूर्वकपरस्वत्वापत्तिस्वस्वत्वध्वंसफलकद्रव्यत्यागः ददातिपदवाच्यः । **मणि.** पृ. १०२.

* **दध–शब्दो** भागधेयवचनः । तद्यथा कङ्कटकाय दधम्, नापिताय दधं इति । देवदधानि देवभागा इत्यर्थः । भा. १०।८।१२।३२.

* **दधि** अग्निहोत्रहोमे नित्यं नैमित्तिकं च उभयविधम् । भा. ४।३।३।५–७, * दधि द्व्यहकालम् । ८।२।३।१६. * 'दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यत्र मधुनि उदके च आज्यधर्माः कर्तव्याः । न सांनाय्यगतपयसो धर्माः । वि. ८।१।१९.

* **दध्नेन्द्रियकामस्य** जुहुयात् इति अग्निहोत्रात् न कर्मान्तरम् । वि. २।२।११. * दध्नेन्द्रियकामस्य जुहुयात् इत्यत्र प्रकरणप्राप्तमपि सन्तं होममेव धातुरनुवदति, न विधानार्थमपि अन्यदेव गमनादि धात्वर्थान्तरं ब्रवीति । वा. ३।१।७।१४ पृ. ७२२. * दध्नेन्द्रियकामस्य जुहुयात् इत्यत्र होमसंबन्धात् दध्यादेर्गुणात् फलं न तु दधिगुणकं होमान्तरम् । भा. २।२।११।२५–२६.

* **दध्नेन्द्रियाधिकरणम्** । इन्द्रियकामाधिकरणं द्रष्टव्यम् । भा. २।२।११।२५–२६.

* **दध्नेन्द्रियकामाधिकरणन्यायेन** एकविंशत्यादेः गुणात् फलावगतिः (सामिधेनीषु) । सु. पृ. १०५७.

* **दध्ना** जुहुयात् इन्द्रियकामस्याग्निहोत्रम् । भा. २।२।११।२५, * 'दध्ना जुहोति' इति न कर्मान्तरम्, किंतु अग्निहोत्रे एव गुणविधिः वैकल्पिकः । २।२।१०।२४. * 'दध्ना जुहोति' इत्यादौ गुणविधिना विशिष्टविधिर्बाध्यते । बाल. पृ. १४०. * 'दध्ना जुहोति' इत्यादौ दध्यादिद्रव्यस्य अक्रियारूपत्वेऽपि क्रियाविशेषणतया विधेयता । वि. ५।१।१ वर्णकं २, * 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य' इति वाक्याभ्यां अग्निहोत्रे दध्नः काम्यत्वं नित्यत्वं चाविरुद्धम् । ४।३।३, * 'दध्ना जुहोति' 'व्रीहिभिर्यजेत' इत्यादौ दध्नो व्रीहीणां च गुणत्वेन विधिः, यागनामत्वासंभवात् । १।४।२, * दध्ना मधुमिश्रेण अग्निचयने अग्नेः प्रोक्षणम् । तच्च सकृदेव, न प्रतीष्टकम् । ९।१।८.

* **दध्नः** अवदानाभिघारणासादनानि पश्चात् आग्नेयस्य तु पूर्वम्, मुख्यक्रमस्य प्रवृत्तिक्रमात् बलीयस्त्वात् । भा. ५।४।२।२–४. * दध्नः एकस्य क्रत्वर्थत्वे पुरुषार्थत्वे च 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य जुहुयात्' इति संयोगपृथक्त्वं कारणं इत्युक्ते, 'शेष इति चेत्' (४।३।६) इति सूत्रेण 'दध्ना जुहोति' इति विहितस्य दध्नः फलापेक्षायां इतरेण इन्द्रियफलत्वोक्तेः एकवाक्यत्वात् संयोगपृथक्त्वाभावमाशङ्क्य, 'नार्थपृथक्त्वात्' (४।३।७) इति सूत्रेण होमार्थत्वेन विहितस्य दध्नः फलानाकाङ्क्षत्वात् एकवाक्यताभावं वक्ष्यति । सु. पृ. ८३७. * दध्नः एष स्वभावः, यत् पूर्वेद्युरुपक्रान्तं अपरेद्युरभिनिर्वर्तते । भा. ३।६।८।२९.

दध्नः स्यान्मूर्तिसामान्यात् । ८।२।३।१५ ॥

अग्नीषोमीयः पशुः सांनाय्यविकारः इत्युक्तम् । इदानीं तत्रापि विशेषो वक्तव्यः । अयं अग्नीषोमीयः पशुः, सांनाय्यमध्ये यत् दधि तस्य दध्नः विकारः स्यात् । दध्नो विध्यन्तः पशौ । मूर्तिसामान्यात् । मूर्तिः घनरूपत्वम् । पशुरपि घनः दधि अपि घनमेवेति ।

पयो वा, कालसामान्यात् । १६ ॥

पूर्वपक्षं वाशब्देन निरस्यन् सिद्धान्तमाह । न दधि प्रकृतिः, किंतु पशोः प्रकृतिः पयः, कालसामान्यात् । सद्यस्कालं पयः, पशुरपि सद्यस्कालः इति पयः अन्तरङ्गम् । दधि तु द्व्यहकालं इति बहिरङ्गम् ।

पश्वानन्तर्यात् । १७ ॥

सिद्धान्ते हेत्वन्तरमाह । पयसः पशोः आनन्तर्यं अव्यवहितत्वम्, दध्नस्तु पयसा व्यवहितत्वम् । एतस्मादपि हेतोः पयः अन्तरङ्गं भवति इति तदेव पशोः प्रकृतिः, न दधि ।

द्रवत्वं चाविशिष्टम् । १८ ॥

ननु अग्नीषोमीयस्य पशोः पयो न प्रकृतिः पयो हि द्रवम् । पशस्तु न द्रवः इति चेत् । न, यद्यपि पशौ कियांश्चित् भागः घनः, तथापि कियांश्चित् भागः द्रवोऽपि वर्तत एव । इति पयसः पशोश्च द्रवत्वं गतिमत्त्वं अविशिष्टं समानमेव । तस्मात् अग्नीषोमीये पशौ ऐष्टिकसांनाय्यैकदेशस्य पयसो विध्यन्तः इति सिद्धान्तः । के.

* **दधनि** इज्यार्थे प्रणीताधर्माः पाके उपकुर्वन्ति । भा. ३।१।७।१४ पृ. ७१६.

⧗ **दधनिसितान्यायः** । सामिधेनीषु– ‘ ऋचि प्रणवं दधाति ’ इति विधानात् प्रत्यृचमन्ते प्रणवः प्रयोज्यः । स च कुण्डबदरन्यायेन ऋगक्षरासंमिश्रो वा दधनिसितान्यायेन तत्संमिश्रो वेति द्वेधाऽपि संभवति । इति पूर्वपक्षः । **संकर्ष** ४।१।११.

* **‘ दधंश्चरुम् ’** इति चन्द्राभ्युदितेष्टौ । तत्र दधनि इज्यार्था धर्माः कर्तव्याः । **भा.** ९।४।१०।४१–४२, * ‘ दधंश्चरुम् ’ इति पशुकामेष्टौ । तत्र दधनि प्रदेयधर्मा न भवेयुः । ९।४।११।४३–४४.

* **दध्यभावे** अन्येनाम्लेनापि काञ्जिकादिना (पयो दधि) क्रियते । तत्रापि चामिक्षा शब्दो भवति । **भा.** ८।२।४।२२.

* **दध्यादेः** नित्यनैमित्तिकोभयार्थत्वम् । अग्निहोत्रे ‘ दध्ना जुहोति ’ इति नित्यार्थे सत् , ‘ दध्नेन्द्रियकामस्य जुहुयात् ’ इति नैमित्तिकार्थम् । **भा.** ४।३।३।५–७.

* **दध्यानयनं** आमिक्षाप्रयोज्यम् । यदुद्देशप्रवृत्त-कृतिव्याप्यत्वं यस्य, तत् तस्य प्रयोज्यम् । **भाट्ट.** ४।१।१.

⧗ **दधिक्षीरन्यायः** । ननु दधिक्षीरन्यायवत् स्वस्वरूपपरित्यागपूर्वकरूपान्तरप्राप्तिरेव परिणामः इति चेन्न । (क्षीरस्वरूपपरित्यागपूर्वकः दधिरूपेण क्षीरस्य परिणामो भवति न स्वरूपमपरित्यज्य) । **श्रीकर.** १।४।२६ ब्रसू.

⧗ **दधिग्रहः अंश्वदाभ्यानन्तरमेव न तु प्राक्** ॥

दधिग्रहो नित्य इत्युक्तम् । स चोपांश्वादिभ्यः पूर्व एव ग्राह्यः । एतदपूर्वविधेस्तेभ्यः पूर्वं पाठात् ‘ ज्येष्ठो वा एष ग्रहाणाम् ’ इति श्रुत्याऽपि सर्वग्रहप्राथम्योक्तेः । प्रथमोत्पन्नस्यैव ज्येष्ठत्वेन व्यवहारात् इति प्राप्ते, ब्राह्मणक्रमान्मन्त्रक्रमस्य बलवत्त्वात् उपांश्वादिमन्त्रोत्तरमेव दधिग्रहमन्त्रपाठात् प्रशंसायामेव ज्यादेशविधानेन ‘ज्येष्ठा वा एता ब्राह्मणाः विदामक्रन् ’ इत्यादाविव ज्येष्ठशब्दस्य प्राथम्यवाचकत्वाभावात् उपांश्वादिभ्यः परत एव तदिज्या । अत एव गवामानयनकाले दधिग्रहेज्याप्रदर्शनार्थः अर्थवादः ‘ यथा गावः संजानानाः संगच्छमानाः संगम्यान्योन्यं घ्नन्ति ’ इत्यादिः संगच्छते । **संकर्ष.** ३।३।८.

* **दधिग्रहः** । अग्निष्टोमे प्रातःसवने । ‘ दधिग्रहेण प्रचरति ’ । **सत्या.** ८।२।१।, दधिग्रहपात्रे दधिग्रहं गृह्णाति । हरति (आहवनीयं प्रति होमार्थं) । जुहोति । २ । दधिग्रहस्य अंशोरदाभ्यस्य च समानं पात्रम् । २८ । औदुम्बरं चतुस्स्रक्ति दधिग्रहपात्रम् । दध्ना द्रव्येण ग्राह्यो ग्रहः दधिग्रहः । **के.** * **दधिग्रहः** नित्य एव ज्योतिष्टोमे ‘ यां वै कांचिदध्वर्युर्यजमानश्च देवतामन्तरितः तस्या आवृश्च्येते , यत् प्राजापत्यं दधिग्रहं गृह्णाति , शमयत्येवैनाम् ’ ‘ ज्येष्ठो वा एष ग्रहाणाम् ’ इति देवताक्षोभतत्समाधानोपन्यासस्तु विधेयदधिग्रहस्तुतये अर्थवादः । **वि.** ४।४।५.

⧗ **दधिग्रहः नित्यः काम्यश्च संयोगपृथक्त्वेन** ॥ तत्प्राये एव ‘ दधिग्रहं गृह्णीयात् पशुकामस्य ’ इति पठिते विधौ अपि उक्तन्यायेन कर्मान्तरत्वे प्राप्ते , लाघवात् फलोद्देशेन धात्वर्थविधिमात्रम् , गुणपदं तु अनुवादः विहितस्य पुनःफलाय विधानात् संयोगपृथक्त्वेन ऐन्द्रवायवाग्रतावत् नित्यकाम्यत्वम् । **संकर्ष.** ३।३।१०.

⧗ **दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् । ४।४।५।८॥**

ज्योतिष्टोमे ‘प्राजापत्यं दधिग्रहं गृह्णाति ’ इति श्रुतम् । सोऽयं दधिग्रहः किं नित्यः नैमित्तिको वेति विचारे पूर्वपक्षमाह । दधिग्रहः नैमित्तिकः देवतात्यागजन्यदोषपरिहारार्थः । श्रुतिसंयोगात् ‘ यां वै कांचिदध्वर्युश्च यजमानश्च देवतामन्तरितः तस्या आवृश्च्येते , यत् प्राजापत्यं ग्रहं गृह्णाति शमयत्येवैनाम् ’ इति श्रुत्या संयोगात् श्रुत्या निमित्तसंबन्धेन उक्तत्वात् ।

नित्यश्च ज्येष्ठशब्दात् । ९ ॥

द्वितीयं पूर्वपक्षमाह । नित्यश्च नित्यो दधिग्रहः, चकारेण नैमित्तिकश्च । ज्येष्ठशब्दात् । ‘ ज्येष्ठो वा एष ग्रहाणां यद्दधिग्रहः ’ इति दधिग्रहे ज्येष्ठशब्दप्रयोगात् । ज्येष्ठत्वं चात्र प्रशस्तत्वम् । तस्मात् नित्यश्च नैमित्तिकश्चासौ ।

सार्वरूप्याच्च । १० ॥

द्वितीये पूर्वपक्षे हेत्वन्तरमाह । ‘ सर्वेषां वैतत् देवानां रूपम् , यदेष ग्रहः ’ इति दधिग्रहस्य सर्वदेवरूपताया उक्तत्वात् नित्यत्वमस्य । तस्मात् नित्यो नैमित्तकश्चायम् ।

नित्यो वा स्यादर्थवादात् तयोः कर्मण्यसंबन्धाद्, भङ्गित्वाच्चान्तरायस्य । ११ ॥

वाशब्दो द्वितीयं पूर्वपक्षं निवर्तयति । दधिग्रहः नित्य एव स्यात् ज्येष्ठशब्दरूपात् सर्वदेवतासारूप्यरूपाच्च अर्थवादात् । यत्तु प्रथमपूर्वपक्षे श्रुतिसंयोग उक्तः तत्राह, कर्मशब्देनात्र क्रियते इति कर्मण्युत्पत्त्या फलं गृह्यते । तयोः अध्वर्युयजमानयोः कर्मणि देवतान्तरायप्रयुक्तदोषपरिहाररूपे कादाचित्के फले दधिग्रहस्य साधनतया असंबन्धात् संबन्धाभावात् नित्यानित्यसंयोगविरोधात् । अन्तरायस्य च भङ्गित्वात् कादाचित्कत्वात् । तस्मान्न नैमित्तकः । तथा च नित्य एव दधिग्रहः इति सिद्धान्तः । के.

* दधिग्रहः नैमित्तिकः श्रुतिसंयोगात् (४।४।५।८ जै.) । ज्योतिष्टोमे श्रुतं 'यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितः तस्या आवृश्च्येते यत् प्राजापत्यं दधिग्रहं गृह्णाति शमयत्येवैनाम्' इति । अत्र देवताऽन्तरायो निमित्तं पूर्ववत् यच्छब्दात् इति पूर्वपक्षिते, सिद्धान्तितम् । अकर्तृसमानाधिकरणस्य यच्छब्दस्य निमित्तता प्रतिपादकत्वाभावात् अर्थवादमात्रं अन्तरायश्रवणं इति नित्यो दधिग्रहः इति । अर्थवादश्चायं निमित्तविधिसरूपः । बाल. पृ. ५५. * दधिग्रहस्य इज्या उपांश्वादिभ्यः परत एव । संकर्ष. ३।३।८.

⌛ दधिग्रहाधिकरणम् । ज्योतिष्टोमे दधिग्रहो नित्यः ॥

दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ।४।४।५।८॥

भाष्यम्-- ज्योतिष्टोमे श्रूयते 'यां वै कांचिदध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते, यत् प्राजापत्यं दधिग्रहं गृह्णाति, शमयत्येवैनाम्' इति । तत्र संदेहः किं नित्यो दधिग्रहः, उत नैमित्तिक इति । किं प्राप्तम् ? दधिग्रहो नैमित्तिकः स्यात्, श्रुतिसंयोगात् । देवताऽन्तराये निमित्ते श्रूयते । न च नित्योऽन्तरायः । तस्मान्नैमित्तिक इति ।

नित्यश्च ज्येष्ठशब्दात् । ९ ॥

भाष्यम्—यदुक्तं नैमित्तिक इति, तत् गृह्यते किन्तु नित्यश्च । कुतः ? ज्येष्ठशब्दात् । ज्येष्ठशब्दो भवति, 'ज्येष्ठो वा एष ग्रहाणां यस्यैष गृह्यते, ज्यैष्ठ्यमेव गच्छति' इति । ज्येष्ठशब्दश्च प्राधान्ये प्राथम्ये वा स्यात् । नैष प्रथमो न प्रधानम् । यदि नित्यः, एवं प्रशस्यत्वादुपपद्यते । न जातु चलाचलं प्रशंसन्ति । तस्मान्नित्यश्च नैमित्तिकश्चेति । विनाऽपि निमित्तेन ग्रहीतव्यः, निमित्तेनापि पुनरिति ।

सार्वरूप्याच्च । १० ॥

भाष्यम्—सर्वरूपता च श्रूयते 'सर्वेषां वैतद्देवानां, रूपं यदेष ग्रहो, यस्यैष गृह्यते सर्वाण्येवैनं रूपाणि पशूनामुपतिष्ठन्ते' इति । नहि देवतारूपमस्माकं किंचिदन्यत् प्रत्यक्षम्, अन्यदतो नित्यत्वात् । तस्मादपि नित्यश्च नैमित्तिकश्चेति ।

नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसंबन्धाद्, भङ्गित्वाच्चान्तरायस्य । ११ ॥

भाष्यम्— यदुक्तं नित्यो नैमित्तिकश्चेति, तत्र नित्य एव स्यात् । ज्येष्ठशब्दात् सार्वरूप्याच्च । यदुक्तं देवताऽन्तराये निमित्ते श्रूयते इति । न देवताऽन्तरायो निमित्तत्वेन गम्यते । तयोरध्वर्युयजमानयोः कर्मणि अन्तरायेण संबन्धात् । नहि एतत् श्रूयते अध्वर्युणा देवता अन्तरितव्या यजमानेन वेति । अनित्यो हि अन्तरायः । न चैवं शब्दोऽस्ति, 'अन्तराये सति दधिग्रहो ग्रहीतव्यः' इति । विनैव संयोगेन दधिग्रहस्य ग्रहणम्, अन्तरायसमाधानं तु अस्य प्रयोजनमिति । तदेतन्नित्यवत् ग्रहणम्, अनित्यं प्रयोजनम् । नित्यं गृह्णीयात् अनित्यमन्तरायं समाधातुमिति नावकल्पते । तत्र प्रयोजने अनित्यत्वात् ग्रहणे नित्यवच्छ्रुतिर्बाध्येत । अर्थवादत्वे तु न बाध्यते । नहि तदन्तरायं समाधातुं गृह्यते । अन्यदेव प्रयोजनं अस्यास्तीति प्रशंसितुमभिधीयते । दधिग्रहस्य तु सोमाङ्गतैव प्रयोजनमिति । भङ्गित्वाच्च अन्तरायस्य । भङ्गी चान्तरायः अनित्यो नित्यप्रशंसार्थं संकीर्त्यते । तस्मान्नैष दोषः । नित्य एव दधिग्रह इति ।

टुप्-- नित्य एव स्यात् । कुतः ? निमित्तसंयोगाभावात् । सप्तम्या हि निमित्तमुच्यते । यद्वृत्तेन वा यदिशब्देन वा । इह तु एषामश्रवणम् । अत आह– न चैवं शब्दोऽस्ति यो निमित्तं प्रतिपादयतीति । निमित्तं

ज्योतिष्टोमापूर्वमेव । अतो यदा ज्योतिष्टोमस्तदा निमित्तस्य विद्यमानत्वात् ग्रहणम् । अनित्यस्य च (अन्तरायस्य) अर्थेनेति पूर्वमुत्तरेण न संबध्यते । न चेदृक् वचनमस्ति, अन्तरायः कार्य इति, येन कर्म गृह्येत तच्चोभयमपि नास्तीत्युक्तमेव ।

शा— ‘ **देवताऽन्तरितो यागो निमित्तेऽयं विधीयते । तस्मान्नैमित्तिकः, सत्यं नित्योऽपि ज्येष्ठशब्दतः ॥ तस्मादुभयरूपः स्यात् नन्वेवं नित्य एव सः । न तु नैमित्तिकः; कस्मान्निमित्तत्वाश्रुतत्वतः ॥** ’ अर्थवादमात्रमन्तरायश्रवणम्, इति नित्य एव स्यात् ।

सोम— आमनहोमानां फलश्रुतिसंयोगाभावात् फलार्थत्वाभावेऽपि दधिग्रहस्य निमित्तश्रुतिसंयोगात् नैमित्तिकत्वं इति प्रत्यवस्थानात् संगतिः । अन्तरितः यागात् बहिष्कृतः विस्मृतः । आवृश्च्येते द्रुह्येते । सूत्रे श्रुतिसंयोगात् देवताऽन्तरायनिमित्तश्रुतिसंयोगादित्यर्थः ।

वि-- ‘ नित्यनैमित्तिकत्वे वा नित्यतैव दधिग्रहे ।, देवान्तरायाज्ज्यैष्ठ्याच्च स्यादस्योभयरूपता ॥, निमित्तत्वद्योतिनोऽत्र यदिशब्दादयो नहि । अतोऽस्य न निमित्तत्वं केवला नित्यतोचिता ॥ ’

भाट्ट-- सोमे ‘ यां वै कांचित् अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात् ’ इति दधिग्रहो नैमित्तिक एव । यद्यपि चायं यच्छब्दो न निमित्तत्वप्रतिपादकः, देवतापदसमभिव्याहृतस्य अन्तरायनिष्ठनिमित्तत्वाप्रतिपादकत्वात्, देवतायाश्च अन्तरायान्विताया नित्यायाः स्वरूपेण निमित्तत्वायोगाच्च, तथापि देवताऽन्तरायनिमित्तदोषपरिहारफलत्वावगमात्, तस्य च कादाचित्कत्वान्नैमित्तिकत्वम् । अर्थवादान्वयार्थं पदान्तराध्याहारस्यावश्यकत्वाद्वा नैमित्तिकत्वम् । ‘ज्येष्ठो ह वा एष ग्रहाणां यद्दधिग्रहः’ इति तु वैगुण्यपरिहारार्थत्वेनापि श्रेष्ठत्वादुपपन्नम् । इति प्राप्ते, न तावदार्थवादिकं फलं पर्णमयीन्यायविरोधात् । अर्थवादान्वयस्तु यत्र देवताभावे प्रधानस्यैव लोपापत्तेः तन्निमित्तकमपि वैगुण्यं परिह्रियते, तत्र इतराङ्गवैगुण्यपरिहारे प्रधानसाद्गुण्ये वा का संभावनेत्येवं नानुपपन्नः । न च अन्तरायजनितवैगुण्यध्वंसस्य फलत्वेन तं प्रत्येव आर्थवादिकस्य जनकत्वस्य कल्पनयोपपत्तौ द्वारीभूतादृष्टांशकल्पने गौरवमिति वाच्यम्, ज्येष्ठत्वसंस्तवस्य आञ्जस्यानुपपत्तेः, पक्षद्वयेऽपि अन्यतरार्थवादस्य अनाञ्जस्यावश्यकत्वेन प्रकरणपाठस्य पाक्षिकत्वपरिहारार्थं अन्तरायार्थवादस्यैव तदौचित्याच्च । लाघवस्य प्रमाणानुग्राहकत्वेन प्रमाणविरोधे अकिञ्चित्करत्वात् । अतो देवताऽन्तरायनिमित्तवैगुण्यस्य दधिग्रहेण परिहर्तुमशक्यत्वान्नित्यमेव अङ्गं दधिग्रहः ।

मण्डन—‘ नित्यमियेष दधिग्रहहोमम् । ’ सूत्रकारः ।

शंकर—‘ नित्य एव दधिग्रहः । ’

⧗ दधिग्रहविकारः आज्यसोमग्रहौ कर्मान्तरम् ॥

दधिग्रहमेव प्रकृत्याम्नातम् ‘ आज्यग्रहं गृह्णीयात् तेजस्कामस्य, सोमग्रहं गृह्णीयाद् ब्रह्मवर्चसकामस्य ’ इति । नित्यत्वेन दध्नः करणत्वेन प्राप्तौ तदपवादेन तद्यागमाश्रित्य फलाय गुणविधी एतौ इन्द्रियकामवाक्यवत् । इति प्राप्ते, ‘ दध्नेन्द्रियकामस्य ’ इत्यत्र दध्नेति तृतीयया गुणस्यैव फलभावनाकरणत्वप्रतीतेः गुणफलसंबन्धविधानेऽपि आज्यसोमयोरिह ग्रहपदेन समस्तयोः तत्रैव करणत्वेन धात्वर्थस्यैव फलभावनाकरणतया दधिग्रहविकृतिभूतयोः काम्यग्रहयोः कर्मान्तरयोरेव इमौ विधी । संकर्ष. ३।३।९.

⧗ दधिग्रहविकारे सोमग्रहे न सोमधर्माः ॥

दधिग्रहविकारेऽपि सोमग्रहे सोमधर्मा भवेयुः । ‘ सोमं क्रीणाति ’ इत्यादिसोमविधिषु अपूर्वसाधनसोमोद्देशेन धर्मविधानात् । उद्देश्यताऽवच्छेदकस्य विधेयव्याप्यत्वनियमात् । इति प्राप्ते, ‘ सोमेन यजेत ’ इति विधिगम्यापूर्वसाधनत्वस्यैव उद्देश्यताऽवच्छेदकतया प्रकृतित एव धर्मप्राप्तेः यागस्य कथम्भावानाकाङ्क्षतया च न तत्र सोमधर्माः । संकर्ष. ३।३।११.

⧗ दधिग्रहविकारे सोमग्रहे सोमधर्माभावेऽपि अभिषवस्याक्षेपः ॥

उक्तन्यायेनैव अभिषवस्यापि अप्राप्तत्वात् सोमलतांशुभिरेव यागः कार्यः । इति प्राप्ते, चतुःस्रक्तिना पात्रेण ग्रहणस्य प्रकृतितः प्राप्तत्वात् तस्य च प्रथमान्त्यन्यायेन द्रवद्रव्यसाधनत्वेन व्यवस्थितत्वात्, पात्रवशादेव प्रकृतावपि

सान्द्रतरदध्न एव करणत्वेन नियमयितुं युक्तत्वेन आर्थिकत्वाभावात् चोदकतोऽपि द्रवद्रव्याधारत्वद्वारैव पात्रप्राप्तेरभिवस्याक्षेपः । **संकर्ष.** ३।३।१२.

* **दधिग्रहविकृतिभूतौ** काम्यौ कर्मान्तरभूतौ सोमग्रहाज्यग्रहौ । **संकर्ष.** ३।३।९.

⧗ **दधित्रापुषं प्रत्यक्षो ज्वर इति न्यायः** । ज्वरनिमित्तमिति गम्यते । (दधिसहिते त्रपुसे नाम फले भक्षिते धातुवैषम्योत्पत्त्या ज्वरः संजायते) । **साहस्री.** १९४.

* **दधिद्रव्यकत्वं** इष्टिप्रकृतिलिङ्गम् । **बाल.** पृ. ११९.

* **दधिन्यायेन** महाव्रते काम्येन 'अग्निं नरो दीधितिभिः' इति आज्यशस्त्रार्थे सूक्तप्रयोगेण पुरुषार्थेन क्रतुरपि निष्पद्यते इत्येकस्यैव सूक्तस्य चोदकप्रत्यक्षवचनाभ्यां उभयार्थत्वमविरुद्धम् । संयोगपृथक्त्वन्यायः द्रष्टव्यः । **ऐआसा.** १।१।२।२२. * नहि अत्र ('त्रिवृदग्निष्टुदग्निष्टोमः तस्य वायव्यासु' इत्यत्र) **दधिन्यायेन** (४।३।३।५–७) गुणस्योत्पत्तौ अन्वययोग्यत्वम् । **कौ.** २।२।१२।२६ पृ. २८०, * रेवतीमात्रं प्राप्ताग्निष्टोमस्तोत्रोत्पत्त्यनुवादेन विधेयं फलोद्देशेन यागविनियोगश्च इति वाक्यभेदतादवस्थ्यात् दधिन्यायेन अत्र लाघवात् गुणफलसंबन्धविधिरेव (पूर्वपक्षे) । २।२।१२।२६ पृ. २८०. * लाघवात् गुण एव रेवत्यधिकरणकवारवन्तीयाख्यः रेवत्याख्य एव वा अप्राप्तत्वात् फलोद्देशेन विधियते इति द्वितीयः पूर्वपक्षः । अतो दधिन्यायेन गुणफलसंबन्ध एव युक्तः । **भाट्ट.** २।२।१२.

* **दधिपयसी**— इज्यार्थे प्रणीताधर्मानुपलभेते । (अभ्युदितेष्टौ यागार्थयोरपि दधिपयसोः सह श्रपयति इति प्राकरणिकेन वाक्येन तण्डुलैः सह श्रपणविधानेन प्रसङ्गात् प्रणीताकार्यापन्नत्वेन तद्धर्माः प्राप्नुवन्ति) । **वा.** २।२।१२।२७ पृ. ५५५.

⧗ **दधिपयसी प्रत्यक्षो ज्वरः इति न्यायः** । ज्वरजनकत्वात् दधिपयःसमाहारस्य ज्वरत्वेन व्यपदेशः । **संग्रहः.**

* **दधिपयसोः** इज्यार्थयोः प्रणीताकार्यश्रपणानङ्गत्वेऽपि श्रपणोपकारित्वात् तद्गतानां प्रणीताधर्माणां श्रपणाङ्गत्वोपपत्तिः । दधिपयसोः श्रपणापूर्वसिद्ध्यर्थत्वात् निरङ्गयोश्च अपूर्वसाधनत्वायोगात् श्रपणापूर्वसाधनीभूतदधिपयोऽर्थतया चोदकेन प्रणीताधर्माणां विधानात् श्रपणाङ्गत्वं युक्तम् । **सु.** पृ. १४९०. * दधिपयसोः चतसृभिः कुम्भीभिरेव साकंप्रस्थायीये होमे कृते सति हविःशेषाभावात् स्विष्टकृदादिशेषकार्यलोपः । **वि.** ३।५।२.

⧗ **दधिपयसोः पशुकामेष्टौ प्रदेयधर्मा नानुष्ठेयाः ॥**

अपनयो वाऽर्थान्तरे विधानाच्चरुपयोवत् । ९।४।११।४३ ॥

भाष्यम्— अस्ति पशुकामेष्टिः 'यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् । ये क्षोदिष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुम्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्' इति । शृते चरुम्, दधंश्चरुं इत्येतदुदाहरणम् । अत्र संदेहः किं शृते दधनि च इज्यार्था दधिपयोधर्माः कर्तव्याः, उत नेति । किं प्राप्तम् ? पूर्वेणाधिकरणेन कर्तव्या इति । समाना हि श्रुतिर्भवतीति । सिद्धवच्च शृतोपदेशः, सत्सु प्रदानार्थेषु धर्मेषूपपद्यते । **एवं प्राप्ते, ब्रूमः** । अपनयो वा धर्माणां भवेत् । अर्थान्तरे हि एतत् पयो विधीयते दधि च श्रयणार्थे, न प्रदानार्थे, सप्तमीसंयोगात् । चरुपयोवत् । यथा प्रायणीये चरौ पयसि प्रदेयधर्मा न क्रियन्ते, सप्तमीसंयोगात् । एवमिहापि ।

लक्षणार्था शृतश्रुतिः । ४४ ॥

भाष्यम्— अथ यदुक्तं सिद्धवत् शृतोपदेशो भवतीति, नैष दोषः । श्रयणेन द्रव्यं लक्षयिष्यति । अर्थप्राप्तं हि चरौ श्रयणम्, तत्संबद्धं लक्ष्यते । श्रयणवति द्रव्ये चरुरिति । तस्मात् प्रदेयधर्मा न भवेयुरिति ।

सोम—पूर्वापवादात् संगतिः । सूत्रार्थस्तु—प्रदेयत्वापनयो वा चरुपयोवत् प्रणीताकार्ये विधानात् इति ।

वि— 'स न्यायः पशुकामेष्टौ प्रायणीयनयोऽथवा ।,
तुल्यश्रुतित्वात् स्यादाद्यो, ऽपूर्वकर्मत्वतोऽन्तिमः ॥'
प्रणीताधर्मा एवात्र कार्याः ।

भाट्ट—'यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्, ये क्षोदिष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुम्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्' इत्यत्रापि यद्यपि अपनयविध्यभावात् कर्मान्तरत्वं षष्ठे उपपादितम्, तथापि अभ्युदितेष्टितुल्यश्रुतित्वात् वत्सापाकरणश्रुतिबलाच्च सप्तम्यर्थाविवक्षया प्रदेयत्वावगतेः प्रदेयधर्मान् मन्वानस्योत्तरम्। वत्सापाकरणविधिबलेन हट्टस्थपयोव्यावृत्तावपि अधिकरणत्वाविवक्षायां प्रमाणाभावात् प्रदेयत्वानुपपत्तेर्न प्रदेयधर्माः आदित्यचरुवत्। ९।४।१०.

मण्डन—'न ते स्युः पशुकामेष्टौ।' ते प्रदेयधर्माः।

शंकर—'पशुकामेष्टौ तु नैवम्।' १२. एवं अभ्युदयेष्टाविव प्रदेयधर्माः न।

* **दधिपयसोः** प्रणीताधर्मानुष्ठानं (चन्द्रस्य-) अभ्युदितेष्टौ। भा. ९।२।१४।४३–४६, * दधिपयसोः प्रदेयधर्मा अनुष्ठेयाः (चन्द्रस्य) अभ्युदितेष्टौ। ९।४।१०।४१–४२. * दधिपयसोः सौविष्टकृताग्नेयपूर्वोत्तरत्वयोरबाधात् तन्त्रता। 'अग्नये भ्राजस्वते पुरोडाशमष्टाकपालम्' इत्यादिना विहितायां चक्षुष्कामेष्टौ। संकर्ष. ४।४।९.

* **दधियागः** पशुकामेष्टौ सप्तयागगतः सांनाय्यस्य विकृतिः। वि. १२।२।७ वर्णकं २.

* **दधिविशिष्टस्य** होमस्य फले विधौ स्वपदार्थस्यैव अन्यान्वयविधानात् संनिकृष्टविध्युपपत्तिः। सु. पृ. ८४४.

* **दधिहोमसंबन्धो** वाक्येन विधीयते इति पूर्वाधिकरणभाष्योक्तेन न्यायेन रेवतीषु इति सप्तमीश्रुतेः (२।२।११) अधिकरणभूताभ्यो रेवतीभ्यः फलं इत्यवगमात्। सु. पृ. ८५४.

* **दन्तधावनं** संस्कारः न फलप्रयुक्तः, तत्र फलश्रुतिरर्थवादः, तच्च क्रत्वर्थं याजमानं ज्योतिष्टोमे। भा. ४।३।१।१–४, * दन्तधावनस्य 'दतो धावते' इत्यस्य ज्योतिष्टोमे 'मेधमेवमुपैति' इति फलश्रुतिः फलार्थवादः, न तु फलविधिः। ४।३।१।१–३.

* **दब्धिमन्त्रः** 'दब्धिरस्यदब्धो भूयासममुं दभेयं' इति मध्यवर्ती सन् मध्यवर्तिनः उपांशुयाजस्याङ्गं यथासंख्यपाठात् दर्शपूर्णमासयोः। दब्धिः घातुकमायुधम्। वि. ३।३।५.

* **दमयन्ती** नलस्य पत्नी। वा. ३।४।१।९.

* **दरिद्रस्यापि** धनार्जनोत्तरमधिकारः कर्मसु। वि. ६।१।८.

⧗ **दर्पणप्रतिबिम्बन्यायः**। अयं न्यायः सुरेश्वराचार्येण विवृतः। तथाहि 'अन्तरस्मिन्निमे लोका अन्तर्विश्वमिदं जगत्। बहिर्वन्मायया भाति दर्पणे प्रतिबिम्बवत्॥' इति। साहस्री. ९०६.

⧗ **दर्पणमुखावलोकनन्यायः**। अयं यादृशं मुखं दर्पणे पश्यति, तादृशमेव दृश्यते इति विषये प्रवर्तते। साहस्री. ८८६.

* **दर्भाः** दशविधाः। ('कुशाः काशा यवा दूर्वा उशीराश्च सकुन्दकाः। गोधूमा व्रीहयो मौञ्जा दश दर्भाः सबल्वजाः॥')। (धर्मसिन्धुः श्रावणे)। 'कुशः काशः शरो गुन्द्रो यवा दूर्वाऽथ बल्वजाः। गोकेश—मुञ्ज—कुन्दाश्च पूर्वाभावे परः परः॥' निर्णयसिन्धुः (३।२ श्राद्धवस्तूनि इत्यत्र)। वि. ३।२।१. * दर्भैः वेदिस्तरणार्थेभ्यो भिन्नैः विधृती पवित्रं च कर्तव्यम्। भा. ३।८।१७।३२, * न तैरेव दर्भैः प्रयोगान्तरमपि क्रियते। ११।३।४।६. * दर्भाणां प्रागग्रत्वमुदगग्रत्वं वा दैवे कर्मणि। पैतृके कर्मणि तु दक्षिणाग्रत्वम्। वि. ३।४।४. * दर्भाणां लवने प्रतिलवनं 'बर्हिर्देवसदनं दामि' इति लवनमन्त्रस्य आवृत्तिः दर्शपूर्णमासयोः। भा. ११।४।१४।४४–४५.

* **'दर्भपिञ्जूलैः पावयति'** अत्रोत्पत्तिवाक्यगताऽपि संख्या कर्मगता न भवति, तेन कर्मभेदो नास्ति तत्र। सोम. २।२।७, * दर्भपिञ्जूलानां एकविंशतेः समुदायेन पावनस्यानुसमयः। भा. ५।२।३।४–५.

* **दर्भमन्त्रयोः** (दर्भस्य मन्त्रस्य च) प्राकृतयोः वाजपेये माहेन्द्रस्तोत्रोपाकरणसाधनभूतेन रथघोषादिना बाधः। भा. १०।४।१।१–२ वर्णकं ३.

* **'दर्भमयं परिदधाति'**। दर्भमयादिवस्त्रं कार्पासादिवस्त्रे सत्यपि परिधेयं अपूर्वार्थत्वात्। वि. ६।८।७. * दर्भमयं वासः पत्नी परिधत्ते महाव्रते। तस्य प्राकृतेन अहतवाससा समुच्चयः। भा. १०।४।७।१३–१५.

*दर्विः लौकिकानां तावदाचारगृहीता। 'न्यग्बिलया मूलदण्डया दर्व्या जुहोति' इति। भा. ८।४।४।६.

*दर्विहोम इति नामधेयं जुहोतिचोदनानामेव, न तु यजतिचोदनानाम्। होमशब्दः जुहोतिचोदनासु मुख्यः। वि. ८।४।३.

⧗ दर्विहोमो यज्ञाभिधानं होमसंयोगात्। ८।४।१।१॥

'यदेकया जुहुयात् दर्विहोमं कुर्यात्' इति दर्विहोमशब्दः श्रुतः। स किं गुणविधिः, उत कर्मनामधेयं इति विचारे सिद्धान्तमाह। दर्विहोमः दर्विहोमशब्दः यज्ञाभिधानं यज्ञस्य नामधेयं कर्मनामधेयं स्यात्, होमसंयोगात्। होमशब्दोऽत्र श्रूयते। तत्प्रधानश्चायं समासः। दर्विशब्द उपसर्जनम्। अथवा जुहुयादिति कर्म उच्यते, तेन समुच्चितोऽयम्। तस्मात् कर्मनामधेयं इति सिद्धान्तः। 'यदेकया जुहुयात्' इति विषयवाक्ये एकया ऋचा इत्यर्थः। पुरोऽनुवाक्यायाज्यारूपे च द्वे ऋचौ विहिते तत्र।

द्रव्योपदेशाद्वा गुणाभिधानं स्यात्। ५॥

दर्विहोमशब्दः कर्मनामधेयं इति सिद्धान्तिना उक्ते पूर्वपक्षी आह। वाशब्दः सिद्धान्तं व्यावर्तयति। दर्विहोमशब्दो न कर्मनामधेयम्, किंतु गुणाभिधानं गुणस्याभिधानं गुणनामधेयं स्यात् द्रव्योपदेशात् दर्विरूपस्य द्रव्यस्य होमगुणस्य उपदेशात्। दर्व्या होमो दर्विहोमः। दर्वीहोमक्रियायां गुणः करणत्वात्। तस्मात् गुणविधिः। इति पूर्वः पक्षः।

पञ्चमादिनवमान्तानि सूत्राणि प्रथमाधिकरणस्यैव शेषभूतानि। द्वितीयतृतीयाभ्यां सूत्राभ्यां एकं अन्तरागर्भिण्यधिकरणम्, चतुर्थेन तु सूत्रेण द्वितीयं अन्तरागर्भिण्यधिकरणम्।

न लौकिकानामाचारग्रहणाच्छब्दवतां चान्यार्थविधानात्। ६॥

दर्विहोमशब्दो गुणविधिः इति पूर्वपक्षिणा उक्ते सिद्धान्ती आह। दर्विहोमशब्दो न गुणविधिः। लौकिकानां कर्मणामर्थे आचारेण शिष्टाचारेण दर्व्याः ग्रहणात्। ननु श्रौते कर्मणि विधास्यते, न, शब्दवतां श्रुतिमतां श्रुतिविहितानां कर्मणां कृते च अन्येषां अर्थानां स्रुवजुहूचमसादीनां पात्राणां विधानात् नास्ति दर्व्याः अपेक्षा। लौकिके तु कर्मणि आचारसिद्धैव, इति नायं गुणविधिः।

दर्शनाच्चान्यपात्रस्य। ७॥

ननु उत्तरवेदिव्याघारणरूपदर्विहोमार्थं श्रौतेऽपि कर्मणि दर्वी विधातव्या इति संभवति गुणविधिः इति। मैवम्। तत्र अन्यस्यैव पात्रस्य दर्शनात् न दर्वी विधातव्या। 'भूतेभ्यस्त्वा इति ऊर्ध्वं स्रुचमुद्गृह्णाति' इति अन्यदेव पात्रं दृश्यते। तस्मान्न गुणविधिः।

तथाऽग्निहविषोः। ८॥

ननु अग्नेः कार्ये अधिकरणत्वेन दर्व्याः विधिः संभवति। हविषोऽर्थे च प्रदेयद्रव्यत्वेन दर्व्याः विधिः संभवति। दर्व्यां होमः, दर्व्याः होमः इति च क्रमेण समासः इति चेत्। मैवम्। यथा उत्तरवेदिव्याघारणार्थे तथा अग्निहविषोः कार्येऽपि न दर्व्याः विधिः संभवति। 'यदाहवनीये जुहोति' इति होमाधिकरणं आहवनीयो विहितः, न तत्र दर्वी संभवति। हविश्च चरुपुरोडाशादि अन्यदेव विहितम्, इति न तत्रापि दर्व्याः संभवः। तस्मान्न अग्निहविरर्थेऽपि दर्व्याः विधिः।

उक्तश्चार्थेऽसंबन्धः। ९॥

दर्विहोमशब्दो गुणविधिः। अग्नेः कार्ये दर्व्याः विधानसंभवात् इति चेन्नेत्याह सिद्धान्ती अर्थे अग्नेः कार्ये होमे आहवनीयादन्यस्य द्रव्यस्य असंबन्धः न संबन्धः संभवति इति असंबन्ध उक्तोऽस्माभिः। तस्मात् अग्निकार्ये दर्व्याः नोपदेशः। तस्मात् दर्विहोमशब्दः न गुणविधानार्थः किन्तु कर्मनामधेयं इति सिद्धान्तः। अत्र प्रथमेऽधिकरणे प्रथमं पञ्चममारभ्य नवमान्तानि चेति षट् सूत्राणि भवन्ति। के.

⧗ दर्विहोमा अपूर्वा एव, न सोमस्य वा नारिष्ठहोमानां वा पत्नीसंयाजानां वा पिष्टलेपफलीकरणहोमयोर्वा विकृतिः॥

तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात्। ८।४।४।१०॥

भाष्यम्— दर्विहोमशब्दः कर्मनामधेयमित्युक्तम्। तत्र चिन्त्यते किमपूर्वा दर्विहोमाः, उत कुतश्चित् धर्मग्राहिण इति। किं प्राप्तम्? नापूर्वा इति। कुतः?

इतिकर्तव्यताऽविधेः । अविहितेतिकर्तव्यताकं कर्म विहितेतिकर्तव्यताकात् धर्मान् गृह्णाति इत्युक्तम् । अविहितेतिकर्तव्यताकाश्चामी । तस्मात् पूर्ववन्तः इति । यदा एतदेवम्, तदा एतदापतति, किंपूर्वा इति । अत्रोच्यते । तस्मिन् खलु दर्विहोमे सोमः प्रवर्तेत, सौमिको विध्यन्तः स्यात् । कुतः ? अव्यक्तत्वात् । अव्यक्तचोदनः सोमः (स्वाङ्गत्वेन अविहितदेवताकः) । अमी अपिच अव्यक्तचोदनाः ‘भिन्ने जुहोति’ इति । अतः चोदनासामान्यात् सौमिको विध्यन्त इति ।

न वा, स्वाहाकारेण संयोगाद्, वषट्कारस्य च निर्देशात् तन्त्रे तेन विप्रतिषेधात् । ११ ॥

भाष्यम्—वाशब्दः पक्षं व्यावर्तयति । नात्र सौमिको विध्यन्तो न्याय्यः । किं कारणम् ? स्वाहाकारेण संयोगात् । स्वाहाकारेण संयुक्ता दर्विहोमाः । ‘पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा’ इति । किमतः ? वषट्कारस्य निर्देशात् तन्त्रे तेन च विप्रतिषेधः । तन्त्रे च सौमिके वषट्कारो निर्दिष्टः । तेनास्य विप्रतिषेधः, उभयोः प्रदानार्थत्वात् । यदि सौमिको विध्यन्तः, ततो वषट्कारेण भवितव्यम् । तत्रैतत् स्वाहाकाराम्नानं अनर्थकं स्यात् । अथ विकल्पः क्रियते, तथापि उभयोः पक्षे बाधः । अथ तु अपूर्वा दर्विहोमाः, नैष विरोधो भविष्यति । तस्मात् अपूर्वाः ।

शब्दान्तरत्वात् । १२ ॥

भाष्यम्— शब्दान्तरं च यजतिशब्दात् जुहोतिशब्दः । यजतिचोदनश्च सोमः, दर्विहोमाः पुनर्जुहोतिचोदनाः । चोदनासामान्येन च धर्मप्राप्तिरिष्यते । तस्मादपि अयुक्ता सौमिकी धर्मप्राप्तिः । ननु अव्यक्तत्वात् चोदनासामान्यमुक्तम् । अत्रोच्यते । सामान्ये अव्यक्तत्वे यजतिशब्दो विशेषलिङ्गम् । तेन यजिमतीषु अव्यक्तासु धर्मनियमः । यथा समाने औषधगुणत्वे देवतैकत्वेन विशेषलिङ्गेन सौर्यकर्मणि आग्नेयविध्यन्त इति ।

लिङ्गदर्शनाच्च । १३ ॥

भाष्यम्— लिङ्गदर्शनाच्च एतत् विज्ञायते ‘नात्र सौमिको विध्यन्तः’ इति । औदुम्बरीहोमे हि स्वाहाकारं विधाय आज्यविधिपरे वाक्ये दर्शयति ‘घृतेन द्यावापृथिवी आपृणेथामिति अन्तरा कर्णौ जुहोति, आ मूलादन्ववस्रावयति, भूमिगते स्वाहा करोति’ इति । यदि अत्र सौमिको विध्यन्तः स्यात् वषट्कारस्ततो भवेत्, न स्वाहाकारः ।

उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यम्, तत्राविप्रतिषिद्धा पुनःप्रवृत्तिर्लिङ्गदर्शनात्, पशुवत् । १४ ॥

भाष्यम्— लिङ्गदर्शनस्य परिहार उच्यते । यदुक्तं औदुम्बरीहोमे सिद्धवत् स्वाहाकारस्य दर्शनात् न सौमिको विध्यन्तः इति, अत्र ब्रूमः । उत्तरार्थस्तु स्वाहाकारः यथा साप्तदश्यम् । तद्यथा साप्तदश्यं अनारभ्याधीतम् ‘सप्तदश सामिधेनीरन्वाह’ इति । अनारभ्यवादानां प्रकृत्यर्थत्वात् दर्शपूर्णमासौ आगतम् । ततः प्राकरणिकेन पाञ्चदश्येन बाधितं सत् विकृत्यर्थं जातम् । एवमयं स्वाहाकारः अनारभ्याधीतः ‘स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते’ इति । तेनैव न्यायेन प्रकृतिं निविविक्षुः सोमं दर्शपूर्णमासौ च । ततस्तथैव वषट्कारेण उपरुद्धः तद्वर्जं अन्यानि प्रदानानि उपसंक्रामति । तत्र अविप्रतिषिद्धा सोमधर्मप्रवृत्तिः । पशुवत् । तद्यथा पशौ साप्तदश्ये श्रूयमाणे न दार्शपौर्णमासिकी तत्र प्रवृत्तिर्विप्रतिषिध्यते वाचनिकत्वात् साप्तदश्यस्य, एवमिहापि वाचनिकत्वात् स्वाहाकारं प्रति लिङ्गदर्शनात् न सौमिकधर्मप्रवृत्तिर्विप्रतिषिध्यते । पुनःशब्दश्च अनर्थकः यथा ‘किं पुनः इदम्’ इति ।

अनुत्तरार्थो वाऽर्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् । १५ ॥

भाष्यम्— यदुक्तं ‘उत्तरार्थः स्वाहाकारः’ इति, तन्न । कुतः ? अनुत्तरार्थः अर्थवत्त्वात् । प्रकृतावेव अस्य अर्थवत्त्वं नारिष्ठहोमेषु, पार्वणहोमयोश्च ‘पूर्णमासाय सुराधसे स्वाहा’ इति । अनर्थकत्वाद्धि प्राकृतस्य उपरोधः स्यात् । यदि प्रकृतौ अनर्थकः स्यात् स्वाहाकारः, ततः प्राकृतस्य वषट्कारस्य विकृतौ प्राप्तस्य अनारभ्यवादेन स्यादुपरोधः, वषट्कारबाधः इत्यर्थः, न तु अस्य आनर्थक्यम् । तस्मात् नोत्तरार्थः । न चेत् उत्तरार्थः, लिङ्गमेव एतद्भवति असोमपूर्वत्वे दर्विहोमानाम् ‘भूमिगते स्वाहा करोति’ इति ।

न प्रकृतावपीति चेत् । १६ ॥

भाष्यम्-- एवं चेत् पश्यसि 'नारिष्ठहोमेषु पार्वणहोमयोश्च स्वाहाकारस्य निवेशः' इति, प्रकृतावपि नारिष्ठहोमादौ नास्य निवेशो घटते । तत्रापि वषट्कार एव प्राप्नोति । स हि अविशेषेण दर्शपूर्णमासयोर्विहितः 'द्व्यक्षरो वषट्कारः, एष वै प्रजापतिः सप्तदशो यज्ञेऽन्वायत्तः' इति । ननु स्वाहाकारोऽपि प्रत्यक्षं पठितः । सत्यं पठितः, वषट्कारस्तु विहितः अतश्चोदनेति । 'नास्य यज्ञो व्यथते, प्रजापतौ प्रतितिष्ठति' इति स्वाहाकारं पाठेन प्राप्तं बाधते, पाठे हि आनुमानिको विधिः प्रत्यक्षेण विधिना बाध्यते । न चेत् तत्रापि निवेशः, उत्तरार्थं एव स्वाहाकारो भवति विकृत्यर्थः ।

उक्तं समवाये पारदौर्बल्यम् । १७ ॥

भाष्यम्— अत्राह नैतद्युक्तं 'वषट्कारेण स्वाहाकारो बाध्यते' इति । कुतः ? यतः उक्तं श्रुत्यादीनां समवाये परस्य दुर्बलत्वम् । इह च वाक्यप्रकरणयोः संनिपातः । प्रकरणेन वषट्कारः प्राप्नोति नारिष्ठहोमेषु, तन्मन्त्रपदैः एकवाक्यत्वात् स्वाहाकारः । वाक्यं च प्रकरणात् बलीयः । ननु स्वाहाकारस्य उपरिष्टात् प्रदानार्थो वषट्कारः प्रयोक्ष्यते (स्वाहावौषट् इति) । न खलु स्वाहाकारेणैव प्रदानं निर्वर्तितम्, कथमविहितः प्रदानार्थे स्वाहाकारः प्रदानार्थं निर्वर्तयिष्यति । (उत्तरम्-) विहितश्च । कथम् ? 'स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते' इति । ननु उभयोः स्वाहाकारवषट्कारयोः प्रकृतौ आम्नानात् अनारभ्यवादस्य आनर्थक्यम्, अत उच्यते, प्रदानार्थतामनयोर्विधास्यति । तस्मात् न सोमप्रकृतयो दर्विहोमाः ।

तच्चोदना वेष्टेः प्रवृत्तत्वात् तद्विधिः स्यात् । १८ ॥

भाष्यम्— वाशब्दः पक्षान्तरपरिग्रहे । तच्चोदना वा । तत् इत्यनेन दर्विहोमाः प्रतिनिर्दिश्यन्ते । जुहोतिचोदना ये दर्शपूर्णमासयोः अङ्गकर्मविशेषाः, ते दर्विहोमेषु प्रवर्तेरन् । के पुनस्ते ? नारिष्ठहोमाः । कस्मात् कारणात् ? ते हि प्रवृत्तधर्माणः सर्वेष्टिषु सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः । यस्य च यो धर्मः प्रायेण दृष्टः, स तस्य अदृश्यमानोऽपि अनुमीयते । यथा यः परार्थान् प्रायेण करोति, अन्यस्मिन्नपि परार्थकरणे स एव संभाव्यते । तस्मात् तेषां प्रवृत्तिः ।

शब्दसामर्थ्याच्च । १९ ॥

भाष्यम्— शब्दसामर्थ्यं च चोदनासामान्यं दर्विहोमानाम् । नारिष्ठहोमेऽपि हि जुहोतिचोदना 'नारिष्ठान् जुहोति' 'मिन्ने जुहोति' इति । चोदनासामान्यात् धर्मप्राप्तिः ।

लिङ्गदर्शनाच्च । २० ॥

भाष्यम्— लिङ्गं चैतमर्थं दर्शयति यथा नारिष्ठहोमपूर्वत्वं दर्विहोमानामिति । किं लिङ्गं भवति ? अग्निहोत्रे श्रूयते 'यदि कीटोऽवपद्येत, अन्तःपरिधि निनयेत्' इति । तथा अग्नौ श्रूयते 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति । परिधयो वेदिश्च अङ्गप्रधानार्थत्वात् नारिष्ठहोमाङ्गम् । यदि तेषां धर्माः प्रवर्तेरन्, ततः एतत् दर्शनमुपपद्यते । तस्मात् तेषां प्रवृत्तिः ।

तत्राभावस्य हेतुत्वाद् गुणार्थे स्याददर्शनम् । २१ ॥

भाष्यम्— यदेतत् गुणार्थे नारिष्ठहोमार्थे दर्शनमुपदिष्टं नारिष्ठहोमानां प्रवृत्तौ इत्यर्थः, अदर्शनं तत्, असाधकमित्यर्थः ; कुतः ? तत्र अभावस्य हेतुत्वात् त्र्यम्बकेषु 'अप्रतिष्ठिता वै त्र्यम्बका इत्याहुः । नेध्माबर्हिः संनह्यते, न प्रयाजा इज्यन्ते, नानुयाजा इज्यन्ते न सामिधेनीरन्वाह' इति अप्रतिष्ठितत्वं त्र्यम्बकाणां प्रतिज्ञाय तदुपपादनार्थं इध्मादीनामभावो हेतुत्वेनोपदिश्यते । यदि च नारिष्ठहोमाः प्रवर्तेरन्, ततः अङ्गप्रधानार्थत्वात् इध्माबर्हिषोः सामिधेनीनां च त्र्यम्बकेषु भाव एव स्यात् । तत्रायं तदभावः असत्त्वात् हेतुत्वेन न युज्यते । तस्मात् नारिष्ठहोमानां अप्रवृत्तिः ।

विधिरिति चेत् । २२ ॥

भाष्यम्--इति चेत् पश्यसि 'दर्शनमेतत्' इति । अथ कस्मात् विधिर्न भवति ? नारिष्ठहोमप्रकृतित्वात् प्राप्तानामिध्मादीनां प्रतिषेधको विधिः सन् अपूर्वमर्थं विधास्यति, अनुवादः अप्रवृत्तिविशेषकरः अनर्थकः स्यात् । स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ।

न, वाक्यशेषत्वाद् गुणार्थे च समाधानं ननात्वे नोपपद्यते । २३ ॥

भाष्यम्—नायं विधिर्युज्यते । किं कारणम् ? अन्योऽत्र विधिराम्नातः 'आदित्यं घृते चरुं निर्वपेत् पुनरेत्य गृहेषु' इति, तस्य वाक्यशेषोऽयम् । कथं ज्ञायते ? तेन आकाङ्क्षितत्वात् । 'अप्रतिष्ठिता वै त्र्यम्बकाः' इति दोषमनुकीर्त्य इदं श्रूयते 'आदित्यं (अदितिदेवताकम्) घृते चरुं निर्वपेत् पुनरेत्य गृहेषु' इति 'इयं वा अदितिः, इयं प्रतिष्ठा, यदादित्यः अस्यामेव प्रतितिष्ठति' इति । तदेतत् तस्य दोषस्य परिहारार्थमिति विज्ञायते, अतस्तेन सह एकवाक्यतां याति । तन्मध्ये च ये इध्माद्यभाववचनाः, तेऽपि तच्छेषा एव समुच्चारणात् न्याय्याः । ते यदि विधयः कल्पेरन् पृथक् वाक्यानि भवेयुः, तत्र एकवाक्यत्वं बाध्येत । व्यवहितकल्पना च स्यात् । न च एषां विधायकत्वम्, अनुवादसरूपत्वात् । तस्मान्न विधयः । अथ कोऽत्र विशेषः, यत् 'समाने लिङ्गत्वे अन्तःपरिधिदर्शनं असाधकम्, इतरत् साधकम्' इति । विशेषं उपरिष्टात् वक्ष्यामः । (एवं दर्विहोमानां नारिष्ठहोमा न प्रकृतिरित्युक्तम्) ।

येषां वाऽपरयोर्होमस्तेषां स्यादविरोधात् । २४ ॥

भाष्यम्— येषां वा यागानां अपरयोः अग्न्योः होमः, तेषां प्रवृत्तिः स्यात् पत्नीसंयाजानामित्यर्थः । कुतः ? अविरोधात् । तत्र विरोधो नास्ति, यो नारिष्ठहोमानां प्रवृत्तौ उक्तः 'तत्राभावस्य हेतुत्वात्' इति । तेषां हि इध्माबर्हिः सामिधेन्यश्च नैवाङ्गम् । तदभावदर्शनं तत्र न विरुध्यते । प्रवृत्तिधर्माणस्तेऽपि जुहोतिचोदनाश्च 'सह पत्न्या जुहोति' इति । तस्मात् तेषां प्रवृत्तिः ।

तत्रौषधानि चोद्यन्ते, तानि स्थानेन गम्येरन् । २५ ॥

भाष्यम्— नैतत् युक्तम् । किं कारणम् ? यतः तत्र औषधानि चोद्यन्ते दर्विहोमे, यथा त्र्यम्बकेषु पुरोडाशः करम्भपात्राणि तण्डुलाः इत्येवमादीनि । तानि स्थानेन गम्येरन् । आज्यस्थानापत्त्या आज्यधर्माः प्राप्येरन् । ते न शक्याः तत्रानुष्ठातुम् । अनुष्ठीयमाना वा अप्राकृतकार्याः स्युः, तत्र चोदको बाध्येत । तस्मात् न तेषां प्रवृत्तौ किञ्चित् प्रयोजनमस्ति । याज्याऽनुवाक्ये अपि मन्त्रान्तरेण निवर्त्येते, वषट्कारः स्वाहाकारेण । (सूत्रद्वयेन पत्नीसंयाजप्रकृतित्वं निरस्तम् ।)

लिङ्गाद् वा शेषहोमयोः । २६ ॥

भाष्यम्— पिष्टलेपफलीकरणहोमयोर्वा प्रवृत्तिः स्यात् (दर्विहोमेषु) । कुतः ? लिङ्गात् औषधसामान्यात् । यश्च पत्नीसंयाजानां प्रवृत्तौ दोष उक्तो धर्माणामानर्थक्यम्, तदत्र नास्ति । तत्र औषधधर्मा निर्वपणादयः शक्याः कर्तुम् । तस्मात् तयोः प्रवृत्तिरिति ।

प्रतिपत्ती तु तौ भवतस्तस्मादतद्विकारत्वम् । २७ ॥

भाष्यम्— न तु एतदेवम् । कुतः ? यतः प्रतिपत्तिकर्मणी एतौ होमौ, दर्विहोमाश्च प्रधानकर्माणि, तेषां दूरतो भेदः । सामान्यतश्च (सादृश्येन च) धर्मप्राप्तिरिष्यते । यच्चोक्तम् 'औषधधर्माः शक्यास्तत्र कर्तुम्' इति, प्रतिपत्तित्वात् अप्रयोजकावेव निर्वपणादीनां धर्माणाम् । अतः तत्प्रकृतित्वं तेनैव न्यायेन नोपपन्नम् । नापि प्रयोजनवत् । तस्मात् एतदप्ययुक्तम् । एवं न कुतश्चिदपि दर्विहोमानां धर्मप्राप्तिर्युज्यते ; तस्मादपूर्वः ।

संनिपाते विरोधिनामप्रवृत्तिः प्रतीयेत, विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद्, वचनादतिदेशः स्यात् । २८ ॥

भाष्यम्— अथ कस्मात् उभयपक्षसाधनानामपि लिङ्गानां भावे अप्रवृत्तिरेव प्रतीयते, न पुनः प्रवृत्तिरिति । उच्यते । संनिपाते विरोधिनामेतेषां लिङ्गानां प्रवृत्तिः प्रत्येतुं न न्याय्या । कुतः ? विध्युत्पत्तिव्यवस्थानात् । विधीनामुत्पत्तिः पाठः, स च व्यवस्थितः, केचित् दर्शपूर्णमासयोः पठ्यन्ते केचित् सोमे । तेषां अर्थस्य अपरिणेयत्वम् । यत्र पठिताः, ततोऽन्यत्र परिणीयमानेषु प्रकरणं बाध्यते । तस्मात् अप्रवृत्तिः प्रतीयेत । तत्राह, किमेष एवोत्सर्गः, सर्वत्र अप्राप्तिरिति । एवं खलु प्राप्ते, उच्यते । वचनात् अतिदेशः स्यात् । यथा राष्ट्रभृतां उद्वाहकर्मसु । असति एवंविधे वचने अपूर्वा इति । अथ ये लिङ्गे अपदिष्टे 'यदि

कीटोऽवपद्येत, अन्तःपरिधि निनयेत्' 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति, तयोः कः समाधिः ? उच्यते। अन्यायपूर्वकत्वात् लक्षणया वादः स विज्ञायते। अन्तःपरिधिदेशे अन्तर्वेदिदेशे इति। परिधीनां वेदेश्च तत्राभावात्। 'यथा रजनी मे कण्डूयति, तिलको मे स्पन्दते' इति रागाभावे तिलकाभावे च तद्देशलक्षणया भवन्ति वक्तारः इति।

सोम— प्रासङ्गिकं परिसमाप्य अपवादविचारः प्रस्तूयते।

वि-- 'दर्विहोमे सोमधर्मा अपूर्वत्वमुता, ऽग्रिमः। अव्यक्तेर्, यज्यभावाच्च स्वाहोक्त्यादेरपूर्वता॥'

भाट्ट— तेषु अव्यक्तत्वसामान्येन सोमयागविकारत्वं अव्यक्तत्वं च उत्पत्तिवाक्ये देवताऽभावरूपम्, न तु स्वाङ्गतया देवताशून्यत्वम्, तथात्वे सिद्धान्ते दार्विहोमेषु देवताऽभावप्रसङ्गात्। अत एव उपांशुयाजविकारत्वमपि शक्यं वक्तुम्। अथवा होमत्वसामान्याधिक्यात् नारिष्ठहोमविकारत्वम्। अत एव अग्निहोत्रे 'यदि कीटोऽवपद्येत, अन्तःपरिधि निनयेत्' इति परिधिदर्शनम्। परिधेर्हि अङ्गप्रधानार्थत्वात् नारिष्ठहोमाङ्गत्वमपि सुलभमेव। तथा अग्नौ 'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति वेदिदर्शनं न नारिष्ठहोमविकारत्वसाधकम्। यत्तु मूले पत्नीसंयाजविकारत्वं शङ्कितम्, तत् तेषां यागत्वादुपेक्षितम्। यदि परमुपांशुयाजसाधारण्येन, तदा अस्तु पिष्टलेपफलीकरणहोमयोर्वा विकाराः। सर्वथा नापूर्वा दर्विहोमाः। इति प्राप्ते, द्रव्यदेवताऽऽदिसंनिपत्योपकारकाङ्गसामग्रीसाकल्यरूपकृत्स्नविधानत्वेन यावदुक्तेतिकर्तव्यतयैव निराकाङ्क्षत्वात्, सादृश्यस्य च विनिगमनाविरहेण अनियामकत्वात् अपूर्वा एव दर्विहोमाः, न प्रकृतिपूर्वाः। यत्तु परिधिवेदिदर्शनम्, तत् देशोपलक्षणतया अपि उपपन्नम्। एवं त्र्यम्बकहोमेषु औचित्येन 'नात्रेध्माबर्हिः संनह्यते न प्रयाजानूयाजा इज्यन्ते न सामिधेनीरन्वाह' इति स्तुतिरपि उपपद्यते। अतिदेशपक्षे स्वतन्त्रपर्युदासकल्पने विध्यन्तरैकवाक्यताभङ्गापत्तेः। सोमयागाद्यविकारत्वे इदमपरं लिङ्गं औदुम्बरीहोमे 'घृतेन द्यावापृथिवी आपृणेथां इति अन्तरा कर्णौ जुहोति, भूमिगते आज्ये स्वाहाकारः' इति। सोमयागादिविकारत्वे हि अतिदेशेन वषट्कारः प्राप्येत, तत्र स्वाहाकारस्यापि विधिः अपूर्वविधिः स्यात्। अस्मन्मते तु 'स्वाहाकारेण वा देवेभ्यो हविः प्रदीयते वषट्कारेण वा' इत्यनारभ्याधीतवाक्येन विहितयोः स्वाहाकारवषट्कारयोः विकल्पेन प्रदानमात्रे प्राप्तौ 'याज्याया अधि वषट्करोति' इति वचनेन याज्यावत् कर्मणि वषट्कारनियमात्, तद्रहिते परिशेषादेव स्वाहाकारप्राप्तेः, तदनुवादेन भूमिगमनोपलक्षितकालमात्रविधानात् लाघवम्। न चैवं परिशेषादेव सर्वत्र स्वाहाकारप्राप्तौ 'अग्निर्ज्योतिः' इत्यादौ क्वचित् पुनः स्वाहाकारपाठवैयर्थ्यम्, तस्य मन्त्रत्वसिद्ध्यर्थत्वेन सार्थक्यात्। यदि तु अतिदेशपक्षेऽपि औपदेशिकमन्त्राम्नानादेव याज्याराहित्यात् वषट्कारप्राप्त्यभावेन परिशेषसिद्धेः स्वाहाकारप्राप्तिरुद्भाव्येत, ततो नेदं लिङ्गमिति ध्येयम्। अतः सिद्धं दर्विहोमा अपूर्वा इति। २.

मण्डन— 'दर्विहोमास्त्वपूर्वकाः।' 'वाक्याद् धर्मातिदेशः स्यात्।' ५.

शंकर-- 'नातिदेशो दर्विहोमेषु। असौ वचनतः क्वचित्।' ५.

* दर्विहोमा नारिष्ठादयः गृहमेधीयादि च। बाल. पृ. ८५. * दर्विहोमा बहवो यत्र क्रमेण क्रियन्ते, तत्र प्रथमहोमाव्यवहितपूर्वकाले गृहीतस्य गृह्यमाणविशेषत्वात् तदर्थतैव। इति प्रत्याहुति सकृत् ग्रहणम्। संकर्ष. २।४।७. * दर्विहोमा राजसूये 'वल्मीकवपायां होमः' इत्यादयः। तेऽपि राजसूये प्रधानमेव। वि. ४।४।१. * दर्विहोमाः स्वाहाकारेण संयुक्ताः पृथिव्यै स्वाहा इत्यादयः। भा. ८।४।४।११. * दर्विहोमेभ्यः प्राक् प्रत्याहुति एकैकसमिदाधानं नियतम्। संकर्ष. २।४।८. * दर्विहोमाणां सर्वेषां अपूर्वत्वेन प्राकृतधर्माग्राहित्वम्। सु. पृ. ११८२. * दर्विहोमाणां सौमिकानां द्रव्यं आज्यम्, न तु सोमः। संकर्ष. ३।२।२०. * दर्विहोमे कस्मिंश्चित् स्वाहाकारपुनःश्रवणं अनारभ्याधीतस्वाहाकारानुपसंहारकम्। भा. १०।८।१०।२०-२२. * दर्विहोमेष्वेव चतुरवत्तं जुहोतीति विधिः। (इदं हविष एव चतुरवत्तत्वम्)। संकर्ष. २।२।५.

⧗ दर्विहोमेषु क्वचित् स्वाहाकारपुनःश्रवणस्य अनारभ्याधीतस्वाहाकारश्रवणेन नोपसंहारः ॥

मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात् स्यात् । १०।८।१०।२० ॥

भाष्यम्—दर्विहोमं प्रकृत्य श्रूयते 'पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा, वायवे स्वाहा' इति । अस्ति च अनारभ्य वचनम् 'वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते' इति । तत्र संदेहः किं तस्य अयं वाक्यशेषः स्वाहाकारेण अन्नं प्रदीयते देवेभ्यः इति एतस्मिन् दर्विहोमे पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा इति, उत नायं वाक्यशेषः, येष्वपि प्रदानेषु स्वाहाकारो नाम्नातः, तेष्वपि स्वाहाकार इति । किं प्राप्तम् ? अनन्तरवृत्तेन अधिकरणेन वाक्यशेष इति । एवं प्राप्ते, ब्रूमः । मन्त्रेषु वाक्यशेषत्वं न स्यात् । नहि विधायकाविधायकवाक्ययोः एकवाक्यत्वं भवति । विधायकं ब्राह्मणं अविधायको मन्त्रः । अपि च अनन्तराधिकरणे न क्रतुसंबन्धोऽस्ति, इह तु संबन्धो गम्यते । 'वषट्कारेण स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते' इति । प्रदानं हि अत्र प्रधानकर्म । अपिच गुणोपदेशो भवति तस्मिन् दर्विहोमे 'पृथिव्यै स्वाहा' इत्येवं समुच्चारणं भवति, न स्वाहा पृथिव्यै इति । तस्मात् अन्येष्वपि दर्विहोमेषु स्वाहाकारोऽस्ति इति ।

टुप्— (पूर्वन्यायसंभवाशङ्कया कस्यचित् इहापि उपसंहारबुद्धिः स्यात्, सा व्यावर्त्यते) अनारभ्य (प्रदानसंयोगेन) स्वाहाकारवषट्कारौ श्रूयेते । सः अनारभ्यवादः मन्त्रेण न शक्यो विशेष्टुम् । मन्त्रस्य (प्रमाणान्तरप्राप्तमर्थं) प्रकाशयितुमेव सामर्थ्यम्, न (अनारभ्यवादं) विशेष्टुम्, अविधायकत्वात् (नहि विधायकाविधायकयोर्विशेषणविशेष्यता घटते । ननु पशुविधेः छागमन्त्रस्य च सा इष्टैव, अत आह–) न चात्र 'छागो वा मन्त्रवर्णात्' इति न्यायः । तत्र यावत् अग्नीषोमीयापूर्वम्, तावन्मत्रः प्रयोक्तव्यः 'अग्नीषोमीयं पशुमालभते' इति न (कश्चित् पशु–) जातिविशेषः श्रूयते, तत्रार्थात् (पशुजातिविशेषो) ग्रहीतव्यः । स यदि अनियमेन गृह्यते (ततः यद्यपि) चोदना न विरुध्यते, (यत्तु नित्यवच्छ्रुतम्) मत्राम्नानं (तत्) पाक्षिकं स्यात् । तस्मात् यैषा (अनियमेन) पशुचोदना, सा मन्त्रवर्णालोचनेन जातिविशेषपरैव कल्प्यते । एवं तत्र छागनियमो न विशेषणविशेष्यतया (कथम्,) न च मन्त्रविध्योर्विशेषणविशेष्यता (प्राप्तप्रकाशकत्वात् मन्त्राणामित्युक्तम्) । अपि च (भवतु वा विशेषणविशेष्यता तथापि अत्र नास्ति उपसंहारः–) 'पृथिव्यै स्वाहा' इति न स्वाहाकारपरं इदमाम्नानम् । (किन्तु) पृथिव्यै इति (अनेन) देवतोच्यते, तस्याश्च संप्रदानत्वात् स्वाहाकारो वा वषट्कारो वा प्राप्नोति, तत्र स्वाहाकारो नियम्यते वषट्कारनिवृत्त्यर्थम् । वषट्कारनिवृत्तिपरत्वाच्च वाक्यस्य उपसंहाराभावात् अन्येषु (क्रतुषु) स्वाहाकारो न भवति इत्याशङ्कैव नास्ति । 'स्वाहा पृथिव्यै' इति यदि एवं श्रूयेत तथा सति स्वाहाकारस्य प्राथम्यात् (उद्देश्यलक्षणाऽऽपत्तेः) योऽसौ (अनारभ्यवादेन विहितः) स्वाहाकारः, स अनूद्य अस्मिन् प्रदानविशेषे नियम्येत इति शङ्क्येत अस्मिंश्च पक्षे नान्येषु स्यात् । न तु ईदृशमिदं वाक्यमिति ।

अनाम्नाते च दर्शनात् । २१ ॥

भाष्यम्-- यत्रापि दर्विहोमे नाम्नायते स्वाहाकारः, तत्रापि क्वचित् दृश्यते, 'घृतेन द्यावापृथिवी आ पृणेथां इत्यौदुम्बर्या विशाखे जुहोति, आऽन्तादन्ववस्रावयति भूमिप्राप्ते स्वाहा करोति' इति प्राप्तं स्वाहाकारं दर्शयति ।

प्रतिषेधाच्च । २२ ॥

भाष्यम्-- क्वचिच्च प्रतिषेधो भवति 'न स्वाहेति वचनं करोति, मन्त्रं च नाह' इति । प्राप्तिपूर्वकः प्रतिषेधो भवति । इत्यवाक्यशेषता अध्यवसीयते ।

सोम—**सूत्रार्थस्तु**— मन्त्रेषु पृथिव्यादिदेवतालक्षणगुणोपदेशात् स्वाहाशब्दोपसंहारार्थत्वं न अनारभ्यविधिशेषत्वात् स्यात् इति ।

वि— 'स्वाहेत्युक्तिर्दर्विहोमे संहारः स्यान्न वा,
ऽग्रिमः । पूर्वन्यायात्, न तन्मन्त्रे स्वाहाकाराविधित्वतः ॥
विधित्वेऽपि नियम्यः स्यान्न व्यत्यासवषट्कृती । होमा-
न्तरे वषट्कारस्वाहाकारविकल्पनम् ॥'

भाट्ट—— अनारभ्य ‘स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते’ इति श्रुतम्। तेन च वाक्यभेदमङ्गीकृत्य स्वाहाकारवषट्कारयोः देवकर्माङ्गत्वेन विधिः विकल्पश्च न्यायादेव प्राप्तः अनूद्यते। पुनश्च केषुचित् दर्विहोमेषु ‘पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा’ इति स्वाहाकारः श्रुतः। सोऽपि पूर्वन्यायेन उपसंहारार्थः। इति प्राप्ते, विधायकमन्त्रयोः स्वरूपेण उपसंहारायोगात् मन्त्रकल्प्यस्वाहाकारविधिना उपसंहारो वाच्यः। तस्य च वषट्कारव्यावृत्तिफलकस्वाहाशब्दनियमप्रयोजनकत्वसंभवे अनुपस्थितशेष्यन्तरपरिसंख्यारूपोपसंहारप्रयोजनकत्वानुपपत्तेः नात्रोपसंहारः, अपितु स्वाहाकारशब्दनियमः एव इति प्राञ्चः। वस्तुतस्तु ‘याज्याया अधि वषट् करोति’ इति वचनेन वषट्कारस्य याज्योत्तरकालत्वविधानात् यत्र याज्यामात्रकरणको यागः, तत्र वषट्कार एव नियतः। यत्र तु याज्याभिन्नमन्त्रकरणकत्वम्, तत्र परिशेषात् स्वाहाकार एव इति व्यवस्थितविकल्प एव तयोः। एवं च ‘पृथिव्यै स्वाहा’ इत्यादौ स्वाहाकारपाठो मन्त्रत्वसिद्ध्यर्थः। अत एव यत्र स्वाहाकारो न पठितः, तत्र उक्तविधितः स्वाहाकारविधानेऽपि न तस्य मन्त्रत्वम्, तद्भ्रेषे मन्त्रभ्रेषप्रायश्चित्तं वा, न तु तत्र स्वाहाकारस्यैवाभावः। अत एव औदुम्बरीहोमादौ मन्त्रे तत्पाठाभावेऽपि ‘मन्त्रेण औदुम्बरीकर्णे होमं कृत्वा भूमिगते स्वाहाकारः’ इति स्वाहाकारानुवादेन कालविधिः स्वाहाकारप्राप्तौ उपपद्यते। क्वचिच्च होमविशेषे ‘न स्वाहा करोति’ इति तत्पर्युदासोऽपि उपपद्यते। अतो नात्रोपसंहारः। सूत्राण्यपि अस्मिन्नेवार्थे योजनीयानि।

मण्डन—— ‘दर्विहोमेऽखिले स्वाहा।’ ११.

शंकर—— ‘स्वाहाकारः सर्वहोमे।’ १२.

* दर्विहोमेषु ‘चतुर्गृहीतं जुहोति’ इत्यत्र प्रथमं गृहीतेनापि होमसंभवात् प्रथमोपस्थितन्यायेनैव (३।४।१६) संख्या नियम्यते। संकर्ष. २।४।६.

दर्विहोमेषु प्रतिहोमं समिधमाधायैव होमः॥

दर्विहोमेभ्यः पूर्वमग्निसमिन्धनस्य आवश्यकत्वेऽपि न तत्र समित्प्रक्षेपनियमः। सामिधेनीष्विव नियामकाभावात्। इति प्राप्ते, अग्निहोत्रप्रकरणे ‘यदेकां समिधमाधाय द्वे आहुती जुहोति’ इति विधाय ‘कस्यां समिधि द्वितीयामाहुतिं जुहोति’ इति प्रश्नसरूपेण प्रत्याहुति एकैकसमिदाधानस्य आवश्यकताप्रापणात् नानियमः। अनियमेन प्राप्तस्यार्थस्य अर्थवादादिना नियमनस्य बहुशो दृष्टत्वात्। अन्यथा ‘स्रुवेणावद्यति’ इत्यादौ शेषिनियमो न स्यात्। अत एव एतस्य अग्निहोत्रप्रकरणस्थत्वाद् अर्थवादत्वाच्च न नियामकतेति केषांचिन्मतं भाष्ये एव निरस्तम्। संकर्ष. २।४।८.

* दर्विहोमेषु ‘भिन्ने जुहोति’ इत्यादिजुहोतिचोदनाविहितेषु अविहितेतिकर्तव्यताकेष्वपि प्रकृतिविशेषानिर्धारणात् नियतविध्यन्तातिदेशानुपपत्तेः अनियमसर्वातिदेशयोश्च अष्टमाद्ये निराकृतत्वात् अपूर्वत्वेन अष्टमान्ते वक्ष्यमाणेषु यावच्छ्रुतस्य द्रव्यदेवतादेः इतिकर्तव्यताजातस्य संनिपत्योपकारित्वेन नियमापूर्वद्वारा करणापूर्वोत्पत्तिमात्रे पर्यवसायितया अन्यत्रावधारितस्यापि अगत्या आरादुपकारकाङ्गसाध्यकरणानुग्रहसाधनत्वमपि कल्पितम्। सु. पृ. ३५–३६.

दर्विहोमेषु वचनाभावे सकृत् गृहीतमेव नियतम्॥

दर्विहोमेषु ‘चतुर्गृहीतं जुहोति’ इत्यादि नियमानुपलम्भात् अनियतसंख्याकगृहीते प्राप्ते प्रथमं गृहीतेनापि होमसंभवात् प्रथमोपस्थितन्यायेनैव संख्या नियम्यते। अत एव ‘चतुरुन्नयति, द्विर्जुहोति’ इति विधाय ‘अथ कथं द्वे आहुती भवतः’ इत्यादिनोन्नयनचतुष्के होमचतुष्कस्य आवश्यकता ध्वनितोपपद्यते। संकर्ष. २।४।६.

* दर्विहोमेषु सर्वेषु ‘उपांशु यजुषा’ इत्यर्थवत्। वा. ३।३।२।९ पृ. ८१३. * दर्विहोमेषु सर्वेषु स्वाहाकारो भवति। भा. १०।८।१०।२०–२२. * दर्विहोमेषु स्वरूपनिष्पादनातिरिक्तः तथा व्यापारो न श्रूयते, नापि अतिदेशेन तत् प्राप्यते। यागीयानां धर्माणां तावन्नातिदेशः, यागत्वेन होमत्वेन च वैलक्षण्यात्। नापि होमीयानाम्, कस्य होमस्य धर्मः कस्मिन् होमे प्रवर्तते इति विशेषनिर्णये प्रमाणाभावात्। (अग्निहोत्र—त्रैयम्बक—नारिष्ठानां धर्मवत्त्वाविशेषत्वादिति भावः) अतो धर्मप्राप्त्यभावात् ‘दर्विहोमैः इष्टं भावयेत् कथम्’ इत्यु-

त्पन्नाऽपि आकाङ्क्षा स्वरूपनिष्पादनेनैव शाम्यति । मीन्या. पृ. १९२–९३.

दर्विहोमन्यायः । दर्विहोमशब्दस्य कर्मनामधेयत्वम् ॥

दर्विहोमो यज्ञाभिधानं, होमसंयोगात् । ८।४।१।१॥

भाष्यम्— 'यदेकया जुहुयात्, दर्विहोमं कुर्यात्' इति श्रूयते । अस्मिन् दर्विहोमशब्दे भवति संशयः । किं गुणविधिः उत कर्मनामधेयमिति । किं प्राप्तम् ? दर्विहोमो यज्ञाभिधानम्, कर्मनामधेयमित्यर्थः । कुतः ? होमसंयोगात् । होमशब्दोऽत्र श्रूयते । तत्प्रधानश्चायं समासः । दर्विशब्द उपसर्जनम्, होमश्च कर्म । अथवा जुहुयादिति कर्मोच्यते । तेन समुच्चितः, यदेकया जुहुयादिति । तस्मात् कर्मनामधेयम् । स्थितं तावत् ततोऽर्थान्तरं प्रक्रियते ।

द्रव्योपदेशाद्वा गुणाभिधानं स्यात् । ५ ॥

भाष्यम्— स्थितादुत्तरमुच्यते । यदुक्तं कर्मनामधेयं दर्विहोम इति, तन्न । किं तर्हि ? गुणाभिधानं स्यात् । गुणविधिरित्यर्थः । कुतः ? द्रव्योपदेशात् । द्रव्योपदेशोऽवगम्यते, दर्व्या होमो दर्विहोम इति । एवमेतौ दर्विहोमशब्दौ यथाप्रसिद्धिकल्पितौ भविष्यतः । तस्मात् गुणविधिः ।

न, लौकिकानामाचारग्रहणाच्छब्दवतां चान्यार्थविधानात् । ६ ॥

भाष्यम्-- नायं गुणविधिर्युज्यते । किं कारणम् ? लौकिकानां तावदाचारगृहीता दर्विः 'न्यग्बिलया मूलदण्डया दर्व्या जुहोति' इति । सा न विधातव्या । श्रौतानामपि अन्यानि होमार्थानि पात्राणि आम्नातानि । 'स्रुवेण जुहोति' 'चमसेन जुहोति' इति । तैः सह दर्वेर्विकल्पः स्यात् । स चान्याय्यः । यत्कारणं स्रुवादीनां विधायकः शब्दोऽस्ति, 'स्रुवेण जुहोति' इति, न तु दर्वेः । तत्र हि आनुमानिको विधिशब्दः ।

दर्शनाच्चान्यपात्रस्य । ७ ॥

भाष्यम्--अन्यच्च पात्रं दर्विहोमे दृश्यते । 'भूतेभ्यस्त्वेत्यपूर्वां स्रुचमुद्गृह्णाति' इति । तस्मान्न गुणविधिः ।

तथाऽग्निहविषोः । ८ ॥

भाष्यम्— अथोच्येत अग्निहविषोः कार्ये दर्विर्भविष्यति । दर्वौ होमो दर्विहोमः, दर्वेर्वा होमो दर्विहोम इति । तत्र ब्रूमः । तथाऽग्निहविषोरपि । यथा पात्रकार्ये दर्विर्न युज्यते, तथा अग्निहविषोः कार्येऽपि । तत्रापि आहवनीयः आधारत्वेन विहितः 'यदाहवनीये जुहोति' इति, अन्यच्च प्रदेयत्वेन पुरोडाशादि । तस्मादग्निहविषोरपि कार्ये न दर्वेर्निवेशः ।

उक्तश्चार्थेऽसंबन्धः । ९ ॥

भाष्यम्— उक्तं चास्माभिः अग्नेः कार्ये अन्यत् द्रव्यमसमर्थम् । दहनपचनप्रकाशनकर्म अग्नेः । न चैतत् कार्यं अन्यत् द्रव्यं शक्नोति कर्तुमिति । तस्मात् न अग्निकार्ये दर्वेरुपदेशः । अतो न गुणविधिः । कर्मनामधेयमेव दर्विहोमशब्दः इति ।

सोम—अत्र प्राभाकरैः करिष्यमाणातिदेशापवादार्थतया गुणविध्यादिविचारः इत्युक्तम्, तदयुक्तम् । अर्थवादगतस्य दर्विहोमशब्दस्य आतिदेशिकत्वाप्रसङ्गेन अपवादार्थत्वाभावात् । तस्मात् प्रसङ्ग एवात्र **संगतिः** । **सूत्रार्थस्तु**– दर्विहोमशब्दः यज्ञाभिधानं कर्मनामधेयम्, होमसंयोगादिति ।

वि--'दर्विहोमो गुणो नाम वा, गुणो दधिहोमवत् ।
गुणासंभवतो लोकवेदयोर्नाम तद् भवेत् ॥'

भाट्ट-- तदेवं सिद्धेऽतिदेशे दर्वीहोमेषु तदपवादं वक्तुं दर्वीहोमशब्दार्थो निरूप्यते । तत्र न तावदयं दर्व्याख्यस्य गुणस्य विधिरिति शङ्कितुं शक्यम्, सोमादिवत् विधिवाक्ये श्रवणाभावेन विधायकत्वशङ्काऽनुपपत्तेः । न च वास्तुहोमीयगुणविध्यर्थवादे 'यदेकया जुहुयाद्दर्विहोमं कुर्यात्' इत्यत्र श्रुतस्य दर्विहोमपदस्य घृतादिपदवत् पदान्तरकल्पनया विधायकत्वसंभवः, 'पुरोऽनुवाक्यामनूच्य याज्यया जुहोति' इति ऋग्द्वयरूपगुणविधेर्द्रव्यापेक्षाभावात् । न च सिद्धवन्निर्देशान्यथाऽनुपपत्त्या 'उपरि हि देवेभ्यो धारयति' इतिवत् वाक्यान्तरकल्पनया होमोद्देशेनैव दर्विविधायकत्वम् । वास्तुहोमे तावत् स्रुचः प्रत्यक्षशिष्टत्वेन विधातुमशक्यत्वात्, होमान्तरेष्वपि स्मार्तेषु 'न्यग्बिलया मूलदण्डया दर्व्या जुहोति' इति स्मार्तवचनेनैव तत्प्राप्तेः,

श्रौतेष्वपि ‘स्रुवेण जुहोति, चमसेन जुहोति, जुह्वा जुहोति’ इत्यादिना तत्रतत्र तत्तत्पात्रान्तरसद्भावाच्च । अतश्च तत्प्रख्यन्यायेन गुणविधित्वानुपपत्तेः दर्विशब्दं पात्रान्तरस्य उपलक्षणमङ्गीकृत्य एकदेशप्रवृत्तिनिमित्तेन वा तत्साध्यहोममात्रस्येदं नामधेयम् ।

मण्डन--‘दर्विहोमपदं नाम ।’

शंकर---‘दर्विहोमे च नामता ।’

* यदि केनचिदुपदेशेन वा अतिदेशेन वा (प्रमाणम्) न लभामहे, ततो **दर्विहोमन्यायेन** (८।४।१।१,५–९) विध्युद्देशस्यैव द्वे शक्ती कल्पयिष्यामः । **वा.** १।२।१।७ पृ. ११५.

* **दर्विहोमशब्दः** कर्मनामधेयम् । स्थालीपाकः, अष्टकाः, अग्निहोत्रम्, नारिष्ठहोमाः इत्यादयो लौकिका वैदिकाश्च होमा दर्विहोमाः । एवं जयाः, अभ्यातानाः, राष्ट्रभृतश्च दर्विहोमा एव । **वि.** ८।४।१,४.

⧗ दर्विहोमशब्दः स्मार्तानां श्रौतानां च कर्मणां नामधेयम् ॥

स लौकिकानां स्यात्, कर्तुस्तदाख्यत्वात् । ८।४।२।२॥

भाष्यम्-- यदा कर्मनामधेयम्, तदा चिन्त्यते किं लौकिकानां स्मार्तानां कर्मणामष्टकादीनां नामधेयं दर्विहोमशब्दः, उत सर्वेषामेव लौकिकानां वैदिकानां चेति । किं प्राप्तम्? स लौकिकानां स्यात् । स खलु दर्विहोमशब्दो लौकिकानां कर्मणां नामधेयं स्यात् । कुतः? कर्तुस्तदाख्यत्वात् । तेषां कर्ता, तेन दर्विहोमशब्देन समाख्यायते । ‘शिनीनां दार्विहोमिको ब्राह्मणः, अम्बष्ठानां दार्विहोमिको ब्राह्मणः’ इति । यश्च यत् करोति, स तेन आख्यायते । यथा लावकः पावक इति । यदि चाष्टकादीनां नामधेयमेतत्, ततस्तेषां कर्मणां कर्ता दार्विहोमिकसमाख्यामर्हतीति । तस्माल्लौकिकानां नामधेयम् ।

सर्वेषां वा, दर्शनाद् वास्तुहोमे । ३ ॥

भाष्यम्— सर्वेषां लौकिकानां वैदिकानां च नामधेयमेतत् । न लौकिकानामेव । कस्मात्? दर्शनात् वास्तुहोमे । वास्तुहोमे हि वैदिके दर्विहोमत्वं दर्शयति । ‘यदेकया जुहुयाद्दर्विहोमं कुर्यात् । पुरोऽनुवाक्यामनूच्य याज्यया जुहोति सदेवतत्वाय’ इति । **ननु** विपरीतमेतद्दर्शनम्, यदेकया जुहुयाद्दर्विहोमं कुर्यात्, अदर्विहोमं सन्तमित्यापद्यते । यदि दर्विहोम एवासौ, तत एकया द्वाभ्यां च हूयमानो दर्विहोम एव भवति । तत्रैतद्दर्शनं नोपपद्यते । यदेकया जुहुयाद्दर्विहोमं कुर्यादिति । **अत्रोच्यते** । यदि लौकिकानामेव नामधेयम्, न वैदिकानाम्, तत एकयाऽपि हूयमानोऽसौ नैव दर्विहोमो भवति अलौकिकत्वात्, तत्रैतद्वचनं नोपपद्यते यदेकया जुहुयाद्दर्विहोमं कुर्यादिति । तस्मात् ज्ञापकमेवेदं वैदिकानां दर्विहोमत्वे । एवमपि ज्ञापकमुक्तम्, कुतः प्राप्तिः? उच्यते । होमशब्दस्य सामान्याभिधायित्वात् प्राप्तिः । तस्माल्लौकिकवैदिकानां नामधेयमेतत् ।

वि-- ‘लौकिकस्योत सर्वस्य नामा, ऽऽद्योऽम्बष्ठवाक्यतः ।, निमित्तसाम्याद् वेदेऽपि तदुक्तेः सर्व-नाम तत् ॥’

भाट्ट— (‘अधिकरणत्रयार्थः प्रथमाधिकरणे एव भाट्टदीपिकायां निवेशितः । तत्रत्यं प्रकृतद्वितीयाधिकरणोपयुक्तं पृथक् कृत्वा अस्माभिरत्र निवेश्यते ।) तत्रापि यथैव स्मार्तानां पार्वणस्थालीपाकादीनां कर्तरि दार्विहोमिक इति प्रयोगदर्शनात् प्रवृत्तिनिमित्तसद्भावाच्च तेषां नामधेयम्, तथैव वास्तुहोमे प्रयोगात् श्रौतानामपि । **न च** वास्तुहोमस्य एकया ऋचा करणे दर्विहोमत्वप्रसक्त्यभिधानात् वस्तुतो दर्विहोमत्वाभावप्रतीतेः अस्य प्रयोगस्य विरुद्धत्वमिति **वाच्यम्** । दर्विहोमपदस्य स्मार्तमात्रनामत्वे वास्तुहोमे एकया ऋचा क्रियमाणेऽपि दर्विहोमत्वानापत्तेः अस्यार्थवादस्य ज्ञापकविधया श्रौतेष्वपि होमेषु दर्विहोमपदप्रवृत्तिसाधकत्वात् । अतः सर्वनामधेयम् ।

मण्डन-- ‘लौकिके वैदिके च तत् ।’ तत् दर्विहोमपदम् ।

शंकर— ‘नामैतद् वैदिकानामपि ।’

⧗ दर्विहोमशब्दः होमानामेव नामधेयम्, न यागानाम् ॥

जुहोतिचोदनानां वा, तत्संयोगात् । ८।४।३।४ ॥

भाष्यम्— लौकिकानां वैदिकानां च नामधेयं

दर्विहोमशब्द इति स्थितम् । इदानीं चिन्त्यते किं यजतिचोदनानां जुहोतिचोदनानां च सर्वेषां नामधेयम्, उत जुहोतिचोदनानामेवेति । अविशेषात् सर्वेषाम् । इति प्राप्ते, उच्यते । जुहोतीनां नामधेयं न यजतीनाम् । कुतः ? तत्संयोगात् होमशब्दसंयोगात् । अयं होमशब्दो जुहोतेर्वाचको न यजतेः । यजतौ लक्षणया स्यात् । तस्माज्जुहोतिनामधेयम् ।

वि—'यजतेरपि नाम स्याज्जुहोतेरेव वा, ऽग्रिमः । अविशेषेण, मुख्यत्वाज्जुहोतेर्लक्षणाऽन्यथा ॥'

भाट्ट—तत्रापि होमपदश्रवणात् होमानामेव, न तु यागानाम् । न च यागस्थलेऽपि 'चतुरवत्तं जुहोति' इत्यनेन होमविधानात् तन्नामत्वोपपत्तिः, तत्रत्यजुहोतिना प्रक्षेपमात्रस्यैव प्रतिपत्तिरूपस्य लक्षणया विधेयत्वेन तस्य मुख्यहोमत्वाभावात् । अतो होमनामधेयमेवेदम् । इदं च सिद्धमेवोत्तरविवक्षार्थं प्राप्यते ।

मण्डन—'जुहोतेरेव नामैतत् ।'

शंकर—'अत्र स्याद् होमनामता ।'

* दर्शः । चन्द्रमसः अदर्शनात् शक्यते दर्श इति वक्तुं विपर्ययहेतुत्वेन । वा. २।२।३।३ पृ. ४८१. * दर्शो न पौर्णमासीविकारः न वा पौर्णमासी दर्शविकारः । वि. ५।१।१६, * दर्शः पूर्वयोर्दधिपयसोर्नाशे पयोन्तरेण दध्यन्तरेण चानुष्ठेयः । ६।४।१०.

दर्शस्याङ्गं हविरार्तिनिमित्तकः पञ्चशरावयागः ॥

स प्रत्यामनेत्, स्थानात् । ६।४।१०।३०॥

भाष्यम्—स एष नैमित्तिको यागः, किममावास्यां प्रत्यामनेत्, नेति । किं प्राप्तम् ? स प्रत्यामनेत् । स एष यागः अमावास्यां प्रत्याम्नातुमर्हति । कुतः ? स्थानात् । यागे विनष्टे याग एष श्रूयमाणो यदि न नष्टस्याङ्गम्, ततोऽर्थवान् भवति । अथाङ्गम्, निष्प्रयोजनस्यार्थे क्रियमाणं निष्प्रयोजनमेव भवितुमर्हति । विगुणं च निष्प्रयोजनमेव । विनष्टमामावास्यं इति प्रत्यक्षम् । इदमपि कर्तव्यमिति शाब्दम् । यत् विनष्टम्, तत् निष्फलमिति न कर्तव्यम् । इदं च कर्तव्यमिति प्रत्याम्नायोऽवगम्यते ।

टुप्—अमावास्याऽभावः द्रव्याभावात् । ततः किम् ? आह, कर्माभावेन (अकर्तव्यतात्मा–) प्रतिषेधो लक्ष्यते, प्रतिषेधेन स्वकार्यम् (लक्ष्यते) । पञ्चशरावोऽपि दर्शाभावे विधीयमानः प्रयोजनाभिलाषी । तस्मात् (साकाङ्क्षत्वात्) अभावेन यत् (प्रयोजनं दर्शसाध्यम्) लक्ष्यते, तत् साधयन् एकवाक्यतां दर्शेन याति, फलसाधनस्य नाङ्गं भवति । अयथाश्रुतकरणे फलवत्त्वाभावः । फलवत्त्वाभावात् (पञ्चशरावस्यापि) तदङ्गत्वाभावः, अफलसाधनस्य यत् अङ्गम्, तत् अनर्थकं (स्यात्) ।

अङ्गविधिर्वा, निमित्तसंयोगात् । ३१ ॥

भाष्यम्—अङ्गं वा एतत् विधीयते । हविषः आर्तौ निमित्ते यागः श्रूयते । तत्र त्रयमापतति, यद्वा निमित्ते स्वतन्त्रं कल्प्यं फलम्, यद्वा अमावास्यायाः यत् कार्यं तदस्य, यद्वा तस्याङ्गमिति । स्वातन्त्र्यं तावत् न, कल्प्यत्वात् फलस्य । नामावास्यायाः कार्ये । किं कारणम् ? अश्रवणात् । नैवं श्रूयते, तस्याः कार्ये वर्तते इति । कर्तव्योपदेशेनापि नान्यतमाध्यवसानम् । त्रिष्वपि पक्षेषु विवक्षितेषु कर्तव्योपदेशः अवकल्पते । ननु एवमभिसंबन्धो भविष्यति 'यस्योभयं हविः आर्तिमार्छेत्, स एतेन यागेन साधयेत्, यत् साधयितुकामः । किं चासौ साधयितुकामः ? यत् अमावास्यायाः फलम्' इति । अत्रोच्यते । फलपदेन संबन्धाभावात् संबन्धस्य विधायकं वाक्यम् । श्रुत्या च यागकर्तव्यता विधीयते, सा च वाक्यात् बलीयसी । तस्मान्न तत्कार्ये वर्तते इति । किं तर्हि प्रयोजनम् ? तस्या अमावास्यायाः अङ्गम् । ननु एतदपि नास्ति 'तस्या अङ्गम्' इति, तत्रोच्यते । तत्संबन्धेन समाम्नानात् तत्प्रयोगवचनेन गृह्यते 'दर्शपूर्णमासाभ्यां फलं साधयेत् सर्वैरङ्गैः सह, अस्यां च आर्तौ एष यागः इतिकर्तव्यता' इति । तस्मादेवमवगम्यते 'विनष्टे हविषि आमावास्यं यन्न शक्नोति स्वकार्यं कर्तुम्, तत् अनया इतिकर्तव्यतया सहितं शक्नोति' इति । तस्मात् निमित्ते कर्म अङ्गमिति ।

टुप्—आरब्धं कर्म (येन केनापि द्रव्येण) अवश्यं समापनीयम् । तस्मात् दर्शकर्मणो नास्त्यभावः ।

तद्भावात् (दर्शस्य भावात्) तत्कार्यस्य लक्षकं नास्ति। न (च) दर्शे प्रतिषिध्य पञ्चशरावो विधीयते। यथा गिरापदं प्रतिषिध्य इरापदम् (विधीयते) । तत्र इरापदस्य गिरापदं कार्यं लक्षयति प्रतिषिध्यमानम्, एवमिह नास्ति (प्रतिषेधो, येन कार्यं लक्षयेत्)। तस्मात् पञ्चशरावविधावपि कार्यापत्तेरभावात् दर्शस्थानापत्तिर्नास्ति। यथाश्रुताकरणात् (यथाश्रुतेन द्रव्येण अकरणात् दर्शस्य यः–) दोष उपजायते, तन्निर्घातापेक्षायां विधीयमानम् (कर्म) तद्दोषप्रतिसमाधानार्थत्वेन (दर्शेन–) एकवाक्यतां याति। (तस्मात् अङ्गमिति सिद्धम्)।

शा— पञ्चशरावयागः अमावास्यायाः प्रत्याम्नायः स्यात्। '**स्यादेवं यद्यमावास्या निवृत्ता, न तु सा तथा। पूर्वद्रव्यविनाशेऽपि द्रव्यस्यान्यस्य संभवात् ॥**'

सोम— प्रासङ्गिकी संगतिः। 'अथोत्तरस्मै हविषे वत्सानपाकुर्यात्' इति वचनेन पुनःप्रयोगस्य पक्षद्वयेऽपि आवश्यकतया पुनःप्रयोगाप्रयोगाभ्यां अनुष्ठानविशेषाभावेऽपि पूर्वपक्षे दर्शस्थानापत्त्या तद्धर्मनियमः, न तु सिद्धान्ते। तथा पञ्चशरावयागभ्रेषे पूर्वपक्षे प्रधानभ्रेषप्रायश्चित्तम्, इत्येवं विशेषो बोध्यः।

वि— 'दर्शे प्रत्याम्नाय एतदङ्गं वा, हविरार्तितः। दर्शयागे निवृत्तेऽस्य प्रत्याम्नायतया विधिः ॥, पूर्वद्रव्यविनाशेऽपि द्रव्यस्यान्यस्य संभवात्। अनिवृत्तेस्तदङ्गं स्यादार्तिवैगुण्यहानये ॥'

भाट्ट— तदिदं कर्मान्तरं द्रव्यनाशप्रयुक्तवैगुण्यपरिहारार्थत्वेन सांनाय्याङ्गतया विधीयते, न तु तत्फलार्थं तत्स्थाने तत्फलस्य पापक्षयादेः शिष्टविगर्हणनिमित्तकस्य वा सांनाय्ययागेनैव सिद्धेः साधनान्तरानपेक्षत्वात्। नहि द्रव्यनाशे यागलोपः, द्रव्यान्तरोत्पत्त्या आज्येन वा तत्समापनोपपत्तेः। न च स्वर्गादिरूपस्य फलस्य वैगुण्ये सति अनुत्पत्तेः, तस्य साधनापेक्षायां यागस्य विधानम्। इति वाच्यम्। तथात्वे तत्कामनाऽभावे तदनुष्ठाने निमित्तश्रुतेः संकोचापत्तेः। अतः अपेक्षितवैगुण्यसमाधानार्थत्वेनैव अस्य विधानम्। अपेक्षा च सांन्नाय्ययागस्यैवेति तस्यैव विशिष्योपस्थितत्वात् तद्वाचकपदकल्पनया वाक्यात् तदङ्गत्वमेव, न तु प्रकरणात् सर्वाङ्गत्वम्, अनुष्ठानसादेश्यात् दर्शमात्राङ्गत्वं वा। अत एव नाशे निमित्ते प्रयोगान्तःपात्येव इदमङ्गम्, न तु क्षाणनिमित्तकपुनःप्रयोगवत् प्रयोगबहिर्भूतम्।

मण्डन— 'दर्शस्य नैमित्तिकमङ्गमेषः।' पञ्चशरावयागः।

शंकर— सा च क्रिया स्याद् दर्शाङ्गम्।'

* दर्शस्य द्व्यहकालत्वं पर्वणि अग्न्यन्वाधानम्, इध्मस्य बर्हिषश्च संपादनम्, प्रतिपदि इष्टिः इति। विकृतिषु तु सद्यस्कालत्वम्। **वि.** ५।४।७, * दर्शस्य पिण्डपितृयज्ञो नाङ्गम्, किन्तु पुरुषार्थं कर्मान्तरम्। तस्य च कालः अपराह्णः 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति वचनात्। ४।४।८, * दर्शस्य पूर्णमासस्य च एकस्मिन् प्रयोगे प्रयाजाद्यङ्गानां सकृदनुष्ठानम्। फलभूमाधिकरणम्। ११।१।७, * दर्शस्य पूर्णमासस्य च सङ्घभेदेन प्रयोगभेदे अङ्गानामावृत्तिः। इष्टिराजसूयाधिकरणम्। ११।२।३. * दर्शे अभ्युदितेष्टौ नैमित्तिको देवताऽपनयः। **भा.** ६।५।१।१–९.

⧗ दर्शे आग्नेयपुरोडाशस्य अवदानादिप्रदानान्तं कृत्वा सांनाय्यस्य तत् कर्तव्यम्। मुख्यक्रमः प्रवृत्तिक्रमात् बलीयान् ॥

अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात्। ५।४।२।२ ॥

भाष्यम्— स्तो दर्शपूर्णमासौ। तत्र पूर्वं दध्नो धर्माः समाम्नाताः पश्चादाग्नेयस्य। प्रदानं च आग्नेयस्य पूर्वम्। तत्र संदेहः किं प्रावृत्तिकेन क्रमेण पूर्वं दध्नः अवदानाभिघारणासादनानि, उत मुख्यक्रमेण पूर्वमाग्नेयस्येति। किं प्राप्तम्? अनियम इति। एवं प्राप्ते, ब्रूमः। अवदानादिषु प्रावृत्तिकेन पूर्वं दध्नः इति। कुतः? एवं अनुज्ञातेभ्यो व्यवधायकेभ्यो नाभ्यधिकः अन्यो वा व्यवधायकः कल्पितो भविष्यति। दर्शयति च 'दध्नः पूर्वमवदेयम्' इति।

टुप्—अवदानाभिघारणासादनेषु (आनुपूर्व्यं प्रवृत्त्या स्यात्) (सूत्रभाष्ययोः अवदानाभिघारणग्रहणं प्रधान-

चतुरवत्तावयवभूतावदानाभिघारणविषयं मा विज्ञायि इत्याह–) स्विष्टकृदवदानं प्रयाजशेषाभिघारणं बर्हिषि हवींष्यासादयति इत्युदाहरणानि । (तत्र) प्रावृत्तिकमुख्यक्रमयोः कतरो बलीयान् इति विचारः । (पूर्वपक्षमाह–) तत्र दध्नः प्रथमं धर्माः प्रक्रान्ताः । यदि तथैव प्रवृत्त्या तस्य आसादनादीनि प्रथमं क्रियन्ते, ततो भवति अङ्गानां प्रधानासत्तिः (प्रधानप्रयोगविहिताङ्गानां परस्परप्रत्यासत्तिरित्यर्थः) इतरथा (मुख्यक्रमेण क्रियमाणे सति) अन्यस्य (आग्नेयस्य) प्रथमं क्रियेरन्, तत्र (दधिधर्माणां पूर्वं प्रक्रान्तानां पश्चात् क्रियमाणानां मिथः अत्यन्तम्–) व्यवधानात् प्रधानप्रत्यासत्तिर्बाध्येत (परस्परप्रत्यासत्तिरित्यर्थः । तदेव दर्शयति) प्रयोगवचनेन साहित्यात् (अमावास्यागतत्रिकस्यापि साहित्यात् अनुपपत्त्या) यावद्भिः क्षणैर्व्यवधानमनुज्ञातम्, तावद्भ्यः अधिकैरपि कृतं स्यात् (तच्चायुक्तम् । तस्मात् दध्नः प्रथमं कार्याणि) ।

यथाप्रदानं वा, तदर्थत्वात् । ३ ॥

भाष्यम्— यथाप्रदानं वा कर्तव्यानि । यस्य प्रदानं पूर्वम्, तस्यावदानानि पूर्वम्, पश्चादाग्नेयस्य । कुतः ? प्रदानचोदनागृहीतत्वात् अवदानादीनाम् । प्रदानोपक्रमा एते, न पृथक्पदार्था इत्युक्तम् (५।२।४।६) । अभिघारणमवदानं च तस्य प्रदानचिकीर्षयैव क्रियते । आसादनमपि प्रदानार्थमेव आसन्नकरणम् । एवं दृष्टार्थता भवति तस्मात् मुख्यक्रमेणाङ्गानां प्रयोग इति । यत्तु दध्नः पूर्वं प्रवृत्तिरिति । अर्थात् पूर्वं प्रवृत्तिः, न पाठात् । प्रावृत्तिकाच्च मुख्यक्रमो बलीयान् । मुख्यक्रमे गृह्यमाणे प्रथम एकः पदार्थो विप्रकृष्टकालः स्यात् । प्रावृत्तिके पुनर्गृह्यमाणे सर्वेषां विप्रकर्षः । तस्मात् मुख्यक्रमो बलीयानिति । अथ यल्लिङ्गमुक्तम्, दध्नः पूर्वमवदेयमिति । अत्रोच्यते । श्रुताभिप्रायमेतद्भविष्यति । तस्माददोषः ।

टुप्-– (सत्यम्) दध्नः पाठात् (पूर्वेद्युः केचन धर्माः) पूर्वं क्रियन्ते, अपरेद्युः पाठक्रमादेव आग्नेयस्य (निर्वापादयः) पूर्वं (भवन्ति) । एतावति विषये मुख्यप्रावृत्तिकौ नावतरतः, पाठक्रमस्य प्रत्यक्षत्वात् । वेद्यासादने तु नास्ति पाठः कस्य पूर्वमासादनमिति । तत्र यदि दध्नः पूर्वं प्रवृत्ताः इति कृत्वा तस्यैव आसादनं (प्रथमम्) क्रियते, तथा सति प्रधानक्रमेण आग्नेयस्य (पूर्वमासादनं) कृत्वा (पश्चात्) अन्येषां कर्तव्यम्, इति (एतत्) नानुगृह्येत । कुतः (पुनर्मुख्यक्रमः ? अत आह–) पाठाद्धि प्रथममाग्नेयः, ततो दधि, ततः पयः इति (हेतोः । यद्यपि) एकैकमेव एषां (आग्नेयादीनां प्रधानानां स्वीयां) इतिकर्तव्यतां संनिहितामभिलषति (तथापि) सहत्वयोगात् द्विक्षणव्यवहितं (आसादनाद्यङ्गं) एकैकं प्रधानमभिलषति । (ततः किम् ? तदाह–) प्रत्यक्षपाठात् (एव आग्नेयादीनामवगतः क्रमः । तेषां च एकैकस्य स्वीया धर्माः क्षणद्वयव्यवहिताः कर्तव्याः इति) पूर्वं पूर्वस्य धर्माः (कर्तव्याः) ततो द्वितीयतृतीययोः । तत्र यदि दध्नः पूर्वं क्रियेरन्, तथा सति पूर्वमासादनमनुभवितव्यम्, इति यः अवगतः प्रधानेन अङ्गानां क्रमः, स बाध्येत । (भाष्यमनूद्य आक्षिपति–) **प्रदानोपक्रमा एते न पृथक् पदार्थाः इत्युक्तम् ।** अग्रन्थोऽयम् । (अग्रन्थत्वे हेतुस्तु वार्तिके नोक्तः । स तु तन्त्ररत्ने इत्थम्– नहि एतेषां पृथक्पदार्थत्वं क्वचिदप्युक्तम् । अथ प्रदानाभिघारणाभिप्रायमिदं भाष्यम्, तदयुक्तम् । तस्य अनुदाहरणत्वात् । न च तदेवोदाहरणमिति शक्यं वक्तुम् । पूर्वमेव अवदानादेः प्रदानान्तस्य एकपदार्थत्वप्रसाधनात् । ... तस्मात् स्विष्टकृदवदानविषयमेव यथाकथञ्चित् भाष्यं व्याख्येयम्) ।

लिङ्गदर्शनाच्च । ४ ॥

भाष्यम्— लिङ्गमपि एतस्मिन्नर्थे भवति । ‘ स वै ध्रुवामेव अग्र अभिघारयति, ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवति ’ इति । तस्मादपि मुख्यक्रमेण नियम इति ।

टुप्— (लिङ्गदर्शनाच्च इति सूत्रार्थमाह–) लिङ्गदर्शनं च इममेव न्यायं दर्शयति ‘ यस्य पूर्वमवदानम्, तस्य पूर्वमभिघारणम् ’ हेतुवन्निगदेनार्थवादेन । अतः तुल्यन्यायत्वात् इतरेष्वपि तथैव भवितुमर्हति । (तस्मान्मुख्यक्रमेण नियमः इति) ।

सोम-– मुख्यार्थपाठानां मुख्यत्वात् तद्बलाबलचिन्ताऽनन्तरं जघन्यप्रमाणानां बलाबलचिन्तनात् **संगतिः** ।

वि— ‘अवदानादि सांनाय्ये पूर्वमाग्नेयकेऽथवा ।, धर्मप्रवृत्तिक्रमतः सांनाय्ये पूर्वतोचिता ॥, प्रदानं पूर्वमाग्नेयेऽवदानं च तथोचितम् । अङ्गानां मुख्यतन्त्रत्वान्मुख्यक्रमबलित्वतः ॥’ ननु अवदानादिः प्रदानान्तः एकः पदार्थः इत्युक्तम्, तत्र कुतः क्रमविचारः ? एवं तर्हि कृत्वाचिन्ता अस्तु । अथवा स्विष्टकृदवदानादिविषया इयं चिन्ता अस्तु ।

भाट्ट— एवं मुख्यक्रमेण प्रवृत्तिक्रमस्य बाधः । यथा दध्नः पाठादर्थाच्च पूर्वं धर्मा दोहनादयः, पश्चादाग्नेयस्य निर्वापादयः । तत्प्रवृत्तिक्रमेण च हविरासादनप्रयाजशेषाभिघारणस्विष्टकृदवदानादीन्यपि कर्तव्यत्वेन प्राप्तानि मुख्यक्रमात् प्रथममाग्नेयस्य कार्याणि, पश्चाद्दध्नः । प्रधानानां हि पाठादेव प्रथममाग्नेयस्य, पश्चात् सांनाय्यस्यानुष्ठानम् । यद्यपि च आसादनादीनां याज्याऽनुवाक्याप्रवृत्तिक्रमात् तादृशानुष्ठानमपि प्रसज्यते इति भूतभाविप्रवृत्तिक्रमाभ्यासनियमप्रसक्तौ मुख्यक्रमस्य नियामकत्वमात्रमिति नेदं विरोधोदाहरणं संभवति, तथापि अन्यदेतादृशोदाहरणं मृग्यम् । दूषकताबीजं तु मुख्यक्रमे प्रधानप्रत्यासत्त्यनुग्रहः । प्रवृत्तिक्रमे तु अङ्गानां परस्परप्रत्यासत्तिः । अतस्तस्य बाधः । अत्र न प्रधानावदानमुदाहरणम्, तस्य प्रदानेनैकपदार्थत्वस्य स्थापितत्वात् ।

मण्डन—‘ ग्राह्यं मुख्यम्, न प्रवृत्तिर्विरोधे । ’

शंकर—‘प्रवृत्तेर्मुख्यतस्तथा । ’ बाधः ।

* दर्शे **आग्नेयसांनाय्ययोः** क्रमः मुख्यक्रमेण । **रत्न.** ५।१।१।१. * दर्शे **आतञ्चनं** दध्नो द्व्यहकालीनत्वेन पूर्वेद्युरित्यर्थसिद्धम् । **वि.** ६।५।१. * दर्शे **इन्द्राग्नी**-इन्द्र-महेन्द्राः पुरुषभेदेन व्यवस्थिताः । **मीन्या.** * दर्शे **दोहः** दध्यर्थः, दध्नो द्व्यहकालसाध्यत्वेन पूर्वेद्युरित्यर्थसिद्धम् । **वि.** ६।५।१, * दर्शे दोहः नित्याग्निहोत्रादौ यज्ञोपवीतिना कार्यः । प्रेताग्निहोत्रे तु प्राचीनावीतिना कार्यः । ३।४।२,४, * दर्शे **दोहौ** द्वौ पूर्वेद्युः सायम्, स दध्यर्थः । यागदिने प्रातश्च, स पयोऽर्थ एव । ३।६।८, * दर्शे **दोहयोः** एकस्य द्वयोर्वा नाशे ऐन्द्रः पञ्चशराव ओदनः प्रायश्चित्तम् । ६।४।६। तच्च कर्मान्तरम् । ६।४।९। तच्च दर्शाङ्गम्, न तु दर्शस्य प्रतिनिधिः। ६।४।१०, * दर्शे **निर्वापः** व्रीहीणाम्, पूर्वेद्युर्विकल्पितः । ६।५।१. * दर्शे **पूर्णमासे** च पार्वणहोमस्य अन्यतरस्यैवानुष्ठानम् । **भा.** ९।२।१९।५६–५७. * दर्शे **पूर्वेद्युर्वेदिः**, यागदिने निर्वापादिअभिवासनान्तम् । नात्रापकर्षो नाम । **वि.** ५।१।१६. * दर्शे **प्रधानाङ्गयोः** कालभेदः (कियांश्चित्) ‘ पूर्वेद्युरमावास्यायां वेदिं करोति’ इति वचनात् । **भा.** ११।३।१।१. * दर्शे ‘ **प्राचीमाहरेत्** ’ इति वृक्षस्य प्राग्गता शाखा लक्ष्यते । शाखावादः । **वि.** ४।२।२.

दर्शे वत्सापाकरणकालेन व्रतसंयोगः असंनयत्पक्षेऽपि ॥

कालश्चेत् संनयत्पक्षे तल्लिङ्गसंयोगात् । ६।४। १३।४१ ॥

भाष्यम्— कालार्थः संयोग इत्येतत् समधिगतम् । इदानीं संदेहः किं संनयत्पक्षे एव कालः, उत असंनयतोऽपीति । किं प्राप्तम् ? संनयत्पक्षे । कुतः ? एवं श्रूयते ‘ पुरा वत्सानामपाकर्तोः ’ इति । न चासंनयतो वत्सापाकरणमस्ति । तस्मात् संनयत्पक्षे एष कालः । अपाकरणं लिङ्गमिति ।

कालार्थत्वाद् वोभयोः प्रतीयेत । ४२ ॥

भाष्यम्--वाशब्दः पक्षं व्यावर्तयति । न संनयत्पक्षे एव । असंनयतोऽपि एष कालः स्यात् । कुतः ? कालार्थत्वात् । न वत्सापाकरणेन व्रते किञ्चित् प्रयोजनमस्ति । कालेन तु प्रयोजनम् । येन च तत्र प्रयोजनम्, स लक्ष्यते । कथं पुनर्वत्सापाकरणं कालार्थमिति ? परार्थत्वात् । पयसे हि ते अपाक्रियन्ते । तथाहि दृष्टार्थता भवति । इतरथा अदृष्टार्थता स्यात् । तस्मान्नोपादेयत्वेन वत्सापाकरणं श्रूयते इति । यत्तूक्तं तल्लिङ्गसंयोगात् संनयत्पक्षे एवेति । तन्न । असंनयतोऽपि कालाहानात् । यस्यापि न सांनाय्यम्, तस्यापि वत्सापाकरणमेव न स्यात्, न तु वत्सापाकरणकालोऽपि । कालेन च नः प्रयोजनम्, न वत्सापाकरणेन । यथा शङ्खवेलायामागन्तव्यमिति । यस्मिन्नपि ग्रामे शङ्खो नाध्मायते, तस्मिन्नपि शङ्खाध्मानकालोऽस्तीति, नागमनं परिहास्यते ।

एवमिहापि असत्यपि वत्सापाकरणे, तत्काले विद्यमाने, व्रतं तस्मिन् काले न परिहास्यते इति ।

सोम--सूत्रे तल्लिङ्गसंयोगात् तस्य कालस्य यत् लिङ्गं चिह्नम्, तत्संयोगादित्यर्थः ।

वि—‘ सांनायिनः स कालः स्यादितरस्यापि वा, ऽग्रिमः । वत्ससत्त्वात् लक्ष्यकालो ह्यन्यस्याप्यस्त्यतोऽन्तिमः ॥ ’

भाट्ट—यद्यपि वत्सापाकरणं कालोपलक्षणं न तु स्वयमङ्गम्, परार्थत्वात् । तथापि तदभावे कालस्यैव ज्ञातुमशक्यत्वात् सांनाय्ययाजिन एव वत्सापाकरणसत्वात् व्रतम् । अत एव एकपुरोडाशायामग्नीषोमीयाभावेऽपि आग्नेयसत्त्वात् कालोपलक्षणसत्त्वेन उपांशुयाजेऽपि न क्षतिः । इति प्राप्ते, ‘ शङ्खवेलायामागन्तव्यम् ’ इत्यादौ उपलक्षणापायेऽपि उपलक्ष्यानपायात् वत्सापाकरणाभावेऽपि अन्वाधानपश्चाद्भावरूपतत्कालानपायात् सांनाय्याभावेऽपि कर्तव्यमेव व्रतम् ।

मण्डन—‘ असंनयत्स्वप्ययमेव कालः । ’

शंकर—‘ असांनाय्येऽप्यसौ भवेत् । ’

* दर्शे **वेद्याः** पूर्वेद्युरपकर्षेऽपि हविरभिवासनान्तस्य नापकर्षः । वेदिकरणन्यायः । **भा.** ५।१।१६।२९, * दर्शे **शाखा** छेदनाहरणपरिवासनानां प्रयोजिका । उपवेषाधिकरणम् । ४।२।३।८–९. * दर्शे ‘ **शाखया** वत्सानपाकरोति ’ । **वि.** ४।२।२, * दर्शे **शाखाऽऽहरणं** दोहधर्मः उभयदोहार्थः । ३।६।८.

दर्शे शाखाऽऽहरणादयो धर्माः दोहद्वयार्था एव, न केवलं सायंदोहार्थाः ॥

दोहयोः कालभेदादसंयुक्तं शृतं स्यात् । ३।६।८। २८ ॥

भाष्यम्-- अस्ति सायंदोहः, तथाऽस्ति प्रातर्दोहः । सन्ति तु दोहधर्माः शाखाहरणम्, गवां प्रस्थापनम्, प्रस्नावनम्; गोदोहनमित्येवमादयः । ते किं सायंदोहार्थाः उत उभयार्था इति । किं तावत् प्राप्तम् ? दोहयोस्तयोः, असंयुक्तं धर्मैः शृतं भवेत् । कस्मात् ? सायंदोहस्य हि क्रमे औपवसथ्येऽहनि शाखाहरणादीन् समामनन्ति । तस्मिन्नेवाहनि सायंदोहः । तस्मात् क्रमात् सायंदोहार्था इति दोहधर्मा ।

वा— एवं क्रमस्याविरोधं दर्शयित्वा इदानीं विरोधं दर्शयति । शाखाहरणादीनामौपवसथ्ये देशसामान्यात् अवान्तरप्रकरणाद्वा दध्यर्थत्वं प्राप्नोति ।

प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् । २९ ॥

भाष्यम्-- प्रकरणं हि साधारणम् । यथैव दध्न एवं पयसः । क्रमाच्च प्रकरणं बलवत्तरम् । तस्मादुभयार्था दोहधर्माः । अपि च, न सायंदोहस्य पूर्वेद्युराम्नानम् । क तर्हि ? उत्तरेद्युः । कथम् ? एवमामनन्ति, ‘ ऐन्द्रं दध्यमावास्यायाम् ’ ‘ ऐन्द्रं पयोऽमावास्यायाम् ’ इति । अमावास्यायां हि उभयं साङ्गं चोद्यते । स एष सायंदोहः अर्थात् पूर्वेद्युरनुष्ठीयते । स्वभाव एष दध्नः, यत् पूर्वेद्युरुपक्रान्तं अपरेद्युरभिनिर्वर्तते । तस्मात् सायंदोहस्य क्रमे आम्नाता इत्येतदेव तावन्नास्ति । अत उभयार्था दोहधर्मा इति ।

वा-- प्रधानं धर्मदेशे क्रियमाणं क्रमं प्रतिपद्यते । पठ्यमानं च अवान्तरप्रकरणम् । दधियागस्तु अमावास्यायां पठ्यते क्रियते च । तस्मात्तुल्यं पयसा । दधित्वसिद्ध्यर्थास्तु केचित् तस्य धर्माः पूर्वेद्युः क्रियन्ते । न च ते शाखाऽऽहरणादीनां ग्राहकाः ‘ गुणानां च परार्थत्वादसंबन्धः ’ इति स्थितत्वात् । तस्मादुभयसंयुक्तस्य शाखाहरणादेर्वचनात् पूर्वेद्युःकरणं न दध्यर्थत्वात् इत्यदोषः ।

सोम-- **प्रयोजनम्**— पूर्वपक्षे प्रातर्दोहार्थे वत्सापाकरणं शाखयैव कर्तव्यं इति नियमाभावः । तथा सायंदोहनिर्वृत्त्यनन्तरं शाखानाशे प्रातर्दोहार्थे न शाखान्तरं संपाद्यम्, सिद्धान्ते तु तदुभयविपर्ययः इति । **सूत्रार्थस्तु**–दोहयोः कालभेदात् सायंदोहस्यैव स्थानम्, न प्रातर्दोहस्य । तेन शृतं पयोधर्मैः असंयुक्तं स्यादिति ।

वि—‘शाखाछेदादयो दोहे धर्माः सायं व्यवस्थिताः । प्रातश्च सन्ति वा, सायं स्थानात् ते पूर्ववत् स्थिताः ॥, आनर्थक्यप्रतिहतिः पूर्ववन्नेह विद्यते । बलिनोऽतः प्रकरणात् प्रातर्दोहेऽपि सन्ति ते ॥ ’

भाट्ट-- दर्शपूर्णमासयोः दधि पूर्वेद्युः अपरेद्युश्च पयः उत्पाद्यते । दोहधर्माश्च शाखाऽऽहरणादयः पूर्वेद्युः क्रियन्ते । तेषामनुष्ठानसादेश्यात् दधिमात्राङ्गत्वम् । इति

प्राप्ते, यद्यपि स्थानं भवेत्, तथापि प्रकरणेन तद्बाधः। न हि अत्र पूर्ववत् क्लृप्तोपकारत्वादिना प्रकरणाभावः शङ्कितुं शक्यः। न च स्थानमपि दधियागस्यास्ति, उत्तरेद्युरेवानुष्ठानात्। दध्नस्तु विद्यमानमपि न आनर्थक्यभिया अपूर्वसाधनत्वलक्षणातात्पर्यग्राहकम्। न च स्मारकविधयैव दध्नैव यागोपस्थितेः स्थानशङ्का, तादृशोपस्थितेः नैयत्याभावेन ग्राहकत्वानुपपत्तेः। किञ्च दोहधर्माः परेद्युरेवाम्नाताः, तत्रैव भाव्यापेक्षायां प्रकरणादुभयार्थत्वेन अवगम्यमानाः पूर्वेद्युरनुष्ठीयमानदधिसिद्धयर्थं पूर्वेद्युस्तन्त्रेण क्रियमाणा अपि न तन्मात्रार्था भवन्ति। दोहनादयस्तु सामर्थ्यादेव आवर्तन्ते इति विशेषः।

मण्डन-- 'दोहद्वये दोहगुणः समत्वात्।'

शंकर-- 'समानो दोहयोर्विधिः।' ९.

* **दर्शे शाखाछेदनादीनां** उपवेषो न प्रयोजकः, किन्तु वत्सापाकरणं प्रयोजकम्। **वि.** ४।२।३. * दर्शे शाखाछेदन–आहरण–परिवासनानां वत्सापाकरणमेव प्रयोजकम्, न कपालोपधानमपि। तथा छेदनादीनां अग्रार्थत्वमेव, न तु मूलार्थत्वमपि। **भा.** ४।२।३।८–९. * दर्शे **शाखाप्रहरणं** प्रतिपत्तिः, नार्थकर्म। शाखाप्रहरणाधिकरणम्। **के.** ४।२।४।१०–१३. * दर्शे शाखाप्रहरणं प्रस्तरेण सह अग्नौ। वि. ४।२।३.

दर्शे शाखाप्रहरणं प्रस्तरप्रहरणकाले ॥

प्रस्तरे शाखा, श्रयणवत्। ६।४।१४।४४ ॥

भाष्यम्— 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति। तत्र श्रूयते 'सह शाखया प्रस्तरं प्रहरति' इति। तत्र संदेहः किं शाखा प्रस्तरस्याङ्गभूता, अङ्गप्रयोजनसंबन्धस्तयोः। अथ कालार्थः संयोगः, प्रस्तरप्रहरणकाले शाखा प्रहर्तव्येति। किं प्राप्तम्? प्रस्तरे शाखा श्रयणवत्। प्रस्तरस्य अङ्गभूता शाखा। कुतः? सह शाखया प्रस्तरं प्रहरतीति सहयुक्ते अप्रधाने तृतीया विभक्तिर्भवति। सा च शाखायां तृतीया। तस्मात् प्रतरस्य शाखा गुणभूता। प्रस्तरे च द्वितीया। सहयोगे च तृतीया गुणतः, द्वितीया प्रधानतः। ननु न शाखया प्रस्तरस्य कश्चिदुपकारः क्रियते। सत्यं न दृष्टं क्रियते किंतु अदृष्टं क्रियते। श्रयणवत्। यथा 'पयसा मैत्रावरुणं श्रीणाति' इति द्वितीयातृतीयासंयोगात् अदृष्टश्चोपकारो गम्यते। एवमिहापीति।

टुप्— वत्ससंयोगप्रसङ्गेनारभ्यते। अथवा शाखाप्रहरणे क्वाधिकार इति संबन्धः। ननु चतुर्थे (४।२।४।११) प्रतिपत्तिः शाखाप्रहरणमिति स्थितम्। उच्यते। प्रस्तरस्य प्रतिपत्तावपि जुह्वादेरङ्गभावो दृष्टः। तेनेहापि तद्वदेव संभवेत्। तत्कथमित्याशङ्कायां युक्तस्तन्निराकरणार्थं आरम्भः।

कालविधिर्वोभयोर्विद्यमानत्वात्। ४५ ॥

भाष्यम्-- कालविधिर्वा स्यात्। कुतः? उभयोर्विद्यमानत्वात्। प्रस्तरस्तावत् स्रुग्धारणार्थः प्राप्तो विद्यते। तस्य प्रहरणमपि विशिष्टे काले वाक्यान्तरेण विहितम्। ततः शाखायाः प्रतिपादनार्थं तस्यैतत् पुनर्वचनम्। उच्यते। भवतु प्रतरस्य पुनर्वचनम्। शाखा तु अत्र विधीयते इति। उच्यते। उभयोरपि विद्यमानत्वात्। शाखाऽपि हि पूर्वं विहिता वत्सापाकरणार्था। इदानीं पुनः किं गुणभूता चोद्यते, उत प्रतिपाद्यते इति। प्रतिपाद्यमानायां दृष्टं प्रयोजनम्। देशवियोगात् प्रचरितुमवकाशः स्यात्। या च यावती च मात्रा देशान्तरसंयोगस्य, न दृष्टं किञ्चिदस्ति। तस्मात् प्रहरणं प्रतिपत्तिस्तस्याः। तस्मात् परतः प्रयोजनाभावात् कालनियमः क्रियते। ननु तृतीया अप्रधाने भवति, सा च शाखायाम्। अत्रोच्यते। या असौ शाखायां तृतीया, सा द्वितीयाऽर्थे। या च प्रस्तरे द्वितीया, सा तृतीयाऽर्थे। कथमवगम्यते? सहयोग एषः, एकस्मिन् काले उभयमपि प्रहर्तव्यमिति। अत्र यस्य निर्ज्ञातः कालः, तस्यानुवादः। यस्य तु अनिर्ज्ञातः, तस्य विधिः। शाखायाश्च अनिर्ज्ञातः, प्रस्तरस्य निर्ज्ञातः। तस्य पुनरुच्चारणमनिर्ज्ञातार्थम्। तदप्रधानम्। इतरस्योच्चारणं प्रधानम्। प्राधान्यं च द्वितीयाऽर्थः, तत्र तृतीया। पारार्थ्यमपि तृतीयाऽर्थः, तत्र द्वितीया। तस्मादयथार्थं विभक्तिवचनम्।

टुप्— कालविधिर्वा उभयोर्विद्यमानत्वात्। ननु च 'सहयुक्तेऽप्रधाने' इति सहयोगे एव तृतीया। उच्यते। यद्येवं, ततः शाखाया अपि यजौ गुणभावः प्रस्तरवत् स्यात्। यथा 'सूक्तवाक एव याज्या, प्रस्तर आहुतिः'।

एवं चेत्, कालार्थता । उच्यते । प्रस्तरे सूक्तवाकस्य निर्देशात् । अथवा प्रस्तरस्य यज्यङ्गत्वेन निर्देशात् यजिरूपम् । अन्यथा याज्यादीनि न स्युरिति । नैवमत्र । अतः प्रहरतिमात्रे शुद्धे सहयोग इति सूक्तम् ।

अतत्संस्कारार्थत्वाच्च । ४६ ॥

भाष्यम्— न च शाखया प्रस्तरस्योपकारो दृष्टः क्रियते । काष्ठं दह्यमानस्य तृणस्य नोपकारे वर्तते । तृणं तु काष्ठस्य दह्यमानस्य उपकुर्यात् । तस्मान्न शाखा प्रस्तरार्था ।

तस्माच्च विप्रयोगे स्यात् । ४७ ॥

भाष्यम्-- किं भवति प्रयोजनम्, यदि प्रस्तरस्य गुणभूता, तथापि प्रस्तरप्रहरणकाले शाखा प्रक्षिप्यते इति । उच्यते । यदि प्रस्तरस्य प्रह्रियमाणस्य अङ्गभूता शाखा, ततो विना प्रस्तरेण न प्रहर्तव्या भवति । अथ अनङ्गभूता, विनापि प्रस्तरेण प्रहर्तव्या । अस्माभिरुक्तं प्रस्तरकाले प्रहर्तव्येति । तस्माच्च विप्रयोगे स्यात्, तस्मादेव कारणात् प्रस्तरविप्रयोगेऽपि शाखायाः प्रहरणं स्यादिति ।

टुप्— यदि प्रस्तरस्य गुणभूता शाखा, ततो विना शाखया प्रस्तरो न प्रहर्तव्यः इति व्याख्येयम् । पौर्णमास्यां प्रस्तरः शाखां प्रयोजयेत् । सिद्धान्ते विनैव शाखया प्रहर्तव्यः । अथवा अन्यथा व्याख्येयमुदाहरणम् । प्रातःसवनीयेषु (पुरोडाशेषु) प्रस्तरं विना न प्रहर्तव्या शाखा पूर्वपक्षे । सिद्धान्ते प्रहर्तव्येति ।

उपवेषश्च पक्षे स्यात् । ४८ ॥

भाष्यम्— यथा पूर्वः पक्षः तथा सति, सांनाय्ये सति असति च शाखा विद्यते इति, उपवेषः सति चासति च स्यात् । यथा तु सिद्धान्तः, तथा सांनाय्यपक्षे शाखा सती हि प्रतिपाद्यते, इति तत्रैव उपवेषो नान्यत्रेति ।

वि— ' प्रस्तरं शाखया युक्तं हरेत् (इत्यनेन) शाखा विधीयते । कालो वा प्रतिपत्त्यर्थः प्रवृत्त्याऽत्रोपलक्ष्यते ॥, आद्योऽङ्गत्वविधेर्भानात्, प्रतिपत्तिमपेक्षते । शाखोपयुक्ता (शाखा उपयुक्ता) तेनान्त्यः प्रस्तरे प्रतिपादनात् ॥ '

भाट्ट— ' सह शाखया प्रस्तरं प्रहरति ' इत्यत्र प्रहरणे एव शाखासाहित्यं प्रस्तरस्य, न तु होमे इत्युक्तं चतुर्थे (४।२) तत्तु न समप्रधानत्वेन प्रस्तरप्रहरणस्यैव शाखाप्रहरणस्यापि शाखाप्रतिपत्तितया, किन्तु प्रस्तरप्रहरणे शाखासाहित्यं गुणत्वेन मैत्रावरुणग्रहे इव पयःसाहित्यं ' सहयुक्तेऽप्रधाने ' इत्यनुशासनेन गुणत्वावगमात् । इति प्राप्ते, शाब्दबोधे गुणत्वश्रवणेऽपि प्रयाजशेषाभिघारणन्यायेन आर्थिकप्रतिपत्त्यन्तरविधिकल्पनेन प्रस्तरवत् शाखाया अपि कृतार्थत्वाविशेषेण प्रतिपाद्यत्वम् । अत एव शाब्दबोधे गुणत्वश्रवणमपि प्रस्तरप्रहरणकाले प्रतिपत्त्यर्थमित्युक्तम्, न तु स्वयं तन्त्रम् । अतश्च असंनयतः शाखां विनैव प्रस्तरप्रहरणम् । पौर्णमास्यां च यथाशक्तिप्रयोगे प्रस्तराभावेऽपि ' गुणलोपे च ' इति न्यायेन शाखाप्रहरणम् ।

मण्डन— ' शाखां क्षिपेत् प्रस्तरहोमकाले । '

शंकर— ' प्रतिपाद्या हुतौ शाखा । ' हुतौ प्रस्तरस्य प्रहरणे प्रहरणकाले शाखा प्रतिपाद्या अग्नौ प्रक्षेप्या इत्यर्थः ।

* दर्शे **शाखामार्जने** (शाखायाः मार्जनं तत्रत्यधूलिनिरसनम्) ' ऊर्जे त्वा ' इति मन्त्रः । वि. २।१।१५, * दर्शे **सांनाय्यदोहे** ' उत्तरा दोहयति ' इति उत्तराशब्देन विद्यमानाः स्वीयाः तिसृभ्यः उत्तराः सर्वा गावो दोग्धव्याः । ११।१।९, * दर्शे **सांनाय्यपात्रप्रोक्षणे** ' शुन्धध्वं ' इत्यादिर्मन्त्रः संनिधिपाठात् । क्रमाधिकरणम् । ३।३।५, * दर्शे **सोमयाजिनः** सांनाय्यम्, असोमयाजिनस्तु आग्नेयैन्द्राग्नौ पुरोडाशौ । १०।८।१४.

* **दर्शामावास्याशब्दौ** एकार्थौ । भा. ४।४।११।३४.

* **दर्शेष्टेः** प्रागुदयात् प्रक्रमः, न तु अहनि । संकर्ष. ३।१।४,

* **दर्शतन्त्रेण** निशीष्टिप्रयोगः । भाट्ट. १२।२।५.

* **दर्शपूर्णमासौ** । अग्नीनाधाय सर्वः संकल्पयति पर्वणिपर्वणि मया दर्शपूर्णमासौ कर्तव्यौ इति । भा. ९।१।११।३५. * दर्शपूर्णमासौ अवघातनिष्पन्नैरेव तण्डुलैः अवान्तरापूर्वद्वारेण परमापूर्वं जनयतः । वि. १।१।१, * ' दर्शपूर्णमासौ इष्ट्वा सोमेन यजेत ' अत्रेष्टिसोमयोः पौर्वापर्यं न नियतम्, ' सोमेन यक्ष्यमाणोऽग्नीनादधीत ' इत्यपि श्रवणात् । ५।४।३. * दर्शपूर्णमासौ कुर्वाणस्य

ज्यौतिष्टोमिकमन्त्रब्राह्मणं न कचिदुपयुज्यते इति असदपि नाधिकारं व्यावर्तयति, इष्टिवेदनेनैव योग्यतायाः सिद्धत्वात् । वा. ३।८।८।१८. * दर्शपूर्णमासौ त्रिंशतं वर्षाणि कर्तव्यत्वेन विहितौ । **संकर्ष.** १।३।७. * दर्शपूर्णमासौ नित्यं कर्म, वाक्यान्तरेण काम्यं च । ‘यावज्जीवं दर्शपूर्णमासाभ्यां यजेत’ ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति । **के.** * दर्शपूर्णमासौ प्रकृत्य आमनन्ति ‘दाक्षायणयज्ञेन यजेत प्रजाकामः, साकंप्रस्थायीयेन यजेत पशुकामः, संक्रमयज्ञेन यजेतान्नाद्यकामः’ इति अत्र दर्शपूर्णमासयोरेव गुणात् फलमुच्यते न कर्मान्तराणि । **भा.** २।३।४।५–११. * दर्शपूर्णमासौ प्रतिशाखं न भिन्नौ इतिपक्षः संयोग–रूप–चोदना–आख्याऽविशेषात् । तत्र स्वर्गकाम इति फलसंयोगः, आग्नेयाष्टाकपालादिकं रूपम्, ‘दर्शपूर्णमासाभ्यां यजेत’ इति चोदना, दर्शपूर्णमासौ इत्याख्या च एकैवेति न कर्मभेदः । **वि.** २।४।२. * दर्शपूर्णमासौ संहत्य फलं साधयतः ‘प्रयोजनाभिसंबन्धात्०’ (११।१।१।१) इति न्यायात् । सु. पृ. ५४४. * दर्शपूर्णमासौ समानतन्त्रौ । **भा.** ११।३।१६। ५४, * दर्शपूर्णमासौ सर्वकामार्थौ । दर्शपूर्णमासन्यायः । ४।३।१०।२५–२६. * ‘दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत’ अत्र कालार्थः संयोगः, न सोमो दर्शाद्यङ्गम् । **वि.** ४।३।१६. * दर्शपूर्णमासाभ्यां ऊर्ध्वमेव सोमविकारा गवादय एकाहाः कार्याः न प्राक् । **भा.** ५।४।९।२६, * ‘दर्शपूर्णमासाभ्यां यजेत’ इति दर्शपूर्णमासशब्दो हि यजिवचनः करणभावोऽत्र यजेः श्रूयते । दर्शपूर्णमासाख्येन यागसमुदायेन अन्यत् कुर्यात् इति । यत् ततोऽन्यत्, तत् कर्तव्यतया चोद्यते न यजिः । अपूर्वं च तत् । ७।१।१।३. * ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ अयं कर्मफलसंबन्धपरः काम्यपुरुषार्थाधिकारविधिः । बाल. पृ. १४. * ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति आत्मनेपदश्रुत्या साङ्गप्रधानफलस्य यजमानगामित्वं प्रतीयते । **वि.** ३।८।१४, * दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति श्रुतं फलं आग्नेयादीनां षण्णां प्रधानानां साङ्गानां तन्त्रेण स्वर्गः फलम्, न तु प्रतिप्रधानं पृथक् । ११।१।१.

* **दर्शपूर्णमासयोः** ‘अगन्म स्वः सं ज्योतिषाऽभूम’ इत्यादिः फलसंबद्धो मन्त्ररूपो धर्मः अपूर्वप्रयुक्त एव न फलप्रयुक्तः । तेन सौर्ये ‘अगन्म ब्रह्मवर्चसम्’ इत्यादिरूहः कर्तव्यः । फलदेवताऽधिकरणम् । **भा.** ९।१।३।४–५, * दर्शपूर्णमासयोः ‘**अग्नये जुष्टं निर्वपामि**’ इत्यग्निशब्दः समवेतवचनो विकृतौ ऊहितव्यः । ९।१।१३।३८–३९ वर्णकं १, * दर्शपूर्णमासयोः ‘**अग्नेरहमुज्जितिमनूज्जेषम्**’ इत्यादिः देवतासंबद्धो मन्त्ररूपो धर्मः अपूर्वप्रयुक्तो न देवताप्रयुक्तः । तेन सौर्ये कर्मणि ‘सूर्यस्याहमुज्जितिम्’ इत्यूहः कर्तव्यः । फलदेवताऽधिकरणम् । ९।१।३।४–५. * दर्शपूर्णमासयोः अग्नेरुद्वाने ज्योतिष्मतीष्टिर्न प्रायश्चित्तम् । सा हि अग्निहोत्रार्थाग्नेरुद्वाने विहितेति । **वि.** ९।४।७. * दर्शपूर्णमासयोः **अग्न्यन्वाधानं** समन्त्रकम् । **भा.** १२।१।१०।१९. * दर्शपूर्णमासयोः अग्न्यादि**संमार्ग**पर्यग्निकरणादि गुणकर्म, न प्रधानकर्म । अग्निसंमार्गाधिकरणम् । **के.** २।१।४।९–१२. * दर्शपूर्णमासयोः **अग्निप्रणयनं** अधर्मकम् । **भा.** ७।३।८।१९, * दर्शपूर्णमासयोः **अग्निप्रणयने** उत्तरवेदिर्नास्ति । ७।३।८।२०. * दर्शपूर्णमासयोः ‘**अग्निहोत्रहवणी** च शूर्पं च’ ‘अग्निहोत्रहवण्या हवींषि निर्वपति’ । **वि.** ३।१।५, * दर्शपूर्णमासयोः **अग्नीषोमीयपुरोडाशस्य** सोमादूर्ध्वमुत्कर्षात् तद्विकारोऽपि सोमादूर्ध्वमुत्कृष्टव्यः । यत्र अग्नीषोमौ देवता स सर्वस्तद्विकारः । ५।४।८, * दर्शपूर्णमासयोः **अङ्गानि** सर्वाणि संभूय उपकारजननेन करणाकाङ्क्षां पूरयन्ति । ११।१।३. * दर्शपूर्णमासयोः **अङ्गक्रमः** कियांश्चित्–प्रधानयागः नारिष्ठहोमाः प्राशित्रभक्षणं इडाभक्षणं अनुयाजाः सूक्तवाकः शंयुवाकः परिधिप्रहरणं भक्षाः पत्नीसंयाजाः फलीकरणहोमः प्रायश्चित्तहोमः कपालोद्वासनं इति । **के.** * दर्शपूर्णमासयोः **अङ्गप्रधानयोः** एकदेशकालकर्तृकत्वम् । अङ्गप्रधानयोः इति बिन्दौ अधिकरणम् । **भा.** ११।२।२।८–१२. * दर्शपूर्णमासयोः **अङ्गारेषु** कपालोपधानं पुरोडाशधर्मः, नासौ सौर्ये चरौ स्यात् । सौर्ये चरौ उपधानस्य इत्यत्र द्रष्टव्यम् । **के.** १०।१।१६। ५७. * दर्शपूर्णमासयोः **अङ्गारापोहनादीनि** संस्पर्शादीनि च प्रतिप्रधानं भिद्यन्ते । **भा.** ११।१।१०।५५.

* दर्शपूर्णमासयोः **अतिपाते** वैश्वानरेष्टिपाथिकृतेष्ट्योर्विकल्पः । प्रायश्चित्तानां दोषनिर्घातार्थानां इत्यत्राधिकरणम् । वि. १२।३।५, * दर्शपूर्णमासयोः **अधिवापः** ‘अधि च वपति कपालानि चोपदधाति’ । पेषणार्थे दृषदि तण्डुलस्थापनं अधिवापः । ३।८।१०, * दर्शपूर्णमासयोः **अनारभ्यविधिप्राप्तस्य** येयजामहस्य ‘नानुयाजेषु येयजामहं करोति’ इति । तत्र अनयोर्नित्यं बाधो विकल्पेन वा इति निरूपणार्थे नञ् । अयं प्रतिषेधार्थः पर्युदासार्थो वा इति चिन्तायाम्, श्रुत्या नञः प्रधानभूतविधायकान्वयेन निषेधार्थत्वं इति प्राप्ते, प्रतीतमपि निषेधार्थत्वं ‘नेक्षेत’ इत्यत्र व्रतशब्दसामानाधिकरण्यात् अनङ्गीकृत्य उपसर्जनीभूतधात्वर्थान्वयेन पर्युदासः अङ्गीकृतः । सु. पृ. ८. * दर्शपूर्णमासयोः **अनुयाजः** तृतीयः स्विष्टकृद्देवतासंस्कारकतया संनिपत्योपकारकः । अनुयाजस्य तृतीयस्य इत्यत्राधिकरणम् । के. १०।४।१९।३८. * दर्शपूर्णमासयोः **अनृतं वदन्** नरकं प्राप्नुयात्, दर्शपूर्णमासफलं चाविकलमेव आप्नुयात् । वा. ३।४।४।१३ पृ. ९१२. * दर्शपूर्णमासयोः **अनृतवदननिषेधः** अङ्गम् । वि. ३।४।८, * दर्शपूर्णमासयोः **अन्वाधानकरणमन्त्रः** ‘ममाग्ने वर्चो विहवेष्वस्तु’ इत्यादिः अध्वर्युणा पठनीयः, तदुक्तं फलं तु याजमानमेव । वर्चोन्यायः । ३।८।१४. * दर्शपूर्णमासयोः **अन्वारम्भणीया** पुरुषं आरभमाणं प्रथमं दर्शपूर्णमासयोः प्रवर्तमानं कर्तारं आरम्भणयोग्यं करोति । भा. ९।१।१०।३४–३५ वर्णकं २, * दर्शपूर्णमासयोः **अन्वारम्भणीयायाः आदौ** सकृदनुष्ठानम् । आरम्भणीयान्यायः । ९।१।११।३४–३५ वर्णकं १. * दर्शपूर्णमासयोः **अन्वाहार्यः** परिक्रयार्था दक्षिणा । सा स्वामिना कार्या नाध्वर्युणा । ऋत्विक्परिक्रयः स्वामिकर्म इत्यत्र । के. ३।८।१।१–२. * दर्शपूर्णमासयोः **अन्वाहार्यस्य** पाको विक्लृत्यर्थः । आग्रयणे वासोवत्सयोः अयं धर्मो लुप्यते । वि. १०।३।९. * दर्शपूर्णमासयोः **अन्वाहार्यदक्षिणायां** ब्राह्मणा एव दृश्यन्ते ‘एते वै देवा अहुतादो यद् ब्राह्मणाः’ इत्यादौ । भा. १२।४।१५।४७. * दर्शपूर्णमासयोः **अन्वाहार्यधर्मः** अभिघारणम्, तच्च स्वादुताकरणार्थम् । आग्रयणे वासोवत्सयोर्दक्षिणारूपयोः अभिघारणं बाध्यते । वि. १०।३।१०. * दर्शपूर्णमासयोः ‘**अपः प्रणेष्यन्** वाचं यच्छति, तां सहविष्कृता विसृजति’ इति हविष्कृद्ग्रहणं काललक्षणार्थं इत्युक्तम् (३।२।३।५–६) । भा. ११।३।७।१५. * दर्शपूर्णमासयोः **अपां प्रणयनं** चमसेन । वि. १।४।२. * दर्शपूर्णमासयोः **अपां प्रणयनस्य** संयवनं प्रयोजकम्, निनयनं तु प्रतिपत्तिः । निनयनन्यायः । के. ४।२।५।१४–१५. * दर्शपूर्णमासयोः **अपां प्रणयने** गोदोहनं पुरुषार्थम्, न क्रत्वर्थम् । वि. ४।१।२ वर्णकं ३, * दर्शपूर्णमासयोः **अपां प्रणयने** मृन्मयगोदोहनादिपात्रमनित्यं काम्यत्वात् । ४।३।२. * दर्शपूर्णमासयोः **अपां व्युत्सेकस्य** भक्त्या अवभृथत्ववादः ‘एष वै दर्शपूर्णमासयोरवभृथः’ इति । भा. ७।३।४।१४. * दर्शपूर्णमासयोः **अपूर्वं** चतुर्विधम् । स्वर्गजनकमपूर्वं फलापूर्वं परमापूर्वं इति यदुच्यते । अमावास्यायां त्रयाणां यागानां एकः समुदायः, आग्नेयपुरोडाश–उपांशुयाज–अग्नीषोमीयपुरोडाशयागानामपरः समुदायः, इति समुदायजन्यं समुदायापूर्वम् । एकैकस्मिन् समुदाये यागत्रयजन्यानि त्रीणि त्रीणि उत्पत्त्यपूर्वाणि । प्रयाजाद्यङ्गजन्यानि प्रोक्षणाद्यङ्गजन्यानि च अङ्गापूर्वाणि । तत्र संनिपत्योपकारकजन्यानि उत्पत्त्यपूर्वनिष्पत्तौ व्याप्रियन्ते, आरादुपकारकजन्यानि तु समुदायापूर्वनिष्पत्तौ । वि. २।१।२, * दर्शपूर्णमासयोः ‘**अभिक्रामं जुहोति**’ इत्याद्यभिक्रमणादीनां प्रयाजाङ्गत्वं तद्द्वारा तु दर्शाद्यङ्गत्वमपि । अभिक्रमणाधिकरणम् । ३।१।१०, * दर्शपूर्णमासयोः **अभिघारणम्** । पुरोडाशाद्यवदानकाले क्रियते स्रुचि अवयवसंश्लेषनिवारणार्थे उपस्तरणं चाभिघारणं चेति । १०।२।२. * दर्शपूर्णमासयोः **अभिमर्शनं** अपूर्वप्रयुक्तमेव, न तु पौर्णमास्यादिसमुदायप्रयुक्तम् । भा. ९।१।५।११–१९, * दर्शपूर्णमासयोः **अभिमर्शनस्य** अङ्गप्रधानसाधारणहविर्मात्रार्थता । अभिमर्शनाधिकरणम् । ३।७।४।८, १०. * दर्शपूर्णमासयोः **अभ्यूहनं** पुरोडाशधर्मः ‘वेदेन भस्मनाऽङ्गारानभ्यूहति’ नासौ सौर्ये चरौ स्यात् । के. १०।१।१८।५९. * दर्शपूर्णमासयोः **अवघातः** तण्डुलनिष्पत्तिपर्यन्तं

अभ्यासेन कर्तव्यः । अवघातादिक्रियाणां इत्यत्राधिकरणम् । **वि.** ११।१।५, * दर्शपूर्णमासयोः **अवघातः** नापूर्वजनकः, दृष्टार्थत्वात् । नियमापूर्वहेतुत्वेन तु विधेयः । २।१।३, * दर्शपूर्णमासयोः **अवघातस्य** प्रधानं प्रयोजकम् । ४।२।११, * दर्शपूर्णमासयोः **अवघातादिविधयो** यथा व्रीहिषु प्रवर्तन्ते, तथा व्रीहिप्रतिनिधिभूतेषु नीवारेष्वपि साक्षात् प्रवर्तन्ते, व्रीहित्वजातिविकलेष्वपि मुख्यैकदेशरूपत्वान्नीवाराणाम् । ३।६।१४. * दर्शपूर्णमासयोः **अवघातपेषणविधिर्नियमार्थः** । अवघातादिसंस्कारविधिर्नियमविधिः इत्यत्र अधिकरणम् । **भा.** ४।२।११।२६, * दर्शपूर्णमासयोः **अवघातमन्त्रः** 'अव रक्षो दिवः सपत्नं वध्यासम्' इति प्रथमप्रहारे सकृदेव पठनीयः, न तु प्रतिप्रहारम् । अवघातन्यायः । ११।४। १२।४२ (४५). * दर्शपूर्णमासयोः **अवज्वलनं** पुरोडाशधर्मः 'दर्भपिञ्जूलैरवज्वलयति' । नासौ सौर्ये चरौ स्यात् । **के.** १०।१।१९।६०, * दर्शपूर्णमासयोः **अवदानेन** प्रदानान्तेन अनुसमयः, न तु अवदानमात्रेण । अवदानादिप्रदानान्तानुसमयः । ५।२।४।६. * दर्शपूर्णमासयोः **अवभृथः** अपां व्युत्सेकरूपः औपचारिकः । 'एष दर्शपूर्णमासयोरवभृथः' । **वि.** ७।३।४. * दर्शपूर्णमासयोः **अवहननविधिः** नियमार्थः, नानुवादः । **भा.** ४।२।११।२६.

दर्शपूर्णमासयोः असोमयाजिनः पुरोडाशद्वयश्रवणमनुवादः ॥

पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद् वैश्यस्तोमवत् । १०।८।१४।३५ ॥

भाष्यम्— दर्शपूर्णमासयोः इदमाम्नायते 'पुरोडाशाभ्यामेव असोमयाजिनं याजयेत्, यावेतौ आग्नेयश्चैन्द्राग्नश्च' इति । तत्रैष संशयः किं अधिकारश्रुतिवाक्यशेषोऽयम् 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति आभ्यां पुरोडाशाभ्यामसोमयाजी इति । अथ किमधिकयोः कर्मान्तरयोरुत्पत्तिः अपराभ्यामेवंजातीयकाभ्यां पुरोडाशाभ्यां यजेतेति, अथवा अङ्गकर्तुरुपदेशः आभ्यां पुरोडाशाभ्यामृत्विक् याजयेदिति, अथवा असोमयागकाले आभ्यां यजेतेति कालोपदेशः, उतैन्द्राग्नस्य विधिराग्नेयस्य चानुवादः, अथवा उभयोरनुवाद इत्येते पक्षाः । किं तावत् प्राप्तम् ? अधिकारशेष इति । यदेतत् स्वर्गकामो यजेतेति, तस्य शेषः, आभ्यां पुरोडाशाभ्यामसोमयाजी स्वर्गकामो यजेतेति । कुतः ? तच्छ्रुतित्वात् । तच्छ्रुतिमन्तौ हि पुरोडाशौ शब्देनानूद्येते । तेन नाभ्यधिकौ । असोमयाजिनश्च कर्तुर्व्यापारः आभ्यां संबध्यते श्रुत्या, न कालः । स हि लक्ष्येत । श्रुतिश्च लक्षणाया गरीयसी । तत्र सोमयाजिनो वा न पुरोडाशौ, असोमयाजिनो वा न सांनाय्यम् । यदि पुरोडाशौ अधिकृत्य असोमयाजी विधीयते, ततो नासोमयाजी सांनाय्ये । तत्र एवकारः समर्थितो भवति । पुरोडाशाभ्यां केवलाभ्यामसोमयाजी, न सांनाय्येनेति । अथ असोमयाजिनमधिकृत्य पुरोडाशौ विधीयेते, तथा न सोमयाजिनः पुरोडाशौ । तत्र अस्थाने एवशब्दो भवति, पुरोडाशाभ्यामसोमयाजिनमेवेति । यथा 'यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् । यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मां ब्रूया निधिपाय ब्रह्मन् ॥' इति । (निरुक्तम् २।४)। यं शुचिमेव विद्या इति वदितव्ये यमेव विद्याः शुचिमिति । एवमत्रापि । तदुभयोरपि वचनव्यक्त्योः अधिकारश्रुतिवाक्यशेषः इत्युभयथाऽयं पूर्वपक्षो भवति । यथा वैश्यस्तोमे अधिकारश्रुतिशेषः 'वैश्यो वैश्यस्तोमेन यजेत' इति, तद्वदत्रापि अधिकारश्रुतिशेष एवेति ।

न त्वनित्याधिकारोऽस्ति, विधेर्नित्येन संबन्धस्तस्मादवाक्यशेषत्वम् । ३६ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । नैतदेवम्, अधिकारवाक्यशेष इति । नित्यौ हि दर्शपूर्णमासौ 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति । नित्यौ च । तत्रेमौ पुरोडाशौ फलं प्रति सहकारिणौ । तौ अनित्यमसोमयाजिनं प्रति विधीयेते इत्यनुपपन्नम् । कथम् ? नित्यौ हि दर्शपूर्णमासयोर्भविष्यतः । यश्च असोमयाजी तस्योपकरिष्यतः इति नोपपद्येत । पुरोडाशविधेर्नित्येन दर्शपूर्णमाससमुदायेन संबन्धः । तस्मान्न असोमयाज्यधिकारश्रुतिवाक्यशेषः । किं तर्हि ? अधिकयोः कर्मान्तरयोरुत्पत्तिरिति । नैवमभिसंबन्धः क्रियते 'यावेतौ पुरोडाशौ दर्शपूर्णमासयोर्विहितौ, तौ प्रति असोमयाजी

विधीयते ' इति । कथं तर्हि ? असोमयाजी यः स्वर्गकामः, स आग्नेयं कुर्यादैन्द्राग्नं च इत्येते कर्मणी विधीयेते । विधीयेते चेत् पूर्वाभ्यां कर्मान्तरे । तत्र यावेतौ इत्यनुवादवचनं धर्मापेक्षं भविष्यति । यथा ' एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा ' इति । एवशब्दश्च पुनरित्यस्मिन्नर्थे भविष्यति । यथा क्षीरेण भुक्त्वा देवदत्तः क्षीरेणैव भुञ्जीतेति । भुञ्जीतैवेति पुनरिति गम्यते । एवमिहापि सोमयाजिनश्च असोमयाजिनश्च दर्शपूर्णमासविधानेन विहितौ पुरोडाशौ, पुनः असोमयाजिनस्तौ विधीयेते, पुरोडाशाभ्यामेव असोमयाजिनं याजयेदिति । तद्धर्मकामाभ्यामिति गम्यते ।

सति च नैकदेशेन, कर्तुः प्रधानभूतत्वात् । ३७ ॥

भाष्यम्— सति चाधिकारशेषे पुरोडाशयोः असोमयाजिकर्तृसंबन्धो नोपपद्यते । अधिकारशेषे हि प्रधानभूतः कर्ता निर्दिश्यते । न चासति फले प्रधानभाव उपपद्यते । न च दर्शपूर्णमासैकदेशभूतौ पुरोडाशौ फलस्य साधकौ भवतः । न च वचनप्रामाण्यात् फलं कल्पयिष्यते । वचनव्यक्त्यन्तरस्य भावात् । तस्मादपि नास्त्यधिकारशेष इति ।

कृत्स्नत्वात्तु तथा स्तोमे । ३८ ॥

भाष्यम्— यदुपवर्णितम्, वैश्यस्तोमवदिति, युक्तं वैश्यस्तोमे । कृत्स्नो वैश्यस्तोमो न कस्यचिदेकदेशः । तत्र फलं संभवति । न चात्र फलं संभवति । न च तत्र किञ्चिदेकं नित्यमनित्येन संबध्यते । तस्माद्वैषम्यं वैश्यस्तोमेन ।

कर्तुः स्यादिति चेत् । ३९ ॥

भाष्यम्— इति चेन्मन्यसे नाधिकारश्रुतिशेषोऽवकल्पते इति । तत्रोच्यते । कर्मान्तरयोरुत्पत्तिः नावकल्पते । यावेतौ इति व्यपेक्षावचनं लक्षणया कल्प्येत । कथं तर्हीदमिति ? अङ्गकर्तुरुपदेशः । अङ्गे यः कर्ता, न प्रधाने । याजयेदिति हेतुकर्तुरेवैतत् प्रत्यक्षं वचनम् । लक्षणया यजेः कर्तुः । अपि च नित्यानित्ययोर्विरुद्धः संबन्धः अभ्युपगतो न भविष्यति । न चैकदेशस्य फलं कल्पयिष्यते । असोमयाजी पुरोडाशाभ्यां याजयितव्यः इति याजयितुरुपदेशः अभ्युदयाय भविष्यति ।

न गुणार्थत्वात्, प्राप्ते च नोपदेशार्थः । ४० ॥

भाष्यम्— नैतदेवम्, अङ्गकर्तुरुपदेश इति । अङ्गकर्ता हि प्रधानकर्तुरेव क्रियोपदेशेन गुणभूतः प्राप्नोति । न चास्य फलं श्रूयते । न च कल्पयितुं शक्यम्, उपग्रहविशेषात् । न च प्राप्तस्य पुनरुपदेशे किंचिदस्ति प्रयोजनम् । अर्थप्राप्तस्य तु अनुवादः पुरोडाशयोर्यागं विधातुम् । न च परिसंख्या, त्रिदोषत्वात् । सोमयाजिनश्च विना अङ्गकर्त्रा असंभवात् । तस्मात् कर्मान्तरयोरुत्पत्तिरिति ।

कर्मणोस्तु प्रकरणे तन्न्यायत्वाद् गुणानां लिङ्गेन कालशास्त्रं स्यात् । ४१ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । नाधिकृयोः कर्मान्तरयोरुत्पत्तिरिति । एतयोः कर्मणोः प्रकरणे कालः उच्यते । नासोमयाजिनं कर्तारं प्रति पुरोडाशौ विधीयेयाताम् । कुतः ? तन्न्यायत्वात् । स हि न्यायः, योऽसावुक्तः । ' अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ' इति । इहापि स एव न्यायः । असोमयागकाले दर्शपूर्णमासयोरेतौ पुरोडाशौ भवत इति । किमेवं भविष्यति ? फलकल्पनादोषो न भविष्यति । यदा समुदायः पूरयिष्यते, तदा सर्वेषां संहतानां फलं भविष्यतीति । शक्यते च असोमयागेन विशेषलिङ्गेन कालो लक्षयितुम् । तस्मिन् काले पुरोडाशाभ्यामेव यजेत, न सांनाय्येनेति ।

यदि तु सांनाय्यं सोमयाजिनो, न ताभ्यां समवायोऽस्ति, विभक्तकालत्वात् । ४२ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । यदि सांनाय्यं सोमयाजिनः, न कालार्थे श्रवणं भवितुमर्हति । सांनाय्यं च सोमयाजिन एव । अनाशङ्किते तस्मिन् आशङ्कितवचनम् । यथा ' शास्त्राणि चेत् प्रमाणं स्युर्गतास्ते परमां गतिम् ' इति । एवं हि श्रूयते ' नासोमयाजी संनयेत् ' इति । एवं सति न कालार्थे श्रवणम् । कथम् ? नैव ताभ्यां पुरोडाशाभ्यां सांनाय्यस्य समवायः प्राप्तः, विभक्तकालत्वात् । प्राक् सोमयागात् पुरोडाशौ,

ऊर्ध्वं सांनाय्यं प्राप्तमेव । न तदर्थं यतितव्यम् । तस्मान्न कालार्थं श्रवणम्, कर्मान्तरचोदनैवेति ।

अपिवा विहितत्वाद् गुणार्थायां पुनःश्रुतौ संदेहे श्रुतिर्द्विदेवतार्था स्याद् यथाऽनभिप्रेतस्तथाऽऽग्नेयो दर्शनादेकदेवते । ४३ ॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः । नैतत् कर्मान्तरचोदनेति । अनुवादः आग्नेयस्य विहितत्वात् । विहितो हि असौ उभयत्र ‘यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति’ इति । ऐन्द्राग्नस्य भवति विधिः, उभयत्र अविहितत्वात् । स यत्र न प्राप्नोति, पौर्णमास्यां ऐन्द्राग्नविधानार्था एषा श्रुतिः । यथा अनभिप्रेतः, तथा आग्नेयः उच्चरितः । विधानं चोभयत्र । तस्य दर्शनं च ‘आग्नेयं चतुर्धा करोति’ इति । तथा साकंप्रस्थायीये ‘आज्यभागाभ्यां प्रचर्य आग्नेयेन पुरोडाशेन’ इति ।

विधिं तु बादरायणः । ४४ ॥

भाष्यम्— तुशब्दः एतमपि पक्षं व्यावर्तयति । नैतदेवम् । आग्नेये अनुवादः ऐन्द्राग्ने विधिरिति । उभयोः कालविधिः स्यात् । कुतः ? बादरायण आचार्यो मन्यते स्म, प्रागपि सोमयागात् सांनाय्यविधिरिति । असोमयाजिनोऽपि सांनाय्यं श्रूयते, तदु संनयेदिति । तथा ‘तथेह स्माहुर्गोपायनाः सांनाय्यमेवासोमयाजिनः’ । तस्मात् कालार्थः संयोग इति ।

प्रतिषिद्धविज्ञानाद्वा । ४५ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । नैतदस्ति, कालविधिरिति । नाप्यधिकयोः कर्मणोरुत्पत्तिः, न वा आग्नेयस्यानुवादः, ऐन्द्राग्नस्य विधिः । किं तर्हि उभयोरनुवादः । कथम् ? सोमयाजिनः सांनाय्यविधानार्थं एतद्वाक्यम् । अतो नैन्द्राग्नस्यापि विधिः । भिद्येत हि तदा वाक्यम् । एवमभिसंबन्धः क्रियते असोमयाजिनः पुरोडाशावेतौ, यौ प्राप्तौ, सोमयाजिनः सांनाय्यमपरमपीति । पुरोडाशाभ्यामेव असोमयाजिनं याजयेत् यावेतौ आग्नेयश्चैन्द्राग्नश्च, सांनाय्येन सोमयाजिनमिति, एवमेकेन वाक्येन सोमयाजिनः सांनाय्यं विधीयते, अपरेणापि वाक्येन असोमयाजिनः । तस्मादुभयोरपि अनुवाद इति ।

तथा चान्यार्थदर्शनम् । ४६ ॥

भाष्यम्-- अन्यार्थोऽपि चैतमर्थं दर्शयति, न कर्मान्तरे इति । कथम् ? ‘चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्’ इति । कर्मान्तरोत्पत्तौ अभ्यधिका आहुतयो भवेयुरिति ।

सोम— उपांशुयाजाज्ये चतुरवदानबाधाभावेऽपि इह असोमयाजिनः सांनाय्यबाधः सोमयाजिनः पुरोडाशबाधो वा इत्युत्थानात् **संगतिः** । **सूत्रार्थस्तु**—पुरोडाशाभ्यामेव असोमयाजिनं इत्यधिकृतानां असोमयाजिनां पुरोडाशयोरुपदेशः, पुरोडाशयोः असोमयाज्यधिकारोपदेशः इति यावत् । तच्छ्रुतित्वात् असोमयाजिन एव श्रुतत्वात् । यथा ‘वैश्यस्तोमेन यजेत’ इत्यत्र वैश्यस्यैव श्रुतत्वात् तस्यैवाधिकारः इति ।

वि— ‘सप्त पक्षाः (१) पुरोडाशाभ्यामेवेत्यधिकारिणः । शेषः स्यात् तच्छ्रुतेर् (२) मैवं कार्त्स्न्यनित्यत्वबाधनात् ॥ कर्मान्तरविधिर् (३) मैवं प्रत्यभिज्ञैवकारतः । णिजर्थस्य विधिर् (४) मैवमाफल्यात् स्वार्थवर्जनात् ॥ कालस्यास्तु विधिर् (५) मैवं लक्षणायाः प्रसङ्गतः । ऐन्द्राग्नैकविधिर् (६) मैवं वैषम्याच्चैवकारतः ॥ कालो लाक्षणिकोऽप्यस्तु स्वार्थत्वायेति चेत् (७) न तत् । स्तुत्या विध्येकवाक्यत्वात् सार्थत्वाच्चानुवादता ॥’ (अत्र पूर्वं पूर्वं पक्षं निरस्य उत्तरोत्तरपक्षस्य निवेशः । सप्तमः पक्षश्च सिद्धान्तः) ।

भाट्ट— दर्शपूर्णमासयोः ‘नासोमयाजी संनयेत्’ इत्यसोमयाजिनः सांनाय्यपर्युदासः श्रुतः । तच्छेषतया च ‘पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् द्वावेतावाग्नेयश्चैन्द्राग्नश्च’ इति श्रुतम् । सोऽयं पर्युदासविधेरेवार्थवादः । ऐन्द्राग्नस्य ‘ऐन्द्राग्नमेकादशकपालं निर्वपेदमावास्यायामसंनयतः’ इति सांनाय्याभाव एव विहितत्वादौचित्येन स्तुत्युपपत्तेः । यदा विधिस्तदा कीदृश इति चिन्त्यते । तत्र पुरोडाशाभ्यामेव असोमयाजी अधिक्रियते न सांनाय्येनेति प्रथमः पक्षः । पर्युदासविधिना एवास्यार्थस्य सिद्धेः ‘तदु संनयेत्’ इति शाखाऽन्तरवचनेन असोमयाजिनोऽपि सांनाय्यविधानात् पुरोडाश-

योरसोमयाजी एवाधिक्रियते, न सोमयाजीति **द्वितीयः**। सोमयाजिनः आग्नेयाभावप्रसङ्गात्, सांनाय्यस्य सोमयाजिनो नियतत्वेन च तदभावविहितैन्द्राग्नस्य सोमयाजिनः प्रसक्त्यभावात् एतत्पक्षानुपपत्तेः कर्मान्तरं विधीयते इति **तृतीयः**। कर्मान्तरत्वे प्रमाणाभावात् एवकारश्रवणाच्च तदनुपपत्तेः याजनविधिरिति **चतुर्थः**। फलाश्रवणात् रागतः प्राप्तत्वाच्च एतत्पक्षस्यापि अनुपपत्तेः असोमयागकाले पुरोडाशाविति कालविधिरेव श्रेयानिति **पञ्चमः**। तदपि ऐन्द्राग्नस्य असोमयागकाले एव प्राप्तत्वात् आग्नेयस्य च असोमयागकालविधौ सोमयाजिनः प्रतिषेधापत्तेः अच्युतवाक्यावगतसर्वदातनत्वबाधापत्तेः अर्थवाद एवायं इत्यौदुम्बराधिकरणसिद्धमिति कृत्वाचिन्तोद्घाटनम्। केषुचित्पक्षेषु आग्नेयस्य असोमयागकालबाधाच्च बाधोपयोगः।

मण्डन—'अधिकौ न पुरोडाशौ।' १५.

शंकर—'प्रागेव सोमान्नैन्द्राग्नौ।' १६.

* दर्शपूर्णमासयोः '**आग्नेयोऽष्टाकपालः**' अत्र आग्नेयशब्दो न कर्मनामधेयम्, किन्तु देवताविधायकः। आग्नेयाधिकरणम्। वि. १।४।७. * दर्शपूर्णमासयोः आग्नेयोऽष्टाकपालः। तत्र निगमेषु अग्नेरभिधानं विधिशब्देनैव अग्निशब्देन, नान्येन शुच्यादिना। विधिशब्दाधिकरणम्। के. १०।४।१२।२३-२४. * दर्शपूर्णमासयोः 'आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति विधाय पुनरुच्यते 'आग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इति। तत्र आग्नेयस्य न द्विरभ्यासः, पुनःश्रुतिस्तु ऐन्द्राग्नस्तुत्यर्था। भा. २।३।१४।२७-२९, * दर्शपूर्णमासयोः **आग्नेयः पुरोडाशः** उपांशुयाजः अग्नीषोमीयः पुरोडाशः ऐन्द्रं दधि ऐन्द्रं पयः आघारौ आज्यभागौ स्विष्टकृत् पत्नीसंयाजाः (इति यागा भवन्ति)। तत्र पयोऽन्तानि प्रधानानि आघारादीनि आरादुपकारकाणि। २।२।३।३-८. * दर्शपूर्णमासयोः **आग्नेयं अवदाय** हुत्वा पश्चात् अग्नीषोमीयादेः अवदानहोमौ इति अवदानस्य प्रदानान्तानुसमयः। अवदानादिप्रदानान्तानुसमयन्यायः इत्यत्राधिकरणम्। वि. ५।२।४, * दर्शपूर्णमासयोः '**आग्नेयं चतुर्धा करोति**' इति चतुर्धाकरणं आग्नेयस्यैव, न तु ऐन्द्राग्नाग्नीषोमीययोः। आग्नेयचतुर्धाऽधिकरणन्यायः। ३।१।१५. * दर्शपूर्णमासयोः **आग्नेयस्य अनुवाक्या** 'अग्निर्मूर्धा दिवः' इति। भा. ८।१।१६।३१. * दर्शपूर्णमासयोः **आग्नेयस्य पुरोडाशस्य** अध्वरकल्पस्थबार्हस्पत्यश्चरुर्विकारः, उपांशुयाजस्य च सारस्वतमाज्यं विकारः। वि. ५।१।१०. * दर्शपूर्णमासयोः **आग्नेयस्य प्रयाजशेषेणाभिघारणं** प्रथमं मुख्यक्रमात्, ततः सांनाय्यस्य। के. ५।१।७।१४. * दर्शपूर्णमासयोः **आग्नेयस्य प्राथम्यं** नाग्नीषोमीयस्य, ब्राह्मणपाठस्य अन्यथात्वेऽपि (तैसं. २।५।२) हौत्राध्वर्यवयाजमानकाण्डेषु आग्नेयमन्त्रस्यैव प्राथम्यात्। मन्त्रपाठस्य ब्राह्मणपाठापेक्षया बलवत्त्वात्। वि. ५।१।९. * दर्शपूर्णमासयोः **आग्नेयाग्नीषोमीयपुरोडाशयोः** मुष्टिकपालोपधान—अवदानेषु समुदायानुसमयः। समुदायानुसमयन्यायः। भा. ५।२।३।४, * दर्शपूर्णमासयोः **आग्नेयाज्यभागः** आरादुपकारकः। आग्नेयाज्यभागन्यायः। १०।१।८।१६-१८, * दर्शपूर्णमासयोः **आग्नेयादीनां** प्रधानानामेकदेशकालकर्तृकत्वम्। ११।२।१। १-२, ४-७, * दर्शपूर्णमासयोः आग्नेयादीनां समुदितानां एकः स्वर्गः फलम्। तन्त्रन्यायः। ११।१;१।१-४.

⧗ दर्शपूर्णमासयोः आग्नेयादिप्रधानभेदेऽपि देशकालकर्तॄणामेकत्वात् आघाराद्यङ्गानां तन्त्रेणानुष्ठानम् ॥

प्रधानकर्मार्थत्वादङ्गानां तद्भेदात् कर्मभेदः प्रयोगे स्यात्। ११।१।१०।५४॥

भाष्यम्— दर्शपूर्णमासयोः प्रधानानि आग्नेयादीनि, तेषामङ्गानि आघारादीनि। तेषु चिन्त्यते किं तस्यतस्य प्रधानस्य भेदेनाङ्गानां प्रयोगः, अथवा सर्वेषां तन्त्रेणेति। अथ तत्र किं वृत्तम्? 'क्रतुवच्चानुमानेनाभ्यासे फलभूमा स्यात्' इति (११।१।७।२९)। तत्र कृत्स्नौ दर्शपूर्णमासौ उद्दिश्य कथा वृत्ता। इह तु तत्तत्प्रधानं प्रति चिन्त्यते। किं प्राप्तम्? प्रधानकर्मार्थत्वादङ्गानां तद्भेदात् कर्मभेदः प्रयोगे स्यात्। अङ्गानां प्रयोगे कर्मभेदः स्यात्, क्रियाभेदः। तस्यतस्य प्रधानस्य भेदेन अङ्गानां प्रयोगः। कुतः? प्रधानकर्मार्थत्वात्। प्रधानार्थत्वात् इत्यर्थः। प्रधानार्थेन हि अङ्गानि उपदिश्यन्ते। अङ्गवन्ति प्रधानानि

कथं स्युरिति । अङ्गसंबन्धे च प्रधानानां सहत्वं न विवक्ष्यते । नहि तत्र प्रधानानि विधीयन्ते । किं तर्हि ? अङ्गानि । न च अविधीयमानस्यार्थस्य गुणो विवक्षितो भवति । यथा ग्रहं संमार्ष्टीत्येकत्वम् । एवं चेत् एकैकस्य प्रधानस्य अङ्गैः संबन्धः कर्तव्यः । तानि यदि सकृत् क्रियेरन्, न विभागेन संबध्येरन् । यथा प्रायणीयोदयनीययोः एकादशिन्याः समस्तैश्च संबन्धः कर्तव्य इत्युक्तम्, विधेस्त्वेकश्रुतित्वादित्यत्र । तस्मात् प्रतिप्रधानमङ्गभेदः ।

टुप्— (ननु ‘अनभ्यासो वा प्रयोगवचनैकत्वात्’ इत्यत्र (११।१।७।३५) अङ्गानां सकृदनुष्ठानमुक्तम् । किमत्र चिन्त्यते ? अत आह–) भावनया इतिकर्तव्यता करणमनुगृह्णती संबध्यते । अतो नोपकृतानाम् (प्रधानानां फलभूमार्थिनाऽपि) पुनरुपकर्तव्यमित्युक्तम् । इदानीं तु विचार्यते, किं आग्नेयादीनां तन्त्रेण इतिकर्तव्यता उपकरोति, उत भेदेनेति । (तत्र) भेदेन इति ब्रूमः । कथम् ? आग्नेयादीनां सर्वेषां (तावत्) इतिकर्तव्यता उपकरोति । उपकारवेलायां च प्रधानभूतानां तेषां साहित्यमविवक्षितम् (उद्देश्यगतत्वात्) । तस्मात् एकैकस्य (एव उपकरोति, न संहतानां इति पूर्वः पक्षः । सिद्धान्तस्तु–) एकदेशकालकर्तृकत्वं वक्ष्यति अङ्गप्रधानानाम् । तेन अगृह्यमाणविशेषत्वात् सकृदेव प्रयुक्ता उपकरोति । तस्मात् तन्त्रमङ्गानामनुष्ठानम् ।

क्रमकोपश्च यौगपद्ये स्यात् । ५५ ॥

भाष्यम्— प्रधानानि च क्रमवन्ति । तानि च यथाक्रमं साङ्गानि कर्तव्यानि । तत्र यदि तन्त्रमङ्गानि स्युः, ततः अकृत्वा आग्नेयं साङ्गं अग्नीषोमीयः प्रक्रान्तः स्यात् । तथाच प्रधानानां क्रमकोपः स्यात् । अथ तु भेदः, ततः साङ्गमाग्नेयं अपवृज्य अग्नीषोमीयः साङ्गः प्रक्रान्तः क्रियते इति नास्ति क्रमकोपः । अपर आह यदि तन्त्रं भवेयुरङ्गानि, ततो यावत् तनूनपात् आग्नेयस्य उपकरोति, तावत् समिधा अग्नीषोमीयस्य उपकर्तव्यम् । स एष उपकारक्रमकोपः (कोपः विरोधः) । अपिच अङ्गारापोहनादीनि संस्पर्शादीनि (च) प्रतिप्रधानं भिद्यन्ते । तैश्च आघारादीनां अवैलक्षण्यं भविष्यति ।

तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्याद्, विशेषाग्रहणात् । ५६ ॥

भाष्यम्— तुशब्दः पक्षान्तरं परिजग्राह । न चैष पक्षः श्रेयान्, भेदः इति । किं तर्हि ? यौगपद्यं सकृत् प्रयोगः स्यात् । सकृदेव प्रयुक्तानि अङ्गानि सर्वैः प्रधानैः युगपत् संबध्यन्ते । तुल्यानां एकशब्दोपदिष्टानां च ऐदमर्थ्यं प्रति विशेषाग्रहणात् । इमानि कर्तृतो देशतः कालतश्च तुल्यानि ‘दर्शपूर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः’ ‘समे दर्शपूर्णमासाभ्यां यजेत’ ‘पौर्णमास्यां पौर्णमास्या यजेत’ ‘अमावास्यायाममावास्यया यजेत’ इति । प्रधानैश्च सह अङ्गानां एकदेशकालकर्तृकत्वं वक्ष्यति ‘अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन्’ इत्यत्र । एकेन च शब्देन प्रधानानि फलं प्रति उपदिष्टानि ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति । किमतः ? अतः तेषां फले संभूयकारित्वम् । तेन स्वर्गकामस्य सर्वेषां युगपच्चिकीर्षा, नैकशः । सर्वचिकीर्षया तु आघारादीनां क्रियमाणानां तुल्यकर्त्रादीनां न गृह्यते विशेषः कस्यैतानि आग्नेयस्य अग्नीषोमीयस्य वेति । सर्वेषां च युज्यन्ते । तस्मात् सर्वार्थानि भवन्ति । तस्मात् अनावृत्तिः ।

ऐकार्थ्यादव्यवायः स्यात् । ५७ ॥

भाष्यम्— यच्च ‘क्रमकोपश्च यौगपद्ये स्यात्’ इति, तत्र ब्रूमः । ऐकार्थ्यात् अव्यवायः स्यात्, न क्रमकोपः । कुतः ? ऐकार्थ्यात् । संभूयकारीणि एतानि इत्युक्तम् । तेषां सह क्रिया, नैकशः । नहि तत्र एकेन कृतेन कश्चिदर्थः । एकसंबन्धक्रियायां आनुपूर्व्यं स्यात् । तस्मान्न तेषां प्रयोगे क्रमः, कुतः क्रमकोप इति । यच्च उपकारे क्रमकोप इति, तत्रापि न आघारः कृतमात्र एव प्रधानेषु उपकरोति । यत् कारणं तस्मिन् काले प्रधानान्येव न सन्ति । यदा तु सर्वाण्यङ्गानि कृतानि, तदा तज्जन्यापूर्वाणि संभूय प्रधानेषु उपकुर्वन्ति । अङ्गानामपि हि संभूयकारित्वमुक्तम् ‘अथेहैकार्थ्यादैककर्म्यम्’ (११।१।२।६) इति । तस्मादुपकारेऽपि नास्ति क्रमकोपः ।

तथा चान्यार्थदर्शनं कामुकायनः । ५८ ॥

भाष्यम्— तथा च अन्यार्थदर्शनं भवति यथा न्याय उपदिष्टः इति कामुकायन आचार्यो मन्यते स्म ।

किं पुनस्तत् ? 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदश अमावास्यायाम्' इति । यदि आवृत्तिः स्यात् न त्रयोदश चतुर्दश वा व्यवतिष्ठेरन् ।

तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात्, संस्कारस्य तदर्थत्वात् । ५९ ॥

भाष्यम्— यच्च 'संस्पर्शवत् आरादुपकारिणामपि आवृत्तिरस्तु' इति, तत्र ब्रूमः । स हि न्यायः 'संभूयकारिणां सहक्रिया' इति । तन्न्यायेन सर्वत्रैव सहक्रिया । अशक्तेस्तु धर्मसंस्पर्शेषु आनुपूर्व्यं स्यात्, भेदेन क्रिया । न शक्यते एकस्मात् अङ्गारापोहनेन सर्वेषां पाकः कर्तुम् । न च एकस्मिन् पुरोडाशे प्रथिते सर्वे प्रथिता भवन्ति । संस्कारस्य तदर्थत्वात्, संस्कारोऽयं पाकार्थो विधीयते । तत एवं प्रत्यक्षोपकारिणः प्रतिप्रधानमावृत्तिः स्यात् । अन्यथा याग एव न संवर्तेत ।

असंस्पृष्टोऽपि तादर्थ्यात् । ६०॥

भाष्यम्-- असंस्पृष्टोऽपि आघारादिः प्रतिप्रधानमावर्तते । कुतः ? तादर्थ्यात् । यस्य समीपे कृतः, तदर्थ इति गम्यते विशेषः । आघारादीनि आज्यभागान्तानि आग्नेयस्य, स्विष्टकृदादीनि अग्नीषोमीयस्य इति गृह्यमाणे विशेषे भेदः । तस्मात् उपांशुयाजादीनां समीपे प्राक् आघारादीनि, ऊर्ध्वं स्विष्टकृदादीनि कर्तव्यानि । एवं च संस्पर्शिभिः इतरेषामवैलक्षण्यं भविष्यति । (अत्र यद्यपि सूत्रे भाष्यारम्भे च असंसृष्टः इति पाठः, अस्मदीये मीमांसादर्शनेऽपि तथैव, तथापि भाष्यान्ते 'संस्पर्शिभिः' इत्युक्तत्वात् 'असंस्पृष्टः' इत्येव पाठ आवश्यकः । बिवलकरीयेऽपि सूत्रभाष्ययोः असंस्पृष्टः इत्येव, वि. शा. वृ. य-संमतश्च । के.) ।

विभवाद्वा प्रदीपवत् । ६१ ॥

भाष्यम्— यदुक्तं 'यस्य संनिधौ प्रयुक्तानि, तस्येमानि इति गृह्यते विशेषः, तस्मात् तदावृत्तिः' इति, नैतत् युक्तम् । कुतः ? विभवात् । विभविष्यन्ति एतानि एकस्यापि संनिधौ क्रियमाणानि सर्वेषामुपकर्तुम् । प्रदीपवत् । तद्यथा प्रदीपः एकस्मिन् प्रदेशे भुञ्जानानां ब्राह्मणानां एकस्य संनिधौ प्रज्वलितः सर्वेषामुपकारं करोतीति । तस्मादनावृत्तिः ।

अर्थात्तु लोके, विधितः प्रतिप्रधानं स्यात् । ६२॥

भाष्यम्— उपवर्णनापरिहारः पूर्वं न कृतः, इति स तावत् वर्ण्यते । यदुपवर्णितं प्रदीपवत् इति । तदयुक्तम् । अर्थात् लोके प्रदीपस्य सकृदसकृद्वा क्रिया । यदि सकृत् कृतः सर्वं प्रकाशयति, सकृत् क्रियते । अथ न प्रकाशयति, ततः असकृत् । ततश्च अस्य प्रत्यक्षसामर्थ्यम् । अथेह विधितः उपकारः अनुपकारो वा गम्यते, न प्रत्यक्षेण । न चास्ति विधानं 'अस्योपकरोति' इति । संनिधानात् विशेषग्रहणात् गम्यते 'यस्य संनिधौ प्रयुक्तः, तस्योपकरोति' इति । तस्मादावृत्तिः ।

सकृदिज्यां कामुकायनः, परिमाणविरोधात् । ६३ ॥

भाष्यम्— अथ यदुक्तम् 'सकृदिज्यां कामुकायन आचार्यो मेने चतुर्दश त्रयोदश इत्याहुतिपरिमाणस्य विरोधात्' इति, तस्य कः परिहारः ? आभाषाऽन्तं सूत्रम् ।

विधेस्त्वितरार्थत्वादसकृदिज्या श्रुतिव्यतिक्रमः स्यात् । ६४ ॥

भाष्यम्— विधीयते इति अङ्गं विधिशब्देनोच्यते । अङ्गस्य इतरार्थत्वात् । यदा एतत् स्थितम् 'यत्संनिधौ यत् कृतम्, तदर्थमेव तत्' इति, तदा आवृत्त्या अङ्गानां प्रयोगः । तत्र चतुर्दश त्रयोदश इत्याहुतिसंख्या नोपपद्यते । आहुतिविषयस्तु चतुर्दश त्रयोदश । तेषां लक्षणया वचनमुपपद्यते । चतुर्दश पौर्णमास्यां आहुतिविषयः, त्रयोदश अमावास्यायामिति । नैतत् संख्याविधानम्, प्रचयेनैव संख्यायाः प्राप्तत्वात् । अनुवादस्तु अयम् । अनुवादश्च लक्षणया उपपद्यते । विदितस्य स भवति । आहुतिविधीनां च इयं संख्या विहिता, नाहुतीनाम् । तस्मात् तेषामनुवादः ।

विधिवत् प्रकरणाविभागे प्रयोगं बादरायणः । ६५ ॥

भाष्यम्— तन्त्रेण प्रयोगं बादरायणो मन्यते स्म । कुतः ? प्रकरणाविभागात् । सर्वेषां प्रधानानां अविभक्ता प्रक्रिया संभूयकारित्वात् इत्युक्तम् । तत्र ऐदमर्थ्यं प्रति न गृह्यते विशेषः । यत्तु संनिधिप्रयोगेण विशेष-

ग्रहणमुक्तम्, तदयुक्तम्। किं कारणम्? विशेषो यः संनिधिक्रमः, स प्रकरणेन बाध्यते। विधिवत्। यथा विधौ तुल्यत्वात् प्रकरणस्य सर्वार्थानि अङ्गानि विज्ञायन्ते, न यस्य संनिधौ तदर्थानि, क्रमस्य प्रकरणेन बाधितत्वात्। अपिच एकेन संनिधानं अविशेषको हेतुः। यदाऽपि सर्वार्थाः, तदाऽपि एकस्य कस्यचित् अवश्यं संनिधौ कर्तव्याः। तस्मान्न विशेषः संनिधेः एकान्ततः शक्यः अवधारयितुम्। अतस्तन्त्रेण प्रयोगः। बादरायणग्रहणं कीर्त्यर्थम्, नैकीयमतार्थम्।

क्वचिद् विधानान्नेति चेत्। ६६ ॥

भाष्यम्-- नैतत् युक्तं सकृत् क्रियेति। कुतः? क्वचित् सहत्वं आहत्य विधीयते। 'सहावघ्नन्ति सह पिंषन्ति' (इति)। तत् अनावृत्तौ सर्वतः प्राप्तायां परिसंख्यार्थं भवति 'इहैव सहत्वम्, नान्यत्र' इत्युच्यते।

न, विधेश्चोदितत्वात्। ६७ ॥

भाष्यम्-- न तत्र परिसंख्या युज्यते। प्राप्तस्य पुनर्वचनं परिसंख्यार्थं भवति। न चेह सहत्वं प्राप्तम्। कुतः? भेदेन निर्वापस्य चोदितत्वात्। आग्नेयाग्नीषोमीययोः भेदेन निर्वापस्तूक्तः। तयोर्भेदेनैव अवहननपेषणे प्राप्नुतः। तत्रावश्यं विधेयं सहत्वम्। तस्मान्न क्वचित् सहत्वविधानात् अन्यत्र भेदेन क्रिया विज्ञायेतेति।

शा— उपोद्घातप्रसक्तानुप्रसक्तादि गतम्। इदानीं लक्षणार्थं तन्त्रावापं विचारयामः। तत्र **'भेदेन विनियुक्तत्वाद् भेदेनैव क्रिया भवेत्। कथम्भावस्य भिन्नत्वाद् भेदेन विनियोगधीः ॥'** इति प्राप्ते, अभिधीयते। **'सत्यं प्रत्येकमङ्गानां विनियोगस्तथापि तु। विधानवदनुष्ठानं सकृदेवोपकारकम् ॥'** तस्मात् एकदेशकालकर्तृणां तन्त्रमङ्गानि।

सोम— सूत्रार्थस्तु— अङ्गानां प्रधानार्थमनुष्ठेयत्वात् प्रधानभेदे च सति प्रयोगदशायामनुष्ठानभेदः स्यात् इति।

वि— 'प्रत्यङ्गि कार्याण्यङ्गानि तन्त्रेणोताङ्गिनो यतः। एकैकस्योपकार्यत्वं तस्मात् प्रत्यङ्ग्यनुष्ठितिः ॥', विधानवदनुष्ठानं सकृदेवोपकारकम्। तद् देशकालकर्तृणामेकत्वान्नर्तकादिवत् ॥' नर्तको यथा सर्वेषां प्रेक्षकाणां युगपत् सुखं निर्वर्तयति तद्वत्।

भाट्ट— यत्रानेकानि प्रधानानि पृथगुत्पन्नानि एकफलार्थत्वेन समुच्चयेन विनियुज्यन्ते, तत्र सत्यपि एकविनियोगविधिविषयत्वे उत्पत्तिविधिभेदेन प्रयोगविधिर्भिन्न एव। विशेषतश्च आग्नेयादौ उत्पत्तिवाक्येष्वेव प्रयोगान्वयिकालश्रवणात् सः। अतश्च प्रधानप्रयोगविधिविधेयानामङ्गानामपि भेदेनैवानुष्ठानम्। न चैवं 'पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेत' इति वाक्यद्वयवैयर्थ्यापत्तिः, आग्नेयादित्रिकस्य विभिन्नपौर्णमासीष्वपि अनुष्ठानप्रसक्तौ तस्येष्टित्रये पौर्णमास्येकत्वविधानेन अर्थवत्त्वात्। तेन एकस्यामेव पौर्णमास्यां अग्न्यन्वाधानादि ब्राह्मणतर्पणान्तं आग्नेयप्रयोगं समाप्य अग्नीषोमीयस्य स कार्यः। अस्तु वा विनियोगविध्येकत्ववशेनैव प्रयोगविधेरपि एकत्वं दर्शपूर्णमासादिषु च 'पौर्णमास्यां पौर्णमास्या' इत्यादिनैव प्रयोगद्वयविधिः, तथापि एकस्यामेवेष्टौ प्रतिप्रधानं गुणावृत्तिन्यायेन प्रयाजाद्यङ्गानामपि निर्वापादिसंनिपत्योपकारकवत् प्रतिप्रधानं भेदेनैवानुष्ठानम्। अत एव आरादुपकारकाङ्गसाधारण्येन सर्वत्र आवृत्तिप्रसक्तौ 'सहावघ्नन्ति, सह पिंषन्ति' इत्यनेन अवघातादौ सहत्वविधिरुपपद्यते। युक्तं चैतत्! अपूर्वस्य फलनाश्यत्वेन आग्नेयोपकाराख्यफलोत्पत्त्या प्रयाजादिजन्यापूर्वनाशस्य आवश्यकत्वेन अग्नीषोमीयोपकारार्थं पृथगनुष्ठानस्य अवश्यम्भावात्। अतः प्रतिप्रधानं भेदेनैवाङ्गानि। इति प्राप्ते, नोत्पत्तिविधिभेदेन प्रयोगविधिभेदः, अपि तु लाघवात् विनियोगविध्येकत्वेन एकस्यैव प्रयोगविधेः असति विशेषश्रवणे सर्वत्र कल्पनम्। अत एव दर्शपूर्णमासादौ यत्र 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिविशेषश्रवणम्, तत्र सत्यपि षण्णामेकस्मिन् विनियोगविधौ प्रयोगद्वयमिष्टमेवेति वक्ष्यते। न तु एतावता षण्णां प्रधानानां षट् प्रयोगविधयः। उत्पत्तिवाक्ये कालश्रवणस्य फलसंबन्धसिद्ध्यर्थकत्वेनोक्तत्वात्। अतश्च न तावत्प्रयोगविधिभेदादङ्गावृत्तिः। नापि एकप्रयोगः एव, प्रधानभेदात्। अनेकेषामपि प्रधानानां एकदेशकालकर्तृकत्वेन अगृह्य-

माणविशेषतया सकृत्कृतैरेवाङ्गैः उपकारसिद्धेः आवृत्तौ प्रमाणाभावात् । न च आनन्तर्यात् गृह्यमाणविशेषत्वम्, प्रकरणेन सर्वाङ्गताबोधे आनन्तर्यस्य अनियामकत्ववत् सकृत्कृतस्यापि उपकारकत्वे तस्य अवर्जनीयतया नियामकत्वाभावात् । अत एव यत्र निर्वापादौ गृह्यमाणविशेषता, तत्र भेद एव, तदपवादेनैव च सहत्वविधिः । अतः सिद्धं प्रधानभेदेऽपि अगृह्यमाणविशेषत्वे अङ्गानां तन्त्रत्वम् । अत एव ‘ चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते ’ इत्यादिलिङ्गमपि उपपद्यते । एवं च यदुद्देश्यकानुष्ठानविषयीभूतक्रियाजन्यं यदपूर्वम्, तन्नाशं प्रति तदन्तिमोद्देश्यस्य कारणतेति कल्पनात् आग्नेयोपकारोत्पत्तिमात्रेण तन्नाशः । अपि तु अन्तिमप्रधानोपकारेणैवेति नाङ्गानां पृथक्करणापत्तिः । यत्र च एकमेव प्रधानम्, तत्र तदेवान्तिममिति तदुत्पत्त्यैव नाशः । आवश्यकं चेदमन्तिमत्वदानं अवघातनियमादृष्टार्थम्, प्रयाजाद्यपूर्वस्य परमापूर्वोपयोगित्वेन तत्र अन्तिमत्वादेरविवक्षितत्वेऽपि क्षतिविरहात् । ११।१।८.

मण्डन–– ‘ यागत्रयेऽङ्गानि भवन्ति तन्त्रम् । ’

शंकर—— ‘कालाद्यैक्येऽङ्गतन्त्रं च । ’

* दर्शपूर्णमासयोः **आग्नेयकपालानि** सर्वाणि उपधाय अग्नीषोमीयस्योपधानम् । अष्टानां कपालानामुपधानं एकः पदार्थः । (परंतु प्रतिकपालं मन्त्रभेदाम्नानेन प्रत्येकमुपधानम् । **सोम.**) । के. ५।२।३।४–५, * दर्शपूर्णमासयोः **आग्नेयपुरोडाशरूपं** कृत्स्नं हविः न अग्नये दातव्यम्, किन्तु किञ्चिदवशेषयितव्यम् । सर्वप्रदानाधिकरणम् । ३।४।१४,३७–४१. * दर्शपूर्णमासयोः **आघारमाघारयति** इति आघारशब्दः कर्मनामधेयं न गुणविधिः । **भा.** १।४।३।४, * दर्शपूर्णमासयोः आघारमाघारयति इति न समुदायानुवादः, किन्तु अपूर्वस्य होमस्य विधायकः । २।२।५।१३–१६, * दर्शपूर्णमासयोः **आघारेऽपि** मन्त्रान्तेन कर्मादिसंनिपातः एव । १२।३।१२।२८. * दर्शपूर्णमासयोः आघारे ऋजुत्वसंततत्वोर्ध्वत्वानां धर्माणां भिन्नकार्यत्वात् समुच्चयः । न विकल्पः । समुच्चयबिन्दौ अधिकरणम् । **वि.** २।३।३. * दर्शपूर्णमासयोः **आघारार्थं** वेद्यतिक्रमणकरणमन्त्रोक्तं फलं कर्मार्थत्वात् आध्वर्यवम्, परंपरया तु याजमानम् । ३।८।१५, * दर्शपूर्णमासयोः **आघार–आज्यभाग**–प्रयाज–अनुयाजानां फलश्रुतिः फलार्थवादः, न तु फलविधिः । के. ४।३।१।१–३. * दर्शपूर्णमासयोः **आघारादयो** न प्रधानम्, किन्तु अङ्गम् । इज्याऽधिकरणम् । वि. ४।४।११, * दर्शपूर्णमासयोः **आघारादीनामा**ग्नेयादीनां चाङ्गाङ्गिभावः । २।२।३, * दर्शपूर्णमासयोः ‘ **आज्यं** विलापयति ’ इति आज्यशब्दो जातिवाची, तेन यूपाञ्जनाज्यं लौकिकम् । बर्हिराज्याधिकरणम् । १।४।८. * दशपूर्णमासयोः **आज्यग्रहणमन्त्राः** ‘ पञ्चानां त्वा वातानाम् ’ इत्यादयः स्रुगन्यूहनमन्त्राश्च अध्वर्युणा यजमानेन च उभाभ्यां कर्तव्याः, न केवलमध्वर्युणा एव । के. ३।८।७।१७. * दर्शपूर्णमासयोः **आज्यग्रहणमन्त्रस्य** ‘धाम नामासि’ (शुक्लसं. १।३४) प्रतिग्रहणमावृत्तिः । **भा.** ११।४।१४। ४४–४५. * दर्शपूर्णमासयोः **आज्यभागौ** यजति । तत्र आग्नेय आज्यभागः आरादुपकारकः न प्रधानाग्निदेवतासंस्कारकः । के. १०।१।८।१६–१८. * दर्शपूर्णमासयोः **आज्यभागयोरनुवाक्ये** ‘ वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायाम् ’ । ‘ अग्निर्वृत्राणि, त्वं सोमासि’ इति वार्त्रघ्न्यौ, ‘ अग्निः प्रत्नेन मन्मना, सोम गीर्भिष्ट्वा ’ इति वृधन्वत्यौ । वार्त्रघ्नी अधिकरणम् । **वि.** ३।१।१३. * दर्शपूर्णमासयोः **आतञ्चनं** सांनाय्यधर्मः । ३।१।४. *दर्शपूर्णमासयोः **आध्वर्यवयाजमानकाण्डयोः** द्विराम्नाता मन्त्राः उभाभ्यामपि प्रयोक्तव्याः । द्व्याम्नाताधिकरणम् । **भा.** ३।८।७।१७. * दर्शपूर्णमासयोः ‘**आयुर्दा अग्नेऽसि**’ इत्यादिर्मन्त्रो याजमानः । **वि.** ३।८।७, * दर्शपूर्णमासयोः **आर्षेयत्रयग्रहणसमर्थस्यैवाधिकारः** । त्र्यार्षेयाधिकरणम् । ६।१।११. * दर्शपूर्णमासयोः **आवाहनादिनिगदेषु** त्यागे च विधिगतशब्देनैव देवताऽभिधानं कर्तव्यम् । विधिशब्दाधिकरणम् । **भा.** १०।४।१२।२३–२४. * दर्शपूर्णमासयोः **आहवनीये** यजिचोदिताङ्गाहुतीनां एकादशत्वं ‘ पञ्च प्रयाजाः, द्वावाज्यभागौ, स्विष्टकृत्, त्रयोऽनुयाजाः ’ इति । **सु.** पृ. ७४५. * दर्शपूर्ण-

मासयोः 'आहार्यपुरीषां पशुकामस्य वेदिं कुर्यात्' इति पुरुषार्थम्, न क्रत्वर्थम् । भा. ४।१।२।२ वर्णकं २.

⌛ **दर्शपूर्णमासयोरिज्याः इति न्यायः । ४।४। ११।२९–३८॥** चतुर्थोपान्त्यन्यायेन दर्शपूर्णमासाख्यानामेव यागानां प्राधान्यात् नेतरेषामङ्गत्वात् समप्राधान्यसिद्धिः । सु. पृ. ७२३.

⌛ **दर्शपूर्णमासयोरिज्याः प्रधानान्यविशेषात् । ४।४।११।२९॥**

दर्शपूर्णमासयोः आग्नेयः पुरोडाशः, अग्नीषोमीयः पुरोडाशः, आज्येनोपांशुयाजः, ऐन्द्राग्नः पुरोडाशः, दधिपयोरूपं सांनाय्यम्, आघारौ आज्यभागौ प्रयाजाः अनुयाजाः पत्नीसंयाजाः समिष्टयजुः स्विष्टकृत्, इति यागाः श्रुताः । ते किं सर्वे एव प्रधानभूताः, उत तत्र केचित् गुणभूताः इति विचारे पूर्वपक्षयति । दर्शपूर्णमासयोः यागयोः यावत्यः इज्याः यागाः तानि सर्वाण्येव प्रधानानि स्युः । अविशेषात् सर्वेषां स्वर्गफलकत्वस्य यागत्वस्य च समानत्वात् ।

अपिवाऽङ्गानि कानिचिद्,येष्वङ्गत्वेन संस्तुतिः, सामान्यो ह्यभिसंस्तवः । ३० ॥

दर्शपूर्णमासयोः आघाराज्यभागप्रयाजादयो यागाः आग्नेयादिवत् प्रधानमेव स्यात् राजसूयवत् इति पूर्वपक्षे सति सिद्धान्तसूत्रमिदम् । न सर्वेष्वेव राजसूयादिक्रतुषु वर्तमानाः सर्वे यागाः प्रधानम्, किन्तु कानिचित् आघारादियागाः अङ्गानि स्युः, न प्रधानम् । अपिवाशब्देन पूर्वपक्षव्यावृत्तिः । येषु यागेषु अङ्गत्वेन संस्तुतिर्भवेत् । 'अभीषू वा एतौ यज्ञस्य, यदाघारौ' 'चक्षुषी वा एतौ यज्ञस्य, यदाज्यभागौ' इत्यादिः संस्तुतिः । हि यस्मात् अभिसंस्तवः अङ्गानां सामान्यः, सामान्यधर्मः, अङ्गानां सामान्यलक्षणं अभिसंस्तुतत्वं इत्यर्थः । अभिसंस्तवेन लक्ष्यते इदमङ्गमिति । तस्मात् आघाराज्यभागादयः यागा अपि अङ्गमेव, न प्रधानम् ।

तथा चान्यार्थदर्शनम् । ३१ ॥

सिद्धान्ते हेत्वन्तरमाह । 'प्रयाजेप्रयाजे कृष्णलं जुहोति' इति सौर्ययागे कृष्णलविधानार्थे प्रयाजानुवादस्य अन्यार्थस्य कृष्णलविधानार्थस्य दर्शनं भवति । न च प्रधानस्यानुवादो भवति । तस्मात् कानिचिदङ्गानि, न सर्वे यागाः प्रधानानि ।

अविशिष्टं तु कारणम्, प्रधानेषु गुणस्य विद्यमानत्वात् । ३२ ॥

पूर्वपक्षी आह । तु–शब्देन सिद्धान्तपक्षव्यावृत्तिः । प्रयाजादीनि नाङ्गानि किन्तु प्रधानान्येव । तेषामङ्गत्वसिद्ध्यर्थं संस्तवरूपं उक्तं कारणं तु प्रधानेष्वपि आग्नेयादिषु अविशिष्टं समानमेव 'शिरो वा एतद्यज्ञस्य यदाग्नेयः' इत्यादिश्रुतेः । संस्तुताङ्गत्वरूपस्य गुणस्य प्रधानेष्वपि विद्यमानत्वात् । तस्मात् प्रयाजादयोऽपि प्रधानमेव ।

नानुक्तेऽन्यार्थदर्शनं परार्थत्वात् ।३३॥

सिद्धान्ते 'तथा चान्यार्थदर्शनं' इति यदुक्तम्, तत्र पूर्वपक्षी ब्रूते । प्रयाजादीनां अङ्गत्वबोधके वचने न्याये वा अनुक्ते सति अन्यार्थदर्शनं न अङ्गत्वस्य साधकम् । यत्तु दर्शितम् 'प्रयाजेप्रयाजे कृष्णलं जुहोति' इति, तत् परार्थम् । प्राकृतात् प्रयाजात् अन्यस्यैव प्रयाजस्य अप्राकृतस्य विधानार्थं तत् । तस्मात् सर्वाणि प्रधानानि इति पुनः पूर्वपक्षः ।

पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च, तत्पुनर्मुख्यलक्षणं यत्फलवत्त्वम्, तत्संनिधावसंयुक्तं तदङ्गं स्याद्, भागित्वात् कारणस्याश्रुतश्चान्यसंबन्धः । ३४ ॥

पुनः प्राप्तं पूर्वपक्षं तुशब्दो व्यावर्तयति । न सर्वे यागाः समप्रधानानि । तत्र फलवन्ति प्रधानानि, इतराणि तु अङ्गानि । तत्र त्रिकद्वयं फलवत् आग्नेयोपांशुयाजाग्नीषोमीयाणामेकं त्रिकं पौर्णमासीसंज्ञकम् । ऐन्द्राग्नदधिपयोरूपं द्वितीयं त्रिकं अमावास्यासंज्ञकम् । दर्शपूर्णमासाभ्यां इति द्विवचनेन व्युत्क्रमेण उक्तयोस्त्रिकयोर्निर्देशः कृतः । स्वर्गकाम इति पदेन च फलवत्त्वमुक्तम् । तदेतदाह, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति श्रुतितः श्रवणात्, दर्शपूर्णमासाभ्यां इति द्विवचनेन व्यपदेशाच्च अभिधानयोः दर्श इति पूर्णमास इति नामधेययोः पृथक्त्वे भिन्ने त्रिकद्वये निवेशः प्रयोगः । यत् फलवत्त्वम्, तत् पुनः मुख्यलक्षणं मुख्यस्य प्रधानस्य लक्षणम् । तत् पुनः, तत्तु इत्यर्थः । अनेन फलवत्त्वं प्रधानलक्षण-

मुक्तम् । त्रिकद्वयं च तादृशम् । तस्मात्तदेव प्रधानम् । अथ अङ्गलक्षणमाह, तत्संनिधौ फलवत्संनिधौ यत् फलेन असंयुक्तम्, तत् अङ्गं स्यात् । फलवत्संनिधावफलं तदङ्ग इत्यर्थः । तादृशं च आघाराज्यभागादिकम् । तस्मात् तन्न प्राधानम्, किन्तु अङ्गम् । कारणस्य अङ्गत्वकारणस्य भागित्वात् । भागो भजनं वचनम् । उक्तत्वात् असंयुक्तम् 'प्रकरणादितिकर्तव्यतार्थित्वात्' (३।३।४।११) इत्यत्र इत्यर्थः । अश्रुतश्च अन्यसंबन्धः प्रयाजादीनां प्रधानफलादन्येन केनचित् फलेन सह संबन्धः न श्रुतः । एवं 'फलवत्संनिधौ अफलं तदङ्गम्' इति अङ्गलक्षणस्य उक्तत्वात् प्रयाजादीनां च अफलत्वात् अङ्गत्वमेव तेषां स्वीकार्यम्, न प्रधानत्वम् ।

गुणाश्च नामसंयुक्ता विधीयन्ते, नाङ्गेषूपपद्यन्ते । ३५ ॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । चकारः समुच्चये । 'चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम्' इति अभिमर्शनादयो गुणाः नामसंयुक्ताः पौर्णमासी अमावास्या इति नामभ्यां संयुक्ता विधीयन्ते । ते च विधयः प्रधानेष्वेवोपपद्यन्ते नाङ्गेषु उपपद्यन्ते । तस्मादाघारादयः अङ्गमेव, न प्रधानम् ।

तुल्या च कारणश्रुतिरन्यैरङ्गाभिसंबन्धः । ३६ ॥

पूर्वपक्षिणा यदुक्तम् 'अविशिष्टं तु कारणम्' इति तत् परिहरति । अन्यैः पुरुषावयवैः पूर्णमासस्य अङ्गानां आग्नेयादीनामवयवानां अभिसंबन्धः एवंरूपा कारणश्रुतिः, सा आग्नेयादीनां प्रधानत्वेऽपि तुल्या । यागावयवानां पुरुषावयवैः स्तुतिः आग्नेयादीनां प्रधानत्वेऽपि युज्यते इति भावः । सा च स्तुतिः 'शिरो वा एतद् यज्ञस्य यदाग्नेयः, हृदयमुपांशुयाजः, पादावग्नीषोमीयः' इति ।

उत्पत्तावभिसंबन्धस्तस्मादङ्गोपदेशः स्यात् । ३७ ॥

'अविशिष्टं तु कारणं०' इति सूत्रोक्तस्य समाधानं 'तुल्या च कारणश्रुतिः०' इति अव्यवहितपूर्वसूत्रेण यदुक्तम्, तत्रैव विशेषप्रतिपादनाय प्रकृतं सूत्रम् । योऽयं पौर्णमास्यङ्गानामभिसंबन्धः पुरुषाङ्गैः सह उक्तः, सः अभिसंबन्धः उत्पत्तौ ज्ञातव्यः । यथा जायमानस्य पुरुषस्य अग्रे शिरो जायते, मध्ये मध्यम्, पश्चात् पादौ, एवं आग्नेयः अग्रतः, उपांशुयाजो मध्ये, अग्नीषोमीयः पश्चादिति । तत्सामान्यादेषा स्तुतिः । तस्मात् अङ्गोपदेशोऽयं स्तुत्यर्थः स्यात् । न तेन आग्नेयादीनां प्रधानत्वहानिर्भवति ।

तथा चान्यार्थदर्शनम् । ३८ ॥

सिद्धान्ते हेत्वन्तरपरं अन्तिमं सूत्रम् । तथाच आग्नेयादिप्राधान्ये आघारादीनां चाङ्गत्वे अन्यार्थदर्शनमपि भवति 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इति । पञ्च प्रयाजाः, द्वावाज्यभागौ, आग्नेयोपांशुयाजाग्नीषोमीयास्त्रयः, त्रयोऽनुयाजाः स्विष्टकृच्चेति चतुर्दश पौर्णमास्याम् । पञ्च प्रयाजाः, द्वावाज्यभागौ, आग्नेयः, सांनाय्यम्, स्विष्टकृत् इति त्रीणि, त्रयोऽनुयाजाः इति त्रयोदश आहुतयः अमावास्यायाम् । एवं सति आघारादयोऽपि यदि प्रधानं स्यात्, तदा तेषां दर्शे पौर्णमासे चावृत्तिर्न स्यात् । अङ्गत्वे तु आवृत्तिः संभवति । एतस्मादन्यार्थदर्शनात् आघारादीनां अङ्गत्वमेव सिध्यति । **के.**

* दर्शपूर्णमासयोः इडे द्वे अनुयाजानां पुरस्तादेका पश्चादपरा । **वि.** १०।७।१३. * दर्शपूर्णमासयोः इडानिगदगतः यज्ञपतिशब्दः बहुयजमानके विकारे नोहितव्यः । यज्ञपतिशब्दः न समवेतार्थाभिधायी । **भा.** । ९। १।१३।४०. * दर्शपूर्णमासयोः **इडाप्राशित्रादिभक्षाः** प्रतिपत्त्यर्थाः । **वि.** १०।२।९ । अत एव इडादिभक्षार्थमवत्तस्य नाशे तत्तद्भक्षलोप एव । ६।४।२, * दर्शपूर्णमासयोः **इडाभक्षः**, प्राशित्रभक्षः, चतुर्धाकरणभक्षः, शंयुवाककालीनो भक्षश्चेति चतुर्धाभक्षणसिद्धये चत्वार उपहारा उपदिष्टाः । कृष्णलेषु तु ब्रह्मविषयाणां तेषामुपहाराणां सहभाव उक्तः । १०।२।४, * दर्शपूर्णमासयोः **इध्मः** 'त्रीन् परिधीन्०' इत्यादिमन्त्रोपेताभिः क्रियाभिः सिध्यति । १०।१।१, * दर्शपूर्णमासयोः 'इषे त्वा इति शाखां छिनत्ति, ऊर्जे त्वा इत्यनुमार्ष्टि' इति अर्थभेदेन वाक्यभेदात् मन्त्रभेदः । २।१।१५, * दर्शपूर्णमासयोः **उखाऽधिश्रयणं** 'वत्सं चोपावसृजति उखां चाधिश्रयति' इति द्वादशद्वंद्वगतं प्रथमं द्वंद्वम् । ३।८।

१०, * दर्शपूर्णमासयोः **उपकारमपेक्षमाणयोः** प्रयाजादिषु च उपकार्यमपेक्षमाणेषु अनिष्पन्नावस्थे एवोपकारे प्रकरणात् तादर्थ्ये प्रतीयते । तदन्यथाऽनुपपत्तिमात्रेणोपकारकल्पना । वा. ३।१।२।२ पृ. ६५८. * दर्शपूर्णमासयोः **उपभृति** चतुर्गृहीतद्वयं विधेयम् , न तु अष्टगृहीतमेकम् । चतुर्गृहीतद्वयाधिकरणम् । के. ४।१।१७। ४६–४८. * दर्शपूर्णमासयोः **उपला** ‘दृषच्चोपला च’। वि. ३।८।१० । ‘दृषदुपलाभ्यां पिनष्टि’ । ३।१।५. * दर्शपूर्णमासयोः **उपवीतं** कृत्स्ने प्रकरणे निविशते , न सामिधेनीष्वेव । के. ३।१।११।२१. * दर्शपूर्णमासयोः उपवीतं दर्शपूर्णमासाङ्गत्वेन विहितम् । वि. ३।४।३, * दर्शपूर्णमासयोः **उपवीतस्य** प्राकरणिकाङ्गता । ३।१।११, * दर्शपूर्णमासयोः **उपस्तरणाभिघारणे** क्रियेते सूक्ष्माणां पुरोडाशावयवानां स्रुचि संसक्तिं निवारयितुम् । १०।२।२. * दर्शपूर्णमासयोः **उपस्तरणाभिघारणाभ्यां** सह चतुरवत्तसंपत्तिः । उपस्तरणादिविधिन्यायः । भा. १०।८।१२।२९–३२. * दर्शपूर्णमासयोः **उपांशुयाजः** अग्नीषोमीयपुरोडाशश्च इत्युभयं पौर्णमास्याम् । तत्र पाठक्रमस्य प्राबल्यात् आदौ पुरोडाशधर्माः, पश्चादाज्यधर्माः अनुष्ठेयाः । वि. ५।१।८. * दर्शपूर्णमासयोः **‘उपांशुयाजमन्तरा यजति’** इति अपूर्वस्य यागस्य वाचकः शब्दः, न समुदायस्य । भा. २।२।४।९–१२. * दर्शपूर्णमासयोः **‘उपांशुयाजमन्तरा यजति’** इति यजतिपदं विधायकम् , न तु अनुवादकम् । वि. २।२।४. * दर्शपूर्णमासयोः **उपांशुयाजे** उपस्तरणाभिघारणयोर्लोपेऽपि हविषैव चतुरवत्तसंपत्तिः । उपांशुयाजशब्दे अधिकरणम् । भा. १०।८।१३।३३–३४, * दर्शपूर्णमासयोः **उपांशुयाजे** देवता प्राकृतीनामन्यतमा । उपांशुयाजशब्दे अधिकरणम् । १०।८।१६।४९–५०, * दर्शपूर्णमासयोः **उपांशुयाजे** ध्रौवाज्यमेव नियतम्, न यत्किञ्चित् । उपांशुयाजशब्दे अधिकरणम् । १०।८।१५।४७–४८. * दर्शपूर्णमासयोः **उपांशुयाजे** विष्णुः प्रजापतिः अग्नीषोमौ इति त्रयाणां विकल्पः । उपांशुयाजशब्दे अधिकरणम् । वि. १०।८।१७. * दर्शपूर्णमासयोः **उपांशुयाजाज्यं** ब्राह्मणेन सोमात् प्रागग्नीषोमीयं न कर्तव्यम्, प्राजापत्यं वैष्णवं वा कर्तव्यम् । भा. ५।४।६।१९–२१, * दर्शपूर्णमासयोः **उलूखलम्** । ‘उलूखलं च मुसलं च’ यज्ञायुधम् । वि. ३।८।१० । ‘उलूखलमुसलाभ्यामवहन्ति’ इति तदुपयोगः । ३।१।५. * दर्शपूर्णमासयोः **उलूखलमुसलयोः** दृषदुपलयोश्च प्रोक्षणं अपूर्वप्रयुक्तमेव , न हन्तिपिषिप्रयुक्तम् । हन्तिपिष्यधिकरणम् । के. ९।१।२।२–३. * दर्शपूर्णमासयोः **ऋत्विजश्चत्वारः** । ब्रह्मा अध्वर्युः होता आग्नीध्रश्चेति । वि. ४।२।९, * दर्शपूर्णमासयोः **एकैकस्मिन्** सङ्घे देशकालकर्तॄणां तन्त्रम् । आग्नेयादीनां प्रधानानां इत्यत्राधिकरणम् । ११।२।१, * दर्शपूर्णमासयोः **एकैकस्मिन् सङ्गप्रयोगे** अङ्गेषु देशकालकर्तॄणां तन्त्रम् । अङ्गप्रधानयोः देशकाल–इतिबिन्दौ अधिकरणम् । ११।२।२. * दर्शपूर्णमासयोः एव वैश्यस्य सामिधेनीसाप्तदश्यम् । गोदोहनाधिकरणम् । (इदं वार्तिके द्रष्टव्यम् ।) भा. ३।६।३।१०. * दर्शपूर्णमासयोः **ऐन्द्राघारार्थ**वेद्यतिक्रमणकरणमन्त्रोक्तसंतापाभावरूपं फलं साक्षात् अध्वर्योरेव निर्विघ्नकर्मसमाप्तिस्तु याजमानं फलम् । वर्चोन्यायः । वि. ३।८।१५, * दर्शपूर्णमासयोः. **औपभृतमाज्यं** प्रयाजानुयाजार्थम्, जौहवं तु प्रयाजार्थमेव । ४।१।१६, * दर्शपूर्णमासयोः **ओपभृताज्यस्य** जुह्वामानयनं आज्यधर्मप्रयोजकम् । आज्यसमानयनाधिकरणम् । ४।१।१५. * दर्शपूर्णमासयोः **औपवसथ्येऽहनि** आरण्यभोजनं आम्नातम् । तद् वृत्त्यर्थम् । आरण्यभोजनन्यायः । भा. १२।१।१४।३०, * दर्शपूर्णमासयोः औपवसथ्येऽहनि रात्रिजागरणं यज्ञाङ्गानां रक्षणाय अप्रमादार्थं वा अदृष्टार्थं वा । १२।१।८।१७, * दर्शपूर्णमासयोः औपवसथ्येऽहनि व्रतं विहितं ‘अग्ने व्रतपते व्रतं चरिष्यामि’ इत्यादि । १२।१।११।२१, * दर्शपूर्णमासयोः **औषध–आज्य–सांनाय्यधर्माः** न सर्वे सर्वत्र कर्तव्याः, किन्तु प्रत्येकमेव । व्रीहिधर्माः यवेषु भवन्त्येव । ३।१।४।७–१०, * दर्शपूर्णमासयोः **औषधधर्माः** पूर्वं समाम्नातास्तत आज्यस्य, तत्र पाठक्रमेणैव तेषामनुष्ठानम्, न तु मुख्यक्रमेण आज्यधर्माणामादौ अनुष्ठानम् । ५।१।८।१५. * दर्शपूर्णमासयोः **कपालं** न तुषोपवापप्रयुक्तम्,

किन्तु श्रपणप्रयुक्तम् । पुरोडाशकपालन्यायः । वि. ४।१।११, दर्शपूर्णमासयोः कपाले भिन्ने 'भिन्ने जुहोति' इति होमः । ६।४।४. * दर्शपूर्णमासयोः कपालेषु पुरोडाशस्य प्रथनं क्रियते, सौर्ये चरौ तु तन्न स्यात् । के. १०।१।१७।५५.

⌛ दर्शपूर्णमासयोः कपालादेरेकदेशभेदनादावपि प्रायश्चित्तम् ॥

अर्थसमवायात् प्रायश्चित्तमेकदेशेऽपि । ६।४।४।१०॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र आमनन्ति, 'भिन्ने जुहोति, स्कन्ने जुहोति' इति । तत्र संदेहः किं कृत्स्ने भिन्ने, स्कन्ने च प्रायश्चित्तम्, उतैकदेशेऽपि भिन्ने, स्कन्ने चेति । किं पुनः सर्वभिन्नं किमेकदेशभिन्नमिति । चूर्णीकृतमयोग्यं प्रयोजनाय, तत् कृत्स्नभिन्नम् । यच्छकले विगतेऽपि प्रयोजनसमर्थम्, तदेकदेशभिन्नमिति । किं प्राप्तम् ? एकदेशभिन्नेऽपि प्रायश्चित्तम् । कस्मात् ? अर्थसमवायात् । समवेतं तत्र भेदनम् । एकदेशभिन्नमपि भिन्नमिति । एवं प्राप्ते निमित्ते, नैमित्तिकं कर्तव्यं भवति ।

टुप्— कृत्स्नभेदे प्रायश्चित्तम् । कुतः ? तस्य भिदुरद्रव्यस्य परस्परसंघर्षणात् अवश्यम्भावी कियानपि मात्राऽपनयः । तस्य अवर्जनीयत्वात् नित्यता प्रसज्यते । भिन्नमिति भिदिक्रियोपसर्जनीभूतम् (भिदिक्रिया उपसर्जनीभूता यस्य तत् द्रव्यम्) निष्ठया द्रव्यमभिधीयते । तदेव उपसर्जनं भवति, यत् कृत्स्नं व्याप्नोति । तस्मात् नैकदेशे भिन्ने होमः इति । एवं प्राप्ते, ब्रूमः । संघर्षणे 'संघृष्टम्' इति बुद्धिर्भवति, न 'भिन्नम्' इति । भेदनं कदाचित् भवति । तस्मात् एकदेशकृत्स्नभिन्नयोः उभयत्र भिन्नबुद्धेः संभवात् उभयत्रापि होमः । यदुक्तम् 'भेदनविशिष्टं द्रव्यं प्रधानम्' इति, उच्यते । विशेषणे एव निमित्तप्रत्यये जाते किमर्थं विशेष्यं यावत् गम्यते ? अर्थात् द्रव्यं लक्ष्यते, न शब्दात् । तस्मात् भेदश्चेत् उपजातो, होमश्च (उपजायते एव) इति ।

न त्वशेषे वैगुण्यात् तदर्थं हि । ११ ॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति । नाशेषेऽपि भिन्ने प्रायश्चित्तं स्यात् । विनष्टसंस्कारार्थे हि प्रायश्चित्तम् । कुतः ? एतद्भेदनवता प्रयोजनमस्ति, न होमेन । तेन संस्कृतेन प्रयोगः करिष्यते इति प्रायश्चित्तं क्रियते । न च तेन चूर्णीकृतेन प्रयोगः शक्यते कर्तुम् । तस्मात् प्रायश्चित्तमनर्थकम् । एकदेशभिन्नेन तु संस्कृतेन शक्यते प्रयोगः । तस्मादेकदेशभिन्ने प्रायश्चित्तं स्यादिति ।

टुप्— एकदेशभेदे एव होमः । कुतः ? 'भिन्ने' इति द्रव्यप्रधानो निर्देशः इत्युक्तमेव । भेदनेन द्रव्ये दोष उत्पन्नः, स होमेन प्रतिसंधीयते, निर्हृतदोषं च यागयोग्यं भवति । सकलभेदे च अयोग्यत्वात् तदर्थे होमः सन् अनर्थकः स्यात् । भिन्ने इति सप्तमी द्वितीयाऽर्थे, भिन्नं द्रव्यं (होमेन संस्कुर्यात्) इति । एवं च वाक्येन होमस्य संबन्धः (उद्देश्यसंबन्धः), संनिपत्योपकारिता च । निमित्तत्वे प्रकरणेन संबन्धः, स दुर्बलः, आरादुपकारकः सन् असंयुक्तः उपकुर्यात् अयमपि दोषः ।

स्याद्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्नहि तस्य गुणार्थेनानित्यत्वात् । १२ ॥

भाष्यम्— स्याद्वा प्रायश्चित्तं कृत्स्नभिन्नेऽपि । कुतः ? प्राप्तनिमित्तत्वात् । प्राप्तं हि निमित्तं भेदनम् । प्राप्ते च निमित्ते नैमित्तिकं कर्तव्यम् । यच्चोक्तम्, व्यापन्नसंस्कारार्थे प्रायश्चित्तमिति । नायं तस्य धर्मः । कुतः ? नित्यसंयोगात् । नित्यवत् होमः । अनित्यं हि भेदनम् । नहि नित्यमनित्यस्य उपकर्तुं चोद्यते । यदि नित्यं दर्शपूर्णमासयोरङ्गम्, नानित्यस्योपकाराय । कुतः ? कदाचिदनित्यं नैव स्यात् । तत्र कथं तस्योपकारकं भवेत् । तत्र को दोषः ? न शक्यं नित्यस्योपकर्तुम् । तेन नित्यमुपकुर्यादिति वचनं प्रलाप एव । अथ नैमित्तिकम्, न दोषो भवति । तस्मादस्मत्पक्षः एव । अस्मिन्पक्षे यदा भिन्नम्, तदा होमः । यदा न भिन्नं तदा नैव होमो विधीयते । भवदीये पक्षे भवति दोषो नित्यानित्ययोर्नास्ति संबन्ध इति । तस्मात् भिन्नमात्रे प्रायश्चित्तमिति ।

टुप्— कपालार्थे होमे (सति निमित्तसंयोगाभावात्) अश्रुतनिमित्तकानाम् (अङ्गानाम्) दर्शपूर्ण-

मासापूर्वं निमित्तम् (अनुष्ठापकम्)। यावत् दर्शपूर्णमासापूर्वं निमित्तम्, तावत् नैमित्तिकेन (अनुष्ठाप्येन होमेन) भवितव्यम्। (कुतः ?) निमित्तेन (अपूर्वेण) प्रयोजितत्वात् होमस्य। भेदनं च तत्र कदाचित् (न तु नित्यम्। तथापि किम् ? इत्यत आह–) तत्र उपकार्यस्य (भिन्नस्य) अनित्यत्वात् प्रयोजकस्य (च अपूर्वस्य) नित्यत्वात् नित्यानित्यसंयोगविरोधः। भेदनस्य (तु) निमित्तत्वे (सति) भिन्नेन (निमित्तेन) होमे प्रयुक्ते (सति) अपूर्वस्य तादर्थ्यम्, इत्यदोषः (न विरोधः)। सप्तमी च निमित्तत्वेन यथाश्रुता (भवति। संस्कार्यत्वे तु लक्षणा स्यात्। तस्मात् निमित्तमेव भिन्नम्, न संस्कार्यम्। पूर्वोक्तस्यैव व्यतिरेकमाह–) निमित्ततादर्थ्ययोर्नित्यत्वात् अस्ति संबन्धः (निमित्तमनुष्ठापकम्, तादर्थ्यमिति फलम्) यथा जीवनं निमित्तं (अग्निहोत्र–) होमं प्रयुङ्क्ते, स (च उपात्त–) दोषोपघातार्थः। (अत्र लिखिते 'यथा जीवनं निमित्तं पुरुषदोषश्च तत्र प्रायश्चित्तं व्रतं होमं प्रयुङ्क्ते स दोषोपघातार्थः' इति पाठः। परंतु नासौ तन्त्ररत्नानुसारी) तत्र जीवनस्य पुरुषदोषस्य च (पूर्वोपात्तस्य) विद्यमानत्वात् अविरुद्धः संबन्धः। द्वयोरपि (प्रयोजकफलयोः) अनित्ययोः अस्ति संबन्धः यथा ब्रह्महत्यादि अनित्यं निमित्तं पुरुषदोषश्च (अनित्यः), तत्र प्रायश्चित्तं ब्रह्महत्याप्रयुक्तं दोषनिर्घाताय च (इति नास्ति विरोधः)। तस्मात् उपकार्ये (फले यावत्प्रयोजकं) विद्यमाने अस्ति संबन्धः। इह (तु) उपकार्यं (भिन्नम्) कदाचित् (प्रयोजकं तु अपूर्वं नित्यम्, इति विरोधः)। (भाष्यं व्याचष्टे–) **न शक्यं नित्यस्योपकर्तुं** इति होमो न शक्नोति नित्यमुपकर्तुम्, उपकार्यस्य (भिन्नस्य नित्यम्–) अभावात्। **तेन नित्यमुपकुर्यात्** (इति वचनं प्रलाप एव इति भाष्यम्–) इति दर्शपूर्णमासापूर्वं ब्रवीति। (कथम् ?) नित्यमुपकुर्यात् इति (होमम्–) प्रयुञ्जानम् (अपूर्वं ब्रवीति भाष्यकारः इति)। तस्मात् (तत्प्रयुक्तस्य नित्यार्थत्वानुपपत्तेः) कपालविशिष्टं भेदनं निमित्तम्।

गुणानां च परार्थत्वाद् वचनाद् व्यपाश्रयः स्यात्। १३ ॥

भाष्यम्–– असति वचने न गुणो गुणार्थो भवितुमर्हति। प्रकरणतः सर्वे प्रधानार्थं भिन्नमपि होमोऽपि। न च भिन्नः आधारभावेन उपदिश्यते। भिन्नस्य आधारभावे हि न होमान्तरं विधीयेत। प्रधानस्यैव हि तदा भिन्नो गुण इति गम्यते। तत्र आहवनीयसंयोगो बाध्येत '**वचनाद्विकल्प इति चेत्, न निमित्तत्वेन संभवात्।**' होमस्य च श्रुत्या विहितत्वात्। यदा होमो विधीयते, तदा श्रुत्या। यदा भिन्नो गुणः तदा वाक्येन। तस्मान्न आधारो भिन्नः। यद्युच्येत, निमित्तपक्षेऽपि न होमान्तरम्, प्रकृतस्यैव होमस्य निमित्तं विधीयेतेति। तन्न। अनुपादीयमानं हि निमित्तमित्युच्यते। यदि हि विधीयेत, निमित्तमेव तन्न स्यात्। यदि च यस्यापि निमित्तं सोऽपि उद्दिश्येत, तत्र द्वयोरुद्दिश्यमानयोः संबन्ध एव न स्यात्। न चात्र भेदनं कुर्यादिति विधीयते। भेदने निर्वृत्ते यदन्यत् श्रूयते, तद्विधीयते।

टुप्–– (कथं निमित्तपक्षे द्वयोः प्रधानार्थत्वमिति चेत्, तत्राह–) प्रकरणात् प्रधानार्थो होमः भिन्नमपि (होमं) प्रयुञ्जानं (अपूर्वं) प्रणाड्या तदर्थमेव (अतो न भिन्नार्थो होमः)। न च कपालार्थत्वेन होमस्य प्रतिपादकं वचनमस्ति, ('भिन्ने जुहोति' इत्यत्र तादर्थ्यप्रतिपादिकायाः) द्वितीयाविभक्तेरभावात्। न च भिन्नस्य प्रत्यक्षतो दोष उपलभ्यते, येन (द्वितीयायामसत्यामपि दृष्टार्थत्वात्) दोषनिर्घातार्थो होमः स्यात् (तस्मान्न भिन्नार्थः)। **न च भिन्नमाधारत्वेन उपदिश्यते** (आधारभावेन इति भाष्ये। ननु पूर्वमेव 'न गुणो गुणार्थो भवितुमर्हति' इति सिद्धे कुतः शङ्का, अत आह–) श्रुतिसंभवमात्रेण (श्रुतिसंबन्धमात्रेण इति रत्नम्) उपन्यस्यते। संभवति हि सप्तमी निमित्ते आधारे च। (निराकरणभाष्यं अर्थतः अनुसंधत्ते–) आधारः सन् आग्नेयादीनां (एव प्रकरणात् अङ्गम्) स्यात्, नाङ्गानाम्। न च कर्मान्तरम् (विशिष्टविधेरन्याय्यत्वात्) **आहवनीयसंयोगो बाध्येत**

इति पाक्षिकं बाधमाह न तु नित्यम् । (परस्तु-) बाधमभिप्रेत्य (अङ्गीकृत्य) आह वचनात् विकल्प इति चेत् । (वचनबलात् पाक्षिको बाधो व्रीहियवादिष्विव न दोषः । इदं विकल्पाभिधानमाक्षिपति-) अयुक्तोऽयं विकल्पः भिन्नस्य प्रकरणसंबन्धात्, आहवनीयस्य च अनारभ्याधीतत्वात् । तद्यथा (प्रकरणसंबद्धेनैव) पाञ्चदश्येन साप्तदश्यम् (अनारभ्याधीतम्) बाध्यते, एवमिहापि (आहवनीयस्य भिन्नेन बाध एव, न विकल्पः)। किञ्च आहवनीयस्य अन्यत्र (होमान्तरेऽपि) कृतार्थत्वात् । भिन्नस्य तु (प्रकृतहोमानुवादेन विधीयमानस्य) अन्यत्रानवकाशत्वात् तदुपमर्देनैव (आहवनीयोपमर्देनैव) पदवत् निवेशः । तस्मात् विकल्पाभिधानं अभ्युपेत्यवादेन (भाष्यकारेण उक्तम्, विकल्पोऽपि सत्यां गतौ अयुक्तः, अस्ति च गतिः निमित्तत्वेनापि संभवात् इति)।

केचिदाहुः युक्त एवायं विकल्पः, उभयोः (भिन्नाहवनीययोः) वाक्येन जुहोतिसंबन्धात् । (ननु भिन्नस्य प्रकरणमस्तीत्युक्तम्, अत आह-) न प्रकरणात् किञ्चित् अभ्यधिकम् (लभ्यते वाक्यबलीयस्त्वात् । पाञ्चदश्यसाप्तदश्ययोः तर्हि कथम् ? तत्राह-) तत्र सामिधेनी- (मात्र-) संबन्धे (संख्ययोः) आनर्थक्यात् अपूर्वसंबन्धः (अवश्यम्) एषितव्यः । तत्र एकस्य (पाञ्चदश्यस्य) प्रकरणेन (अपूर्वसंबन्धः) क्लृप्तः, इतरस्य (तु साप्तदश्यस्य अव्यभिचरितक्रतुसंबन्धसामिधेनीद्वारेण) कल्प्यः, इति (संबन्धस्य) विप्रकर्षात् पाञ्चदश्येन साप्तदश्यं बाध्यते, (विकृतिषु साप्तदश्यस्य) कृतार्थत्वात् । (किञ्च) तदर्थत्वे च न शास्त्रं नियमेन कारणम्, अननुग्राह्यत्वात् शास्त्रस्य (नहि प्रमाणानुग्रहार्थः प्रेक्षावतां प्रयासः, किन्तु समीहितप्राप्त्यर्थः । तस्मात्) प्रमाणात् यस्य बाधो गम्यते, स बाध्यते । (गम्यते च साप्तदश्यशास्त्रस्य बाधः)। इह (तु) जुहोतिशब्दः समानः (भिन्नस्य आहवनीयस्य च)। अधिकरणविभक्तिश्च सप्तमी (समानैव) तस्मात् विकल्पः । ननु ' पदे जुहोति ' इत्यत्र (अपि सप्तमी जुहोतिशब्दयोः) तुल्यत्वात् पदेन नाहवनीयबाधः (स्यात्) । उच्यते । उत्पत्तिवाक्यशिष्टेन वाक्यान्तरशिष्टं बाध्यते, पदं च उत्पत्तिवाक्यशिष्टम् । (वाक्यान्तरशिष्टस्तु आहवनीयः, तेनासौ पदेन बाध्यते । एवं तावत् पदवाक्यालोचनया बाध उक्तः । आहवनीयवाक्यमपि न तत्र विदधातीत्याह-) किञ्च होमेन आधारस्य (आहवनीयस्य) अनपेक्षितत्वात् वाक्येन असौ (आधारः) नीयमानः (दीयमानः इति लिखिते पाठः), ये शुद्धाः (उत्पन्नाः अग्निहोत्रादयः) होमाः,ताननूद्य आहवनीयः आधारो विधीयते, न (तु) ये (पदहोमादयः उत्पद्यमाना एव) आधारकलुषिताः, (ताननूद्य)।

भेदनार्थमिति चेत् । १४ ॥

भाष्यम्—अथोच्येत, एवमुपायं तत् कपालं संधीयते । ' गायत्र्या त्वा शताक्षरया संदधीत ' इति तत् कपालं संदध्यामिति । तत्र वक्ष्यामः ।

नाशेषभूतत्वात् । १५ ॥

भाष्यम्— न भेदनस्य शेषभूतं युज्यते, न तत् संधातुं शक्यते होमेन मन्त्रेण वा । मृदाऽपि संधीयमानस्य भिन्नबुद्धिर्नैवापेयात् ।

अनर्थकश्च सर्वनाशे स्यात् । १६ ॥

भाष्यम्— सर्वनाशे च श्रूयते ' भिन्नं कपालमप्सु प्रहरति ' इति । तत्रानर्थकः संस्कारः । ननु तत उद्धृत्य उपधायिष्यते । नेति ब्रूमः । ' अन्यदुपदधाति ' इति हि आमनन्ति । तस्मान्नैमित्तिकं कर्माङ्गम्, भिन्ने जुहोतीति ।

शा—'तत्रैकदेशभेदस्य नित्यत्वान्न निमित्तता । कादाचित्कस्तु कृत्स्नस्य भेदो गच्छेन्निमित्तताम् ॥' द्वितीयपक्षवादी तु मन्यते ' होमोऽयं भिन्नसंस्कारो भेददोषनिबर्हणात् । संनिपत्योपकारित्वं तथा सति हि लभ्यते ॥ आरादुपक्रियातश्च न्याय्या स्यात् संनिपातिता । कार्यक्षमश्च संस्कार्यः, कृत्स्नभिन्नं न तत्क्षमम् ॥' तस्मात् यदा कियताऽपि अंशेन भेदो भवति तदैव होमः । इति प्राप्ते, ब्रूमः । ' संस्कारत्वे भवेदेवं, न त्वियं भिन्नसंस्क्रिया । संस्कार्यत्वे हि भिन्नस्य निमित्तत्वं न लभ्यते ॥ निमित्ताभावतो होमो नित्यमङ्गं क्रतोर्भवेत् । नित्यश्चानित्यसंस्कार्य-

संवन्धं लभते कथम् ॥ ’ तस्मात् भेदने निमित्ते होमो विधीयते । स चाविशेषात् एकदेशभेदे कृत्स्नभेदेऽपि स्यात् ।

सोम— पूर्वत्र कादाचित्कानां अन्येषां (ऋत्विग्भिन्नानां) अग्रहणेऽपि इह कृत्स्नभेद एव ग्राह्यः इति प्रत्यवस्थानात्, भक्षणस्य द्रव्यसंस्कारत्ववत् होमस्य भिन्नसंस्कारत्वम्, इति प्रत्यवस्थानाच्च **संगतिः** । **सूत्रार्थस्तु** एकदेशेऽपि भिन्ने प्रायश्चित्तं स्यात् अर्थस्य भेदनस्य तत्रापि समवायात् इति ।

वि— ‘ कपालभेदने होमो भग्ने घृष्टेऽथवोभयोः ।, आद्यो भेदस्य भङ्गत्वात् संस्कार्यत्वेन मध्यमः ॥, संस्कृतावनिमित्तत्वात् नित्यानित्यविरोधनम् । निमित्तता समा भङ्गे घर्षे वाऽतो द्वयोर्हुतिः ॥ ’

भाट्ट-- दर्शपूर्णमासयोः प्रायश्चित्ताधिकारे ‘ भिन्ने जुहोति , स्कन्ने जुहोति ’ इति श्रुतम् । तत्र कृत्स्नभेदे एवेदम्, उतैकदेशभेदे एव, उतोभयत्रापीति चिन्तायाम्, द्वयोः संघर्षे सति एकदेशभेदस्य अवर्जनीयत्वेन नित्यत्वात् निमित्तत्वानुपपत्तेः सर्वभेदे एवेदं चूर्णतादशायां प्रायश्चित्तमिति **प्रथमः पक्षः** । संघर्षेण कतिपयावयवानां चूर्णीभावेऽपि भिन्नमिति प्रतीत्यभावात् कपालिऽऽकादिस्थूलावयवविभागे एव भेदनप्रतीतेः तस्यैवानित्यत्वेन सर्वभेदनवत् एकदेशभेदनस्यापि निमित्तत्वोपपत्तेः तत्रैवायं होमः । अयं हि भेदनस्य निमित्तत्वेऽपि होमस्य प्रयोजनापेक्षायां संनिपत्योपकारकत्वलाभाय भिन्नकपालसंस्कारार्थः । कपाले हि भेदनेन उक्तपरिमाणबाधात् वैगुण्यप्रसक्तौ तत्परिहाररूपः होमेन संस्कारो नानुपपन्नः । तस्य चानुपयुक्तस्य संस्कारायोगात् सर्वभेदने च उपयोगायोगात् एकदेशभेदनमेव निमित्तम् । अस्तु वा सप्तमी इयं संस्कार्यत्वपरैव, न तु निमित्तत्वार्थिकाऽपि । न च भिन्नस्य कादाचित्कत्वात् नित्यानित्यसंयोगविरोधः, रथंतरस्य कादाचित्कत्वेऽपि संमीलनादिधर्मविधिवदुपपत्तेः । **इति प्राप्ते**, भाव्युपयोगित्वे भूतोपयोगित्वे वा तस्योपधानावश्यकत्वे ‘ भिन्नं कपालमप्सु प्रक्षिपति, अन्यदुपदधाति ’ इतिवाक्यविरोधात् नायं स्वतन्त्रो होमो भिन्नसंस्कारकः । नापि प्रकरणपठितहोमानां तत्संस्कारकत्वम् । एतेन प्राकरणिकहोमानुवादेन लौकिकस्य भिन्नकपालस्यैव अधिकरणत्वेन विधिः आहवनीयबाधेन इत्यपास्तम् । होमस्य प्राकरणिकस्य कपालोपधानोत्तरत्वात् ‘ अन्यदुपदधाति ’ इत्यस्य वैयर्थ्यापत्तेः प्रायश्चित्तसमाख्याऽनुपपत्तेश्च । अत एवेदं कर्मान्तरम्, तच्च नैमित्तिकं आरादुपकारकं क्रतुवैगुण्यपरिहारार्थं क्रत्वङ्गत्वेन विधीयते । अतः सर्वभेदनमेकदेशभेदनमुभयमपि अत्र निमित्तम् ।

मण्डन-- ‘ भिन्नैकदेशेऽपि भवेज्जुहोतिः । ’

शंकर-- ‘ होमः किञ्चित्–कृत्स्नभेदे । ’

* दर्शपूर्णमासयोः **कपालोपधानम्** ‘ अधि च वपते कपालानि चोपदधाति ’ इति द्वादशद्वंद्वमध्ये एकम् । वि. ३।८।१० । ‘ कपालेषु श्रपयति ’ इति तत्कार्यम् । ३।१।५, * दर्शपूर्णमासयोः कपालोपधानम् ‘ उपवेषेण कपालान्युपदधाति ’ । ४।२।३, * दर्शपूर्णमासयोः **कपालोपधाने** समुदायानुसमयः कर्तव्यः । ५।२।३. * दर्शपूर्णमासयोः **कर्ता** सपत्नीक एक एव पुरुषः । ‘ अधिकारः दर्शपूर्णमासादौ ’ इत्यत्राधिकरणम् । **भा.** ६।२।२।३–१३. * दर्शपूर्णमासयोः **कर्तारः** ते एव वा अन्ये वा अनियमः पुनः प्रयोगे । **के.** ११।३।१२।३५. * दर्शपूर्णमासयोः **काम्यसामिधेनीषु** संख्यावृद्धौ आगमेन संख्यापूरणम् । वि. १०।५।८, * दर्शपूर्णमासयोः **काम्यसामिधेनीसंख्यापूरणं** प्रथमोत्तमयोः षट्त्वं गृहीत्वा अधिकानामेव षडादीनामागमेन । १०।५।८. * दर्शपूर्णमासयोः **कालः** ‘ यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ’ इति । तत्र सायंप्रातःकाले प्राप्ते जीवता कर्म कर्तव्यम्, इति कालार्थः संयोगः । **शा.** ६।२।७. * दर्शपूर्णमासयोः **कालभेदात्** अङ्गावृत्तिः इष्टिराजसूयाधिकरणे (११।२।३।१२) सिद्धान्तिता । **सु.** पृ. ७७९. * दर्शपूर्णमासयोः **कुम्भ्यादिपात्रभेदने** आज्यादिस्कन्दने च होमो विहितः ‘ भिन्ने जुहोति ’ ‘ स्कन्ने जुहोति ’ इति । स च निमित्तावृत्तौ आवर्तनीयः, न तु सकृदेव । वि. ६।२।९, * दर्शपूर्णमासयोः ‘ **कृष्णाजिनं** च शम्या च ’ यज्ञायुधम् । ३।८।१० । ‘ कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति’ इति उपयोगस्तस्य । ३।१।५, * दर्शपूर्णमासयोः **खननं** वेदिधर्मः । ‘ देवस्य त्वा सवितुः

प्रसव इति खनति ।' १०।१।१०. ✻ दर्शपूर्णमासयोः **गोदोहनं** पुरुषार्थमेव । तच्च पशुप्रयोज्यं पशूद्देशेन विहितम् । भा. ४।१।२।२ वर्णकं २. ✻ दर्शपूर्णमासयोः '**गोदोहनेन** पशुकामस्य प्रणयेत्' इति विहितं गोदोहनं प्रकृतावेव निविशते । के. ३।६।३।१०. ✻ दर्शपूर्णमासयोः **चतुरवत्तं** उपस्तरणाभिघारणाभ्यां सह । उपस्तरणादिविधिन्यायः । भा. १०।८।१२।२९–३२, ✻ दर्शपूर्णमासयोः **चतुर्थोत्तमयोः** प्रयाजयोः प्रति समानयति इत्युक्ते सति 'अतिहायेडो बर्हिः प्रति समानयति' इत्युच्यते, तेन बर्हिषश्चतुर्थतां दर्शयति इति श्रौतः क्रमः । ५।१।४।७, ✻ दर्शपूर्णमासयोः **चतुर्धाकरणं** आग्नेयपुरोडाशस्यैव आग्नेयचतुर्धाकरणाधिकरणम् । ३।१।१५। २६–२७, ✻ दर्शपूर्णमासयोः चतुर्धाकरणं भक्षणार्थम्, न परिक्रयार्थम् । चतुर्धाकरणं भक्षार्थं इत्यत्राधिकरणम् । ३।४।१७ (वि. २१) । ४८–५१. ✻ दर्शपूर्णमासयोः चतुर्धाकरणं हस्तेन । आभिचारिके वैश्वदेवे चरौ तु शम्यया । वि. १०।१।१ वर्णकं ३. ✻ दर्शपूर्णमासयोः **चतुर्धाकरणोत्तरं** 'इदं ब्रह्मणः' इत्यादिना भागनिर्देशः भक्षणार्थः । के. ३।४।१७।४८–५१. ✻ दर्शपूर्णमासयोः **चतुर्धाकरणविधौ** आग्नेयशब्देन द्विदेवत्यो न गृह्यते किंतु आग्नेय एव केवलः । वा. ३।१।१५।२६–२७. ✻ दर्शपूर्णमासयोः '**चतुर्होत्रा** पौर्णमासीमभिमृशेत्, पञ्चहोत्रा अमावास्याम्' इति अभिमर्शनं अङ्गहविषां प्रधानहविषां च, न प्रधानहविषामेव । ३।७।४।८,१०, ✻ दर्शपूर्णमासयोः **चतुर्होतृपञ्चहोतृ**मन्त्राभ्यामभिमर्शनं अपूर्वप्रयुक्तम्, न समुदायप्रयुक्तम् । ९।१।५।११–१९. ✻ दर्शपूर्णमासयोः **जागरणं** औपवसथ्यां रात्रौ कर्तव्यम्, तच्च रक्षार्थमदृष्टार्थं वा । यागपूर्वरात्रिः औपवसथी । वि. १२।१।८. ✻ दर्शपूर्णमासयोः **जाघनी** शास्त्रेण नोच्यते 'एवं पशोर्निष्पन्नया जाघन्या पत्नीसंयाजा यष्टव्याः' इति । सा संभवति क्रीत्वापि आनीयमाना पत्नीसंयाजार्थम् । भा. ३।३।१०।२३. ✻ दर्शपूर्णमासयोः '**जाघन्या** पत्नीः संयाजयन्ति' अत्र जाघनी क्रयादिना संपाद्य यागः कर्तव्यः । तथा चाज्येन सह जाघन्याः विकल्पः । वि. ३।३।१५. ✻ दर्शपूर्णमासयोः 'जाघन्या पत्नीः संयाजयन्ति' इति अर्थकर्म । नहि तत्र काचित् शेषभूता जाघनी अस्ति । लौकिक्यास्तु तत्र आज्येन सह विकल्पः । भा. १२।४। ६।१०. ✻ दर्शपूर्णमासयोः **जुहूः** पर्णमयी पलाशकाष्ठजन्या इत्यर्थः । अव्यभिचरितक्रतुसंबन्धमाश्रित्य जुहूहेतुः पलाशवृक्षः वाक्येन विधीयते 'यस्य पर्णमयी जुहूर्भवति' इति । अनारभ्यविधिश्च प्रकृतावेव निविशते । वि. ३। ६।१, ✻ दर्शपूर्णमासयोः **जुह्वां** चतुर्वारमाज्यं ग्राह्यं आज्यग्रहणकाले 'चतुर्जुह्वां गृह्णाति' । तत्र च प्रतिग्रहणं मन्त्रावृत्तिः । ११।४।१५. ✻ दर्शपूर्णमासयोः **जृम्भायाम्** 'मयि दक्षक्रतू' इति मन्त्रः पठनीयः । स च मन्त्रपाठः क्रत्वर्थः क्रतुयुक्तपुरुषधर्मो वा, न पुरुषार्थः । जञ्जभ्यमानाधिकरणं इत्यत्राधिकरणम् । के. ३।४।५। १४–१६.

दर्शपूर्णमासयोः जौहवाज्यं प्रयाजार्थम्, औपभृताज्यं च प्रयाजानुयाजार्थम् ॥

तत्रोत्पत्तिरविभक्ता स्यात् । ४।१।१६।४२॥

भाष्यम्––दर्शपूर्णमासयोः श्रूयते 'चतुर्जुह्वां गृह्णाति, अष्टावुपभृति' इति । तत्र संदेहः किं जौहवमौपभृतं चोभयं उभयार्थं प्रयाजेभ्यश्च अनुयाजेभ्यश्च (इति), उत जौहवं प्रयाजेभ्यः, औपभृतमनुयाजेभ्यः । अथवा औपभृतं प्रयाजेभ्यः, अनुयाजेभ्यश्चेति ; किं प्राप्तम् ? उभयमुभयार्थम् । कुतः ? यद्यत् आज्येन क्रियते, तस्मैतस्मै भवितुमर्हति, अविशेषात् ।

टुप्— प्रसक्तानुप्रसक्तेन आरभ्यते । (समानयनस्य औपभृताज्यप्रयोजकत्वे साधिते तत्प्रसङ्गेन औपभृतस्य तादर्थ्यं चिन्त्यते, तदनुप्रसङ्गेन च जौहवस्य ध्रौवस्य चेति) । तस्य आज्यप्रयोजकत्वे स्थिते चास्मिन् पूर्वाधिकरणारम्भः । (पूर्वमसंगतिप्रसङ्गात्तु न पूर्वमारब्धम् । पूर्वपक्षमाह–) असंयुक्तोत्पन्नानि (आज्यानि) प्रकरणिना गृह्यन्ते । तस्मात् यद्यत् आज्यसाध्यम् (कार्यं प्रयाजानुयाजादि) तत्रतत्र एतानि (बहुवचनं ध्रौवापेक्षम् । भाष्ये जौहवौपभृतग्रहणं ध्रौवस्यापि प्रदर्शनार्थम्) ।

तत्र जौहवमनुयाजप्रतिषेधार्थम् । ४३ ॥

भाष्यम्— नैवं उभयमुभयार्थमिति । जौहवं प्रया-

जार्थम्, औपभृतं उभयार्थम्। कथम्? 'यज्जुह्वां गृह्णाति, ऋतुभ्यस्तद् गृह्णाति, ऋतवो वै प्रयाजाः' इति जौहववचनं अनुयाजप्रतिषेधार्थं प्रयाजान् संकीर्तयति। आह, ननु नास्त्यत्र अनुयाजप्रतिषेधार्थं वचनम्। यदेतत् 'प्रयाजेभ्यस्तद् गृह्णाति' इति, प्रयाजेषु उपदेशकमेतत्। नास्त्यस्य अनुयाजप्रतिषेधे सामर्थ्यमिति। उच्यते। न ब्रूमः प्रतिषेधकमेतदिति, किन्तु उत्पत्तिवाक्ये आज्यानां नैव प्रयोजनाभिसंबन्धः। अनेन वचनेन प्रयाजप्रयोजनता क्रियते जौहवस्य, अनुयाजप्रयोजनता अस्य वचनाभावादेव न गम्यते, इति अनुयाजप्रतिषेधार्थं वचनमित्युच्यते।

टुप्— तत्र जौहवमनुयाजप्रतिषेधार्थम् 'चतुर्जुह्वां गृह्णाति' इति उत्पद्यमानं जौहवं अभिलषति किं मया कर्तव्यमिति। प्रयाजाश्च उत्पद्यमानाः द्रव्याभिलाषिणः। (तत्र यावदेव सर्वार्थता प्रकरणेन कल्प्यते, तावदेव) तयोः (जौहवप्रयाजयोः) श्रुतेन वाक्येन संबन्धे (विहिते) द्वयोरपि परस्परनियमात् अन्यत्र (प्रयोजनान्तरे जौहवस्य, प्रयाजानां च चर्वादिद्रव्यान्तरे) प्रसङ्ग एव नास्ति। एवं ध्रौवोपभृतयोः (ध्रौवस्य उपस्तरणाद्यर्थत्वम्, औपभृतस्य च प्रयाजानुयाजार्थत्वमेवेति) एवं चेत् (यदा परस्परनियमात् अन्यत्र प्रसङ्गाभावः, तदा) प्रतिषेधफलत्वात् नियमफलकत्वादित्यर्थः प्रतिषेधः उक्तः (नियमः उक्तः)।

औपभृतं तथेति चेत्। ४४॥

भाष्यम्— इति चेद् दृश्यते, जौहवमनुयाजेभ्यः प्रतिषिध्यते, औपभृतमुभयार्थमिति। भवतु जौहवं प्रयाजार्थम्, न तु औपभृतमुभयार्थम्। तदपि तथा स्यात्, यथा जौहवम्। कथम्? एतदपि अनुयाजार्थमेव श्रूयते 'यदुपभृति गृह्णाति अनुयाजेभ्यस्तद् गृह्णाति। छन्दांसि ह्यनुयाजाः' इति अनुयाजार्थता अस्येति।

टुप्— (पूर्वपक्षान्तरसूत्रार्थमाह—) यदि श्रुतेन नैराकाङ्क्ष्यात् नान्यार्थत्वम् (आज्यानाम्, तर्हि) औपभृतम् (अपि 'अनुयाजेभ्यस्तद् गृह्णाति' इति वचनात् केवल—) अनुयाजार्थत्वेन निराकाङ्क्षीकृतत्वात् न प्रयाजार्थं स्यात्।

जुहूप्रतिषेधान्नित्यानुवादः। ४५॥

भाष्यम्— नैतदेवम्, उभयार्थमौपभृतम्। एवं हि श्रूयते 'यदष्टावुपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णाति' इति। ननूक्तं 'अनुयाजेभ्यस्तद्गृह्णाति' इति अनुयाजार्थता अस्येति। उच्यते। जुहूप्रतिषेधात् नित्यानुवादः। उभयस्मिन् औपभृते जौहवे च उभयार्थे प्राप्ते जौहवमनुजाजेभ्यः प्रतिषिद्धम्, नौपभृतम्। तदा औपभृतस्य उभयार्थतायां सत्यां अनुयाजार्थतावचनं नित्यानुवादो भवितुमर्हति, न शक्नोति प्रयाजार्थतां प्रतिषेद्धुम्। प्रत्यक्षश्रुता हि सा। तस्मात् औपभृतमुभयार्थम्। समानयनं च ततो जुह्वां श्रूयते। तस्मादपि प्रयाजार्थता न शक्या बाधितुम्। (अत्र सूत्रे 'स्यात्' इति पदं सूत्रारम्भे सर्वत्रोपलभ्यमानमपि टुप्टीकायां तन्त्ररत्ने चादर्शनात् न पठनीयम्। भाष्येऽपि 'उच्यते' इत्युक्त्वा 'जुहूप्रतिषेधान्नित्यानुवादः' इत्येव सूत्रमनुदितं न तत्र 'स्यात्' इति पदमनूदितम्। तेन भाष्यमतेऽपि स्यात् इति पदं सूत्रे नास्तीत्येव सिध्यति। के.)।

टुप्— जुहूप्रतिषेधान्नित्यानुवादः। प्रयाजानुयाजार्थत्वे अवधृते ज्ञायते एवैतत् अनुयाजार्थमिति। यदि तु अनुयाजार्थमेवैतत्, ततः प्रयाजार्थमिति अशक्यं वक्तुम् (अप्राप्तत्वात्)। तस्मात् अयमनुवादोऽपि न घटते। तस्मात् 'प्रयाजानुयाजेभ्यस्तद् गृह्णाति' इत्यस्य अत्यन्तानर्थक्यात् इतरः ('अनुयाजेभ्यस्तद् गृह्णाति' इति) अनुवादः।

शा— 'उत्पत्तावविशेषेण सर्वार्थप्रतिभोद्गमः। अवयुत्यानुवादश्च प्रयाजाद्यर्थतावचः॥' (प्रयोजनविशेषसंयोगात् प्रकरणेन सर्वार्थत्वावगमः इत्यर्थः)। इति प्रथमः पक्षः 'नानाऽर्थत्ववचो युक्तमर्थवत्त्वस्य संभवे। तेन जुह्वां प्रयाजार्थमितरार्थं तथेतरत्॥' इति द्वितीयः पक्षः। 'जौहवस्य प्रयाजैकशेषत्वं युक्तमीरितम्। अनूयाजैकशेषत्वमितरस्य न मृष्यते॥'

सोम— पूर्वाक्षेपेण प्रत्यवस्थानात् संगतिः। सूत्रार्थस्तु— तत्र औपभृताद्याज्ये उत्पत्तिः कार्यविशेषासंयुक्ता, अतः सर्वार्था स्यादिति।

वि-- 'जुहूपभृद्ध्रुवास्वाज्यं सर्वार्थे वा व्यवस्थितिः ।, सर्वार्थमविशेषात् स्यात्, प्रयाजार्थे तु जौहवम् ॥ प्रयाजानूयाजहेतुः स्यादौपभृतमाज्यकम् । ध्रौवमन्यार्थमित्येषा व्यवस्था वचनैर्मता ॥ '

भाट्ट— एवं तावदौपभृतस्य प्रयाजार्थत्वमङ्गीकृत्य प्रयोज्यत्वं विचारितम् । तदेवाक्षिप्य समाधीयते । 'चतुर्जुह्वां गृह्णाति, अष्टावुपभृति गृह्णाति, चतुर्ध्रुवायां गृह्णाति' इत्यसंयुक्तानि आज्यानि लिङ्गप्रकरणाभ्यां यावत् सर्वप्राकरणिकद्रव्यापेक्षकार्यार्थत्वेन विनियुज्यन्ते, तावत् 'चतुर्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, अष्टावुपभृति गृह्णाति अनूयाजेभ्यस्तत्, सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इत्यादिवचनैस्तत्तत्कार्यार्थत्वेन विनियोगात् औपभृतस्य अनूयाजमात्रार्थत्वम् । यत्तु 'अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्' इति वचनम्, तत्र प्रयाजत्वानूयाजत्वयोरुद्देश्यताऽवच्छेदकत्वे वाक्यभेदापत्तेः अनूयाजानां प्रयाजोत्तरत्वानुवादमात्रम् । इति प्राप्ते, उभयतोऽपि अनुवादत्वावश्यकत्वे समानयनादिविध्यदृष्टार्थत्वाद्यनुरोधेन शुद्धानूयाजवचनस्यैव अनुवादत्वम् । न वा वाक्यभेदः, ग्रहैकत्वाधिकरणव्युत्पादितकौस्तुभोक्तरीत्या 'अध्वर्युयजमानौ वाचं यच्छतः' इतिवत् अवाक्यभेदात् । अतश्चौपभृतं प्रयाजानूयाजार्थमिति सिद्धम् ।

मण्डन-- 'द्व्यर्थमौपभृतं घृतम् ।' १८.

शंकर-- 'नानुयाजाङ्गमेव तत् ।' १९.

* दर्शपूर्णमासयोः 'तण्डुलान् पिनष्टि' इति पेषणं नापूर्वजनकं दृष्टफलकत्वात् । नियमापूर्वहेतुत्वेन तु विधेयता । वि. २।१।३, * दर्शपूर्णमासयोः 'तिष्ठन् याज्यामन्वाह, आसीनः पुरोऽनुवाक्याम्' इति । अत्र नानुवचनविधानं किन्तु स्थानासनगुणविधानम् । १०।४।२२, * दर्शपूर्णमासयोः **तुषोपवापः** पुरोडाशकपालेन कर्तव्यः । तत्र कपालस्य तुषोपवापो न प्रयोजकः, किन्तु प्रासङ्गिकः । श्रपणं तु कपालस्य प्रयोजकम् । पुरोडाशकपालन्यायः इत्यत्राधिकरणम् । ४।१।११. * दर्शपूर्णमासयोः '**त्रीन् परिधीन्०**' इति मन्त्रः अपूर्वप्रयुक्तः, न तु परिधित्रित्वसंख्याप्रयुक्तः । के. ९।१।५।११-१९.

* दर्शपूर्णमासयोः त्रिधातु पञ्चधातु वा वेदिं स्तृणाति । भा. ३।८।१७।३२.

⌛ **दर्शपूर्णमासयोः त्रिष्टुभौ संयाज्ये काम्ये नित्ये च संयोगपृथक्त्वेन ॥**

दर्शपूर्णमासयोरेव 'गायत्र्यौ संयाज्ये ब्रह्मवर्चसकामस्य, त्रिष्टुभौ वीर्यकामस्य' इत्यादि श्रुतम् । 'पिप्रीहि देवान्' 'अग्ने यदद्य' इत्यनयोस्त्रिष्टुभोर्नित्यवदाम्नातत्वेन केवलकाम्यप्राये तयोर्विशिष्य पाठाभावेन च तादृशावृचौ अन्ये वीर्यकामस्यागमयितव्ये । इति प्राप्ते, त्रिष्टुप्शब्देनापि द्रव्यवचनेन संनिहितयोः ऋचोः परामर्शसंभवात् संयोगपृथक्त्वेनोभयार्थता । संकर्ष. ४।३।१२.

* दर्शपूर्णमासयोः **दक्षिणा** अन्वाहार्यचरुः ! वि. १०।३।६, * दर्शपूर्णमासयोः **दण्डिधमन्त्रः** उपांशुयाजाङ्गं यथासंख्यक्रमात् । क्रमाधिकरणं द्रष्टव्यम् । ३।३।५, * दर्शपूर्णमासयोः **दर्भलवनमन्त्रस्य** प्रतिमुष्टिलवनं आवृत्तिः । ११।४।१४. * दर्शपूर्णमासयोः '**दाक्षायणयज्ञेन** यजेत प्रजाकामः' इति फलविशेषाय गुणविशेषविधिः, न तु दाक्षायणयज्ञः कर्मान्तरम् । दाक्षायणयज्ञाधिकरणम् । भा. २।३।४।५. * दर्शपूर्णमासयोः **दृषदि** पेषणाय तण्डुलाधिवापे 'धान्यमसि धिनुहि देवान्' इति मन्त्रः । शाक्त्यानामयने तु तत्र 'मांसमसि धिनुहि देवान्' इति ऊहः । वि. ९।१।१३ वर्णकं २. * दर्शपूर्णमासयोः **दृषदुपले** 'दृषच्चोपला च' यज्ञायुधम् । वि. ३।८।१० । तदुपयोगस्तु 'दृषदुपलाभ्यां पिनष्टि' । ३।१।५, * दर्शपूर्णमासयोः **दृषत्समाहननं** कुटरुणा 'दृषदुपले च समाहन्ति' । (कुटरुः = मुष्टिमेयः पाषाणः । बौधायनमते तु कुटरुस्थाने शम्या) । ३।८।१०. * दर्शपूर्णमासयोः **देवताऽऽवाहनकालः** सामिधेनीप्रयाजयोर्मध्ये । वि. १०।१।१ वर्णकं ३, * दर्शपूर्णमासयोः **देवतापरिग्रहार्थमन्वाधानं** अग्न्यन्वाधानात्मकमेव 'ममाग्ने वर्चो विहवेष्वस्तु' इत्यग्निं गृह्णाति इत्युक्तत्वात् । १२।१।१२. * दर्शपूर्णमासयोः **देशः** पुनःप्रयोगे पूर्वप्रयोगीय एव वा अन्यो वा यथाकामम् । भा. ११।३।१२।३३. * दर्शपूर्णमासयोः **दोहनातञ्चनादयः** सांनाय्यधर्माः । वि. ३।१।४, * दर्शपूर्णमासयोः **दोहननिर्वापादयो** धर्मा यजुर्वेदे आम्नाताः ।

३।३।६. * दर्शपूर्णमासयोः द्रव्यनाशे आज्येन समापनं वचनात् । भाट्ट. ४।१।७.

⧗ दर्शपूर्णमासयोः द्वादश द्वन्द्वानि आध्वर्यवाणि, न याजमानानि ॥

याजमाने समाख्यानात् कर्माणि याजमानं स्युः । ३।८।९।१९ ॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र यजमानकाण्डे कर्माणि आम्नातानि द्वादश, 'वत्सं चोपावसृजति उखां चाधिश्रयति, अव च हन्ति दृषदुपले च समाहन्ति, अधि च वपते कपालानि चोपदधाति, पुरोडाशं चाधिश्रयति आज्यं च, स्तम्बयजुश्च हरति अभि च गृह्णाति, वेदिं च परिगृह्णाति, पत्नीं (च) संनह्यति, प्रोक्षणीश्चाऽऽसादयति, आज्यं च । एतानि वै द्वादश द्वंद्वानि दर्शपूर्णमासयोः' इति । अत्र संदेहः किमेतानि अध्वर्योः कर्माणि, उत यजमानस्येति । किं प्राप्तम् ? यजमाने समाख्यानात् कर्माणि याजमानं स्युः । विशेषसमाख्यानात् याजमानानीति गम्यते । यथा पोत्रीयं नेष्ट्रीयमिति ।

वा— उखाऽधिश्रयणावहन्त्यादीनां द्वादशानां कर्मद्वंद्वानां याजमाने आध्वर्यवे च पठितानां हि आम्नातमन्त्रवत् उभाभ्यां प्रयोक्तुमशक्यत्वात् याजमानसमाख्यानात् यजमानकर्तृकत्वमिति ।

अध्वर्युर्वा, तदर्थो हि, न्यायपूर्वं समाख्यानम् । २० ॥

भाष्यम्— अध्यर्युर्वा कुर्यादेतानि । तदर्थो हि अध्वर्युः परिक्रीत इति समाख्यानादवगम्यते । आध्वर्यवे एव सर्वे इमे पदार्थाः समाम्नाताः । याजमाने एषां द्वंद्वता उच्यते । द्वंद्वता च समभ्यासक्रिया । तत्राध्वर्युः पदार्थान् करिष्यति, यजमानेनापि समभ्यासीकरणम्, इत्येतदशक्यम् । तत्र 'अङ्गगुणविरोधे च तादर्थ्यात्' इति द्वंद्वतागुणो बाधितव्यः । तस्मादाध्वर्यवा एते पदार्था इति । यदुक्तं समाख्यानादिति, तत् परिहर्तव्यम् । उच्यते । न्यायपूर्वं समाख्यानम्, समाख्यानात् यजमानेन द्वंद्वता संपादयितव्या । 'इदं चेदं च संपादय' इति यजमानो ब्रूयात् । केषुचिच्चात्र पदार्थेषु यजमानस्य अनुमन्त्रणम् । तन्निमित्ता समाख्या भविष्यति । 'अपूर्वं त्वपकृष्येत' यदुक्तम्, यथा पोत्रीयम्, नेष्ट्रीयमिति, एवमत्रापीति । तदुच्यते । युक्तं तत्र, विशेषसमाख्यानात् । इह तु द्वंद्वता याजमानीया, पदार्थास्तु आध्वर्यवा एव । तस्माददोषः ।

वा— अनुत्पन्नानां द्वंद्वत्वापादनाशक्तेः, विधायकशब्दाभावाच्च नैषां याजमाने एवोत्पत्तिः । किं तर्हि ? आध्वर्यवे । तत्र च कर्त्राकाङ्क्षा, तदर्थश्च परिक्रयः इत्यवगते कर्तरि, न द्वंद्वाम्नानवेलायामपेक्षास्ति इति यजमानकर्तृत्वानुपपत्तिः । तत्र स्वरूपस्य असति यजमानसंबन्धे द्वंद्वता कथं याजमानी क्रियेत । न च सा कर्त्रन्तरेण क्रियमाणानां संभवति । समासन्नकरणं हि द्वंद्वता । न च अन्यकर्तृकां क्रियामन्यः समासन्नां कर्तुं समर्थः । न च समासन्नकरणानुरोधेन क्रियास्वरूपमपि याजमानं संभवति । अतः अङ्गगुणविरोधन्यायात् तदपि आध्वर्यवमेव । यजमानस्तु स्मारयिष्यति द्वंद्वतामिति समाख्याऽर्थवत्ता ।

शा—'कर्माणि यत्र चोद्यन्ते तत्रैषां कर्त्रपेक्षिता । आध्वर्यवे च चोद्यन्ते कर्माण्याध्वर्यवाण्यतः ॥'

सोम— पूर्वत्र ज्ञनियमवत् इह यजमाननियमः इति प्रत्यवस्थानात् **संगतिः** ।

वि— 'वत्सं चोपसृजेत् तद्वदुखां चाधिश्रयेदिति ।
द्वादशद्वंद्वकर्मैतत् स्वामिनो वेतरस्य वा ॥, आद्यः
पाठात् स्वामिकाण्डे, तादर्थ्येन परिक्रयात् । महाकाण्डोक्तितोऽन्त्योऽस्तु द्वंद्वतैवात्र कीर्त्यते ॥'

भाट्ट— दर्शपूर्णमासयोः 'वत्समुपावसृजति' इत्यादीनि चतुर्विंशतिकर्माणि आध्वर्यवसमाख्यायुक्तानि प्रत्येकं भिन्नदेशे विधाय पुनस्तान्येव याजमानसमाख्यायुक्तानि 'वत्सं चोपावसृजति उखां चाधिश्रयति' इत्याद्युक्त्वा 'एतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्य यजेत' इति श्रुतम् । तदेषां ह्याम्नातमन्त्रवत् उभयकर्तृकत्वं तावन्न संभवति, अदृष्टार्थताऽऽपत्तेः । न चाभ्यासात् कर्मान्तरम्, अन्यपरत्वात् । अत एवैककर्तृकत्वावश्यम्भावे विशेषसमाख्यानात् याजमानत्वे प्राप्ते, नैषां याजमानकाण्डे विधानम्, आध्वर्यवे भिन्नदेशे विहितानामेव द्वयोः मिथः प्रत्यासन्नत्वाख्यद्वन्द्वतारूपगुणविधानार्थमनुवादात् । अतः पदार्थेषु तावत् अध्वर्युरेव कर्ता । न च द्वन्द्वतायामेव यजमानः

शङ्क्यः, अन्येन क्रियमाणानां अन्येन द्वंद्वतायाः संपादयितुमशक्यत्वात्। द्वंद्वता नाम एकया वत्सोपावसर्जनक्रियया धेनुवत्सयोः प्रत्यासन्नत्वसंपादनम्। एकया च अवहननक्रियया उलूखलमुसलयोः। एवं द्वादशसु क्रियासु द्रष्टव्यम्। न च तत्कर्त्रनुरोधेन प्रधानभूतपदार्थानां कर्तृबाधः, अङ्गगुणविरोधन्यायेन तदसंभवात्। **न च** 'तानि संपाद्य यजेत' इति क्त्वाप्रत्ययबलेनैव द्वन्द्वताया यागसमानकर्तृकत्वावगतेः वचनादेव अङ्गनिष्ठादपि पदार्थेषु समाख्याबाधः इति **वाच्यम्**। क्त्वाप्रत्ययस्य प्रयोजकत्वेनापि उपपत्तेः प्रधानसमाख्याबाधकत्वानुपपत्तेः। एवं द्वंद्वतानिष्ठसमाख्याऽपि प्रयोजकत्वाभिप्रायेणैव व्याख्येया। अतः स्मारणमात्रं याजमानं पदार्थास्तु आध्वर्यवा एव।

मण्डन—'द्वंद्वानि न स्युर्यजमानकर्म।'

शंकर—'द्वंद्वान्याध्वर्यवाणि नः।' १२.

* दर्शपूर्णमासयोः **द्विबहुपत्नीकप्रयोगे** 'पत्नीं संनह्य' इत्यत्र एकवचनस्य नोहः। पत्नीसंनहनन्यायः। **भा.** ९।३।६।२१, * दर्शपूर्णमासयोः **धर्माः** अपूर्वप्रयुक्ता न यजिप्रयुक्ताः, तस्मात् विकृतिषु ऊहसिद्धिः। ९।१।१।१, * दर्शपूर्णमासयोः धर्माः फलप्रयुक्ताः। फलदेवताऽधिकरणम्। ९।१।३।४–५, * दर्शपूर्णमासयोः **'धान्यमसि धिनुहि देवान्'** इति धान्यशब्दः प्रयोगसमवेतवचन एव। धान्याधिकरणम्। ९।१।१३।३८–३९ वर्णकं २. * दर्शपूर्णमासयोः **'नानृतं वदेत्'** इत्यनृतचदनप्रतिषेधः क्रत्वर्थः। तत्र क्रतुगामि प्रायश्चित्तम्। ततः पुरुषार्थो निषेधो भिन्नः, तत्र स्मार्तं प्रायश्चित्तम्। **वि.** ३।४।८, * दर्शपूर्णमासयोः **नारिष्ठहोमा** विहिताः नक्षत्रेष्ट्यादौ विकृतौ अतिदिश्यन्ते। १०।४।१, * दर्शपूर्णमासयोः **नारिष्ठहोममन्त्राः** 'दश ते तनुवो यज्ञ यज्ञियाः' इत्यादयः। १०।४।१. * दर्शपूर्णमासयोः **निगमाः** निगदा वा आवाहननिगमः 'अग्निमग्न आवह', स्वाहाकारनिगमः 'स्वाहाग्निं स्वाहा सोमम्', अयाट्–निगमः 'अयाडग्नेः प्रिया धामानि', जोषणनिगमः 'अग्निरिदं हविरजुषत' इति। **के.** * दर्शपूर्णमासयोः **नित्यत्वेऽपि** तयोर्विहितकाले एवानुष्ठानं न सततम्, दर्शपूर्णिमाकालविशिष्टजीवनस्यैव निमित्तत्वात्। **वि.** ६।२।७. * दर्शपूर्णमासयोः **निर्वापः** 'अपरेण गार्हपत्यं प्रागीषं अनः अवस्थितं भवति, तस्य दक्षिणचक्रमारुह्य अनसोऽधि निर्वपति' इति। **भा.** १२।१।७।१५. * दर्शपूर्णमासयोः निर्वापः प्रतिदेवतं मुष्टिचतुष्टयात्मकः 'चतुरो मुष्टीन् निर्वपति' इति। **वि.** १०।२।२८. * दर्शपूर्णमासयोः **निर्वापे** 'अग्नीषोमाभ्याम्' इत्यत्र 'देवस्य त्वा' इत्यादिः पूर्वभागस्य 'जुष्टं निर्वपामि' इत्युत्तरभागस्य चानुषङ्गः, तेन मन्त्रपूरणं भवति। **के.** २।१।१६।४८. * दर्शपूर्णमासयोः **निर्वाप—बर्हिर्लवन—**वेदिस्तरण–आज्यग्रहणेषु प्रतिनिर्वापादि तत्तन्मन्त्रस्यावृत्तिः। निर्वापन्यायः। **भा.** ११।४।१४।४४–४५. * दर्शपूर्णमासयोः **निर्वापमन्त्रः** 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति एकं वाक्यम्। **वि.** २।१।१४, * दर्शपूर्णमासयोः **निर्वापमन्त्रस्य** प्रतिमुष्टि आवृत्तिः। **भा.** ११।४।१४।४४–४५. * दर्शपूर्णमासयोः **निर्वापमन्त्रे** वर्तमानः अग्निशब्दः समवेतवचनत्वात् विकृतौ ऊहितव्यः। ९।१।१२।३८–३९. * दर्शपूर्णमासयोः **निर्वापमन्त्रगतस्य** 'अग्नये' इति पदस्य स्थाने 'अग्नीषोमाभ्यां' इत्यादिपदानां यथायोगं निवेशः। **वि.** ९।१।१२. * दर्शपूर्णमासयोः **निर्वापमन्त्रगतानां** सवितृ–अश्वि–पूषशब्दानां विकृतौ न ऊहः, कर्मासमवेतार्थत्वात्। **भा.** ९।१।११।३६–३७, * दर्शपूर्णमासयोः **नीवाराणां** प्रतिनिधित्वे 'व्रीहीणां मेध' इति मन्त्रे नोहः। नीवाराणां यत्र प्रकृतिद्रव्यत्वमेव तत्र तु ऊहः। ९।३।९।२३–२६, * दर्शपूर्णमासयोः **नैमित्तिकं** 'गोदोहनेन पशुकामस्य प्रणयेत्, कांस्येन ब्रह्मवर्चसकामस्य, मार्तिकेन प्रतिष्ठाकामस्य' इति। नेदं नित्यम्, नित्यं तु वारणं प्रणयनपात्रम्। ४।३।२।४. * दर्शपूर्णमासयोः **पञ्चशराव ओदनः** ऐन्द्रः कर्मान्तरमपि सत् हविरार्तौ पयोऽन्तरेण दध्यन्तरेण चानुष्ठीयमानदर्शस्याङ्गम्, न तु स्वतन्त्रमेव। पञ्चशरावन्यायः। **वि.** ६।४।१०, * दर्शपूर्णमासयोः पञ्चशराव ओदनः ऐन्द्रः प्रायश्चित्तं एकस्य द्वयोर्वा दोहयोर्नाशे। आर्तिन्यायः। ६।४।६, * दर्शपूर्णमासयोः पञ्चशराव ओदनो द्रव्यदेवताविशिष्टं कर्मान्तरं प्रायश्चित्तरूपं न तु

दोहद्वयस्य द्रव्यरूपः प्रतिनिधिः । ६।४।९. * दर्शपूर्णमासयोः ‘ **पत्नीं** संनह्य ’ इति पत्नीशब्दः द्विबहुपत्नीके प्रयोगे नोहितव्यः । पत्नीसंनहनन्यायः । भा. ९।३।६।२०, * दर्शपूर्णमासयोः **पत्न्याः** संनहनं समाम्नातं ‘ योक्त्रेण पत्नीं संनह्यति’ इति । १२।१।१३।२९. * दर्शपूर्णमासयोः **पत्नीसंयाजा**श्चत्वारः । तत्र तृतीयाऽऽहुतौ देवपत्नीनां देवतात्वात् तद्द्वारा पत्नीसंयाजशब्दप्रवृत्तिः । अत्र जाघनी द्रव्यं विहितम् । तच्च क्रयादिना संपाद्यम्, अत्र पशोरभावात् । जाघन्याश्च प्रकरणात् नोत्कर्षः । जाघनीन्यायः । वि. ३।३।१५, * दर्शपूर्णमासयोः **पत्नीसंयाजेभ्य** ऊर्ध्वं हविष्कृतः पत्न्याः उत्थानं विहितम् । १२।२।४, * दर्शपूर्णमासयोः **पत्नीसंयाजेषु** गार्हपत्येन आहवनीयस्य बाधः । ज्योतिष्टोमादौ विशेषविहित–इत्यत्राधिकरणम् । ३।८।१८, * दर्शपूर्णमासयोः **पत्नीसंयाजरूपे** अर्थकर्मणि आज्यजाघनीद्रव्ये विकल्पेन विहिते । १२।४।६, * दर्शपूर्णमासयोः **पथिकृत्** । ‘अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्, यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वाऽतिपातयेत् ’ । अतिपातनं अकरणम् । अस्याः पाथिकृतेः वैश्वानरेष्ट्या विकल्पः, अन्योन्यनिरपेक्षत्वात् । १२।३।५. * दर्शपूर्णमासयोः **परिक्रयः** अन्वाहार्यं आम्नातः । भा. १२।१।१६।३२. * दर्शपूर्णमासयोः **परिग्रहो** वेदेः । ‘स्फ्येन वेदिं परिलिखन् परिगृह्णाति’। पूर्वपरिग्रहोऽयम् । परिग्रहो द्विविधः पूर्वपरिग्रहः उत्तरपरिग्रहश्चेति । वि. १०।१।१, * दर्शपूर्णमासयोः **परिधिप्रहरणम्** । यदा होता ‘ तच्छंयोः ’ इति मन्त्रं जपति , तदानीमध्वर्युः परिधीन् अग्नौ प्रक्षिपति । तथा च कल्पसूत्रम् ‘अनूच्यमाने शंयुवाके आहवनीये परिधीन् प्रहरति ’ इति । १०।७।१२, * दर्शपूर्णमासयोः **परिभोजनीया** दर्भाः शास्त्रीयलवनादिसंस्काररहिताः यागे उपयोज्यमानाः । ३।८।१८. * दर्शपूर्णमासयोः **परिमार्जनं** (श्लक्ष्णतामार्जनं) पुरोडाशधर्मः ‘सं ते तन्वा तनूः सृज्यतां इति त्रिः परिमार्ष्टि ’। (सत्याषाढीयास्तु ‘ त्वचं गृह्णीष्व ’ इति मन्त्रेण त्रिः परिमृजन्ति) । भा. १०।१।१७।५५. * दर्शपूर्णमासयोः **परिलेखनं** वेदिधर्मः । ‘स्फ्येन वेदिं परिलिखन् परिगृह्णाति ’ । (परिलेखनं बाह्यरेषा) । वि. १०।१।१, * दर्शपूर्णमासयोः **पर्णमयत्वं** जुह्वाः क्रत्वर्थम् । फलश्रुतिस्तु अर्थवादः । पर्णः पलाशवृक्षः । ४।३।१, * दर्शपूर्णमासयोः **पलाशशाखायाश्छेदने** ‘ इषे त्वा ’ इति मन्त्रः, मार्जने च ‘ ऊर्जे त्वा ’ इति मन्त्रः । २।१।१५, * दर्शपूर्णमासयोः **पवित्रं** नाम ‘समौ अप्रच्छिन्नाग्रौ प्रादेशमात्रौ दर्भौ पवित्रे करोति ’। ३।८।१८. * दर्शपूर्णमासयोः **पवित्रे** विधृती च परिभोजनीयादर्भैः कर्तव्ये , न तु बहिर्दर्भैः । विधृतिपवित्राधिकरणम् । भा. ३।८।१७।३३. * दर्शपूर्णमासयोः **पार्वणहोमौ** । ‘ ऋषभं वाजिनं वयम् ’ इति मन्त्रेण पूर्णमासेष्टौ , ‘ अमावास्या सुभगा सुशेवा ’ इति मन्त्रेण च अमावास्येष्टौ , न तु द्वयोरपि द्वावपि । के. ९।२।१९।५७–५८. * दर्शपूर्णमासयोः **पिष्टलेपफलीकरणहोमौ** अनुयाजोत्तरं क्रियेते , तयोः अनुयाजैः सह नोत्कर्षः । पिष्टलेपः दृषदुपलकपालादिषु आश्लिष्टः, फलीकरणानि च तण्डुलकणाः । होमोऽयं दक्षिणाग्नौ । तत्र ‘ अग्नेऽदब्धायो ’ इति मन्त्रेण फलीकरणहोमः , ‘ उलूखले मुसले ’ इति मन्त्रेण पिष्टलेपहोमः । वि. ५।१।१५. * दर्शपूर्णमासयोः **पुरोडाशः** यागप्रयुक्तः , न स्विष्टकृत्प्रयुक्तः । उत्तरार्धन्यायः । के. ४।१।१३।२८. * दर्शपूर्णमासयोः ‘ **पुरोडाशं** पर्यग्नि करोति ’ अत्र, एकवचनमविवक्षितम् , सर्वानेव पुरोडाशान् पर्यग्नि करोति । भा. ३।१।७।१३. * दर्शपूर्णमासयोः ‘ पुरोडाशं पर्यग्नि करोति ’ इति पुरोडाशशब्दो जातिवाची ‘ पुरोडाशेन मे माता प्रहेलकं ददाति ’ इति प्रयोगात् । बर्हिराज्याधिकरणम् । वि. १।४।८, * दर्शपूर्णमासयोः पुरोडाशंपुरोडाशं प्रति कपालभेदः । ११।४।१२, * दर्शपूर्णमासयोः ‘ **पुरोडाशाभ्यामेव** असोमयाजिनं याजयेत् ’ इत्ययं ‘ सांनाय्येन सोमयाजिनः ’ इत्यस्यार्थवादः । शा. १०।८।१४. * दर्शपूर्णमासयोः **पुरोडाशस्य** कपालेभ्यो व्युद्धृत्य वेद्यां आसादनं क्रियते । भा. १०।१।२०।५८. * दर्शपूर्णमासयोः पुरोडाशस्य चतुर्धाकरणे ब्राह्मणा एव निर्दिष्टाः । ‘ ब्राह्मणानामिदं हविः ’ इति । अधिकारः आर्त्विज्ये ब्राह्मणस्यैव इत्यत्राधिकरणम् । १२।४।१५।

४६. * दर्शपूर्णमासयोः पुरोडाशस्य द्विरवदानम्, उपस्तरणाभिघारणे च द्वे इति चतुरवत्तत्वम् । वि. १०।८।१२, * दर्शपूर्णमासयोः पुरोडाशस्य सकलस्याग्नौ प्रक्षेपो नास्ति किंतु द्व्यवदानमात्रस्य । ३।४।१८, * दर्शपूर्णमासयोः पुरोडाशस्य सदनं ‘ स्योनं ते ’ इति पूर्वार्धेन कार्यम्, सादनं तु ‘ तस्मिन् सीद ’ इत्युत्तरार्धेन लिङ्गात्, न तु वाक्येन ऐकमन्त्र्यम् । ३।३।८. * दर्शपूर्णमासयोः **पुरोडाशे** प्रायशः सर्वस्मिन् दग्धे पुनः सैवेष्टिः कर्तव्या । अल्पांशदाहे तु न कर्तव्या, तस्या वर्जनीयत्वात् । सैवेयं क्षामेष्टिः नाम । क्षामेष्टिन्यायः । भा. ६।४।५।१७–२१. * दर्शपूर्णमासयोः पुरोडाशे व्रीहियवयोर्विकल्पः, न तु समुच्चयः एकार्थत्वादुभयोः । वि. १२।३।४. * दर्शपूर्णमासयोः **पुरोडाशाधिश्रयणं** कपालेषु, पाकार्थम् । ‘पुरोडाशं चाधिश्रयति आज्यं च’ । भा. ३।८।९।१९, * दर्शपूर्णमासयोः **पुरोडाशार्थे** तण्डुलानां पेषणम् । भा. १०।१।१२।४९–५०, ‘ प्रणीताभिर्हवींषि संयौति ’ इति संयवनम् । १३।५१, ‘सवितृप्रसूत एवैनं देवताभिः संवपति’ इति संवपनम् । १४।५२, ‘ वसूनां रुद्राणां आदित्यानां भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम् ’ इति संतापनम् । १५।५३, अङ्गारेषु कपालानामुपधानम् । १६।५४, ‘ उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति ’ इति प्रथनम् । १७।५५, ‘ वेदेन भस्मनाङ्गारानभ्यूहति ’ इत्यभ्यूहनम् । १८।५६, ‘ दर्भपिञ्जूलैरभिज्वलयति ’ इत्यवज्वलनम् । १९।५७, ‘ अन्तर्वेद्यां हवींष्यासादयति ’ इति कपालेभ्यो व्युद्धृत्यासादनं च क्रियते । चरोरर्थे तु नेदं किमपि कर्तव्यम् । २०।५८. * दर्शपूर्णमासयोः **पुरोडाशकपालस्य** श्रपणं तु प्रयोजकम्, न तुषोपवापः । पुरोडाशकपालन्यायः । भा. ४।१।११।२६. * दर्शपूर्णमासयोः **पुरोडाशधर्मा** आदौ कर्तव्याः, आज्यधर्माः पश्चात् । धर्मिणोस्तु आदौ उपांशुयाजाज्यम्, ततोऽग्नीषोमीयपुरोडाशः । वि. ५।१।८. * दर्शपूर्णमासयोः **पुरोडाशविभागार्थानां** एककार्याणां मन्त्राणां प्रयोगे विकल्पः । भा. १२।३।१३।२९. * दर्शपूर्णमासयोः **पुरोडाशश्रपणं** गार्हपत्ये विहितम् । (‘ आहवनीये गार्हपत्ये वा ’ इति तु सत्याषाढसूत्रम्) । वि. १२।१।५, * दर्शपूर्णमासयोः **पुरोडाशश्रपणे** ‘ यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः, यः शृतः स दैवः ’ इति श्रुतम् । अत्र विदग्धरौद्रयोरनुवादः शृतस्तुतये यथोचितपाकस्तुतये । ३।४।७, * दर्शपूर्णमासयोः **पूर्णमासे** अभिवासनोत्तरं वेदिः । दर्शे तु पूर्वेद्युर्वेदिः, यागदिने निर्वापादि अभिवासनान्तम् । ५।१।१६, * दर्शपूर्णमासयोः **पेषणं** पिष्टभवनपर्यन्तं कर्तव्यम्, न सकृत्, दृष्टफलकत्वात् । अवघातादिक्रियाणां इत्यत्राधिकरणम् । ११।१।५, * दर्शपूर्णमासयोः पेषणं प्रथमतः पश्चात् पुरोडाशश्रपणम् । चातुर्मास्येषु महापितृयज्ञे तु प्रथमतः श्रपणेन धानाः संपाद्य पश्चात् सक्तुभावाय पेषणं इति पेषणधर्माः क्रियन्ते एव । १०।२।३४ वर्णकं २. * दर्शपूर्णमासयोः **पेषणविधिः** नियमार्थः, नानुवादः । भा. ४।२।११।२६. * दर्शपूर्णमासयोः **पौर्णमास्यां** उपवेषेणैव कपालोपधानम्, परंतु तदर्थे शाखाछेदो न कर्तव्यः । न हि शाखाछेदस्य उपवेषः प्रयोजकः । वि. ४।२।३, * दर्शपूर्णमासयोः **पौर्णमास्यमावास्या**कालविशिष्टजीवननिमित्तकत्वात् ‘ निमित्तावृत्तौ नैमित्तिकस्याप्यावृत्तिः ’ इति प्रतिपौर्णमास्यमावास्याकालं अनुष्ठानम्, न तु सकृदेव । ६।२।८, * दर्शपूर्णमासयोः ‘ **प्रणीताभिर्हवींषि संयौति** ’ इति संयवनं क्रियते पिष्टानाम् । भा. १०।१।१३।५१, * दर्शपूर्णमासयोः **प्रणीतानां** वेद्यां निनयनं प्रतिपत्तिः । तच्च प्रणयनस्य न प्रयोजकम् । अतः संयवनोत्तरं निनयनात् प्राक् प्रणीतानां नाशेऽपि न पुनरुत्पत्तिः । निनयनन्यायः । ४।२।५।१४–१५. * दर्शपूर्णमासयोः **प्रणीताकाले** अध्वर्युयजमानयोर्विहितस्य वाङ्नियमस्य हविष्कृदाह्वाने त्यागः । तत्र च प्रोक्षणाद्यङ्गापूर्वं प्रयोजकम्, न परमापूर्वमिति । वि. ९।१।७, * दर्शपूर्णमासयोः **प्रणीताधर्मा** उत्पवनादयः । ९।४।१०. * दर्शपूर्णमासयोः **प्रणीताप्रणयनकाले** पौर्णमास्यां ब्रह्मणो वरणम् । दर्शे पूर्वेद्युः । भा. १२।१।१८।४०. * दर्शपूर्णमासयोः **प्रणीताप्रणयनकालीनो** वाङ्नियमः तद्देशगतपदार्थान्तरापूर्वप्रयुक्तः । प्रणीतावाङ्नियमन्यायः इत्यत्रा-

धिकरणम् । के. ९।१।७।२३–२४ वर्णकं २. ＊ दर्शपूर्णमासयोः **प्रणीताप्रणयनपात्रं** नित्यं वारणम् (वारणवृक्षविकारः । गोदोहनकांस्यमृन्मयानि तु काम्यानि) । **भा.** ४।३।२।४. ＊ दर्शपूर्णमासयोः **प्रतिनिधिः** अत्यन्तसदृश एव ग्राह्यः यथा व्रीहीणां नीवाराः । **वि.** ६।३।११, ＊ दर्शपूर्णमासयोः **प्रथनं** पुरोडाशधर्मः ‘ उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति ’ । चरौ नेदं कर्तव्यम् । १०।१।१७, ＊ दर्शपूर्णमासयोः **प्रदानान्तानुसमयः** आग्नेयाग्नीषोमीयपुरोडाशयोः कर्तव्यः । अवदानं प्रदानान्तमेकः पदार्थः । तथा चाग्नेयमवदाय हुत्वा अग्नीषोमीयमवदाय जुहुयात् । ५।२।४. ＊ दर्शपूर्णमासयोः **प्रधानानि** एकेन शब्देन फलं प्रति उपदिष्टानि ‘ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ’ इति । अतस्तेषां संभूयकारित्वम् । **भा.** ११।१।१०।५६, ＊ दर्शपूर्णमासयोः **प्रधानानां** तन्त्रेण स्वर्गः फलम् । ११।१।१।१–४, ＊ दर्शपूर्णमासयोः **प्रयाजः** अन्त्यः देवतासंस्कारापूर्वोभयार्थः । आश्रयिन्यायः । ४।१।७।१८–२०.

⌛ दर्शपूर्णमासयोः प्रयाजः पञ्चमः आज्यभागादिदेवतासंस्कारार्थः ॥

प्रयाजे च तन्न्यायत्वात् । १०।१।७।१४॥

भाष्यम्— दर्शपूर्णमासयोराम्नायते उत्तमः प्रयाजः ‘ स्वाहाकारं यजति ’ इति । तत्र संशयः किं उत्तमः प्रयाजः आरादुपकारकं कर्म, उत संस्कारकर्म इति । तत एतत् तावत् परीक्ष्यते किं आज्यभागादिषु या देवता यष्टव्याः, ता एवात्र देवताः उत अन्यास्ताभ्यो देवताभ्यः इति । कथमन्या देवताः, कथं वा प्रकृताः स्युरिति ? यदि ‘ स्वाहाकारं यजति ’ इति देवताविधानम्, ततोऽन्या प्रकृताभ्यो देवता । अथ ‘ ये यजामहे स्वाहाऽग्निम् ’ इति निगदेन मान्त्रवर्णिको देवताविधिः, ततः प्रकृता देवता इति । किं प्राप्तम् ? आरादुपकारकं कर्म इति । तदेतत् वर्ण्यते अन्या देवता ‘ स्वाहाकारं यजति ’ इत्यनेन विधीयते । एवं वचनप्राप्ता भविष्यति, इतरथा मान्त्रवर्णिकी कल्पयितव्या भवेत् । **ननु** अन्या अग्न्यादिशब्दैः न शक्यते वदितुम् । तत्रायम् ‘ ये यजामहे स्वाहाऽग्निम् ’ इति मन्त्रवर्णोऽपि विप्रतिषिध्येत। **अत्रोच्यते** । नैतत् विप्रतिषिद्धम् । अनेकस्यापि एकः शब्दो भवति वाचकः । तद्यथा ‘ माता ’ इति मातरमपि वदति मातारमपि । ‘ माता च परमं दैवतम्, समा च पुत्रेषु ’ इत्येतैरुपबध्यमानो जननीवचनः अवगम्यते । ‘ माता समः क्षिप्रश्च ’ इत्येभिरपि अनुबध्यमानः धान्यस्य मातुर्वाचकः । एवं मन्त्रेऽपि अग्न्यादयः स्वाहाकारदेवताके यागे प्रयुज्यमानाः तद्वाचिनः अवगम्येरन् । तथा सति प्रज्ञातं यागस्य कार्यमनुगृहीतं आरादुपक्रिया । तस्मात् आरादुपकारकं कर्म उत्तमः प्रयाजः इति ।

एवं प्राप्ते, ब्रूमः । प्रयाजे च तन्न्यायत्वात् । उक्तमधस्तात् स्थाण्वाहुतिः संस्कारकर्मेति, इहापि चशब्देन अन्वादिश्यते, उत्तमः प्रयाजः संस्कारकर्मेति । तत एतत्तावद्वर्णयन्ति । या आज्यभागादिषु देवता यष्टव्याः, ता एवेह देवता इति । कुतः ? स्वाहाकारस्य देवतासंयोगाभावात् । तद्धितेन वा देवतासंयोगो विज्ञायते, चतुर्थ्यन्तेन वा । न चेह तद्धितो न चतुर्थी । अतो न देवताविधिः । यागसामानाधिकरण्यं च द्वितीयया गम्यते । तस्मात् यागवचनः स्वाहाकारशब्दो यथा समिदादय इति । आह । यदि द्वितीयया संयोगात् तं यागवचनं मन्यसे, आरादुपकारकस्तर्हि यागः । ईप्सिततमे हि द्वितीया विभक्तिर्भवतीति । अत्रोच्यते । **एवमेव प्राप्ते, वदामः** । तन्न्यायत्वादिति । स एव न्याय इह, यः स्थाण्वाहुतौ । अपि वा शेषभूतत्वात् तत्संस्कारः प्रतीयेत (१०।१।६।११) इति । शेषभूताश्च आज्यभागादिषु अग्न्यादयः । तदर्थो यागः सन् प्रयोजनवान् भवति । इतरस्मिन् पक्षे यागो निष्प्रयोजनः स्यात् । तदर्थं देवताभिधानमपि निष्प्रयोजनं स्यात् । सत्यां च देवतासंस्कारशङ्कायां यागप्रयोजनं कल्पयितुं न शक्यते । तथा अग्न्यादीनां संभवति स्वार्थे अदृष्टा स्वाहाकारवचनता न शक्या कल्पयितुम् । तस्मात् देवतासंस्कारार्थमुत्तमः प्रयाजः । देवतास्मरणसंस्कारद्वारं च अदृष्टमपि तस्मात् यागाद्भवतीति ।

टुप्— ननु पूर्वपक्षेऽपि (स्वाहाकारदेवतापक्षेऽपि) संस्कारकर्मैव । अन्यत्र (हि कर्मान्तरे अग्न्यादिवत्)

स्वाहाकारो विहितः । तस्य स्मारकः ('स्वाहाग्निम्' इत्यादिर्मन्त्रः) भविष्यति (तेन मान्त्रवर्णिकमेव स्वाहाकारस्य देवतात्वम् । अत्र भविष्यति इत्यतः परम् 'नारिष्ठहोमादिषु' इति पदं लिखिते मुद्रिते च वर्तते । तन्त्ररत्ने तु न तत् स्पृष्टम्) शब्दपदार्थनिर्देशात् । ('स्वाहाकारं यजति' इति हि कारप्रत्ययान्तः शब्दोऽयं शब्दपरार्थकः, तस्यैव देवतात्वमाह, न स्वाहाऽर्थस्य) । स्वाहाशब्दो हि (मन्त्रगतः कारप्रत्ययाभावात्) अर्थस्य स्मारकः, न शब्दस्य । स च (अर्थः) स्वाहाकारमन्त्रेणैव (देवतात्वेन) चोद्यते । (न शब्दः । तेन अर्थस्य देवतात्वं मन्त्रवर्णात् स्यात् । अतः—) वाचनिकोऽयं देवताविधिः । (पूर्वपक्षमाह—) करणेन मन्त्रेण देवता अवगम्यते । यथा 'सूक्तवाकेन प्रस्तरम्' इति । (करणविभक्त्या सकलस्य सूक्तवाकस्य करणत्वावगमात् अग्न्यादीनां देवतात्वं आयुरादीनां च फलत्वं गम्यते तद्वत्) । न चायम् (स्वाहाऽग्निं इत्यादिर्मन्त्रः) करणत्वेन निर्दिष्टः (अतो नात्र मान्त्रवर्णिकी देवता) । ननु च अग्न्यादिशब्दः स्वाहाकारं न शक्नोति वक्तुम् । उच्यते । शक्ष्यति द्व्यर्थत्वात् मातृवत् । (यथा मातृशब्दो धान्यस्य मातारं जननीं चाभिधत्ते तद्वत् । सिद्धान्तमाह—) अत्राभिधीयते । न द्वितीयान्तेन शब्देन देवता उच्यते प्रमाणाभावात् । अपिच स्वाहाकारः शब्दपदार्थको न शक्नोति देवतां वक्तुम् । (नहि शब्दस्य देवतात्वमुचितम्) । तस्मात् मान्त्रवर्णिको देवताविधिः । (यत्तु करणविभक्तिनिर्देशाभावात् न मान्त्रवर्णिकी देवतेत्युक्तम्, तत्राह—) प्रकरणात् क्रमसहितात् करणभावोऽवगम्यते । स्मरणं च प्रधानदेवतया अपेक्षितम् । अतः तेनैवांशेन संबध्यते । (तेन संस्कारार्थत्वसिद्धिः) ।

लिङ्गदर्शनाच्च । १५ ॥

भाष्यम्— लिङ्गमपि अस्मिन्नर्थे भवति । किं लिङ्गम् ? संप्रतिपन्नदेवताकः चातुर्मास्येषु उत्तमप्रयाजस्य निगदो दृश्यते 'स्वाहाऽग्निं स्वाहा सोमं स्वाहा सवितारं स्वाहा सरस्वतीं स्वाहा पूषणम्' इत्येवंलक्षणकः । स देवतासंस्कारपक्षेऽवकल्पते । इतरस्मिन्नदृष्टार्थः स्यात् । तस्मादपि देवतासंस्कार उत्तमः प्रयाजः स्यात् । **प्रयोजनं** विप्रतिपन्नदेवताकेषु सौर्यादिकर्मसु प्राकृतानि देवतापदानि न निवर्तन्ते पूर्वपक्षे । सिद्धान्ते तु निवर्तन्ते ।

शा— उत्तमः प्रयाजः 'स्वाहाकारं यजति' इति किमारादुपकारकः, उत आज्यभागादिषु यक्ष्यमाणानामग्न्यादिदेवतानां संस्कारः इति । तदर्थमिदं विचार्यते किं 'स्वाहाकारं यजति इति देवताविधिः, उत नामधेयं इति । तत्र '**वचनाद्देवतालाभे न मन्त्रात् कल्पनं क्षमम् । तस्याश्चानुपयोगित्वाद् भवेदारादुपक्रिया ॥**' इति प्राप्ते, उच्यते '**न देवताविधौ शक्तिर्द्वितीयान्तस्य विद्यते । न च, यागविधौ क्षीणो विधत्ते देवतां विधिः ॥**' मन्त्रे च आज्यभागादिषु यक्ष्यमाणा देवता यथाक्रमेण संकीर्त्यमानाः प्रत्यभिज्ञायन्ते इति तासां स्मरणं दृष्टमेव प्रयोजनमिति नादृष्टार्थकल्पना । तस्मात् विकृतिषु सौर्यादिषु अग्न्यादिपदानि लुप्तार्थत्वात् निवर्तन्ते ।

सोम— स्थाण्वाहुतेः अस्तु संस्कारत्वं स्थाणोः पूर्वं यूपसंनिधित्वात् । इह तु कथञ्चिदपि स्वाहाकारस्य समवायाभावात् न संस्कारकत्वं इति इत्युत्थितेः प्रत्युदाहरणं संगतिः । **सूत्रार्थस्तु**— दृष्टे संभवति अदृष्टकल्पना न युक्तेति स्थाण्वाहुतिन्यायसाम्यात् उत्तमप्रयाजस्यापि संस्कारकत्वम् । इति ।

वि— 'अन्त्यः प्रयाज आरात् किमुपकार्युत (री: उ) संस्कृतिः ।, स्वाहाकारेति देवोक्तेर्मातृवन्मन्त्रवर्णनात् ॥ आद्यो, मैवं चतुर्थ्यादेरभावाद् यागमात्रके । विधित्सयाऽत्र सौर्यादावर्थोऽग्न्यादिनिवर्तनम् ॥'

भाट्ट— स्वाहाकारप्रयाजे सत्यपि 'स्वाहाकारं यजति' इतिवचनेन 'विष्णुं यजति' इतिवत् स्वाहाकारदेवताविधौ याज्यामन्त्रवर्णे अग्न्यादीनां प्रधानादिदेवतानां प्रत्यभिज्ञायमानानां प्रकाशनात् स्विष्टकृद्वदेव मन्त्रांशे तत्तद्देवताप्रकाशनार्थत्वावगतेर्युक्तः एव सौर्यादौ अग्निपदस्थाने सूर्यपदोहवत् अग्नीषोमादिपदानां बाधः । न हि तदा तत्रत्याग्न्यादिपदानां स्वाहाकारवाचित्वकल्पने प्रमाणमस्ति, स्विष्टकृद्वत् तत्तद्देवतासंस्कारकत्वेऽपि प्रकृत-

यागाङ्गत्वोपपत्तेः । ‘अग्न आज्यस्य वियन्तु’ इति मन्त्रेण ‘हे अग्निपदलक्षित स्वाहाकार त्वयि तुष्टे तत्तत्प्रधानादिदेवताः सर्वा यक्ष्यमाणाः संतुष्टाः भवन्तु’ इत्यर्थाङ्गीकारात् । अतः स्वाहाकारयागः उद्देशांशे परं आरादुपकारकः स्यात्, न तु मन्त्रांशेऽपि, स्विष्टकृद्वदेव तत्तद्देवताप्रकाशकत्वोपपत्तेः । वस्तुतस्तु न स्वाहाकारस्य द्वितीयया देवतात्वाभिधानम्, स्वाहाकारशब्दस्य स्वाहाकारं यथा स्यात् तथेति णमुलन्तत्वादिनाऽपि संभवेन अकारान्तत्वस्य संदिग्धत्वात् । अतः प्रथमविधिप्रकारलिप्सया मन्त्रवर्णप्राप्तस्वाहाकारपदवत्त्वं प्रवृत्तिनिमित्तीकृत्य स्वाहाकारशब्दो नामधेयमेवेत्युक्तं कौस्तुभे । देवताश्चास्मिन् यागे मन्त्रवर्णप्राप्ताः यक्ष्यमाणाः अग्न्यादयः एव सूक्तवाकवत् । अतश्चायं यागः उद्देशांशेऽपि तद्वदेव तत्तद्देवतासंस्कारकः मन्त्रांशेऽपि, न तु स्विष्टकृद्वन्मन्त्रांशे एव संस्कारकः, उद्देशांशे तु आरादुपकारकः इति सिद्धः एवायमर्थः उत्तरविवक्षया स्मार्यते इति द्रष्टव्यम् ।

मण्डन— ‘संस्कारकर्मोत्तमकः प्रयाजः ।’

शंकर-- ‘स्वाहाकारः संनिपाती ।’

* दर्शपूर्णमासयोः **प्रयाजा** अनुयाजाश्च आज्येनैव हूयन्ते । तत्र प्रयाजत्रयार्थाज्यधारणार्था जुहूः, अन्तिमप्रयाजद्वयाज्यस्य अनुयाज्यस्य धारणार्था च उपभृत् ।

वि. ५।२।८.

⌛ दर्शपूर्णमासयोः प्रयाजा आरादुपकारकाः, समिदादिपदानां नामधेयत्वात् ॥

प्रयाजेऽपीति चेत् । ९।२।२०।५८ ॥

भाष्यम्—दर्शपूर्णमासयोः प्रयाजा आम्नाताः ‘समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति’ इति । तत्र संशयः क्रियते किं समिधो यजतीत्यादिशब्दैः समिदादयो देवताविशेषा विधीयन्ते, एतान् समिदादीन् यजतीति । किंवा न प्रकृतैः समिदादिभिः संबन्ध उपादीयते, एवंशब्दिका देवता न प्रकृतौ उपदिश्यन्ते इति । किं तावत् प्राप्तम् ? प्रकृतानां समिदादीनां यागो विधीयते । समिदादयश्च देवता वाक्यसंबन्धादिति । एवं प्रकृतैः समिदादिभिः संबन्धे क्रियमाणे प्रकरणानुग्रहो भविष्यति । तस्मात् प्रयाजेऽपि प्रकृता देवता भवितुमर्हतीति । देवताप्राधान्यं च यथा पार्वणहोमे इति ।

नाचोदितत्वात् । ५९ ॥

भाष्यम्-- नैतदेवम् । नात्र समिदादयश्चोद्यन्ते देवतात्वेन । कुतः ? द्वितीयानिर्देशात् । तद्धितनिर्देशेन वा देवता चोद्यते, चतुर्थ्यन्तनिर्देशेन वा । तत्र हि तादर्थ्यं गम्यते । तादर्थ्ये च सति देवता भवति । न देवता नाम जात्या काचित् । सैव कस्यचिद्रूपस्य देवता, सैव नान्यस्य । यस्य यां प्रति तादर्थ्यम्, सा तस्य देवता । द्वितीया हि ईप्सिततमे कारके भवति । तत्र न द्रव्यस्य तादर्थ्यं गम्यते । तस्मात् न द्वितीयाऽन्तेन देवताविधानम् ।

अत्राह । तादर्थ्यं कल्पयिष्यामः । यथा ‘विष्णुं यजति, वरुणं यजति’ इति । अत्र न विष्णुर्वरुणो वा यागः । नापि यागादर्थान्तरम्, यागस्य कारकं यत् ईप्सितम्, तत् द्वितीयया अभिधीयते । तेन तत्र कल्प्यते तादर्थ्यम् । शब्दान्तरेण वा विहितं गम्यते । इह तु न शब्दान्तरविहितम् । न चैवं शक्यं परिकल्पयितुम् । न च यागस्य कारकत्वेन संभवति । समिदादिशब्दकत्वात्तु यजीनां समिदादयः शब्दा वाचका उपपद्यन्ते । क्रियायां चेप्सितायां इष्यते द्वितीया । यथा पाकं पचतीति । तस्मात्, समिधो यजतीत्ययमर्थः ‘समिद्यजिः कर्तव्यः’ इति । यदा च यजिं प्रति अनुष्ठानं चोद्यते, तदा यजिरुपदिष्टो भवति । यदि पुनरत्र देवता उपदिश्येत । उपदिष्टे यजौ देवता उपदिश्येत । तत्र उपदिष्टोपदेशो वाक्यं भिद्येत । तस्मान्न देवतोपदेशः । यदा न देवतोपदेशः, तदा मान्त्रवर्णिको देवताविधिः । तदा चोपादेयत्वात् एवंशब्दिका देवताश्चोद्यन्ते । तस्मात् मान्त्रवर्णिको देवताविधिः ।

टुप्— अत्र सिद्धान्तग्रन्थे ‘विष्णुं यजति, वरुणं यजति’ इति परिचोदना । (तत्र सिद्धान्तभाष्यं कल्प्यते **तादर्थ्यम्, शब्दान्तरेण वा विहितं गम्यते** इति । तत्र द्वितीयं परिहारं द्वेधा व्याचष्टे-) अत्रोच्यते । वाक्यान्तरेण वैष्णवयागो विहितः, तस्यायमनुवादः । अथवा याग एवात्र विधीयते । तत्र प्रकरणसंनिधिभ्यां मान्त्रवर्णिको विष्णुः प्राप्तः, तस्य (लक्षणया) अय-

मनुवादः यागस्तुत्यर्थः। न चात्र नामधेयं विष्णुः, द्वितीयान्तस्य यजतिसामानाधिकरण्याभावात्। (एवं दृष्टान्तं परिशोध्य प्रकृतमनुसंधत्ते-) प्रयाजेष्वपि च मान्त्रवर्णिको देवताविधिः। अग्निसमिदादयश्च (अग्निशब्देन तनूनपात् प्रदर्शितः), एवमेव (विष्ण्वादिवदेव) अनूद्यन्ते। संज्ञारूपा वा (समिदादिशब्दाः)। यद्यपि (तत्प्रख्यन्यायेन यजि-) सामानाधिकरण्यमस्ति, तथापि न च सा (संज्ञा) भेदिका, किन्तु अभ्यास एव भेदकः। तदुक्तं द्वितीये (२।२।२।२)।

शा—'उद्देशपूर्वकस्त्यागो याजिना ह्यभिधीयते।
त्यागे च नास्ति कर्मत्वं देवतायाः कथंचन॥'

तस्मादाराद्युपकारकाः प्रयाजाः।

सोम—पूर्ववत् उत्थानात् संगतिः।

वि—'देवता यजयो वा स्युः प्रयाजे समिदादयः।,
विष्ण्वादिवद् देवतात्वं, न चतुर्थ्याद्यभावतः॥'

भाट्ट—समिदादीनां चतुर्णां प्रयाजानां यदि समिदादिपदैर्द्वितीयाऽन्तैः 'विष्णुं यजति' इतिवत् देवताविधिः, यदि वा विशिष्टविधिगौरवापत्तेर्मन्त्रवर्णादेव समिदादिदेवताविधिः। उत्पत्तिवाक्यस्थं तु समिदादिपदं देवतानुवादो नामधेयमेव वा। सर्वथा संनिपत्योपकारकत्वलाभाय तत्तद्देवतासंस्कारार्थत्वमेव पावर्णहोमस्वाहाकारोत्तमानुयाजादिवदिति। न च समिदादीनामुपयोगाभावः, वेदे सर्वत्र समिदादिपदानामग्निसामानाधिकरण्यदर्शनेन आग्नेये उपयोगसंभवात्। समिन्मात्रस्यैव वा समिन्धनादौ उपयोगसत्त्वेन तस्यैव संनिपत्योपकारकत्वम्। इति प्राप्ते, सत्यपि वेदे समिदादिपदानामग्निपदसामानाधिकरण्ये इन्द्रमहेन्द्राधिकरणन्यायेन समिदादिपदैः तत्तत्प्रकाशनानुपपत्तिः। शब्दस्य देवतात्वेन तद्भेदे पदान्तरप्रयोगानुपपत्तेः। न च पूर्णमासादिशब्दस्य पार्वणहोमयोर्देवतात्वेऽपि तदर्थस्यापि आग्नेयादेः उद्देशांशविषयशब्दप्रतिपाद्यत्वसंबन्धेन उद्देश्यसंबन्धित्वात् पार्वणहोमसंस्कार्यत्ववत् इहापि समिदादिपदस्य देवतात्वे तत्प्रतिपाद्यस्याग्नेः संस्कार्यत्वोपपत्तिः इति वाच्यम्। तथात्वेऽपि 'समिधो अग्न आज्यस्य वियन्तु, तनूनपादग्न आज्यस्य वेतु' इत्यादिमन्त्रवर्णेषु अग्नेः संबोधनेन ततो भिन्नस्यैव समिदादिपदार्थस्य क्रियाऽन्वयप्रतीतेः समिदादिपदस्य अग्निप्रतिपादकत्वाभावात् अग्निसंस्कारकत्वे पशौ अतिदेशानुपपत्तेश्च। यत्तु इतरप्रयाजानां आराद्युपकारकत्वेऽपि समिद्यागस्य समिन्धनाङ्गभूतसमित्संस्कारकत्वमिति, तन्न। तथात्वे 'यो वै प्रयाजानां मिथुनं वेद, समिधो बह्वीरिव यजति' इति लिङ्गानुपपत्तेः। अत्र हि इवशब्देन वस्तुतो बहुत्वाभावेन आरोपितं बहुत्वमिति सूच्यते। न च तत् समिन्धनाङ्गसमित्सु युज्यते, वस्तुत एव तासां बहुत्वात्। आराद्युपकारकत्वपक्षे तु सत्यपि बहुवचनान्तसमित्पदस्य देवतात्वे प्रातिपदिकसंज्ञाबलेन एकस्यैव समित्पदार्थस्य सिद्धौ लिङ्गवशेन युक्तो बहुत्वारोपः। तस्मात् चत्वारोऽपि प्रयाजाः आराद्युपकारका एवेति न विकृतौ ऊहितव्याः। १९.

मण्डन—'समिदादौ यजिविधिः।' २७.

शंकर—'प्रयाजा अर्थकर्म च।' ३१.

* दर्शपूर्णमासयोः **प्रयाजे** उत्तमे मान्त्रवर्णिको देवताविधिः। टुप्. १०।१।७।१४, * दर्शपूर्णमासयोः **प्रयाजेषु** पाठक्रमो नियामकः। पाठक्रमाधिकरणम्। भा. ५।१।४।४, * दर्शपूर्णमासयोः प्रयाजेषु वाक्यपाठेन प्रतीतस्य क्रमस्य नियमोऽस्ति। वि. ५।१।४. * दर्शपूर्णमासयोः **प्रयाजादीनां** अङ्गत्वं प्रकरणात्। प्रकरणान्तराधिकरणम्। भा. ३।३।४।११. * दर्शपूर्णमासयोः प्रयाजादीनां सर्वेषामङ्गानां प्रधानसमुदाये एक एवोपकारो मुख्यः। वि. ११।१।२. * दर्शपूर्णमासयोः **प्रयाजद्व्यार्थं** समानयनं औपभृताज्यस्य प्रयोजकम्। आज्यसमानयनाधिकरणम्। भा. ४।१।१५।४०–४१, * दर्शपूर्णमासयोः **प्रयाजवाक्ये** श्रूयते, 'अभिक्रामं जुहोति अभिजित्यै' इति। तस्य अभिक्रमणस्य प्रयाजेष्वेव निवेशः, न सर्वस्मिन् प्रकरणे। अभिक्रमणाधिकरणम्। ३।१।१०।१९–२०, * दर्शपूर्णमासयोः **प्रयाजशेषेण** हविरभिघारणार्थं शेषधारणतत्पात्रे पृथक् न कर्तव्ये। प्रयाजशेषाभिघारणन्यायः। ४।१।१४।३३–३९, * दर्शपूर्णमासयोः **प्रयोगभेदेन** सर्वे कामाः, न तु एकेनैव प्रयोगेण। योगसिद्ध्यधिकरणम्। ४।३।११।२७–२८, * दर्शपूर्णमासयोः **प्रयोगभेदेऽपि** फलैकत्वात् समास-

वचनं ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति । ११।४।१।२, * दर्शपूर्णमासयोः **प्रस्तरस्य** प्रहरणं ‘आशीर्भिः प्रस्तरं प्रहरति’ (आशीर्भिः सूक्तवाकेन)। ११।३।५।१२. * दर्शपूर्णमासयोः प्रस्तरस्य प्रहरणं ‘सह शाखया प्रस्तरं प्रहरति’। वि. ४।२।४ । ‘सूक्तवाकेन प्रस्तरं प्रहरति’। ९।१।१५. * दर्शपूर्णमासयोः **प्रागूर्ध्वं** चेति सोमस्य द्वौ कालौ । **टुप्.** ५।४।३।६. * दर्शपूर्णमासयोः ‘**प्राचीमाहरति**’ इति शाखावादः, न दिग्वादः। शाखावादः इत्यत्राधिकरणम् । **भा.** ४।२।२।७, * दर्शपूर्णमासयोः **प्राशित्रावदानं** सर्वेभ्य एव, न केवलं आग्नेयादेव । ३।१।१५।२६. * दर्शपूर्णमासयोः **प्राशित्रादिभक्षणं** ऋत्विग्भिरेव कर्तव्यम् , न यजमानेन । वि. ६।४।३. * दर्शपूर्णमासयोः **प्रैषो** नित्यः ‘प्रोक्षणीरासादय’ इत्यादिः । **भा.** ६।८।८।२८.

⧗ **दर्शपूर्णमासयोः प्रैषप्रैषार्थौ भिन्नकर्तृकौ । प्रोक्षण्यासादनादि कर्म नाध्वर्योः, किन्तु अग्नीधः ॥**

प्रैषेषु च पराधिकारात् । ३।८।११।२३ ॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र प्रैषाः समाम्नाताः ‘प्रोक्षणीरासादय , इध्माबर्हिरुपसादय , स्रुवं च स्रुचश्च संमृड्ढि , पत्नीं संनह्याऽऽज्येनोदेहि’ इति । तत्र संदेहः किं य एव प्रैषे , स एव प्रैषार्थे, उतान्यश्च प्रैषेऽन्यश्च प्रैषार्थे , इति । किं प्राप्तम् ? एक एव प्रैषप्रैषार्थयोरिति । कुतः ? समाख्यानात् । अन्यः इति चाश्रुतत्वात् । नन्वात्मनः प्रैषो विप्रतिषिध्यते । उच्यते। न प्रैषो भविष्यति । प्राप्तकाले लोटं वक्ष्यामः । आह । प्राप्तकालेऽपि सति युष्मदादिष्वेव उपपदेषु मध्यमादयो व्यवस्थिताः । न पुरुषसंकरो भवति । उच्यते । सत्यां विवक्षायां युष्मदादिषु मध्यमादयः । यदा तव प्राप्तः काल इति विवक्ष्यते तदा युष्मद्येव मध्यमः, नास्मदि शेषे वा । यदा खलु क्रियायाः प्राप्तः कालः इत्येतावत् विवक्ष्यते , न तव मम वेति , न तदा युष्मदादीनामनुरोधेन मध्यमादयो भवितुमर्हन्ति । न चेदं युगपत् विवक्षितुं शक्यते , पदार्थस्य प्राप्तः कालः तव चेति । भिद्येत हि तथा वाक्यम् । तेन यदि वा निर्ज्ञाते पदार्थकाले ‘तव कालः’ इति शक्यते वदितुम्, यदि वा तवेति निर्ज्ञाते ‘पदार्थस्य कालः’ इति । तत्र पदार्थस्य कालो वदितव्यः, न तु युष्मदर्थस्य । तेन हि स्मृतेन प्रयोजनम् । स हि कर्तव्यः इत्यवगतः , न तु युष्मदर्थस्तथा । तस्मात् समाख्यानात् अध्वर्योरेव प्रैषप्रैषार्थौ। **इति प्राप्ते, ब्रूमः**। प्रैषेषु अन्यः, अन्यस्तदर्थेषु इति । कुतः ? पराधिकारात् । परस्मिन् हि प्रैषे उपपद्यते , नात्मनि इति । आह , ननूक्तं प्राप्तकाले भविष्यतीति । उच्यते । न संभवति प्रैषे , प्राप्तकालता न्याय्या । तस्मात् युष्मदर्थो गम्यमानो न विवक्षितः इत्युच्यते । संभवति चात्र प्रैषार्थः तस्मात् प्रैषः । प्रैषश्चेत् , अन्यः प्रैषार्थः इति सिद्धम् ।

वा—– प्रैषस्य प्रैषार्थस्य च आध्वर्यवसमाख्यातुल्यत्वात् अध्वर्युप्रयोज्यत्वे अवधारिते कथमात्मनः प्रैषः इति चेदाह – नैवायं प्रैषः, किं तर्हि ? **प्राप्तकालतायां लोटं वक्ष्यामः** इति । प्रैषवादी तु आह , प्रत्यगात्मविषया चेत् प्राप्तकालता विवक्षिता , हन्त उत्तमपुरुषेण भवितव्यम् । नहि परविषययुष्मदर्थमन्तरेण मध्यमपुरुषो लभ्यते । प्रैषे तु स्वभावतः परविषयत्वात् सुलभ इति । परस्तु आह , यदा समाख्याऽवगतात् समानकर्तृत्वात् प्रैषबुद्धिरपनीता, तदा प्राप्तकालत्वमभिधीयमानं किं क्रियाणामभिधीयताम्, उत कर्तृणामिति, क्रियाणां इत्येव गम्यते। ताः हि चोदितत्वात् प्रयोजनवत्यः प्रथमतरं प्रतीताः । तासां च अनुष्ठानार्थं प्राप्तकालत्वस्मरणं दृष्टार्थम् । कर्तृप्राप्तकालप्रकाशने तु सर्वं विपरीतम् । आख्यातेषु च प्रथमादेः पुरुषस्य कस्यचित् अवश्यम्भावित्वात् नान्तरीयककृत एव मध्यमपुरुषो भविष्यति । क्रियैव चोच्यते तव प्राप्तकाल इति । यदि च कर्तुः प्राप्तकालत्वमुच्येत, ततः ‘किं कर्तुम्’ इति साकाङ्क्षमेव स्यात् । अथ ‘प्रोक्षण्यासादनादि कर्तुम्’ इति (अध्याह्रियते), तथा विशिष्टार्थप्रेषणात् वाक्यभेदः स्यात् । तस्मादपि क्रियायाः प्राप्तकालत्वं प्रकाश्यते । अथापि प्रैषोऽयं आश्रीयते, तथापि आत्मानमेव कथञ्चित् शरीरशरीरिणोः अवस्थाऽन्तराणां वा भेदेन प्रेषकं प्रेष्यं च व्यपदेक्ष्यति । इति समानकर्तृकत्वे प्राप्ते, ब्रूमः । प्रैषेषु च इतरमन्यः कुर्यात् इति संबन्धः । (अत्र प्रैषेषु च इति प्रकृतसूत्रस्थम्,

इतरमन्यः इति पूर्वसूत्रादनुवृत्तम्, कुर्यात् इति अध्याहृतम्) कुतः ? स्वभावेनैव तेषां परविषयत्वात् परिक्रयवत्। यत्तु नैवायं प्रैष इति, तदयुक्तम्, मन्त्ररूपादेव प्रैषप्रत्ययोपपत्तेः। यो हि समानकर्तृकतया तं बाधते, तेन समाख्यया लिङ्गं बाधितं स्यात्। न च प्राप्तकालतया लिङ्गविरोधः परिह्रियते, मध्यमपुरुषस्य असंपादनात्। न च शब्दान्तरेण अनुपात्ता क्रिया एवं शक्यते वक्तुं 'तव प्राप्तः कालः' इति। यद्यपि च शक्यते, तथापि न दृष्टः कश्चिदर्थः स्यात् चेतनविषयत्वात् ईदृशस्य प्रयोगस्य। तथा आत्मभेदपरिकल्पनायामपि नैव दृष्टं प्रयोजनम्। गौणताऽत्र स्थितैव। मुख्यं च कार्यं मन्त्राणां इत्यवधारितम् (३।२।१)। ततश्च यद्यपि प्राप्तकालतायामेव लोट्, तथापि परस्यैव सा कथ्यते इति पराधिकारो निवर्तते। न च वाक्यभेदः, विशिष्टार्थप्रेषणात्। अवश्यं चात्र विशिष्टता अभ्युपगन्तव्या प्रोक्षणीपदोपादानात्। न च एकपदोपात्तः अनेकोऽर्थः वाक्यं भिनत्ति। सर्वाख्यातेषु क्रिया–कर्तृ–संख्या–उपग्रह–पुरुषविशेषभावनानां युगपदुपादानस्य अपरिहार्यत्वात्। न च ईदृशं विशिष्टविधानं क्वचित् नाभ्युपगन्तव्यम्। प्राप्तकालत्वे च क्रियायुष्मदर्थयोः पृथक्त्वात् भेदेन शक्तिः कल्प्येत। प्रैषे तु तस्य नित्यमेव युष्मदर्थविषयत्वात् मध्यमपुरुषः अनुवादः। एवं चैषा (प्रैष–)समाख्या अनुगृह्यते। तस्मात् लिङ्गेन समाख्याबाधात् अन्यः प्रैषः, अन्यश्च प्रैषार्थः इति।

सोम— पूर्वत्र वचनबलात् आतिदेशिकस्य प्राकृतसमाख्यालब्धस्य कर्तुर्बाधेऽपि, इह वचनाभावात् न समाख्यालब्धकर्तृबाधः इति प्रत्यवस्थानात् संगतिः।

सूत्रार्थस्तु– प्रैषेषु प्रैषार्थमन्यः कुर्यात्, तेषां स्वभावतः परविषयत्वादिति।

वि–– 'प्रोक्षण्यासादनं कुर्यादध्वर्युरितरोऽथवा।,
आख्ययाऽऽद्यः, सादयेति प्रेषितोऽन्योऽस्तु लिङ्गतः॥'

भाट्ट— 'प्रोक्षणीरासादय' इत्यादयः प्रैषाः, प्रैषार्थाश्च प्रोक्षण्यासादनादयः समाख्यानात् अध्वर्युणैव एकेन कर्तव्याः। न च स्वस्मिन् स्वस्य प्रैषानुपपत्तिः 'चेतो वृथा खिद्यसे' इत्यादाविव स्वस्मिन्नपि स्वस्योपदेशसंभवात्। वस्तुतो नैवायं प्रैषः, अपि तु 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (पा॰ ३।३।१६३) (कृत्यप्रत्ययाः लोट् च एतेषु अर्थेषु स्युः। तत्र प्रैषो विधिः। अतिसर्गः कामचारानुज्ञा।) इति चकारेण लोटोऽपि प्राप्तकालतायां विधानात् प्राप्तकालतायामयं लोट्। प्रोक्षण्यासादनस्य प्राप्तः काल इति। युष्मदर्थको मध्यमपुरुषस्तु साधुत्वार्थः। अथवा 'हे प्रोक्षण्यासादन तव प्राप्तः कालः' इति क्रियायां चेतनत्वाध्यारोपेण सः। यत्र तु 'अग्नीदग्नीन् विहर' इत्येवं प्रैषः, तत्रास्तु संबोधनानुरोधेन प्रैषार्थस्य आग्नीध्रकर्तृकत्वम्। वस्तुतस्तु 'हे अग्नीत् ममाग्निविहरणस्य प्राप्तः कालः' इति व्याख्यातुं शक्यत्वात् न तत्रापि समाख्याबाधः। इति प्राप्ते; समाख्याऽनुरोधेन मध्यमपुरुषस्य साधुत्वेन क्रियायां चैतन्याध्यारोपेण व्याख्याने प्रमाणाभावात् संबोधनमध्यमयोश्च अदृष्टार्थत्वापत्तेः प्रैषत्वसमाख्याबाधापत्तेश्च प्राप्तकालार्थकत्वानुपपत्तेः प्रैषस्यापि स्वस्मिन् औपचारिकत्वापत्त्या एकत्राध्वर्युसमाख्याबाधेन उभयोर्भिन्नकर्तृकत्वमेव।

मण्डन— 'प्रैषे तदर्थे च न कर्तुरैक्यम्।' १२.

शंकर–– 'प्रैषप्रैषार्थकर्तृभित्।' कर्त्रोः भिदा। १४.

* दर्शपूर्णमासयोः **प्रोक्षणं** न व्रीहिस्वरूपप्रयुक्तम्, किन्तु अपूर्वप्रयुक्तम्। भा. ९।१।५।११–१९, * दर्शपूर्णमासयोः **प्रोक्षणादीनि** संनिपत्योपकारकाणि अपूर्वप्रयुक्तानि। हन्तिपिष्यधिकरणम्। ९।१।२।२–३, * दर्शपूर्णमासयोः '**प्रोक्षणीरासादय**' इति प्रोक्षणीशब्दः यौगिकः। तेन क्वचित् घृतं प्रोक्षणं भवति। प्रोक्षण्यधिकरणम्। १।४।८।११, * दर्शपूर्णमासयोः **प्रोक्षण्यासादनादि** कर्म नाध्वर्योः, किन्तु अग्नीधः। प्रैषा आध्वर्यवाः इत्यत्राधिकरणम्। ३।८।१२।२४–२५, * दर्शपूर्णमासयोः **फलदेवताप्रकाशका** मन्त्राः अपूर्वप्रयुक्ताः। फलदेवताधिकरणम्। ९।१।३।४–५, * दर्शपूर्णमासयोः **फलभावनायां** अङ्गोपकार उपयुज्यते, नापूर्वस्य फलस्योत्पत्तौ। यद्यपूर्वं फलं अङ्गैरुत्पाद्येत, अङ्गफलमेव तत् स्यात्। ११।१।७।३५. *दर्शपूर्णमासयोः **फलीकरणहोमः** 'अग्नेऽदब्धायो' इति मन्त्रेण अनुयाजोत्तरं दक्षिणाग्नौ।

फलीकरणानि तण्डुलकणाः। असौ चरौ पुरोडाशे च। **वि.** ५।१।१५, * दर्शपूर्णमासयोः **बर्हिः** असकृदाच्छिन्नं भवति। पितृयज्ञे तु सकृदाच्छिन्नम्। **भा.** ११।१।७। ३६–३७. * दर्शपूर्णमासयोः बर्हिः द्विविधं मुख्यं गौणं च। मुख्यं कुशकाशादिदशविधदर्भरूपम्। गौणं तु तृणान्तरं 'उलपं' इत्युच्यते। **वि.** ३।२।१. * दर्शपूर्णमासयोः बर्हिः बर्हिर्धर्माः वेदिः वेदिधर्माश्च अङ्गप्रधानार्थाः, न केवलं प्रधानार्थाः। वेदिबर्हिर्धर्मन्यायः। **भा.** ३।७।१।१–५. * दर्शपूर्णमासयोः बर्हिः (मुख्यं) 'यज्ञस्य घोषदसि' इत्यस्मिन्ननुवाके (तैसं. १।१।२) प्रोक्तैर्मन्त्रैः दात्रेण छित्त्वा संपाद्यते। **वि.** १०।१।१. * दर्शपूर्णमासयोः 'बर्हिर्लुनाति' 'आज्यं विलापयति' 'पुरोडाशं पर्यग्नि करोति' इति बर्हिराज्यपुरोडाशशब्दाः जातिशब्दाः, न संस्कारशब्दाः। **भा.** १।४।७।१०, * दर्शपूर्णमासयोः 'बर्हिर्लुनाति' इति बर्हिःशब्दो जातिवाची, न संस्कारवाची। तस्मात् यूपावटस्तरणबर्हिर्लौकिकम्। बर्हिराज्याधिकरणम्। १।४।७।१०. * दर्शपूर्णमासयोः बर्हिः संस्कृतं वेद्यामास्तरणे उपक्षीणम्, इति पवित्रं विधृती च परिभोजनीयैः कार्याणि। **वि.** ३।८।१८, * दर्शपूर्णमासयोः बर्हिः सधर्मकम्, यूपावटस्तरणबर्हिस्तु निर्धर्मकम्। ७।३।७, * दर्शपूर्णमासयोः **'बर्हिषा पूर्णमासे व्रतमुपैति**, वत्सैरमावास्यायाम्'। पूर्णमासे बर्हिःसंपादनकाले व्रतग्रहणम्, दर्शे च वत्सापाकरणकाले व्रतग्रहणम्। संनयतः असंनयतश्चेदं व्रतग्रहणम्। असंनयतस्तु वत्सापाकरणोपलक्षिते काले इति विशेषः। ६।४।१२,१३. * दर्शपूर्णमासयोः **बर्हिर्धर्माः** अङ्गप्रधानोभयार्थाः। द्रव्यसंस्कारन्यायः इत्यत्राधिकरणम्। **भा.** ३।८।१५।३१. * दर्शपूर्णमासयोः **बर्हिर्लवने** प्रतिमुष्टि लवनमन्त्रावृत्तिः। **वि.** ११।४।१५, * दर्शपूर्णमासयोः **बर्हिर्लवनादि** न सर्वार्थम्। विधृतिपवित्राधिकरणम्। **भा.** ३।८।१७।३३. * दर्शपूर्णमासयोः **बर्हिर्लवनकाले** अयुग्वा युग्वा मुष्टीर्लुनाति। **वि.** ११।४।१५. * दर्शपूर्णमासयोः **बर्हिर्लवनमन्त्रस्य** मुख्ये कुशे एव विनियोगः। बर्हिर्न्यायः। **भा.** ३।२।१।१–२, * दर्शपूर्णमासयोः **ब्रह्मणो** वरणं प्रणीताप्रणयनकाले। प्राक् वरणात् न किञ्चित् ब्रह्मत्वमस्ति, वरणादुत्तरकालं ब्रह्मणः कार्यम्। आनत्यर्थमेव तत्। तत्र अमावास्यायां 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति वचनेनोपदिष्टम्। तस्मिन्नपकृष्यमाणे परिग्रहोऽपि अपकृष्टः प्रसवोऽपि ब्रह्मवरणमपि, प्रधानदेशकालत्वात् गुणानाम्। एवं सति पौर्णमास्यां प्रणयनकाले ब्रह्मवरणम्, अमावास्यायां पूर्वेद्युः। उभयत्रापि अप्रवृत्ते ब्रह्मत्वे एव ब्रह्मवरणम्। तस्मात् उभयत्रापि आनत्यर्थम्, नादृष्टार्थम्। १२।१।१८।३७–४१, * दर्शपूर्णमासयोः **भक्षाः** इडा–प्राशित्र–चतुर्धाकरण–शंयुवाककालाः सन्ति। १०।२।३।१३. * दर्शपूर्णमासयोः **भक्षार्थ**मवत्तस्य नाशे भक्षलोपः प्रतिपत्तित्वात्। **वि.** ६।४।२, * दर्शपूर्णमासयोः **'भिन्ने जुहोति'**, 'स्कन्ने जुहोति' इति भेदनहोमः स्कन्दनहोमश्च दर्शपूर्णमासाङ्गम्, लौकिके नासौ होमः। ६।५।१५. * दर्शपूर्णमासयोः **भेदन**स्कदनाद्यावृत्तौ नैमित्तिकस्य प्रायश्चित्तस्यापि आवृत्तिः। क्रत्वर्थानां नैमित्तिकानां इत्यत्राधिकरणम्। **भा.** ६।२।९।३०. * दर्शपूर्णमासयोः '**मन्द्रया** (वाचा) आज्यभागान्तम्'। **सु. पृ.** ११८१. * दर्शपूर्णमासयोः '**मयि दक्षक्रतू**' इति मन्त्रपाठः क्रतुयुक्तजञ्जभ्यमानपुरुषसंस्कारः। **वि.** ३।४।९, * दर्शपूर्णमासयोः '**मलवद्वाससा** न संवदेत' इति निषेधः केवलपुरुषार्थः, न क्रत्वर्थः। तस्मात् तस्य प्रकरणादुत्कर्षः। क्रतौ तु निषेधोऽर्थसिद्धः 'तामपरुद्धय यजेत' इति विधानात्। ३।४।११. * दर्शपूर्णमासयोः **मुसलम्** 'उलूखलं च मुसलं च यज्ञायुधम्'। **वि.** ३।८।१०। तदुपयोगस्तु 'उलूखलमुसलाभ्यामवहन्ति'। ३।१।५, * दर्शपूर्णमासयोः '**यजमानः** प्रस्तरः' इत्यत्र यजमानशब्दः प्रस्तरस्तुत्यर्थो यागसाधनत्वेन गौणः। १।४।१३. * दर्शपूर्णमासयोः '**यजमानपञ्चमा** ऋत्विजः इडां भक्षयन्ति'। **भा.** १२।१।१५।३१. * दर्शपूर्णमासयोः '**यज्ञं** तन्विष्यन्तौ अध्वर्युयजमानौ वाचं यच्छतः' प्रोक्षणमारभ्य हविष्कृदाह्वानपर्यन्तम्। **वि.** ९।१।७, * दर्शपूर्णमासयोः **यज्ञायुधानि** तत्तत्क्रियासु व्यवस्थितानि– 'स्फ्येनोद्धन्ति' 'कपालेषु श्रपयति' 'अग्निहोत्रहवण्या हवींषि निर्वपति' 'शूर्पेण विविनक्ति' 'कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति', 'शम्यायां

दृषदमुपदधाति ' ' उलूखलमुसलाभ्यामवहन्ति ' ' दृषदुपलाभ्यां पिनष्टि ' इति । ३।१।५, * दर्शपूर्णमासयोः **यज्ञायुधानां** दशानां न पुरोडाशादिना समुच्चयो विकल्पो वा संभवति, किन्तु यज्ञसाधनत्वरूपयज्ञायुधत्वानुवादेन ' यज्ञायुधानि संभरति ' इति संभरणविधिः स्तूयते ' स्फ्यश्च कपालानि च, अग्निहोत्रहवणी च शूर्पं च, कृष्णाजिनं च शम्या च, उलूखलं च मुसलं च, दृषच्चोपला च एतानि वै दश यज्ञायुधानि ' इति वाक्येन । ३।१।५. * दर्शपूर्णमासयोः **यज्ञक्रतो**श्चत्वारः ऋत्विजः इति कर्तृणां नियमविधिः नानुवादः । (ब्रह्मा अध्वर्युः होता आग्नीध्रश्चेति) । भा. ४।२।९। २३–२४.

⧗ दर्शपूर्णमासयोः याजमानानां प्रयाजाद्यनुमन्त्रणंमन्त्राणां क्रमो न नियामकः ॥

अनियमोऽन्यत्र । ५।१।३।३ ॥

भाष्यम्— अस्मिन् विषये क्रमस्य नियमो नास्ति। यथा दर्शपूर्णमासयोर्याजमानानां प्रयाजानुमन्त्रणादीनां नानाशाखान्तरसमाम्नातानां ' वसन्तमृतूनां प्रीणामि ' इत्येवमादीनां ' एको मम ' इत्येवमादीनां च ।

टुप्— ' एको मम ' ' वसन्तमृतूनां प्रीणामि ' इति (शाखाभेदेन आम्नातानाम्) प्रयाजानुमन्त्रणमन्त्राणां (अदृष्टार्थत्वात्) समुच्चयः । (तत्र प्रथमे प्रयाजे नियमप्रमाणाभावात् अनियमः । द्वितीयादिषु प्रवृत्त्या नियममाशङ्क्य प्रमाणाभावमाह–) पाठस्तावत् नास्ति शाखाऽन्तराम्नानात् । श्रुतिरपि नास्ति । नापि अर्थो नियामकः । (शङ्कते–) यदि समित्प्रयाजः काठकानुमन्त्रणेन अनुमन्त्रितः, तनूनपात्प्रयाजेऽपि प्रवृत्त्या तदेव प्रथमम् । इति चेत् । तन्न । ये हि सह चोदिताः (यथा प्राजापत्याः पशवः), तेषां प्रवृत्तिर्नियन्त्री (भवति) । न चैते (मन्त्राः) सह चोदिताः । तस्मात् द्वितीयादिष्वपि अनियमः । काण्डक्रमोऽपि नास्ति । भिन्नदेशानां हि (प्राप्तानां पशूनामिव साद्यस्क्रे) सहानुष्ठाने चोदिते (सति) ' कः प्रथम आरभ्यताम् ' इति (अपेक्षायाम्) यस्यैव बोधकः (स्मारकः) पदार्थो विद्यते (सवनीयपशोः परिव्याणम्) स प्रथमं क्रियते । इह तु एतदपि नास्ति (तस्मान्न स्थानक्रमः) । मुख्यक्रमोऽपि नास्ति । तत्र प्रधानक्रमेण नियमः क्रियते सहचोदितानाम् । इह हि ईदृशमपि नास्ति । अतः (षण्णामपि क्रमप्रमाणानामभावात्) अनियमः ।

शा— यत्र उक्तवक्ष्यमाणनियमकारणाभावः तत्र अनियम एव क्रमस्य (अनेन सूत्रार्थ उक्तः ।) ।

सोम— यद्यपि सर्वप्रमाणव्युत्पादनानन्तरं ' अनियमोऽन्यत्र ' इति वक्तुं युक्तम्, तथापि नानाशाखागतानां श्रुत्यर्थावेव क्रमनियमे कारणम्, तदभावे तु अनियम एव, तस्य तत्राप्रवृत्तेः इति ज्ञापनाय प्रमाणद्वयव्युत्पादनानन्तरमेतत् **संगतं** इत्याहुः ।

वि— ' स्याद् वसन्तादिमन्त्राणां क्रमो नो वा, ऽन्यवद् भवेत् ।, शाखाऽन्तरे व्यत्ययेन न क्रमो नियतोऽत्र हि ॥ '

भाट्ट— यत्र उक्तवक्ष्यमाणक्रमनियामकप्रमाणाभावः तत्रानियम एव । यथा प्रयाजानुमन्त्रणानां ' वसन्तमृतूनां प्रीणामि ' इत्यादीनां ' एको मम ' इत्यादीनां च शाखाभेदेन आम्नातानां परस्परम् । अत्र हि यद्यपि वसन्तादिप्रकाशकानां न देवताकल्पकत्वम्, उभयाकाङ्क्षाप्रमाणकाङ्क्षाभावयाज्यामन्त्रकल्प्यसमिदादिदेवताऽवरोधे अन्यतराकाङ्क्षाप्रमाणकाङ्क्षाभावानुमन्त्रणमन्त्रेण तत्कल्पनाऽनुपपत्तेः। एवम् ' एको मम ' इत्यादीनामपि न फलकल्पकत्वम्, निर्ज्ञातपारार्थ्यात् श्रुत्यविनियुक्तत्वाच्च । न चोत्कर्षः, प्रयाजानुमन्त्रणसमाख्यया अत्रैवान्वयेन अन्यत्र सामान्यसंबन्धबोधकप्रमाणाभावात् । अतश्च मनोतामन्त्रवत् लक्षणया प्रयाजीयक्रतूपकाराख्यफलदेवताप्रकाशकत्वेऽपि भिन्नकार्यत्वात् समुच्चय एवोभयोरेकैकस्मिन् प्रयाजे । यत्तु **तन्त्ररत्नादौ** अदृष्टार्थत्वेन समुच्चयाभिधानम्, तत् दृष्टार्थत्वसंभवे तदयोगात्, ' मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् । शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥ ' इत्यनुमन्त्रणलक्षणानुपपत्तेश्चोपेक्षितम् । तत्र च एकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठ्यमानयोर्न क्रमनियमः, प्रमाणाभावात् । **ननु** समित्प्रयाजे नियामकाभावेऽपि येन क्रमेण समिदनुमन्त्रितः, तेनैव तनूनपातादयोऽपि, प्रवृत्तिक्रमादिति **चेन्न**, प्राजापत्यपशुषु हि

एकप्रयोगविधिपरिगृहीतेषु पदार्थानुसमये सति प्रकृतौ पाठेन क्लृप्तक्रमयोरुपाकरणनियोजनयोः औपदेशिकपशुसाहित्यानुरोधेन षोडशक्षणव्यवधानेऽपि तदधिकव्यवधाने प्रमाणाभावात्, येनैव क्रमेणोपाकरणम्, तेनैव क्रमेण नियोजनमिति प्रवृत्तिक्रमो युक्तः। प्रकृते तु एकप्रयाजगतयोर्नानाशाखास्थानुमन्त्रणयोः पाठाद्यभावेन अक्लृप्तक्रमत्वात्, सत्यपि च सर्वप्रयाजानामेकप्रयोगविधिपरिग्रहे पदार्थानुसमयासंभवात् एकैकस्मिन् प्रयाजे द्वयोर्द्वयोर्मन्त्रयोः पठनीयत्वान्न प्रयाजान्तरीयमन्त्रस्य प्रयाजान्तरीयमन्त्रेण प्रवृत्तिक्रमः। न च नानाशाखास्थयोः क्लृप्तक्रमत्वाभावेऽपि एकशाखास्थानां पञ्चानामपि मन्त्राणां पाठेन क्लृप्तक्रमत्वात् शाखाऽन्तरीयेणापि अनियतव्यवधाने प्रवृत्तिक्रमबाधापत्तिः, पञ्चानां मन्त्राणां पञ्चप्रयाजाङ्गत्वेन एकशेष्यङ्गत्वाभावात् अवान्तरप्रयोगविधिभेदेन भिन्नप्रयोगविधिपरिगृहीतानां पाठेन क्रमानियमात्। इष्यते च पाशुकानूयाजानां ऐष्टिकपिष्टलेपफलीकरणहोमस्य च महाप्रयोगैकत्वेऽपि भिन्नावान्तरप्रयोगविधिपरिगृहीतत्वेन अक्लृप्तक्रमत्वम्। तस्मादनियमः।

मण्डन—'अन्यत्रानियमो भवेत्।' ४.

शंकर—'नियतो न त्वमानतः।' क्रमः। ५.

* दर्शपूर्णमासयोः याज्याऽनुवाक्याऽऽदिमन्त्रपाठबलात् आग्नेयपुरोडाशस्य अवदानादिप्रदानान्तं कृत्वा पश्चात् सांनाय्ये तदनुष्ठीयते। वि. ५।४।२, * दर्शपूर्णमासयोः याज्यापाठस्तिष्ठता कार्यः, अनुवाक्यापाठस्तु आसीनेन। १०।४।२२.

⌛ दर्शपूर्णमासयोः याज्यापुरोऽनुवाक्याऽनुवचनं देवतासंस्कारार्थम् ॥

अन्वाहेति च शस्त्रवत् कर्म स्याच्चोदनाऽन्तरात्। १०।४।२०।३९ ॥

भाष्यम्— दर्शपूर्णमासयोः श्रूयते 'याज्यामन्वाह' 'पुरोऽनुवाक्यामन्वाह' इति। तत्र संशयः किं याज्यापुरोऽनुवाक्यानुवचनं प्रधानकर्म, उत संस्कारकर्म इति। किं प्राप्तम्? 'अन्वाह' इति प्रधानकर्म स्यात्। कुतः? चोदनाऽन्तरात्। यदि संस्कारकर्म, ततो रूपादेव तयोर्वचनं प्राप्नोति, पुनः 'अन्वाह' इति वचनमनर्थकम्। प्रधानकर्मत्वे तु वक्तव्यम्। नहि अन्यथा तस्य कर्तव्यता गम्यते इति। अतः श्रुत्या कर्तव्यताऽवगमात् प्रधानकर्मेति। शस्त्रवत्। यथा स्तोत्रशस्त्रे, स्तौति शंसतीति कर्तव्यताऽवगमात् प्रधानकर्मणी एवमिहापि द्रष्टव्यम्।

संस्कारो वा, चोदितस्य शब्दवचनार्थत्वात्। ४० ॥

भाष्यम्— संस्कारकर्म वा स्यात्। कुतः? चोदितस्यार्थस्य यः शब्दः, स तद्वचनार्थो भवति। स तस्य दृष्टोऽर्थः। तस्मिन् सति अदृष्टकल्पनायां हेतुर्नास्ति। तस्मात्संस्कारकर्मेति।

अवाच्यत्वान्नेति चेत्। ४१ ॥

भाष्यम्— इति यदुक्तम्, तत् परिहर्तव्यम्।

स्याद् गुणार्थत्वात्। ४२ ॥

भाष्यम्— स्यात् उपपद्येत 'अन्वाह' इति वचनम्। कुतः? गुणार्थत्वात्। 'तिष्ठन् याज्यामन्वाह' 'आसीनः पुरोऽनुवाक्यामन्वाह' इति स्थानासनगुणार्थं पुनर्वचनमुपपद्यते। तस्मात् संस्कारकर्मणी याज्यापुरोऽनुवाक्ये इति।

सोम-- पूर्ववैषम्येणोत्थानात् संगतिः। सूत्रार्थस्तु-अन्वाहेति विधीयमानमनुवचनं अदृष्टार्थकर्म स्यात् चोदनाऽन्तरात् अदृष्टार्थतया विधानबलात् शस्त्रवत् इति। २१.

वि--'अन्वाहेत्यर्थकर्म स्यात् संस्कारो वा, ऽर्थकर्मता। शस्त्रवत् कार्यताज्ञानाद्, दृष्टार्थत्वेन संस्कृतिः॥' २२.

भाट्ट-- याज्याऽनुवाक्ययोर्लिङ्गात् देवताप्रकाशनार्थत्वसंभवेऽपि 'तिष्ठन् याज्यामन्वाह, आसीनः पुरोनुवाक्याम्' इत्यादिवचनानर्थक्यप्रसङ्गात् स्तोत्रशस्त्राणामिव अनुवचनस्य अदृष्टार्थत्वम्। नहि अनुवचनानुवादेन अत्र गुणविधिः संभवति, अतिप्रसङ्गसांकर्यापत्तेः। याज्याऽनुवाक्ययोर्विशेषणत्वे विशिष्टोद्देशापत्तेश्च। याज्याद्युद्देशेनैव तद्विधौ याज्याऽऽदिकर्मकाध्वर्यवप्रैषेऽपि तदापत्तेः। 'अन्वाह' इत्यनुवादानुपपत्तेश्च। दृष्टार्थत्वे द्वयोर्विकल्पापत्तेः 'आसीनः पुरोनुवाक्याम्' इत्यत्र याज्यापुरोवृत्तित्वस्यापि विधौ वाक्यभेदापत्तेश्च। अतो गुणविशिष्टानु-

वचनस्य अदृष्टार्थत्वात् न देवताऽन्यत्वे विकृतौ प्राकृतयाज्याऽनुवाक्ययोर्बाधः, अपितु वैकृतयाज्याऽनुवाक्यापाठसत्त्वे तेन समुच्चय एव । इति प्राप्ते, यद्यपि लिङ्गकल्प्यविधिप्रवृत्तेः पूर्वं एतद्विधिप्रवृत्तिमङ्गीकृत्य विशिष्टानुवचनविधिः स्यात्, तथापि दृष्टे संभवति अदृष्टकल्पनस्य अन्याय्यत्वात् देवतास्मरणार्थत्वमेव अनुवचनस्य भवेत्, न तु अदृष्टार्थत्वम् । वस्तुतस्तु याज्योद्देशेन अत्र गुणमात्रविधानमेव । न च याज्याकर्मकप्रैषे तदापत्तिः, 'होतारं प्रेष्यति' इति होतुरेव प्रैषे कर्मत्वेन याज्यायास्तत्कर्मत्वाभावात् । अतः अनुवचनस्य नित्यप्राप्ततया याज्योद्देशेनैव गुणमात्रविधिः । 'पुरोऽनुवाक्यामनूच्य याज्यया यजति' इति वाक्यान्तरेणैव समुच्चयप्रतीतेः नासीनवाक्ये पुरःपदार्थविध्याशङ्का । अतो दृष्टार्थत्वात् युक्त एव विकृतौ बाधः । २१.

मण्डन-- 'याज्याऽनुवाक्ये संस्कारौ ।' २३.

शंकर---'याज्याऽनुवाक्या चैवं स्यात् ।' संस्क्रिया । २३.

* दर्शपूर्णमासयोः **यावज्जीवमावृत्तिः**, पौर्णमास्यमावास्याकालविशिष्टजीवननिमित्तकत्वात्तयोः । **वि.** ६।२।८. * दर्शपूर्णमासयोः **योक्त्रेण** पत्नीं संनह्यति । तत् ज्योतिष्टोमे ऐष्टिकेषु कर्मसु सौमिकेन प्रसङ्गसिद्धम् । **भा.** १२।१।१३।२९. * दर्शपूर्णमासयोः **लवनमन्त्रस्य** मुख्ये कुशे एव विनियोगः । बर्हिर्न्यायः । **वि.** ३।२।१, * दर्शपूर्णमासयोः **वत्सापाकरणं** दोहधर्मः । ३।६।८, * दर्शपूर्णमासयोः वत्सापाकरणं पलाशशाखया । 'यत् पर्णशाखया वत्सानपाकरोति' । ४।२।२, * दर्शपूर्णमासयोः **वत्सोपावसर्जनम्** (स्तनपानार्थं मातृसमीपे वत्सस्य मोचनम्) । द्वादशद्वंद्वगतमिदम् । 'वत्सं चोपावसृजति उखां चाधिश्रयति' । ३।८।१०. * दर्शपूर्णमासयोः **वत्सोपावसर्जनउखाधिश्रयणादीनि** द्वादश द्वंद्वानि अध्वर्योः कर्म, न यजमानस्य । **के.** ३।८।९।१९-२१. * दर्शपूर्णमासयोः **वाग्यमः** 'यज्ञं तन्विष्यन्तौ अध्वर्युयजमानौ वाचं यच्छतः' । अत्र वाग्यमस्य परमापूर्वं न प्रयोजकम्, किन्तु हविष्कृदाह्वाने वाग्विसर्गस्य विहितत्वात् आह्वानात् प्राक् ये प्रोक्षणादयः पदार्थाः तदीयापूर्वं वाग्यमस्य प्रयोजकम् । **वि.** ९।१।७, * दर्शपूर्णमासयोः **विद्वद्वाक्यं** 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति समुदायानुवादकम् । २।२।३. * दर्शपूर्णमासयोः **विद्वद्वाक्यद्वये** कालयोगनिमित्तनामधेयावच्छेदेन यजेः कालयोगियागविषयत्वावसायात् भिन्नवाक्यविहितानामपि एककालान्वयात् समुदायः संभवति । **सु. पृ.** ७२९. * दर्शपूर्णमासयोः **विधृती** परिभोजनीयादर्भैः कर्तव्ये । **भा.** ३।८।१७।३३. * दर्शपूर्णमासयोः **वेदः** दर्भमयी संमार्जनी । 'वेदं कृत्वा वेदिं करोति' । **वि.** ११।३।१. * दर्शपूर्णमासयोः 'वत्सजानुं पशुकामस्य वेदं कुर्यात्' इति पुरुषार्थम्, न क्रत्वर्थम् । **भा.** ४।१।२।२ वर्णकं २. * दर्शपूर्णमासयोः **वेदद्वयविहितेषु** अङ्गेषु नानावेदस्वरे प्राप्ते गुणमुख्यव्यतिक्रमन्यायेन याजुर्वेदिकप्रधानधर्मः उपांशुत्वं प्राप्नोति, ततो वाचनिकः स्वरो भवति 'मन्द्रया आज्यभागान्तम्, परं मध्यमया, उत्तमया अनुयाजादि' इति । **वा.** ३।३।२।९ **पृ.** ८११. * दर्शपूर्णमासयोः **वेदवेदीध्मबर्हिरादीनां** स्वस्वकाले करणम्, न तु प्रधानस्य काले । अङ्गप्रधानयोः भिन्नदेशकालकर्तृत्वमपि इत्यत्राधिकरणम् । **के.** ११।३।१।१. * दर्शपूर्णमासयोः **वेदिं** 'देवस्य त्वा सवितुः प्रसवे इति खनति' । 'स्फ्येन वेदिं परिलिखन् परिगृह्णाति' । 'स्फ्येनोत्तमां त्वचमुद्धन्ति' । परिलेखः परिग्रहश्च परस्तात् वक्ष्यते । **वि.** १०।१।१. * दर्शपूर्णमासयोः **वेदेः** 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति पूर्वेद्युरपकर्षः । **भा.** ५।१।१६।२९. * दर्शपूर्णमासयोः **वेद्याः** त्रिः प्रोक्षणे 'वेदिरसि बर्हिषे त्वा' इति मन्त्रस्य प्रथमप्रोक्षणे पाठः एकदैव, न प्रतिप्रोक्षणं मन्त्रावृत्तिः, वेदेरेकत्वात् । प्रोक्षणावृत्तिस्तु वाचनिकी । **वि.** ११।४।१६, * दर्शपूर्णमासयोः **वेदिकरणादौ** 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' इति मन्त्रो द्वेषाभावेऽपि पठनीयः, अपूर्वार्थत्वात् । **भा.** ६।८।८।२८, * दर्शपूर्णमासयोः **वेदिधर्माः** अङ्गप्रधानोभयार्थाः । द्रव्यसंस्कारन्यायः । ३।८।१५।३१. * दर्शपूर्णमासयोः **वेदिपरिग्रहः** (वेदिमापनं प्राथमिकम्) 'स्फ्येन वेदिं परिलिखन् परिगृह्णाति' ।

परिलेखनं नाम परितः रेखाकरणम् । वि. १०।१।१. ॥ दर्शपूर्णमासयोः **वेदिप्रोक्षणाङ्गमन्त्रस्य सकृत् प्रयोगः** । वेदिप्रोक्षणन्यायः । **भा.** ११।४।१५।४९–५०, ॥ दर्शपूर्णमासयोः **वेदिबर्हिरादयः** पदार्थाः सर्वाङ्गप्रधानहविरर्थाः, न प्रधानमात्रार्थाः । वेदिबर्हिर्धर्मन्यायः । ३।७।१।१–५. ॥ दर्शपूर्णमासयोः **वेदिस्तरणे** ‘ त्रिधातु पञ्चधातु वा वेदिं स्तृणाति ’ इति तत्र प्रतिधातु स्तरणमन्त्रावृत्तिः । धातुः परिपाटी इति धूर्तस्वामी । मुष्टिमेया दर्भाः ऐकध्येन एकः धातुः इत्युच्यते । वि. ११।४।१५, ॥ दर्शपूर्णमासयोः वेदिस्तरणे मन्त्रः ‘ स्तृणीत बर्हिः परिधत्त वेदिं जामिं मा हिंसीरनु या शयाना । दर्भैः स्तृणीत हरितैः सुपर्णैर्निष्का इमे यजमानस्य ब्रध्ने ॥ ’ इति (के.) । तत्र मौद्गे चरौ ‘ पुण्डरीकैः स्तृणीत हरितैः ’ इत्यूहः कर्तव्यः । ९।३।२. ॥ दर्शपूर्णमासयोः **वैमृधेष्टिः** पूर्णमासस्यैवाङ्गम् । वैमृधन्यायः । **भा.** ४।३।१३।३२–३५. ॥ दर्शपूर्णमासयोः **(एव) वैश्यस्य** सामिधेनीसाप्तदश्यम् । (वार्तिके द्रष्टव्यम्) । के. ३।६। ३।१०. ॥ दर्शपूर्णमासयोः ‘ **वैश्वानरं** द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वाऽतिपात्य ’ । अतिपातनं स्वकाले अकरणम् । अस्या वैश्वानरेष्टयाः पाथिकृतेष्ट्या विकल्पः, अन्योन्यनिरपेक्षत्वात् । वि. १२।३।५, ॥ दर्शपूर्णमासयोः **वैश्वानरेष्टिः** पत्नीसंयाजेषु कपालाभिहोमे प्रायश्चित्तम् । १०।२।१६.

⧗ दर्शपूर्णमासयोः व्रते वत्साद्युपलक्षितकालस्य विधानम् ॥

वत्ससंयोगे व्रतचोदना स्यात् । ६।४।१२।३४ ॥

भाष्यम्— दर्शपूर्णमासयोः श्रूयते ‘ बर्हिषा वै पौर्णमासे व्रतमुपयन्ति, वत्सैरमावास्यायाम् ’ इति । तत्र संदेहः किं वत्ससाधनकं व्रतं विधीयते, उत व्रतस्य कालः इति, अथ वत्सो व्रताङ्गमिति । किं प्राप्तम् ? वत्ससाधनकं व्रतं विधीयते इति । अमावास्यायां वत्सैर्व्रतं कुर्यात् इति वत्सव्रतसंयोगः अपूर्वः, स विधीयते । तस्मिंश्च विधीयमाने उभयमपि विहितं भवति, वत्सो व्रतं च ।

टुप्— एतदौपोद्घातिकम् । अनेन कालेन कस्मिन् पक्षेऽधिकार इति ।

कालो वोत्पन्नसंयोगाद् यथोक्तस्य । ३५ ॥

भाष्यम्— यथोक्तस्य वा वचनान्तरेण प्राप्तस्य व्रतस्य कालोऽयं विधीयते । कुतः ? उत्पन्नसंयोगात् । उत्पन्नसंयोगोऽयं व्रतस्य, नोत्पत्तिसंयोगः । कथम् ? ‘ अमाषममांसं बहुसर्पिष्कं व्रतं व्रतयति ’ इति विहितं पूर्वं व्रतम् । अप्रज्ञातश्च कालः । तस्मात् कालविधिरिति ।

अर्थापरिमाणाच्च । ३६ ॥

भाष्यम्— न च शक्योऽत्रार्थः परिमातुम्, वत्सेन व्रतमुपयन्तीति । किं वत्सोऽत्र व्रतयितव्यः एवं वत्सेन व्रतमुपगतं भवति । किं वत्सेन हस्तस्थानीयेन व्रतयितव्यमिति, एवं तदुपेतं भवति । उत वत्सं सनिधाय अन्यदेतदुपेयादिति, नैव व्यवतिष्ठते शास्त्रार्थः । करणं हि एतन्निर्दिष्टम्, नेतिकर्तव्यता । एतावदुक्तम्, वत्ससाधनं व्रतं कुर्यात् । कथमित्येतत् अविशेषाकाङ्क्षमेवावतिष्ठेत । नैवार्थः परिच्छिद्यते, व्रते किं वत्सेन क्रियते इति । अथवा यद्वातद्वेति । तथा वत्सो व्रतेन संबध्यमानः इष्टः स्यात् अपरार्थतामापद्येत । परार्थतां चास्य द्योतयति विभक्तिस्तृतीया । साधकतमे हि सा भवति । तस्मादपि कालार्थः संयोगः ।

वत्सस्तु श्रुतिसंयोगात्तदङ्गं स्यात् । ३७ ॥

भाष्यम्— यदुक्तं विहितत्वात् व्रतस्यानुवाद इति । सत्यमेवम् । यत्तूक्तम्, कालविधानार्थं इति, तन्न । वत्सस्तदङ्गत्वेन विधीयते । कुतः ? श्रुतिसंयोगात् । वत्से अङ्गे विधीयमाने श्रुतिर्निमित्तम्, काले लक्षणाशब्दः स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या । तस्मादङ्गं वत्सः इति ।

कालस्तु स्यादचोदना । ३८ ॥

भाष्यम्— कालस्तु एष निर्दिश्यते, न वत्सोऽङ्गं विधीयते । नैषा चोदना ‘ बर्हिषा वै पौर्णमासे व्रतमुपयन्ति, वत्सैरमावास्यायाम् ’ इति । कथमवगम्यते ? विधिनैकवाक्यत्वात् । परस्ताच्च विधिः समाम्नायते ‘ पुरा वत्सानामपाकर्तोर्दंपती अश्नीयाताम् ’ इति । यदि एषोऽपि

विधिः स्यात् वाक्यं भिद्येत । अनुवादश्च तथाभूतस्यार्थस्य भवति । न च वत्साङ्गता प्राप्ता । प्राप्तस्तु कालः ।

अनर्थकश्च कर्मसंयोगे । ३९ ॥

भाष्यम्— न च शक्यो वत्सोऽत्र व्रतयितुम् । कर्मसंयोगे वत्सेन नार्थः शक्यते कश्चित्कर्तुम् । तस्मादपि न वत्सोऽङ्गम् ।

अवचनाच्च स्वशब्दस्य । ४० ॥

भाष्यम्-- न चैतदुच्यते 'विशस्य श्रपितं वत्सं व्रतयिष्यते' इति । न चास्यार्थस्य स्वशब्दः श्रूयते । वत्स इत्याकृतिशब्दो मांसे न वर्तते । तस्मादपि काल इति ।

सोम-- सूत्रार्थः-- 'वत्सैरमावास्यायाम्' इति वत्सव्रतसंयोगे वत्सविशिष्टव्रतवधिः स्यादिति ।

वि--'वत्सैर्दर्शे सवत्सस्य वत्समात्रस्य वा विधिः । व्रतकालं लक्षयेद्वा, वत्सयुक्ते व्रते विधिः ॥ भाति रागाद् व्रतप्राप्तेर्वत्समात्रं विधीयते ।, व्रतस्याकरणं वत्सः कालगीस्तदपाकृतेः ॥' वत्सः नाम वत्सापाकरणम् । तदपाकृतेः वत्सापाकरणस्य ।

भाट्ट-- सत्रे अप्रवृत्तस्य विश्वजिदित्युक्ते सांनाय्ये अप्रवृत्तस्यैव व्रतमित्युक्त्यर्थं उत्तराधिकरणम्, तदुपोद्घातत्वेन इदं विचार्यते । 'दर्शपूर्णमासयोः बर्हिषा पूर्णमासे व्रतमुपैति, वत्सैरमावास्यायाम्' इति श्रुतम् । तत्र तृतीयया वत्सकरणकभक्षणापरपर्यायव्रतविधिः रागप्राप्तभक्षानुवादेन 'अमाषममांसमसर्पिष्कं व्रतं व्रतयति' इति वचनान्तरप्राप्तभक्षानुवादेन वा वत्समात्रविधिः । इति प्राप्ते, न तावत् वत्सस्य व्रते हस्तादिवत् करणत्वम्, नापि भक्ष्यत्वेन अशक्यत्वात् । नापि मांसप्रकृतित्वेन, विना वचनं विशसने प्रमाणाभावात् । अतः 'पुरा वत्सानपाकर्तोर्दंपती अश्नीयाताम्' इति वचनान्तरैकवाक्यतालाभाय 'बर्हिषा पूर्णमासे' इत्येतत्प्रायपाठाच्च वत्सप्रातिपदिकेन वत्सापाकरणं लक्षयित्वा तृतीयां च इत्थम्भूतलक्षणे व्याख्याय अमावास्योद्देशेन वत्सापाकरणपूर्वकालो व्रताश्रितत्वेन विधीयते । व्रतं च प्रकरणप्राप्तमिति न कश्चिद्विरोधः ।

मण्डन-- 'वत्सेन कालं कलयेद् व्रतस्य ।'

शंकर-- 'वत्सकाले व्रतं च स्यात् ।'

* दर्शपूर्णमासयोः **व्रतग्रहणं** संनयतः असंनयतश्च । तत्र संनयतः पूर्णमासे बर्हिःसंपादनकाले, दर्शे च वत्सापाकरणकाले। असंनयतस्तु दर्शे वत्सापाकरणोपलक्षिते काले इति विशेषः । व्रतं भोजनम् 'अमाषं अमांसं बहुसर्पिष्कं व्रतयति' । **वि.** ६।४।१२-१३, * दर्शपूर्णमासयोः **व्रीहयः** प्रधानमात्रपर्याप्ताः स्विष्टकृदादिशेषकार्येषु अपर्याप्ता एव यदा लब्धाः, तदाऽपि व्रीहय एवोपादेयाः, शेषकार्याणां तु लोपः कर्तव्यः । तदा च प्रतिनिधिर्न ग्राह्यः । ६।३।२१, * दर्शपूर्णमासयोः **'व्रीहीनवहन्ति'** इत्यवघातो नापूर्वजनकः, दृष्टफलकत्वात् । नियमापूर्वहेतुत्वेन तु विधेयता । २।१।३. * दर्शपूर्णमासयोः 'व्रीहीन् प्रोक्षति' इति प्रोक्षणं न व्रीहिद्रव्यप्रयुक्तम्, किन्तु अपूर्वप्रयुक्तम् । **भा.** ९।१।५।११-१९. * दर्शपूर्णमासयोः **व्रीहीणामपचारे** प्रतिनिधिना कर्म समापनीयम् । **वि.** ६।३।४. * दर्शपूर्णमासयोः व्रीहीणामलाभे प्रतिनिधीनां नीवाराणां प्रयोगे 'व्रीहीणां मेध' इति मन्त्रे व्रीहिपदस्य नोहः । **भा.** ९।३।९।२३-२६. * दर्शपूर्णमासयोः व्रीहीणामसंभवेन नीवारस्वीकारे द्रव्यभेदेऽपि न कर्म भिद्यते । वि. ६।३।३, * दर्शपूर्णमासयोः व्रीहीणां यवानां च परस्परं न प्रतिनिधित्वम्, वैकल्पिकत्वात् । ६।३।१२. * दर्शपूर्णमासयोः व्रीहि–आज्य–सांनाय्यधर्मा व्यवस्थयैयव कर्तव्याः, न सांकर्यम्। तेषामर्थाधिकरणम् । **के.** ३।१।४।७-१०. * दर्शपूर्णमासयोः **व्रीहिमयं** (पुरोडाशं) संकल्प्य यवमयो न दातव्यः, 'नानृतं वदेत्' इति निषेधात् । **वा.** ३।४।४।१३ पृ. ९४३. * दर्शपूर्णमासयोः **व्रीहियवयोर्विकल्पः** । एककार्याणां गुणानामेकस्मिन् कर्मणि विकल्पः। विकल्पाधिकरणम् । **के.** १२।३।४।१०-१५. * दर्शपूर्णमासयोः **शंयू** द्वौ पत्नीसंयाजानां पुरस्तादेकः पश्चादपरः । **वि.** १०।७।१३. * दर्शपूर्णमासयोः शंयुवाकः 'तच्छंयोरावृणीमहे' इति मन्त्रः। **के.** * दर्शपूर्णमासयोः **शंयुवाककालीनः** शेषभक्षः कश्चित् । **वि.** १०।२।४, * दर्शपूर्णमासयोः **शम्या** । 'कृष्णाजिनं च शम्या च' यज्ञायुधम् । 'शम्यायां दृषदमुपदधाति' इति तदुपयोगः । (शम्याः नाम शकटयुगाग्रयोः कृतेषु

छिद्रेषु प्रक्षेप्याः हस्तमात्राः स्थूलशीर्षका यष्टिविशेषाः)। ३।१।५, * दर्शपूर्णमासयोः **शूर्पम्** । 'अग्निहोत्रहवणी च शूर्पं च' इति यज्ञायुधम् । 'शूर्पेण विविनक्ति' इति तदुपयोगः । विवेचनं तुषेभ्यः कणेभ्यश्च तण्डुलानां पृथक्करणम् । ३।१।५. * दर्शपूर्णमासयोः **शेषभक्षः** ऐडादिः संस्कारार्थः उपयुक्तशेषत्वात् द्वितीयानिर्देशाच्च । भा. १२।१।१५।३१, * दर्शपूर्णमासयोः **शेषभक्षाः** न परिक्रयार्थाः, किन्तु संस्कारार्थाः । १०।२।९।२९–३३, * दर्शपूर्णमासयोः '**संक्रमयज्ञेन** यजेतान्नाद्यकामः' इति फलविशेषाय गुणविशेषविधिः, न तु संक्रमयज्ञः कर्मान्तरम् । दाक्षायणयज्ञाभिकरणम् । २।३।४।५, * दर्शपूर्णमासयोः **संमार्जनं** पर्यग्निकरणं च गुणकर्म, न प्रधानकर्म । अग्निसंमार्गाधिकरणम् । २।१।४।९–१२, * दर्शपूर्णमासयोः **संयवनं** पुरोडाशधर्मः 'प्रणीताभिर्हवींषि संयौति' । तस्य चरौ बाधः । १०।१।१३।५१ (५४), * दर्शपूर्णमासयोः **संवपनं** पुरोडाशधर्मः । तस्य चरौ बाधः । १०।१।१४।५२ (५५), * दर्शपूर्णमासयोः **सत्यवचनं** क्रत्वर्थमुपेयते पुरुषार्थत्वेन वर्तमानमपि संयोगपृथक्त्वात् । १२।१।११।२२. * दर्शपूर्णमासयोः **सदनकरणं** पुरोडाशस्य, पात्र्यां 'स्योनं ते सदनं०' इति मन्त्रेण । वि. ३।३।८. * दर्शपूर्णमासयोः '**समे** दर्शपूर्णमासाभ्यां यजेत' इति देशस्य नियमविधिः न तु अनुवादः । भा. ४।२।९।२३–२४. * दर्शपूर्णमासयोः 'समे यजेत इति देशस्य संबन्धः कर्मणा सह विधीयते न तु कर्मान्तरम् । वि. २।३।१३, * दर्शपूर्णमासयोः '**समिधो यजति**, तनूनपातं यजति०' इत्यादियजतिपदस्याभ्यासात् भावनाभेदः, तेन कर्मभेदः । २।२।२. * दर्शपूर्णमासयोः **समिदादिजन्यानामपूर्वाणां भेदः** । भा. २।२।२।२, * दर्शपूर्णमासयोः **समिदादिशब्दाः** कर्मनामधेयानि । देवताविधिस्तु मान्त्रवर्णिकः । ९।२।१०। ५९–६०. * दर्शपूर्णमासयोः **सर्वफलकत्वेऽपि** प्रतिफलं पृथगनुष्ठानं कर्तव्यम् । योगसिद्ध्यधिकरणम् । वि. ४।३।११, * दर्शपूर्णमासयोः **सांनाय्यं** सोमादूर्ध्वमुत्कृष्यते 'नासोमयाजी संनयेत्' इति निषेधात् । सांनाय्यविकारोऽपि 'वैश्वदेव्यामिक्षा' सोमादूर्ध्वमुत्कृष्यते। ५।४।८, * दर्शपूर्णमासयोः **सांनाय्यधर्माः** वत्सापाकरणदोहनादयः प्रथममाम्नाताः, पुरोडाशधर्मा निर्वापावघातादयः पश्चात् । प्रवृत्तिक्रमात् मुख्यक्रमस्य बलवत्त्वात् आग्नेयस्य प्रथममवदानादिप्रदानान्तं कृत्वा पश्चात् सांनाय्यस्य कर्तव्यम् । ५।४।२, * दर्शपूर्णमासयोः **सांनाय्यपात्रशोधनशेषः** 'शुन्धध्वं०' इति मन्त्रः क्रमस्य समाख्यापेक्षया प्राबल्यात् । ३।३।११. * दर्शपूर्णमासयोः '**साकंप्रस्थायीयेन** यजेत पशुकामः' इत्यनेन साकंप्रस्थाप्य(स्थायीय)रूपो गुणः फलाय विधीयते, न कर्मान्तरम् । दाक्षायणयज्ञाधिकरणम् । भा. २।३।४। ५–११. * दर्शपूर्णमासयोः **सादनं** पुरोडाशस्य पात्र्यां 'तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति मन्त्रेण । वि. ३।३।८, * दर्शपूर्णमासयोः **सामिधेन्यः** अङ्गम् । तत्र काम्यपक्षाः 'एकविंशतिं प्रतिष्ठाकामस्य, चतुर्विंशतिं ब्रह्मवर्चसकामस्य' इत्यादि । ४।३।१०, * दर्शपूर्णमासयोः सामिधेन्यः पञ्चदश । पठिता ऋचस्तु एकादशैव । 'त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्' इति विधानात् आवृत्त्या पञ्चदशत्वं संपद्यते । ५।३।३, * दर्शपूर्णमासयोः सामिधेन्यः पञ्चदश, वैश्यस्य तु सप्तदश । ६।६।७, * दर्शपूर्णमासयोः सामिधेन्यः 'प्र वो वाजा अभिद्यवः' इत्याद्याः अग्निसमिन्धनार्थाः ऋचः । वि. ३।६।२। सम्यगिध्यते अग्निर्याभिर्ऋग्भिः, ताः सामिधेन्यः । ३।१।११.

दर्शपूर्णमासयोः सामिधेनीनां काम्यसंख्यायाः विवृद्धौ प्रथमोत्तमे त्रिरभ्यस्य अवशिष्टानामृचामागमेन संख्यायाः पूरणं नाभ्यासेन ॥

अभ्यासेन तु संख्यापूरणम्, सामिधेनीष्वभ्यासप्रकृतित्वात् । १०।५।८।२७॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र काम्याः सामिधेनीकल्पाः । 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य, चतुर्विंशतिमनुब्रूयाद् ब्रह्मवर्चसकामस्य, एकविंशतिं च–अनुब्रूयादन्नकामस्य, द्वाविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य, षड्विंशतिमनुब्रूयात् पशुकामस्य' इत्येवमादयः । तत्र अयमर्थः सांशयिकः किं सामिधेनीषु आगमेन संख्या पूरयितव्या, उत अभ्यासेन, उत

यावदुक्तमभ्यस्य शेषमागमेनेति । किं प्राप्तम् ? पूर्वेण न्यायेन आगमः इति । अपिच अविशेषोऽर्थः । अभ्यासेन हि पूर्यमाणा न सामञ्जस्येन स्यात् । तस्मात् आगम इति । **एवं प्राप्ते, ब्रूमः** । अभ्यासेन तु संख्यापूरणमिति । तुशब्दः पक्षव्यावर्तकः । न आगमः, किं तर्हि ? अभ्यासः । कुतः ? अभ्यासप्रकृतित्वात् । प्रकृतौ अभ्यासेन संख्या पूरिता 'त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्' इति । कथम् ? 'पञ्चदश सामिधेन्यः' इति श्रुतिः, एकादश च समाम्नाताः । तत्र अभ्यासेन आगमेन वा संख्यायां पूरयितव्यायां अभ्यास उक्तः 'त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्' इति । अनेन नियमेन प्रथमोत्तमयोरभ्यासः कर्तव्यः इति । यावत्कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसंख्या पूर्यते तावत्कृत्वः अभ्यसितव्यं इत्येतदभिप्रायं त्रित्वम् । तथा हि दृष्टार्थता । त्रिसंख्याऽभिप्राये अदृष्टं कल्प्यं स्यात् । तस्मात् इहापि तत्प्रकृतित्वात् यावत्कृत्वः अभ्यस्यमानयोः यथोदिता संख्या पूर्यते, तावत्कृत्वः अभ्यसितव्यमिति ।

अविशेषान्नेति चेत् । २८ ॥

भाष्यम्— इति यदुक्तम्, तत् परिहर्तव्यम् ।

स्यात् तद्धर्मत्वात् प्रकृतिवदभ्यस्येताऽऽसंख्यापूरणात् । २९ ॥

भाष्यम्— स्यादभ्यासः । कुतः ? प्रकृतिधर्मत्वं हि विकृतेः । तस्मात् आ संख्यापूरणात् अभ्यसितव्यम् । एवं प्रकृतिवत् कृतं भविष्यति । चोदकानुरोधेन अभ्याससामञ्जस्यं अभ्युपगन्तव्यम् । तस्मात् अभ्यास इति ।

यावदुक्तं वा, कृतपरिमाणत्वात् । ३० ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । नैतत् 'आ संख्यापूरणात् प्रथमोत्तमे अभ्यसितव्ये' इति । यावदुक्तमभ्यस्य अवशिष्टानां आगमेन पूरयितव्या संख्येति । कुतः ? कृतपरिमाणत्वात् अभ्यासस्य । कृतं हि अभ्यासस्य परिमाणम् 'त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्' इति । त्रिसंख्या चाभ्यासेन विवक्षिता, न पूरणी संख्या । तथा श्रुतिः परिगृहीता स्यात् । इतरथा लक्षणा । अथ यदुक्तं 'दृष्टार्थता चैवं भवति' इति, नैतदेवम् । आदर्तव्यो हि त्रित्वानुरोधः । द्विचतुष्केणापि हि संख्या पूर्यते । तथापि प्रथमोत्तमयोः त्रिः अभ्यास अनुष्ठेयः, तेन संख्या पूरयितव्येति । इहापि तेनैव अभ्यासेन संख्या पूर्यते । भवति हि सोऽपि अत्र संख्यापूरणः । प्रकृतौ प्रथमोत्तमे च त्रिरभ्यस्ते, संख्या च पूरिता । इहापि तद्वदेव कर्तव्यम् । प्रथमोत्तमे च त्रिरभ्यसितव्ये संख्या च पूरयितव्या । न प्रकृतावेष शब्दार्थो गम्यते 'अनेनाभ्यासेन संख्या पूरयितव्या' इति । अभ्यासः कर्तव्य इति वचनादवगम्यते, संख्या पूरयितव्येति सामर्थ्यात् । सा च प्रकृतौ अर्थात् अनेन पूरिता । यश्च अर्थात् कृतः, न स चोदनार्थः । तस्मात् नानेनाभ्यासेन संख्या पूरयितव्येति चोदक आह । एवं चेत् यावदुक्तमभ्यस्य अवशिष्टानामागम इति ।

अधिकानां च दर्शनात् । ३१ ॥

भाष्यम्— इतश्च आगम इति । अधिकदर्शनं हि भवति 'न जगत्या परिदध्यात् । यज्जगत्या परिदध्यात्, तच्छन्दांसि गमयेत् । त्रिष्टुभा परिदधाति' इति । अभ्यासे च जगतीपरिधानाशङ्का नावकल्पते । तस्मादपि आगम इति ।

कर्मस्वपीति चेत् । ३२ ॥

भाष्यम्— इति चेत् पश्यसि यावदुक्तमभ्यस्य अधिका आगमयेदिति, धुरिसामकर्मसु अपि एवमेव स्यादिति ।

न, चोदितत्वात् । ३३ ॥

भाष्यम्— नैतदेवम् । धुरिसामकर्मसु युक्तम् । चोदितस्तत्र अभ्यासः 'आवृत्तं धूर्षु स्तुवते, पुनरावृत्तं पृष्ठैरुपतिष्ठते' इति । इह तद्वचनं नास्ति । तस्मात् यावदुक्तमभ्यस्य अवशिष्टानां आगमेन संख्या पूरयितव्येति ।

सोम-- पूर्वत्र यथा न सामागमः, एवमिहापि न सामिधेन्यन्तरागमः इत्युत्थितेः संगतिः । सूत्रे—अभ्यासप्रकृतित्वात् प्रकृतौ 'त्रिः प्रथमाम्' इत्यभ्यासेन संख्यापूरणस्य दृष्टत्वात् इत्यर्थः ।

वि—'सामिधेनीविवृद्धौ किमागमोऽभ्यस्यतामुत ।, आगमः पूर्वव, न्नैवमभ्यासः प्रकृतित्वतः ॥' (पुनरपि संशयादि) 'तत्राप्याद्यन्तयोर्यावत्पूर्त्यभ्यासो यथोक्ति वा ।, अभ्यस्यागमतः पूर्तिः पूरणार्थत्वतोऽग्रिमः ॥, त्रित्वं न

पूरणायोक्तमन्यथाऽप्यत्र पूरणात् । विवक्षितमन्नाधित्वा भवेत् पूरणमागमात् ॥'

भाट्ट-- 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इत्यादिना यत्र सामिधेनीविवृद्धिः श्रुता, तत्र न्यायप्राप्तोऽपि आगमो न प्रवर्तते । प्रकृतौ 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति वचनेन एकादशसंख्यानां पठितानामृचां प्रथमोत्तमयोः यावत्पञ्चदशसंख्यापरिपूर्त्यभ्यासविधानेन आगमबाधावगतेः । न चानेन प्रथमोत्तमयोः त्रिरभ्यासमात्रविधानेन ततोऽधिकानामागमे बाधकाभावः, त्रिरभ्यासावधौ अदृष्टार्थत्वापत्तेः अनेन वचनेन प्रयाजशेषाभिघारणन्यायेन लक्षणया 'पञ्चदश सामिधेनीरनुब्रूयात्' इति विहितपञ्चदशसंपत्त्यर्थत्वेन अभ्यासमात्रविधानात् । एकादशानां हि ऋचां प्रथमोत्तमयोः यावत्संख्यासंपत्त्यभ्यासे 'समं स्यादश्रुतत्वात्' इति न्यायेन प्रत्येकं त्रिरभ्यास एव संपद्यते । अत एव द्विचतुरभ्यासेनापि संख्यासंपत्तिसिद्धेः त्रित्वानुवादानुपपत्तिरिति पार्थसारथ्युक्तमपास्तम् । अतश्च लक्षणया यावत्संख्यासंपत्ति प्रथमोत्तमे अभ्यसेत् इतिवाक्यार्थावगमात् एकविंशत्यादिसंपत्त्यर्थमपि तयोरेवाभ्यासः । न च प्रथमोत्तमयोः उद्देश्यत्वे तदनेकत्वनिमित्तो वाक्यभेदः, 'अर्धमन्तर्वेदि' इतिवत् तदुभयत्वस्य लक्षणया उद्देश्यताऽवच्छेदकत्वात् । इति प्राप्ते, निषादस्थपत्यधिकरणन्यायेन अदृष्टार्थत्वापत्तावपि लक्षणाया अन्याय्यत्वात् प्रयाजशेषाभिघारणन्यायस्यापि अत एव अस्माभिरन्यथोपपादितत्वात् क्रियापदानुषङ्गेण अप्यत्र वाक्यद्वयेन प्रथमाद्युद्देशेन त्रिरभ्यास एव विधीयते । अत एव एकादशानामृचां प्रथमोत्तमयोः त्रिस्त्रिरभ्यासे पञ्चदशत्वसंपत्तेः वस्तुतः 'पञ्चदश सामिधेनीरनुब्रूयात्' इत्यत्र नैव संख्या विधीयते इत्युक्तं कौस्तुभे । अतः पञ्चदशसंख्याया अप्राप्तत्वात् तत्संपत्त्यर्थत्वेन लक्षणया अभ्यासविध्यनुपपत्तेः त्रिरभ्यासः एवानेन विधीयते । 'ताः पञ्चदश संपद्यन्ते' इति तु 'त्रिः प्रथमामन्वाह' इत्यस्यार्थवादमात्रमिति ध्येयम् । अतश्च एकविंशत्यादावपि प्रथमोत्तमे त्रिरभ्यस्य अवशिष्टानां प्राकृताधिकानामागमः इति सिद्धम् ।

मण्डन--'अभ्यस्या यथोक्तं खलु सामिधेनी ।'

शंकर--'सामिधेनीषु चागमः ।'

* दर्शपूर्णमासयोः सामिधेनीनां स्थानं आहवनीयाग्नेः पश्चिमो देशः । ज्योतिष्टोमे तु दक्षिणहविर्धानशकटसमीपो देशः । वि. ३।७।७, * दर्शपूर्णमासयोः सामिधेनीषु 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इति । तत्र अधिकानां षण्णामृचां आगन्तूनामन्ते निवेशः । ५।३।३.

दर्शपूर्णमासयोः सामिधेनीत्रिरभ्यासः प्रथमोत्तमस्थानधर्मः, न तु प्रवोवाजादिऋग्विशेषधर्मः ॥

अभ्यासः सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यात् । ९।१।१०।३३ ॥

भाष्यम्-- स्तो दर्शपूर्णमासौ । तत्र सामिधेनीः प्रकृत्योच्यते 'त्रिः प्रथमामन्वाह, त्रिरुत्तमामन्वाह' इति । तत्र एषोऽर्थः सांशयिकः किं ऋग्धर्म एषः यत्रतत्रस्था प्रवोवाजा त्रिरभ्यसितव्या, उत स्थानधर्मः या अन्याऽपि प्रथममुच्यते सा त्रिरभ्यसितव्येति । कुतः संशयः ? उभयथोपपत्तेः । यदि एवमभिसंबन्धः क्रियते, या असौ उच्चरितानां सामिधेनीनां प्रथममुच्चरिता सा त्रिरभ्यसितव्येति, ततः प्रवोवाजायाः ऋचो धर्मः । अथ एवं विज्ञायते प्राथम्यसंयुक्तं त्रिर्ब्रूयादिति, ततो वचनस्य स्थानधर्मता । किं तावत् प्राप्तम् ? ऋचो धर्म इति । कुतः ? प्राथम्यस्य व्यक्त्या संबन्धात्, व्यक्तेरभ्यासेन । कथमवगम्यते ? स्त्रीलिङ्गनिर्देशात् । व्यक्तिविशेषो हि स्त्री नाम । यदि तद्विशेषणं प्राथम्यं स्यात्, ततो लिङ्गविशेषनिर्देशः अवकल्पते, साऽपि स्त्री अभ्यासेन संभन्त्स्यते । अथ प्रथममनुब्रुवता त्रिरभ्यसितव्यमिति, ततो व्यक्तिविशेषो न विवक्ष्येत, तत्र स्त्रीलिङ्गविशेषनिर्देशो नोपपद्यते । अपि च वाक्यभेदः प्रसज्येत प्रथममुक्तं त्रिरभ्यसितव्यम्, प्रथममुक्ता ऋक् त्रिरभ्यसितव्येति । मत्पक्षे पुनः प्राथम्यलक्षिताया ऋचो धर्म उच्यते । तत्र एकार्थविधाने न भवेत् वाक्यभेदः । अपि च श्रुत्या प्राथम्येन स्त्री संबध्यते, वाक्येन अभ्यासः । तस्मात् ऋग्धर्मो यत्रतत्रस्था प्रवोवाजा त्रिरभ्यसितव्येति । एवं प्राप्ते, ब्रूमः । योऽयं सामिधेनीनां प्रथमायाः त्रिरभ्यासः उच्यते, स प्रथम-

स्थाननिमित्तो धर्मः, न ऋचः कस्याश्चित् जातिनिमित्तः। कुतः ? न हि कृत्स्नेऽपि ऋग्वेदे प्रथमा नाम काचित् ऋक् विद्यते, या त्रिरभ्यस्येत, तत्र प्राथम्यमुपलक्षणार्थं स्यात्। इतरस्मिन् पक्षे श्रुतिः न लक्षणा, श्रुतिश्च ज्यायसी लक्षणायाः। तस्मात् असत्पक्षः। अथ यदुक्तं 'स्त्रीलिङ्गसंबधात् अस्मत्पक्षे एव श्रुतिः, वाक्यं च न भिद्यते, स्त्रीलिङ्गोपपत्तिश्च' इति। अत्रोच्यते। गुणवचनानां हि शब्दानां आश्रयतो लिङ्गवचनानि भवन्ति इति अविशेष्यमाणायामपि व्यक्तौ यत् अवश्यं प्राप्तं लिङ्गम्, तदाश्रयभूतं गुणस्य भवति। अविधित्सितेऽपि तस्मिन् लिङ्गविशेषनिर्देशः अनुवादभूतो भवत्येव। यथा शुक्लः पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकम्। शुक्लः एकः, शुक्लौ द्वौ, शुक्ला बहवः इति। शुक्लां शाटीमानयेति यद्यपि शाट्याद्यानयनं न विधीयते, शुक्लसंबन्धमात्रविधित्सा भवति, न तत्र लिङ्गेन विशेषणं क्रियते, तथापि अनुवादभूतः स्त्रीलिङ्गनिर्देशो भवत्येव 'शुक्लामानय' इति। अनुवादभूतत्वाच्च न वाक्यभेदो भविष्यति। एवं च सति यद्यपि प्राथम्यस्य स्त्रीलिङ्गसंबन्धः श्रौतः, तथापि प्राथम्यस्यैव अभ्यासेन संबन्धः, न लिङ्गस्य। यदि लिङ्गस्य एतेन संबन्धः अभिधीयते, प्राथम्यस्य अनुवादता कल्प्येत। प्राथम्यसंबन्धेऽपि अभिधीयमाने वाक्यं भिद्येत। अपि च नैवात्र विवदितव्यं प्रातिपदिकविशेषणं हि स्त्रीशब्दः 'स्त्रियां यत् प्रातिपदिकं वर्तते ततः टाबादयः' इति। न विशेषणस्य पदान्तरेण संबन्धो भवति यथा 'राजपुरुषो गच्छति' इति। यदा तु प्राथम्यस्य अभ्यासेन संबन्धः, तत्र प्राप्तमनूद्यते स्त्रीत्वम्। यानि सामिधेनीषु वचनानि, ऋचस्ताः, स्त्रीलिङ्गश्च ऋक्शब्दः। तत्र यत् प्रथमं वचनम्, तस्याश्रयः ऋक्। गुणवचनानां च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति इति अविशेषितायामपि ऋचि स्त्रीलिङ्गं भविष्यतीति। यत् प्रथमवचनं तत् त्रिराह इति स्त्री च सा ऋक् सामिधेनी। तस्मात् 'त्रिः प्रथमामन्वाह' इति प्राप्तस्य लिङ्गस्य अनुवादः। 'त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्, ताः पञ्चदश संपद्यन्ते' इति पञ्चदशानां सामिधेनीनां संपत्तये त्रिर्वचनमुच्यमानं परिपूर्णाया ऋचो भवति, न ऋगवयवस्य। परिपूर्णा च समिन्धनवती, न ऋगवयवः। तस्मात् प्राप्तानुवादो लिङ्गस्य इति प्राथम्यस्य धर्मः, न ऋचः।

शा— 'तत्र स्त्रीलिङ्गनिर्देशादृगनेनाभिधीयते। तस्या एव त्रिरभ्याससंबन्धोऽत्र विधीयते॥' उच्यते 'श्रुत्या प्रथमशब्देन प्राथम्यमभिधीयते। ऋक् तु लक्षणयोच्येत, तस्मात् प्राथम्यधर्मता॥'

सोम— पूर्वत्र यथा अपेक्षितविधिलोभेन पत्नीसंयाजान्तत्वमुत्तमवर्जे इत्युक्तम्, एवं पाञ्चदश्यसिद्ध्यर्थं अपेक्षितः ऋगभ्यास एव विधीयते इति प्रतिपादनात् संगतिः। **सूत्रार्थस्तु**– सामिधेनीनां मध्ये प्रथमोत्तमाभ्यासः प्राथम्यसंबन्धात् प्रथमशब्देन उपस्थितत्वाद्वा स्थानधर्मः इति।

वि— 'त्रिरनूक्तिर्ऋचो धर्मः स्थानधर्मोऽथवा, ऽग्रिमः। स्त्रीलिङ्गत्वात्, न तत्प्रातिपदिकप्रबलत्वतः॥' स्थानान्तरे पठितायाः 'प्र वो वाजाः' इत्यस्या ऋचः नास्त्यभ्यासः।

भाट्ट— दर्शपूर्णमासयोः सामिधेन्यवान्तरप्रकरणे 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति श्रुतम्। तत्रानुवचनं तावत् प्रकरणप्राप्तमनूद्यते, त्रिरभ्यासमात्रं तु विधीयते। प्रथमामिति च उद्देश्यसमर्पकमित्यविवादमेव। तत्रापि प्रथमामिति विशेष्यनिघ्नं प्राथम्यविशिष्टमभिधत्ते शुक्लादिपदवत्। तच्च विशेष्यं स्त्रीलिङ्गनिर्देशात् सामिधेनीप्रकरणाच्च ऋगेव। प्राथम्यरूपविशेषणयोगाच्च ऋग्विशेषप्रतीतिरार्थिकी, न तु प्रवोवाजादित्वप्रकारिका उपस्थितिः शाब्दी, तद्वाचकपदाभावात्। अत एव प्राथम्यमेव उद्देश्यताऽवच्छेदकं ग्रहत्वादिवत्। न तु तदुपलक्षितप्रवोवाजादित्वं विना कारणं लक्षणायां प्रमाणाभावादित्यविवादमेव। इदं तु विचार्यते। प्रथमास्वरूपे आनर्थक्ये प्रसक्ते अपूर्वसाधनत्वलक्षणायां अपूर्वसाधनीभूताग्निसमिन्धनप्रकाशकऋक्त्वमात्रलक्षणे अतिप्रसङ्गापत्तेः, तन्निराकरणार्थं उद्देश्यताऽवच्छेदककोटौ ऋक्त्वविशेषणतया प्रवोवाजादित्वस्य विवक्षणम्, उत प्राथम्यस्य इति चिन्तायाम्, प्राथम्यरूपस्य अश्रुतस्य उद्देश्यताऽवच्छेदकस्य व्रीहित्वादिवत् अपूर्वसाधनत्वलक्षणोपयोगिशक्योपस्थितौ उपक्षीणत्वेन निरुक्तापूर्वसाधनत्वरूपोद्देश्यताऽवच्छेदककोटिप्रवेशे

प्रमाणाभावात् प्रवोवाजादित्वमेव ऋक्त्वविशेषणम्। अतश्च विकृतौ यत्रकुत्रस्था प्रवोवाजैव त्रिरभ्यसितव्या । न तु प्रथमस्थानपतितमृगन्तरम् । इति प्राप्ते , अतिप्रसङ्गपरिहारार्थमवश्यकल्प्येन क्वचित् तत्तद्व्यापारकसाधनत्वातिरिक्तेन विशेषणं उपस्थितत्वात् उपक्षीणेनापि प्राथम्येनैव विशेषणं न तु अनुपस्थितेन प्रवोवाजत्वेन । अवघातादौ तु तण्डुलनिष्पत्तिव्यापारकसाधनतामात्रेणैव उद्देश्यत्वपर्यवसानात् यवानां धर्माकाङ्क्षाबलेन यवसाधारण्यकल्पनेऽपि च वाक्यवैयर्थ्याभावात् नातिप्रसङ्गपरिहारार्थं व्रीहित्वप्रवेशः । प्रकृते तु अतिप्रसङ्गाङ्गीकारे प्रथमोत्तमापदघटितवाक्यद्वयवैयर्थ्यापत्तेः 'ताः पञ्चदश संपद्यन्ते' इत्यर्थवादानुपपत्तेश्च विशेषणविवक्षा आवश्यकी । अतश्च याकाचित् प्रथमोत्तमा त्रिरभ्यसितव्या इत्यूहोपयोगोऽपि ।

मण्डन—'अभ्यासक्रिया स्यात् प्रथमोत्तमाऽन्ते ।' अन्ते स्थाने ।

शंकर-- 'त्रिरभ्यास ऋचां न च ।' १६.

⌛ दर्शपूर्णमासयोः सामिधेनीसंख्यायां काम्यविवृद्धौ आगन्तूनामृचामन्ते निवेशः ॥

समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् । ५।३।३।४ ॥

भाष्यम्— दर्शपूर्णमासयोः सामिधेन्यः 'सामिधेनीरन्वाह' इति । तत्र काम्याः सामिधेनीकल्पाः 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इत्येवमादयः । तत्र आगमेन संख्यापूरणं वक्ष्यते (१०।५।८) । तत्र संदेहः किमागन्तूनां अन्ते निवेशः, उत समिध्यमानवतीं समिद्धवतीं चान्तरेण निवेशः इति । किं तावत् प्राप्तम् ? अन्ते निवेशः 'अन्ते तु बादरायणः' इत्यनेन न्यायेनेति । एवं प्राप्ते, ब्रूमः । समिध्यमानवतीं समिद्धवतीं चान्तरेण निवेश इति । कुतः ? द्यावापृथिव्योरन्तराले समर्हणात् संस्तवादित्यर्थः । 'इयं वै समिध्यमानवती द्यौः, असौ समिद्धवती पृथिवी, यदन्तरा तद् धाय्याः' इति अन्तरिक्षसंस्तुत्या तस्मिन् अन्तराले विधीयन्ते । तस्मात् नान्ते स्युरिति । ('समिध्यमानो अध्वरे' इत्यादिः समिध्यमानवती , 'समिद्धो अग्न आहुतः' इत्यादिः समिद्धवती) ।

तच्छब्दो वा । ५ ॥

भाष्यम्— अथवा या धाय्याशब्दिकाः , तास्तत्र भवितुमर्हन्ति । तेन हि शब्देन तत्र संस्तवः । संस्तवाच्च विधानम् । यथा 'पृथुपाजवत्यौ (पृथुपाजा० तं सबाध० इति द्वे) धाय्ये' 'उष्णिक्ककुभौ धाय्ये' इति । (त्रैधातवीयायां 'प्रसो अग्ने तवोतिभिः, प्रहोत्रे पूर्व्यम्' इति धाय्ये- **सोम.**) काः पुनरेता धाय्या नाम, नास्य शब्दस्य प्रसिद्धिमुपलभामहे । उच्यते । सामिधेन्यो धाय्याः । कुतः ? एवं हि भगवतः पाणिनेर्वचनम् 'पाय्य-सांनाय्य-निकाय्य-धाय्या-मान-हविर्-निवास--समिधेनीषु' (पा० ३।१।१२९) इति । अस्मात् वचनात् श्रुतिमनुमिमीमहे । कतमासु सामिधेनीषु इति ? उच्यते । अविशेषात् सर्वासु इति गम्यते । इह तु समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युरिति । सर्वासु सामिधेनीषु सतीषु धाय्यावचनात् विशिष्टानां सामिधेनीनां धाय्याशब्द इति गम्यते । ननु पाणिनिवचनात् अविशेषेण सर्वा धाय्याः । नेत्याह । विशिष्टास्वपि वचनमुपपद्यते एव । यदि विशिष्टाः ततः का इति । उच्यते । यासु धाय्याशब्दः श्रूयते, तास्तावत् धाय्याः । तासु च धाय्यासु सतीषु वचनमर्थवत् भवति । अर्थवति च सति वचने, नान्या धाय्याः प्रमाणाभावादिति ।

उष्णिक्ककुभोश्चान्ते दर्शनात् । ६ ॥

भाष्यम्— उष्णिक्ककुभोश्च अन्ते प्रयोगो दृश्यते 'यज्जगत्या परिदध्यात् अन्तं यज्ञं गच्छेत् । अथ यत् त्रिष्टुभा परिदधाति, नान्तं गच्छति' इति । (त्रैधातव्यायां अग्ने त्री ते वाजिना इति परिधानीया इति शा.) । ननु त्रिष्टुप् अत्रान्ते दृश्यते, नोष्णिक्ककुभौ इति । उच्यते । त्रिष्टुभमेव अयं (सूत्रकारः) उष्णिक्ककुभौ इति ब्रूते । कथम् ? 'त्रिष्टुभो वीर्यम्' इत्येवं संस्तुतेः । त्रिष्टुभो वा एतद्वीर्यम्, 'यदुष्णिक्ककुभौ' इति कारणे कार्यवत् उपचारः कृतः (वेदेनैव, ततः सूत्रकारेणापि) ।

सोम-- पूर्ववदिहापि प्राकृतक्रमाबाधः इति प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**- धीयमानतया धाय्याः सकला आगन्तवः स्युः समिध्यमानवतीं समिद्धवतीं चान्तरेण द्यावापृथिव्योरन्तरालसंस्तवात् इति ।

वि--'सामिधेन्येकविंशत्यामागन्तोर्मध्यतः स्थितिः । अन्ते वा, मध्यतो धाय्याशब्दितानां तथेक्षणात् ॥, इद्धमानेद्धवत्योस्ता मध्ये धाय्याविधानतः । आगन्तूनामधाय्यानां निवेशोऽन्ते हि युज्यते ॥'

भाट्ट— पञ्चदशसामिधेनीनां यत्र 'एकविंशतिमनुब्रूयात्' इत्यत्राधिका संख्या श्रुता, तत्रागमेन संख्यापूरणं दशमे वक्ष्यते । तदत्र आगम्यमानानामृचां यद्यपि न्यायेनान्ते निवेशः प्रसज्यते, तथापि 'इयं वै समिद्ध्यमानवती असौ समिद्धवती, यदन्तरा तद्धाय्या' इति द्यावापृथिव्यन्तरालत्वेन स्तुतस्य च समिद्ध्यमानवतीसमिद्धवत्यन्तरालस्य अप्राप्तिबलकल्पितविधिविहितस्य सत्त्वात् तदन्तराले एव सर्वासामागम्यमानानां निवेशः । **न च** धाय्यापदपरिभाषितानामेव मन्त्रविशेषाणां तदन्तराले निवेशः अन्येषां तु अन्ते इति **वाच्यम्** । धीयमानत्वयोगेन सर्वेषामेव धाय्यापदवाच्यत्वात् । **इति प्राप्ते**, नायं यौगिकः स्तोत्रादौ आगम्यमानास्वपि धाय्याशब्दप्रयोगापत्तेः, पाणिनिना सामिधेनीष्वेव धाय्यापदस्य अनुशिष्टत्वाच्च । अतो रूढ एवायम् । सोऽपि यत्रैव वेदे 'पृथुपाजवत्यौ धाय्ये' इत्यादिना परिभाषितस्तत्रैव । तेषामेव चान्तराले निवेशः । अन्येषां तु अन्ते इति । अत एव त्रैधातवीयायां अधाय्याशब्दितायाः 'अग्ने त्री ते' इत्यस्या ऋचः 'त्रिवत्या परिदधाति' इत्यन्ते निवेशदर्शनमुपपद्यते ।

मण्डन--'धाय्याशब्दोदिता मध्ये ।'

शंकर--'नान्ते धाय्या निवेक्ष्यते ।'

* दर्शपूर्णमासयोः **सार्वकाम्यं** फलविधिरेव न अङ्गफलैः अङ्गाङ्गकामैश्च सह अनुवादः । **भा**.४।३।१०।२५–२६, * दर्शपूर्णमासयोः **सूक्तवाकः** प्रस्तरप्रहरणे मन्त्रत्वेनोपदिश्यते, न तु कालार्थः संयोगः । सूक्तवाकन्यायः । ३।२।५।११–१५, * दर्शपूर्णमासयोः सूक्तवाको याज्या प्रस्तरः द्रव्यं अग्न्यादिश्च देवता । यागः सन् प्रतिपत्तिरपि स्विष्टकृद्वत् । ३।२।५।११–१५, * दर्शपूर्णमासयोः **सूक्तवाके** 'अयं यजमान आयुराशास्ते' इति यजमानशब्दः बहुकर्तृके विकारे ऊहितव्यः । ९।१।१४ (१५) । ४१, * दर्शपूर्णमासयोः **सूक्तवाकावान्तरवाक्यानां** विभज्य प्रत्येकं विनियोगः वाक्यात्, न तु प्रकरणात् सर्वेषामपि समुच्चयेन विनियोगः । वाक्यप्रकरणाधिकरणं द्रष्टव्यम् । **वि**. ३।३।९. * दर्शपूर्णमासयोः **सूक्तवाकनिगदे** लिङ्गसामर्थ्यात् पौर्णमासीप्रयोगात् इन्द्राग्निशब्दः उत्कृष्टव्यः अमावास्यायां च प्रयोक्तव्यः । तत्र हि पौर्णमासीदेवताः अमावास्यादेवताश्च आम्नाताः । ताः परस्परेण एकवाक्यतां नाभ्युपयन्ति । **भा**. ३।३।७।१४ पृ. ८५२–५३. * दर्शपूर्णमासयोः **सूक्तवाकमन्त्रः** 'इदं द्यावापृथिवी भद्रमभूत्' इत्यादिः । **वि**. ३।२।५. * दर्शपूर्णमासयोः **सूक्तवाकमन्त्रस्य** अर्थानुसारेण विभज्य विनियोगः । सूक्तवाकविभागन्यायः । **भा**. ३।२।६।१६–१९. * दर्शपूर्णमासयोः **स्तम्बयजुर्हरणं** 'स्तम्बयजुश्च हरति, अभि च गृह्णाति' द्वादशद्वंद्वगतम् । **वि**. ३।८। १०। (स्तम्बेन तृणमूलेन सह पांसूनां हरणम् । वेदिं कृत्वा त्रिः संमार्ष्टि । पूर्वार्धात् वेदेः वितृतीयदेशे ($\frac{2}{3}$ भागे) स्तम्बयजुर्हरति । तूष्णीं चतुर्थम् । सत्या. १।६।६२–८५). * दर्शपूर्णमासयोः **स्फ्यादीनि** दश यज्ञायुधानि न हविः, किन्तु तद्वाक्येन संभरणस्तुतिः । यज्ञायुधाधिकरणम् । **के**. ४।१।४।७–१०. * दर्शपूर्णमासयोः **स्फ्यकपालादिद्रव्याणि** स्वस्वकार्ये व्यवस्थितानि । द्रव्याधिकरणम् । **भा**. ३।१।२।११. * दर्शपूर्णमासयोः **'स्योनं ते'** इति मन्त्रः सदनकरणे, 'तस्मिन् सीद' इति तु पुरोडाशसादने विनियोक्तव्यः लिङ्गात्, न तु वाक्येन उभयोरेकमन्त्रत्वम् । **वि**. ३।३।८, * दर्शपूर्णमासयोः **'स्रुचः** संमार्ष्टि' इति स्रुक् प्रधानम्, दर्भैः संमार्जनं गुणकर्म । अग्निसंमार्गाधिकरणम् । २।१।४. * दर्शपूर्णमासयोः **स्रुग्व्यूहनमन्त्राः** 'वाजस्य मा प्रसवेन' इत्यादयः अध्वर्युयजमानाभ्यामुभाभ्यामपि पठनीयाः, द्वयोरपि काण्डयोः पठितत्वात् । द्व्याम्नाताधिकरणम् । **भा**. ३।८। ७।१७. * दर्शपूर्णमासयोः **स्रुवः** खादिरः जुहूः पर्णमयी । **भा**. ३।६।१।१. * दर्शपूर्णमासयोः **'स्रुवेण** पार्वणौ जुहोति' । तत्रैकः पार्वणः 'ऋषभं वाजिनं वयं॰' इति मन्त्रेण पूर्णमासे होमः । अपरः पार्वणः 'अमावास्या सुभगा' इति मन्त्रेण दर्शे होमः । पार्वणन्यायः । **वि**. ९।२।१८–१९. * दर्शपूर्ण-

मासयोः **स्रुवजुहूपभृद्ध्रुवाणां** फलश्रुतिः फलार्थवादः, न तु फलविधिः। पर्णमयीन्यायः। भा. ४।३।१।१–३. * दर्शपूर्णमासयोः **स्वर्गः** फलम्, तच्च न विधेयं सौन्दर्यात् स्वयंप्रवृत्तेः। वि. ४।१।२ वर्णकं २, * दर्शपूर्णमासयोः **स्विष्टकृत्** उपयुक्तहविःसंस्कारः। ३।४।१९, * दर्शपूर्णमासयोः स्विष्टकृत् पुरोडाशस्य न प्रयोजकः। उत्तरार्धन्यायः। ४।१।१३. * दर्शपूर्णमासयोः स्विष्टकृत् यागश्च प्रतिपत्तिश्च। भा. ३।२।५।१५. * दर्शपूर्णमासयोः स्विष्टकृत् यागद्रव्यशेषसंस्कारकः। टुप्. १०।७।३।११. * दर्शपूर्णमासयोः स्विष्टकृत् हविःसंस्कारापूर्वोभयार्थः। आश्रयिन्यायः। के. ४।१।७।१८–२०, * दर्शपूर्णमासयोः **स्विष्टकृदादिशेषकर्माणि** सर्वेभ्यो हविर्भ्यः अनुष्ठेयानि, नैकस्मात् कस्माच्चित्। स्विष्टकृदधिकरणन्यायः। ३।४।१५।४२–४५. * दर्शपूर्णमासयोः **स्विष्टकृदादिशेषकर्मानुष्ठानं** एकस्मादेव चेत् प्राथमिकादेव। प्रथमोपस्थितन्यायः। भा. ३।४।१६।४६–४७. * दर्शपूर्णमासयोः **स्विष्टकृदादिशेषकार्यं** ध्रौवाज्येन न कार्यम्, उपस्तरणादिकार्यान्तरसद्भावात्। वि. ३।५।१. * दर्शपूर्णमासयोः **स्विष्टकृदिडं** उपांशुयाजाज्यान्नावदातव्यम्। भा. ३।५।१।१–१२, * दर्शपूर्णमासयोः **स्विष्टकृद्यागः** अनुयाजेषु संस्कारकः न आरादुपकारकः। १०।४।१९।३८. * दर्शपूर्णमासयोः **हविषां** श्रपणं गार्हपत्ये श्रुतम्। १२।१।५।१२.

⧗ दर्शपूर्णमासयोः हविरार्तौ पञ्चशराव ओदनः कर्मान्तरम्, न सांनाय्यस्य प्रतिनिधिः॥

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात्। ६।४।९।२८॥

भाष्यम्— 'दर्शपूर्णमासयोः श्रूयते 'यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति। तत्र संदेहः किं हविषि आर्ते पञ्चशरावः प्रतिनिधिः, उत निमित्ते कर्मान्तरमिति। कथं प्रतिनिधिः, कथं कर्मान्तरमिति? यदि एवमभिसंबन्धो भवति पञ्चशरावं निर्वपेत् कुर्यादिति, ततः सांनाय्यस्य कार्ये पञ्चशरावः प्रतिनिधिरिति। अथ न पञ्चशरावो निर्वपतिना, किन्तु देवतया संबध्यते, पञ्चशरावमैन्द्रं कुर्यादिति, ततो निमित्ते यजतिर्विधीयते। किं तावत् प्राप्तम्? पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात्। पञ्चशरावः सांनाय्यस्य प्रतिनिधिः। कुतः? द्रव्यश्रुतेः। द्रव्यस्य निर्वापे श्रवणम्, नेन्द्रसंबन्धे। कुतः? एवं निर्वापविधिर्भविष्यति, तत्र श्रुतिर्विधायिका। इतरथा द्रव्यदेवतासंबन्धे वाक्यं स्यात्। तच्च दुर्बलं श्रुतेः। तस्मात् प्रतिनिधिरिति।

टुप्— द्रव्यविनाशे द्रव्यमभिलषतः प्रकृतस्य आमावास्यस्य कर्मणः ओदनः पञ्चशरावपरिमितो द्रव्यं विधीयते। एवं अपेक्षितः संबन्धः (भवति) कर्मान्तरे (तु सति द्रव्यान्तरस्य) अनपेक्षितत्वात् अदृष्टं कल्प्यम्। एवं च ओदनस्य आनन्तर्यलक्षणया (प्रत्यासत्तिलक्षणया) श्रुत्या न्याय्यैव कर्तव्यता (विधेयता)।

चोदना वा, द्रव्यदेवताविधेरवाच्ये हि। २९॥

भाष्यम्— निमित्ते वा अङ्गभूतं कर्मान्तरं यजतिः, द्रव्यदेवताविधेः। द्रव्यदेवतमिह श्रूयते, पञ्चशरावमैन्द्रं कुर्यादिति। इतरथा हि, ऐन्द्रमिति प्रमादपाठोऽवगम्येत। ऐन्द्रमाहेन्द्रयोर्वा अयथार्थानुवादः ऐन्द्रमिति स्यात्। अवाच्ये हि ते देवते। ऐन्द्रशब्देन इन्द्रो महेन्द्रश्च न शक्योऽनुवदितुम्। विशेषणत्वे वाक्यभेदः। ननु श्रुतिर्बलीयसीत्युक्तम्। सत्यमेवम्। किन्तु इतरस्मिन् पक्षे बाध्यतेतरां श्रुतिः। ऐन्द्रशब्दस्य अतन्त्रत्वात्।

टुप्— देवतापरिमाणयोः (इन्द्रस्य पञ्चशरावस्य च) अप्राप्तत्वात् (तयोर्द्वयोर्विधौ) अनेकगुणविधानात् (विधानप्रसङ्गात्) कर्मान्तरम् (इदम्। यत्तु अपेक्षितं द्रव्यमिति तत्राह–) द्रव्ये चासति प्रतिनिधिर्भवति, विद्यते च लौकिकं पयः (तस्मिन् मुख्ये सति द्रव्यान्तरमनपेक्षितमिति)।

शा— 'आर्तत्वाद् द्रव्ययोरन्यत् कर्मणो द्रव्यमीप्सितम्। लाघवं च (विशिष्टकर्मान्तरविध्यपेक्षया) विधेरेवमतो द्रव्यविधिर्भवेत्॥' उच्यते 'स्थानापत्त्या हि नैकान्तात् प्राप्तिरिन्द्रस्य लभ्यते। महेन्द्रस्यापि सद्भावात् तस्मादिन्द्रो विधीयते॥ प्राप्ते कर्मणि नैकेन विधिना द्रव्यदेवते। शक्ये विधातुं, ताभ्यां तु विशिष्टं कर्म चोद्यते॥'

सोम—पूर्वत्र विशिष्टोद्देशेऽपि यथा न वाक्यभेदः, एवमिहापि इति प्रत्यवस्थानात् संगतिः । **प्रयोजनम्**—पूर्वपक्षे पञ्चशरावौदने सांनाय्यधर्माः कार्याः, सिद्धान्ते तु औषधधर्माः इति ।

वि-- 'द्रव्यप्रतिनिधिः पञ्चशरावो भिन्नकर्म वा ।, दोहद्वयार्तितो दर्शे द्रव्यं स्यादीप्सितत्वतः ॥, प्राप्ते कर्मणि नैकेन विधिना द्रव्यदेवते । शक्ये विधातुं ताभ्यां तु विशिष्टं कर्म चोद्यते ॥'

भाट्ट— 'ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्र हविर्नाशे आज्यादिना समापने प्रसक्ते प्रतिनिधित्वेन लाघवात् सांनाय्यानुवादेन पञ्चशरावपरिमितौदनमात्रविधानम् । न च वाक्यभेदः, पञ्चशरावौदनपदयोः समानाधिकरणत्वेन 'अग्नये दात्रे इतिवत् विशिष्टविधानोपपत्तेः, ओदनपदस्य तात्पर्यग्राहकत्वेन पञ्चशरावमिति बहुव्रीहिणैवौदनस्योक्तत्वाच्च । ऐन्द्रमिति सांनाय्यस्य इन्द्रदेवताकत्वस्यापि सत्वात् 'तावब्रूताम्' इतिवत्पाक्षिकानुवादः । अथवा तत्तदुत्पत्तिवाक्ये इन्द्रमहेन्द्रभेदेन सांनाय्यस्य भेदात् ऐन्द्रयागानुवादेनैव प्रतिनिधिविधानम् । इति प्राप्ते, सुबन्तपदद्वयस्य परस्परान्वयाव्युत्पत्तेः बहुव्रीहिणा सामान्यतो द्रव्योपादानेऽपि ओदनत्वादिरूपेणोपादाने प्रमाणाभावात् । तात्पर्यग्राहकत्वमङ्गीकृत्य एकत्रैव पदे विशिष्टलक्षणाङ्गीकारे च क्वापि प्राप्तकर्मानुवादेन अनेकविधाने वाक्यभेदानापत्तेः, वाक्यभेदापादकगुणादेव कर्मान्तरमिदं प्रायश्चित्तत्वेन विधीयते । समाप्तिस्तु आज्यादिनैव । 'अग्नये दात्रे' इत्यत्रापि तु न देवतामात्रविधिपक्षाश्रयणम्, वाक्यभेदप्रसङ्गात्, अपि तु भावनाऽन्तरविधिपक्षः एव । न चैवमत्रापि भावनाऽन्तरत्वापत्तेर्यागान्तरत्वानापत्तिः, उत्पत्त्यन्वयिनो गुणस्य वाजिनवत् यागभेदकत्वावश्यम्भावात् । अभ्युदितेष्टौ तु पूर्वदेवताऽपनयविधानात् यच्छब्दश्रवणाच्च विशिष्य पूर्वयागीयत्वप्रतीतेर्भावनामात्रभेद इति विशेषः ।

मण्डन-- 'कर्मान्तरं पञ्चशरावयागः ।'

शंकर— 'हविरार्तौ क्रियाविधिः ।'

* दर्शपूर्णमासयोः **हविष्कृदाह्वानमन्त्रः** 'हविष्कृदेहि' इति । स चाह्वानशेषः नावघातशेषः । वि. ३।२।३, *दर्शपूर्णमासयोः **हविष्कृदाह्वानमन्त्रस्य** अवहननकाले त्रिरभ्यासः । ३।२।३. * दर्शपूर्णमासयोः '**हविष्कृदेहीति** त्रिरवघ्नन् आह्वयति' इति अवहन्तिः मन्त्रस्य कालं लक्षयति, न तु अवहन्ति प्रति मन्त्र उपदिश्यते । **भा.** ३।२।३।५-९. * दर्शपूर्णमासयोः **हस्तावनेजनादिकं** सर्वाङ्गप्रधानसाधारणम्, न आस्तरणादिमात्राङ्गम् । आनन्तर्याधिकरणम् । **के.** ३।१।१४।२४-२५. * दर्शपूर्णमासयोः **होतुर्वरणमदृष्टार्थम्**, वरणात् प्रागपि सामिधेनीषु तस्य प्रवृत्तेः । वि. १२।१।१८. * दर्शपूर्णमासयोः होतुर्वरणमाम्नातं 'अग्निर्देवो दैव्यो होता देवान् यक्षत्' इति मन्त्रेण । **भा.** १२।१।१८।३५ । अस्ति होतुः प्राग्वरणात् सामिधेनीकर्मणा संयोगः । तस्मात् होतृवरणमदृष्टार्थम् । ४१ । प्रवृत्ते कर्मणि दार्शपौर्णमासिकं होतृवरणं क्रियते । अतस्तत् नानत्यर्थम्, किं तर्हि धर्ममात्रम् । ३५.

* **दर्शपूर्णमासाङ्गं** उपवीतम् । उपवीताधिकरणम् । **वि.** ३।१।११.

दर्शपूर्णमासाङ्गं भेदनादिनिमित्तकहोमाः ॥

प्रायश्चित्तमधिकारे सर्वत्र, दोषसामान्यात् । ६।५।१५।४५ ॥

भाष्यम्-- दर्शपूर्णमासयोः श्रूयते 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इति । तत्र किं दर्शपूर्णमासयोरेव एतत् भिन्ने स्कन्ने च प्रायश्चित्तम्, उत यत्र भिद्यते स्कन्दति चेति । किं प्राप्तम् ? प्रकरणे यत् प्रायश्चित्तमेवंजातीयकं किञ्चिदुत्पन्नम्, तत् सर्वत्र यत्रयत्र भिद्यते स्कन्दति वा तत्रतत्र स्यात् । कस्मात् ? दोषसामान्यात् । समानं निमित्तं स्कन्दनं भेदनं वा । स एवात्र दोषः इत्यभिप्रेतम् । प्रकरणात् दर्शपूर्णमासयोः प्रायश्चित्तम्, वाक्यादन्यत्रापि । प्रकरणाच्च वाक्यं बलीयः । तस्मात् सर्वत्र स्कन्ने भिन्ने च प्रायश्चित्तमिति ।

प्रकरणे वा, शब्दहेतुत्वात् । ४६ ॥

भाष्यम्-- प्रकरणे एव भिन्ने स्कन्ने वा प्रायश्चित्तम् । कुतः ? शब्दहेतुत्वात् । तेन प्रकृतेनार्थेन सह एकवाक्यता एषां होमानाम् । ततो होमवतो यागस्य प्रत्यायने प्रकृतो 'यजेत' इति शब्दो हेतुः । एवं चेत्

तदुपकारेण अर्थवान् भविष्यतीति । इतरथा विना वाक्येन फलं कल्पयितव्यं स्यात् । तस्मात् वाक्यं फलाभावेनैव बाधितम्, इतिकृत्वा प्रकरणमनुग्रहीतव्यमिति ।

अतद्विकारश्च । ४७ ॥

भाष्यम्— न च तद्विकारः अग्निहोत्रं ज्योतिष्टोमो वा, न दर्शपूर्णमासविकारः । यदि तद्विकारो भवेत्, तत्रापि स्कन्ने भिन्ने वा प्रायश्चित्तं स्यादिति ।

शा— गतं प्रासङ्गिकं (६।५।८–१४) पुनः प्रायश्चित्ताधिकारमनुसंधत्ते ।

सोम-- सूत्रार्थस्तु-- अधिकारे दर्शपूर्णमासादिप्रकरणे श्रुतं प्रायश्चित्तं दोषसामान्यात् सर्वत्र स्यादिति ।

वि-- ‘ भिन्ने होत्रे यत्रतत्र प्रकृते वा, निमित्ततः । सर्वत्र स्यात्, फलित्वाय प्रकृतेनैकवाक्यता ॥ ’

भाट्ट-- ‘ भिन्ने जुहोति ’ इत्यादि प्रायश्चित्तं नैमित्तिकमपि फलापेक्षायां प्रकरणात् क्रत्वङ्गम् । निमित्तमपि भेदनादिकं न लौकिककपालादेः, प्रायश्चित्तसमाख्याबलेन क्रत्वङ्गभूतकपालादिभेदननिमित्तवैगुण्यपरिहारार्थत्वस्यैव कल्पनेन स्वतन्त्रादृष्टकल्पने गौरवात् ।

मण्डन-- ‘ प्रकृते स्याद् भिदाऽऽहुतिः ।’ १६.

शंकर-- ‘ भिन्ने होमो न सर्वगः ।’ १७.

* **दर्शपूर्णमासार्थोद्धरणकाले** अग्निहोत्राङ्गोद्धरणाङ्गमन्त्रो नानुष्ठेयः । **भा.** ९।४।८।३१, * **दर्शपूर्णमासार्थोद्धृतस्याग्नेः** उद्वाने ज्योतिष्मतीष्टेः नानुष्ठानम् । ९।४।६।२८.

* **दर्शपूर्णमासाख्यस्य** एकस्यैव कर्मणः अयनादिशब्दवाच्यावृत्त्यादिगुणयोगेन अनेकदाक्षायणादिसंज्ञोपपत्तिः । **सु. पृ.** ८१९.

* **दर्शपूर्णमासादेः** गुणकामाः विकृतौ न प्रवर्तन्ते । **भा.** ८।१।१४।२३–२५, * **दर्शपूर्णमासादीनां** कर्मणां साङ्गानामध्वर्युः कर्ता । ३।४।८।२२. * दर्शपूर्णमासादीनां काम्यकर्मणां सर्वाङ्गोपसंहारः । **वि.** ११।१।३, * दर्शपूर्णमासादीनां निमित्तावृत्तौ आवृत्तिः । अग्निहोत्रादिकर्मणां इत्यत्राधिकरणम् । ६।२।८.

* दर्शपूर्णमासादीनां सर्वफलकत्वेऽपि प्रतिफलं पृथगनुष्ठानम् । योगसिद्ध्यधिकरणम् । **भा.** ४।३।११।२८. * **दर्शपूर्णमासादौ** अध्वर्युकाण्डे यजमानकाण्डे च द्विराम्नाता मन्त्रा अध्वर्युयजमानयोर्द्वयोरपि । द्व्याम्नाताधिकरणम् । **वि.** ३।८।८. * दर्शपूर्णमासादौ आवाहनादिनिगमेषु विधिगतदेवतापदेनैव अभिधानं कर्तव्यम् । **भा.** १०।४।१२।२३–२४.

⌛ दर्शपूर्णमासादौ इडाऽऽदिशेषभक्षणं ऋत्विजामेव (यजमानस्य च) ॥

निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् । ६।४।३।४ ॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र भक्षाः प्राशित्रचतुर्धाकरणशंयुवाककालाः । तेषु संदेहः किमन्ये एव तेषां भक्षयितारः, उत प्रकरणगताः पुरुषा इति । किं प्राप्तम् ? शेषभक्षः अन्यैरप्रकरणस्थैः कर्तव्यः । कुतः ? निर्देशात् । निर्देश्यन्ते हि अध्वर्य्वादयः इडाभक्षे, ‘ यजमानपञ्चमा इडां भक्षयन्ति ’ इति । सर्वेषु भक्षयितव्येषु प्राप्तेषु परिसंख्यानार्थो निर्देशः क्रियते । इडामेवैते भक्षयेयुरिति । यथा आग्नेयोऽष्टाकपाल इति सर्वस्मिन्नवयविनि यागानियमे प्राप्ते द्व्यवदानमात्रं श्रूयते । स विधिर्न, प्राप्तत्वात् । नानुवादः अनर्थकत्वात् । परिसंख्या तु अर्थवत्त्वाय । एवमेषां परिसंख्येति । अपि च यदि प्रकृता एव भक्षयेयुः, अश्वमेधे दोषः स्यात् । बहुत्वाद्भक्षाणाम्, भक्षयन्तो म्रियेरन् ।

टुप्— भक्षो निर्वर्तयितव्यः । तस्मिन् यथासमाख्यं कर्तृषु प्राप्तेषु परिसंख्या क्रियते, इडामेवैते भक्षयेयुरिति । अनिर्ज्ञातकर्तृकेषु भक्षेषु पूर्वपक्षोत्थानम् ।

सर्वैर्वा, समवायात्स्यात् । ५ ॥

भाष्यम्— सर्वैर्वा प्रकृतैरेव भक्ष्येत । तद्धि भक्षणं पुरुषसंस्कारार्थम् । पुरुषाः संस्कृताः प्रचरिष्यन्तीति । तेषु विनिगमनाया अभावात् यावन्तः प्रकरणे समवेताः, ते सर्वे भक्षयेयुरिति ।

टुप्— (यजमानविधिपरत्वे संभवति परिसंख्यापरत्वमन्याय्यम्, इत्याशङ्क्याह–) द्रव्यसंस्कारत्वात् (भक्षाणाम्, तत्कर्तृत्वेन ऋत्विजामेव प्राप्तेः) यजमानः अप्राप्तः विधीयते । (कथं तर्हि पुरुषसंस्कारकत्वं

भाष्यकारेणोक्तम्, तत्राह--) वाक्यप्रकरणसमाख्याभिः ‘ एभिः (ऋत्विग्भिरेव) भक्षयितव्यम् ’ इत्यस्यापि (कर्तृ-) नियमस्य दृष्टमेव प्रयोजनम् । (तथाहि,) कर्तॄणां कियत्यपि तृप्तिः उपजायते । तदनु निष्पाद्यं (उक्तप्रयोजनानुनिष्पाद्यं) अपेक्ष्याह (भाष्यकारः) **तद्धि भक्षणं पुरुषसंस्कारार्थं** इति । याज्ञिकैस्तु (क्रियाप्रयोजनं द्रव्यसंस्कारः नियमप्रयोजनं तु कर्तृसंस्कारः इति) विवेकमगृहीत्वा ‘ भक्षाः पुरुषसंस्काराः ’ इत्याद्युक्तम् ।

निर्देशस्य गुणार्थत्वम् । ६ ॥

भाष्यम्-- अथ यदुक्तम्, निर्देशादिति । गुणार्थः सः । अन्ये कर्मकरत्वादेव प्राप्ताः । तत्र यजमानस्तेषां पञ्चमो वचनान्निर्दिश्यते । तत्प्राप्त्यर्थं चेदं वचनम् । ततो न परिसंख्या ।

प्रधाने श्रुतिलक्षणम् । ७ ॥

भाष्यम्— यत्तु द्व्यवदानमात्रं प्रधाने निर्दिश्यते, तद्वचनप्रामाण्यात् परिसंख्यानार्थम् । नहि तत्र कस्यचित् अपूर्वस्य विधिः । इह यजमानो विधीयते । विधिपरिसंख्यासंशये विधिर्ज्यायान् । तत्र स्वार्थे शब्दः । परिसंख्यायां त्रयो दोषाः स्वार्थहानम्, अस्वार्थपरिग्रहः, प्राप्तबाधश्चेति । तस्मात् प्रकृता एव भक्षयेयुरिति ।

अर्थवदिति चेत् । ८ ॥

भाष्यम्— अथ यदुक्तं अश्वमेधे विरोधः स्यात् बहुत्वात् भक्षाणामिति । तत्परिहर्तव्यम् ।

न, चोदनाविरोधात् । ९ ॥

भाष्यम्— अश्वमेधे न सर्वे भक्षयिष्यन्ति । अर्थात् सर्वे भक्षयन्तः अश्वमेधं न समापयेयुः । तत्र अश्वमेधश्रुतिः प्रत्यक्षा । सा विरुध्यमाना चोदकप्राप्तं सर्वभक्षणं बाधते । प्रकृतौ तु न विरोधः । तस्मात् सर्वे प्रकृता भक्षयेयुरिति ।

शा-- शेषप्रसङ्गात् इदमधिकरणम् ।

सोम--सूत्रार्थस्तु- शेषभक्षः अन्यैः कार्यः ‘ यजमानपञ्चमा इडाम् ’ इति निर्देशात् । यथा सर्वस्य होमे प्राप्ते द्व्यवदानमात्रस्य निर्देशात् होमः, तद्वत् इति ।

वि--‘ शेषभक्षाः किमन्येषामृत्विजां वा, ऽन्यभक्षणम् । ऋत्विजां परिसंख्यानात्, स्वाम्यप्राप्तोक्तितोऽन्तिमः ॥ ’

भाट्ट— शेषप्रसङ्गादिह दर्शपूर्णमासयोः शेषभक्षाः श्रुताः । तत्रेडाभक्षे ‘ यजमानपञ्चमाः इडां भक्षयन्ति ’ इति श्रुताः कर्तारः । तथा प्राशित्रभक्षे ‘ प्राशित्रं ब्रह्मणे परिहरति ’ इति श्रुतः । चतुर्धाकरणभक्षेऽपि न्यादेशाम्नानात् चत्वार ऋत्विजः यजमानभागब्रह्मभागयोस्तावेव । शंयुवाककालभक्षे तु ‘ हविःशेषान् भक्षयन्ति ’ इत्याम्नातेन बहुवचनेन आध्वर्यवसमाख्याबाधेऽपि कर्मकरत्वात् सर्वे ऋत्विजो भवन्ति । **न च** इडाभक्षे न्यायप्राप्तर्त्विक्पुनःश्रवणस्य परिसंख्याऽर्थत्वात् शंयुवाककालभक्षे तदन्ये एव भवेयुरिति **वाच्यम्** । ऋत्विजां प्राप्तत्वेऽपि अप्राप्तयजमानसाहित्यस्यैव तत्र विधेयत्वेन तस्य भक्षान्तरे ऋत्विक्परिसंख्यार्थत्वाभावात् । अत्र हि इडोद्देशेन कर्तृविशिष्टभक्षान्तरविधानेऽपि विशेषणविधिवेलायां प्राप्ताप्राप्तविवेकेन भक्षो यजमानसाहित्यं च विधीयते । ऋत्विजां तु भक्षस्य प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारकत्वस्यापि वक्ष्यमाणत्वेन आनत्यर्थत्वात् प्राप्तिसंभवेन न विधानम्, स्वत एव आनतत्वाच्च अप्राप्तं यजमानसाहित्यं तु विधीयते । यदि तु करिष्यमाणकर्मणि बलाधानार्थत्वमपि भक्षस्येति विभाव्यते, तदा अस्तु यजमानपञ्चमत्वग्रहणं पत्नीपरिसंख्यार्थम् । सर्वथा भक्षान्तरे कर्तृपरिसंख्याऽभावात् शंयुवाककालभक्षे ऋत्विज एव कर्तारः ; अस्मिंश्च पक्षे तस्मिन् पत्नीयजमानयोर्निवृत्तिः, ‘ अत्रैव ऋत्विजो हविःशेषान् भक्षयन्ति ’ इति कल्पसूत्रकारवचनादवगन्तव्या ।

मण्डन— ‘ शेषस्य भक्षः प्रकृतर्त्विजां स्यात् । ’

शंकर— ‘ सर्वे भक्षास्तथर्त्विजाम् । ’

* दर्शपूर्णमासादौ **इडाभक्षो** यजमानस्याप्यस्ति । ‘ यजमानपञ्चमाः संभूयेडां भक्षयन्ति ’ । वि. १०।२।९. * दर्शपूर्णमासादौ **ऋग्यजुःसामतो** भ्रेषप्रायश्चित्तानां विकल्पः । **भा.** १२।३।५।१६, * दर्शपूर्णमासादौ **करणमन्त्रोक्तं** फलं याजमानम् । वर्चोन्यायः । ३।८।

१३।२६-२८. ✻ दर्शपूर्णमासादौ **करणमन्त्रप्रकाश्यं** कर्मोपयोगि फलं ऋत्विग्गामि । अतिक्रमाधिकरणम् । ३।८।१४।२९–३०, ✻ दर्शपूर्णमासादौ **कर्तुरेकस्यैव** स्त्रीसद्वितीयस्य अधिकारः । ६।२।२।३–१३. ✻ दर्शपूर्णमासादौ **कर्तृदेशकालविधिः** नियमार्थः । वि. ४। २।९. ✻ दर्शपूर्णमासादौ **निर्वापाद्यङ्गमन्त्राणामावृत्तिः** । निर्वापन्यायः । भा. ११।४।१४।४७–४८, ✻ दर्शपूर्णमासादौ **नीवारादिप्रतिनिधिष्वपि** अवघातादिमुख्यधर्मानुष्ठानम् । ३।६।१४।३७–३९. ✻ दर्शपूर्णमासादौ **नीवारसंकल्पोत्तरमपि** व्रीहिलाभे व्रीहय एव ग्राह्या न नीवाराः । पुरोडाशकरणोत्तरं तु प्रतिनिधिनैव समापनम् । वि. ६।३।१६, ✻ दर्शपूर्णमासादौ **पुरोडाशप्रथनमन्त्रयो**र्विकल्पः । १२।३।१५, ✻ दर्शपूर्णमासादौ **प्रयाजादीनां** विनियोजकं प्रकरणम् । ३।३।४.

दर्शपूर्णमासादौ प्रैषा आध्वर्यवाः ॥

अध्वर्युस्तु दर्शनात् । ३।८।१२।२४॥

भाष्यम्— अथ एवं गते (प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वे अवगते इत्यर्थः) इदं संदिह्यते किमध्वर्युः अग्नीधं प्रेषयेत्, उत अग्नीत् अध्वर्युमिति । अनियमोऽविशेषात् । **इति प्राप्ते**, ब्रूमः । अध्वर्युः उक्तप्रैषार्थकारी स्यात् । कुतः ? दर्शनात् । दर्शनं भवति ‘ तिर्यञ्चं स्फ्यं धारयेत् । यदन्वञ्चं धारयेत् वज्रो वै स्फ्यो वज्रेणाध्वर्युं क्षिण्वीत ’ इति । यः प्रेष्यति, तस्य हस्ते स्फ्यः । स्फ्येन अध्वर्युं क्षिण्वीत इति अन्यमध्वर्युं प्रेषकात् दर्शयति । तस्मात् अग्नीत् अध्वर्युं प्रेष्येत् इति ।

वा— ‘ यदन्वञ्चं धारयेत्, वज्रेणाध्वर्युं क्षिण्वीत ’ । ‘ वज्रोऽध्वर्युं क्षिण्वीत ’ इति वा पाठः । स्फ्यस्य धारणं तावत् अग्नीधः एकान्तेन । स च अध्वर्युं क्षिण्वीत इति वदन् अग्नीधं स्फ्यवन्तं प्रेषकं दर्शयति । का तु अस्य प्राप्तिः ? उच्यते । ‘ अङ्गगुणविरोधे च तादर्थ्यात् ’ इत्यनेन अङ्गत्वात् प्रैषस्य कर्तृलोपो युक्तः, न प्रधानस्य । बहवश्च प्रैषार्थाः, एको निगदः । तेन ‘ भूयसां स्यात् सधर्मत्वम् ’ (१२।२।७।२२) इत्यपि प्रैषार्थे अध्वर्युरिति, परिशेषात् प्रैषे अग्नीत् ।

गौणो वा, कर्मसामान्यात् । २५ ॥

भाष्यम्— नैतदस्ति अग्नीधः प्रैषः, अध्वर्योः प्रैषार्थ इति । किं खलु ? अध्वर्युरेव अग्नीधं प्रेष्येत् । एवमध्वर्युणा प्रैषः प्रैषार्थश्च उभावपि कृतौ भविष्यतः । तत्र आध्वर्यवमिति समाख्या अनुग्रहीष्यते । तस्मात् अध्वर्युरेव मुख्यः स्यात् । किमस्य मुख्यत्वम् ? यदनेन सर्वं कर्तव्यं समाख्यानात् इति । अथ यदुक्तं ‘ अध्वर्युः प्रचरिता दृश्यते ’ इति, तदुच्यते । सत्यं दृश्यते, न तु अस्य प्रैषार्थकरणे प्रमाणमस्ति चिन्त्यमानम् । तस्मादेतत् मिथ्या दर्शनम् । यस्य हि दर्शनस्य प्रमाणं नास्ति, व्यामोहः सः । यथा शुक्तिकायां रजतविज्ञानम् । अस्ति तु अग्नीधः प्रैषार्थकरणे प्रमाणम् । तस्मात् आग्नीध्रः प्रचरिता । प्रचरितरि च अध्वर्युशब्दो दृश्यते । तस्मात् गौणः । आध्वर्यवे वेदे समाम्नातान् पदार्थान् करोति इति कृत्वा अध्वर्युरित्युच्यते आग्नीध्र इति । तस्मात् आध्वर्यवः प्रैषः, आग्नीध्रः प्रैषार्थ इति ।

वा—‘ मुख्यं वा पूर्वचोदनात् ’ इति प्राथम्यात् प्रैषे समाख्यातः कर्ता युक्तः । नहि तदानीं विरोधः कश्चिदस्ति । तस्मिंस्तु प्रयुक्ते विरोधात् प्रैषार्थे अन्यो भवति । प्रयोजकस्य च प्रयोज्यव्यापारेऽपि कर्तृत्वं न विहन्यते इत्युभयानुग्रहः । इतरथा हि प्रैषे अत्यन्तबाध एव स्यात् । नहि स तेन कृतो नापि कारितो भवेत् । तस्मादध्वर्युप्रेषितः अग्नीत् कुर्यादिति । ‘ वज्रेणाध्वर्युम् ’ इति च आग्नीध्रमेव तत्कार्यापत्तेरभिधास्यति ।

भाट्ट—तत्रापि बहुषु प्रधानभूतेषु प्रैषार्थेषु समाख्याबाधे प्रमाणाभावादेकस्मिन् ‘ प्रोक्षणीरासादय ’ इत्यादिप्रैष एव अध्वर्युबाधेन अन्यकर्तृकत्वम् । अत एव ‘ तिर्यञ्चं स्फ्यं धारयित्वा संप्रैषमाह यद्यन्वञ्चं धारयेत्, स्फ्यो वज्रेणाध्वर्युं क्षिण्वीत ’ इति धारयितुर्भिन्नमध्वर्युं दर्शयति । **इति प्राप्ते**, प्रैषार्थेषु अन्यकर्तृकत्वेऽपि प्रयोजकत्वेनापि अध्वर्योः कर्तृत्वोपपत्तेः समाख्यायाः कुत्रापि अबाधात् प्रैषार्थान् अन्य एव कुर्यात्, प्रैषोच्चारणं तु अध्वर्युः । स च सोमादावसति विशेषवचने प्रतिप्रस्थात्रादिः तत्पुरुषः । दर्शादौ तु आग्नीध्र एव, कर्मकरत्वेन

याज्ञिकप्रसिद्धत्वादिति ध्येयम् । यत्तु लिङ्गम्, तत् यदि अध्वर्युः अन्वञ्चं धारयेत् तदा स्फ्यः तं क्षिण्वीत इत्यर्थेऽपि बाधकाभावात् धारणप्रैषयोराध्वर्यवत्वेऽपि उपपन्नम् । स्फ्यधारणमपि कल्पसूत्रेषु आध्वर्यवमेव प्रसिद्धमिति अत्रत्यवार्तिकं प्रौढिवादः ।

मण्डन––‘अध्वर्युणा प्रेषणमेव कार्यम् ।’ परिशेषार्थः आग्नीध्रेण कार्यः ।

शंकर—‘प्रेषिताऽध्वर्युरेव स्यात् ।’ १५.

⧗ दर्शपूर्णमासादौ स्विष्टकृदादिशेषकार्यार्थमवत्तस्य द्रव्यस्य नाशे शेषकार्यलोपः । नाशाधिकरणम् ॥

अपि वा शेषभाजां स्याद् विशिष्टकारणत्वात् । ६।४।२।३॥

भाष्यम्— अथ स्विष्टकृदर्थमवत्तं यदि विनश्यति, तत्र किं शेषादवदेयम्, उत नेति । किं प्राप्तम् ? पुनः शेषादवदेयमिति । कुतः ? नात्र कृत्स्नस्य उत्तरार्धादवदीयते । कस्य तर्हि ? संनिहितस्य । सति हि प्रयोजने संनिहितस्यावदेयमिति । तस्मादवदीयमाने श्रुतं कृतं भवति । तस्माच्छेषादवदेयमिति । एवं प्राप्ते, ब्रूमः । शेषभाजां स्याल्लोपः (लोपः इति पदस्य सूत्रे अध्याहारः । श्लोवा. १।१।१।५४) । कुतः ? विशिष्टकारणत्वात् । विशिष्टं हि कारणं तस्यावदाने, कथं प्रतिपाद्येतेति । प्रतिपत्तिश्च विविक्तकरणेन उपकरोति । तस्य विविक्तकरणाय प्रतिपाद्यमानस्य नियमोऽयं ‘स्विष्टकृद्धोमेन प्रतिपादयितव्यः’ (इति) । तथाहि स प्रतिपादितो भवति । स यदि होमाय उद्धृतो विपद्येत, कृते विवेके न पुनर्ग्रहणं प्रयोजयेत् । प्रतिपाद्यमानश्च स्विष्टकृद्धोमेन प्रतिपादयितव्य इति । प्रतिपाद्यमानाभावात् लोप एव स्विष्टकृतः स्यात् । प्रधाने कृते शिष्टं सर्वशेषकार्यसाधारणम् । तत्र एकस्य उद्धृते शिष्टमन्यत्र प्रतिपादनीयम् ।

टुप्––(पूर्वपक्षमाक्षिपति–) स्विष्टकृत् अग्निप्रयुक्तस्य (अन्यप्रयुक्तस्य इति आनन्दाश्रमीये पाठः । द्रव्यस्य–) ग्राहकः । एवं चेत् संनिहितं परकीयं ग्रहीष्यति (अतः नाशे लोप एव सिद्ध इति) किमतः (अधिकरणकृत्यम् ?) उच्यते । यदि प्रयोजकः स्यात् (ततः) यादृशं प्रयुक्तम्, तादृशस्याभावात् न पुनः शिष्टादवदेयं (स्यात्) । यत् पुनर्द्रव्यं संस्कार्यम्, तस्य (कस्मिंश्चिदंशे विनष्टेऽपि शिष्टस्य) विद्यमानत्वात् पुनरवदानेन संस्कारः किमिति न क्रियते ? न चात्र अवयवी उपलक्षणार्थः (स्विष्टकृदवदानोपलक्षणार्थः इत्यर्थः) । किं तर्हि ? संस्क्रियतेऽसौ इति । एवं प्राप्ते, ब्रूमः । विशिष्टो देशः (सकलपुरोडाशोत्तरार्धावयवरूपः, स्विष्टकृद्यागस्य) संस्कार्यत्वेन अपेक्षितः । तस्य (च देशस्य) अभावात् कः प्रतिपत्तिं प्रयुञ्जीत ? अपूर्वमिति चेत्, तन्न, द्रव्यप्रतिपादनानुनिष्पादि (एव) अत्र अपूर्वम् । अतस्तत् (स्वयम्) अप्रयोजकम् । द्रव्यप्रतिपत्तिरत्र चिकीर्षिता (प्रयोजिका) न तु यागनिर्वृत्तिरिति । (इदं च स्विष्टकृतो लोपविधानं न्यायप्राप्तमुक्तम् । वचनात्तु तस्य आज्येन समापनमिष्टमेव । इडाऽऽदीनामेव तु लोपः) ।

सोम— पूर्ववदिह नास्ति अवदेयाभावः, येन पुनरवदानं न भवेत् इति प्रत्यवस्थानात् संगतिः । सूत्रार्थस्तु– पुनरवदानव्यावृत्त्यर्थः अपिवाशब्दः । लोपशब्दश्चापि अध्याहार्यः । तथा च शेषभाजां स्वार्थावत्तनाशे नावदानम्, किन्तु लोपः स्यात् प्रतिपत्तिरूपविशिष्टप्रयोजनकारणकत्वात् तदनुष्ठानस्य प्रतिपाद्याभावे प्रतिपत्त्यभावादिति ।

वि––‘इडाद्यर्थस्य नाशेऽन्यः शेषाद् ग्राह्यो न वा, ऽग्रिमः । शेषसत्त्वा, न्न शेषेऽन्यप्रतिपत्त्यवरोधनात् ॥’

भाट्ट––यत्र तु त्यागांशयुक्तानि शेषकार्याणि यथा स्विष्टकृदादौ, तत्रोत्तरार्धादिनाशे उत्तरार्धान्तराभावात् अवशिष्टस्य प्रतिपत्त्यन्तरगृहीतत्वाच्च न तावच्छेषेण करणम् । नापि हविरन्तरोत्पत्तिः, अप्रयोजकत्वात् । किन्तु आज्येनैव समापनम् । उक्तवचनस्य श्रुतद्रव्यनाशे द्रव्यापेक्षामात्रेणैव प्रवृत्तेः । याज्ञिकमते तु ‘यदि प्रत्तदेवतम्, आज्येन शेषं संस्थापयेत्’ इत्यापस्तम्बवचनादवधेयम् । अविशेषप्रवृत्तमपीदं अपेक्षानुरोधात् स्विष्टकृत्परमेव । अतस्त्यागांशाभावादिडादेर्लोपः एव । इदं चोत्तरार्धत्वादिना अनेकप्रतिपत्तिविधाने । शेषत्वेन अनेकप्रतिपत्ति-

विधाने तु शेषैकदेशविनाशेऽपि अवशिष्टेनैव अवयवशः सर्वप्रतिपत्तिकरणमिति ध्येयम् ।

मण्डन--‘ शेषक्रिया नास्ति तु शेषनाशे । ’

शंकर--‘ एवं शेषावत्तनाशे । ’ शेषकार्यलोपः ।

* **दर्शपूर्णमासादिषु** आग्नेयादीनां समुदितानां एकस्वर्गफलकत्वम् । तन्त्रन्यायः । भा. ११।१।१।१-४. * दर्शपूर्णमासादिषु जुह्वादिपात्राणां पर्णतादिविधावपि उलूखलादिपात्रेषु वारणवैकङ्कतत्वविध्यविरोधः । सु. पृ. १०६२. * दर्शपूर्णमासादिषु वैदिकीतिकर्तव्यता । भा. ७।४।१।१.

* **दर्शपूर्णमासादिप्रकरणे** विधिसंनिधौ श्रुतानां देशकालनिमित्तफलसंस्काराणां न कर्मभेदकत्वम् । वि. २।३।१३. * **दर्शपूर्णमासादिवाक्यस्य** श्रुतिस्मृत्याचारपर्यन्ताङ्गप्रापकसर्वप्रमाणसहितस्यैव साङ्गप्रधानप्रयोगविधायित्वम् । सु. पृ. ११८६. * **दर्शपूर्णमासादिसंबद्धफलनियमकर्तृसमुदायस्य** सौर्यादिषु नातिदेशः । भा. ८।१।१३।२०-२२. * **दर्शपूर्णमासादिसर्वयज्ञार्थं** आधाने श्रुतं वैकङ्कतादिपात्रम् । वि. ३।१।१२.

* **दर्शपूर्णमासारम्भत्वप्रसिद्धिः** याज्ञिकानां अग्न्यन्वाधानादिरूपे प्रथमपदार्थे । भाट्ट. ९।१।११ पृ. ६७.

* **दर्शपूर्णमासावृत्तावपि** अन्वारम्भणीयायाः आदौ सकृदेवानुष्ठानम् । भा. ९।१।१०।३४-३५.

* **दर्शपूर्णमासेतिकर्तव्यतायाः** अविहितेतिकर्तव्यताकेषु सौर्यादिषु अतिदेशः । भा. ७।४।१।१.

* **दर्शपूर्णमासेष्टिः** मूलप्रकृतिः । वि. ८।१।३ वर्णकं २.

* **दर्शपूर्णमासोत्तरमेव** सोमविकारा गवादयः एकाहा भवन्ति न प्रागपि । भा. ५।४।९।२६, * दर्शपूर्णमासोत्तरं ज्योतिष्टोमः अनुष्ठेयः । ४।३।१५।३७.

* **दर्शपूर्णमासोपकाराय** वदतो यदनृतं प्रसज्यते तत्प्रतिषेधो विधीयते । ततश्च यावत् कर्मार्थः संवादः तत्र सर्वत्र अनृतं वर्जनीयम् । वा. ३।४।४।१३ पृ. ९४१.

* **दर्शपूर्णमासकर्मणि** यजमानः उत्सर्गमात्रं कुर्यात् , शेषस्य अन्य एव कर्ता अध्वर्य्वादिः । के. ३।७।८।१८-२०.

* **दर्शपूर्णमासकालत्वात्** प्रायेण यागानाम् । भा. ७।१।१।२ पृ. १५२८.

* **दर्शपूर्णमासगतं** बर्हिः यूपावटस्तरणबर्हिषो न प्रकृतिः । न च धर्मातिदेशः । वि. ७।३।७. * **दर्शपूर्णमासगतयोः** हविरभिमर्शनकरणमन्त्रयोश्चातुर्होतृपञ्चहोत्रोः सौर्ययागे विकल्पः । भा. ८।१।१५।२६.

* **दर्शपूर्णमासगताग्नेयद्रव्यस्य** विकल्पेन सौर्ये चरौ अतिदेशः । भा. ८।१।१५।२६. * **दर्शपूर्णमासगताग्नेयविध्यन्तस्य** एकदेवताकौषधद्रव्यकविकृतिषु अतिदेशः, द्विदैवत्ये तु अग्नीषोमीयादेरतिदेशः, आज्यद्रव्यके च उपांशुयाजस्यातिदेशः । वि. ८।१।१६. * **दर्शपूर्णमासगताज्यनाम्ना** पशुगतयूपसंबन्धिनि अञ्जनाज्ये धर्माणां नातिदेशः । भा. ७।३।७।१८, * **दर्शपूर्णमासगतेडानिगदे** यज्ञपतिशब्दस्य विकृतौ नोहः । ९।१।१३।४०, * **दर्शपूर्णमासगतनिर्वापमन्त्रस्थाग्निशब्दस्य** विकृतौ ऊहः । ९।१।१३।३८, * दर्शपूर्णमासगतनिर्वापमन्त्रस्थसवित्रादिपदानां विकृतौ नोहः । ९।१।११।३६-३७, * दर्शपूर्णमासगतपार्वणहोमयोः विकृतौ नातिदेशः । ९।२।१८।५१-५६. * **दर्शपूर्णमासगतपुरुषार्थगोदोहनादेः** सौर्यादौ नातिदेशः । क्रत्वङ्गमेव हि अतिदिश्यते । वि. ८।१।१४. * **दर्शपूर्णमासगतपेषणमन्त्रे** धान्यशब्दस्य विकृतौ शाक्त्यानामयने ‘ मांसमसि ’ इति ऊहः । भा. ९।१।१२।३८-३९ वर्णकं २, * **दर्शपूर्णमासगतप्रणयनस्य** (अग्निप्रणयनस्य) चातुर्मास्यगतप्रणयने (द्वयोः प्रणयन्ति) अतिदेशः, न सौमिकस्य इति भाष्यमतम् । न दार्शिकम् , न सौमिकं किंतु अपूर्वमेवेति वार्तिकमतम् । ७।३।८।१९-२२ । इदं च प्रणयनं मध्यमयोरेव पर्वणोः । ७।३।९।२३-२५, * **दर्शपूर्णमासगतसांनाय्यविकारः** अग्नीषोमीयः पशुः । ८।२।२।१०-१४ । तत्रापि पयोविकारो न दधिविकारः । ८।२।३।१५-१८, * **दर्शपूर्णमासगतसांनाय्यविकाराणां** अग्नीषोमीयपुरोडाशविकाराणां च सोमोत्तरकालता । ५।४।८।२५.

* **दर्शपूर्णमासचातुर्मास्यादिषु** आग्नेयादिप्रधानानां एकदेशकालकर्तृकत्वम् । भा. ११।२।१।१, * दर्शपूर्णमास-

चातुर्मास्यादिषु तत्तद्व्याप्यप्रयोगानुरोधेनाङ्गानामावृत्तिः। इष्टिराजसूयाधिकरणम्। ११।२।३।१२–१८.

* दर्शपूर्णमासतन्त्रगतान्यतमदेवताकत्वनियमः उपांशुयाजस्य। भा. १०।८।१६।४९–५०.

* दर्शपूर्णमासधर्माणां ऐन्द्राग्नादिविकृतौ अतिदेशः। भा. ८।१।४।११, * दर्शपूर्णमासधर्मातिदेशः सोमे नास्ति। ८।१।३।३–१०.

दर्शपूर्णमासन्यायः। दर्शपूर्णमासौ ज्योतिष्टोमश्च सर्वकामार्थाः॥

सार्वकाम्यमङ्गकामैः प्रकरणात्। ४।३।१०। २५॥

भाष्यम्— इदमाम्नायते ‘एकस्मै वा अन्या इष्टयः कामायाह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ, एकस्मै वा अन्ये क्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः’ इति। तत्र संदेहः किमङ्गकामैः अङ्गाङ्गकामैश्च सह अस्यानुवादः, अथवा विधिरिति। किं प्राप्तम्? अनुवाद इति। यदेतत् सार्वकाम्यम्, तदनूद्यते। अङ्गकामैश्च अङ्गाङ्गकामैश्च सह। सन्ति हि अङ्गकामाश्च अङ्गाङ्गकामाश्च। यथा ‘आहार्यपुरीषां पशुकामस्य वेदिं कुर्यात्, खननपुरीषां प्रतिष्ठाकामस्य’ इत्येवमादयः। तथा, ‘यदि कामयेत वर्षेत् पर्जन्य इति नीचैः सदो मिनुयात्’ इति। तद्विहितमेवेदं अभिधीयते इत्यनुवादं न्याय्यं मन्यामहे।

टुप्— ‘सर्वेभ्यो ज्योतिष्टोमः’ इति विधायकाभावात् साधनत्वाभावः। तस्मादङ्गाङ्गकामानपेक्ष्य सर्वेभ्यो ज्योतिष्टोम इत्यनुवादः।

फलोपदेशो वा, प्रधानशब्दसंप्रयोगात्। २६॥

भाष्यम्— फलविधिर्वा। कुतः? प्रधानशब्देन फलसंयोगो भवति। सर्वेभ्यो दर्शपूर्णमासौ, सर्वेभ्यो ज्योतिष्टोमः इति च। प्रधानाभिधानेन च प्रधानस्य सर्वफलवत्ता विहिता। तस्मान्नानुवादः। अथ अङ्गकामान् अङ्गाङ्गकामांश्चापेक्षते, तथा लक्षणाशब्दः स्यात्। श्रुतिश्च लक्षणाया गरीयसी। तस्मात्प्रयोगवचनेन विधिरिति।

टुप्— प्रधानेभ्यः फलं श्रुतम्। अङ्गानि अङ्गाङ्गानि च लक्षणया गम्येरन्। श्रुतिश्च बलीयसी। न चायं कस्यचिद्विधेः शेषः, येन अर्थवादत्वादनूद्येत। तस्मादत्रोत्पत्तिप्रयोगवचनार्थवादाध्याहाराणामन्यतरतो विधिः। किं कर्मसाध्यान् कामानपेक्ष्य सर्वकामता, उत यावन्तः केचन कामा इति। अविशेषात् यावन्तः कामा इति। अन्ये क्रतवः एकफलसाधनकाः, अयं तु क्रतुः सर्वाणीति क्रतुंगतानि फलान्यपेक्ष्य सर्वतेति चेत्, तन्न। ज्योतिष्टोमस्य सर्वफलेभ्यो विधीयमानस्य अर्थवादोऽयम्। तस्मान्नियतफलताया नास्ति प्रमाणम्। उच्यते। यत्रयत्र कामशब्दो हिरण्यकामः पुत्रकाम इति, तेष्वेवास्य साधनता। कुतः? तेषु हि कामशब्दमुच्चारयन्ति, नेतरत्र। उपलब्धपूर्वे हि प्रियं भवतीति। सर्वज्ञता च न कदाचिदुपलब्धा। तस्मात्तत्र कामस्य अप्रवृत्तिः। तेन ये एव वेदे कामशब्दा उच्चारिताः, तेऽनुषज्यन्ते।

शा— ‘सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ’ इत्यनुवादो दर्शपूर्णमासस्तुत्यर्थः इति प्राप्ते, ब्रूमः। ‘**षष्ठी संबन्धमात्रेऽपि वर्तमाना न दुष्यति। तादर्थ्ये च चतुर्थ्यर्थस्तच्च प्राप्तं न केनचित्॥ स्यात् प्रधानफलार्थत्वमङ्गानां तदनुग्रहात्। न त्वङ्गफलशेषत्वं प्रधानस्य कथंचन॥ सर्वकामार्थता तस्मादप्राप्तेह विधीयते। कर्तव्याविति चाहार्यं विधिभावनयोः पदम्॥ उत्पत्तिचोदनाभ्यो वा प्रसिद्धे विधिभावने। आश्रित्य फलसंबन्धमात्रमत्रोपदिश्यते॥**’ तस्मात् फलविधिः।

सोम— पूर्ववत् इहापि नानेकफलार्थत्वं इति प्रत्यवस्थानात् संगतिः।

वि— ‘दर्शादिः सर्वकामेभ्योऽनुवादो वा फले विधिः।, अङ्गोपाङ्गोदितः कामो विध्यभावादनूद्यते॥, उत्पत्तिचोदनासिद्धे आश्रित्य विधिभावने। फलसंयोगबोधेन भवेदेष फले विधिः॥’

भाट्ट— ‘एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः, एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते सर्वेभ्यो दर्शपूर्णमासौ’ इति श्रुताभ्यां वचनाभ्यां संयोगपृथक्त्वन्यायेन सर्वफलार्थत्वम्, न तु तत्तत्प्रकरणस्थगुणकामानामपि दर्शादिप्रयोज्यत्वात्। तदभिप्रायेणानुवादत्वं वैयर्थ्यात्, औपचारिकत्वाङ्गीकारे तादर्थ्यस्य प्रमाणाभावाच्च। अतः अप्राप्तार्थकत्वादेव विधि-

भावनावाचिपदाध्याहारेण सर्वफलार्थत्वेन विनियोगः । न चैवं स्वर्गार्थत्वबोधकविधिवैयर्थ्यम्, गोबलीवर्दन्यायेन भिन्नविषयकत्वकल्पनया अभ्युदयशिरस्कत्वोपपत्तेः ।

अत्र चाविशेषात्सर्वाणि फलानि ज्ञेयानि । न तु अर्थवादगतान्यशब्दस्य सदृशवाचित्वात् ज्योतिष्टोमदर्शपूर्णमाससदृशसोमयागान्तरेष्टयन्तरजन्यफलमात्रपरः तत्रतत्र यथायोगं सर्वशब्दः, अर्थवादस्य स्तुत्यर्थत्वेनैवोपपत्तौ हारियोजनगतसर्वशब्दन्यायेन संकोचकत्वानुपपत्तेः । अत एव सर्वशब्दस्य सर्वनामत्वात् वैदिकफलमात्रपरत्वमपि नाशङ्क्यम्, वैदिकानामपि पूर्वमनुपस्थितत्वात् । कथञ्चिदुपस्थितेर्लौकिकेष्वपि अविशेषाच्च । यानि तु शशविषाणप्राप्त्यादीनि प्रमाणेन केनापि अप्रसिद्धानि तेषां न सर्वशब्देन ग्रहणम् । यत्तु अतीन्द्रियार्थापरोक्षज्ञातृत्वलक्षणसार्वज्ञ्यादेरपि न सर्वशब्देन ग्रहणम्, तस्य लोकवेदयोः क्वचिदपि उपायान्तरजन्यत्वादर्शनादित्युक्तं तन्त्रसारतन्त्ररत्नादौ, तत् ‘प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्, भुवनज्ञानं सूर्ये संयमात्’ इत्यादिपातञ्जले ‘चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि । मां तत्र मनसा ध्यायन् विश्वं पश्यति चक्षुषा ॥’ इत्यादिपुराणेषु च सिद्धिमात्रे योगधारणाविशेषस्य साधनत्वेन उक्तत्वादुपेक्षितम्, निरतिशयसार्वज्ञ्यस्य अजन्यत्वेऽपि भुवनज्ञानादेः संभवेन ग्रहणोपपत्तेः । न चैवं मन्वादीनामपि सर्वज्ञत्वोपपत्तेः स्मृतीनां वेदमूलकत्वानापत्तिः, अष्टकास्वर्गसाधनत्वस्य प्रमाणान्तरेण असिद्धौ योगेनापि द्रष्टुमशक्यत्वात् ।

मण्डन— ‘सर्वकामविधिर्भवेत् ।’

शंकर— ‘दर्शादि सर्वकामार्थम् ।’

* **दर्शपूर्णमासपदं** विद्वद्वाक्यद्वयसिद्धसमुदायद्वयपरं प्रसिद्धार्थकम्, न च तदाख्यातपरतन्त्रम् । (विद्वद्वाक्यं च ‘य एवं विद्वान् दर्शपूर्णमासाभ्यां यजते’ इत्यादि)। **मीन्या.** * **दर्शपूर्णमासपदवत्**, यथा दर्शपूर्णमासपदं यागषट्कस्यावच्छेदकं तथा ज्योतिष्टोमपदं ज्योतीरूपत्रिवृदादिस्तोमचतुष्टयस्यावच्छेदकम् (पूर्वपक्षे स्थित्वा)। भाट्ट. ४।४।१२.

* **दर्शपूर्णमासपुरोडाशधर्मातिदेशः** सौत्रामणीगतसुराग्रहेषु । भा. ८।२।१।१–९.

* **दर्शपूर्णमासप्रकरणं** असंदंशोद्भूतिकं महाप्रकरणम् । बाल. पृ. ९. * **दर्शपूर्णमासप्रकरणात्** पूषाद्यनुमन्त्रणादीनां उत्कर्षः । संस्कारको हि मन्त्रः सोऽसति संस्कार्येऽनर्थकः इति तत्र नायमिष्यते । भा. ३।२।१।२.

* **दर्शपूर्णमासप्रकरणे आज्यभागौ** प्रकृत्य ‘न तौ पशौ करोति न सोमे’ इति । अत्र ‘न सोमे’ इति वाक्यं ‘तौ न पशौ करोति’ इत्यस्य अर्थवादः । भा. १०।८।२।५. * दर्शपूर्णमासप्रकरणे **‘आर्षेयं वृणीते’** इति वचनं यजमानप्रवरर्षिनामकीर्तनपरं न तु ऋग्विषयम् । **संकर्ष.** ३।४।१. * दर्शपूर्णमासप्रकरणे **‘निवीतं मनुष्याणाम्’** इति श्रुतं निवीतवाक्यं उपवीतविधेः अर्थवादः, न विधिः । **के.** ३।४।१।१–९. * दर्शपूर्णमासप्रकरणे **पिण्डपितृयज्ञे** ‘यत् परुषि दितं तद्देवानाम्, यदन्तरा तन्मनुष्याणाम्, यत् समूलं तत् पितॄणाम्’ इति श्रुतम् । अत्र परुषि दितम्, यदन्तरा इत्यनुवादः समूलत्वस्तुतये । समूलत्वं तु विधीयते । **वि.** ३।४।७. * दर्शपूर्णमासप्रकरणे **पूषाद्यनुमन्त्रणानि** असंबद्धान्यपि न पुरस्तात् प्रकरणं विच्छिन्दन्ति । वा. ३।१।११।२१ पृ. ७३३. * दर्शपूर्णमासप्रकरणे **‘पौर्णमास्यां यजेत’** इत्यादिना कालसंबन्धो विधीयते न कर्मान्तरम् । **वि.** २।३।१३, * दर्शपूर्णमासप्रकरणे **‘शेषं स्विष्टकृते समवद्यति’** इति संस्कारसंबन्धस्य विधिः न कर्मान्तरस्य । २।३।१३, * दर्शपूर्णमासप्रकरणे **श्रुतं** निवीतप्राचीनावीतवाक्यं उपवीतविधेरर्थवादः । निवीताधिकरणम् । ३।४।१, * दर्शपूर्णमासप्रकरणे श्रुतः अनृतवदननिषेधः क्रत्वर्थत्वेन विधीयते । ३।४।८. * दर्शपूर्णमासप्रकरणे श्रुतः ‘मयि दक्षक्रतू’ इतिमन्त्रपाठः क्रतुयुक्तजञ्जभ्यमानपुरुषसंस्कारः, न केवलपुरुषार्थः । जञ्जभ्यमानाधिकरणम् । भा. ३।४।५।१४–१६. * दर्शपूर्णमासप्रकरणे श्रुतः ‘यो विदग्धः स नैर्ऋतः’ इत्यादिः ‘अविदहता श्रपयितव्यः’ इत्यस्य विधेरर्थवादः । परुषिदिताधिकरणम् । **के.** ३।४।३ (वि. ७) । ११, * दर्शपूर्णमासप्रकरणे श्रुतस्य

अवगोरणनिषेधस्य केवलपुरुषार्थतया प्रकरणादुत्कर्षः । ३।४।६।१७. * दर्शपूर्णमासप्रकरणे श्रुतस्य पौष्णपेषणस्य पूषैकदेवत्ये निवेशः, न तु द्विदेवत्ये । भा. ३।३।१५।३९–४६, * दर्शपूर्णमासप्रकरणे श्रुतस्य पौष्णपेषणस्य पौष्णे चरावेव निवेशः । ३।३।१४।३५–३८, * दर्शपूर्णमासप्रकरणे श्रुतस्य पौष्णपेषणस्य पौष्णे यागे उत्कर्षः । पौष्णपेषणाधिकरणम् । ३।३।१३।३४, * दर्शपूर्णमासप्रकरणे श्रुतस्य मलवद्वासःसंवादनिषेधस्य केवलपुरुषार्थतया प्रकरणादुत्कर्षः । संवादाधिकरणम् । ३।४।७।१८–१९, * दर्शपूर्णमासप्रकरणे **श्रुतायाः** जाघन्याः नान्यत्रोत्कर्षः । पत्नीसंयाजन्यायः । जाघनीन्यायः । ३।३।१०।२०–२३. * दर्शपूर्णमासप्रकरणे ‘ **संस्थाप्य** पौर्णमासीं वैमृधमनुनिर्वपति ’ वैमृधः पौर्णमास्यङ्गम्, न तु दर्शपूर्णमासोभयाङ्गम् । वि. ४।३।१४. * दर्शपूर्णमासप्रकरणे हविषामभिवासनादूर्ध्वं वेदिकरणमाम्नातम् । भा. १२।१।१८।३९. * **दर्शपूर्णमासप्रकरणपठितानामपि** प्रयाजानां अवान्तरप्रकरणं अतिक्रमाधिकरणे व्युत्पादयिष्यते । सु. पृ. ७६४.

* **दर्शपूर्णमासप्रकृतीनि** दीक्षणीयादीनि । भा. ४।३।१५।३७.

* **दर्शपूर्णमासप्रक्रमसमाप्ती** प्रतिमासम् । वा. २।४।१।३ पृ. ६२७.

* **दर्शपूर्णमासप्रयुक्तो** न भवति पवमानेष्टिसंस्कारः किन्तु अग्निप्रयुक्तः । भा. ३।६।६।१७.

* **दर्शपूर्णमासप्रयोगे** यावज्जीविके प्रयाजादीतिकर्तव्यता भवति इत्युक्तम् (६।३।१।२) । वा. ९।१।११।३४.

* **दर्शपूर्णमासप्रवृत्त्युत्तरं** निर्वापात् प्राक् चन्द्रोदयेऽपि अभ्युदितेष्ट्यनुष्ठानम् । भा. ६।५।३।१२–१६.

दर्शपूर्णमासयागस्य परेद्युरनुष्ठानेऽपि दिवैव अनुष्ठानम् ॥

परेद्युरपि रात्रावेव यागः कार्यः । ‘तस्मात् सदृशीनां रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्ते’ इति श्रुतौ रात्रीणामिति निर्धारणषष्ठ्या ‘ब्राह्मणानां मध्ये यज्ञदत्तः सुरूपः’ इति वाक्येन यज्ञदत्ते ब्राह्मणत्वस्येव पौर्णमास्यादेः रात्रित्वस्य अवगमात् । ‘दर्शाद्दृष्टेत्यनुवाके’ पौर्णमासीदर्शपदयोः रात्रिनामत्वोक्तेश्च । इति प्राप्ते, दिवसे एव यागः कर्तव्यः ‘प्रातर्यजध्वम्’ इति श्रुत्या ‘पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥’ इति वृद्धशातातपविवृताया ‘उत्तरमहः’ इति श्रुतेरुपसंहारात् । शुक्लप्रतिपद्वाचकस्य दर्शापदस्य इहानुपयोगाच्च । तन्त्रप्रक्रमस्य रात्रावपि कदाचित् संभवाभिप्रायेण रात्रीणामिति श्रुतेरुपपत्तेः । रात्रिशब्दस्य ‘द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत’ ‘दशरात्रमाशौचम्’ इत्यादौ अहोरात्रपरत्वदर्शनाच्च । यत्तु भाष्ये ‘पुण्याहे दैवानि कर्माणि’ ‘ते वा एते पूते मेध्ये अहनी यजनीये उत्तरमहर्देवता यजते’ इति श्रुतिषु अह्नामेव कीर्तनमिह हेतूकृतम् । तत्तन्त्रप्रक्रमाभिप्रायेण अहोरात्रपरत्वेन च अन्यथासिद्धो रात्रिशब्द इति वदतः **सूत्रकृतो** विरुद्धम् । अहःशब्देऽपि तदुभयसंभवात् । संकर्ष. ३।१।३.

* **दर्शपूर्णमासविकारो** हि साकंप्रस्थायीयः । भा. ३।५।२।१३. * **दर्शपूर्णमासविकाराणां** पशूनां अग्नीषोमीयः पशुः प्रकृतिः प्राणिद्रव्यकत्वसामान्यात् । के. * **दर्शपूर्णमासविकारेषु** यजमानमन्त्राणामतिदेशः । संकर्ष. २।२।४.

* **दर्शपूर्णमासविकृतीनां** काम्येष्टिव्यतिरिक्तानां साङ्गानां चोदकप्राप्तमन्त्रादिस्वरत्रयम्, काम्येष्टीनां तु काम्यशब्दवाच्ये प्रधाने ‘यज्ञाथर्वणं वै’ इत्यादिना विशेषवचनेन उपांशुत्वविधानात् अङ्गमात्रे स्वरत्रयं युक्तम् । सु. पृ. ११७८, * **दर्शपूर्णमासविकृतिषु** वर्णत्रयस्यापि सामिधेनीसाप्तदश्यम् । वि. ६।६।७. * दर्शपूर्णमासविकृतिषु सौर्यादिषु आरम्भणीयायाः पुनरनुष्ठानम् । आरम्भणीयायाः इत्यत्राधिकरणम् । भा. १२।२।६।१९–२१.

* **दर्शपूर्णमासविध्यन्तः** अग्नीषोमीयपशौ ग्राह्यः ‘आग्नेयमष्टाकपालम्’, ‘अग्नीषोमीयं पशुम्’ इति व्यक्तद्रव्यदेवत्वम् ‘एकादश प्रयाजान् यजति’ इति प्रयाजवत्त्वम्, ‘स्रुच्यमाघार्य’ इत्याघारवत्त्वम्, ‘जुह्वा पशुमनक्ति’ इत्यञ्जनम्, ‘ईषामालभते’ इत्यालम्भः इति

लिङ्गेभ्यः पशोर्विकृतित्वसिद्धेः । वि. ८।१।५, * दर्शपूर्णमासविध्यन्तस्य सौर्ये अतिदेशः । ८।१।२.

* दर्शपूर्णमासशब्दो लोके कालवाचकः प्रसिद्धो न यागवाचकः । यजिसामानाधिकरण्यात् यागवचनो भवेत् । टुप्. ९।१।१।१ पृ. १६३९. * दर्शपूर्णमासशब्दौ कालवाचिनौ सन्तौ कालसंयोगेन विहितानामेव आग्नेयादीनां षण्णां यागानां नामधेयतां प्रतिपद्येते । वि. ४।४।११.

दर्शपूर्णमासशब्दौ सूर्याचन्द्रमसोः संनिकर्षविप्रकर्षवचनौ ॥

यदा पौर्णमास्यमावास्या च अहन्येव खण्डा सती समाप्यते तदा तत्पूर्वेद्युरेव पर्वणोरहोरात्रव्याप्तिसत्त्वात् पौर्णमास्यमावास्याशब्दयोः अहोरात्रव्यापककालवाचित्वात् 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिवचनेन तत्रैव दर्शपूर्णमासयोरनुष्ठानम् । इति प्राप्ते, सूर्याचन्द्रमसोः विप्रकर्षसंनिकर्षोभयस्यैव तत्तत्पदप्रवृत्तिनिमित्तत्वात् तस्य च परदिने एव लाभात् परेद्युरेवानुष्ठानम् । पूर्णो मासो यस्मिन्काले स पूर्णमासः, तत्पूर्तिश्च पौर्णमास्यन्त्यक्षणे । तदैव पुष्पवन्तयोरतीव विप्रकर्षः । अमा सह समीपे वा वसतः तौ यस्मिन् काले, सा अमावास्या । तत्संनिकर्षोऽपि तदन्त्यक्षणे एवातिशयित इत्यसंकुचितवृत्तिकयोः पदयोस्तत्रैव प्रवृत्तिः । सौत्रं तत्संयोगादिति पदं यौगिकवृत्त्या तथैव प्रतीतेरित्येतत्परम् । 'संधौ यजेत' इति श्रुत्यन्तरे तस्यैव कालस्य विनियोगेन उपसंहारादिति वा अर्थः । 'विक्रमः संनिपाततश्च यागकालः' इति शिष्टाः स्मरन्ति इति भाष्यं न शिष्टाचारस्मृत्यन्तरपरम् । अपितु अमावास्याऽऽदिपदनिर्वचनपरम् । तथैव निर्वचनस्य स्मृतिषु अपि उपलम्भात् इति भावः । संकर्ष. ३।१।१.

* दर्शपूर्णमासशब्दस्य यागवचनत्वात् । भा. ११।१।१।३.

* दर्शपूर्णमासस्थसूक्तवाकगतयजमानशब्दस्यानेककर्तृकविकृतौ ऊहः । भा. ९।१।१४।४१.

* दर्शपूर्णमासहविषो विकारः सुरावाजिने । औषधविकृतिः सुरा, सांनाय्यविकृतं वाजिनम् । भा. ८।२।१।५.

* दर्शशब्दस्य अप्रसिद्धार्थत्वात् पूर्णमासशब्दवच्च केनचित् यागनाम्ना सारूप्याभावात् कथं यागविशेषे निवेश इत्याशङ्क्य आरम्भणीयाख्यशेषे 'दर्शो वा एतयोः पूर्वः, पूर्णमास उत्तरः, अथ यत् पूर्णमासं पूर्वमारभते तद् यथापूर्वं क्रियते तस्मात् पूर्णमासमारभमाणः सरस्वत्यै चरुं निर्वपेत्, सरस्वते द्वादशकपालम्, अमावास्या वै सरस्वती पूर्णमासः सरस्वान्, उभावेतौ यथापूर्वं कल्पयित्वा आरभते' इति अमावास्याख्ययागविशेषस्य दर्शव्यपदेशात् चन्द्रदर्शनात् अमावास्यायां तिथौ दर्शव्यपदेशात् (चन्द्रादर्शनाद्वा अमावास्यायां तिथौ विपरीतलक्षणया दर्शव्यपदेशात्) 'प्रतिपद्दर्शषष्ठीषु न कुर्याद्दन्तधानम्' इत्यादौ च अमावास्यायां दर्शव्यपदेशात् प्रसिद्धार्थता । सु. पृ. ७२३, * दर्शशब्दस्य विरुद्धलक्षणया दर्शनविपर्ययात् अदर्शनगमकत्वात् स्पष्टा अमावास्याविषयत्वप्रतिपत्तिः । पृ. ७३२.

* दर्शनं यदुपदिष्टं 'स सत्रस्य प्रत्येता' इति, न तत् दर्शनम्, किं तर्हि वचनं तत् । प्राप्तिपूर्वकं हि दर्शनं भवति । भा. १२।४।१४।४१, * सर्वत्र नो दर्शनं प्रमाणम् । १।१।५।५ पृ. ४४. * दर्शनाद् विनियोगः स्यात् । (१।३।८।१७) त्र्यार्षेयपञ्चार्षेय गोत्रव्यवस्थया शिखाकल्पव्यवस्थायाः दर्शनात् गोत्रविशेषवाच्युपपदानुमानेन कर्तृविशेषस्य विनियोगः स्यात् । सु. पृ. २५१. * दर्शनादर्शनयोश्च दर्शनं प्रमाणम् । भा. १०।७।११।३६.

* दश घटाः कर्तव्या इतिवत् उत्पत्तिलक्षणक्रियाऽवच्छेदात् संख्याऽन्वयो वाच्यः । सोम. ५।३।१. * 'दश दाडिमानि षडपूपाः' इति अनुपपन्नार्थमपि हि लौकिकं वचनं दृष्टम् । लोके चानुपपन्नार्थमेव किंचित् दृष्ट्वा शास्त्रं तन्नियमाय प्रवृत्तम् । बृहती. पृ. १२३. * 'दशभिः क्रीणाति' इति वचनस्य क्रयसमुच्चयपरत्वम् । भाट्ट. ३।१।६.

* दशतयशब्देन शाकलसंहिताया 'दश' मण्डलानि उच्यन्ते । सु. पृ. ११२१.

⌛ दशत्वं लिङ्गदर्शनात् । ३।७।१२।२७॥

ज्योतिष्टोमे चमसाध्वर्यवो बहवः इति प्रागुक्तम् । किमात्मकं तत् बहुत्वं इति विचारे, कपिञ्जलाधिकरणन्यायेन त्रित्वरूपं बहुत्वं इति उत्सूत्रे पूर्वपक्षे प्राप्ते सिद्धान्तमाह । उक्तं चमसाध्वर्यूणां बहुत्वं दशत्वं दशत्वरूपं ग्राह्यम् । कुतः ? लिङ्गदर्शनात् । ज्योतिष्टोमविकारे दशपेये ‘ दशदश एकैकं चमसमनुप्रसर्पन्ति ’ इति ब्रुवन् दश चमसाध्वर्यून् दर्शयति । स्वामिनां ऋत्विजां दशत्वं च लिङ्गम् । होता, ब्रह्मा, उद्गाता, यजमानश्चेति चत्वारो मध्यतः कारिणः, प्रशास्ता, ब्राह्मणाच्छंसी, पोता नेष्टा, अच्छावाकः, आग्नीध्रश्चेति षट् होत्रकाः इति दशानां चमसाध्वर्यवोऽपि दश इति युक्तम् । तस्मात् चमसाध्वर्यवो दश ।

अत्र सुधा— एकस्यापि ग्रामभृत्यवत् अनेकस्वाम्यन्वयाविरोधात् स्वामिदशत्वेऽपि त्रित्वनियमविरोधिनी चमसाध्वर्युदशता न युक्ता इत्याशङ्कायाम्, ग्रामभृत्यस्यापि अन्योन्यानपेक्षानेकस्वामित्वायोगात्, इह च मध्यतः कारिणां होत्रकाणां इति च बहुवचनावगतस्य साहित्यस्य उद्देश्यविशेषणत्वेन अविवक्षितत्वात् अन्योन्यानपेक्षस्वामिदशत्वावगतेः, तदन्यथाऽनुपपत्त्या अवगतेन दशत्वेन त्रित्वनियमस्य लिङ्गदर्शनद्योतितदशत्वापनयप्रयोजकस्य बाधितत्वात्, न दशता अपनीयते इति उत्तरं बोध्यम् । इति । के.

* **दशपेयः** ज्योतिष्टोमस्य विकृतिः । वि. ३।५।२०. * दशपेयः राजसूये अभिषेचनीयोत्तरं एकस्मिन्नेव क्रतौ । तत्रापि अभिषेचनीयस्य दशमेऽहनि दशपेयः संपद्यते । शाब्दः सोमक्रयः अभिषेचनीयसोमक्रयकाले एव । अर्थकृतस्तु स्वकाले । नानयोस्तन्त्रम् । भा. ११। २।१४।५७–६२. * दशपेयः सद्यस्कालः । ‘ सद्यो दीक्षयन्ति ’ ‘ सद्यः सोमं क्रीणन्ति ’ । वि. ११।२।१४, * दशपेयः सोमयागविशेषो राजसूयान्तर्गतः । ४।४।१, * **दशपेयस्य** संसृपाख्यदशेष्टिभ्य ऊर्ध्वमपराह्णे उपक्रमः । ११।२।१४, * दशपेयस्य सोमक्रयार्थोपसंवादमात्रं अभिषेचनीयक्रयार्थोपसंवादेन सहैव । ११।२।१४, * दशपेये एकैकश्चमसो दशभिर्दशभिः पीयते । ‘ दशदश एकैकं चमसमनुप्रसर्पन्ति ’ । ३।५।२०.

⌛ दशपेये क्रयप्रतिकर्षात् प्रतिकर्षस्ततः प्राचां तत् समानं तन्त्रं स्यात् । ११।२।१४।५७॥

राजसूये पवित्रादयः सोमयागाः । तत्र द्वितीयः सोमः अभिषेचनीयः नाम, पञ्चमः सोमः दशपेयो नाम । अनयोः अभिषेचनीयदशपेययोर्मध्ये दशपेये यः क्रयः सोमक्रयः तस्य ‘ सह सोमं क्रीणाति अभिषेचनीयदशपेययोः ’ इतिवाक्येन अभिषेचनीयसोमक्रयकाले प्रतिकर्षो विहितः । तेन ततः क्रमात् प्राचां पुरस्तादङ्गानामपि प्रतिकर्षः स्यात् ‘ तदादि वाभिसंबन्धात् ’ (५। १।१२।२४) इति न्यायात् । यस्माच्च क्रयान्तानामङ्गानां प्रतिकर्षः तत् तस्मात् समासावपि समानं तन्त्रं स्यात् । अभिषेचनीयदशपेययोः क्रयान्तानामङ्गानां तन्त्रत्वात् उत्तराङ्गानामपि तन्त्रं स्यात् इति क्रयान्तानां तन्त्रत्वे तु सहक्रयविधानं हेतुः । इति पूर्वः पक्षः ।

समानवचनं तद्वत् । ५८ ॥

‘समानो वा एष यज्ञो यद्दशपेयश्चाभिषेचनीयश्च ’ इति तयोः सोमयोः समानवचनं समानत्वबोधकं वचनं भवति । समानत्वं च अङ्गानां तन्त्रेणैव संभवति प्रधानानां भिन्नत्वात् । तस्मात् तन्त्रम् । इति पूर्वपक्षे हेत्वन्तरम् ।

अप्रतिकर्षो वाऽर्थहेतुत्वात् सहत्वं विधीयते । ५९ ॥

वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अप्रतिकर्षः न क्रयस्य प्रतिकर्षः, नापि क्रयान्तानामङ्गानाम् । सहत्वं क्रयसहत्वं तु अर्थहेतुत्वात् मूल्यनिश्चयार्थम् । नायं मुख्यः सोमक्रयः । मूल्यपरिच्छेदोऽयम् । मुख्यः क्रयस्तु दशपेयकाले एव भविष्यति । तस्मात् न अभिषेचनीयदशपेययोः समानं तन्त्रम् । इति सिद्धान्तः ।

पूर्वस्मिंश्चावभृथस्य दर्शनात् । ६०॥

सिद्धान्ते हेत्वन्तरमाह । पूर्वस्मिन् अभिषेचनीये अवभृथस्य दर्शनात् अभिषेचनीयदशपेययोर्न तन्त्रम् । समानतन्त्रत्वे तु दशपेयान्ते एव एक एव अवभृथः स्यात् । ‘ समानं वा एतद्यज्ञं विच्छिन्दन्ति यदभिषेच-

नीयस्यावभृथमभ्यवयन्ति ' इति अवभृथदर्शनम् । तस्मान्न तन्त्रम् ।

दीक्षाणां चोत्तरस्य । ६१ ॥

सिद्धान्ते हेत्वन्तरम् । अभिषेचनीयदीक्षाभ्यः पृथक् उत्तरस्य दशपेयस्य दीक्षाणां दर्शनात् तयोर्न तन्त्रम् । ' तथाऽभिषेचनीयस्य दीक्षा वर्धयेयुर्यथा दशमेऽहनि दशपेयः संपद्यते ' ' सद्यो दीक्षयति, सद्यः सोमं क्रीणाति ' इति (अत्र सत्याषाढसूत्रं तु ' तथा दीक्षाः प्रवर्धयन्ति अभिषेचनीयस्य, यथा दशरात्रे शिष्टे संवत्सरस्य दशपेयो भविष्यति ' इति) तस्मान्न तन्त्रम् ।

समानः कालसामान्यात् । ६२ ॥

यत्तु ' समानवचनं तद्वत् ' इति (सू० ५८) तत्राह । यस्मिन् संवत्सरे अभिषेचनीयः तस्मादुत्तरे संवत्सरे तस्मिन्नेव ऋतौ दशपेयः । तथा च कालसामान्यात् ऋतुरूपस्य कालस्य सामान्यात् समानत्वात् अभिषेचनीयदशपेययोः ' समानो वा एष यज्ञः ' इत्यनेन समानत्वमुक्तम् । तस्मात् तन्त्रभेदः इति सिद्धान्तः । **के.**

* दशपेये राजसूयगते प्राकाशौ अध्वर्युभागस्यैव निवर्तकौ, न तु कृत्स्नस्य ऋतुदाक्षिण्यस्य (भाष्ये अश्वमेधे इत्युक्तम्) । प्राकाशन्यायः । **भा.** १०।३।१७। ६३–६४.

* दशपेयाभिषेचनीययोर्भिन्नतन्त्रता राजसूये । अभिषेचनीयदशपेययोः इत्यत्राधिकरणम् । **भा.** ११।२। १४।५७-६२.

⌛ **दशपेयन्यायः** । दशपेये यजमानचमसस्य दश ब्राह्मणा एव भक्षकाः, न राजन्याः ॥

अनुप्रसर्पिषु सामान्यात् । ३।५।२०।५२ ॥

भाष्यम्— अस्ति राजसूये दशपेयः । तत्र श्रूयते ' शतं ब्राह्मणाः सोमान् भक्षयन्ति, दशदश एकैकचमसमनुप्रसर्पन्ति ' इति । अत्र राजन्यचमसे संदेहः किं तं राजन्या अनुप्रसर्पेयुः उत ब्राह्मणा इति । किं प्राप्तम् ? राजन्या इति । कथम् ? दशदश एकैकं चमसमनुप्रसर्पेयुः इति अनुप्रसर्पतां संख्या विधीयते । एकस्यां राजन्यजातौ दशसंख्या विधीयते । राजन्यजातिः सैव । तेन तं दश राजन्याः अनुप्रसर्पेयुः । एवं शतं ब्राह्मणा राजन्याश्च । तेषु शतशब्दोऽनुवादः । अनुवादसरूपश्च शतं भक्षयन्तीति । तस्मात् राजन्या राजन्यचमसमनुप्रसर्पेयुरिति । केचिदाहुः, ' ब्राह्मणराजन्यानामेकस्मिँश्चमसे भक्षणं विरुध्यते ' इति । न स दोषः, ' नहि सोमेनोच्छिष्टा भवन्ति ' इति श्रूयते ।

वा— दशपेये (राजसूयगते सोमविशेषे) ' शतं ब्राह्मणाः सोमान् भक्षयन्ति, दशदश एकैकं चमसमनुप्रसर्पेयुः ' इति । तत्र राजन्यचमसोऽपि (यजमानचमसोऽपि इत्यर्थः) किं ब्राह्मणैरेव दशभिर्भक्षयितव्यः, उत राजन्यैः इति संदेहः । कः पुनः संदेहहेतुः ? केचिदाहुः, वचनव्यक्तिभेद इति । यदि हि ' दशदश एकैकम् ' इति विधिः, ततः तुल्यजातीयेषु सर्वत्र विहितेषु ' शतं ब्राह्मणाः ' इति यथाप्राप्तानुवादः ब्राह्मणग्रामवत् भूम्ना भवति इति राजन्या दश । अथ पुनः ' शतं ब्राह्मणाः ' इति विधिः, ' दशदश एकैकम् ' इत्यनुवादः, ततो विधौ गौणत्वासंभवात् सर्वत्र ब्राह्मणैरेव भक्षयितव्यम्, इति ब्राह्मणा दश । किं तावत् प्राप्तम् ? ' अनुप्रसर्पेयुः ' इत्यस्य विधिसामर्थ्यात्, ' भक्षयन्ति ' इति च अनुवादसामर्थ्यात् ' दशदश एकैकम् ' इति विधौ सति, ' के दश ' इत्यपेक्षायां तुल्यजातीयेषु संख्यावृत्तिस्वाभाव्यात् ब्राह्मणचमसेषु (ऋत्विक्चमसेषु) ब्राह्मणाः, राजन्यचमसे राजन्या दश इति गम्यते । ' सामान्यात् ' इति च (सूत्रे) दशसंख्यां चोदयित्वा निवृत्तव्यापारे शास्त्रे, तत्पूरणार्थं अश्रुतासु व्यक्तिषु उपादीयमानासु यासां किञ्चित् प्रत्यायकमस्ति, ता ग्रहीतव्याः । तुल्यजातीयानां च सामान्यं गमकं विद्यते, न जात्यन्तरानुगतानाम् । **अथवा** सामान्यात् इति विषयसामान्यात् । ' अर्थैकत्वे द्रव्यगुणयोः ' इति हि फलचमसं प्रति उपादीयमानयोः क्षत्रियत्वदशत्वयोः परस्परनियमे सति, यावति विषये दशत्वं तावति राजन्यत्वं इत्यवगम्यते, इति बलात् दश राजन्या विज्ञायन्ते । अथवा सामान्यात् इति तुल्यकार्यं तुल्यजातीयं च तुल्यस्य बाधकं भवति । तत् यदि राजसूयचोदनातो राजन्यत्वं प्राप्तं प्रकृतितश्चैकत्वम् । तत्र दशत्वं विधीयमानं सामान्यात् आतिदेशिकत्वाच्च एकत्वं बाधते, न जातिम्,

भिन्नकार्यत्वात् । ततश्च अनिवृत्तजातिरेव यजमानचमसो दशत्वेन योजयितव्यः इति दश राजन्या भवन्ति । ननु च दशत्वे विधीयमाने यत् एकैकं चमसमनु प्रसर्पन्ति, इति विशिष्टानुवादात् वाक्यं भिद्यते । नैष दोषः । 'चमसम्' इति द्वितीयान्तं केवलमनूद्यते, तावता तु संस्कार्यत्वं गम्यते । न च चमसानां भक्षणं मुक्त्वा अन्यः संस्कारः । तेन स एव अनुप्रसर्पणशब्देन लक्ष्यते । तत्र च प्रत्येकमेव भक्षणं प्राप्तम्, इति तदपि अनूद्यते । तस्मात् न वाक्यभेदः ।

ब्राह्मणा वा, तुल्यशब्दत्वात् । ५३ ॥

भाष्यम्— ब्राह्मणा वा राजन्यचमसमनुप्रसर्पेयुः । कथम् ? 'शतं ब्राह्मणाः सोमान् भक्षयन्ति' इति विधिः श्रुत्या ब्राह्मणगतामेव संख्यामाह । तस्मात् शतं ब्राह्मणाः । तेषां भक्षणार्थमनुप्रसर्पतां एकैकस्मिँश्चमसे दशदश उपदिश्यन्ते । तस्मात् ब्राह्मणशतस्य (मध्ये) दश ब्राह्मणाः राजन्यचमसमनुप्रसर्पेयुरिति ।

वा— न वा राजन्या भक्षयेयुः । कुतः ? **'शतब्राह्मणसंयुक्तो विधिरत्रावगम्यते । अन्यथा तदुपादानं गौणं व्यर्थं च ते भवेत् ॥'** तुल्येन ब्राह्मणशब्देन सर्वचमसेषु ब्राह्मणाः प्रतिपाद्यन्ते । तेन कुतश्चिदपि व्यावर्तयितव्याः । न च गौणत्वकारणं किञ्चिदस्ति । प्रमाणान्तरेण विस्पष्टराजन्यानुपादानात् । समस्तमेव चैतत् अनर्थकं पुनःश्रवणं भवेत् । अस्मत्पक्षे पुनः प्रयोगवचनादिभ्यो विधिशास्त्रमनुमाय ब्राह्मणशते विहिते 'दशदशमेकैकम्' इति विभागार्था पुनःश्रुतिः । अथवा 'समं स्यादश्रुतत्वात्' इति न्यायेन दशदश प्राप्ताः मुख्ययैव वृत्त्या अनुवदिष्यन्ते । ब्राह्मणशतेन च दशदशकैः अवस्थितेन दशस्वपि चमसेषु अवरुद्धेषु न कश्चित् राजन्यानामवकाशो विद्यते । तस्मात् ब्राह्मणा दश (राजन्यचमसं भक्षयेयुः) इति ।

न तु इयं व्याख्या घटते । यदि हि 'शतं ब्राह्मणाः' इत्येष विधिः स्यात्, ततः अतिदेशप्राप्तभक्षानुवादात् विशिष्टविधानासंभवेन अन्यतरत्र विधीयमाने, यदि शतं विधीयते, (तदा) 'ब्राह्मणाः' इत्यनर्थकम्, सिद्धान्तहानिश्च । ब्राह्मणविधौ तु 'शतं' इत्यनर्थकम् । अथ 'यत् शतं भक्षयन्ति' इत्यनूद्य ब्राह्मणा विधीयन्ते (तदा), केन शतं प्राप्तं इति वक्तव्यम् । अथ 'यत् ब्राह्मणा भक्षयन्ति' इत्यनूद्य शतं विधीयते, ततो राजन्यव्यावृत्त्या ब्राह्मणश्रुतेः विशेषणत्वात् विशिष्टानुवादात् वाक्यभेदः, राजन्यचमसे न च किञ्चित् कृतं स्यात् । तत्र 'एकैकम्' इत्यस्य राजन्यचमसे अनुवादासंभवात् तत्रान्ये राजन्या दश विधीयेरन् इतरत्र च ब्राह्मणशतं नवसु चमसेषु, न विद्मः केन विभागेन स्यादिति । अथ सोमसंबन्धात् 'ब्राह्मणाः' इति प्राप्तानुवादः कल्प्यते, तथापि फलचमसव्यावृत्त्या विशिष्टानुवादो दोषोऽस्त्येव, फलचमसे च पुनरपि न कश्चित् व्यापारः, इति पूर्ववदेव प्रसङ्गः । न च सोमशब्दब्राह्मणशब्दयोः अर्थान्तरेऽपि फलचमसे राजन्ये वा प्रयोगः इति किञ्चित् प्रमाणम् ।

अविशेषितभक्षानुवादे पशुपुरोडाशादिभक्षेष्वपि शतप्रसङ्गः, नहि असौ प्रधानेन विशेष्यते, 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इत्येवं अङ्गप्रधानार्थत्वप्रतीतेः, सोमशब्दश्च अत्यन्तमेव अनर्थकः स्यात् । अथ 'सोमान्' इत्येतावन्मात्रमनूद्य शतं विधीयते, ततः क्रयादारभ्य यावान् सोमसंस्कारः, स सर्वः शतेन कर्तव्यः, तत्र भक्षयतिरनर्थक एव स्यात् । अथ भक्षयतौ शतब्राह्मणसंबन्धो विधीयते, तथा पुरोडाशादिष्वपि प्रसङ्गात् सोमशब्दानर्थक्यं अस्त्येव । सोमे तु ब्राह्मणशतसंबन्धविधानं अक्रियाशब्दत्वादेव अशक्यम् । पुनरपि फलचमसे स्तिभीरूपत्वेन (स्तिभीनाम न्यग्रोधफलगुच्छः) असोमे राजन्यप्राप्तिः नैव वार्यते । तेन एतद्वाक्यमनुपपन्नम् । तथा 'दशदश एकैकम्' इत्यस्यापि अनुपहतविधिशक्तेः स्वतन्त्रविधित्वावधारितस्य अनुवादत्वं निष्फलं अप्रमाणकं च । कथं हि पूर्वेण वर्तमानापदेशः सन् विधिः स्यात्, अयं चानुवादः ? न च निमित्तत्वादिभिर्विना अनेकाख्यातैकवाक्यत्वं घटते । न च यदिशब्दादिरहितस्य निमित्तत्वादिप्रतीतिरस्ति । न च 'दशदश एकैकम्' इत्यत्र काचित् स्तुतिः प्रतीयते, येन तदर्थः अनुवादः, एकवाक्यत्वं चोपपद्येत । तस्मात् पृथग्भूतस्य वाक्यस्य समस्तानुवादत्वमयुक्तम्, इति किञ्चित् विधातव्यम् ।

तत्र यदि तावत् शतस्य अनियमप्रसङ्गे दशदश इति विधीयते, ततश्च 'एकैकं' इत्यनुपपन्नम्, (एकैकमित्यस्यापि–) विधाने वाक्यभेदप्रसक्तेः। वषट्कर्तॄणां च अनेकचमसप्राप्तौ सत्यां अनुवादत्वासंभवात् ग्रहेष्वपि पूर्वेण ('शतं ब्राह्मणाः सोमान् भक्षयन्ति' इति वाक्येन भक्षणस्य) प्राप्तत्वात् चमसशब्दः अनर्थकः, विशिंषंश्च वाक्यं भिन्द्यात्। न च 'दशदश एकैकं' इत्यनुवादः संभवति, शतस्यापि चमससंस्कारार्थं उपादीयमानस्य प्रतिचमसं सामस्त्येन प्राप्तेः। कर्तृसंस्कारार्थे हि सति दक्षिणावत् विभागप्राप्त्या 'समं स्यात्' इति 'दशदश एकैकं' इति प्राप्नुयात्। तत्र सत्यपि विधौ परिसंख्या स्यात्। अनेकस्मिन्नपि वा दशदश भक्षयितारः प्राप्नुवन्ति। एकस्मिन्नपि वा चमसे दशानांदशानां प्रसङ्गः, शतस्यैव दशदशकैर्गणैः स्थित्वा चमसे भक्षणं स्यात्।

तस्मात् वाक्यद्वयं अस्मिन् व्याख्याने अनुपपन्नम्, इति एवं व्याख्येयम्। द्वे अप्येते वाक्ये विधायके, तत्सरूपत्वात्। तत्रापि 'दशदश एकैकम्' इत्येतदेव पूर्वपक्षवत् प्रथममाश्रीयते। यथोक्तेन न्यायेन क्रमान्तरस्य अनुपपत्तेः। 'अनुप्रसर्पन्ति' इत्यनेन तावत् अतिदेशप्राप्तभक्षोपलक्षणसंबन्धात् यथा फलचमसभक्षणेन यागोपलक्षणमुक्तम्, तेन 'यत् चमसमनुप्रसर्पन्ति' इति अन्यतरस्य साकाङ्क्षत्वात् विशेषणविशेष्यभावमङ्गीकृत्य अनुवादः, 'दशदश' इति विधिः, चमसप्राधान्याच्च प्रत्येकं दशत्वभेदात् वीप्सा भवति। ततः पूर्वं 'शतं' इतरेण वाक्येन अनूद्य 'यत् शतं सोमान् भक्षयन्ति, तत् ब्राह्मणाः' इति विधिः। नहि विधिसंभवे समस्तवाक्यानुवादत्वं युक्तम्, ब्राह्मणशब्दस्य च गौणत्वम्। शतमात्रसंबन्धेन च कृतार्थत्वात् अतन्त्रमेव सोमशब्दः भक्षयतिश्च इति न विशिष्टानुवाददोषः। नापि सोमशब्दात् यागसाधनमात्रलक्षणया फलचमसप्रतिपादनेऽपि दोषः। तेन संख्यापूरणार्थं यावत् अश्रुतराजन्यकल्पना प्रक्रम्यते, तावत् ब्राह्मणश्रुत्या संख्यान्तरं विधाय नैराकाङ्क्ष्यं क्रियते। न च एवं सति ग्रहेषु प्रसङ्गः 'दशदश' इत्यस्य चमसविषयत्वात्। राज्यन्यचमसेऽपि दशकप्राप्तौ सत्यां ब्राह्मणदशकेनैव अवरोधः इति द्रव्ये संस्कृते कृतार्थत्वात् यजमानस्य नैव भक्षणेन भवितव्यम्। तस्मात् ब्राह्मणाः दश (राजन्यचमसे भक्षयितारः) इति सिद्धम्।

यत्तु **भाष्यकारेण** ब्राह्मणराजन्यानां सहभक्षणप्रतिषेधस्य 'न सोमेनोच्छिष्टा भवन्ति' इति (पूर्वपक्षग्रन्थे केचिदाहुरित्यादिना कृतायां शङ्कायाः) उत्तरं दत्तम्, तत्र केचित् चोदयन्ति 'फलचमसे सोमत्वाभावात् कथमनुच्छिष्टत्वं संभवति' इति। न तु एष दोषः, स्थानापत्त्या सोमधर्मलाभात्। वक्ष्यति हि (सूत्रकारः) 'नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्' (इति) 'धर्मस्यार्थकृतत्वात्' इति च। ननु पुरुषधर्मोऽयं अनुच्छिष्टत्वं न युक्तं स्थानापत्त्या अन्यत्र कल्पयितुम्। (उत्तरयति–) न कल्प्येत, यदि पुरुषधर्मोऽयं स्यात्। न तु अयं पुरुषधर्मः, फलकल्पनागौरवप्रसङ्गात्। सोमभक्षविषये च उच्छिष्टत्वप्रसङ्गे अनुच्छिष्टत्वमभिहितम्। स च कर्मधर्मः इति स्थितम्। अतो यथैव सोमः संस्क्रियमाणः कर्तुः उच्छिष्टतां नापादयति, एवं तत्कार्यापन्नः फलचमसोऽपि। तस्मात् पूर्वयैव उपपत्त्या ब्राह्मणलाभसिद्धिः इति भावः।

शा— (सिद्धान्तमाह) '**उच्यते विधिरेवायमर्थवत्त्वात् श्रुतेस्तथा। अन्यथा वचनं व्यर्थं लक्षणा च प्रसज्यते॥ नहि कृत्स्नानुवादस्य किञ्चिदस्ति प्रयोजनम्। संभवन्त्यां श्रुतौ नैव लक्षणाप्युपपद्यते॥ तस्मात् शतानुवादेन ब्राह्मण्यमिह चोद्यते। तत्र च न्यायतः प्राप्ता राजजातिर्निवर्तते॥ स्यात् पञ्चमलकारेण विधिश्च समिदादिवत्। ब्राह्मणानामतो भक्षो राजन्यचमसे स्थितः॥**' १९.

सोम— फलचमसे राज्यन्यस्य भक्षे उक्ते, तस्य क्वचिदपवादः क्रियते इति **संगतिः**। दशवाक्यविधायकत्वस्य पक्षद्वयसाधारण्यात् किं 'शतं ब्राह्मणाः' इति विधिः, उत अनुवादः इति संशयनिष्कर्षः। **सूत्रार्थस्तु**– अनुप्रसर्पिषु राजन्यचमसे राजन्या एव तुल्यजातीयत्वात् ग्राह्याः इति।

वि— 'राजसूये क्वचित् (दशपेये) कर्तुश्चमसो दशभिर्जनैः। भक्ष्यः किं तत्र राजन्या भक्षका ब्राह्मणा

उत ॥, आद्यो भानात् संख्ययैकजातेर्, विप्राः शतं दश । चमसानद्युरित्युक्त्या राजपात्रं च विप्रगम् ॥'

भाट्ट--राजसूये दशपेयो नाम सोमयागविकारो राजकर्तृकः । तत्र अतिदेशतो दशसु चमसेषु प्राप्तेषु यजमानचमसे राज्ञो भक्षणम् । तत्र अपरं 'शतं ब्राह्मणाः सोमान् भक्षयन्ति' 'दशदशैकैकं चमसमनुप्रसर्पेयुः' इति वचनद्वयं श्रुतम् । तत्र न तावत् 'शतं ब्राह्मणाः' इति विधिः 'दशदश' इत्यनुवादः, भक्षानुवादेन गुणद्वयविधाने वाक्यभेदात्, एकैकस्मिन् भक्षे शतब्राह्मणप्राप्त्यापत्तौ दशदश इत्यस्य प्राप्त्यभावाच्च । अतो दशदशेत्येव लिङ्श्रवणात् विधिः । सोऽपि च न चमसोद्देशेन, दशत्वस्य प्राप्तत्वात् । नापि तदुद्देशेन भक्षाश्रितदशकर्तृविधिः, चमसोन्नयनादिक्रियाऽन्तरस्यापि आश्रयत्वप्रसङ्गेन भक्षस्यैव आश्रयत्वे प्रमाणाभावात्, याज्ञिकाचारसिद्धसमाख्याभक्षस्यैव नियमेन उपस्थित्यभावेन वषट्कारनिमित्तस्यापि आश्रयत्वापत्तेश्च, 'चमसम्' इति द्वितीयायाः अनुशब्दयोगनिमित्तत्वेन प्रतियोगित्वपरतया तस्य उद्देश्यत्वोपस्थापकत्वाभावाच्च । नापि चमसानुप्रसर्पणोद्देशेन दशकर्तृविधिः विशिष्टोद्देशे वाक्यभेदात्, चमसप्रतियोगिकर्त्विक्कर्तृकानुप्रसर्पणस्य अप्राप्तत्वाच्च, 'प्रयाजेभ्यस्तत्' इतिवत् सर्वचमसेषु एकस्यैव दशकस्य प्रसक्त्यापत्तेश्च । चमसेषु एकैकत्वविशेषणे पुनः विशिष्टोद्देशः । दशदश इति वीप्सार्थविधाने वाक्यभेदः, प्रतिचमसं विंशत्यापत्तिश्च । अतो दशकर्तृविशिष्टं प्रत्येकचमसप्रतियोगिकं अनुप्रसर्पणमेव अत्र विधीयते । तयोश्च पार्ष्ठिकान्वये एकैकस्मिन् चमसे दशदश कर्तारो भवन्तीति वीप्सानुवादः । अनुप्रसर्पणस्य च प्रयोजनापेक्षायां वैमृधन्यायेन चमसपदान्तर्गतचमिधातुप्रतिपाद्यसमाख्यानिमित्तभक्षस्यैव स्ववाक्योपस्थितत्वात् तद्वाचकपदान्तरकल्पनया प्रयोजनत्वम् । अतश्च समाख्यानिमित्तभक्षार्थे प्रतिचमसं दशानामनुप्रसर्पणे चमसानां दशत्वात् शतसंख्यासंपत्तेः शतवाक्यमनुवादो विधेयदशत्वस्तुत्यर्थः, न तु ब्राह्मणत्वविधायकः, वाक्यभेदापत्तेः । अतो ब्राह्मणग्रहणं सोमपदवदेव भूम्ना गौणमिति यजमानचमसे राजत्वजातेरेव न्यायप्राप्तत्वात् राजन्या दश भक्षयेयुः । इति प्राप्ते, ब्राह्मणत्वस्य सर्वचमसेषु प्राप्त्यभावेन 'उपरि हि देवेभ्यो धारयति' इतिवत् विधेयत्वोपपत्तेः गौणत्वे प्रमाणाभावात् ब्राह्मणत्वमेवेह शतोद्देशेन विधीयते । 'सोमान् भक्षयन्ति' इत्यनुवादमात्रम् । वस्तुतस्तु भक्षयतिना पूर्ववाक्ये समाख्याभक्षस्य उद्देश्यत्वेन उपस्थितस्यैव उपादानात् तदुद्देशेनैव ब्राह्मणत्वविधानमिति दशत्वेन एकत्वबाधवत् ब्राह्मणत्वेन राजत्वबाधः, इति यजमानचमसेऽपि ब्राह्मणा एव फलचमसं दश भक्षयेयुः । न च 'स यदि सोमम्' इत्यनेन राजकर्तृकभक्षस्य निमित्तत्वावगतेः कथं तदभावे फलचमस इति वाच्यम् । निमित्तत्वद्वयाङ्गीकारे वाक्यभेदापत्तेः आद्येनैव यदिशब्देन यागगतराजकर्तृकत्वस्य निमित्तत्वप्रतिपादनात् । अयं तु यदिशब्दो निःसंदिग्धत्वार्थकोऽनुवाद इत्युक्तम् ।

मण्डन--'सोमपा ब्राह्मणाः शतम् ।'

शंकर--'ब्राह्मणा दश भक्षेयुः ।' दशपेये यजमानचमसम् ।

* दशममहः द्वादशाहे । 'एष वै दशमस्याह्नो विसर्गो यन्मानसम्' इति । नात्र पत्नीसंयाजान्तता किंतु मानसान्तत्वम् । दशमेऽहनि मानसाय प्रसर्पन्ति । दशमेऽहनि सार्पराज्ञीभिर्ऋग्भिः स्तुवन्ति । **भा.** १०।६। १३।३९–४०. * **दशमस्य अह्नो** द्वादशाहगतस्य समापनं मानसग्रहेण वाचनिकम् । **वि.** ९।१।९. * दशमस्य अह्नो मानसमङ्गम्, न स्वतन्त्रं द्वादशाहे । **भा.** १०।६।१३।३४–४४.

* **दशमे अध्याये** चोदकप्राप्तानां प्रत्यक्षविहितानां च पदार्थानामियत्ता चिन्तिता । एकादशे इयत्ताविशेषश्चिन्त्यते । दशमेऽध्याये बाधाभ्युच्चयौ वृत्तौ । **टुप्.** ११।१।१।१. * दशमेऽध्याये प्राप्तबाधः, तृतीये तु अप्राप्तबाधः । **के.** * दशमेऽध्याये बाध उच्यते । **वि.** १०।१ प्रास्तावश्लोके. * दशमेऽध्याये बाधाभ्युच्चयानुनिष्पादिनी शेषेयत्ताचिन्ता । **टुप्.** ७।१।१।१. * दशमे अहनि द्वादशाहगते ऐन्द्रवायवाग्रत्वम् । **वि.** १०।५।२३.

* **दशमाध्यायार्थः** । 'द्वारलोपोऽस्य विस्तारः कार्यैकत्वं समुच्चयः । ग्रहसामप्रकीर्णानि नञर्थश्चाष्टपादगाः ॥' प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः । तद्यथा 'स्वयं-

कृता वेदिर्भवति' इत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धननादीनां बाधः । कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेन अवघातस्य बाधः । **द्वितीये पादे** संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः । **तृतीये** बाधकारणं कार्यैकत्वम् । तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्यम् । तथा विकृतिरूपे भूनाम्नि एकाहे धेनुरूपायाः दक्षिणायाः तदेव कार्यम् । ततो धेन्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते । **चतुर्थे** नक्षत्रेष्टिविहिता उपहोमाः चोदकप्राप्तैर्नारिष्ठहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः । **पञ्चमे** षोडशिग्रहः प्रकृतिगामी । स च आग्रयणपात्रादेव ग्रहीतव्यः इत्यादिः बाधप्रसङ्गागतो ग्रहादिविचारः । **षष्ठे** 'साम तृचे गेयम्' इत्यादिर्बाधप्रसङ्गागतः सामविचारः । **सप्तमे** पश्वङ्गेषु प्रत्यङ्गं हविर्भेदः, न कृत्स्नः पशुः हविः । गृहमेधीयमपूर्वं कर्म इत्यादिः बाधप्रसङ्गागतः प्रकीर्णविचारः । **अष्टमे** 'नानुयाजेषु' इति पर्युदासः, 'न सोमे' इत्यर्थवादः, 'नातिरात्रे' इति प्रतिषेधः इत्यादिः बाधोपयुक्तो नञर्थविचारः । वि. प्रस्तावना. श्लोकः २२.

* **दशमाध्यायार्थविचारः ।** (न्यायरत्नमालास्थः)। दशमे बाधाभ्युच्चयद्वारेण विकृतिषु पदार्थैयत्ता चिन्त्यते । कथं पुनः वचनप्राप्तस्य बाधः अध्यवसीयते ? यथा चैतत् तथा वक्ष्यामः । प्रथमं तावत् इदं तत्सिद्ध्यर्थं चिन्त्यते किं प्राकृतमङ्गजातं अनादृतोपकारं स्वरूपेणैव विकृतौ अतिदिश्यते 'सौर्येण कुर्यात्, कथम् ? आग्नेयस्य स्वकार्यसाधने यः प्रकारः, स सौर्यस्य स्यात्' इति अतिदिश्यते । ततः तत्सिद्ध्युपायत्वेन अवान्तरापूर्वाणि प्रयाजादिजन्यानि प्रोक्षणजन्यं चादृष्टं जातिद्रव्यगुणावघातादिजन्यं च नियमादृष्टानुविद्धं दृष्टं अतिदिश्यते । ततः तत्साधनभूताः पदार्थाः, तेषां च तथाविधानामेव प्रतीत्युपायतया वचनानि अतिदिश्यन्ते इति ।

तत्र पूर्वपक्षः । प्रकृतिवत् सर्वमेव अङ्गकाण्डं विकृतेरपि वाक्यशेषो भवति, तेन तेषु सर्वेषु विहितेषु प्रकृतिवत् यथासंभवं दृष्टमदृष्टं वा प्रयोजनं कल्प्यते इति नास्ति बाधः । यद्यपि न शास्त्रातिदेशः, तथापि पदार्था एवातिदिश्यन्ते नोपकारः । प्रकृतौ उपकारस्य पदार्थपूर्वकत्वात् विकृतावपि तत्पूर्विकैव तस्य प्रतीतिः । तत्र प्रथमप्रतिपन्नपदार्थातिक्रमेण न युक्तं जघन्यप्रतिपन्न उपकारः अतिदिश्यते इति । तस्मात् पदार्थानामेव कार्यनिरपेक्षाणामतिदिष्टानां इहैव दृष्टादृष्टप्रयोजनकल्पनात् नास्ति बाधः । इति प्राप्ते, अभिधीयते **'प्रकारस्यातिदेशः स्यात् पूर्वं यस्मादपेक्षितः । ततोऽवान्तरकार्याणामङ्गानां वचसां क्रमात् ॥' १ ॥** यद्यपि प्रकृतानामुपकारः शास्त्रपदार्थपूर्वक एव, तथापि विकृतौ अतिदेशावस्थायां सर्वेषां शास्त्रपदार्थकार्याणां क्लृप्तत्वाविशेषेऽपि कथंभावापेक्षा विकृतिभावनाप्रकारमेव प्रथमं स्वीकरोति । नहि तस्याः शास्त्राणि पदार्था वा स्वरूपेणापेक्षिताः, किन्तु प्रकारः प्राकृतः । स एव तावदङ्गीक्रियते । स च पदार्थविशिष्टावान्तरकार्यविशिष्टः सन् विशेषणानि च अर्थात् प्रापयति । तेन तत्सिद्ध्यर्थं अवान्तरकार्याणि, तदर्थं चाङ्गानि, ततः शास्त्राणि । यद्यपि प्रथमावगताः (प्रधानगताः) पदार्थाः तथैव आलोचयितव्याः, तथापि अनपेक्षितत्वात् पदार्थान् उपेक्ष्य प्रकारमेव विकृतिर्गृह्णाति । तस्मात् तत्पुरःसर एव अतिदेशः, तदतिदेशेन च अर्थात् प्राप्यमाणेषु पदार्थेषु व्रीहीणां प्रत्यक्षश्रुतकृष्णलचरौ निवृत्तिः, वितुषीकरणस्य च तेषु असंभवात् निवृत्तिः, तन्निवृत्तौ च तद्द्वारस्य अवघातस्य निवृत्तिः, इति तदतिरिक्तविशेषणयुक्तस्यैव उपकारस्यातिदेशः इति । **'प्रकृतस्योपकारस्य विकृतावुपदेशतः । अन्वयं कश्चिदाचष्टे पितृयज्ञे नियोज्यवत् ॥' २ ॥** उपदेशो हि ग्रन्थसंदर्भः स च अर्थान्तरान्वितं विध्यर्थं कार्यतया (कर्मतया) प्रतिपादयति । स तावत् तथाभूत एव औपदेशिकः । तेनापि यत् अपर्यवस्यता आक्षिप्यते, तदपि औपदेशिकमेव, यथा पिण्डपितृयज्ञे नियोज्यः । यथा च प्रकृतौ उपकारः, तेन विकृतावपि विध्यर्थकल्पितस्य उपकारस्य भवति औपदेशिकत्वम्, इति कश्चित् । तन्न युक्तम्, **'उपकारकभेदात् स्यादुपकारविशेषधीः । पूर्वमेव त्वपेक्षा स्यात् पदार्थेष्वपि सा समा ॥' ३ ॥** उपकारकपदार्थविशेषाधीनसिद्धिः उपकारविशेषः न अनवधारितेषु तेषु विशिष्टरूपेण निरूपयितुं शक्यते । भवितव्यं हि केनचित्

उपकारविशेषेण इति अपेक्षामात्रमेव प्रथमं सिध्यति । तच्च पदार्थेष्वपि भवितव्यं उपकारजनकैः पदार्थभेदैः । इत्यपेक्षासंभवात् तुल्यमेव । अथोच्येत न विधिः विशेषरूपेण पदार्थान् आक्षेप्तुं प्रभवतीति वाक्यान्तरादिभिः अतिदेशेन वा यागदानादिपदार्थभेदसमर्पणं अपेक्षते, उपकारं तु विशेषरूपेणैव आक्षिपति । अयमेव हि तस्य विशेषाक्षेपः, यदस्ति कश्चित् उपकार इति । नहि असौ पदार्थवत् 'अयमसौ' इति निरूप्यते, तद्विधित एव कल्पितोऽसौ औपदेशिक इति । तथापि कथं प्राकृतस्य उपकारविशेषस्य औपदेशिकत्वम्, तस्य हि नान्तरेण चोदकं विधिः आक्षेपाय प्रभवति । सत्यम्, तथापि उपकारविशेषकल्पनाय ईशानोऽपि लाघवात् प्राकृतं गृह्णाति, तेन विध्याक्षेपस्यापि विशेषस्य नियममात्रं चोदकादिति ।

अत्राह । ननु च एवं सति दृष्टार्थानामवघातादीनां द्रव्यगुणादीनां च विधित एव अनियमेन आक्षेपसंभवात् अतिदेशेन च नियममात्रालाभात् व्रीह्यादीनामपि विकृतौ उपदेशादेव संगतिः प्रसज्येत । अथ 'विधिना यत् साक्षादाक्षिप्यते, तत् औपदेशिकं यथा चोपकारः । तत्सिद्ध्यर्थं तु यत् पश्चादाक्षिप्यते द्रव्यादि, न तत् औपदेशिकम्' इति परिभाष्यते, तथा सति विश्वजिद्यागस्य स्वर्गफलसाधनत्वं नौपदेशिकं स्यात्, विधिपरिकल्पितविशिष्टनियोज्यसंबन्धकाल्पितत्वात् । तस्मात् नोपकारस्य उपदेशः, सहैव तु पदार्थैः उपकारस्यातिदेश एव प्रमाणम् । तद्वद्भावो हि अतिदेशः । तेन यत् साक्षात् प्रणाल्या वा प्राप्यते, तत् आतिदेशिकम् । तन्निरपेक्षमेव तु ग्रन्थसंदर्भमात्रेण श्रुत्यर्थाभ्यां प्रमितं औपदेशिकम्, इति विवेकः ।

यदपि उच्यते उपदिष्टस्यापि उपकारस्य अन्यदीयस्य अन्यत्रातिदेशात् अतिदिष्टत्वमपि अस्ति, तेन उपदेशातिदेशयोः एकत्रैव युगपत्संभवात् नैतौ प्रतिपक्षभूतौ शब्दप्रमाणभेदौ । अत एव नोपदेशातिदेशाश्रितौ षट्कौ, किन्तु उपदेशकार्यान्वितौ, कार्यमिति च पदार्थजन्यस्य उपकारस्याभिधानम्, न नियोगस्य । अत एव उपादानाभिधानो विध्याक्षेपः पूर्वषट्के चिन्तितः, विध्याक्षेप्यत्वात् उत्पत्त्यादीनाम् । तन्त्रावापादि तु प्रकृतावपि उपकारप्रमेयं इत्युत्तरषट्के निरूपितम्, अन्यथा अतिदेशविषयत्वे सति प्रयाजादीनां आग्नेयादिषु तन्त्रेण आवृत्त्या वा अनुष्ठानम्, इत्यादिविचारो नात्र संबध्येत । तस्मात् नोपदेशातिदेशाश्रितं षट्कद्वयम्, अपितु उपदेशकार्याश्रितमिति । तदपि उपकारस्य उक्तेन न्यायेन औपदेशिकत्वासंभवात् निरस्तम् । तथाहि, उपदेशातिदेशावेव प्रमाणे, तदाश्रितं च षट्कद्वयं भवति । तथा सति कथं उपदिष्टार्थविषया तन्त्रावापादिचिन्ता । अन्यथा वा कथं सप्तमाष्टमयोः वचननामधेयचोदनालिङ्गैः उपकारस्य उपदेशप्रमेयस्य चिन्ता । सा हि विध्याक्षेपविषयत्वात् चातुर्थिकी स्यात् प्रदार्थप्राप्तिसिद्ध्यर्थं इति ब्रूमः । नहि असत्यां उपकारस्य प्राप्तौ तद्वशेन पदार्थानां प्राप्तिर्वर्णयितुं शक्यते । तेन उपोद्घातः तद्विचारः पारिप्लवत्वनिराकरणवदिति । असत्पक्षेऽपि प्रासङ्गिकः तन्त्रावापादिविचारः । दशमे हि पदार्थेयत्तायां निरूपितायां परिमाणप्रसङ्गेन तन्त्रावापप्रसङ्गाः प्रयोगपरिमाणरूपाः चिन्त्यन्ते । उपदिष्टातिदिष्टपदार्थसाधारण्याच्च उभयोत्तरकालमेव तन्त्राद्यारम्भः । यद्यपि प्रयोगविशेषविचारात्मकत्वात् चतुर्थपञ्चमसमीपेऽपि आरम्भसंभवः, तथापि परिमाणविचारात्मकत्वात् अत्रापि आरम्भः संभवति, इति पर्यनुयोगाविशेषात् अत्रापि आरम्भः । यथा भवन्मते कार्यपदार्थयोः उपदेशकार्यप्रमेयत्वात् उभयविचारात्मकयोः सप्तमाष्टमयोः अन्यतरांशेन चतुर्थोत्तरषट्कान्तर्भावात् अन्यतरत्रारम्भे कर्तव्ये सति अविशेषात् उत्तरषट्क एवारम्भः, तथा अस्माकमपि तन्त्रादेः इति न दोषः । यच्च उपकारप्राप्तेः पश्चात् पदार्थाङ्गीकरणम्, तदपि व्यर्थम्, विशिष्टोपकारप्राप्त्यैव अर्थात् पदार्थप्राप्तेः । न चेह सामान्यशास्त्रात् परतः विशेषशास्त्राणि कल्प्यन्ते सर्वपदार्थसाधारणोपकारशास्त्रतः पश्चात् न पदार्थविशेषाणां शास्त्राणि संभवन्तीति । तत् सिद्धं कार्यद्वारेण पदार्थानां प्राप्तौ कार्याभावे बाध इति । एवं च यत् वचनप्राप्तस्य बाधो न युक्त इति, तत् परिहृतम्, वचनस्यैव कार्यद्वारेण पदार्थान् प्रापयतः तदभावे प्रापकत्वव्याघातात् । एतादृशं हि वचनं 'यथा आग्नेय उपकृतः, तथा सौर्योऽपि' इति । किं तत् येनोपकर्तव्यम्, समिदाद्यवान्तरकार्यम् । तदपि तैरेव समिदादिभिः

यथाप्रकृत्येव जनयितव्यमिति । एवं च सामान्यतः प्राप्तिमवगम्य तदनन्तरं पदार्थान् स्वरूपेण आलोचयति 'अनेन कथमुपकृतं अनेन कथमुपकृतम्' इति । तत्र अवघातस्य दृष्टप्रयोजनद्वारेण उपकारकत्वं प्रकृतौ आलोच्य कृष्णलेषु तथाभावासंभवात् पूर्वसंजातस्य सामान्यज्ञानस्य बाधं मन्यते । एवं **प्रत्याम्नानेऽपि** कार्यद्वारेण पदार्थेषु प्राप्यमाणेषु बर्हिःकार्ये हविरासादने पूर्वं प्राप्तेः तत्साधनापेक्षायां यावत् चोदकेन कुशा न प्राप्यन्ते, तावदेव प्रत्यक्षेण वाक्येन तदुद्देशेन शराणां विधानात् कुशबाधः । तथा **प्रतिषेधे** सामान्यरूपस्य चोदकस्य विषयविशेषात् उत्कालनं 'नार्षेयं वृणीते' इति । तस्मात् लुप्तार्थ–प्रत्याम्नात–प्रतिषिद्धाङ्गेभ्यः समुत्काल्य अन्याङ्गेषु चोदको व्यवस्थाप्यते इति सिद्धो बाधः । **'लुप्तार्थस्यापि हन्त्यादेः कृष्णलादिषु शेषता । अस्ति नास्ति त्वनुष्ठानमिति केचित्प्रचक्षते ॥ ४ ॥ प्राप्तबाधत्वसिद्ध्यर्थमन्यथा तन्न सिध्यति । प्राप्तौ निवार्यमाणायां श्रुतिलिङ्गादिवद्भवेत् ॥' ५ ॥** तार्तीयो हि अप्राप्तबाधः, दाशमिकस्तु प्राप्तबाध इति स्थितिः । तत्र यदि चोदक एव लुप्तार्थानां नाश्रीयते, ततो हन्त्यादीनां प्राप्त्यभावात् प्राप्तबाधवाचोयुक्तिरयुक्ता स्यात् । श्रुतिलिङ्गादिवत् अप्राप्तबाध एव स्यात् । तस्माच्चोदकेन सर्वमेव प्राकृतमङ्गजातं प्राप्यते । सत्यामेव तु प्राप्तौ कृष्णलादिषु हन्त्यादेः प्रयोजनाभावात् अननुष्ठानलक्षणो बाधो भवति । तथा 'शरमयं बर्हिः' इत्यत्रापि चोदकावगताबाधिताङ्गभावानां दर्भाणां प्रत्यक्षावगतशरनिराकाङ्क्षेण प्रयोगवचनेन अनुपसंग्रहात् तल्लक्षण एव बाधः । तथा 'नार्षेयं वृणीते' इत्यत्रापि प्रतिषेधस्यैव प्रयोगविधिसंग्रहात् वरणस्य प्राप्तस्यापि अशक्यत्वात् अननुष्ठानम् । तस्मान्न कुतश्चिदपि चोदको निवार्यते इति सर्वमेव तेन प्रापितमपि प्रयोगविधिसंग्रहाभावात् बाध्यते इत्युच्यते । युक्तं चैतत् । नहि प्रतिस्वं पदार्थानां चोदकोऽस्ति, यत् एकवर्जं इतरत् प्राप्यते । उपकारसूत्रे हि प्राकृतं पदार्थरत्नजातं प्रोतं सर्वमेव तस्मिन् आकृष्यमाणे समाकृष्यते, तदनाकर्षणे वा न किञ्चिदपि । तदुक्तम् 'तद्वर्जं तु वचनप्राप्तेः' (३।६।१।३ वार्तिके 'प्राप्तेः इति वा पाठः' इत्युक्तं) 'चोदनार्थकार्त्स्न्यात्' (३।६।१।८) इति । किमिदानीं प्रमत्तगीतमिदं भाष्यम् 'नास्ति लुप्तार्थानां चोदकवचनम्' इति (१०।१।१।२ सूत्रे । आनन्दाश्रमीये तु मूले 'नास्ति लुप्तार्थस्य देशकं वचनम्' इति पाठः) । 'तस्मान्न लुप्तप्राकृतप्रयोजनं चोदकश्चोदयति' इति च (द्वितीयसूत्रान्ते । परन्तु न–शब्दः आनन्दाश्रमीये 'प्रयोजनं न' इत्यत्र पठितः) । तथा 'बाधो नाम यत् एवमिदं इति विज्ञानं निश्चितं कारणान्तरेण मिथ्येति विकल्प्यते' इति च (आनन्दाश्रमीये तु 'बाधो नाम यदेव इदमिति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कल्प्यते' इति पाठः प्रथमसूत्रे आदौ) ! नेति ब्रूमः । मिथ्यात्वं तावत् अनुष्ठानाभिप्रायम् । व्यवहारविसंवादादेव हि सर्वसंविदां मिथ्यात्वम्, न तु अयाथार्थ्यात् । नहि अयथाऽर्थं नाम संवेदनं संभवति इत्युक्तम् । 'यत् प्रत्यक्षम्, न तत् व्यभिचरति । यत् व्यभिचरति, न तत् प्रत्यक्षम्' इत्यत्र (भाष्ये १।१।५ वृत्तिग्रन्थे पृ. २६), शुक्तिकारजतादिषु अग्रहणाभिधानात् । तद्वदेव तर्हि अग्रहणमस्तु, न ग्रहणकारणसद्भावात् । युक्तं हि चक्षुरादीनां प्राप्यकारित्वात् असंनिहितरजतप्राप्त्यसंभवात् अग्रहणम् । अत्र तु चोदकस्य ग्रहणकारणस्य संभवात् न अग्रहणसंभवः । कथं तर्हि बाधः ? उक्तं व्यवहारविसंवादादिति । तदेव तु न युक्तमिति पश्यामः । अग्रहणनिबन्धनो हि व्यवहारः ग्रहणेन अग्रहणे निवृत्ते परावर्तते इति युक्तम् । ग्रहणे तु सति कः तन्निबन्धनं व्यवहारं परावर्तयेत् । उच्यते । अङ्गत्वमात्रं चोदकेन अवगम्यते न च तावन्मात्रेणानुष्ठानम्, प्रयोगविध्युपसंग्रहनिमित्तत्वात् तस्य । तेन च लुप्तार्थानामनुपसंग्रहात् भवत्येवात्रापि व्यवहारविसंवादः । **'अन्यथा ज्ञानमप्यत्र चोदकान्नोपजायते । दुष्टकारणजं तत् स्याददुष्टश्चेह चोदकः ॥' ६ ॥** येषामपि 'अयथार्थं विज्ञानं मृगतोयादिविषयं उत्पन्नमेव ज्ञानान्तरेण अर्थतत्त्वोपदर्शनेन मिथ्या क्रियते' इति मतम्, तेऽपि मिथ्याज्ञानस्य दुष्टकारणजत्वात् चोदकस्यादुष्टत्वात् तज्जनितं यत् पदार्थप्रातिज्ञानम्, **'नार्थलोपादिना तस्य मिथ्यात्वं वदितुं क्षमाः । अननुष्ठानमेवात्र बाधोऽङ्गानां सतामपि ॥'**

७ ॥ तेन चोदकप्राप्तानामपि तत्फलस्यानुष्ठानस्य अभावात् नास्ति चोदकवचनम् । 'न चोदकश्चोदयति' इति च फलद्वारेण व्याख्यातम् (भाष्ये) इति ।

अत्र ब्रूमः '**चोदकेन पदार्थानां विकृतौ संगतिः कथम् । किं कार्यनिरपेक्षाणां तद्द्वारेणाथवा भवेत् ॥ ८ ॥ संगतौ निरपेक्षाणां कल्पयित्वा प्रयोजनम् । प्रकृतौ वा प्रयोगः स्याद् विकृतौ बाधनं कुतः ॥ ९ ॥ बाधोऽधिकरणस्य स्यात् तादृशी संगतिर्यदि । कार्यद्वारेण चेत् प्राप्तिस्तल्लोपे वा कथं भवेत् ॥**' १० ॥ यो हि चोदकप्राप्तानां अबाधिताङ्गभावानामेव अङ्गानां अननुष्ठानं बाधमातिष्ठते, स विकल्प्य प्रष्टव्यः किं प्राकृतकार्यनिरपेक्षस्यैव हन्त्यादेः कृष्णलादिषु चोदकेन अङ्गत्वप्राप्तिः, अथवा तद्द्वारेणेति। स चेद् ब्रूयात् तन्नैरपेक्ष्येणैव विकृत्या संगतिरिति । प्रतिब्रूयादेनम् । तथा सति चोदकावगताङ्गभावनां तदुपपत्त्यर्थं दृष्टमदृष्टं वा प्रयोजनं परिकल्प्य प्रकृताविव विकृतावपि कृष्णलादौ हन्त्यादीनां प्रयोगात् नाननुष्ठानलक्षणबाधसिद्धिः । दशमाद्यधिकरणबाधश्च कार्यनिरपेक्षाणां प्राप्तौ प्रसज्येत। स चेत् एतद्दोषपरिहारार्थं द्वितीयं पक्षमवलम्ब्य ब्रूयात् कार्यद्वारेणैव अङ्गानां प्राप्तिर्न स्वतन्त्राणामिति, प्रतिब्रूयादेनम्, न तर्हि कृष्णलेषु हन्तेः प्राप्तिः संभवति, द्वाराभावात् । यत्र हि यस्य द्वारं नास्ति, स तत्र तेनैव द्वारेण प्रविशतीति कुत एतत् । नो खलु आर्द्रतया ज्वलनमकुर्वन्ति काष्ठानि तद्द्वारेण ओदनसिद्धेः साधनभावमनुभवितुं प्रभवन्ति । तत्र प्राकृतेन द्वारेण कृष्णलापूर्वस्य हन्तिरङ्गमिति वचनमशक्यार्थविधित्वादप्रमाणं स्यादिति । तत्रैतत् स्यात् । '**उपकारस्तु सर्वाङ्गजन्यः पूर्वं प्रदिश्यते । ततोऽवान्तरकार्याणां नाङ्गानामतिदेशनम् ॥**' ११ ॥ न ब्रूमः । कार्यानपेक्षः पदार्थातिदेश इति । सर्वाङ्गजन्य उपकारः पूर्वमतिदिश्यते एव तदनन्तरं तु नावान्तरकार्याणामतिदेशः, किन्तु अङ्गानामेव । स चोपकारः कृष्णलेष्वपि विद्यते एव तत्सिद्ध्युपायत्वेनैव पदार्थानामतिदेशात् नास्त्यप्राप्तिः। एवमुपकारपृष्ठेन पदार्थानामङ्गभावे अपूर्वे प्रत्यवगते तदुपकारजनकत्वं तेषां प्रकृतावेव ज्ञातप्रकारमिति न प्रकारान्तरकल्पनाऽवसरः । न चावघातस्यात्र तथा तज्जनकत्वं संभवतीत्यननुष्ठानम् । तस्मादुभयमप्युपपन्नं प्राप्तिरननुष्ठानं चेति । अधिकरणमपि उपकारानपेक्षपदार्थप्राप्त्यनभ्युपगमात् अक्षतमिति । '**तदेतदपि पूर्वोक्तदूषणं नातिवर्तते । शेषभावे प्रतीते हि द्वारकार्यानपेक्षया ॥ १२ ॥ प्राकृतस्योपकारस्य प्रकारान्तरमास्थितः । हन्त्यादिहेतुतां गच्छेदपूर्वाङ्गवदेव नः ॥**' १३ ॥ यद्यपि परमोपकारपुरःसर एव अङ्गानामतिदेशः, तथापि अवान्तरकार्यनिरपेक्षाणामेव अङ्गभावावगमात्, तस्य च करणोपकारसाधनमन्तरेण अघटनात्, तस्य च प्रकृत्यवगतेन मार्गेणासंभवात्, प्रकारान्तरेणापि तत्साधनत्वमवघातादीनां अपूर्वाणामिव आमनहोमादीनां अङ्गानां परिकल्प्य अनुष्ठानं स्यात् । किञ्च उपकारजनकापेक्षयाऽपि पदार्थानां पृथगतिदेशं भवानिच्छति, तेषां च न प्रथममुपकारेण अन्वयः । नहि उपकाराभिधायी शब्दोऽस्ति यः पदार्थैरन्वितमुपकारमभिदध्यात् । न च पदार्थवाचिनोऽपि शब्दा विकृतौ सन्ति, ये पदार्थानुपकारान्वितान् अभिदध्युः । तेन अपूर्वस्यैव स्वशब्देन पदार्थप्रयोजनतया अन्वितस्याभिधानात् तत्सिद्धये कल्पयित्वाऽपि द्वारमनुष्ठानं स्यात् । एवं च यद्यपि उपकारानन्तरं अवान्तरकार्याणि, ततः पदार्थाः प्राप्यन्ते, तथापि तेषामशब्दतया मिथःसंबन्धाभावादपूर्वेणैव तादर्थ्यान्वयात् लुप्तद्वाराणामपि तत्कल्पनया स्यादेवानुष्ठानम् । यदि उच्येत नावश्यम्भावि उपकारसाधनत्वमङ्गानाम्, तेन उपकारसाधनत्वं न कल्पयितव्यमिति । प्रकृतौ तर्हि कथमुपकारकल्पना ? अपेक्षितत्वात् । प्रधानस्य हि उपकारापेक्षा, तेन प्रकृतौ शेषाणां तज्जनकत्वं कल्प्यते । विकृतौ तु अलुप्तार्थाङ्गजातजनितेनैव उपकारेण प्रधानस्य नैराकाङ्क्ष्यात् नास्ति उपकारकत्वपरिकल्पनं लुप्तार्थानामिति । नैतत् सारम् । नहि अनुपकारिणामपि अङ्गत्वे सत्येव प्रधानापेक्षानिबन्धनं तज्जनकत्वपरिकल्पनम् । तर्हि लब्धप्राकृतोपकारासु विकृतिषु तदपेक्षाऽभावात् अपूर्वाणामपि आमनहोमादीनां अवघातादिवत् तज्जनकत्वपरिकल्पनाहेत्वभावात् अनुपकारकत्वेन नानुष्ठानं सिध्येत् । अथ तेषां वचनानर्थक्यभयात् अनुष्ठानम्, चोदकस्य तु नानर्थक्यम्, अङ्गान्तरेष्वपि

कृतार्थत्वात् इत्युच्यते, **तदयुक्तम्**। अत्रापि आनर्थक्यात्। नहि सर्वपदार्थसाधारणोपकारप्राप्त्यैव अर्थात् पदार्थप्राप्तिरभिमता, पुनरपि शास्त्रेणैव पदार्थानां विधेरिष्टत्वात्, तेषां च सामान्यरूपाभावात् प्रत्येकमतिदेशात् अवघातस्यापि शास्त्रं अननुष्ठाने अनर्थकं स्यात्। अतस्तस्य अनतिदेशो वा अनुष्ठानं वा, नान्या गतिरस्ति। काममनर्थकं भवतु नैतावता अनवगतोऽर्थः शक्यते कल्पयितुम्। नहि अत्र किञ्चिदुपकारजनकत्वे प्रमाणमस्ति। **ननु** अङ्गत्वानुपपत्तिरेव प्रमाणम्। नहि अनुपकारिणः तत् भवति, हन्तेस्तु प्रकृतिवद्वचनात् अन्यथोपकारकत्वं न संभवति। तस्मात् अननुष्ठानम्। इति चेत्, **तत् उक्तोत्तरम्**। प्रकृतिवत् अङ्गत्वमवघातस्य कृष्णलेषु विदधत् वचनं अप्रमाणं स्यादिति। किञ्च प्राप्त्यबाधे कुशानामलुप्तार्थानां किमिति अनु(अननु)ष्ठानम्? प्रत्याम्नानात् इति चेत् न, तेनापि अङ्गत्वानवलोपात्। तेन अबाधिताङ्गभावयोः कुशशरयोः विकल्पेन अनुष्ठानं ऐकार्थ्यात् स्यात्, न बाधः। ननु अतुल्यबलयोः उपदेशातिदेशयोः कथं विकल्पः? किंवा उपदेशेन अतिदेशो बाध्यतां इत्युच्यते? ओमिति चेत्, न तर्हि कुशानामङ्गत्वमस्ति, तत्प्रमाणस्यातिदेशस्य बाधितत्वात्। अथ नातिदेशस्य बाधः नापि विकल्पः, अथ किम्? समुच्चयः। सोऽपि न, ऐकार्थ्यात्। कथं तर्हि उक्तं प्रयोगवचनेन अनुपसंग्रहात् अननुष्ठानमिति? तदेव तु न युक्तम्, अङ्गत्वाबाधात् इति ब्रूमः। कः खलु अङ्गभूतयोः उपकारसाधनयोः कुशशरयोर्विशेषः? येन द्वितीयस्यामिव (परयोषितीवेत्यर्थः) शरेषु कापुरुषस्य विधेः अनुरागो भवेत्। अयमस्ति विशेषः, शराणां प्रत्यक्षवचनं प्रमाणं इतरेषामनुमानमिति। नायं विशेषः, प्रत्यक्षेणापि अनुमानस्य अबाधितत्वात्। प्रमाणयोर्हि प्राबल्यदौर्बल्याभ्यां अन्यतरस्य प्रमेयापहारात् मिथ्यात्वं भवति। प्रमेयानपहारे तु द्वयोरपि अर्थयोः कार्यसाधनत्वाविशेषात् अविशिष्टं कार्यनिमित्तमनुष्ठानमिति। विधिर्हि साध्यभूतः साधनेषु अनुष्ठानमाक्षिपति। साधनत्वं च द्वयोरपि कुशशरयोः अङ्गत्वाविशेषात् द्वारसंभवाच्च अविशिष्टं इति नानुष्ठानाक्षेपे कश्चित् विशेषः। तस्मात् उभयस्यानुष्ठानात् नास्ति अननुष्ठानलक्षणो बाधः।

तथा 'नार्षेयं वृणीते' इत्यत्र प्रतिषेधपक्षे विकल्पमभ्युपेत्य तत्परिहाराय पर्युदास एव चोदकस्य आश्रितः। यदि उच्यते अनारभ्यविधेः सामान्यरूपस्य उपदेशात्मकस्य तत्र पर्युदासः अभिहितः, नातिदेशस्येति। कथं तर्हि (१०।८।१।१ सूत्रे) प्रदेशग्रहणम्? न्यायविरोधात् अनादरणीयमिति चेत्, अहो बत महामोहसमाश्रयणं भवतः, यत् आत्मीयमज्ञानं ऋषौ (सूत्रकारे) आरोपयति। नहि अङ्गत्वाबाधे सदि उपदिष्टं अतिदिष्टं इत्यनेन कश्चित् विशेषः इत्युक्तम्। यदि च अनपह्नुतयोरपि प्रमेययोः 'इदं प्रबलप्रमितम्, इदं दुर्बलप्रमितम्' इत्यनेन विशेषेण अनुष्ठानाननुष्ठाने भवतः, ततो दूरात् वह्निमध्यक्षयन् आराच्च अनुमिमानः अनुमितं हित्वा पाकार्थी दूरस्थमुपधावेत्।

तथा 'यजतिषु येयजामहं करोति' इत्यस्य सामान्यविधेः 'नानुयाजेषु येयजामहं करोति' इत्यतः विशेषप्रतिषेधात् आहवनीयशास्त्रस्येव विशेषशास्त्रात् पदविधायिनो दुर्बलत्वात् प्रतिषेधे सत्यपि अननुष्ठानं येयजामहस्य अनुयाजेषु शक्यते वक्तुम्, इति अनर्थकं पर्युदासप्रतिपादनं स्यात्। तस्मात् न कथञ्चिदपि प्राप्त्यबाधे सति अननुष्ठानं संभवति इति प्राप्तिरेव बाधयितव्या।

यत्तु एवं सति प्राप्तबाधाभिधानमनुपपन्नं तार्तीयदाशमिकयोरविशेषात् इति, अत्राभिधीयते **'साधारणस्य शास्त्रस्य विशेषविषयादिना। संकोचः क्लृप्तरूपस्य प्राप्तबाधोऽभिधीयते ॥ १४ ॥ कल्प्यस्य शास्त्रस्य तु कल्पनं यन्निरुध्यते मूलनिकृन्तनेन। क्लृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरन्ति ॥' १५॥** यत्र क्लृप्तस्यैव शास्त्रस्य सामान्यद्वारेण विशेषानुपसर्पतः क्वचित् विशेषयागादिना प्राप्तिरपोद्यते, तत्र प्राप्तबाधः। यथा प्राकृतवैकृतसामान्य–विशेष–नित्यनैमित्तिक–क्रत्वर्थ–पुरुषार्थ – पौर्वापर्य– अल्पभूयस्त्व– सावकाशनिरवकाश–अङ्गप्रधान–तद्धर्मबाधेषु। प्राकृता हि धर्माः न प्रातिस्विकेन रूपेण चोदकेन विकृतौ प्राप्यन्ते 'इदमिदं कर्तव्यम्' इति। कथं तर्हि? यथा प्रकृत्या स्वकार्यं साधितं तथा विकृत्याऽपि इति। तथाभावश्च तैरेव पदार्थैः तथासंबध्यमानैः संपादयितुं शक्यते नान्यथेति।

तेषां तत्साधनत्वसामान्यरूपेण प्राप्तिः अविशेषेण प्रतीयते । सेयं प्रतीतिः अविशेषेण उपजाता सती पश्चात् तत्तत्पदार्थविशेषनिरूपणावसरे हन्त्यादेः तथा साधनभावासंभवपर्यालोचनेन भ्रान्तीक्रियते । न चैतावता शास्त्रस्य अप्रामाण्यम्, तस्य विषयविशेषपरिशेषमात्रपरिकल्पनात् । विशेषादर्शनेन हि सामान्यमात्रालोचनात् सर्वविषयत्वं शास्त्रस्य भ्रान्त्या अवगम्यते । तद्दर्शनात्तु नायमस्य विषयः अन्यविषयमेव तु शास्त्रं सामान्यमात्रपर्यालोचनादोषात् एतद्विषयत्वेन भ्रान्त्या अध्यवसितं इति मन्यते । तेन अर्थलोपात् प्रत्याम्नानात् प्रतिषेधाच्च चोदकसंकोचः ।

तथा आहवनीयविधायिनः सामान्यशास्त्रस्य पदविधायिना विशेषशास्त्रेण होमान्तरविषयत्वकल्पनम् ।

पाञ्चदश्यस्य नित्यस्य अविशेषविहितस्य वैश्यविषयेण नैमित्तिकेन साप्तदश्येन वर्णान्तरविषयत्वम् । साप्तदश्यस्यापि क्रत्वर्थस्य पुरुषार्थेन एकविंशाद्यनुवचनेन प्रतिष्ठाकामव्यतिरिक्तवैश्यविषयत्वम् । न चात्र सामान्यविशेषभावः, उभयोरपि सामान्यत्वात् । एकविंशत्यनुवचनं हि प्रतिष्ठाकामवर्णत्रयसाधारणं साप्तदश्यमपि प्रतिष्ठाकामातत्कामवैश्यसाधारणम्, प्रतिष्ठाकामे तु वैश्ये द्वयोः संनिपाते सति पुरुषार्थानुवचनेन क्रत्वर्थस्य प्रत्यासन्नफलेन अन्यादृशस्य बाधः ।

तथा पौर्वापर्येऽपि च उद्गातृप्रतिहर्त्रपच्छेदयोः सामान्यविशेषभेदाभावात् पौर्वापर्यवशादेव मिथो बाधः । तत्र एवं शास्त्रार्थो भवति पश्चाद्भाव्युद्गात्रपच्छेदविधुरप्रतिहर्त्रपच्छदेवतः क्रतोः सर्ववेदसदानमङ्गमिति, एवमुद्गात्रपच्छेदेऽपि द्रष्टव्यम् ।

तथा पञ्चदशरात्रे प्रथमेऽहनि अग्निष्टुन्नामधेये एकाहाग्निष्टुद्धर्मेषु प्राप्तेषु सुब्रह्मण्या आग्नेयी प्राप्ता, उत्तरेषां चतुर्दशानामह्नां ऐन्द्री, तत्र अल्पवैगुण्येनापि गतौ सत्यां भूयोवैगुण्यमन्याय्यम्, इति भूयस्त्वेन प्रथमावगताऽपि आग्नेयी बाध्यते । तेन अग्निष्टुन्नामधेयं सुब्रह्मण्याऽऽग्नेयीव्यतिरिक्ताङ्गातिदेशपरं भवति ।

तथा ‘यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति’ इत्यस्य ‘यावत्या वाचा कामयेत तावत्या वाचा दीक्षणीयायामनुब्रूयात्’ इत्यनेन दीक्षणीयाऽऽदिप्रधानेषु स्वरान्तरविधानात् अन्यविषयत्वम् । न चास्य सामान्यात्मता, यत्किञ्चिच्छब्दस्य प्रकृतविशेषाभिधायित्वात् । तेन सावकाशनिरवकाशत्वेन अत्र बाधः ।

तथा ‘उपांशु यजुषा’ इति विहितं यजुरङ्गं उपांशुत्वं निगदेषु प्रधानभूतपरप्रत्यायनकार्यविरोधात् बाध्यते । तेन यजुःषु उपांशुत्वविधानं निगदव्यतिरिक्तयजुर्विषयं भवति ।

तथा ‘य इष्ट्या पशुना सोमेन वा यजेत, सोऽमावास्यायां पौर्णमास्यां वा’ इत्यनेन इष्टिषु पशौ सोमे च पर्वणि प्राप्ते सति एकादिदीक्षापक्षे सुत्यादीक्षणीययोः उभयोरपि पर्वसंपादनासंभवात् अन्यतरस्य बाधे कर्तव्ये सति प्रधानस्य अवैगुण्यात् दीक्षणीयायां पर्वबाधः । तेन इष्टिषु पर्वविधानं प्रधानकालाविरोधिविषयं भवति । तदेवं सर्वत्र विद्यमानस्य प्रापकस्य शास्त्रस्य अविषेशेण प्रापकत्वे प्राप्ते क्वचित् विशेषे यः प्रापकत्वापवादः स प्राप्तबाधः ।

(एवं प्राप्तबाधप्रतिपादकं चतुर्दशं श्लोकं व्याख्याय, अप्राप्तबाधप्रतिपादकं पञ्चदशं श्लोकं व्याचष्टे—) यत्र तु कल्पनीयस्य अलब्धात्मकस्य शास्त्रस्य कल्पनाऽभिमुखस्य शीघ्रेण तद्विषयापहारात् कल्पनामूलं निकृत्य तन्निरोधः क्रियते, तत्र अप्राप्तबाधः । यथा श्रुतिलिङ्गादिषु । नहि ‘ऐन्द्या इन्द्रमुपतिष्ठते’ इति शास्त्रमस्ति, यस्य प्राप्तस्य ‘ऐन्द्या गार्हपत्यमुपतिष्ठते’ इत्यनेन बाधः स्यात् । नहि लिङ्गमात्रं स्वत एव प्रमाणम्, तत्कल्पिता तु श्रुतिः अत्र प्रमाणम् । तत्कल्पनायामपि न तन्मात्रं प्रमाणम्, किन्तु **‘मन्त्राकाङ्क्षासनाथं तत् प्रमाणं श्रुतिकल्पने । तां चान्यत्र नियोगेन प्रत्यक्षा कृन्तति श्रुतिः ॥’ १६ ॥** तेन प्रत्यक्षेण शास्त्रेण साकाङ्क्षमन्त्रलिङ्गकल्प्यश्रुतिविषयं मन्त्रमपहृत्य गार्हपत्योपस्थाने विनियुज्य मन्त्रं निराकाङ्क्षीकुर्वता कल्पनामूलभूता आकाङ्क्षा निराकृता इति न तदधीनात्मलाभा श्रुतिः उन्मज्जितुं क्षमते । एवमन्यत्रापि अप्राप्तबाधो द्रष्टव्यः । तत् उपपन्नः प्राप्ताप्राप्तबाधविवेकः ।

प्रत्युत एकदेशिमते एव प्राप्तबाधानुपपत्तिः । नहि तस्य किञ्चित् प्राप्तं बाध्यते । अङ्गत्वं हि प्राप्तम्, न तत्

बाध्यते । यत्तु अनुष्ठानं बाध्यते, न तत् प्राप्तम्, इति न प्राप्तबाधसंभवः । तस्मात् यथोक्तमेव न्याय्यम् । यत्तु कृत्स्नप्रापी चोदको न किञ्चित् वर्जयितुमर्हतीति । सत्यं अयमेवास्य स्वभावः । स तु स्वभावः प्रबलेन हेतुना प्रतिबध्यते सामान्यशास्त्रस्येव विशेषशास्त्रेण । 'तद्वर्जं तु वचनप्राप्तेः' (३।६।१।३) 'न चोदकार्थकात्स्न्यात्' (३।६।१।८ । वस्तुतस्तु 'न तुल्यत्वात्' ७, 'चोदनार्थकात्स्न्यात्तु० ८ इति सूत्रपाठः। प्रकृतग्रन्थेऽपि पूर्वं 'चोदनार्थकात्स्न्यात्' इत्येव उक्तम् । तस्मादत्र अन्यथा मुद्रणं लेखकप्रमादः स्यात्) इत्यपि स्वभावत एव कतिपयविषयत्वमाशङ्क्य निराकृतं इति वेदितव्यम् । यद्यपि चात्र न कारणदोषेण मिथ्यात्वं सामान्यशास्त्रज्ञानस्य उपलक्षयितुं शक्यते, तथापि बाधकेन प्रत्ययान्तरेण तदुपलक्षणं भवति । द्वयमपि हि तदुपलक्षणत्वेनोक्तम् 'यस्य च दुष्टं करणम्, यत्र च मिथ्येति प्रत्ययः, सः असमीचीनः प्रत्ययः' इति (भाष्यं १।१।५ वृत्तिग्रन्थादौ पृ. २८)। तत्र वैदिकेषु संभवात् बाधकप्रत्यय एव तदुपलक्षणम्, न करणदोषज्ञानमसंभवात् । आह च 'यत्तु कारण– (करण–) दोषज्ञानं द्वितीयमुपलक्षणमुक्तम्, तत् लोकविषयत्वात् न वेदे संभवति इति नोपन्यस्तम्' इति । **कथं पुनः** अदुष्टेन करणेन मिथ्याज्ञानं जन्यते ? नहि बाधकेन मिथ्याज्ञानं जायते, जातस्य तु मिथ्यासतः तत्त्वमसौ ज्ञापयति । तज्जन्म तु कारणदोषादेव । **सत्यमेव तत्** । अत्रापि हि कारणदोषो विद्यते एव । यद्यपि असौ अपौरुषेयस्य वेदस्य न स्वगतः कश्चित् दोषो विद्यते, तथापि प्रतिपत्तुरेव सामान्यापहृतबुद्धित्वात् अपवादानिरूपणाच्च न्यायाभासेभ्यः प्रसरत् मिथ्याज्ञानं जायते । अत एव सम्यक् न्यायनिरूपणार्थं मीमांसाशास्त्रमर्थवत् भवति । न चायं दोषो बाधकात् प्राक् अङ्गुल्यवष्टम्भादिव निरूपयितुं शक्यते इति बाधकैकोपलक्षणीयत्वं मिथ्यात्वस्य अभिहितम् । इति सर्वमवदातम् ।

तत् सिद्धं यत् 'एवमिदं' इति निश्चितं ज्ञानं कारणान्तरेण मिथ्येति कथ्यते । 'नास्ति लुप्तार्थानां चोदकवचनम्' । 'लुप्तप्राकृतप्रयोजनं न चोदकश्चोदयति' इत्यादिभाष्यविनाशात् (भाष्यं १०।१।१।२) । 'अपि तु वाक्यशेषः स्यात्' (१०।८।१।४) इति च सूत्राविनाशात् लुप्तार्थप्रत्याम्नातप्रतिषिद्धेभ्यः अङ्गेभ्यः चोदकस्य समुत्कालनम् ।

'कृष्णलादिषु हन्त्यादेरनङ्गत्वं तथा क्रिया ।
नियमाद्दृष्टसिद्धिस्तु नियमान्न स्वरूपतः ॥' १७ ॥

तत्र एतत् स्यात्, यद्यपि कृष्णलेषु हन्तिः दृष्टार्थं न प्राप्यते, तथापि नियमाद्दृष्टसिद्ध्यर्थं किं न प्राप्यते इति । **तन्न** । तत्र तस्यासंभवात् । एवं हि तत् कल्प्यते 'अवघातेनैव निष्पाद्यमानास्तण्डुलाः अपूर्वं साधयन्ति' इति । न चैवमिह संभवतीति, अप्रयोजकत्वाच्च । नहि अवघातस्य नियमाद्दृष्टं प्रयोजकम् । दृष्टप्रयोजनेनैव तावत् स्वरूपे प्राप्ते नियममात्रं तेन प्रयुज्यते । तेन यद्यपि चरुषु पेषणमप्रतिषिद्धम्, पिष्टस्यापि चरुत्वाविघातात्, तथापि प्रयोजनाभावात् पेषणस्वरूपस्य अप्राप्तेः तदधीनत्वाच्च नियमप्रयुक्तेः अननुष्ठानम् । सत्यपि च प्रयोजने प्रयोजकाभावात् पुरोडाशकपालादेः चर्वादिषु बाध इति । एतेन चित्रेष्ट्यां तण्डुलेषु प्राकृतस्य व्रीहियवप्रकृतिद्रव्यनियमस्य बाधो व्याख्यातः । तथाहि **'प्राप्ते प्रकृत्युपादाने नियमोऽत्र विधीयते । लौकिका एव तु ग्राह्यास्तण्डुलाः प्रकृतिर्न तु ॥' १८ ॥** नहि प्रकृतौ 'व्रैहेयेण हविषा यजेत' इति शास्त्रमस्ति, यदतिदेशात् तण्डुलानामपि तन्मयत्वं स्यात् । यागं प्रति 'व्रीहिभिर्यजेत' इति व्रीहीणां करणत्वं श्रूयते । कर्तृव्यापारगोचरश्च करणं भवति । यथा आहुः 'करणं खलु सर्वत्र कर्तृव्यापारगोचरः' इति । (भावनाविवेके) तेन व्रीहीनुपादाय तैर्यष्टव्यमिति । करणत्वं च तेषां उत्पत्तिविशिष्टपुरोडाशावरुद्धे यागे तत्प्रकृतित्वेन संभवति, इति एष शास्त्रार्थः 'व्रीहीनुपादाय तैर्हविः संपाद्य यजेत' इति । अत्र च 'हविः संपाद्य यजेत' इत्यनूद्य 'व्रीहिभिः' इत्येतावन्मात्रं विधीयते । एवं च सति आर्थिकं हविषस्तन्मयत्वम्, न श्रौतम् । न चैवं तण्डुलेषु संभवति । नहि तत्र प्रकृत्युपादानेन हविः संपादनीयं (हविः संपादनं) प्राप्तम्, यत् 'व्रीहिभिः' इति नियम्येत, लोकसिद्धानेव तण्डुलानुपादाय यष्टुं शक्यत्वात् । ननु प्रकृतावपि लौकिकमेव पुरोडाशमादाय यागस्य कर्तुं शक्यत्वात् कथं प्रकृत्युपादानेन हविः-

संपादनप्राप्तिः । इति चेत्, तदुच्यते '**हविःश्रपणसाध्यं हि पुरोडाशाख्यमिष्यते । स्वयं कर्तृकता तस्य श्रपणस्य विधीयते ॥**' १९ ॥ पुरोडाशरूपं हि हविः नान्तरेण श्रपणं सिध्यति । तत् किं लौकिकमेव उपादेयं स्वयमेव वा प्रकृत्युपादानेन संपादयितव्यमिति, यद्यपि उत्पत्तिवाक्यात् अनियमः प्राप्तः 'अष्टाकपालेन यजेत' इत्यस्य उभयथाऽपि उपपत्तेः, तथापि 'कपालेषु श्रपयति' इति वचनात् नान्येन श्रपितं गृह्णाति इति स्वयंकर्तृकत्वमेव तु अस्य विधेयम्, सर्वमन्यत् उत्पत्तिवाक्यसामर्थ्यसिद्धम् । कपालानि उत्पत्तिवाक्यसिद्धानि, श्रपणमपि सामर्थ्यात् नाश्रपितस्य पुरोडाशत्वमस्ति इति श्रपितद्रव्यविशेषवचनत्वात् पुरोडाशचर्वादिशब्दानाम् । ततः स्वयंकर्तृकतैवात्र विधेया । यथा आह भगवान् **भाष्यकारः** 'कपालेषु श्रपयति इति वचनात् नान्येन श्रपितं गृह्णाति' (१।४।६।९ पृ. ३४१) इति तद्बलेन प्रकृत्युपादानं प्राप्नोति इति । नहि अन्यथा स्वयं श्रपयितुं शक्यते । एवं प्रकृतिद्रव्योपादाने प्राप्ते किमवस्थं किं रूपं च द्रव्यमुपादेयं इत्याकाङ्क्षायाम्, व्रीहिशब्देन सतुषजातिविशेषवाचिना तन्नियमात् पिष्टतण्डुलावस्थयोः नीवारादीनां च व्यावृत्तिः । यदि तु अनेनैव शास्त्रेण 'प्रकृतिमुपादाय हविः संपादयेत्, तच्च व्रीहिभिः' इति विधीयते, ततो गौरवम् । 'कपालेषु श्रपयति' इति च विधेः आनर्थक्यं सत्यां गतौ स्यात्, तच्च अन्याय्यम् । तेन यत्र श्रपणम्, तत्र तस्य स्वयंकर्तृकत्वम् । यत्र च तत्, तत्र प्रकृत्युपादानप्राप्तिः । यत्र चासौ, तत्र व्रीहिनियमः । तण्डुलेषु तु श्रपणस्य अर्थलोपात् निवृत्तिः । निवृत्ते च तस्मिन् तत्र स्वयंकर्तृकत्वस्य कुतः प्राप्तिः, कुतस्तरां च प्रकृत्युपादानम्, कुतस्तमां च व्रीहिनियमः इति न तेषु व्रीहिनियमसंभवः । **ननु** अवघातसामर्थ्यात् तण्डुलेष्वपि प्रकृत्युपादानं स्यात् । **नेत्याह** । नहि 'व्रीहीनवहन्ति' इत्येतत् अवघातस्य स्वयंकर्तृकत्वसिद्ध्यर्थं अप्राप्तत्वात् व्रीह्युद्देशेन अवघातो विधीयते इति न तद्वशेन प्रकृतिद्रव्यप्राप्तिः शक्यते वदितुम् । न चासौ श्रपणवत् नियमेन प्राप्नोति, यत् तदनुवादेन स्वयंकर्तृकता विधीयेत स्वयमेव अवहन्यात् नान्येन अवहतान् गृह्णीयात् इति नखनिर्लुञ्चनादिभ्योऽपि वितुषीकरणसंभवात् ।

एतेन पेषणं व्याख्यातम् । तस्यापि नियमेन अप्राप्तेः । अवघातेनापि हि विक्लिन्नास्तण्डुलाश्चूर्णीभवन्ति ।

तदेवं क्रमः । प्रथमं तावत् पुरोडाशो विनियुज्यते, ततस्तस्य यथाकथञ्चित् उपादाने प्राप्ते श्रपणविधिवशात् प्रकृत्युपादानेन स्वयं संपादनम्, ततः प्रकृतिविशेषापेक्षायां 'व्रीहिभिर्यजेत' इत्यनेन अनन्तरतत्प्रकृतिपिष्टव्युदासेन पिष्टव्यवहिततण्डुलव्युदासेन व्यवहिततरनीवारादिव्युदासेन च व्रीहयो विधीयन्ते, ततः तैः कथं हविरुत्पाद्यम्, इत्यपेक्षायां अवघातपेषणादिविधानम् । तण्डुलेषु तु अर्थलोपात् श्रपणनिवृत्तौ तन्मूलप्रकृत्युपादानव्रीहिनियमावघातादीनां क्रमेण निवृत्तिः, इति लोकसिद्धा एव यत्किञ्चिज्जातीयकवरकादिवर्जं उपादेयाः । यत्र तु अपुरोडाशेऽपि श्रपणेन अर्थः चरु–धाना–मन्थ–लाज–पृथुक–यवाग्वादिषु, तत्र भवत्येव व्रीहिनियमः अवघातादयश्च संस्काराः । इति सूक्ष्ममिदं न्यायरत्नं भाष्यवार्तिकपरिचयोपचितचेतोलोचनसंस्कारैः विवेक्तुं शक्यते, न स्थूलदृष्टिभिरिति । श्लोकौ अप्यत्र वार्तिककारीया गायन्ति 'तण्डुलेभ्योऽर्थलोपेन श्रपणं चेन्निवर्तते । श्रपणस्य निवृत्तस्य स्वयंकर्तृकता कथम् ॥ तदधीनमुपादानं प्रकृतेः स्यात् कथन्तराम् । तद्वशो व्रीहिनियमस्तदभावे कथन्तमाम् ॥' इति ।

तदेवं प्राकृतानामर्थलोपादिना बाधात् वैकृतकार्यापत्तिशून्यानां आमनहोमादीनां अभ्युच्चयाभिधानाच्च प्रयोगेयत्ता दशमे चिन्तितेति ।

इति श्रीन्यायरत्नमालायां अङ्गनिर्णये चतुर्थः परिच्छेदः ॥

* **दशमाद्यपूर्वपक्षन्यायेन** सामस्वरूपं उत्तरयोः प्रापितं अविकृतस्वरूपमेव सत् प्राकृतं अप्राकृतं दृष्टमदृष्टं वा कार्यं कुर्यात् । **शा.** ९।२।९ । दशमाद्यपूर्वपक्षन्यायस्तु 'स्वरूपेण पदार्थानामतिदेशः' इति । **सोम.**

* **दशमाद्यसिद्धान्तन्यायः** । 'सौर्यादौ कथम्भावाकाङ्क्षाबलात् उपकारातिदेशः' इति दशमाद्यसिद्धान्तस्य अत्राप्रसरात् । **सोम.** ९।२।९.

* **दशरात्रस्य आद्यन्तौ द्वौ अग्निष्टोमौ** । **वि.** ८।३।५. * दशरात्रस्य प्रवृत्तिः द्विरात्राद्यहर्गणेषु । **भा.**

१०।५।४।१२–१३, * दशरात्रे चयनं कर्तुं शक्यते। १०।५।२३।७८.

* **दशहोता** व्याहृतयः हिंकारः सामिधेन्यः इति क्रमः न तु अनियमः। **संकर्ष.** ४।१।१.

* **दशापवित्रं** नाम सोमपावनार्थो वासःखण्डः। 'दशापवित्रेण ग्रहं संमार्ष्टि'। वि. ३।१।७. * 'दशापवित्रेण ग्रहं संमार्ष्टि' इत्यत्र सर्वेषामेव ग्रहाणां संमार्जनं कर्तव्यम्। नैकस्यैव ज्योतिष्टोमे। **भा.** ३।१।७। १३–१५. * 'दशापवित्रेण ग्रहं संमार्ष्टि' सर्वे ग्रहा एव संमार्जनीयाः, न तु चमसादयः। वि. ३।१।८.

* **दशाहस्य** द्वादशाहिकस्य धर्माणामनुष्ठानं द्विरात्राद्यहर्गणेषु। **भा.** १०।५।४।१२–१३.

* **दहराकाशो** ब्रह्म इति बह्वनुग्रहन्यायेन निर्णयः नोपसंहारप्राबल्येन। **पराक्रमः.** ५७।१, * **दहराकाशमहिमप्रपञ्चनस्य** तदन्तर्गतवस्तुप्रतिपत्त्यर्थत्वासंभवात् उपासनार्थत्वावश्यम्भावेन (अन्तर्गतवस्तूनां) तेषामनन्यथा सिद्धानां भूयसामनुग्रहानुरोधेन तस्मिन् यदन्तः इत्यादेः दहराकाशस्य अन्वेष्टव्यतापरत्वमवसीयते, न तदुपास्तिकालोपसंहारमात्रानुरोधेन। ५९।२.

* **दाक्षायणयज्ञः**। अयनमित्यावृत्तिरुच्यते। दक्षस्य इमे दाक्षाः तेषामयनं दाक्षायणम्। कः पुनर्दक्षः? उत्साही। **भा.** २।३।४।१०। दक्ष इति च उत्साही शीघ्रकारी यजमानः। तदीया ऋत्विजो दाक्षाः तेषामयनं प्रयोगः यज्ञाश्रितत्वात् दाक्षायण इत्युच्यते। **वा.** पृ. ५९६. * दाक्षायणयज्ञः दर्शपूर्णमासयोरेव अभ्यासरूपगुणविकारः। **संकर्ष.** १।३।६. * '**दाक्षायणयज्ञेन** यजेत प्रजाकामः' इति आवृत्तिविशिष्टौ दर्शपूर्णमासौ एव न यागान्तरम्। दर्शपूर्णमासयोरेव गुणात् फलमुच्यते। **भा.** २।३।४।५–११.

⧗ दाक्षायणयज्ञे गुणविकाराणां प्रथमप्रयोगे एव विकल्पः ॥

ईदृशानां गुणविकाराणामैच्छिको विकल्पः प्रतिप्रयोगं स्यात्, दर्शपूर्णमासनिष्ठस्य यावज्जीविकत्वस्य विकारेष्वपि प्रवृत्तेः। इति प्राप्ते, प्रथमप्रयोगे एवायं विकल्पः, कर्मधर्मरूपाणां विकारे प्रवृत्तावपि कर्तृधर्मस्य यावज्जीविकत्वस्य तदयोगात्। **संकर्ष.** १।३।९.

* दाक्षायणयज्ञे दर्शस्येव पौर्णमास्यामपि सांनाय्यस्यैव आवृत्तिः। **संकर्ष.** १।३।६.

⧗ दाक्षायणयज्ञे दर्शस्यैवावृत्तिः ॥

दाक्षायणयज्ञस्य दर्शपूर्णमासयोरेव अभ्यासरूपगुणविकारविशिष्टत्वात् दर्शस्येव पौर्णमास्याः अप्यावृत्तिः। 'पौर्णमासे संनयेत्' इति वचनेन सांनाय्यस्य पौर्णमास्यां अमावास्यायां च करणवत् 'तेषामेतं अर्धमासं प्रसुत' इति वचनेन सोमसंस्तुतस्य समस्तस्य कर्मणः कालेन सह अत्यन्तसंयोगविधानेन तस्य समस्तकर्मावृत्तिमन्तरेण अनुपपत्तेः। दर्शमात्रावृत्तौ च तद्विरोधात्। इति प्राप्ते, 'सोमः खलु वै सांनाय्यम्' इति श्रुत्या कर्मैकदेशस्यैव सोमयागत्वेन संस्तवात् तस्यैव पौर्णमासेऽपि विधानाच्च अर्धमासमित्यस्यापि तदेकवाक्यतया सांनाय्यस्यैव आवृत्तिः। **संकर्ष.** १।३।६.

* दाक्षायणयज्ञे दर्शपूर्णमासावृत्त्यात्मके सकलयोः दर्शपूर्णमासयोः द्विरावृत्तेः नावृत्ताववयवबुद्धिः। **सु.** पृ. ७८६.

⧗ दाक्षायणयज्ञे द्विरेव आवृत्तिर्नियता ॥

'अर्धमासम्' इति अत्यन्तसंयोगलक्षणद्वितीयावशादेव 'मासमधीते, क्रोशमधीते' इत्यादाविव निरन्तरमभ्यासः। इति प्राप्ते, 'द्वे अमावास्ये यजेत' इति द्वित्वं विधाय 'आग्नेयोऽष्टाकपालः पौर्णमास्यामाग्नेयोऽष्टाकपाल ऐन्द्रं दधि च पूर्वस्याममावास्यायामाग्नेयोऽष्टाकपालो मैत्रावरुण्यामिक्षोत्तरस्याम्' इति प्रयोगद्वयस्य विवरणान्न प्रत्यहमभ्यासः पौर्णमास्यां क्रियमाणस्य सांनाय्यस्यैव सोमाभिषवत्वेन अमावास्यायां क्रियमाणायाः आमिक्षायाः अनूबन्ध्यात्वेन संस्तवात् तन्मध्यपतितस्य सर्वस्यापि कालस्य सुत्यारूपत्वात् अत्यन्तसंयोगः स्तुत्यर्थत्वादपि उपपन्नः। किञ्च त्रिंशतं वर्षाणि कर्तव्यत्वेन विहितयोर्दर्शपूर्णमासयोः 'यद्यु वै दाक्षायणयाजी स्यात् पञ्चदशवर्षाणि यजेत त्रिंशद्याजी संपद्यते' इति पञ्चदशस्वेव वर्षेषु त्रिंशत्संपत्तिवचनाद् द्विरेवाभ्यासः। **संकर्ष.** १।३।७.

* दाक्षायणयज्ञे 'नानृतं वदेत्, न मांसमश्नीयात्' इत्यादिव्रतानां न विकल्पः। संकर्ष. १।३।९.

⧗ दाक्षायणयज्ञे पठितानि अन्तरालव्रतानि न प्राकृतानि ॥

तत्रैव तस्य 'एतद्व्रतम्' इत्युपक्रम्य 'नानृतं वदेत्, न मांसमश्नीयात्, न स्त्रियमुपेयात्, नास्य पल्पूलनेन वासः पल्पूलयेयुः, एतद्धि देवाः सर्वे न कुर्वन्ति' इति विहितानि व्रतानि प्राकृतव्रतानामेव गुणविकाररूपाणि दाक्षायणयज्ञस्यैव दर्शपूर्णमासगुणविकाररूपत्वेन तत्तदङ्गव्रतयोरपि तथात्वस्योचितत्वात्। इति **प्राप्ते**, चातुर्मास्यव्रतवत् अमावास्येष्टिद्वयान्तराले अपरपक्षे एवैतत् व्रतम्, प्राकृतं तु प्रतिप्रयोगं व्रतोपायनादिव्रतविमोकान्तकालमेवेति तयोर्भेदात्। 'स एतमर्धमासं यज्ञो विततस्तस्यैतद्व्रतम्' इत्यर्धमाससंनियोगशिष्टत्वात्। एतत्प्रकरणे एव पठितस्य 'ऋतौ भार्यामुपेयात्' इति प्रतिप्रसवस्य वैयर्थ्यापत्तेश्च। **संकर्ष. १।३।८.**

⧗ दाक्षायणयज्ञाधिकरणम्। दर्शपूर्णमासयोः दाक्षायणयज्ञादिः फलविशेषाय गुणविशेषविधिः, न कर्मान्तरम् ॥

⧗ अयनेषु चोदनाऽन्तरं संज्ञोपबन्धात्। २।३।४।५ ॥

भाष्यम्—दर्शपूर्णमासौ प्रकृत्य आमनन्ति 'दाक्षायणयज्ञेन यजेत प्रजाकामः' 'साकंप्रस्थायीयेन यजेत पशुकामः' 'संक्रमयज्ञेन यजेतान्नाद्यकामः' इति। तत्र संदेहः किं दर्शपूर्णमासयोरेव गुणात् फलम्, उत कर्मान्तरमेवंजातीयकमिति। किं प्राप्तम्? कर्मान्तरमिति। कुतः? संज्ञोपबन्धात्। यद्यपि प्रकरणात् यजतिशब्दाच्च स एव पूर्वप्रकृतो याग इति गम्यते, तथापि नासौ एवंसंज्ञक इति यागान्तरं विधेयं गम्यते।

वा—युक्तं दध्नेन्द्रियकामस्येति गुणात् फलम्। नहि तत्र दध्यादीनां होमसामानाधिकरण्यं येन संज्ञालक्षणो भेदः स्यात्। दाक्षायणयज्ञादीनां तु यागसामानाधिकरण्यात् पूर्वयागे च अप्रयुक्तत्वात् आत्मरूपावच्छिन्नयागान्तरप्रतिपादनमविरुद्धम्। न च कश्चिद्दध्यादिभिस्तुल्य एवंसंज्ञो गुणः प्रसिद्धः। तस्मात् भावार्थाधिकरणन्यायेन फले यागविधानात् यागान्तरम्।

अगुणा च कर्मचोदना। ६ ॥

भाष्यम्— न चात्र गुण उपरुध्यते कश्चित् यद्विधानार्था चोदना भवेत्। यदि च न यागान्तरम्, आनर्थक्यमेव। अपि च, यदि गुण उपबध्येत, ततो यागगुणसंबन्धो गम्यते, इति तदनुष्ठानं विहितं गम्यते।

वा— विधिशक्तिः क्रियातो नोत्तारितेत्यभिप्रायः।

समाप्तं च फले वाक्यम्। ७ ॥

भाष्यम्—इतश्च कर्मान्तरम्। कथम्? फले समाप्तं वाक्यम्। 'प्रजाकामो यजेत' इति प्रजाकामस्य याग उपायो विधीयते। विधीयते चेत् कर्मान्तरम्।

वा— फलस्यानुपादेयत्वान्न 'व्रीहिभिर्यजते' इत्यादिवत् कर्मोद्देशेन विधिः संभवति इति अवश्यं कर्म तत्र विधातव्यम्। ततश्च सिद्धो भेदः।

विकारो वा, प्रकरणात्। ८ ॥

भाष्यम्— दर्शपूर्णमासयोरेव विकार एवंजातीयकः स्यात् दाक्षायणयज्ञादिः। एवं प्रकरणमनुगृहीतं भवति।

वा— सत्यपि फलं प्रति विधाने 'संनिधौ त्वविभागात्' इत्यनेन अकर्मान्तरता। दध्यादिवच्च गुणफलसंबन्धप्रत्ययात् प्रकृतयागबुद्धेः। यत्तु गुणो न प्रसिद्ध इति, नैष दोषः। उक्थ्यादिवत् प्रकरणलभ्यत्वात्। एवंविधा च ('द्वे पौर्णमास्यौ यजेत द्वे अमावास्ये, सह कुम्भीभिरभिक्रामेत्' इत्यादिना) वाक्यान्तरेण गुणरूपविधानादस्ति प्रसिद्धिः। दध्यादिवदेव अत्रापि वैयधिकरण्येनैव संबन्धः। किञ्च '**अवस्थान्तररूपत्वाद्दध्यादेरविलक्षणाः। प्रत्यासत्तेः प्रतीयन्ते सामानाधिकरण्यवत् ॥**' तस्मात् दर्शपूर्णमासयोरेव अवस्थाऽन्तररूपात् विकारात् फलं न कर्मान्तरात्। एवं च प्रकरणविच्छेदो नात्यन्तं कृतो भविष्यति। यद्यपि फलवतः कथम्भावेन अग्रहणादेतद्विषये अस्त्येव प्रकरणबाधः, तथापि आश्रयत्वेन संबन्धादुत्तराणि च वाक्यानि प्रति अनुषङ्गसिद्धेरनुग्रह इत्युच्यते।

लिङ्गदर्शनाच्च ॥ ९ ॥

भाष्यम्— लिङ्गमपि एतमर्थं दर्शयति 'त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत । यदि दाक्षायणयाजी स्यात् । अथो अपि पञ्चदशैव वर्षाणि यजेत । अत्र ह्येव सा संपद्यते । द्वे हि पौर्णमास्यौ यजेत द्वे अमावास्ये । अत्र ह्येव खलु सा संपद्भवति' इति । यदि दाक्षायणयज्ञो दर्शपूर्णमासावेव, एवं तर्हि त्रिंशत्संपदा प्रयोजनम् । ततस्तस्य त्रिंशत्संपदनुग्रहो युज्यते । तस्मादपि न कर्मान्तरम् ।

वा— त्रिंशत्संपत्पूरणं पौर्णमास्यमावास्यासंकीर्तनं वा भेदं बोधयति । नहि दार्शपूर्णमासिकः त्रिंशद्वर्षपक्षः कर्मान्तरेण पूरयितुं शक्यते । न च नियमस्यातिदेशः । येन कर्मान्तरस्येव एतत् पञ्चदशवर्षपक्षविधानं स्यात् । न च दाक्षायणयाजित्वेन निमित्तेन दर्शपूर्णमासयोरेव पञ्चदशवर्षपक्ष उपजायते, संबन्धाभावात् । द्वे हि पौर्णमास्यौ द्वे अमावास्ये इति चास्य अनुपपत्तिः ।

गुणात् संज्ञोपबन्धः । १०॥

भाष्यम्— यदुक्तं संज्ञोपबन्धात् कर्मान्तरमिति । यदि दाक्षायणशब्दो न केनचिदपि प्रकारेण दर्शपूर्णमासवचनः शक्यते कल्पयितुम्, तत उच्येत कर्मान्तरमिति । शक्नोति तु आवृत्तिगुणसंबन्धात् वदितुम् । अयनमिति आवृत्तिरुच्यते । दक्षस्य इमे दाक्षाः, तेषामयनं दाक्षायणम् । कः पुनर्दक्षः ? उत्साही । तथा साकंप्रस्थायीयेऽपि, सहप्रस्थानं गुणसंबन्धः । एवं सर्वत्र । शक्यते चेत् दर्शपूर्णमासयोर्गुणसंबन्धो वदितुम्, किमिति स एव यागः प्रतीयमानः अन्य इत्युच्यते, किमिति वा प्रकरणं बाध्यते ।

वा— उत्पत्तिसंयोगे पूर्वासंबन्धे च संज्ञा भेत्त्री भवति । न च इयमुत्पत्तिसंयुक्ता 'अथैष ज्योतिः' इत्यादेरिव प्रक्रमाभावात् । संभवति च पूर्वकर्माश्रितगुणवाचित्वेनैव इति न भिनत्ति । दाक्षायणयज्ञे हि वाक्यान्तरवशात् अवयवप्रसिद्धेश्च अभ्यस्तत्वमभिधीयते । तेन च प्रकरणात् दर्शपूर्णमासाश्रितेनैव फलं साध्यते । दक्ष इति च उत्साही शीघ्रकारी यजमानः, तदीया ऋत्विजो दाक्षाः । तेषामयनं प्रयोगो यज्ञाश्रितत्वात् दाक्षायण इत्युच्यते । साकंप्रस्थायीयेऽपि सांनाय्यमनवदाय कुम्भीभ्यामेव साकं प्रस्थीयते इत्येवमभिधीयते । तस्मान्न प्रकृतप्रत्यभिज्ञानबाधः ।

समाप्तिरविशिष्टा । ११ ॥

भाष्यम्— यदुक्तं फले वाक्यं समाप्तम्, प्रजाकामादेर्यागानुष्ठानं विधीयते इति । नैवम् । अविशिष्टा फले समाप्तिः । यानि अन्यानि मुक्तसंशयानि गुणे फलस्य विधायकानि वाक्यानि गुणस्य फलवचनानि पर्यवसितानि, यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्येवमादीनि तैरेतदविशिष्टम् । अत्रापि हि गुणात् फलमुच्यते । कथम् ? नैतदेवं संबध्यते प्रजाकामस्य यज्ञमनुतिष्ठेदिति । कथं तर्हि ? प्रजाकामस्य आवृत्तियज्ञमनुतिष्ठेदिति । आवृत्तियज्ञ इति यज्ञावृत्तिसंबन्धः अनुष्ठातव्यो निर्दिश्यते, न यज्ञः । तस्मात् प्रकृतयोर्दर्शपूर्णमासयोः गुणात् फलमुच्यते, न यागान्तरं विधीयते इति । एवं साकंप्रस्थायीये संक्रमयज्ञे च द्रष्टव्यमिति ।

वा— यद्यपि कर्मोद्देशेन न फलं विधीयते, तथापि कर्मफलसंबन्धाभावात् अकर्मान्तरता । यथैव हि कर्मणः फलमिति भावार्थाधिकरणे साधितम्, तथैव 'अतुल्यत्वात्तु वाक्ययोः' इत्यत्र गुणफलसंबन्धपर्यवसायित्वमपि उक्तमिति संदेहे सति पदान्तरानुग्रहार्थं गुणादेव फलम्, न कर्मणः इति सिद्धम् ।

शा—(दाक्षायणादिः कर्मान्तरम्–) इति प्राप्ते अभिधीयते । '**स्यादेवं नामधेयत्वे, गुणस्त्वत्र विधीयते । फलस्य साकंप्रस्थानमावृत्तिश्चेत्यभिन्नता ॥**'

सोम— वसन्तादिवाक्येषु आधानमिव अत्रापि कर्मान्तरं विधेयं इति प्रत्यवस्थानात् **संगतिः** । **प्रयोजनं** पूर्वपक्षे दर्शपूर्णमासप्रयोगात् बहिः सौर्यादिवत् दाक्षायणयज्ञादेः प्रयोगः, तथा दाक्षायणयज्ञस्य पञ्चदशवर्षप्रयोगेण दर्शपूर्णमासयोः त्रिंशद्वर्षप्रयोगाबाधः । सिद्धान्ते तु तस्यैव गुणविकृतप्रयोगमात्रम्, त्रिंशद्वर्षप्रयोगबाधश्चेति । **सूत्रार्थस्तु**- अयनेषु दाक्षायणादिवाक्येषु संज्ञोपबन्धात् कर्मान्तरं स्यात् इति ।

वि— 'यद् दाक्षायणयज्ञेन स्वर्गकामो यजेत तत् । कर्मान्तरं गुणो वोक्तदर्शादौ फलसिद्धये ॥, गुणस्यास्या-

प्रसिद्धत्वात् कर्मभेदोऽत्र संज्ञया ।, गुणो व्युत्पत्तिशेषाभ्यामावृत्त्याख्यो न नाम तत् ॥ '

भाट्ट— दर्शपूर्णमासयोः 'दाक्षायणयज्ञेन स्वर्गकामो यजेत ' इति श्रुतम् । तथा ' साकंप्रस्थायीयेन यजेत पशुकामः ' इति च । तत्र दाक्षायणादिपदवाच्यस्य गुणस्य लोके अप्रसिद्धत्वात् उद्भिदादिवत् नामधेयत्वावगतेः संज्ञया अभ्यासाद्वा कर्मान्तरं विधीयते फलसंबन्धस्यापि सार्वकाम्यवाक्यवशादेव प्राप्तत्वेन अन्यपरत्वाभावात् । **इति प्राप्ते, अभिधीयते** । यद्यपि लोके गुणो न प्रसिद्धः, तथापि दक्षस्य यजमानस्य इमे दाक्षाः ऋत्विजः, तत्कर्तृकं अयनं प्रयोगावृत्तिर्यस्य यज्ञस्येति व्युत्पत्त्या आवृत्तिपरत्वावगतेः, सह प्रस्थानं यत्रेति व्युत्पत्त्या च सहत्वपरत्वावगतेर्नातिरिक्तशक्तिकल्पनया नामधेयत्वाध्यवसानम् । अतः अप्राप्तावृत्तिरूपः सहत्वरूपश्च गुण एव फलोद्देशेन विधीयते । आवृत्तिश्च कियतीत्यपेक्षायां ' द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत ' इति वाक्येन विशेषविधानात् द्विरावृत्तिरेव । सहत्वं च प्रस्थाने केनेत्यपेक्षायां ' सह कुम्भीभिरभिक्रामेत् ' इति वचनात् कुम्भीभ्याम् । अनेनैव च वचनेन सहत्वाश्रयत्वमभिक्रमणस्य विदधता अवान्तरप्रकरणाभावेऽपि तस्याश्रयत्वसिद्धिः । आवृत्तेस्तु प्रकरणात् दर्शपूर्णमासावेवाश्रयः । अतोऽत्र संज्ञात्वाभावात् गुणफलसंबन्धपरत्वेन च अभ्यासाभावान्न कर्मान्तरम् । वस्तुतस्तु ' पूर्वपदात् संज्ञायामगः ' (पा० ८।४।३ पूर्वपदस्थान्निमित्तात् परस्य नस्य णः स्यात् संज्ञायाम्, न तु गकारव्यवधाने द्रुणसः, ऋगयनम्) इति स्मृत्या संज्ञात्वाभावे णत्वानापत्तेः दाक्षायणयज्ञपदे संज्ञात्वावश्यंभावेऽपि अवयवार्थप्रतीत्या योगरूढिस्वीकारादवयवार्थरूपावृत्तिः अप्राप्तत्वात् फलोद्देशेन विधीयते इति न विरोधः ।

मण्डन—'भेदो दाक्षायणे नहि ।'

शंकर-- ' दाक्षायणगुणात् फलम् । '

अत्र कुतूहलम्– तदेतदपरे न क्षमन्ते । नहि दर्शपूर्णमासयोः संनिधौ दाक्षायणयज्ञादिविधिः, येन तत्र गुणविधानं स्यात् । कौषीतकिब्राह्मणे हि तृतीयेऽध्याये दर्शपूर्णमासौ अनुक्रम्य चतुर्थेऽध्याये पूर्णमासे संस्थिते अनुनिर्वाप्यं वैमृधम्, दर्शे संस्थिते अदितियागं च विधाय अभ्युदितेष्टिं अभ्युद्दृष्टेष्टिं च विधाय ' अथातो दाक्षायणयज्ञस्य । दाक्षायणयज्ञेन एष्यन् फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्ते ' इत्यादिना दाक्षायणयज्ञसाकंप्रस्थायीयादीनि बहूनि कर्माणि अनुक्रान्तानि । तत्र अथशब्देन प्रकरणविच्छेदात् ' अथैष ज्योतिः ' इत्यादिवत् उत्पत्तिशिष्टसंज्ञाऽन्तरकत्वात् प्रकृतकर्मणि संज्ञाऽन्तरस्य समावेशासंभवाच्च कर्मान्तरत्वमेव युक्तम् । नापि दाक्षायणशब्दः दर्शपूर्णमासयोः आवृत्तिगुणयोगात् वर्तितुमर्हति, नहि दक्षस्य इमे दाक्षाः ऋत्विजः, तत्कर्तृकमयनं आवृत्तिः इति अवयवव्युत्पादनमुचितम्, येन वाक्यान्तरप्रसिद्धगुणपरत्वं स्यात् । ' दक्षो वै पार्वतिः एतेन यज्ञेनेष्ट्वा सर्वान् कामानवाप ' (कौषी. ४।४), ' स वै दक्षो नाम तत्, यदनेन सोऽयजत, तस्मात् दाक्षायणयज्ञ इत्याख्या ' इति कौषीतकिवाजसनेयकयोः अन्यथैव निर्वचनावगतेः । अतो दाक्षायणशब्दस्य गुणविधिपरत्वासंभवात् कर्मान्तरत्वमेव युक्तम् । एवं शतपथब्राह्मणेऽपि हव्यवाहकाण्डे दर्शपूर्णमासौ अनुक्रम्य संभरणकाण्डे आधानं पुनराधानं अग्निहोत्रं चानुक्रम्य दाक्षायणयज्ञः अनुक्रान्तः । तथा च प्रकरणविच्छेदात् कर्मान्तरत्वमेव युक्तम् । यद्यपि तैत्तिरीयादिशाखायां दर्शपूर्णमासप्रकरणे दाक्षायणादिवाक्यं श्रुतम्, तथापि दाक्षायणादिशब्दस्य गुणपरत्वं उक्तरीत्या अनुपपन्नम्, इति कर्मान्तरत्वमेव युक्तम् । अधिकरणं तु गवामयनप्रकरणस्थोत्सर्गिणामयनादिविषयं योज्यम् । इत्यास्तां तावत् । इति ।

संक्रमयज्ञविषयकं वाक्यं यत्रक्वचिच्छाखायामन्वेषणीयम्, तत्रैव च संक्रमशब्दस्य गुणविशेषपरत्वे वाक्यशेषश्च अन्वेषणीयः इत्युक्तं एकादशे सूत्रे ।

* **दाक्षायणयज्ञाधिकरणस्य** (२।३।४) अपवादः ईषाऽऽलम्भाधिकरणम् (२।३।५) । कौ. २।३।५।१२ पृ. ४५, * इन्द्रियकामाधिकरणसिद्धस्यैव गुणफलसंबन्धस्य आक्षेपसमाधानात् न तेनास्य (दाक्षायणयज्ञाधिकरणस्य २।३।४) पौनरुक्त्यम् । कौ. २।३।४।५ पृ. ३६.

* **दाक्षायणयज्ञादिवत्** अग्निहोत्रसायंप्रातर्होमयोः सकलकर्मावृत्तिप्रज्ञानात् । वा. २।२।५।१६ पृ. ५०८. * न

च अन्त्यपक्षे तृतीयान्तेन (तस्य वायव्यासु एकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो ह्येतेन यजेत इति) एतच्छब्देन विलिङ्गसंख्यत्वात् रेवतीमात्रनिर्देशानुपपत्तिः। तेन रेवतीविशिष्टवारवन्तीयनिर्देशेऽपि **दाक्षायणयज्ञन्यायेन** अप्राप्तरेवतीमात्रस्यैव फलसंबन्धोपपत्तेः। दाक्षायणयज्ञाधिकरणम् । **भाट्ट.** २।२।१२. * 'वायव्यं श्वेतमालभेत', 'ईषामालभेत' इत्यादौ दाक्षायणयज्ञन्यायेन गुणमात्रविधानं इति पूर्वपक्षः प्रथमः । **कौ.** २।३।५।१२ पृ. ४५.

* **दाक्षिणानि** । न च दाक्षिणानि नाम गुणः कश्चित् प्रसिद्धः इति सामानाधिकरण्यात् नामधेयत्वमेव युक्तम् । **वा.** २।२।१।१ पृ. ४६६ । दाक्षिणशब्दस्य दक्षिणाकालवाचित्वात् प्रसिद्धेः विधौ चावाचकशब्दायोगात् अर्थाक्षिप्तसाध्यांशसामानाधिकरण्याच्च नामत्वावगतेः कर्मण एव विधेयत्वात् सिद्धो भेदः । **सु.** पृ. ७१०.

* **दाक्षिणाग्निकौ** होमौ पिष्टलेपफलीकरणहोमौ । **के.** ५।१।१५।२८.

⌛ **दाक्षिणाग्निकहोमानपकर्षाधिकरणम्** । ज्योतिष्टोमे अनुयाजोत्कर्षेऽपि दाक्षिणाग्निकयोः पिष्टलेपफलीकरणहोमयोर्नोत्कर्षः ॥

प्रासङ्गिकं च नोत्कर्षेदसंयोगात् । ५।१।१५।२८॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति' इति । अनुयाजा उत्कृष्यमाणा दाक्षिणाग्निकौ होमौ उत्कर्षन्ति, नेति संशयः । संबन्धादुत्कर्षन्ति इति प्राप्ते, उच्यते । नैतौ उत्क्रष्टुमर्हन्ति, येन तयोस्तु अनुयाजाः संबद्धाः तेन प्रयुक्ताः, परकीयैस्तेषामर्थो निर्वर्तित इति । पदार्थानां च क्रमो भवति, न पदार्थप्रयोजनानाम् । यौगपद्येन हि पदार्था उपकुर्वन्तीति वक्ष्यामः । पदार्थानां चोत्पत्तिः क्रमवती । पृथक्शब्दत्वात् उत्पत्तेः। न पदार्थप्रयोजनस्य, युगपत् प्रयोगवचनेनाभिहितत्वात् । अतः अनुयाजोत्पत्तेः उत्कर्षिकाया अभावाद् दाक्षिणाग्निकौ होमौ नोत्कृष्येयातामिति । अपि च अनुयाजमात्रमुत्कृष्य कृतार्थे शब्दे दाक्षिणाग्निकयोर्होमयोः स्वक्रमबाधो न भविष्यतीति ।

टुप्— (सिद्धान्तमाह–) यद्यपि प्रकृतौ अनुयाजोत्तरकालीनौ (दाक्षिणाग्निकौ) होमौ दृष्टौ, तथापि अनुयाजोत्कर्षे नोत्कृष्येते । कुतः ? असंयोगात् । कथमसंयोगः ? (प्रसङ्गन्यायं दर्शयितुं प्रश्नः । प्रसङ्गन्यायं दर्शयति–) उपमितलक्षितप्रापणेन (उपमितेन वाक्यान्तरेण लक्षिता या इतिकर्तव्यता तस्याः प्रापणेन) अग्नीषोमीयात् (पशोः) अयं (सवनीयः) धर्मान् गृह्णाति । तत्रायं (सवनीयः) त्रिष्वपि सवनेषु विप्रकृष्यते ('वपया प्रातःसवने चरन्ति' इत्यादिवचनात्) । इतिकर्तव्यता चास्य तद्विप्रकर्षादेव विप्रकृष्यते । पदार्थप्रयोजनानां एककालत्वात् (एकस्मिन्नेव काले संभूय सर्वैरवान्तरोपकारैः प्रधानानि उपकर्तव्यानि । तेन) यावत् क्रतूपकारः (सर्वाङ्गजन्यः) अभिनिर्वर्त्यते, तावत् अग्न्यन्वाधानादिजनितः (अवान्तरः) उपकारः आशेते । यावत् पशोः अन्त्यः पदार्थः, तावदाद्यः (अवान्तरोपकारद्वारेण पदार्थः अवतिष्ठते), अन्त्योऽपि यावदाद्यः । एवं वितते पशौ मध्ये निपतन् पुरोडाशः उपमितलक्षणप्रापणेन अग्नीषोमीयपुरोडाशात् यागगतं व्यापारं (विचित्रप्रकारं) अभिलषन् तमुत्पादयति प्रापयति च । (ननु सवनीयस्य पशोराग्नेयत्वात् तत्पुरोडाशस्यापि आग्नेयविकृतित्वे सति, कथं अग्नीषोमीयविकृतित्वमुच्यते । नैष दोषः । अग्नीषोमीयपशुपुरोडाशस्तावत् अग्नीषोमीय एव । स एव च सवनीयपशुपुरोडाशेऽपि अतिदिष्टः । तेन सवनीयपशुपुरोडाशस्य देवतासाम्यात् आग्नेयत्वेऽपि पूर्वावगताग्नीषोमीयप्रकृतिकत्वं नापैति, इति युक्तमुक्तं अग्नीषोमीयपुरोडाशयागगतं व्यापारं अभिलषन् इत्यादि) । प्रापितान् (च) समस्तान् (प्रकारान्) समीपे प्रयोगवचनः उपसंगृह्णाति (योजयति । तत्रापवादमाह–) तत्र पशुना प्रयुक्तस्य यागगतव्यापारस्य समीपे गृहीतत्वात् (पुरोडाशः स्वयं) समीपे न करोति (नहि अन्यप्रयुक्तेनापि कार्यसिद्धौ सत्यां स्वयंप्रवृत्तिर्युक्ता । अस्यापि अपवादमाह–) उपसंगृह्णता तु पशुना ये (अंशाः) न समीपे कृताः, तेषां (पिष्टलेपादीनां पशुना उपसंग्रहाभावात्) उत्पत्तिप्राप्त्युपसंग्रहान् अपेक्षते (पुरोडाशः । इतरेषां तु उत्पत्तिमात्रं करोति नोपसंग्रहम्) । तत्रासौ व्यापारः

अपूर्वमन्तरेण नोपपद्यते । अपूर्वाण्यपि पदार्थैर्विना न सन्ति । इति अन्यथाऽनुपपत्त्या (व्यापारप्रयोजकेन–) विधिना पदार्था आक्षिप्यन्ते । यांस्तु (परप्रयुक्तान्) प्रसङ्गेन उपकारान् गृह्णाति, तेषु तस्य (प्रसङ्गिनो विधेः) व्यापारो नास्ति, येनैव ते प्रयुक्ताः तस्यैव (तन्त्रिणः पशुविधेः) तत्र व्यापारः । (प्रकृतमनुत्कर्षं दर्शयति–) पदार्थानां च क्रमः आकाङ्क्ष्यते, न पदार्थप्रयोजनानाम् । तस्मात् दाक्षिणाग्निकहोमयोः (पुरोडाशार्थयोः) अनुयाजानां च (पाशुकानां) नास्ति सः (क्रमः) । अनुयाजजनितः तेन (पुरोडाशेन) उपकारो गृह्यते, न पदार्थः । अतः परकीयैः पदार्थैरुत्कृष्यमाणैः न दाक्षिणाग्निकौ होमौ उत्कृष्येते ।

अत्र (भाष्य–) ग्रन्थः ‘ पदार्थानां च क्रमो भवति, न पदार्थप्रयोजनानाम् । यौगपद्येन हि पदार्था उपकुर्वन्ति इति वक्ष्यामः ’ इति । कथमित्याकाङ्क्षायां यौगपद्येन उपकारा गृह्यन्ते । तत्र यस्मिन्नेव क्षणे एकः (उपकारः) संबध्यते, तस्मिन्नेव द्वितीयादयोऽपि । तस्मात् कथम्भावग्रहणवेलायां नास्ति क्रमः । अत्र अपरः (भाष्य–) ग्रन्थः ‘ पदार्थानां चोत्पत्तिः क्रमवती पृथक्शब्दत्वादुत्पत्तेः, न पदार्थप्रयोजनस्य ’ इति । (तत् व्याचष्टे–) पदार्थग्रहणे हि क्रमो भवति (अनेन उत्पत्तिः क्रमवती इति व्याख्यातम् । पृथक्शब्दत्वादुत्पत्तेः इत्येतत् व्याचष्टे–) शब्देन हि पदार्थोऽवबोध्यते, एवं द्वितीयस्तृतीयोऽपि (शब्देनैव) तत्र (उत्पादकस्य शब्दस्य क्रमवत्त्वात्) अवश्यं भवितव्यं क्रमेण अनुष्ठानावबोधेन । (न पदार्थप्रयोजनस्य इत्यस्यार्थमाह–) यः पुनरुपकारस्तदीयः, स एकः (एकेन प्रयोगवचनेन एकस्मिन्नेव काले एकस्येत्थंभावस्य विशेषणतया कल्प्यमाना उपकाराः एकतामापन्ना भवन्ति) । तस्मिन् (युगपत्) गृह्यमाणे कीदृशः क्रमः (नास्तीत्यर्थः) । अतो न (पाशुक–) प्रयोगवचनापरिगृहीतानां तन्त्रमध्यपतितानामपि (पिष्टलेपादीनां तदीयैरनुयाजैः) अस्ति क्रमः । तस्मात् स्वस्थानावेव दाक्षिणाग्निकौ होमौ (नोत्कृष्येते इति) ।

सोम—पूर्ववैषम्येण संगतिः । सूत्रार्थस्तु– प्रसङ्गादुपकारकं प्रासङ्गिकं पाशुकानूयाजादिकं दाक्षिणाग्निकहोमादीन् नोत्कर्षेत् असंयोगादिति ।

वि— ‘ सवनीये पिष्टलेपफलीकरणहोमकौ । उत्क्रष्टव्यौ न वा, ऽऽद्यः स्यादनुयाजोत्तरत्वतः ॥, पश्वर्थाः स्युरनूयाजाः पुरोडाशगताविमौ । उभौ होमौ प्रयोगस्य भेदान्नोत्कर्षमर्हतः ॥’

भाट्ट— सवनीयपशुतन्त्रं सवनीयहविःषु प्रसज्यते । दैक्षपशुतन्त्रं च पशुपुरोडाशे इति वक्ष्यते । प्रसङ्गे च ये उपकाराः प्रयाजानूयाजादिजन्याः तन्त्रतो लब्धाः तज्जनकीभूतपदार्थांशे नातिदेशः, अपेक्षाऽभावात् । ये तु न लब्धाः आज्यभागपिष्टलेपफलीकरणहोमादिजन्याः, तत्पदार्थांशेऽस्त्येवातिदेशः इत्यपि वक्ष्यते । तदिह पाशुकानूयाजानां दैक्षे हृदयादियागोत्तरत्वात् सवनीये चाग्निमारुतशस्त्रोत्तरत्वात् तत्पूर्वभाविसवनीयहविःपशुपुरोडाशादीनामङ्गभूताः पिष्टलेपफलीकरणादिहोमाः किमनूयाजोत्तरमुत्क्रष्टव्याः, उत नेति चिन्तायाम्, प्रकृतौ दर्शपूर्णमासयोः पिष्टलेपफलीकरणहोमानां परप्रयुक्तानूयाजैरेव बद्धक्रमत्वात् इहापि सत्यपि भिन्नप्रयोगविधिपरिग्रहे अङ्गभूतस्य अन्याङ्गभूतानुयाजोत्तरत्वस्यापि संभवेन उत्कर्षे प्राप्ते, न तावत् विकृतावेव क्रमक्लृप्तिः, भिन्नप्रयोगविधिपरिग्रहात्, पुरोडाशादिप्रयोगविधिना विहितानां पिष्टलेपफलीकरणहोमेडाभक्षणानां व्यवधायकाभावात्, व्यवधायकाभावविशिष्टप्रकृतिदृष्टपौर्वापर्यस्य क्रमकल्पकत्वेन उत्कर्षे तत्क्रमबाधप्रसङ्गाच्च, पाशुकप्रयोगविधिविहितानां समिष्टयजुःपत्नीसंयाजानां उक्तप्रमाणेनैव क्रमक्लृप्तेः तद्बाधस्यापि प्रसङ्गाच्च । नापि प्रकृतितः अनूयाजोत्तरत्वक्लृप्तिः, प्रकृतौ हि पाठकल्पितवाक्येन क्रमनियम एव विधीयते, न तु क्रमोऽपि, तस्य प्रयोगविध्याक्षेपादेव प्राप्तेः । अतश्च प्रकृते भिन्नप्रयोगविधिपरिगृहीतानां सामान्यतः क्रमस्याप्राप्तौ तदाश्रितस्य नियमस्याप्राप्तिः । न ह्यत्राक्षेपात् पूर्वमेव अवघातविधिवत् प्रवृत्त्यङ्गीकारेण पाठकल्पितवाक्यस्य क्रमविधायकत्वमेवेति शक्यं वक्तुम्, तद्वदिह पाठकल्प्यस्य विधेः क्लृप्तत्वाभावेन समतया आक्षेपप्रतिबन्धायोगात् । इतरथा दधियागपयोयागयोरपि पाठेन क्रमापत्तेः । अतश्च प्रकृतितोऽपि अनूयाजोत्तरत्वस्याप्राप्तेः पुरोडाशाद्यङ्गेडाभक्षणोत्तरमेव पिष्टलेपफलीकरणहोमौ ।

मण्डन— 'नोत्कृष्यते पिष्टलेपि ।' पिष्टलेपः अस्ति अस्मिन् कर्मणि तत् पिष्टलेपि । १७.

शंकर— 'नैवं प्रासङ्गिके मतः ।' १९.

* **दाक्षिणात्यः** । 'स्वमातुलसुतां प्राप्य दाक्षिणात्यस्तु तुष्यति' । वा. १।३।३।७ पृ. २०४, * **दाक्षिणात्याः** 'श्यामा बृहन्तो लोहिताक्षाः' इति भाष्यम् । 'यच्चिह्नं दाक्षिणात्यानां लोहिताक्षादि कल्प्यते । अन्येषामपि तत् दृष्टम्' ॥ १।३।७।१८ पृ. २४९. * **दाक्षिणात्यैः** आह्नीनैबुकं नाम कर्म क्रियते । तच्च स्वस्वकुलागतं करञ्जार्कादिस्थावरदेवतापूजनम् । वि. १।३।८. * **दाक्षिणात्यानां** मातुलदुहित्रुद्वाहासन्दीस्थभोजनादीनि, मित्रस्वजनोच्छिष्टस्पृष्टभोजनम्, सर्ववर्णपरस्परस्पृष्टताम्बूलादन–तदवसानानाचमन– निर्णेजकधौतगर्दभारूढवस्त्रपरिधान – ब्रह्महत्यातिरिक्तमहापातककार्यपरिहरणादीनि च धर्मव्यतिक्रमोदाहरणानि । वा. १।३।३।७ पृ. २०४.

* **दातुः** वारुणचतुष्कपालेष्टिः, न तु अश्वस्य प्रतिग्रहीतुः । वि. ३।४।१५, * **दातुः** समर्पणादिरूपः एको व्यापारः, अपरः प्रतिग्रहीतुः स्वीकरणरूपः । इति दाने द्वौ व्यापारौ । वा. ३।४।१०।२८ पृ. ९६०, * **दातृदोषेण** सर्वद्रव्यप्रतिग्रहाणां दुष्टत्वात् । ३।४।१०।२८ पृ. ९५९, * **दातृव्यापार** एवासौ परस्वत्वापादनं नाम । ३।४।१०।२८ पृ. ९६०.

* **दात्रादि** (दात्रं लवित्रं) यन्निष्पन्नम्, तत् करणत्वं प्रतिपत्तुं शक्नोति । वा. ६।१।१।१ पृ. १३४७.

* **दानं** **अदृष्टार्थं** सारस्वतसत्रगतकामेष्टौ । भा. १०।२।१५।४४–४५. * **दानं** आत्मसंबन्धत्यागपूर्वकं परकीयस्वत्वापादनम् । वि. ६।७।१. * **दानं** आधाने अपरिमितस्य नाम सहस्राधिकस्य । भा. ६।७।११।२३ –२५, * **दानं** आधाने उक्तैकादिभिन्नसंख्याकगवाम् । ६।७।१०।२१–२२, * **दानं** गवायुतस्य अश्वसहस्रस्य च सकृत् पौण्डरीके । १०।६।१७।६२–६८, * **दानं** दक्षिणार्थनिर्दिष्टभागस्यैव सर्वस्य विश्वजिति । ६।७।७।८–१३. * **दानम्** । दातव्यस्यैव तद् रूपं यत् स्वत्वपरित्यागेन परस्वत्वापादनम् । भा. १०।३।१२।५० । ददातिश्च स्वत्वनिवृत्तिपरस्वत्वापादनरूपम् । तच्च यज्ञे एकैकं प्रति कर्तव्यम् । यदि समुदायं अङ्गीकृत्य परित्यजेत्, तथा सति त्याग एव कृतो भवेन्न ददातिः । टुप्. * **दानं** द्वेष्याय अदृष्टमात्रार्थं दार्शपौर्णमासिकपत्नीसंयाजगतकपालाभिहोमनिमित्तकवैश्वानरेष्टौ । भा. १०।२।१६।४७, * **दानं** नाम आत्मीयस्य द्रव्यस्य परस्वत्वापादनम् । तच्च परः स्ववान् स्यादित्येवमर्थम् । १२।४।५।९, * **दानं** नास्ति अश्वादीनां (उभयतो दतां) विश्वजिति सर्वस्वदाने । ६।७।३।४, * **दानं** नास्ति पित्रादीनां विश्वजिति सर्वस्वदाने । ६।७।१।१–२, * **दानं** नास्ति महाभूमेः विश्वजिति सर्वस्वदाने । ६।७।२।३, * **दानं** नास्ति विश्वजिति धर्मार्थसेवकस्य शूद्रस्य । ६।७।५।६, * **दानं** प्रभवता हि शक्यं दातुम्, नाप्रभवता । ३।४।१७।५०, * **दानं** यज्ञे ऋत्विग्भ्यः परिक्रयार्थमेव, न तु धर्ममात्रम् । १०।२।८।२२–२८. * **दानं** विप्रसामान्याय न संभवति, किन्तु तद्विशेषस्य । संकर्ष. २।४।२. * **दानं** विभज्य कर्तव्यं ज्योतिष्टोमे द्वादशोत्तरशतगोदक्षिणायाः । भा. १०।३।१२।५०–'५२. * **दानं** विश्वजिति दक्षिणाकाले विद्यमानस्य स्वीयस्य । ६।७।६।७, * **दानं** विश्वजिति विद्यमानस्यैव सर्वस्य स्वीयस्य । ६।७।४।५, * **दानं** सर्वस्य अष्टरात्रान्तर्गतेऽपि विश्वजिति (भाष्यमते, वार्तिकमते तु द्वादशाहदक्षिणा अहर्गणस्थेऽपि विश्वजिति) । ६।७।८।१४–१७.

* **दानानि** सदाचारः । वा. १।३।३।७ पृ. २०१.

* **दानस्य** पुरुषार्थस्य दीक्षितकर्तृकत्वपर्युदासः ज्योतिष्टोमे । भा. १०।८।७।१२–१५. * **दानस्य** विधिलक्षणत्वे सति दानाङ्गत्वेन अचोदितेऽपि प्रतिग्रहे, विहिते दाने साध्ये तत्सिद्ध्यै प्रयोगविधिना प्रतिग्रहस्य अनुमतत्वात् न तत्करणे पदार्थपरिमाणबाधापत्त्याख्यो दोषः । सु. पृ. १४९०.

⌛ दानेऽपाकोऽर्थलक्षणः । १०।३।८।३६ ॥

आग्रयणे 'वत्सः प्रथमजो दक्षिणा' । तत्र अन्वाहार्यधर्माः कर्तव्याः इत्युक्तम् । परंतु वत्सस्य दाने कर्तव्ये अपाकः पाको न कर्तव्यः । जीवन्नपि हि वत्सः अर्थलक्षणः परिक्रयं लक्षयितुं समर्थः । यदि पाकः क्रियेत

अश्रुतः प्राणिवधः आचारविरुद्धोऽनुष्ठीयेत। तस्मात् वत्से न पाकः इति सिद्धान्तः। के.

* **दाने द्वौ व्यापारौ** एकः प्रतिग्रहीतुः स्वीकरणम्, अपरो दातुः तत्समर्थाचरणं समर्पणादिरूपम्। वा. ३।४।१०।२८ पृ. ९६०.

* **दानक्रिया** उद्देशत्यागलक्षणा क्रिया। ब्राह्मणोद्देशेन पक्वेऽपि अन्ने तदुद्देशेन त्यागं विना ब्राह्मणसंबन्धाप्रसिद्धेः, अव्याप्रियमाणेऽपि च 'तुभ्यमिदं न मम' इति तदुद्देशेन त्यागे कृते तत्संबन्धप्रसिद्धेः अन्वयव्यतिरेकाभ्यां उद्देशत्यागलक्षणैव क्रिया संबन्धापादिका अवसीयते। सु. पृ. ९३०.

* **दानविधानेनैव** प्राक् परस्वत्वापादनात् अपर्यवस्यता तस्य (प्रतिग्रहस्य) आक्षिप्तत्वात्। वा. ३।४।१०।२८ पृ. ९५९.

* **दानशब्दः** अन्नहिरण्यादीनां अदृष्टार्थे त्यागे प्रसिद्धः। दृष्टार्थायां भृत्तावपि दानशब्दः 'भृतिर्देया' इत्यादौ प्रसिद्धः। वि. १०।२।८. * दानशब्दः कर्मकरेषु सत्सु परिक्रयार्थं इत्युक्तम्। भा. १०।२।१५।४४.

* **दानहोमपाकानामुत्कर्षो** दीक्षाकालोत्कर्षे। भा. ६।५।१०।३८-३९. * दानपाकहोमानां क्रतुप्रयुक्तभिन्नानां प्रतिषेधः पर्युदासः ज्योतिष्टोमे। १०।७।७। १२-१५.

⌛ '**दामव्यालकटन्यायो** न तव (रामस्य) स्यात् कदाचन' इति वसिष्ठ उवाच (दामः व्यालः कटः एते त्रयो राक्षसाः अतीवयुद्धदुर्मदा अपि द्वैतनिष्ठत्वात् कामक्रोधलोभाविष्टा भूत्वा अन्ते विनष्टा एवेति कथा योगवासिष्ठे)। संग्रहः.

* **दारसंग्रहः** न द्विः। अपिच एवं स्मर्यते 'धर्मे च अर्थे च कामे च नातिचरितव्या' इति। एवं सती अतिचरिता स्यात्। अतोऽपि न द्विर्दारसंग्रहः। एकैव भार्या कर्मार्था अपत्यार्था च। भा. १०।८।२।१७, * दारसंग्रहः विद्याग्रहणोत्तरकालः। ६।८।२।१३.

* **दारुहारो** नैष्कर्तृको निष्कर्तनभृतः कर्मयोगे वर्तते, एवं वा एते यज्ञस्य ऋत्विजः। भा. १०।२।८।२८.

* **दार्विहोमिको** ब्राह्मणः शिबीनाम्। अम्बष्ठानां दार्विहोमिको ब्राह्मणः। (दार्विहोमिकः स्मार्तकर्मकर्ता उपाध्यायः)। भा. ८।४।२।२.

* **दार्शपौर्णमासिकं** होतुर्वरणं प्रवृत्ते कर्मणि क्रियते। भा. १२।१।१८।३५. * दार्शपौर्णमासिकं हौत्रकाण्डम् (तैब्रा. ३।५।७), आध्वर्यवकाण्डम् (तैसं. १।१।४), याजमानकाण्डं च (तैसं. १।६।२)। के. * **दार्शपौर्णमासिकानि** पात्राणि जुह्वादीनि सौमिकपात्रैर्ग्रहचमसैः सवनीयपुरोडाशादिषु प्रसङ्गसिद्धानि न भवन्ति। भा. १२।१।४।१०-११, * **दार्शपौर्णमासिको** विध्यन्तः ऐन्द्राग्नादिषु इष्टिषु। ८।१।४।११। पशौ च। ८।१।५।१२, * दार्शपौर्णमासिको विध्यन्तः चातुर्मास्यादिगतवाजिने सौत्रामणीगतसुराग्रहेषु च। औषधविकृतिः सुरा, सांनाय्यविकृतिर्वाजिनम्। ८।२।१। १-९, * दार्शपौर्णमासिको विध्यन्तः दीक्षणीयायां आतिथ्यायां प्रायणीयायाम्, पशौ च। ८।१।३।३, * **दार्शपौर्णमासिकस्य** फलनियमकर्तृसमुदायस्य सौर्यादौ नातिदेशः। ८।१।१३।२०-२२.

* **दार्शपौर्णमासिकनिर्वापालम्भन्यायेन** (आलम्भनिर्वापन्यायेन २।३।५।१२-१५) यदि विशेषणमिष्यते ततो दार्शन्यायेन कर्तव्यतावचनेन लिङ्गेन विशेष्टव्यम् (सुधा— कर्तव्यतावाचिना प्रत्ययेन उपलक्षणीभूय व्यावृत्त्याख्यविशेषणं कर्तव्यम्)। वा. ३।२।८।२१ पृ. ७७५. * 'यदि आलम्भनिर्वापौ विधीयेते ततो न प्राकृतौ तौ विहितौ। यदि न विधीयेते ततः प्राकृतौ लक्ष्येते यौ आलम्भनिर्वापौ कर्तव्यौ' इति आलम्भनिर्वापाधिकरणभाष्योक्तन्यायेन कर्तव्यतावाचिना प्रत्ययेन उपलक्षणीभूत्वा व्यावृत्त्याख्यविशेषणं कर्तव्यमित्युक्तम्। सु. पृ. ११२३.

* **दार्शपौर्णमासिकपत्नीसंयाजाङ्गभूतेन** आज्येन सह विकल्प्यमाना जाघनी। वा. ३।३।१०।२३। 'जाघन्या पत्नीः संयाजयन्ति'। भा.। न आज्ये पत्नीसंयाजा इज्यन्ते। कु.

दार्शपौर्णमासिकपत्नीसंयाजगतकपालाभिहोमनिमित्तकवैश्वानरेष्टौ द्वेष्याय दानं अदृष्टमात्रार्थम् ॥

द्वेष्ये चाचोदनाद् दक्षिणाऽपनयः स्यात् । १०।२।१६।४७॥

भाष्यम्—दर्शपूर्णमासयोः इदमाम्नायते 'यदि पत्नीः संयाजयन् कपालमभि जुहुयात् (कपालं अभिलक्ष्य कपालोपरि इत्यर्थः), वैश्वानरं द्वादशकपालं निर्वपेत् । तस्य एकहायनो गौर्दक्षिणा । तं स द्वेष्याय दद्यात्' इति । तत्र संशयः किं परिक्रियार्थे एकहायनस्य दानम्, उत धर्ममात्रमिति । किं प्राप्तम् ? दक्षिणाशब्दात् परिक्रयार्थमिति । परिक्रियार्थे हि दक्षिणाशब्दो भवति । **एवं प्राप्ते, ब्रूमः ।** द्वेष्ये च धर्ममात्रं दानमिति चशब्देन अन्वादिश्यते । कुतः ? अचोदनात् द्वेष्यस्य ऋत्विजः । नहि द्वेष्यः ऋत्विक् भवति, 'ऋत्विगाचार्यौ नातिचरितव्यौ' इति । यदा परिक्रेतव्येनैव कर्त्रा प्रयोजनं नास्ति, तदा किं दक्षिणाशब्दः करिष्यति ? अपिच परिक्रियार्थे सति दक्षिणाऽपनयः स्यात् चोदकप्राप्तः अन्वाहार्यः अपनीयेत, तत्र चोदको बाध्येत । तस्मात् धर्ममात्रं एकहायनस्य दानम्, अनृत्विजे दातव्यमिति ।

टुप्— द्वेष्ये चाचोदनाद् दक्षिणाऽपनयः स्यात् । (अत्र टुप्टीकायां अचोदनात् इति पञ्चम्यन्तः पाठः । रत्ने तु अचोदनेन इति तृतीयान्तः पाठः । सूत्रार्थकथनकाले तु 'अचोदितत्वात्' इति व्याख्यातम्) **अपिच परिक्रयार्थे सति** दक्षिणाशब्दः **स्यात् । चोदकप्राप्तः अन्वाहार्यः अपनीयेत, तत्र चोदको बाध्येत** इति अयुक्तोऽयं (भाष्य–) ग्रन्थः । कथम् ? पत्नीसंयाजनवेलायां अन्वाहार्यो दत्तः । यद्यपि निमित्ते इयमिष्टिः (वैश्वानरी) विधीयते, तथापि (प्रधानदक्षिणयैव) प्रसङ्गेनैव (कार्यस्य) निर्वृत्तत्वात् नान्वाहार्यः (चोदकेन) प्राप्नोति ।

शा— दर्शपूर्णमासयोरेव नैमित्तिकमङ्गं तन्त्रमध्ये एव क्रियते ।

सोम— पूर्वत्र दक्षिणाशब्दाभावात् परिक्रियार्थत्वाभावेऽपि इह दक्षिणाशब्दात् परिक्रियार्थत्वमिति संगतिः । **सूत्रार्थस्तु**–– द्वेष्ये च यद् दानम्, तस्य दक्षिणात्वात् अपनयः स्यात् अदृष्टार्थता स्यादितियावत् । द्वेष्यस्य ऋत्विजः अचोदितत्वादिति ।

वि––'क्रीत्यै धर्माय वा द्वेष्ये दानं स्याद्, दक्षिणोक्तितः । क्रयाय, मैवं द्वेष्यत्वं नर्त्विजो धर्मकृत् ततः ॥' धर्मकृत् अदृष्टजनकम् ।

भाट्ट— दर्शपूर्णमासयोः 'यदि पत्नीः संयाजयन् कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत् तस्यैकहायनो गौर्दक्षिणा, तं स द्वेष्याय दद्यात्' इति श्रुतम् । तत्र किमिदं दक्षिणादानमदृष्टार्थम्, उत ऋत्विगानत्यर्थमिति चिन्तायाम्, दक्षिणाशब्दस्य आनतिकरद्रव्यवाचित्वेन तद्दानस्य आनत्यर्थत्वप्रतीतेः, नादृष्टार्थत्वकल्पनोचिता । न चास्याः प्रयोगमध्यवर्तिनिमित्तानन्तर्यबलेन प्रयोगमध्यवर्तितया प्रधानदक्षिणयैव प्रसङ्गसिद्धेर्दक्षिणान्तरानपेक्षत्वादेव नानन्तर्यार्थता, दक्षिणाविधानान्यथाऽनुपपत्त्या आनतिविशेषकल्पनेन तदर्थत्वोपपत्तेः । अस्तु वा दक्षिणाऽऽम्नानबलात् अस्याः प्रयोगबहिर्भूतत्वमेव । निमित्तानन्तर्यं तु जातेष्टिवत् व्यवधानेऽपि न विरुध्यते । न चैवमपि 'ऋत्विगाचार्यौ नातिचरितव्यौ' इति स्मरणात् ऋत्विजां द्वेष्यत्वानुपपत्तेः द्वेष्यसंप्रदानकदानस्य आनत्यर्थत्वानुपपत्तिः, ऋत्विक्त्वसंपत्त्युत्तरं तस्य द्वेषनिषेधेऽपि पूर्वकृतद्वेषस्य आर्त्विज्ये बाधकाभावात्, सत्यपि द्वेष्यस्यार्त्विज्यनिषेधे तस्य पुरुषार्थतया निषेधमुल्लङ्घ्यापि क्रतुकरणे वैगुण्याभावाच्च । क्रत्वर्थत्वेऽपि वा निषेधस्य सामान्यविषयत्वेन दक्षिणाऽऽम्नानबलकल्प्यद्वेष्यनियमविधिना विशेषविषयेण बाधोपपत्तेश्च । अतोऽस्य दक्षिणात्वात् कर्तव्या एव अन्वाहार्यधर्माः, पाकादयस्तु अर्थलोपात् निवर्तन्ते । **इति प्राप्ते,** न तावदत्र प्राकृतदक्षिणादानानुवादेन गुणमात्रविधिः संभवति, प्राकृतदानकार्यस्य आनतेः प्रधानार्थान्वाहार्येणैव निष्पन्नतया प्राकृतदानस्य इह अप्राप्तत्वात्, तदनुवादेन अनेकगुणविधानासंभवाच्च । अतश्चावश्यं तच्छब्दवाच्यं गुणद्वयविशिष्टं द्रव्यम्, द्वेष्यश्च संप्रदानमिति उभयविशिष्टं दानान्तरमेवात्र विधेयम् । तदपि च न प्राकृतकार्यार्थितया, तस्य पूर्वमेव निष्पन्नत्वात्, द्वेष्यकर्तृकत्वनैयत्यस्य दर्श-

पूर्णमासयोः प्रमाणान्तरासिद्धतया तत्संप्रदानकत्वस्य नैयत्यासंभवेन आनतिविशेषस्यापि कल्पयितुमशक्यत्वाच्च । द्वेष्यसंप्रदानकदानाम्नानबलादेव अस्यां प्रायश्चित्तेष्टौ प्रयोगबहिर्भावे द्वेष्यकर्तृविधिनिमित्तानन्तर्यबाधं प्रयाजाद्यंशे अतिदेशं चानपेक्षितं च प्रकल्प्य आनत्यर्थत्वकल्पने तु तवैव गौरवम् । न हीदं फलमुखम्, एतत्कल्पनमन्तरेण आनतेरबुध्यमानत्वात् । अतो वरमदृष्टार्थमेवेदं दानं प्रयोगमध्यक्रियमाणाया एव प्रायश्चित्तेष्टेरङ्गम् । दक्षिणाशब्दस्तु तच्छब्दापेक्षितार्थसमर्पकार्थवादे श्रुतो द्वेष्यानतिकरत्वमात्रेण अगत्या कथञ्चिन्नेयः । अतः अन्वाहार्यधर्माणामप्रसक्तत्वादेव निवृत्तिः । अध्यायसंगतिस्तु पूर्वपक्षे पाकलोपात् द्रष्टव्या । १५.

मण्डन— ‘ दानं द्वेष्याय नानतिः । ’

शंकर-- ‘ द्वेष्य ऋत्विङ् न नो मतः । ’ नः अस्माकम् ।

* **दार्शपौर्णमासिकी वेदिः** सौमिकेष्टिपश्वादिषु सौमिकवेद्या प्रसङ्गसिद्धा । सौमिकवेदिन्यायः । भा. १२।१।३।८–९, * **दार्शपौर्णमासिकी वेदिः** हविषामासादनार्था । सौमिकी प्रचारार्था । १२।१।३।८.

* **दार्शिकसांनाय्यपयोधर्मातिदेशः** वैश्वदेव्यामिक्षायाम् । वि. ८।२।४.

* **दाशतयी** दशमण्डलयुक्ता ऋक्संहिता । वि. ३।२।८. * **दाशतयीभ्यः** उत्पन्नगायत्रीणां समानयनं बृहस्पतिसवादौ । भा. ८।३।६।१२–१६, * दाशतयीभ्यः मानवीनामेकादशानामृचामानयनं विकृतिविशेषे सोमारौद्रेष्टौ सामिधेन्यर्थम् । १०।६।१९।७३–७६.

* **दास्यादिभागान्तरस्य** अध्वर्योः वाजपेयश्रुतयजुर्युक्तरथेन न बाधः । भा. १०।३।२१।७४–७५. .

* **दाहे** कृत्स्नपुरोडाशस्य जाते क्षामेष्टिः प्रायश्चित्तम् । भा. ६।४।५।१७–२१, * दाहे सोमस्य पञ्च गाः दक्षिणां दद्यात् । १०।३।१५।५९.

⌛ **दाहकदाह्यन्यायः** । दाहकः अग्निः दाह्यकाष्ठाकारं भजते, तथा चैतन्यं विषयाकारं भजते । संग्रहः, साहस्री. ३६८.

* **दिक्** आकाशदिक्कालात्मनां परमाणुदृष्टान्तबलेन नित्यत्वम् । वा. १।३।८।२७ पृ. २८५. * दिक् प्रत्यक्षैव मीमांसकमतेन । रत्न. १०।४।१२।२३. * दिशः षडिन्द्रियजन्यप्रत्यक्षविषयत्वं बाह्यविषयसंबन्धित्वेन प्राच्यां पर्वतो दृश्यते इत्याद्यनुभवात् । मणि. पृ. १७०. * **दिशामवेष्टीनां** द्वेधा प्रयोगः राजसूयान्तःपाती बहिःपाती च । अन्नाद्यकामेन ब्राह्मणेन वैश्येन वा दिशामवेष्टयः स्वातन्त्र्येण कर्तुं शक्यन्ते । तत्राङ्गानां तन्त्रम् ‘ एतयाऽन्नाद्यकामं याजयेत् ’ । वि. ११।४।३, * दिशामवेष्टीनां यान्यङ्गानि, तेषां राजसूये अन्तःप्रयोगे भेदः उत्पत्तिशिष्टेन दक्षिणाभेदेन प्रयोगभेदावगमात् । बहिष्प्रयोगे तु तन्त्रम् । ११।४।३.

* **दिङ्मोहाभिधानं** आकुलीभावसामान्यात् । तथा च लोके कर्तव्यतासु ‘ दिशो मे परिभ्रमन्ति ’ इति वक्तारो भवन्ति । वा. १।२।१।१० पृ. १२६.

* **दिग्वादः** शाखावादश्च । दर्शपूर्णमासयोः वत्सापाकरणाद्यर्थां शाखामधिकृत्य ‘ प्राचीमाहरति उदीचीमाहरति प्रागुदीचीमाहरति ’ इति श्रुतम् । अत्र प्राच्यादिशब्देन दिगुक्ता, प्राच्यादिदिशं गत्वा शाखा आहर्तव्या इति यो वादः स दिग्वादः । अथ प्राच्यादिशब्दो न दिग्वाचकोऽत्र, किन्तु कांचिद्दिशं गत्वा पलाशवृक्षस्य या प्राच्यादिदिशि विरूढा शाखा; सा आहर्तव्या इति यो वादः स शाखावादः । वादः पक्षः इत्यर्थः । ताविमौ वादौ ‘ शाखायां तत्प्रधानत्वात् ’ ४।२।२।७ इत्यत्र उदाहृतौ भाष्ये । के.

* **दिग्विभागः** अर्थवादः प्राचीनवंशस्तुतये । ज्योतिष्टोमे ‘ प्राचीनवंशं करोति देवमनुष्या दिशो व्यभजन्त । प्राचीं देवाः, दक्षिणां पितरः, प्रतीचीं मनुष्याः, उदीचीं रुद्राः । यत् प्राचीनवंशं करोति देवलोकमेव तद्यजमान उपावर्तते ’ इति । वि. ३।४।६.

⌛ **दिग्विभागश्च तद्वत् संबन्धस्यार्थहेतुत्वात् । ३।४।२।१०॥**

ज्योतिष्टोमे दिग्विभागः श्रूयते ‘ प्राचीं देवा अभजन्त, दक्षिणां पितरः, प्रतीचीं मनुष्याः, उदीचीमसुराः ’ (‘ उदीचीं रुद्राः ’ इति शाखाऽन्तरे) इति । तत्र

प्रतीचीं मनुष्याः इत्यत्र विधिर्वा अर्थवादो वा इति विचारे सिद्धान्तमाह । ‘प्राचीनवंशं करोति’ इत्यनेन विधिना एकवाक्यत्वात् सर्वं दिग्विभागवाक्यं अर्थवादः, न विधिः । तद्वत् पूर्वोक्तनिवीतवाक्यं यथा उपवीतविधेरर्थवादः तथा इदमपि । कुतः ? संबन्धस्य मनुष्यप्रतीचीसंबन्धस्य अर्थहेतुत्वात् अर्थवादार्थभूतस्तुतौ आलम्बनतया हेतुत्वोपपत्तेः । अथवा पूर्वाह्णे व्याप्रियमाणानां मनुष्याणां आदित्यं पृष्ठतः कर्तुं प्रतीचीसंबन्धस्य अर्थतः हेतुत्वात् इति । के.

⧗ **दिग्विभागाधिकरणम्** । ज्योतिष्टोमे श्रुतो दिग्विभागः प्राचीनवंशविधेरर्थवादः ॥

दिग्विभागश्च तद्वत् संबन्धस्यार्थहेतुत्वात् । ३।४।२।१०॥

भाष्यम्— ज्योतिष्टोमं प्रकृत्य श्रूयते ‘प्राचीं देवा अभजन्त दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीमसुराः’ इति । अपरेषाम् ‘उदीचीं रुद्राः’ इति । तत्र संदेहः किं विधिः, उतार्थवादः । विधिः सन् किं मनुष्यधर्मः, उत कर्मधर्मः । अथवा प्रकरणे मनुष्यप्रधाने कर्मणि निवेशः, किंवा आतिथ्ये इति । किं तावत् प्राप्तम् । दिग्विभागश्च तद्वत्, संबन्धस्यार्थहेतुत्वात् । य एष दिग्विभागः, स निवीतवत् विचार्यः । यो निवीते पूर्वपक्षः स इह पूर्वपक्षः, यो मध्यमः स मध्यमः, यः सिद्धान्तः स सिद्धान्तः । अर्थवत्त्वात् विधिः, मनुष्यसंबन्धान्मनुष्यधर्मः इति पूर्वपक्षः । प्रत्यङ्मुखा उदङ्मुखा वा पृष्ठतः आदित्यं प्राञ्चु पदार्थाननुतिष्ठन्ति मनुष्या इत्यनुवादः । विधिरेव, प्रकरणानुग्रहाच्च ज्योतिष्टोमधर्मः । वाक्यप्रकरणानुग्रहाय ज्योतिष्टोमे मनुष्यप्रधाने दक्षिणाव्यापारे निवेश इत्यपरः पक्षः । भिन्नत्वात् वाक्यानां आतिथ्ये निवेशः इत्यपरं मतम् । अर्थवादोऽयं प्रकरणानुग्रहाय । ‘प्राचीनवंशं करोति’ इत्यनेन विधिना एकवाक्यत्वस्य प्रत्यक्षसिद्धत्वादिति सिद्धान्तः ।

शा—‘प्रतीचीं मनुष्याः’ इत्यत्र निवीताधिकरणवत् सर्वे पक्षा रचयितव्याः । ‘व्यभजन्त’ इति पुराकल्पेन पूर्वपुरुषाचरितत्वेन प्रशंसा गम्यते, तया च विधित्वं गम्यते इति विशेषाशङ्का । तां निवर्तयितुं अधिकरणम् ।

सोम—**सूत्रार्थंतु**— दिग्विभागः प्रतीच्याः दिशः मनुष्यकर्तृको विभागोऽपि निवीतवत् अर्थवादार्थः । प्रायेण पूर्वाह्णे व्याप्रियमाणानां मनुष्याणां आदित्यं पृष्ठतः कर्तुं प्रतीचीसंबन्धस्य अर्थतः प्राप्तत्वेन तत्र विध्ययोगात् इति । अत्र ‘संबन्धस्य अर्थहेतुत्वात्’ इति सूत्रावयवः निवीताधिकरणद्वितीयसूत्रावयवोक्तार्थस्मारकत्वेन अनतिप्रयोजनत्वात् आचार्यैः नोक्तः, तदनुसारेण ग्रन्थकृताऽपि न पठितः । (मुद्रकैस्तु अनवधानात् मुद्रितः) ।

वि— ‘दिशं प्रतीचीं मनुजा व्यभजन्तेत्यसौ विधिः । वादो वा, ऽत्र पुराकल्पस्तुत्यर्थो विधिमर्हति ॥, प्राचीनवंशवाक्योक्तेर्विधावस्यैकवाक्यतः । दिग्विभागोऽर्थवादोऽयमुपवीते निवीतवत् ॥’

भाट्ट— सोमे ‘प्राचीनवंशं करोति’ इत्येतद्विधिशेषः ‘देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीं रुद्राः’ इत्ययं श्रुतः । तत्र मनुष्यसंयुक्ते निवीताधिकरणवत् औदुम्बराधिकरणवच्च विधित्वं निरस्तमपि पूर्वाधिकरणवत् मनुष्यकर्तव्यवैदिककर्मणि तावत् दिगन्तरस्यैव सामान्यविशेषादिवचनेन प्राप्ततया प्रतीच्या अप्राप्तेः, लौकिके च कर्मणि प्रतीच्या नित्यप्राप्त्यभावात् । विधित्वं विधिकल्पकत्वं वा । इति प्राप्ते, इह प्रतीच्या मनुष्यसंबन्धमात्रोपादानेऽपि कर्मविशेषानुपादानात् सर्वत्र विधानस्य त्वयैव निरस्तत्वात्, यस्यामेव क्रियाव्यक्तौ प्रतीचीदिगभिमुखत्वं लोके यदृच्छया सिद्धम्, तादृशक्रियागतमेव मनुष्यप्रतीचीसंबन्धं गृहीत्वा स्तुत्युपपत्तेर्नातिरिक्तविध्यन्तरकल्पनं प्रमाणवत् । ‘उपरि हि’ इत्यत्र तु दैवाग्निहोत्रत्वावच्छेदेन उपरिभावश्रवणात्, तस्य च अप्राप्तत्वेन विध्यन्तरकल्पनया दैवाग्निहोत्राङ्गसमिद्धारणानुवादेन उपरिभावविधिः । अनुमितवाक्यत्वाच्च न विशिष्टोद्देशः इति वैषम्यम् ।

मण्डन— ‘प्राचीनवंशस्तुतये प्रतीची ।’ २.

शंकर— ‘दिग्विभागो निवीतवत् ।’ ८.

* **दित–पूर्ण**– घृत– विदग्धानां समूलत्व–पात्राधोभाग– नववीत–यथोचितपाकानां स्तुतये अनुवादः । परुषिदिताधिकरणम् । भा. ३।४।३।११.

* **दिनैर्द्वादशभिः** प्रत्येकं दीक्षोपसत्सुत्याः साध्याः द्वादशाहे । भा. ११।४।५।१५–२२.

* **दिवसपरत्वेन** संवत्सरशब्दस्य विश्वसृजामयने सहस्रसंवत्सरे मनुष्याधिकारः । अधिकारशब्दे अधिकरणम् । भा. ६।७।१३।३१–४०.

* **‘दिवा** संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥’ इति कालतः वाचनिकव्यवस्थाविधिः । बाल. पृ. १८.

* **दीक्षणीया** अश्वमेधे त्रैधातवीया इष्टिरेव । वि. ९।१।२ वर्णकं २. * दीक्षणीया ज्योतिष्टोमे ‘आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणः’। भा. १२।२।९।२५. * दीक्षणीया पुरुषसंस्कारद्वारेणोपकरोति, न आरम्भार्थतया । दीक्षासंजननमस्या उत्पत्तिवाक्येनैवावगम्यते । टुप्. १०।१।२।४ पृ. १८०५. * दीक्षणीया साग्निचित्ये उखासंभरणोत्तरम् । के. * **दीक्षणीयायाः** इष्टेरन्ते दीक्षितशब्दस्य प्रवृत्तिः स्यात् । भा. ५।३।११।३०, * दीक्षणीयायाः पूर्वं सावित्रहोमाः उखासंभरणं इष्टकाः पशुश्च कर्तव्याः, ततो दीक्षणीया । सावित्रहोमन्यायः । ५।२।११।२२. * दीक्षणीयायाः याजुर्वेदिकत्वात् साङ्गायामुपांशुत्वं प्राप्नोति । तच्चोदकेन बाध्यते । ‘प्राक् स्विष्टकृतः प्रथमस्थानेन’ ‘मध्यमेनेडायाः’ ‘शेषं तृतीयस्थानेन’ इत्येतत् स्वरवैचित्र्यं चोदकप्राप्तम् । तत् ‘अग्नीषोमीयात्’ इत्युपांशुत्वेन बाध्यते । ‘यावत्या वाचा कामयेत’ इत्यनेन दीक्षणीयाशब्दवाच्ये वाङ्नियमो विधीयते । स दीक्षणीयाशब्दः प्रधानमात्रे वर्तते नाङ्गेषु । तस्मात् उपांशुत्वमङ्गेषु प्रधानेषु (तु) ‘यावत्या वाचा’ इति । टुप्. ९।१।६।२५ पृ. १६६७–६८. * **दीक्षणीयायां** द्वादशमानं हिरण्यं दक्षिणा श्येने । भा. ८।१।९।१६. * दीक्षणीयायां यावत्या वाचा कामयेत तावत्या अनुब्रूयात् । अयं स्वरः दीक्षणीयाऽपूर्वप्रयुक्तः, न परमापूर्वप्रयुक्तः । ज्योतिष्टोमे । वा. ३।३।२।९ पृ. ८१२. * दीक्षणीयायां स्वरः (उच्चावचध्वनिः) अङ्गापूर्वप्रयुक्तः । दीक्षणीयावाङ्नियमन्यायः । भा. ९।१।२।२–३ वर्णकं २.

* **दीक्षणीयाऽग्निरेव** सोमान्तं धारणीयः । संकर्ष. ३।२।१०.

* **दीक्षणीयाऽधिकरणम्** । अङ्गगुणविरोधन्यायः । सुत्या पर्वणि दीक्षा अपर्वणि । भा. १२।२।९।२९.

* **दीक्षणीयाऽन्ते** दीक्षितत्वसिद्धिः, दीक्षितधर्मानुष्ठानम् । ज्योतिष्टोमे दीक्षणीयेष्ट्या इत्यत्राधिकरणम् । भा. ५।३।११।२९–३१.

* **दीक्षणीयाऽऽदयो** धर्माः अग्निष्टोमसंस्थं ज्योतिष्टोमं प्रकृत्य उक्ताः, न सर्वसंस्थम् । संस्थाऽधिकरणम् । भा. ३।६।१६।४१–४७. * दीक्षणीयाऽऽदयः पुरुषसंस्काराः फलप्रतिग्रहणयोग्यं पुरुषं कुर्वन्तो यागकार्ये वर्तमानास्तदर्थाः । टुप्. ७।३।१४।३६. * दीक्षणीयाऽऽदीनि कर्माणि दर्शपूर्णमासप्रकृतिकानि ज्योतिष्टोमे । भा. १०।१।२।४. * **दीक्षणीयाऽऽदीनां** ज्योतिष्टोमाङ्गत्वात् सोमविकृतिषु अतिदेशः । सोमयागप्राधान्याधिकरणम् । सोम. ४।४।१२. * **दीक्षणीयाऽऽदिषु** अग्न्यन्वाधानं देवतापरिग्रहार्थमपि न कर्तव्यम् । अग्न्यन्वाधानशब्दे अधिकरणम् । भा. १२।१।१२।२४–२८, * दीक्षणीयाऽऽदिषु अन्वाहार्यदक्षिणा सौमिक्या दक्षिणया प्रसङ्गसिद्धा । सौमिकदक्षिणान्यायः । १२।१।१६।३२, * दीक्षणीयाऽऽदिषु आरण्याशनं सौमिकेन पयोव्रतादिना प्रसङ्गसिद्धम् । १२।२।१४।३०. * दीक्षणीयाऽऽदिषु आरम्भणीया न क्रियते । टुप्. १०।१।२।४. * दीक्षणीयाऽऽदिषु जागरणं दार्शपौर्णमासिकं सौमिकेन दीक्षाकालीनजागरणेन प्रसङ्गसिद्धं न भवति । जागरणन्यायः । भा. १२।१।८।१७, * दीक्षणीयाऽऽदिषु दार्शिकाग्निसमिन्धनं (अग्न्यन्वाधानम्) न कार्यम् । १२।१।१०।१९, * दीक्षणीयाऽऽदिषु पत्नीसंनहनं सौमिकेन प्रसङ्गसिद्धम् । १२।१।१३।२९, * दीक्षणीयाऽऽदिषु व्रतोपायनं ‘अग्ने व्रतपते’ इत्यादिरूपं सौमिकप्रायणीयाऽऽदिषु प्रागेव उपेतत्वात् पुनर्नानुष्ठेयम् । १२।१।११।२०–२३, * दीक्षणीयाऽऽदिषु शेषभक्षः ऋत्विग्भिः प्रतिपत्त्यर्थः कर्तव्यः । १२।१।१७।३३–३४, * दीक्षणीयाऽऽदिषु शेषभक्षः यजमानेन कर्तव्य एव । १२।१।५।३१

–३२, * दीक्षणीयाऽऽदिषु होतुर्वरणं सौमिकेन प्रसङ्गसिद्धं न भवति । १२।१।१८।३५–४१.

* **दीक्षणीयाऽऽदिपरिसाम्नां** दीक्षणीयादिप्रयोगानन्तर्गतत्वेऽपि अग्नीषोमीयप्राचीनत्वाविशेषात् उपांशुता । सु. पृ. ११८३.

* **दीक्षणीयाऽऽदिविकृतौ** अन्वारम्भणीयायाः बाधः । आरम्भणीयायाः इत्यत्राधिकरणम् । भा. १०।१।२।४.

* **दीक्षणीयेष्टिः** अस्थियज्ञे मृताधिकारपक्षे लुप्यते (कृत्वाचिन्ता) । वि. १०।२।१८, * **दीक्षणीयेष्ट्या** दीक्षासिद्धिः, दण्डमेखलाऽऽदिकं तु दीक्षाऽभिव्यञ्जकम् । ५।३।११, * **दीक्षणीयेष्ट्यादयः** इष्टयः ज्योतिष्टोमे अङ्गम्, ज्योतिष्टोमप्रकरणे उपदिष्टत्वात् । सोमयागाः प्रधानम् । ४।४।१२.

* **दीक्षणीयादिनकृत्यान्ते** रुक्मप्रतिमोचनादिकं कार्यं अग्निचयने । भाट्ट. ५।२।१२.

⧗ दीक्षणीयावाङ्नियमन्यायः । स्वरनियमः ॥

संस्कारे युज्यमानानां तादर्थ्यात् तत्प्रयुक्तं स्यात् । ९।१।२।२ वर्णकं २ ॥

भाष्यम्-- एवं वा अस्ति ज्योतिष्टोमः । तत्रेदं समाम्नायते ‘ यावत्या वाचा कामयेत, तावत्या दीक्षणीयायामनुब्रूयात् । मन्द्रं प्रायणीयायाम्, मन्द्रतरमातिथ्यायाम्, उपांशूपसत्सु ’ इति । तत्रायमर्थः सांशयिकः किं परमापूर्वप्रयुक्ता एते धर्माः, उत दीक्षणीयाद्यपूर्वप्रयुक्ता इति । किं प्राप्तम् ? परमापूर्वसंस्कारे दीक्षणीयाऽऽद्यपूर्वे युज्यमानस्यास्य धर्मस्य परमापूर्वार्थत्वात् दीक्षणीयाऽऽदीनां परमापूर्वार्थतैव स्यात् । परमापूर्वं हि फलवत् । यत् कर्तव्यतयाऽभिसंबध्यते, तदेव धर्मैरभिसंबध्यते, नाङ्गापूर्वम् । निष्प्रयोजनं हि तदिति ।

टुप्— संस्कारे दीक्षणीयाऽऽख्ये यो धर्मः, स परमापूर्वयुक्तः (न स्वरूपप्रयुक्तः) । कुतः ? परमापूर्वप्रयुक्तत्वात् दीक्षणीयायाः, स्वयं निष्फलत्वात् ।

तेन त्वर्थेन यज्ञस्य संयोगात् धर्मसंवन्धस्तस्माद् यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् । ३ ॥

भाष्यम्-- तेन त्वर्थेन दीक्षणीयादिना , यस्मात् परमापूर्वस्य संबन्धः, तस्मात् परमापूर्वमेवंजातीयकेन धर्मेण धर्मवत् । तस्मादङ्गयज्ञप्रयुक्तमेवंजातीयकं धर्मजातम् । तथा श्रुतिः शब्दो भवति । इतरस्मिन् पक्षे लक्षणा स्यात् । न च प्रायणीयाऽऽद्यपूर्वं निष्प्रयोजनम् । ज्योतिष्टोमस्य हि तदुपकारकम् । न च तद्विना एवंजातीयकेन धर्मेण प्रायणीयाऽऽद्यपूर्वं सिद्धम् । अवहन्तिपिषिवत् । यदुच्यते, विनैव धर्मेण तदपूर्वं भविष्यतीति । तन्न । कुतः ? तदपि हि अपूर्वं शब्दादेवावगम्यते अस्तीति न प्राक् शब्दादन्येन प्रमाणेन उपसंख्यायते । एवंजातीयके च शब्दप्रमाणके यत् शब्द आह, तदस्माकं प्रमाणम् । शब्दश्च प्रायणीयाऽऽद्यपूर्वस्य उपकारकमिमं धर्ममाह, न परमापूर्वस्य , वचनप्रामाण्यात् । एवं च आपरमापूर्वनिष्पत्तेः अजरमविनाशि चात्र धर्मः प्रतिष्ठितः, न परमापूर्वं संक्रमिष्यति । एवमपि प्रयोजनसमर्थम् । तस्मादेवंजातीयकं धर्मजातं अङ्गापूर्वप्रयुक्तमेवेति । किं भवति प्रयोजनमितरस्मिन्नितरस्मिन् वा पक्षे इति ? उच्यते । अश्वमेधे समाम्नायते, त्रैधातवीया भवतीति । यदि परमापूर्वप्रयुक्त एवंजातीयको धर्मः, ततस्तस्योपकारविशेषे निबद्ध इति तत्कार्यापन्नायां त्रैधातवीयायां भविष्यति । अथ आग्नावैष्णवाऽपूर्वप्रयुक्तः , ततो नेदमाग्नावैष्णवापूर्वमिति तत्र त्रैधातवीयाऽपूर्वं न तेन धर्मेण संभन्त्स्यते इति ।

टुप्—‘तेन त्वर्थेन...तदर्थत्वात् ।’ ३ ॥ दीक्षणीयाद्यर्थेन यो धर्मः संयुक्तः स न परमापूर्वप्रयुक्तः (किन्तु स्वापूर्वप्रयुक्तः) । कुतः ? दीक्षणीया आत्मीयमपूर्वं लक्षयति, तेन धर्माणां संबन्धः (तदतिक्रमे कारणाभवात्) । तस्मिन् पक्षे लक्षणैव (केवला , न लक्षितलक्षणा) । यदा तु (लक्षितं) दीक्षणीयाऽपूर्वं परमापूर्वं लक्षयति तदा लक्षितलक्षणया धर्माणां संबन्धः । (यदि सिद्धान्तेऽपि लक्षणा, कथं तर्हि भाष्ये श्रुत्यभिधानम् ? अत आह–) तस्मात् लक्षणां श्रुतिं ब्रवीति (भाष्यकारः) लक्षितलक्षणाऽपेक्षया (संनिकृष्टार्थत्वात्) । अथवा (दीक्षणीयाऽऽख्यं) अङ्गं संबन्धात् अङ्गिनं (ज्योतिष्टोमम्) शक्नोति लक्षयितुम् । तेन अङ्गि-

संबन्धे लक्षणा अङ्गसंबन्धे तु श्रुतिः (अङ्गिसंबन्धे विवक्षिते लक्षितेन अङ्गिना तदपूर्वं लक्षयितव्यम्, अङ्गापूर्वसंबन्धे तु श्रुतयैव दीक्षणीयया स्वापूर्वलक्षणा । तदनेन प्रकारेण पूर्वपक्षे लक्षितलक्षणा, सिद्धान्ते तु लक्षणा इत्येतदेव प्रतिपादितम्) [‘ अथवा ’ इत्यादिग्रन्थः लिखितटुप्टीकायां नास्ति । तन्त्ररत्ने तु व्याख्यातत्वात् अस्त्येव सः] ।

पूर्वपक्षे ‘ त्रैधातव्या दीक्षणीया भवति ’ इति आग्नावैष्णवकार्यापत्त्या (त्रैधातव्या) तद्धर्मैर्युज्यते यथा नीवाराः प्रोक्षणेन (युज्यन्ते) । सिद्धान्ते तु आग्नावैष्णवापूर्वप्रयुक्ता धर्माः त्रैधातवीयायां च अपूर्वान्तरम् । न चापूर्वान्तरं अपूर्वान्तरधर्मान् गृह्णाति । (भाष्योक्तं प्रयोजनमाक्षिपति–) अनुपपन्नमिदं प्रयोजनम् । (कथम् ?) ‘ त्रैधातवीया दीक्षणीया भवति ’ इति सामानाधिकरण्यम् (अनयोः) । तत्र यदि मुख्यवृत्ते द्वे अपि पदे गृह्येयातां (ततः) सामानाधिकरण्यं नोपपद्यते । तस्मात् एकमत्र गौणं पदम्, अन्यत् मुख्यम् । तत्र प्राथम्यात् अविरोधाच्च त्रैधातव्यापदं मुख्यम्, दीक्षणीयापदं तु (जघन्यत्वात् संजातविरोधं च) आत्मीयं क्रतूपकारं लक्षयति । तस्मिन् लक्षिते त्रैधातव्या विधीयते (त्रैधातव्या दीक्षणीयाकार्यकारिणी भवतीति) । सा (च) विधीयमाना तत्कार्यापन्नत्वात् तद्धर्मान् लभते । सिद्धान्तेऽपि यथा खलेवाली यूपकार्ये विधीयमाना तद्धर्मान् (अञ्जनादीन्) लभते । तस्मात् उभयोः पक्षयोः तुल्या धर्मप्राप्तिरिति । अथोच्येत ‘ त्रैधातव्या दीक्षणीया भवति ’ इत्यनेन त्रैधातवीयायाः यत् कार्यम्, तत् निवार्य दीक्षणीयाकार्ये (तस्यां) विधीयते । तच्च (दीक्षणीयाकार्यम्) आत्मीयैरेव (यथासिद्धैः) धर्मैः आत्मीयेन चापूर्वेण त्रैधातव्या साधयिष्यति, न दीक्षणीयाधर्मान् ग्रहीष्यति सिद्धान्तवादिनः । (एतत् दूषयति–) पूर्वपक्षेऽपि यदि दीक्षणीयाकार्ये (यथासिद्धे) त्रैधातवीया वर्तेत, तथा सति आत्मीयैरेव धर्मैः तत्कार्यं साधयिष्यति प्रसिद्धधर्मकत्वात् । अथ न वर्तते (दीक्षणीयाकार्ये त्रैधातवीया, तदा) सुतरां आत्मीया एव धर्मास्तस्याः । अपि च परमापूर्वप्रयुक्ततायामपि वाङ्नियमस्य प्रकृतौ आग्नावैष्णवो विशिष्टं द्वारमभूत् (आग्नावैष्णवापूर्वमित्यर्थः) । तच्चेह (द्वारम्) नास्ति । तस्मात् नास्ति (पूर्वपक्षे) वाङ्नियमः ।

ननु अनेन न्यायेन नीवारेषु प्रोक्षणं न प्राप्नोति (आग्नावैष्णवपदं यथाश्रुतं मन्वानस्य चोद्यम्) । उच्यते । सत्यं विशिष्टं द्वारं (व्रीहयः) प्रोक्षणस्य । इयांस्तु (नीवारत्रैधातव्ययोः) विशेषः, व्रीहयो दृष्टेन (तण्डुलनिर्वृत्त्या अपूर्वस्य) उपकुर्वन्ति, नीवाराश्च तत्कार्ये प्रत्यक्षतः साधयन्तो दृश्यन्ते । तत्र तत्कार्यापत्त्या धर्मप्राप्तिर्युक्ता । इह तु (दीक्षणीयायाम्) अदृष्टं द्वारम् (अपूर्वम्) तस्मिन् कार्ये त्रैधातव्या वर्तते इति नास्ति प्रमाणम् । अथवा दूरादेवेदं भ्रष्टं प्रयोजनम् । (कथम् ?) त्रैधातवीया यादृशी एवोत्पन्ना, तादृशी एव (अश्वमेधे दीक्षणीयात्वेन) चोद्यते, त्रैधातवीयाशब्देन सैव विपरिवर्तते । आख्याताभावात् कर्मान्तरमपि न (भवति) । तस्मात् यादृशी तत्र विज्ञाता, तादृशी (एव) अत्र (कर्तव्या) । यद्यपि च कर्मान्तरं स्यात् तथापि नाम्ना धर्मान् गृह्णीयात्, न चोदकेनेति ।

शा—‘ फलवत् परमापूर्वं तच्छेषत्वं ततो भवेत् । स्वापूर्वं क्रतुशेषत्वान्न स्वयं फलवद् यतः ॥ फलवच्छेषता युक्ता न तु निष्फलशेषता । तस्मात् तत्साधने रूपे स्वरभेदो विधीयते ॥ ’ उच्यते । ‘ एवमाश्रीयमाणे हि भवेत् लक्षितलक्षणा । स्वापूर्वे लक्षणामात्रं तस्मात् तच्छेषता वरम् ॥ ’

सोम— पूर्वत्र हन्तिपिष्यर्थत्वे आनर्थक्यात् प्रोक्षणस्य अपूर्वार्थत्ववत् इहापि निष्फलदीक्षणीयाऽपूर्वार्थत्वे आनर्थक्यात् फलवज्ज्योतिष्टोमापूर्वार्थत्वं इत्युत्थितेः संगतिः । सूत्रे संस्कारशब्देन दीक्षारूपो यजमानसंस्कारो विवक्षितः, तच्छब्देन च परमापूर्वं विवक्षितम् ।

वि— ‘ मन्द्रादिकमपूर्वाय परायावान्तराय वा ।, फलादाद्यो, नो समत्वाल्लक्षणा तु विशिष्यते ॥ ’

भाट्ट— एवं वा । एवं तावदुद्देश्यस्वरूपे आनर्थक्यप्रसक्त्या अपूर्वसाधनत्वलक्षणेत्युक्तम् । तत्र प्रधानजन्यापूर्वमेव लक्ष्यते उताङ्गजन्यमपीति चिन्तायाम्, यत्र तावत् अवघातपेषणादौ न व्रीह्यादिजन्यं मध्ये अपूर्वान्तरम्, तत्र प्रधानजन्योत्पत्त्यपूर्वसाधनत्वलक्षणा अविवादैव । यत्र तु

अदृष्टार्थसंनिपत्योपकारकेषु प्रोक्षणीयाऽऽदिषु स्वजन्यादृष्टमस्ति, तत्रापि तदङ्गानामुत्पवनादीनां 'यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्' इत्यादीनां च स्वराणां दर्शपूर्णमासज्योतिष्टोमाद्युत्पत्त्यपूर्वसाधनत्वलक्षणया तदर्थत्वमेव । न तु प्रोक्षणदीक्षणीयाऽऽदिजन्योत्पत्त्यपूर्वार्थत्वम्, तस्मिन्नपि फलवत्त्वाभावेन आनर्थक्यापत्तेः । **इति प्राप्ते**, साक्षात्फलवत्त्वाभावेऽपि परंपरया अग्निवत् फलवत्त्वोपपत्तेः अङ्गापूर्वाणामपि अनिर्ज्ञातोपायत्वेन स्वाङ्गाभावे निष्पत्तौ प्रमाणाभावात् अङ्गापूर्वस्वरूपेऽपि आनर्थक्याभावेन तत्साधनत्वलक्षणायामपि बाधकाभावात् प्रधानापूर्वार्थत्ववादिनाऽपि च अङ्गापूर्वाणामतिप्रसङ्गपरिहारार्थं द्वारत्वस्य आवश्यकत्वेन तदर्थतयैव उपपत्तौ प्रधानापूर्वपर्यन्तगमने प्रमाणाभावात् लक्षितलक्षणाप्रसङ्गाच्च । झटित्युपस्थितदीक्षणीयाऽऽद्यपूर्वसाधनत्वमेव दीक्षणीयाऽऽदिपदैर्लक्ष्यते इति ते धर्मास्तत्प्रयुक्ता एव । अत एव आरादुपकारकाङ्गानां अभिक्रमणयूपादीनां प्रयाजदैक्षादिजन्यापूर्वार्थत्वमेव । न तु दर्शज्योतिष्टोमाद्यपूर्वार्थत्वम्, अव्यवहितापूर्वेऽपि आनर्थक्याभावात् ।

प्रयोजनं--ज्योतिष्टोमानङ्गभूतपशुषु मेष्यादिद्रव्यकेषु उपाकरणादीनामूहाभावात् अकरणं पूर्वपक्षे, ज्योतिष्टोमापूर्वस्थानापन्नापूर्वाभावेन प्राकृतकार्याभावात् । सिद्धान्ते तु ऊहः इति द्रष्टव्यम् । एवं दैक्षधर्मानतिदेशोऽपि पूर्वपक्षे प्रयोजनमनुसंधेयम् । यत्तु **भाष्यकारेण** अश्वमेधे 'त्रैधातवीया दीक्षणीया भवति' इति वचनेन दीक्षणीयाकार्ये यजमानसंस्कारे विहितायां त्रैधातवीयायां पूर्वपक्षे दीक्षणीयाधर्मप्राप्तिः, सिद्धान्ते तु प्रसिद्धत्रैधातवीयाया धर्मा एवेति प्रयोजनमुक्तं तन्न, पूर्वपक्षवत् सिद्धान्तेऽपि स्थानापत्तौ बाधकाभावात् । यदि तु स्थानापत्त्यतिदेशापेक्षया त्रिविधातिदेशस्यापि बलवत्त्वस्य अष्टमे साधितत्वात् नामातिदेशेन प्रसिद्धत्रैधातवीयाया धर्मा एवेत्याशङ्क्येत तत् पूर्वपक्षेऽपि तुल्यम् । वस्तुतस्तु नेयं त्रैधातवीया प्रसिद्धत्रैधातवीयातः कर्मान्तरम्, सत्यपि अनुपादेयगुणयोगे आख्यातसामानाधिकरण्याभावात् । अतः प्रसिद्धायाः सधर्मकाया एव त्रैधातवीयायाः यजमानसंस्कारार्थत्वेन विधानात् धर्माकाङ्क्षाविरहेण क्व स्थानापत्त्यतिदेशप्रसक्तिः ।

मण्डन-- 'वाचां स्वरस्त्वङ्गविधिप्रयुक्तः ।' ३.
शंकर— 'दीक्षणीयाङ्गता स्वरे ।' ८.

* न चात्र **दीक्षणीयावाङ्नियमन्यायः** । दीक्षणीया हि संनिपत्योपकारकत्वेऽपि न ज्योतिष्टोमोत्पत्त्यपूर्वजनिका, तथात्वे ज्योतिष्टोमतुल्यत्वेन प्राधान्यापत्तेः । किन्तु स्वापूर्वद्वारेण उत्पत्त्यपूर्वसंपादनानुकूलज्योतिष्टोमवृत्तियोग्यतासंपादनार्था इत्युक्तम् । अतश्च दीक्षणीयापदे स्वापूर्वादिद्वारा ज्योतिष्टोमोत्पत्त्यपूर्वप्रयोजकत्वस्य कारणकारणत्वापरपर्यायस्य लक्षणायां लक्षितलक्षणाऽऽद्यापत्तेः न सा आश्रिता । प्रकृते तु यागस्य स्वर्गसाधनत्वान्यथाऽनुपपत्त्या द्वारत्वेन कल्पितं उत्पत्त्यपूर्वं प्रतीव परमापूर्वं प्रत्यपि साधनत्वाविशेषात् उत्पत्त्यपूर्वं अतन्त्रीकृत्य प्रधानत्वेन फलापूर्वसाधनत्वलक्षणायां बाधकाभावः । कौ. ३।१।४।८ पृ. १४४. * यूपस्य तत्साध्यपश्वपूर्वस्य वा सप्तदशारत्नित्वं विनापि प्रकृतौ तत्सिद्धिदर्शनात् तत्स्वरूपेऽपि आनर्थक्यापत्तेः **दीक्षणीयावाङ्नियमं बाधित्वा** लक्षितलक्षणया अधिकाराख्यप्रकरणसहकृतेन **यूपशब्देन** वाजपेयापूर्वसंबन्धित्वस्यैव यूपनिष्ठस्य लक्षणात् वाजपेयापूर्वप्रयुक्तत्वसिद्धिः । इति सिद्धान्ते । कौ. ३।१।९।१८ पृ. १८९. * **दीक्षणीयावाङ्नियमन्यायेन** तत्तत्संस्कारसमूहप्रयुक्ता एव तत्तद्धर्माः इति न प्रकृतौ (अग्निष्टोमे) सांकर्यम् । भाट्ट. ९।२।१४; * 'एकं साम तृचे क्रियते' 'यद्योन्यां गायति' इत्यादेः **दीक्षणीयावाङ्नियमन्यायेन** प्राकृततत्तत्स्तोत्रीयर्चामेव उद्देशेन अप्राकृते अप्रवृत्तेः । ९।२।७ वर्णकं २, * गुणाभिधानजन्यस्यापूर्वस्य एकस्यैव अग्निष्टोमस्तोत्रे चयनादौ च उपयोगात् धर्माणां च गीत्यादीनां गिरापदकार्यगुणाभिधानजन्यावान्तरापूर्वप्रयुक्तस्यैव दीक्षणीयावाङ्नियमन्यायेन अङ्गीकारात् । ९।१।१८, * ग्रहधर्माणां ग्रहस्वरूपे आनर्थक्यप्रसक्तौ ग्रहयागाभ्यासापूर्वसाधनत्वमेव ग्रहपदेन लक्ष्यते. दीक्षणीयावाङ्नियमन्यायेन, न तु ज्योतिष्टोमापूर्वसाधनत्वम् । इति पूर्वपक्षे । ३।६।११. * यदि उपस्थानस्य अदृष्टार्थत्वं स्यात् तदा तन्मन्त्रस्यापि प्रोक्षण-

मन्त्रवत् उपस्थानजन्यादृष्टार्थत्वमेव दीक्षणीयावाङ्नियमन्यायेन भवेत्, तस्य तु अभिधानफलकस्य (मन्त्रस्य) करिष्यमाणमण्डपवृत्तिपदार्थानुष्ठानोपयोगितया दृष्टार्थत्वात् अवघातमन्त्रवदेव तन्मन्त्रस्य क्रत्वपूर्वार्थत्वमावश्यकम् । **कौ.** ३।२।८।२३ पृ. २६७, * यद्यपि प्रकृतायाः (‘अग्न आ याहि’ इति आग्नेय्याः ऋचः स्तोत्रादिवाक्येषु स्वातन्त्र्येण अपूर्वार्थत्वक्लृप्तिः, तथापि तस्याः दीक्षणीयावाङ्नियमन्यायेन स्तोत्रजन्यापूर्वार्थत्वस्यैव क्लृप्तेः । पूर्वपक्षः । ३।२।८।२१ पृ. २६३, * सप्तदशारत्नित्वं वाजपेयोद्देशेन विधीयते ... अन्यथा हि दीक्षणीयावाङ्नियमन्यायेन पश्वपूर्वार्थत्वं यूपमात्रार्थत्वं वा आपद्येत इति वाजपेयानङ्गत्वात् तद्बाधापत्तिः । इति पूर्वपक्षे । ३।१।९।१८ पृ. १८८, * ‘समानयते जुह्वामौपभृतम्’ ‘प्रयाजशेषेण हवींष्यभिघारयति’ । अत्र हि दीक्षणीयावाङ्नियमन्यायेन प्रधानसंबन्धायोगात् अङ्गाधिकारस्यैव तात्पर्यग्राहकत्वमावश्यकम् । ३।१।१०।२० पृ. १९५. * उद्देश्यभागस्य स्वरूपे आनर्थक्ये प्रसक्ते भागजन्यापूर्वसद्भावे प्रमाणाभावात् **दीक्षणीयावाङ्नियमन्यायासंभवेन** भागसंबन्धियज्ञजन्यपरमापूर्वसाधनत्वमेव भागनिष्ठं लक्ष्यते इति परमापूर्वप्रयुक्तं उपांशुत्वम् । **भाट्ट.** ९।१।६.

* **दीक्षा** अपर्वणि कर्तव्या सुत्या पर्वणि । अङ्गगुणविरोधन्यायः । **भा.** १२।२।९।२५, * दीक्षा गवामयनस्य माघ्याः पौर्णमास्याः पुरस्ताच्चतुरहे । ६।५।९।३०–३७, * दीक्षा च व्रतानि । १०।२।१८।४९. * दीक्षा दीक्षणीयेष्ट्या संपन्नः संस्कारः । **वि.** ६।५।८. * दीक्षा यमनियमव्रतविषयसंकल्पः । व्रतशब्देन ब्रह्मचर्यादिः विवक्षितः । **सोम.** १०।२।१८. * **दीक्षाः** गवामयने द्वादश, ‘द्वाभ्यां लोमावद्यति’ इत्यादिना षण्णां दीक्षायुग्मानां उपन्यस्तत्वात् । **वि.** ८।१।१०, * दीक्षाः तिस्रः ज्योतिष्टोमे । **भा.** ३।७।५।११, * दीक्षाः द्वादशाहे तन्त्रेण कर्मप्रयोगात् पृथक्कालत्वात् । (आदौ द्वादशसु अहःसु दीक्षाद्वादशकं कृत्वा ततः सुत्याऽऽरम्भः इत्यर्थः) । ११।३।१०।२१, * दीक्षाः द्वादशाहे द्वादशैव । ११।४।५।१५–२२, * दीक्षाः प्रधानार्थाः । दीक्षादक्षिणन्यायः । ३।७।५।११–१२.

* **दीक्षायाः** एकत्वपक्षे एका दीक्षा तिस्र उपसदः पञ्चमे दिने सुत्या । त्रित्वपक्षे तिस्रो दीक्षाः तिस्र उपसदः सप्तमे दिने सुत्या । चतुष्ट्वपक्षे–चतस्रो दीक्षाः तिस्र उपसदः अष्टमे दिने सुत्या । **के.** * दीक्षायाः फलीभूतयमनियमपरिग्रहोपयोगिदीक्षितत्वज्ञानजनकतयैव दीक्षणीयाऽर्थत्वं दीक्षाऽर्थत्वमेव वा अङ्गीकर्तुमुचितम् । **भाट्ट.** ५।३।११. * **दीक्षाणां** उन्मोचनार्थो हि अवभृथः । **भा.** ६।५।१२।४२. * दीक्षाणां उपसदां च स्वस्थानविवृद्ध्या प्रयोगो द्वादशाहे । **टुप्.** ११।४।५।१८. * दीक्षाणां द्वादशत्वपक्षः एव द्वादशाहे नियतः । तत्र च द्वादश दीक्षाः, द्वादशोपसदः, द्वादश सुत्याश्चेति । ‘षट्त्रिंशदहो वा एष, यद् द्वादशाहः’ । **वि.** ६।५।९. * दीक्षाणां द्वादशाहे क्रमविशेषनियमः । **भा.** ५।१।११ वर्णकं ३. * **दीक्षायां** मुष्टीकरणं सर्वाङ्गम् । तेन हस्तचापलं निवार्यते । **वि.** ३।१।१४. * **दीक्षासु** अग्नीषोमीययूपमात्रस्य प्रतिकर्षः, न तु ततोऽर्वाचीनानामपि सौमिकानामग्नीषोमप्रणयनादीनाम् । **भा.** ५।१।१४।२७, * दीक्षासु यूपमात्रापकर्षः । यूपकर्मन्यायः । ५।१।१४।२७, * दीक्षासु विनिर्देशो भवति, इदं क्रत्वर्थम्, इदं भक्षार्थम्, इदमानमनायेति । ६।७।७।१३. * दीक्षासु सोमक्रयसमीपे अग्निषोमीयः पशुः समाम्नायते । **वा.** ३।६।७।१८.

* **दीक्षाऽर्थाभ्यङ्गे** ज्योतिष्टोमे नवनीतं ग्राह्यम् । तत्स्तुतये च ‘घृतं देवानाम्, मस्तु पितृणाम्, निष्पक्वं मनुष्याणाम्’ इत्यनुवादः । **वि.** ३।४।७.

* **दीक्षाऽऽवेदनं** आध्वर्यवं ज्योतिष्टोमे । **वा.** ३।१।१४।२४.

* **दीक्षाऽऽहुतयः** प्राकृत्यो वैकृत्यश्च । तासां समुच्चयः कर्तव्यः, चयने । तत्र प्राकृत्यः षट् ‘आकूत्यै प्रयुजेऽग्नये स्वाहा’ इत्यादयः । वैकृत्यश्च ‘आकूतिमग्निं प्रयुजं स्वाहा’ इत्यादयः । **भा.** १०।३।४।२३–२९, * **दीक्षाऽऽहुतिमन्त्राणां** अग्निचयनप्रकरणे श्रुतानां

सौमिकदीक्षाऽऽहुतिमन्त्रैः समुच्चयः । अग्निचयनप्रकरणे इत्यत्राधिकरणम् । १०।३।४।२३–२९.

⧗ दीक्षोत्कर्षे अग्निहोत्रादीनामपि उत्कर्षः ॥

दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् । ६।५।१०।३८॥

भाष्यम्— इदं श्रूयते, 'तस्माद्दीक्षितो न ददाति, न पचति, न जुहोति' इति । ज्योतिष्टोमे समामनन्ति 'तिस्रो दीक्षाः' इत्येवमादि । यदि तु दैवान्मानुषाद्वा प्रतिबलात् दीक्षाकालः उत्कृष्यते, तत्र संदेहः किं दानहोमपाकानामुत्कर्षः, उत नेति । किं प्राप्तम् ? अनुत्कर्षः । नियता हि दानहोमपाकाः 'यावज्जीवमग्निहोत्रं जुहोति' इत्येवमादिभिः श्रुतिभिः । तेषामपवादः, येष्वहःसु साङ्गो ज्योतिष्टोमो विहितः, तावन्ति अहानि मुक्त्वा अन्येष्वहःसु कर्तव्याः । ज्योतिष्टोमविधानकालात् परतः अप्रतिषिद्धाः । तस्मात् कर्तव्याः । प्राप्तो हि तेषां कालः इति ।

उत्कर्षो वा, दीक्षितत्वादविशिष्टं हि कारणम् । ३९ ॥

भाष्यम्—वाशब्दात् पक्षो विपरिवर्तते । यदुक्तं नैषामुत्कर्ष इति, नैतदेवम् । उत्कृष्टव्याः । कुतः ? दीक्षितत्वात् । दीक्षितस्य ते प्रतिषिद्धाः, न दीक्षितो यस्मिन्काले । लक्षणा हि एवं स्यात् । यथा तु वयं ब्रूमः, तथा श्रुतिः कारणम् । प्राक् चावभृथादयं दीक्षित एव । अविशिष्टं हि कारणम् । यदेव ज्योतिष्टोमविधानकाले, तदेव अतिक्रान्तेऽपि । उभयत्र हि दीक्षितत्वं हि कारणम् । तस्मात्तेषामुत्कर्ष इति ।

सोम— दीक्षाप्रसङ्गागतविचारानन्तरं यदर्थे दीक्षापरिमाणं निरूपितम्, तद्विचारात् संगतिः । **सूत्रार्थस्तु**—दीक्षाकालस्य निषेधाङ्गतया शिष्टत्वात् शास्त्रीयदीक्षाकालातिक्रमे नियतानामग्निहोत्रादीनां प्राप्तकालत्वात् अनुत्कर्षः इति । ११.

वि-- 'कुतोऽप्यवभृथोत्कर्षे जुहुयादग्निहोत्रकम् । न वा,ऽऽद्योऽप्रतिषिद्धत्वा, न्मैवं दीक्षाऽनुवर्तनात् ॥' ११.

भाट्ट--सोमे 'दीक्षितो न जुहोति' इत्यादिना पुरुषार्थानामग्निहोत्रादीनां क्रत्वङ्गत्वेन पर्युदासः प्रतिषेधो वा दीक्षितस्य श्रुतः । अवभृथे च कृते दीक्षामुक्तिः । तद्यदा दैवादिना कारणेन संध्यातः पूर्वं क्रियमाणावभृथस्य उत्कर्षः, तदा कालेऽग्निहोत्रं कर्तव्यमेव । यावन्तं कालं शास्त्रवशेन दीक्षाऽनुवृत्तिः, तावत्कालम् 'न जुहोति' इति तत्प्रतिषेधशास्त्रावधारणात् । इति प्राप्ते, काललक्षणायां प्रमाणाभावात् दीक्षैव निषेधावधिः । तस्याश्च अनिवृत्तत्वान्न कर्तव्यमेवाग्निहोत्रादि । ११.

मण्डन--'यावद्दीक्षं निषिद्धानि ।' ११.

शंकर--'दीक्षितोऽवभृथावधि ।' ११.

* दीक्षोत्कर्षे ज्योतिष्टोमे अवभृथोत्कर्षेण दैवाज्जाते, तावति काले अग्निहोत्रहोमलोपः स्यात् । होमनिषेधादेव च लुप्तहोमानां प्रतिहोमा न कर्तव्याः । वि. ६।५।१२.

* **दीक्षोन्मोचनार्थः** अवभृथः । भा. ११।४।५।२०,

* **दीक्षोन्मोचनवचनं** नक्तंसंस्थापनस्य अर्थवादः । 'वरुणपाशाभ्यां वा एषोऽभिधीयते (अभिधानं बन्धनम्) यो दीक्षितः । अहोरात्रे वै वरुणपाशौ । यद् दिवा संस्थापयेत् (यज्ञं समापयेत्) अनुन्मुक्तो वरुणपाशाभ्यां स्यात् । नक्तं संस्थाप्यः । वरुणपाशाभ्यामेवोन्मुच्यते, आत्मनः अहिंसायै' इति । ९।१।८।३१.

* **दीक्षोपक्रमदिन**मारभ्य पञ्चमे सप्तमेऽष्टमे वा दिने सुत्या भवति । ततोऽवभृथेन दीक्षानियमनिवृत्तिः । वि. ६।५।११.

* **दीक्षोपसत्सुत्यानां** प्रत्येकं द्वादशदिनसाध्यत्वं द्वादशाहे । भा. ११।४।५।१७-२५.

⧗ दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् । ६।५।१०।३८ ॥

ज्योतिष्टोमे 'तिस्रो दीक्षाः' इत्यादि उक्तम्, 'दीक्षितो न ददाति, न जुहोति, न पचति' इति चोक्तम् । अवभृथपर्यन्तं च दीक्षितत्वम् । यदि दीक्षाकालस्य कस्माच्चित् कारणात् वृद्धिः स्यात् तदा विचारः । दीक्षाकालस्य दीक्षाणां कालः दीक्षाकालः । दीक्षाकालः एव कालः यस्य दानहोमपाकस्य सः दीक्षाकालः । उत्तरपदलोपोऽत्र समासे । दीक्षाकालसमानकालानामेव दानहोमपाकानां निषिद्धत्वेन शिष्टत्वात्, तेषां निषेधस्य विहितत्वात् इत्यर्थः । अतिक्रमे दीक्षाणां कालस्य अति-

क्रमे वृद्धौ सत्यामपि नियतानां नित्यानां अग्निहोत्रहोमादीनां अनुत्कर्षः उत्कर्षो न कर्तव्यः, किन्तु अवभृथात् प्रागपि नियता होमादयः कर्तव्याः। तेषां प्राप्तकालत्वात्। अवर्धितो यावान् वास्तवो दीक्षायाः कालः, तस्मिन् समाप्ते होमादीनां अनुष्ठानस्य कालः प्राप्तो भवति। तस्मात् दीक्षाकालोत्कर्षेऽपि होमादीनां नियतानां उत्कर्षो न कार्यः इति पूर्वः पक्षः।

उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम्। ३९॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्य सिद्धान्तमाह। दीक्षाणां कालस्योत्कर्षे होमादिनिषेधकालस्यापि उत्कर्षः कार्यः। मुख्यदीक्षाकालस्य अविवृद्धस्य समाप्तावपि अवभृथपर्यन्तं यजमानस्य दीक्षितत्वात् दीक्षितकर्तृकस्य च होमादेर्निषिद्धत्वात्। तथा च होमादिनिषेधकारणं दीक्षितत्वं हि यस्मात् अविशिष्टं समानमेव दीक्षाकालस्य विवृद्धौ अविवृद्धौ वा। तस्मात् दीक्षोत्कर्षे होमादिनिषेधस्यापि उत्कर्षः इति सिद्धान्तः। **के.**

* **दीक्षाकाले** अग्नीषोमीयपशुयूपच्छेदमात्रस्य अपकर्षः न तु तदन्ताङ्गसमूहस्य। **वि.** ५।१।१४.

* **दीक्षाकालोत्कर्षे** अग्निहोत्रादीनामुत्कर्षः। **भा.** ६।५।१०।३८–३९.

* **दीक्षाक्रमः** सत्रे श्रौतः। **भा.** ५।१।१।१.

* **दीक्षाक्रमपरं** वाक्यम् 'अध्वर्युर्गृहपतिं दीक्षयित्वा' इति। **वा.** ७।१।१।२ पृ. १५२५.

* **दीक्षाग्रहणार्था** दीक्षणीयेष्टिः। **भा.** १०।२। १८।४९.

* **दीक्षातः** पूर्वमपि प्राजापत्यपशोः परस्तात् अपि चयनेष्टकाकरणकालः। **संकर्ष.** २।१।२९.

⧗ **दीक्षादक्षिणं तु वचनात् प्रधानस्य। ३।७। ५।११॥**

ज्योतिष्टोमे तिस्रो दीक्षाः द्वादशशतं (११२) दक्षिणा चोक्ता। तत् द्वयमपि किं अङ्गप्रधानार्थम्, उत प्रधानार्थमेवेति विचारे अङ्गप्रधानार्थं इति पूर्वपक्षं उत्सूत्रं गृहीत्वा तन्निरासार्थः तुशब्दः। दीक्षाश्च दक्षिणाश्च तासां समाहारः दीक्षादक्षिणम्। तत् प्रधानस्यैव स्यात्। 'दीक्षाः सोमस्य' 'दक्षिणाः सोमस्य' इति वचनात्। अत्र हि स्पष्टमेव प्रधानस्य सोमस्यैव दीक्षादक्षिणमुक्तम्।

निवृत्तिदर्शनाच्च। १२॥

सिद्धान्ते हेत्वन्तरार्थं सूत्रम्। 'अध्वर्यो यत् पशुनाऽयाक्षीः अथ काऽस्य दीक्षेति, यत् षड्ढोतारं जुहोति साऽस्य दीक्षा' इति निरूढपशौ षड्ढोतृहोमेन दीक्षानुग्रहं वदन् वस्तुतः दीक्षाया अप्राप्तिं दर्शयति। एवं दीक्षायाः निवृत्तेः दर्शनात् अङ्गेषु न दीक्षादक्षिणं इति सिध्यति। तस्मात् प्रधानस्यैव।

अत्र **सुधा**–– षड्ढोतृमन्त्रकेण होमेन निरूढपशौ दीक्षानुग्रहोक्तेः दीक्षाननुष्ठानाख्यनिवृत्तिदर्शनात् सर्वार्थत्वे च दैक्षाङ्गत्वात् तद्विकारे निरूढपशौ दीक्षाप्राप्तेः तन्निवृत्तिदर्शनायोगात् न सर्वथा दीक्षा इति। **के.**

* **दीक्षादक्षिणयोः** प्रधानमात्रार्थता ज्योतिष्टोमे। **भा.** ३।७।५।११–१२ पृ. १०८२.

* **अङ्गैः** सह प्रधानानां सामानासामानविध्यचिन्तारूपत्वात् न्यायाधीनत्वेन च वचनाधीनदीक्षादक्षिणाचिन्तावैलक्षण्यात्। **सु.** ३।७ पृ. ८.

⧗ **दीक्षादक्षिणन्यायः**। ज्योतिष्टोमे दीक्षा दक्षिणाश्च प्रधानार्था एव॥

दीक्षादक्षिणं तु वचनात् प्रधानस्य। ३।७।५। ११॥

भाष्यम्— ज्योतिष्टोमे दीक्षाः श्रूयन्ते 'तिस्रो दीक्षाः' इति। तथा दक्षिणाः श्रूयन्ते 'तस्य द्वादशशतं दक्षिणा' इति। तत्र संदेहः किं दीक्षादक्षिणमङ्गप्रधानार्थम्, उत प्रधानार्थमिति। किं प्राप्तम्? पुरुषाणामङ्गप्रधानार्थत्वात् दीक्षादक्षिणस्य अङ्गप्रधानार्थतेति। एवं प्राप्ते, ब्रूमः। दीक्षादक्षिणं प्रधानस्य। कुतः? वचनात्। वचनं हि भवति। 'दीक्षाः सोमस्य' 'दक्षिणाः सोमस्य' इति। नहि वचनस्यातिभारो नाम कचित्। तस्मात् दीक्षादक्षिणं वचनात् सोमस्येति।

वा— 'फलसंयोगात्तु स्वामियुक्तं प्रधानस्य' (३। ७।२।६) इत्यनेनैव गतार्थत्वात् दीक्षाणां अनुदाहरणत्वम्। अन्ये तु समर्थयन्ते सर्वेषु सोमक्रयादिषु दीक्षित-

शब्देन विनियोगो दृश्यते । दीक्षाश्च दीक्षितत्वसिद्धयर्थाः । तच्च दीक्षितत्वं उपादीयमानत्वात् तत्रतत्र गुणत्वेन विवक्षितम् । अतः अङ्गप्रधानार्थत्वप्रसक्तिः । दक्षिणानां ऋत्विंगानमनार्थत्वात् , आनमनस्य च साहाय्योपादित्सया प्रयोगार्थता । तस्मात् चिकीर्षान्यायेन (३।७। ३।७) साङ्गप्रधानप्रयोगविषयत्वमिति सर्वार्थत्वप्रसक्तिः । (याज्ञिकाचारेण न्यायं उपोद्बलयति–) अपिच प्रत्यक्षमेव एतत् दृश्यते दक्षिणोपात्ता: (दक्षिणया उपात्ताः इति विग्रहः) ऋत्विजः अङ्गान्यपि कुर्वन्ति, इतरथा हि प्रधानमात्रमेव तत्परिक्रीताः कुर्युः । न च तावन्मात्रार्थे यजमानस्य एतैः परिक्रीतैः प्रयोजनम् । अतः यद्यत् परिक्रीताः करिष्यन्ति इत्यवधार्यते, तस्मै दक्षिणा । एवं च कर्तृतन्त्रत्वाभिधानं एकादशे योक्ष्यते (११।२।१।८) । तस्मात् सर्वार्थत्वम् । **इति प्राप्ते, अभिधीयते** । ‘ दीक्षाः सोमस्य ’ ‘ दक्षिणाः सोमस्य ’ इति वचनात् प्रधानार्थता (अनेन सूत्रार्थ उक्तः) । यस्तु दीक्षितविनियोगः अङ्गेषु, स पुरोडाशकपालादिवत् अप्रयोजकलक्षणाऽऽपत्तेः प्रधानप्रयुक्तस्यैव इति ज्ञायते । दक्षिणाश्च प्रधानार्थाः सत्यः प्रसङ्गात् अङ्गानामुपकुर्वन्ति इति वक्ष्यामः (भृतत्वाच्च परिक्रयः इत्यत्र) ।

निवृत्तिदर्शनाच्च । १२ ॥

भाष्यं— निवृत्तिं दीक्षाणां दर्शयति । कथम् ? ‘ अध्वर्यो यत्पशुनाऽयाक्षीरथ काऽस्य दीक्षेति, यत् षड्ढोतारं जुहोति साऽस्य दीक्षा ’ इति । असत्यामपि दीक्षायां वचनं भवति । तस्मादङ्गानां दीक्षादक्षिणमिति ।

वा— निरूढपशौ च षड्ढोतृहोमेन (सूर्यं ते चक्षुः, वातं प्राणः इत्यादिर्मन्त्रः षड्ढोता) दीक्षाऽनुग्रहं वदन् अप्राप्तिं दर्शयति । सर्वार्थत्वे च स्यादेव दीक्षा, इति नान्येन अनुगृह्येत । ननु च अनङ्गत्वेऽपि अनुग्रहवचनं अनाकाङ्क्षितत्वात् व्यर्थमेव । नैष दोषः । प्रकृतौ परप्रयुक्तोपजीवनात् तत्कृत उपकार आसीत् इति अप्रयोजकत्वात् तदभावे सति वैगुण्यमिव आशङ्क्यते, तत्र अनुग्रहवचनमुपपत्स्यते ।

सोम-- वचनाविरोधप्रतिपादनेन यथा चतुर्होत्रादेः अङ्गप्रधानार्थत्वेऽपि वचनाविरोधः, एवमिहापि इति प्रत्यवस्थानात् **संगतिः** । **प्रयोजनं**– निरूढपश्वादौ प्रवृत्त्यप्रवृत्ती एव ।

वि-- ‘ दण्डदीक्षा दक्षिणा तु शतं द्वादशभिर्युतम् । द्वयार्थमुत मुख्यार्थे, सोमस्येत्युक्तिसंभवात् ॥ मुख्याङ्गद्वयगं, मैवं पारंपर्यविडम्बना । वचनस्य न युक्ताऽतः प्रधानार्थमिदं स्थितम् ॥ ’

भाट्ट-- ज्योतिष्टोमे दीक्षा ‘ दण्डेन यजमानं दीक्षयति ’ इत्यादिका, दक्षिणा च ‘ गौश्चाश्वश्च ’ इत्यादिका श्रुता । सा अङ्गप्रधानार्था । दीक्षायास्तावत् द्वितीयया पुरुषसंस्कारिकाया वपनाधिकरणन्यायेन (३।८।२) फलिसंस्कारकत्वप्रसक्तावपि ‘ यो दिक्षितो यदग्नीषोमीयं पशुमालभते ’ ‘ दीक्षितः सोमं क्रीणाति ’ इत्यादौ दीक्षितग्रहणात् ‘ निर्मन्थ्येनेष्टकाः पचन्ति ’ इत्यादिवत् विशेषणीभूतदीक्षाया अपि कर्तृसंस्कारद्वारा अग्नीषोमीयाद्यर्थत्वप्रतीतेः, तस्य च स्वतन्त्रविध्युन्नायकत्वे गौरवात्, अनुवादविधया ‘दण्डेन दीक्षयति’ इत्यादौ ‘ हिरण्यमालिनः ’ इति बहुवचनवत् कर्तृसंस्कारकतातात्पर्यग्राहकत्वावगतेः, कर्तुरङ्गप्रधानार्थत्वेन दीक्षाया अपि अङ्गप्रधानार्थत्वम् । दक्षिणायास्तु कर्त्रानमनद्वारा अङ्गप्रधानार्थत्वं स्फुटमेव । एवं च ‘दीक्षा सोमस्य’ ‘दक्षिणा सोमस्य ’ इति वचनद्वयं साक्षात्परंपरासाधारणसंबन्धसामान्यमादाय अनुवादः, इतरथा परिसंख्यापत्तेः । **इति प्राप्ते**, वचनाऽऽनर्थक्यभिया प्रधानमात्रार्थत्वम् । फलतः परिसंख्यात्वाच्च न त्रैदोष्यापत्तिः । न च वचनस्य प्रधानप्रयुक्तत्वमात्रपरत्वेनापि उपपत्तेः अङ्गाङ्गत्वनिवृत्तिपरत्वे मानाभावः, प्रसङ्गसिद्धकृतिकारकत्वादेर्निराकर्तुं अशक्यतया वचनस्य अङ्गोद्देश्यतामात्रनिवृत्तिफलकत्वावसायात् । तस्याश्च प्रयुक्तत्वे इव अङ्गत्वेऽपि प्रविष्टत्वेन उभयनिवृत्त्युपपत्तेः, प्रयुक्तत्वनिवृत्तौ अङ्गत्वाङ्गीकारे फलाभावाच्च । न च दक्षिणावाक्ये परिसंख्यार्थत्वोपपत्तावपि ‘ दण्डेन ’ इत्यादिवाक्येन दीक्षायाः प्रसक्तस्य प्रधानमात्रार्थत्वस्य ‘ यो दीक्षितः ’ इत्यादिवाक्येन दीक्षायाः तत्तदङ्गाङ्गताविधायकेन बाधितस्य प्रतिप्रसवार्थता ‘ दीक्षा सोमस्य ’ इति वाक्यस्यास्त्विति **वाच्यम्** । गौरवेण अग्नीषोमीयादिवाक्यस्य दीक्षाविधायकत्वानुपपत्तेः । अतः

अनुवादविधयैव तद्बाधकत्वात् युक्तमेव परिसंख्यात्वम् । वस्तुतस्तु गौरवभियैव अनुवादविधयाऽपि न बाधकत्वं अपितु प्रधानाङ्गभूतदीक्षायुक्तपुरुषानुवाद एव ‘ य एवं विद्वान् ’ इतिवत् दीक्षितपदम् । अतश्च दीक्षावाक्यस्य अनुवादकत्वमेव दक्षिणाप्रशंसाफलकम् । अतः प्रधानमात्रार्थमेव दीक्षादक्षिणम् । तथापि तु नाङ्गेषु प्राकृती अन्या वा दक्षिणा, प्रसङ्गेन कार्यसिद्धेर्द्वादशे वक्ष्यमाणत्वात् ।

प्रयोजनं—- अग्नीषोमीयादिविकारेषु दीक्षादक्षिणयोः अनतिदेशः सिद्धान्ते । ततश्च तेष्वपेक्षितत्वात् शतोक्थ्यादिवत् प्रकृतिप्रकृतितः अन्वाहार्यदक्षिणायाः स्वतन्त्रातिदेशः, अर्थाक्षिप्तं यत्किञ्चिदानतिसाधनद्रव्यं वा दक्षिणा, इत्यपि तत्रैव वक्ष्यते ।

मण्डन— ‘ दीक्षा सदक्षिणा नाङ्गे । ’

शंकर— ‘ सोमाङ्गं दक्षिणा दीक्षा । ’

* **दीक्षादक्षिणवाक्योक्तब्रह्मादीनामेव** सप्तदशर्त्विक्त्वम् । **वि.** ३।७।१७.

* **दीक्षानियमाः** अस्थियज्ञे मृताधिकारपक्षे लुप्यन्ते (कृत्वाचिन्ता) । **वि.** १०।२।१८,

* **दीक्षापदार्थः** यजमानसंस्कारः । **भा.** १०।६।१५।५२.

* **दीक्षापरिमाणे** ज्योतिष्टोमे यथाकामी । **वा.** ६।५।८।२८.

दीक्षापरिमाणे यथाकाम्यविशेषात् । ६।५।८।२८ ॥

‘ एका दीक्षा, तिस्रो दीक्षाः, द्वादश दीक्षाः ’ इति बहूनि दीक्षापरिमाणानि आम्नातानि । तत्र ज्योतिष्टोमे अनुष्ठातव्ये दीक्षापरिमाणे दीक्षाणां परिमाणे यजमानः यथाकामी यथा कामयते तथाकामी स्यात् । इच्छया यः कोऽपि परिमाणपक्षः स्वीकार्य इत्यर्थः । अविशेषात् विशेषाभावात् विशेषस्य अनुक्तत्वात् । इति पूर्वः पक्षः । यथाकामी इत्यत्र याथाकाम्यं इति, याथाकामी इति च पाठः । तत्र यथाकामी इति इन्नतः, पुंलिङ्गम् । यथाकामिनो भावः याथाकाम्यं इति नपुंसकलिङ्गम् । याथाकामी इति स्त्रीलिङ्गं इति विशेषः । सर्वे च पाठाः प्रामाणिकाः नातिभिन्नार्थकाश्च ।

इदं पूर्वपक्षसूत्रं भाष्यकारमतेन । वार्तिककारमतेन तु सिद्धान्तसूत्रमेवेदम् । ज्योतिष्टोमे दीक्षाणां परिमाणे यथाकामी स्यात् । ऐच्छिको विकल्पः । अविशेषात् ज्योतिष्टोमप्रकरणस्य । इति सिद्धान्तः । इति ।

द्वादशाहस्तु लिङ्गात् स्यात् । २९ ॥

पूर्वपक्षं सूत्रेण प्राप्तं तुशब्देन निरस्यन् सिद्धान्तमाह । द्वादशाहः दीक्षाद्वादशाहपक्ष एव ज्योतिष्टोमे स्यात् । ज्योतिष्टोमे द्वादशैव दीक्षाः कर्तव्याः स्युः । कुतः ? लिङ्गात् ‘ द्वादश रात्रीर्दीक्षितो भृतिं वन्वीत ’ इति नित्यवदाम्नानरूपात् । अन्यानि परिमाणानि तु विकृतौ भविष्यन्ति । इति भाष्यकारपक्षेण व्याख्या । वार्तिककारमतेन तु– अहीनरूपः सत्ररूपो वा द्वादशाहः नाम क्रतुविशेषः, द्वादशदीक्षापक्षमेव गृह्णीयात् । ‘ षट्त्रिंशदहो वा एष यद् द्वादशाहः ’ इति लिङ्गात् । द्वादश दीक्षाः, द्वादश उपसदः, द्वादश सुत्याः इति षट्त्रिंशदहत्वं अत्रोक्तम् । तस्मात् द्वादशाहे नाम क्रतौ द्वादशदीक्षानियमः इति सूत्रार्थः । **के.**

* **दीक्षाशब्देन** क्रत्वर्थधर्मनियमविषयकः संकल्प उच्यते । **रत्न.** १२।१।१२।२४. * दीक्षाशब्देन मुण्डनवपनादिसंस्कारो लक्ष्यते । तेन तद्विषयः संकल्पः । **टुप्.** १२।१।१२।२४.

* **दीक्षासिद्ध्यर्थं** अध्वर्युणा दीयमानो दण्डो यजमानेन आसोमक्रयात् धार्यते । ‘ क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति ’ । **वि.** ४।२।६.

* **दीक्षितः** न जुहोति न पचति इति निषेधः दीक्षणीयेष्ट्यनन्तरमेव । **रत्न.** ५।३।११।२९–३१. * ‘ दीक्षितो भृतिं वन्वीत ’ । भृतिवननं यज्ञार्थे याचनया द्रव्यसंपादनम् । तत्र ‘ द्वादश रात्रीः ’ इति तु प्रदर्शनार्थम् । **वि.** ६।५।८. * **दीक्षिताः** सत्रैर्यजन्ते, अदीक्षिता अहीनैर्यजन्ति । एतौ च नियतौ एवार्थौ । दीक्षिताः स्वार्थे यजन्ते, याजका अपि अदीक्षिताः याजयन्ति इति । **भा.** १०।६।१५।५८, * **दीक्षितमदीक्षिता** दक्षिणापरिक्रीता ऋत्विजो याजयन्ति । १०।२।

८।२६. * **दीक्षितस्य** अन्नभोजनाभावे 'पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य' इति वर्णभेदेन व्रतस्य व्यवस्था। इदं व्रतं न पुरुषार्थं किंतु प्रकरणात् क्रत्वर्थम्। **वि.** ४।३।४, * दीक्षितस्य अमेध्यदर्शने 'अबद्धं मनः' इत्यादिर्मन्त्रो जप्यः। स च एकदा अनेकामेध्यदर्शनेऽपि नावर्तनीयः। ११।४। १८.

दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात्। १०।८।७।१२॥

ज्योतिष्टोमे योऽयं 'दीक्षितो न ददाति, न जुहोति, न पचति' इति दीक्षितस्य दानहोमपाकानां प्रतिषेध उक्तः सः अविशेषात् विशेषाभावात् सर्वेषामेव दानहोमपाकानां क्रत्वर्थानां पुरुषार्थानां च प्रतिषेधः स्यात् इति पूर्वः पक्षः।

अक्रतुयुक्तानां वा धर्मः स्यात्, क्रतोः प्रत्यक्षशिष्टत्वात्। १३॥

पक्षान्तरमाह अक्रतुयुक्तानाम्, ये दानादयो न क्रतुना संबद्धाः, तेषां धर्मः स्यात् अयं प्रतिषेधः। क्रतुसंबद्धानां तु दानादीनां नायं प्रतिषेधः स्वीकर्तुं शक्यते क्रतोः क्रतुसंबद्धस्य दानादेः प्रत्यक्षशिष्टत्वात् वचनैरेव विहितत्वात्।

तस्य वाऽप्यानुमानिकमविशेषात्। १४॥

वाऽपि अपिवा इति पक्षान्तरमाह। तस्य क्रतोः आनुमानिकं चोदकप्राप्तं दानहोमपाकं 'दीक्षितो न ददाति' इत्यादिना प्रतिषिध्यते। पुरुषार्थस्य आनुमानिकस्य च अविशेषात् प्रतिषेध्यत्वेन तुल्यत्वात्। तस्मात् चोदकप्राप्तस्य प्रतिषेधः इति पक्षान्तरम्।

अपितु वाक्यशेषत्वादितरपर्युदासः स्यात्, प्रतिषेधे विकल्पः स्यात्। १५॥

अपितु इति पक्षव्यावृत्तिः। 'अहरहर्दद्यात्, अहरहर्जुहुयात्, अतिथिमाकाङ्क्षेत्' इत्यादिवाक्यस्य 'दीक्षितो न ददाति' इत्यादि वाक्यं शेषः। तस्मात् वाक्यशेषत्वात् 'दीक्षितो न ददाति' इत्यादिः इतरस्य अदीक्षितस्य पर्युदासः स्यात् अदीक्षितः अहरहः जुहोति ददाति पचति इति। 'दीक्षितो न ददाति' इत्यत्र प्रतिषेधे स्वीकृते तु विहितप्रतिषिद्धत्वात् विकल्पः स्यात्, स चान्याय्यः। सर्वथाऽपि ज्योतिष्टोमाङ्गभिन्नानां दानहोमपाकानां दीक्षितेन अकर्तव्यता इति सिद्धान्तः। 'दीक्षितो न ददाति' इति नञ् न प्रतिषेधार्थकः किन्तु पर्युदासार्थकः इति अधिकरणार्थः। **के.**

* दीक्षितस्य नदीतरणकाले 'देवीरापो अपांनपात्' इति मन्त्रस्य जपः। स च अवान्तरस्रोतोभेदेऽपि नावर्तनीयः। वि. ११।४।१८, * दीक्षितस्य निद्राकाले प्रथमतः 'त्वमग्ने व्रतपा असि' इत्यादिमन्त्रस्य जपः। स च अवान्तरनिद्राभेदेऽपि नावर्तनीयः। ११।४।१८. * दीक्षितस्य पर्जन्याभिवर्षणे 'उन्दतीर्बलं धत्त' इति मन्त्रः पठनीयः। स च अनेकधारापातेऽपि नावर्तनीयः। ११।४।१८, * दीक्षितस्य वाङ्नियमात् प्राक् जपाय सारस्वत – आग्नावैष्णव– बार्हस्पत्यमन्त्राः सन्ति, तेषां समुच्चय एव न विकल्पः, नानाकार्यकत्वात्। १२।४।१, * दीक्षितस्य संकल्पितप्रयाणसमाप्तिपर्यन्तं मध्ये विश्रामव्यवधानेऽपि आदौ सकृदेव 'भद्रादभि श्रेयः प्रेहि' इत्यादिमन्त्रपाठः। ज्योतिष्टोमप्रघट्टके अधिकरणम्। ११।४।१९. * **दीक्षितान्न**विशिष्टाभोजननियमो हि श्रेयोऽर्थिभ्यो विधीयते। ('दीक्षितान्नं न भोक्तव्यम्' इति दीक्षितान्नेन विशिष्टस्य भोजनस्य अभावो नियम्यते)। वा. १।३।२।४ पृ. १९२. * **दीक्षितकर्तृकस्य** पुरुषार्थदानहोमपाकानां पर्युदासः। नदीक्षिताधिकरणम्। **भा.** १०।८।७।१२–१५. * **दीक्षितधर्माः** 'न ददाति, न पचति, न जुहोति' इत्यादयः। वि. ६।५।११, * **दीक्षितधर्माणां** दैवादवभृथोत्कर्षे सति उत्कर्ष एव। ६।५।११. * **दीक्षितव्रतं** ज्योतिष्टोमे 'कृष्णविषाणया कण्डूयति' इति। पुनः श्रुतं 'नीतासु (दक्षिणासु) चात्वाले कृष्णविषाणां प्रास्यति' इति। **भा.** ११।३। ६।१३, * **दीक्षितशब्दप्रवृत्तिः** दीक्षणीयाऽन्ते। ५।३। ११।२९–३१, * **दीक्षितसंस्काराः** पूर्वं कर्तव्याः, ततः रुक्मप्रतिमोचनादि अग्निचयने। ५।२।१२।२३.

* **दीक्षिष्यमाणः** इति शानचा कर्ता अभिधीयते। लृटा भविष्यत्कालः। **टुप्.** १२।१।१२।२४. * **दीक्षिष्यमाणवत्** क्रियार्थायां क्रियायामुपपदे

लृट्प्रत्ययः सोमेन यक्ष्यमाणः सोमेन यष्टुं इत्यर्थः । **रत्न.** ५।४।२.

* **दीपस्य** क्वापि स्थितस्येव पदस्य अर्थप्रकाशकत्वानपायात् 'ब्राह्मणाय देहि, देहि ब्राह्मणाय' इत्यपि शेषः । **संकर्ष.** २।४।१७.

* **दीर्घकालः** तन्त्री भवति । **टुप्.** १२।२।१२।३२.

* **दीर्घशूकाः** (सक्तवः) प्रियङ्गवश्च पूर्वसस्ये क्षीणे भवन्ति । **भा.** १।३।४।९.

* **दीर्घसोमाः** उक्थ्यादयः सोमविकृतयो ग्रहाधिक्यात् । द्विरात्रादयश्चावृत्त्या । अग्निष्टोमस्तु नैव दीर्घसोमः । **वि.** ३।३।१६, * **दीर्घसोमे** संतर्दनस्य ज्योतिष्टोमादुत्कर्षः । ३।३।१६.

⧗ **दुःखमेव सर्वं विवेकिनः इति न्यायः ।** दुःखे स्रक्चन्दनवनिताऽऽदौ सुखत्वारोपः इत्याद्युक्तं पातञ्जलदर्शने माधवाचार्येणेति । **साहस्री.** ८७०.

* **दुःखं** हि तपः । **भा.** ३।८।३।९, * **दुःखफलभोगाय** अधर्मः श्रूयते । ३।८।३।९, * **दुखःवान्** । कर्तव्यश्च सुखवान्, अकर्तव्यो दुःखवान् । ६।१।१।१ पृ. १३४९.

* **दुन्दुभिगान**सजातीयं काण्डवीणोपगानं महाव्रते । तच्च दुन्दुभिगानस्यैवोपगानम् । **वि.** १०।४।६.

* **दुन्दुभिघोषेण** वाजपेये माहेन्द्रस्तोत्रोपाकरणसाधनभूतेन प्राकृतदर्भमन्त्रयोर्बाधः । (तत्र दुन्दुभिना दर्भयोः, घोषेण च मन्त्रस्य बाधः ।) **भा.** १०।४।१।१–२ वर्णकं ३.

* **दुन्दुभिरूपस्य** वादित्रस्य उपगानमिदं पत्नीनां काण्डवीणादिभिर्गानम् । महाव्रते । **भा.** १०।४।५।८–९.

* **दुरिष्टशब्दः** समुदायप्रसिद्ध्या पापवचनः । दुरिष्टं पापमित्यर्थः । **टुप्.** ९।३।३।९ पृ. १७४८.

* **दुरिष्टिशब्दः** समासिवाचकः । **टुप्.** ९।३।३।९ पृ. १७४८.

⧗ **दुर्जनगर्दभन्यायः** । यथा दुर्जनस्तथा गर्दभः, यथा गर्दभस्तथा दुर्जन इत्यर्थविवक्षायामस्य प्रवृत्तिः । अयमपि श्लोकेन निबद्धः । तथाहि 'मलिनीकुर्वन्नर्जुनवर्त्म मदी भवति राधेयः । यदि ताडनादि लभते तथापि तच्छील एव खलः ॥' अस्यार्थः—खलस्तथापि तच्छील एव । कथम् ? तदाह– अर्जुनवर्त्म श्वेतमार्गम् । 'धवलोऽर्जुनः' इत्यमरः । मलिनीकुर्वन्, किञ्च राः धनं यदि धेयः निधातुं योग्यः संचितो भवति, तदा मदी भवति, मदवान् भवति । पुनर्यदि ताडनादि लभते देहलीदीपकन्यायेन मदीत्यस्योभयत्र संबन्धः । गर्दभपक्षे खलः रलयोरभेदात् खरः तथापि तच्छील एव । किं कुर्वन्, अर्जुनवर्त्म उज्ज्वलमार्गं लोडनात् धूल्युत्थापनेन मलिनीकुर्वन् । पुनर्यो राधे वैशाखमासे मदी मत्तो भवति, पुनर्यदि ताडनादि लभते, तथापि दुष्टं शीलं न त्यजति । अथ अर्जुनस्य मध्यमपाण्डवस्य वर्त्म मार्गं मलिनीकुर्वन् राधेयः कर्णः मदी भवतीत्यर्थोऽपि ध्वनित इति । **साहस्री.** ९७२.

* **दुर्बलोऽपि** अर्थवादः प्रबलस्यापि विधेः संदेहजनकत्वे निर्णयहेतुर्भवति । 'अक्ताः शर्करा उपदधाति' इति विधेः 'तेजो वै घृतम्' इत्यर्थवादेन निर्णयः । **वि.** १।४।१९. * '**दुर्बलोऽपि** विधिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवति' इति पर्युदासन्यायस्य येयजामहन्यायापरपर्यायस्य स्वरूपम् । **बाल.** पृ. ९८, * दशमे 'प्रतिषेधः प्रदेशे०' १०।८।१।१ इत्यत्रोक्तेन '**दुर्बलोऽपि विधिः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवति**' इति न्यायेन 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यस्य प्रतिषेधत्वे वैधप्रवर्ग्ये प्रतिषेधबलादेव विकल्पसिद्धिः । पृ. ९८. * **दुर्बलस्यापि** प्रबलाश्रितस्य प्राबल्यम् । श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेः आचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यात् पदार्थधर्मगुणभूतश्रौतक्रमत्यागेन वेदकरणानन्तरं क्षुते सति आचमनमेव कर्तव्यम् । **मीन्या.** * **दुर्बलस्य** प्रमाणस्य बलवदुपष्टम्भकृतमेव बलवत्त्वं वाच्यम् । **पराक्रमः.** ६२।२. * **दुर्बलस्य** बाधो न्याय्यो न बलीयसः । **भा.** १२।१।२।७.

* **दुर्बलाश्रयं** बलवदाश्रयेण बाध्यते अप्राप्तबाधः । **वा.** ३।३।७।१४ पृ. ८६०.

⧗ **दुश्चिकित्स्यव्रणपीडितानां व्रणं शिशमयिषोः शस्त्रग्रहणमिति न्यायः ।** यथा व्रणपीडितपुंसः पीडानिवृत्तये शस्त्रेण व्रणं छिनत्ति वैद्यः स तु वैद्यत्वेनोच्यते

न तु घातकत्वेन, एवं च निरन्तरदुःखमयसंसारपरिवृत्तिश्रान्तानां जीवानां कञ्चित्कालं विक्षेपविगमसमुल्लसदात्मानन्दानुभवेन विश्रान्तिं संपादयितुकामस्य शिवस्य संहाराय तामसत्वम् । वस्तुतस्तु निरतिशयकरुणाम्बुधित्वमेव शिवस्य । अत एव निदानज्ञस्य भिषजो रुग्णहिंसां प्रयुञ्जतो न किञ्चिदपि नैर्घृण्यम् । 'घृणैवात्र प्रयोजिका' इति शिवपुराणे व्याख्यातम् । **साहस्री. ९४.**

✻ **दुष्कुलप्रसूतत्वं** व्यभिचारशीलत्वे प्रयोजकम्, न स्त्रीत्वम् । सु. पृ. १२.

✻ **दुष्टतायाः** कार्यशक्तिविघातकत्वात् । ऋजु. पृ. २२७. ✻ दुष्टतायाः कार्याक्षमत्वं युक्तम्, न पुनः कार्यान्तरक्षमत्वम् । बृहती. पृ. ५३ । नहि दुष्टत्वादयः शाल्याद्यङ्कुरप्रसवसमर्थतां भजन्ते । यच्चोक्तं भस्मकस्य दोषस्य कार्यान्तरोत्पादकत्वमिति, तत्र शारीरस्य वह्नेः बलपुष्ट्यादिकं कार्यम्, तत्तु तत्र नास्त्येव । यत्तु जरणं तदग्निमात्रस्य, तदपेक्षया च न दोषत्वम् । ऋजु. पृ. ५२.

✻ **दुहितृगमनं** अनाचारः । वा. १।३।३।७ पृ. २०३–२०४.

✻ **दूरान्वयोऽपि** क्वचिद्भवति । "व्यवहितमपि पराणुद्य व्यवधायकं आनन्तर्येण मनसि विपरिवर्तमानं अलमेव भवति विशेषमुपजनयितुम् । यथा 'इतः पश्यसि धावन्तं दूरे जातं वनस्पतिम् । त्वां ब्रवीमि विशालाक्षि या पिनक्षि जरद्गवम् ॥" (धावन्तं जरद्गवं पश्यसि इत्यन्वयः) । भा. ४।३।५।११.

✻ **दूरभूयस्त्वात्** (१।२।१।१२) इति अर्थवादनिमित्तं कथितम् । ("धूम एवाग्नेर्दिवा ददृशे, अर्चिरेवाग्नेर्नक्तं ददृशे' इत्यस्यार्थवादस्य निमित्तं अनेन सूत्रेण कथितम् । दिवा अग्निः दूरत्वात् न दृश्यते, रात्रौ तु अग्नेः आदित्यसाहित्येन तेजसोभूयस्त्वात् दृश्यते इति निमित्तम्) । वा. १।४।१२।२३ पृ. ३५४.

⧗ **दूरस्थितवाक्यैकवाक्यताकल्पनमपेक्ष्य अष्टदोषदुष्टो विकल्पः पापीयान् इति न्यायः । आभरणम्. ३।३।१५।२६ वर्णकं १ ब्रसू.**

⧗ **दूर्वेष्टकादिषु इष्टकाधर्माः कर्तव्याः ॥**

इष्टकासंस्काराणां इष्टकाकार्यार्थत्वेऽपि द्वारांशे नियमविधेः आवश्यकतया चमसाधिकरणन्यायेन इष्टकात्वस्याविवक्षाऽभावात् दूर्वाघृतादिषु आकृतेरभावेन इष्टकात्वजातेरभावात् न तेषु इष्टकाधर्माः । इति प्राप्ते, 'दूर्वेष्टका उपदधाति' 'घृतेष्टका उपदधाति' इत्यादौ इष्टकाशब्दप्रयोगस्य तद्धर्मप्राप्त्येकफलकत्वात् 'सहस्रेष्टकमग्निं चिनुते' इति विहितसंख्याघटकत्वाच्च भवेयुः अमृन्मयीष्वपि इष्टकाधर्माः । **संकर्ष. २।१।८.**

⧗ **दृतिनवनीतं श्येने सर्वेषामेवाङ्गानाम्, न सुत्याकालीनानामेव ॥**

तत्काले वा लिङ्गदर्शनात् । ३।८।२१।४०॥

भाष्यम्— इदमिदानीं संदिह्यते, किं सुत्याकालानामङ्गानां नवनीतम्, उत सर्वेषामिति । सुत्याकालानां स्यात्, लिङ्गदर्शनात् । इदं श्रूयते 'सहपशूनालभते' इति । तत्र पुनर्वचनम्, अग्नीषोमीयस्य स्थाने अग्नीषोमीयः पुरोडाशः, अनुबन्ध्यायाः स्थाने मैत्रावरुणी पयस्या, इति द्वे स्थाने शून्ये दर्शयति । तेन अवगम्यते श्येनस्य वचनं सुत्याकालानामङ्गानां विशेषं विदधातीति ।

वा— (पूर्वतमसूत्रस्थसंनिधानविशेषात् इति पदानुषङ्गेण व्याचष्टे–) संनिधिविशेषात् सामान्यतो दृष्टाच्च तत्कालानां लिङ्गदर्शनेन दृष्टान्तं साधयति । पशुसाहित्यं हि एतदीयो धर्मः सुत्याकालो दृष्टः अग्नीषोमीयानुबन्ध्यास्थानयोः अन्येनानुग्रहवचनात् । तस्मात् अयमपि एतद्धर्मत्वात् सुत्याकालः इति ।

सर्वेषां वाऽविशेषात् । ४१ ॥

भाष्यम्— सर्वेषामेव वाऽङ्गानां नवनीतं स्यात् । कुतः ? अविशेषात् । असति विशेषे सर्वेषामप्यङ्गानामिति ।

वा— तदुक्तम् 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इति ।

न्यायोक्ते लिङ्गदर्शनम् । ४२ ॥

भाष्यम्— यदुक्तं लिङ्गम्, तत्परिहरणीयम् । नास्ति तावत् प्रमाणं यत् श्येनस्य वचनं तत् सुत्याकालानामङ्गानामिति । किन्तु दर्शनम् । तदप्रमाणमूलत्वात्

मिथ्यादर्शनं मृगतृष्णावत् । कथं तु मध्ये पशूनामालम्भः इति । न्यायात् । को न्यायः । क्रमानुग्रहः । एवं वचनवर्जितः क्रमोऽनुगृहीतो भवति । तस्मात् सर्वेषामङ्गानां नवनीतमिति ।

वा—न्यायगम्ये लिङ्गमीदृशं साधकं भवति । आगमगम्यस्तु अयम् । न च सहालम्भस्य एतद्धर्मत्वात् सुत्याकालता । किं तर्हि ? अन्यत एव न्यायात् । न चासौ दृतिनवनीते संभवति । तं न्यायं दर्शयति (भाष्यम्–) एवं वचनवर्जितः यः क्रमः संनिकर्षलक्षणः अनुमेयश्रुत्यर्थः, सोऽनुग्रहीष्यते इति । सवनीयकाले हि आलभ्यमानेषु न कस्यचित् पशोः कालमतिक्रम्येत । न च द्विगुणो वा भवति । इतरथा द्वयमपि स्यात् । तस्मादुपपन्नं दर्शनम् ।

साम – (दृतिनवनीतं अङ्गेषु इत्युक्तम् । तत्र सुत्याकालेषु वा सर्वेष्वेव वा इति विचारात् प्रासङ्गिकी संगतिः ।) **सूत्रार्थस्तु**– सुत्याकालाङ्गे एवेदं स्यात् पशुसाहित्यस्य श्येनाङ्गत्वेन विहितस्य सुत्याकालत्वरूपलिङ्गदर्शनादिति ।

वि— 'सुत्याकालगताङ्गेषु गुणः सर्वेषु वोदितः ।,
आद्यो वैशेषिकाङ्गत्वाद्, वाक्यात् सर्वाङ्गसंगतिः ॥ '

भाट्ट—एवं चेत् सुत्याकाले एव श्येनवैशेषिकाणां 'सहपशूनालभते' इत्यादीनां दर्शनात् दृतिनवनीतत्वस्यापि सुत्याकालाङ्गाज्ये एव निवेशः । इति प्राप्ते, सामान्यतोदृष्टेन वाक्यसंकोचायोगात् सर्वार्थत्वम् । नहि पशुसाहित्यस्यापि सुत्याकालत्वे श्येनाङ्गत्वं प्रयोजकम्, अपितु प्रधानप्रत्यासत्तितुल्यकालोत्कर्षवाक्याबाधरूपहेतुत्रयम् । न चात्र तदस्ति । अतः सर्वार्थतैव ।

मण्डन— ' सर्वत्र चाङ्गे नवनीतमिष्टम् । '

शंकर—'असुत्याकालेऽप्यङ्गे तत् ।' २५. 'सुत्यायां पशुसंहतिः ।' २६. (श्येने पशुसाहित्यं सुत्यायां यथा)।

दृतिनवनीताधिकरणम् । दृतिनवनीतं श्येने अङ्गेषु न प्रधाने ॥

संनिधानविशेषादसंभवे तदङ्गानाम् ।३।८।२०। ३७ ॥

भाष्यम्— श्येने श्रूयते ' दृतिनवनीतमाज्यम् ' इति । तत्र संदेहः किं नवनीतं प्रधानस्य, उत अङ्गानामिति । किं प्राप्तम् ? प्रधानस्य । तस्य हि प्रकरणमिति । वचनप्रामाण्यात् नवनीतेन प्रधानं निर्वर्तयितव्यमिति । एवं प्राप्ते, ब्रूमः । असंभवे एतस्मिन् तदङ्गानां श्येनाङ्गानां स्यात् । कथमसंभवः सोमद्रव्यकत्वात् प्रधानस्य । ननु वचनात् नवनीतं भविष्यति, न श्येने नवनीतं भवति इत्येष वाक्यार्थः । कस्तर्हि ? श्येने नवनीतं आज्यं भवति इति नवनीताज्यसंबन्धो विधीयते, श्येनाज्यसंबन्धः अनूद्यते न च साक्षात् श्येनस्य आज्यसंबन्धोऽस्ति । श्येनाङ्गानां तु विद्यते । यस्यास्ति तस्यानूद्य नवनीतं विधीयते संनिधानविशेषात् ।

वा—' दृतिनवनीतमाज्यम् ' इति प्रकरणे विशिष्टविधानात् सोमो बाधिष्यते इति मन्यते । (सिद्धान्तमाह–) यतस्तु अनेकार्थविध्यसंभवात् आज्यमनूद्य विशेषमात्रं विधीयते । न च प्रधानस्य आज्यप्राप्तिः । तस्मात् ' आनर्थक्यात् तदङ्गेषु ' इत्येव सिद्धम् ।

आधानेऽपि तथेति चेत् । ३८ ॥

भाष्यम्— एवं चेत् दृश्यते श्येनाङ्गानां नवनीतमिति, आधानेऽपि पवमानेष्टिषु स्यात् । ता अपि हि श्येनस्योपकुर्वन्ति, तत्संस्कृतेऽग्नौ श्येनो निर्वर्तते इति ।

वा— अवश्यं श्येनोपकारि यदाज्यं इति वक्तव्यम् । ततश्च पवमानहविराज्यमपि श्येनोपकारि इति दृतिनवनीतं स्यात् ।

नाप्रकरणत्वादङ्गत्वस्य तन्निमित्तत्वात् । ३९ ॥

भाष्यम्-- न श्येनस्य प्रकरणे पवमानेष्टयः अग्न्याधानं वा श्रूयते । किमतो यद्येवम् ? आधानस्य च श्येनस्य च न कश्चिदस्ति संबन्धः । अग्नीनामाधानम्, अग्नयश्च श्येनस्य । तस्मान्न पवमानहविःषु नवनीतम् । नैतत् श्येनाङ्गत्वे निमित्तम्, यत् आधानमग्नीनामुपकरोति । यदि प्रकरणादीनां अन्यतममस्ति, तत् निमित्तं भवेत् । तस्मान्न श्येनाग्न्याधानयोः सबन्धोऽस्ति इति ।

वा--(सूत्रं स्वयं व्याख्यातुमाह –) नहि उपकारित्वमात्रेण संबन्धः । किं तर्हि ? अधिकारात् प्रकृतस्योपकारिणः प्राकरणिकं चोदकेन संनिहितम्, न पवमानेष्टिगतमिति व्यवस्था ।

सुधा-- दृतौ नवनीतं प्रकृतिभूतं अस्य इति बहुव्रीह्युक्तं दृतिनवनीतविशिष्टमाज्यं सोमबाधेन प्रधानमात्रार्थं

विधीयते इति पूर्वपक्षः। उत्तरपदार्थप्रधानतत्पुरुषसंभवे अन्यपदार्थप्रधानबहुव्रीह्ययोगात् व्यधिकरणबहुव्रीहेश्च अत्यन्तायुक्तत्वात् विशिष्टविध्ययोगेन अनेकार्थविध्यापत्तेः नवनीताज्यशब्दयोश्च भिन्नार्थत्वेन सामानाधिकरण्यायोगात् जघन्यस्य आज्यशब्दस्य कार्यलक्षणार्थत्वावगतेः विधौ च लक्षणायोगात् आज्यकार्यानुवादेन दृतिनवनीतविध्यवगतेः प्रधाने कार्याभावात् आज्यवति अङ्गमात्रे दृतिनवनीतविधिः इति सिद्धान्तः।

शा— विशिष्टविधिगौरवात् उपदेशतः अप्रकृतस्यापि आज्यस्य अतिदेशतः प्राप्तिसंभवात् तदनुवादेन दृतिनवनीतत्वं गुणो विधीयते। यत् आज्यं तत्, दृतौ (चर्मभस्त्रिकायाम्) नववीतं प्रकृतिर्यस्य तत् स्यात्। (दृतिस्थाज्यपाकनिष्पन्नं आज्यमित्यर्थः)

सोम— पूर्वत्र वाक्यादिव इह प्रकरणात् प्रधानार्थत्वमिति प्रत्यवस्थानात् **संगतिः। सूत्रार्थस्तु**—– प्रधाने असंभवे अङ्गानां स्यात् चोदकतः आज्यसंनिधिलक्षणविशेषात् नवनीतविध्युपपत्तिः इति। यद्यपि नवनीतस्य आज्यकार्ये तत्पुरुषोऽपि संभवति, तथापि तथा सति आज्यशब्दस्य आज्यकार्ये लक्षणा स्यात्, सा च जघन्याऽपि न युक्ता इति बहुव्रीहिराश्रितः (शास्त्रदीपिकायां सिद्धान्ते)।

वि—'नवनीतं श्येन आज्यं मुख्येऽङ्गे वा, ऽस्तु मुख्यगम्। विधेयमाज्यमप्राप्तं दृतिस्थनवनीतकम्॥ मुख्यः सोमविकारो (मुख्यसोमविकारो), ऽङ्गे चोदकप्राप्तमाज्यकम्। अनूद्य दृतिसंस्थानं नवनीतगुणो विधिः॥' अङ्गेषु चोदकप्राप्तस्य आज्यस्य प्रकृतिद्रव्यत्वेन यथोक्तनवनीतगुणो विधीयते।

भाट्ट— श्येने 'दृतिनवनीतमाज्यं भवति' इति श्रुतं दृतिनवनीतं प्रकरणात् श्येनप्रधानाङ्गम्। नहि अत्र आज्यानुवादेन दृत्यधिकरणकनवनीतप्रकृतिविधिः, आज्यस्य नवनीतप्रकृतिकत्वस्य प्राप्तत्वात् तदनुवादेन दृत्यधिकरणत्वविधौ एकप्रसरताभङ्गापत्तेश्च। अतो बहुव्रीहिसमासार्थ एवैको दृत्यधिकरणकनवनीतप्रकृतिकं संनिधानात् श्येने द्रव्यतया विधीयते। आज्यपदं तु तस्यैव नवनीतप्रकृतिकत्वादनुवादः अन्यपदार्थतात्पर्यग्राहकं चेति नानेकविधेयता। अत एव श्येनोऽपि आज्यद्रव्यकत्वात् उपांशुयाजविकार एव। गमकान्तरसत्त्वे तु सोमप्रत्याम्नायमात्रमाज्यम्। **इति प्राप्ते**, विशिष्टविधिगौरवाद्यापत्तेः अतिदेशप्राप्ताज्योद्देश्यपरत्वमेव आज्यशब्दस्य अङ्गीकृत्य तदुद्देशेन दृत्यधिकरणकनवनीतप्रकृतिकत्वमेव प्रयोगान्तःपातितया विधीयते। आज्यं च अङ्गेष्वेव प्राप्तमिति तन्मात्रविषयता। यत्तु दृतिनवनीतपदस्य तत्पुरुषत्वमङ्गीकृत्य दृत्यधिकरणकनवनीतमेवाज्यपदलक्षिततत्कार्योद्देशेन द्रव्यतया पक्वघृतरूपाज्यप्रत्याम्नायत्वेन विधीयते इति न्यायसुधाकृतोक्तम्, तत् आज्यपदे सांप्रतिकलक्षणापत्तेः तदपेक्षया आनुशासनिकनिरूढलक्षणापादकबहुव्रीह्यङ्गीकारस्यैव न्याय्यत्वादुपेक्षितम्। यदि तु किञ्चिद्गमकान्तरं भवेत् तदा तदेवास्तु। २०.

आधानेऽपि तथेति चेत्। ३।८।२०।३७॥ नाप्रकरणत्वादङ्गस्य तन्निमित्तत्वात्। ३८॥ सर्वत्र धर्माणां अनारभ्याधीतप्राकरणिकसाधारण्येनापूर्वोपकारके एवान्वयात् पवमानेष्ट्याधानादीनामपि च श्येनापूर्वोपकारकत्वात् तत्रापि दृतिनवनीतम्। **इति प्राप्ते**, यदुपकारकता वैधप्रमाणप्रमिता तदुपकारक एव धर्माणां निवेशः। न तु अर्थसमाजग्रस्तोपकारकत्वेऽपि, श्येनोपकारकयजमानाज्यभोजनादावपि दृतिनवनीतत्वापत्तेः। न च आधानादेः श्येनोपकारकत्वं शास्त्रे प्रमितम्, अग्निमात्रार्थत्वस्यैव तत्प्रमितत्वात्। अतः श्येनप्रयोगवर्तितदुपकारकाज्य एव तन्निवेशः। (अत्र अधिकरणान्तरमेव स्वीकृतं इति भाति)। २१.

मण्डन— 'श्येनेऽङ्गधर्मो नवनीतमाज्यम्।'

शंकर—– 'श्येनाङ्गं नवनीतयुक्।' २४.

* दृशिः स्वार्थः प्रयुज्यमानः दर्शनमवगमयेत्, न परार्थः। भा. १०।६।२।३ पृ. १९८७.

* 'दृश्यमानेऽपि कदाचित्' (चन्द्रे, दर्शे उपवासः) इति गोभिलः। संकर्ष. १।२।११.

* दृषद् यज्ञायुधम् 'यज्ञायुधानि संभरति'। 'दृषदुपलाभ्यां पिनष्टि'। वि. ३।१।५, * **दृषदुपलयोः** पेषणे समुच्चयः परस्परसापेक्षत्वात्। १२।३।४.

* **दृषदुपलप्रोक्षणं** अपूर्वप्रयुक्तं दर्शपूर्णमासयोः । **भा.** ९।१।२।२–३.

* **दृष्टश्च** तुशब्दस्यार्थे चशब्दः यथा 'किं चेह भवति' इति । **भा.** ८।३।६।२८, * **दृष्टो हि** तस्य (वेदस्य) अर्थः कर्मावबोधनं नाम । १।१।१।१ पृ. ६. * **दृष्टो हि** मणिविक्रये वणिक्शबरयोर्ज्ञानाज्ञानकृतः फलभेदः । **कल्पतरुः.** ३।३।२८।४३ ब्रसू. * **दृष्टमेव तु** अर्थे अङ्गानि कुर्वन्ति प्रधानस्य अङ्गवत्ताम् । **भा.** ११।१।७।३५.

⧗ **दृष्टं किमपि लोकेऽस्मिन्न निर्दोषं न निर्गुणमिति न्यायः ।** अयं सर्वत्र गुणदोषौ भवत इति विवक्षायां प्रवर्तते । **साहस्री.** ५७२.

⧗ **'दृष्टं हि कर्मणः फलं कृष्यादितः' ।** (२।२।२५ सूत्रस्था भाष्यपङ्क्तिरियम्) **इत्यनेन न्यायेन** सामान्यतोदृष्टेन किं होमात् फलं मन्यसे ? इति सिद्धान्तवादी पृच्छति । **वा.** २।२।११।२५ पृ. ५४३. * **दृष्टं** हि हरीतकीं भक्षयतोस्तद्रसज्ञेतरयोर्विरेचनं फलम् । **कल्पतरुः.** ३।३।२८।४३ ब्रसू.

* **दृष्टे कारणे** सति न च अदृष्टं कल्पयितुं शक्यते प्रमाणाभावात् । **भा.** १।१।५।५ पृ. ४०.

⧗ **दृष्टे संभवति अदृष्टकल्पनमयुक्तं इति न्यायस्य** वेदमूलत्वाभावान्यमूलत्वयोर्निश्चयकारणस्य तुल्यत्वात् । **सु.** पृ. १५८.

⧗ **दृष्टे संभवति अदृष्टकल्पना न न्याय्या इति न्यायः ।** प्रत्यक्षप्रमाणसिद्धे कार्ये अप्रत्यक्षकल्पना न कार्या, तस्या अयोग्यत्वादिति । महाभारतोद्योगपर्वैकोनषष्ट्यधिकशततमाऽध्याये १५९–'य आत्मनो दुश्चरितादशुभं प्राप्नुयान्नरः । न स कालं न वा देवानेनसा गन्तुमर्हति ॥' इति नवमश्लोकटीकायाम् 'एनसा दोषेण देवान् कालं वा गन्तुमुपालब्धुं नार्हति, दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात् दृष्टापराधे देवस्य कालस्य चोपालम्भः कर्तुमुचितः, न तु तस्मिन् सतीत्यर्थः' इत्युक्तमिति । **साहस्री.** ५५९.

* ननु जिज्ञासासूत्रे एवाध्ययनस्य अर्थज्ञानफलकत्वसाधनाय 'दृष्टे०' इति न्यायस्य व्युत्पादनात् इह (१।२।४) पुनस्तद्व्युत्पादनमनर्थकमिति चेन्न । इहैवायं न्यायो व्युत्पाद्यते । **अनेन तु न्यायेन** अध्ययनस्य अर्थज्ञानार्थत्वं न संभवति, तथा सति विधिवैयर्थ्यात् विध्यभावेऽपि प्रमाणान्तरेणैव तदर्थसिद्धेः । **सोम.** १।२।४.

⧗ **दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात् इति न्यायस्य** तानिद्वैधादौ (२।१।३।६) व्युत्पादनेऽपि अकर्मकाले प्रयोगबलादवश्यमदृष्टार्थत्वमिति शङ्का । **सोम.** ९।२।२. * 'दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात्' स्विष्टकृद्देवतासंस्कारार्थत्वमेव तृतीयस्यानूयाजस्य (दर्शादौ) । **भाट्ट.** १०।४।२०.

⧗ **दृष्टे संभवति अदृष्टकल्पनाऽनवकाशः इति न्यायेन** धर्मजिज्ञासाऽधिकरणे अध्ययनविधिः फलवदर्थावबोधरूपदृष्टार्थः इति सिद्धान्तः । **बाल.** पृ. २.

⧗ **दृष्टे सति अदृष्टकल्पना न न्याय्या इति न्यायेन** अर्वाचीनानामेव पुराणोपनिबद्धानां व्यक्तीनां वेदेऽपि ग्रहणं इति समुचितमेव । **सना. ध. प्र. प्रामाण्य.** पृ. ६७. * दृष्टे सति अदृष्टकल्पना न संभवति । **भा.** ११।२।१६।६६.

* दृष्टे ह्यनुपपत्तिर्नास्ति । **बृहती.** पृ. १६४ (नहि दृष्टेऽनुपपन्नं नाम १५२, १५५, १६४). * 'दृष्टे हि सत्यदृष्टस्य कल्पना निष्प्रमाणिका ।' **वा.** १।३।२।४ पृ. १८६.

* **'दृष्टा हि न क्वचित् बुद्धिरगृहीतविशेषणा'** । कथं हि अश्वत्वे अनुच्यमाने तदवच्छिन्नरक्तत्वप्रत्ययो जायेत । **वा.** ३।४।४।१३ पृ ९१९.

* **दृष्टादृष्टोभयार्थः** (दृष्टं देवतासंस्कारः, अदृष्टं च अपूर्वम्) अन्त्यः प्रयाजः, स्विष्टकृत्, पशुपुरोडाशश्चेति । **वि.** ४।१।७.

⧗ **दृष्टानुसारेण कल्पना इति न्यायेन** नीरूपस्याकाशस्य प्रतिबिम्बासंभवात् । तत्प्रतिबिम्बप्रतीतिस्तु भ्रान्तिरेव । **श्रीकर.** १।१।२ ब्रसू.

* **दृष्टार्थः** एव सप्तदशाक्षरः प्रजापतिः आश्रावय इत्यादिः । **संकर्ष.** २।३।१. * **दृष्टार्थः** एव सर्वोऽपि अभ्यनुज्ञाविधिः । **बाल.** पृ. २१, प्रतिनिधिनियमविधिश्च । पृ. २३. * **दृष्टार्थो** विधिः अप्राप्तविषयः प्राप्तविषयो वा, स सर्वोऽपि नियमविधिः इत्यभ्युपगच्छामः, अप्राप्तविषयेऽपि तस्मिन् नियमादृष्टाभ्युपगमावश्यम्भावात् । **रसायनं.** पृ. २१३. * **दृष्टार्थं** ऋत्विजां वरणम् । **संकर्ष.** २।३।१, * दृष्टार्थं प्रत्यभिघारणं स्नेहनार्थम् । २।२।१७. * **दृष्टार्थेष्वपि** नियमादृष्टसिद्ध्यर्थं कथंभावापेक्षोत्पत्तेः प्रकरणसद्भावः । **वा.** ३।१।११।२१ पृ. ७३२. * दृष्टार्थेष्वपि विहितेषु नियमादृष्टं संभवति । **वि.** ६।२।१०. * 'दृष्टार्थेष्वपि सर्वेषु नियमादृष्टमिष्यते' । **रसायनं.** २१३. * दृष्टार्थेषु कार्यैक्यं दृष्ट्वा (वैकृतेन प्राकृतस्य) बाधः । **वि.** १०।४।१, * 'दृष्टार्थेषु (कर्मसु) तु तुल्यत्वमार्यम्लेच्छप्रयोगिणाम्' । **वा.** १।३।४।९ पृ. २१९. * **दृष्टार्था** स्मृतिः अदृष्टार्थया बाध्यते, अप्राप्तबाधः । ३।३।७।१४ पृ. ८६०, * **दृष्टार्थानां** अवघातादिक्रियाणां प्रयोजननिष्पत्तिपर्यन्तमभ्यासः । **भा.** ११।१।५।२७.

* **दृष्टार्थगन्धस्पृष्टानि** बहून्येव वेदेऽपि विधीयन्ते, इति न तावता वेदमूलत्वाभावः । **वा.** १।३।३।७ पृ. २०६.

* **दृष्टार्थता** अध्ययनस्य (अध्ययनस्नानयोरानन्तर्ये) व्याहन्येत (तस्मात् 'अधीत्य स्नायात्' इति क्त्वा नानन्तर्ये) । **भा.** १।१।१।१ पृ. ६.

* **दृष्टार्थत्वं** वेदमूलत्वाविरोधि । **सु.** पृ. १२६, * वैदिकेष्वपि च सर्वत्र **दृष्टार्थत्वस्य** उत्प्रेक्षितुं शक्यत्वात् न तेन अवैदिकत्वसिद्धिः । पृ. १२६.

* **दृष्टार्थाप्राप्तविधिविषयो** द्विविधः, विधिं विना स्वतःप्रसिद्धदृष्टप्रयोजनजननसामर्थ्यः, विधिबलप्रसादनियततज्जननसामर्थ्यश्च । तत्र 'औदुम्बरो यूपो भवति' इत्याद्यः । प्रकृतौ यूपे पक्षप्राप्तोऽपि उदुम्बरः खदिरादिनियमविधिना निवर्तितः इति विकृतावपि चोदकात् खदिरादेरेव प्राप्त्या प्रतिप्रसवविधिविषयन्यायेन सौमापौष्णपशौ (१०।८।१८) अप्राप्तैव उदुम्बरजातिः अदृष्टत्वादिविशिष्टयूपाकृतिजनने स्वत एव प्रसिद्धसामर्थ्या च । उत्तराघारशाखाछेदनमन्त्र–उत्कर–परिध्यादिः द्वितीयः, विधिबलादेव हि हिरण्यगर्भमन्त्रस्य गौणवृत्तिकल्पनया इन्द्रप्रकाशने, इषे त्वेति मन्त्रस्य छिनद्मि इत्यध्याहारेण शाखाछेदनप्रकाशने, उत्करस्य पृथग्भूताकरणेन वाजिनपात्रधारणे, परिधेः स्थविमद्ग्रहणेन पशुनियोजने च सामर्थ्यं प्रसाधनीयम् । **रसायनं.** पृ. २१३.

* **दृष्टार्थापत्तिः** प्रमाणम् । पीनो देवदत्तो दिवा न भुङ्क्ते । अत्र दृष्टस्य पीनत्वस्यान्यथानुपपत्त्या रात्रिभोजनं सिध्यति । **भा.** * दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति अर्थापत्तिर्द्विविधा । **बाल.** पृ ८.

* **दृष्टकार्यं** अदृष्टात् बलीयः । **भा.** १०।१।९।२३. * **दृष्टपूर्वा** च या लक्षणा, तस्यामेव शीघ्रतरबुद्धिर्भवति । **वा.** ३।३।१।३. * **दृष्टप्रयोजनद्वार** एव संबन्धोऽवकल्पते संस्काराणां अपूर्वप्रयुक्तत्वेऽपि । **वा.** ३।१।४।७ पृ. ६६६. * **दृष्टप्रयोजनसंभवेन** अदृष्टार्थत्वकल्पनाऽयोगात् । **संकर्ष.** २।४।३. * **दृष्टफले** संभवति अपूर्वं न कल्पनीयम् । यथा अवघाते पेषणे च । **वि.** २।१।३. * **दृष्टफलसंभवे** अदृष्टकल्पनस्यान्याय्यत्वात् 'लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना' इति न्यायात् । **वैद्यनाथी.** १।१।१।१ पृ. १०. * **दृष्टमूलकस्मृतेः** न प्रामाण्यम् । **वि.** १।३।३, * **दृष्टसंस्कारे** संभवति अदृष्टमारादुपकारकत्वं कल्पयितुमयुक्तम् । १०।१।६.

* **दृष्टान्ते** यथाभूतो धर्मो दृष्टः तथाभूतेनैव दार्ष्टान्तिकेऽपि भवितव्यम् । **ऋजु.** पृ. २३५. * **दृष्टान्तता** विशेषणस्य उपलक्षणोपन्यासे न युक्ता इति यत्तु, तत् उपलक्षणस्यापि विशेषकत्वात् न चोद्यम् । यद्वा केनचित् सामान्येन दृष्टान्तता भविष्यति अनभिधेयत्वेन विशेषकत्वेन चेति । **वा.** १।३।९।३३ पृ. ३१८.

दृष्टिसृष्टिन्यायः । अयमपि नीलकण्ठ्यां व्यवहृतः । तथाहि, प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजङ्गमप्रपञ्चः सर्वोऽपि तदीये अज्ञाने अव्याकृताख्ये लीयते रात्र्यागमे । तथा दिवसागमे पुनस्तत एव यथापूर्वमाविर्भवति । एवं दृष्टिसृष्टिन्यायेन असत्कल्पितोऽप्ययं

वियदादिप्रपञ्चः अस्मत्सुषुप्तौ लीयते अस्मत्प्रबोधे यथापूर्वं प्रादुर्भवतीति । **साहस्री. ९१८.**

* **देवाः** । दीव्यन्ति द्योतन्ते वा चन्द्रादित्याग्निग्रहनक्षत्रतारकादिरूपेण, वायवश्च सततगत्या स्तूयन्ते सर्वैर्मन्त्रैः इति देवाः । **वा.** १।३।९।३१ पृ. २९९ । सर्वेन्द्रादिदेवतानुवर्ति दीव्यतिधात्वर्थयोगित्वसामान्यं देवताशब्दवाच्यम् । **सु. पृ.** ३५२.

⧗ **देवस्यत्वेतिमन्त्रन्यायः** । विकृतौ निर्वापमन्त्रे सवित्रादिशब्दानां ऊहो न ॥

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्, तत्राचोदितमप्राप्तम्, चोदिताभिधानात् ।९।१।१२। ३६ ॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र निर्वापमन्त्रः ‘देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि’ इति । तत्र एषोऽर्थः सांशयिकः किं सवित्रश्विपूषशब्दानां विकृतौ ऊहः, उतानूहः इति । तत एतत् तावत् परीक्ष्यते, कर्मणि समवेतमर्थं एते शब्दा अभिदधति, उत असमवेतमिति । यदि समवेतम्, ऊहिष्यन्ते । अथासमवेतम्, अविकृताः प्रयोक्ष्यन्ते । तदुभयमपि सह परीक्ष्यते । किं तावन्नः प्रतिभाति ? तत्र समवेतमभिवदन्ति इति । कुतः ? एतद्धि मन्त्रपदानां दृष्टं प्रयोजनम्, यत् समवेतमर्थं प्रकाशयन्तीति । तत्र असमवेतार्थप्रकाशने न किञ्चिदपि दृष्टं प्रयोजनम् । समवेतानां तु प्रकाशने दृष्टमस्ति । तत् यदि समवेताभिधायिनः एते शब्दाः, ततः प्रयोजनवन्तः । कथं पुनः समवेताभिधायिनः ? यदि नाम सवित्रादयः शब्दाः अग्न्यादीनां वाचका भवेयुः, यदि वा सवित्रादयो देवताविशेषाः दर्शपूर्णमासयोः स्युः । तन्मन्त्रपदानां अदृष्टार्थता मा भूत् इति अन्यतरदपि अवसीयते, मान्त्रवर्णिको देवताविधिः, सवित्रादयो वा शब्दाः अग्न्यादीनां वाचका भवेयुः । तस्मात् अर्थवत्त्वात् अन्यतरत् अध्यवसेयम् । **अत्राह**, ननु ‘अग्नये जुष्टम्’ इत्यत्र अवयवभूताः सवित्रादयः अग्न्यादीनां वचना अपि सन्तः अग्न्यादिभिः प्रकाशिताया देवतायाः न किञ्चिदपि अधिकं कुर्युः । नो खल्वपि सवित्रादिवचना एव मान्त्रवर्णिकाः शक्नुवन्ति उपकर्तुम् । **अत्रोच्यते** पृथक् वाक्यानि एतानि भविष्यन्ति, तेषां ‘जुष्टं निर्वपामि’ इति साधारणः अनुषङ्गः । तानि वाक्यानि दर्शपूर्णमासयोर्गुणभूतानि । यदि एतद्देवत्यानि अत्र हवींषि विद्यन्ते, ततः अवकल्पन्ते इति अर्थापत्त्या मान्त्रवर्णिक्यो देवता विधीयन्ते अग्न्यादिवचना वा सवित्रादीनाम्, पृथक् वाक्यानि वा अग्निवाक्येन वैकल्पिकानि इति ।

एवं प्राप्ते, ब्रूमः । नैवमादीनि ऊहितव्यानि इति । अचोदिते ऊहो न प्राप्नोति, चोदिताभिधानात् मन्त्रस्येति । ततः एतत् वर्ण्यते, असमवेताभिधायिनः सवित्रादय इति । कथम् ? नहि अत्र सवित्रादिदेवत्यं कर्म चोद्यते । न च अग्न्यादीनामर्थेषु सवित्रादयः शब्दाः प्रसिद्धाः । **अत्राह**, ननु अर्थापत्त्या अन्यतरत् अध्यवसीयेत इत्युक्तम् । सति एतद्देवत्ये कर्मणि सवित्रादिवाक्यानि उपपद्यन्ते, अग्निवचनत्वे वा सति । या हविषो देवता, सा मन्त्रवचनेन प्रकाशयितव्या । सवित्रादयश्च शब्दाः निर्वापवाक्ये प्रकाशनार्थाः । ते हविर्देवताः प्रकाशयन्तः उपपद्यन्ते, नान्यथेति । अग्न्यादयश्च हविर्देवता इति तद्वचनाः इत्यध्यवसीयते । **अत्रोच्यते** । यदि अकल्प्यमाने आनर्थक्यमेषां स्यात्, ततः अन्यतरत् कल्प्येत अर्थाभिधानसंयोगात् मन्त्रेषु शेषभागो भवतीति । न तु एवमवकल्प्यमानेऽपि आनर्थक्यम् । तस्मात् नान्यतरस्यापि कल्पने किञ्चिदस्ति प्रमाणम् । न च चोद्यन्ते एतच्छब्दिका देवताः । तत्र अचोदितमप्राप्तं ऊहम्, चोदिताभिधानात् ।

टुप्— उपोद्घातप्रसक्तानुप्रसक्तादि निवृत्तम् । इहेदानीं ऊहश्चिन्त्यते । किं सवित्रादिशब्दा विकृतौ ऊहितव्याः (उत) नेति । (तदर्थमिदं चिन्त्यते किं समवेतदेवताप्रकाशनार्था एते शब्दाः, उत असमवेतस्वार्थद्वारा निर्वापमेव प्रशंसन्ति इति । पूर्वपक्षमाह–) ऊहितव्याः । कुतः ? सवित्रादयः शब्दाः (तावत्) अर्थप्रकाशकाः (न तु अदृष्टार्थाः) । यदि श्रुतिवृत्ताः (गृह्यन्ते)

ततो दृष्टार्थाः स्युः, प्रकाशनद्वारेण मन्त्रस्यापेक्षितत्वात् । यदि (तु) लक्षणया अग्निमभिवदन्ति, ततो दृष्टार्थाः (तस्मात् समवेताग्निवचनाः सवित्रादयः शब्दाः) । अथवा सवित्रादिभिः (शब्दैः) मुख्य एवार्थः प्रत्याय्यते, तथापि समवेतवचनाः, कथम् ? भिन्नत्वात् एतेषाम् (मन्त्राणाम् । तस्मात् 'देवस्य त्वा सवितुः' इत्यादि प्रतिदेवतं मन्त्रभेदः । तेषु च 'जुष्टं निर्वपामि' इत्यनुषङ्गः । तत्र–) मान्त्रवर्णिको देवताविधिः दर्शपूर्णमासयागेषु अग्न्यादिभिः वैकल्पिको भविष्यति । अत्र (केचित्) आहुः । मान्त्रवर्णिकेन देवताविधानेन न शक्यन्ते अग्न्यादयः उत्पत्ति–(वाक्य–)शिष्टा बाधितुम्, विषमशिष्टत्वात् । (तस्मात्) सवित्रादिमन्त्रवर्णे (अपि) यागान्तराणि कल्प्यन्ते । तेषु मुख्याश्च समवेतवचनाश्च (सवित्रादिशब्दाः) इति । **नैतत् युक्तम्** । एवं सति यागान्तरत्वात् प्रयाजादितुल्याः स्युः । तत्र चोदकेन अतिदिष्टानामपि अविकारः स्यात्, यथा प्रयाजादीनाम् । तत्र पूर्वोत्तरपक्षयोः न (कश्चित् महान्) विशेषः । तस्मात् स एव (युक्तः पूर्व–)पक्षः, यत्र ऊहः सिध्यति । (अत्राह सिद्धान्ती–) **एवं प्राप्ते, ब्रूमः** । लोके सवित्रादयः अग्न्यादिवचना न प्रसिद्धाः । न च गुणेन (गुणवृत्त्याश्रयणेनापि) अग्न्यादीनभिधातुं समर्थाः । (कुतः ?) यत्र (हि) परशब्दसामानाधिकरण्यं (तत्र) गुणेन (निमित्तेन) परशब्दः परत्र (वर्तते) न चेह (अग्निशब्देन) सामानाधिकरण्यं (सवित्रादीनामस्ति) विविभक्तिनिर्देशात् । न च मान्त्रवर्णिको देवताविधिः शक्यः कल्पयितुम् । मन्त्रभेदे (हि सति) स भवति । एकः (चायं) मन्त्रः इत्युक्तम् ' अर्थैकत्वात् ' इति (२।१।१४।४६) । कल्पितेऽपि (मन्त्र–) भेदे नैव अग्न्यादिना (सह मान्त्रवर्णिकानां सवित्रादीनां) विकल्पः (युक्तः) विषमशासनात् । तस्मात् निर्वापस्तुत्यर्थमेषामुच्चारणं इति ।

ततश्चावचनं तेषामितरार्थं प्रयुज्यते । ३७ ॥

भाष्यम्— अथ यदुक्तं प्रत्यायकेन शब्देन प्रकाश्यन्तेऽत्र देवताः, तत्रापि अश्रुतानां प्रकाशने न किञ्चिदस्ति प्रयोजनमिति, तत् परिहर्तव्यम् । अत्रोच्यते । ततश्च तेन कारणेन, अश्रुतानां वचनं न क्रियते सवित्रादिभिः शब्दैः । केन तर्हि कारणेन क्रियते ? इतरार्थं प्रयुज्यते निर्वापस्तुत्यर्थम् । देवस्य सवितुः प्रसवे –देवेन सवित्रा यजमानेन प्रसूते उदिते वा सवितरि । अश्विनोर्बाहुभ्यां – परिक्रयमभिप्रेत्य यजमानयोर्दंपत्योर्बाहुभ्याम्, अश्विनौ (अश्ववन्तौ) हि तौ अग्न्याधेये अश्वदानेन, अशितवन्तौ वा तद्यज्ञफलं अश्नुवाते । तद्बाहू इति स्वौ बाहू व्यपदिशति, देवताऽध्वर्य्वोर्वा अश्विनोः एतौ बाहू इति । पूषणं तु यजमानमेव मन्यते पुष्णातेः । एवं सर्वे निर्वापविशेषप्रकाशनार्थाः ।

अत्राह, कस्मात् नोत्कृष्टाः सवित्रादयः शब्दाः, प्रकरणान्तरे सवितारं अश्विनौ पूषणं चाभिवदन्ति । लिङ्गेन तत उत्कृष्यमाणाः प्रकरणं बाधितुमर्हन्ति । **अत्रोच्यते** । सवित्रादयः परविशेषणं विभक्तिश्रुत्या क्रियन्ते, प्रातिपदिकार्थस्तु अव्यतिरिक्त इति गम्यते । तत्र लिङ्गं श्रुत्या बाध्यते । लिङ्गं हि प्रातिपदिकार्थप्रकाशनं देवताऽर्थमिति कृत्वा । इह देवताऽभावात् यत्र देवता तत्रोत्कर्षति । विभक्तिश्रुतिस्तु प्रातिपदिकार्थे पदार्थान्तरविशेषणं ज्ञापयति । तच्च इहास्ति पदान्तरम् । श्रुतिश्च लिङ्गात् बलीयसी । तस्मात् नोत्कर्षः । **आह**, यदा सवित्रादयो यजमानपराः, तदा सत्रे कथमनूह इति । **उच्यते** । जोषणार्थमिदं वाक्यम्, नानुज्ञापनार्थम् । अजोषितस्य जोषणं कर्तव्यम्, तत्र दृष्टोऽर्थः । अनुज्ञापनं पूर्वं वृणानेन कृतम्, तत् अदृष्टार्थमापद्येत । अपिच्च 'जुष्टं निर्वपामि' इति जोषणकरणं 'निर्वपामि' इति भावशब्देनोच्यते । 'सवितुः प्रसवे' इति अनुज्ञा निर्वृत्ता परविशेषणार्थं कीर्त्यते । अननुज्ञातमपि निर्वपणशब्दार्थं कुर्यादेव, न तु अजोषितेन यागः श्रूयते । तस्मात् जोषणार्थत्वात् परार्थाः सवित्रादयः शब्दाः नोहिष्यन्ते इति ।

शा— (पूर्वपक्षमाह–) **'तत्र दृष्टार्थतालाभाद् देवतावाचिता भवेत् ॥ निर्वापस्य प्रशंसार्थाः सन्तोऽदृष्टार्थतामियुः । सवित्रादिपदैस्तस्मादग्न्यादिरभिधीयते ॥ अग्निना वा विकल्पेन सविता मान्त्रवर्णिकः ।** (सिद्धान्तमाह–) **उत्पत्तौ तद्धितोक्तेन न मन्त्रोक्तो विकल्पते** (विकल्प्यते) **॥ वैषम्यान्न**

सवित्रादिपदमग्नेश्च वाचकम् । मन्त्रवाक्यानि चैतानि भिद्येरन् प्रतिदेवतम् ॥ जुष्टनिर्वापशब्दौ च भजेतामनुषङ्गिताम् । सर्वश्च निर्वपाम्यन्तः एकमन्त्रः प्रतीयते ॥ जुष्टादिः सकृदाम्नातो न सहेतानुषञ्जनम् ॥' तस्मान्नोहितव्याः ।

सोम— उपोद्घातप्रसक्तानुप्रसक्तं समाप्य इदानीं अध्यायार्थः ऊहश्चिन्त्यते इति **संगतिः** । **सूत्रार्थस्तु**— मन्त्राणां अर्थाभिधानद्वारा कर्मणि शेषभावात् सवित्रादीनामपि स्वार्थाभिधानेन शेषभावे समवेतार्थत्वात् ऊहः इति 'अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्' इत्यनेन पूर्वपक्षः प्रतिपाद्यते । तत्रोत्तरम्, अचोदितं अचोदितार्थकं सवित्रादि ऊहमप्राप्तं मन्त्रस्य चोदिताभिधायकत्वात् इति ।

वि—'सवित्रश्व्याद्यूहनीयं न वा, ऽर्थः संगतस्ततः । ऊह्यो, नाविकृतस्यैव निर्वापान्वयसंभवात् ॥' सवितृ-अश्वि-आदि ऊहनीयं न वा इति संशयः ।

भाट्ट— एवं तावदुपोद्घातमुखेन ऊहविषयश्चिन्तितः । इदानीं साक्षादेव तद्विषयश्चिन्त्यते । तत्र 'फलदेवतयोश्च' (९।१।३।४) इत्यत्र शक्त्या अपूर्वसाधनीभूतदेवताधिप्रकाशकमन्त्रपदानां विकृतौ तत्स्थानापन्नदेवताद्यन्तरे शक्त्या तत्प्रकाशनार्थं पदान्तरोहः इत्युक्तम् । ततश्च यत् मन्त्रपदानां न शक्त्या अपूर्वसाधनीभूतदेवतादिप्रकाशकत्वम्, अपि तु लक्षणया तत्प्रकाशकत्वम्, शक्यार्थस्यैव वा अदृष्टार्थमन्यस्तुत्यर्थं वोपादानम्, तत्रासमवेतार्थत्वात् विकृतेष्वपि श्रुतपदैरेव तत्प्रयोजनोपपत्तेर्नोहः । समवेतार्थत्वं च अदृष्टाद्वारकसंबन्धेन स्वशक्यार्थस्य अपूर्वसाधनीभूतसंबन्धित्वम् । अस्ति चेदम् 'देवस्य त्वा' इत्यादिमन्त्रे अग्निनिर्वापपदयोस्तादृशयागगतद्रव्यसंबन्धित्वात् । जपस्तोत्रशस्त्रादिमन्त्रपदानां च स्वशक्यार्थस्य अदृष्टद्वारा तादृशयागसंबन्धित्वेऽपि न समवेतार्थत्वम् । एवं देवादिपदानामपि न समवेतार्थत्वम् । नहि देवसवित्रश्विपूषशब्दानां प्रकृतयागीयदेवताप्रतिपादकत्वं संभवति, उत्पत्तिशिष्टदेवताऽवरोधेन मान्त्रवर्णिकदेवताकल्पनाऽनुपपत्तेः । न चोपांशुयाजे तत्कल्पनम्, तथात्वे गम्यमाननिर्वापैकवाक्यताभङ्गापत्तेः । **न च** 'त्वा जुष्टं निर्वपामि' इत्येतत्पदानुषङ्गेण 'देवस्य सवितुः प्रसवे त्वा जुष्टं निर्वपामि, अश्विनोर्बाहुभ्यां त्वा जुष्टं निर्वपामि, पूष्णो हस्ताभ्यां त्वा जुष्टं निर्वपामि, अग्नये त्वा जुष्टं निर्वपामि' इत्येव मन्त्रभेदाङ्गीकारेण निर्वपामिपदैकवाक्यतोपपत्तेः चतुर्थस्याग्नेये उपयोगेऽपि आद्यानां त्रयाणां मन्त्राणामुपांशुयाजे देवताकल्पकत्वोपपत्तिरिति **वाच्यम्** । अनुषङ्गेण वाक्यभेदाङ्गीकारस्यैव दोषत्वात् । षष्ठ्यन्तपदानां प्रसवबाहुहस्तपदैरन्वितानां देवताप्रतिपादकत्वे प्रमाणाभावाच्च । अत एव एतत्कल्प्यदेवतानामन्यत्र निवेशासंभवेऽपि यागान्तरकल्पकत्वमिति शङ्काऽपि प्रत्युक्ता, तथात्वे तद्यागान्तरस्य आग्नेयाद्यङ्गताऽऽपत्तेर्विकृतौ ऊहाप्रसक्तेश्च । एतेन या **मूले** सवित्रादिपदानामग्न्यादिपरत्वं लक्षणया अङ्गीकृत्य समवेतार्थत्वशङ्का कृता, सा येन शक्यसंबन्धेन अग्न्यादिपरत्वम्, तेनैव शक्यसंबन्धेन वैकृतदेवतापरत्वस्यापि उपपत्तौ ऊहाप्रसक्तेरुपेक्षिता । अत एव समवेतार्थत्वलक्षणे शक्यार्थस्येति विशेषणम् । अस्तु वा शक्यपदं वृत्तिप्रतिपाद्यपरम्, तथापि समवेतार्थत्वेऽपि उक्तयुक्त्या ऊहरूपफलाप्रसक्तेरेव इयं शङ्कोपेक्षिता । तस्मात् कथमपि समवेतार्थप्रकाशकत्वाभावात् देवस्यत्वादिपदानां यः शक्योऽर्थः, तद्विशिष्टनिर्वापप्रकाशनमेव देवस्यत्वाऽऽदिसकलमन्त्रप्रयोजनम् । तत्र येषां पदार्थानां दृष्टप्रयोजनसंभवः, तत्प्रकाशनस्य दृष्टमेव प्रयोजनम्, येषां तु तदसंभवः, तत्प्रकाशनस्य अदृष्टमेव प्रयोजनं कल्प्यम् । अत एव तादृशपदार्थानां निर्वापोपरि वैशिष्ट्यमपि आहार्यसंबन्धेनैवेति ध्येयम् ।

तदिह निर्वापस्य तावत् दृष्टमेव पृथक्करणं प्रयोजनम् । अग्नये त्वा पदार्थस्य च तदुपयोगितया स्वातन्त्र्येण च स्मृतिदार्ढ्यम् । जुष्टपदस्य तु वक्ष्यते, तदन्येषां तु अदृष्टार्थत्वमिति । केचित्तु देवस्यत्वादिपदैर्निर्वापस्तुतिर्लक्षणया प्रतिपाद्यते । सा चानुष्ठानकालेऽपि निर्वापं प्ररोचयितुमिति दृष्टार्थैव । तथा वा अस्तु, सर्वथा देवस्यत्वाऽऽदिपदानि असमवेतार्थानि नोहितव्यानि ।

यत्तु **भाष्यकारेण** गौण्या अश्विशब्दः आधाने अश्वदानकरणात् दंपतिपरः, पूषशब्दश्च पोषकत्वात् यजमानपरः, अध्वर्युबाहुहस्तयोश्च तदीयत्वं परिक्रीतत्वात्, देवः सविताऽपि लक्षणया यजमानः, तस्य प्रसवे अनु-

ज्ञायामित्यर्थाङ्गीकारेण निर्वापविशेषणत्वमुपपादितम्, तत् वेदे आरोपकपुरुषाभावात् अन्यत्रार्थवादादौ आहार्यारोपस्येव इहाप्यारोपाभावमभिप्रेत्य । **यदा** तु अध्वर्योः स्वात्मनिष्ठेन आहार्यारोपेण वैशिष्ट्यं संपाद्य स्वकर्तृकं निर्वापं प्रकाशयितुं लौकिकवाक्यप्रयोगवत् वैदिकवाक्यप्रयोगेऽपि बाधकाभाव इत्यालोच्यते, **तदा** अप्रयुक्तलक्षणायां प्रमाणाभावात् अध्वर्युब्रह्मयजमानान्यतमग्रहणे नियमकाभावाच्च पूर्वोक्तपक्षाश्रयणमेव युक्तम् । किञ्च, एवं सत्रे देवसवित्रश्विपूषशब्देषु बहुवचनोहः प्रसज्येत । न च यज्ञपतिवृद्धिवदत्र परार्थत्वमिति भाष्यकारसमाधानं युक्तम्, अश्विपूषपदे तथा संभवेऽपि यजमानानुज्ञायाः परकीयद्रव्यविषयेऽपि अलीकादिपरिहारार्थत्वेन दृष्टार्थत्वात् 'उदीचीनानस्य पदो निधत्तात्' इत्यादाविव देवसवितृपदयोः ऊहस्यानिवार्यत्वात् । **न च** एवं भवन्मतेऽपि देवस्य सवितुरुदयरूपे प्रसवे इत्यर्थाङ्गीकारेण तस्य समवेतार्थत्वात् 'महारात्रे हवींषि निर्वपेत्' इत्यादिविकृतौ अप्रसवे इत्यूहापत्तिः । अमावास्यायां च प्रागुदयान्निर्वापे लोपापत्तिरिति वाच्यम् । प्रसवे जाते जनिष्यमाणे वा इत्यर्थाङ्गीकारेण बाधकाभावात् । सूर्योदयकालीनत्वप्रकाशनस्य दृष्टार्थत्वाभावाच्च । अतो न देवस्यत्वाऽऽदिपदेषु ऊहः इति सिद्धम् ।

मण्डन-- 'नोहः सवित्रादिपदेषु कार्यः ।'

शंकर-- 'सवित्रादेरनूहनम् ।' १८.

* 'देवस्य त्वा' इत्यादौ एकवाक्यत्वनिर्णयार्थे एकवाक्यत्वलक्षणम् । **के.** २।१।१४।४६. * 'देवस्य त्वा सवितुः प्रसवे' इति मन्त्रे 'अग्नये निर्वपामि' इति पदद्वयस्य अनुष्ठेयार्थप्रकाशकतया देवस्य त्वा इत्यादिपदानां स्तावकता इति सर्वेषां सार्थकता । **आभरणम्.** ३।३।१४। २५ ब्रसू.

* **देवानां** आत्मोद्देशेन त्यागासंभवात् विग्रहाभावाच्च अशक्तेः अनधिकारः । कर्मकर्तृभावविरोधात् आत्मोद्देश्यकत्यागस्य स्वत्वनिवृत्तिफलकत्वासंभवाच्च त्यागासंभवः । **सोम.** ६।१।२. * देवानां देवतात्वं क्वचित् श्रुत्या क्वचिद् वाक्येन । तद्धितनिर्देशे श्रुत्या, चतुर्थीनिर्देशे वाक्येन । **भा.** २।२।९।२३ पृ. ५३३, * देवानां वैदिके कर्मणि नाधिकारः । ६।१।२।५.

* **देवपत्न्यः** चतुर्षु पत्नीसंयाजेषु तृतीयस्य देवता । तद्द्वारा कर्मनाम्नः पत्नीसंयाजशब्दस्य प्रवृत्तिः । **वि.** ३।३।१५.

* **देवपूजा** चन्दनादिना यथा चादृष्टार्थेषु उपदिश्यमानेषु कश्चिद् ब्रूयात् देवाय धूपो देयः पुष्पाण्यवकरितव्यानि चन्दनेनानुलेप्तव्यः उपहारोऽस्मा उपहर्तव्यः एवं कृते देवस्तुष्यति इति । तमन्यः प्रतिब्रूते नैतदेवम्, न प्रथमं धूपो दातव्यः, प्रथमं पुष्पाणि अवकरितव्यानि इति । एवं मन्यते धूपदानस्य प्राथम्यमनेन उक्तमिति । **भा.** ५।१।४।४.

* **देवयजनं** देवाः इज्यन्ते यत्र इति यज्ञभूमिः । देवयजनाध्यवसानम्– इदं योग्यत्वात् देवयजनं कर्तव्यं इति निश्चयः । इदं यज्ञारम्भात् प्राक् कर्तव्यं भवति । **के.**

* **देवव्रतानि** नाम त्रीणि सामानि अनृक्काणि । **बाल.** पृ. ७२.

* **देवस्वादिव्यवहारसिद्ध्यर्थं** देवताया अपि स्वीकाराख्यसंबन्धस्य तृतीये साधितत्वात् । **भाट्ट.** ९।३।१२.

* **'देवीरापः'** इति दीक्षितस्य प्रवासे नदीतरणार्थो मन्त्रः । यदा अनेकस्रोतसं नदीं तरति, तदा आदौ सकृदेव मन्त्रः, न तु प्रत्येकं स्रोतसि मन्त्रावृत्तिः । **भा.** ११।४।१७।५०.

* **देवता** अलौकिकैकप्रमाणसमधिगम्या अपूर्ववत् । **संकर्ष.** २।२।२. * देवता आरादुपकारिणी, तस्मात् बहिरङ्गम् (हविस्तु अन्तरङ्गम्) । **भा.** ८।१।१७।३२, * देवता आहूता सती हविरुपयोक्ष्यते तप्स्यति च । तृप्ता प्रसेत्स्यति । प्रसन्ना सती फलेन संयोक्ष्यतीति । तदेतन्नवमे सिद्धम् । १०।१।१।१ वर्णकं ३. * देवता इन्द्रादयो विग्रह– हविःस्वीकार– तद्भोजन– तृप्ति– प्रसादरूपपञ्चकविशिष्टा नैव सन्ति । विग्रहादिपञ्चकप्रतिपादकयोर्मन्त्रार्थवादयोः स्वार्थे तात्पर्याभावात् न चान्यत् किंचित् प्रमाणमस्ति । शब्दात्मका एव तु देवताः । शब्दबोध्या वा मनःकल्पितरूपा देवताः स्वीकार्याः । **चि.** ९।१।४.

* देवता उद्देश्याङ्गभूतत्वात् द्रव्यस्य त्यागाङ्गभूतस्यापेक्षया दुर्बला। भाट्ट. ४।१।७. * 'देवतैव प्रधानत्वात् फलं याच्येत कर्मवत्। न स्वामिनि स्थिते कश्चित् दासान् प्रार्थयते फलम् ॥' (कर्मण एव फलं न देवतायाः इत्यर्थः)। वा. २।१।५।२९ पृ. ४३१. * देवता कर्मणि गुणभूता याज्याऽनुवाक्याद्वयेन कर्मसिद्ध्यर्थमुपलक्ष्यते। भा. १२।४।२।३, * देवता तावत् उद्देशेन अर्थं साधयति। ६।३।५।१८.

* देवता तु तदाशीष्ट्वात् संप्राप्तत्वात् स्वामिन्यनर्थिका स्यात्। ९।३।१२।३६ इति सूत्रेण 'आशासाना मेधपतिभ्यां मेधम्' इति मेधाख्यस्य पशोः मेधपत्यर्थत्वाशिषः देवतायां पशुस्वामित्वसिद्ध्यर्थं उपपत्तेः यजमाने तु पशुस्वामित्वस्य प्राप्तत्वात् तदाशासनानर्थक्यापत्तेः देवतापर एव मेधपतिशब्दः न यजमानपर इति सिद्धान्तितम्। सु. पृ. १५३४. * देवता दर्शपूर्णमासयोः उपांशुयाजे प्राकृतीनामन्यतमा। भा. १०।८।१६। ४९–५० * देवता द्वितीयान्तेन शब्देन न हि उद्दिश्यते प्रमाणाभावात्। टुप्. १०।१।७।१४. * देवता नात्रागच्छति। यजतौ तु उद्देशेन केवलमङ्गी भवति। भा. ११। ४।७।२८, * देवता नास्ति काचिद् विग्रहवती। ननु विष्णुः स्तूयते, न च विष्णुना स्तुतेन कश्चिदर्थोऽस्ति। न स्तुत्यो विष्णुः कश्चिदङ्गी क्रियते। १२।४।१।१. * देवता न संबोध्या 'यथाभागं व्यावर्तेथाम्' इत्यादिविभागमन्त्रेषु, किन्तु पिण्डयोरेव। संकर्ष. १।३।१६.

* देवता नाम का पुनरियम्? एकं तावन्मतं या एता इतिहासपुराणेषु अग्न्याद्याः संकीर्त्यन्ते नाकसदः, ता देवता इति। उच्यते, तासु देवतासु अहरादीनां शार्दूलादीनां वा न संग्रहः। स्मर्यते च कालवाचिनां देवतात्वं कालेभ्यो भवति 'मासो देवता, संवत्सरो देवता' इतिं। अपरं मतम्, येषु देवताशब्दो मन्त्रब्राह्मणे श्रूयते 'अग्निर्देवता, वातो देवता, सूर्यो देवता, चन्द्रमा देवता' इत्येवमादिषु तेऽत्र देवताशब्दे नोच्यन्ते इति। तत्रापि अहरादीनामनुपसंग्रह एव। तस्मात् सूक्तभाजो हविर्भाजश्च देवताः। काः सूक्तभाजः? 'इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥' (ऋसं. १।९४।१) इति। हविर्भाजः 'आग्नेयमष्टाकपालं निर्वपेत्, अग्नीषोमीयमेकादशकपालम्' इति। सा हविर्भाक् देवता, यां प्रति तादर्थ्यं हविषः। सूक्तस्याप्येवमेव। एवं मूर्तानाममूर्तानां चेतनानामचेतनानां श्रुत्या कंचिदर्थं प्रति तादर्थ्येन संकल्पनीयानां देवतात्वं भविष्यति। यस्याः वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामि इति संकल्पः क्रियते सा देवता भवति तत्र। भा. १०।४।१२।२३ पृ. १९२७, * देवता नाम यदर्थं किंचिच्चोद्यते। चोदिता हि देवता भवति नाचोदिता। देवता इति संबन्धिशब्दो न जातिशब्दः। ६।३।५।१९, * देवता। न्यायसुधाग्रन्थस्वारस्यात् प्रातिपदिकेन अर्थवाचिनाऽपि उद्देश्यत्वान्वयार्थं पदविशिष्टार्थलक्षणामङ्गीकृत्य तत्र तद्धितवाच्यदेवतात्वान्वयाङ्गीकारात् शब्दोपहितः अर्थो देवता इति प्रतीयते, तत् पदविशिष्टेऽर्थे उच्चार्यत्वाख्योद्देश्यत्वस्य बाधात् विशेषणीभूतपदान्वयस्य च 'अन्योपसर्जनं अन्येन नान्वेति' इति न्यायेन अव्युत्पन्नत्वात् उपेक्षणीयम्। कौ. २।१।१६ पृ. ९०–९१. * देवता पौर्णमास्यां उपांशुयाजे प्रजापतिर्वा विष्णुर्वा अग्नीषोमौ वा। भा. १०।८।१७।५१–६१, * देवता मान्त्रवर्णिकी आघारे। १।४।३।४ पृ. ३३५. * देवता। 'यदर्थो यादृशो यत्र देवतात्वेन चोदितः। मनागपि ततोऽन्यत्वे देवतेति न गम्यते ॥' इति स्तुतशस्त्राधिकरणवार्तिके व्याख्यातम्। सु. पृ. ७४२. * देवता यद्यपि प्रत्यक्षं भुञ्जीत, तथापि हंस इवोदकात् क्षीरं पश्चात्तनमेव सोमं विविच्य भुञ्जीत। किमुत यदा उद्देशमात्रोपकारिणी देवता पुनरभ्युन्नीतस्यैव उद्दिश्यते न पूर्वशेषस्य। वा. ३।२।१२।३२. * देवता यागे गुणभूता। तस्याः दातृत्वं स्तुत्या उच्यते। यागात्तु फलम्। 'स्वर्गकामो यजेत' इति श्रूयते। भा. ८।१।१८।३४.

* देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वात् (९।१।४।६) इति पूर्वतन्त्राधिकरणे अतिथिभोजनस्य अतिथिप्राधान्यवत् देवतोद्देशेन द्रव्यत्यागरूपस्य यागस्य देवताप्राधान्यमिति पूर्वपक्षं कृत्वा अतिथिभोजनवैषम्य-

कथनेन यागप्राधान्यसिद्धान्तकरणात् अतिथिभोजनस्य अतिथिप्राधान्यमभ्युपगतम् । परिमल. ४।१।४।५ ब्रसू.

देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वात् । ९।१।४।६॥

दर्शपूर्णमासयोः 'अग्नेरहमुज्जितिमनूज्जेषम्, सोमस्याहमुज्जितिमनूज्जेषम्' इति मन्त्रं न देवता प्रयोजयति किन्तु अपूर्वं इति सिद्धान्त उक्तः पूर्वाधिकरणे । तमाक्षिपति । वाशब्दः पूर्वाधिकरणसिद्धान्तव्यावर्तकः । देवता एव मन्त्रं प्रयोजयेत्, भोजनस्य तदर्थत्वात् देवतार्थत्वात् । भोजनं हीदं यागो नाम देवतायाः । भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते । अतः देवता प्रयोजिका । अतिथिवत् । यथा यावत् किञ्चित् अतिथेः परिचरणम्, तत्सर्वं अतिथिप्रयुक्तम् । एवमिदमपि ।

आर्थपत्याच्च । ७॥

देवताया आर्थपत्यात् अर्थपतित्वात् यागे मन्त्रादीनां प्रयोजकता सिध्यति । अर्थपतित्वं च स्मरन्ति 'अर्थानामीष्टे देवता' इति । तथा देवताग्रामः देवक्षेत्रं इति व्यवहारः तामेव स्मृतिं द्रढयति । तथा 'इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम् । इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥' (ऋसं. १०।८९।१०) इति ।

ततश्च तेन संबन्धः । ८॥

दर्शपूर्णमासयोः 'अग्नेरहमुज्जितिमनूज्जेषम्' इति मन्त्रस्य देवता प्रयोजिका । यस्मात् देवता हविर्भोजनेन तृप्ता भवति । ततश्च तस्मादेव हेतोः देवतायाः प्रसादेन तेन स्वर्गादिना फलेन सह यागकर्तुः संबन्धो भवति । तस्मात् देवतैव प्रयोजिका प्रधानभूता ।

अपिवा शब्दपूर्वत्वाद् यज्ञकर्म प्रधानं स्याद्, गुणत्वे देवताश्रुतिः । ९॥

पूर्वपक्षव्यावृत्तये अपिवाशब्दः । यागे न देवता प्रधानम्, किन्तु यज्ञकर्मैव प्रधानम् । शब्दपूर्वत्वात् फलादेः । यत् शब्द आह, तत् प्रमातव्यम् । शब्दश्च कर्मणां फलमाह 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिः । ननु द्रव्यदेवताक्रियं यजत्यर्थः । सत्यमेतत् किन्तु गुणत्वे देवताश्रुतिः । द्रव्यदेवतं हि भूतम्, भावयितव्यो यजत्यर्थः । भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते । ततश्च कर्मणि प्रधाने गुणभूता देवता । तस्मान्न देवता प्रयोजिका किन्तु अपूर्वमेव मन्त्रादेः प्रयोजकं इति सिद्धान्तः । शब्दः पूर्वः प्रमाणं यस्य तत् यज्ञकर्म शब्दपूर्वं शब्दप्रमाणकमित्यर्थः । तस्य भावः शब्दपूर्वत्वं तस्मात् इति विग्रहः । देवताश्रुतिः देवतावाचकः शब्दः गुणत्वे कर्मगुणत्वस्य बोधकः इत्यर्थः ।

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्, तस्य प्रीतिप्रधानत्वात् ।१०॥

यज्ञकर्मणि देवतैव प्रधानं इत्यत्र पूर्वत्रादिना उक्तस्य अतिथिवत् इति दृष्टान्तस्य वैषम्यं प्रतिपाद्य सिद्धान्तमुपसंहरति । अतिथौ सति भोजनादिदानस्य तत्प्रधानत्वं अतिथिप्रधानत्वं स्यात् । सः अतिथिः प्रधानं यस्मिन् भोजनादिदाने तत् तत्प्रधानम् ! तस्य भोजनादिदानस्य अतिथिप्रीतिप्रधानत्वात् । तत्र हि अतिथेः प्रीतिः संतोषः प्रधानम् । यागादौ कर्मणि तु तस्य देवताप्रीतिप्रधानत्वस्य अभावः स्यात् । यागादौ हि कर्मैव प्रधानम्, देवता तु गुणभूता । तस्मात् अतिथिवत् इति विषमो दृष्टान्तः । तस्मात् नास्ति कर्मणि देवतायाः प्राधान्यम् । ततश्च मन्त्राणां देवता न प्रयोजिका ।

अत्र **सुधा**– (पृ. ७५०) दृष्टान्तवैषम्याभिधानार्थे सूत्रे विग्रहादिसद्भावेऽपि यजेः पूजावाचित्वाभावात् यागकर्मणि देवताप्राधान्याभावः इति मध्यमावयवेन देवताप्राधान्यं निषेत्स्यते इति । के.

* **देवताः विग्रहादिमत्यो** मीमांसकमते सन्ति न वेत्यत्र कुतूहले विचारः । स इत्थम् –

येषां तु मते चतुर्थ्यन्तशब्द एव देवता, येषां च चैतन्यादिरहितोऽर्थ एव देवता, तेषां शब्दस्य अर्थस्य वा अचेतनत्वादेव अनधिकारे सिद्धे 'देवताऽन्तराभावात्' इति प्रयत्नवैयर्थ्यापत्तेः सूत्रभाष्यविरोधो दुष्परिहरः ।

यत्तु नवमे 'देवता वा प्रयोजयेत्' (९।१।४।६) इत्यधिकरणे देवतानां विग्रहादिपञ्चकं निराक्रियते, तत् प्रौढिवादमात्रम् । अत एव वार्तिके देवताविग्रहादि-

पञ्चकं अनाघ्रायैव तदधिकरणं प्रवर्तयिष्यते । 'शब्द एव देवता न तु अर्थः' इति तु बौद्धप्रलपितमेव । अर्थाभावे इन्द्रादिशब्दानां अनर्थकतया प्रातिपदिकार्थतद्गतकर्मत्वादिकारकसंख्याभिधायिन्यः सुब्विभक्तयो न स्युः । ततश्च इन्द्रादिशब्दघटितसमस्तवेदवाक्यानि उन्मत्तप्रलपितानि आपद्येरन् ।

तथा विग्रहादिपञ्चकरहितोऽर्थो देवता इत्यपि प्रच्छन्नबौद्धप्रलपितमेव । नहि वेदप्रामाण्यमभ्युपगच्छद्भिर्वैदिकैः देवतानां विग्रहादिपञ्चकं नास्तीति शक्यमभ्युपगन्तुम् । यागविधिसामर्थ्यादेव तद्विग्रहादिलाभात् । यागा हि देवताऽऽराधनरूपाः, 'यज देवपूजायाम्' इति स्मरणात् ।

फलकामिभ्यश्च 'राजा फलं ददाति' इतिवत् यागैराराध्यमानानां देवतानां फलदातृत्वं गम्यते । न च फलस्यानीशानानां फलदातृत्वं संभवति । नापि अप्रसन्नाः फलं प्रयच्छन्ति । नापि दत्तं हविः अभुञ्जानाः प्रसीदन्ति । न चैतत् सर्वं अचेतनानां विग्रहरहितानां घटते । तस्मात् यागविधिसामर्थ्यादेव विग्रहवत्त्वम्, हविर्भोक्तृत्वम्, प्रसादवत्त्वम्, फलैश्वर्यवत्त्वम्, फलदातृत्वं च इति विग्रहादिपञ्चकं देवतानां कल्प्यते ।

'सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु' 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' 'इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति । ततो ददाति दाशुषे वसूनि' 'इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः' 'ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः' इत्यादिमन्त्रार्थवादेतिहासपुराणेषु देवतानां विग्रहादिपञ्चकस्य स्पष्टमभिधानाच्च । तेषां विध्येकवाक्यत्वेऽपि अवान्तरपदसंसर्गतः प्रतीयमानदेवताविग्रहादित्यागे कारणाभावात् ।

अत एव भगवता जैमिनिना 'अविशिष्टस्तु वाक्यार्थः' (१।२।४।३२) 'अर्थैकत्वादेकं वाक्यम्' (२।१।१४।४६) इत्यादिभिः सूत्रैः मन्त्राणां वाक्यत्वं अर्थवत्त्वं च दर्शितमुपपद्यते । मन्त्रवाक्यार्थप्रतीतिमुपजीव्यैव 'छागो वा मन्त्रवर्णात्' (६।८।१०।३१) इत्यधिकरणप्रवृत्तिः । 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्राणां लैङ्गिकश्च विनियोगः सिध्यति । अर्थवादानामर्थवत्त्वविरोधिनश्च शास्त्रदृष्टविरोधादयः अर्थवादाधिकरणे 'गुणवादस्तु' (१।२।१।१०) 'रूपात् प्रायात्' (१।२।१।११) इत्यादिभिः सूत्रैः गौण्या वृत्त्या परिहृताः । 'यजमानः प्रस्तरः' इत्यादौ तत्कार्यकरत्वादिगुणयोगात् अर्थवत्त्वं तत्सिद्धिपेटिकायां (१।४।१२।२३) निरूपितम् । किं बहुना, कृत्स्नमपि अध्वरमीमांसाशास्त्रं मन्त्रार्थवादलिङ्गान्युपजीव्यैव प्रवृत्तं तेषामर्थवत्त्वाभावे व्याकुलं स्यात् ।

न च विध्येकवाक्यतया तत्र तात्पर्यवत्ता, मन्त्रार्थवादानां देवताविग्रहादिरूपेऽर्थे तात्पर्याभावात् कथं तत्र तेषां प्रामाण्यमिति **वाच्यम्** । यागादिविधिभिः वाक्यैकवाक्यतया तेषु महातात्पर्यवतामपि मन्त्रार्थवादानां प्रधानविध्येकवाक्यताकप्रयाजादिवाक्यानामिव स्वस्वार्थेऽपि अवान्तरतात्पर्यवत्त्वात् ।

'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदम् ॥' इत्यर्थवादस्य विधेयस्तुतितात्पर्यकत्वेऽपि स्वर्गशब्दार्थप्रतिपादनेऽपि अवान्तरतात्पर्यस्य सर्वसंप्रतिपन्नतया तद्वदेव अर्थवादमात्रस्य असति विरोधे स्वार्थावान्तरतात्पर्यकताया आश्रयणीयत्वाच्च ।

न च स्वर्गार्थवादस्य फलविध्यपेक्षितत्वात् स्वार्थे अवान्तरतात्पर्यं नान्यस्य इति **वाच्यम्** । 'देवता आवाहयति' इति आवाहनविधिः दृष्टार्थत्वात् देवतानामागमनमपेक्षते । तदागमनं च हविषां स्वीकरणाय । तत्स्वीकरणं च भोजनाय । भोजनं च तृप्तये । फलकामेन क्रियमाणं च देवतानां तृप्तिजननं फलदातृत्वसिद्धये । फलदातृत्वं च फलैश्वर्यात् इति साक्षात् परंपरया वा देवताऽऽगमनादीनां आवाहनविध्यपेक्षितत्वात् तद्विग्रहादौ तात्पर्यमनिवार्यम् । किञ्च विश्वसृजामयनाख्यस्य सत्रस्य फलं श्रुतम् 'ब्रह्मणः सायुज्यं सलोकतां यन्ति, एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतां यन्ति य एतदुपयन्ति' इत्यादौ कश्चित् कालं समानलोकता एकलोकताप्राप्तिः, ततः सार्ष्टिता समानदेहभोगवत्त्वम् । सायुज्यं तदेकत्वम् । यदि देवाः तत्तल्लोकविशेषेषु दिव्यशरीरायतन-

निरतिशयभोगवन्तो न स्युः तदा तत्फलार्थत्वेन विधानं उन्मत्तप्रलपितमेव स्यात् ।

तथा सामविधिब्राह्मणे ‘अयाजितमेतेन कद्वनम् ! इति द्वितीयं प्रयुञ्जानो देवान् पश्यति’ इति देवदर्शनार्थसामविशेषजपविधिसामर्थ्यादपि देवानां विग्रहवत्त्वं सिध्यति । न च देवदर्शनार्थं युगपदेव सामजपं कुर्वत्सु अनेकेषु यजमानेषु विग्रहवतामपि देवानां कथं दर्शनसंभव इति वाच्यम् । अत एव तेषां संकल्पमात्रोपनतकायव्यूहादिकल्पनात् । एवं च बहुभिर्यजमानैः युगपदाहूतानां देवतानां युगपत् संनिधानं इति नानुपपन्नम् । यज्ञवाटेषु देवतानामदृश्यत्वं तु योगिवत् ऐश्वर्यवशादुपपन्नम् ।

‘कस्य वा ह देवता यज्ञमागच्छन्ति, कस्य वा न बहूनां यजमानानाम्, यो वै देवताः पूर्वः परिगृह्णाति स एवैनाः श्वोभूते यजते’ इत्यर्थवादस्तु ‘अग्निहोत्रं हुत्वा प्रातरन्वादधाति’ इति विधेः स्तावकः, न विवक्षितस्वार्थः ।

न च वाजसनेयके ‘ते वा एते आहुती उत्क्रमतः, ते अन्तरिक्षमाविशतः, ते अन्तरिक्षं तर्पयतः, ते दिवमाविशतः, ते दिवं तर्पयतः । ते आवर्तेते ते इमामाविशतः, ते पुरुषमाविशतः, ते स्त्रियमाविशतः, ततः पुत्रो जायते’ इति श्रवणेन ‘अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥’ इत्यादिस्मृत्या च हुतानां हविषां परलोकात् क्रमेण प्रत्यावृत्त्यवगमात् कथं यज्ञवाटे देवतानां हविर्भोक्तृत्वं इति वाच्यम् । हुतस्य हविषः कश्चिदंशः तृप्तिपर्याप्तो देवैर्भुज्यते अन्योंऽशस्तु वृष्टयन्नादिरूपेण परिणतः प्रत्यावर्तते इत्युभयविधवचननिर्वाहात् ।

न च ‘त्रिंशदस्या जघनं योजनानि उपस्थ इन्द्रः स्थविरं बिभर्ति’ इति अतिस्थूलदेहानां देवानां कथं अल्पेन हविषा तृप्तिरिति वाच्यम् । ‘यावदेका कामयते देवता यावदेका, तावदाहुतिः प्रथते’ इति हुतस्य हविषः वृद्धिश्रवणेन तदुपपत्तेः ।

यद्यपि हुतं हविर्भस्मीभवति ततो निर्गतस्य तदीयसूक्ष्मांशस्यैव वृद्ध्युपगमान्न दोषः । ‘अवाढ्ढव्यानि सुरभीणि कृत्वा’ इति च हविरवस्थान्तरनयनस्य श्रवणात् । कुशकाशदारुशकलादिष्वपि हविःषु कश्चित् भक्ष्यांशः तत्तदास्वादनयोग्यरूपेण परिणमते, इति न तेषु अनदनीयत्वदोषः । अत्र च लिङ्गम् ‘एतद्वै दैव्यं मधु यद् घृतम्’ इति । उक्तं च तन्त्रवार्तिके लोकवेदाधिकरणे (१।३।९।३० वर्णकं १) ‘यच्चैतद् घृतमस्माकं देवानां मध्विदं यदि । रसवीर्यादिभिस्तत्र न शब्दार्थोऽन्यथा भवेत् ॥’ (वा. पृ. २९२) इति ।

येषु देवताऽऽवाहनमस्ति तेषु आगत्य भुज्यते इत्यागमनश्रुतिः हविर्नयनश्रुतिश्च विरुध्यते । आहूतसंनिहितान् देवान् प्रति तदास्वादनीयरसांशनयनसंभवाच्च ।

यद्यपि श्राद्धे अतीतपितॄणां स्थावरतिर्यङ्मनुष्यनारकजन्मप्राप्तानां आगमनासंभवात् आवाहनं न संभवति, तथापि यथा गर्भवृद्धये सुहृद्भिर्दत्तमभीष्टमन्नं गर्भवती भुक्त्वा तृप्ता सती गर्भं तर्पयित्वा पोषयति सुहृद्भ्यश्च प्रत्युपकरोति तथा श्राद्धीयमन्नं भुक्त्वा तदधिष्ठानदेवाः तृप्ताः श्राद्धकर्तुः पित्रादीनपि तर्पयन्ति श्राद्धदात्रेऽपि फलं प्रयच्छन्ति ‘वसुरुद्रादित्यरूपाः पितरः श्राद्धदेवताः । प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेषु तर्पिताः ॥ सर्वान् कामान् प्रयच्छन्ति शतशोऽथ सहस्रशः ॥’ इत्यादि स्मरणात् ।

‘जगृभ्मा ते दक्षिणमिन्द्र हस्तम्’ इति, हे इन्द्र ते दक्षिणं हस्तं रक्षकत्वेन वयं ग्रहीष्यामः इत्यर्थः । इति न प्रत्यक्षविरोधः ।

‘ओषधीभ्यः स्वाहा, मूलेभ्यः स्वाहा’ इत्यादौ तत्तदधिष्ठात्र्यो देवताः इति न विरोधः ।

न च देवताप्रसादादेव यागस्य कालान्तरभाविफलजनननिर्वाहसंभवात् किमपूर्वकल्पनया इति वाच्यम् । प्रसन्नानामपि देवतानां कल्पान्तरभाविफलदातृत्वस्य असंभवेन अपूर्वद्वारैव देवताप्रसादस्यापि फलजनकत्वस्य वक्तव्यतया अन्यत्रापि तथा कल्पनात् । ‘तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च’ इति विद्याकर्मणोः पूर्वानुभवजनितसंस्कारस्य च जीवेन सह उत्क्रान्तिश्रवणेन कर्मजन्यापूर्वस्य अवश्याभ्युपेयत्वाच्च ।

एवमन्योऽपि मन्त्रार्थवादादिषु देवताविग्रहादिविरोधः परिहर्तव्यः । तद्विस्तरस्तु ब्रह्ममीमांसायां वाचस्पत्यपरिमलन्यायरक्षामण्यादिमहाग्रन्थेषु द्रष्टव्यः ।

‘कर्ममीमांसकाः निरीश्वरवादिनः’ ‘तेषां देवताविग्रहादिपञ्चकं नास्ति’ इति प्रवादस्तु प्रच्छन्नबौद्धतदेकदेशिविषयः । ‘न देवतानां देवतान्तराभावात्’ इत्येतत्सूत्रभाष्यवार्तिकेषु तद्विग्रहाभ्युपगमात् । ‘विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे । श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥’ इति श्लोकवार्तिकारम्भे भट्टाचार्यैः ईश्वरस्वरूपाभिधानाच्च। भूतार्थवादानामपि स्वार्थे प्रामाण्याभिधानपुरःसरं देवतिर्यङ्मनुष्यादिजगत्सृष्टिप्रलयकर्तुः परमेश्वरस्य देवतादिव्यविग्रहादेश्च वार्तिके तत्रतत्राभिधानाच्च।

शास्त्रदीपिकायां तृतीयस्य द्वितीयपादे ‘लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम्’ इत्यधिकरणे (३।२।७।१९) ‘मन्त्रार्थवादेतिहासपुराणादिषु स्वर्गाधीश्वरत्वलोकपालकत्वासुरजेतृत्वादिरूपेण प्रतिपादितानां कर्मणो बहिरपि सद्भावावगमात् न क्रत्वव्यभिचारः इत्यभिधानाच्च (टीप्पणी– ‘न च अग्निसूर्यादीनां क्रत्वव्यभिचारः, येन क्रतुरुपस्थाप्येत । लोकेऽपि तत्सद्भावात् । इन्द्रादीनामपि मन्त्रार्थवादेतिहासादिभिः कर्मणोऽन्यत्रापि प्रतीतेः’ इति शास्त्रदीपिकायां पङ्क्तिः । तत्र सोमनाथस्य च ‘मन्त्रार्थवादादिषु स्वर्गाधीश्वरत्वलोकपालत्वासुरजेतृत्वादिना प्रतिपाद्यमानत्वेन इन्द्रादीनामपि कर्मणो बहिरपि संभवावगमात् लोके संभवोऽस्तीत्यर्थः’ इति पङ्क्तिः)।

तस्मात् वैदिकानामास्तिकानां अस्ति देवताविग्रहादिपञ्चकम् । इत्यास्तां तावत् । [‘न देवतानां देवतान्तराभावात्’ (६।१।२।६) इति सूत्रे इदम्] ।

* देवता विधिमात्रप्रमाणिका इत्युक्तं इन्द्रमहेन्द्राधिकरणे, ‘विधिशब्दस्य मन्त्रत्वे’ (१०।४।१२।२३) इति दशमे च । बाल. पृ. १२२, १२५.

⧗ **देवता वैधशब्देनैव ध्यातव्या ‘यस्यै देवतायै वषट्कुर्यात् तां ध्यायेत्’ इति ॥**

‘कान्तां ध्यायन् आस्ते’ इत्यादौ तद्रूपध्यानस्येव प्रकृतेऽपि देवतारूपध्यानविधिः, अर्थवादेषु देवतारूपाम्नानात्, विध्यपेक्षितघृतादिनियमांशे तस्य प्रामाण्याच्च । देवतायाः फलदातृत्वं स्वरूपेण कर्माङ्गत्वं च धर्माणां तत्प्रयुक्तता चेत्येतत् त्रितयनिरासेनैव सामञ्जस्ये विग्रहनिरासस्य देवताऽधिकरणार्थत्वाभावात् । तथात्वे तिर्यगधिकरणे तेषामनधिकारसाधनमनर्थकं स्यात् । असदेव वा रूपमीदृशविध्यपेक्षितार्थनियमनार्थतया उपदिश्यते इत्यपि सुवचम् । न च शब्दद्वारेणैव देवतायाः कर्माङ्गतया शब्दस्यैव मानसमुपनीतभानमङ्गत्वेन विधीयते इति **वाच्यम्**। ‘यद्धि मनसा ध्यायति तद्वाचा वदति’ इति व्याप्त्या याज्याऽनुवाक्याऽन्तर्गतदेवताशब्दोच्चारणतः पूर्वं नियमतः तत्सत्त्वेन तस्याविधेयत्वात् । **इति प्राप्ते**, सर्वत्रापि प्रथमोपस्थिते शब्दे कार्यस्य असंभवादेव हि तदर्थपर्यन्तानुधावनम् । न च प्रकृते तदसंभवः, संकल्पपूर्वकशब्दध्यानविशेषस्येह विधेयत्वात् । याज्योच्चारणपूर्वनियतशब्दध्यानस्य होतुः सत्त्वेऽपि हविर्ग्रहणाव्यवहितोत्तरकालं यजमानस्य एतद्विधिसार्थक्यात् । **तस्मात् देवतारूपः शब्द एव ध्यातव्यः** । संकर्ष. ४।३।६ वर्णकं २.

* देवता श्रुत्या गम्यते, न प्रत्यक्षादिभिः । भा. ४।३।१५।३७. * देवता सर्वा एवमर्थमभिधीयते विधीयते वा, कथं नाम तदुद्देशेन कर्म क्रियेतेति । वा. २।१।५।१८. * देवता स्तुता वा अस्तुता वा अङ्गभावं साधयति । भा. २।३।१४।२९. * ‘देवता हि विधेयत्वाद् विवक्षितगुणेष्यते । लक्षणत्वे तु तस्याः स्यादविवक्षा गुणादिषु ॥’ यदि हि तद्धितसंबन्धे देवता उद्दिश्यमाना स्यात् ततः अस्याः गुणाविवक्षा भवेत् । इयं पुनः अविधीयमाना देवतात्वमेव न प्रतिपद्यते इति अवश्योपादातव्या । वा. २।१।५।१७ पृ. ४२३. * अग्निर्मूर्धा इत्यादिमन्त्रेषु अग्न्यादीनां प्राधान्येन अभिधानात् यमर्थं प्राधान्येन मन्त्रोऽभिदधाति साऽपि देवता इति लक्षणेन देवतात्वावसायात् । सु. पृ. ४५७. * अनुपदिष्टदेवताद्रव्यरूपं न यागान्तरं प्रतिपद्येमहि । भा. २।२।४।९,* ‘गुणत्वेन देवताश्रुतिः’ (८।१।३४ सूत्रम्) । विशेषणत्वेन देवता श्रूयते हविर्विशेष्यत्वेन । ‘ऐन्द्रं पयः’ इत्युक्ते हविर्बुद्धौ संनिधीयते, न देवता । ८।१।१८।३४, * तादर्थ्ये च सति देवता भवति । न देवता नाम जात्या काचित् । सैव कस्यचित् रूपस्य देवता, सैव नान्यस्य । यस्य यां प्रति तादर्थ्यम्, सा तस्य देवता ।

९।२।२०।६०, * द्रव्यदेवतक्रिये यजतिशब्दो वर्तते। ६।१।१।२ पृ. १३५१. * द्रव्यदेवतासंयोगस्तु न कथञ्चित् यागाद्विना सिध्यति। वा. २।२।६।१८ पृ. ५१६. * न च शब्दमात्रं देवता इति नवमदशमयोरभिधास्यते। २।१।५।१५ पृ. ४१७, * न तु अस्माकं देवता पिन्नति, किं तर्हि ? संकल्पविषयत्वेनैवोपयुज्यते। ३।२।१७।४१. * यमर्थं प्राधान्येन मन्त्रोऽभिधत्ते सा देवता। सु. पृ. ६५४. * यं चार्थप्राधान्येन मन्त्रः प्रकाशयति सा तस्य देवता नाभिधानमात्रेण, एकदेवत्येऽपि मन्त्रे अनेकदेवताऽन्तरपदप्रयोगे सति तद्देवत्यव्यपदेशाभावात्। वा. १।२।४।४३. * यस्य वाचकं शब्दमुद्दिश्य स्मृत्या वा हविस्त्यक्ष्यामि इति संकल्पः क्रियते सा देवता भवति इति विधिशब्दाधिकरणे लक्षणं वक्ष्यते। सु. पृ. ७४२. * येषां शब्द एव देवता तेषां......। वा. ६।१।२।५, * यां चोद्दिश्य द्रव्यं त्यज्यते सा देवता। ३।१।१५।२७. * **देवताः** चतुर्थ्या तद्धितेन वा निर्दिश्यन्ते। 'यदग्नये सायं जुहुयात्' अत्र चतुर्थी। 'आग्नेयोऽष्टाकपालः' अत्र तद्धितः। वि. ९।२।२०. * देवताः नहि माद्यन्ति। भा. ३।२।१५।३७, * देवताः विग्रहादिमत्यो न सन्ति। देवताऽधिकरणम्। ९।१।४।६–१०, * **देवतामुद्दिश्य** यस्त्यागः स यागो भवति। न हि उद्देशमात्रेण देवता भवति। या यस्य श्रूयते सा तस्य देवतेति। ९।४।१।३२. * देवतां च विना होमायोगात्। सु. पृ.४५७. * देवतां प्रति द्रव्यस्योत्सर्गः कर्म। भा. ८।१।१७।३२. * 'देवतां यां यदुद्दिश्य द्रव्यं स्वत्वेन गृह्यते। तस्यास्तदेव संबन्धि, नान्यत् तन्मध्यपात्यपि॥' शास्त्रलक्षणो हि देवतासंबन्धः। वा. ३।२।१२।३२. * देवतां विना यागो नहि भवति। तेन स देवतामाकाङ्क्षति। तस्मात् देवता यागार्था। भा. १०।१।८।१८, * न हि **देवता**मन्तरेण यागो भवति। न च वचनमन्तरेण देवता। न चान्यस्य विहिता देवता अन्यस्यावकल्पते। १०।८।१७।५०. * यागो देवतामपेक्षते देवताश्च यागमन्तरेण न संभवन्ति इति यागमपेक्षन्ते। तयोः संनिधानेन प्रमाणेन संबन्धो भवति। टुप्. १०।४।२।३ पृ. १९१३. * न हि एकस्य कर्मणः अनेकया **देवतया** अनेकया (च) अनुवाक्यया कार्यमस्ति। वा. २।२।३।३ पृ. ४७९. * **देवता**भिरप्रत्यक्षाभिः संलापे न कश्चिद्यज्ञस्योपकारः। भा. १।२।४।३२. * **देवतायै** दातुं द्रव्यं त्यजन्ति। वा. ३।४।१४।४१ पृ. ९७९. * देवतायै संकल्पितं यजमानेन न स्वयमुपयोक्तव्यम्। तस्मान्न तस्योपयोक्तृत्वमृत्विज ईशते, नो खल्वपि यजमानः। भा. १०।२।९।३१, * देवतायै संकल्पितेन शिष्टाः न स्वेनेव व्यवहरन्ति। ३।४।१७।५०, * **देवतायाः** अभिधानं वनस्पतियागे वनस्पतिशब्देनैव। १०।४।१६।३२–३९, * देवतायाः असति विधाने अभावात्। २।२।३।६. * देवतायाः ऐश्वर्यम्। 'देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमम्' इत्यादौ ब्राह्मणादिवत् देवताया अपि ऐश्वर्यप्रसिद्धेः 'यस्यै वा कस्यै देवतायै पशुरालभ्यते सैव मेधपतिः' इत्यर्थवादेभ्यश्च देवतात्वस्य ऐश्वर्यरूपत्वप्रसिद्धेः प्रतिग्रहाभावेऽपि तदुद्देशपूर्वकेण त्यागेन तदधीनत्वापादनात् मुख्यैश्वर्याभावेऽपि औपचारिकमैश्वर्यमस्ति। सु. पृ. ८३२, * देवतायाः कर्मसंप्रदानातिरिक्तकारकत्वस्य कथंचिदपि अयोगः। पृ. ७५१, * देवतायाः कारकत्वाभावेऽपि अङ्गत्वाभ्युपगमः। पृ. १३७, * देवतायाः त्यज्यमानद्रव्योद्देश्यत्वमात्रेण यागनिष्पादकत्वम्। पृ. ८००. * देवतायाः नास्ति प्रतिनिधिः। भा. ६।३।५।१८–१९. * देवतायाः। 'न वाऽतिथिवदेतस्याः पूज्यतेति च वक्ष्यते' रूपासमवायित्वात् नातिथिवत् पूज्यमानतां प्रतिपद्यते। नैतस्यास्तादृशं संप्रदानत्वमप्यस्ति प्रतिग्रहीतृत्वाभावात्। वा. २।२।४।१० पृ. ४९२. * देवतायाः नवमे विग्रहाभावस्य वक्ष्यमाणत्वेन क्रियया वृत्रहननायोगात् मन्त्रस्य स्तुतिमात्रार्थत्वावगतेः न वृत्रहन्तृत्वानुवादेन अग्निशब्दवाच्यत्वविधिर्युक्तः। सु. पृ. ३७२. * देवतायाः पशुयागीयायाः संस्कारः पशुपुरोडाशयागः। भा. १०।१।९।१९–३३. * देवतायाः प्रतिग्रहीतृत्वं न च संभवति। वा. २।२।९।२३ पृ. ५३६. * देवतायाः प्रतिग्रहीतृत्वाभावेन तत्स्वत्वापादनलक्षणदानायोगात् न तेन द्रव्यदेवतान्वयः संभवति। सु. पृ. ८३१, * देवतायाः प्रतिग्रहीतृत्वाभावेन रूपासमवायात् उद्देश्यत्वमात्रेण उपकारित्वात् उद्देशस्य च शब्दाधीनत्वात् केन

शब्देन उद्देष्टव्या देवता इत्यपेक्षायां श्रुतशब्दत्यागेन अश्रुतशब्दकल्पनाऽयोगात् विधिगतेनैव शब्देन देवतात्वचोदनाऽवगतेः न शब्दान्तरवत् न्यूनशब्दोच्चारणेऽपि देवतात्वप्रसिद्धिः । पृ. ६५१, * देवतायाः प्रतिग्रहीतृत्वाभावेन संप्रदानत्वाभावः । पृ. ७४९, * देवतायाः भोक्तृत्वाभावेऽपि स्तुतिभोक्तृत्वलक्षणस्य देवतात्वस्य यागकल्पकत्वम् । पृ. ९२९. * देवतायाः भोजनं हीदं यागो नाम (पूर्वपक्षे) । भा. ९।१।४।६. * देवतायाः विग्रहाद्यभावेन रूपासमवायात् पूज्यत्वं निरस्तम् ‘अपिवा शब्दपूर्वत्वात्’ (९।१।४।९) इति सूत्रे । सु. पृ. ७५०. * देवतायाः शब्दद्वारैव यागोपकारकत्वम् । संकर्ष. २।४।२, * देवतायाः शब्दरूपत्वात् । १।३।१६. * देवतायाः संस्कार्यत्वं विनाऽपि आरादुपकारित्वात् यागस्य प्रयोजनवत्त्वोपपत्तिः । सु. पृ. ८३४. * देवतायाः सकाशात् पुरोडाशपिण्डद्रव्यं अन्तरङ्गम् । संकर्ष. १।३।१६. * देवतायाः स्वेन रूपेण कर्मणि साधनभाव इत्युक्तम् । भा. १०।४।१४।२८. * देवतायाः स्वरूपेण कर्मणि समवायनिषेधः ‘विधिशब्दस्य मन्त्रत्वे’ (१०।४।२३ सू.) इति दाशमिके देवताधिकरणे उक्तः । सु. पृ. १३४२. * शब्देन प्रत्यासन्नस्य यागस्य फलसाधनत्वात् प्राधान्यम्, **देवतायाश्च** गुणत्वं विज्ञायते । टुप्. ९।१।४।९ पृ. १६५४. * **देवतानां** अनुयाजीयानां प्रकाशनार्थं चातुर्मास्येषु प्राकृतावाहनमन्त्रस्याविकारेणैव प्रयोगः । भा. १०।४।२५।५०–५९. * देवतानां विग्रहाद्यभावः । संकर्ष. २।४।१.

देवतानां विधिगतशब्देनैव प्रकाशनं सौर्यादिविकृतौ आवाहनादिनिगमेषु ॥

तथोत्तरस्यां ततौ तत्प्रकृतित्वात् । १०।४।१३। २५ ॥

भाष्यम्—– अस्ति चरुः ‘सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः’ इति । सन्ति सूर्यस्याभिधानानि ‘सूर्य आदित्यो भास्करः सविता दिवाकरः’ इति । तत्र किं वाचिषु निगमेषु येनकेनचिच्छब्देन अभिधानं कर्तव्यम्, उत विधिशब्देन सूर्यशब्देनेति । किं प्राप्तम् ? अग्निशब्दसंयुक्तास्ते प्रकृतौ निगमा इह चोदकेन प्राप्ताः, न सूर्यशब्देनेति । सूर्यशब्दो हि चरौ, नोज्जित्यादिषु । ते यथार्थं विपरिणमयितव्याः । सूर्यार्थश्च तेषु संकीर्तयितव्यः । स च येनकेनचित् सूर्यवाचिना शब्देन संकीर्त्यते । तस्मादनियमः । ये च प्रकृतौ अग्निशब्दसंयुक्ता निगमास्ते इहोदाहरणम्, नासंयुक्ताः । एवं प्राप्ते, ब्रूमः । तथोत्तरस्यां ततौ तत्प्रकृतित्वादिति । यथा प्रकृतौ, तथोत्तरस्यां ततौ विकृतौ कर्तव्याः । तत्प्रकृतित्वात्तेषाम्, चोदकानुग्रहाय । प्रकृतौ च विधिशब्दाभिप्रायोऽग्निशब्दः प्रयुक्तो नाग्न्यभिधानपरः । इहापि तत्प्रकृतित्वात् विधिशब्दाभिप्रायेणैव निगमाः प्रयोक्तव्याः । न चायं चरुणा सूर्यशब्दस्य संबन्धः । किं तर्हि ? प्रयोगेण । सौर्यं निर्वर्तयेदिति प्रयोगेण संबन्धो न सौर्यश्चरुरिति । कारकविभक्तिर्हि द्वितीया । सा आख्यातेन संबध्यते । तस्मात् तत्रापि सूर्यशब्देन संयुक्ताः कर्तव्या इति ।

टुप्—– ननु नैवेदमधिकरणमारभ्यम् । य एव शब्दश्चोदितः स एव अन्यत्राप्युच्चार्यः । उच्यते । यत्र शब्दो विद्यते, तत्रैव पर्यायशब्दानामप्रसङ्गः । यत्र शब्दो नाम्नायते तत्रार्थः प्रत्याययितव्यः । स च येनकेनचित् प्रत्याय्यते इति पूर्वः पक्षः । सिद्धान्तस्तु– सूर्यशब्दो यागानुमितप्रयोगभावनया संबध्यते । अन्यः शब्दो यदि उच्चार्येत, तथा सति शब्दः प्रयोगे अश्रुत एवोच्चार्येत । एवं प्रकृतावपि ।

सोम— पूर्ववैधर्म्येण उत्थानात् संगतिः ।

सूत्रार्थस्तु— यथा प्रकृतौ विधिशब्दनियमः, तथा उत्तरस्यां ततौ विकृतावपि, तत्प्रकृतित्वादिति । १४.

वि—–‘सौर्यादिनिगमे कोऽपि शब्दः स्याद् वैध एव वा ।, चरौ सूर्यान्वयादाद्यः, प्रयोगान्वयतोऽन्तिमः ॥’ १५.

भाट्ट—– विकृतौ ‘सौर्यं चरुम्’ इत्यादिना यागे सूर्यशब्दस्यैव पूर्वाधिकरणवत् विधानेऽपि आवाहनादिमन्त्रेषु अग्न्यादिपदैः तदर्थस्यैव प्रकाशनात् इहापि तस्यैव कर्तव्यत्वात्, तत्र च प्रकृतिप्राप्ताग्निपदे निवृत्ते तत्प्रकाशकसूर्यपदोहवत् तत्पर्यायादित्यादिपदोहेऽपि बाधकाभावः । न च अनेकपदप्राप्तौ उपस्थितत्वात् सूर्यपदस्यैव नियमः इति शङ्क्यम् । तथात्वे प्रैयङ्गवे पुरोडाशे धानासु वा

'व्रीहीणां मेध' इति मन्त्रे यवप्रियङ्ग्वादिपदस्यैव नियमेनोहापत्तेः । न च विधिवाक्ये सूर्यदेवताया भावनायामेव सप्तमनवमाद्यन्यायेन अन्वयात् यागमात्रे तस्याः विधानाभावेन प्रयोगान्वयित्वावगतेः साङ्गप्रधाने तत्प्राप्तौ आवाहनादौ प्राकृततत्पाठस्य इतराङ्गेषु तत्परिसंख्यार्थत्वेऽपि प्रकृतौ आवाहनादिमन्त्रेषु अग्निपदनियमवत् विकृतावपि तेषु सूर्यपदनियमोपपत्तिरिति मूलोक्तं शङ्क्यम् । द्रव्यवद्देवतायाः सत्यपि प्राथमिके भावनाऽन्वये अरुणान्यायेन उत्तरकालिकान्वयस्य यागमात्रे एवाङ्गीकारात् आवाहनादौ तदप्राप्तेः । इतरथा द्रव्यस्यापि साङ्गप्रधानसंबन्धापत्तेः देशकालकर्तृभिन्नानां द्रव्यदेवतादीनां उत्पत्त्यन्वयित्वस्य वक्ष्यमाणत्वाच्च । किञ्च, साङ्गयागभावनायां गुणत्वेन देवताऽन्वयेऽपि आवाहनादेर्देवतासंस्कारार्थत्वान्न आग्नेयम्, सौर्यमित्यादितद्धितेन आवाहनादौ तद्विनियोगः शक्यते कर्तुम् । अतः आवाहनादिमन्त्रस्य लिङ्गादेव देवतासंस्कारार्थत्वप्रतीतेः, विकृतौ च अग्निपदनिवृत्तौ जातायां सूर्यवाचियावत्पदप्राप्तौ न किञ्चित् बाधकम् । इति प्राप्ते, नावाहनादिमन्त्रेषु प्रकृतौ लिङ्गकल्प्या श्रुतिः 'तत्तत्प्रकृतापूर्वसंबन्धिनीं देवतां तत्तदग्न्यादिपदैः प्रकाशयेत्' इति एवंविधा, येन विकृतौ अग्निपदस्य लोपे सूर्यप्रकाशकयावत्पदप्राप्तिर्भवेत्, न त्वेतदस्ति, अनेकश्रुतिकल्पनाऽऽपत्तेः । किन्तु 'प्रकृतापूर्वसंबन्धिनीं देवतां विधिगतशब्देन प्रकाशयेत्' इत्येवंविधा एकैव । अतश्च तदर्थे विकृतावपि विधिगतशब्दप्रयोगः एवावश्यक इति न सूर्यपर्यायाणां प्रयोगः । अत एव द्रव्ये नैवंविधश्रुतिकल्पनासंभवः । तथात्वे 'व्रीहीणां मेध' इत्यादौ प्रकृतावेव यवपदप्रयोगापत्तेः । अपितु प्रकृतापूर्वसाधनीभूतं द्रव्यं व्रीहिपदेन प्रकाशयेत् इत्येवंविधा । ततश्च धानाऽऽदिषु व्रीहिपदे निवृत्ते यवप्रतिपादकसकलपर्यायपदप्राप्तिरविरुद्धा । अस्तु वा प्रकृतावेव नान्तरीयकसिद्धस्यापि अर्थस्य यागाङ्गतया तत्प्रकाशनस्यानुपयोगात् यागाङ्गभूतस्य शब्दस्यैव विनाऽपि लक्षणामावाहनादिमन्त्रगताग्न्यादिपदेन अर्थस्मरणद्वारा स्मरणम् । तथा चैवं लिङ्गकल्प्या श्रुतिः विधिगतशब्देन स्वनिष्ठशक्तिप्रयोज्यशाब्दबोधोपधायकशक्त्याश्रयत्वरूपसंबन्धप्रयोज्यस्मृतिद्वारा अपूर्वसाधनीभूतदेवतात्वाश्रयत्वावच्छिन्नं संस्कुर्यादिति । संभवति हि उक्तविधशाब्दबोधविषयस्य अर्थरूपस्यैकस्य संबन्धिनः शाब्दबोधात्मकेन दर्शनेन तादृशबोधोपधायकशक्त्याश्रयत्वसंबन्धेन अपरसंबन्धिनः शब्दस्य स्मरणम् । एवं च उद्देश्यताऽवच्छेदके लाघवमपि । ततश्च विकृतावपि पर्यायाणामप्रसक्तिरेव । न वा 'अग्नये पावकाय' इत्यादिविकृतौ शब्दद्वयस्य आवाहनादिमन्त्रेषु अप्रयोगप्रसङ्गः । अर्थस्यैव उद्देश्यतामङ्गीकृत्य प्रकाशकत्वपक्षे हि तस्य एकेनैव स्मरणसिद्धेः इतरवैयर्थ्यमित्यपि शङ्क्येत । १४.

मण्डन--'सौर्ये सूर्यपदं वदेत् ।' १६.

शंकर-- 'विकृतावपि तत् तथा ।' १६. तत् देवतापदं तथा विधिगतमेव ।

* देवतानां सवनीयपुरोडाशीयानामप्युत्कर्षः– आग्निमारुतादूर्ध्वं अनुयाजोत्कर्षेणोत्कृष्यमाणे सूक्तवाके । **भाट्ट.** ११।३।१५.

देवताऽग्निशब्दक्रियाणामपचारेऽपि प्रतिनिधिर्न ग्राह्यः ॥

न देवताऽग्निशब्दक्रियमन्यार्थसंयोगात् ।६।३। ५।१८॥

भाष्यम्— देवताः 'आग्नेयोऽष्टाकपालः' इत्येवमाद्याः । अग्निः 'यदाहवनीये जुह्वति, तेन सोऽस्याभीष्टः प्रीतो भवति' इति । शब्दः मन्त्रः 'बर्हिर्देवसदनं दामि' इत्येवमादिः । क्रियाः 'समिधो यजति, तनूनपातं यजति' इत्येवमाद्याः । तत्र संदेहः देवताऽग्निशब्दक्रियाणां अपचारे प्रतिनिधिः उपादेयः, उत नेति । किं प्राप्तम् ? पूर्वाधिकरणन्यायेन प्रतिनिधाय अन्यत् प्रयोगः कर्तव्यः इति । एवं प्राप्ते, ब्रूमः । न देवताऽग्निशब्दक्रियाणां अपचारे प्रतिनिधिना भवितव्यमिति । कुतः ? अन्यार्थसंयोगात् । प्रतिनिधीयमानं अन्यदेतेभ्यः तेषामर्थे (बिवलकरीयपाठोऽयम्, आनन्दाश्रमीये तु अन्यच्च तेषाम् इति पाठः) न शक्नुयात् कर्तुम् । कश्च तेषामर्थः ? देवता तावत् उद्देशेन अर्थं साधयति । अग्निमुद्दिश्य अष्टाकपालः पौर्णमास्याममावास्यायां च त्यज्यते । यच्च अन्येषु हविःषु विहितम्, न ततो दर्शपूर्णमासौ भवतः । तत्र अन्या उद्दिश्यमाना न

श्रुताया उद्देश्याया अर्थं कुर्यात् । नहि अन्यस्यामुद्दिश्यमानायां दर्शपूर्णमासौ भवतः । तस्मात् न देवता प्रतिनिधीयते ।

तथा ‘ यदाहवनीये जुहति ’ इत्याहवनीयापचारे नान्योऽग्निः प्रतिनिधातव्यः, अन्यत् वा द्रव्यमिति । कुतः ? अन्यार्थसंयोगात् । प्रतिनिधीयमानं आहवनीयकार्ये न वर्तते । कथम् ? अदृष्टं आहवनीयस्य-कार्यम् । आहवनीयस्य उपरि त्यज्यमाने यत् भवति, न तत् अन्यस्योपरि । नहि यजतिशब्देन सामर्थ्यात् तत् गृह्यते, यस्योपरि त्यज्यते । नहि उपरि त्यज्यमानस्य देशः किञ्चिदुपकरोति इति । तस्मात् नाग्नेः प्रतिनिधिः ।

तथा मन्त्रापचारे नान्यो मन्त्रः प्रतिनिधीयते । कुतः ? अन्यार्थसंयोगात् । मन्त्रस्य हि एतत् प्रयोजनम्, यत् स्मारयति क्रियां साधनं वा । असति स्मरणे न क्रिया संवर्तेत । तत् अपचरिते मन्त्रे यदि तस्यार्थे अन्यं शब्दमुच्चारयति (पूरयितुम्), पूर्वप्रतीतेऽर्थे (पूर्वं इत्यानन्दाश्रमीये) शब्दमुच्चारयेत्, न शब्देनार्थं प्रतीयात् । अथ प्रतीतमपि पुनः प्रतिनिधिशब्दोच्चारणेन प्रतीयात् शब्दात् प्रतीतिं कुर्यात् । (अत्र शब्दात् इत्यादि, प्रतीयात् इत्यस्यैव व्याख्या स्यात् । सा च बहिर्लिखिता सती कायस्थेन ग्रन्थे एव लिखितेति प्रतीमः) एवं च प्रतिनिधिशब्दोच्चारणानुरोधः अनर्थकः स्यात् । नहि ‘ शब्देन प्रत्याययितव्यम् ’ इति किञ्चित् प्रमाणमस्ति । यदस्ति, तत् विशेषेणैव ‘ अनेन शब्देन बर्हिरादिना ’ इत्येवम् । तदभावे शब्दान्तरानुरोधः अनर्थकः स्यात् । तस्मात् न शब्दस्य प्रतिनिधिः ।

क्रियाऽपचारे न क्रियाऽन्तरं प्रतिनिदध्यात् । अन्यार्थसंयोगात् । समिद्यजिमन्तौ दर्शपूर्णमासौ कर्तव्यौ । तौ अन्यस्यां क्रियायां (बिवलकरीये पाठः) क्रियमाणायां न तद्वन्तौ भवतः । तस्मात् क्रियायां न प्रतिनिधिरिति ।

टुप्— (सिद्धान्तमाह–) अर्थो वाचनिकया श्रुत्या उच्यमानो देवतात्वं प्रतिपद्यते नान्यथा । तद्वाचकाभावे च कथमर्थो देवता स्यात् (द्वाराभावात्) । नीवारैस्तण्डुलनिर्वृत्तिः प्रत्यक्षा, न तु देवतात्वम् (प्रत्यक्षम्) । किञ्च सदृशं प्रतिनिधातव्यम् । देवताऽभावश्च शब्दनाशे । अतो देवताशब्दं स्मृत्वा उत्तरकालं (तत्सदृशशब्दस्य–) स्यादुपादानम् । तत्तु मुख्येनैव सिद्धम् (तस्मात् न प्रतिनिधिः) । मन्त्रेऽपि एष एव प्रकारः (टुप्-पुस्तकेषु तु प्रसङ्गः इति पाठः । प्रकारः इति रत्नपाठस्तु युक्तः) । इयांस्तु विशेषः, (देवतातो मन्त्रस्य–) अर्थेन स्मृतेन–न मुख्येन (मन्त्रेण) न (अपि तत्–) सदृशेन (शब्दान्तरेण) – प्रयोजनमस्ति । न च शब्देन स्मरणं कर्तव्यमिति (वचनमस्ति) । किं तर्हि (मन्त्रविशेष–) आम्नानसामर्थ्यात् उपद्रष्ट्रादिनिवृत्तिः मन्त्रनियमात् । तदभावात् (तस्य नियतस्य मन्त्रस्याभावात्) उपद्रष्ट्रादि केन वार्यते (तेन अस्ति शब्दान्तरं प्रतिनिधिः । अग्नीनां नास्ति प्रतिनिधिः इत्याह–) आहवनीयो यागहोमाभ्यामनाक्षिप्तः अदृष्टोपकारित्वात् (दृष्टोपकारित्वाभावात् । आहवनीये जुहोति इति–) वचनात् (अदृष्टार्थतया) विधीयते, (अतः) तयोः (यागहोमयोः आहवनीयस्य–) अभावे नास्ति आक्षेपः । आक्षेपाभावाच्च न प्रतिनिधिः । (क्रियायामपि दर्शयति–) यत् प्रयाजादिभिः (अदृष्टम्) क्रियते, तत् अन्या क्रिया करिष्यति इति नास्ति प्रमाणम् । हन्त्यादीनां तु दृष्टार्थत्वात् अस्ति (प्रतिनिधिः । सूत्रोक्तं हेतुमनुसंधत्ते–) अन्यार्थसंयोगात् इति किमुक्तं भवति ? प्रतिनिधिकारणासंयोगात् इति यावत् । (नायमर्थशब्दः प्रयोजनवाची किन्तु वस्तुपर्यायः) ।

देवतायां च तदर्थत्वात् । १९ ॥

भाष्यम्— देवतायामपरो विशेषो येन न प्रतिनिधीयते । देवता नाम यदर्थे किंचिच्चोद्यते सा । अन्या तस्याः स्थाने प्रतिनिधीयमाना न देवता स्यात् । चोदिता हि देवता भवति, नाचोदिता । संबन्धिशब्दश्चैषः । या यदर्थे चोद्यते, सा तस्यैव देवता, नान्यस्य । देवतेति संबन्धिशब्दो न जातिशब्दः । तस्मादपि न देवतायाः प्रतिनिधिरिति ।

सोम—**सूत्रार्थस्तु**– देवतादिकं न प्रतिनिधेयम्, अन्यार्थसंयोगात् प्रतिनिधिन्यायात् न्यायान्तरसंयोगात् इति ।

वि—'देवाऽग्निमन्त्रोक्षणादावस्ति प्रतिनिधिर्न वा ।, पुरेवास्तीह, यन्मुख्ये कार्ये तन्नेति नास्त्यसौ ॥'

भाट्ट—एवं सर्वत्र प्रतिनिधौ प्रसक्ते देवतायां स न भवति । यदि हि अर्थमात्रस्यैव देवतात्वं त्यागकालीनोच्चारणकर्मभूतशब्दप्रतिपाद्यत्वरूपं भवेत्, तदा तस्य शब्दविशेषापेक्षायां प्रतिपादकत्वेन विधिगतस्य उपस्थितस्य शब्दस्य नियमेऽपि रोगादिना तत्पदोच्चारणासंभवे तादृशार्थस्य यागाङ्गत्वानपायात् तद्बोधकश्रौतलाक्षणिकशब्दान्तरप्रसक्त्या भवेदपि प्रतिनिधिः । यदा तु दाशमिकाधिकरणवक्ष्यमाणरीत्या विधिगतशब्दविशिष्टस्यार्थस्य तादृशशब्दमात्रस्य वा देवतात्वम्, तदा कः प्रसङ्गः शब्दान्तरस्य । नहि हविस्त्यागकालीनोच्चारणकर्मत्वविशिष्टविधिगतशब्दत्वसमनियतं अखण्डोपाधिरूपं वृद्धव्यवहारसिद्धं देवतात्वं शब्दान्तरे समस्ति । यदि तु अर्थस्यापि देवतात्वं कथञ्चिदङ्गीक्रियेत, ततस्तत्रापि तादृशविधिगतशब्दप्रतिपाद्यत्वसमनियतमेव तदङ्गीकृत्य प्रतिनिध्यभावः समर्थनीयः । अत एव यागस्य देवतात्वाक्षेपकत्वेऽपि विधेयत्वघटिततद्विषये आक्षेपकत्वासंभवात् देवताविधिरपूर्वविधिरेव । तदसंभवे च यागपदार्थस्य लोप एव । यदा तु देवताऽपचारे प्रजापतिरिति वचनं तदभावे विधिविधया प्रामाणिकम्, तदा तथैवानुष्ठानम् । एवमग्नेरपि होमाधिकरणस्य न प्रतिनिधिः । तत्राहवनीयादेस्तावत् आधानविधिसिद्धत्वादेव क्रतुप्रयोगविध्यविषयत्वात् तेषामधिकारिविशेषणत्वप्रतीतेः यथाशक्तिन्यायाविषयत्वादेव न प्रतिनिध्याशङ्का । यत्र तु लौकिकाग्नेरेव वाचनिकमधिकरणत्वं यत्र वा पदादेः, तत्रापि सत्यपि तस्य प्रयोगविधिविषयत्वे अदृष्टार्थत्वात् न तत्प्रतिनिधिः । नहि पूर्वदेशविभागानुकूलव्यापाररूपप्रक्षेपमात्ररूपस्य होमस्य आधारापेक्षाऽस्ति । अत एव तद्विधिरपि अपूर्वविधिरेव । पदादिना आहवनीयादिबाधस्तु पतनप्रतिबन्धकत्वरूपाधिकरणताया एवं अदृष्टोत्पादकत्वात् एकेन तत्सिद्धेः समुच्चयायोगादनुसंधेयः । अतश्च तत्रापि तत्प्रतिनिधेरदृष्टोत्पादकत्वे प्रमाणाभावान्न सः । क्वचित्तु वाचनिको ब्राह्मणपाण्यादिरभावे विधिरेव ।

एवमर्थप्रकाशनार्थेष्वपि मन्त्रेषु न प्रतिनिधिः शब्दान्तरस्य मन्त्रान्तरस्य वा । स हि उपायान्तरेण ध्यानादिना अर्थे अनवगते तत्प्रतिपादकत्वज्ञानाभावादेव अनाशङ्क्यः । अवगते तु तस्मिन्न स्मारकानपेक्षत्वादेव न तदुपादानम् । न चैवं यत्र स्वत एवार्थः स्मृतः, तत्र विहितमन्त्रपाठानापत्तिः, तत्र नियमादृष्टसिद्ध्यर्थं मत्रजन्यस्मृतेरेव अभ्युदयकारित्वकल्पनेन मन्त्रपाठावश्यकत्वात् । प्रतिनिधेस्तु कर्मचोदनाऽऽक्षिप्तस्य नियमादृष्टजनकत्वे प्रमाणाभावात् न पाठ इति वैषम्यम् ।

एवमन्यस्मात् तददृष्टोत्पत्तौ प्रमाणाभावेन अदृष्टार्थप्रयाजादिक्रियाया अपि न प्रतिनिधिः । दृष्टार्थावघातादिक्रियायास्तु स समस्त्येव ।

यत्तु अत्र कैश्चिददृष्टार्थस्य षोडशिग्रहणाभावादेरपि न प्रतिनिधिः । तेन षोडश्यभावयुक्तक्रतुप्रयोगसंकल्पे कृते यदि दैवादनङ्गमपि तत्र षोडशी कृतः, तदा षोडश्यभावस्याभावे तददृष्टार्थं नाभावान्तरं प्रतिनिधेयमित्युक्तम् । तन्न 'नातिरात्रे षोडशिनं गृह्णाति' इत्यनेन षोडशिग्रहणाभावेऽपि इतराङ्गमात्रादेव क्रतूपकारसिद्धिरित्यवगमात् षोडशिग्रहणाभावस्य अदृष्टोत्पादकत्वे प्रमाणाभावात् । अत एव तत्र षोडशिग्रहणे वृथाचेष्टाकृतप्रायश्चित्तमात्रम् ।

मण्डन—'न मन्त्रादौ प्रतिनिधिः ।'

शंकर—'न देवताऽऽदेः स मतः ।' स प्रतिनिधिः ।

देवताऽधिकरणम् । देवतानयः । धर्मा न देवताप्रयुक्ताः । विग्रहादिमत्यो देवता न सन्ति ॥

देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् । ९।१।४।६॥

भाष्यम्—नैतदस्ति, अग्न्यादयः अप्रयोजका इति । सर्वा देवताः सर्वेषां धर्माणां प्रयोजिका भवितुमर्हन्ति । कुतः ? भोजनस्य तदर्थत्वात् । भोजनं हीदं देवतायाः, यागो नाम । भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते इति । देवतासंप्रदानको ह्ययं यागः श्रूयते । संप्रदानं च नाम कर्मणोऽपि ईप्सिततमादभिप्रेततरम् । तस्मान्न गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्मणी । अपिच यागो नाम देवतापूजा । पूजा च पूजनीयं प्रति गुणभूता

लोके दृश्यते । तदेतत् अतिथिवत् द्रष्टव्यम् । यथा यावत्किंचित् अतिथेः परिचरणम्, सर्वं तदतिथिप्रयुक्तम् । एवमिदमपीति ।

आह । नन्वेवं ब्रुवता विग्रहवती देवता, भुङ्क्ते चेत्यभ्युपगतं भवति। उच्यते । बाढम् । विग्रहवती देवता, भुङ्क्ते च । कुतः ? स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च । एवं हि स्मरन्ति, विग्रहवती देवतेति । स्मृतिश्च नः प्रमाणम् । तथा, विग्रहवतीं देवतामुपचरन्ति । यमं दण्डहस्तमालिखन्ति, कथयन्ति च । तथा, वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तम् । उपचारादपि स्मृतेर्द्रढिमानं कल्पयामः । तथा अन्यार्थवचनम्, विग्रहवतीं देवतां दर्शयति । 'जगृभ्मा ते दक्षिणमिन्द्र हस्तम्' इति (ऋसं. १०।४७।१) पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति । तथा 'इमे चिदिन्द्र रोदसी अपारे यत् संगृभ्णा मघवन् काशिरित् ते' इति (ऋसं. ३।३०।५) । काशिः मुष्टिः । सोऽपि पुरुषविग्रहस्यैवोपपद्यते । तथा 'तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते ॥' इति (ऋसं. ८।१७।८) । ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति । तस्मात् विग्रहवती देवतेति भुङ्क्ते च । कथमवगम्यते ? स्मृतेः उपचारात् अन्यार्थदर्शनाच्च । एवं स्मरन्ति 'भुङ्क्ते देवता' इति । तथा चैनां भुञ्जानामिव उपचरन्ति, यदस्यै विविधानुपचारान् उपहरन्ति । तथाच अन्यार्थदर्शनं भुञ्जानां देवतां गमयति । 'अद्धीन्द्र पिब च प्रस्थितस्य' इति तथाच 'विश्वा सनानि जठरेषु धत्ते' इति (ऋसं. १।९५।१०) । 'एकया प्रतिधा पिबत् साकं सरांसि त्रिंशतम्' इति (ऋसं. ८।७७।४) । आह, न देवता भुङ्क्ते । यदि च भुञ्जीत देवतायै हविः प्रत्तं क्षीयेत । उच्यते, अन्नरसभोजिनी देवता मधुकरीवत् अवगम्यते । कथम् ? देवतायै हविः प्रत्तं नीरसं भवति । तस्मात् अन्नरसं भुङ्क्ते देवतेति गम्यते ।

टुप्— तत्र यागो देवताऽऽराधनार्थं इतिमन्यमानः पूर्वपक्षं करोति । न भाव्यमानार्थो यागः, किन्तु देवताऽऽराधनार्थः । कुतः ? तद्धितशब्दात् (आग्नेयः इति अग्निर्देवता अस्येति) । अग्निर्देवता अस्यशब्दस्य विशेषणम्, अस्यशब्दश्च द्रव्याभिधायी इतरत् तद्विशेषणम् । तत् (द्रव्यम्) यदि अग्न्युद्देशेन प्रदीयते, एवं अग्निशब्दो विशेषणं (भवति) नान्यथा । यदा च द्रव्यं (अग्न्युद्देशेन) प्रदीयते, तदा अग्निः संप्रदानं भवति । संप्रदानं च कर्मणोऽपि (ईप्सिततमात्) प्रधानतरम् । (कथम् ?) यजतिक्रियया द्रव्यं व्याप्यते, द्रव्येण च संप्रदानम् । तस्मात् अग्न्यर्थो यागः । यथा उपाध्यायाय गां ददाति इति । (उपाध्यायार्थं दानमिति) । अपिच देवपूजायां यजिर्वर्तते इति स्मरन्ति (शाब्दाः 'यज देवपूजासंगतिकरणदानेषु' इति) । तस्मात् 'यजेत स्वर्गकामः' इति देवतां यागेन आराधयेत् ततः (देवतायाः सकाशात्) स्वर्गो भविष्यति इति ।

आर्थपत्याच्च । ७ ॥

भाष्यम्— यदि कस्यचिदर्थस्य ईशाना देवता, उपचर्यमाणा च प्रसीदेत्, ततः तदाराधनार्थं इयं देवतापूजा अभिनिर्वर्त्येत । न चैतत् उभयमपि अस्ति इति । तदुच्यते अर्थपतिर्देवतेति । कथमवगम्यते ? स्मृतेः उपचारात् अन्यार्थदर्शनाच्च । एवं हि स्मरन्ति 'अर्थानामीष्टे देवता' इति । तथा देवग्रामो देवक्षेत्रं इत्युपचारः तामेव स्मृतिं द्रढयति । तथा अन्यार्थदर्शनं ईशानां देवतां दर्शयति 'इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम् । इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥' इति (ऋसं. १०।८९।१०) । तथा 'ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः' इति । तथा स्मृत्युपचाराभ्यां प्रसीदति इत्यवगच्छामः । एवं हि स्मरन्ति 'प्रसीदति देवता' इति । तथा उपचरन्ति 'प्रसन्नोऽस्य पशुपतिः पुत्रोऽस्य जातः' 'प्रसन्नोऽस्य वैश्रवणः धनमनेन लब्धम्' इति । तथा अन्यार्थदर्शनं भवति 'आहुतिभिरेव हुतादो देवान् प्रीणाति' इति, 'तस्मै प्रीता इषमूर्जं नियच्छन्ति' इति ।

ततश्च तेन संबन्धः । ८ ॥

भाष्यम्— ततो देवतायाः तेन फलेन संबन्धः परिचरितुर्भवति । यो देवतां इज्यया परिचरति, तं सा फलेन संबध्नाति । कथमेतदवगम्यते ? स्मृत्युपचाराभ्याम् ।

स्मरन्ति हि ‘ देवता यष्टुः फलं ददाति ’ इति । तामेव उपचारेण स्मृतिं द्रढयति ‘ पशुपतिरनेन उपचरितः, पुत्रोऽनेन लब्धः ’ इति । तथा अन्यार्थदर्शनं इममेवार्थं दर्शयति ‘ स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः । देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ ’ इति (तैसं. २।३।१४)। तथा ‘ तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति ’ इति । तस्मात् हविर्दानेन गुणवचनैश्च देवता आराध्यते । सा प्रीता सती फलं प्रयच्छति । येन कर्मणा अग्निराराधितो यस्य फलस्य ईष्टे, तत् कर्त्रे प्रयच्छति । न तत् सूर्यः प्रदातुमर्हति । वचनात् एतदवगम्यते ‘ कः किं प्रयच्छति ’ इति । यथा अग्नौ वचनम्, न तत् सूर्ये ।

अपिवा शब्दपूर्वत्वाद् यज्ञकर्म प्रधानं स्याद्, गुणत्वे देवताश्रुतिः । ९ ॥

भाष्यम्— अपिवेति पक्षो व्यावर्त्यते । न च एतदस्ति यदुक्तम् ‘ देवता प्रयोजिका ’ इति । यज्ञकर्म प्रधानं स्यात् । यजतेर्जातमपूर्वम् । कुतः ? शब्दपूर्वत्वात् । यद्धि फलं ददाति, तत् प्रयोजकम् । ‘ इदं फलं ददाति ’ इत्येतत् ज्ञानं शब्दपूर्वकम्, न प्रत्यक्षादिभिरवगम्यते । शब्दश्च यजतिवाच्यात् फलमाह, न देवतायाः । कथमवगम्यते ? दर्शपूर्णमासयोः करणत्वेन निर्देशः ‘ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ’ इति । तथा ‘ ज्योतिष्टोमेन स्वर्गकामो यजेत ’ इति । यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः । ननु द्रव्यदेवताक्रियं यजत्यर्थः । सत्यमेवम्, किन्तु गुणत्वे देवताश्रुतिः । द्रव्यदेवतं हि भूतम्, भावयितव्यो यजत्यर्थः । भूतभव्यसमुच्चारणे च भूतं भव्यायोपदिश्यते । तस्मात् न देवता प्रयोजिका ।

अथ यदुक्तम्, कर्मणः ईप्सितादभिप्रेततरमिति । नास्याभिप्रेततां अपह्नुमहे । तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवताऽर्थस्य वाक्यात् अभिप्रेतता अवगम्यते । फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य । तस्य च श्रुत्या करणता अवगम्यते, न देवतायाः । तत्र यद्यपि देवताऽर्थता यागस्य गम्यते, फलार्थताऽपि तेन न प्रतिषिध्यते । फलं च पुरुषार्थः । पुरुषार्था च नः प्रवृत्तिः । न चासौ देवतायाः । तस्मान्न देवताप्रयुक्ताः प्रवर्तिष्यामहे । या तु संप्रदानस्य अभिप्रेतता, सा फलवतो यजेः साधनत्वे सति उपपद्यते ।

यच्च ‘ यजिर्देवतापूजा, सा पूज्यमानप्रधाना लोके लक्ष्यते ’ इति । न लोकवत् इह भवितव्यम् । इह पूज्यमानं पूजाप्रधानम् । यद्धि फलवत्, तत् प्रयोजकम् । तस्मात् यज्ञकर्म प्रयोजकम् । अपि च एतस्मिन् पक्षे विग्रहवती देवता, भुङ्क्ते च इत्यध्यवसनीयं भवति । नहि अविग्रहायै अभुञ्जानायै च दानं भोजनं वा संभवतीति ।

यच्चोक्तं स्मृत्युपचारान्यार्थदर्शनैः विग्रहवती भुङ्क्ते चेति, तन्न । स्मृतेर्मन्त्रार्थवादमूलकत्वात् । मन्त्रेभ्यश्च अर्थवादेभ्यश्च स्मृतिमूलं विज्ञानमुत्पद्यते इति प्रत्यक्षमवगम्यते । ते च मन्त्रार्थवादाः नैवंपराः इत्येतत् वक्ष्यामः । आह यदि नैवंपराः, न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानमिति । उच्यते । ये आलोचनमात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषां तत् स्मृतिमूलम् । ये पुनर्निपुणतः पश्यन्ति, तेषां तत् बाधितमपि च कस्यचित् स्मृतिमूलं भवति । तस्मात् तत एव स्मृतिः । उपचारोऽपि स्मृतिमूल एव ।

यत्तु अन्यार्थदर्शनमुक्तम् ‘ जगृभ्मा ते दक्षिणमिन्द्र हस्तम् ’ इति नैतत् एवंपरम् ‘ इन्द्रस्य हस्तो विद्यते ’ इति । यस्तस्य दक्षिणो हस्तः, तं वयं गृहीतवन्तः इति । तस्मात् वाक्यात् इन्द्रस्य हस्तसत्ता न प्रतीयते । आह, यदि त्वसौ नास्ति, ‘ वयं ते हस्तं गृहीतवन्तः ’ इत्येवं नावकल्पते इति हस्तसत्ता अध्यवसीयते ‘ अस्त्यसौ हस्तः, वयं यं गृहीतवन्तः ’ इति । तन्नोपपद्यते । यद्यपि अस्य हस्तो भवेत्, तथापि न ‘ तं उपगृहीतवन्तः ’ इति प्रत्यक्षमेतत् । तथापि एतन्नावकल्पते एव । तत्र एतत् असंबद्धं वा कल्पयितव्यं स्तुतिर्वा । तच्च मत्पक्षेऽपि तुल्यम् । अथैवमुच्यते, तस्य एतत् वचनम्, यो गृहीतवान् तस्य हस्तमिति । उच्यते । नैतदध्यवसेयम्, आदिमत्ता दोषो वेदस्य प्रसज्येत । न च गृहीतवानासीत् इत्युच्यते, प्रमाणाभावात् । एतस्मादेव वचनात् अर्थात् कल्प्यते हस्तग्रहीता इति चेत्, तन्न । अयथार्थस्यापि उच्चारणं संभवत्येव यतः । यथा ‘दश दाडिमानि, षडपूपाः’ इति ।

यस्यापि चैष पक्षो 'विग्रहवानिन्द्रः' इति, तस्यापि इन्द्रशब्देन आमन्त्रणं संबोधनार्थम्, संबोधनमनुवचनाय। तत्र संबुद्ध इत्यवगते अनुवचनं न्याय्यम्। न चासौ केनचित् प्रकारेण संबुद्ध इत्यवगम्यते। अनवगते संबोधनं व्यर्थम्। वचनप्रामाण्यात् संबुध्यते इत्येवं गम्यते इति चेत्, उक्तम् 'अदृष्टकल्पनायां हस्तादिकल्पनाऽनुपपत्तिः' इति। न चासौ संबुद्धः इत्यवधार्यते, प्रमाणाभावात्। तस्मात् संबोधनवचनं न संबोधनाय, निर्देशार्थमेव। अविग्रहपक्षेऽपि तत् निर्देशार्थमेव भविष्यति। तत्र आमन्त्रितविभक्तिवचनं स्तुतये। एवमिदं देवताऽऽख्यं साधनं साधयितृतमम्, यत् चेतनादिवत् संबुध्य (टिप्पणीपाठः) साधयतीति चेतनवदिव उपचर्यमाणः संबुद्धिशब्देन आमन्त्र्यते। तथा संबोधनशब्देन निर्दिश्य उच्यते 'गृहीतवन्तो वयं तव हस्तम्' त्वदाश्रया वयमित्यर्थः। 'अस्माभिः इन्द्रकर्म कर्तव्यम्' इत्येतदनेन स्मार्यते। तथा इमे द्यावापृथिव्यौ दूरे अपारे यत् संगृह्णासि मघवन् अहो ते पूजितो मुष्टिः इति सन्तमिव मुष्टिं स्तुत्यर्थेन वदति। तस्यापि भावे न प्रमाणमस्ति। नेदं वचनम्, इत् महान् काशिरस्तीति। किं तर्हि? यस्तव काशिः, स महानिति। अन्यार्थः 'तव काशिरस्ति' इति, अन्यः 'तव काशिर्महान्' इति। सता हि स्तुतिरुपपद्यते इति चेत्, नैतत्। नियोगतो यस्यापि पौरुषविधिकैः अङ्गैः नास्ति संयोगः, पौरुषविधिकैरङ्गैः तस्यापि स्तुतिर्भवति यथा 'एते वदन्ति (ग्रावाणः) शतवत् सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः। विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित् पूर्वे हविरद्यमाशत॥' इति (१०।९४।२) तथा 'सुखं रथं युयुजे सिन्धुरश्विनम्' इति (ऋसं. १०।७५।९)। तस्मात् न स्तुतिवचनादर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः।

तथा 'तुविग्रीव इन्द्रः' इति नैतत् युक्तं भवति ग्रीवावान् इन्द्र इति। किं तर्हि? या अस्य ग्रीवा, सा महती। ग्रीवासत्त्वे नास्ति प्रमाणम्। न च ग्रीवास्तुतिरर्थापत्तिः, अपुरुषविधत्वेऽपि स्तुत्युपपत्तेः। अपिच 'इन्द्रो वृत्राणि जिघ्नते' इत्येताभ्यां पदाभ्यां इन्द्रशब्दः संबद्धो न शक्नोति तुविग्रीवादिभिः संबन्धं यातुम्। द्विरुच्चारणमस्य प्रसज्यते 'तुविग्रीवावान् इन्द्रो वेदितव्यः; वृत्राणि च इन्द्रो हन्ति' इति। तथाहि सति भिद्येत, अभिन्नं च वाक्यमुपलभ्यते। तदेवमवकल्पते; यदि तुविग्रीवादयः अस्य नोपदिश्यन्ते इति। स्तुत्यर्थं संकीर्त्यते तुविग्रीवादिः। अन्धसो मदे, ईदृशो वृत्राणि हन्ति इति एषा तु वचनव्यक्तिः। वृत्रवधोपदेशपरमिदं वचनमिति।

यदपि वचनम्, 'बाहू ते इन्द्र रोमशौ'. 'अक्षी ते इन्द्र पिङ्गले' इति। तदपि बाह्वोः रोमशत्वं अक्ष्णोश्च पैङ्गल्यमाह, न बाहुसत्तामक्षिसत्तां च। यदपि अक्षिसत्तां वदतीति गम्यते 'चक्षुष्मते शृण्वते ते ब्रवीमि' इति, तदपि न चक्षुःसंबन्धार्थम्, 'चक्षुष्मते ब्रवीमि' इति वचनसंबन्धार्थम्। तत् सतीमिव चक्षुष्मत्तां स्तुत्यर्थमुच्चारयति। कुत एतदवगम्यते? चतुर्थीनिर्देशात्। यदि प्रातिपदिकार्थः अध्यवसीयते, तथा वाक्यं भिद्येत। चक्षुष्मान् इत्येवं चोद्दिश्येत, 'चक्षुष्मते ते ब्रवीमि' इति च। तस्मात् न किञ्चित् अन्यार्थदर्शनं पुरुषविधतां देवतायामिदं ख्यापयति इति।

न चेदं भोजनम्। नहि देवता भुङ्क्ते। तस्मात् 'भोजनस्य तदर्थत्वात्' इति तत् असत् वचनम्। यदपि स्मृत्युपचारान्यार्थदर्शनैः भुङ्क्ते इति, तत् अविग्रहत्वेन प्रत्युक्तम्। अपिच भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत। न च मधुकरीवत् अन्नरसभोजिन्यो देवता इति प्रमाणमस्ति। मधुकरीषु प्रत्यक्षम्। न च तद्वत् देवतायाम्। तस्मात् न भुङ्क्ते देवतेति। यदुक्तं देवतायै हविः प्रत्तं नीरसं भवतीति, नैष दोषः। वातोपहतं नीरसं भवतीति शीतीभूतं च।

न चासौ कस्यचिदर्थस्य ईष्टे। अनीशा कथं दास्यतीति। यदुक्तम् 'स्मृत्युपचारान्यार्थदर्शनैः ईशाना देवतेति अवगम्यते इति, तन्न, स्मृतेः मन्त्रार्थवादमूलत्वात् इत्युक्तम्। उपचारोऽपि देवग्रामो देवक्षेत्रमिति, उपचारमात्रम्। यो यदभिप्रेतं विनियोक्तुमर्हति तत् तस्य स्वम्। न च ग्रामं क्षेत्रं वा यथाऽभिप्रायं विनियुङ्क्ते देवता। तस्मात् न संप्रयच्छति इति। देवपरिचारकाणां तु ततो भृतिर्भवति, देवतामुद्दिश्य यत् त्यक्तम्। यदुक्तम्, अन्यार्थदर्शनं ईशानां देवतां ख्यापयति 'इन्द्रो दिव इन्द्र

ईशे ' इत्येवमादीनि, तत् प्रत्यक्षां अनीशानां देवतामुपलभ्य अध्यवस्यामः, भाक्त एष शब्दः इति । तत्राह वचनप्रामाण्यादेव अस्य ईशानता अवगम्यते, यदेव लोका अर्थान् विनियुञ्जते, तत् देवताऽभिप्रायादेव इति अध्यवस्याम इति । तन्न । प्रत्यक्षात् प्रमाणात् देवतापरिचारकाणामभिप्रायः इत्यवगम्यते । स न शक्यो बाधितुम् । येऽपि देवतामीशानां वर्णयन्ति, तेऽपि नापह्नुवते परिचारकाणामभिप्रायम् । किं चाहुः ? तथा देवता करोति, यथा परिचारकाणामभिप्रायो भवतीति । न च स ईशानो भवति, यः पराभिप्रायमनुरुध्यते यस्य न स्वाभिप्रायात् विनियोगो भवति । अपिच न चैतद्वचनम्, वर्तमानकालोपदेशत्वात् । प्रत्यक्षविरोधात् स्तुतिवादः अवधार्यते । स्तुतिवादे च संभवति न वचनप्रामाण्यात् ईशिष्यते इति गम्यते ।

न च देवता फलेन संबध्नाति, या तदर्थं परिचर्येत । यदुक्तं स्मृत्युपचारान्यार्थदर्शनैः ददाति प्रसीदति चेति, तत्र स्मृत्युपचारयोरुक्तम् । यत् अन्यार्थदर्शनम् ‘ तस्मै प्रीता इषमूर्जं प्रयच्छति ’ इति, तन्न । अन्यस्य विधेः आम्नानात् ‘ दक्षिणतः संपरिहर्तव्या इत्याह ’ इति । ‘ तथा तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति ’ इति । अत्र ऐन्द्रस्य हविषो विधानम् । तस्मात् देवता न प्रयोजिका इति ।

टुप्—(अपिवा शब्दपूर्वत्वात् यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिः ॥) ‘ यजेत स्वर्गकामः ’ इति (अत्र) यजेत इति उत्तरार्धात् (भावनावचनात्) तिस्रः आकाङ्क्षा जायन्ते । तत्र प्रथमं तावत् भाव्यमाकाङ्क्षते ‘ भावयेत् किम् ’ इति । तत् फलपदेन निराकाङ्क्षीक्रियते । तत् (फलम्) भाव्यमानं केन (भाव्यते) इति द्वितीयामाकाङ्क्षां पूर्वार्धो निराकाङ्क्षीकरोति । ‘ कथम् ’ इति तृतीयामाकाङ्क्षां अग्न्यन्वाधानादीनि निराकाङ्क्षीकुर्वन्ति, संनिधानात् । तदेवं अस्मात् वाक्यात् यागात् फलं श्रूयते, न देवतायाः । ननु देवतासंप्रदानम् (प्रधानम्) इत्युक्तम् । उच्यते । यागः फलाय (फले इति आनन्दाश्रमीये रत्ने च) निर्वृत्तिमपेक्षते । सा च द्रव्यदेवतामन्तरेण न संभवति । अपेक्षमाणं च द्रव्यदेवतं कारकांशेनैव अपेक्ष्यते, न भाव्यांशेन । तत्र द्रव्यं तृतीयया कारकं भवति, देवता (च) तद्धितेन चतुर्थ्या वा । तच्च देवताकारकं यागं प्रति प्राधान्यं यदि न प्रतिपद्येत, तथा सति यागो नैव निर्वर्तेत । यागनिर्वृत्त्यभावाच्च कारकमेव न स्यात् । यदि च यागः तस्य गुणतां न प्रतिपद्येत आत्मानमेव न लभेत । तस्मात् यागेन नान्तरीयको गुणभावः प्रतिपत्तव्यः । देवताकारकेणापि नान्तरीयकः प्रधानभावः । न च नान्तरीयको व्यापारो गुणभावे प्रधानभावे वा कारणम्, अचोदितत्वात् । यागेन हि फले चोदितः सन् अहं नान्यथा फलं साधयामीत्येवं नान्तरीयकव्यापारेण देवतां प्रति गुणभूतेन भवितव्यम् ।

तस्मात् सर्वत्रांशद्वयमस्ति । तत्र किं विवक्षितं किमविवक्षितमिति विज्ञेयम् । तत्र लोके अर्थकृता विवक्षा भवति । वेदे तु शब्दकृता । शब्देन च प्रत्यासन्नस्य यागस्य फलसाधनत्वात् प्राधान्यम्, देवतायाश्च गुणत्वं विज्ञायते । न चोपकारलक्षणं शेषत्वम् । किं तर्हि ? चोदनालक्षणं तत् इति स्थितम् ।

किं भवति प्रयोजनं चिन्तायाः ? यदि देवताऽऽराधनार्थो यागः, ततः पूज्यमाना देवता, यागश्च पूजा । पूजा च लौकिकः पदार्थः । तत्र येन प्रकारेण अग्निः पूज्यते, तेनैव सूर्यः पूज्यते इति क आश्वासः । विपरीतमपि कदाचित् स्यात् । अपि च सूर्यः एकाकी सन् अग्निपूजया तृप्यति, देवताऽन्तरसहितस्तु अग्निः अग्नीषोमपूजया इति नैतत् संभाव्यते । नहि देवदत्तः अत्यन्तमधुरमधुपयःप्रभृतिभिः प्रीयमाणो यज्ञदत्तसाहचर्यात् सौवीरप्रियो भवति । **सिद्धान्ते** भाव्यमानेन धर्माः संबध्यन्ते, तत्र सौर्ये भाव्यमानेनैव धर्मा आकाङ्क्ष्यन्ते । तत्र सादृश्यात् धर्मप्राप्तिर्भवति, अलौकिकत्वात् धर्माणाम् । **अथवा** यदा देवताऽऽराधनार्थो यागः, तदा यदुक्तम् (‘ विप्रतिपत्तौ हविषा नियम्येत ’ इत्यत्र–) द्रव्यदेवताविरोधे द्रव्यसामान्यात् विध्यन्तः इति (–सिद्धान्ते । पूर्वपक्षे तु) देवताऽऽराधनार्थत्वात् यागस्य देवतासामान्यमेव बलीयः, विप्रकृष्टत्वात् द्रव्यसामान्यस्येति ।

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात् तस्य प्रीतिप्रधानत्वात् । १०॥

भाष्यम्—यदुक्तं अतिथिवदिति। तत् परिहर्तव्यम्। आतिथ्यं अतिथिप्रयुक्तं स्यात् । आतिथ्ये हि तत्प्रीतिर्विधीयते । अतिथिः परिचरितव्यः । यथा प्रीयते, तथा कर्तव्यमिति । दानं भोजनं वा कार्यमिति । यद्यत् अतिथये रोचते, तत्कर्तव्यम् । यत्तस्मै न रोचते, न तद्बलात् कारयितव्यमिति । इह तु कर्मणि अभावः प्रीतिविधानस्य । तस्मात् विषममतिथिनेति ।

शा— (पूर्वः पक्षः–) ‘**इन्द्रादेः संप्रदानत्वात् कर्मणोऽपि प्रधानता । यागः पूजा तदङ्गं स्यादतिथेर्भोजनं यथा ॥**’ एवं प्राप्ते, ब्रूमः ‘**यागस्यैव पदश्रुत्या फलसाधनतोच्यते । देवतायाश्च तादर्थ्यं तन्निर्वृत्त्युपयोगतः॥ यागश्च साध्यरूपत्वात् साधनत्वेन देवताम् । गृह्णाति सिद्धरूपा च देवता तस्य साधनम् ॥**’ तस्मात् अपूर्वप्रयुक्ता धर्माः ।

सोम-- प्राधान्येऽपि प्रयोजकता न स्यात् इति पूर्वोक्तापूर्वप्रयोजकत्वमाक्षिप्य समर्थ्यते इति **संगतिः**। **सूत्रार्थस्तु**--देवतैव सर्वान् धर्मान् प्रयोजयेत् भोजनस्य यागस्य इदं हविः देवता भोक्ष्यते इति क्रियमाणत्वात् यागस्य भोजनशब्देन निर्देशः । देवताऽर्थत्वात् भोजनस्य भोक्त्रर्थत्वे दृष्टान्तः अतिथिवदिति ।

वि— ‘देवः प्रयोजकोऽपूर्वं वा, ऽऽद्योऽस्य फलदत्वतः।, न विधेये गुणो ह्येषोऽपूर्वस्य फलितोचिता ॥’

भाट्ट— एवं तावदपूर्वमङ्गीकृत्यैव देवताप्रसादस्य प्रयोजकत्वं निराकृतम्। इह तु तदनङ्गीकृत्य देवताप्रसादः एव प्रयोजकोऽस्तु इत्याशङ्का प्रसङ्गान्निराक्रियते । तत्र देवतायाः संप्रदानत्वात् तस्य च कर्मकारकापेक्षयाऽपि अभिप्रेयमाणत्वेन प्राधान्यात् यागस्य पूजारूपस्य तत्संस्कारकत्वावगतेः, तस्याश्चोपयोगापेक्षायां ‘स एवैनं भूतिं गमयति’ ‘तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति’ इत्याद्यर्थवादानुसारात् प्रसन्नायाः फलदातृत्वावगतेः, यागस्यैव फलजनकत्वे प्रमाणाभावे अपूर्वसाधनत्वे सुतरां प्रमाणाभावः। अस्तु वा देवताया अभिप्रेयमाणत्वोक्तावपि तस्य ‘ब्राह्मणाय गां ददाति’ इत्यादौ ब्राह्मणस्य फलदातृत्वासंभवेन उपयोगाभावात् प्राधान्यासंभवेन प्राधान्यव्यभिचारेण तत्कल्पनाऽनुपपत्तेः, प्रत्युत भावार्थाधिकरणन्यायेन यागकरणिकायां भावनायां भाव्यापेक्षायां स्वर्गस्यैव तत्त्वेनान्वयात्, देवताया अपि संस्कार्यत्वे उद्देश्यत्वानेकत्वनिमित्तवाक्यभेदापत्तेः देवताया एव यागाङ्गत्वम्, तथापि यागस्य फलजनकत्वे व्यापारापेक्षायामश्रुतापूर्वकल्पनाऽपेक्षया रात्रिसत्रवत् आर्थवादिकदेवताप्रसादस्यैव द्वारत्वकल्पनात् तत्प्रयुक्तत्वसिद्धिः । प्रसादस्य च विग्रहभोगादिव्यतिरेकेण अनुपपत्तेः अर्थवादाद्यनुसारेण विग्रहभोगादिकल्पनेऽपि न दोषः । **इति प्राप्ते**, प्रसादो हि यदि इच्छारूपः, तदा तस्येच्छात्वेन तत्फलं प्रति कारणत्वे अतिप्रसङ्गापत्तेरवश्यं दर्शादिकर्तुस्तत्फलं भवतु इत्येवमाकारकेच्छात्वेन तद्वाच्यम्, तथा च कारणताऽवच्छेदके गौरवम्। दर्शादिजन्यफलभोगे जातेऽपि तत्कर्तृत्वानपायात् अन्यकृतदर्शपूर्णमासजन्यप्रसादात् अन्यस्य फलापत्तिश्च । अतस्तत्फलव्यक्तित्वावच्छिन्नं प्रति तद्व्यक्तिकर्तुः सा फलव्यक्तिर्भवतु इत्येवमाकारकेच्छात्वेन कारणत्वं वाच्यम्। तथा चानेककार्यकारणभावकल्पनं कारणताऽवच्छेदके गौरवं च ।

किञ्च एतादृशप्रसादो यदि ब्राह्मणतर्पणान्ते, तदा यागानां नष्टत्वादेव उत्पत्त्यनापत्तिः। यदि तु तत्तद्यागेभ्योऽपि अवान्तरप्रसादा आग्नेयव्यक्तिकर्तुस्तद्व्यक्तिजन्यं फलं भवतु इत्याकारिका इष्यन्ते, तदा देवतानां अमोघेच्छत्वस्य अर्थवादेषु प्रतिपादनात् दैवादग्नीषोमीयाद्यकरणेऽपि फलापत्तिः। अथैतस्यार्थवादत्वमेव अभ्युपगम्य तादृशमहाप्रसादस्य विजातीयेच्छात्वेनैव अपूर्ववादिन इव विजातीयफलत्वावच्छिन्नं प्रति कारणता, अवान्तरप्रसादानां च विजातीयतत्तदिच्छात्वेनैव महाप्रसादं फलं च प्रति कारणता, कारणताऽवच्छेदकसंबन्धश्च स्वजनकयागसमवायित्वम्, कार्यताऽवच्छेदकसंदन्धश्च फलांशे समवायः, नातः कर्त्रन्तरे फलापत्तिः । अवान्तरप्रसादमहाप्रसादयोः परस्परं कार्यकारणभावे प्रत्यासत्तिस्तु उभयत्र स्वजनकयागसमवायित्वसेव । देवतानिष्ठमेव वा तं कार्यकारणभावमङ्गीकृत्य समवायः एव प्रत्यासत्तिरस्तु इति चेत्, संबन्धगौरवस्यैव दोषत्वात्, यागनिष्ठकारणतानिरूपितकार्यता-

घटकसंबन्धस्य भवता निर्वक्तुमशक्यत्वाच्च । मन्मते तु सर्वकार्यकारणभावानां समवायः एव संबन्ध इति लाघवम् । एतेन प्रसादो नाम सुखविशेष इत्यपि पक्षः प्रत्युक्तः ।

न च अस्य गौरवस्यार्थवादिके प्रसादाख्ये व्यापारे सिद्धे फलमुखत्वमिति **वाच्यम्** । अर्थवादस्य स्तावकतयाऽपि उपपत्तौ स्वतस्तत्कल्पकत्वाभावात्, व्यापारापेक्षायां रात्रिसत्रन्यायेन तद्वाचकपदान्तरकल्पनया तस्य व्यापारत्वकल्पने च व्यापारत्वस्य कारणताघटितत्वेन तस्याः संबन्धावगमपूर्वकत्वात् संबन्धगौरवस्य फलमुखत्वानुपपत्तेः । अतो ये तावत् प्रसादादिप्रतिपादकाः, ते देवस्यत्वादिमन्त्रवदेव प्रसादादिविशिष्टदेवताप्रकाशनार्थाः सन्तो विशेषणांशे प्रकाशनस्य अदृष्टार्थत्वात् नानुपपन्नाः । वैशिष्ट्यघटकसंबन्धश्च आहार्यो वा अनाहार्यो वेत्यन्यदेतत् । अर्थवादाश्च तेनैव संबन्धेन स्तावका इति तेष्वपि न स्तुतिलक्षणा, अतोऽन्या काचिल्लक्षणा। अस्तु वा सा, तथाऽपि विधौ गौरवापत्तेः सा न दोषः ।

न च एवं विध्यनपेक्षितत्वात् आर्थवादिकप्रसादाद्यकल्पनेऽपि लक्षणया प्राशस्त्यतात्पर्यकस्यापि अर्थवादस्य असति प्रमाणान्तरविरोधे स्वशक्यार्थेऽपि प्रामाण्याभ्युपगमात् विग्रहभोगप्रसादादिस्वीकारात् अपूर्वान्ते एव प्रसादस्वीकरणमस्त्विति **वाच्यम्** । अन्यतात्पर्यकस्य वाक्यस्य अन्यत्र प्रामाण्यायोगात् । अन्यथा शुद्धपुरुषतात्पर्यके 'यष्टीः प्रवेशय' इत्यादौ परान्नभोजननिवृत्तितात्पर्यके 'मृदं भुङ्क्ष्व' इत्यादौ च प्रमाणान्तराविरोधात् स्वशक्यार्थेऽपि प्रामाण्यापत्तिः । अतः सकृदुच्चरितस्य शब्दस्य अनेकार्थबोधकत्वाभावनियमानुरोधेन शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वानुरोधेन चार्थवादानां शक्यार्थे प्रामाण्यानुपपत्तेर्न देवताविग्रहादिस्वीकारः ।

न च तथापि शक्यार्थविशिष्टप्राशस्त्ये एव लक्षणया अर्थवादानां तात्पर्यात् विशेषणांशेऽपि प्रामाण्योपपत्तिः, लक्ष्यताऽवच्छेदके गौरवापत्तेः । अन्यथा व्रीहित्वादेरपि विवक्षाऽऽपत्त्या ऊहानापत्तिः । अतः कथमपि न विग्रहादिस्वीकारः । किन्तु शब्दमात्रं देवता । अर्थस्तु प्रातिपदिकानुरोधात् चेतनोऽचेतनो वा कश्चित्स्वीक्रियते । न तु विग्रहादिमान् । उपासनाऽऽदौ परं ध्यानमात्रमाहार्यं तस्येति जैमिनिमतनिष्कर्षः । मम तु एवंवदतोऽपि वाणी दुष्यतीति हरिस्मरणमेव शरणम् ।

मण्डन— 'न देवता कर्मणि तु प्रधानम् ।' ५.

शंकर— 'देवताविग्रहादि न ।' प्रधानम् । १०.

* **देवताऽधिकरणे** दाशमिके (१०।४।१२।२३) देवतायाः स्वरूपेण कर्मणि समवायनिषेध उक्तः । सु. पृ. १३४२, * देवताऽधिकरणे देवताप्राधान्यस्य निषेध्यमानत्वात् । पृ. ४३८. * देवताऽधिकरणे (ब्र.) वक्ष्यमाणेन न्यायेन 'एतस्यैव रेवतीषु वारवन्तीयम्' इति वाक्ये रेवतीनां वारवन्तीयस्य च आधाराधेयभावस्येव यज्ञादीनां विविदिषायाश्च क्रियाकारकभावस्यापि समभिव्याहारादेव सिद्ध्युपपत्तेः । **परिमल.** १।१।१ ब्रसू. पृ. ६१. * देवताऽधिकरणे विग्रहादिपञ्चकाभावस्य प्रतिपादनात् । **सोम.** ६।१।२. * आगमतस्वरूपस्य देवतासांनिध्यस्य **देवताऽधिकरणे** निराकृतत्वात् । **श्राद्धममूखः** पृ. ७१. * क्रममुक्तिनिर्वाहाय देवतानां विग्रहवत्त्वस्थापनेन ब्रह्मविद्याऽधिकारस्तासामुक्तः, अन्यथा उपासनादिकर्मभिः तत्तद्देवतास्वरूपप्राप्त्या मुक्तिफलोपपादिकानां श्रुतिस्मृतीनामप्रामाण्यमेव प्रसज्येत इति शारीरकमीमांसायां देवताधिकरणे (ब्र.) स्थापितम् । **वैजयन्ती.** १।१।१. * तत्तत्प्रासादाट्टालगोपुरतोरणाद्युपजननिदर्शनसहस्रैः सुपरिनिश्चितं यथा चेतनाधिष्ठानात् अचेतनानां कार्यारम्भकत्वमिति, तथा चैतन्यं देवताया असति बाधके श्रुतिस्मृतीतिहासपुराणप्रसिद्धं न शक्यं प्रतिषेद्धुं इत्यपि स्पष्टं निरटङ्कि देवताऽधिकरणे । **भामती.** ३।२।८।४१ ब्रसू. * ननु एवं अन्यपरस्यापि 'वज्रहस्तः पुरंदरः' इत्याद्यर्थवादस्य स्वार्थेऽपि प्रामाण्ये देवताऽधिकरणविरोध इति चेन्न, देवताऽधिकरणे सूत्रकृता (जैमिनिना) याग एव फलस्य प्रयोजकः, देवता तु यागस्य गुणः, न तु यागाराधिता देवता फलं प्रयोजयति इत्येवं "देवताया गुणभावो यागं प्रति' इत्येतावदेव व्यवस्थापयिष्यते, देवताविग्रहादिकं तु भाष्यकृतैव उत्सूत्रं निराकरिष्यते प्रौढिवादेन । कु. १।१।८।३२. * नहि प्रमाणान्तरयोग्यविषयकत्वं इत्येतावता अर्थवादादीनां प्रमाणान्तरमूलकत्वं

संभवति । तदुक्तं देवताऽधिकरणे भामत्याम् । **सना. प्रा. प्रकाशे** पृ. ९५. * शास्त्रदीपिकायां 'लक्ष्मीकौस्तुभवक्षसं. ... वन्दे मुकुन्दं मुदा' इति मङ्गलं कृतम् । **तत्र सिद्धान्तचन्द्रिका**—न त्वेवं देवताऽधिकरणविरोधः उद्देश्याया एव तद्विषयत्वात् , सोमाय स्वाहा इत्येवंरूपा या देवता कर्माङ्गभूता तस्या एव देवताऽधिकरणे विग्रहादिपञ्चकनिराकरणात् । उक्तं च 'नास्माकं शब्द एव देवता , नाकसदामिन्द्रादीनां देवतात्वाङ्गीकारात् ' इति । अत एव वार्तिककारैः 'विशुद्धज्ञानदेहाय ' इत्यादिना ग्रन्थादौ महादेवो नमस्कृतः । **के.**

⧗ **देवताऽधिकरणन्यायः** । यत्तु केचिन्मन्यन्ते विग्रहबोधकश्रुत्यादेः उपासनापरत्वात् आरोपितविग्रहेणापि उपासनासिद्धेः नेशस्योक्तविग्रहसिद्धिरिति ,– **तन्न** । उपासनापरेभ्योऽपि अविरोधे देवताऽधिकरणन्यायात् प्रतीयमानार्थसिद्धेरनिवार्यत्वादित्युक्तं संग्रहे । (देवताऽधिकरणं द्रष्टव्यम्) । **साहस्री.** ८४५.

* **देवताऽधिकरणन्यायेन** (ब्र.) ' उपासनायाः कार्यत्वे विष्णोरात्मत्व एव च । उभयत्रापि तात्पर्यमात्मोपासाऽऽदिके विधौ ॥ ' इति प्रतिवाद्युक्तस्मृतेः विधेः स्तावकत्वे स्वार्थपरत्वे चेति उभयसिद्धिपरत्वात् । **अद्वैत.** २।४।१९३. * देवताऽधिकरणन्यायेन भूतार्थवादतया व्यवस्थाहेतुता अस्या– (शुको मुक्तः इत्यादेः) स्थेया । **संक्षेपशा. टीका.** २।२।७. * देवताऽधिकरणन्यायेन मन्त्राणामपि प्रतीयमानार्थप्रामाण्यमङ्गीकरणीयमेव । **सना. विवाह.** पृ. २८६. * अत्र विश्वसत्यत्वस्य पारमार्थिकस्य **देवताऽधिकरणन्यायेन** कल्पनीयतया , तन्न्यायस्य च श्रुतिविरोधे अप्रवृत्तेः न प्रतिप्रसवार्थत्वम् । **चतुर्ग्रन्थी.** पृ. ४३९. * अन्यपदादपि परामर्शात् आश्रमान्तराणि प्रतीयमानानि देवताऽधिकरणन्यायेन आत्मनोऽपि सिद्धिसंभवात् । **आभरणम्.** ४।१।१।२ **ब्रसू.** * असति बाधके देवताऽधिकरणन्यायेन शब्दतः प्रतीयमानं परित्यक्तुमशक्यम् । **भामती.** ३।३।१५।२६ **ब्रसू.** * देवतावत् भागधर्मत्वानुपपत्तेः यागद्वारा अपूर्वधर्म एवायं (पौष्णपेषणे) देवताऽधिकरणन्यायेन विज्ञायते । **वा.** ३।३।१५।४४ पृ. ८८७. * स्तुतिपराणामपि उक्तश्रुतीनां देवताऽधिकरणन्यायेन (ब्रसू.) विश्वसत्यत्वेऽपि तात्पर्यस्य अङ्गीकरणीयतया बाधकत्वस्य संभवात् । **चतुर्ग्रन्थी.** ४३८, * नागमबाधिताः दृश्यत्वादयः प्रत्यक्षादिसिद्धतात्त्विकसत्त्वपरत्वकल्पनाया अयुक्तत्वेन देवताऽधिकरणन्यायाप्रवृत्तेः । पृ. ४३९.

* **देवताऽन्तरत्वं** (इन्द्रः महेन्द्रः इत्यत्र) सत्यपि द्रव्यैकत्वे सगुणनिर्गुणाश्रयणात् । **वा.** २।१।५।१७ पृ. ४२४.

* **देवताऽन्वाधानं** अग्न्यन्वाधानात् पृथङ् न विद्यते । **वि.** १२।१।१२.

* **देवताऽपनयः** अभ्युदितेष्टौ उपांशुयाजेऽपि । **भा.** ६।५।२।१०–११, * देवताऽपनयो दर्शे अभ्युदयेष्टौ नैमित्तिकः । ६।५।१।१–९.

* **देवताऽभिधानं** आवाहनादौ विधिगतशब्देनैव अतिदेशस्थले । **भाट्ट.** १०।४।१४. * देवताऽभिधानं वनस्पतियागे (ज्योतिष्टोमेऽग्नीषोमीये पशौ) विधिगतवनस्पतिशब्देनैव निगदेषु । **भा.** १०।४।१६।३२–३३.

* **देवताऽर्थे** कृत्स्नस्य हविषः संकल्पितत्वेन तत्र यजमानस्य स्वामित्वाभावात् न युक्तः परिक्रयः । **वि.** ३।४।२१. * **देवताऽर्थता** हविषः आहवनीयप्रक्षेपेण भवति । **वा.** ३।४।१४।३७.

* **देवताऽऽदेः** दृष्टमात्रापेक्षत्वेन अदृष्टोपकारानपेक्षता । **भाट्ट.** ४।१।७.

* **देवताऽऽयतनेषु** महायात्रा सदाचारः । **वा.** १।३।३।७ पृ. २०५.

* **देवताऽऽराधनार्थो** यदि यागः , ततः पूज्यमाना देवता । यागश्च पूजा । पूजा च लौकिकः पदार्थः । तत्र येन प्रकारेण अग्निः पूज्यते , तेनैव सूर्यः पूज्यते इति क आश्वासः । विपरीतमपि कदाचित् स्यात् । (पूर्वपक्षे इदम्) । **टुप्.** ९।१।४।९ पृ. १६५५. * देवताऽऽराधनार्थः सर्वोऽयं प्रयासः । साऽस्य प्रसन्ना फलं ददाति । इति चेन्न । यागादेव फलम् 'स्वर्गकामो यजेत ' इति हि श्रूयते । 'तृप्त एवैनमिन्द्रः ' इति तु गुणत्वेन देवताश्रुतिः । गुणभूतायां तु देवतायां स्तुत्या दातृत्ववादः । तस्मात् देवता न फलं प्रयच्छति । **भा.** ८।१।१७।३४.

* **देवताऽऽवाहनार्थः** निगदः ‘अग्निमग्न आवह’ इत्यादिः होत्रा सामिधेनीप्रयाजयोर्मध्ये पठ्यते । **वि.** १०।१।१ वर्णकम् ३. * **देवताऽऽवाहनकाले** वैश्वदेवचरौ विष्णोरुरुक्रमस्यावाहनं न कार्यम् । **भा.** १०।१।१।१–३ वर्णकं ३.

* **देवताऽऽश्रयं** द्रव्याश्रयेण बाध्यते यथा ऐन्द्रपुरोडाशे देवतासामान्यात् सांनाय्यविध्यन्तः प्राप्तः, स तु द्रव्यसामान्यात् प्रवृत्तेन आग्नेयविध्यन्तेन बाध्यते । **बाल.** पृ. १४१.

* **देवतोपलक्षणार्था** याज्या । **भा.** १२।३।१५।३५.

* **देवतैक्ये** पशुगणे वसाहोमस्य तन्त्रम् । **भा.** ११।२।५।२४.

* **देवताघटितसादृश्यापेक्षया** द्रव्यघटितसादृश्यस्य बलीयस्त्वम् । **भा.** ८।१।१७।३२–३४.

* **देवतात्वं** अग्नीषोमयोर्व्यासज्यवृत्ति । **संकर्ष.** ४।४।६. * देवतात्वं त्यज्यमानद्रव्योद्देशकर्मत्वम् । **सु.** पृ.७४९. * देवतात्वं त्यज्यमानद्रव्योद्देश्यत्वम् । **मीन्या.** * देवतात्वं त्यागकालीनचतुर्थ्यन्तपदोच्चारणकर्मत्वरूपम् । **रहस्य.** पृ. १०२. * देवतात्वं नाम यस्यैव शब्देनोक्तम्, तस्यैव योग्यस्यायोग्यस्य वा भवति, इति न जातिनिमित्तम् । **वा.** २।२।९।२३ पृ. ५३७. * देवतात्वं मन्त्रप्रतिपाद्यत्वम् । **संकर्ष.** २।४।२. * देवतात्वं व्यासज्यवृत्ति अखण्डोपाधिरूपम् । **भाट्ट.** ३।१।१५.

* देवतात्वं शब्दमात्रस्य निरस्तम् । ननु शब्दमात्रस्य देवतात्वात् इन्द्रमहेन्द्रशब्दयोश्च भेदात् कथं देवतैक्यं इत्याशङ्क्याह–– नचेति (न च शब्दमात्रं देवता इति नवमदशमयोरभिधास्यते । वा.पृ.४१७) । **नवमे** ‘अपिवा शब्दपूर्वत्वाद् यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिः’ इति सूत्रे (९।१।९) भूतभव्यसमुच्चारणन्यायेन देवतायाः यागं प्रति गुणत्वे अभिहिते, ‘ननु कर्मणोऽपि ईप्सिताद‌भिप्रेतत्वं देवताया गम्यते’ इत्याशङ्क्य ‘नास्या अभिप्रेततामपह्नुमहे । तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेतता गम्यते’ (भा. पृ. १६५२) इति भाष्येण अनर्थकवर्णसमूहस्य प्रातिपदिकत्वाभावे तद्धितचतुर्थीसंयोगायोगात् तत्संयोगाभिधानेन अर्थग्रहणेन (च) शब्दमात्रस्य देवतात्वं निरस्तम् । **दशमे** च ‘विधिशब्दस्य मन्त्रत्वे भावः स्यात् तेन चोदना’ (१०।४।२३) इत्यत्र ‘आवाहनादौ येनकेनचित् पर्यायेण देवताऽभिधानसिद्धेः विधिगताग्न्यादिशब्दानादरः’ इति पूर्वपक्षयित्वा “ आग्नेयोऽष्टाकपालः’ इतिविधिगतेन अग्निशब्देन देवताया हविःसंबन्धविधानात् मन्त्रकार्ये देवतोद्देशे विधिगतस्यैव शब्दस्योच्चारणं कार्यम्’ इति सिद्धान्तिते, ‘का पुनरियं देवता नाम’ इति पृष्ट्वा इन्द्रादीनां द्युस्थानानां वेदे वा यत्र ‘अग्निर्देवता वातो देवता’ इत्यादिर्देवताशब्दः प्रयुक्तः, सा देवता इति परमतद्वयं अहःशार्दूलादीनां अनुपसंग्रहापत्तेः निरस्य, स्वमतेन ‘सूक्तभाजो हविर्भाजश्च देवताः’ (भा. पृ. १९२७) इति भाष्येण ‘अग्निदैवत्यं सूक्तम्’ ‘अग्निदैवत्यं हविः’ इत्यादिप्रयोगात् ‘आहुतिभाजो वा अन्या देवता अन्याः स्तोमभाजश्छन्दोभाजः’ इति लिङ्गाच्च सूक्तस्तुत्यत्वस्य त्यज्यमानहविरुद्देश्यत्वस्य च देवतात्वाभिधानादर्थस्यैव स्तुत्यत्वोद्देश्यत्वावगतेः ‘मूर्तानाममूर्तानां चेतनानामचेतनानां च श्रुत्या कञ्चिदर्थं प्रति तादर्थ्ये संकल्पनीयानां देवतात्वं भविष्यति’ (भा. पृ. १९२७) इति च भाष्येण मूर्तानां चेतनानां देवतात्वाभिधानात् ‘यस्य वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामि इति संकल्पः क्रियते सा (देवता) भवति (तत्र)’ (भा. पृ. १९२७) इति च भाष्येण उच्चारणार्थत्वात् दिशेः उच्चार्यमाणेन शब्देन ‘प्रजापतिं मनसा यजेत’ इत्यादिविधौ वा स्मर्यमाणेन वाच्यस्य देवतात्वाभिधानात्, ‘ननु एवं सति सुतरां येनकेनचित् अग्नेः शब्देन निर्देशः करणीयः’ इति चाशङ्क्य ‘भवेदेतदेवं यदि अग्निशब्दोऽर्थप्रत्यायनार्थमुच्चार्येत अर्थोऽपि हविःसंबन्धार्थं प्रत्याय्येत’ इत्युपक्रम्य (भा. पृ. १९२७) ‘देवतायाश्च यज्ञसाधनभावो न रूपेण भवति । केन तर्हि ? संबन्धिना शब्देन’ इत्यादिना भाष्येण (भा. पृ. १९२८) शब्दसंबन्धितद्व्यतिरिक्ताभिधानात् शब्दस्य देवतात्वं निरस्तं भवति । **सु.** पृ. ६४३, * देवतात्वं हविर्भाक्त्वम्, स्तुतिभाक्त्वम् । पृ. ६५९. * अर्थो वाचिकया श्रुत्या उच्यमानो **देवतात्वं** प्रतिपद्यते, नान्यथा । **वा.** ६।३।५।१८. * नहि द्रव्योद्देश्यत्वमेव देवतात्वम् । तथा

सति 'मैत्रावरुणाय दण्डं प्रयच्छति' 'आत्रेयाय हिरण्यं ददाति' इत्यादौ मैत्रावरुणात्रेयादेरपि द्रव्योद्देश्यत्वसद्भावेन देवतात्वापत्तेः। किञ्च उद्देश्यत्वमात्रस्य देवतात्वे प्रतिनिधीयमानस्यापि देवतात्वसंभवात् षष्ठे वक्ष्यमाणो देवताप्रतिनिध्यभावो विरुध्येत। **सोम.** १।४।४ पृ. ६३. * शब्दस्यैव देवतात्वम्। **भाट्ट.** ९।३।१२, * संप्रदानद्वैविध्यमभ्युपगम्य प्रतिग्रहणात्मकस्य संप्रदानस्य देवतात्वाभावेऽपि अनिराकरणात्मकसंप्रदानस्य देवतात्वमिच्छन्ति केचित्। **सु.** पृ. ८३२. * 'अर्थोऽपि यादृशो यत्र **देवतात्वेन** चोदितः। मनागपि ततोऽन्यत्वे देवतेति न गम्यते॥' देवतात्वस्य प्रत्यक्षाद्यनवगम्यत्वात् चोदनैव एकं प्रमाणम्। सा च यं यादृशं यत्र यादृशे चार्थे विदधाति, स यदि तथैव अनुष्ठानेऽपि संपाद्येत, ततः तत्प्रमितोऽयं इत्यवसीयते। किञ्चिदपि चेत् इह अन्यथा जातं निवृत्तव्यापारायां चोदनायां प्रमाणान्तरं मृग्यम्। न च तदस्ति इत्यप्रमाणता। **वा.** २।१।५।१७ पृ. ४२२, * मन्त्रेषु प्राधान्याभिधानात् अग्न्यादयः देवतात्वेन प्रज्ञाताः। १।४।६।९ पृ. ३४०, * **देवतात्वस्य** अनुष्ठानसंपाद्यत्वात्। २।३।५।१४ पृ. ६०१, * देवतात्वस्य द्विदेवत्ये व्यासङ्गित्वात् (व्यासज्य वृत्तित्वात्)। ३।३।१५।४१. * 'देवतात्वस्य शब्दनिष्ठत्वेन' इत्यादिना एकदेवतात्वलक्षणमुक्त्वा 'अर्थस्य देवतात्वपक्षे' इत्यादिना अन्यथा लक्षणमुक्तम्। (भाट्टे ८।२।७)। **के.** * त्यज्यमानहविरुद्देश्यत्वात्मकहविर्भोक्तृलक्षणस्य **देवतात्वस्य** यागकल्पकत्वम्। **सु.** पृ. ९२९, * भोक्तृत्वरूप**देवतात्वावगमात्**। पृ. ९२६, * यागं विना **देवतात्वानुपपत्तेः**। पृ. ९२८, * विधिं विना **देवतात्वाभावः**। पृ. ७५५.

* **देवतात्वबोधकानि** च देवताशब्दः, तद्धितः, चतुर्थी, द्वितीया, मन्त्रवर्णश्चेति। 'देवतास्तर्पयति प्रजापतिर्ब्रह्मा देवताः' इत्यादौ 'रात्रिदेवतामेके, नक्षत्रदेवतामेके' इत्यादौ च द्रव्यत्यागोद्देश्यत्वरूपदेवतात्वस्य देवतापदवाच्यस्य अन्वयः। धात्वर्थत्यागांशे अनुवादः। एवं आग्नेयः इत्यादितद्धितस्य देवतात्वविशिष्टद्रव्यविशेषवाचित्वम्। न च द्रव्यविशेषवाचित्वमसिद्धं इति वाच्यम्। बुद्धिस्थप्रकारावच्छिन्नबोधकसर्वनामार्थे 'साऽस्य देवता' (पा० ४।२।२४) इति तद्धितविधेः। एवं च तद्धितस्य देवतात्वविशिष्टे बुद्धिस्थप्रकारे अष्टाकपालत्वादौ तद्व्यक्तित्वादौ वा शक्तिः। तदवच्छिन्नस्य तु व्यक्तिन्यायेन लाभः। बुद्धिस्थत्वेन भानाभावात्तु न बुद्धिस्थत्वे शक्तिः। तेषां प्रकाराणां नानात्वेऽपि बुद्धिस्थत्वस्य उपलक्षणत्वेन शक्तिग्रहसंभवः। शक्तिग्रहोपलक्षणस्य न शक्यताऽवच्छेदकत्वं इति दिक्। **मणि.** पृ. १६२–१६३.

* **देवताद्रव्येण** स्वकार्याणि न कर्तव्यानि। **भा.** १०।७।२।७. * **देवताद्रव्ययोः** संनिपाते द्रव्यं बलीयः। **भाट्ट.** ८।१।८. * **देवताद्रव्यादीनां** प्राकृतानां विकृतौ उपदिष्टदेवताद्रव्यादिभिः बाधः। **भा.** १०।७।१७।५८–६०, * **देवताद्रव्यसंयोगः** यागविधेः प्रयोजकः। 'वायव्यं श्वेतमालभेत' 'सौर्यं चरुं निर्वपेत्'। २।३।५।१२–१५.

* **देवताध्यानं** वषट्कारात् प्रागेव होत्रा कर्तव्यम्। **संकर्ष.** ४।३।६.

⧗ देवताध्यानं वषट्कारात् प्राक् 'तां ध्यायेद् वषट्करिष्यन्' इति लट्प्रयोगात्॥

'यस्यै देवतायै वषट्कुर्यात् तां ध्यायेत्' इति विहितं देवताध्यानमविहितकालनियमेन यदाकदाचन कुर्यात्। इति प्राप्ते, 'जातमञ्जलिना गृह्णाति' 'जातमभिप्राणिति' इत्यादौ जननाव्यवहितोत्तरकालस्य सामर्थ्येनापि नियमदर्शनात् देवताऽर्चनविधौ ध्यानस्य प्राथमिकदर्शनाद् वषट्कारात् पूर्वमेव देवताध्यानम्। वस्तुतो 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन् साक्षादेव तद्देवतां प्रीणाति' इति वचनान्तरेणैव कालनियमः। **संकर्ष.** ४।३।६.

* **देवतानयः**। देवताऽधिकरणं द्रष्टव्यम्। **भा.** ९।१।४।६–१०. * प्रमाणान्तराविरोधे एव **देवतानयः** (ब्रसू.) प्रवर्तते। अन्यपराया अपि (भेदश्रुतेः) देवताऽधिकरणन्यायेन स्वार्थपरत्वमपि किं न स्यात्। **संक्षेप.** रामतीर्थ. ३।२८३.

* **देवतानिर्देशः** इदममुष्य अमुष्य च इत्यादिरीत्या समुच्चित्य कार्यः, यत्र चरवः पुरोडाशाश्च व्यतिषक्ताः। **संकर्ष.** १।३।२३.

* देवतानिष्ठगुणवाचिपदस्यापि विकृतौ आवाहनादौ प्रयोगः । भा. १०।४।१४।२६–२९.

* देवतापदस्य ,निर्गुणस्यैवाभिधानं पवमानेष्टिषु आज्यभागयोः । भा. १०।४।१५।३०–३१. * देवतापदस्य शब्दविशेषरूपत्वेन तदुच्चारणनियमः । संकर्ष. २।४।२.

देवतापदयोगेऽपि न सप्तदशत्वभङ्गः ॥

‘ अग्नयेऽनुब्रूहि ’ इत्यादौ इव ‘ अग्निं यज ’ ‘ ये यजामहेऽग्निम् ’ इति तत्तदेवतानाम्नां योगे सप्तदशाक्षरत्वभङ्गापत्तेः नियमादृष्टविरोधात् , अश्रुतकल्पने मानाभावात् , आकाङ्क्षितकर्मपदस्य ‘ छिनद्मि ’ इत्यादिवत् अर्थाध्याहारेणापि उपपत्तेः, अग्निपदस्य अध्याहारेऽपि तस्य प्रैषादौ प्रतिवचनान्त एवेति नियमेऽपि मानाभावात् । द्व्यक्षरपञ्चाक्षरावेव तौ प्रयोज्यौ । इति प्राप्ते , सर्वदेवतापदसाधारणांशमादायापि सप्तदशत्वोपपत्तेः अर्थाध्याहारस्य निरस्तत्वाच्च देवताविशेषपदमन्तरेण यागविशेषप्रतिपत्तेः अभावेन अनन्तराधिकरणसिद्धदृष्टार्थत्वभङ्गापत्तेश्च , देवतानाम्नां आदेशः । अत एव शाखाऽन्तरे ‘ अमुष्मै अनुब्रूहि ’, ‘ अमुं यज ’ इत्यादिवचनैः देवतानामविशेषोपलक्षकः अदःशब्दः श्रूयते । ‘ असावेहि ’ ‘ अवधिष्मामुम् ’ ‘ इदमहममुष्य ’ इत्यादिवचनैः देवतापदपौर्वापर्यनियमोऽपि एतद्बलादेव । यत्तु लिङ्गदर्शनमुक्तं मूले ‘ यत्तनूनपातं यज इडो यज इति ब्रूयात् जामि स्यात् , यजेत्येव ब्रूयात् ’ ‘ मारुतस्यावद्यन् मरुद्भ्योऽनुब्रूहीत्याश्राव्य मरुतो यजेति ब्रूयात् ’ इत्यादिज्ञापकात् अन्यत्रापि देवतापदप्राप्तिरिति , तत् शाखाऽन्तरे ‘ तनूनपातं यज ’ इत्येव पाठात् तन्निषेधार्थकत्वेन पूर्वस्य , इतरस्य तु विधिरूपत्वेनापि उपपत्तेः विपरीतसाधकं इति तत्रैवोक्तम् । संकर्ष. २।३।२.

* देवतापरो मेधपतिशब्दः अध्रिगुप्रैषगतः । भा. ९।३।१२।३२–४०.

* देवतापरिग्रहार्थं अग्निधारणार्थे वा अग्न्यन्वाधानम् । देवतापरिग्रहार्थमपि अग्निधारणार्थम् । भा. १२।२।५।१८, * देवतापरिग्रहार्थमपि अग्न्यन्वाधानं ज्योतिष्टोमे ऐष्टिकेषु कर्मसु न कर्तव्यम्, प्रधानदेवतावत् अङ्गदेवतानामपि गृहीतत्वात् । १२।१।१२।२४–२८.

* देवतापरिग्रहणं अग्न्यन्वाधानेन कृतम् । भा. १२।४।७।१९.

* देवतापूजा यागो नाम (पूर्वपक्षे) । भा. ९।१।४।६.

* देवताप्रकाशेन च प्रत्यक्ष उपकारो यागसिद्धिः । भा. २।१।५।१३.

* देवताप्रकाशकस्य मन्त्रस्यापूर्वप्रयुक्तत्वम् । भा. ९।१।३।४–५.

* देवताप्रकाशनं सौर्यादिविकृतौ आवाहनादिमन्त्रेषु विधिगतशब्देनैव । भा. १०।४।१३।२५.

* देवताप्रयुक्ता न धर्माः किन्तु अपूर्वप्रयुक्ता एव । भा. ९।१।४।६–१०.

* देवताप्रसादाभयप्रार्थनादौ संहतहस्तसंयोगमात्रं अञ्जलिः । वा. १।४।१४।२५.

* विग्रहादिसद्भावेऽपि यजेः पूजावाचित्वाभावात् यागकर्मणि देवताप्राधान्याभावः इति देवताप्राधान्यं ‘ अतिथौ तत्प्रधानत्वम् ’ (९।१।४।१०) इति सूत्रे निषेत्स्यते । सु. पृ. ७५०, * देवताप्राधान्यस्य देवताऽधिकरणे निषेध्यमानत्वात् । पृ. ४३८.

* देवताबोधकयाज्यादिक्रमादपि यागक्रमः । भाट्ट. ५।१।४.

* देवताभेदात् कर्मभेदः । बिन्दु. २।२।९. * देवताभेदेऽपि एकजातीयेषु पशुषु (ऐकादशिनेषु) कुम्भीशूलवपाश्रपणीनां तन्त्रम् । भा. ११।४।९।३१–३६. * देवताभेदेऽपि वाचनिके पुरोडाशैकत्वे सहैवावदानम् । संकर्ष. २।२।१४ । प्रदानं तु भिन्नमेव । २।२।१५. * देवताभेदे पशुगणे दैवतावदानादिप्रदानान्ते न अनुसमयः । भाट्ट. ५।२।६. * देवताभेदे पशुगणे वसाहोमस्यावृत्तिः । भा. ११।२।६।२५.

* देवतायागं अदनीयेन द्रव्येण आचरन्ति शिष्टाः, न अनदनीयेन । तत्रभवतामाचारात् तेषां स्मृतिरनुमीयते, स्मृतेः श्रुतिः । भा. १०।१।१०।३६.

* न हि देवतारूपमस्माकं किञ्चिदन्यत् प्रत्यक्षम् , अन्यदतो नित्यत्वात् । भा. ४।४।५।१०. * देवतारूपः

शब्द एव ध्यातव्यः । **संकर्ष.** ४।३।६ वर्णकम् २.
* **देवतारूपस्य** अग्न्यादिशब्दस्य आनुपूर्वीविशिष्टवर्णत्वेन क्रतुं प्रतीव स्वार्थप्रतिपादनं प्रत्यपि कारणत्वात् । **भाट्ट.** ३।२।७.

* **देवतावाचकपदस्य** गुणवाचकपदरहितस्य पवमानेष्टयादिषु अभिधानम् । **भा.** १०।४।१५।३०–३१.

* **देवताविग्रहचैतन्यादिकं** नवमे यद्यपि निराकरिष्यते, तथापि तत् उत्सूत्रं भाष्यकृता, न तु सूत्रकृता । प्रत्युत सूत्रकारस्य देवताविग्रहादिकं अभिमतं वार्तिकाभिमतं च इति षाष्ठतिर्यगधिकरणे प्रपञ्चयिष्यते । **कु.** १।२।४।४३ पृ. ४७.

* **देवताविधिः** 'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते । देवतासंगतिस्तत्र दुर्बलं तु परंपरम् ॥' **वा.** २।२।९।२३ पृ. ५३३. * देवताविधिः तद्धित–चतुर्थी–मन्त्रवर्ण–द्वितीया–अर्थवादभेदात् पञ्चविधः । **बाल.** पृ. २२. * देवताविधिः प्रयाजेषु मान्त्रवर्णिकः । **टुप्.** ९।२।२०।६०.

* **देवताविधिसरूपः** अर्थवादः 'विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति । **बाल.** पृ. ५३.

* **देवताव्यापारे** शास्त्रकृते उपक्रम्य अपरिसमाप्यमाने शिष्टविगर्हणम् । **भा.** ६।२।४।१६.

* **देवताशब्दस्य** विधिगतस्यैव त्यागादौ उच्चारणम् । विधिशब्दाधिकरणम् । **भा.** १०।४।१२।२३–२४.

* **देवताश्रवणं** ग्रहग्रहणे न यागे । प्रसङ्गात्तु यागं निर्वर्तयति, न तु तासां यागं प्रति तादर्थ्ये प्रमाणमस्ति । कथम् ? क्रत्वर्थेन देवताः संयुक्ताः, ता यागमभिलषन्ति । यागोऽपि देवताभिलाषी । तयोः संबन्धोऽर्थात् भविष्यति । यागोऽपि द्रव्यं गृह्णन् तदाश्रितां देवतां गृह्णाति । **टुप्.** ८।१।३।५.

* '**देवतासंबन्धाभावात् आलभतिर्न यागवचनः । दृष्टार्थत्वाच्च वत्स आलभ्यमानो गां प्रस्नावयिष्यति**' इति न्यायः 'विशये प्रायदर्शनात्' (२।३।७।१६–१७) इत्यधिकरणसिद्धान्तबीजम् । **के.**

* **देवतासंस्कारार्थः** उत्तमः प्रयाजः । **भा.** १०।१।७।१४–१५, * देवतासंस्कारार्थः पशुपुरोडाशः । ३।६।७।२६, १०।१।९।२८–२९, १२।२।२।९, * **देवतासंस्कारार्थाः** याज्याऽनुवाक्याः । १०।४।२०।३९–४२.

* **देवतासमर्पकत्वं** वाक्यशेषस्य, उपक्रमस्य नैराकाङ्क्ष्यात् निराकृतम् 'संयुक्तस्त्वर्थशब्देन०' इत्यधिकरणे (२।३।७।१८) । **पराक्रमः.** ४४।२.

* **देवतासाधकं** विग्रहादिपञ्चकं नाम । विग्रहः, हविःस्वीकारः, तद्भोजनम्, तृप्तिः, प्रसादश्चेति । तत्र विग्रहः 'सहस्राक्षो गोत्रभिद् वज्रबाहुः', हविःस्वीकारः 'अग्निरिदं हविरजुषत', हविर्भोजनम् 'अद्धीदिन्द्र प्रस्थितेमा हवींषि', तृप्तिप्रसादौ 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' । एतेषां विग्रहादीनां प्रतिपादकयोर्मन्त्रार्थवादयोः स्वार्थे तात्पर्याभावात्, देवानां वस्तुसामर्थ्यात् फलप्रदत्वं न सिध्यतीति मीमांसकसिद्धान्तः । **वि.** ९।१।४.

* **देवतासामान्यं** बलीयो हविःसामान्यात् । कुतः ? सर्वोऽयं प्रयासो देवताऽऽराधनार्थ एव, सा अस्य प्रसन्ना फलं ददाति । एवं श्रूयते 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इति । यश्च इन्द्रस्य प्रसादनोपायः इति ज्ञातः पुनरपि इन्द्रे प्रसादयितव्ये स एवास्थेयो भवति, तस्मात् देवतासामान्यं बलीय इति । अत्र ब्रूमः । स्यादेतदेवं यदि देवतातः फलं स्यात् । यागात्तु फलं 'स्वर्गकामो यजेत' इति श्रूयते । यत्तु 'तृप्त एवैनमिन्द्रः' इति, तत्रेदमुच्यते, गुणत्वेन देवताश्रुतिः । यागे गुणभूता देवता । तस्या दातृत्वं स्तुत्योच्यते । यथा 'अमात्येन मे ग्रामो दत्तः, सेनापतिना मे ग्रामो दत्तः' इति । न च अमात्यः सेनापतिर्वा ग्रामस्य प्रभवति । राजैव प्रभवति । इतरस्मिन् गुणभूते स्तुत्या दातृत्ववादः । तस्मात् यथोक्तेन न्यायेन हविःसामान्यमेव बलीयः इति । **भा.** ८।१।१७।३४, * **देवतासामान्यात्** आग्नावैष्णवादौ अग्नीषोमीयपुरोडाशधर्माणां शुचिपावकादिषु आग्नेयपुरोडाशधर्माणां चातिदेशः । ८।३।१।१–२.
* देवतासामान्यात् हविःसामान्यं बलवत् । त्यागरूपे कर्मणि हविः प्रत्यासन्नम्, देवता तु बहिरङ्गम् । अतः

'ऐन्द्रमेकादशकपालं निर्वपेत्' इत्यादौ पुरोडाशधर्मातिदेशः, न तु सांनाय्यधर्मातिदेशः। **वि.** ८।१।१७. * **देवतासामान्यस्य** उत्पत्तिसमयावगतस्य प्रयोगकालावगतक्रमात् बलवत्त्वम्। **संकर्ष.** २।३।५.

* **देवतास्वत्वं** त्यागमात्रेण न च भवति। प्रतिग्रहेण हि स्वस्वामिसंबन्ध आपद्यते। न च परिगृहीतं देवतया इति किंचन प्रमाणमस्ति। **भा.** ३।३।१५।४४.

* **देवदत्तस्य गुरुकुलम्।** संबन्धिशब्दानां प्रतिसंबन्धिनमपेक्षमाणानामपि न सामर्थ्यविघातो भवति। **रत्नाकरः.** पृ. ३४७.

* **देवदत्तादिशब्दो** द्रव्यवचनो न शक्तिं ब्रवीति। **वा.** ३।४।४।१३ पृ. ९३३.

⧗ **देवदत्तपुत्रन्यायः।** पितृप्राधान्यविवक्षायामेवमुच्यते, मातृप्राधान्यविवक्षायां तु देवदत्तापुत्र इति। **संग्रहः.**

⧗ **देवदत्तहननोद्यतहतन्यायः।** यथा देवदत्तहननोद्यतस्य हनने तु देवदत्तस्य भवत्येवोन्मज्जनम्, तथा रामावित्यत्र पूर्वसवर्णदीर्घेण न वृद्धेर्हननम्, किंतु हननोद्यतसजातीयस्य प्रसक्तिमात्रम्, प्रसक्तस्यैव निषेधात्। **साहस्री.** ३४.

⧗ **देवदत्तहन्तृहननन्यायः।** यथा देवदत्तस्य हन्तरि हते देवदत्तस्योन्मज्जनं न भवतीति, तथा अज्ञानबाधके ज्ञाने विनष्टे पुनरज्ञानोदयेन बन्धप्रसङ्गो न भवतीति। अयं न्यायः 'अचः परस्मिन् पूर्वविधौ' १।१।५७ इति सूत्रमहाभाष्येऽपि। **साहस्री.** ३३.

⧗ **देवदत्तापुत्रन्यायः।** यथा नहि देवदत्ताया एव पुत्रः किन्तु देवदत्तस्यापि, मातुः प्राधान्यविवक्षायां देवदत्तापुत्र इत्युच्यते। यथा च दाक्षीपुत्रः पाणिनिः। अत एव यजुर्वेदे वंशकीर्तने स्त्रीप्राधान्येनैव निर्देशः। यथा 'अथ वंशस्तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः' इत्यादि (शब्रा. १४।९।४)। **साहस्री.** ३०.

⧗ **देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते** इति लोकन्यायः। **भूतिः.** पृ. २९८.

* **देवनस्य** कृत्स्नराजसूयाङ्गता। **वि.** ४।४।२, * **देवन–जय–शौनःशेपाख्यानानि** अभिषेचनीयसंनिधौ पठितान्यपि न अभिषेचनीयाङ्गम्, किन्तु प्रकरणबलेन राजसूयाङ्गम्। ३।३।१०.

* **देवसुवां हवींषि अष्टौ।** १ अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाम्, २ सोमाय वनस्पतये श्यामाकं चरुम्, ३ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाम्, ४ रुद्राय पशुपतये गावीधुकं चरुम्, ५ बृहस्पतये वाचस्पतये नैवारं चरुम्, ६ इन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणाम्, ७ मित्राय सत्याय आम्बानां चरुम्, ८ वरुणाय धर्मपतये यवमयं चरुम्। [आशुव्रीहयः षष्ट्या दिनैः पच्यमानाः, महाव्रीहयः स्थूलबीजम्, आम्बाः–आंबेमोहोर (भाषायां)] एतानि च अग्नीषोमीयस्य पशुपुरोडाशतन्त्रमध्ये विहितानि इति पुरोडाशधर्मैः प्रसङ्गसिद्धानि, हविषां स्वधर्मानुष्ठानं न कर्तव्यम्। इदं अनुनिर्वाप्याधिकरणम्। **के.** १२।३।२।३–८. * **देवसुवां हविःषु** अनुनिर्वाप्येषु अग्नीषोमीयपशुपुरोडाशतन्त्रेण प्रसङ्गसिद्धिः। अनुनिर्वाप्याधिकरणम्। **भा.** १२।३।२।३.

* **देविकाहवींषि** अनुबन्ध्यामनुनिर्वाप्याणि। **भा.** १२।३।२।३. * देविकाहवींषि पञ्च। १ धात्रे पुरोडाशं द्वादशकपालम्, २ अनुमत्यै चरुम्, ३ राकायै चरुम्, ४ सिनीवाल्यै चरुम्, ५ कुह्वै चरुं इति। **के.** * **देविकाहविःषु** अनुनिर्वाप्येषु अनुबन्ध्यातन्त्रस्यैव प्रसङ्गः, न तु वैपरीत्यम्। **भा.** १२।३।२।३–८.

* **देविकाहविरधिकरणम्।** अनुनिर्वाप्याधिकरणं द्रष्टव्यम्। **भा.** १२।३।२।३–८.

* **देशः** अनुपादेयः। तस्य कर्मभेदकत्वे उदाहरणानि 'दक्षिणेन तीरेण सरस्वत्याः आग्नेयेनाष्टाकपालेन शम्या परासमीयात्' इत्यादीनि यद्यपि अत्र अतिरात्रादिवदेव यज्यश्रवणं तथापि प्राग् यज्यनुमानात् तद्धितान्तपदयुक्तवाक्यापरिसमाप्तेः वाक्यान्तरस्यानपेक्षणात् कर्मान्तरत्वम्। **वा.** २।३।१२।२५. * **देश** एक एवाग्नेयादीनां प्रधानानां

दर्शपूर्णमासचातुर्मास्यादौ । भा. ११।२।१।१–२,४–७. * **देशः** ‘एककालाभिसंयोगाद्भिन्नानामपि कर्मणाम् । समुदायार्पणं शक्यमेकदेशस्थवृक्षवत् ॥’ यथैव हि एकदेशावस्थितान् वृक्षानालोच्य वनमिति समुदायबुद्धिर्भवति, एवं एककालयुक्तकर्मसमुदायनामधेयबुद्धिः । वा. २।२।३।३ पृ. ४८०. * **देशः** कालः फलं निमित्तं संस्कार्ये इत्यनुपादेयपञ्चकम् । बाल. पृ. ८८, * **देशः** दर्शपूर्णमासयोः पुनः प्रयोगे स वा अन्यो वा अनियमः । भा. ११।३।१२।३३, * **देशः** निर्वापस्य ‘अपरेण गार्हपत्यं प्रागीषं अनोऽवस्थितं भवति, तस्य दक्षिणं चक्रमारुह्य अनसोऽधिनिर्वपति’ । १२।१।७।१५. * **देशः** पात्राणि ऋत्विजश्च एकस्मिन् प्रयोगे ये उपयुक्ताः, प्रयोगान्तरे ते वा अन्ये वा इच्छया प्रयोक्तव्याः, उपयुक्ता अपि यातयामा न भवन्ति । ‘कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः । न ते निर्माल्यतां यान्ति विनियोज्याः पुनःपुनः ॥’ भाट्ट. ११।३।१२. * **देशः** ‘समे दर्शपूर्णमासाभ्यां यजेत’ इति एकस्मिन् प्रयोगे तन्त्रम् । वि. ११।२।१, * **देशस्य** नियमविधिः चातुर्मास्येषु वैश्वदेवपर्वणि ‘प्राचीनप्रवणे वैश्वदेवेन यजेत’ इति । ४।२।९.

* **देशान्वयनिमित्तेन** साहित्येन कालान्वयसाहित्यानवगतिः । सु. पृ. ७३४.

* **देशादिसंबन्धं** विधातुम् ‘समे यजेत’ इत्यादिः दर्शादीनां पुनर्विधिः कर्मानुवादः, इति न कर्मभेदमावहति । वि. २।३।१३.

* **देशकर्तृविषये** अनियमः कर्मसु भिन्नेषु । भा. ११।३।१२।३३.

* **देशकालयोः** सिद्धवदाकाररूपोद्देश्यत्वेऽपि स्वारसिकप्रवृत्तिविषयत्वाऽऽपादकप्रयोजनाकाररूपेण उद्देश्यत्वाभावात् स्वरूपतश्च सिद्धवत्कृत्य निर्देशेऽपि कर्माङ्गत्वेन अप्राप्तत्वात् विधेयत्वोपपत्तिः । सु. पृ. ९५८.

* **देशकालकर्तारः** तन्त्रं अङ्गेषु दर्शपूर्णमासयोः । भा. ११।२।२।३,८–११, * **देशकालकर्तारः** तन्त्रं प्रधानेषु दर्शपूर्णमासादिषु । ११।२।१।१–२,४–७, * **देशकालकर्तॄणां** नियमविधिः ‘दर्शपूर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः’ इति । ४।२।९।२३–२४. * **देशकालकर्तॄणां** प्रयोगशेषत्वम्, न तु आग्नेयादिविधिशेषत्वम् । वि. ११।२।२.

* **देशकालकर्त्रादीनामैक्ये** न्यायेन प्राप्ता तन्त्रता । व्यवहारमयूखः. पृ. ५९.

* **देशकालकर्त्रैकत्वं** अङ्गानां प्रधानैः सह । भा. ११।२।२।३,८–१२.

* **देशकालकर्तृभेदोऽपि** अङ्गप्रधानयोर्वचनेन भवति । भा. ११।३।१।१.

* **देशकालपरिमाणमपि** लोक–ज्योतिःशास्त्रव्यवहारसिद्ध्यर्थं दर्शनगणितसंप्रदायानुमानपूर्वकम् । वा. १।३।१।२ पृ. १६७.

⧗ **‘देशकालवयोऽवस्थाबुद्धिशक्त्यनुरूपतः । धर्मोपदेशो भैषज्यं वक्तव्यं धर्मपारगैः ॥’ इति न्यायः ।** स्पष्टोऽर्थः । **साहस्री. ५३२.**

* **देशतस्तुल्यानि** दर्शपूर्णमासयोः अङ्गानि प्रधानानि च । ‘समे दर्शपूर्णमासाभ्यां यजेत’ इति । प्रधानैः सह अङ्गानां एकदेशकालकर्तृकत्वं वक्ष्यति, ‘अङ्गानि तु विधानत्वात्’ (११।२।८) इत्यत्र । भा. ११।१।१०।५६. * **देशतः** वाचनिकी व्यवस्था यथा श्रौते ‘वरुणप्रघासेषु उत्तरे विहारे अध्वर्युरष्टौ हवींष्यासादयति, मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्’ इति । स्मार्तेऽपि ‘नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके । कुलीरसंस्थिते भानावुपाकुर्यात्तु दक्षिणे ॥’ इति बृहस्पतिः । बाल. पृ. १८. * **देशतो** व्यवस्थारूपः प्रतिषेधो यथा ‘कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन । येऽपीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे ॥’ इति त्रिकाण्डमण्डने । बाल. पृ. ३४.

* **देशपरिमाणम्** । ‘तिर्यग् यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः । प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला ॥ हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम् । तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम् ॥’ सु. पृ. १२८.

⧗ देशपात्रादीनामुपयुक्तानां प्रयोगान्तरे उपादानेऽपि न दोषः ॥

लौकिकेषु यथाकामी, संस्कारार्थालोपात् । ११।३।१२।३५ ॥

भाष्यम्— इह लौकिकार्था उदाहरणम् । यथा देशः ‘ समे दर्शपूर्णमासाभ्यां यजेत ’। कर्तारः ‘ दर्शपूर्णमासयोर्यज्ञक्रतोः चत्वार ऋत्विजः ’ । स्रुगादीनि च पात्राणि । तेषु विचारः । किं प्रतिप्रयोगमन्यान्युपादेयानि, उत तानि वाऽन्यानि वोपादाय प्रयोग इति । किं प्राप्तम् ? अन्यान्यन्यानि उपादेयानीति । किं कारणम् ? निरिष्टकेन पुनः क्रियां शिष्टा नाचरन्तीति । एवं प्राप्ते, ब्रूमः । लौकिकेषु यथाकामी, तानि वाऽन्यानि वा, अनियमः । कुतः ? संस्कारानर्थलोपात् । न कश्चित्पूर्वस्मिन् प्रयोगे कर्त्रादीनां संस्कारः कृतः, योऽन्योपादाने लुप्येत । नाप्यर्थलोपः । अन्यैरपि हि शक्यते प्रयोगः कर्तुम् । तस्मादनियमः । अथ यदुक्तं निरिष्टकेन शिष्टा यागं नाचरन्तीति । एतैराचरन्तीति । तस्मान्नैष दोषः । ननु ‘ऋत्विगाचार्यौ नातिचरितव्यौ’ इति स्मरन्तीति । पुरुषधर्मोऽसौ, न कर्मधर्मः । कर्मसंयोगाभावात् प्रकरणाभावाच्च । देशेषु कर्तृषु च पर्यवसितम् । पात्रेषूत्तरा कथा करिष्यते ।

सोम— आह्वानभेदवत् देशादीनामपि भेदः इत्युत्थितेः **संगतिः** । (निरिष्टकेन इति भाष्यादौ–) नितरां इष्टं अनेन इति निरिष्टम्, निरिष्टमेव निरिष्टकं एकस्मिन् कर्मणि उपयुक्तम् । **सूत्रार्थस्तु**– लौकिकेषु देशादिषु पूर्वप्रयोगकृतस्य प्रयोगान्तरे उपजीव्यस्य संस्कारस्य अभावे अन्योपादानेऽपि संस्कारलोपाभावात् अन्यैरपि प्रयोगनिर्वृत्त्या अर्थलोपाभावाच्च यथाकामी इति ।

वि—‘ देशपात्रर्त्विजोऽन्यस्मिन् प्रयोगेऽन्य उतैच्छिकाः ।, भुक्त्यर्थपर्णवत् तेऽन्ये, वासोवत् ते स्युरैच्छिकाः ॥ ’

भाट्ट—समादिदेशानामध्वर्य्वादिऋत्विजां स्रुवादिपात्राणां च प्रतिकर्म प्रतिप्रयोगं च भेद एव । इतरथा निरिष्टकोपधाने शिष्टाचारविरोधात् । इति प्राप्ते, ‘ कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः । न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः ॥ ’ इतिवचनेन अत्र विनियुक्तविनियोगेऽपि शिष्टाचारविरोधाभावादनियमः । न च ‘ ऋत्विगाचार्यौ नातिचरितव्यौ ’ इति वचनेनातिचारनिषेधात् ते एवेति नियमः शङ्क्यः । अस्याप्रकरणस्थतया पुरुषार्थरूपस्य क्रत्वर्थत्वे प्रमाणाभावेन अन्यकरणे क्रतुवैगुण्यानापत्तेः । तस्यान्यत्र व्यासक्तत्वे क्रोधोत्पादकव्यापाररूपातिचारासंभवेन पुरुषार्थनिषेधस्याप्यनापत्तेश्च । न चैवमेकत्वपक्षे व्यक्तेरेकत्वेन आतिथ्याबर्हिःप्रोक्षणन्यायेन सकृत्कृतैरेव वरणसंमार्जनादिसंस्कारैः सर्वकर्मसु कार्यसिद्धेः प्रतिप्रयोगं वरणाद्यननुष्ठानापत्तिः, व्यक्त्यैकत्वस्य नैयत्याभावेन आतिथ्याबर्हिःप्रोक्षणन्यायाभावात् । अग्निसंमार्गवत् व्यक्त्यैकत्वनैयत्येऽपि वरणादेः प्रयोगान्तरे प्रसङ्गसिद्धयनापत्तेश्च । अवसितमृत्विक्षु देशे च । पात्रेषु तु चिन्त्यते ।

मण्डन— ‘ देशः कर्ताऽन्यः स वऽन्यप्रयोगे । ’

शंकर— ‘ऋत्विग्देशभिदाऽपि च । ’ ऐच्छिकी ।

⧗ देशपृथक्त्वान्मन्त्रोऽभ्यावर्तते । १२।१।२०।४५॥

आतिथ्यायां उपसत्सु अग्नीषोमीये च बर्हिः साधारणम् । तस्य ‘ ऊर्णाम्रदसं त्वा स्तृणामि ’ इति स्तरणस्य मन्त्रः अभ्यावर्तते पृथगेव प्रयुज्यते । देशपृथक्त्वात् । आतिथ्यायाः प्राग्वंशः उपसदां च, अग्नीषोमीयस्य तु उत्तरवेदिसमीपः । तस्मात् आवृत्तिः स्तरणमन्त्रस्य इति सिद्धान्तः । **के.**

* **देशबद्धमुपांशुत्वं** (देशसंबद्ध इति च पाठः) इति नवमाधिकरणन्यायेन (९।१।६।२०) प्रकृतस्य स्वरस्य यज्ञभागधर्मतया स्थितत्वात् यज्ञभागपतितस्य अपूर्वस्यापि अङ्गस्य प्राकृतस्वराख्यधर्मलाभोपपत्तेः । **सु. पृ. ११८२.**

* **देशभाषा**ऽपभ्रंशपदानि हि विप्लुतिभूयिष्ठानि न शक्यन्ते विवेक्तुम् । **वा.** १।३।५।१० पृ. २२६.

* **देशलक्षणा** भवति यथा ‘ अग्नौ तिष्ठति ’ ‘ कूपे तिष्ठति ’ इति (अग्निदेशे कूपदेशे इत्यर्थः) । **भा.** ७।२।१।१२, * देशलक्षणा । ‘ रजनीं मे कण्डूयति,

तिलको मे स्पन्दते ’ इति रागाभावे तिलकाभावे च तद्देशलक्षणया भवन्ति वक्तारः । ८।४।५।२८.

* **देशविधिरयं** प्रयोगविधिरेव ‘ अप्सु अवभृथेन चरन्ति ’ इति । भाट्ट. ११।२।७. * देशविधिः दर्शपूर्णमासादौ नियमार्थः । कर्तृदेशकालविषयः इत्यत्र द्रष्टव्यम् । वि. ४।२।९.

* **देशविधिसरूपः** अर्थवादः ‘ षट्त्रिंशत्प्रक्रमा प्राची त्रिंशज्जघनेन चतुर्विंशतिः पुरस्तात् ’ इति विधौ वाक्यशेषः, ‘ इयति शक्ष्यामहे अस्यां कर्तुम् ’ इति । बाल. पृ. ५७.

* **देशविशेषो** लक्ष्यते ‘ अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि ’ इत्यनेन । व्यवहारमयूखः पृ. ५१.

* **देशसंनिधेः** कर्मभेदकत्वं नास्ति । भा. २।३। १३।२६.

* **देशसंबद्धमुपांशुत्वम्** (देशबद्ध—इत्यन्यत्र पाठः) इत्यत्र ‘ त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति ’ इति उदाहृत्य यज्ञभागधर्मो वा एतदुपांशुत्वं पदार्थधर्मो वा इति संदिग्धे, यज्ञस्य फलवत्त्वेन धर्मप्रयुक्तसामर्थ्यात् यज्ञस्य यत् प्राचीनं इति व्यवहितेनापि यज्ञशब्देन प्राचीनशब्दस्य अन्वयप्रतीतेः श्रुत्या च प्राग्देशवाचिनः प्राचीनशब्दस्य लक्षणया तद्देशपदार्थपरत्वायोगात् यज्ञभागधर्मत्वं पूर्वपक्षयित्वा प्राचीनशब्दस्य वीप्सा किञ्चिच्छब्दसमभिव्याहृतयच्छब्दान्वयात् वीप्सायाश्च बहुविषयत्वेन एकस्मिन् देशे अनुपपत्तेः लक्षणया अग्नीषोमीयप्राग्देशपदार्थपरत्वस्यैव न्याय्यत्वात् पदार्थधर्मता इति सिद्धान्तितम् । सु. पृ. ७३०.

देशसंबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्, तस्य च तत्र भावात् । ९।१।६।२०॥

ज्योतिष्टोमे ‘ त्सरा वा एषा यज्ञस्य तस्माद् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेन उपांशु चरन्ति ’ इति श्रूयते । अग्नीषोमीयात् पशोः प्राचीनः योंऽशः यज्ञस्य, सा वै त्सरा छद्मगतिः शनैः पदविन्यासः शकुनिग्राहकस्येव । तस्मात् तदानीं उपांशुना स्वरेण मन्त्रा उच्चारणीयाः इति श्रुत्यर्थः । अत्र किं अग्नीषोमीयात् प्राक्तनानि यानि कर्माणि, तत्प्रयुक्तं उपांशुत्वम्, उत परमापूर्वप्रयुक्तं इति विचारे सिद्धान्तमाह । उपांशुत्वं देशसंबद्धं श्रुतं अग्नीषोमीयात् पशोः यत् प्राचीनं कर्मजातम् । स उपांशुत्वस्य देशः । तेन तत् संबद्धं श्रुतम् । अग्नीषोमीयात् इति पञ्चमीश्रुत्या येषां कर्मणां निर्देशः, तेषां कर्मणां पञ्चमीश्रुतिनिर्देशात् उपांशुत्वं धर्मः स्यात् । अथवा ‘ यत्किञ्चित् प्राचीनमग्नीषोमीयात् ’ इति श्रुतं वाक्यमेव श्रुतिशब्देन गृह्यते । श्रुतिनिर्देशात् तेन वाक्येन निर्देशात् । अथवा लक्षणया अग्नीषोमीयप्राग्भाविपदार्थापूर्वं श्रुतिशब्देन ग्राह्यम् । तादृशमपूर्वं निर्दिश्य उद्दिश्य उपांशुत्वं विधीयमानं तदर्थं स्यात् । तस्य च अवान्तरापूर्वस्य च तत्र तेषु अग्नीषोमीयप्राग्भाविपदार्थेषु भावात् सत्त्वात् । तस्मात् अग्नीषोमीयपशुप्राक्तनकर्मापूर्वप्रयुक्तं उपांशुत्वं इति सिद्धान्तः ।

यज्ञस्य वा, तत्संयोगात् । २१ ॥

उपांशुत्वं अग्नीषोमपशुप्राक्तनकर्मप्रयुक्तं इति सिद्धान्तपक्षव्यावृत्त्यर्थः वाशब्दः । उपांशुत्वं यज्ञस्य । यज्ञजन्यपरमापूर्वप्रयुक्तमुपांशुत्वम् । तत्संयोगात् ‘ त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति ’ इत्यत्र यज्ञस्य यत् प्राचीनं इति यज्ञपदस्य तेन प्राचीनपदेन यज्ञप्राग्भागवाचिना संयोगात् संबन्धात् भागद्वारा भागिनो यज्ञस्यैव उपांशुत्वप्रयोजकत्वस्य युक्तत्वात् । प्राचीनपदं प्राचीनं यज्ञभागं श्रुत्या वदति प्राचीनभागगतकर्माणि तु लक्षणया । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा । तस्मात् परमापूर्वप्रयुक्तमुपांशुत्वं इति पूर्वः पक्षः ।

अनुवादश्च तदर्थवत् । २२ ॥

‘ त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति ’ इत्यत्र ‘ यज्ञस्य त्सरा एषा ’ इत्यन्वयस्वीकारे यद्यपि उपांशुत्वं अग्नीषोमीयप्राग्भागवर्तिपदार्थानामिति ज्ञातुं शक्यम्, तथापि न तद्देशगतानां पदार्थानामर्थेन क्रियते, किन्तु तद्देशाभिगतस्य यज्ञस्यार्थेन गम्यते । ‘ त्सरा वा एषा यज्ञस्य यत् प्राचीनमग्नीषोमीयात् ’ इति हि अनुवादः अनुवादरूपः अर्थवादः । तच्च अर्थवादवाक्यं अर्थवत् परमापूर्वप्रयोजक-

त्वबोधनेन सफलम् । तस्मात् परमापूर्वप्रयुक्तमेव उपांशुत्वं इति पूर्वः पक्षः ।

इतः परं (२३–२४) सूत्रद्वयं प्रकृताधिकरणगुणत्वेन भाष्यादौ व्याख्यातमपि अन्तरागर्भिणीत्वेन अधिकरणान्तरत्वेनापि व्याख्यातम् । ततोऽस्माभिः अधिकरणान्तरत्वेनैव व्याख्यास्यते प्रदेशान्तरे इति ध्येयम् ।

तद्देशानां वा, संघातस्याचोदितत्वात् । २५ ॥

वाशब्दात् पूर्वपक्षस्य व्यावृत्तिः । उपांशुत्वं न परमापूर्वप्रयुक्तम्, किन्तु तद्देशानाम् । सः अग्नीषोमीयात् प्राक्तनः देशः येषां कर्मणां ते तद्देशाः, तेषां तद्देशानां कर्मणां उपांशुत्वं स्यात् प्राचीनपदार्थप्रयुक्तमुपांशुत्वं स्यात्, न ग्रहयागसंघातप्रयुक्तम्, न ग्रहयागसंघातजन्यपरमापूर्वप्रयुक्तमित्यर्थः । संघातस्य ग्रहयागसंघातस्य यो भागः प्राचीनः, तस्य उपांशुत्वसंबन्धेन अचोदितत्वात् चोदनाऽभावात् । ‘ त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् ’ इति वाक्ये यज्ञस्य यत् प्राचीनं इति नान्वयः शक्यः, तस्मादितिपदेन व्यवधानात् । तस्मान्न परमापूर्वप्रयुक्तमुपांशुत्वम्, किन्तु यानि अग्नीषोमीयात् प्राक्तनानि दीक्षणीयादिप्रधानवर्जं अङ्गानि, तदपूर्वप्रयुक्तं इति सिद्धान्तः । **के.**

* **देशसंयोगनिमित्तायामपि** आख्यायां देशान्निर्गतस्य तदाख्या न विरुद्धा । यत एषा योगाख्या योगमात्रापेक्षा न भूतवर्तमानभविष्यत्संबन्धापेक्षा । यतो दृश्यते मथुरामभिप्रस्थितो माथुर इति, मथुरायां वसन्, मथुराया निर्गतश्च । **भा.** १।३।७।२१.

* **देशसंस्कारकं** आतिथ्याबर्हिषः अग्नीषोमीयार्थं उत्तरवेदिसमीपे स्तरणम् । **भा.** १२।१।२०।४४.

* **देशसामान्यम्** (क्रमः) एकदेशत्वाख्यं इति, बुद्धिविपरिवृत्त्याख्यसंनिधिरूपः क्रमः प्रतीयते । **सु.** पृ. ११९७. * **देशसामान्यात्** देवतासामान्यं बलीयः, तेन शुचिदेवत्ये आग्नेयस्य विध्यन्तः, आग्नावैष्णवे च अग्नीषोमीयस्य । **भा.** ८।३।१।२. * ‘ तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः । पाठानुष्ठानसादेश्याद् विनियोगस्य कारणम् ॥ ’ (पाठसादेश्यं अनुष्ठानसादेश्यं चेति) । **वा.** ३।३।५।१२.

* **देशीयभाषासु** काव्ये चतुर्विंशत्यक्षरसंख्यया गायत्रीछन्दस्कत्वं भवति । **वि.** ८।३।६.

* **देहः** महाभौतिकः । ‘ महाभौतिकदेहस्था यथाऽऽत्मानः सचेतनाः । कंचिदर्थं विवक्षन्ति न विवक्षन्ति चापरम् ॥ ’ **वा.** ३।१।७।१३ पृ. ७०२, * ‘ जरायुजादयो **देहा** दृष्टा भुवि चतुर्विधाः । ’ ३।१।७।१३ पृ. ७०२. * **देहानां** तैजसानामपि ‘ एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति । स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ॥ ’ इति मानवाभिधानेन चेतनाधिष्ठितत्वं ज्ञायते । (पथा ऋजुना देवयानेन) । **सु.** पृ. १००९.

⧗ **देहाधोमुखत्वन्यायः** । यया वाताद्युपाधिकृतस्य स्वदेहे अधोमुखत्वादेस्तदपगमे अपगमः । **साहस्री.** ३५३.

⧗ **देहकेशन्यायः** । चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यः विलक्षणानां केशनखादीनामुत्पत्तिर्दृश्यते, तथा चेतनात् ब्रह्मणः अचेतनस्यापि जगतः उत्पत्तिः स्यात् । इदं २।१।५।६ ब्रह्मसूत्रशांकरभाष्ये स्पष्टमुक्तम् । **साहस्री.** ८९१.

* ‘ **देहभेदप्रकाराश्च** कर्मशक्तिवशानुगाः । प्रकृत्यारम्भवैचित्र्याद् दृश्यन्तेऽपरमात्मनाम् ॥ पार्थिवावयवप्रायाः शेषतोयाद्यनुग्रहात् । जरायुजादयो देहा दृष्टा भुवि चतुर्विधाः ॥ भूतान्तरानुबद्धेन तोयेनैव विनिर्मिताः । श्रूयन्ते वारुणे लोके देहाः स्वच्छाङ्गलक्षणाः ॥ अन्तरिक्षे च बहवः प्राणिनो वातनिर्मितैः । भ्रमन्ति लघुभिः सूक्ष्मैर्देहैर्भूम्याद्यनुग्रहात् ॥ स्वर्लोके तैजसप्राया देहाः शुद्धप्रभाऽन्विताः । आप्यायन्ते विकीर्णेन भानवीयेन तेजसा ॥ तथा व्योमशरीरोऽपि परमात्मा श्रुतौ श्रुतः । इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः ॥ रूपस्पर्शादयो येऽपि महाभूतगुणाः स्थिताः । प्रत्येकमात्मनां तेऽपि देहाः संभोगहेतवः ॥ शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते । तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥ तथर्ग्वेदादयो देहाः प्रोक्ता येऽपि पृथक्पृथक् । भोग्यत्वेनाऽऽत्मनां तेऽपि चैतन्यानुगताः सदा ॥ ’ **वा.** ३।१।७।१३ पृ. ७०२–०३.

⧗ **देहलीदीपन्यायः ।** अयं न्यायो यथा शालाद्वयमध्यवर्तिदेहलीनिहितदीपः शालाद्वयं स्वकिरणमण्डितं करोतीति दृष्टान्तभूतः । किंच 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रस्थोपदेशपदार्थस्य एकाचपदार्थे अनुदात्तपदार्थे चान्वय इति । अयं च न्यायः अन्वयविषये एव प्राय उदाह्रियते वृद्धैरिति बोध्यम् । **साहस्री.** २४६.

* 'अभयं सर्वभूतेभ्यो मत्तः' इतिमन्त्रस्थं 'मत्तः' इति पदं **देहलीदीपन्यायेन** हृदये निधाय 'मत्तः सर्वं प्रवर्तते' यतः तस्मात् इति हेतुमाह । आरुणेय्युपनिषत्–शंकरानन्दः, * 'संपश्यन् ब्रह्म परमं याति नान्येन हेतुना ।' न याति इति देहलीदीपन्यायेन संबध्यते (संपश्यन् याति, अन्येन न याति इति यातिपदस्योभयत्रान्वयः) । शंकरानन्दः कै. उ. १।१०.

* **दैक्षः** इत्यग्नीषोमीयः (पशुः) उच्यते दीक्षासंबन्धात् । भा. ८।१।६।१३. * दैक्षः पशुः यो हि प्रकृतिभूतः पशूनाम्, स दर्शपूर्णमासविकारो भवति । इतरे तु प्राणिद्रव्यकत्वसामान्यात् तद्विकाराः । वा. ३।६।७।१९.

⧗ **दैक्षस्य चेतरेषु । ८।१।६।१३॥**

दीक्षायां भवः दैक्षः अग्नीषोमीयः पशुः । तस्य विध्यन्तः इतरेषु पशुषु सवनीये निरूढे सौम्यादौ च । आलभतिचोदनासामान्यात् पशुत्वचोदनासामान्याच्च । तस्मात् पशूनां प्रकृतिः अग्नीषोमीयः पशुः । **के.**

* **दैक्षे** अहनि ऋत्विग्वरणं वषट्कर्तॄणामेव, न सर्वेषाम् । **संकर्ष.** ३।४।९. * दैक्षे पशौ उपभृद्द्वयं शुद्धाज्यपृषदाज्यधारणार्थं ग्राह्यं एककाले एव च ग्रहणम् । न तु प्रयाजाज्यसमानयनोत्तरं तस्यामेव उपभृति पृषदाज्यग्रहणम् । **भाट्ट.** ५।२।८. * दैक्षे पशौ (अग्नीषोमीये) श्रुतं पशोः शामित्रदेशे नयनकाले वपाऽऽनयनकाले च यत् उल्मुकस्य नयनं प्रत्याहरणं च, तत् वाजपेये प्राजापत्यानां क्रतुपशूनां च तन्त्रम्, तस्य श्रपणार्थत्वात् । **संकर्ष.** १।१।९. * दैक्षे पशौ स्वरुः अञ्जनप्रोक्षणादीनां न प्रयोजकः । **भाट्ट.** ४।२।१. * दैक्षे हृदयाद्यभिघारणार्थं प्रयाजशेषधारणं तत्पात्रं च न कर्तव्यम् । वि. ४।१।१४.

* **दैक्षानुबन्ध्यक्रमविचारे** आदौ दैक्षस्य तदुत्तरमनूबन्ध्यस्य प्रकृतिदृष्टपौर्वापर्यस्यैव नियामकान्तराभावे नियामकत्वाङ्गीकारात् । साद्यस्क्रे सह पश्वालम्भे सवनीयोत्तरम् । के. (५।१।६।१३ वर्णकम् २ भा.)

* **दैक्षादिवाक्ये** पशोर्विनष्टत्वेन साक्षात् देवताऽन्वयायोगात् अगत्या सापेक्षतद्धिताङ्गीकारेण प्रदेयप्रकृतित्वोपपत्तिः । सु. पृ. १५३७.

⧗ **दैक्षन्यायः ।** अग्नीषोमीयस्य पशोः धर्माः सवनीयादिषु अतिदेष्टव्याः ॥

दैक्षस्य चेतरेषु । ८।१।६।१३॥

भाष्यम्-- इह पशुबन्धा उदाहरणम् । सवनीयो निरूढः पशुः, सौम्यादयश्च । तेषु किं दार्शपौर्णमासिको विध्यन्तः, उत दैक्षस्येति । दैक्ष इत्यग्नीषोमीय उच्यते, दीक्षासंबन्धात् । किं प्राप्तम् ? यथोक्तेन न्यायेन (प्रयाजानुयाजाघारादिलिङ्गदर्शनरूपेण) दार्शपौर्णमासिक इति । तथा प्राप्ते, उच्यते । दैक्षस्य च इतरेषु पशुषु सवनीयादिषु अग्नीषोमीयस्य विध्यन्तः । आलभतिचोदनासामान्यात् पशुत्वचोदनासामान्याच्च । तच्च दर्शयति 'वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने, अङ्गैस्तृतीयसवने' इति । वपापुरोडाशाङ्गप्रचारं दर्शयति । भेदेन च तथा क्वचित् 'औदुम्बरो यूपो भवति' इति यूपं दर्शयति । तस्मात् अग्नीषोमीयः पशूनां प्रकृतिः ।

सोम-- पूर्वेण न्यायेन सवनीयादिषु ऐष्टिकविध्यन्तप्राप्तेः **संगतिपूर्वपक्षौ ।**

वि— 'सवनीयादिके दार्शो दैक्षो वा, प्रकृतित्वतः । आद्यो, ऽन्त्यो लिङ्गतोऽन्यत्र विकृतिः प्रकृतिर्भवेत् ॥'

भाट्ट-- अन्येषु तु पशुषु सवनीयादिषु दैक्षस्यातिदेशः आलभतिचोदनाकत्वपशुद्रव्यकत्वाद्यधिकतरसादृश्यात् यूपाद्यधिकधर्मलाभाच्च । अत एव 'वपया प्रातःसवने चरन्ति' 'औदुम्बरो यूपः' इत्यादि लिङ्गम् । ८।१।३.

मण्डन-- 'दैक्षस्य चान्ये पशवो विकाराः ।'

शंकर--'दैक्षाच्चान्यपशुष्वयम्' अयं विध्यन्तः । ७.

* सवनीयादिष्वपि साङ्गं प्रयोगं त्रेधा विभज्य मन्द्राद्युच्चारणानां **दैक्षन्यायेन** उचितत्वात् तदतिक्रमेण

अनूबन्ध्याऽऽदिषु दैक्षन्यायातिदेशो न युक्तः इत्याशङ्क्य । सु. पृ. ११८०.

* **दैक्षप्रकरणे** दार्शपूर्णमासिकप्रयाजादिदर्शनात् दैक्षे पौर्णमासधर्माति-(दर्शधर्माति-)देशावगतेः स्वोपकारस्य स्वप्रकरणे प्राकृतप्रमाणसिद्धस्य उपलम्भः । सु.पृ.११९४.

* **दैवानि** कर्माणि उदगयन-पूर्वपक्ष-अहः-पुण्याहेषु कर्तव्यानि । के. ६।८।५।२३, * **दैवात्** एकस्य स्वकालाद् भ्रंशेऽपि तदनुसारेणान्येषां भ्रंशो न कार्यः । यथा चातुर्मास्येषु सांतपन्याः भ्रंशेऽपि अग्निहोत्रस्य स्वकालात् भ्रंशो न कर्तव्यः । ५।१।१७।३०–३४.
* **दैवस्य** अधिकः पुरुषकारात् प्रभावः । सु. पृ. १३२.
* **दैवे** कर्मणि दर्भाणां प्रागग्रत्वं उदगग्रत्वं वा, पैतृके कर्मणि तु दक्षिणाग्रत्वम् । वि. ३।४।४.

* **दैवतैरवदानैः** दैवतानां सौविष्टकृतैः सौविष्टकृतानां ऐडैश्चैडानां अनुसमयः एकदेवताकपशुगणे वाजपेये प्राजापत्यपशुषु । भा. ५।२।६।१०–१२.

* **दैवतावदानं** सौविष्टकृतावदानं ऐडावदानं इति पदार्थभेदः ‘दैवतान्यवदाय’ इत्यादिकात् क्रमान्यत्वविधायकाद्वचनात् । असंबन्धिपदार्थान्तरव्यवधाने च एकपदार्थता न संपद्यते । अतश्च एकदैवत्ये पशुगणे दैवतावदानादिना प्रत्येकमनुसमयः, अन्ते च तन्त्रेण देवताहोमः । स्विष्टकृदिडाभक्षणे तु तन्त्रेणैव । वस्तुतस्तु असंबन्धिपदार्थान्तरव्यवधानेऽपि पञ्चावत्तहोमसंपादकत्वेन दैवतावदानस्यापि प्रदानावयवत्वोपपत्तेः विभिन्नदेवताकस्थलेऽपि दैवतावदानादिप्रदानान्तेन अनुसमयः, एकदेवताके तु पदार्थावयवानामेवानुसमय इति न कोऽपि विरोधः । भाट्ट. ५।२।६.

* **दैवताद्यवदानेषु** पदार्थानुसमयः पशौ । वि. ५।२।६.

* **दैवतैक्यवत्** ‘अग्नीषोमौ देवता’ इत्यत्र यथा व्यासक्तयोर्देवत्वात् दैवतैक्यम्, तथा ‘यजेत’ इत्यत्र दंपत्योरेकमेव कर्तृत्वम् । वि. ६।१।४.

⌛ **‘दोषो नानुमिते त्वसौ’ इति न्यायेन** आर्थिके प्रतिपत्तिविधौ धारणप्रयोजकत्वस्य अदोषत्वात् । (प्रयाजशेषाभिघारणवाक्ये) । मुरारि. भा. पृ. ११७३.

* महांश्चैव **दोषो** यच्छिष्टा वर्जयन्ति । भा. ६।२।५।२०,
* यश्चोभयोः पक्षयोर्दोषः, न तमेकश्चोद्यो भवति । १०।१।९।२५, * यत्र दोषः, तत्र दोषविघातार्थेन भवितव्यम् । १०।८।१८।६३. * ‘**दोषात्** त्विष्टिर्लौकिके’ इत्यादिसूत्रेण अश्वप्रतिग्रहेष्टिः लौकिकाश्वदाननिमित्ता इति पूर्वपक्षं कृत्वा ‘अर्थवादो वा’ इत्यादिसूत्रेण ‘वैदिकाश्वदाननिमित्ता’ इति सिद्धान्तितम् । पराक्रमः. २१।१–२.

⌛ **दोषात् त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् । ३।४।१०।२८॥**

‘वरुणो वा एतं गृह्णाति, योऽश्वं प्रतिगृह्णाति, यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेत्’ इति अश्वप्रतिग्रहेष्टिराम्नाता । सा किं लौकिके अश्वप्रतिग्रहे कर्तव्या, वैदिके वा इति विचारे, पूर्वपक्षमाह । इष्टिः अश्वप्रतिग्रहेष्टिः लौकिके मित्रादिसंप्रदानके अश्वदाने स्यात् । दोषात् तत्रैव जलोदरात्मकवरुणग्रहरूपदोषसंभवात् । वैदिके तु पौण्डरीकादौ अश्वदाने शास्त्रात् दानविधायकशास्त्रबलादेव दोषः न स्यात् । तस्मात् लौकिके अश्वप्रतिग्रहे दाने वा इयमिष्टिः स्यात् इति पूर्वः पक्षः ।

अर्थवादो वाऽनुपपातात्, तस्माद्यज्ञे प्रतीयेत । २९ ॥

अश्वप्रतिग्रहेष्टिः लौकिके अश्वप्रतिग्रहे अश्वदाने वा इति पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन परिहरन् सिद्धान्तमाह । ‘वरुणो वा एतं गृह्णाति’ इत्यादिः अर्थवादः इष्टिप्रशंसाऽर्थवादः, न तु दोषनिर्घातार्थवादः । कुतः ? अनुपपातात् ‘स एवैनं वरुणपाशान्मुञ्चति’ इति वाक्यशेषस्य मुख्यार्थे समावेशासंभवात् । नहि वस्तुतः अश्वप्रतिग्रहात् वरुणग्रहस्य जलोदररूपस्य उपपातः प्राप्तिर्भवति । ततश्च अश्वप्रतिग्रहात् जलोदरस्य अनुपपातात् अप्राप्तेः अर्थवाद एव सः इष्टिप्रशंसार्थः । तस्माद्धेतोः यज्ञे वैदिके अश्वप्रतिग्रहे विधिबलात् प्रायश्चित्तेष्टिः प्रतीयेत, न लौकिके अश्वप्रतिग्रहे । इति सिद्धान्तः । के.

* ‘दोषात् त्विष्टिर्लौकिके स्यात्’ इत्यधिकरणे अश्वप्रतिग्रहेष्टिः अश्वप्रतिग्रहवतः कर्मणः अङ्गम्, न स्वतन्त्रमिति स्थितम् । पराक्रमः. ८।१.

* **दोषापनयेन** यजमानस्य फलप्रतिग्रहणयोग्यता भवति। तपश्च दोषनिर्घातं करोति । वा. ३।८।३।९.

* **दोषार्थस्वतन्त्रार्थवादकल्प्यः** प्रतिषेधो यथा 'मिथ्याभिशंसने दोषो द्विः समो भूतवादिनः । मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन् ॥' इति । बाल. पृ. ३०.

* **दोषनिर्घातार्थं** अनियतनिमित्तकं नैमित्तिकं वैदिकं कर्म यथा 'योऽमावास्यां पौर्णमासीं वाऽतिपातयेत्, अग्नये पथिकृतेऽष्टाकपालं निर्वपेत्' इति । 'योऽमावास्यां पौर्णमासीं वाऽतिपातयेत् वैश्वानरं द्वादशकपालं निर्वपेत्' इति च । अनयोर्विकल्पः । बाल. पृ. ८५. * **दोषनिर्घातार्थः** नैमित्तिकः क्रत्वर्थः अधिकारविधिः द्विविधः विहितातिक्रमनिमित्तकः निषिद्धाचरणनिमित्तकश्चेति । पृ. १४. * **दोषनिर्घातार्थानां** प्रायश्चित्तानां ऐकार्थ्येन विकल्पः । विकल्पशब्दे अधिकरणम् । भा. १२।३।५।१६.

* '**दोष्णः** (दोस्–शब्दस्य दोषन् आदेशः) पूर्वार्धादग्नयेऽवद्यति, गुदस्य मध्यतः, श्रोण्या जघनतः' इति अनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृत् पशौ । भा. १०।७।३। १०–११.

* **दोहः** प्राचीनावीतिना प्रेताग्निहोत्रे कार्यः । दर्शादौ तु यज्ञोपवीतिना कार्यः । वि. ३।४।४, * **दोहौ द्वौ** । अमावास्यायां रात्रावेको दोहः प्रतिपदि प्रातरपरः । ३।६।८.

दोहयोः कालभेदादसंयुक्तं शृतं स्यात् । ३।६।८।२८॥

दर्शे सायंदोहः श्वः प्रातर्दोहश्चेति द्वौ दोहौ उक्तौ । शाखाहरणगोप्रस्थापनादयश्च दोहधर्मा उक्ताः । ते धर्माः प्रातर्दोहस्यापि भवन्ति, न वेति विचारे, अनेन सूत्रेण पूर्वपक्षोपन्यासः क्रियते । शृतं प्रातर्दुग्धं पयः दोहधर्मैः असंयुक्तं स्यात् संयुक्तं न स्यात् । प्रातर्दोहस्य ते धर्मा न भवेयुरित्यर्थः । कुतः ? दोहयोः द्वयोः यौ द्वौ कालौ तयोर्भेदात् । धर्माणां च सायंदोहसमीपे एव च पाठात् । सायंदुग्धस्य पयसः दधि क्रियते । प्रातर्दुग्धं पयश्च तथैव गृह्यते । दध्यर्थमेव दोहधर्माः, न पयोऽर्थाः । इति पूर्वः पक्षः ।

प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् । २९ ॥

पूर्वपक्षस्य निषेधाय वाशब्दः । प्रकरणस्य दर्शप्रकरणस्य अविभागात् विभागाभावात् । उभयोरेव दोहयोः प्रकरणं समानम् । न तत्र कश्चित् प्रकरणस्य विभागः । 'ऐन्द्रं दधि अमावास्यायाम्, ऐन्द्रं पयोऽमावास्यायाम्' इति उभयं साङ्गं अमावास्यायां प्रकरणाविभागेन चोदितम् । तदिदं कालशास्त्रं तत्संयुक्तस्य उभयप्रधानसंयुक्तस्य शाखाहरणादेरेव, न तु सायंदोहसंयुक्तस्यैव । दोहधर्माश्च सायंदोहस्य क्रमे आम्नाता इति वक्तुं न शक्यते । तस्मात् उभयदोहार्था एव शाखाहरणादयो धर्माः । अत्र सुबोधिन्याम् 'ऐन्द्रं दधि' इत्यादिकालशास्त्रं तत्संयुक्तस्य प्रधानस्यैव इति व्याख्यातम् । तत्संयुक्तस्य दधियागसंयुक्तस्य धर्मजातस्य अनुष्ठाने पूर्वेद्युःकालस्य शास्त्रं विधायकं इति तत्रानुष्ठानम्, न तु तावता दधिमात्रार्थता इति तु कुतूहले व्याख्यातम् । अस्माभिस्तु वार्तिकानुसारेण व्याख्यातम् । के.

* दर्शे सायंप्रातर्दोहयोरेकहविर्नाशेऽपि पञ्चशराव ओदनः प्रायश्चित्तम् । वि. ६।४।६.

* **दोहाधिकारे** अग्निहोत्रप्रकरणस्थे 'वत्समालभेत' इति न यागविधिः किन्तु स्पर्शमात्रविधिः । वि. २।३।६.

* **दोहधर्माः** शाखाहरणम्, गवां प्रस्थापनम्, गोप्रस्नावनम्, गोदोहनं इत्येवमादयः । भा. ३।६।८।२८, * दोहधर्माः सायंप्रातरुभयदोहार्थाः, न केवलं सायंदोहार्थाः एव । ३।६।८।२८–२९.

* **दोहनं** न तिसृणामेव गवाम्, किन्तु स्वगृहस्थितसर्वासामेव कार्यं हविर्भूयस्त्वार्थं सांनाय्यविषये सायम् । वि. ११।१।९, * दोहनं सांनाय्याङ्गम्, तत्साधनं वत्सापाकरणम्, तदङ्गं पलाशशाखाहरणम् । ४।२।१०.

* **दोहनातञ्चनादयः** सांनाय्यधर्माः । वि. ३।१।४.

* **दोहननिर्वापादयो** धर्माः यजुर्वेदे समाम्नाताः । वि. ३।३।६.

* **द्यावापृथिव्य** एककपालः आग्रयणे । स वैश्वदेविकैककपालप्रकृतिकः । तस्य धर्मः प्रसूनं बर्हिः । भा. १२।२।१४।३४. * **द्यावापृथिव्यस्य** अग्नीषोमीयविकृतित्वं पञ्चाक्षरत्वसाम्यात् । बाल. पृ. १२०. * द्यावापृथिव्यस्य जघनस्याप्यनुरोधेन मुख्यस्याप्यैन्द्राग्नादेः प्रसूनबर्हिर्नियमो विरोधाभावात् । आग्रयणे । आग्रयणेष्टिन्यायः । भा. १२।२।१४।३४.

* ‘ **द्यावापृथिव्यां** धेनुमालभेत, मारुतं वत्सम्, ऐन्द्रमृषभम् ’ । तत्र धेनुशब्दो नवप्रसूतिकामाचष्टे, वत्सशब्दो बालम्, ऋषभशब्दः पुमांसम् । एते धेन्वादिशब्दाः गोगतानेव तान् गुणानाहुः । अतस्ते मुख्यवृत्त्या गां विशिंषन्तः छागं बाधन्ते । तस्मादेते गोजातीया एव । वि. १०।२।२९.

* **द्यावापृथिव्यानुरोधेन** ऐन्द्राग्नवैश्वदेवयोः वैश्वदेवतन्त्रस्य न नियमः आग्रयणे । भा. १२।२।१५। ३५–३७.

* **द्यावापृथिव्याद्येककपालेषु** सकृदेव होतव्यम्, नावदानधर्मः । संकर्ष. २।२।१६.

* चातुर्मास्यवैश्वदेविकस्य विध्यन्तस्य आग्रयणगते **द्यावापृथिव्यैककपाले** वरुणप्रघासकायैककपाले च अतिदेशः । भा. ७।३।१०।२६–२७.

⧗ **द्युभ्वाद्यधिकरणन्यायेन** (१।३।१।१ ब्रसू.) आत्मशब्दस्य परमात्मन्येव मुख्यत्वं इति न च वाच्यम् । (द्युभ्वाद्यधिकरणे ‘ यस्मिन् द्यौः पृथिवी चान्तरिक्षम् ’ इतिमन्त्रगत आत्मशब्दः परमात्मवाचकः इति साधितम् । के.) । अद्वैत. २।१२।२२.

* **द्योतकः** उपसर्गः इत्येकः पक्षः, वाचक इत्यपरः । बाल. पृ. ४१.

* **द्योत्यः** अर्थः प्रादीनामुपसर्गाणाम् । सु. पृ. १४३९.

* **द्रवद्रव्यस्यावदाने** स्रुवः करणं सामर्थ्यात् । वि. १।४।२०. * **द्रवद्रव्याणां** लोकेऽपि क्वचित् पानादौ उपयोक्ष्यमाणानां ईषत्क्षारणसंस्कारं कुर्वन्ति । वा. १।४। ३।४ पृ. ३३३. * **द्रवद्रव्यादिकं** स्रुवादिना अवदातव्यम् । व्यवस्थाऽधिकरणम् । भा. १।४।१४।२५.

* **द्रवसमानवर्णद्रव्यकत्वं** इष्टिप्रकृतिलिङ्गम् । बाल. पृ. ११९.

* **द्रविडानां** राज्याधिकारयोग्येषु क्षत्रियेषु (राजन् शब्दस्य) प्रयोगो न विरोत्स्यते । वा. २।३।२।३ पृ. ५८४.

⧗ **द्रविडप्रणामन्यायः** । लघुना सिध्यतोऽर्थस्य गुरुणा साधनमनर्थकम् । द्रविडब्रह्मचारिणः प्रणामं कुर्वन्तः गोत्रप्रवरादिकं सर्वं पठन्ति, तेन प्रणामो दीर्घो भवति । अत्र लोके ‘ द्राविडी प्राणायामः ’ इति पठन्ति तदशुद्धम् । नहि द्रविडानां प्राणायामस्तादृशः । के.

* **द्रविडप्रसिद्धेस्तु** म्लेच्छप्रसिद्धित्वेन असाधकत्वात् । भाट्ट. २।३।२.

* **द्रव्यं** एव विशिष्टशक्त्युपेतं व्यापारशब्दवाच्यं भवति इत्यनेन न्यायेन क्रियाऽऽत्मनोः अत्यन्तभेदाभावेन आत्मसमवेतस्य अपूर्वस्य क्रियातः अत्यन्तभेदाभावात् साध्यसाधनसंबन्धोपपादकत्वं संभवति । सु. पृ. ६०५. * द्रव्यं क्रियार्थम्, यदि प्रयोजनवती क्रिया व्यक्तं सा द्रव्येण निर्वर्तयितव्या । तस्याः निर्वृत्तिः द्रव्यादृते न भवति इति तन्निर्वृत्तये द्रव्यमेषितव्यं भवति । तस्मात् क्रियार्थं द्रव्यम् । (इति द्रव्यस्य शेषत्वम्) । भा. ३।१।३।३.

⧗ **द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत ।** ३।१।५।११॥

दर्शपूर्णमासयोः ‘ स्फ्यश्च कपालानि च ’ इत्यादिना दश यज्ञायुधानि समाम्नातानि । ‘ स्फ्येनोद्धन्ति ’ ‘ कपालेषु श्रपयति ’ इत्यादिभिश्च तदुपयोगोऽप्युक्तः । किं योय इह शक्यते एभिः कर्तुं तस्मैतस्मै पदार्थाय एतानि उपयोज्यानि, उत यत् येन संयुक्तं तस्मै एव इति विचारे यत् शक्यते तस्मै इति पूर्वपक्षे सिद्धान्तमाह । चशब्दः पूर्वाधिकरणोक्तावहननादिदृष्टान्तार्थः । अवहननादिधर्मवत् स्फ्यादि द्रव्यं येन संयुक्तं तदर्थमेव चोद्येत चोदनया प्रतीयेत । उत्पत्तिसंयोगात् ‘ स्फ्येन उद्धन्ति ’ इत्यादिषु उत्पत्तिविधिवाक्येषु उद्धननादिकार्यविशेषेण संयोगस्य श्रवणात् । तस्मात् स्फ्यादीनां व्यवस्थयैव शेषत्वम् । के.

द्रव्यं त्यागाङ्गभूतत्वात् उद्देशाङ्गभूतदेवताऽपेक्षया प्रबलम् । **भाट्ट.** ४।१।७. * द्रव्यं नाम लिङ्गसंख्यायोग्योऽर्थः । **वा.** २।३।११।२४ पृ. ६१६, * द्रव्यं प्रज्ञानोत्तरकालमपि क्रियायां व्यापार्यते । गुणस्तु न पृथक् द्रव्यव्यतिरेकेण व्याप्रियते । ३।१।६।१२ पृ. ६९२, * द्रव्यं यत् इन्द्रवायुभ्यां दातव्यमिति संकल्पितम्, तस्य त्यक्तप्रायत्वात् अनीशो यजमानः कथमिव वक्ष्यति मित्रावरुणाभ्यामेतदेवेति । २।२।६।१९ पृ. ५२०. * द्रव्यं यागे गुणभूतं चोद्यते ! **भा.** १०।६।१७।६५. * द्रव्यं व्यक्तिः इति पर्याय एव । **बाल.** * द्रव्यं साक्षात् (क्रियायाः) साधनं गुणस्तत्परिच्छेदार्थः । **वा.** ३।१।६।१२ पृ. ६९५. * द्रव्यं साक्षाद्धि क्रियां प्रत्युपकरोति, गुणस्तु विशिनष्टि साधनम् । **भा.** ३।१।६।१२ पृ. ६९५. * द्रव्यं स्फ्यकपालादिकम्, तस्य शेषत्वं संभवति । **वि.** ३।१।३. * द्रव्यं हि प्रत्यक्षं चाक्षुषमेव इति नैयायिकाः । दर्शनस्पर्शनाभ्यां हि गुणत्यागेनापि द्रव्यग्रहणेन अन्वयव्यतिरेकाभ्यां द्रव्यस्यापि प्रत्यक्षता भवति । **ऋजु.** पृ. २५३. * द्रव्यं हि स्वभावत एव शेषभूतम् । **वा.** ३।१।३।३, * कार्ये हि प्रवर्तमानं द्रव्यं संस्कारं गृह्णाति नोदासीनम् । न च द्व्यवदानव्यतिरिक्तस्य हविषः कार्यमस्तीति न संस्कारमपेक्षते । ३।४।१४।४० पृ. ९७६. * गुणसमुदाय एव पृथिव्यादि द्रव्यं नातिरिक्तमिति केचित् । तन्न । **मणि.** पृ. २२. * नापि द्रव्यं स्वरूपेण सिद्धात्मकत्वात् कर्तव्यम् । **वा.** १।४।६।९ पृ. ३४१. * न ह्येकमेव द्रव्यं असकृत् त्यज्यते । ३।२।१२।३२, * न हि जात्या गुणेन च विना द्रव्यं उपलक्षयितुं शक्यम् । २।३।९।२०. * नियमादनियमाच्चार्जितं द्रव्यं पुरुषं प्रीणयति । **भा.** ४।१।२।२ वर्णकं ३, * भूतं द्रव्यम्, भव्यं कर्म । भूतस्य च भव्यार्थता न्याय्या । ६।१।१।१ पृ. १३४८, * द्रव्याणि अर्थं (प्रयोजनं) प्रति शेषभूतानि । ६।३।१९।३९. * द्रव्याणि कारकत्वेन प्रतीयन्ते तथापि तत्पदानि अविधायकान्येव । **वा.** ३।१।६।१२ पृ. ६९४.

⧗ द्रव्याणि त्वविशेषेणानर्थक्यात् प्रदीयेरन् । ४।१।४।७॥

तुशब्दः पूर्वाधिकरणोक्तप्रजापतिव्रतेभ्यः स्फ्यादिद्रव्याणां विशेषमाह । पूर्वपक्षसूत्रमिदम् । दर्शपूर्णमासयोः ‘ स्फ्यश्च कपालानि च ’ इत्यादिवाक्योक्तानि यज्ञायुधानि नाम स्फ्यादीनि द्रव्याणि अविशेषेण श्रुतानि । अङ्गत्वेन प्रधानत्वेन वा विशेषेण नैतानि श्रुतानि । ‘यज्ञायुधानि’ इति हि तेषां विशेषणं वाक्ये श्रुतम् । खननाद्यङ्गत्वे तु यज्ञायुधत्वस्य आनर्थक्यं प्रसज्येत । तथात्वे तु एतानि उद्धननायुधानीति वक्तव्यं स्यात् । तस्मात् अविशेषेण श्रुतानि द्रव्याणि वाक्यवैयर्थ्यप्रसङ्गात् प्रदीयेरन् अग्नौ प्रदेयद्रव्याण्येतानि स्युः । प्रजापतिव्रतानि तु यज्ञोपस्थित्यभावात् मा भूवन् क्रत्वर्थानि । स्फ्यादीनि द्रव्याणि तु यज्ञायुधत्वात् क्रत्वर्थान्येव साक्षात् । तस्मात् प्रदेयानीति पूर्वः पक्षः ।

स्वेन त्वर्थेन संबन्धो द्रव्याणां पृथगर्थत्वात्, तस्माद् यथाश्रुति स्युः । ८ ॥

सूत्रेण पूर्वपक्षे प्राप्ते सिद्धान्तसूत्रमिदम् । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । द्रव्याणां स्फ्यादीनां स्वेन अर्थेन स्वीयेनस्वीयेन उद्धननादिना प्रयोजनेन संबन्धः ‘स्फ्येनोद्धन्ति’ ‘कपालेषु श्रपयति’ ‘अग्निहोत्रहवण्या हवींषि निर्वपति’ इत्यादिश्रुत्या पृथगर्थत्वात् पृथक्पृथक्प्रयोजनत्वात् ज्ञायते । तस्मात् स्फ्यादीनि द्रव्याणि यथाश्रुति ‘स्फ्येनोद्धन्ति’ इत्यादिश्रुतिं अनतिक्रम्य स्वस्वार्थसाधकानि स्युः, न तु प्रदेयानि इति ।

चोद्यन्ते चार्थकर्मसु । ९ ॥

स्फ्यादीनि द्रव्याणि न प्रदेयानि, किन्तु उद्धननादिक्रियाङ्गानि इति सिद्धान्तोपष्टम्भकं सूत्रमिदम् । अर्थकर्मसु दार्शपौर्णमासिकेषु आग्नेयाष्टाकपालादियागेषु पुरोडाशादिद्रव्याणि चोद्यन्ते । स्फ्यादीनामपि प्रदेयत्वे तु पुरोडाशादीनां स्फ्यादीनां च समुच्चयो वा विकल्पो वा स्वीकर्तव्यः । तत्तु उभयमपि न संभवति, पुरोडाशादीनामुत्पत्तिशिष्टत्वात् स्फ्यादीनां चोत्पन्नशिष्टत्वात् । उत्पत्तिशिष्टस्य च उत्पन्नशिष्टात् बलीयस्त्वात् । तस्मात् स्फ्यादीनां उद्धननाद्यर्थत्वमेव न प्रदेयत्वम् । चकारः पूर्वोक्तहेतुना समुच्चयार्थः ।

अथवा अर्थकर्मशब्देन परिधानीयं नाम अन्त्येष्टिकर्म ग्राह्यम् । तत्र 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च' इत्युक्तम् । स्फ्यादीनां प्रदेयत्वे तु प्रेतस्य यजमानस्य यज्ञपात्रैर्दहनं न स्यात्, तस्मात् न तानि प्रदेयानि ।

लिङ्गदर्शनाच्च । १०॥

सिद्धान्ते हेत्वन्तरपरं सूत्रम् । चकारो हेतुसमुच्चयार्थः । 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इति आहुतिसंख्यारूपस्य लिङ्गस्य दर्शनात् स्फ्यादीनि न प्रदेयानि । तेषां प्रदेयत्वे तु चतुर्विंशतिराहुतयः पौर्णमास्यां स्युः, त्रयोविंशतिश्च अमावास्यायाम् । तस्मात् स्फ्यादीनि उद्धननाद्यर्थान्येव न प्रदेयानि । **के.**

* द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोऽन्धकारशब्दाः एकादश । गुणसमुदाय एव पृथिव्यादि द्रव्यं नातिरिक्तमिति **केचित् । तन्न ।** पृथिव्यादौ पाकादिना पूर्वरूपनाशस्य उत्तररूपोत्पत्तेश्च अनुभवसिद्धत्वात् । अन्ये तु अवयवसमुदायमेव अवयविनमाहुः । **तदपि न** । 'उत्पन्नो घटः' 'विनष्टो घटः' इत्यादिप्रतीतेः । **मणि.** पृ. २१–२२.

* द्रव्याणि हि द्विविधानि स्थावराणि जङ्गमानि च । तत्र स्थावरेषु विच्छेदो भवति । यथा वनस्पतौ पर्णे गृहीत्वा कृष्यमाणे न कृत्स्नः कृष्यते स्थावरत्वात् । **भा.** ९।१।८।२७ पृ. १६७१. * प्रतिपत्तिः द्रव्यं न प्रयोजयति । ११।४।९।३४ (३७ **के.**), * संस्काराः हि द्रव्यं कर्मयोग्यं कुर्वन्ति । ६।३।१८।३८, * गुणाश्चामूर्तत्वात् न क्रियया संबध्यन्ते । द्रव्येण एषां संबन्धो भवति । १०।२।२९।६८, * द्रव्यस्य अपचारे वैकल्पिकं द्रव्यान्तरं नोपादेयम् । ६।३।२।१२।२८–३०, * द्रव्यस्य अपूर्वविधिर्यथा 'गोदोहनेन पशुकामस्य प्रणयेत्' । **बाल.** पृ.२२, * द्रव्यस्य इतिकर्तव्यताकाङ्क्षा संख्याऽधिकरणवार्तिके निराकरिष्यते । **सु.** पृ. ७९७. * द्रव्यस्य औपदेशिकप्रतिनिधिकत्वेन भेदे सत्यपि कर्मभेदो नास्ति । व्रीहिग्रहणे नीवारग्रहणे वा न दर्शपूर्णमासयोर्भेदः । **के.** ६।३।३।११–१२. * द्रव्यस्य क्रत्वर्थेन निर्वापादिना प्रक्रान्तस्य क्रत्वर्थत्वं समाप्तिप्रतिपत्त्या अभिव्यज्यते । **सु.**

⧗ **द्रव्यस्य गुणेन न बाधः** । वायव्यपशौ उपदिष्टश्वेतगुणेन प्राकृताजद्रव्यस्य न बाधः ॥

नैमित्तिके तु कार्यत्वात् प्रकृतेः स्यात् तदापत्तेः । १०।२।३०।७०॥

भाष्यम्–– इदमामनन्ति 'वायव्यं श्वेतमालभेत भूतिकामः' इति । अत्र संशयः किमिहापि नाजः पशुः कर्तव्यः, उताजः पशुरिति । उच्यते । औत्पत्तिकोऽयं श्वेतगुणसंबन्धे श्वेतशब्दः । अतो यः कश्चित् श्वेतगुणसंबद्धः, स आलभ्यः । नहि श्वेतशब्दः प्रत्यक्षः सन् कुतश्चित् श्वेतद्रव्याच्चोदकेन आनुमानिकेन निवर्तयितव्यः । तस्मादजो गौरन्यो वा श्वेत आलब्धव्यः इति । एवं प्राप्ते, **ब्रूमः** । नैमित्तिके एतस्मिन् श्वेतगुणनिमित्तके द्रव्ये श्वेतशब्दे सति गुणमात्रं विक्रियते । न ह्यत्र जातिविशिष्टं द्रव्यं प्रतीयते । यदेव आलम्भसाधनभूतम्, तदेव परिच्छेत्तव्यमिति एतद्वाक्यादवगम्यते । यच्चास्य चोदकप्राप्तं द्रव्यं साधनमविरुध्यमानं श्रुत्या प्राप्नोति, तदयं श्वेतशब्दः परिच्छेत्स्यति । ननु अजात् अन्यान्यपि द्रव्याणि परिच्छेत्तुमयं शक्नोति ! न ब्रूमो न शक्नोतीति, न तेन परिच्छिन्नेन प्रयोजनमस्ति । तस्मात् प्रत्यक्षोऽपि श्वेतशब्दः छागमेव परिच्छिन्द्यात् नान्यं पशुमिति ।

सोम–– श्वेतादिशब्दानामपि न गुणमात्रपरत्वम् । तथा सति द्रव्यदेवतासंबन्धाभावेन यागस्यैव अलाभापत्तेः । अतो द्रव्यपर्यन्तत्वावश्यम्भावे श्वेतगुणकद्रव्यमात्रस्यैव उपदेशतः अवगमात् अतिदिष्टाजद्रव्यनियमबाधः इति पूर्वः पक्षः । उपदेशस्य द्रव्यपर्यन्तत्वेऽपि पूर्ववत् द्रव्ये जातिविशेषाक्षेपाशक्तेः प्राकृताजद्रव्यग्रहणेऽपि उपदेशाविरोधात् तत्रैव पर्यवसानमिति न बाधः इति सिद्धान्तः । **सूत्रार्थस्तु**–– नैमित्तिके गुणमात्रनिमित्तके श्वेतादिशब्दे तु प्रकृतेः स्यात् प्राकृतद्रव्यस्यैव ग्रहणं स्यात्, तत्रैव श्वेतगुणस्य संपादयितुं शक्यत्वेन, तदापत्तेः तस्यैव श्वेतगुणेन परिच्छेदापत्तेरिति । नैमित्तिके इत्यनेन पूर्ववत् उत्पत्त्यैव जातिविशेषाविनाभावो नास्ति । किन्तु गुणमात्रमेवात्र निमित्तम्, तच्च चोदकग्रहेऽपि उपपन्नमिति दर्शयति ।

वि-- ‘वायव्यं श्वेतमित्यत्र यः कोऽपि (पशुः) छाग एव वा ।, विशेषानुक्तितः कोऽपि, च्छाग एवास्त्वबाधनात् ॥ ’

भाट्ट— यत्र तु ‘ वायव्यं श्वेतमालभेत ’ इत्यादौ श्वेतादिशब्दानां अजादिसाधारणगुणवाचित्वम् , तत्र नाजत्वस्य बाधः इति प्रत्युदाहरणमेतत् । २९.

मण्डन-- ‘ श्वेतोऽजो वायुदैवतः ।’ ३०.

शंकर-- ‘ श्वेतादौ नाजबाधः स्यात् ।’ ३१.

द्रव्यस्य चाकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात्, स्वकालत्वात् । ११।३।२।२॥

ऐष्टिकपाशुकादिकर्मार्थतया तत्तत्कर्मकादेः किं पृथक् अग्न्याधानं कर्तव्यम्, उत सर्वकर्मार्थं एकमेव स्वकाले कर्तव्यं इति विचारे सिद्धान्तमाह। द्रव्यस्य गार्हपत्याद्यग्नेः अकर्मकालनिष्पत्तेः । इष्टिपश्वादिकर्मणः काले निष्पत्तिर्नास्ति, किन्तु स्वतन्त्रे एव वसन्तादिकाले अग्नेर्निष्पत्तिर्भवति। तस्मात् कर्मकालनिष्पत्तेरभावात् प्रयोगः आधानप्रयोगः सर्वार्थः सर्वकर्मार्थः स्यात् । स्वकालत्वात् स्वस्य आधानस्य वसन्तो ग्रीष्मः शरद् इति स्वतन्त्र एव कालो विहितः । तथा च स्वीयस्वतन्त्रकालवत्त्वात् आधानं सर्वकर्मार्थमेकमेवेति । **के.**

* द्रव्यस्याकर्म- (स्य चाकर्म-) कालनिष्पत्तेः इति एकादशे आधानस्य अनुष्ठानसाधारण्यं वक्ष्यते । **वा.** ३।६।५।१५, * द्रव्यस्याकर्मकालनिष्पत्तेः। (११।३।२।२) इति कृत्वाचिन्ता इति तत्रैव वक्ष्यते। (परंतु तत्र किमपि नोक्तम् । ‘ अष्टौ अधिकरणानि अतिक्रम्य लिख्यते ’ इति हि तृतीयचरणादावेव उक्तं तत्र) । ३।६।५।१५ पृ. १०४०. * सर्वे एव अग्नयः अजस्रं धारणीयाः, प्रतिदिवसं तेषां कर्मोपयोगात् द्रव्यस्याकर्मकालनिष्पत्तेरिति न्यायात् । **संकर्ष.** ३।२।५.

* द्रव्यस्य तु कर्मार्थता स्वभावतः । **भा.** ६।१।१।१ पृ. १३४६, * द्रव्यस्य देवतां प्रति उत्सर्गः कर्म। ८।१।१७।३२. * द्रव्यस्य देवतोद्देशपूर्वकद्रव्यत्यागाच्च विना देवताऽन्वयायोगात् । **सु.** पृ. ४६३, * द्रव्यस्य धात्वर्थनिष्पादकत्वं भूतभव्यसमुच्चारणन्यायात् अवसीयते । पृ. ६२२, * द्रव्यस्य नियमविधिः ‘सोमेन यजेत’ इति । **वि.** ४।२।९, * द्रव्यस्य प्रतिषिद्धस्य माषादेः प्रतिनिधित्वं न भवति । ६।३।६, * द्रव्यस्य प्रधाननिर्वाहकत्वे अङ्गनिर्वाहासमर्थस्यापि उपादानम्। ६।३।२१. * द्रव्यस्य प्राकृताजस्य गुणेन श्वेतेन न बाधः वायव्यपशौ। **भा.** १०।२।३०।६९. * द्रव्यस्य शुद्धस्य विशेषणत्वे द्रव्यविशिष्टक्रियाविधिना द्रव्यविशेषणानाक्षेपः । **सु.** पृ. १०१२. * द्रव्यस्य शेषकार्यार्थमवत्तस्य नाशे शेषकार्यलोपः । **भा.** ६।४।२।३, * द्रव्यस्य श्रुतस्यापचारे तत्सदृश एव प्रतिनिधिः । सदृशन्यायः । ६।३।११।२७, * द्रव्यस्य श्रुतस्यापचारे नित्यकर्मणः प्रारब्धकाम्यकर्मणश्च प्रतिनिधिना समापनम् । प्रतिनिधिन्यायः । ६।३।४।१३ –१७. * द्रव्यस्य सावयवस्य अनेकेनापि भक्षणं संभवति । **वा.** ३।५।१२।३४. * द्रव्यस्य स्थेमा च प्रत्यभिज्ञाऽधीनः । **ऋजु.** पृ. १७२. * ‘ब्राह्मणः प्रतिग्रहादिना द्रव्यमर्जयेत्’ इत्यादिनियमस्य क्रत्वर्थत्वेन भृतिवननादिवत् तदार्जितद्रव्यस्य क्रत्वर्थत्वेऽपि भोजनाद्यर्थे अनियतोपायाक्षेपप्रतिबन्धे प्रमाणाभावात् न सर्वस्य द्रव्यस्य क्रत्वङ्गता । **भाट्ट.** ४।१।२ वर्णकम् ३. * द्रव्ययोः द्वयोर्विभुनोः संयोगो नास्ति संयोगहेत्वभावात् । अन्यतरकर्मजः उभयकर्मजः संयोगजश्च संयोगो भवति । न च द्वयोरपि सर्वगतयोः कर्मास्ति । न च अनवयवानां संयोगजोऽपि संयोगो घटते । न च समवायोऽपि युक्तः, द्वयोर्द्रव्ययोः आरभ्यारम्भकभावहीनयोः परस्परासमवायात् । इहेति बुद्ध्यनुत्पादात् । **ऋजु.** पृ. २४२.

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः । ६।१।१।१॥

‘ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ’ ‘ ज्योतिष्टोमेन स्वर्गकामो यजेत ’ ‘ चित्रया यजेत पशुकामः ’ इत्यादिवचने द्रव्याणां स्वर्गपश्वादीनां कर्मभिः दर्शपूर्णमासचित्रादिकर्मभिः संयोगे साध्यसाधनभावरूपे संबन्धे श्रूयमाणे द्रव्याणां कर्मजननसामर्थ्यात् गुणत्वेन अभिसंबन्धः स्यात् । तथा च स्वर्गादिद्रव्यं साधनम्, यागः प्रधानम् । इति पूर्वः पक्षः ।

असाधकं तु तादर्थ्यात् । २ ॥

‘स्वर्गकामो यजेत’ इत्युक्तम्, तत्र यागः प्रधानं स्वर्गो गुणः । स्वर्गशब्दः सुखसाधनद्रव्यपरः, द्रव्यं क्रियासाधनम्, इति यागः साध्यः, स्वर्गः तत्साधनं इति पूर्वपक्षे सिद्धान्तसूत्रम् । तादर्थ्यात् यागस्य स्वर्गार्थत्वात् याग एव स्वर्गस्य साधकः । स्वर्गस्तु यागस्य असाधकं न साधकः । तुशब्दः पूर्वपक्षव्यावर्तकः ।

प्रत्यर्थं चाभिसंयोगात् कर्मतो ह्यभिसंबन्धस्तस्मात् कर्मोपदेशः स्यात् । ३ ॥

यागः स्वर्गार्थः, न तु स्वर्गो यागार्थः । अतः स्वर्गः प्रधानं कर्म गुणः, इति सिद्धान्ते ‘यजेत इत्येकपदश्रुत्या यागस्य भाव्यत्वेन स्वर्गकामपदोपात्तस्य न भाव्यत्वम्’ इति शङ्का । तन्निरासार्थं सूत्रमिदम् । प्रति अर्थं इति पदभेदः । अर्थ्यते अभिलष्यते इति अर्थः स्वर्गपश्वादिः । अर्थं प्रति स्वर्गादिकं प्रति विधेः अभिसंयोगात् अन्वयात्, कर्मतः हि कर्मणा एव साधनत्वेन अभिसंबन्धः अन्वयः । तस्मात् हेतोः ‘यजेत स्वर्गकामः’ इत्यत्र स्वर्गादिसाधनत्वेन कर्मोपदेशः कर्मणः एव यागादेः उपदेशः स्यात् । तथा च प्रीतिरूपस्य स्वर्गस्य भाव्यत्वम्, यागादेश्च गुणत्वं इति सिद्धान्तः । एवं च फलभोगसंभवेन कर्मकर्तुः अधिकारोऽस्ति इति अधिकाराध्याय आरब्धव्यः इति भावः । चशब्दः हेत्वन्तरसमुच्चायकः सन् शङ्कानिरासार्थः । **के.**

* द्रव्याणां क्रियासु व्यवस्था । यथा—‘स्फ्येनोद्धन्ति’, ‘कपालेषु श्रपयति’, ‘अग्निहोत्रहवण्या हवींषि निर्वपति’, ‘शूर्पेण विविनक्तिः’, ‘कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति’, ‘शम्यायां दृषदमुपदधाति’, ‘उलूखलमुसलाभ्यामवहन्ति’, ‘दृषदुपलाभ्यां पिनष्टि’ इति । **वि.** ३।१।५. * द्रव्याणां क्रियार्थानां संस्कारः क्रतुधर्मः । **सूत्रम्** ४।३।४।८.

द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यात् । ४।३।४।८॥

अग्निष्टोमे ‘पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य’ इति श्रुतम् । इदं व्रतं पुरुषार्थं क्रत्वर्थं वेति संशये वाक्येन विनियुक्तत्वात् पुरुषार्थं इति उत्सूत्रं पूर्वपक्षं तुशब्देन निरस्य सिद्धान्तयति । द्रव्यशब्देनात्र ब्राह्मणराजन्यादयः पुरुषा गृह्यन्ते । क्रियार्थानां क्रत्वर्थानां क्रतुगतानां द्रव्याणां ब्राह्मणादिरूपाणां इदं व्रतं संस्कारः स्यात् शरीरधारणार्थः बलकरणार्थश्च । तथा च क्रतुगतपुरुषद्वारा क्रतुधर्मः स्यात् । न केवलपुरुषार्थः ।

पृथक्त्वाद् व्यवतिष्ठेत । ९ ॥

पयोयवाग्वामिक्षाः दीक्षितानां यज्ञे ब्राह्मणराजन्यवैश्यानां क्रमेण व्रतानि । स च क्रतुधर्मः न केवलपुरुषधर्मं इति सिद्धान्तिना उक्ते, तर्हि पुरुषसंयोगः ‘पयो व्रतं ब्राह्मणस्य’ इत्यादिना किमर्थं उक्तः ? इत्याशङ्कायां उत्तरमाह । ब्राह्मणराजन्यवैश्यकर्तृकाणां प्रयोगाणां पृथक्त्वात् व्रतव्यवस्थार्थं पुरुषसंयोग उक्तः, ब्राह्मणकर्तृकस्य अग्निष्टोमस्य अङ्गं व्रतं पयः, राजन्यकर्तृकस्य यवागूः, वैश्यकर्तृकस्य आमिक्षा इति । एवं प्रयोगाणां पृथक्त्वात् तत्तत्कर्तृके अग्निष्टोमे व्रतं व्यवतिष्ठेत व्यवस्थितं स्यात् इति पुरुषसंयोग उक्तः । तस्मात् क्रत्वर्थमेव व्रतम् । **के.**

* द्रव्याणां (खादिरः स्रुवः, पर्णमयी जुहूः, आश्वत्थी उपभृत्, वैकङ्कती ध्रुवा इ०) न फलप्रयुक्तत्वम् । **भा.** ४।३।१।१–४, * द्रव्याणां येषामनवगतोत्पत्तीनां भाव एव लक्ष्यते, तेषामपि केषांचित् अनित्यता गम्यते, येषां विनाशकारणमुपलभ्यते यथा अभिनवं पटं दृष्ट्वा । १।१।६।२१. * ‘द्रव्याणां वाक्यसंयुक्तक्रियानिर्वर्तनाद्विना । न प्रयोजनमस्त्यन्यत् कथम्भावाद्यसंगतेः ॥’ यथा होमः क्रियात्मकत्वात् किमित्यपेक्षमाणः प्रधानकथम्भावेन इत्थमनुग्राहकत्वेन गृह्यते, नैवं द्रव्यम् । न च तस्माददृष्टकल्पना । क्रियानिर्वर्त्यत्वादपूर्वाणाम् । **वा.** २।१।४।१२ पृ. ४११. * द्रव्याणां सोमक्रयसाधनानां समुच्चयः । **भा.** १२।४।३।५–७. * द्रव्ये फलश्रुतिः ‘यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति’ इति । अयमर्थवादः । **मीन्या.** * श्रुते द्रव्ये अपचरति प्रतिनिधिमुपादाय प्रयोक्तव्यं इति स्थितम् । **भा.** ६।३।११।२७. * द्रव्येष्वेवारम्भगामित्वादर्थे विकारसामर्थ्यम् (१०।४।१४।२९) (द्रव्येष्वारम्भगामित्वादर्थेऽविकारे सामर्थ्यात्) इत्यनेन आरम्भेण स्वरूपेण द्रव्येषु क्रियागामित्वात् विकारसहितस्यापि शब्दस्य

द्रव्यरूपे अर्थे सामर्थ्यमस्ति इति वैषम्यं वदता द्रव्येषु अर्थरूपेण कर्मणि समवायाभ्युपगमात् विधिगतशब्दप्रयोगनियमो नास्तीत्यर्थः । सु. पृ. ४६९.

⌛ द्रव्येषु गुणश्रुतिर्नियमविधानार्थौ ॥

तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् । ४।२।१०।२५ ॥

भाष्यम्— अधिकरणातिदेशोऽयम् । इदमामनन्ति 'वायव्यं श्वेतमालभेत भूतिकामः' । तथा 'सोमारौद्रं घृते चरुं निर्वपेच्छुक्लानां व्रीहीणां ब्रह्मवर्चसकामः' तथा 'नैर्ऋतं चरुं निर्वपेत्कृष्णानां व्रीहीणाम्' इति । तत्र संदेहः किं श्वेतादिवर्णो विधीयते, उतानूद्यते इति । किं प्राप्तम् ? अनूद्यते । द्रव्यश्रुतिगृहीतत्वात् । विधिर्वा, पक्षे प्राप्तस्य वर्णस्य नियमार्थः इति । पक्षोक्तं प्रयोजनमुभयोरपि अधिकरणयोः ।

सोम— सूत्रार्थस्तु–द्रव्ये गुणश्रुतिरपि नियमविधिः उत्पत्त्या क्रियोत्पादकेन द्रव्येण तत्परिच्छेदकतया संयोगादिति ।

वि— 'श्वेतालम्भोऽनुवादो वा श्वैत्यस्य विधि, रग्रिमः । द्रव्यद्वारेण तत्प्राप्तेः, पूर्ववत् तन्नियम्यते ॥'

भाट्टे तु इदं पूर्वाधिकरणेन एकीकृतम् ।

मण्डन— 'द्रव्ये गुणानां नियमस्तथैव ।'

शंकर— 'द्रव्ये गुणश्रुतिश्चैवम् ।' एवं नियमविधिः ।

* द्रव्येषु यजतौ च यः संस्कारः सोऽपूर्वप्रयुक्तः । यजतेर्द्रव्याणां च तदीयत्वेन धर्मैरभिसंबन्धो न स्वेन आत्मना । भा. ९।१।१।१ वर्णकम् ३. * न च द्रव्येषु अर्थसमवायात् विधिशब्दप्रयोगनियमः (देवतायां तु अस्ति) । वा. १।४।८।११ पृ. ३४५.

⌛ द्रव्याधिकरणम् । स्फ्याधिकरणम् । द्रव्यविषयकोद्देश्यताऽवच्छेदकनिरूपणम् ॥

द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत । ३।१।५।११॥

भाष्यम्— स्तो दर्शपूर्णमासौ । तत्र समामनन्ति 'स्फ्यश्च कपालानि च अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या च उलूखलं च मुसलं च दृषच्च उपला च, एतानि वै दश यज्ञायुधानि' इति । तत्र संदिह्यते किं श्रेय इह शक्यते एभिः कुर्तुम्, तस्मैतस्मै पदार्थाय एतानि समाम्नातानि, उत यत् येन संयुक्तं तस्मै एवेति । किं तावत् प्राप्तम् ? यत् येन शक्यमिति । कुतः ? एवं विधयो भविष्यन्ति, तथा अर्थवन्तः । इतरथा ते अनुवादा निष्प्रयोजनाः । प्रकरणाविशेषश्च सर्वपदार्थान् प्रति । यज्ञायुधानि इति च यज्ञसंयोगः अविशिष्टः । तस्मात् सर्वे सर्वत्रेति । एवं प्राप्ते, ब्रूमः । द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत । यो येन पदार्थेन सह उत्पत्तिवाक्येन संयुक्तः, स पदार्थस्तेनैव कर्तव्यः । यथा 'स्फ्येनोद्धन्ति' इति उद्धननार्थता स्फ्यस्य वाक्येन । तत् उद्धननं च स्फ्यादन्येन कर्तव्यम् । यदा चैवम्, तदा प्राप्त एव स्फ्यः । तस्यायमनुवादो भवितुमर्हति 'एतानि वै दश यज्ञायुधानि' इति । एवं एकैकस्यानुवादः तेनतेन वचनेन प्राप्तस्य । यथा 'कपालेषु श्रपयति, अग्निहोत्रहवण्या हवींषि निर्वपति, शूर्पेण विविनक्ति, कृष्णाजिनमधस्तादुलूखलस्य अवस्तृणाति, शम्यायां दृषदमुपदधाति, उलूखलमुसलाभ्यामवहन्ति, दृषदुपलाभ्यां पिनष्टि' इति । प्रकरणात् सर्वाणि सर्वत्र प्राप्नुयुः । वचनात्तु यथावचनम् । यज्ञायुधशब्दोऽपि सामान्येन प्रयोजनं विदधत् तत् बाध्येतैव । परोक्षं हि सामान्यवचनेन विशेषविधानं भवति । प्रत्यक्षं तु विशेषवचनेन विशेषविधानम् । तस्मात् यत् येन उत्पत्त्या संयुक्तम्, तत् तत्रैव विनियुज्यते इति सिद्धम् ।

वा— अवघातादिवदेव द्रव्याणामपि यथासंयोगं विनियोगे सिद्धे किमर्थः पुनरारम्भः । उच्यते । एवं तावत् तत्र दृष्टप्रयोजनवशेन यथासंयोगं विनियोगं पूर्वपक्षवादी मन्यते । स चात्रापि विना दृष्टेन प्रयोजनेन नैवाश्रयितव्यः । सति हि दृष्टार्थत्वेन अन्यत्र अप्रसङ्गे न कश्चिदपि यथासंयोगं व्यवस्थाहेतुरस्ति । यथा च तस्य व्रीह्यादिसंबन्धात् भिन्नापूर्वप्रयुक्तत्वम् (भिन्नापूर्वेति विशेषापूर्वेत्यर्थः), नैवं वेद्युद्धननादिषु एकं किञ्चिदपूर्वं प्रयोजकम् । एक एव च तत्र संयोगः (विनियोजकवाक्यम्, संयुज्यते अनेनेति) इह तु द्वौ संयोगौ 'एतानि वै दश यज्ञायुधानि' इत्येकः, 'स्फ्येनो-

द्धन्ति ’ इत्येवमादिरपरः । तयोश्च एको विधिः, अपरोऽनुवादः । तत् यदि पूर्वो विधिः, ततः साक्षात् यागसंबन्धे चतुर्थाधिकरणेन (३।१।४) व्यावर्तिते सप्तदशारत्नित्ववत् आनर्थक्यात् तदङ्गेष्वेव अवतरन्ति अङ्गत्वाविशेषात् यथासामर्थ्यं सर्वार्थानि इति विज्ञायन्ते । ततश्च उद्धननादिसंयोगानां अवयुत्यानुवादत्वम् । अथ पुनः उद्धननादिसंयुक्ता एव विधयः, इतरोऽनुवादः, ततः पूर्वाधिकरणन्यायेनैव यथासंयोगं व्यवस्थेति । किं प्राप्तम् ? अपूर्वभेदसंबन्धाभावात् दृष्टार्थत्वाविशेषाच्च यथासामर्थ्यं विनियोगः । एवं यज्ञायुधसंयुक्ता विधयो भूत्वा अर्थवन्तो भविष्यन्ति । बहुवचनं च (भाष्यस्थं) विधेयार्थशब्दबाहुल्याभिप्रायम् (विधेयार्थशब्दानां ‘ स्फ्यश्च कपालानि च ’ इत्यादीनां बाहुल्यम्) । इतरथा तु एकवाक्यत्वात् एक एव विधिः । तस्मात् यथासामर्थ्यं विनियोगः। **इति प्राप्ते , अभिधीयते । ‘स्फ्यादेरुत्पत्तिसंबन्धः कार्यैरुद्धननादिभिः । तत्र यज्ञायुधानीति प्राप्तमेवानुकीर्त्यते ॥’** ‘एतानि वै दश यज्ञायुधानि ’ इति वैशब्दसंयोगात् अस्यानुवादसारूप्यम् । न चात्र भावनावचनो विधायकोऽस्ति, यो विनियुञ्जीत विदध्याद्वा इति । बहुतराणि च वाक्यानि त्वत्पक्षे अनर्थकानि भवेयुः । न चैषामनुवादत्वे किञ्चित् प्रयोजनमस्ति । साक्षाच्च एतानि स्वाभिधानैः उद्धननादिष्वेव विनियुज्यन्ते, परोक्षवृत्त्या यज्ञायुधवाक्ये । यज्ञशब्दस्य अङ्गलक्षणाऽर्थत्वात् आयुधशब्दस्य च युद्धसाधनवचनस्य क्रियान्तरसाधनेषु औपचारिकत्वात् । नचात्र सप्तदशारत्निन्यायः(आनर्थक्यतदङ्गन्यायः) अवकल्पते । नहि अत्र ‘ वाजपेयस्य ’ इतिवत् संबन्धमात्राभिधायिनी यज्ञशब्दात् परा षष्ठी दृश्यते । सत्यपि च आनर्थक्यात्तदङ्गावतरणे सामान्यशास्त्राणि विशेषशास्त्रैः उद्धननादिसंयुक्तैः उपसंह्रियमाणानि न कर्मान्तरैः संबध्येरन् । तस्मात् उद्धननादिवाक्यप्रापितानां सतां यादृशं वयं यज्ञायुधत्वं पश्यामः, तादृशम् ‘ एतानि वै दश ’ इत्यनेनानूद्यते । **यत्तु** अपूर्वभेदः प्रयोजको नास्तीति , **तत्र ब्रूमः** । कपालादीनां तावत् अस्त्येव पुरोडाशाद्यपूर्वभेदः । इतरेषामपि उद्धननादिद्वारत्वात् अन्यत्र तत्कृतोपकाराभावात् असंकरः । तत् यथा अवघातादयः समानापूर्वनिबन्धनेष्वपि स्रुगादिषु कारकान्तरत्वात् न क्रियन्ते । तस्मात् एतेषामपि यथासंयोगमेव विनियोग इति सिद्धम् ।

शा—**‘तस्मादस्यानुवादत्वादितरे विधयो मताः ।**
तेन स्फ्यादेर्व्यवस्था स्यात् कार्येषूद्धननादिषु ॥’

सोम— उद्धननादिवाक्यस्य विधायकत्वाभावात् व्रीह्यादीनामवघातादिसंयोगवत् इह संयोगासत्त्वात् न व्यवस्थितिः इति प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु**—द्रव्यमपि येन संयुक्तं तदर्थमेव उपपद्यते ‘ स्फ्येनोद्धन्ति ’ इति उत्पत्तौ संयोगात् इति ।

वि—– ‘ द्रव्यस्य स्फ्यकपालादेः सांकर्यं वा व्यवस्थितिः ।, यज्ञायुधत्वं सर्वेषां समं तेनात्र संकरः ॥, वाक्यस्योद्धननादेः स्याद् वैयर्थ्यं संकरे सति । अनुवादो ह्यायुधोक्तिर्व्यवस्था तेन पूर्ववत् ॥ ’

भाट्ट— दर्शपूर्णमासयोः ‘ स्फ्यश्च कपालानि च ’ इति दश द्रव्याण्यनुक्रम्य ‘ एतानि वै दश यज्ञायुधानि ’ इति श्रुतेन वाक्येन दशानामपि द्रव्याणां यज्ञसाधनत्वेन विधानात् , उत्पत्तिशिष्टपुरोडाशाद्यवरोधेन च साक्षाद्यागसाधनत्वायोगात् अङ्गेषु अवतारात् प्रकृतापूर्वसाधनीभूतद्रव्यसाकाङ्क्षशक्यक्रियात्वावच्छिन्नोद्देशेन द्रव्याणि विधीयन्ते ‘ स्फ्येनोद्धन्ति ’ इत्यादिविशेषविनियोगास्तु अवयुत्यानुवादाः । **इति प्राप्ते** , तेनतेन प्रत्यक्षविधिना तृतीयाश्रुतिसहकृतेन स्फ्यादीनां विशिष्यविनियोगात् यज्ञायुधवाक्यमेव एकमश्रुतविधिकं वैशब्दोपबद्धमनुवादकम् , बहूनामनुवादानां वैयर्थ्यात् । अस्य च ‘ यज्ञायुधानि संभरति ’ इत्येतद्विध्यर्थवादत्वेन सार्थकत्वात् । तस्मात् उद्धननमात्रजन्यव्यापारकप्रकृतापूर्वसाधनत्वाश्रयत्वमेव उद्धननपदेन लक्षयित्वा तदुद्देशेनैव स्फ्यादिविधिः ।

मण्डन—– ‘ स्फ्यादिरुद्धननादिनः । ’ शेषः ।

शंकर— ‘ व्यवस्थितं स्फ्यादिकार्यम् । ’

* **द्रव्याधिकरणे** (३।१।५।११) द्रव्यस्य विनियोगः कथ्यते । स च वाक्येन इति केचित् । वस्तुतस्तु श्रुत्यैव । (संक्षेपेणेदम्) । द्रव्यसंख्याहेतुसमुदायाधिकरणमिदम् । वा. ३।१।४।७ पृ. ६६५.

* **द्रव्यान्तरं** अस्तीति तत्र गम्यते, यत्रैकस्मिन्नवयवे गृहीत्वा कृष्यमाणे कृत्स्नः कृष्यते । नहि अबद्धे काष्ठपूलके काष्ठे एकस्मिन्नाकृष्यमाणे काष्ठान्तराणि कृष्यन्ते । यत्र हि परस्परव्यतिषङ्गजनिता एका बुद्धिर्भवति, नावयवबुद्धिर्दृश्यते, नापि केनचिदनुमानेनानुमीयते तत्र द्रव्यान्तरं जातमित्युच्यते । **भा.** ९।१।७।२६। यत्रयत्र द्रव्यान्तरबुद्धिर्भवति तत्रतत्र द्रव्यान्तरम् । यत्र एकस्मिन्नवयंवे कृष्यमाणे कृत्स्नोऽवयवी आकृष्यते तत्र यथादृष्टम् । यत्रैकस्मिन् कृष्यमाणे एकः कृष्यते, तत्रापि यथादृष्टम् । **टुप्.** २७. * द्रव्यान्तरं वैकल्पिकं नोपादेयं द्रव्यापचारेऽपि । **के.** ६।३।१२।२८–३०, * **द्रव्यान्तरेण** प्रतिनिधिना यागे कृतेऽपि ऐककर्म्यमेव, न कर्मभेदः इति सिद्धान्तः। ६।३।३।११–१२.

⧗ **द्रव्यान्तरे कृतार्थत्वात् तस्य पुनःप्रयोगान्मन्त्रस्य च तद्गुणत्वात् पुनःप्रयोगः स्यात्, तदर्थेन विधानात् । ११।४।१३।४६ ॥**

राजसूये नानाबीजेष्टौ एकस्मिन् बीजे अवहननस्य कृतार्थत्वात् तुषविमोकस्य अर्थस्य निष्पादितत्वात् द्वितीयादिबीजे तस्य अवहननस्य तुषविमोकार्थे पुनःप्रयोगात्, मन्त्रस्य च तद्गुणत्वात् अवहननशेषत्वात् तस्यापि पुनःप्रयोगः स्यात् । तदर्थेन अवहननाङ्गत्वेन चोदकेन विधानात् । तस्मात् प्रतिबीजं मन्त्रावृत्तिः इति सिद्धान्तः । **के.**

* **द्रव्यान्तरागमनन्यायः**। अयमेव प्रतिनिधिन्यायः। (६।२।४।१३)। प्रक्षेपानिष्पत्तौ यागस्यापि अनिष्पत्त्यवगमेन प्रक्षेपस्य अप्रयोजकत्वेऽपि यागेन प्रयोक्तुं शक्यत्वात् नाशादिषु द्रव्यान्तरागमनन्यायाविरोधः। **सु. पृ.** १५३५.

* **द्रव्यापचारे** प्रतिनिधिना समापनम् । **के.** ६।३।४।१३–१७.

* **द्रव्याभिधानं** आनुबन्ध्ययागे निगमेषु विधिगतोस्राशब्देन ज्योतिष्टोमे । **भा.** १०।४।१६।३२–३३.

* **द्रव्यार्जनं** पुरुषार्थं न क्रत्वर्थम् । ‘ न्यायागतेन द्रव्येण कुर्यात् कर्माणि वै द्विजः ’ इत्यादिवचनैः मुख्यगौणसाधारणवृत्त्युपायानां अधिकारितारतम्येन क्रत्वर्थत्वस्यापि बोधनात् संयोगपृथक्त्वन्यायेन उभयार्थत्वेऽपि न दोषः । **भाट्ट.** ४।१।२ वर्णकं ३ पृ. ८६, * **द्रव्यार्जनस्य** प्रयोगबहिर्भूताङ्गत्वाङ्गीकारेण प्रयोगान्तःपातेऽपि भृतिवननप्रयाजादिवदेव प्रतिप्रयोगावृत्त्यङ्गीकारेण अतिपातदर्शने न काचिदनुपपत्तिः । ४।१।२ वर्णकं ३ पृ. ८५. * **द्रव्यार्जने.** उपायनियमः उपायान्तरेषु प्रत्यवायविवक्षया । तत्र ब्राह्मणस्य प्रतिग्रह–याजन–अध्यापनान्येव द्रव्यार्जनोपायः, राजन्यस्य जयादिकम्, वैश्यस्य कृष्यादिकम्, शूद्रस्य सेवादिकं इति । **वि.** ४।१।२ वर्णकं ४.

⧗ **द्रव्यार्जनवर्णकम्** । द्रव्यार्जनं पुरुषार्थम् ॥

यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात् । ४।१।२।२ वर्णकं ३ ॥

भाष्यम्— एवं वा । द्रव्यार्जनमुदाहरणम् । इह द्रव्यार्जनं तैस्तैर्नियमैः श्रूयते । ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना । तत्र संदेहः किं क्रत्वर्थो द्रव्यपरिग्रहः, उत पुरुषार्थः इति। किं प्राप्तम् ? क्रत्वर्थो नियमात् । यदि एष पुरुषार्थः स्यात्, नियमः अनर्थको भवेत् । प्रत्यक्षेण एतदवगम्यते नियमात् अनियमाच्च अर्जितं द्रव्यं पुरुषं प्रीणयति इति। तस्मात् क्रत्वर्थः । कामश्रुतिभिश्च अस्य सह एकवाक्यता दृष्टा । इतरथा अनुमेयेन फलवाक्येन सह एकवाक्यतां यायात् । लिङ्गं चापि भवति ‘ अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, यस्याहिताग्नेः सतः अग्निर्गृहान् दहेत् ’ ‘ यस्य हिरण्यं नश्येत् आग्नेयादीनि निर्वपेत् ’ इत्येवमादि । तद्धि द्रव्योपघाते चोद्यते । यदि द्रव्यपरिग्रहः क्रत्वर्थः, ततः एतदपि सति संबन्धे कर्मार्थे इत्युच्यते । इतरथा असति संबन्धे कर्मार्थे इति अनुमीयते (अनुमीयेत), फलं चास्य कल्प्येत । तस्मात् यजतिश्रुतिगृहीतं द्रव्यार्जनम् । येन विना यागो न निर्वर्तते, स यागस्य श्रुत्या परिगृहीतः इति गम्यते । तस्मात् क्रत्वर्थः इति । एवं प्राप्ते, ब्रूमः पुरुषार्थः इति । एतस्मिन् कृते पदार्थे, प्रीतिः पुरुषस्य भवति । तस्मात् अस्य लिप्सा अर्थलक्षणा शरीरधारणार्था । यस्य शरीरं ध्रियते, व्यक्तं तस्यास्ति द्रव्यम् । शरीरिणश्च यागः श्रूयते । तस्मात् विद्यमानद्रव्यस्य विनियोग उच्यते । न द्रव्यार्जनं काम-

श्रुतिगृहीतम्, विनाऽपि हि द्रव्यार्जनवचनत्वेन शब्दस्य, यागो निर्वर्तते एव। तस्मात् पुरुषार्थो द्रव्यपरिग्रहः।

अपिच यदि शास्त्रात् कर्मार्थे द्रव्यार्जनम्, तत् न अन्यत्र विनियुज्येत तथा आर्जितम्। तत्र सर्वतन्त्रपरिलोपः स्यात्। अपिच उपक्रान्तानि सर्वकर्माणि द्रव्यार्जनेन भवेयुः। तत्र एतन्नोपपद्यते 'अप वा एष सुवर्गात् लोकात् छिद्यते, यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वा अतिपातयेत्' इति। एवं च सति प्रयोगकालात् बहिः एतदङ्गं सत् अनुपकारकं स्यात्। न च आधानवत् भवितुमर्हति। तत्र हि वचनम् 'वसन्ते अग्निमादधीत' इति। न चैतत् अङ्गम्। **अथ यदुक्तम्** 'नियमवचनं अनर्थकं पुरुषार्थे द्रव्यपरिग्रहे सति' इति। **उच्यते**। नैतावता पुरुषार्थता व्यावर्तते। प्रत्यक्षा हि सा। त्वया च परोक्षं युक्तिबुद्ध्या व्यपदिश्यते। न च परोक्षं प्रत्यक्षस्य बाधकं भवति। तस्मात् नियमवचनात् कामं अपरमदृष्टं कल्प्येत, न तु दृष्टहानम्। तस्मात् यत् पुरुषस्य प्रयोजनं प्रीतिः, तदर्थं धनस्य अर्जनमिति। एवं च सति व्रीहिणा यागः कर्तव्यः प्रीत्यर्थं आर्जितेन वा क्रत्वर्थं आर्जितेन वा, नात्र कश्चित् विशेषः। प्रीत्यर्थं उपार्जितोऽपि व्रीहिः व्रीहिरेव, कर्मार्थं उपार्जितोऽपि व्रीहिः व्रीहिरेव। तस्मात् न प्रयोगचोदनागृहीतं द्रव्यार्जनम्। **अथ यदुक्तम्** 'अनुमेयेन अप्रकृतेन वा शब्देन युष्मत्पक्षे नियमस्य एकवाक्यता, अस्मत्पक्षे तु दृष्टेन प्रयोगवचनेन' इति। नैष दोषः। अस्मत्पक्षेऽपि दृष्टेन भुजिना, न फलवचनेन (एकवाक्यता)। कथं तर्हि नियमात् अदृष्टं भवति इति गम्यते? यथैव भवदीये पक्षे। **आह**, अस्मत्पक्षे फलवता एकवाक्यभावात् फलवतः उपकरोति इति गम्यते। **उच्यते**। अस्मत्पक्षेऽपि फलवतैव एकवाक्यभावः। एतावांस्तु विशेषः, तव श्रुतं फलम्, मम तु दृष्टमिति। **अथ यत्** लिङ्गमुक्तम्, 'गृहदाहादिषु कर्म श्रूयते' इति, **तत्रोच्यते**। यद्यपि न क्रत्वर्थे द्रव्यार्जनम्, तथापि दाहे निमित्ते फलाय वा कर्माङ्गभावाय वा क्षामवत्यादीनां विधानं उपपद्यते एव। तस्मात् पुरुषार्थं द्रव्यार्जनम्, प्रीत्या हि तत् अविभक्तं इति।

टुप्—— एवं वा। द्रव्यार्जननियमः क्रत्वर्थः। तेन हि (क्रतुना) द्रव्यमाकाङ्क्षितम्। (तस्मात् क्रतुना सह अस्यैकवाक्यता, अपेक्षितत्वात् इति ग्रन्थसंबन्धः। कथमेकवाक्यता, तत्राह – अपेक्षितं द्रव्यम्) तत् इत्थमुपादेयम्। प्रतिग्रहादिनैव। (इत्येवं क्रत्वेकवाक्यता। तस्मात् क्रत्वर्थः) यथा अवघातादयः। (इति युक्ता तन्नियमस्य क्रत्वर्थता। तस्मात् अर्जनाङ्गमेव नियमः, न स्वयं फलवान्। कथमेकान्ततः क्रत्वर्थत्वं अत आह –) **इतरत्र** (पुरुषार्थत्वपक्षे सत्यं द्रव्यमाकाङ्क्षितम्, तत्तु–) **क्षुत्प्रतिघातार्थम्। अनियमेनापि उपात्तं क्षुधं विहन्त्येव। तस्मात् न तत्र** (अर्जनस्य पुरुषार्थत्वपक्षे) **नियमस्य** (विधीयमानस्य) **फलम्** (अर्जनाङ्गता घटते। अथ अदृष्टं एवमुपात्ते द्रव्ये भवति इति कल्प्यते, तथा सति अश्रुतफलवचनेन एकवाक्यतादोषः। तदाह–) अश्रुतमपि अध्याहृत्य तेन सह एकवाक्यता कल्पयितव्या (सा च अन्याय्या)। [इतः परं नञ्रहितपाठमनुसृत्य तन्त्ररत्नमाह–] (यैस्तु नञ् न पठ्यते, तेषां एकग्रन्थतैव 'अनियमेनापि उपात्तं क्षुधं विहन्त्येव। तस्मात् तत्र नियमस्य फलं अश्रुतमपि अध्याहृत्य तेन सह एकवाक्यता कल्पयितव्या इति)।

इतरत्र (क्रत्वर्थत्वपक्षे) श्रुतेन (क्रतुना) एकवाक्यता (पक्षद्वयेऽपि तदेकवाक्यता कल्प्या, त्वत्पक्षे अश्रुतेन, मम तु श्रुतेन। क्रत्वर्थे च द्रव्यार्जने सति–) हिरण्यादिनाशे च क्रत्वर्थ-(द्रव्य-) नाशात् क्रतुवैगुण्ये क्षामवत्यादीनां क्रतुसमाधानार्थं उपदेशो युक्तः (भवति)। इतरत्र (पुरुषार्थत्वपक्षे) तु वैगुण्याभावात् (समाधानापेक्षा नास्तीति–) फलकल्पनैव (दोषत्वेन उक्ता प्राप्नोति)।

इत्येवं प्राप्ते ब्रूमः। श्रुत्याद्यभावात् (अर्जनं) अनङ्गं क्रतोः। पुरुषस्य तु प्रीतिमुत्पादयन्ति (अर्थाः) कामश्रुतिनिरपेक्षाः। शरीरधारणार्थमेव असौ (पुरुषः, द्रव्यं) उपादत्ते। अन्यथाऽनुपपत्त्या कामश्रुतिभिः आक्षिप्येत। तत्र पुरुषार्थेन उपार्जितमस्ति इति अन्यथाऽनुपपत्तिः क्षीयते यथा आधाने (न काम-

श्रुतीनां तदाक्षेपकत्वं वसन्तादिवाक्यैर्लाभात्)। अपिच क्रत्वर्थे द्रव्यार्जने क्रतुविघातः स्यात् (कुतः ?) देवतोद्देशेन च स्वद्रव्यपरित्यागे (क्रियमाणे) यागो भवति, (चशब्दो हेतौ देवतोद्देशेन इत्यतः प्राक् संबध्यते) क्रतुप्रयुक्तत्वे तु (स्वीय-) द्रव्याभावात् परित्यागो नास्ति इति (क्रतुविघातः स्यात्)।

(अत्र अनन्तरम् 'अपि च ' इत्यादि भाष्यं ' एवं च सति प्रयोगकालात् बहिः ' इत्यनेन संगतार्थत्वात् तत्रैव उत्कृष्टव्यं इत्यभिप्रेत्य ' अप वा एष सुवर्गात् ' इत्यादि लिङ्गदर्शनभाष्यं अनुसंधत्ते–) द्रव्यार्जने च प्रकान्ते सर्वक्रतूनां प्रक्रमात् ' अप वा एष स्वर्गात् लोकाच्छिद्यते ' इति (आक्षिपति–) यदि आरम्भविषयं अतिपातनम्, ततो न घटते। (समाधत्ते–) अथवा अङ्गारम्भेणैव प्रधानस्य आरब्धत्वात् अतिपातनाभावः । [अतिपादनं इति दकारः तैत्तिरीयानुसारी लिखिते, मुद्रिते तु भाष्यानुसारि]। यागाकरणात् अतिपातनं यत्, तत् इतरत्रापि (पूर्वपक्षेऽपि) घटते एव। क्रत्वर्थे तु (द्रव्यार्जने बहिःप्रयोगेण अनुष्ठीयमाने सर्वक्रत्वर्थत्वप्रसङ्गात्) सर्वक्रतूनां प्रक्रमात् (युगपदनुष्ठानासंभवात् अन्यतरानुष्ठानेऽपि अनध्यवसायात्) अशकनीयोऽर्थः स्यात्। [एवं लिङ्गभाष्यं व्याख्याय प्राचीनम् ' अपि च यदि ' इत्यादि भाष्यं व्याचष्टे–] तथा (क्रत्वर्थत्वेन) अर्जितस्य अन्यत्र (जीवनादौ) अविनियोगात् शरीरनाशात् सर्वतन्त्रविपरिलोपः स्यात्। (ननु स्वातन्त्र्येण पुरुषार्थार्जितेन जीवनादि स्यात् इति चेत् तत्राह–) न च (पूर्वपक्षवादिनः) द्वे द्रव्यार्जने (विद्येते) एकं क्रत्वर्थे अपरं पुरुषार्थे (इति)। किं तर्हि ? एकमेवेदं (क्रत्वर्थे) द्रव्यं उपाददानस्य एते नियमाः (प्रतिग्रहादयः) उपदिश्यन्ते पुरुषस्येति।

' एवं च सति प्रयोगकालात् बहिः एतदङ्गं सत् अनुपकारकं स्यात् ' इति अनन्तरेण अतिपातनग्रन्थेन नायं (भाष्य–)ग्रन्थः संबध्यते। कथं तर्हि ? ' सर्वतन्त्रपरिलोपः स्यात् ' इत्यस्य शेषः। (यथाऽवस्थिते वा पूर्वग्रन्थे शक्यते एवायं ग्रन्थो व्याख्यातुं इति मत्वा व्याख्यानान्तरमाह——) अथवा प्रयोगवचनबहिर्भावात् (अप्रकरणस्थत्वात्) नेदं फलवतः (क्रतोः) अङ्गं श्रुत्याद्यभावात्। (ननु अनुपकारकं इति भाष्यं कथं अनङ्गं इति व्याख्यायते तत्राह–) अङ्गत्वे च अपनीते अनुपकारकं स्यात् इति फलेन अयं (भाष्य–) ग्रन्थः। (व्याख्यानान्तरमाह–) अथवा प्रधानकालत्वात् अङ्गानां अन्यस्मिन् काले क्रियमाणं अनुपकारकं स्यात् इति। ' न चैतत् आधानवत् भवितुमर्हति ' इति (भाष्यं चरमे व्याख्याने तदेकवाक्यतया व्याचष्टे–) यथा आधानं अन्यकालमपि प्रधानस्य उपकारकम्, नैवं इदं द्रव्यार्जनम्, कालविधेरभावात्। तस्मात् क्रत्वर्थे सत् अन्तस्तन्त्रं उत्पाद्यं स्यात्। (तदेव दर्शयति–) य एव क्रतुः प्रक्रान्तः, तमेव उररीकृत्य द्रव्यमुपादत्ते (उपादेयं इत्यर्थः) एवं च द्रव्यार्जने (क्रियमाणे) न [' द्रव्यार्जनेन न ' इति मुद्रितपाठः] सर्वकर्माणि प्रक्रान्तानि भवेयुः। यथा अहवन्तिः पौर्णमासे क्रियमाणः न सौर्यस्योपकरोति, एवमिहापि। तस्मात् (क्रत्वर्थत्वे सति कालविध्यभावात्, सर्वकर्मप्रक्रमदोषपरिहाराच्च) प्रतिकर्म द्रव्यार्जनम्, न सर्वकर्मणां तन्त्रेण इति (युक्तम्। न चैतदिष्टम्, न च संभवति। तस्मात् न क्रत्वर्थमिति)। (व्याख्यानान्तरमाह–) ' न च आधानवत् भवितुमर्हति '। यथा आधानं (अग्न्यर्थे) न क्रत्वर्थम्, नापि पुरुषार्थे (एवं द्रव्यार्जनमपि केवलं द्रव्यार्थम्) एवं कस्मात् न भवति ? उच्यते। आधानस्य वाक्येन अग्न्यर्थता अवगता। अस्य पुनः (द्रव्यार्जनस्य) अन्यार्थत्वे प्रमाणं नास्ति। प्रत्यक्षेण तु अस्य पुरुषार्थता (अवगम्यते)। (अस्यैव भाष्यस्य अभिप्रायान्तरमाह–) अथवा आधानेन अग्नयः उत्पाद्यन्ते (ततः तस्य तन्मात्रार्थता युक्ता) न तु एतेन (अर्जनेन) व्रीह्यादयः (अतो न स्वरूपमात्रार्थे अर्जनम्। अत्र अपरितोषात् एतदेव भाष्यं उत्तरत्वेन योजयति–) अथवा द्रव्यार्जननियमः फलवत्त्वात् पुरुषार्थः। आधानं तु न पुरुषार्थम् (तत्र फलाभावात्, अग्निमात्रार्थमेव तत्। व्याख्यानान्तरमाह–) अथवा आधानशब्देन आहवनीयादयः अभिधीयन्ते (लक्षणया)। यथा (पूर्वग्रन्थे द्वितीयव्याख्याने–) बहिःप्रयोगे आहिताः अङ्गत्वं प्रतिपद्यन्ते, [आहिताः इत्यत्र श्रुताः इति लिखितमुद्रितयोः

पाठः । आहिताः इत्येव तु तन्त्ररत्ने] एवं कस्मात् न भवति इति परिचोदिते आह–‘आधानवत् भवितुमर्हति’ इति । न चैतत् आहवनीयादिवत् भवितुमर्हति इत्यर्थः । तत्र हि आहवनीयादयः (आधानेन) उत्पन्नाः (प्रयोजन–) साकाङ्क्षाः सन्तः वाक्येन (यदाहवनीये जुहोति इत्यादिना) अङ्गतां (होमाङ्गतां) प्रतिपद्यन्ते (विनाऽपि प्रकरणेन) । इह (द्रव्यार्जने) तादृशं नास्ति वाक्यम् (यत् द्रव्यार्जनं कर्मणि विनियुङ्क्ते । ‘अथ यत् लिङ्गमुक्तम्’ इत्यादि भाष्यं अनुभाषते–) गृहदाहेऽपि अङ्गत्वाय वा फलाय वा इति, (तत्रापि–) अङ्गत्वे नास्ति प्रमाणम् । (तदभिधानं तु आनास्थया । तस्मात् द्रव्यार्जनं पुरुषार्थमिति) ।

शा— किं क्रत्वर्था पुरुषस्य द्रव्यप्राप्तिः उत पुरुषार्थेति । तत्र ‘**नियमस्यार्थवत्त्वाय क्रत्वर्थो द्रव्यसंग्रहः । पुरुषार्थत्वपक्षे हि नियमोऽनर्थको भवेत् ॥**’ एवं प्राप्ते, ब्रूमः । ‘**पुरुषार्थत्वमेतस्य प्रत्यक्षेणावगम्यते । क्रत्वर्थताऽनुमानेन प्रत्यक्षात् तच्च दुर्बलम् ॥**’

सोम–– **प्रयोजनं** पूर्वपक्षे प्रतिग्रहाद्यर्जितस्यैव द्रव्यस्य क्रतौ उपयोगः, सिद्धान्ते तु यथाकथञ्चिदर्जितस्यापीति ।

वि––‘द्रव्यार्जनं स्यात् क्रत्वर्थे पुमर्थे वा, क्रताविदम् । नियतत्वात्, पुमर्थत्वं दृष्टं क्रत्वर्थताऽऽर्थिकी ॥’ ४।१।२ वर्णकं ४.

भाट्ट— **यत्तु भाष्यकारादिभिः** ‘ब्राह्मणः प्रतिग्रहादिना द्रव्यमार्जयेत्, जयादिना राजन्यः’ इत्यादिविधिमुदाहृत्य अनारभ्याधीतस्यापि प्रतिग्रहादिनियमस्य फलकल्पनाभिया क्रत्वर्थत्वावसायात् तादृशविशिष्टोपायार्जितं द्रव्यमपि सर्वं क्रत्वर्थमेव । अत एवाव्यभिचरितहिरण्यादिसंबन्धात् तन्नाशे इष्ट्यादीनामपि क्रत्वर्थत्वसिद्धिरिति पूर्वपक्षयित्वा श्रुत्याद्यभावात् अदृष्टकल्पनस्य क्रत्वर्थत्वपक्षेऽपि तुल्यत्वान्नियमस्य क्रत्वर्थत्वानुपपत्तेः आर्जनस्य रागप्राप्तत्वेन अविधेयत्वात् तदार्जितद्रव्यस्य दृष्टार्थत्वात् विहिताविहितसाधारणपुरुषकृत्यमात्रशेषत्वमेव, इतरथा जीवनलोपात् सर्वतन्त्रपरिलोपापत्तेः । किञ्च द्रव्यार्जनरूपाङ्गोपक्रमणे सर्वक्रतूनामुपक्रमात् ‘यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वाऽतिपातयेत्’ इत्यनारम्भरूपातिपातदर्शनानुपपत्तिः । अतः आर्जनं तावत् पुरुषार्थम्, नियमोऽपि अदृष्टार्थत्वेऽपि पुरुषार्थ एव । एवं क्षामवत्यादयोऽपि पुरुषार्था एव, क्रत्वर्थत्वे प्रमाणाभावादिति **सिद्धान्तितम् । तत्** प्रतिग्रहनियमस्य फलकल्पनाभयात् क्रत्वर्थत्वे हिरण्यधारणादेरपि क्रत्वर्थत्वापत्तेः, तेन गतार्थत्वाच्चोपेक्षितम् । किञ्च नियमस्य क्रत्वर्थत्वेन भृतिवननादिवत् तदार्जितद्रव्यस्य क्रत्वर्थत्वेऽपि भोजनाद्यर्थमनियतद्रव्योपायाक्षेपप्रतिबन्धे प्रमाणाभावात् न सर्वस्य द्रव्यस्य क्षामवत्यादीनां वा क्रत्वङ्गता । अत एव सिद्धान्ते जीवनलोपापादनमसंगतम् । किञ्च अस्तु वा तत्, तथापि अतिपातनस्य अनारम्भरूपत्वे प्रमाणाभावात् यागाकरणस्य असमापनस्यैव अतिपातनत्वाङ्गीकारेण तद्दर्शनोपपत्तिः । अनारम्भरूपत्वेऽपि वा द्रव्यार्जनस्य प्रयोगबहिर्भूताङ्गत्वाङ्गीकारेण, प्रयोगान्तःपातेऽपि भृतिवननप्रयाजादिवदेव प्रतिप्रयोगावृत्त्यङ्गीकारेण अतिपातदर्शने न काचिदनुपपत्तिः।

वस्तुतस्तु नायं प्रतिग्रहादिनियमविधिः फलकल्पनापत्तेः, ‘प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वारयेत्’ इति तस्य पापजनकत्वश्रुतेश्च । नापि प्रतिग्रहाद्यतिरिक्तोपायान्तरपरिसंख्या, चौर्यादीनां सर्वसाधारणप्रतिषेधेनैव परिसंख्यातत्वात्, शिलोञ्छदायादीनां मुख्यवृत्तित्वेन परिसंख्यानुपपत्तेश्च, जयवाणिज्यादीनां ब्राह्मणपुरस्कारेण आपद्वृत्तित्वविधानादेव अनापदि प्रतिषेधाच्च । अतो ब्राह्मणस्य प्रतिग्रहविधिः दायशिलोञ्छाद्यसंभवे दोषाभावमात्रबोधकतया अभ्यनुज्ञाविधिरेव । दायशिलोञ्छादीनां तु निषिद्धत्वाभावात् मुख्यवृत्तित्वमेव । सोऽपि च ‘त्रीणि कर्माणि जीविका’ इत्यादिवचनात् प्रकरणाद्यभावाच्च पुरुषार्थः । ‘न्यायागतेन द्रव्येण कुर्यात् कर्माणि वै द्विजः । अन्यायोपगतं द्रव्यं गृहीत्वा यो ह्यपण्डितः । धर्माकाङ्क्षी तु यजते न धर्मफलमश्नुते ॥’ इत्यादिवचनैस्तु मुख्यगौणसाधारणवृत्त्युपायानां अधिकारितारतम्येन क्रत्वर्थत्वस्यापि बोधनात् संयोगपृथक्त्वन्यायेन उभयार्थत्वेऽपि न दोषः । यदि तु शिलोञ्छादेः क्वचित् फलश्रवणं भवेत्, तदा जीवनाश्रितयावज्जीवशिलोञ्छनियमस्यैव फलजनकत्वं

बोध्यम्, न तु प्रतिग्रहस्येति व्यर्थोऽयं विचारः, क्रत्वाचिन्तात्वेन वा बोध्यः ।

मण्डन—– ' नार्जने नियमः क्रतोः । '

शंकर—–' पुमर्थे द्रविणार्जनम् । ' ५.

* **द्रव्यार्जनविधिः** अयं विनियोगविधिः पुरुषार्थः । बाल. पृ. १३.

* **द्रव्यादीनि** प्रति यत्रैव क्रियाणां प्रधानत्वम्, तत्रैव तद्भेदनिमित्तापूर्वभेदसिद्धिः । वा. २।१।१।१ पृ. ३७१. * ' **द्रव्यादेर्यत्र** शेषत्वम्, तत्र नैवास्ति शेषिता । फलयागनराणां तु द्व्याकारत्वं परस्परम् ॥ ' द्रव्यगुणसंस्कारा हि फलवन्तं यागं प्रति नियोगतः शेषभूताः । सत्यपि स्वाङ्गानि प्रति शेषित्वे, तं प्रति नास्तीत्यभिधीयते । वा. ३।१।३।६ पृ. ६६४.

* **द्रव्यादिवत्** । क्रियाविशेषणत्वात् ' दध्ना जुहोति ' इति होमक्रियाविशेषणतया दधि द्रव्यं यथा विधीयते, तथा क्रमः क्रियाविशेषणतया विधीयते । के. ५।१।१।१.

* **द्रव्यादिशब्दानां** निष्पन्नार्थाभिधायिनां करणत्वार्थत्वयोगत्वात् प्राप्नोति फलसंगतिः । वा. २।१।१।१ पृ. ३७५.

* **द्रव्यादेशे** तद्द्रव्यः । (द्रव्यस्योपदेशे सति यत्रोपदेशः स यागः तद्द्रव्यक एव विज्ञेयः) । के. ७।३।५।१६.

⌛ **द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात् पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् । ७।३।५।१७ ॥**

वरुणप्रघासगतः अवभृथः सौमिकावभृथधर्मग्राहकः इत्युक्तम् । स किं पुरोडाशद्रव्यकः, उत तुषनिष्कासद्रव्यकः इति विचारे सिद्धान्तमाह । द्रव्यादेशे कस्मिंश्चिद्यागे द्रव्यादेशे द्रव्यस्य आदेशे उपदेशे सति स यागः तद्द्रव्यः स्यात् । तत् द्रव्यं यस्मिन् यागे स यागः तद्द्रव्य एव स्यात् । श्रुतिसंयोगात् श्रुत्या उक्तत्वात् । वारुणप्राघासिके चावभृथे ' वारुण्या निष्कासेन तुषैश्च अवभृथं यन्ति ' इति तुषनिष्कासौ श्रौतमेव द्रव्यम् । तस्मात् तुषनिष्कासद्रव्यक एव वारुणप्राघासिकोऽवभृथः स्यात्, न पुरोडाशद्रव्यकः । पुरोडाशस्तु आतिदेशिकः आनुमानिकः । अतिदेशादुपदेशो बलीयान् । पुरोडाशस्तु अनादेशे । यदि अत्र प्रत्यक्षश्रुतं द्रव्यं न स्यात्, ततः पुरोडाशः स्यात् तत्प्रकृतित्वात् सौमिकावभृथप्रकृतिकत्वात् वारुणप्राघासिकावभृथस्य । तस्मादयमवभृथः न पुरोडाशद्रव्यकः किन्तु तुषनिष्कासद्रव्यक इति सिद्धान्तः । के.

* **द्रव्याश्रयेण** देवताश्रयं बाध्यते अप्राप्तबाधः । वा. ३।३।७।१४ पृ. ८६०.

* **द्रव्याश्रितानां** स्वातन्त्र्येण अग्रहणम् । बृहती. पृ. २४१.

⌛ **द्रव्यैकत्वे कर्मभेदात् प्रतिकर्म क्रियेरन् । ३।५।४।१६ ॥**

सर्वपृष्ठा नाम काचिदिष्टिः । तत्र विशेषणभेदात् भिन्नाः षट् इन्द्राः देवताः । ' इन्द्राय राथंतराय, इन्द्राय बार्हताय, इद्राय वैरूपाय, इन्द्राय वैराजाय, इन्द्राय शाक्कराय, इन्द्राय रैवताय ' इति वचनात् । अत्र केषांचिन्मतेन भिन्नान्येव हवींषि इति वार्तिकम् (पृ. ९९६)। अन्येषां तु मतेन एक एव रथचक्रमात्रः पुरोडाशः । एवं द्रव्यैक्येऽपि देवताभेदात् अवान्तरकर्मभेदः । तत्र स्विष्टकृदादि शेषकार्यं भेदेन कर्तव्यम्, उत तन्त्रेणेति विचारे भेदेन कार्यं इति पूर्वपक्षप्रतिपादनार्थं सूत्रमिदम् । द्रव्यस्य हविर्द्रव्यस्य एकत्वेऽपि देवताभेदेन कर्मभेदात् हेतोः प्रतिकर्म कर्मणिकर्मणि शेषकार्याणि क्रियेरन् ।

अविभागाच्च शेषस्य सर्वान् प्रत्यविशिष्टत्वात् । १७ ॥

सर्वपृष्ठेष्टौ षण्णामिन्द्राणां कृते शेषकार्यं प्रतिकर्म कर्तव्यं इति पूर्वपक्षं तुशब्दस्थानवर्ती चशब्दो वारयति । न षड्वारं भेदेन स्विष्टकृदर्थं अवदातव्यम्, किन्तु सकृदेव । शेषस्य अविभागात् अविभक्तत्वात् ऐक्यात् सर्वान् षट् इन्द्रान् प्रति शेषस्य अविशिष्टत्वात् एकत्वात् । सर्वेषामेक एव उत्तरार्धः । तस्मात् सकृदवदातव्यम् । के.

* **द्रव्यैकत्वे** सत्यपि सगुणनिर्गुणाश्रयणात् देवताऽन्तरत्वम् । आह च ' आचार्यो मातुलश्चेति द्रव्यैकत्वे-

ऽपि दृश्यते । अपेक्षाहेतुभेदेन व्यवहारः पृथक्तया ॥' वा. २।१।५।१७ पृ. ४२४.

* **द्रव्योत्सर्गे** अन्येन क्रियमाणे न किञ्चित् यजमानेन कृतं स्यात् इति यजमानः द्रव्योत्सर्गं करोति। वा. ३।७।८।१९.

* **द्रव्योद्देश्यक** एव प्रतिपत्तिविधिः नियमविधिः। बाल. पृ. २३.

* **द्रव्यकर्मणोः** एकत्वेऽपि ईषद्भेदोऽपि । द्रव्यमाश्रयः, कर्म आश्रितम् । आश्रयाश्रितयोः भेदाभेदौ अभ्युपगम्य तादात्म्यसंबन्धो वर्ण्यते । तस्मात् द्रव्यभेदेऽपि न कर्म भिद्यते । वि. ६।३।३. * **द्रव्यकर्मणां** साम्यवैषम्यप्रतिपादनप्रतिज्ञा । भा. ४।१।८।२१.

* **द्रव्यकर्मसंयोगन्यायः** । ६।१।१।१—३॥ पशुमालभेत । पशौ द्रव्यस्य निष्प्रयोजनत्वात् सक्तुवत् अविवक्षितेप्सितार्थया द्वितीयया कारकसामान्यं लक्षयित्वा तद्विशेषाकाङ्क्षायां सत्यां भूतभव्यसमुच्चारण—द्रव्यकर्मसंयोगन्यायेन करणत्वेन गुणभावे अवगमिते... । वा. ३।१।७।१५. * **द्रव्यकर्मसंयोगन्यायेन** अधिकरणतया अपादानतया च अङ्गत्वेन विशेषणं गार्हपत्यः इन्द्रोपस्थाने । पूर्वपक्षे । (स्वर्गकामाधिकरणम्) । सु. पृ. १०८८. * 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राजा **द्रव्यकर्मसंयोगन्यायेन** क्रियां प्रति शेषभूतः । रत्न. ६।२।१।४.

* न हि **द्रव्यकार्येषु** गुणो वर्तितुमर्हति । भा. १०।२।२।६.

* **द्रव्यगुणयोः** प्रधानत्वाप्रधानत्वप्रतीतिस्तु स्वाभाविकी । नित्यं हि रूपादिषु स्वप्राधान्येन अभिधीयमानेषु द्रव्यं विशेषणत्वेनोच्यते, शुक्लादिषु विशेष्यत्वेन । वा. ३।१।६।१२ पृ. ६८४, * द्रव्यगुणयोः यत्रार्थैकत्वं श्रूयते तत्र द्रव्यगुणौ एकस्मिन् पदार्थे नियम्येयाताम् । भा. ३।१।६।१२ । 'यत्र द्रव्यगुणैकार्थ्ये श्रवणादेव गम्यते । अन्योन्यनियमस्तत्र तयोः स्थाल्यादिवद्भवेत् ॥' वा. पृ. ६९१.

* **द्रव्यगुणादिवत्** क्रमस्यापि पदार्थविशेषणत्वेन विधानम् (दध्ना जुहोति, अरुणया एकहायन्या क्रीणाति, शुक्लानां व्रीहीणाम्) । भाट्ट. ५।१।१ पृ. १५४.

* **द्रव्यगुणशब्दाः** नामानि इत्युच्यन्ते । भा. २।१।१।३, * **द्रव्यगुणशब्देभ्यो** द्रव्यगुणप्रत्ययो न भावनायाः अतस्ते न भावशब्दाः । २।१।१।१ पृ. ३०५.

* **द्रव्यगुणसंस्काराः** फलवन्तं यागं प्रति नियोगतः शेषभूताः, सत्यपि स्वाङ्गानि प्रति शेषित्वे तं प्रति नास्ति इत्यभिधीयते । वा. ३।१।३।६ पृ. ६६४.

⧖ **द्रव्यगुणसंस्कारेषु बादरिः । ३।१।३।३॥**

द्रव्येषु व्रीह्यादिषु, गुणेषु आरुण्यादिषु, संस्कारेषु अवघातादिषु एव शेषत्वं यागं प्रति वर्तते, न तु फलपुरुषकर्मस्विव शेषत्वं शेषित्वं चेत्युभयम् । इति बादरिराचार्यो मन्यते स्म ।

कर्माण्यपि जैमिनिः, फलार्थत्वात् । ४ ॥

न द्रव्यगुणसंस्कारा एव शेषलक्षणलक्ष्याः किन्तु कर्माण्यपि यागप्रयाजादीनि । फलार्थत्वात् फलसाधकत्वात् कर्मणाम् । इति जैमिनिराचार्यो मन्यते । न केवलं द्रव्यगुणसंस्काराणामेव शेषत्वं किन्तु कर्मणामपि शेषत्वं इति ।

फलं च पुरुषार्थत्वात् । ५ ॥

कर्मवत् फलमपि शेषभूतम्, तस्य पुरुषार्थत्वात् । पुरुषोपभोगार्थं हि फलम् । एवं च फलमपि शेषलक्षणलक्ष्यम् । इति जैमिनिराचार्यो मन्यते । न केवलं द्रव्यगुणसंस्काराणामेव शेषत्वं किन्तु फलस्यापि शेषत्वमिति ।

पुरुषश्च कर्मार्थत्वात् । ६ ॥

कर्मवत् फलवच्च पुरुषोऽपि शेषभूतः, कर्मार्थत्वात् औदुम्बरीसंमानादिकर्मार्थः सन् । इति जैमिनिराचार्यो मन्यते । न केवलं द्रव्यगुणसंस्काराणामेव शेषत्वं किन्तु पुरुषस्यापि इति । के.

* **द्रव्यघटितसादृश्यं** देवताघटितसादृश्यापेक्षया बलीयः । भा. ८।१।१७।३२—३४.

* **द्रव्यचिकीर्षया** यत्र गुणभावः तत्र नापूर्वभेदः प्रतिपत्तव्यः । वा. २।१।४।१०.

* **द्रव्यदेवतेन** हि यागोऽभिव्यज्यते । **भा.** ८।१।९।१६, * **द्रव्यदेवतस्याभाव:** चोदनासु अव्यक्तता । ८।१।९।१६. * **द्रव्यदेवतयोर्यागसंपादनद्वारा** अन्वयः सांप्रदायिकैरुक्तः । **मीन्या.** * द्रव्यदेवतयोः संनिपाते द्रव्यस्य बलीयस्त्वम् । **भाट्ट.** ८।१।८.

* **द्रव्यदेवताऽन्वयः** देवतोद्देशपूर्वकद्रव्यत्यागाख्य-क्रियागर्भः । **सु.** पृ. १५२१.

* **द्रव्यदेवताऽऽदिभिः** विकृतावुपदिष्टैः प्राकृत-द्रव्यदेवताऽऽदीनां बाधः । (काम्यासु विकृतिषु इत्यत्राधिकरणम्) । **भा.** १०।७।१७।५८–६०.

* **द्रव्यदेवतोभयश्रवणे** सति यागविधिः स्वीकर्तव्यः । 'वायव्यं श्वेतमालभेत' 'सौर्यं चरुं निर्वपेत्'। द्रव्यदेवतोभयसंयोगः यागविधेः प्रयोजकः । **के.** २।३।५। १२–१५.

* **द्रव्यदेवताक्रियं** यजतिचोदना । (**सूत्रम्**) यजतिचोदना तावत् द्रव्यदेवताक्रियम् (**भाष्यम्**) । **के.** ४।२।१२।२७.

* **द्रव्यदेवतायुक्तानां** यागान्तरत्वम् । **भा.** २।३। ५।१२–१५.

* **द्रव्यदेवतालक्षणस्य** रूपस्य भिन्नत्वात् कर्मान्तरम् । चातुर्मास्यवैश्वदेवपर्वणि 'सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम् ' इत्यत्र । **वि.** २।२।९.

* **द्रव्यदेवतासंबन्धो** हि यज्यर्थः । **भा.** १०।१। १०।४२, * **द्रव्यदेवतासंबन्धेन** पञ्चशरावे कर्मान्तरं गम्यते । यथा च पशुकामेष्टयाम् । ६।५।१।१.

* **द्रव्यदेवतासंबन्धन्यायेन** क्रियाकारकसंबन्धस्य फलसंबन्धे वृत्ते... (वैश्वदेवीशब्देनैव संनिहितस्य द्रव्यविशेषस्य देवताऽन्वये अभिहितेऽपि आमिक्षाशब्दो विशेष्यान्वयार्थः तद्वत् इति) । **वा.** २।२।११।२६ पृ. ५५१.

* **द्रव्यदेवतासंबन्धप्रतिपादकतद्धितान्तपदाक्षर-साम्यं** चोदनालिङ्गं अतिदेशकरम् । 'आग्नावैष्णवमेकादशकपालं निर्वपेत् ' इत्येतेषां पञ्चाक्षरतद्धितान्तपदवत्त्वं चोदनालिङ्गम् । **बाल.** पृ. १२०, * द्रव्यदेवतासंबन्ध-प्रतिपादकतद्धितान्तपदाक्षरसाम्यं प्रकृतिलिङ्गम् । पृ. ११९.

* **द्रव्यदेवतासंबन्धसमुदाययोर्विधौ** 'संबन्धो हि विधीयमानः संबन्धिनं तावत् आक्षिपेत् धात्वर्थे पुनः स विधातव्य एव संबन्धी, अन्यथा संबन्धस्यैव संबन्धी शेषः स्यात् न क्रियायाः ' इति आघाराग्निहोत्राधिकरणवक्ष्यमाणन्यायेन (वा. २।२।५।१६ पृ. ५०२) द्रव्यदेवतयोरपि विध्यापत्तेः वाक्यभेदः । **सु.** पृ. ७४२.

* **द्रव्यदेवतासंयोगस्तु** न कथंचिद् यागाद्विना सिध्यति । **वा.** २।२।६।१८ पृ. ५१६.

* **द्रव्यनाशे** दर्शपूर्णमासयोः आज्येन न समापनम्, वचनात् (स्विष्टकृतः) । **भाट्ट.** ४।१।७.

* **द्रव्यनियमविधिः** प्रतिनिधिनियमेन बाध्यते । **बाल.** पृ. १४४.

* **द्रव्यन्यायः** । द्रव्याधिकरणम् ३।१।५।११ इत्यत्र, द्रव्यसंख्याहेतुसमुदायन्यायः ९।१।५।११–१९ इत्यत्र च द्रष्टव्यः । तथा च द्विविधोऽयम् । **के.** * संख्यासमुदाययोरपि **द्रव्यन्यायेनैव** अप्रयोजकत्वं द्रष्टव्यम् । द्रव्य-संख्याहेतुसमुदायन्याय एवायम् । **सोम.** ९।१।५.

* **द्रव्यपदार्थो** हि अद्रव्याश्रितो भवति परमाण्वाकाशादिः । अनेकद्रव्याश्रितोऽपि भवति घटादिः । **ऋजु.** पृ १९८.

* यदा शब्दः केवलगुणवचनतायां प्रवर्तमानः नान्येन संबन्धं लभते, तदा अनुपदेशकत्वात् आनर्थक्यं मा भूत् इति **द्रव्यपरतामापद्यते** । **भा.** ३।१।६।१२ पृ. ६८६.

* **द्रव्यपरिच्छेदद्वारा** आरुण्यस्य क्रयसंबन्धो लब्धः । **वा.** ३।२।२।३ पृ. ७५२.

* **द्रव्यप्रतिनिधिनियमविधिः** प्रत्यक्षविधिः 'यदि सत्राय दीक्षितानां प्रमीयेत योऽस्य नेदिष्ठः स्यात् तं तस्य स्थाने दीक्षयित्वा ' इति । नेदिष्ठशब्दस्य यौगिकत्वेन द्रव्यवाचित्वात् । **बाल.** पृ. २३.

* '**द्रव्यप्रयुक्तत्वाभावात्** वाजिनयागस्य लोपः ' इति न्यायः । तेन वाजिनयागात् पूर्वं वाजिनापचारे पुनर्द्ध्यानयनेन वाजिनं न संपादनीयम् । स्विष्टकृतस्तु आज्येनानुष्ठानम् । **सोम.** ४।१।९.

* **द्रव्यभेदेन** संख्याभेदेन वा अपूर्वान्तरं न भवति। किं तर्हि ? प्राकृती संख्या प्राकृतं च द्रव्यमपनीयते। उपकारस्तु स एव। टुप्. १२।१।१४ पृ. २२२१.

⌛ **द्रव्यभेदेऽपि कर्म न भिद्यते ॥**

क्रियाणामाश्रितत्वाद् द्रव्यान्तरे विभागः स्यात्। ६।३।३।११॥

भाष्यम्— दर्शपूर्णमासयागः पुरोडाशेनोक्तः । स च पुरोडाशो व्रीहिमयः कर्तव्य इति श्रूयते। तत्रैतच्चिन्त्यते यदि नीवारमयेन पुरोडाशेन यागः क्रियेत, किं स एव यागः स्यात् उतान्य इति । किं प्राप्तम् ? द्रव्यान्तरे विभागः स्यात् । अन्यो यागः । कुतः ? आश्रितत्वात्। आश्रयभेदाद्धि गम्यते विशेषः। अयमन्यो नीवाराश्रयो व्रीह्याश्रयादिति । आश्रयभेदस्तावत् विस्पष्ट एव। तद्भेदात् रूपमपि भिन्नं गम्यते। तस्मादन्यो यागो द्रव्यान्तरे इति ।

अपिवाऽव्यतिरेकाद् रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववत्। १२॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः। ऐककर्म्यं स्यात् द्रव्यान्तरेऽपि। यदा क्रिया भवति चलनं पतनं वा, तदाऽपि तावानेव सोऽर्थः। न च कश्चित् तत्र व्यतिरिक्तो विशेषो हीनो वा। नो खल्वपि अन्यदेव रूपम्। न च शब्दान्तरं वाचकम्। ननु आश्रयभेदो विस्पष्टः। उच्यते । भिन्नमेव वयमाश्रयं प्रतिजानीमहे, न तु तद्भेदादाश्रितस्य भेदः, अन्यत्वात्। न हि स्रजि वाससि वा भिन्ने तद्भेदात् पुरुषभेदो गम्यते । सोऽपि तस्य आत्मा भिन्न इति चेत्, नैतदेवम्। विशेषमुपलभमानैः एवं शक्यं वक्तुम्। न चास्य विशेष उपलभ्यते।

ननु अयमेव विशेषः, यत् एको विनष्टः एको वर्तते। न विनष्ट इति यदुच्यते, तन्न। प्रागस्य उपलम्भनात् सत्त्वे प्रमाणं नास्ति। तस्मात् विनष्टः। न च प्रत्यभिज्ञायते (तद्द्रव्यातिरिक्तः, इत्यधिकं क्वचित्) भेदानुपलम्भनात् (विनष्टस्य रूपात् भेदेन स्थिरस्य रूपानुपलम्भनात् इत्यर्थः)। कथं तर्हि चलतीति प्रत्यय इति चेत्, उच्यते। देशान्तरे संप्रतिपत्तिदर्शनात्। तत् देशान्तरं गच्छत् आगच्छच्च चलतीत्युच्यते। तत्र आगन्ताऽपि प्रत्यक्षः, देशान्तरमपि (प्रत्यक्षम्)। तेन गतः इति चोच्यते, आगतः इति चोच्यते। (' ननु अयमेव ' इत्यारम्य ग्रन्थः विनष्टाविनष्टप्रत्ययभेदात् क्रियाभेदप्रतिपादनपरः)।

सत्यं विनष्टादविनष्टः अन्यः। योऽपि तु असावन्यः, सोऽपि यजतिशब्दवाच्यः एव । यजतिसामान्यं न भिद्यते । न च शब्देन नोच्यते। तस्मात् योऽपि नीवारैर्यागं कुर्यात्, तेनापि चोदितमेव कृतम्। चोदितं च कुर्वतः ईप्सितं भवति, नापूर्वकृतम्। नामधेयं च दर्शयति। दर्श इति वा पूर्णमास इति वा अस्यैव सामान्यस्य नामधेयम्, न व्यक्तीनाम्। किं प्रयोजनं चिन्तायाः ? उत्तरेणाधिकरणेन एतद्विचार्यते।

टुप्— (अतः प्रभृति आपादपरिसमाप्तेः यथाशक्तिप्रयोगगतविशेषचिन्ता । पूर्वाधिकरणं तु यथाशक्तिप्रयोगस्यैव अतिप्रसङ्गनिवृत्त्यर्थतया शेषभूतम्। सिद्धान्तमाह–) **अपिवाऽव्यतिरेकात्**। दर्शपूर्णमासौ यथा कालान्तरदेशान्तरपुरुषान्तरेषु क्रियमाणौ नातिरिच्येते, न (चापि) न्यूनौ भवतः। एवं द्रव्यान्तरेऽपि (अन्यूनानतिरिक्तावेव। अनेन 'अव्यतिरेकात्' इति सूत्रपदं विवृतम्। रूपाविभागं विवृणोति–) न च द्रव्यान्तरेऽपि ' तावेव दर्शपूर्णमासौ ' इत्यस्य प्रत्ययस्य प्रत्यक्षावगतस्य बाधोऽस्ति, शब्दान्तरादीनाम् (भेदकारणानाम्) अभावात् । नहि नीवारैः क्रियमाणस्य शब्दान्तरादि –(निमित्तो–)भेदः अवतरति, येन ' तदेवेदम् ' इति (प्रत्यभिज्ञा–)प्रत्ययो बाध्येत । (शब्दाविभागं विवृणोति–) द्रव्यान्तरेणापि च क्रियमाणस्य (क्रियमाणे इति मुद्रिते पाठः) दर्शपूर्णमासाद्यभिधेयता अस्त्येव। यथा नैव चैत्रीप्रयोगात् वैशाखीप्रयोगो भिद्यते। तेन (भेदाभावेन) तौ दर्शपूर्णमासाभिधेयतां न जहीतः। तथा तत्सामान्यात् नीवारैरपि क्रियमाणयोः अस्त्येव (तदभिधेयता)। तस्यैव सामान्यं फले चोद्यते इति चेत्, तदयुक्तम्। नहि सास्नादिवत् (सास्नादिभिरिव गोत्वम्) सामान्यं अत्राभिव्यज्यमानमुपलभ्यते (तस्मान्न सामान्यं फले विधीयते) किं तर्हि ? षट् आग्नेयादयो व्यक्तिविशेषाः उत्पन्नाः फले विधीयन्ते।

दर्शपूर्णमासशब्दवाच्याश्च व्यक्तय एव । अतो द्रव्यान्तरेणापि (नीवारादिना) क्रियमाणे (कर्मणि) व्यक्त्यन्तरबुद्धिर्नोपजायते ।

शा— अतः परं अतिप्रसङ्गनिराकरणेन नैमित्तिके स्थापितस्य यथाशक्तिप्रयोगस्य शेषत्वेन प्रतिनिधिविचाराः प्रस्तोष्यन्ते । तदुपोद्घातत्वेन तु इदं चिन्त्यते । तत्र '**द्रव्यस्यैव क्रिया नाम रूपं नार्थान्तरं ततः । तदात्मनश्च तद्भेदे न भवेद् भिन्नता कथम् ॥**' उच्यते, '**तदात्मनोऽपि त्वस्यैव व्यतिरेकः कियानपि । जातिवद् गुणवच्चातस्तद्भेदेऽपि न भिद्यते ॥**' अतो द्रव्यान्तरेऽपि क्रियाभेदाभावात् सिद्धः प्रतिनिधिः ।

सोम— सूत्रार्थस्तु– क्रियाणां द्रव्याव्यतिरेकात् द्रव्यान्तरे विभागो भेदः स्यादिति ।

वि— 'नीवारादिद्रव्यभेदात् कर्मान्यत् स्यात् तदेव वा ।, द्रव्यकमक्यतः पूर्व, स्तत्रेषद्भेदतोऽन्तिमः ॥'

भाट्ट— एवं यथाशक्त्युपबन्धे निरूपिते तच्छेषत्वेन प्रतिनिधिविचारे कर्तव्ये उपोद्घाततयेदं विचार्यते । तत्र मूले तावत् द्रव्यस्य क्रियातोऽत्यन्तभेदाभावात् द्रव्यभेदे कर्मभेदापत्तेः न नीवाराद्युपादाने विहितक्रियासिद्धिरिति पूर्वपक्षिते अत्यन्तभेदाभावेऽपि अत्यन्ताभेदस्यापि अभावात् कर्तृदेशकालादिवत् द्रव्यभेदेऽपि तदेवेदं चलनं यजनमित्यादिप्रत्यभिज्ञाबलात् क्रियैक्यप्रतीतेः प्रतिनिध्युपादानेऽपि न क्षतिः । तत्र च जगतीतलवर्तिनी एकैव कर्मव्यक्तिः अभिव्यक्तिमात्रं तु भिद्यते । **अथवा** शब्दान्तरादिप्रमाणैरेव व्यक्तिभेदः, द्रव्यदेशकालकर्तृव्यक्त्यादिभिस्तु तस्या एव व्यक्तेरभिव्यक्तिभेदमात्रम् । **अथवा** माऽस्तु तत्रापि व्यक्तिभेदः शब्दान्तरादिप्रमाणैश्च आग्नेयत्वादिजातय एव भिद्यन्ते इति सिद्धान्तितम् ।

तत् द्रव्याश्रितत्वेऽपि क्रियायास्तद्भेदे वैजात्यस्य शङ्कितुमशक्यत्वात् व्यक्त्यैक्यसिद्धान्ते चापूर्वापह्नवापत्तेः । तस्याभिव्यक्तिजन्यत्वे च यजिपदे तल्लक्षणाऽऽपत्तेरुपेक्षितम् ।

अत एवं विचारो वाच्यः:– सत्यपि शब्दान्तरादिप्रमाणैः आग्नेयत्वादिवैजात्ये विधेयताऽवच्छेदकविजातीययागत्वावच्छिन्नं प्रति व्रीहित्वादिनैव कारणत्वावगतेः, तस्यैव तज्जात्यभिव्यञ्जकत्वावसायात् न नीवाराद्युपादाने तज्जात्यवच्छिन्नसिद्धिः । **इति प्राप्ते**; सत्यपि तज्जात्यवछिन्नं प्रति तत्त्वादिना कारणत्वे, न तस्य प्रत्येकं तज्जात्यभिव्यञ्जकत्वम्, व्रीहित्वादिना कर्मान्तरेऽपि कारणत्वेन व्यभिचारात् । अपि तु सामग्रीत्वेनैव । सामग्री च शक्तस्य व्रीहिघटिता । अशक्तस्य तु तदघटिता । अतश्च व्रीह्यभावे नीवाराद्युपादानेऽपि विजातीययागत्वापूर्वत्वफलत्वावच्छिन्नं जायते एव । फलं परं नित्ये एव तारतम्येन जायते । काम्ये तु आरम्भोत्तरमशक्तस्य शिष्टविगर्हणदोषपरिहारार्थं समापनेऽपि न फलोत्पत्तिः । सर्वाङ्गोपसंहारेणैव तदुत्पत्तेः । प्रयोगसमाप्त्यकरणे दोषमात्रोत्पत्तेः । करणे फलान्तराभावात् नापूर्वोत्पत्तिरिति केचित् । नैमित्तिकत्वाविशेषात्तु तत्रापि पापक्षयकल्पनेऽपि तत्रापि तारतम्यमित्यपि ध्येयम् ।

मण्डन—' कर्म नान्यत् प्रतिनिधौ । '

शंकर—' कर्माभेदो द्रव्यभेदे (अपि) । '

* **द्रव्यरहितस्याप्यधिकारः कर्मसु**, द्रव्यार्जनसंभवात् । **भा.** ६।१।८।३९–४०.

* **द्रव्यवचनः** त्रिष्टुप्शब्दः । **संकर्ष.** ४।३।१३, * द्रव्यवचनः बृहतीशब्दः । शब्दो द्रव्यं इत्यर्थः । ४।४।४. * **द्रव्यवचनत्वं** पिङ्गाक्ष्यादीनाम् । **वा.** ३।१। ६।१२ पृ. ६७९.

⌛ **द्रव्यवच्चोपचार इति न्यायः ।** द्रव्यवच्चोपचाराः प्राप्नुवन्ति । उपचाराः व्यवहाराः । यथैकेन घटेन उदकाहरणादिक्रियां युगपदनेको न करोति एवं प्रकृतेऽपि बोध्यमिति प्रत्याहाराह्निके इति । **साहस्री.** ८२७.

* **द्रव्यवत्त्वं स्त्रीणामपि** । 'अर्थेन च समवेतत्वात्' (६।१।३।१४) । एवं दानकाले संवादः 'धर्मे चार्थे च कामे च नातिचरितव्या' इति भाष्यम् । 'स्ववत्तामपि दर्शयति' (६।१।३।१६) 'पत्नी वै पारिणय्यस्येष्टे' (इति श्रुतेः) भाष्यम् । **के.**

* '**द्रव्यविकारं तु पूर्ववदर्थकर्म**' इति न्यायः जाघनीसमुच्चयन्यायः इति बिन्दौ द्रष्टव्यः । **के.**

⌛ **द्रव्यविकारं तु पूर्ववदर्थकर्म स्यात् तथा विकल्पे नियमः प्रधानत्वात् । १२।४।६।१०॥**

पशुगणे पत्नीसंयाजेषु जाघनीनां समुच्चयो विकल्पो

वेति विचार्यते । द्रव्यविकारं द्रव्यस्य पशोः विकारः अवयवः जाघनी यस्मिन् तत् द्रव्यविकारं पत्नीसंयाजनं कर्म पूर्ववत् पूर्वस्मिन् इव प्रकृतौ दर्शपूर्णमासयोरिव अर्थकर्म स्यात् न प्रतिपत्तिकर्म । एवं च तथा प्रकृतिवत् विकल्पे आज्येन सह जाघन्याः विकल्पे प्राप्ते 'जाघन्या पत्नीः संयाजयन्ति' इति अग्नीषोमीये पशौ पुनःश्रुत्या जाघन्याः नियमः स्यात्। कर्मणः प्रधानत्वात् जाघन्याश्च गुणत्वात् । तस्मात् जाघन्या पत्नीसंयाजनं अग्नीषोमीये पशाविव पशुगणेऽपि अर्थकर्म । अर्थकर्मणि च एकार्थानां जाघनीनां समुच्चयो न युक्तः । तस्मात् पशुगणे पत्नीसंयाजेषु जाघनीनां विकल्पः इति सिद्धान्तः ।

द्रव्यत्वेऽपि समुच्चयो, द्रव्यस्य कर्मनिष्पत्तेः, प्रतिपशु कर्मभेदादेवं सति यथाप्रकृति ।११॥

पत्नीसंयाजे कर्मणि जाघनी हविर्द्रव्यम्, इति जाघनी गुणभूता । एवं पशुगणे जाघनीनां द्रव्यत्वेऽपि गुणत्वेऽपि समुच्चयः स्यात् । द्रव्यस्य जाघन्याः कर्मनिष्पत्तेः कर्मणा विशसनेन निष्पत्तेः उत्पन्नत्वात् प्रयोजनापेक्षायां पत्नीसंयाजनं प्रयोजनम् । पशुगणे च प्रतिपशु कर्मणो भेदात् तस्यतस्य पशोः विशसनेन निष्पन्ना जाघनी पत्नीसंयाजार्था स्यात् । एवं सति यथाप्रकृति अग्नीषोमीयपशुवत् कृतं भविष्यति । तस्मात् अर्थकर्मत्वेऽपि जाघनीनां समुच्चयः इति पूर्वः पक्षः ।

कपालेऽपि तथेति चेत् । १२ ॥

कश्चित् पूर्वपक्षं प्रतिबन्द्या आक्षिपति । कपालेऽपि तथा जाघनीवत् समुच्चयः स्यात् । विशसनकर्मनिष्पन्नत्वात् चेत् जाघनीनां समुच्चयः, तदा 'पुरोडाशकपालेन तुषानुपवपति' इति प्रयोगकर्मणा कपालं प्रयुज्यते तस्यापि तुषोपवपनं प्रयोजनं भवितुमर्हति, इति पुरोडाशगणे प्रतिपुरोडाशं कपालेन तुषोपवपनं कर्तव्यं प्राप्नोति । इति तत्रापि समुच्चयः स्यात् । तत्र यदि कपाले न समुच्चयः, तर्हि जाघन्यामपि मास्तु ।

न, कर्मणः परार्थत्वात् । १३ ॥

आक्षेपं च पूर्वपक्षं चोभयं प्रतिक्षिपति सिद्धान्ती । कपाले प्रयोगकर्मणः परार्थत्वात् पुरोडाशश्रपणार्थत्वात् । तथा च तुषोपवपनार्थे कपालानामुत्पत्तेरभावात् न तेषां समुच्चयः । एवं जाघनीषु विशसनकर्मणः परार्थत्वात् हृदयादिनिष्पत्त्यर्थत्वात्, तथाच जाघन्यर्थे विशसनाभावात् तासामनुनिष्पन्नत्वात् न जाघनीनां समुच्चयः ।

प्रतिपत्तिस्तु शेषत्वात् । १४ ॥

पूर्वपक्षी आह । जाघन्या पत्नीसंयाजनं न अर्थकर्म, प्रतिपत्तिस्तु एषा । शेषत्वात् जाघन्याः उपयुक्तपशोः शेषत्वात् । पशुना यागे निर्वर्तिते शेषभूता जाघनी पत्नीसंयाजेषु निक्षिप्यते । तस्माज्जाघनीकर्म प्रतिपत्तिः । तस्मात् पशुगणे पत्नीसंयाजेषु जाघनीनां समुच्चयः ।

शृतेऽपि पूर्ववत्त्वात् स्यात् । १५ ॥

प्रतिबन्द्या कश्चित् शङ्कते । शृतेऽपि 'शृते चरुम्', 'दधंश्चरुम्' इति शृतेऽपि दधन्यपि च प्रतिपत्तिः स्यात् । पूर्ववत्त्वात् अन्यपूर्वकत्वात्तयोः । शृतं दधि च दर्शे इन्द्रायोत्पन्नम् । तयोः चन्द्रोदयेन निमित्तेन विष्णुं शिपिविष्टं प्रति गमनम् । तत् गमनं प्रतिपत्तिः स्यात् । यदि तदनिष्टम्, तदा जाघन्याः पशुयागपूर्वकत्वेऽपि पत्नीसंयाजेषु न प्रतिपत्तित्वम् । तस्मान्न समुच्चयः ।

विकल्पे त्वर्थकर्म नियमप्रधानत्वाच्छेषे च कर्मकार्यसमवायात्, तस्मात् तेनार्थकर्म स्यात् । १६ ॥

अत्र सूत्रे द्वौ विभागौ, तत्र 'विकल्पे तु' इत्यादिना 'प्रतिपत्तिस्तु शेषत्वात्' (१४ सू.) इत्यस्य निरासः । 'शेषे च' इति द्वितीयेन च विभागेन 'शृतेऽपि' (१५ सू.) इत्यस्य निरासः । दर्शपूर्णमासयोः जाघन्याः अज्येन सह विकल्पः । पशौ च तथैव विकल्पे प्राप्ते, 'जाघन्या पत्नीः संयाजयन्ति' इति अग्नीषोमीयपशुगतपुनःश्रुतेः नियमप्रधानत्वात् । पुनःश्रुत्या आज्यं निवर्त्य जाघन्या नियमः कृतः । सा च पुनःश्रुतिः जाघन्याः अर्थकर्मत्वं न वारयति । इति जाघन्याः पत्नीसंयाजनं अर्थकर्म । ततश्च पशुगणे जाघनीनां विकल्पः । अथ शृते उच्यते । यदुक्तं शृतस्य इन्द्रार्थमुत्पन्नस्य विष्णुं प्रति गमनं प्रतिपत्तिरिति तन्न । **शेषे च कर्मकार्यसमवायात् ।** य उपयुक्तस्य शेषः तस्मिन् संस्कारात्मकं कर्मकार्यं समवैति । न च शृतं कचिदुपयुक्तम् । यस्मै यागाय तदुत्पन्नं

सः चन्द्राभ्युदयेन निमित्तेन नैव निर्वर्त्यते । तस्मात् तेन शृतेन अर्थकर्म स्यात्, न प्रतिपत्तिः । अर्थकर्मत्वाच्च पशुगणे पत्नीसंयाजेषु जाघनीनां विकल्पः इति सिद्धान्तः । के.

* **द्रव्यविधयः** सर्वे नियमविधयः इति मीमांसकमर्यादा । **रसायनम्. ४०.**

⧗ द्रव्यविधिसंनिधौ संख्या तेषां गुणत्वात् स्यात् । १०।३।११।३९॥

ज्योतिष्टोमे 'गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' इति श्रुतम् । द्वादशाधिकं शतं द्वादशशतम् । द्रव्यविधिसंनिधौ द्रव्याणां गवादीनां विधेः संनिधौ विधीयमानानां द्रव्याणां संनिधौ श्रूयमाणा द्वादशाधिकशतरूपा संख्या तेषां गवादीनां प्रत्येकं स्यात् । द्वादशशतं गावः, द्वादशशतं गर्दभाः, द्वादशशतं माषाः इत्येवम् । गुणत्वात् । गवादीनां प्रधानत्वात्, संख्यायाश्च गुणत्वात्, प्रतिप्रधानं गुणावृत्तिः इति न्यायात् । तस्मात् प्रतिद्रव्यं द्वादशशतसंख्याऽन्वयः कर्तव्यः इति पूर्वः पक्षः ।

समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् । ४०॥

पूर्वपक्षं सूत्रेण प्राप्तं निषेद्धुं तुशब्दः । गुणानां समत्वात् गवादयोऽपि दक्षिणया संबद्धाः संख्याऽपि । तस्मात् उभयोरपि दक्षिणागुणत्वेन समत्वात् न संख्यायाः गवादिना अन्वयः । ततो न प्रत्येकं संख्याऽन्वयः । तस्मात् एकस्य कस्यचित् द्वादशशतसंख्यान्वयः । संख्यायाः दक्षिणया अन्वयस्तु श्रुतिसंयोगात् । द्वादशशतशब्दस्य दक्षिणाशब्देन सांनिध्यात् । तस्मात् एकं किञ्चित् द्रव्यं द्वादशाधिकशतसंख्याकं देयम् । इति द्वितीयः पूर्वपक्षः ।

यस्य वा संनिधाने स्याद्वाक्यतो ह्यभिसंबन्धः ।४१॥

वाशब्दः पूर्वसूत्रोक्तद्वितीयपूर्वपक्षनिरासार्थः । ज्योतिष्टोमे गवाश्वादीनां तिलमाषान्तानां दशानां द्रव्याणां यस्यकस्यचित् द्वादशाधिकशतसंख्याकत्वं इति न युक्तम् । किन्तु यस्य द्रव्यशब्दस्य संनिधाने संख्याशब्दो वर्तते तस्य सा संख्या स्यात् । माषशब्दस्य च संनिधाने द्वादशशतं इति शब्दः श्रूयते । तस्मात् द्वादशाधिकशतसंख्या माषाणामेव स्यात् । हि यस्मात् वाक्यतः अभिसंबन्धः एकवाक्यतया संनिहितस्य माषशब्दस्यैव संख्यायामन्वयः । इति तृतीयः पूर्वपक्षः ।

असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते, तस्मात् सर्वाधिकारः स्यात् । ४२ ॥

तृतीयं पूर्वपक्षं सूत्रेण प्राप्तं निरसितुं तुशब्दः । संख्या केवलैर्माषैः असंयुक्ता, न संयुक्ता । इतराभिः द्रव्यश्रुतिभिः माषा अपि तुल्यवदेव विधीयन्ते । गौश्च अश्वश्च इति प्रत्येकं चशब्दः श्रुतौ पठ्यते, तेन सर्वेषामेव द्रव्याणां तुल्य एव संबन्धो भवति संख्यया । तस्मात् सर्वाधिकारः स्यात् सर्वेषां दशानामपि द्रव्याणां अधिकारः स्यात् । तस्मात् सर्वव्यापिनी संख्या । यस्मात् इतराभिः द्रव्यश्रुतिभिः तुल्यवत् माषा विधीयन्ते । तस्मात् संख्यायां सर्वाधिकारः स्यात् । तस्मात् सर्वाणि गवादीनि माषान्तानि दश द्रव्याणि मिलित्वा द्वादशशतसंख्याकानि भवेयुः । इति चतुर्थः पूर्वपक्षः ।

असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्यकोपात् क्रतोः । ४३ ॥

चतुर्थं पूर्वपक्षं सूत्रेण प्राप्तं निरस्यन् पञ्चमं पक्षमाह । विधिश्रुतौ विधिवाक्ये असंयोगात् दशद्रव्यसमुदायस्य संख्यया असंयोगात् समुदायपदबोधकपदाभावेनासंबन्धात् एकजाताधिकारः स्यात् एकस्य जातस्य जातेः एकजातीयस्यैव अधिकारः स्यात् संख्यायाम् । क्रतोः श्रुत्यकोपात् । 'तस्य दक्षिणा' इत्यत्र तस्य इति पदस्य क्रतोरित्यर्थः । तस्य च एकवचनान्तत्वम् । 'गौश्चाश्वश्च' इत्यत्रापि एकवचनान्तत्वमेव । तत्र समुदायस्य संबन्धे स्वीकृते एकत्वश्रुतेः कोपः स्यात् विरोधः स्यात् । एकजातीयस्यान्वये तु कोपो न स्यात् । तस्मात् गौश्चाश्वश्च इत्यनेन, तस्येति क्रतुवाचकेन च उक्तस्य एकत्वस्य अविरोधाय समुदायान्वयो न स्वीकर्तव्यः । किन्तु एकजातीयस्यैव संख्यायामन्वयः स्वीकर्तव्यः । इति पञ्चमः पक्षः ।

शब्दार्थश्चापि लोकवत् । ४४ ॥

ज्योतिष्टोमे गवाश्वादीनि तिलमाषान्तानि दश द्रव्याणि दक्षिणात्वेन उक्तानि । तत्र च द्वादशाधिकशतसंख्या

श्रुता । सा कस्यचित् एकजातीयस्य स्यात् इति पञ्चमः पक्ष उक्तः । तत्र युक्त्यन्तरमाह । अपिच किञ्चेत्यर्थः । शब्दार्थः शब्दादर्थस्य प्रत्ययः एकजातीयस्यैव भवति असति बाधके । लोकवत् यथा लोके ' शतमाभ्यां दीयताम् ' इत्युक्ते एकजातीयानां शतं प्रतीयते न भिन्नजातीयानां तद्वत् । तस्मात् एकजातीयस्यैव कस्यचित् संख्यायामन्वयः ।

सा पशूनामुत्पत्तितो विभागात् । ४५ ॥

इयं संख्या कस्यचित् एकजातीयस्य इति पूर्वसूत्राभ्यामवगतम् । एकजातीयस्यापि किं पशूनाम्, उत धान्यानां इति विचारे आदितः षष्ठं पक्षमाह । सा द्वादशाधिकशतसंख्या गवादीनां पशूनां स्यात्, न तु व्रीह्यादीनां धान्यबीजानाम् । उत्पत्तितो विभागात् । स्वाभाविकेन विभागेन पशवः व्यवहारेषु संख्यायन्ते पञ्चभिरश्वैः क्रीतः, पञ्चभिर्गोभिः क्रीतः इति । नहि व्रीह्यादिबीजानां तथा व्यवहारः । तस्मात् सा संख्या पशूनां स्यात्, न धान्यानाम् ।

अनियमोऽविशेषात् । ४६ ॥

अथ पशूनामपि कस्य पशुविशेषस्येयं संख्या इति विचारे, आदितः सप्तमं पक्षमाह । अविशेषात् विशेषस्य अनुक्तत्वात् अनियमः स्यात्, गवां वा अश्वानां वा इत्यादिः ।

भागित्वाद्वा गवां स्यात् । ४७ ॥

सप्तमं पक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । सा संख्या गवां स्यात् । भागित्वात् गवां महाभागत्वात् । अश्वानां च दानप्रतिग्रहविक्रयाः प्रतिषिद्धाः । सर्वपश्वपेक्षया तु गवामेव महाभागत्वम् । तस्मात् गवामेव द्वादशशतसंख्या प्रत्येतव्या इति सिद्धान्तः ।

प्रत्ययात् । ४८ ॥

सिद्धान्ते हेत्वन्तरमाह । 'गौश्च अश्वश्च अश्वतरश्च' इत्यादिदक्षिणावाक्ये आदौ गवामेव प्रत्ययो ज्ञानं भवति । तस्य त्यागे कारणाभावात् गवामेव सा संख्या प्रत्येतव्या ।

लिङ्गदर्शनाच्च । ४९ ॥

सिद्धान्ते तत्र हेत्वन्तरमाह । लिङ्गस्य दर्शनाच्च गवामेव सा संख्या । 'तां वा एतां शबलीं समामनन्ति इडे रत्ने हव्ये काम्ये चन्द्रे ज्योतिरदिति सरस्वति महि विश्रुति एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं कृतात्' इति गवामेतानि नामानि । सहस्रतमीं च दक्षिणामेवमाह एतानि ते नामानीति । यदि सा गौः एवमेतदवकल्पते । तस्मात् ज्योतिष्टोमे द्वादशशतसंख्या गवामेव । इति सिद्धान्तः । **के.**

* **द्रव्यविशेषा** ह्येते स्त्री पुमान् नपुंसकमिति । **भा.** ३।१।६।१२ पृ. ६८१.

* **द्रव्यविषये** उद्देश्यताऽवच्छेदकनिरूपणाधिकरणम् । **भा.** ३।१।५।११.

* **द्रव्यविषयक**—उद्देश्यताऽवच्छेदकनिरूपणाधिकरणम् । द्रव्याधिकरणमेवेदम् । स्फ्याधिकरणम् । **भा.** ३।१।५।११.

* **द्रव्यशब्दः** छन्दोगैर्ऋक्षु आचरितः । **भा.** ७।२।१।१४.

द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात् । ९।१।५।११ ॥

'व्रीहीन् प्रोक्षति' इति प्रोक्षणं किं व्रीहिरूपद्रव्यस्वरूपार्थम्, किंवा अपूर्वसाधनत्वप्रयुक्तम् । तथा 'त्रीन् परिधीन्, तिस्रः समिधः' इति मन्त्रः किं परिधित्रित्वसंख्यार्थः, उत अपूर्वसाधनत्वार्थः । तथा 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इति होमः किं अन्नकरणसंस्कारार्थः, किंवा अपूर्वार्थः । तथा 'चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्रा अमावास्याम्' इति अभिमर्शनं किं पौर्णमास्यादिसमुदायस्वरूपार्थम्, किंवा तदुभयापूर्वार्थम् । इति विचारे पूर्वपक्षमाह । द्रव्यं व्रीह्यादि च, संख्या परिध्यादिगतत्रित्वादिः, शूर्पगतान्नहेतुत्वम्, पौर्णमास्यादिगतसमुदायश्च एषां समाहारः द्रव्यसंख्याहेतुसमुदायं प्रोक्षणादेः प्रयोजकं स्यात् । श्रुतिसंयोगात् द्वितीयाश्रुतिसंयोगात् हिशब्दश्रुतिसंयोगाच्च । वाशब्दः अविवक्षितोऽत्र । ऊहो न सिध्यति इति भावः ।

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ।१२॥

द्रव्यसंख्याहेतुसमुदायं प्रोक्षणादीनां प्रयोजकं इति पूर्वपक्ष उक्तः । अत्र विपक्षे दोषमाह । अर्थकारिते । अर्थ्यते इति अर्थः अपूर्वम् । अर्थेन कारिते प्रयुक्ते

प्रोक्षणादिधर्मे अभ्युपगम्यमाने द्रव्येण व्यवस्था न स्यात्। द्रव्येण व्यवस्था नाम मैत्रावरुणस्यैव पयसा श्रयणम्, मन्थिग्रहस्य सक्तुभिरेव श्रयणम्, इत्यादि। सेयं व्यवस्था द्रव्यप्रयुक्तत्वे एव सिध्यति। अपूर्वप्रयुक्तत्वे तु मन्थिग्रहस्य सक्तुभिः पयसा वा, मैत्रावरुणस्य पयसा सक्तुभिर्वा श्रयणं इति अव्यवस्था स्यात्, सर्वत्र अपूर्वस्य सत्त्वात्। तस्मात् द्रव्यप्रयुक्ततैव । किञ्च द्रव्येण व्रीह्यादिनैव प्रोक्षणादीनां संबन्धः इति व्यवस्था न स्यात् स्रुवादिष्वपि प्रसज्ज्येत । तस्मात् प्रोक्षणादेः व्रीह्यादिद्रव्यस्वरूपमेव प्रयोजकं इति द्रव्यान्तरादौ नोहसिद्धिः इति पूर्वः पक्षः ।

अर्थो वा स्यात् प्रयोजनमितरेषामचोदनाऽर्थस्य गुणभूतत्वात् ।१३॥

प्रोक्षणमन्त्रहोमाभिमर्शनानि क्रमेण द्रव्यसंख्याहेतुसमुदायप्रयुक्तानि इति पूर्वपक्षं व्यावर्तयति वाशब्दः। अर्थः इत्यपूर्वं ब्रूमः अर्थ्यते इति सतः। प्रोक्षणादीनां द्रव्यादिकं न प्रयोजनम्, किन्तु अर्थः अपूर्वमेव प्रयोजनम् । अपूर्वार्थानि प्रोक्षणादीनि । प्रोक्षणादीनां अपूर्वं प्रयोजकम् । इतरेषां द्रव्यसंख्यादीनां अचोदना कर्तव्यतया न चोदना। प्रोक्षणादिकं द्रव्यादिस्वरूपसिद्ध्यर्थं न विधिः। अर्थस्य गुणभूतत्वात् अपूर्वनिरूपितगुणत्ववत्त्वादित्यर्थः । अर्थं प्रति अपूर्वं प्रति गुणभूता ह्येते द्रव्यादयः । तस्मात् अपूर्वप्रयुक्ताः प्रोक्षणादय इति सिद्धान्तः ।

अपूर्वत्वाद् व्यवस्था स्यात्। १४ ॥

यदुक्तं पूर्वपक्षिणा 'पयसा मैत्रावरुणं श्रीणाति' इति पयसा श्रयणं ऐन्द्रवायववादावपि प्राप्नोति अपूर्वप्रयुक्तत्वे स्वीकृते इति, तत्रोत्तरमाह। अपूर्वत्वात् मैत्रावरुणसंबन्ध्यपूर्वत्वात् मैत्रावरुणजन्यापूर्वत्वस्य उद्देश्यताऽवच्छेदकत्वात् व्यवस्था स्यात्। नहि मैत्रावरुणापूर्वत्वं ग्रहान्तरापूर्वेऽस्ति, यतः अव्यवस्था स्यात् । तथाच अपूर्वप्रयुक्तत्वे न कश्चिद्दोषः । इदं सूत्रं कुतूहले न व्याख्यातम् ।

तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् । १५ ॥

प्रोक्षणादिधर्माणां व्रीहिद्रव्यादिप्रयुक्तत्वे स्वीकृते दोषमाह सिद्धान्ती । धर्मस्य प्रोक्षणादेः तत्प्रयुक्तत्वे व्रीहिद्रव्यादिप्रयुक्तत्वे स्वीकृते सर्वविषयत्वं स्यात् ओदनार्था ये व्रीहयः तेष्वपि प्रोक्षणं प्राप्नुयात् । तस्मात् न द्रव्यप्रयुक्तत्वम् ।

तद्युक्तस्येति चेत् । १६ ॥

प्रोक्षणादिधर्मस्य व्रीह्यादिद्रव्यप्रयुक्तत्वे ओदनाद्यर्थव्रीहिष्वपि प्रोक्षणं प्राप्नुयात् इति यदुक्तं सिद्धान्तिना तन्न । तद्युक्तस्य प्रकरणयुक्तस्य यागीयव्रीहिद्रव्यस्य प्रोक्षणे स्वीकृते सर्वविषयता दोषो न स्यात् । यागीयव्रीहित्वस्य उद्देश्यताऽवच्छेदकत्वात् न दोषः । इति चेत् ।

नाश्रुतित्वात् । १७ ॥

यत् पूर्वपक्षिणा उक्तं तन्न । अश्रुतित्वात् यागीया एव व्रीहयो निर्वप्तव्या इति नास्ति श्रुतिः । अग्निष्ठशकटस्थिता हि व्रीहयो न यागार्था एव भवन्ति किंतु ओदनाद्यर्था अपि । तादृशानां तु व्रीहीणां देवतार्थत्वेन मुष्टिचतुष्टयं निरुप्यते । ततश्च उद्देश्यतावच्छेदकमत्र न यागीयव्रीहित्वं किंतु व्रीहित्वसामान्यमेवेति प्रोक्षणस्य द्रव्यप्रयुक्तत्वे स्यादेव सर्वविषयत्वं दोषः ।

अधिकारादिति चेत् । १८ ॥

प्रोक्षणस्य द्रव्यप्रयुक्तत्वेऽपि सर्वविषयत्वं न प्राप्नोति । कथम् ? अधिकारात् प्रकरणात् ज्ञास्यति अध्वर्युः इमे ओदनार्थाः व्रीहयः, इमे यागार्था इति । तत्र ये यागार्थाः तान् प्रोक्षिष्यति इति न सर्वविषयत्वप्रसङ्गः । इति चेत् ।

तुल्येषु नाधिकारः स्यादचोदितश्च संबन्धः, पृथक् सतां यज्ञार्थेनाभिसंबन्धस्तस्माद् यज्ञः प्रयोजनम् । १९ ॥

प्रकरणात् भोजनार्थयागार्थव्रीहीणां भेदं ज्ञास्यति अध्वर्युः इति यदुक्तं पूर्वपक्षिणा तन्न । व्रीहयः तुल्याः समाना एव भोजनार्था यागार्थाश्च । ये ओदनार्थास्त एव कर्मार्थाः, न केचित् पृथक् कर्मार्था नाम निर्वापकाले । तथा च निर्वापकाले सर्वविषयत्वं प्राप्नोत्येव । एवं तुल्येषु सत्सु व्रीहिषु अधिकारः प्रकरणं निर्वापकाले नास्ति । अचोदितश्च संबन्धः । निर्वापात् पूर्वं व्रीहीणां संबन्धः धर्मसंबन्धः कश्चित् अचोदितः न चोदितः । ततश्च निर्वापस्य लौकिकसाधारणत्वं स्यात् । पृथक् सतां लौकिककर्मभ्यः पृथक् कृतानां व्रीहीणामेव यज्ञार्थेन

निर्वापेण अंभिसंबन्धः भवति। यस्मात् तुल्येष्वधिकारो नास्ति, संबन्धश्च न चोदितः, पृथक् कृतानामेव यज्ञार्थेन अभिसंबन्धः, तस्मात् प्रोक्षणस्य यज्ञः अपूर्वमेव प्रयोजनं न द्रव्यस्वरूपम्। इति सिद्धान्तः। के.

* द्रव्यसंख्याहेतुसमुदायं चाश्रुति– (वा श्रुति) संयोगात्। ९।१।५।११। 'व्रीहीन् प्रोक्षति' इति श्रुत्या द्रव्यसंयुक्तं प्रोक्षणम्, 'त्रीन् परिधीन्' इतिमन्त्रलिङ्गात् संख्यासंयुक्तम्, 'शूर्पेण जुहोति तेन ह्यन्नं (ह्यशनं) क्रियते' इतिवाक्यात् हेतुसंयुक्तं होमम्, 'चतुर्होत्रा पौर्णमासीमभिमृशेत्' इतिश्रुत्या आग्नेयादिसमुदायसंयुक्तं मन्त्रं चोदाहृत्य प्रोक्षणादयो द्रव्यादिस्वरूपप्रयुक्ता अपूर्वप्रयुक्ता वा इति संदेहे श्रुतिसंयोगात् तद्रूपलक्षितात् लिङ्गात् वाक्यसंयोगाच्च द्रव्यादिस्वरूपप्रयुक्तत्वं पूर्वपक्षयित्वा 'अर्थो वा स्यात् प्रयोजनमितरेषामचोदनार्थस्य गुणभूतत्वात्' (९।१।५।१३) इत्यनेन अर्थ्यमानमपूर्वं प्रयोजनं द्रव्यादीनामर्थ्यमानमपूर्वं प्रति गुणभूततया कर्तव्यत्वेन अचोदनात् इति सिद्धान्तिते भाष्यकृता श्रुत्यादिगम्यस्वरूपान्वयविरोधात् प्राकरणिकापूर्वान्वयायोगमाशङ्क्य आनर्थक्यभयात् स्वरूपान्वयविवक्षया अपूर्वसाधनत्वलक्षणा वक्ष्यते। सु. पृ. १४६९.

* 'द्रव्यासंख्याहेतुसमुदायं वा' इत्यधिकरणन्यायेन स्वरूपसंगतौ अनर्थकत्वात् यदि जञ्जभ्यमानशब्देन अपूर्वसाधनत्वं लक्ष्यते। वा. ३।४।५।१५ पृ. ९४७.

⧗ द्रव्यसंख्याहेतुसमुदायन्यायः। द्रव्यन्यायः। द्रव्यसंख्यान्यायः। दर्शपूर्णमासादौ प्रोक्षणादयो धर्मा अपूर्वप्रयुक्ताः॥

द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात्। ९।१।५।११॥

भाष्यम्—दर्शपूर्णमासयोरामनन्ति 'व्रीहीन् प्रोक्षति' इति। तत्रैव 'त्रीन् परिधीन्, तिस्रः समिधः' इति मन्त्रम् (आमनन्ति इति सर्वत्र अनुषङ्गः)। 'चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्रा अमावास्याम्' इति। चातुर्मास्यानां द्वितीये पर्वणि वरुणप्रघासेषु आम्नायते 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इति। तत्र संशयः किं द्रव्यसंख्याहेतुसमुदायप्रयुक्ताः प्रोक्षणादयो धर्माः, उत अपूर्वप्रयुक्ता इति। किं तावत् प्राप्तम्? द्रव्यादिप्रयुक्ता इति। इह 'व्रीहीन् प्रोक्षति' इति प्रकरणेन अपूर्वप्रयुक्तता स्यात्, वाक्येन द्रव्यप्रयुक्तता। द्रव्येण हि प्रोक्षणस्य समभिव्याहारः। तस्मिन्नपि समभिव्याहारे द्रव्यगता द्वितीया विभक्तिः प्रोक्षणस्य द्रव्यप्रयुक्ततां वदति। तथा 'त्रीन् परिधीन्' इति यत् त्रिशब्दस्याभिधेयम्, तदिह मन्त्राम्नानसामर्थ्यात् वदितव्यमिति गम्यते। संख्या च त्रिशब्दस्यार्थः। तस्याः श्रुतिर्वाचिका। तत्संबद्धे अपूर्वे लक्षणा स्यात्। 'यावन्तः परिधयः, तावन्तो वक्तव्याः' इति।

तथा हेतुना धर्मः संयुज्यते वाक्येन 'शूर्पेण जुहोति' इति। किं कारणम्? यतः, तेन अन्नं क्रियते। तत् होमेन संबद्धव्यम्। अन्नकरणद्रव्यं होमे विधीयते। प्रकरणात् अपूर्वप्रयुक्तता स्यात् यस्मात् अनेन होमेन अपूर्वं क्रियते तस्मादेतत् शूर्पेण निर्वर्तयितव्यमिति। प्रकरणात् वाक्यं बलीयः, अतः प्रकरणं बाध्येत। येनयेन द्रव्येण दर्विपिठरादिनाऽपि अन्नं क्रियते, तेनतेन होमः कर्तव्यः इत्येवं अन्नप्रकरणं सगुणं भवतीति। ननु प्रथमेऽध्याये (हेतुवन्निगदाधिकरणे १।२।३) प्रतिषिद्धा हेत्वर्थता, शूर्पस्यार्थवादोऽयं इत्युक्तम्। सत्यमुक्तम्। अपूर्वप्रयुक्ततायां हि सिद्धायां नैकस्मिन् वाक्ये होमे शूर्पविधानं हेतुविधानं चावकल्पते, इत्यर्थवादः प्रकल्पते नान्यथा।

'चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्रा अमावास्याम्' इति समुदायसमभिव्याहारात् वाक्येन तत्प्रयुक्तता, प्रकरणसामर्थ्यात् लक्षणया अपूर्वसमभिव्याहारात् अवगतां अपूर्वप्रयुक्ततां बाधते। तस्मात् द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्माः।

टुप्—'प्रोक्षिताभ्याम्' इति वाक्यात् हन्त्यर्थे प्रोक्षणम्। स च वाक्यसंयोगः श्रौतांशेन निराकृतः (श्रौतेन हन्तिरूपेण यो वाक्यात् प्रोक्षणस्य संयोगः, स निराकृतः)। लिङ्गसंयोगश्च श्रौतांशेन (स्वर्गाग्न्यादिरूपेण) निराकृत एव। अस्मिन्नधिकरणे लिङ्गवाक्यसंयोगा नोदाहरणम्, निराकृतत्वात्। श्रुत्या तु येषां तादर्थ्यम्, ते इहोदाहरणम्। तान् श्रुत्या तदर्थान्

(व्रीह्यादिस्वरूपार्थान्) मन्यमानः पूर्वपक्षं करोति । व्रीहीन् इति द्वितीया (विभक्तिः) श्रुत्या व्रीह्यर्थतां प्रोक्षणस्य प्रतिपादयति अपूर्वसंबन्धः प्रकरणात् स्यात् । श्रुतिश्च प्रकरणात् बलीयसी । 'पौर्णमासीम्' इत्यत्रापि समुदायार्थमभिमर्शनं श्रुत्यैव द्वितीया प्रतिपादयति । 'त्रीन् परिधीन्' इति द्वितीया । साऽपि श्रुत्यैव मन्त्रस्य संख्याऽर्थतामाह । (अत्र तन्त्ररत्नम्– "ननु मन्त्रगतेयं द्वितीया कथं मन्त्रस्य तादर्थ्यं प्रतिपादयेत्, स्वात्मनि क्रियाविरोधात् । सत्यम्, मन्त्रकल्पिता श्रुतिरियमुदाहृता । सा हि त्रिसंख्याप्रकाशनसमर्थमन्त्रवशात् कल्प्यमाना ईदृशी कल्प्येत 'मन्त्रेणानेन त्रीन् परिधीन् प्रकाशयेत्' इति । न चैवं लिङ्गविनियोगोऽयं स्यात्, स च निराकृतः । सत्यम्, उदाहरणान्तरं तु दातव्यम्, यत्र प्रत्यक्षेणैव ईदृशी श्रुतिः ।" एतेन आनन्दाश्रमपुस्तकस्था अत्रत्या टिप्पणी व्याख्याता) तस्मात् त्रिसंख्याप्रयुक्तोऽयं मन्त्रः, नापूर्वप्रयुक्तः । 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्यत्र शूर्पं तावत् अनुदाहरणम्, करणविभक्तिनिर्देशात् । यथा 'व्रीहिभिर्यजेत' इति । 'अन्नकरणेन जुहोति' इत्येतदपि करणविभक्तिनिर्देशादेव अनुदाहरणम् । अथोच्येत हिशब्दयोगात् अन्नकरणमुदाहरणं स्यात् । (निराकरोति–) तन्न, शूर्पस्य विधीयमानस्य अर्थवादोऽयमित्युक्तम् । उच्यते । हिशब्दश्रुत्या हेतुत्वेन अन्नकरणम् । यस्मादनेन अन्नं क्रियते, तस्मादनेन होमः कर्तव्यः इति (न स्तुतिर्लक्षणाप्रसङ्गात्) । ननु प्रसिद्धसंबन्धो हेतुर्भवति । न च होमान्नकरणयोः संबन्धः अवगतः प्रमाणान्तरेण, यथा कृतकत्वानित्यत्वयोः । उच्यते । सत्यमेवं लोके (प्रमाणान्तरेण संबन्धोऽपेक्षितः), वेदे तु हिशब्दश्रवणात् वाक्यमनुमीयते होमान्नकरणयोः संबन्धकर्तृ ('यद्यत् अन्नकरणम्, तत्तत् होमेन संबद्धव्यम्' इति) । तेनानुमितेन (वाक्येन) हेतुश्रवणमुपपत्स्यते । सति च हेतुश्रवणे अन्नकरणं संस्कार्यम्, होमः संस्कारकः । यद्यदन्नकरणं तत्तत् होमेन व्याप्यते । यथा यद्यत् कृतकम्, तत्तदनित्यत्वेन व्याप्यते । यथा च यत्रयत्र धूमः, तत्राग्निना व्याप्यते । (प्रधानं चाङ्गेन व्याप्यते) । तस्मात् हिशब्दश्रुत्या अन्नकरणार्थो होमः इति मन्यमानः पूर्वपक्षं करोति । (यत्तु प्रथमेऽध्याये अर्थवादत्वं साधितं इत्युक्तम्, तत्राह–) इह अपूर्वार्थे होमे स्थिते प्रथमेऽध्याये किं अन्नकरणं विधीयते, शूर्पं प्रदर्शनार्थं (एकदेशानुवादः) उत शूर्पं विधीयते, (तस्य) अन्नकरणं स्तुतिः इत्ययं विचारः (इत्यपुनरुक्तता) ।

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् । १२ ॥

भाष्यम्— अपूर्वप्रयुक्ते एवंजातीयके धर्मे सति द्रव्येण च धर्मव्यवस्था न स्यात् । 'पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनम्, धानाभिर्हारियोजनम्, हिरण्येन शुक्रम्, आज्येन पात्नीवतम्' इति । यस्मान्मैत्रावरुणः अपूर्वस्य (साधकः), तस्मात्पयसा श्रयितव्यः इति । ऐन्द्रवायवोऽपि अपूर्वस्य । सोऽपि पयसा श्रयितव्यः प्राप्नोति । एवं सर्वाणि श्रयणादीनि सर्वेषां ग्रहाणाम् । तत्र मैत्रावरुणादिग्रहणमविवक्षितं स्यात् । तस्मादपि द्रव्यादिप्रयुक्ताः प्रोक्षणादय इति ।

अर्थो वा स्यात्, प्रयोजनमितरेषामचोदनात्, तस्य च गुणभूतत्वात् । १३ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । न द्रव्यादिप्रयुक्ता भवेयुः । किं तर्हि ? अर्थ एषां प्रयोजनम् । अर्थ इत्यपूर्वं ब्रूमः । तदर्थास्ते । तद्धि कर्तव्यतया श्रूयते । तदितिकर्तव्यतया अनुबध्यते । इतरेषां द्रव्यादीनां कर्तव्यतया न चोदना । किं तर्हि ? अर्थस्य गुणभूतत्वेन । अर्थं प्रति, अपूर्वं प्रति गुणभूतानामेषां श्रवणम् । किमतो यद्येवम् ? अकर्तव्यानां इतिकर्तव्यतया नास्ति संबन्ध इति ।

ननु व्रीह्यादिसमभिव्याहारात् तैर्हि संबन्धः । तत्र द्वितीयया व्रीहिसमुदायप्रयुक्तता गम्यते । लिङ्गवाक्याभ्यां संख्याहेतुप्रयुक्तता । नेत्याह ! एवं सति फलं कल्पनीयं स्यात् । तस्मादपूर्वप्रयुक्तता । नन्वेवमपि सति अपूर्वोपकारः कल्पयितव्यः । सत्यं कल्पयितव्यः, प्रकृतेन तु एकवाक्यतां नीत्वा । त्वत्पक्षे तु अप्रकृतेन फलवचनेनैकवाक्यता स्यात् । ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकम् । सत्यमबाधकम् । फलाभावात्तु भवदीयः पक्षो मुच्यते । तस्मिन् नानर्थक्येनाविवक्षिते प्रकरणवता प्रयोगवचनेनापरिपन्थि प्रोक्षणादि विधायिष्यते । आह । अपूर्वसंबन्धे-

ऽपि तदीयैर्व्रीह्यादिभिरेव धर्मः प्रयुज्यते । किमेवं भविष्यति ? द्रव्यादिसंबन्धश्चैवं हि नावज्ञातो भविष्यति । फलं च न कल्पयितव्यम् । उच्यते । नैवं शक्यम् । व्रीहीन् प्रोक्षतीति हि व्रीहिजातिर्निर्दिश्यते, व्रीहिद्रव्यलक्षणार्था वा, अपूर्वसाधनविशेषलक्षणार्था वा । अन्यतरलक्षणया कृतार्थेति, नोभयलक्षणार्था स्यात् । द्रव्यलक्षणा वा, तत्र च लक्षणैव दोषः । फलकल्पनेति कृत्वा साधनविशेषलक्षणार्था जातिरवसीयते । व्रीहिजातिलक्षितं यत् साधनम्, किं तत् ? यतस्तण्डुला भवन्ति, तत् प्रोक्षितव्यमिति । तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वम्, न द्रव्यता । एवं संख्यादिष्वपि योजयितव्यम् । तस्मादपूर्वप्रयुक्तता प्रोक्षणादीनामिति ।

टुप्-- यदि व्रीहिस्वरूपप्रयुक्तं प्रोक्षणं (स्यात्) तथा सति फलकल्पना (स्यात्) । नहि स्वरूपार्थत्वे परंपरयाऽपि (प्रकृत–) अपूर्वप्रयोजनत्वं अग्निद्वारेणेव आधानस्य क्रत्वपूर्वप्रयोजनता संभवति । (नैवं शक्यं इत्यादिभाष्यं व्याचष्टे–) न च वाक्यस्य द्वौ अर्थौ, यदि वा तण्डुलनिर्वृत्तिप्रणाड्या यत् अपूर्वं लक्ष्यते तस्यायं धर्मः, यदि वा व्रीहिजातिलक्षितस्य द्रव्यस्य । (न तु द्वयमपि लभ्यते । नहि सकृदुच्चरितं व्रीहिपदं स्वरूपं च तत्समवेतं च साधनविशेषं प्रतिपादयितुं शक्तम् । तत्र–) स्वरूपपरत्वे आनर्थक्यात् साधनविशेषलक्षणम् (विज्ञायते) ।

अत्र (भाष्य–) ग्रन्थः– **व्रीहिजातिलक्षितं यत् साधनम्– किं तत् ? यतस्तण्डुला भवन्ति– तत् प्रोक्षितव्यं इति** (शास्त्रार्थः । कुतः ?) **तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वम्, न द्रव्यता ।** (अस्य भाष्यस्य–) कोऽभिप्रायः ? (उत्तरम्–) तण्डुलनिर्वृत्तिप्रणाड्या यत् साधनत्वं लक्षयति, तदर्थं प्रोक्षणम् । यवेष्वपि तण्डुलनिर्वृत्तिरविशिष्टा । न चान्यत् द्रव्यं तण्डुलनिर्वृत्तिकरणांशेन शक्यते लक्षयितुम् । तस्मात् अन्येषु द्रव्येषु प्रोक्षणाभावः ।

अपूर्वत्वाद् व्यवस्था स्यात् । १४ ॥

भाष्यम्— अथ यदुक्तम् ‘ अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ’ इति । साधनविशेषलक्षणार्था जातिः इत्येवं सति व्यवस्था भविष्यति । मैत्रावरुणेन यत्क्रियते, तत्र पयःश्रयणम्, न तत् ऐन्द्रवायवेन । अतो न मैत्रावरुणापूर्वात् ऐन्द्रवायवस्य धर्माः । अपूर्वो हि ऐन्द्रवायवः । तस्मात् अपूर्वत्वाद् व्यवस्था स्यादिति ।

तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् । १५ ॥

भाष्यम्-- यश्च मन्यते ‘ द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्माः ’ इति, तस्य सर्वविषयता धर्मस्य प्राप्नोति । येऽपि भक्तार्था व्रीहयः तेऽप्येवं प्रोक्षितव्याः प्राप्नुवन्ति । न चैतत् त्वयाऽपीष्यते । तस्मादयमस्मिन् पक्षे दोष इति ।

तद्युक्तस्येति चेत् । १६ ॥

भाष्यम्-- इति चेत्पश्यसि, सर्वविषयता धर्मस्य भविष्यतीति । तद्युक्तस्य प्रकरणयुक्तस्य भविष्यति । एवं प्रकरणमनुगृह्यते । न च सर्वविषयता धर्मस्येति ।

नाश्रुतित्वात् । १७ ॥

भाष्यम्— नैतदेवम् । न हि श्रयते, प्रकरणयुक्ता व्रीहयो निर्वप्तव्याः, प्रोक्षितव्याश्चेति । ननु प्रकरणानुग्रहाय एतदध्यवसानम् । नेत्याह । नहि वाक्येन बाधितं प्रकरणमुत्सहते धर्मान् नियन्तुम् । अथापि न बाध्यते, तथापि न प्रकरणस्य विशेष्टुं सामर्थ्यमस्ति । कर्तव्यतया हि तत् क्रियमाणं चोद्यते, न प्रसिद्धसंबन्धमिव विशेषणत्वेन । तस्मान्न प्रकृतयागविशेषितानां व्रीहीणां निर्वापः प्रोक्षणं वा चोद्यते इति ।

टुप्— **न प्रकरणस्य विशेष्टुं सामर्थ्यमस्ति । कर्तव्यतया हि तत् क्रियमाणं चोद्यते, न प्रसिद्धसंबन्धमिव परविशेषणत्वेन** इति (भाष्यम्) कोऽभिप्रायः ? (उत्तरम्–) भावयेत् स्वर्गम् । केन ? यागेन । कथं इति प्रकाराकाङ्क्षा भवति । स च प्रकारः अनिर्ज्ञातस्वरूपत्वात् कर्तव्यः । यश्च निर्ज्ञातस्वरूप उच्चार्यते, स परविशेषणं यथा ‘ शुक्लः पटः ’ इति । इह यत् कथम्भावाकाङ्क्षायां अग्न्यन्वाधानादि उपनिपतति, तदस्य संबन्धित्वे कारणम् (तत् कथम्भावात्मकं प्रकरणं अग्न्यन्वाधानादेः इत्थम्भावेन संबन्धित्वे कारणं भवति) । न चान्यस्य भवितुमर्हति । (न स्वरूपेण प्रकरणं अन्यस्य संबन्धित्वे कारणं भवति इत्यर्थः । आनन्दाश्रमीये तु अत्र ‘ नान्यस्य भवति, न चान्यस्य भवति ’

इति पाठः। वाक्यद्वयमपि च टिप्पण्यां व्याख्यातम्। परंतु तत् अस्मदीयें लिखिते तन्त्ररत्ने वा नास्ति)।

अधिकारादिति चेत् ।१८॥

भाष्यम्— इति चेत्पश्यसि, न प्रकरणं विशेषकं व्रीहीणामिति। बाढम्। अधिकारात् ज्ञास्यत्यध्वर्युः। इमे भक्तार्थाः, इमे कार्यार्थाः। तत्र कार्यार्थान् प्रोक्षिष्यतीति।

तुल्येषु नाधिकारः स्यादचोदितश्च संबन्धः, पृथक् सतां यज्ञार्थेनाभिसंबन्धस्तस्माद्यज्ञः प्रयोजनम्। १९॥

भाष्यम्— तुल्या एते व्रीहयः। य एव भक्तार्थास्त एव कर्मार्थाः, न पृथक् केचित् कर्मार्था नाम। ननु ये निरुप्तास्ते कर्मार्थाः। सत्यं भवेदेतत्। प्रोक्षणादिषु दोषो न स्यात्। निर्वापे तु दोषः। न तत्र केचन प्रकृता विद्यन्ते। पृथक्सतां यज्ञार्थेन निर्वापः श्रूयते। कथम्? अपरेण गार्हपत्यं प्रागीषमनोऽवस्थितं भवति। तस्य दक्षिणं चक्रमारुह्य अनसोऽधिनिर्वपति इति। तस्माद्धर्मस्य सर्वविषयत्वं प्राप्नोत्येव। पूर्वेण हेतुनाऽपूर्वप्रयुक्तत्वं प्रोक्षणादीनामिति।

शा— ‘तत्र श्रुतिबलीयस्त्वाद् व्रीह्यादिद्रव्यशेषता। प्रक्रियाऽवगता पूर्वशेषत्वस्यापबाधिनी॥ व्रीह्यादिरूपशेषत्वे सत्यानर्थक्यमापतेत्। प्रोक्षणस्य, विनाऽप्यस्मात् तत्स्वरूपस्य सिद्धितः॥ तस्मात् साधनरूपं यद् व्रीहीणां शास्त्रचोदितम्। तेन रूपेण संबन्धः प्रोक्षणादेर्विधीयते॥’ तस्मात् सर्वेषामेव भूतभवद्भाविविनियोगानां द्रव्यादीनां संस्काराः अपूर्वभावनाशेषभूताः तद्विकृतिषु प्राकृतार्थकरेषु द्रव्यान्तरेषु संस्कारेषु ऊहितव्याः।

सोम— सूत्रार्थस्तु– द्रव्यादि प्रयोजकं द्वितीयाश्रुतेः हिशब्दश्रुतेश्च संयोगात्। वाशब्दः वाक्यलिङ्गसंयुक्तापेक्षया श्रुतेः विशेषद्योतनार्थः।

वि— ‘व्रीह्यादयः प्रयोक्तारोऽपूर्वं वा प्रोक्षणादिषु।, वाक्यश्रुतिभ्यामाद्यः स्यात्, चोदिताकाङ्क्षयाऽन्तिमः॥’

भाट्ट— अत्र मूले द्रव्यसंख्याहेतुसमुदायानां यत्र श्रुत्या उद्देश्यता, तत्र व्रीहित्वादिनैव, न तु अपूर्वसाधनत्वेन, प्रकरणेन श्रुतिसंकोचायोगात् इत्याशङ्क्य स्वरूपे आनर्थक्यापत्तेः अपूर्वसाधनत्वेनेति सिद्धान्तितम्। तत्र ‘व्रीहीन् प्रोक्षति’ इति द्रव्योदाहरणस्य ‘चतुर्होत्रा पौर्णमासीम्’ इति समुदायोदाहरणस्य च कथञ्चित् संभवेऽपि संख्योदाहरणस्य ‘त्रीन् परिधीन्’ इति मन्त्रस्य ‘अगन्म सुवः’ इति मन्त्रवत् अपूर्वसाधनीभूतपरिधीयत्ताप्रकाशनार्थत्वस्य सिद्धत्वात् अनुदाहरणत्वमिति वार्तिककारेणवोक्तम्, तथा हेतूदाहरणेऽपि। यत् ‘शूर्पेण जुहोति, तेन ह्यन्नं क्रियते’ इत्यन्नकरणहेतुना तस्य व्याप्यत्वावगमात्, व्याप्यस्य च सर्वत्र प्राधान्यदर्शनात्, अन्नकरणोद्देशेन होमः संस्कारकतया विधीयते इत्याशङ्क्य तृतीयया होमं प्रति शूर्पस्य करणत्वावगतेः ‘तेन ह्यन्नं क्रियते’ इत्यस्य चार्थवादत्वात्, होमोऽयं आरादुपकारकः अपूर्वार्थं इति विचारितम्, तत् व्याप्यस्यापि जुह्वादेः क्रतुं प्रति प्राधान्यादर्शनात् अर्थवादत्वस्य च हेत्वधिकरणे स्थापितत्वात् तद्विचारस्य च ऊहानुपयोगित्वाच्चोपेक्षितम्।

किञ्च सर्वस्यैवास्य विचारस्य आद्याधिकरणेन गतार्थतेत्यन्यथा वर्ण्यते। **यद्यपि** यज्ञकर्मेति सूत्रेण (९।१।१।१) संनिपत्योपकारकमात्रे अपूर्वसाधनत्वलक्षणा सिद्धा। संस्कारे चेति सूत्रेण (२) च आन्तरालिकानां यागत्वादिकारणताऽवच्छेदकानां अविवक्षा सिद्धा, **तथापि** श्रुतस्य व्रीहित्वादेः कारणताऽवच्छेदकस्य त्यागे प्रमाणाभावः। न च युगपद्वृत्तिद्वयविरोधः, अपूर्वसाधनीभूतव्रीहित्वावच्छिन्नस्यैव लक्षणया उद्देश्यत्वाङ्गीकारात्। अतश्च तादृशत्वस्य नीवारादौ असत्त्वात् नोहसिद्धिः। **इति प्राप्ते**, लक्ष्यताऽवच्छेदके गौरवापत्तेः श्रुतस्य व्रीहित्वस्य च लक्षणोपयोगिशक्यप्रतिपादकत्वेनापि चरितार्थत्वान्न विवक्षा। अत एव तत्तद्व्यापारिकाया विजातीयापूर्वसाधनताया एव लक्षणेति कौस्तुभे स्पष्टम्। तत्तद्व्यापारकसाधनतात्वावच्छिन्नसाधनताया एव लक्षणाच्च व्रीहियवनिष्ठकारणताया गुणादिप्रमाणेन भेदेऽपि यवसाधारण्यलाभोऽपीत्यपि तत्रैव व्यक्तम्। अतश्च व्रीहित्वादेरविवक्षितत्वात् युक्तो नीवारादिषु ऊहो विकृतौ। एवं यत्रापि नापूर्वसाधनत्वम् ‘व्रीहीनवहन्ति’ इतिवत् पूर्वप्रमितम्, स्ववाक्ये एव तु संस्कारविशिष्टस्य व्रीह्यादेः साधनत्वविधानं यथा ‘प्रोक्षि-

ताभ्यामुलूखलमुसलाभ्याम्' इत्यादौ तत्समानजातीयवाक्यान्तरे वा, तत्रापि प्रोक्षणविशिष्टस्य व्रीहित्वविशिष्टस्य च विधेयक्रियाविशेषणत्वेन विधौ कृते पश्चादरुणैकहायनीन्यायेन परस्परान्वयात् प्रकृतौ तज्जातीयस्य प्रोक्षणेऽपि विकृतौ तज्जातिलोपेऽपि तत्स्थानापन्नद्रव्यान्तरे एव प्रोक्षणलाभात् सिध्यति ऊहः। प्रोक्षणं प्रति विशेषणविधिवेलायां अपूर्वसाधनत्वस्यैव उद्देश्यताऽवच्छेदकत्वम्, लक्षणा परं (केवलम्) न तत्रास्ति, व्रीहिपदेन व्रीहित्वस्यैव अभिधानात्। अपूर्वसाधनत्वस्य कल्पितविधावेव स्वपदेनैवाभिधानात्।

एवं यत्रापि संस्कारविध्युत्तरं तच्छब्देन संस्कृतस्य विनियोगः यथा 'तप्ते पयसि' इत्यादौ तत्रापि संस्कारवाक्ये पयस्त्वसमानाधिकरणधर्मावच्छिन्नोद्देशेनैव दध्यानयनविधिः, न तु पयस्त्वावच्छिन्नोद्देशेन आनर्थक्यात्। स च धर्मः उत्पत्तिवाक्ये इष्टसामान्यमिव सामान्यतः एव पयःपदेन प्रथमं प्रतीयते, पश्चाच्च तच्छब्देन पयस्त्वावच्छिन्नस्य अपूर्वसाधनत्वे प्रमिते स धर्मः अपूर्वसाधनत्वरूपः इति प्रतीयते। तत्र च पयःपदस्य लक्षणेति पश्चादवगम्यते इति न कश्चिद्विरोधः। वस्तुतस्तु यद्यपि सप्तमीश्रवणात् तापविशिष्टपयोऽधिकरणकदध्यानयनस्य विहितस्य प्रयोजनापेक्षायां उद्देश्यवाचकं सामर्थ्यात्पयस्यापदमनुमीयते। तथापि मन्त्रवर्णाद्यनुरोधात् अवस्थाविशिष्टपयोवाच्यामिक्षापदसमभिव्याहृत — तच्छब्दबलेन पयस्याया एव उद्देश्यत्वावगतेः, तन्निष्ठविजातीयापूर्वसाधनत्ववाचिपदस्यैव कल्पनात् न तल्लक्षणाऽपीति ध्येयम्।

मण्डन— 'न द्रव्यसंख्यादिरपि प्रयोक्ता।'

शंकर— 'श्रौताङ्गापूर्वशेषत्वम्।'

* **द्रव्यसंप्रदानादिना** कारकसङ्गेन दानादिधात्वर्थनिष्पत्तेः न तन्निष्पादकधात्वर्थान्तरापेक्षा। सु. पृ. ७०९.

⧗ द्रव्यसंयोगाच्चोदना, पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो नहि तस्य गुणार्थेन। २।२।६।१७॥

'अग्नीषोमीयं पशुमालभते' इति 'हृदयस्याग्रेऽवद्यति, अथ जिह्वाया अथ वक्षसः' इति च श्रूयते। तथा 'सोमेन यजेत' इति, 'ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाति' इत्यादि च श्रूयते। तत्र अवद्यतिगृह्णातिचोदितानां कर्मणामेव समुदायस्य आलभतियजती अनुवादकौ, किंवा अपूर्वयोः कर्मणोः विधायकौ इति विचारे इदं सूत्रं पूर्वपक्षमाह। हृदयादिवाक्यं गृह्णातिवाक्यं च चोदना कर्मचोदना प्रत्येतव्या। अन्यत्र असंभवन्निवेशस्य हृदयरसादेः द्रव्यस्य संयोगात्। पशुसोमयोः पशुसोमवाक्ययोः उत्पत्तिचोदनात्वे हि यस्मात् प्रकरणे प्रकरणसापेक्षावद्यतिगृह्णातिवाक्येषु द्रव्यसंयोगः हृदयरसादिद्रव्यसंस्कारः विधीयमानः अनर्थकः न यागाङ्गत्वं प्रतिपद्येत उत्पत्तिशिष्टपशुसोमावरोधेन हृदयादीनां साधनत्वानुपपत्तेः। नहि तस्य उत्पत्तिशिष्टद्रव्यस्य अवदानग्रहणादि गुणार्थत्वेन संस्कारकत्वेन उपयुज्यते, नाशकत्वात्;

अथवा भाष्यरीत्या सिद्धान्तसूत्रमिदं तस्यार्थ इत्थम्— पशुसोमयोः पशुसोमवाक्ययोरेव चोदना कर्मचोदना द्रव्यसंयोगात् पशुसोमरूपापूर्वद्रव्यसंयोगात्। द्रव्यसंयोगः पशुशब्दः सोमशब्दश्च प्रकरणे प्रकृते हृदयादौ अनर्थकः, लक्षणाप्रसङ्गात्। नहि हृदयादिवाक्यविहितयागे एव तस्य पशोः सोमस्य च द्रव्यस्य गुणार्थेन प्रदेयप्रकृतित्वेन विधिः संभवति। इति।

"पशुसोमवाक्ययोः चोदना पश्वग्नीषोमलक्षणद्रव्यदेवताविशिष्टस्य सोमविशिष्टस्य च यागस्य विधिः। द्रव्यसंयोगात् पशुसोमद्रव्यश्रवणस्य प्रयोजनेन संयोगात्। हि यस्मात् प्रकरणे प्रकृतहृदयाद्यैन्द्रवायवादिवाक्यविहिते कर्मजाते सति पशुसोमद्रव्यसंयोगः अनर्थकः स्यात्। ननु पशुसोमशब्दयोः गौण्या वृत्त्या तत्प्रकृतिकद्रव्यपरतया तदनुवादकत्वं संभवति इत्यत आह– नहीति। गुणः उपचारः, अर्थः वृत्तिः, गुणादागतोऽर्थो गुणार्थः गौणी वृत्तिः। तस्य हि पशुशब्दस्य सोमशब्दस्य च मुख्यार्थत्वे संभवति गौण्या वृत्त्या तद्विकृतिद्रव्यपरत्वं न युक्तमाश्रयितुमित्यर्थः।" इति **कुतूहलम्**। तस्मादपूर्वकर्मणी विधीयेयातां न प्रकृतानामनुवादौ इति सिद्धान्तः।

अचोदकाश्च संस्काराः। १८॥

पूर्वस्य सूत्रस्य पूर्वपक्षपरत्वे इदं सिद्धान्तसूत्रम्। चकारः तुकारार्थः पूर्वपक्षव्यावर्तकः। पूर्वस्य सूत्रस्य

सिद्धान्तसूत्रत्वे तु इदं सूत्रं सिद्धान्ते युक्त्यन्तरपरम् । चकारः समुच्चयार्थः । अथ प्रकृता एव यागा न सन्तीत्युच्यते । ‘हृदयस्याग्रेऽवद्यति’ ‘ऐन्द्रवायवं गृह्णाति’ इति अवद्यतिगृह्णातयः यागानां अचोदकाः न चोदकाः । किन्तु संस्काराः संस्कारमात्रविधयः तन्मात्रपर्यवसानात् । प्रकृतानां यागानामभावात् न समुदायशब्दो यजतिः तथा आलभतिः । तस्मात् पशुसोमवाक्ये यागविधायके ।

तद्भेदात् कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्याद्, भेदो द्रव्यगुणीभावात् । १९ ॥

‘ दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति ’ इति समुच्चयो दृश्यते । तथा ‘ आश्विनो दशमो गृह्यते , तृतीयो हूयते ’ इति च क्रमः श्रूयते । यदि च ‘ सोमेन यजेत ’ इति अपूर्वो यागो विधीयेत ततः ऐन्द्रवायवादिभिः देवता विधीयेरन् , ता एकार्थाः सत्यो विकल्प्येरन् । तत्र क्रमसमुच्चयौ नोपपद्येयाताम् । अथ यजतौ समुदायवचने सति सम्यगेतत् अवक्लृप्तं भवति , तस्मात् समुदायानुवादः यजतिः इति पूर्वपक्षी । तत्रोत्तरमाह सिद्धान्ती । तद्भेदात् देवतासंयोगभेदात् कर्मणः ग्रहणकर्मणः अभ्यासः द्रव्यपृथक्त्वात् देवतासंयुक्तग्रहणसंस्कार्यद्रव्यपृथक्त्वात् अनर्थकं हि संयोगान्तरश्रवणं अननुष्ठीयमानं अनर्थकं स्यात् । तेन ग्रहणस्य भेदः संस्कार्यं द्रव्यं प्रति गुणभावात् । एतद्देवतावन्ति ग्रहणानि यागप्रक्रमात्मकत्वात् न यागादृते देवतार्थं द्रव्यं संस्कर्तुं शक्नुवन्ति इत्येवमपेक्षिते , भविष्यति कश्चिद्यागः , य एतानि द्रव्याणि देवतासंबन्धं आपादयिष्यति इति । यागोऽपि च अविहितदेवताकः श्रुतिलिङ्गवाक्यैः देवतामलभमानः प्रकरणस्य च ईदृशे वस्तुनि अक्रियात्मके व्यापाराभावात् ग्रहणेषु तावत् विनियोजकं भवति । तानि च अपर्यायविधानात् भिन्नादृष्टसंबन्धित्वाच्च युगपत् गृह्यन्ते तद्वशेन देवतानामपि समुच्चयसिद्धिः ।

ग्रहणाभ्यासवत् यागाभ्यासेऽपि सूत्रं योज्यं यथा– “ तद्भेदात् प्रकल्पितसोमभेदात् यागकर्मणः अभ्यासः , स्वीकृतद्रव्यपृथक्त्वात् अशेषं अत्यज्यमानं अनर्थकं स्यात् । अतः उत्पत्तौ सकृच्छ्रुतस्यापि वाक्यान्तरप्रकल्पितावस्थौत्पत्तिकद्रव्यगुणत्ववशेन अनुष्ठानभेदः । तद्धि द्रव्यं अवश्यं यथागृहीतमेव दातव्यम् ” इति वार्तिकम् । तस्मात् क्रमसमुच्चयौ युक्तौ एव भवतः ।

संस्कारस्तु न भिद्येत परार्थत्वाद् द्रव्यस्य गुणभूतत्वात् । २० ॥

ननु ‘ सोमेन यजेत ’ इति सोमवाक्यस्य यागविधायकत्वे यूपे खादिरादिवत् इन्द्रवाय्वादिदेवतानां विकल्पः स्यात् इत्याशङ्कायामाह सिद्धान्ती । तुशब्देन शङ्कानिरासः । खादिरादियूपेषु संस्कारः पशुनियोजनं प्रतियूपं न भिद्यते । नियोजने तेषां समुच्चयो न भवति इत्यर्थः । तेषां परार्थत्वात् पशुनियोजनार्थत्वात् । द्रव्यस्य खादिरादेः बन्धनक्रियां प्रति गुणभूतत्वात् । तस्मात् खादिरादीनां न समुच्चयः । ग्रहदेवतास्तु न यागे श्रुताः, तस्मात् समुच्चीयेरन् । तस्मात् ‘ पशुमालभते ’ ‘ सोमेन यजेत ’ इति अपूर्वयोः कर्मणोर्विधानम् , नानुवादः इति सिद्धम् । के.

⧗ द्रव्यसंयोगाच्चोदना पशुसोमयोः , प्रकरणे ह्यनर्थको द्रव्यसंयोगो नहि तस्य गुणार्थेन । २।२। ६।१७ ॥

ज्योतिष्टोमे श्रूयते ‘ यो दीक्षितो यदग्नीषोमीयं पशुमालभते ’ इति । तथा ‘ हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः ’ इति । तथा ‘ सोमेन यजेत ’ ‘ ऐन्द्रवायवं गृह्णाति , आश्विनं गृह्णाति ’ इत्येवमादि । तत्र संशयः किमवद्यतिगृह्णातिचोदितानां कर्मणां इमावालभतियजती समुदायस्यानुवदितारौ, अथापूर्वयोः कर्मणोर्विधातारौ इति । इदानीं पूर्वाधिकरणवैषम्यात् पुनः प्रत्यवतिष्ठते ।

अत्रायं पूर्वपक्षिणोऽभिसंधिः । भवतु ऊर्ध्वादिसंयुक्तदध्यादिसंयुक्तवाक्यानां प्रकृते कर्मणि गुणविधायकत्वेनैव उपपत्तेः कर्मानुवादकत्वम् । इह तु ‘ हृदयस्याग्रेऽवद्यति ’ इत्यादिवाक्येषु हृदयादिसंबन्धेन अवदानं श्रूयते । तत्र हृदयादीनां वाक्यान्तरविहितत्वेन संस्कारावदानरूपगुणविधानासंभवात् हृदयादिसाधनकर्मोत्पादकत्वमेव युक्तम् । ‘ ऐन्द्रवायवं गृह्णाति ’ इत्यादिवाक्येषु रससंबन्धेन ग्रहणं श्रूयते । तत्र रसस्य वाक्यान्तराविहितत्वेन तत्संस्कारग्रहणरूपगुणविधानासंभवात् रससाधनककर्मोत्पादकत्वम् । एवं च सति ‘ यो दीक्षितो यदग्नीषोमीयं पशुमालभते ’ इत्यत्र अग्नीषोमदेवताविधानाय पशुशब्देन लक्षणया

हृदयादिसमुदायानुवादः। द्रव्यदेवतासंबन्धानुमितेन यजिना आलम्भवाक्ये हृदयादिसाधनकयागानुवादः । तथा ‘सोमेन यजेत’ इत्यत्रापि हविःप्रकृतिसोमलताविधानाय यजिना ऐन्द्रवायवादिवाक्येषु द्रव्यदेवतासंबन्धानुमितयागसमुदायानुवादः इति । अत्रापि पौर्णमासीवत् समुदायानुवादत्वमेव ।

ननु ‘हृदयस्याग्रेऽवद्यति’ इत्यादिवाक्येषु न तावत् यजिः श्रूयते। नाप्यनुमीयते, द्रव्यदेवतासंबन्धानवगमात्। हृदयादिसंबन्धवशात् अवदानस्य वत्सालम्भवत् यागमन्तरेणापि संभवान्न यागानुमापकत्वम् । कथम् ? पशुद्रव्याग्नीषोमदेवताकयागविधानेनैव मुख्यपशुशब्दार्थोपपत्तौ दीक्षितवाक्ये लक्षणया पशुशब्देन हृदयाद्यनुवादः। अतः पशौ तावत् सर्वथा पूर्वपक्षो न संभवति । तथा ‘सोमेन यजते’ इति प्रत्यक्षयागविधौ सति कथं ऐन्द्रवायवादिवाक्येषु द्रव्यदेवतासंबन्धानुमितस्य यागस्य विधानम् ? ‘प्रत्यक्षविधिसद्भावात् लभ्यते नानुमानिकम्’ इति न्यायविरोधात्। ऐन्द्रवायवादिवाक्यानां चेन्द्रवायुदेवताकश्रौतग्रहणविधानेनैव उपपन्नत्वात् नाश्रुतयागविधानाशङ्कोपपद्यते। भवतु वा द्रव्यदेवतासंबन्धेन ऐन्द्रवायवादिवाक्येषु यागविधानम्, तथापि ‘सोमेन यजेत’ इत्यत्र सोमद्रव्यकयागविधानोपपत्तेः कथं यजतेः यच्छब्दाद्युपरागाभावेऽपि यागानुवादकत्वं संभवति, अतः कथं सोमेऽपि पूर्वपक्षः ? इति । उच्यते, पशौ तावत् यद्यपि हृदयादिसंबन्धेन अवदानं श्रूयते, तथापि ‘सान्नाय्यं वा तत्प्रभवत्वात्’ (सू. ८।१।४०) इत्यनेनैव न्यायेन अयमवद्यतिः सांनाय्यावद्यतिप्रकृतिः । सांनाय्यावद्यतेश्च यागीयद्रव्यसंस्काररूपत्वात् एतस्यापि यागीयद्रव्यसंस्कारकत्वम् । तच्च तदैव संभवति, यदि हृदयादीनि यागसाधनानि भवन्ति। तेन यथायागसाधनसंस्काराभिषवसंबन्धेन पूतीकानां यागसाधनत्वं कल्प्यते, यथा वा लक्षणसंबन्धेन फलचमसस्य अश्रूयमाणमपि यागसाधनत्वं कल्प्यते, तथेहापीति पशुशब्देन हृदयादीनि अनूद्यन्ते, यजिना च तत्संबन्धिना यागाननूद्य अग्नीषोमौ देवतात्वेन विधीयेते। न च पशुशब्दस्य हृदयाद्यनुवादत्वे लक्षणैव दोषः, यतो विधौ हि लक्षणा दोषमावहति, नानुवादे। अथवा योदीक्षितवाक्ये देवताविधिदर्शनादेव हृदयादिवाक्येषु यागानुमानम् ।

ननु योदीक्षितवाक्ये देवताविशिष्टयागविधिरेवास्तु कथं देवतामात्रविधानम् ? मैवम् । एवं हि मन्यते, अवश्यं सिद्धान्तिनाऽपि हृदयादिगतावदानसंस्कारवैयर्थ्यात् पशुशब्दस्य लक्षणया हृदयादिपरत्वं वक्तव्यम् । तद्यदि योदीक्षितवाक्ये यागोत्पत्तिः, तदा विधौ लक्षणा, सा चायुक्ता ‘न विधौ परः शब्दार्थः’ इति न्यायात् । अवद्यतिवाक्यानां तु यागोत्पादकत्वे अनुवादे लक्षणा, सा न दोषाय । दृष्टा च भाविनीमपि अङ्गप्राप्तिमालोच्य उत्पत्तिव्यवस्था । यथा संख्याऽधिकरणे भाविनीमातिदेशिकावदानगणप्राप्तिमालोच्य सप्तदशयागोत्पत्तिः । तेन पशुशब्देन हृदयादीनि अनूद्य यजतिना तत्संबन्धिना यागाननूद्य अग्नीषोमौ देवतात्वेन विधीयेते इति सिद्धम्। तथा सोमेऽपि ऐन्द्रवायवादिवाक्येषु द्रव्यदेवतासंबन्धेन तावदवश्यं यागोऽनुमातव्यः । नहि द्रव्यदेवतासंबन्धप्रतिपादकस्य यागं विना स्वार्थे पर्यवसानमस्ति। तदुक्तम्—

‘यथाऽऽग्नेयादिवाक्यानां न प्राग्यागानुमानतः ।
स्वार्थपर्यवसायित्वं तथा सोमेऽपि दृश्यताम् ॥’

इति । (वा. पृ. ५१०) ।

ननु एवं श्रुतानुमितैकदेशमेवेदं वाक्यं निष्पन्नम् ‘इन्द्रवायुदैवत्येन द्रव्येण यजेत’ इति । तथा सति सोमवाक्यविहितयागानुवादेन अग्नीषोमवाक्ये इव हृदयाद्यनुवादेन देवताविधानमेवास्तु, किमत्र विशिष्टविधिस्वीकारेण ? मैवम् । सोमवाक्योत्पन्नयागानुवादेन ऐन्द्रवायवादिवाक्यैर्देवताविधौ एकयागसंबन्धेन खदिरपलाशानामिव एकस्मिन् यागे विकल्पः स्यात् । तदुक्तम्— **‘तथैकबन्धनार्थत्वात् पलाशखदिरादयः । तत्संबन्धे विकल्प्यन्ते यागेऽस्मिन् देवतास्तथा ॥’** इति । (वा. पृ. ५१२) । तथा सति ‘आश्विनो दशमो गृह्यते, तृतीयो हूयते’ इति क्रमदर्शनम्। तथा ‘दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति’ इति समुच्चयदर्शनं च नोपपद्यते। ऐन्द्रवायवादिवाक्यानां तु यागोत्पादकत्वे भिन्नयागसंबन्धित्वात् देवतानां समुच्चये सति क्रमसमुच्चयदर्शनमुपपद्यते । तथा सति रूपाभावेन यागविधानाभावात् यच्छब्दाद्यभावेऽपि ऐन्द्रवायवादि-

वाक्यविहितयागसमुदायानुवाद एवायं 'सोमेन यजेत' इत्यत्र यजतिशब्दः । सोमशब्दः ऐन्द्रवायवादिवाक्यावगतरसप्रकृतिसोमलताविधानार्थ इति । **एवं प्राप्ते, अभिधीयते** । भवेदवं यद्यत्र पौर्णमासीवत् वाक्यान्तरोत्पन्नयागप्रत्यभिज्ञानं भवेत् । सर्वत्र खलु प्रत्यभिज्ञानबलेन अनुवादो भवति । पुनरनुवादसिद्ध्यर्थं प्रत्यभिज्ञाकारणं कल्प्यते । न च अवद्यतिगृह्णातिवाक्येषु यागः श्रूयते, येनात्र प्रत्यभिज्ञानम् । तदुक्तम् '**प्रकृतप्रत्यभिज्ञानं वाक्ये यत्रोपलभ्यते । तत्र स्यादनुवादत्वं नचात्रैवं प्रतीयते** ॥' इति । (वा. पृ. ५१२) । तेन योदीक्षितवाक्ये एव द्रव्यदेवतासंबन्धानुमितस्य यागस्य विधानम् । सोमवाक्ये तु प्रत्यक्षसिद्धमेव द्रव्यविशिष्टयागविधानम् । न च वाच्यम्, पशुद्रव्यकसोमद्रव्यकयागोत्पत्तौ हृदयादीनां रसस्य च अविनियुक्तत्वात् तत्संबन्धिनोः अवदानग्रहणरूपसंस्कारयोर्विधानमनर्थकमेव स्यादिति । न हि पशुसोममात्रप्रतीतिः, यतः अवद्यतिगृह्णातिवाक्यदर्शनेन तयोरविकृतयोर्देवतोद्देशेन यागविधानात् । किं तर्हि ? हृदयादिपर्यन्तो रसपर्यन्तश्च, तेन सोमविनियोगेन तदन्तर्गतपशुहृदयसोमरसयोरपि विनियुक्तत्वात् विनियुक्तगोचरमेव संस्कारविधानम् । यथा व्रीहिशास्त्रस्य तण्डुलादिपर्यन्तत्वात् 'तण्डुलान् पिनष्टि' इत्यादिसंस्कारविधानम् । न चैवं सति विधौ पशुसोमशब्दः संस्कारज्ञापनार्थः, तदुक्तम् '**द्रव्येणात्यन्तभिन्नेन सह चिन्त्यं बलाबलम् । हृदयादिरसद्वारमङ्गत्वं पशुसोमयोः** ॥' इति । (वा. पृ. ५१६) । किञ्च विशेषतः पशूदाहरणे अवद्यतौ यागः संभावयितुमपि न शक्यते । **यदपि** हृदयाद्यवदानस्य सांनाय्यावदानप्रकृतित्वेन तद्धर्मलाभे सति यागीयद्रव्यसंस्कारत्वात् यागानुमानमित्युक्तम्, **तदपि** अयुक्तम् । सांनाय्यावद्यतेरेव प्रकृतौ अचोदितत्वेन धर्मसंबन्धाभावात् । न च 'द्विर्हविषोऽवद्यति' इत्यनेन तावदवदानं विधीयते । किं तर्हि ? अर्थप्राप्तानुवादेन द्वित्वमात्रम् । एतच्च सर्वप्रदानाधिकरणे (३।४।१८ भा. १४।३७) विस्तरेण वक्ष्यामः । भवतु वा हृदयाद्यवदानस्य तत्प्रकृतित्वम्, तथापि न यागसाधनसंस्कारकत्वं तस्य । इतिकर्तव्यता चातिदिश्यते, न धर्ममात्रम् । अतो न तद्वशेनापि यागकल्पना । पूतीकाभिषवफलचमसभक्षणयोस्तु यागसाधनद्रव्यसंस्कारयोरेव प्रकृतयोर्वाक्यप्रकरणाभ्यां पूतीकफलचमससंबन्धेन उपादानमिति वैषम्यम् । **यदपि** योदीक्षितवाक्ये पशुशब्दस्य लक्षणया हृदयादिपरत्वमापाद्य विधौ लक्षणाऽभावात् भाविदेवतासंबन्धनिरीक्षणेन अवद्यतिवाक्ये एव यागानुमानमित्युक्तम्, **तदपि** यागविधौ पशुशब्दस्य हृदयादिपर्यन्तत्वेन मुख्यार्थस्य उक्तत्वान्निरस्तम् । पशूदाहरणं तावन्निरपवादम् ।

एवं 'सोमेन यजेत' इति प्रत्यक्षे यजौ ऐन्द्रवायवादिवाक्येषु यागः संभावयितुमेव न शक्यते । **न च** आग्नेयादिवाक्यानामिव ऐन्द्रवायवादिवाक्येष्वपि न यागमन्तरेण स्वार्थपर्यवसानमस्तीति **वाच्यम्** । यतः इन्द्रवायुदेवतोद्देशेन द्रव्यग्रहणविधानेनैव वाक्यपर्यवसानात् । आग्नेयादिवाक्येषु तु पुंव्यापारस्य विधिविषयत्वात् भवत्यर्थस्य च अपुंव्यापारत्वात् अवश्यं कल्पनीये पुंव्यापारे द्रव्यदेवतासंबन्धेन यागः एव कल्प्यते इत्युक्तम् । इह ग्रहणरूपस्य पुंव्यापारस्य श्रुतत्वान्नापर्यवसानं वाक्यस्येति । **ननु** त्यज्यमानं हविः प्रति उद्देश्यत्वं देवतात्वं न किञ्चिज्जात्या समस्ति । अतः कथं ग्रहणे देवताऽन्वयः ? इति । **उच्यते**, न हीदं ग्रहणमर्थान्तरभूतम्, किं तर्हि ? यागावयवभूतमेवैतत् । न हि देवतोद्देशेन त्यज्यते । न च अन्योद्देशेन गृहीतस्य अन्योद्देशेन त्यागे यागः संपद्यते । तेन देवतोद्देशेन गृहीतस्यैव हविषस्त्यागो याग इति न यागावयवभूते ग्रहणे देवतोद्देशो विरुध्यते इति । एवञ्च यागापेक्षायां 'सोमेन यजेत' इत्ययमेव प्रत्यक्षश्रुतो यागोऽस्तीति नात्र यागकल्पनाप्रयासः इति । तथा च सति इयमेव यागैकदेशभूतग्रहणसंबन्धिनी देवता प्रकृतयागे देवतापेक्षिणि संबध्यते इति । **न च** एवं सति खादिरपालाशादीनामिव एकबन्धनार्थत्वे देवतानामपि एकयागार्थत्वे विकल्पः इति **वाच्यम्** । यतो नात्र खादिरपालाशादीनामिव बन्धने, देवतानां यागे वाक्येन विधानम्, येन विकल्पः आपद्येत । किं तर्हि ? ग्रहणमुखेन देवतानां यागान्वयः । ग्रहणानि तावत् भिन्नकार्याणि युगपदेव प्रकरणिना गृहीतानि भिन्नकार्यत्वात् समुच्चेत-

न्यानि । तेन ग्रहणद्वारा देवतानामपि समुच्चयो युक्तः । परमयं विशेषः, ग्रहणत्यागयोरेका देवता, येन यदुद्देशेन गृहीतं तदुद्देशेनैव त्यक्तव्यम् । तेन प्रतिग्रहणं सोमयागस्य अभ्यासः । एवं च सति त्रिषवणदशग्रहदशचमसादीनां प्रत्यभ्यासं भिन्नो यागः 'सोमेन यजेत' इत्यनेन शास्त्रेण सकृदुत्पादित इति मन्तव्यम् । तथा सति 'आश्विनो दशमो गृह्यते, तृतीयो हूयते' इति क्रमदर्शनम्, तथा 'दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति' इति समुच्चयदर्शनमुपपन्नं भवतीति सोमोदाहरणमपि अनवद्यम् ।

प्रयोजनम्--पूर्वपक्षे हृदयादीनामैन्द्रवायवादियागानां पृथक्त्वात् स्वार्थत्वात् विशेषचोदनालिङ्गात् तद्धर्मातिदेशे सति न सकलधर्मप्राप्तिः । सिद्धान्ते तु पशुयागस्य सोमयागस्य एकत्वात् विकृतौ सकलधर्मापत्तिरिति ।

सूत्रं तु—पशुसोमद्रव्यसंयोगात् पशुवाक्ये सोमवाक्ये च यागचोदना यागविधानम्, यस्मात् प्रकृतयागेषु अनर्थको निष्प्रयोजनो द्रव्यसंयोगः । 'नहि तस्य गुणार्थेन' इति सूत्रावयवो भाष्यकारेण सोमोदाहरणे सोमलतायाः प्रदेयत्वेन गुणार्थत्वमाशङ्क्य श्रौतरसावरोधेन तन्निराकरणपरतया व्याख्यातः । 'नहि तस्य गुणार्थेन' इति सूत्रावयवतात्पर्यमनाकलितं भाष्यकारेण । नहि गुणाधिकरणविरुद्धा प्रदेयत्वेन गुणत्वाशङ्का जैमिनेर्मनसि संभाव्यते । व्रीहियववत् प्रदेयप्रकृतित्वेनैव तु सोचिता । तदुक्तम्-- **'यथैवाष्टाकपालादौ श्रौतेऽपि सति वाक्यतः । व्रीह्यादयो विधीयन्ते तथा सोमो विधास्यते ॥'** इति । (वा. पृ. ५१३) ।

अत्रैके समाधानमभिदधति— 'आग्नेयोऽष्टाकपालो भवति' इति अत्र अग्निदेवतासंबन्धपुरोडाशप्रतिपादकवाक्यशेषः संभवति । 'पुरोडाशं कूर्मं भूतं सर्पन्तमपश्यन्, तमब्रुवन्, इन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्व' इत्यादि । अस्य च स्तुतिपरत्वेऽपि स्तुत्यपुरोडाशप्रतिपादनावरोधात् स्ववाक्यस्थपुरोडाशे एव आग्नेयतद्धितपर्यवसानम् । तथा सति किंप्रकृतिकः पुरोडाश इति प्रकृतिद्रव्यापेक्षायां 'व्रीहिभिर्यजेत' इति युक्तः प्रकृतितया व्रीहीणां विधिः । अत्र तु 'ऐन्द्रवायवं गृह्णाति' इति वाक्यशेषानवगमात् प्रकरणनिरीक्षणेन च 'सोमं पुनाति' इति सप्रकृतिकस्यैव रसस्य प्रतीतेस्तत्रैव तद्धितपर्यवसानमिति प्रकृतिरूपापेक्षाभावान्न प्रकृतित्वेन 'सोमेन यजेत' इति सोमलताविधिः संभवति । **न च** 'त्वाष्ट्रं पात्नीवतमालभेत' इत्यत्र यथा आलम्भस्य अर्थाक्षिप्तालभ्यमात्रे तद्धितपर्यवसानम्, तथा 'ऐन्द्रवायवं गृह्णाति' इत्यत्रापि स्ववाक्ये एव ग्रहणाक्षिप्तग्रहमात्रे तद्धितपर्यवसानम् । अव्यवहितश्रुतेश्च 'अण्व्या धारया गृह्णाति' इति वाक्ये गौणशब्दस्यैव अव्यभिचारिग्रहणविशेषाभिधायकत्वात्, अव्यभिचरितोपस्थितद्रवद्रव्येणैव तद्धितपर्यवसानमिति वक्तव्यम् । येनान्यपरशब्दोपनीतौ अप्राप्तेन अर्थाक्षिप्तेनार्थेन अभिधानमिति व्युत्पत्तेः, परमते च नित्यं शाब्दाशाब्दयोरसंबन्धात् अर्थाक्षिप्तस्यापि तद्वाचकशब्दकल्पनाव्यतिरेकेण अन्वयात् प्रकरणे च 'सोमं पुनाति' इति अनन्यपरशब्दोपनीतस्य सोमरसस्यैव प्राप्तेस्तत्रैव पर्यवसानम् । **न च** लतावचनत्वात् सोमशब्दस्य 'सोमं पुनाति' इत्यत्र सोमशब्दो न रसपर इति वाच्यम् । द्रवद्रव्यकल्पापहरणाभिधायकस्योत्पुनातिशब्दस्य लतासमभिव्याहारानुपपत्तौ लाक्षणिकस्वप्रभवरसपरत्वस्य अवश्याभ्युपेयत्वात् । **न च** प्रथमावगतसोमशब्दानुरोधेन उत्पुनातिशब्दः एव लक्षणाश्रयणान्न सोमलक्षणार्थत्वं वक्तव्यम् । उत्पुनातिशब्दगतलक्षणायां सोमलतासंबन्धोचितक्रियाविशेषे विनिगमनाप्रमाणाभावात् । सोमशब्दे तु उत्पवनसंबन्धोचितस्वप्रभवरसस्यैव योग्यत्वादस्ति विनिगमनायां प्रमाणमिति तद्गतैव लक्षणेति । एवं सति उत्पवनप्रधानकर्मत्वे च उभयथापि सोमशब्दस्य रसपरत्वात् किमैन्द्रवायवं इत्यपेक्षायां अनुषङ्गात् सोमरसः एव संबध्यते । नच धारावाक्यव्यवधानान्नानुषङ्गः, तत्रापि किं धारया गृह्णातीत्यपेक्षायां सोमरससंबन्धात् । यथा 'या ते अग्नेरजाशया' इत्यनेन संबद्धं 'तनूः' इति पदं हराशयेत्यत्र न व्यवधीयते, तथेहापि सोमरसस्य न धारावाक्येन ऐन्द्रवायवसंबन्धो व्यवधीयते इति । तथाच सति सोमरसे एव तद्धितश्रुतेः पर्यवसानात् प्रकृतिद्रव्यापेक्षाऽभावान्न तत्प्रकृतितया लताविधिः संभवति । तदुक्तम्—'पुरोडाशो ह्यनिरूपितप्रकृतिद्रव्यतया आग्नेयादिषु प्रतीयते इति युक्तं प्रकृतिद्रव्यविधानम् । इह

तु निरूपितप्रकृतिकः सोमरस एव गम्यते, नहि भवति सोमरसः किंप्रकृतिक इत्यपेक्षा ’ इति ।

अत्रोच्यते— भवतु सोमरसे एव तद्धितश्रुतिपर्यवसानम्, तथापि नियमेन क्रयणाभिषवसंस्कृतसोमप्रभवरसहविष्कयागसिद्ध्यर्थं अङ्गतया सोमविधानं अर्थवद्भविष्यति । इतरथा तु अनङ्गस्य नियमेन उपादानाभावात् प्रतिग्रहं क्रयणादिस्वरसेनापि यागः क्रियेत । न च अनङ्गत्वेऽपि प्रसङ्गादेव क्रीतादभिषुतात् पूतात् तथाभिप्लावितादपि सोमादुद्भूत एवासौ रस ऐन्द्रवायव इति वक्तव्यम् । विकल्पासहत्वात् । किं क्रयणादीनां संस्कारकर्मत्वमाश्रित्योच्यते ? प्रधानकर्मत्वं वा ? न तावदाद्यः कल्पः, तस्य विनियुक्तगोचरत्वेन असंभवात् । नापि द्वितीयः, तत्रापि यद्यप्सु पानं प्रसङ्गः (?), तदा क्रीतसोमापचारे अभिषवादीनां रसापचारे च प्रधानस्य लोप एवेति ।

किञ्च, सामान्यशास्त्रं हि प्रसङ्गेन विशेषशास्त्रं अपेक्षावशादुपजीवति । यथा पदकर्मशास्त्रं क्रयार्थानीयमानैकहायन्युपपदविशेषशास्त्रम् । क्रयाभिषवादिशास्त्राणां तु लोकसिद्धसोमग्राहित्वेन तुल्यत्वात् ‘तुल्येषु नाधिकारः स्यात्’ इति न्यायेन न प्रसङ्गविषयत्वमिति युक्तः प्रकृतित्वेन सोमविधिरिति । तदुक्तम्— ‘सोमेन यजेतेत्येतद्विधिमन्तरेणापि क्रयणाभिषवादिसंस्कारविध्युपपत्तेः’ (इति) । न चाविनियुक्तत्वेन सोमस्य अनङ्गत्वादसंस्कार्यत्वम्, ‘सोमं पुनाति’ इत्यत्र सप्रकृतिकस्यैव अवगतस्य ऐन्द्रवायवादिवाक्येषु विनियुक्तत्वात्, सविशेषणान्वयस्य कार्योपयोगित्वेन तत्संभवे सति प्रतीतिमात्रोपयुक्तस्य उपलक्षणस्य अन्याय्यत्वात् । विशिष्टविधौ च विशेषणानां औपादानिकाङ्गभावस्य सर्वत्र स्थितत्वात् । न च औपादानिकस्य सोमाङ्गभावस्य कल्पनीयत्वात्, प्रत्यक्षायां च श्रुतौ कल्पनाऽनवकाशात्, ‘सोमेन यजेत’ इति प्रत्यक्षश्रुतेरेव अङ्गभावप्रतिपादकत्वमिति वक्तव्यम् । यतोऽभिव्यक्ते यागे तदनुवादेन सोमविधिर्वक्तव्यः । यागाभिव्यक्तिश्च ऐन्द्रवायवतद्धितस्य उत्पवनवाक्यावगतसोमविशिष्टरससंबन्धपूर्विका, तत्र विशिष्टविशेषणविशेष्ययोरैकरूप्यम्, किन्तु आकाङ्क्षायोग्यतावशाद्देवता (तात्वेन) रसस्याङ्गभावो न सोमाङ्गभावमन्तरेण संभवतीत्यौपादानिके सोमाङ्गभावे पृथगसिद्धे तदुपजीवी सोमविधिः प्रत्यक्षोऽपि अकिञ्चित्कर एवेति । न चैवं सति लताया अपि प्रदेयत्वप्रसङ्गः । नहि सर्वत्र विशिष्टविधौ विशेषणविशेष्ययोरैकरूप्यम्, किन्तु आकाङ्क्षायोग्यतावशाद्देवतात्वेनोद्देश्यत्वमेव । तत्रापि रसस्य प्रदेयत्वेऽपि तत्प्रकृतित्वेनैव सोमलतासंबन्ध इति । अथवा सोमस्य अविनियुक्तत्वेऽपि अङ्गभूतरसोपकारकतया अभिषवादिसंस्कार्यत्वम्, वत्सस्येव विनियुक्तदोहोपकारकतया ‘वत्समालभेत’ इत्यत्र आलम्भसंस्कार्यत्वम्, ऋचां वा यथा विनियुक्तस्तुत्युपकारितया सामसंस्कार्यत्वम्, स्वाध्यायस्य वा परमते विनियुक्ततदर्थोपकारकतया अध्ययनसंस्कार्यत्वम् ।

ननु सोमस्य अविनियुक्तत्वेन अनङ्गत्वात् अनङ्गस्य च अप्रतिनिधेयत्वात्, ‘यदि सोमं न विन्देयुः पूतीकानभिषुणुयुः’ इत्यत्र पूतीकानामभावविधित्वं भवेत्, न सोमप्रतिनिधिनियमः । तथा सति पूतीकापचारे तत्सदृशोपादानं भवेत्, न सोमसदृशोपादानम् । अतो युक्तः सोमसदृशोपादानार्थमयं सोमविधिरिति वैषम्यम् । न सोमरसस्य विनियुक्तत्वेन तत्सदृशपूतीकान्तर्गतरसनियमात् प्रतिनिधिनियम एव । अथवा अनङ्गत्वेऽपि सोमस्य तत्प्रकृतिकरसस्यैव विहितत्वेन रसस्येव रसप्रकृतेरपि सोमस्य शास्त्रार्थत्वात्, शास्त्रार्थस्यैव प्रतिनिध्युपयोगित्वात् सोमप्रतिनिधिनियमोऽपि युक्त एव, किमङ्गता करिष्यति ? न च गुणाधिकरणन्यायेन प्रदेयत्वमपि आशङ्कनीयम् । तत्र हि ‘वैश्वदेव्यामिक्षा’ इति स्ववाक्यगतामिक्षाऽवरोधान्न पुनः ‘ऐन्द्रवायवं गृह्णाति’ इत्यादिषूत्पत्तिवाक्येषु रसस्य अप्रतीतत्वेन वैषम्यात् । अतो युक्ता भाष्यकारस्य लतायाः प्रदेयत्वाशङ्केति ।

अत्रोच्यते-- यत्तावदुक्तम्, उत्पवनवाक्ये सोमरसस्यैव शाब्दत्वात् तद्धितश्रुतिपर्यवसानम्, तथा च सति न प्रकृतितया सोमविधानं संभवतीति । तदयुक्तम्, न तावदुत्पवनवाक्ये सोमरसः श्रूयते । नापि उत्पवनसमभिव्याहारानुपपत्त्या सोमशब्देन लक्ष्यते । संस्कारकर्मत्वे हि उत्पवनस्य लतायामुत्पवनरूपसंस्कारासंभवात् रसो लक्षणीयः । तथा विनियुक्तत्वेन सोमलतारसयोर्द्वयो-

रपि संस्कार्यत्वं संभवति । संस्कार्यत्वेन च विनियोगकल्पनायामितरेतराश्रयप्रसङ्गात् । तेन भूतभव्यसमुच्चारणन्यायेन प्रधानकर्मत्वमेव स्यात् । तथा च सति मुख्यार्थस्यैव सोमस्य द्रवद्रव्यकल्पापहरणरूपोत्पवनसाधनत्वसंभवः । नासौ लक्षणा …… । न च द्रवद्रव्यान्तरस्य कल्पनीयत्वात् सोमशब्दस्यैव लक्षणया रसोपस्थापकत्वमिति वक्तव्यम् । पक्षद्वयेऽपि कल्पनासमानत्वात् । उत्पवनसाधनत्वेन रसलक्षणायामपि पार्थिवं द्रव्यान्तरं कल्पनीयमेव । इयांस्तु विशेषः, एकत्रोत्पवनाविनाभूतद्रव्यस्वीकारेण मुख्यसोमशब्दार्थस्य उत्पवनसाधनत्वम्, अपरत्र च उत्पवनाविनाभूतसाधनस्वीकारेण सोमशब्दे लाक्षणिकत्वम् । तच्चायुक्तम् ।

अथवा अस्तु उत्पवनवाक्ये शाब्दी रसावगतिः, न तत्र तद्धितपर्यवसानम् । न च तथा सति सोमलतायामेव तद्धितपर्यवसानमिति वक्तव्यम् । धारावाक्यस्य व्यवधानेन असंबद्धत्वात् । धारावाक्ये पुनर्ग्रहणस्य गुणकर्मत्वे प्रधानकर्मत्वेऽपि वा धाराऽर्हद्रवद्रव्यस्य आक्षेपलभ्यत्वेन तस्यैव गृह्णातिचोदनासाम्यात् । आनन्तर्याच्च बुद्धितारतम्यात् शब्दकल्पनयाऽपि तत्रैव तद्धितवृत्तिः । तेनायमर्थो भवति 'ऐन्द्रवायवं द्रवद्रव्यं गृह्णीयात्' इति । द्रवद्रव्यं च द्विविधं भवति निर्यासमनिर्यास च । तत्र भवत्याकाङ्क्षा किं द्रवद्रव्यं निर्यासरूपं कुतश्चित्प्रकृतिविशेषादुपादेयम् ? अनिर्यासं वा कुतश्चित् तटाकादिजलाशयादुपादेयम् ? इत्यपेक्षायां 'व्रीहिभिर्यजेत' इतिवत् 'सोमेन यजेत' इति प्रकृतितया सोमविधिरुपपन्न एवेति व्रीहिमुद्रार्थः (?) । भवतु वा यथाकथञ्चित् उत्पवनवाक्यगतसोमप्रकृतिरसे एव तद्धितपर्यवसानम्, तथापि अविनियुक्तस्य अनङ्गभूतस्य संस्काराभावात् क्रयणाभिषवादिसंस्कारसिद्धये सोमविधिरर्थवान् भविष्यति । न च विशिष्टविधानेन सोमोऽपि विनियुक्त एवेति वक्तव्यम् । यतः शाब्दत्वलोभेन संनिहितधारावाक्याक्षिप्तद्रवद्रव्यपरित्यागेन उत्पवनवाक्यलक्षितसोमरसेन तद्धितपर्यवसानं युक्तम् । तत्किं रसस्येव सोमस्यापि लक्षणया शाब्दत्वम्, श्रुतिवृत्त्या वा ? न तावल्लक्षणया, उत्पवनक्रियासंबन्धानुपपत्तिभ्यां हि लक्षणावृत्त्या सोमशब्दः संबन्धायोग्यमेव ह्यात्मानं लक्षयतीति हास्यास्पदमेव । नापि श्रुतिवृत्त्या, एकस्य शब्दस्य संभवासंभवकृतयुगपच्छ्रुतिलक्षणाविरोधात् । तेन विशिष्टत्वासंभवात् यथा 'गङ्गायां घोषः प्रतिवसति' इत्यत्र गङ्गापदार्थलक्षिततीरमात्रस्यैव निवासयोग्यस्य लक्षणाविषयत्वम्, न त्वयोग्यस्यापि जलस्य, तथात्रापि सोमप्रकृत्युपलक्षितरसस्यैव लक्षणाविषयत्वमिति अशाब्दत्वात् लताया न विशेषणत्वेन रसान्तर्भावो घटते, इति क्रयणादिसंस्कारसिद्धये युक्तः 'सोमेन यजेत' इति प्रकृतिविधिरिति ।

अथ अविनियुक्तस्यानङ्गस्यापि अङ्गभूतरसोपकारकतया वत्सादिवत् संस्कारार्हत्वात् तत्सिद्ध्यर्थमनर्थकः सोमविधिरित्युच्यते । तद्युक्तम् । उपकारकस्य हि संस्कारो भवन् अव्यभिचरितोपादानस्यैव भवति, नित्यवच्छ्रुतानां संस्काराणामनित्यसंयोगविरोधात् । तेन विनियुक्तापूर्वीयदोहस्य प्रस्नवनोपायान्तरनिषेधेन वत्सोपादानस्य अव्यभिचारात् 'साम्ना स्तुवीत' इति स्तुतिविनियुक्तानां च साम्नां 'ऋच्यध्यूढं साम गायति' इति ऋगधिष्ठानाव्यभिचारात् वत्सस्य च ऋचां च संस्कारो युक्त एव । स्वाध्यायस्य तु न विनियुक्तार्थोपकारकतया अध्ययनसंस्कार्यत्वम्, किन्तु अध्ययनसंस्कृतस्यैव तथाभूतार्थज्ञानहेतुत्वात् । तथा आधानसंस्कृताहवनीयविनियोगवत् सामर्थ्यात् संस्कृतविनियोग एवायम् । यथा चैतत् तथा अर्थवादाधिकरणे एवोक्तम् । सोमरसस्य तु अविनियुक्तत्वेऽपि प्रकारान्तरेणापि तदुपादानाविरोधेन नियमेन तदुपादानासंभवात् संस्कृतविनियोगस्य चासंभवात् भवदनभिमतत्वाच्च न वत्सादिसाम्यम्, नापि स्वाध्यायसाम्यमिति क्रयणाभिषवसंस्कारार्थं युक्तः 'सोमेन यजेत' इति सोमविधिः । न च क्रयणाभिषवादिसंस्कारवाक्यैरेव विनियोगभङ्गभिया अङ्गभावः सोमस्याक्षिप्यते इति वाच्यम् । प्रत्यक्षे हि सोमविधौ लैङ्गिककल्पनाऽसंभवात् । तदुक्तम्––'स एवायं युक्तः सोमेन यजेत' इति । न च विनापि विधानात् संस्कारवशादेव सोमाङ्गभावप्राप्तौ किं विधिनेति वाच्यम् । यतः शक्यमितरेणापि

वक्तुम् 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति तदधिकाराक्षेपादेवोत्पत्तिप्राप्तौ किं सर्वत्र विधिनेति ।

अथ आम्नानसामर्थ्येन श्रुतशब्दावगतोत्पत्तेरेव अनुष्ठितस्य कर्मणः अपूर्वसाधनत्वम्, तर्हि अत्रापि श्रुतशब्दावगताङ्गभावस्यैव सोमस्य अनुष्ठानमपूर्वसाधनमिति नानुपपन्नम् । अतो युक्ता प्रकृतित्वेनैव सोमविधिशङ्का, न तु प्रदेयत्वेन युक्ता, तदधिकरणविरोधात् । वाक्यान्तरोपात्तत्वेऽपि रसस्य एकवाक्योपात्ते सा वैश्वदेव्यामिक्षेतिवत् तत्र तद्धितपर्यवसाने प्रदेयरसावरुद्धत्वाविशेषात् इत्यलमतिविस्तरेणेति । तेन 'नहि तस्य गुणार्थेन' इति सूत्रावयवस्य अयमर्थः, पशौ प्राप्ते कर्मणि द्रव्यदेवतोभयविधानासंभवान्न पशुद्रव्यस्य गुणार्थे विधानम्, नापि सोमयागानुवादेन प्रकृतितया सोमस्य, ऐन्द्रवायवादिवाक्यानां ग्रहणमात्रपर्यवसितत्वमेव यागानुवादासंभवादिति । **तौता.**

* **द्रव्यसंस्कारः** अङ्गप्रधानार्थः । **भा.** ३।८।१५।३०.

⧗ द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम् । ३।८।१५।३१ ॥

दर्शपूर्णमासयोः बर्हिर्धर्मा वेदिधर्माश्च उक्ताः । स च द्रव्यसंस्कारः बर्हीरूपस्य वेदिरूपस्य च द्रव्यस्य संस्कारः प्रकरणाविशेषात् प्रकरणस्य अङ्गेषु प्रधानेषु च समानत्वात् सर्वकर्मणां अङ्गकर्मणां प्रधानकर्मणां च समान एव स्यात् । यथा प्रकृतौ तथा विकृतावपि द्रव्यसंस्कारः सर्वकर्मणां स्यात् इति सिद्धान्तः ।

भाष्ये तावत् अनेन सूत्रेण पृथगधिकरणमारचय्य 'उत्तरविवक्षया प्राप्तिरेषा क्रियते' इत्युक्तम् । वार्तिके तु "यत्तु धर्माणां सामानविध्यं अङ्गप्रधानेषु पूर्वोक्तं (३।७।१।२) तत् विकृतिषु कथमिति विचारे प्राप्ते सूत्रमेतत्" इत्युक्त्वा पुनरुक्तं "शक्यं तु पूर्वपक्षेऽपि (उत्तराधिकरणस्य पूर्वपक्षेऽपि) एतत् समर्थयितुं यस्मात् प्रकृतौ बर्हिरादिसंस्कारः सर्वकर्मणां तस्मात् विकृतावपि तथैव स्यादिति" इति । इतरग्रन्थेषु तु उत्तराधिकरणे एवैतत् सूत्रं समावेशितम् । तदनुसारेण तु एवं योजनीयम्– ज्योतिष्टोमे अग्नीषोमीये पशौ 'बर्हिषा यूपावटमवस्तृणाति' 'आज्येन यूपमनक्ति' इति श्रुतम् । तत्र आज्ये बर्हिषि च प्राकृता बर्हिराज्यधर्माः कर्तव्या नवेति विचारे पूर्वपक्षमाह, यथा प्रकृतौ प्रकरणाविशेषात् द्रव्यसंस्कारः वेदिधर्मबर्हिर्धर्मरूपः सर्वकर्मणां अङ्गानां प्रधानानां च कर्मणां क्रियते, एवं यूपावटबर्हिषि बर्हिर्धर्माः कर्तव्याः यूपाञ्जनाज्ये च आज्यधर्माः कर्तव्याः इति । अस्मिन् पक्षे सर्वं सूत्रमिदं दृष्टान्तार्थमेवेति ध्येयम् । **के.**

* द्रव्यसंस्कारो भक्षः, न कर्तृसंस्कारः । **वा.** ३।५।८।२६ पृ. १००४.

* **द्रव्यसंस्कारकर्मणां** फलप्रयुक्तत्वं नास्ति । तानि तु क्रत्वर्थानि । **भा.** ४।३।१।१–४.

* '**द्रव्यसंस्कारकर्मसु**' (४।३।१।१) 'यस्य पर्णमयी' 'तीर्थे स्नाति तीर्थमेव समानानां भवति' 'वर्म वा एतद्यज्ञस्य' इत्यादीनि द्रव्यादिविषयाणि वाक्यानि उदाहृत्य किमेते फलविधयः, फलार्थवादा वा । तत्र पर्णतादेः अप्राप्तत्वेन अवश्यविधेयस्य फलाकाङ्क्षायां साक्षात् पुरुषार्थरूपश्रुतफलसंभवे पारंपर्यपुरुषार्थरूपक्रतूपकाराख्यफलकल्पनाऽयोगात् फलविधित्वेन पूर्वपक्षयित्वा यथाकथञ्चित् पुरुषार्थत्वरूपफलत्वेन विध्यनुपपत्तिपरिहारात् रात्रिसत्रादिवत् विपरिणामकल्पनाऽनुपपत्तेः, यथाश्रुतवर्तमानफलत्वसंकीर्तनस्य च अनुपलब्धिविरोधात्, न फलविधित्वं इति सिद्धान्तयिष्यते । **सु.** पृ. १५–१६.

* 'द्रव्यसंस्कारकर्मसु परार्थत्वात्' (४।३।१।१) इति न्यायेन 'तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः' इति अर्थवादेन 'ब्राह्मणेन न म्लेच्छितवै' इति क्रत्वङ्गनिषेधस्य प्राशस्त्यमात्रं बोध्यते । **शब्दकौ.** १ साधुत्वनिर्वचने. * 'द्रव्यसंस्कारकर्मसु परार्थत्वात्' इत्यनेन न्यायेन ज्ञानस्य पुरुषशब्दसंस्कारत्वेन निराकाङ्क्षस्य फलसंबन्धासंभवात् । **वा.** १।३।८।२७ पृ. २८८.

⧗ द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् । ४।३।१।१ ॥

'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इति द्रव्ये पर्णापरपर्याये पलाशे फलश्रुतिः । 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' इति नेत्राञ्जनरूपे संस्कारे फलश्रुतिः । 'यत्प्रयाजानुयाजा इज्यन्ते

वर्म वा एतद् यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै ’ इति प्रयाजादिरूपे कर्मणि फलश्रुतिः । पर्णः पलाशवृक्षः । पापः श्लोकः अपकीर्तिः । आङ्क्ते नेत्रयोः अञ्जनं कुरुते । भ्रातृव्यस्य शत्रोः । वृङ्क्ते नाशयति । वर्म कवचम् । अभिभूतिः पराभवः इति श्रुतिपदार्थः । द्रव्येषु संस्कारेषु अङ्गकर्मसु च येयं फलस्य श्रुतिः श्रवणम्, सः अर्थवादः स्यात् न विधिः । उक्तानां द्रव्यसंस्कारकर्मणां परार्थत्वात् अन्यशेषत्वात् क्रत्वर्थत्वात् । नैतानि पुरुषार्थानि किन्तु क्रत्वर्थानि । तस्मात् फलार्थवादोऽयम् ।

उत्पत्तेश्चातत्प्रधानत्वात् । २ ॥

द्रव्यसंस्कारकर्मसु फलश्रुतिरर्थवादः इति सिद्धान्तिना उक्ते, ननु पुरुषमुद्दिश्य फलं श्रूयते ‘ न स पापं श्लोकं शृणोति ’ इति, कथमयमर्थवादः स्यादिति शङ्कायां सिद्धान्ती उत्तरयति । उत्पत्तेः पर्णमयी इति विधेः उत्पत्तिवाक्यस्य अतत्प्रधानत्वात् तत्प्रधानत्वाभावात् फलपरत्वाभावात् पुरुषप्रधानत्वाभावात् इति वा । पर्णतापरमेतत् वाक्यम् । तस्मादर्थवादः फलश्रुतिः ।

आनर्थक्यमक्रियार्थत्वात् । इति सूत्रं (४।३।१।३) यपुस्तके । कुतूहलवृत्तौ च तत् एवं व्याख्यातम्—– ननु ‘ यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति ’ इत्यस्य फलपरत्वाभावे ‘ प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ति ’ इति रात्रिसत्रवाक्यमपि फलपरं न स्यात् इति, अत आह । प्रतितिष्ठन्ति इत्यस्य विपरिणामेन फलपरत्वाभावे रात्रिसत्रविधेरानर्थक्यं स्यात् अक्रियार्थत्वात् त्वत्पक्षे क्रतूपस्थापकपदाभावेन क्रत्वर्थत्वाभावात् क्रतूपकारेण फलाकाङ्क्षाशान्तेरभावात् इति यावत् । ततश्च तत्र अगत्या फलपरत्वं इति ।

भाष्येऽपि ‘ अर्थवादे तु सति भवति प्रयोजनम्, खादिरादेः स्रुवादिषु कर्मार्थेषु प्रयोजनवत्सु ’ इति व्यतिरेकेण व्याख्यातमिदम् । सिद्धान्तपक्षीयं सूत्रम् ।

फलं तु तत्प्रधानायाम् । ४ (३) ॥

सिद्धान्तपक्षीयं आशङ्कानिराकरणार्थं सूत्रम् । ‘ यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति ’ इत्यादेः द्रव्यसंस्कारकर्मसु फलश्रुतेरर्थवादत्वे ‘ खादिरं वीर्यकामस्य यूपं कुर्यात् ’ इत्यादेरपि अर्थवादत्वमेव स्यादिति चेन्न । तुशब्दः शङ्कानिरासार्थः । अत्र तत्प्रधानायां विधिप्रधानायां चोदनायां वीर्यादि फलं अन्वेति इति चोदनैवेयं नार्थवादः । अपापश्लोकश्रवणादिकं तु कमिपदाभावात् न चोदनायां फलत्वेन अन्वेति इति वैषम्यम् । **के.**

* असत्यां प्रयोजनाकाङ्क्षायां यद्यपि काचित् फले श्रुतिर्भवेत्, साऽपि **द्रव्यसंस्कारकर्मसु इत्यनेन न्यायेन** अर्थवादतया ज्ञायते । (न्यायस्वरूपं तु) ‘ नहि समानाध्वनोः परस्मिन् फलवति ज्ञाते पूर्वस्यापि फलवत्ता ज्ञायते ’ इति वर्णितमेतत् । **वा.** १।३।८।२४ पृ. २५७, * किमेतदेवास्य फलमिति ? (पुरोडाशस्य कपालेषु ‘ उरु ते यज्ञपतिः प्रथताम् ’ इत्यत्र) नेत्याह । स्तुत्यर्थमेव तत् – द्रव्यसंस्कारकर्मसु **इति न्यायात् ।** १।२।४।३५ पृ. १५३. * गर्गत्रिरात्रब्राह्मणे ‘ शोभतेऽस्य मुखं य एवं वेद ’ इति नैष विधिः, द्रव्यसंस्कारकर्मसु इति चिन्तयिष्यति एतदुपरिष्टात् । **भा.** १।२।१।३, * न च तस्य (वेदस्य) अध्ययनमात्रात् तत्रभवन्तो याज्ञिकाः फलं समाननन्ति । यदपि च समामनन्तीव तत्रापि द्रव्य. ... स्यात् इति अर्थवादतां वक्ष्यति । १।१।१।१ पृ. ६, * द्रव्यसंस्कारकर्मसु फलश्रुतिः अर्थवादः अयं न्यायः पर्णमयीन्यायः इत्यत्र । ४।३।१।१–३.

⧗ **द्रव्यसंस्कारन्यायः** । बर्हिर्न्यायः । दर्शपूर्णमासयोः बर्हिर्धर्मा वेदिधर्माश्च अङ्गप्रधानोभयार्थाः ॥

द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम् । ३।८।१५।३१॥

भाष्यम्— दर्शपूर्णमासयोः बर्हिर्धर्मा वेदिधर्माश्च । तेषु संदेहः किमङ्गप्रधानार्थाः, उत प्रधानार्थाः इति । प्रकरणात् प्रधानार्थाः । इति प्राप्ते । उच्यते । नैवम् । द्रव्यसंस्कारः अङ्गप्रधानार्थः यथा व्याख्यातमेव । उत्तरविवक्षया प्राप्तिरेषा क्रियते इति ।

वा— गतः समाख्याविरोधाविरोधविषयः । सर्वश्च श्रुत्यादिविरोधाविरोधविचारः प्रकृताविव विकृतिष्वपि द्रष्टव्यः । यत्तु धर्माणां सामानविध्यं अङ्गप्रधानेषु पूर्वोक्तम् (३।७।१।१–५), तत् विकृतिषु कथमिति विचारे प्राप्ते सूत्रमेतत् । शक्यं तु पूर्वपक्षेऽपि एतत् समर्थयितुम्,

यस्मात् प्रकृतौ बर्हिरादिसंस्कारः सर्वकर्मणाम् । तस्मात् विकृतावपि तथैव स्यादिति ।

शा — बर्हिर्धर्माणां अङ्गप्रधानार्थत्वं उत्तरविवक्षया प्राप्यते । (अथवापक्षेण इदमादिसूत्रद्वयम् ‘ यूपावटस्तरणबर्हिर्न्यायः ’ इत्यत्र व्याख्यातं द्रष्टव्यम्) ।

वि-- ‘ यूपावटस्तरणबर्हिर्न्यायः ’ इत्यत्र निवेशितः । यद्यपि ‘ द्रव्यसंस्कारस्य अङ्गप्रधानार्थता ’ इत्येव अधिकरणशीर्षकमुपन्यस्तं विस्तरपुस्तके, तथापि ग्रन्थकारेण यूपावटबर्हिर्विषये एव अधिकरणं व्याख्यातम् ।

भाट्टदीपिकाऽपि यूपावटस्तरणबर्हिर्न्यायः इत्यत्रैव निवेशिता, तादर्थ्यात् ।

मण्डन— ‘ साङ्गप्रयोगाय घृतादिधर्माः । ’ १७.

शंकर— ‘ बर्हिर्धर्मोऽङ्गाङ्गिनोः स्यात् । ’ १९.

*** द्रव्यसंस्कारविरोधे** द्रव्यं तदर्थत्वात् इत्यधिकरणं भाष्यीयं द्रव्यसंस्कारविरोधाधिकरणे द्रष्टव्यम् । **के.**

⧗ द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् । ६।३। १८।३८॥

पशुकर्मणि यूपार्थं महत् कदरद्रव्यं तक्षणादिसंस्कारक्षमं लब्धम् । खदिरद्रव्यमपि लब्धम्, परंतु तत् पशुनियोजनक्षममपि तक्षणादिसंस्कारे अक्षमम् । तत्र द्रव्यसंस्कारयोर्विरोधः प्राप्तः । एवं द्रव्यसंस्कारविरोधे सति द्रव्यं ग्राह्यम् । द्रव्यादरः कर्तव्यो न संस्कारादरः । तदर्थत्वात् संस्काराणां द्रव्यार्थत्वात् । संस्कारा हि द्रव्यं कर्मयोग्यं कुवन्ति । तस्मात् उक्ते स्थले संस्काराक्षममपि पशुनियोजनक्षमं खदिरद्रव्यमेव स्वीकार्यं इति सिद्धान्तः । **के.**

* द्रव्यसंस्कारविरोधे द्रव्यं प्रबलम् । संस्कारसहात् प्रतिनिधेः संस्कारासहोऽपि प्रयोजनसमर्थश्चेत् मुख्य एव ग्राह्यः । यूपे खदिरः मुख्यः, कदरः प्रतिनिधिः । **के.** ६।३।१८।३८. * द्रव्यसंस्कारविरोधे द्रव्यस्यैव उपादानम् । **भा.** ६।३।१८।३८.

⧗ द्रव्यसंस्कारविरोधाधिकरणम् । द्रव्यसंस्कारयोर्विरोधे द्रव्यस्यैवोपादानम् ॥

द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् । ६।३। १८।३८॥

भाष्यम्— प्रवृत्ते पशुकर्मणि यूपकाले अस्ति महत् कदरद्रव्यं तक्षणादिसंस्कारक्षमम् (कदरः खदिरे सिते इत्यमरः) । अस्ति खदिरद्रव्यं अनेवंजातीयकम् । तत्र किमुपादेयमिति । संस्काराः न परिलोप्स्यन्ते इति कदरः उपादीयेतेति । एवं प्राप्ते, ब्रूमः । द्रव्यसंस्कारविरोधे द्रव्यं प्रति आद्रियेरन्, न संस्कारान् । कुतः ? तदर्थत्वात् । संस्काराः हि द्रव्यं कर्मयोग्यं कुर्वन्ति । तत्र संस्कारपरिलोपे द्रव्यमपि तावत् गृह्यते । द्रव्याभावे न द्रव्यम्, न संस्काराः । द्रव्यं तेषां द्वारम्, वचनप्रामाण्यात् । तदभावे नष्टद्वारा नापूर्वं गच्छेयुः । तस्मात् खदिरमुपाददीरन्निति ।

शा— ‘ **द्रव्यार्थो एव संस्कारास्तेषां नान्यत् प्रयोजनम् । तद्वशेन ततो द्रव्यपरित्यागो न युज्यते ॥ ततः संस्कारहीनेऽपि खदिरे स्यान्नियोजनम् । तक्षणादीनि लुप्येरन् प्रधानेन विरोधतः ॥** ’ १९.

सोम— पूर्वत्र गुणाननुरोधेऽपि इह तदनुरोधः इति प्रत्यवस्थानात् संगतिः । सूत्रे तदर्थत्वात् संस्काराणां द्रव्यार्थत्वादित्यर्थः ।

वि-- ‘ अमुख्यमुख्ये संस्कारयोग्यायोग्ये तदा नु किम् ।, आद्यो बहुगुणालोपा, न्न मुख्यायास्तु (य अ) लोपनम् ॥ ’ १९.

भाट्ट— यदा नियोजनादिकार्यमात्रयोग्यो मुख्यः तक्षणादिसकलसंस्कारयोग्यस्तु प्रतिनिधिस्तदा मुख्यस्यैवोपादानम् । संस्काराणां तु ‘ गुणलोपे च मुख्यस्य ’ इति न्यायेन लोपेऽपि न दोषः । न च अन्यत्र तथात्वेऽपि यूपस्य दृष्टादृष्टसंस्कारसमूहरूपत्वान्न संस्काराणां काष्ठाङ्गत्वमिति वाच्यम् । लाघवेन सकलसंस्कारजन्यपरमापूर्वविशिष्टकाष्ठस्यैव यूपपदार्थत्वात् । अत एव ‘ यूपं तक्षति ’ इत्यादौ काष्ठस्यैव संस्कार्यत्वान्न काऽप्यनुपपत्तिः । यत्र तु प्रधानभूतनियोजनासमर्थमेव मुख्यं तत्र तदनादरेण प्रतिनिधिनैव कार्यसंपादनं द्रष्टव्यम् । १५.

मण्डन-- ‘ ग्राह्यं न्यूनमपि श्रुतम् । ’

शंकर-- ‘ संस्कारयोग्यं मुख्यं स्यात् । ’ १९.
[संस्कारायोगि (अपि) मुख्यं स्यात् इति पाठस्तु आवश्यकः ।]

***‘ अर्थद्रव्यविरोधे** अर्थः० । (सूत्रं) **भाष्यम्**-- अर्थद्रव्यविरोधे अर्थं प्रति आदर्तव्यम् । इति । **के.**-अर्थः

प्रयोजनम् । द्रव्यं खदिरादि मुख्यम् । मुख्यग्रहणे अर्थासंभवे कदरादिः अमुख्य एव ग्राह्यः । ६।३।१९।३९.

* **द्वंद्वः** समासः । एतद्विषये भूयान् ग्रन्थः द्याधानाधिकरणे ६।१।५।२२–२३ भाष्ये टुप्टीकायां च द्रष्टव्यः। **के.** * द्वंद्वः सर्वः विभाषया एकवद् भवति । **टुप्.** * युगपदधिकरणे **द्वंद्वः** । तेन पदद्वयमपि लक्षणावृत्ति स्यात् । **शा.** । अधिकरणं द्रव्यं अभिधेयमिति यावत् । तस्य युगपदभिधाने द्वंद्व इत्यर्थः । तथाच ‘ एकेन पदेन अर्थद्वयप्रतिपादने द्वंद्वः ’ इति कात्यायनोक्तेः द्वंद्वे पदद्वयलक्षणा स्यादित्यर्थः । **सोम.** ६।६।१.

* **द्वंद्वानि** द्वादश दर्शपूर्णमासयोः आध्वर्यवं कर्म , न याजमानम् । **भा.** ३।८।९।१९-२०.

* यो हि **द्वंद्वस्य** धर्मः इतरेतरयोगो नाम , स एकशेषस्यापि । इयांस्तु विशेषः एकत्र शब्दश्चार्थश्च द्वावपि भिन्नौ , इतरत्रार्थो भिन्नः शब्द एक एव । **टुप्.** ६।१।५।२२. पृ. १३६६. * **द्वंद्वे** च स्वार्थाभिधानात् । (बहुव्रीहौ तु परार्थाभिधानम्) । **भा.** १०।६।३।४. * द्वंद्वे यथा ‘ धवखदिरावानय ’ इत्यादौ इतरेतरयुक्तमर्थद्वयं क्रियान्वयि गम्यते , तथा ‘ घटावानय ’ इत्यादौ एकशेषे इतरेतरयुक्तमेवार्थद्वयं गम्यते । **रत्न.** ६।१।५।२२.

* **द्वंद्वान्ते** श्रूयमाणं पदं प्रत्येकं संबध्यते इति प्रवादः , यत्र उद्देश्यत्वेन साहित्याविवक्षा तत्रैव । **भाट्ट.** ३।१।१५.

* **द्वंद्वापवादत्वाच्च** एकशेषस्य । **भा.** ६।१।५।२२ पृ. १३६६.

* **द्वंद्वतत्पुरुषयोः** उत्तरपदे नित्यसमासवचनम् (पा० २।१।५१ सूत्रे वार्तिकम्) वाक्त्वचप्रियः, पञ्चगवधनः, दशगवधनः इति । **टुप्.** १०।६।३।४.

* **द्वंद्वता** (द्वादशानां द्वंद्वानाम्) च समभ्यासक्रिया । **भा.** ३।८।९।२० । समासन्नकरणं हि द्वंद्वता । **वा.**

* **द्वंद्वभाविनोः** प्राधान्यात् सत्यामपेक्षायां भवति समासः । **भा.** १०।६।४।८.

* **द्वंद्वविचारः** ‘ समासवादः ’ इति बिन्दौ मणिग्रन्थे द्रष्टव्यः । **के.**

* युगपदधिकरणवचनतायां द्वंद्वस्मृतेः यत्र द्वौ बहवो वा युगपदभिधातुं इष्यन्ते तत्र **द्वंद्वसमासो** भवति । **टुप्.** ६।१।६।२५ पृ. १३७२. * इतरेतरयोगे चार्थे (**द्वंद्व-**)**समास**विधानात् । **भा.** ६।१।५।२२ पृ. १३६६, * युगपदधिकरणवचनतायां **द्वंद्वस्मृतेः** द्विवचनबहुवचनोपपत्तेश्च प्रमित्रयोर्वरुणयोः इति च दर्शनात् । यथैव खदिरौ च धवौ चेति निदर्शनं क्रियते । ६।१।५।२२ पृ. १३६६.

* **द्वादश** एव दीक्षा द्वादशाहे । **टुप्.** ६।५।९।२९. * द्वादश द्वंद्वानि दर्शपूर्णमासयोः आध्वर्यवं कर्म , न याजमानम् । **भा.** ३।८।९।१९–२०. * द्वादश द्वंद्वानि दर्शपूर्णमासयोर्याजमानकाण्डे उक्तानि १ वत्सोपावसर्जनं च उखाधिश्रयणं च , २ अधिवापश्च कपालोपधानं च , ३ अवहननं च दृषत्समाहननं च , ४ पुरोडाशाधिश्रयणं च आज्याधिश्रयणं च , ५ स्तम्बयजुर्हरणं च अभिग्रहणं च , ६ वेदिपरिग्रहश्च पत्नीसंनहनं च , ७ प्रोक्षण्यासादनं च आज्यासादनं च, ८ स्फ्यश्च कपालानि च, ९ अग्निहोत्रहवणी च शूर्पं च , १० कृष्णाजिनं च शम्या च , ११ उलूखलं च मुसलं च , १२ दृषच्चोपला च इति । **वि.** ३।८।१०. * ‘ द्वादश द्वादशानि जुहोति ’ अत्र ‘ १२ × १२ = १४४ ’ होमा भवन्ति इति कर्मभेदः संख्यया । तत्र ‘ अग्नाविष्णू सजोषसा ’ (तैसं. ४।७।१) इत्याद्याः १३५ मन्त्राः ‘ कूयवाश्चमे ’ इत्यस्य चावृत्त्या संख्यापूरणं इति बौधायनीयाः । **सोम.** २।२।७ पृ. १४२. * द्वादश यागाः (द्वादशाहे) सह फलेन चोदितत्वात् सह कर्तव्याः । तेषां अग्नीषोमीयाद्या इतिकर्तव्यता अगृह्यमाणविशेषत्वात् तन्त्रेण कर्तव्या । अवभृथादीन्यपि तन्त्रेणैव । ये संनिपत्योपकारकास्ते आवर्तन्ते । **टुप्.** ९।१।८।३२. * द्वादश स्तोत्राणि अग्निष्टोमस्य । प्रातःसवने बहिष्पवमानमेकम् , आज्यस्तोत्राणि चत्वारि , माध्यंदिने माध्यंदिनपवमानः एकम् , पृष्ठस्तोत्राणि च चत्वारि । तृतीयसवने आर्भवपवमानः एकम् , यज्ञायज्ञीयसामसाध्यं अग्निष्टोमस्तोत्रं द्वितीयम् । संकलने द्वादश स्तोत्राणि अग्निष्टोमे । अधिकैस्त्रिभिः उक्थ्यस्तोत्रैः उक्थ्यः संतिष्ठते । षोडशेन स्तोत्रेण समाप्य-

मानस्तु षोडशी । अतिरात्रस्तोत्रेण अतिरात्रः संतिष्ठते । **वि.** ८।३।५.

* **द्वादशः अध्यायः** तन्त्रावापेन शेषेयत्तायां प्राप्तायां तदपवादत्वेन आरभ्यते । अन्यादृशी इयत्ता प्रसङ्गेन भवति । **टुप्.** ७।१।१।१ पृ. १५२४.

* **द्वादशाध्यायार्थः** । ‘ प्रसङ्गस्तन्त्रनिर्णीतिः समुच्चयविकल्पने । द्वादशाध्यायपादार्थाः (इति पादार्थसंग्रहः) ॥’ **प्रथमे** पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः । सौमिकवेदेः उत्तरकालीनकर्मसु प्रसङ्गः इत्यादिर्विचारः । **द्वितीये** सवनीयपशोस्तन्त्रित्वम्, न तु सवनीयपुरोडाशानाम् । विकृतिस्तन्त्रिणी, न प्रकृतिः । अन्वारम्भणीया विकृतिष्वपि स्यात्, न तु प्रकृतावेव । इत्यादिर्विचारः । **तृतीये** त्वग्वाससोः समुच्चयः । आघारगतानां ऋजुत्वसंततत्वादीनां समुच्चयः । इत्यादिकं प्राधान्येन, यवव्रीह्योर्विकल्पः इत्यादिकं समुच्चयापवादत्वेन इत्युभयं चिन्तितम् । **चतुर्थे** च ऐन्द्राग्नार्हस्पत्ययाज्याऽनुवाक्यायुगलयोर्विकल्पः इत्यादिकं प्राधान्येन, याज्याऽनुवाक्ययोः समुच्चयः इत्यादिकं विकल्पापवादत्वेन इत्युभयं चिन्तितम् । **वि.** प्रस्तावना श्लो. २४.

* **द्वादशाध्यायार्थनिरूपणम्** । एवं तन्त्रावापस्वरूपे प्रयोगपरिमाणे चिन्तिते तत्परिमाणमेव प्रसङ्गरूपं द्वादशे चिन्त्यते । प्रयोगपरिमाणत्वाविशेषेऽपि तन्त्रप्रसङ्गप्रयोजकानां भाष्यकारेण विशेषोऽभिहितः ‘ साधारणं भवेत् तन्त्रं परार्थे त्वप्रयोजकः । एवमेव प्रसङ्गः स्याद् विद्यमाने स्वके विधौ ॥ ’ इति । यत् अनेकोद्देशेन अनुष्ठीयते तत् **तन्त्रम्** । यत्तु अन्यार्थमनुष्ठितं तदनुनिष्पन्नं वा अन्यस्य साधनं भवति प्रतिपाद्यं वा, तत्र **अप्रयोजकत्वम्** । यथा पुरोडाशकपालं तुषोपवापस्य, यथा च पदं अक्षाञ्जनस्य, वाजिनं वाजिनयागस्य शकृल्लोहिते च निरसनस्य । तत्र अविद्यमानमपि कपालादि तुषोपवापादिना न प्रयोक्तुं शक्यते, इति अप्रयोजकत्वम् । यत्र तु उभयत्रापि अन्योन्यनैरपेक्ष्येण अङ्गविनियोगे सत्यपि एकार्थानुष्ठितैरेव अङ्गैः अन्यस्यापि उपकारसंपत्तेः अन्यस्य प्रयोजकत्वक्षमस्यापि तल्लोपः (तच्छब्दो व्यर्थः) यथा पश्वर्थानुष्ठितैरेव प्रयाजादिभिः उपकारसंपत्तेः पशुपुरोडाशः पशुसंबन्धानादरेणैव स्वार्थतया अतिदेशेन विनियुक्तान्यपि प्रयाजादीनि न पृथक् अनुष्ठापयति, तत्र प्रसङ्गः । अत्र च अन्यार्थालाभे स्वयमपि प्रयोजकं भवति । अत एव च आज्यभागौ पशौ अविद्यमानौ पशुपुरोडाशेन अनुष्ठाप्येते ।

आह । **यदि** पश्वर्थानुष्ठिता एव प्रयाजादयः पशुपुरोडाशस्योपकुर्वन्ति, न तु तदर्थमनुष्ठीयन्ते– **‘ कथं तर्हि तदङ्गत्वम्, तादर्थ्यं ह्यङ्गतेष्यते । उद्देशेन च तादर्थ्यं नोपकारा, न्न चात्र सः ॥ ’** ३३ ॥ यदुद्देशेन यत् अनुष्ठीयते, तत् तदर्थम्, तदेव च अङ्गमुच्यते, न तु उपकारकमात्रम् । न च प्रयाजादयः पशुपुरोडाशोद्देशेन अनुष्ठीयन्ते, इति कथं तदङ्गत्वम् ? ।

ननु एवं सति तुषोपवापाङ्गत्वं वा **‘ पुरोडाशप्रयुक्तस्य कपालस्य कथं भवेत् । व्यापार्यते तुषाणां तदुपवापप्रसिद्धये ॥ ’** ३४ ॥ यद्यपि पुरोडाशप्रयुक्तमेव कपालस्वरूपम्, तथापि तुषोपवापसिद्धौ व्यापार्यते एव, इति युक्तमेव परोद्देशप्रवृत्तव्यापारगोचरत्वलक्षणं शेषत्वम् । प्रयाजादयस्तु न कथञ्चिदपि पशुपुरोडाशोद्देशप्रवृत्तपुरुषप्रयत्नगोचराः, इति न तच्छेषत्वमेषां संभवतीति । **‘ उच्यते, न प्रयाजानां पुरोडाशेऽस्ति शेषता । तद्योग्यत्वेन तेषां तु तदङ्गत्वं प्रतीयते ॥ ’** ३५ ॥ यथैव अदहत्यपि वह्नौ दाहकत्वव्यपदेशः, तथैव प्रयाजादिष्वपि पशुपुरोडाशार्थमनुष्ठीयमानेष्वपि तद्योग्यतया तदङ्गत्वव्यपदेशः । शक्नोत्येव पुरोडाशःताननुष्ठापयितुम्, अन्यतस्तु सिद्धत्वात् नानुष्ठापयति, तेन अन्यशेषभूतेष्वपि योग्यतया शेषत्वव्यवहारः । अन्ये तु ‘ योग्यतैव शेषत्वम्, अतः पुरोडाशेऽपि प्रयाजादीनां मुख्यमेव तदस्ति ’ इति वर्णयन्ति । तथा वा अस्तु । सर्वथा तावत् उपपन्नः शेषत्वव्यवहारः, इति सर्वं समञ्जसम् ।

तदेवं संक्षेपार्थः । भावना तावत् स्वशब्देन प्रथममभिधीयते, तस्याश्च विधिना समानाभिधानेन अन्वयः प्रतीयमानोऽपि अयोग्यतया न द्रागेव निष्पद्यते । इयं चावस्था ‘ विधिप्रक्रमः ’ इत्युच्यते । विधिप्रक्रमाच्च तदा एवं ज्ञायते ‘ यादृशैरंशैः पूर्णेयं विधानमर्हति, तादृशैः

पूरयितव्या ’ इति । ततः किमस्याः भाव्यं इत्यपेक्षायां समानपदोपात्तमपि धात्वर्थे अयोग्यत्वादुल्लङ्घ्य पदान्तरोपात्तं स्वर्गादि स्वीक्रियते । तच्च षष्ठाद्ये व्युत्पादितम् । तदभावे च अर्थवादस्थम् , तदभावे च अध्याह्रियते । तच्च रात्रिसत्राधिकरणे विश्वजिदधिकरणे च (क्रमेण) प्रतिपादितम् । ततः करणापेक्षायां समानपदोपात्तो धात्वर्थः एव करणतया अन्वीयते इति भावार्थाधिकरणार्थः । तस्य च करणत्वं क्षणिकस्य कालान्तरभावि फलं प्रति साक्षात् न संभवति इति स्थिरद्वारापेक्षायां देवताऽऽराधनकर्तृसंस्कारयोः देवताऽधिकरणे , कर्मण्यारम्भभाव्यत्वात् (११।१।४।२०) इत्यत्र च निराकृते तद्द्वारत्वे अपूर्वमेव आश्रयितव्यम्, इति तच्छब्दमध्याहृत्य यागेनापूर्वं कृत्वा स्वर्गं भावयेत् इति , अपूर्वेतिकर्तव्यतायुक्तो यागो ज्वालोपेतकाष्ठादिवत् पाकमिव फलं प्रति करणतया विनियुज्यते इति अपूर्वाधिकरणेनोक्ते ‘ कथमनेन अपूर्वं कर्तव्यम् ’ इति पुनः इतिकर्तव्यताऽऽकाङ्क्षा काष्ठादीनामिव ज्वालासिद्ध्यर्थं जायते । तत्र षड्विधेन उपदेशेन , त्रिविधेन चातिदेशेन , स्मृत्याचाराभ्याम् , श्रुत्यर्थादिभिश्च यथायथं तेन द्वारेण समर्पितं जाति–द्रव्य–गुण–क्रिया–क्रमात्मकमङ्गजातं इत्थंभावेन शुष्कत्वादिवत् (ज्वालाऽर्थे काष्ठे शुष्कत्वं यथा तद्वत्) स्वीक्रियते । अत एव प्रधानं फलप्रयुक्तम् । तथा प्रकल्पिते अपूर्वे दीक्षणीयादिवत् अकल्पिते चावान्तरापूर्वे प्रधानापूर्वं फलं प्रति विनियुज्यते । तेन दीक्षणीयेव परमापूर्वप्रयुक्ता , फलप्रयुक्तमेव प्रधानम् । अङ्गं तु कल्पिते अपूर्वे तदङ्गत्वेन दीक्षणीयाङ्गवाङ्नियमवत् अवान्तरापूर्वाङ्गत्वेन विनियुज्यमाने तद्वदेव अवान्तरापूर्वप्रयुक्तम् , न परमापूर्वप्रयुक्तमिति वेदितव्यम् । ततः सर्वविशेषणविशिष्टभावनाऽनुष्ठानं प्रयोजकत्वाप्रयोजकत्वतन्त्रावापप्रसङ्गतदपवादावगतपरिमाणं श्रुत्यर्थाद्यवगतक्रमसहितं फलार्थिनं सकलाङ्गानुष्ठानक्षमं काम्येषु । नित्यनैमित्तिकेषु तु किञ्चिदङ्गानुष्ठानाशक्तमपि पुरुषं प्रति विधिर्विधत्ते इति । एतत् सर्वं वाक्यार्थसंग्रहरूपेण वार्तिकेन ‘ भावनावचनस्तावत् तां स्मारयति लोकवत् ’ इत्यादिना (वाक्याधिकरणे २४८) ‘ तस्मात् प्रक्रान्तरूपोऽपि विधिस्तावत् प्रतीक्षते । यावद् योग्यत्वमापन्ना भावनाऽन्यानपेक्षिणी ॥ ’ इत्येवमन्तेन (२७६) दर्शितमिति वेदितव्यम् । **न्यायरत्नमाला.**

* **द्वादशोपसत्ता** अहीनस्य धर्मः, न ज्योतिष्टोमस्य । **वि.** ३।३।८.

* **द्वादशोपसत्ताऽधिकरणम्** । अहीनाधिकरणन्यायः । **भा.** ३।३।८।१४–१५.

* **द्वादशोपसत्त्वं** द्वादशाहिकं धर्मं गवामयने दर्शयति ‘ द्वाभ्यां लोमावद्यति० ’ इति । **भा.** ८।१।१०।१७.

* **द्वादशकपालः** अंशी अष्टाकपालादिभिरंशैः स्तूयते ‘ वैश्वानरं द्वादशकपालं निर्वपेत् ’ इत्यत्र । **वि.** १।४।१२. * द्वादशकपालः तृतीयसवने सवनीयपुरोडाशः । **भा.** १०।५।२६।८८. * **द्वादशकपाले** अष्टाकपालादीनामर्थवादता (जातेष्टौ) । **वि.** १।४।१२, * **द्वादशकपालशब्दः** न संख्यापरः किन्तु पुरोडाशद्रव्यपरः, द्वादशसु कपालेषु संस्कृत इति व्युत्पत्तेः । एवमष्टाकपालादिशब्दा अपि । १।४।१२.

* **द्वादशदीक्षानियमो** ज्योतिष्टोमस्य (भाष्यमते) । **भा.** ६।५।८।२८–२९.

* **द्वादशप्रथमप्रथमस्थो न्यायः** (१२।१।१।१–६) ‘ न कृतस्य गुणानुग्रहार्थं आवृत्तिरस्ति ’ इति । **भा.** १२।२।५।१५.

* **द्वादशमानं** हिरण्यं दक्षिणा श्येनीयदीक्षणीयायाम् । **भा.** ८।१।९।१६.

* **द्वादशलक्षण्या** धर्मो व्युत्पाद्यः । **वि.** प्रस्तावना श्लो. ११.

* **द्वादशशत–(११२)गोरूपा** दक्षिणा अध्वर्युवेदे उद्गातृवेदे च समाम्नाता । वि. ३।८।१. * **द्वादशशतदक्षिणायाः** विभागः अध्वर्य्वादिसमाख्याऽनुरोधेन ज्योतिष्टोमे । **भा.** १०।३।१३।५३–५५.

* **द्वादशशतन्यूनधनस्य** विश्वजिति नाधिकारः । **भा.** ६।७।९।१८–२०.

* **द्वादशशतसंख्यामात्रस्य** नित्यप्रयोगीयगोगतस्य ज्योतिष्टोमे नैमित्तिकैकादिगोदक्षिणया बाधः । **भा.** १०।३।१५।५९–६२.

* **द्वादशसंख्यायां** अष्टत्वादयः संख्याविशेषा अविभक्ताः सन्ति । भा. १।४।११।२०.

* **द्वादशाहः** अहर्गणानां प्रकृतिः । भा. ८।१।१०। १७, * द्वादशाहः इति द्वादश एतानि कर्माणि अहोभिः परिमितानि एकत्र समाहृतानि इति अनेन रूपेण तत् कर्मगणस्य नामधेयं न वर्णानुपूर्व्यमात्रेणेति । द्वादशाह इति अर्थान्वयेन नामधेयं नार्थाभावेन । १०।६।१३।४१. * द्वादशाहः ज्योतिष्टोमस्य विकृतिः अव्यक्तलिङ्गत्वात् इति तद्धर्मातिदेशः । वि. ६।५।९, ८।१।९, * द्वादशाहः द्विविधः अहीनरूपः सत्ररूपश्च । 'द्वादशाहेन प्रजाकामं याजयेत्' इति यजतिचोदना, यजमानबहुत्वनियमाभावः, ऋत्विग्यजमानभेदश्च अहीनलिङ्गम् । अहीनाः यजतिचोदनाः भवन्ति । 'द्वादशाहमृद्धिकामा उपेयुः' 'द्वादशाहमृद्धिकामा आसीरन्' इति चोदनाद्वयम्, यजमानबहुत्वनियमः, ऋत्विग्यजमानैक्यं च सत्रलिङ्गम् । सत्राणि आसनचोदनानि उपायिचोदनानि च भवन्ति । ८।२।५. * द्वादशाहः द्विविधः व्यूढः समूढश्च, तत्र व्यूढः समूढविकारः । भा. १०।५।२४।७९–८०. * द्वादशाहः द्विविधः समूढो व्यूढश्च । त्र्यनीकाभेदाच्च तयोर्भेदः । वि. १०।५।२४. * द्वादशाहः । प्रकृतौ चानेनाहःशब्देन उपांश्वादिहारियोजनपर्यन्तो यागः परिच्छिन्नः । इहाप्येवं द्रष्टव्यम् । द्वादश यागाः सह फलेन चोदितत्वात् सह कर्तव्याः । तेषामग्नीषोमीयाद्या इतिकर्तव्यता अगृह्यमाणविशेषत्वात् तन्त्रेण कर्तव्या । अवभृथादीन्यपि तन्त्रेणैव । ये संनिपत्योपकारकास्ते आवर्तन्ते । टुप्. ९।१।९।३२.

द्वादशाहो व्यूढः समूढस्य विकारः ॥

द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत् समानविधानं स्यात् । १०।५।२४।७९॥

भाष्यम्— द्विविधो द्वादशाहः व्यूढः समूढश्च । समूढस्तावत् 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्' इति । अथ व्यूढः 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, अथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे' इति । तत्र संदेहः किमुभयप्रकारमपि द्वादशाहं प्रकृत्य धर्मा आम्नाताः, उत समूढं प्रकृत्य आम्नाताः, तद्विकारो व्यूढः इति । किं प्राप्तम् ? द्वादशाहस्य व्यूढसमूढत्वं समानविधानं स्यात् । कुतः ? उभयप्रकारस्य प्रकृतत्वान्न गम्यते विशेषः, कस्य धर्माः कस्य नेति । तस्मात् समानविधानौ । पृष्ठवत् । यथा बृहद्रथंतरे पृष्ठे प्रकरणस्य तुल्यत्वात् समानधर्मणी, एवं व्यूढसमूढं स्यादिति ।

व्यूढो वा लिङ्गदर्शनात्, समूढविकारः । ८० ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । न व्यूढसमूढौ समानविधानौ । किन्तु व्यूढः समूढविकारः स्यात् । कुतः ? लिङ्गदर्शनात् । लिङ्गमिदं भवति, 'ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः' इति व्यूढे श्रूयते । न च व्यूढे चतुर्थेऽहनि ऐन्द्रवायवाग्रता । का तर्हि ? आग्रयणाग्रता । तत्र ऐन्द्रवायवस्य वा एतदायतनमिति वचनं नावकल्पते । यदि व्यूढः समूढविकारः ततः प्रकृतिमपेक्ष्योपपद्यते वादः । ऐन्द्रवायवस्यैतदायतनं प्राप्तम् । तत्र आग्रयणस्योच्यते इति । तस्माल्लिङ्गदर्शनात् व्यूढः समूढविकारः इति ।

कामसंयोगात् । ८१ ॥

भाष्यम्— 'यः कामयेत बहु स्यां प्रजायेयेति' । काम्यो वा नैमित्तिको वा नित्यमर्थं विकृत्य निविशते । यथा अक्ष्यामये मुद्गौदनभोजनं निवातशय्या चेति ।

तस्योभयथा प्रवृत्तिरैककर्म्यात् । ८२ ॥

भाष्यम्— इदं प्रयोजनसूत्रम् । तस्योभयप्रकारस्य अहर्गणेषु प्रवृत्तिरविशेषेण । ऐककर्म्यात् यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः, यत्र वचनं लिङ्गं च, तत्र व्यूढः प्रवर्तते । अन्यत्र अविशेषेण समूढः इति ।

सोम— पूर्वत्र अनैमित्तिकत्वे विधानं 'अपिवाऽहर्गणेष्वग्निवत् समानविधानं स्यात्' इति सूत्रे समानविधानत्वेन व्यवहृतम् । एवं च पूर्ववत् इहापि व्यूढसमूढयोः समानविधानत्वं इत्युत्थानात् संगतिः ।

द्वादशाहविकारेषु व्यूढस्य अप्रवृत्तिः इति **प्रयोजनम्** ।

सूत्रार्थस्तु— द्वादशाहस्य व्यूढत्वं समूढत्वं च रथंतरबृहत्पृष्ठवत् समानविधानं स्यादिति ।

वि— ‘ व्यूढोऽपि प्रकृतिः किंवा विकृतिः स्याद्धि, पृष्ठवत् । विधिसाम्यादादिमो, ऽन्त्यो लिङ्गात् कामे विधेरपि ॥ ’

भाट्ट— पूर्वोक्ताग्रतासमूहविशेषः समूढपदार्थः । तं विधाय ‘अथ व्यूढः ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नां ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, अथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे’ इत्यनेन व्यूढात्मकः अग्रतासमूहविशेषो विहितः । अत्र च अग्रतासमूहविशेषवाचकयोरपि समूढव्यूढपदयोर्द्वादशाहेऽपि प्रयोगः तद्वत्त्वात् उक्थ्याग्निष्टोमवल्लाक्षणिकः । तत्र समूढस्य तावत् फलाश्रवणात् प्रकरणात् क्रत्वङ्गत्वं निर्विवादमेव । व्यूढस्य तु ‘ यः कामयेत बहु स्यां प्रजायेयेति, स व्यूढेन यजेत ’ इति वचनेन द्वादशाहाश्रितव्यूढप्रकारस्य फलोद्देशेन विधानात् काम्यत्वम् । अत्र च आश्रयस्य अनेककर्तृकत्वेऽपि एककामनयाऽपि गुणानुष्ठानं भवतीति सूचयितुमेकवचनम् । अहीनाभिप्रायं वा तत् । व्यूढस्य च क्रत्वर्थत्वमपि अस्ति न वेति चिन्तायाम्, इन्द्रियकामवाक्येन दध्नः पुरुषार्थत्वेऽपि ‘ दध्ना जुहोति ’ इत्यनेन तस्य क्रत्वर्थत्ववत् व्यूढस्य कामवाक्येन पुरुषार्थत्वेऽपि क्रत्वर्थत्वस्यापि निरुक्तवाक्येन उपपत्तेः संयोगपृथक्त्वन्यायेन उभयार्थत्वम् । इति प्राप्ते, दध्नः स्वरूपेण दधिपदवाच्यत्वेन च लोकावगततया इन्द्रियकामवाक्यमात्रेण तस्य पुरुषार्थत्वावगतेः अनन्यार्थकेन ‘दध्ना जुहोति ’ इत्यनेन युक्तं क्रत्वर्थत्वम् । प्रकृते तु व्यूढस्वरूपस्य तत्पदवाच्यत्वस्य च अन्यतः अनवगतेः निरुक्तवाक्यस्य तद्बोधकत्वेन उक्थ्यादिस्वरूपबोधकवाक्यवत् अन्यार्थत्वात् न क्रत्वर्थत्वम् । अत्र च अग्रताविशेषस्य ग्रहणाङ्गतया क्रत्वर्थत्वेऽपि तदानुपूर्वीघटितसमूहविशेषस्य व्यूढपदवाच्यस्य पुरुषार्थत्वान्न क्रत्वर्थत्वम् । अतश्च तस्य विकृतौ अप्रयोगः । प्रकृतावपि कामनाभावेन समूढबाधकत्वमिति बाधोपयोगिताऽपि ।

मण्डन-- ‘ व्यूढः समूढस्य भवेद् विकारः । ’ २५.

शंकर— ‘ अनङ्गं व्यूढ इष्यते । ’ २६.

* द्वादशाहः सत्ररूपः सत्राणां प्रकृतिः । **वि.** १०।२।१५. (त्रयोदशरात्रादीनां आसंवत्सरात् यानि सत्राणि, तेषां प्रकृतिर्द्वादशाहः इति सत्याषाढः । १८।२) । * **द्वादशाहेन** प्रजाकामं याजयेत् । **भा.** १०।५।१।१. * ‘ द्वादशाहेन यजेत ’ इति द्वादशानामह्नां सह प्रयोगो विहितः । तत्र दीक्षोपसदादिकं तन्त्रेण क्रियते । **वि.** ९।१।९. * **द्वादशाहात्** त्र्यनीका गवामयने प्राप्ता । तत्र अर्थप्राप्तोऽभ्यासः । तत्र च स्वस्थानविवृद्धिः न दण्डकलितवत् । अहरधिकारश्च नास्त्येव । **भा.** १०।५।२५। ८३–८७, * **द्वादशाहस्य** अहीनभूतस्य तत्र प्रवृत्तिः, यत्र यजतिः श्रूयते । सत्रभूतस्य च तत्र प्रवृत्तिः, यत्र आसनं उपायिश्च श्रूयते । ८।२।५।२५. * द्वादशाहस्य अहीनरूपस्य विकृतयः द्विरात्रत्रिरात्रादयः । **वि.** १०।५।४. * द्वादशाहस्य आदिमसप्तानामह्नां क्रमेण जनकसप्तरात्रे धर्मातिदेशः । तत्र चाग्रिमचतुरहे त्रिवृत्ता विधीयते । **भा.** ८।३।२।३–५. * द्वादशाहस्य द्वादशसु अहःसु दीक्षाः, द्वादशसूपसदः, द्वादशसु सुत्याः इति षट्त्रिंशता अहोभिः समाप्तिः इति स्वस्थानविवृद्धिः सिद्धान्तः । **वि.** ११।४।५, * द्वादशाहस्य यत् द्वितीयमहः, तत् द्विरात्रस्य प्रथममहः । यत् तृतीयम्, तत् द्वितीयम् । एवं त्रिरात्रादौ ज्ञेयम् । १०।५।४.

⧗ **द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत् समानविधानं स्यात् । १०।५।२४।७९ ॥**

द्वादशाहस्य व्यूढसमूढत्वं व्यूढत्वं समूढत्वं च समानविधानं स्यात् । न तत्र प्रकृतिविकृतिभावः कश्चित् । पृष्ठवत्, यथा बृहद्रथंतरे पृष्ठे प्रकरणस्य तुल्यत्वात् समानधर्मणी तद्वत् । इति पूर्वः पक्षः ।

व्यूढो वा लिङ्गदर्शनात् समूढविकारः स्यात् । ८० ॥

पूर्वपक्षव्यावर्तको वाशब्दः । व्यूढः द्वादशाहः समूढविकारः समूढस्य विकारः स्यात् । लिङ्गदर्शनात् । ‘ ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः’ इति व्यूढे श्रूयते । न च व्यूढे चतुर्थेऽहनि ऐन्द्रवायवाग्रता, किन्तु आग्रयणा-

ग्रता । यदि व्यूढः समूढविकारः स्यात् ततः प्रकृतिमपेक्ष्य उपपद्यते वादः । ऐन्द्रवायवस्य एतदायतनं प्राप्तं तत्र आग्रयणस्य उच्यते इति । तस्मात् व्यूढः समूढस्य विकारः इति सिद्धान्तः ।

कामसंयोगात् । ८१ ॥

व्यूढे द्वादशाहे कामसंयोगः श्रूयते ‘ यः कामयेत बहुः स्यां प्रजायेयेति ’ इति । ततश्च व्यूढः काम्यः । काम्यो वा नैमित्तिको वा नित्यमर्थं विकृत्य निविशते । तस्मात् व्यूढः समूढस्य विकारः । इति सिद्धान्तः ।

तस्योभयथा प्रवृत्तिरैककर्म्यात् । ८२ ॥

इदं प्रयोजनसूत्रम् । तस्य द्वादशाहस्य व्यूढसमूढरूपस्य अहर्गणेषु अविशेषेण प्रवृत्तिः ऐककर्म्यात् एकरूपत्वात् इति पूर्वपक्षे फलम् । सिद्धान्ते तु उभयथा प्रवृत्तिर्भेदेन । यत्र वचनं लिङ्गं वा व्यूढस्य तत्र व्यूढस्य प्रवृत्तिः, अन्यत्र तु अविशेषेण समूढस्य इति । **के.**

* द्वादशाहस्य सत्राहीनात्मकस्य धर्माणामतिदेशः सत्राहीनयोर्व्यवस्थया । **भा.** ८।२।५।२५–२९, द्वादशाहस्य सत्रात्मकस्य धर्माणामतिदेशः पञ्चदशरात्रकुण्डपायिनामयनयोः, सत्रत्वात् । ८।२।६।२९–३२.

⧗ द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च, सत्रशब्दाभिसंयोगात् । १०।६।१६।६० ॥

सत्रस्य लक्षणमुच्यते । आसनोपायिचोदनेन द्वादशाहस्य सत्रत्वम् । आस उपवेशने इति धातुना उपउपसर्गपूर्वकेण इण् गतौ इति धातुना च यस्य चोदनं तत् सत्रम् । यजमानबहुत्वेन च नियतेन सत्रत्वम् । सत्रशब्दाभिसंयोगात् ‘ य एवं विद्वांसः सत्रमासते ’ ‘ य एवं विद्वांसः सत्रमुपयन्ति ’ इति आसधातोः उपायिधातोर्वा सत्रशब्देन अभिसंयोगात् नित्यसंबन्धात् । ‘ चतुर्विंशतिपरमाः सप्तदशावराः सत्रमासीरन् ’ इति यजमानबहुत्वस्य च नित्यसंबन्धात् ।

यजतिचोदनादहीनत्वं स्वामिनां चास्थिसपरिमाणत्वात् । ६१ ॥

अत्र अहीनस्य लक्षणमुच्यते । द्वादशाहस्य द्विरात्रादीनां च यजतिचोदनात् यजधातुना विधानात् अहीनत्वम् । स्वामिनां यजमानाना अस्थितपरिमाणत्वात् अनियतपरिमाणत्वाच्च अहीनत्वम् । द्वौ बहवो वा अहीनेन यजन्ते । एवं च यजतिचोदनत्वे सति यजमानानियतपरिमाणकत्वं अहीनस्य लक्षणम् । अहर्गणसाध्यसुत्याकत्वे सति इत्यपि विशेषणं देयमेव । यजतिचोदनत्वमात्रे लक्षणे ज्योतिष्टोमादौ अतिव्याप्तिः । अहर्गणसाध्यसुत्याकत्वमात्रे तु सत्रे अतिव्याप्तिः इति द्वयोरपि निवेशः, यजमानानियतपरिमाणकत्वं तु स्वरूपकथनं न लक्षणघटकम् । **के.**

* द्वादशाहस्य समूढस्यैव अहर्गणेष्वतिदेशः । **वि.** १०।५।२३, * द्वादशाहस्य समूढस्य विकृतिर्गवामयनं संवत्सरसत्रम् । १०।५।२५, * द्वादशाहस्य स्वरूपम्– १ प्रायणीयोऽतिरात्रः, २–७ पृष्ठ्यः षडहः, ८–१० त्रयः छन्दोमाः, ११ अविवाक्यमहः, १२ उदयनीयोऽतिरात्रः इति द्वादश अहानि इति । ८।२।५. * **द्वादशाहे** अधिका ऐकाहिकेभ्यः केचिद्धर्मा उच्यन्ते ‘ अभिप्लवः अन्वहं भवति, गौरिवीतमन्वहं भवति ’ इति । **भा.** ७।४।३। १३, * द्वादशाहे ‘ अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति ’ इत्यादिः क्रमविधानार्था श्रुतिः । ५।१।१।१ वर्णकं ३. * द्वादशाहे अहर्गणे उत्तमाहात् प्राक् पत्नीसंयाजान्तत्वम् । उत्तमे हारियोजनादि शेषं तन्त्रेण सर्वम् । दशमस्य तु मानसान्तत्वमेव वचनात् । ९।१।९। २९–३२. * द्वादशाहे अहीनात्मके ‘ अन्वहं द्वादशशतं ददाति ’ । अत्र द्वादशगुणितद्वादशशतसंख्या दक्षिणा (१३४४ गावः) । **वि.** १०।६।१८, * द्वादशाहे आत्रेयाय हिरण्यदानं ऋतुयाज्यावरणं च अदृष्टार्थं कर्तव्यम् । १०।२।२६. * द्वादशाहे आद्यस्याह्नो दक्षिणानयनकालादूर्ध्वं विषाणाकण्डूयनमेव स्यात् । **भा.** ११। ३।६।१४, * द्वादशाहे उपसत्कालीनं सुब्रह्मण्याह्वानं तन्त्रम् । ११।३।१०।२१.

⧗ द्वादशाहे उपसत्कालीनसुब्रह्मण्याह्वाने विवृद्धसुत्याहानुपलक्षणम् ॥

सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणम्, प्रकृत्यन्वयादावाहनवत् । ११।४।७।३०॥

भाष्यम्— उपसत्कालं सुब्रह्मण्याह्वानम् ‘ चतुरहे सुत्यामागच्छ मघवन् ’ इति द्वादशाहे चोदकेन प्राप्यते ।

तत्रेदं विचार्यते द्वादशाहे सुत्याहानि उपलक्षयितव्यानि, उताविकारेणैव प्रयोगः कर्तव्य इति । किं प्राप्तम् ? सुत्याविवृद्धौ एतस्यां सर्वेषामह्नां उपलक्षणं कर्तव्यम् । कुतः ? प्रकृत्यन्वयात् । प्रकृतौ सौत्यमहः उपलक्षितम् । सर्वाणि चैतानि तत्प्रकृतीनि । अतः सर्वाण्युपलक्षणीयानि । ननु एकैवासौ देवता इन्द्रः सकृदुपलक्षणेन संस्कृतः संस्कृत एव । तस्य पुनरुपलक्षणमनर्थकमिति । उच्यते । अद्योपलक्षणकृतः (आद्योप इति तु आनन्दाश्रमीयादौ पाठः । अद्योप इति तु बिवलकरीये । स एव च शुद्धः । अद्यशब्दबोध्यस्य उपलक्षणं अद्योपलक्षणम्, तेन कृतः इति तदर्थः । के.) संस्कारः सोऽद्यतनस्य प्रधानस्याङ्गम् । तस्मादुत्तरार्थे पुनःपुनरुपलक्षयितव्यः । आवाहनवत् । तद्यथा ‘आग्नेयं कृष्णग्रीवमालभेत, सौम्यं बभ्रुम्, आग्नेयं कृष्णग्रीवं पुरोधायां स्पर्धमानः’ इत्येकत्वेऽपि अग्नेर्देवतायाः कर्मभेदात् भेदेन आवाहनं क्रियते । एवमिहापि ।

टुप्— (‘इत्यहे सुत्यामागच्छ मघवन्निति ब्रूयात्’ इति ज्योतिष्टोमे विहितम् । तत्र इत्यहशब्दः परिमाणवाची अत आह–) प्रकृतौ ‘चतुरहे सुत्यामागच्छ मघवन्’ इति कालेयत्ता विवक्षिता । इह तु तथैव प्राप्नोति (चोदकेन) । सा च (अहःशब्दस्य अभ्यासात्मकं) ऊहमन्तरेण न शक्यते विवक्षितुम् । तस्मात् ऊहः कर्तव्यः, द्वादशाहे त्रयोदशाहे इति । न चैकत्वाद्देवतायाः सकृदुपलक्षणं कर्तव्यमित्ययमर्थो लभ्यते । कथम् ? या प्रथमस्य यागस्य संस्कृता देवता, सा द्वितीयस्य संस्कृता न भवति, कालभेदात् ।

अपिवेन्द्राभिधानत्वात् सकृत् स्यादुपलक्षणम्, कालस्य लक्षणार्थत्वात् । ३१ ॥

भाष्यम्—— अपिवा न स्यात् सर्वेषामुपलक्षणम् । अविकारेणैव प्रयोगः स्यात् । कुतः ? इन्द्राभिधानत्वात् । इन्द्रः अत्रोपलक्षणेन संस्क्रियते । स सकृत्संस्कृतः संस्कृत एव, न पुनः संस्कर्तव्यः । ननु चतुरहेऽसौ संस्कृतः, ‘चतुरहे सुत्यामागच्छ’ इति वचनात् । अविवक्षितोऽत्र कालः, इन्द्र आगच्छ इत्येतावदेव विवक्षितम् । विवक्षिते सति काले वाक्यं भिद्यते । आगच्छ मघवन्, चतुरहे आगच्छेति सकृदुच्चरिताऽऽगच्छतिविभक्तिः उभौ संबन्धौ न शक्नोति वदितुम् । अथ कस्मात् इन्द्रागमनसंबन्धो विवक्षितः, न पुनः कालाभिसंबन्धः ? आगच्छ मघवन्निति प्रत्यक्षः संयोगः । चतुरहे आगच्छेति परोक्षः, सुत्याशब्देन व्यवायात् । ननु च सुत्यामागच्छेत्यपि प्रत्यक्षः । स विवक्षितो भवतु । नैवं कश्चिद्विरोधः । सुत्यात्वस्य अविशेषात् । ननु चतुरहे इति सुत्याविशेषो गम्यते । न खलु । किं कारणम् ? कालस्य लक्षणार्थत्वात् । चतुरहकालोऽत्र सुत्यालक्षणार्थः । चतुरहादिसुत्यामागच्छेति । यत्कारणम् ? नात्र देवता आगच्छति । यजतौ तूद्देशेन केवलमङ्गीभवति । स यजतौ अङ्गभावोऽयमुपलक्ष्यते । सर्वसुत्यासु चासौ तुल्यः । तत्र चतुरहवचनं प्रदर्शनमात्रम्, मुख्यत्वात् । मुख्येन हि प्रदर्शनं भवति यथा ‘इडान्ता आतिथ्या संतिष्ठते, नानुयाजान् यजति’ इति ।

टुप्— (भाष्योक्तं व्याख्यानमनुभाषते–) ‘इन्द्र आगच्छ’ इति (एतावदिह) विवक्षितम्, चतुरहे इति (कालवचनम्) अविवक्षितम्, वाक्यभेदभयात् (इन्द्र आगच्छ, तच्च चतुरहे इति) एवं ‘इन्द्र आगच्छ, तच्च सुत्यामागच्छ’ इति वाक्यभेदः । एवं वाक्यभेदभयाच्च सुत्याग्रहणमपि अविवक्षितमेव । तस्मात् प्रकृतावपि अविवक्षितत्वात् विकृतावपि अविकारेणैव प्रयोगः इति । (एवमनुभाष्य दूषयति–) **एतदयुक्तम्** । (कथम् ?) यदि ईदृशोऽपि (क्रियाकारकभावेन विशिष्टविधिविषयसंभवेऽपि) वाक्यभेदो भवता अङ्गीक्रियते, (तदा) सवत्रैव वाक्यभेदः स्यात्, ‘व्रीहीन् प्रोक्षति’ इति (अत्र) प्रोक्षणं कर्तव्यम्, तच्च व्रीहीणां इति । **अपिच** प्रकृतौ ‘चतुरहे, त्र्यहे’ इति किमर्थमुच्चार्यते ? अविवक्षितत्वादेतेषाम् (नोच्चार्यम् । किन्तु–) ‘सुत्यामागच्छ’ इति (एव) प्रयोगः कर्तव्यः (स्यात्) । एवं स्थिते विकारेण अविकारेण वेति (संशयाभावात्) अधिकरणमेव नोत्तिष्ठति । **तस्मादन्यथा वर्ण्यते** । ‘इत्यहे सुत्यामागच्छ मघवन् इति ब्रूयात्’ इति । इतिशब्दोऽयं प्रकारवाची (लोके) । अस्मिन् (तु) वाक्ये अस्य प्रकारवाचित्वं नोपपद्यते, प्रकारस्यासंभवात् । किं तर्हि ? इयत्तावाची वाक्यशेषा-

दवगम्यते (वाक्यशेषे चतुरहादिशब्दानां इयत्तावाचिनां श्रवणात् । इतिशब्दस्य–) अहःशब्देन सामानाधिकरण्यात् अहर्गतेयत्ता अवगम्यते । तच्च अहः आगमनक्रियाविशेषणार्थमुच्चार्यते । सुत्याशब्दोऽपि आगच्छतिक्रियाविशेषणार्थमेव । इन्द्रस्य करिष्यमाणप्रयोजनत्वात् आगमनक्रिया तदर्था (तत्संस्कारार्था)। इत्यहे इति सामान्येन परिमाणवाची । न च सामान्येन व्यवहारः (भवति)। तस्मात् (तस्य परिमाणविशेषवचनत्वात् विशेषवाचकशब्दस्य–) अध्याहारं कृत्वा (तेन अहःशब्दः) विशेषणीयः । अध्याहारे (च कर्तव्ये) यः समवेतार्थः (शब्दः) सोऽध्याह्रियते कालेयत्तां प्रकाशयितुम् । तस्मात् यत्र चतुर्षु अहःसु (चतुर्थे अहनि) सुत्या, तत्र ' चतुरहे ' इत्यध्याहारः, यत्र त्रिषु (तृतीये), तत्र ' त्र्यहे ' इति । तस्मात् अध्याहारविशिष्टं अहः आगच्छतिक्रियां प्रति विशेषणभूतम् । तथा सुत्यापदमपि । अयं प्रकृतिवाक्यार्थो वृत्तः । यच्च प्रकृतौ चोद्यते प्रधानं (प्रकृतौ यत् समवेतम्, यच्च स्वार्थं प्रकाश्यते) तस्योहो भवति । अहःसुत्याशब्दौ तु परार्थौ । (तस्मात् अहर्गणे आद्ये औपसदे अहनि ' त्रयोदशाहे सुत्यामागच्छ मघवन् ' इति, द्वितीये तु ' द्वादशाहे सुत्यामागच्छ मघवन् ' इतिरीत्या तृतीयादौ) तस्मात् अनेन प्रकारेण (पारार्थ्यात् इतिकारणेन) ऊहाभावः, (अभ्यासात्मकस्य ऊहस्याभावः) न वाक्यभेदभयेन (भाष्योक्तेन) इति ।

अविभागाच्च । ३२ ॥

भाष्यम्—– अथ यदुक्तमावाहनवदिति । तत्र ब्रूमः । विभक्तः कालः कृष्णग्रीवयोः, सौम्येन व्यवायात् । तत्र गृह्यते विशेषः, पूर्वस्य कृष्णग्रीवस्यैतद्देवतावाहनं नोत्तरस्येति । अथ इह अविभक्तकालाः सुत्याः अन्यवेताः । केनचित्तासु न गृह्यते विशेषः । चतुरहग्रहणं च अविशेषकमित्युक्तम् । तस्मादविकारेण प्रयोगः ।

शा— किं सर्वेषामह्नां पृथक्पृथगुपलक्षणं त्रयोदशाहे चतुर्दशाहे आगच्छ इति अहःशब्दस्य एकधाशब्दस्येव अभ्यासात्मक ऊहो भवति, उत अविकारेण प्रयोगः इति । (अत्र अहःशब्दस्य किं अभ्यासात्मक ऊहो भवति इति पूर्वपक्षकोटिः । अविकारेण प्रयोगः इति सिद्धान्तकोटिः । पृथगुपलक्षणं तु अभ्यासोपपादकत्वात् उपन्यस्तम्)।

सोम— ऊहविचारस्यापि अस्य आवापविचारात्मकत्वात् अध्याये संगतिः । सुत्याकालाङ्गानामावृत्तिवत् अहःशब्दस्यापि आवृत्तिः इति उत्थानात् अवान्तरसंगतिश्च । **सूत्रार्थस्तु**— सुत्याविवृद्धौ उपसत्कालसुब्रह्मण्यायां सर्वेषामह्नामुपलक्षणम् । प्रकृतौ सौत्यस्य उपलक्षणीयत्वेन इहापि सर्वेषु तदन्वयात् । **न च** देवतासंस्कारार्थत्वात् अहरुपलक्षणस्य सकृदुपलक्षणेनापि तत्संस्कारसिद्धिः इति **वाच्यम्** । ' आग्नेयं कृष्णग्रीवमालभेत, सौम्यं बभ्रुम्, आग्नेयं कृष्णग्रीवम् ' इत्यत्र अग्निदेवताऽऽवाहनलक्षणसंस्कारावृत्तिवत् इहापि तदावृत्तिसंभवात् इति ।

वि—– ' उपसत्काल आह्वानं द्वादशाहे विकारभाक् । न वा, आद्य उपलक्ष्यत्वादत्राह्नां प्रकृताविव ॥, सुत्याऽऽगमनमात्रस्य विवक्षा प्रकृतौ ततः । विकारमन्तरेणात्र तत् सिध्येत् तेन तन्त्रता ॥ '

भाट्ट—– द्वादशाहादौ उपसत्कालीनं सुब्रह्मण्याह्वानं तन्त्रमित्युक्तम् । सुब्रह्मण्यामन्त्रे च ' इत्यहे सुत्यामागच्छ मघवन्निति ब्रूयात् ' इति विहितम् । इतिकरणेन च उपसद्दिनावधिका सुत्यागतदिनसंख्योच्यते । तेन प्रथमोपसद्दिने ' चतुरहे सुत्यामागच्छ ' इति । द्वितीयोपसद्दिने त्र्यहे सुत्यामिति । तृतीयोपसद्दिने द्व्यहे इति प्रकृतौ प्रयोगः । द्वादशाहे च उपसदां द्वादशत्वात् आद्योपसद्दिने त्रयोदशाहे इति प्रयोक्तव्यम् । द्वितीयाद्युपसद्दिने द्वादशाहे इत्यादि । तेन च आद्यसुत्याया एवोपलक्षणत्वापत्तेः सुत्यान्तरोपलक्षणार्थे एकैकस्मिन् दिने त्रयोदशाहे चतुर्दशाहे इत्यादि चतुर्विंशाहादिपर्यन्तमहःशब्दावृत्त्या प्रयोक्तव्यम् ।

न च सुत्यागमनसंबन्धमात्रमिह विवक्षितं न तु संख्यासंबन्धोऽपि वाक्यभेदापत्तेः इति भाष्यकारोक्तं युक्तम्, विशिष्टस्य व्युत्पन्नत्वेन विशिष्टशाब्दबोधोपपत्तेः अवाक्यभेदात् । **न च** तथापि सर्वसुत्यासु एकस्यैव इन्द्रस्य देवतात्वात् एकसुत्यासंबन्धित्वेनापि आहूतस्य सर्व-

सुत्योपकारकत्वोपपत्तेः नावृत्त्यापत्तिरिति **वाच्यम्**। चतुरहे तिथौ निमन्त्रणसंस्कृतस्य देवदत्तस्य तदुत्तरदिनकर्तव्यश्राद्धभोजने निमन्त्रणसंस्कृतत्वाभाववत् आद्यसुत्यायामाहूतस्य इन्द्रस्य सुत्याऽन्तरे उपकारकत्वानुपपत्तेः। **न च** एवमपि प्रकाशनीये सुत्योद्देश्यकावाहने चतुरहादिशब्दानां विशेषणत्वेनोपादानात् यज्ञपतिशब्दवत् परार्थत्वावगतेः नाहःशब्दस्य अभ्यासात्मकोहसिद्धिरिति वार्तिकोक्तं युक्तमिति **वाच्यम्**। 'अग्नये जुष्टं' इत्यादिवत् क्रियां प्रति विशेषणतामात्रेण परार्थत्वानुपपत्तेः। इतरथा चतुःशब्दस्थानेऽपि त्रयोदशपदोहानुपपत्तिः। यज्ञपतिपदे तु यथा परार्थत्वम्, तथा तदधिकरणे स्पष्टम्। अतः कर्तव्यैव त्रयोदशाहे चतुर्दशाहे इत्येवमहःपदावृत्तिः। **इति प्राप्ते**, इत्यहे इत्यत्र इतिशब्दः संख्यापरः। इत्यहे इति च समाहारोऽयम्, तेन तावत्संख्याकेषु दिनेष्वित्यर्थः। तथा च अतीतेषु इत्यध्याहार्यम्। तेन प्रथमोपसदि त्र्यहे सुत्यामिति, द्वितीयायां द्व्यहे, तृतीयायां श्वः इति प्रयोक्तव्यम्। छन्दोगग्रन्थे धन्विप्रभृतिभिरपि एवमेव व्याख्यातम्। याज्ञिकाश्चैवमेवानुतिष्ठन्ति। ततश्च प्रकृतौ 'त्र्यहे अतीते सुत्यामागच्छ' इत्यर्थावगतेः द्वादशाहे च प्रथमोपसद्दिने त्र्यहपदस्थाने द्वादशाहपदोहेन 'द्वादशाहे अतीते सुत्यामागच्छ' इत्यर्थाङ्गीकारेण सुत्यागतैकत्वस्य अविवक्षितत्वात् सर्वसुत्योद्देश्यकागमनप्रकाशनोपपत्तेः अनभ्यासेनैव प्रयोगः।

यदि तु 'चतुरहे सुत्यामागच्छ मघवन्निति ब्रूयात्' इतिभाष्यवार्तिकधृतवचनान्तरानुसारात् इत्यहे इत्यादेः पूरणार्थकत्वे लक्षणामङ्गीकृत्य 'चतुर्थेऽहनि सुत्यामागच्छ' इत्यर्थोऽङ्गीक्रियते तदा भाष्यवार्तिकोक्तसमाधानस्य त्वयैव दूषितत्वात् कथञ्चिदेवं समाधेयम्। नास्मन्मते देवताया आगमनं संभवति, तेन देवस्यत्वादिपदार्थवत् चतुरहाधिकरणकसुत्योद्देश्यकागमनमन्यत्र प्रसिद्धमाहार्यमिन्द्रे प्रकाशनीयम्। तच्च न देवस्यत्वादिवत् अदृष्टाद्यर्थम्, अपि तु इन्द्रस्य प्रकृतसुत्यासंबन्धार्थम्। अतो लाघवात् व्यञ्जनाऽऽदिना सुत्यासंबन्धे एवात्र तात्पर्यम्, न तु चतुरहादिवृत्तिसुत्यासंबन्धे। अतश्च अनभ्यस्तप्रयोगेणैव प्रकृतसर्वसुत्यासंबन्धप्रकाशनोपपत्तेः नाहःपदावृत्तिः। न चैवं द्वादशाहे आहार्यस्य चतुरहाधिकरणत्वस्यैव प्रकाशनोपपत्तेः न तत्स्थाने त्रयोदशाहपदोहापत्तिः, चतुरहाधिकरणकसुत्योद्देश्यकागमनप्रकाशनेन इन्द्रे द्वादशाहीयसुत्यासंबन्धबोधानुपपत्तेः प्रयोजनानुरोधेन तदूहाङ्गीकारात्।

मण्डन— 'गाने नाह्नां पृथग्भावः।' गाने सुब्रह्मण्याह्वाने। गाने इत्यत्र ह्वाने इत्येव पाठः स्यात्।

शंकर— 'सुब्रह्मण्याहःशब्दतन्त्रम्।'

* द्वादशाहे एकत्वात् क्रतोः एक एव परिक्रयः। भेदस्तु वचनात् सुत्यासंबन्धप्रयोजनः दक्षिणासंस्कारप्रयोजनश्च। न तस्मिन् भिद्यमाने परिक्रयैकत्वं भिद्यते। **भा.** १०।६।१७।६८, * द्वादशाहे ऐकादशिनानां पशूनां प्रायणीयोदयनीययोः क्रमेण पञ्च षट् इति विभज्य अनुष्ठानम्। 'ऐकादशिनानां पशूनाम्' इत्यत्र अधिकरणम्। १०।६।४।६–१२, * द्वादशाहे कृष्णविषाणया कण्डूयनं प्रथमाहे दीक्षामारभ्य उत्तमाहे दक्षिणानयनपर्यन्तं कार्यम्। चात्वाले प्रासनं च अन्तिमाहे दक्षिणानयनोत्तरम्। ११।३।६।१३–१४. * द्वादशाहे चतुर्थेऽहनि त्रैशोकं नाम साम। तस्य योनिर्ऋक् 'विश्वाः पृतनाः०' इति। उत्तरे च द्वे ऋचौ उत्तराग्रन्थपठिते बृहत्यौ एव ग्राह्ये न तु कुतश्चित् अतिजगत्यौ समानेतव्ये। उत्तरे बृहती च 'नेमिं नमन्ति' 'समीं रेभासो अस्वरन्' इति। **वि.** ९।२।५ वर्णकं २.

द्वादशाहे तत्प्रकृतित्वादेकैकमहरपवृज्येत, कर्मपृथक्त्वात्। ११।४।५।१७॥

द्वादशाहे एकैकं अहः द्वादशदीक्षाद्वादशोपसत्सहितं अपवृज्येत समाप्तं भवेत्। एकैकं अहः पञ्चविंशतिरात्रं पृथक् पृथक् कर्तव्यम्। कर्मपृथक्त्वात् पृथगेतानि द्वादश कर्माणि। तत्प्रकृतित्वात् ज्योतिष्टोमप्रकृतिकत्वात् द्वादशानां अह्नाम्। तस्मात् द्वादश पञ्चविंशतिरात्राः कर्तव्याः इति प्रथमः पूर्वपक्षः।

अह्नां वा श्रुतिभूतत्वात् तत्र साङ्गं क्रियेत, यथा माध्यंदिने। १८॥

प्रथमपूर्वपक्षं वाशब्देन निरस्य द्वितीयं पूर्वपक्षमाह। अह्नां श्रुतिभूतत्वात् 'द्वादशाहेन' इति अह्नां द्वादश संख्या प्रत्यक्षश्रुता। तस्मात् तत्र एकैकस्मिन् अहनि

साङ्गं सद्योदीक्षोपसत्सहितं क्रियेत कर्तव्यम् । यथा साकमेधपर्वणि माध्यंदिने सांतपनीया इष्टिः साङ्गा क्रियते तद्वत् । तस्मात् द्वादश साद्यस्क्राः कर्तव्याः इति ।

अपिवा फलकर्तृसंबन्धात् सहप्रयोगः स्यादाग्नेयाग्नीषोमीयवत् । १९ ॥

अपिवाशब्देन द्वितीयं पक्षं निराकृत्य तृतीयं पक्षमाह । सहप्रयोगः स्यात्, चतुरहे दीक्षाः चतुरहे उपसदः, चतुरहे सुत्याः इति द्वादशाहानां सहप्रयोगो नाम । फलकर्तृसंबन्धात् एकेन फलेन एकेन च कर्त्रा समेतानां प्रधानकर्मणां संबन्धात् 'द्वादशाहेन प्रजाकामो यजेत' इति वचनेन तादृशसंबन्धस्योक्तत्वात् । आग्नेयाग्नीषोमीयवत् यथा आग्नेयस्य अग्नीषोमीयस्य च पुरोडाशस्य पौर्णमास्यां एकफलकत्वात् एककर्तृकत्वाच्च सहप्रयोगः तद्वत् ।

साङ्गकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात् । २० ॥

वाशब्देन तृतीयमपि पक्षं प्रत्याख्याय सिद्धान्तमाह । न सहप्रयोगः साङ्गकालश्रुतित्वात् साङ्गानां प्रधानानां पृथक्पृथक् द्वादशद्वादशदिनरूपस्य कालस्य श्रुतित्वात् श्रवणात् । 'द्वादश दीक्षाः' 'द्वादश उपसदः' इति दीक्षाणां उपसदां च कालः पृथक् श्रुतः । तस्मात् स्वस्थानानां स्वेस्वे स्थाने स्थितानामेव दीक्षाणां उपसदां सुत्यानां च विकारः विवृद्धिः स्यात् । तस्मात् प्रथमं द्वादश दीक्षाः, ततो द्वादश उपसदः, ततो द्वादश सुत्याः कर्तव्याः इति सिद्धान्तः ।

तदपेक्षं च द्वादशत्वम् । २१ ॥

तदपेक्षं दीक्षोपसत्सुत्यापेक्षं द्वादशत्वम्, प्रथमं दीक्षाः, तासां तत्रैव द्वादशत्वम्, तत उपसदः तथैव, ततः सुत्यास्तथैवेति । तस्मात् स्वस्थानविवृद्धिः ।

दीक्षोपसदां च संख्या पृथक्पृथक्, प्रत्यक्षसंयोगात् । २२ ॥

दीक्षाणामुपसदां च स्वस्थानविवृद्धया प्रयोगः । संख्या द्वादशेति संख्या च पृथक्पृथक् प्रधानकर्मणां अङ्गकर्मणां च भेदेन उपपन्ना । एवं च 'षट्त्रिंशदहो वा एष यद् द्वादशाहः' इति प्रत्यक्षश्रुत्या उक्तः कालसंयोगः अनुगृहीतो भवति ।

वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमन्यकालत्वादवभृथादीन्युत्तराणि दीक्षाविसर्गार्थत्वात् । २३ ॥

अत्र द्वादशाहे वसतीवरीपर्यन्तानि पूर्वाणि अङ्गकर्माणि प्रथमेऽहन्येव अन्यकालत्वात् प्रधानानां अन्यान्यकालत्वेन अगृह्यमाणविशेषत्वात् तन्त्रं भवन्ति । एवं अवभृथादीनि उत्तराणि अङ्गकर्माण्यपि दीक्षाविसर्गार्थत्वात् दीक्षोन्मोचनार्थत्वात् तन्त्रं स्युः । मध्यमानि च कर्माणि भेदेन स्युः । इति प्रयोगपद्धतिरुक्ता सूत्रकारेण सुहृद्भावेन ।

तथा चान्यार्थदर्शनम् । २४ ॥

तथा च दीक्षोपसत्सुत्यानां स्वस्थानविवृद्धौ सत्यां 'षट्त्रिंशदहो वा एष यद् द्वादशाहः' इति अन्यार्थदर्शनं युक्तं भवति ।

चोदनापृथक्त्वे त्वैकतन्त्र्यं समवेतानां कालसंयोगात् । २५ ॥

यत्तु आग्नेयाग्नीषोमीयवत् इत्युक्तं तत्राह । आग्नेयाग्नीषोमीययोस्तु चोदनापृथक्त्वेऽपि ऐकतन्त्र्यं सहप्रयोगो भवति समवेतानां अङ्गप्रधानानां पौर्णमासीरूपेण एकेन कालेन संयोगात् । प्रकृते तु कालभेदेन संयोगः । तस्मात् द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकं द्वादशदिनसाध्यत्वं इति सिद्धान्तः । के.

* द्वादशाहे त्रयस्त्रिंशानन्तरं मध्वशनं घृताशनं वा वृत्तम् । भा. १०।६।९।२७, * द्वादशाहे त्रैशोकसाम्नो गानं उत्तराग्रन्थपठितयोर्बृहत्योरेव, अतिजगतीषु इति बहुवचनं तु प्रथमाया अतिजगत्याः सप्तकृत्वोऽभ्यासात् । ९।२।५।२१–२४ वर्णकं २, * द्वादशाहे त्रैशोकसाम्नो विषमछन्दस्कासु ऋक्षु गानम् । (अतिजगत्यां 'विश्वाः पृतनाः' इति योनौ उत्तरयोर्बृहत्योश्चेति) । ९।२।५। २१–२४ वर्णकं २.

⧗ द्वादशाहे त्र्यनीकायां प्रथमद्वितीययोः अह्नोः ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः पुनःश्रवणात् समानविधित्वम् ॥

त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् । १०।५।२३।७७॥

भाष्यम्— अस्ति द्वादशाहे त्र्यनीका 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः । अथेतरेषां

नवानामह्नां ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्’ इति । तत्र प्रथमद्वितीययोः अह्नोः ऐन्द्रवायवाग्रता शुक्राग्रता च श्रूयते । सा चोदकेनैव तयोः प्राप्ता, रथंतरसामत्वात् बृहत्सामत्वाच्च । तत्र संदेहः किं उदितं अनुवदितुं पुनः श्रूयते, किमन्यत् परिसंख्यातुम्, उतार्थवादार्थम्, अथवा समानविध्यर्थम् । किं प्राप्तम् ? अर्थवादायेति । कुतः ? उदितं अनुवदितुं हि उच्यमाने प्रवृत्तिविशेषक्रिया नास्ति । त्रिदोषा परिसंख्या । तस्मात् अर्थवादायेति । कः पुनरत्र गुणवादः ? औचित्यम् । आग्रयणाग्रत्वं हि तृतीये अहनि न्याय्यम् । कथमिव ? प्रथमद्वितीययोः अह्नोः ऐन्द्रवायवाग्रता (शुक्राग्रता) च चोदिता, न तृतीये अहनि । तत्र तु आग्रयणाग्रता न्याय्येति ।

अपिवाऽहर्गणेष्वग्निवत् समानविधानं स्यात् । ७८ ॥

भाष्यम्-- अपिवा इति पक्षव्यावृत्तिः । न गुणार्थं श्रवणम्, समानविध्यर्थमिति । न शक्यं वदितुं चोदकेन प्राप्तम् । तत्र पुनर्वचनमनर्थकम् । तस्मात् तदन्यार्थमिति । कथं तर्हि शक्यम् ? वाक्येनेदं ज्योतिष्टोमे रथंतरसाम्नि प्रवृत्तं चोदकेन प्राप्यते । तस्मात् समानविधिं करिष्यामीति पुनरुच्यते । अग्निवत् । यथा ‘अथातोऽग्निमग्निष्टोमेनैवानुयजति, तमुक्थ्येन, तमतिरात्रेण, तं चतूरात्रेण, तं पञ्चरात्रेण, तं सप्तरात्रेण, तमष्टरात्रेण, तं नवरात्रेण, तं दशरात्रेण, तमेकादशरात्रेण’ इति । प्रयोजनं पक्षोक्तं न परिसंख्या भवतीति ।

शा— इदं तु अनैमित्तिकार्थं वचनम् । तस्य च प्रयोजनं तत्तद्विकृतिषु असत्यपि रथंतरबृहत्सामत्वे ऐन्द्रवायवशुक्राग्रतयोः सिद्धिः ।

सोम— प्रदानक्रमस्य बाधाभावेऽपि इह परिसंख्यया अङ्गान्तराणां बाधः इत्युत्थितेः संगतिः । अनीकशब्दः अग्रतावचनः, लोके शताग्रे शतानीकः इति व्यवहारात्, वेदे च ‘चित्रं देवानामुदगादनीकम्’ इति प्रयोगाच्च । त्र्यनीका इति अजादेः आकृतिगणत्वात् टाप्, न तु ङीप् । उक्तं च ‘स्मृत्याऽजादिगणे ह्युक्ता टाबुत्पत्तिर्द्विगोरपि । त्र्यनीकेति गणे कीर्त्यः स्यादाकृतिगणो हि सः ॥’ इति । न चात्र गृहमेधीयाज्यभागन्यायेन चोदकपरिलोपकत्वेन अप्राप्तपरिसंख्यासंभवः, अग्रतायाः संनिपातिग्रहणधर्मतया साक्षात् उपकारासंबन्धात् इति भवनाथादयः । **सूत्रार्थस्तु--** त्र्यनीकायां चोदकप्राप्तेषु ऐन्द्रवायवाग्रत्वादिषु यत् पुनराम्नानम्, तत् अर्थवादार्थं स्यात् इति ।

वि— ‘त्र्यनीकायामैन्द्रवायव-शुक्राग्रानुवादता । परिसंख्या वाऽर्थवादो वा विधिर्वा, नहि त्रयम् ॥ वैयर्थ्येन त्रिदोषत्वात् लक्षणाऽऽपत्तितस्तथा । विधिराग्रयणाग्रत्व इवानैमित्तिको हि सः ॥’ अत्र पक्षत्रयं पूर्वपक्षः इति ज्ञेयम् ।

भाट्ट— द्वादशाहे द्वादशस्वपि अहस्सु ग्रहाग्रता विहिता ‘ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्’ इति । सेयं नवाहःसंबन्ध्यग्रता त्र्यनीका । नवसु आद्यानि षट् रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामकानि । अतश्च तत्र अहरन्तरेषु बृहद्रथंतरसामकत्वाभावात् अग्रताविधिः अपूर्वविधिरेव । आद्ययोस्तु रथंतरबृहत्सामकत्वात् तन्नैमित्तिकयोः ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः अतिदेशेनैव प्राप्तिसंभवे पुनस्तत्र तच्छ्रवणं किमर्थमिति बाधोपयोगितया चिन्त्यते । तत्र आज्यभागन्यायेन अङ्गान्तरपरिसंख्यार्थं इत्याद्यः पक्षः । द्वितीयस्तु सा हि गृहमेधीयपञ्चमपक्षन्यायेन प्राप्तपरिसंख्या वा स्यात्, तदीयाष्टमपक्षन्यायेन अपूर्वख्यापनद्वारा अप्राप्तपरिसंख्या वा ? नाद्यः, त्रैदोष्यापत्तेः । नान्त्यः, सति अन्यस्मिन् लघुभूते प्रयोजने परिसंख्याफलकत्वस्य अन्याय्यत्वात् । तथात्वे ग्रहणानामपि प्राप्त्यभावेन ऐन्द्रवायवाग्रत्वादेरपि विधातुमशक्यत्वाच्च । अतः एकवाक्यतालाभाय ‘एकं वृणीते’ ‘द्वादशाहीनस्य’ ‘उपांशूपसत्सु’ इत्यादिवत् आग्रयणाग्रताविधेरेव अयमर्थवादः औचित्येन तत्स्तुत्यर्थः, न तु विध्यन्तरद्वयं वाक्यभेदापत्तेरिति । **सिद्धान्तस्तु**,

अधिकारार्थकाथशब्दबलेन उत्तरस्मिन् पूर्वस्यानन्वयप्रतीतेः । अन्यथा 'इदं तु आग्रयणाग्रम्' इत्युक्त्यापत्तौ वा अथशब्दानाञ्जस्यात् वाक्यत्रयमेवेदं अनीकान्तरवाक्ये इव । तत्प्रयोजनं च अतिदेशप्रवृत्तेः पूर्वं एतद्वाक्येन ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोर्विधौ अतिदेशस्य एतद्विषयत्वाकल्पनात् अनैमित्तिकत्वसिद्धिरेव । तत्फलं च तत्तद्विकृतिषु असत्यपि निमित्ते तत्तदग्रतासिद्धिः । यथा गर्गत्रिरात्रे 'द्वितीयमहर्वामदेव्यपृष्ठम्' इति । तत्र असत्यपि बृहत्सामत्वे शुक्राग्रत्वनियमसिद्धिः । अन्यथा अनियमेन यस्यकस्यचिद्ग्रहस्य प्राथम्यं प्रकृतिदृष्टपाठानुरोधाद्वा ऐन्द्रवायवस्य स्यादिति पूर्वपक्षे अङ्गान्तराणां परिसंख्यातत्वाच्च बाधोपयोगिता ।

मण्डन-- 'समं विधत्ते पुनरग्रतोक्तिः ।'

शंकर-- 'नित्यं त्र्यनीका शुक्राग्रा ।'

* द्वादशाहे दक्षिणा अन्वहं द्वादशाधिकं शतं विभज्य दीयते । **वि.** १०।६।१८. * द्वादशाहे दश सौमिकानि अहःसंयुक्तानि कर्माण्युत्पद्यन्ते । अपरौ प्रायणीयोदयनीयौ । तावपि लक्षणया कर्म प्रतिपादयतः । तस्माद् द्वादश कर्माणि उत्पद्यन्ते । तानि उत्पन्नानि साकाङ्क्षाणि 'द्वादशाहेन प्रजाकामं याजयेत्' इति फले विधीयन्ते । **टुप्.** ११।४।५।१५. * द्वादशाहे दशमस्याह्नो मानसग्रहेण समापनं वाचनिकम् । **वि.** ९।१।९. * द्वादशाहे दीक्षा पृथक्कालत्वात् तन्त्रम् । **भा.** ११।३।१०।२१.

द्वादशाहे दीक्षाः द्वादशैव ॥

[अत्रत्यं भाष्यं वार्तिकं च 'ज्योतिष्टोमे एकादीनां दीक्षाणां विकल्पः' (६।५।८।२८–२९ मी. को. पृ. १७९०) इति बिन्दौ गृहीतम् ।]

शा— द्वादशाहे 'षट्त्रिंशदहो वा एषः, यद् द्वादशाहः' इति लिङ्गात् दीक्षा द्वादश इति गम्यते ।

वि—'द्वादशाहे किमेकादिविकल्पा द्वादशैव वा ।, आद्यः प्रकृतिवत्, षण्णां द्विकानामुक्तितोऽन्तिमः ॥'

भाट्ट—द्वादशाहेषु 'द्वादशरात्रीर्दीक्षितः स्यात्' इति वाक्येन यवमयश्चरुरितिवत् द्वादशदीक्षाकत्वस्यैव नियमनान्न विकल्प इति प्रत्युदाहरणमात्रम् । अत एव 'षट्त्रिंशदहो वा एष द्वादशाहः' इति लिङ्गं उपसत्सुत्यानां द्वादशत्वस्य प्रमाणान्तरसिद्धत्वात् दीक्षा अपि द्वादशेति गमयति । तथा 'अभीन्धते एव दीक्षाभिः' इति दीक्षाबहुत्वं विधाय 'द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृक् द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानम्' इति तद्वाक्यशेषे षड्द्विकानुक्रमणमपि ।

मण्डन—'द्वादशाहे द्वादशैताः ।' एताः दीक्षाः ।

शंकर— 'द्वादश द्वादशाहके ।' दीक्षाः ।

* द्वादशाहे दीक्षाणामुपसदां च तन्त्रम् । द्वादशानामह्नां सहप्रयोगविधानात् । **वि.** ९।१।९. * द्वादशाहे दीक्षाणामुपसदां च स्वस्थानविवृद्धया प्रयोगः । **टुप्.** ११।४।५।१८. * द्वादशाहे दीक्षाणां क्रमविशेषनियमः । श्रौतक्रमाधिकरणं इत्यत्र द्रष्टव्यम् । **वि.** ५।१।१ वर्णकं ३.

द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकं द्वादशदिनसाध्यत्वम्, तेन षट्त्रिंशदहत्वम् ॥

द्वादशाहे तत्प्रकृतित्वादेकैकमहरपवृज्येत, कर्मपृथक्त्वात् । ११।४।५।१७॥

भाष्यम्-- 'द्वादशाहेन प्रजाकामं याजयेत्' इति श्रूयते । तत्र विचार्यते किमेकैकशः पृथक्पृथक् दीक्षोपसदेन (द्वंद्वस्य दकारान्तत्वात् अच् समासान्तः 'द्वंद्वाच्चुदषहान्तात्' इत्यनेन) अहः संपाद्य द्वादश पञ्चविंशतिरात्राः कर्तव्याः (दीक्षाः १२, उपसदः १२, एका सुत्या इति एकैकमहः पञ्चविंशतिरात्रम्), अथवा द्वादश साद्यस्काः, (एकैकस्मिन्नेव अहनि एकैकं दीक्षोपसत्सुत्यमिति), अथवा चतुरहे दीक्षाः, चतुरहे उपसदः, चतुरहे सुत्याः, अथवा स्वस्थानानां दीक्षोपसत्सुत्यानां विवृद्धिरिति । किं प्राप्तम् ? तत् सूत्रेणैवोपक्रमः 'द्वादशाहे तत्प्रकृतित्वात् एकैकमहरपवृज्येत कर्मपृथक्त्वात्' । एकैकं सदीक्षोपसदं (दीक्षोपसदेन सहितम्) अहः अहः अपवृज्येत । द्वादश पञ्चविंशतिरात्राः कर्तव्याः । कुतः ? तत्प्रकृतित्वात् । सदीक्षोपसदं अहः अपवर्जितं ज्योतिष्टोमे । यतः तत्प्रकृतीन्येतानि द्वादशाहानि पृथग्भूतानि कर्माणि पृथक्त्वेनैन धर्मानाकाङ्क्षन्ति । तस्मात् ज्योतिष्टोमवत् सदीक्षोपसदं एकैकमहः कर्तव्यमिति ।

टुप्--प्रकृतौ उपांश्वादेः हारियोजनपर्यन्तस्य यागस्य अहःशब्दो परिच्छेदको दृष्टः । तेन तत्परिच्छेदद्वारेण

कर्मणि वर्तते अहःशब्दः । इहापि द्वादशाहे 'प्रथममहः, द्वितीयमहः' (इत्येवमादि 'दशममहः' इत्यन्तम्) श्रूयते । सोऽयं अहःशब्दः श्रूयमाणः (अहःपरिमितं) कर्म लक्षयति । यच्च तत् कर्म लक्ष्यते, अनेन (वाक्येन) तदुत्पद्यते । एवं दश सौमिकानि अहःसंयुक्तानि कर्माणि उत्पद्यन्ते, अपरौ प्रायणीयोदयनीयौ (अतिरात्रौ अभितो दशाहं श्रूयेते), तावपि लक्षणया कर्म प्रतिपादयतः । तस्मात् द्वादश कर्माणि उत्पद्यन्ते । तानि च उत्पन्नानि (फलं प्रति) साकाङ्क्षाणि 'द्वादशाहेन प्रजाकामं याजयेत्' इति (यजिना) फले विधीयन्ते तत्र द्वादशाहशब्दः सामानाधिकरण्यात् यागेन अयमपि कर्मवचनो न लौकिकमहर्ब्रवीति । संख्याशब्दस्तु द्वादश यागान् प्रतिपादयति । तत्र एकैको यागः फलसाधनत्वात् ज्योतिष्टोमात् विध्यन्तं गृह्णाति । तत्र (प्रत्येकमेव) चोदकेन ज्यौतिष्टोमिके दीक्षोपसत्परिमाणे (दीक्षोपसदपरिमाणे एका दीक्षा तिस्र उपसदः इति) प्राप्ते वचनेन द्वादश दीक्षा विधीयन्ते, (द्वादश) उपसदश्च । तस्मात् एकको यागः पञ्चविंशतिरात्रः ।

अह्नां वा श्रुतिभूतत्वात्तत्र साङ्गं क्रियेत यथा माध्यंदिने । १८ ॥

भाष्यम्— न चैतदस्ति, यदुक्तं द्वादश पञ्चविंशतिरात्राः कर्तव्या इति । किं तर्हि ? द्वादश साद्यस्क्राः कार्याः । किं कारणम् ? अह्नां श्रुतिभूतत्वात् । द्वादशाहेनेति द्वादशसंख्या अह्नां प्रत्यक्षश्रुता । सा बाध्येत, यदि द्वादश पञ्चविंशतिरात्राः क्रियेरन् । तस्मात् द्वादशसु अहःसु एकैकं प्रधानं प्रयुज्येत । प्रधानकालत्वाच्चाङ्गानां तत्कालं तदीयं दीक्षोपसदम् । यथा माध्यंदिने । तद् यथा 'सांतपनीयस्य माध्यंदिने निरुप्यते' इति वचनात् मध्यंदिनकालान्येवाङ्गानि भवन्ति, एवमिहापि । तस्मात् द्वादश साद्यस्क्राः कर्तव्याः ।

टुप्— यागास्तावत् फले विधीयन्ते इति तुल्यम् (आवयोः) । संख्याशब्दः (तु) अहर्विशेषणार्थमुच्चार्यते 'द्वादशाहानि भवन्ति' इति । द्वादशशब्दोऽपि श्रुतिवृत्तः । अहःशब्दोऽपि (श्रुत्यैव) लौकिकमहः ब्रवीति इति न कर्म, लक्षणाऽर्थः (कल्पितो) भविष्यति । द्वादशाहेन इति द्वादशभिरहोभिः ते यागाः कर्तव्याः । (गुणविधिर्द्वादशाहशब्दः, न नामधेयमित्यर्थः) । तस्मात् द्वादशाहेन इति (कालविधानेन) साङ्गानां द्वादशाहकालत्वं प्रतिपाद्यते । याऽसौ चोदकेन अन्यादृशी प्राप्तिः (अन्यस्मिन्नहनि दीक्षाः, अन्यस्मिन् उपसदः, अन्यस्मिन् सुत्याः इति) सा प्रत्यक्षया अहर्गतया संख्यया निवार्यते ।' (तस्मात् द्वादश साद्यस्क्राः) । एवं च प्रधानसंनिधौ अङ्गानि कृतानि भविष्यन्ति ।

अपिवा फलकर्तृसंबन्धात् सहप्रयोगः स्यादाग्नेयाग्नीषोमीयवत् । १९ ॥

भाष्यम्— अपिवा नैवं स्यात् 'द्वादश साद्यस्क्राः' इति । कथं तर्हि ? सहप्रयोगः स्यात् चतुरहे दीक्षाः, चतुरहे उपसदः, चतुरहे सुत्याः । कुतः ? फलकर्तृसंबन्धात् । फले कर्तृषु च एतेषां प्रधानकर्मणां समेतानां संबन्धः । द्वादशाहशब्देन समुदायवचनेन संयोगात् फले संबन्धः । सत्रे स्वयंकर्तृत्वात् अहीने च दक्षिणैक्यात् कर्तृषु च । एकफलत्वात् एककर्तृत्वाच्च सहप्रयोगो भवति । आग्नेयाग्नीषोमीयवत् । यथा आग्नेयाग्नीषोमीययोः एकफलत्वात् एककर्तृत्वाच्च सहप्रयोगो भवति । सहप्रयोगे च विशेषाग्रहणात् तन्त्रं दीक्षोपसदम् । द्वादशाहश्रुतिश्च अनुग्राह्या । तत् उभयं एवमुपपादितं भवति सहप्रयोगः अहःसंख्या च । तस्मादेष पक्षः श्रेयान् ।

टुप्— यागाः फले चोद्यन्ते । तेषां (अङ्गभूतदीक्षोपसदाम्) द्वादशसंख्या प्रत्यक्षा श्रूयते । सा चोदकप्राप्तां संख्यां कार्यापत्त्या बाधते । तत्र ये संख्यायुक्ताः, ते बाध्यन्ते । ते च दीक्षणीयादयः संख्यायुक्ताः, नाग्नीषोमीयादयः । अपिच एकस्मिन् फले चोदितानां तन्त्रेण इतिकर्तव्यता भविष्यति । (ननु एकफलानामपि राजसूयवत् तन्त्रभेदः स्यात्, अत आह–) दक्षिणैक्यात् कर्तृभेदो नास्ति । तस्मात् (अहीने तावत्) सहप्रयोगः सिद्धो भवति । सत्रे च यजमाना एव कर्तारः, (अतः) तत्रापि कर्तृभेदो नास्ति (इति) तत्रापि तन्त्रम् (दीक्षोपसदः) ।

साङ्गकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात् । २० ॥

भाष्यम्-- अथवा एतदपि न युक्तम् । कुतः ? साङ्गकालश्रुतित्वात् । यदि अत्र प्रधानानामेव कालश्रुतिः स्यात् नाङ्गानाम्, तत एवं स्यात् । अत्र तु साङ्गानां कालः श्रुतः । ('द्वादश दीक्षाः, द्वादशोपसदः' इति दीक्षाणां उपसदां च पृथक्पृथक् कालः श्रुतः । यदि चतुरहे क्रियेत, ततो बाध्येत । तस्मात् स्वस्थानानां विवृद्धिः ।

टुप्— (द्वादशाहशब्दो न गुणविधिः, किन्तु नामधेयमित्याह-) भावयेत् प्रजाम् (प्रजाः इति मुद्रिते पाठः) । केन ? यागेन । कतरेण ? द्वादशाहसंज्ञकेन । (इत्येवं याग-) सामानाधिकरण्यात् अहःशब्दः कर्म ब्रवीति । संख्याशब्दः (अपि) 'संख्यया कर्मभेदः' इत्यनेन न्यायेन द्वादश यागान् प्रतिपादयति । तत्र एकैको यागः चोदकेन धर्मान् गृह्णाति । तत्र प्रत्यक्षेण (द्वादश दीक्षाः इत्यादिना) संख्यावचनेन (बाध्यते इत्यन्वयः) चोदकेन या दीक्षोपसत्संख्या प्राप्नोति, सा बाध्यते । (ननु एवं द्वादश पञ्चविंशतिरात्राः स्युः, अत आह-) दक्षिणैक्यात् तन्त्रेण प्रयोगः । तस्मात् दीक्षाणामुपसदां च स्वस्थानविवृद्ध्या प्रयोगः । द्वादशसंख्या च या द्वादशश्रुतेः (शब्दस्येत्यर्थः), सा कर्मोपकर्मभेदेन उपपन्ना भवति (कर्मशब्देन प्रधानस्याभिधानम्, उपकर्मशब्देन अङ्गस्य) एवं च 'षट्त्रिंशदहो वा एष यद् द्वादशाहः' इति दर्शनमनुगृहीतं भवति ।

तदपेक्षं च द्वादशत्वम् । २१ ॥

भाष्यम्— दीक्षोपसत्सुत्याऽपेक्षम् । प्रथमं दीक्षाः, तासां तत्रैव द्वादशत्वम् । तत उपसदः, तासामपि तद्देशानामेव (द्वादशत्वम्) । अन्ते सुत्या, तस्या अपि तत्स्थानाया एव विवृद्धिः । तदपेक्षं द्वादशत्वम् ।

दीक्षोपसदां च संख्या पृथक्पृथक्, प्रत्यक्षसंयोगात् । २२ ॥

भाष्यम्-- अपि च 'द्वादशाहेन प्रजाकामं याजयेत्' इत्युक्त्वा त्रिवृदादीनि अनुक्रान्तानि । तस्मादपि तदपेक्षा द्वादशसंख्या ।

वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमन्यकालत्वादवभृथादीन्युत्तराणि दीक्षाविसर्गार्थत्वात् । २३ ॥

भाष्यम्-- एवं च वसतीवरीपर्यन्तानि पूर्वाणि अस्वकालत्वात् अगृह्यमाणविशेषाणि तन्त्रं भवन्ति । अवभृथादीनि चोत्तराणि । तस्य दीक्षाविसर्गार्थत्वात् । स हि दीक्षोन्मोचनार्थः । एवं ह्याह 'अप्सु दीक्षां प्रवेशयित्वा देवाः स्वर्गं लोकमायन् । यदप्सु स्नाति, तामेव दीक्षामालभते । अथ यदपोऽवभृथमभ्यवयन्ति, तामेव दीक्षां पुनरप्सु प्रवेशयन्ति' इति । तन्त्रं च दीक्षोत्पन्ना । सा तन्त्रमेवोत्स्रक्ष्यते । विशेषाग्रहणात् ।

तथा चान्यार्थदर्शनम् । २४ ॥

भाष्यम्--एवं च सति अन्यार्थदर्शनमिदं युक्तं भविष्यति, 'षट्त्रिंशदहो वा एष द्वादशाहः' इति ।

चोदनापृथक्त्वे त्वैकतन्त्र्यम्, समवेतानां कालसंयोगात् । २५ ॥

भाष्यम्— यच्च आग्नेयाग्नीषोमीयवदिति । युक्तं यत् आग्नेयाग्नीषोमीययोः चोदनापृथक्त्वेऽपि ऐकतन्त्र्यं सहप्रयोगः । कुतः ? समवेतानां कालसंयोगात् । समवेतानामङ्गप्रधानानां कालसंयोगात् । पौर्णमास्यां पौर्णमास्या यजेत साङ्गयेति । तस्मात्तन्त्रम् । पौर्णमास्यामेवाङ्गानि च प्रधानानि च क्रियन्ते । इह पुनः, साङ्गकालश्रुतित्वादित्येवं अपदिष्टो हेतुः । तस्मादत्र द्वादशाहे अङ्गप्रधानानि पौर्णमासीवत्सह कार्याणि ।

सोम— पूर्ववत् इहापि तन्त्रता इत्युत्थितेः संगतिः । **सूत्रार्थस्तु**— द्वादशाहे एकैकमहः सदीक्षोपसत्कं अपवृज्येत, कर्मणां पृथक्त्वेन तेषां प्रत्येकं ज्योतिष्टोमप्रकृतिकत्वात् इति ।

वि— 'द्वादशाहे सदीक्षोपसदहे दिनमानकम् । शतत्रयं- द्वादश वा-षट्त्रिंशद् वा, ऽग्रिमो यतः ॥ एकैककर्मणोऽह्नोऽस्य ज्योतिष्टोमविकारता । एकैकं तदनुष्ठानं दिनानां पञ्चविंशतिः ॥ अह्नां द्वादशताश्रुत्या मध्यपक्षस् तदाऽपि किम् । कार्या द्वादश साद्यस्काश्चतुष्काणामुत त्रिकम् ॥ एकैकस्यैव यागस्य विकृतित्वादिहादिमः । अमुख्यकालाङ्गबाधाच्चतुष्कं भिद्यते त्रिधा ॥, दीक्षा उपसदः सुत्याः प्रत्येकं द्वादश स्मृताः । साङ्गस्य द्वादशाहस्य

षट्त्रिंशद् दिवसा मताः ॥' अतिदिष्टानामुपसदां दीक्षाणां च प्राकृतसंख्याबाधनाय पृथक् द्वादशत्वं श्रुतम् । ततो दीक्षोपसदर्थे चतुर्विंशतिर्दिनानि, सुत्याऽर्थमेकं दिनमिति पञ्चविंशतिः । ईदृशस्य कर्मविशेषस्य द्वादशभिरावृत्तिभिः (दिनानाम्-) शतत्रयं स्यात् । इत्याद्यः पक्षः । तथा सति अह्नां द्वादशत्वं श्रूयमाणं बाध्येत । तस्मात् द्वादश दिवसाः इति मध्यमः पक्षः । तदाऽपि दीक्षोपसद्भ्यामुपेतस्य एकैकस्याह्नः साङ्गज्योतिष्टोमविकारत्वात् तत् सर्वं सद्यः एव कर्तव्यम् (इति द्वादश साद्यस्क्राः) । इत्येकः पक्षः । प्रकृतौ दीक्षोपसदोर्मुख्यकालात् प्रागेव अनुष्ठितत्वात् इहापि तथैवानुष्ठानं प्राप्तम् । तच्च मुख्यकाले अनुष्ठाने बाध्येत । तस्मात् अङ्गद्वयस्य प्रधानस्य च द्वादश दिनानि विभज्य अनुष्ठानम्, इति पक्षान्तरम् । 'द्वादशैव दीक्षाः, द्वादशोपसदः' इति अङ्गयोः मुख्यवत् पृथक् द्वादशत्वश्रुत्या षट्त्रिंशत् इति सिद्धान्तः ।

भाट्ट— द्वादशाहे द्वादशदीक्षाः द्वादशोपसदः द्वादशसुत्याश्च विहिताः । तत्र 'द्वादशाहेन प्रजाकामं याजयेत्' इत्यनेन द्वादशानां सुत्यानां फलसंबन्धे अवगते प्रत्येकातिदेशप्राप्तदीक्षोपसदनुवादेन द्वादशत्वसंख्याविधौ एकैका सुत्या प्रत्येकं द्वादशसंख्याकदीक्षोपसद्युक्ता कर्तव्येति द्वादश पञ्चविंशतिरात्राः संपद्यन्ते । न च द्वादशाहपदस्य द्वादशदिनात्मककालविधायित्वात् कथमेतावद्दिनसाध्यतेति वाच्यम् । अहःशब्दस्य सुत्यात्मकक्रतुवाचित्वेन द्वादशसंख्याकसुत्यात्मकत्वस्य प्राप्तत्वेन तस्य नामधेयत्वादिति **प्रथमः** पक्षः । न अहःशब्दस्य क्रतौ रूढिः, अपि तु दिने एव शक्तस्य क्रतुविशेषे निरूढलक्षणया प्रयोगात् । अतो लक्षणायां प्रमाणाभावात् द्वादशदिनात्मककालविधिरेवायम् । अतश्च सांतपनीयान्यायेन (५।१।१७) आतिदेशिककालबाधात् साङ्गानां द्वादशसुत्यानां द्वादशदिनसमाप्यत्वावगतेः एकस्मिन्नहनि द्वादशसंख्याकदीक्षोपसद्युक्तैकैका सुत्या समापनीयेति द्वादश साद्यस्क्राः कर्तव्या इति **द्वितीयः** । साहित्येन एकफलसाधनानां द्वादशानामपि सुत्यानां प्रयाजवत् तन्त्रेणैव निरुक्तसंख्याकदीक्षोपसत्करणोपपत्तेः तदावृत्तौ प्रमाणाभावः । अतश्च औपदेशिककालानुरोधात् आद्यदिने एव निरुक्तसंख्याकदीक्षोपसदादिकं ससुत्यं सर्वं समाप्य द्वादश सुत्या एकैकस्मिन्दिने कर्तव्याः इति **तृतीयः** । यत्तु अस्मिन् पक्षे 'चतुरहे दीक्षाः, चतुरहे उपसदः, चतुरहे सुत्याः' इति मूले अनुष्ठानमुक्तम्, तत् प्रमाणाभावादुपेक्षितम् । **सिद्धान्तस्तु--** अहःपदस्य कालपरत्वे द्वादशाहमित्यापत्तेः यागसामानाधिकरण्येन अहःशब्दस्य निरूढलक्षणया यागपरत्वावश्यम्भावात् तस्य च सुत्यात्मकत्वेन अहःसाध्यत्वस्य प्रमाणान्तरेणैव प्राप्तेः नानेन साङ्गे कालविधिः । अपितु सर्वप्रधानानां द्वादशदिनात्मककालसाध्यत्वात् तत्प्रख्यन्यायेन नामधेयमेव द्वादशाहशब्दः । अतश्च अतिदेशानुरोधात् सुत्यातो बहिरेव द्वादशाहं दीक्षाः द्वादशाहं चोपसदः कृत्वा द्वादशाहं द्वादश सुत्याः कर्तव्याः । एवं च 'षट्त्रिंशदहो वा एषः यद् द्वादशाहः' इति लिङ्गमप्युपपद्यते ।

मण्डन-- 'स्वस्थानवृद्धिर्दीक्षाऽऽदेः ।'

शंकर-- 'द्वादशाहः षट्त्र्यहः स्यात् ।' षट् च त्रीणि च अहानि यस्य सः षट्त्र्यहः 'अङ्कानां वामतो गतिः' इति रीत्या षडङ्कस्य त्र्यङ्कस्य च निवेशे ३६ इति षट्त्रिंशद्दिनात्मकत्वं सिध्यति ।

* द्वादशाहे दीक्षोपसत्सुत्यानां स्वस्थानानां विवृद्धिः । प्रथमं दीक्षाः, तासां तत्रैव द्वादशत्वम् । ततः उपसदः, तासामपि तद्देशानामेव । अन्ते सुत्या, तस्या अपि तत्स्थानाया एव विवृद्धिः । **भा.** ११।४।५।१८. * द्वादशाहे दीक्षावाक्ये 'पदार्थोच्चारणात् यः क्रमः प्रतीयते, स एव विधीयते' । **टुप्.** ५।१।१।१ पृ. १२८८. * द्वादशाहे 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते' । अत्र प्रागुत्तमादह्नः यानीतराण्यहानि तेष्वेव दशमवर्जं पत्नीसंयाजान्तत्वं व्यवतिष्ठते । तत्रापि न पत्नीसंयाजोत्तरस्य लोपः किन्तु तादृशस्य हारियोजनादेः बर्हिःप्रहरणान्तस्य द्वादशेऽहनि पत्नीसंयाजान्ते अनुष्ठानम् । पूर्वेषु तु अहःसु पत्नीसंयाजैरुपरमः । **वि.** ९।१।९. * द्वादशाहे पुरस्तात् पर्यासात् आगन्तवो भवन्ति बहिष्पवमाने । **भा.** ५।३।४।७ । द्वादशाहस्य षाडहिके द्वितीयेऽहनि स्तोत्रियानुरूपौ पठित्वा अपूर्वास्तृचाः पठ्यन्ते, तत उत्तरः पर्यासः पठितः । तस्मात् पर्यासात् पूर्वमेतेषां

निवेशो दृष्टः । 'स्तोत्रियानुरूपौ तृचौ भवतः, वृषण्वन्तस्तृचा भवन्ति, तृच उत्तमः पर्यासः' इति । **टुप्.** * द्वादशाहे 'पृश्निप्राणग्रहान् व्यतिषजति' इति श्रुतम् । तत्र 'वायुरसि' इत्यादयः दश मन्त्राः पृश्नयो नाम, 'अयं पुरो भुवः' इत्यादयः दश मन्त्राः प्राणा नाम । अत्र मन्त्रेषु ग्रहशब्दो गौणः । (इदम् 'पृश्निप्राणग्रहमन्त्राः' इति शब्दे द्रष्टव्यम्) । **संकर्ष.** ३।३।१९. * द्वादशाहे पृष्ठ्यः षडह उत्पन्नः, स प्रकृतिरूपः । गवामयने पृष्ठ्यः षडहः तद्विकृतिः । **वि.** १०।६।३. * द्वादशाहे प्रत्यहं सुब्रह्मण्याभेदः 'संस्थितेसंस्थिते अहनि' इति वीप्सावचनात् । **भा.** ११।४।६।२५. * द्वादशाहे प्रथममहः प्रायणीयम्, उत्तममहः उदयनीयम् । इमौ द्वावपि आतिरात्रौ । **वि.** १०।५।४, * द्वादशाहे प्रथममहः प्रायणीयम्, गवामयने च प्रथममहः प्रायणीयम्, तयोः प्रकृतिविकृतिभावो नास्ति । इति न धर्मातिदेशः । ७।३।२. * द्वादशाहे प्रायणीयातिरात्रे ज्यौतिष्टोमिको विध्यन्तः । **वा.** ७।४।३।१९. * द्वादशाहे मानसो ग्रहः 'अनया त्वा पृथिव्या पात्रेण समुद्ररसया प्रजापतये त्वा जुष्टं गृह्णामि इति मानसं प्राजापत्यं गृह्णाति' इति विहितः। अयं मानसः दशमस्याह्नोऽङ्गं न भिन्नः इति दशमेऽहन्येव कर्तव्यः । **वि.** १०।६।१३. * द्वादशाहे योगविमोकौ 'अहरहर्युनक्ति, अहरहर्विमुञ्चति' इति प्रात्यहिकयोगदर्शनं प्रधानमात्रार्थत्वे तद्भेदेन भेदोपपत्तेरुपपन्नम् । इतरथा सर्वाद्यन्तयोः सकृदेव अग्नियोगविमोकयोः प्राप्त्यापत्तेः इति भाष्यकारेण सिद्धान्तितम् । **भाट्ट.** ११।३।९. * द्वादशाहे व्यूढे त्र्यनीका 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नां ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे । अथैन्द्रवायवाग्रं अथ द्वे शुक्राग्रे । अथाग्रयणाग्रं अथ द्वे ऐन्द्रवायवाग्रे' इति । अत्र प्रथमे द्वितीये षष्ठे दशमैकादशद्वादशेषु च ऐन्द्रवायवाग्रत्वम् । तृतीये सप्तमाष्टमयोश्च शुक्राग्रत्वम्, चतुर्थपञ्चमयोर्नवमे च आग्रयणाग्रत्वम् । **वि.** १०।५।२४.

⌛ द्वादशाहे व्यूढे भक्षपवमानपरिधिकपालमन्त्रगतानां गायत्रादिशब्दानामेव व्यतिक्रमो नार्थानाम् ॥

छन्दोव्यतिक्रमाद् व्यूढे भक्षपवमानपरिधिकपालस्य मन्त्राणां यथोत्पत्तिवचनमूहवत् स्यात् । १०।५।२६।८८ ॥

भाष्यम्— अस्ति द्वादशाहः, समूढो व्यूढश्च । तत्र व्यूढः 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, अथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे' इति । तत्र व्यूढे इदं समामनन्ति 'छन्दांसि वा अन्योन्यस्य लोकमभिध्यायन्ति, गायत्री त्रिष्टुभः, त्रिष्टुब् जगत्याः, जगती गायत्र्याः' इति । तत्र सन्ति भक्षपवमानपरिधिकपालानि । भक्षास्तावत् 'भक्षेहि (ओमाङोश्च इति पररूपम्) मा (मां प्रति) विश दीर्घायुत्वाय शंतनुत्वाय, एहि वसो पुरोवसो प्रियो मे हृदोऽसि, अश्विनोस्त्वा बाहुभ्यां सघ्यासम्, वसुमद्गणस्य रुद्रवद्गणस्य आदित्यवद्गणस्य (इति पदत्रयं सवनत्रये क्रमेण योज्यम्) सोम देव ते मतिविदः प्रातःसवनस्य माध्यंदिनस्य सवनस्य तृतीयसवनस्य (सवनत्रये यथायथं क्रमेण योजनीयानि) गायत्रच्छन्दसः त्रिष्टुप्छन्दसः जगतीछन्दसः (सवनत्रये क्रमेण योजनीयानि त्रीणि पदानि) अग्निष्टुत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि' इति । तथा पवमानः, 'श्येनोऽसि गायत्रच्छन्दाः, सुपर्णोऽसि त्रिष्टुप्च्छन्दाः, सघाऽसि जगतीच्छन्दाः, अनु त्वाऽऽरभे स्वस्ति मा संपारय' इति च । तथा परिधयः, गायत्रो मध्यमः परिधिः, त्रैष्टुभो दक्षिणः, जागत उत्तरः इति । तथा कपालानि, अष्टाकपालः प्रातःसवने, एकादशकपालो माध्यंदिनीयः, द्वादशकपालस्तार्तीयसवनिकः इति । तत्र संदेहः किं छन्दोव्यतिक्रमे व्यतिक्रमो भक्षमन्त्राणां भक्षणस्य च, पवमानमन्त्राणां पवमानस्य च, तथा परिधीनां कपालानां च, अथवा मन्त्राणां छन्दोव्यतिक्रम इति । किं प्राप्तम् ? मन्त्राणां मन्त्रार्थानां च । कुतः ? अविशेषवचनात् । अविशेषेण भवति वचनम् । 'छन्दांसि वा अन्योन्यस्य

लोकममिध्यायन्ति, गायत्री त्रिष्टुभः, त्रिष्टुब् जगत्याः, जगती गायत्र्याः' इति। न विशेषः श्रूयते मन्त्राणां व्यतिक्रम इति। तस्मान्मन्त्राणामर्थानां चेति। अतो मध्यमः परिधिर्दक्षिणस्थाने स्थापयितव्यः, दक्षिणः उत्तरस्य, उत्तरो मध्यमस्येति। अष्टाकपालो माध्यंदिनीयः कार्यः, एकादशकपालस्तार्तीयसवनिकः, द्वादशकपालः प्रातःसवनीयः इति। तथा, प्रातःसवनीयो भक्षो माध्यंदिनस्य भक्षणस्य स्थाने भक्षयितव्यः, माध्यंदिनस्तार्तीयसवनिकस्य, तार्तीयसवनः प्रातःसवनीयस्येति। तथा, बहिष्पवमानो माध्यंदिनस्य पवमानस्य लोके, [स्थाने] माध्यंदिन आर्भवस्य, आर्भवो बहिष्पवमानस्येति।

एवं प्राप्ते, ब्रूमः। नाविशेषेण छन्दसां व्यतिक्रमः स्यात्। मन्त्रगतो ह्येष व्यतिक्रमः। मन्त्रगतान्येव व्यतिक्रमेयुः। किं कारणम्? शक्यन्ते मन्त्रगतानि विपर्यसितुम्। भक्षादयः पुनर्विपर्यस्ता अपि त एवेति। माध्यंदिनस्य भक्षस्य कालेऽपि प्रातःसवनीयो भक्षो भक्ष्यमाणो नैव त्रैष्टुभः कृतः स्यात्। एवं सर्वत्र। कथम्? स्वकालेऽपि ह्यसौ न गायत्रः। गायत्री हि त्रिष्टुभः स्थानमभ्येति, नागायत्री। न भक्षादयो गायत्रादयः। तस्मादसंभवो भक्षादीनां व्यतिक्रमणस्य। मन्त्रगतानि तु छन्दांसि शक्नुवन्ति अन्योन्यस्य लोकं व्यतिक्रमयितुम्। तस्मात् मन्त्रगतानां छन्दसां व्यतिक्रमः इति।

सोम— पूर्वत्र प्रातिलोम्यबलात् उत्तरपक्षसि छन्दःप्रभृतीनां व्यतिक्रमः, तथेहापि भक्षपवमानादीनां व्यतिक्रमात् स्वस्थानबाधः इत्युत्थितेः **संगतिः। सूत्रार्थस्तु—** भक्षादीनां मध्ये यथाशक्ति छन्दःशब्दमुख्यवृत्त्यनुसारेण छन्दसामेव व्यतिक्रमात् तेषां वचनं ऊहवत् स्यादिति।

वि— 'व्यूढे भक्षादिमन्त्राणामर्थानां च व्यतिक्रमः। मन्त्राणामेव वा, ऽऽद्यः स्यादविशेषेण कीर्तनात्॥, छन्दसां व्यत्ययः प्रोक्तो नार्थानां तेन मन्त्रगाः। गायत्र्याद्या विपर्यस्ता अर्थेषूक्तिः प्रशस्तये॥'

भाट्ट— व्यूढात्मके द्वादशाहे छन्दोव्यतिक्रमः समाम्नातः 'छन्दांसि वा अन्योन्यस्य लोकमभ्यध्यायन् गायत्री त्रिष्टुभः, त्रिष्टुब् जगत्याः, जगती गायत्र्याः' इति। लोकं स्थानम्। त्रिष्टुप्स्थाने गायत्री कर्तव्या इत्यर्थः। सोऽयं छन्दोव्यतिक्रमः किं गायत्र्यादिरूपेण अर्थवादेषु मन्त्रेषु वा स्तुतानामर्थानामपि भवेत्, उत मन्त्राणामेवेति चिन्तायाम्, अर्थानामपि केषांचित् गौण्या वृत्त्या अर्थवादेषु गायत्र्यादित्वेन संकीर्तनात् तेषामपि व्यतिक्रमं मन्यते। तत्र 'गायत्रो मध्यमः परिधिस्त्रैष्टुभो दक्षिणो जागत उत्तरः' इत्यर्थवादात् तेषामपि गायत्र्यादित्वम्। अतश्च 'स्थविष्ठत्वादिगुणको मध्यमः परिधिः दक्षिणस्य स्थाने, दक्षिणश्चोत्तरस्य उत्तरो मध्यमस्य' इति व्यतिक्रमः। तथा सवनीययागाङ्गभूतः प्रातःसवनिकोऽष्टाकपालः अष्टत्वसंख्यावत्त्वात् 'अष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति' इत्यर्थवादे गायत्रीत्वेन संस्तवाच्च 'गायत्रो माध्यंदिनस्यैकादशकपालस्य त्रैष्टुभत्वेन संस्तुतस्य स्थाने कर्तव्यः, स च तार्तीयसवनिकस्य द्वादशकपालस्य जागतत्वेन संस्तुतस्य स्थाने, स च प्रातःसवनिकस्य स्थाने' इति व्यतिक्रमः। एवं पवमानानामपि सवनत्रयस्थानां व्यतिक्रमः। तेषामपि 'श्येनोऽसि गायत्रछन्दाः, सुपर्णोऽसि त्रिष्टुप्छन्दाः, सघाऽसि जगतीछन्दाः' इति मन्त्रेषु गायत्र्यादित्वेन संकीर्तनात्। अत्र च स्तुतिस्वरूपस्य व्यतिक्रमः स्पष्ट एव। एवं च तत्तत्पवमानाङ्गभूतः सर्वोऽपि मन्त्रो व्यतिक्रमयितव्यः। एवं भक्षस्यापि सवनत्रयगतस्य व्यतिक्रमः। तस्यापि 'गायत्रछन्दसस्त्रिष्टुप्छन्दसो जगतीछन्दसः' इति मन्त्रे गायत्र्यादित्वेन संस्तवात्। यद्यपि च भक्षव्यतिक्रमे न भक्षस्वरूपे कश्चित् व्यतिक्रमः। तथापि तत्तद्भक्षमन्त्राणामेव पूर्वोत्तरपदोपेतानां व्यतिक्रमात् व्यतिक्रम इति ध्येयम्। सिद्धान्ते तु न पूर्वोत्तरपदानां व्यतिक्रमः, अपितु गायत्र्यादिपदानामेवेति विशेषः। एवमन्यत्रापि। **इति प्राप्ते,**

अर्थानां स्वतो गायत्र्यादित्वे प्रमाणाभावात् गौणार्थग्रहणस्य च सत्यां गतौ अन्याय्यत्वात् गायत्रीछन्दः एव त्रिष्टुप्स्थाने कुर्यादिति वाक्यार्थावगतेः यत्र मन्त्रे स्वातन्त्र्येण वा अन्यविशेषणत्वेन वा त्रिष्टुप् प्रकाशिता, तत्र गायत्रीप्रकाशनं कार्यम्। अतश्च तत्र त्रिष्टुप्पदलोपो गायत्रीप्रकाशनार्थं तत्पदप्रक्षेपश्चार्थिकः। तेन 'श्येनोऽसि

त्रिष्टुप्छन्दाः ' इत्येवमादिमन्त्रप्रयोगः प्रातःसवनादौ कार्य इति न पदार्थेषु स्थानबाधः ।

मण्डन— 'छन्दोविवृत्या न विवर्ततेऽर्थः ।' २७.

शंकर— ' छन्दोऽन्यस्थानता मनौ । ' मन्त्रे ।

* द्वादशाहे षाडहिके द्वितीयेऽहनि, विवृद्धस्तोमके पञ्चदशे बहिष्पवमाने, चोदकप्राप्त–अनुरूप–पर्यासयोर्मध्ये वृषण्वन्तः तृचाः आगमयितव्याः 'स्तोत्रियानुरूपौ तृचौ भवतः, वृषण्वन्तः तृचा भवन्ति, तृच उत्तमः पर्यासः' इति वचनात् । वि. ५।३।४. * द्वादशाहे संस्थास्तोत्राण्यनाम्नातानि इत्यतो यत्राम्नातानि तत आकाङ्क्षन्ति । वैकृतेषु अहःसु तानि नाम्नातानि । ज्योतिष्टोमे च तान्याम्नातानि । तस्माज्ज्योतिष्टोमादुपचयः । भा. ८।३।५।११, * द्वादशाहे 'संस्थिते पृष्ठ्ये षडहे मध्वाशयेत् घृतं वा' इति श्रूयते । तत्र मधु सत्रिभिर्भक्षयितव्यं क्रत्वर्थत्वात् । १०।६।१२।३२–३३, * द्वादशाहे सत्रे धर्ममात्रं ऋतुयाज्यावरणं आत्रेयाय हिरण्यदानं च कर्तव्यमेव । १०।२। २६।६२.

द्वादशाहे सत्रात्मके सत्रिभिः मधुभक्षणं कर्तव्यं क्रत्वर्थत्वात् ॥

मधु न दीक्षिताः ब्रह्मचारित्वात् । १०।६।१२। ३२ ॥

भाष्यम्— द्वादशाहे श्रूयते ' संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वा ' इति । तत्र संशयः किं सत्रिभिर्मधु भक्षयितव्यम्, नेति । किं प्राप्तम् ? नेति । कुतः ? दीक्षिता हि ते ब्रह्मचारिणः । ब्रह्मचारिणां च मधु प्रतिषिध्यते, ' मधु मांसं च वर्जयेत् ' इति । तस्मान्न प्राश्नीयुरिति । नन्वेतद्वचनं सामान्यं प्रतिषेधं बाधेत । न बाधते इति ब्रूमः । कथम् ? यदि अबाधमानमेतत् द्वादशाहेऽनर्थकं भवेत्, ततो बाधेत । न त्वनर्थकम् । कथम् ? उभयविधं द्वादशाहमङ्गीकृत्य उभयमशितव्यं घृतं मधु वा । तत्र सत्रिणां घृतप्राशनं भविष्यति, अहीने मधुनः प्राशनमृत्विजाम् । एवमुभयं द्वादशाहसंबद्धं भविष्यति विषयभेदेन । न च विरुद्धस्य आचारो भविष्यतीति । तस्मान्न प्राश्नीयुरिति ।

प्राश्येत वा, यज्ञार्थत्वात् । ३३ ॥

भाष्यम्— न चैतदस्ति, सत्रिभिर्मधु न भक्षयितव्यमिति । किं तर्हि ? भक्षयितव्यम् । कथम् ? अविशेषेणोच्यते कर्तृमात्रस्य उभयप्रकारमङ्गीकृत्य द्वादशाहम्, ' संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वा ' इति । उभयं विकल्पेन, न कर्तृव्यवस्थया । तस्मात् सत्रिणोऽपि मधु भक्षयेयुः । यत्तूक्तम्, विषयभेदेनार्थवत्त्वान्न बाधो न्याय्यः, द्वादशाहाङ्गभावश्चैवं सति न विरोत्स्यत इति । अत्रोच्यते । षडहे अतिवृत्ते सत्रसंबद्धे अहीनसंबद्धे वा अविशेषेण मध्वशने घृताशने चोच्यमाने केन व्यवस्थां ब्रूमः । विरोधेनेति चेत् । न । विषयभेदेन विधिप्रतिषेधयोः समाम्नानात् । पुरुषार्थेन प्रतिषेधः, कर्माङ्गत्वेन विधानम् । यदि च प्रतिषेधबलीयस्त्वमिहाङ्गीक्रियते, वचनमनर्थकमेव स्यात् । पक्षे अर्थवत्तेति चेत् । न । नानाविषयत्वात् । तुल्यार्थयोर्हि तुल्यविषययोर्विकल्पो भवति, न नानाऽर्थयोः । नानाऽर्थता चेहाधिगम्यते । कुतः ? विधेः कर्मसाद्गुण्यप्रयोजनत्वात् । प्रतिषेधस्यापि नियमानुष्ठानात् पुरुषस्यादृष्टसिद्धिरिति । तस्मात् प्राश्नीयुरिति ।

सोम— मध्वशनप्रसङ्गात् संगतिः । ब्रह्मणो वेदस्य चर्यं चरणं अध्ययनं इति व्युत्पत्त्या वेदाध्ययनम्, ' आहूतो ब्रह्मचारी ' इत्यादिदर्शनात् मैथुनवर्जनं वा ब्रह्मचर्यशब्दार्थः । मधुमांसवर्जनादिकस्य ब्रह्मचर्यशब्दार्थत्वे ' ब्रह्मचारी मधु नाश्नीयात् ' इत्यादिब्रह्मचारिपदेन इह तद्व्रतविधानानुपपत्तेः । व्रतं च वेदाध्ययनं दीक्षितस्य न विध्यर्हम्, कृतवेदाध्ययनस्यैव कर्मण्यधिकारात्, किंतु मैथुनवर्जनमेव । तथा च मधुनिषेधस्य ब्रह्मचर्यशब्दार्थत्वाभावेन मैथुनवर्जनरूपब्रह्मचर्यमात्रस्य क्रत्वर्थतया चोदकप्राप्तावपि न मध्वशनप्रतिषेधस्य प्राप्तिः । न च चोदकात् ब्रह्मचर्यमात्रप्राप्तावपि ब्रह्मचारिणं आहत्य मध्वशननिषेधादेव तत्प्राप्तिरस्ति इति वाच्यम् । आहत्यवचनस्य पुरुषार्थत्वेन तन्निषेधार्थकतया तद्बलेन क्रत्वर्थमध्वशनप्रापकवचनस्य संकोचायोगात् । ' अस्तु वा ब्रह्मचर्यशब्दस्य मधुमांसवर्जनादिव्रतसमुदायपरत्वम्, तथापि चोदकस्य आनुमानिकस्यैव संकोचः प्रत्यक्ष-

वचनात् युक्तः, न तु चोदकात् प्रत्यक्षवचनस्य संकोचः' इत्यभ्युपगमः ।

वि-- ' मध्वभक्ष्यं भक्ष्यते वा सत्रिभिर्, ब्रह्मचारिणः । निषिद्धत्वादादिमो,ऽन्त्यः पुंस्क्रत्वर्थविभेदतः ॥'

भाट्ट— द्वादशाहे गृहपतिव्रतानि ' न बहु वदेत्, संस्थिते षडहे मध्वाशयेत् घृतं वा ' इत्यादीनि । अत्र आशयेत् इत्यस्य णिजन्तत्वात् प्रकृतान् अध्वर्य्वादीनिति संबध्यते । अतश्च अध्वर्य्वादिकर्तृकं मध्वशनमपि षडहाङ्गत्वेनादृष्टार्थे आर्थिकेन विधिना विधीयते । तच्च तेषां सत्रात्मकद्वादशाहे भवेत् न वा, **इति चिन्तायाम्**, सत्रे अध्वर्य्वादीनां यजमानत्वेन दीक्षितत्वात्, दीक्षितानां च ब्रह्मचर्यविधानात्, ब्रह्मचारिणश्च मधुभक्षणप्रतिषेधात्, षडहस्य च घृतभक्षणेनापि साङ्गतोपपत्तेः, मध्वशनविधेश्चाहीनविषयत्वेनाप्युपपत्तेः, न सत्रे मध्वशनम् । **इति प्राप्ते**, ब्रह्मचर्याश्रमपुरस्कारेणोक्तस्य मधुवर्जनस्य गृहस्थाधिकारके सत्रे अप्रसक्तेः, दीक्षितपुरस्कारेणोक्तस्य ब्रह्मचर्यस्य च मैथुनवर्जनरूपत्वेन मधुवर्जनरूपत्वाभावात्, तद्रूपत्वेऽपि वा रागप्राप्तमधुभक्षणविषयत्वेन तस्य वैधमधुभक्षणविषयत्वाभावात्, तद्विषयत्वेऽपि वा तस्येहातिदेशप्राप्तत्वेन औपदेशिकमधुभक्षणे अहीनमात्रविषयतायाः कल्पयितुमशक्यत्वात् अहीनवत् सत्रेऽपि मधुघृतयोर्विकल्पः ।

सण्डन-- ' दीक्षितैः प्राश्यते मधु । '

शंकर-- ' सत्रे मध्वशनं भवेत् । '

* द्वादशाहे सत्ररूपे दीक्षावाक्ये आनुपूर्व्येण कीर्त्यमानानां दीक्षाणां विततिविशेषः प्रतीयते स एव विधीयते । विततिविशेषैकार्थविधानादेकं वाक्यम् । अनभिहितोऽपि प्रातिस्विकेन विधिना विधीयमानत्वात् श्रुतिक्रम इत्युच्यते । यदा तु पौर्वापर्ये क्रमः तदा क्त्वाशब्देन तदभिधानात् अनभिधानं नास्ति प्रतिदीक्षं च तद्भेदात् नाना वाक्यानि इति विवेकः । **के.** ५।१।१।१.

* द्वादशाहे समूढे त्र्यनीका ' ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः । अथेतरेषां नवानामह्नां ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् । अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्' इति । त्रयाणामनीकानां समाहारः त्र्यनीका । द्वितीयादिनवमान्तानि अष्टौ एकादशं चेति नवसु अहःसु मध्ये द्वितीये पञ्चमे अष्टमे चाहनि ऐन्द्रवायवाग्रत्वम् । तृतीये षष्ठे नवमे चाहनि शुक्राग्रत्वम् । चतुर्थे सप्तमे एकादशे चाहनि आग्रयणाग्रत्वम् । प्रायणीयं उदयनीयं दशमं चाहः ऐन्द्रवायवाग्रमेव इति । **वि.** १०।५।२३,

* द्वादशाहे सवनीयपश्वादिकमङ्गं भेदेनैवानुष्ठेयं न तु सकृत्, मुख्यकालानां भेदात् । ११।४।६.

द्वादशाहे सुत्याकालीनानामङ्गानामावृत्तिः ॥

भेदस्तु तद्भेदात्, कर्मभेदः प्रयोगे स्यात्, तेषां प्रधानशब्दत्वात् । ११।४।६।२६ ॥

भाष्यम्— अथ यानि प्रधानैः अपृथक्कालानि अङ्गानि तेषु चिन्त्यते किं तान्यपि तन्त्रं अथवा भेदेनेति । किं प्राप्तम् ? तन्त्रमिति । किं कारणम् ? एवं सहत्वस्य वक्ता प्रयोगवचनोऽनुग्रहीष्यते ' द्वादशाहेन प्रजाकामं याजयेत् ' इति । तदुक्तं ' विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ' (११।१।१०।६५) इति । **एवं प्राप्ते**, **ब्रूमः** । भेदस्तु स्यात् । कुतः ? तद्भेदात् । तदित्यनेन पूर्वसूत्रनिर्दिष्टः कालः प्रतिनिर्दिश्यते । कालभेदात् । काले भिद्यमाने तन्त्रभेदो भवति । यथा दर्शे पूर्णमासेऽपि । इहापि कालभेदः । अद्य श्वः परश्व इति । तत इहापि कर्मभेदः स्यात् । करणभेदः इत्यर्थः । कथं पुनरङ्गानां कालभेदो विज्ञायते ? तेषां प्रधानशब्दत्वात् । प्रधानशब्दगृहीतान्यङ्गानि यत्र प्रधानं तत्र विज्ञायन्ते । यदद्य प्रधानं तस्याद्यकालान्यङ्गानि । यत् श्वस्तस्य श्वःकालानि । तस्माद्भेदः ।

तथा चान्यार्थदर्शनम् । २७॥

भाष्यम्— ' पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते ' इति भेदेनाह्नां पत्नीसंयाजान्ततां दर्शयति ।

श्वःसुत्यावचनं तद्वत् । २८ ॥

भाष्यम्— ' संस्थितेसंस्थितेऽहन्यग्नीदाग्नीध्रागारं प्रविश्य सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति प्रेष्यति ' इति, संस्थितेसंस्थिते इति वीप्सावचनात् सुब्रह्मण्याभेदं दर्शयति ।

पश्वतिरेकश्च।२९॥

भाष्यम्—पश्वतिरेकश्च दृश्यते 'य एकः पशुरतिरिच्यते, स ऐन्द्राग्नः कार्यः' इति। न तावदतिरिच्यते, यद्येकैको न भवति एकादश एते पशवः, द्वादशाहानि। तत्पश्वालम्भभेदः उपपद्यते। तन्त्रभावे सकृदेव ऐकादशिनानालभेत। तस्मादपि भेदः।

सोम—दीक्षादिवत् सुत्याकालानामङ्गानामपि तन्त्रत्वं इत्युत्थितेः **संगतिः**। **सूत्रार्थस्तु**--यतः कालभेदात् प्रधानकर्मणामनुष्ठाभेदः, अतः प्रयोगे अङ्गानामपि भेदः स्यात्, तेषां प्रधानविधिविधेयत्वात् इति।

वि—'सवनीयादिकं तत्र सकृत् स्याद् भिद्यतेऽथवा।, प्रयोगैक्यात् सकृ, न्मैवं मुख्यकाले विधानतः॥'

भाट्ट— तदेवं सुत्याबहिर्भूतानां दीक्षोपसदादीनामग्नीषोमीयाङ्गानां तन्त्रत्वात्, पत्नीसंयाजोत्तरकालीनानां च तन्त्रत्वात्, एकोपक्रमावसानत्वेन द्वादशानामपि सुत्यानामेकप्रयोगत्वं तावदविवादम्। अहीनात्मकत्वे च तस्मिन् दक्षिणैकत्वस्य स्थापितत्वादपि तथा। अतश्च सुत्याकालीनानामपि आरादुपकारकाणामङ्गानां सवनीयपशुसवनीयहविरादीनामपि तन्त्रत्वमेव। न च गृह्यमाणविशेषत्वात् तेषामावृत्तिः, तज्जन्योपकारस्य अग्नीषोमीयादिजन्योपकारस्येव द्वादशाहपरमापूर्वं यावत् अवस्थितेरावश्यकत्वेन पुनःपुनः करणे प्रयोजनाभावात्। यदि तु प्रकृतौ परमापूर्वस्य अतिरिक्तस्याभावात्, सर्वाभ्यासापूर्वजन्यसुत्यापूर्वं प्रत्येव सर्वेषामुपयोगात्, द्वादशाहे तत्सुत्यापूर्वाणां भेदात् सुत्याकालीनाङ्गानामावृत्तिरित्युच्येत, ततस्तदकालीनाङ्गानामपि प्रकृतौ तदपूर्वप्रयुक्तत्वात् तद्भेदेन तद्भेदापत्तिः। अथ एतद्भेदेऽपि प्रयाजादाविव अन्तिमापूर्वेणैव अग्नीषोमीयादिजन्योपकारनाशात् सकृदेव करणमित्युच्येत, ततः सवनीयादिजन्योपकारस्यापि तेनैव नाशात् प्रतिसुत्यं करणे प्रमाणाभावः। नहि अग्नीषोमीयादौ परमापूर्वप्रयुक्तत्वं सवनीयादौ च सुत्यापूर्वप्रयुक्तत्वं इत्यत्र प्रमाणमस्ति, प्रकृतौ एकापूर्वं प्रत्येव सर्वेषामुपयोगात्। अभ्यासापूर्वाव्यवहितापूर्वत्वेनैव प्रकृतौ प्रयोजकत्वाच्च। इति प्राप्ते, 'प्रायणीयं प्रथममहः' इत्याद्युत्पत्तिवाक्येषु अहःपदेन अहःसाध्यसुत्याऽभिधानात् अहःकालविशिष्टसुत्याख्यकर्मविधिप्रतीतेः, कालविधौ च सत्यपि महाप्रयोगैक्ये सुत्यामात्रकालीनाङ्गविशिष्टसुत्याप्रयोगविधेरावश्यकत्वात् तावत्प्रयोगविधिभेदादेव तत्कालीनाङ्गानामावृत्तिः। अत एव सुत्याकालबहिर्भूताङ्गानां अन्तिमसुत्याऽपूर्वेणैव नाशः। सुत्याकालीनाङ्गानां तु तत्तत्सुत्याऽपूर्वेणेत्यपि प्रयोगभेदादवसीयते। अत एव 'पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते, संस्थितेसंस्थितेऽहनि अग्नीदाग्नीध्रागारं प्रविश्य सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति प्रेष्यति' इत्यादिलिङ्गदर्शनान्यपि आरादुपकारकाङ्गावृत्तौ उपपद्यन्ते। संनिपत्योपकारकाङ्गावृत्तिस्तु अविवादैव।

मण्डन--'सुत्याहाङ्गं पृथग्भवेत्।'

शंकर--'सुत्याकालाङ्गभित् त्विह।' इह द्वादशाहे। भित् भेदः।

* द्वादशाहे सुन्याकालीनसुब्रह्मण्याह्वानस्यावृत्तिः। **भा.** ११।३।११।२२–३२. * द्वादशाहे सोमोपावहरणं द्वादशेऽहनि मानवाससैव, न तस्मिन् अहनि वासः पृथक्। इतरेषु अहःसु तु तत् प्रत्यहं भिन्नम्। **के.** १०।६।२१।७८.

* **द्वादशाहान्तर्गतदशमाहाङ्गं मानसो ग्रहः। भा.** १०।६।१३।३४–४४.

* **द्वादशाहादौ** अहर्गणे उपसत्कालीनं सुब्रह्मण्याह्वानं प्रधानभेदेऽपि न भिद्यते, किन्तु तन्त्रम्। **वि.** ११।३।१०, * द्वादशाहादौ अहर्गणे प्रत्यहं क्रियमाणसोमोपावहरणवासः उपावहरणकाले एव कर्तव्यं न मानकाले। १०।६।२२, * द्वादशाहादौ अहर्गणे बहिष्पवमाने उद्गात्राद्यपच्छेदे सर्वोऽहर्गणो नावर्तनीयः, किन्तु तदेवैकमहरावर्तनीयं यस्मिन्नपच्छेदः। ६।५।२१. * द्वादशाहादौ अहर्गणे सोमोपावहरणवस्त्रस्य ग्रावस्तुते दानविधानम्। **भाट्ट.** १०।६।१९. * द्वादशाहादौ अहर्गणे हविर्धानशकटे अवस्थितात् सोमात् प्रत्यहं कियांश्चित् सोमभागः पृथक्कृत्योपावहर्तव्यः। तदर्थं पृथक् पृथक् वासः संपादनीयम्। तच्च वासःसंपादनं उपावहरणकाले एव न मानकाले, उत्तमाहनि तु मानवाससैवोपावहरणम्। **वि.** १०।६।२१–२२.

* **द्वादशाहगतस्य** दशमस्याह्नः मानसान्तता (मानसग्रहान्तता) वचनेनोक्ता । **भा.** ९।१।८।२९, * **द्वादशाहगते** पृष्ठ्ये षडहे चतुर्थेऽहनि त्रैशोकं नाम साम उत्तराग्रन्थपठितयोरुत्तरयोर्बृहत्योरेव गेयम् । ९।२। ५।२१–२४ वर्णकं २. * द्वादशाहगते पृष्ठ्ये षडहे प्रकृतिरूपे , षट्सु अहःसु क्रमेण रथंतर--बृहत्–वैरुप–वैराज–शाक्वर–रैवतानि सामानि विहितानि । **वि.** १०।६।३, * द्वादशाहगते पृष्ठ्ये षडहे मध्वशनं त्रयस्त्रिंशेऽहनि कर्तव्यम्, गवामयने उत्तरे पक्षसि तु त्रिवृत्संनिधौ कर्तव्यम् । १०।६।९.

* **द्वादशाहगतप्रायणीयनाम्ना** धर्माणां गवामयनगतप्रायणीये नातिदेशः । **भा.** ७।३।२।५.

* **द्वादशाहधर्माणां** पञ्चोक्थ्य–शतोक्थ्य–शताग्निष्टोम–शतातिरात्रादिषु संस्थागणेषु अतिदेशः, परन्तु तत्रतत्र तत्तःसंस्थता । **भा.** ८।३।४।८–९.

* **द्वादशाहधर्मातिदेशः** अहर्गणेषु । **भा.** ८।१।१०। १७.

* **द्वादशाहन्यायः** । सारस्वते हि (सत्रे मित्रावरुणयोरयने नाम) द्वादशाहन्यायेनैव उभयोः पक्षयोः (दर्शनं) ज्योतिष्टोमपूर्वकत्वात् । **वा.** २।४।२।२८.

* **द्वादशाहप्रकरणे** ‘ द्वादशोपसदः ’ इति विहितत्वात् तत्प्रकृतित्वेन सर्वाहीनेषु तत्प्राप्तिः । **वा.** ३।३।८। १६ पृ. ८१४.

* **द्वादशाहप्रकृतिकेष्वपि** सत्राहीनेषु वृषण्वतामेव तृचानां चोदकवशात् प्राक् पर्यासान्निवेशः, अन्येषां तु पर्यासोत्तरमेव बहिष्पवमाने । **रत्न.** ५।३।४।९.

* **द्वादशाहविकृतिषु** रथंतरात्मकनिमित्ताभावेऽपि ऐन्द्रवायवाग्रत्वम् । **वि.** १०।५।२३.

* **द्वादशाहसंबन्धिब्रह्मसामस्तोत्रोद्देशेन** विहितं बार्हद्गिरादि नैमित्तिकं निमित्ताभावे अनुलोमाधिकारके प्रयोगे न ग्राह्यम् । निमित्ताभावेऽपि अनुष्ठाने निमित्तसंबन्धस्य वैयर्थ्यापत्तेः । **भाट्ट.** ४।३।२.

⧗ **द्वादशाहिकमहर्गणे तत्प्रकृतित्वादैकाहिकमधिकागमात् तदाख्यं स्यादेकाहवत् । ७।४।३।१३॥**

गवामयने ज्योतिः गौः आयुः इति त्रीण्यहानि । एवं ज्योतिर्गौरायुः इति स्वतन्त्रा एकाहविशेषाः । तत्र गावामयनिकेषु ज्योतिरादिषु द्वादशाहिकधर्माः प्राप्यन्ते ऐकाहिकाश्च । तत्र ऐकाहिकैरविरुद्धाः द्वादशाहिका यथाप्राप्तं क्रियन्ते । विरुद्धेषु तु संशयः, किं द्वादशाहिकः स्यात् ऐकाहिको वेति । तत्र सूत्रेण पूर्वपक्षमाह । अहर्गणे गवामयनगते ज्योतिरादौ द्वादशाहिकं धर्मजातं स्यात् । तत्प्रकृतित्वात् गवामयनस्य द्वादशाहिकप्रकृतिकत्वात् । ननु तर्हि कथं तत्र ऐकाहिकसमाख्यायाः प्रवृत्तिः ? उच्यते । अधिकागमात् ऐकाहिकं तदाख्यं स्यात् । ऐकाहिकं एकाहसंबन्धि ज्योतिर्गौरायुः इति समाख्यानं ज्योतिष्टोमात् अधिकानां धर्माणां आगमात् स्यात् । एकाहवत् । यथा एकाहेष्वपि ज्योतिरादिषु ज्योतिर्गौरायुः इति आख्या ज्योतिष्टोमात् अधिकानां धर्माणां आगमादेव भवति , तद्वत् इहापि । तस्मात् अहर्गणे ज्योतिरादौ द्वादशाहिकं धर्मजातं स्यात् इति पूर्वः पक्षः ।

अत्र भाष्यम्– अधिकागमात् तदाख्यं स्यादेकाहवत् इत्यस्यापरा व्याख्या । ये द्वादशाहे अधिकाः ऐकाहिकेभ्यः केचिद्धर्माः ‘ अभिप्लवोऽन्वहं भवति ’ ‘ गौरिवीतं (साम) अन्वहं भवति ’ इति । तेषामधिकानां आगमात् तदाख्यं स्यात् एतत् द्वादशाहिकमहः, ज्योतिराख्यं आयुराख्यं वा । एकाहवत् । यथा षडहगतानां पृष्ठानां भावात् एकाहो विश्वजित् ‘षडहः’ इत्युच्यते ‘तमेकाहं षडह इत्याचक्षते’ इति तद्वत्–इति ।

लिङ्गाच्च । १४ ॥

पूर्वपक्षे हेत्वन्तरं लिङ्गमाह । ‘द्वादशोपसदो भवन्ति’ इति द्वादशोपसत्तारूपात् लिङ्गात् द्वादशाहिक एव विध्यन्त इति ज्ञायते । परस्वेकादशिन्यां द्वादशाहिको धर्मः प्रत्यहमेकैक इति विभज्य विधानमपि विहारदर्शनरूपं लिङ्गम् ।

न वा प्रत्यक्षत्वादधिकानामशब्दत्वम् । १५ ॥

गवामयनगते ज्योतिरादित्र्यहरूपे अहर्गणे द्वादशाहिकधर्माः कर्तव्या इति पूर्वपक्षं सूत्राभ्यां प्राप्तं न वा इति शब्दाभ्यां निषिध्य सिद्धान्तमाह । न वा द्वादशाहिकं धर्मजातं कार्यम्, किन्तु ऐकाहिकम् । चोदकेन द्वादशाहिकं

प्राप्तम्, नामधेयेन ऐकाहिकम्। नामधेयं च चोदकात् बलीयः, प्रत्यक्षत्वात्। प्रत्यक्षं नामधेयं चोदकं तु आनुमानिकम्, प्रत्यक्षं चानुमानाद्बलीयः। ननु अधिकार्थे नामधेयं इत्युक्तम्। उच्यते। अधिकानां अशब्दत्वम्। अधिकानां शब्दो नास्ति वाचकः। ज्योतिरादिशब्दाश्च कर्मनामधेयानीत्युक्तम् (१।४।१।२)। यत्तु 'अधिकागमात् तदाख्यम्' इत्युक्तं तत्र ब्रूमः। वचनादधिकागमो न नामधेयेन। तस्मात् द्वादशाहिक–ऐकाहिकधर्मविरोधे नामधेयेन ऐकाहिकं धर्मजातं कर्तव्यमिति सिद्धान्तः।

लिङ्गं संघातधर्मः स्यात् तदर्थापत्तेर्द्रव्यवत्। १६ ॥

लिङ्गमुपदिष्टं द्वादशोपत्तारूपम्, परिहरति सिद्धान्ती। लिङ्गं संघातधर्मः अहःसंघातस्य धर्मः स्यात्। तदर्थापत्तेः, तस्य गवामयनस्य अर्थेन कार्येण आपत्तेः प्राप्तेः। गवामयनं द्वादशाहकार्यापत्त्या द्वादशाहधर्मान् गृह्णाति, न चोदकेन। तत्स्थानापन्नः तद्धर्मं लभते इति न्यायात्। द्रव्यवत्। यथा व्रीहौ ये धर्माः श्रुताः, ते व्रीहिकार्यापन्नेषु नीवारेषु द्रव्येषु भवन्ति तद्वत्। द्रव्ये इव द्रव्यवत्।

न वाऽर्थधर्मत्वात् संघातस्य गुणत्वात्। १७॥

द्वादशोपसत्तालिङ्गं संघातधर्मः इति यत् सिद्धान्तिना उक्तं तत् पूर्वपक्षी परिवर्तयति। न वा लिङ्गं संघातधर्मः। अर्थधर्मत्वात् अर्थस्य प्रधानस्य तत्तदहरपूर्वस्यैव धर्मः द्वादशोपसत्ता। संघातस्य तु गुणत्वात् अहर्गुणत्वात्। अहानि प्रधानानि, संघातः तद्गुणः। एवं संघातस्य अहर्गुणत्वात् द्वादशोपसत्तायाश्च अर्थधर्मत्वात् न द्वादशोपसत्तालिङ्गं संघातधर्मः।

अर्थापत्तेर्द्रव्येषु धर्मलाभः स्यात्। १८॥

सिद्धान्तिना उक्तं दृष्टान्तं वैषम्येण परिहरति पूर्वपक्षी। व्रीहिकार्यापन्नेषु नीवारेषु द्रव्येषु धर्मलाभः व्रीहिधर्मलाभः अर्थस्य पुरोडाशनिष्पादनकार्यस्य आपत्तेः प्राप्तेः स्यात्। द्वादशोपसत्त्वं तु नैव संघातस्य धर्मः इति विषमो दृष्टान्तः।

प्रवृत्त्या नियतस्य लिङ्गदर्शनम्। १९॥

द्वादशोपसत्तारूपस्य लिङ्गस्य पूर्वपक्षिणा उक्तस्य गतिमाह सिद्धान्ती। 'द्वादशोपसदो भवन्ति' इति द्वादशोपसत्तारूपं इदं लिङ्गदर्शनं प्रवृत्त्या मुख्यानुसारेण या प्रवृत्तिस्तया नियतस्य द्वादशोपसत्त्वस्य स्यात्, न चोदकप्राप्तस्य। चोदकस्य नामधेयाद्दुर्बलत्वात्। तथाहि। गवामयने द्वादशाहिकं प्रायणीयोऽतिरात्रः प्रथममहः। तस्य धर्मो द्वादशोपसत्त्वम्। उत्तरभाविनां ज्योतिर्गौरायुर्नामकानामह्नां षडाद्युपसत्त्वम्। उभयोर्गवामयने संनिपाते प्रथमातिक्रमे कारणाभावात् द्वादशोपसत्त्वं नियतं इति। तथा च इदं लिङ्गदर्शनं उपसद्भिन्नविध्यन्तातिदेशे न नियामकम्। किन्तु ज्योतिरादिनामधेयेन एकाहविध्यन्तातिदेशे एवेति।

विहारदर्शनं शिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात्। २०॥

गवामयनगते ज्योतिर्गौरायुः इति त्र्यहे द्वादशाहिकविध्यन्तस्यातिदेशः इति पूर्वपक्षे विहारदर्शनरूपं लिङ्गं द्वितीयं 'लिङ्गाच्च' इत्यत्र प्रदर्शितम्। तस्य अन्यथोपपत्तिप्रदर्शनार्थं इदं सिद्धान्तसूत्रम्। शिष्टस्य विहारदर्शनं शिष्टस्य उपदिष्टस्य विहारस्य दर्शनं अनारभ्यवादानां प्रकृत्यर्थत्वात् उपपद्यते। न तेन ज्योतिरादिषु द्वादशाहिकविध्यन्तस्य प्राप्तिर्भवति। अनेन च विहारदर्शनरूपेणापि लिङ्गेन ज्योतिरादिषु द्वादशाहिकधर्माणां ऐकाहिकधर्माणां च विरोधे द्वादशाहिकधर्माणां अतिदेशः साधयितुं न शक्यते। तस्मात् ज्योतिरादिनामधेयेन एकाहधर्माणामेव अतिदेशः इति सिद्धान्तः। **के.**

* **द्वादशाहिकं** द्वादशोपसत्त्वं धर्मं गवामयने दर्शयति 'द्वाभ्यां लोमावद्यति' इत्यादिना। **भा.** ८।१।१०।१७, * **द्वादशाहिकानि** अहानि प्रायेण उक्थ्यसंस्थानि द्वावग्निष्टोमौ। ८।३।५।१०, * **द्वादशाहिको** धर्मो द्वादशोपसत्त्वम्। ७।४।३।१४, * द्वादशाहिको विधिस्तन्त्रदृष्टो वसतीवरीपर्यन्तः अवभृथादिश्च। ११।३।११।३१, * **द्वादशाहिकानामह्नां** सामान्येन पत्नीसंयाजान्तता। विशेषेण तु दशमस्याह्नो मानसान्तता उच्यते। १०।६।१३।४४.

* **द्वादशाहिकदशमाहाङ्गं** मानसो ग्रहः। मानसग्रहाधिकरणम्। **भा.** १०।६।१३।३४–४४.

* **द्वादशाहिकदशाहधर्माणां** द्विरात्राद्यहर्गणेषु अनुष्ठानम् । द्विरात्रन्यायः । **भा.** १०।५।४।१२–१३.

* **द्वादशाहिकधर्माणां** अहर्गणेषु अतिदेशः । **भा.** ८।१।१०।१७, * द्वादशाहिकधर्माणां शतोक्थ्यादिषु संस्थागणेषु अतिदेशः । ८।३।४।८–९.

* **द्वादशाहिकसप्ताहधर्माणां** जनकसप्तरात्रे अतिदेशः, तत्र अग्रिमचतुरहे त्रिवृत्ता विधीयते । जनकसप्तरात्राधिकरणम् । **भा.** ८।३।२।३–५.

* **द्विरवदानं** दध्नो गृहीत्वा पयसो ग्राह्यम् । उपस्तरणाभिघारणयोस्तु तन्त्रम् । कल्पसूत्रेषु तु पयसो द्विरवदानं गृहीत्वा पश्चात् दध्नः इत्युक्तम्, तैत्तिरीयश्रुतौ तादृशक्रमस्य वाचनिकत्वात् । होमस्तु तन्त्रेणैव । **भाट्ट.** ५।२।३.

⌛ **द्विरुक्तत्वापत्तिलक्षणो न्यायः** (३।६।१।२)।

'प्रकृतौ वा' (३।६।१।२) इति अनारभ्यवादाधिकरणसिद्धान्तसूत्रेण खादिरत्वादेः प्रकृतिविकृत्यर्थत्वे (बाधकतया) द्विरुक्तत्वापत्तिलक्षणो न्यायो य उक्तः, स एव 'तत्प्रकृत्यर्थम्' इति आधानाधिकरणपूर्वपक्षसूत्रेण (३।६।५।१४) आधाने अतिदेशात् दृढीकरणेन प्रतिपादितः । **सु.** ३।७ पृ. ४१.

⌛ **द्विरुक्तत्वन्यायः** । 'प्रकृतौ वाऽद्विरुक्तत्वात्' इति सूत्रोक्तो हेतुरेवात्र न्यायः । सूत्रार्थस्तु अनारभ्याधीतं पर्णमयीत्वादि प्रकृतौ एव निविशते न विकृतौ । विकृतौ तु अतिदेशेनैव प्राप्नोति । एवं सति अद्विरुक्तत्वं भवति । विकृतावपि विधाने तु द्विरुक्तत्वं दोषः अतिदेशेन सिद्धे पुनर्विधानात् इति । **के.** ३।६।१।२.

* अनारभ्याधीतः प्रवर्ग्यः श्रुतः । तस्य च 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति ज्योतिष्टोमाङ्गत्वेन विनियोगः अव्यभिचरितक्रतुसंबन्धसहकृत**द्विरुक्तत्वन्यायेन** तदुपस्थितेः । **भाट्ट.** ३।३।१२. * विधिः अतिदिष्टेष्वपि अङ्गेषु शस्त्रादिषु उपदेशात् एव प्रवर्तते न **द्विरुक्तत्वन्यायात्**, अतिदेशतः कर्तव्यत्वेन उद्दिश्य आचमनविधानात् कर्तव्यतायाश्च अतिदिष्टेष्वपि औपदेशिकत्वात् । **बाल.** पृ. ३६. * वस्तुतस्तु यूपोद्देशेन विहितस्य कालस्य द्विरुक्तत्वन्यायसहकृताव्यभिचरितक्रतुसंबन्धादेव दैक्षार्थत्वसंभवे । **भाट्ट.** ११।३।३.

⌛ **द्विर्बद्धं सुबद्धं भवतीति न्यायः** । स्पष्टाऽभिप्रायकोऽयम् । किञ्च– शब्देन्दुशेखरे स्त्रीप्रत्ययप्रकरणे द्योत्यविषये हि उक्तार्थानामप्रयोग इति पूर्वोक्तन्यायो न संचरतीत्यभिप्रेत्य हृदि व्यतिलुनीते इत्यादौ द्विर्बद्धं सुबद्धं भवतीति न्यायेन समुच्चयस्य दृष्टत्वादित्युक्तमिति । **साहस्री.** ५८१.

* '**द्विर्हविषोऽवद्यति**' इत्यर्थप्राप्तस्यावदानस्य विशेषमात्रस्य विधानम् 'हविषो द्विः' इति । **के.** ५।२।४।६. * 'द्विर्हविषोऽवद्यति' इति उपस्तरणाभिघारणाभ्यां सह यत् चतुरवत्तम्, तस्मिन् हविर्विषयं अवदानद्वित्वं विधातुं उच्यते । **वि.** ५।२।४.

* '**द्वौ अग्नी** प्रणयतः ।' अयं कर्मतः वाचनिको व्यवस्थितविकल्पः । **बाल.** पृ. १६०. * द्वौ आनय इत्युक्तः यथा पुमांसौ आनयति न स्त्रीपुंसौ, तथा 'वसानौ' इत्युक्ते पुमांसौ इति गम्यते न तु स्त्रीपुंसौ । **भा.** ६।१।५।२२ पृ. १३६५.

⌛ **द्वौ नञौ प्रकृतमर्थं गमयतः इति न्यायः** । 'करणेषूपदिष्टेषु याऽर्थात् साध्यत्वकल्पना । ताभ्यां गुणविधाने न नास्ति मत्वर्थलक्षणा ॥' (वा. पृ. ३३७) करणेषु उपदिष्टेषु सत्सु या अर्थात् साध्यत्वकल्पना, तस्यां च गुणविधाने मत्वर्थलक्षणा न नास्ति, किन्तु अस्ति, इति 'द्वो नञौ०' इति न्यायेन योज्यः । **सु.** पृ. ४४७.

* '**द्वाभ्यां** लोमावद्यति द्वाभ्यां मांसम्' इत्यादिना द्वादशोपसत्त्वं द्वादशाहिकं धर्मं गवामयने दर्शयति । **भा.** ८।१।१०।१७, * **द्वयोः** एकार्थत्वात् समुच्चयो न संभवति । ८।१।१५।२६. * 'द्वयोः प्रणयन्ति' इत्यनेन मध्यमयोर्द्वयोः पर्वणोः प्रणयनम् । **बिन्दु.** ७।३।९। २३–२५. * द्वयोर्हि साकाङ्क्षयोः संबन्धो भवति । **टुप्.** ११।१।२।६.

* **द्व्यर्थत्वं च** (वाक्यस्य) विप्रतिषिद्धम् । **भा.** ७।१।१।६.

* **व्यवदानं** यदैव आहवनीये निक्षिप्यते, तदैव याज्याऽनुवाक्याभ्यां समस्तविषयदेवतासंकल्पोत्थापनं क्रियते । **वा.** ३।४।१४।४१ **पृ.** ९८२. * **व्यवदानं** होमसंबद्धम् ‘ व्यवदानं जुहोति ’ इति । **भा.** ६।४।१।२. * **व्यवदानस्य** हविःसंस्कारकस्यापि अवत्तोद्देशेन होमविधानात् लाघवेन अवत्तहोमस्यैव प्रयोज्यत्वे अवदानांशेऽपि पृथक्प्रयोज्यत्वाकल्पनात् न पृथक्पदार्थत्वम् । **भाट्ट.** ५।२।७. * **व्यवदाने** अधिकमपि प्रक्षेपांशं गते सति उत्पत्तिवाक्यशिष्टं यागसाधनत्वं समस्तेनाष्टाकपालेन प्रतिपन्नमेवेत्यविरोधः । **वा.** ३।४।१४।४१ **पृ.** ९८२.

* **व्यवदानमात्रेण** अनुसमयं पूर्वपक्षयित्वा व्यवदानादिना प्रदानान्तेन अनुसमयं सिद्धान्तयिष्यति । ‘ मुष्टिकपालावदान ’ इत्यत्राधिकरणे (५।२।३।४) । **सु. पृ.** १३२७.

* **व्यवदानवाक्यं** (द्विर्हविषोऽवद्यति) नावदानविधायकं चतुरवत्तवाक्ये (चतुरवत्तं जुहोति) अवदानविशिष्टहोमविधानात्, किन्तु ‘ द्विः ’ इति संख्यामात्रमेव विदधाति । **सोम.** ५।२।३.

* **व्यहकालता** नाम प्रकृतौ दर्शे पर्वणि अग्न्यन्वाधानादिकं प्रतिपदि इष्टिः इति । **वि.** ५।१।११, * व्यहकालत्वं चोदकप्राप्तं विकृतिषु ‘ य इष्टया पशुना ’ इत्यादिवचनेन बाध्यते । ५।४।७, * व्यहकालत्वं पर्वण्यग्न्यन्वाधानं इध्माबर्हिषोः संपादनं च, प्रतिपदीष्टिः, इति प्रकृतौ दृष्टम् । ५।४।७.

⧗ व्याधानं च द्वियज्ञवत् । ६।१।५।२२ ॥

‘ क्षौमे वसानौ अग्निमादधीयाताम् ’ इति वाक्ये यत् अग्न्याधानमुक्तं तत् व्याधानम्, द्वयोः पुरुषयोः संभूय आधानं स्यात् । यथा दंपत्योः संभूय कर्म तद्वत् इति चशब्दार्थः । वसानौ आदधीयातां इति द्विवचनेन द्वयोः पुरुषयोरुक्तत्वात् । द्वियज्ञवत् इति दृष्टान्तः । ‘ एतेन द्वौ राजपुरोहितौ यजेयाताम् ’ इति राज्ञः पुरोहितस्य चेति द्वयोः कुलायः नाम याग उक्तः, तद्वत् । इति पूर्वः पक्षः ।

गुणस्य तु विधानत्वात् पत्न्या द्वितीयशब्दः स्यात् । २३ ॥

पूर्वपक्षं सूत्रेण प्राप्तं तुशब्देन निरस्यन् सिद्धान्तमाह । नात्र वाक्ये द्वयोः पुरुषयोः संभूय एकमाधानमुक्तम् । वसानौ आदधीयातां इति द्वितीयशब्दः द्वित्ववाचकद्विवचनरूपः शब्दः द्वितीयं पुरुषमभिप्रेत्य न प्रयुक्तः स्यात् किन्तु पत्न्या द्वितीयशब्दः स्यात् द्वितीयां पत्नीमभिप्रेत्य द्विवचनं प्रयुक्तम् । तत्र अग्न्याधानं अन्यतः प्राप्तम् । वस्त्रपरिधानं च लोकत एव प्राप्तम् । क्षौमत्वरूपो गुणस्तु अन्यतो न प्राप्तः । तदर्थमेतद्विधानम् । विधीयते इति विधानं विधानत्वं विधीयमानत्वं इत्यर्थः । ‘ अतसी स्यादुमा क्षुमा ’ इत्यमरः । अतसी तन्तुभिः (अतसी–आळशी, जवस) निर्मितं वस्त्रं क्षौमम् । वस्त्रगतस्य क्षौमत्वरूपस्य गुणस्य दंपत्योर्विधानार्थत्वात् वाक्यस्य नात्र द्वयोः पुरुषयोराधानस्य विधानं इति सिद्धान्तः । **के.**

⧗ व्याधानाधिकरणम् । आधाने स्त्रीसद्वितीयस्य एकस्यैव पुरुषस्याधिकारः ॥

द्व्याधानं च द्वियज्ञवत् । ६।१।५।२२ ॥

भाष्यम्— अस्त्याधानम् ‘ य एवं विद्वानग्निमाधत्ते ’ इति । तत्रेदमामनन्ति ‘ क्षौमे वसानौ अग्निमादधीयाताम् ’ इति । तत्रैषोऽर्थः सांशयिकः किं द्वौ पुरुषौ आदधीयाताम्, उत एकः पुरुष इति । कथं संशयः ? उच्यते । इह एतत् श्रूयते ‘ वसानौ आदधीयाताम् ’ इति । तत्र वचनमर्थप्राप्तं पुनः श्रूयते । तत् किं पुंलिङ्गसंबन्धार्थम्, उत क्षौमविध्यर्थमिति । उभयोर्विद्यमानत्वात् भवति संशयः । यदि लिङ्गसंबन्धार्थम्, उभौ पुरुषौ आधास्येते । अथ क्षौमसंबन्धार्थम्, तत एकः । किं प्राप्तम् ? व्याधानं तु द्वियज्ञवत् स्यात् । यथा ‘ एतेन द्वौ राजपुरोहितौ सायुज्यकामौ यजेयाताम् ’ इति द्वयोः पुरुषयोः द्वियज्ञो भवति, एवं व्याधानं द्वयोः पुरुषयोः स्यात्, ततः अविशेषात् । वसानौ इति श्रवणादेव पुरुषौ गम्येते । न पदान्तरगतेन क्षौमेण अस्य संबन्धः । श्रुत्यवगतं हि श्रवणादवगतम्, पदान्तरसंबन्धं वाक्यादवगतम्, श्रुतिश्च वाक्याद् बलीयसी ।

वसानशब्दगतश्चार्थः आधानेन संबध्यते, न क्षौमशब्दगतः। **आह**, वसानौ इति नायं केवलं पुंलिङ्गे एव, स्त्रीपुंसयोरपि अभिधायको भवति। यथा कुक्कुटश्च कुक्कुटी च कुक्कुटौ, शूकरश्च शूकरी च शूकरौ इति। एवं वसानश्च वसाना च वसानौ स्यातामिति। **अत्रोच्यते**। यत्र नार्थः प्रकरणं वा विशेषकम्, विधायकश्च शब्दो नानुवादः, तत्र द्वौ पुमांसौ गम्येते। यथा 'द्वौ आनय' इत्युक्तः पुमांसौ आनयति, 'द्वे आनय' इति स्त्रियौ। तेन स्त्रियो वाचकमेकारान्तं द्विवचनं इति गम्यते, औकारान्तमपि द्वयोः पुंसोर्वाचकमिति। यत्र इदानीं स्त्रीपुंसयोः प्रयुज्यमानं औकारान्तं दृश्यते तत्र किं पुमान् सद्वितीयः तस्य निमित्तम्, उत स्त्री सद्वितीया इति। **उच्यते**। पुंसि सद्वितीये दृष्टः, यथा 'ब्राह्मणौ आनय' इति। इहापि पुमान् सद्वितीयोऽर्थः। तस्मात् पुंनिमित्तः इति गम्यते। अत्राह, प्रयोगो यदि दृष्टं प्रमाणं द्वयोः पुंसोर्दृष्टः, कथमेकस्मिन् स्यात्? **अत्रोच्यते**। पुंसि च द्वित्वे च दृष्टः इति शक्यते वदितुम्, न द्वयोर्द्रव्ययोरिति। पुंभावं द्वित्वं च एष शब्दो न व्यभिचरति, द्रव्यं पुनर्व्यभिचरति। **अपि च** युगपदधिकरणवचनतायां द्वंद्वस्मृतेः द्विवचनबहुवचनोपपत्तेश्च। 'प्र मित्रयोर्वरुणयोः' इति च दर्शनात्। इतरेतरयोगे चार्थे समासविधानात् द्वंद्वापवादत्वाच्च एकशेषस्य। यथैव खदिरौ च धवौ च इति निदर्शनं क्रियते, एवमत्रापि द्रष्टव्यम्। तस्मात् पुंसि द्वित्वे च वर्तते इति गम्यते। न च स्त्रीद्वित्वे दृष्टः। **अत्राह**, ननु अत्रैव दर्शनात् स्त्रीपुंसयोर्वाचक इति गम्यते। **अत्रोच्यते**। उक्तमेतत् अन्यायश्चानेकार्थत्वमिति, इति पुमान् सद्वितीयः अस्यार्थो भविष्यति। स्त्रीपुंसौ चेत्यन्याय्यम्। अथ इदानीं सद्वितीयस्य पुंसो विधौ, कोऽन्यः सहाय: इति, स्त्रिया अनभिधेयत्वात् अवश्यम्भावित्वाच्च द्वितीयस्य, अपरः सद्वितीयः पुमान्। एवं इतरोऽपि इतरेण सद्वितीयः, इतरोऽपि इतरेण इति द्वावेव पुमांसौ उपादीयेते। तस्मादिह द्वौ पुमांसौ आधाने विधीयेते इत्युच्यते। **ननु** स्त्रीपुंसयोर्वाचकं औकारान्तं द्विवचनं स्मरन्ति। **नैषा** स्मृतिरस्तीति ब्रूमः। आह भगवतः पाणिनेर्वचनात् स्मृतिमनुमास्यामहे 'पुमान् स्त्रिया' (पा० १।२।६७) इति। **उच्यते**, न पाणिनेर्वचनम् 'कुक्कुटौ इति औकारः स्त्रीपुंसयोर्वाचकः' इति। कथं तर्हि? यत्र स्त्रीपुंसयोः सहवचनम्, तत्र सद्वितीयो वा पुमान् इति कृत्वा अकारान्तस्य औकारः प्राप्नोति, सद्वितीया वा स्त्री इति कृत्वा एकारः। पुंशब्दस्तत्र साधुः, न स्त्रीशब्द इति पाणिनेर्वचनम्। पुमान् शिष्यते इति च ब्रूते, तेन सुतरां गम्यते पुंसोर्वाचक औकार इति। तस्मात् द्वयोः पुंसोरधिकार इति। **ननु** क्षौमविधानपरमेतत् वाक्यम्, क्षौमसंबन्धस्य अर्थवत्त्वात्। इतरथा क्षौमवचनमनर्थकं स्यात्। **अत्रोच्यते**। वसानौ आदधीयातां इत्यस्ति संबन्धः, न क्षौमे आदधीयातामिति। तस्मात् संनिकृष्टमपि न तत् संबद्धमाधानेन। **आह**, वसानशब्देन सह संबध्यमानं अर्थवद् भविष्यति, वसानसंनिकृष्टे अपि क्षौमे न विधीयेते, विधायकस्य शब्दस्याभावात्। नहि वसानशब्दो विधायकः, न क्षौमशब्दः, नानयोः समुदायः। कस्तर्हि विधातुं शक्नोति? आदधीयातां इत्यत्र या लिङ्। **आह**, सा खलु विधास्यति, **उच्यते**, सा स्वशब्दगतमाधानं शक्नोति विधातुं श्रवणात्। विहितत्वादाधानस्य आनर्थक्ये, वसानौ इति शक्नोति वाक्येन विधातुम्। भवति हि वसानयोराधानसंबन्धः, तत्र नात्यन्ताय स्वार्थः परित्यक्तो भवति। क्षौमवसानसंबन्धे तु विधातव्ये 'आदधीयाताम्' इत्याधानं उत्सृज्य विदधानः अत्यन्ताय श्रुतिं जह्यात्। आधानसंनिकृष्टे च लिङ्गे विधातव्ये श्रुतिः विप्रकृष्टं न क्षौमवसानसंबन्धं विधातुमुत्सहते, अर्थविप्रकर्षात्। **अपिच** उत्सृज्य श्रुतिं क्षौमवसानसंबन्धे विधीयमाने क्षौमं वसानस्य अङ्गं स्यात्, नाधानस्य। तत्र क्षौमाभावेऽपि नाधानं विगुणं इति क्षौमाभावेऽपि आधानं स्यात्। **आह**, वसानगुणतायां तर्हि कोऽर्थो विवक्ष्यते? **उच्यते**। न कश्चित्। अत एव अस्य पक्षस्य परित्यागः। **आह**, क्षौमवसानश्रवणमिदानीं किमर्थमिति? **उच्यते**। न शक्यते उभयं विधातुं क्षौमं लिङ्गं च। भिद्येत हि तथा वाक्यम्। तस्मात् क्षौमाक्षौमयोः क्षौमशब्दोऽनुवादः। अर्थप्राप्ते च वसने, वसानौ पुमांसौ इत्यर्थः।

ते च प्रायेण विचेष्टमानस्य मलिने क्षौमसदृशे भवतः । विचेष्टमानस्य वा वसने शब्दवती भवतः । तस्मात् द्वयोः पुंसोरधिकार इति ।

टुप्-- (अवान्तरसंगतिमाह-) यजेत इति संख्या मिथुनाभिप्राया (इदं कारकशक्तेरपि उपलक्षणम्) । आधानेऽपि प्राप्तं वसानौ इति मिथुनद्वयम्, तत् निवार्यते । अत्र पूर्वः पक्षः । यत् आदधीयाताम् (इति अनूद्य) तत् वसानौ इति (पुंद्वयं विधीयते, वसनमपि अनूद्यते प्राप्तत्वात् । ननु क्षौमविधानं युक्तमत आह-) आधाने द्वित्वविधाने (सति) धात्वर्थे किञ्चित् विहितम्, इति श्रुत्यनुग्रहः (स्यात् । ननु क्षौमविधानेऽपि अस्ति श्रुत्यनुग्रहः इति चेत् तत्राह-) इतरत्रापि (पक्षे) यदि आधाने क्षौमं विधीयते, तत्र क्षौमं अधिकरणत्वेन प्राप्नोति (आदधातिना अन्वयार्थं सप्तम्येकवचनान्तत्वस्य स्वीकार्यत्वात् । ततश्च क्षौमोपरि अग्निराधेयः स्यात्) । अथ वसने क्षौमं विधीयते (नाधाने) ततः क्षौमं वसनमात्राङ्गं (सत्) आधानस्यानङ्गत्वात् अनर्थकं स्यात् । (किञ्च) वसानप्रातिपदिकस्यैव औकारेण श्रुत्या संबन्धः । (एवकारो भिन्नक्रमः औकारेणैव श्रुत्या संबन्धः इति) पदान्तरत्वात् (तु) क्षौमसंबन्धे वाक्यं स्यात् (तच्च दुर्बलं श्रुतेः । किञ्च) तादृशस्य (वाक्यगम्यस्य क्षौमवसानसंबन्धस्य विधि-)प्रत्ययेन परामर्शात् अत्यन्तं वाक्यम् (स्यात्) । वसानौ इति संख्यासंख्येयसंबन्धः (द्वित्वपुंस्त्वयोः संबन्धः) शब्देन (गम्यते) तत्र संख्यया नान्यत् संख्येयं ग्राह्यम् (किन्तु पुमानेव । तथा) संख्येयेन च नान्या संख्या, इति (द्वयोरपि एतयोः) इतरेतरनियमः यथा अरुणैकहायन्योः । तस्मात् द्वावत्र पुमांसौ (आधातारौ) प्राप्तौ । (संख्यापूरणार्थम्) स्त्रीग्रहणे (क्रियमाणे सति) संख्यासंख्येययोः (द्वित्वपुंस्त्वयोः) संबन्धो बाध्येत । (ननु स्त्रियाऽपि संख्यासंख्येयसंबन्धसिद्धिः, अत आह-) द्वितीयस्य पुंसः अस्ति पर्युपस्थापकः (औकारः) यथा घटौ आनीयेतामित्युक्ते द्वितीयो घट एवानीयते नाश्वादिः, एवमिहापि ।

'आह । वसानौ इति नायं केवलं पुंलिङ्ग एव (पुंलिङ्गस्यैव), **स्त्रीपुंसयोरपि अभिधाता** (अभिधायकः । भाष्ये तु अभिधायकः इत्येव पाठः) **भवति'** इति (भाष्यम्) । अस्य (द्विवचनस्य) न पुंद्वित्वविशिष्टं द्रव्यमभिधेयम्, न च स्त्रीपुंसद्वित्वविशिष्टम् (चशब्दः अप्यर्थः) । तस्मात् उभयोः (अपि) यत् सामान्यम्, तत् वाच्यम् । किं तत् ? पुंस्त्वं द्वित्वं च । तच्च प्राप्तम्, न विधेयम् । तस्मात् क्षौमं विधीयते इति अन्तर्णीताभिप्रायः परिचोदयति । अथवा शब्दार्थमेव उभयप्रकारं (स्त्रीपुंसयोर्द्वित्वं पुंद्वित्वं चेति) मन्यते, (उभयोः) प्रयोगदर्शनात् । (भाष्योक्तां शङ्कां पूर्वपक्षी परिहरति-) **'अत्रोच्यते । यत्र नार्थः प्रकरणं वा विशेषकम्, विधायकश्च शब्दो नानुवादः'** इति (परिहारभाष्यस्य-) कोऽभिप्रायः ? । (अभिप्रायं दर्शयति-) 'कुक्कुटौ आनय मिथुनं करिष्यामः' इत्यत्र सामर्थ्यात् द्वितीया स्त्री आनीयते । यत्र वा स्त्रीपुंसौ अधिकृतौ, यत्र वा औकाराभिधेयं प्राप्तत्वात् न विधीयते, तत्र स्त्रीपुंसौ गृह्येते । इह इदं त्रितयमपि नास्ति । अतः (कारणत्रयाभावात्) औकारः (स्वशक्त्या) द्वितीयं पुमांसं शक्नोति पर्युपस्थापयितुम्, न स्त्रियम् । अन्वयव्यतिरेकाभ्यां पुंस्त्वं द्वित्वं चाभिधेयम् । (एतदेव व्यनक्ति-) द्वयोरपि पुंसोः प्रयुक्तः (द्वौ पुरुषौ इति, तथा) स्त्रीपुंसयोरपि । (तत्रोभयोर्वाच्यत्वे) अनेकशक्तिकल्पनाभयात् पुंस्त्वं द्वित्वं चास्य वाच्यं इत्यध्यवसीयते । **युगपदधिकरणवचनतायां द्वंद्वस्मृतेः** इत्येवमादिना (भाष्येण) विग्रहपर्यालोचनयाऽपि यथा संख्यापूरणी स्त्री न गृह्यते, तत् प्रतिपाद्यते । कथम् ? (धवखदिरौ इत्यादौ) द्वंद्वे धवशब्दः आत्मीयमर्थं इतरापेक्षं (खदिरापेक्षम्) अभिधत्ते । इतरोऽपि (खदिरशब्दोऽपि) इतरापेक्षं (धवापेक्षं) इति ईदृशेऽर्थे (द्वंद्वः) स्मर्यते । **'द्विवचनबहुवचनोपपत्तेश्च'** इति (भाष्यं व्याचष्टे-) यदि धवशब्दः खदिरनिरपेक्षमात्मीयमर्थं अभिधत्ते, तत एकत्वात् तस्य एकवचनबहुवचने न स्याताम् । दृश्येते च (द्विवचनबहुवचने) । तस्मात् तुल्यं द्वितीयं प्रातिपदिकार्थमपेक्ष्य द्वित्वादिसंभवः । **'प्र मित्रयोर्वरुणयोः'** इति च दर्श-

नात् (ऋसं. ७।६६।१) इति । न द्वौ मित्रौ स्तः, न वरुणौ, तत्र (प्रत्येकम्) द्विवचनं नोपपद्यते, अन्योन्यापेक्षायाम् (तु) घटते (ततश्च द्वंद्वे युगपद्वचनता निश्चीयते इति । इतश्चैवमित्याह–) '**इतरेतरयोगे चार्थे दंद्वविधानात्**' (**समासविधानात्** इति भा–पाठः) इति चकारः समुच्चय– अन्वाचय– इतरेतरयोग– समाहारेषु वर्तते । तत्र समुच्चयान्वाचययोः नास्ति समासः, समाहारेतरेतरयोगयोरेव (तु समासः)। ततोऽपि युगपदधिकरणतायाम् (एव) द्वंद्वः (एषितव्यः । प्रकृते किमायातं इत्यत आह–) **द्वंद्वापवादत्वाच्च एकशेषस्य** इति ।(तद् व्याचष्टे–) यो हि द्वंद्वस्य धर्मः (अनेकेषाम्) इतरेतरयोगो नाम, स एकशेषस्यापि । इयांस्तु विशेषः (द्वंद्वैकशेषयोः), एकत्र (द्वंद्वे) शब्दश्च अर्थश्च द्वावपि भिन्नौ, इतरत्र (एकशेषे) अर्थो भिन्नः, शब्द एक एव । (यत्र शब्दश्च अर्थश्च द्वावपि भिन्नौ तत्र द्वंद्वः धवखदिरादौ । यत्र तु अन्यतरस्यापि ऐक्यम्, तत्र एकशेषः अक्षाः पादाः इत्यादौ वक्रदण्डौ इत्यादौ च)। वसानौ इत्येकशेषत्वात् द्वितीयेन पुंसा भवितव्यम् । पुमान् हि श्रूयते द्विवचनश्रवणात् । स इतरसव्यपेक्षः, तस्य पुमानेव द्वितीय. । पुंसः अस्ति पर्युपस्थापकम् (औकारः), न स्त्रियाः । यत्र स्त्रीपुंसौ सहोच्चार्येते, तत्र पुमान् सद्वितीयः इति औकारान्तः प्राप्नोति, स्त्री सद्वितीया इति एकारान्तः । (वसानौ इत्यत्र तु–) औकारः प्रयुज्यमानः (पुंद्वित्वे) साधुः, (तस्य) न स्त्रीपुंसौ वाच्यौ ।

[अस्यैव सूत्रस्य टुप्टीकाकृतैव द्वितीया व्याख्या कृता । सा च आनन्दाश्रमीये पुस्तके चतुर्विंशसूत्रव्याख्योत्तरं मुद्रिताऽपि अस्माभिः योग्यतया अत्रैव लिख्यते । एवमुत्तरसूत्रेऽपि । सा चेयं व्याख्या अस्मदीये लिखिते पुस्तके नास्ति । तथापि तन्त्ररत्नेन व्याख्यातत्वात् संगृह्यते]।

टुप्-– (एतदेव सूत्रं विस्पष्टीकरणाय वार्तिककारेण पुनर्व्याख्यातम्) पूर्वाधिकरणे एकवचनं मिथुनाभिप्रायं संसर्गाभिप्रायं (दंपतीनिष्ठव्यासज्यवृत्तिकर्मत्वाभिप्रायम्) वा इत्युक्तम् । इहापि (वसानौ इति–) द्विवचनं तथैव द्वे कारकशक्ती द्वे च (वाशब्दार्थे चशब्दः) मिथुने ब्रवीति इत्यनेन प्रसङ्गेन आरभ्यते । (पूर्वापवादार्थम् । तदनेन अधिकरणसंगतिः पूर्वपक्षहेतुश्च प्रदर्शितः)। क्षौमाधानसंबन्धो न (विधीयते) वसान–(शब्द–) व्यवधानात् । (इतश्चैवमित्याह–) 'वसानौ आदधीयाताम्' इति सामानाधिकरण्यात् उपपद्यते संबन्धः । 'क्षामे आदधीयाताम्' इति सामानाधिकरण्याभावात् नास्ति संबन्धः । (दोषान्तरमाह–) संबध्यमानं च आधानस्य अधिकरणं स्यात् (क्षौमे इति सप्तमी स्यात्, तदधिकरणकं च अग्नेराधानम्, इति । तच्चानिष्टम् । शङ्कते–) क्षौमवसानसंबन्धे (सति) न सामानाधिकरण्यम् (बाधकम्,) अधिकरणदोषश्च नास्ति, इति चेत् । (उत्तरम्–) वसनक्रिया कर्तुरुपसर्जनभूतत्वात् नान्येन संबन्धयितुं शक्यते । (अथ प्रधानभूतेन कर्त्रैव क्षौमं संबध्यते, तत्राह–) कर्त्राऽपि नास्ति संबन्धः । (कुतः ?) नहि कारकाणां मिथः संबन्धः । (अथ–) वसनक्रिया कर्तुरुपसर्जनभूताऽपि पुनर्विपरिवृत्य (क्षौमेण) संबध्यते इति चेत् (उत्तरम्–) न । (कुतः ?) विधीयमाना हि क्रिया भाव्यमानत्वात् (कर्तव्यत्वात्) कारकैः संबध्यते। अविधीयमानायाः (तु) न कारकैर्भवति संबन्धः । (कस्मात् इत्यत आह–) अविधीयमाने (वसने) क्षौमं संबध्यमानं लौकिकेऽपि स्यात् । तत्र अदृष्टार्थता (क्षौमस्य) स्यात् । (तस्मान्न विपरिवृत्त्यापि संबन्धः)। किञ्च (अस्मिन् पक्षे) क्षौमवसानयोः संबन्धं आदधीयातां इति (विधिः) कुर्यात् । इति अत्यन्तं वाक्यम् (स्यात् इति श्रुतिबाधः । बाधमेवाह–) प्रत्ययः उपश्लेषलक्षणया (एकपदप्रत्यासत्तिलक्षणया) श्रुत्या धात्वर्थं विधत्ते, तदङ्गं वा (किञ्चित्)। इह द्वयमपि न विधत्ते धात्वर्थम्, धात्वर्थस्य वा अन्यत्, तत्परायाः श्रुतेः (धात्वर्थतदङ्गपरायाः विधिश्रुतेः) अभावात् । (मत्पक्षे तु आधानाङ्गतया) वसानौ इति (पुंद्वये) विधीयमाने धात्वर्थे किञ्चिद्विधानात् श्रुतिः अनुगृहीता (भवति । किञ्च) वसानशब्दस्यापि एकपदोपात्तत्वात् औकारेण श्रुत्या संबन्धः । क्षौमेण (तु संबन्धे) पदान्तरोपात्तत्वात् वाक्यम् । श्रुतिश्च वाक्यात् बलीयसी।

तस्मात् द्वौ पुमांसौ आधाने विधीयेते । (भाष्यकारेण वसानौ इत्यत्र पुंद्वयं प्रतिपादितम्, तत्र **चोदयति**–) कस्मात् पुनः पूर्वपक्षवादिना अनुमानेन द्वितीयः पुमानिष्यते, न पुनः औकारेण द्वौ पुमांसौ अभिधीयेते इति ब्रवीति, येन सिद्धान्तवादिनः परिचोदनैव नोत्तिष्ठति । **उच्यते** । यदि (द्वौ) पुमांसौ वाच्यौ इति ब्रूयात्, ततः अनैकान्तिकत्वं भवति । यथा (हि) द्वयोः पुंसोर्दृष्टः, तथा स्त्रीपुंसयोरपि दृष्ट एव । तत्र इह क्षौमस्य विधानात् स्त्रीपुंसयोरर्थप्राप्तत्वात् पूर्वपक्षानुत्थानम् (स्यात्) । तन्मा भूत् इति न्यायात् पुंद्वयं प्रतिपाद्यते (न शब्दात्) । **‘यत्र नार्थः प्रकरणं वा विशेषकम्, विधायकश्च शब्दो नानुवादः’** (इति न्यायप्रतिपादनार्थं भाष्यं **आक्षिपति**–) इति पूर्वपक्षविपरितोऽयं ग्रन्थः । कथम् ? यत्र एतानि कारणानि (त्रयाणामन्यतममपि वा अस्ति–) तत्र स्त्रीसद्वितीयो गृह्यते (पुमान् इत्यर्थादुक्तं भवति) इह च प्रकरणात् स्त्रीसद्वितीयः पुमान् प्राप्तः । एवं चेत् स्त्री (एव प्रकरणवशेन द्वितीया) ग्रहीष्यते । किञ्च क्षौमपदानुग्रहात् (सैव ग्रहीष्यते, इति पूर्वपक्षविपरीतोऽयं ग्रन्थः । **समाधत्ते**–) उच्यते । (विधि–)प्रत्ययविप्रकर्षात् व्यवहितकल्पनात् सामानाधिकरण्याभावाच्च युक्तं (यत्) न विधीयते क्षौमम् (इति) । वसानौ इति चोच्चार्यमाणं स्वरसेन द्वौ पुमांसौ अवगमयति । अतः (न्यायात्) एतस्मिन् (वसानशब्दस्य विधायकत्वे) स्थिते इदमुक्तम् ‘औकारस्य पुंस्त्वं द्वित्वं च वाच्यम्’ इति । कथम् ? ब्राह्मणौ इति द्वयोः पुंसोः औकारः प्रयुक्तः, कुक्कुटौ इति स्त्रीपुंसयोः । तत्र यदि द्वे (अपि) अभिधेये स्याताम् (ततः) द्विरदृष्टं भवेत् (तच्चान्याय्यम्) । उच्चरिते च संशयः स्यात् कतरदनेन अभिहितमिति । अतो यदनयोः सामान्यम्, तत् वाच्यम् । (किं पुनस्तत् ? आह–) तत्र पुमान् उभयत्रापि विद्यते द्वित्वं च । तस्मादेतदेवास्य वाच्यम् । (एवमपि–) पुमान् एव कथं द्वितीय इति चेत्, उच्यते । यत्र द्वित्वं तत्र पुमान्, यत्र पुमान् तत्र द्वित्वम्, (इति) अनयोः परस्परं नियमः (एतदेव व्यनक्ति–) एकपदोपादानात् यस्यां क्रियायां द्वित्वं तस्य पुंस्त्वं अनयोः परस्परसंबन्धः अरुणाऽऽदिवत् । (सर्वथा तावत्) द्वित्वस्य (गुणस्य द्रव्येण) आश्रयेण भवितव्यम् । (तत्र) स्त्रिया अवबोधकं नास्ति । द्वित्वं तावत् नावबोधयति, विनाऽपि स्त्रिया उपपद्यमानत्वात् । पुमानपि न शक्नोति अवबोधयितुम्, असंबन्धात् । औकारो ब्रूते पुंलिङ्गं द्वित्वं च । (द्वित्वेन च) संख्यापूरकं बाह्यम् (अशब्दार्थभूतं किमपि आक्षेप्यम्) तत्र कतरः प्रकारः स्यात् ? पुमान् । (कुतः ?) पुमान् शक्नोति पुमांसमवबोधयितुम् । तस्मात् न्यायात् द्वौ पुमांसौ । (‘युगपदधिकरणवचनतायाम्’ इत्यादिभाष्यार्थमाह–) न च विग्रहकालेऽपि स्त्रियाः श्रवणम्, ‘वसानश्च वसाना च’ इति ईदृशस्य (विग्रहस्य) अभावात् । कथमभावः ? युगपदधिकरणवचनतायां द्वंद्वस्मृतेः । (उक्तवचनतामेव दर्शयति–) यत्र द्वौ बहवो वा युगपदभिधातुमिष्यन्ते, तत्र द्वंद्वसमासो भवति । (तदेव उपपादयितुं अन्तरा किञ्चित् प्रस्तौति) **अयुक्तमिदमुच्यते** (द्वंद्वसमासो भवतीति । कथम् ?) समासः प्रमाणान्तरेण (समस्यमानयोः) संबन्धे (ज्ञाते) भवति । धवखदिरयोश्च अङ्गाङ्गित्व–स्वस्वाम्य–आश्रयाश्रयिसंबन्धः (तावत्) नास्ति । क्रियया च संबन्धः समासोत्तरकालभावी । सर्वे च समासाः संबन्धोत्तरकालम् । यथा ‘राजपुरुषः’ इति स्वस्वामिभावे अवगते, ‘चित्रगुः’ इति चित्राभिर्गोभिः संबन्धे अवगते, ‘पञ्चपूली’ इति समाहारसंबन्धोत्तरकालम्, ‘उपकुम्भम्’ इति समीपसंबन्धोत्तरकालम् । (द्वंद्वेऽपि संबन्धेन भवितव्यम्) । न चेह धवखदिरयोः संबन्धः अस्ति (प्रागवगतः । तस्मात् द्वंद्वः अनुपपन्नः) । **उच्यते**, एकशब्दाभिधेयत्वमनयोः (धवखदिरयोः) संबन्धः । तत्र (स च द्वंद्व–) समासे अभिप्रेते भवति । (तदा च युगपदधिकरणता सिद्धा इति ।) विग्रहस्तु ईदृशः (कार्यः) धवौ च खदिरौ चेति । **‘द्विवचनबहुवचनोपपत्तेश्च’** इति (भाष्यस्य अयमर्थः), यदि धवेन केवलेन धव एवाभिधीयते, खदिरेण खदिरः । एवम् (सति) खदिरात् परं द्विवचनं न प्राप्नोति । अतो द्वावपि

अभिधीयेते। लौकिकोऽयं न्यायः प्रदर्शितः। (वैदिकमपि लिङ्गं प्रदर्श्यते–) **'प्र मित्रयोर्वरुणयोः' इति दर्शनात्** (इति भाष्यम्) इह मित्रस्य एकत्वात् वरुणस्य च, द्विवचनं न प्राप्नोति (तेन युगपदभिधानता गम्यते)। **'इतरेतरयोगे चार्थे द्वंद्वविधानात्'** इति (भाष्येण) 'चार्थे द्वंद्वः' इति सूत्रस्यार्थः प्रदर्श्यते। चशब्दः समुच्चय–अन्वाचय–इतरेतरयोग–समाहारेषु। तत्र समुच्चये 'धवमानय, खदिरमानय' इति (निरपेक्षयोः क्रियान्वयात्) समासो नास्ति। अन्वाचये (अरण्यं गत्वा) काष्ठान्यानय, शाकमपि आहर्तव्यं इति। (तत्रापि समासो नास्ति इत्यनुषङ्गः। समुच्चयान्वाचययोर्विशेषमाह–) तत्र काष्ठानि अरण्यगमनप्रयोजकानि इतरदप्रयोजकम्। समुच्चये द्वयमपि प्रयोजकम्। द्वयोः सह आनीयमानयोः इतरेतरयोगः अनुनिष्पादी भवति। चकारस्य तत् फलम्, तत्कृते 'चार्थे द्वंद्वः' इति (नेदं तन्त्ररत्ने)। तत्र कदाचित् इतरेतरयोगो विवक्षितः, समाहारः प्रचयादवगम्यमानः अविवक्षितः। कदाचित् समाहारो विवक्षितः इतरेतरयोगो नान्तरीयकः। एतयोरर्थयोर्द्वंद्वः। (तत्र) समाहारविवक्षायाम् 'धवखदिरम्' इति प्रयोगः, इतरत्र 'धवखदिरौ' इति। (प्रकृते यदायातम्, तदाह–) **'द्वंद्वापवादत्वाच्च एकशेषस्य** (इति भाष्यम्)। यथा द्वंद्वे यौगपद्येन द्वौ अभिधीयेते, विग्रहश्च (यथा), तथा एकशेषेऽपि वसानौ इति च एकशेषः। ततो द्वौ पुमांसौ। (वसानौ च वसानौ च इति विग्रहः। इति न स्त्रीसद्वितीयत्वम्। एवं भाष्यं व्याख्याय चोदयति–) **ननु** यदि धवो द्वित्वाभिधायी खदिरश्च, ततो बहुवचनं स्यात्। **उच्यते**। द्वयोर्द्वित्वयोः बहुवचनम्, न द्वयोर्द्विवचनयोः। यदि हि द्वयोर्द्विवचनयोः बहुवचनं स्यात्, 'ब्राह्मणौ शोभनौ विज्ञातारौ' इत्यत्रापि बहुवचनं स्यात्। (पुनश्चोदयति–) सैषा युगपदधिकरणता दुःखा (बुद्धौ अनारोहात्) दुरुपपादा च (युक्त्यभावात्)। कथम्? (तस्यामभ्युपगतायाम्) एकैकशब्दस्य द्वंद्वे अभिधेये स्याताम्। यदि च स्याताम् 'उक्तार्थानामप्रयोगः' इति धवस्यैव (धवशब्दस्यैव) प्रयोगः स्यात्। (परिहरति–) तस्मादेवं वर्णयन्ति। धवः आत्मीयमभिधेयं इतरसहितं ब्रवीति एवं खदिरोऽपि। (तत्र) कतरो द्वितीयः इति तत्र खदिरशब्देन धवो विशेष्यते, धवेनापि इतरः (अतो नान्यतरप्रयोगदोषः। वस्तुतस्तु युगपदधिकरणता न पारमार्थिकी। **तन्त्ररत्ने** अत्र विषये विस्तरेण प्रतिपादितम्। विस्तरभयात् नोद्ध्रियते)।

ननु तत्र (औकारान्ते द्विवचने) पाणिनिस्मरणम् 'पुमान् स्त्रिया' इति। उच्यते। न पाणिनिना अर्थानुशासनं कृतम्। किं तर्हि? यथा लोके अवस्थितोऽर्थः, तथाऽवस्थितस्य शब्दानुशासनं कृतम्। तत्र (नियमः क्रियते इति परेणान्वयः।) अकारात् परः औकारः श्रूयमाणः पुमांसं सद्वितीयं वदति। यदा स्त्री सद्वितीया, तदा औकारः एकारीभवति। यदा पुनः स्त्रीपुंसौ अभिधेयौ, तदा एकारौकारौ प्राप्नुतः, द्वयोरभिधेययोर्विद्यमानत्वात्, तत्र औकारः शिष्यते इत्ययं नियमः क्रियते। न तु पुंसा सद्वितीया स्त्री अभिधीयते (तस्मात् द्वौ पुमांसौ अग्निमादधीयातां इति पूर्वः पक्षः)।

गुणस्य तु विधानत्वात् पत्न्या द्वितीयशब्दः स्यात्। २३॥

भाष्यम्— तुशब्दः पक्षं व्यावर्तयति। नैतदस्ति, यदुक्तम् 'द्वौ पुरुषौ आदधीयाताम्' इति। एक एवादधीत 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति एकवचनं हि विवक्षितम्। तस्मादेक एवादधीत। ननु इदं वचनं द्वौ पुमांसौ आदधीयातां इति। नेत्याह। गुणस्य तु विधानत्वात्। क्षौमविधानं अस्मिन् वाक्ये न्याय्यम्। तथाहि अपूर्वोऽर्थो विहितो भवति। गम्यते हि विशेषनियमः। इतरथा क्षौमवचनं अनुवादमात्रं स्यात्। वादमात्रं चानर्थकम् (१।२।२।१९)। पक्षे चानुवादः। न च एकपक्षवचन एष शब्दः। गौणत्वे च साधारणं सादृश्यम्। तस्मात् प्रमादाध्ययनमवगम्येत विनैव हेतुना। आह ननु पुमांसौ विधेयौ। तद्विधाने च न क्षौमविधानम्। वाक्यभेदो हि तथा स्यात्। श्रुतिगम्यौ च पुमांसौ वाक्यगम्यं च क्षौमं बाधेयातामिति। **अत्रोच्यते**। न पुमांसौ विधेयौ, प्राप्त एवात्र सद्वितीयः पुमान्, सोऽनूद्यते। कथम्? एकोऽत्र पुमान् श्रूयते।

तस्य पत्न्या द्वितीयशब्दः स्यात् । न च यत् प्राग्वचनाद्गम्यते तद् विधेयं भवति । तस्मात् क्षौमविधानम्, न वाक्यभेदो भवति । यदुच्यते न क्षौमस्य विधायकोऽस्तीति । तदुच्यते । आदधीयातां इति तद् विधास्यति । **ननु** एतत् आधानं श्रुत्या विधातुं समर्थम्, नान्यदिति । **उच्यते** । शब्दान्तरेण विहितत्वादाधानस्य न विधायकम्, विहितत्वाच्च पुंसः सद्वितीयस्य तस्यापि न विधायकम् । अतस्तदसंभवात् क्षौमस्य विधायिका लिङ् भविष्यति, वाक्यसामर्थ्यात् । यत्तु अस्मिन् पक्षे अत्यन्ताय स्वार्थे जहातीति, नात्यन्ताय हास्यति । आधाने वासः क्षौमं कुर्यात् इति । अस्मिन् पक्षे पुंशब्दः स्त्रीपुंसयोर्वृत्त इति गम्यते । अस्ति हि तत्र तस्य निमित्तं पुमान् सद्वितीयः । एवमादि च दृष्ट्वा भगवता पाणिनिना सूत्रं प्रणीतम् 'पुमान् स्त्रिया' इति । तस्य विषयः पुंशब्दः शिष्यमाणः साधुर्भवति, न स्त्रीशब्द इति । तस्मादेकः पुमानादधीत, न द्वाविति ।

टुप्— क्षौमशब्दस्य अनुवादो न घटते अप्राप्तत्वात् । न लक्षणया अनुवादः सादृश्येन वा (गौण्या वृत्त्या वा इत्यर्थः) । नहि क्षौमं मलिनत्वेन विना आत्मानं न लभते, येन तल्लक्षयेत् । यथा शुक्लादिर्गुणः द्रव्येण विना न भवति इति अविनाभावात् द्रव्यं लक्षयति, नैवमिह । विनाऽपि मलिनत्वेन क्षौमस्य सद्भावोऽस्त्येव । अतो नास्ति लक्षणया अवबोधः । अथ विद्यते क्षौमे मलिनतेति, सा हि कार्पासादावपि विद्यते । असाधारण्येन हि लक्षणा भवति । नहि सादृश्यं हेतुः उपपदाभावात् । सामानाधिकरण्येन हि भवति सादृश्यं यथा सिंहो देवदत्त इति । अवयवप्रसिद्धिरपि समुदायप्रसिद्ध्या बाध्यते । तस्मात् (अनुवादाभावात्) विधेयमेतत् । यः प्रकरणगतः पुरुषः, तस्य अर्थप्राप्ते वसने क्षौमं नियम्यते । स प्रकरणगतः शक्नोति अपूर्वं लक्षयितुम् । तत्र एतत् विधीयते, न पुरुषस्वरूपे । यथा व्रीहयः शक्नुवन्ति अपूर्वं लक्षयितुम्, एवमिहापि । वसानौ इति उत्पत्तिवाक्ये स्त्रीपुंसयोः प्राप्तत्वात् अनुवादः ।

(अस्यैव सूत्रस्य वार्तिककारीया द्वितीया व्याख्या इत उत्तरं निवेश्यते । सा च अस्मदीये टुप्टीकालिखिते नास्ति । तन्त्ररत्ने तु सा व्याख्यातेति अत्र उद्ध्रियते ।

के. । न पुंद्वयं आधाने विधातुं शक्यते, 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति—) उत्पत्तिवाक्यशिष्टेन एकत्वेनावरुद्धत्वात् द्वित्वस्यावकाशाभावात् (वाजिनवत्) कर्मान्तरं प्राप्नोति । न चेष्यते कर्मान्तरम्, (प्रकृताधानप्रत्यभिज्ञानात्) । न च क्षौमयोरनुवादो घटते । तत्र (अनुवादपक्षे) शब्दवती वा क्षौमे (स्याताम्) मलिने वा । (द्वेधाऽपि अयुक्तमित्याह—) 'टुक्षु शब्दे' इति (अस्मात् धातोः) अवयवव्युत्पत्त्या वर्तेत । (तदयुक्तम्) रूढया (हि) क्षौममेव ब्रवीति (अतसी स्यादुमा क्षुमा इत्यमरः । अतसी = आळशी, जवस इति भाषा) । रूढया च अवयवव्युत्पत्तिर्बाध्यते । व्युत्पत्तौ (केवलायाम्) आश्रीयमाणायां शङ्खादीनामपि क्षौमशब्दवाच्यता स्यात् (शब्दवत्त्वात्), न च तेषु वर्तते (क्षौमशब्दः । नापि मलिनत्वप्रतिपादकत्वमित्याह—) मलिनवचने (सति) कार्पासादीनामपि मलिनत्वस्य विद्यमानत्वात् क्षौमशब्दाभिधेयता स्यात्, न च तेषु क्षौमशब्दः । (किञ्च एवम्—) अमलिने क्षौमे (क्षौमशब्दस्य) प्रयोगो न स्यात्, अस्ति च प्रयोगः । अमलिनपक्षे च विधिं प्रयोजयेत् । न च उपपदेन सह अनुच्चरितत्वात् क्षौमसदृशं कार्पासादि शक्नोति अवबोधयितुम् । यथा 'सिंहो देवदत्तः' इति सिंहशब्दोच्चारणे सिंहसादृश्यं देवदत्ते (अवगम्यते), एवमिहापि । तस्मात् उपपदाभावात् सादृश्ये गृह्यमाणे साधारणशब्दता (अनेकार्थता) स्यात् । अविनाभावेन मलिनत्वं अवबोधयेताम् (क्षौमद्वयाभिप्रायं द्विवचनम्) । न च मलिनत्वेन विना क्षौमं नोपपद्यते । तस्मात् (अनुवादकत्वानुपपत्तेः) अप्राप्तत्वात् क्षौमं विधीयते । (ननु पुंद्वयप्रतिपादकस्य शब्दस्य का गतिः ? अत आह—) वसानौ इति पुंस्त्वं द्वित्वं च वदति, तच्च (द्वयमपि) प्रकरणेन प्राप्तत्वात् अनूद्यते । यदुक्तं आधानसंबन्धो न प्राप्नोतीति, तत्रोच्यते । आधाने क्षौमं कुर्यात् इति विधीयते (न तु वसने, तस्माददोषः इति । चोदयति—) तत् कथमाधाने भवति ? (उत्तरम्—) तत्साधकस्य (पुरुषस्य) भवत् तदर्थं भवति । अथवा अस्तु (वाक्येन) क्षौमवसनसंबन्धविधानम् । ननु

वसनमात्रे स्यात्, उच्यते। आधानप्रकरणे समाम्नानात् तदीयस्य पुरुषस्य यत् वसनम्, तत्र भविष्यति, यथा 'प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत्' (३।४।५।१५) एवमत्रापि। इति सिद्धम्। (ततश्च क्षौमे वाससी दंपत्योः इति ज्ञेयम्)।

शा— किं आधानं द्वौ पुमांसौ सस्त्रीकौ सह कुर्यातां उत एकः। तत्र 'पूर्वत्राख्यातसंख्यायाः कर्तृरूपान्वयः स्थितः। तेनेह कर्तृरूपस्य भेदो द्विवचनाद्भवेत्॥ वसानाविति चौकारात् पुंद्वयं संप्रतीयते। द्वित्वपुंस्त्वे हि तद्वाच्ये नियम्येते च ते मिथः॥' तस्मात् द्वौ पुमांसौ सस्त्रीकौ। एवं प्राप्ते, अभिधीयते। 'क्षौमशब्दो न मुख्यः सन् मुख्यमर्थं परित्यजेत्। नापि धात्वर्थयोगेन वर्तते रूढिसंभवात्॥ वसानक्षौमशब्दौ च तव स्यातामनर्थकौ। द्वित्वमात्रविधायित्वात् तस्मात् क्षौमं विधीयते॥ तद्विधाने च पुंद्वित्वं विधातुं नैव शक्यते। उत्पत्तिवाक्यादन्यत्र नानेकार्थविधिर्यतः॥ संनिकर्षश्च शब्दस्य धर्मो, न तदनुग्रहात्। प्रधानभूतशब्दार्थपरित्यागोऽवकल्पते॥ कर्तृरूपस्य चैक्येऽपि तदधिष्ठानभेदतः। युक्तं द्विवचनं यद्वदग्नीषोमौ हि देवते॥ अप्राप्तत्वात्तु वसने यदा क्षौमं विधीयते। वसानावादधीयातामित्येतावनुवादकौ॥ अनुवादो यथाप्राप्ति सा च स्त्रीपुंसयोर्द्वयोः। तेन प्राप्तिवशाच्छब्दाविमौ तावेव वक्ष्यतः॥ एक एव पुमांस्तस्मादादधीत सह स्त्रिया। उत्पत्तिवाक्ये ह्येकत्वमुपादेयं विवक्षितम्॥'

सोम— 'एतेन राजपुरोहितौ यजेयाताम्' इति द्वियज्ञवत् आधानं पुंद्वयाधिकारं इति पूर्वपक्षसूत्रार्थः।

वि— 'पुंसोरेकस्य वाऽऽधानम्, वसानावित्यतो द्वयोः।, एष क्षौमविधिर्द्वित्वं दंपत्योरेकता ततः॥'

भाट्ट— आधानप्रकरणे 'क्षौमे वसानौ अग्निमादधीयाताम्' इति श्रुतम्। तेन च आधाने कर्तृद्वित्वविधानात् द्वौ पुमांसौ सस्त्रीकौ आधाने अधिकारिणौ 'एतेन राजपुरोहितौ साम्राज्यकामौ यजेयाताम्' इतिवत्। न चात्र 'कुक्कुटावानय मिथुनं करिष्यामि' इतिवत् 'पुमान् स्त्रिया' इत्याद्यनुशासनानुरोधेन स्त्रीसद्वितीयतया विरूपैकशेषस्यापि उपपत्तेः, वाक्यस्य क्षौमविधिमात्रपरत्वेनापि उपपत्तौ उत्पत्तिशिष्टकर्त्रैकत्वबाधानुपपत्तिः इति वाच्यम्। सरूपैकशेषसंभवे लक्षणाऽऽपादकविरूपैकशेषस्य अन्याय्यत्वात्। तथाहि, औकारस्तावत् द्वित्वं पुंस्त्वं चाभिधत्ते इति अरुणैकहायनीवत् द्वित्वावच्छिन्ने पुंस्त्वम्, पुंस्त्वावच्छिन्ने द्वित्वं इति परस्परनियमात् पुंद्वयप्रतीतिः सुलभा। विरूपैकशेषे तु पितरौ इत्यादौ मातृत्वादेः, कुक्कुटौ इत्यादौ स्त्रीत्वस्य च प्रत्यायकाभावात् लक्षणा आवश्यकी इति तस्य ततो दौर्बल्यम्। न च भवन्मतेऽपि उपक्रमस्थक्षौमपदे मलिनत्वसादृश्यात् गौणी, 'टुक्षु शब्दे' इत्यनुशासनाद्वा अवयवयोगः इति जघन्यवृत्त्याश्रयणम्, अनुवादवैयर्थ्यम्, उत्पत्तिवाक्यस्थैकवचनस्य साधुत्वमात्रार्थत्वं इति अनेकदोषतादवस्थ्यं इति वाच्यम्। क्षौमवाक्यस्यैव उभयविशिष्टाधानविधानाङ्गीकारात्। वसन्तादिवाक्ये तु ब्राह्मणादिकर्तृकत्वे निमित्ते वसन्तादिकालविधानम्। अत एव 'ब्राह्मणः' इति एकत्वं पुंस्त्वं चाविवक्षितम्। आदधीत इत्यपि च। ब्राह्मणो यदि शूद्रसहित आदधीत तदा वसन्ते इत्येवं कादाचित्कब्राह्मणैकत्वानुवादः। तस्मात् द्वौ पुमांसौ सस्त्रीकौ अधिकारिणौ। यत्तु **भाष्यादौ** सरूपैकशेषसाधकं प्रमाणान्तरमुपन्यस्तम्। "द्वंद्वापवादत्वादेकशेषस्य द्वंद्वार्थ एव अर्थः इत्यवगम्यते। द्वंद्वश्च 'युगपदधिकरणे द्वंद्वो भवति' इति कात्यायनस्मरणात् युगपदधिकरणतावाची (अत्र 'सिद्धं तु युगपदधिकरणवचने द्वंद्ववचनात्' इति २।२।२९ पा० सूत्रे द्वितीयं वार्तिकम्। तत्र महाभाष्यपङ्क्तिः 'युगपदधिकरणवचने द्वंद्वो भवति इति वक्तव्यम्' इति)। अधिकरणं शब्दप्रतिपाद्योऽर्थः, स यत्र अनेको युगपदेकेन पदेन बोध्यते तत्र द्वंद्वः। तथा च धवखदिरौ इत्यत्र धवपदं लक्षणया खदिरसहितधवपरं इतरसहितधवपरं वा। इतरत्तु खदिरपदान्निर्णीयते। एवं खदिरपदमपि। सेयं युगपदधिकरणता। इतरेतरयोगोऽप्ययमेव अस्मिन्नेवार्थे द्वंद्वः। चकारस्य हि चत्वारोऽर्थाः समुच्चय– अन्वाचय– इतरेतरयोग– समाहाराः। तत्र विभक्त्यर्थान्वये परस्परनिरपेक्षत्वेऽपि, क्रियाऽन्वये

दण्डचक्रादिवत् परस्परसापेक्षत्वे सति समत्वं समुच्चयः। अतश्च न इतरेतरयोगे, न विकल्पे, न वा अन्वाचये अतिव्याप्तिः। यथा ‘अहरहर्नयमानो गामश्वं पुरुषं च’ [अयुक्तः पाठोऽयं चशब्दस्य] इत्यादौ। अन्वाचये तु एकस्य प्रयोजकत्वम्, अपरस्य न इति न साम्यम्, यथा ‘काष्ठान्याहर शाकं चाहर’ इति। इतरेतरयोगे तु व्यासज्यवृत्तिविभक्त्यर्थे परस्परसाहित्येनान्वयः, यथा ‘अग्निश्च सोमश्च देवता’ इत्यादौ। अत्र धवं च खदिरं च इत्यादौ इतरेतरयोगविवक्षायां युगपदधिकरणवचनता आवश्यकी। अन्यथा प्रत्येकं विभक्त्यर्थान्वयेन इतरेतरयोगस्य समुच्चयाद्भेदानापत्तेः। अत एव निरपेक्षयोः एकक्रियाऽन्वयित्वं समुच्चयः इति तन्त्ररत्नोक्तमपास्तम्। ‘अमावास्यायां पौर्णमास्यां वा’ इत्येकवाक्योक्तविकल्पे अतिव्याप्तेः। इतरेतरयोगसमाहारयोस्तु साहित्यस्य पदार्थान् प्रति गुणत्वप्रधानत्वकृतो विशेषः, इतरेतरयोगत्वं तुल्यम्। एषु चार्थेषु इतरेतरयोगे एव द्वंद्वः। अत एव च अर्थानामनेकत्वेऽपि इतरेतरयोगरूपचार्थे एव द्वंद्वः इति ‘चार्थे दंद्वः’ इति सामान्यसूत्रं महाभाष्यकारादिभिः विशेषपरतया व्याख्यातम्। अतश्च युगपदधिकरणतावाचिद्वंद्वापवादत्वात् एकशेषस्यापि तद्वाचित्वप्रतीतेः ‘वसानौ’ इत्यत्र पुंद्वयप्रतीतिरिति ”। तन्न। विरूपैकशेषाङ्गीकारेऽपि स्त्रीसहितपुंसः पुंसहितस्त्रियाश्च युगपदभिधानोपपत्तेः। न चैवं पुंद्वयं स्त्रीद्वयं च इति चतुष्टयापत्तिः, धवखदिरद्वयवत् स्त्रीपुंद्वयोपपत्तेः। वस्तुतस्तु कात्यायनोक्तं युगपदधिकरणतावाचित्वं पतञ्जलिभिरेव दूषितम्। तस्यायमाशयः। धवपदे खदिरपदे च लक्षणायां प्रमाणाभावात् इतरेतरयोगस्य चशब्देनैव तात्पर्ये सति बोधोपपत्तेः। अत एव धवं च खदिरं च इत्यादौ तात्पर्यानुरोधेन धवखदिरवृत्तिव्यासज्यकर्मत्वे लक्षणा इत्यपि ध्येयम्। द्वंद्वे तु विभक्तेरेकत्वादेव इतरेतरयोगो लक्षणां विनैव निरवबाधः। यत्तु ‘प्र मित्रयोर्वरुणयोः’ इति वेदे क्वाचित्कं विग्रहप्रदर्शनं तच्छान्दसम्। अत एव विभक्तेर्व्यासज्यवृत्तिधर्मपरत्वे द्वंद्वः एव तादृशस्थले तात्पर्यग्राहकः इत्यपि बोध्यम्। किञ्च द्वंद्वापवादत्वेऽपि एकशेषस्य न तदुत्तरविभक्तेर्व्यासज्यवृत्तिधर्मपरत्वम्, वचनान्वयस्य विभक्त्यर्थान्वयोत्तरकालीनत्वेन ततः पूर्वं एकशेषत्वग्राहकप्रमाणाभावात्। वस्तुतस्तु एकशेषानुशासनमपि परिभाषामात्रमेव, सरूपद्वंद्वनिराकरणार्थं एकप्रातिपदिकार्थस्यैव द्विवचनादिबलेन अनेकत्वप्रतीत्युपपत्तेः। विरूपैकशेषत्वे तु तात्पर्यग्राहकानुरोधेन आनुशासनिकी औकारे लक्षणा इति विशेषः। अतस्तद्भिया सरूपैकशेषस्यैव अङ्गीकारात् पुंद्वयाधिकारः। इति प्राप्ते, वसन्तादिवाक्ये ‘आदधीत’ इत्येकवचनस्य पाक्षिकानुवादत्वापत्तेः, ब्राह्मणद्वयकर्तृकाधाने वसन्तप्राप्त्यनापत्तेश्च वसन्तादिवाक्येष्वेव आधानविधानम्। वसानवाक्ये तु एककर्तृत्वविशिष्टाधाने कर्तृद्वित्वक्षौमोभयविध्ययोगात् आनुशासनिकीं लक्षणामङ्गीकृत्य परं विरूपैकशेषः अधिष्ठानलक्षणया। तस्मिन् द्वित्वान्वयोऽपि पार्ष्ठिको युक्तः समाश्रयितुम्। अत एव तत्र क्षौममात्रं वसनक्रियोद्देशेन विधीयते। युक्तश्च कृदुपात्तभावनायामपि कारकसंबन्धः। विधायकस्तु आदधातिपर एव प्रत्ययः। उपक्रमस्थक्षौमपदे श्रुत्यर्थलाभाय च विप्रकृष्टार्थस्यापि विधायकः। अन्यत्तु सर्वं प्रकरणप्राप्तत्वादनूद्यते। यद्यपि च उत्पत्तौ पुंस्त्वश्रवणात् स्त्रियमादाय द्वित्वं न प्राप्यते, तथापि विशिष्टविधौ गौरवपरिहाराय वसानवाक्ये वाक्यभेदपरिहाराय च ब्राह्मणादेः अधिकारित्वेनैव अन्वयाङ्गीकारात्, तस्य चोद्देश्यत्वेन तद्विशेषेण पुंस्त्वस्याविवक्षोपपत्तेः स्त्रियमादाय द्वित्वप्राप्त्यविघातः। द्विवचनं चात्र अधिष्ठानानेकत्वमात्रपरम्। तेन पत्न्यनेकत्वेऽपि न कश्चिद्विरोधः। अतः एक एव पुमान् स्त्रीसद्वितीयः आधाने अधिकारी।

मण्डन— ‘वसानौ दंपती प्रोक्तौ।’

शंकर— ‘नाधाने पुंद्वयस्य सा।’ सा अधिक्रिया।

* **द्व्याम्नातेषु** (अध्वर्युकाण्डे यजमानकाण्डे च पठितेषु) स्रुग्व्यूहनादिमन्त्रेषु उभौ कर्तारौ। अध्वर्युः एतेन प्रकाशितमनुष्ठास्यामीति, यजमानो न प्रमदिष्यामीति। भा. ३।८।७।१७.

⌛ द्व्याम्नातेषूभौ, ह्याम्नानस्यार्थवत्त्वात्। ३।८।७।१७॥

दर्शपूर्णमासयोः ‘पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि’ इत्यादयः आज्यग्रहणमन्त्राः, ‘वाजस्य मा

प्रसवेन' इत्याद्यौ स्रुग्व्यूहनमन्त्रौ च आध्वर्यवे याजमाने च काण्डे इति द्विराम्नातौ। इति द्व्याम्नातेषु मन्त्रेषु उभौ अध्वर्युश्च यजमानश्च द्वावपि अधिकारिणौ। ते मन्त्राः द्वाभ्यामपि पठनीयौ। तत्र अध्वर्युः, एतेन प्रकाशितमनुष्ठास्यामि इति संधाय, यजमानस्तु न प्रमदिष्यामि इति संधाय ब्रूयात्। कस्मात्? द्व्याम्नानस्य अर्थवत्त्वात् सफलत्वात् हेतोः द्वाभ्यां पठनीयौ। समाख्याद्वयस्य समानबलत्वात् इति भावः।

अत्र **सुधा**-- द्विःपाठार्थवत्त्वान्यथाऽनुपपत्त्या द्विःप्रयोगावगमात् भिन्नविषयत्वेन सामान्यसमाख्याया अपि बाधायोगः इति। **के.**

⧗ **द्व्याम्नाताधिकरणम्।** दर्शपूर्णमासयोः आध्वर्यवयाजमानकाण्डयोर्द्विराम्नाता मन्त्राः उभाभ्यामपि प्रयोक्तव्याः॥

द्व्याम्नातेषूभौ, द्व्याम्नानस्यार्थवत्त्वात्। ३।८।७।१७॥

भाष्यम्-- स्तो दर्शपूर्णमासौ, तत्र द्व्याम्नाता मन्त्रा आध्वर्यवे काण्डे याजमाने च। आज्यं यैर्गृह्यते 'पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि' इत्येवमादयः। तथा स्रुग्व्यूहनमन्त्राः। 'स्रुचौ व्यूहति, वाजस्य मा प्रसवेन' इति। तत्र संदेहः किं ते उभाभ्यामपि कर्तव्याः, उताध्वर्युणैवेति। किं प्राप्तम्? समाख्यानादाध्वर्यवाः। इति **प्राप्ते, उच्यते।** उभावपि तान् प्रयुञ्जीयातामिति। कुतः? द्व्याम्नानस्यार्थवत्त्वात्। द्वाभ्यां समाख्यानात् द्वावपि कर्तारौ गम्येते। तस्मात् द्वौ ब्रूयाताम्। अध्वर्युः एतेन प्रकाशितमनुष्ठास्यामीति। यजमानो न प्रमदिष्यामीति।

वा— आज्यग्रहणादिमन्त्रेषु सामान्येन आध्वर्यवे पुनर्विशेषेण याजमाने काण्डे पठ्यमानेषु किमुभौ प्रयोक्तारौ विकल्पेन समुच्चयेन वा, अथान्यतरः इति। तत्र आध्वर्यवत्वे विकल्पे वा प्राप्ते, द्वावित्याह। ननु च विशेषसमाख्यानात् केवलयाजमानत्वमेव स्यात्। तत्र वयं विशेषसमाख्यां बलीयसीमिच्छामो यत्र सकृदाम्नानम्। ये तु सामान्ये विशेषे च भेदेन आम्नायन्ते, तेषु यदि विशेषसमाख्या अङ्गीक्रियते, ततः सामान्यपाठस्य आनर्थक्यमेव स्यात्। एकविषयत्वे च सामान्यं विशेषो बाधते। सत्यपि त्वत्र मन्त्राभेदे पाठभेदात् विषयान्यत्वम्। पाठस्य हि भेदेन प्रयोजनं कल्पयितव्यम्। न च तदुभयप्रयोज्यत्वात् अन्यत् संभवति। तस्मादुभावपीति। **ननु** द्वयोः पाठयोः एकः स्वरूपप्रज्ञापनार्थः, इतरो विनियोगार्थः स्यात्। तत्रापि मन्त्राणां कर्मप्रकाशनार्थत्वादङ्गप्रधानानां च समानकर्तृकत्वात् यत्रैव आज्यग्रहणादि कार्यमाम्नातम्, तत्रैव समाख्यातेनैव कर्त्रा विनियोगो युक्तः। तत्रैव च मन्त्रस्य प्रयोज्यत्वेन अवगतस्य कर्तृविशेषाकाङ्क्षा भवति, नेतरत्र। रूपमात्रप्रज्ञापनस्य अन्तरेणापि कर्मकालप्रयोगम्, अध्ययनमात्रेणैव सिद्धत्वात्। आज्यग्रहणादि च असंदिग्धमाध्वर्यवम्। तस्मान्न यजमानेन प्रयोक्तव्या इति। **उच्यते।** याजमानेऽपि रूपमात्रादेव अन्तरेणापि कार्ये प्रयोज्यत्वेनावधारणात् अस्त्येव कर्त्रपेक्षेति यजमानकर्तृत्वसिद्धिः। किं पुनस्तेषां प्रयुज्यमानानां प्रयोजनम्? **उच्यते।** यथैवाध्वर्युणा पदार्थाः कर्तव्याः, तथैव यजमानेन अप्रमादार्थं प्रत्यवेक्षितव्याः। तद्यत्र मन्त्रा नाम्नायन्ते तत्रोपायान्तरेण प्रत्यवेक्ष्यते, इह तु मन्त्रैरित्यर्थवत्ता।

सोम— समाख्याबाधापवादात् **संगतिः।**

वि— 'वाजस्य मेत्यमुं ब्रूयादेको द्वौ वा, कृतार्थतः।
एकः, काण्डद्वये पाठादध्वर्युस्वामिनावुभौ॥' ८.

भाट्ट— ये मन्त्राः सामान्यतः आध्वर्यवसमाख्याते काण्डे समाम्नाताः, पुनश्च याजमानेऽपि विशेषतः समाख्यायन्ते, यथा आज्यग्रहणमन्त्राः स्रुग्व्यूहनमन्त्राश्च, ते तावत् सत्यपि अभ्यासे प्रत्यभिज्ञायमानत्वात् विध्यभावाच्च अभिन्नाः। अतः तत्र गुणभूतकर्तृद्वयस्य विकल्पः। विशेषसमाख्याबलाद्वा यजमान एव कर्ता। आज्यग्रहणस्रुग्व्यूहनादेर्वा निःसंदिग्धमाध्वर्यवत्वात् तदङ्गभूता मन्त्रा अपि तत्कर्तृका एव। न चैवं द्विःपाठवैयर्थ्यम्, एकत्र स्वरूपज्ञानं अन्यत्र विनियोगः इत्येवं सार्थक्यात्। इत्येवं **प्राप्ते,** एकपाठेनैवोभयसिद्धा द्वितीयस्य वैयर्थ्यापत्तेः तस्योच्चारणान्तरविधायित्वावगतेः, तस्य च समाख्याऽन्तरेण कर्त्रन्तरसिद्धिः। उच्चारणान्तरप्रयोजनं तत्क्रियाप्रत्यवेक्षणमिति नादृष्टकल्पनाऽपि। यद्यपि च तत्

नियमेन यजमानस्य न प्राप्तम्, तथापि द्विःपाठबलादेव तत्कल्पनमिति न दोषः। यत्र तु नैवंविधं प्रयोजनं कर्तृभेदो वा संभवी यथा 'अयं सहस्रमानवः' इत्यस्यामौद्गात्रे एव प्रगीताप्रगीतभेदेन समाम्नातायाम्, तत्रागत्या अभ्युदयशिरस्कत्वं परिकल्प्य उत्पत्तिविनियोगपरत्वेन सार्थक्यमिति विशेषः। ('पञ्चानां त्वा वातानाम्' इत्यादय आज्यग्रहणे, 'वाजस्य मा प्रसवेन' इति स्रुग्व्यूहने)।

मण्डन— 'द्व्याम्नातमन्त्रा उभयप्रयोज्याः।' ८.

शंकर— 'द्व्याम्नातस्तूभयोर्मनुः।' १०.

* **द्व्यार्षेयस्य** कर्माधिकारो नास्तीति जैमिनिमतम्, अस्ति तस्यापि कर्माधिकार इति ऋष्यन्तरमतम्। **के.** ६।१।११.

* **द्व्येकबहुशब्दाः** संख्यावचनाः। तामनभिधाय संख्येये वृत्त्यसंभवात्। **वा.** ३।४।४।१३ पृ. ९२४.

* **द्विकपाले** आश्विने आग्नेयाष्टाकपालगतप्रथमकपालद्वयविध्यन्तः। **भा.** १०।५।१।१-६.

* **द्विकर्मकत्वं** अविवक्षाविरहविशिष्टकर्मद्वयाकाङ्क्षधातुत्वं इति द्विकर्मकस्यापि एककर्मत्वे 'निनाय' इत्यादौ न क्षतिः। **मणि.** पृ. १०९.

⌛ **द्विगता अपि हेतवो भवन्तीति न्यायः।** द्वावर्थौ गताः प्रयोजनद्वयस्य संपादका इत्यर्थः। तद्यथा 'आम्राश्च सिक्ताः पितरश्च प्रीणिताः। एका क्रिया द्व्यर्थकरी प्रसिद्धा' इति महाभाष्यम्। **साहस्री.** ४२३.

⌛ **द्विगोत्राणां प्रवरवरणे एकतो द्वौ अन्यत एकः इति त्रयः॥**

द्व्यामुष्यायणानां शैशिरादीनामुभयकीर्तने त्रित्वसंख्याधिक्यापत्तेरन्यतरत्रितयकीर्तनेनैव 'त्रीन् वृणीते' इति विध्यर्थानुष्ठानसिद्धिः। **इति प्राप्ते**, विकल्पस्य जघन्यतयैव 'एकतो द्वावन्यत एकम्' इत्यादिवचनसिद्धव्यवस्थयैव आर्षेयवरणम्। अत एवोभयतो द्वयोर्द्वयोर्ग्रहणे त्रिस्त्रिग्रहणे वा चतुःषडार्षेयप्राप्तौ तन्निषेधः संगच्छते। अन्यथा चतुःषट्प्रवराणामभावादेव सिद्धेः निषेधवैयर्थ्यापत्तिः। **संकर्ष.** ३।४।८.

* **द्वित्वम्।** अवान्तरसामान्यावच्छेदं विना द्वित्वानवधारणात्। **सु.** पृ. ७२६.

* **द्वित्वादीनां** अपेक्षाबुद्धेरेव अनेकता। **मणि.** पृ. १७.

* **द्वित्वबहुत्वयोः** भाविभूतपदार्थनिष्ठत्वम्। **मणि.** पृ. १६.

⌛ **द्वित्वबहुत्वाधिकरणम्।** ज्योतिष्टोमे श्रुतयोः यजमानद्वित्वबहुत्वसंबन्धिन्योः प्रतिपदोः कुलायसत्रयोः उत्कर्षः।

द्वित्वबहुत्वयुक्तं चाचोदनात्तस्य। ३।३।९।१७॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः' इति। तत्र संदेहः ज्योतिष्टोमे एव निविशेते प्रतिपदौ, उत द्वियज्ञं कञ्चित् कुलायादिं बहुयज्ञं च द्विरात्रादिं उत्कृष्यते इति। किं प्राप्तम्? द्वित्वबहुत्वयुक्ते ज्योतिष्टोमेन असंयोगात् उत्कृष्येयातां प्रतिपदौ। नहि ज्योतिष्टोमस्य द्वौ यजमानौ श्रूयेते, यथा कुलायस्य 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इति।

वा— पूर्ववदेव विचारः। एतावत्तु भिद्यते। पूर्वत्र प्रधानान्तरेण प्रकृतासमर्थशब्दाभिधेयेन सह संबन्ध आसीत्, इह तु गुणेन यजमानद्वित्वादिना कथञ्चिदाशङ्कितप्रकृतसंबन्धेन। तत्र पूर्वन्यायेनैव सिद्धान्तोपक्रमं सूत्रम्। न तावत् इह यजमानद्वित्वबहुत्वे विधीयेते, सिद्धानुवादेन निमित्तीकृत्य प्रवृत्तेः प्रतिपद्विधिपरत्वात्, अनेकविधौ च वाक्यभेदात्। अविहितत्वाच्च न ज्योतिष्टोमे यजमानद्वित्वबहुत्वे विद्येते। कुलायादिषु तु एकाहेषु अहीनेषु च प्रत्यक्षविहिते विद्येते। 'राजपुरोहितौ यजेयाताम्' 'एतेनैव द्वौ याजयेत्' 'एतेनैव त्रीन् याजयेत्' 'एको द्वौ बहवो वाऽहीनैर्यजेरन्' इति। तस्मादुत्कर्षः।

पक्षेणार्थकृतस्येति चेत्। १८॥

भाष्यम्— इति चेत् पश्यसि प्रतिपदौ उत्कृष्यन्ये इति। नैतदेवम्। प्रकरणं हि बाध्येत। बाध्यताम्, असंयोगात् द्वाभ्यां यजमानाभ्यां बहुभिश्च यजमानैर्ज्योति-

ष्टोमस्य, इति चेत् । असत्यपि वचने अर्थात् द्वौ यजमानौ भविष्यतः । य एको न शक्ष्यति, ससहायः स उपक्रंस्यते । अवश्ययष्टव्ये सति यथा शक्यते तथा यष्टव्यमिति बाधित्वाऽपि कांचित् प्राप्तिं यजमानः सहायमुपादास्यते । एवं प्रकरणे प्रतिपदौ भविष्यतः । तस्मान्नोत्कृष्टव्ये इति ।

वा— प्रकरणात् ज्योतिष्टोमे निवेशः । न च अहीनवत् अप्रकृतयज्ञसंबन्धोऽस्ति । यजमानद्वित्वादिसंबन्धस्तु निमित्तमात्रौपयिकत्वात् नाङ्गाङ्गिभावाय प्रभवति । न च तद्द्वारेण क्रतुसंबन्धो घटते, लक्षणाप्रसङ्गात् । नहि श्रुत्या उपयुक्तानां लक्षणया उपयोगान्तरं युज्यते । द्वित्वादिस्वरूपसंबन्धे तु विधिरेव अनर्थको भवेत् । फलकल्पनायाश्च प्रकरणसंबन्धकल्पना ज्यायसी । यत्तु निमित्तं प्रकरणे नास्तीति, तदुच्यते अर्थाद्भविष्यति । नहि विहितमेवैकं निमित्तं भवति, अर्थप्राप्तस्यापि उपपद्यमानत्वात् । अस्ति च एकाशक्तिपक्षे द्वित्रादियजमानप्राप्तिः । न चाद्यापि यजमानैकत्वविवक्षां अवधारयामः । सत्यामपि च विवक्षायाम् ‘अपि वाऽप्येकदेशे स्यात्’ इत्यनेन यथैव अशक्तेः अन्यत् किञ्चिदङ्गं हाप्यते, तथैव यजमानैकत्वमपि कदाचित् परिहाप्य द्वौ बहवो वा यजेरन्, ततश्चास्ति निमित्तम् । अथवा एतदेव प्रतिपद्विधानं दृष्ट्वा अर्थात् द्विबहुयजमानकर्तृश्रुतिं कल्पयिष्यामः । सा चैतस्मिन्नेव पक्षे भवति, न प्रतिपदन्तरपक्षेषु इति नैकत्वचोदना विरोत्स्यते ।

न, प्रकृतेरेकसंयोगात् । १९ ॥

भाष्यम् — प्रकृतिर्हि ज्योतिष्टोमः । प्रत्यक्षास्तत्र धर्मा आम्नाताः, न कुतश्चित् चोदकेन प्राप्यन्ते । किमतो यद्येवम् ? प्रत्यक्षश्रुताः न शक्या बाधितुम् । विकृतौ तु चोदकप्राप्ताः सन्तः आनुमानिका बाध्येरन्निति । विवक्षितं हि ज्योतिष्टोमे कर्तुरेकत्वं प्रत्यक्षश्रुतं न सामर्थ्येन बाध्येत । यत्रापि हि अवश्यकर्तव्यता श्रूयते, तत्रापि एक एव यजमानः श्रूयते ‘वसन्तेवसन्ते ज्योतिषा यजेत’ इति । तस्मात् ज्योतिष्टोमात् उत्कृष्टव्ये एते प्रतिपदाविति । अथ कस्मात् पत्न्यभिप्रायमेतन्न भवति । एकस्यां पत्न्यां यजमाने च ‘युवं हि स्थः’ इति, द्वयोर्बहुषु वा पत्नीषु ‘एते असृग्रमिन्दवः’ इति । यथा ‘क्षौमे वसानौ अग्निमादधीयाताम्’ इति क्षौमवसानपरं वचनम्, एवमिहापि प्रतिपद्विधानपरम् । उच्यते । असंभवात् तत्र मुख्यस्य, लक्षणाशब्दः पुंसो वाचकः स्त्रियाम् । इह तु द्वियज्ञे बहुयज्ञे च संभवति, न लक्षणाशब्दो भवितुमर्हति बहुभ्यो यजमानेभ्य इति । यदपि एतत् द्विवचनं द्वयोर्यजमानयोरिति, अत्रापि य एकशेषः, ‘पुमान् स्त्रिया’ (पा० १।२।६७) इति, असावपि लक्षणाशब्द एव । अपिच ‘उपास्मै गायता नरः’ इति प्रतिपदो निरवकाशत्वमेव स्यात् । तस्मादुत्कृष्टव्ये एते प्रतिपदौ इति सिद्धम् ।

बा-- प्रकृतिग्रहणं प्रकृतप्रतिपत्त्यर्थम् । औपदेशिकत्वाद्वा अत्यन्तानतिक्रमार्थम् । आतिदेशिकं हि अर्थवशेन बाध्येतापि । प्रत्यक्षविहितं तु एतत् काम्ये नित्ये च, यजेत इत्येकवचनश्रवणात् । न च अस्य अविवक्षायां कारणमस्ति । यथा च विवक्षा, तथा षष्ठे प्रतिपादयिष्यते (६।३।१।२) । यदपि अशक्तिकृतं हापनम्, तदपि एको यथा शक्नुयात् इति उपबन्धात् अन्याङ्गविषयं विज्ञायते । शक्नोति हि दक्षिणापरिमाणं परित्यज्य एकोऽपि निर्वर्तयितुम् । उत्पत्तिप्रयोगचोदनास्थत्वाच्च संख्याऽनुग्रह एव युक्तः । तस्मात् एकयजमानकत्वात् प्रकृतौ निमित्तमस्ति इति उत्कृष्यते । यत्तु इदमेव वचनं सामर्थ्यादाक्षेप्स्यतीति, तन्न, अन्यथाऽपि उपपद्यमानत्वात् । यदि हि एतन्निमित्तं अनाक्षिपत् अनर्थकीभवेत्, तत आक्षिपेत् । कथं चैतदनर्थकं भवेत्, यदि प्रकृताविव अन्यत्रापि द्वित्वबहुत्वे न स्याताम् । न तु ते अन्यत्र न स्तः, कुलायादौ विद्यमानत्वात् । इह च सिद्धवन्निमित्तत्वेन उपादानात् वाक्यभेदप्रसङ्गाच्च नार्थात् आक्षेपमर्हतः । पत्न्यभिप्राये तु द्वित्वे नित्यत्वात् निमित्तोपादानानर्थक्यम् । बहुभ्य इति च विरूपैकशेषः (बहवश्च बह्वयश्च इति) स्वरसतः पुंबहुत्वप्रतीतौ सत्यां विधिर्निष्प्रमाणकः कल्प्येत । ‘क्षौमे वसानौ’ (वसानश्च वसाना चेति) इत्यत्र तु अगत्या पत्न्यां द्वितीयशब्द इष्टः । नहि द्वियज्ञवत् द्विपुरुषकमाधानं क्वचित् विहितम् । एकद्विपत्नीकप्रयोगावरोधाच्च नित्यायाः प्रतिपदः आनर्थक्यं भवेत् । विषमशिष्टविकल्पो वा अभ्युपगम्येत । तस्मादपि उत्कृष्यते ।

यत्तु क्रतुसंबन्धो नाभिहित इति, नैष दोषः, प्रतिपच्छब्दादेव क्रतुगामित्वप्रतिपत्तौ सत्यां द्वित्वादिना विशेषप्रतिपत्तिसिद्धेः । यजमानशब्दो वा अन्यथाऽनुपपत्त्या यज्ञमुपस्थापयिष्यति । तस्मात् व्यतिरिक्तसंयोगे सति अस्ति प्रकरणविरोधः । तत्र च श्रुतेर्बलीयस्त्वम् ।

शा— **'हीनाङ्गस्यापि नित्यस्य प्रयोगो येन वक्ष्यते । तेनैकत्वं विहाय द्वौ बहवो वा प्रयुञ्जते ॥ नैतदेवमशक्याङ्गमुपादेयं हि लुप्यते । अनुपादेयमेकत्वं यजमानस्य कालवत् ॥'** तस्मादुत्कर्षः प्रतिपदोः ।

सोम-- पूर्ववैषम्येण प्रत्यवस्थानात् संगतिः । **सूत्रार्थस्तु**— द्वित्वबहुत्वयुक्तं च प्रतिपद्द्वयं विकृतौ उत्कृष्येत तस्य द्वित्वबहुत्वस्य प्रकृतौ अचोदनात् इति ।

वि--'युवं हीति द्वयोः कर्त्रोर्बहूनां चैत इत्यमूम् (एते इति) । कुर्यात् प्रतिपदं ज्योतिष्टोमे साहर्गणेऽथवा ॥, एकस्य शक्तिराहित्ये द्वाभ्यां बहुभिरेव वा । ज्योतिष्टोमस्य कार्यत्वात् प्रकृतेऽत्रैव सा भवेत् ॥, यजमानस्य नानात्वं साक्षात् विकृतिषु श्रुतम् । उत्कृष्य प्रतिपत् तेन कुलायादिषु नीयताम् ॥' १४.

भाट्ट--ज्योतिष्टोमे एव 'उपास्मै गायता नरः' इति नित्यां प्रतिपदं विधाय 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात् । एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः' इति श्रुतम् । तत्र आद्यवाक्ये 'द्वयोर्यजमानयोः' इति यदि सप्तमी, तदा सा निमित्तत्वपरा । यद्यपि च पृथग् विभक्तिश्रवणम्, तथापि हविरार्त्यधिकरणन्यायेन (६।४।६।२२) पाक्षिकत्वाभावेन प्रत्येकं निमित्तत्वापर्यवसानात् प्रधानभूतनिमित्तत्वानुरोधेन मिलितयोरेव द्वित्वावच्छिन्नयजमानत्वावच्छिन्नयोः निमित्तत्वं प्रतिपाद्यते । यदि तु षष्ठी, तदा अधिकारित्वाख्यसंबन्धानुवादिका सती स्ववैयर्थ्यपरिहारार्थं पदद्वयेऽपि लक्षणामङ्गीकृत्य लाघवात् द्वित्वयजमानत्वयोरेकं व्यासज्यवृत्तिनिमित्तत्वं प्रतिपादयति, विशेषणविशेष्यभावेऽपि विनिगमनाविरहात् । एवं 'बहुभ्यो यजमानेभ्यः' इति तादर्थ्यचतुर्थ्याऽपि अधिकारित्वसंबन्धानुवादिकया उक्तविधनिमित्तत्वे लक्षणा । अतश्च न अन्यतराविवक्षाप्रसङ्गः । निमित्ते च प्रतिपदुद्देशेन मन्त्रविधानेऽपि विजातीयत्वान्न अनेकोद्देश्यता । प्रकरणाद्वा प्रतिपत्संबन्धलाभः इति पक्षद्वयेऽपि अविवादम् । तदिह इमौ मन्त्रौ ज्योतिष्टोमे एव निविशेते, उत द्विबहुयजमानके कुलायाऽहीनादौ इति चिन्तायाम्, प्रकरणाविरोधात् प्रकृते एव निवेशः । न च तत्र निमित्ताभावः, आख्यातेन 'वसन्तेवसन्ते ज्योतिषा यजेत' इत्यादिना उपादेयकर्तृविशेषणत्वेनोक्तस्य एकत्वस्य विवक्षायामपि नित्यत्वेन ज्योतिष्टोमे यथाशक्त्युपबन्धस्य वक्ष्यमाणत्वात्, यदि एको न शक्नुयात्, तदा द्विबहुयजमानकत्वप्राप्तेः प्रतिपद्विधानसंभवात् । अथवा यजमानशब्दस्य यागकर्तृमात्रवचनस्य पत्न्यामपि संभवात् आद्यवाक्ये तावत् स्त्रीलिङ्गत्वे बाधकाभावात् पत्नीद्वित्वे स मन्त्रः । द्वितीयवाक्येऽपि पाशाधिकरणन्यायेन लिङ्गानुरोधेन प्रकरणबाधानुपपत्तेः व्यत्ययानुशासनेन पुंलिङ्गस्य स्त्रीत्वपरत्वावगतेः पत्नीबहुत्वे द्वितीयो मन्त्रः । नित्या तु प्रतिपत् पत्न्येकत्वे । इति प्राप्ते, नित्यत्वेऽपि ज्योतिष्टोमस्य न एकत्वे यथाशक्तिन्यायविषयता, उत्पत्त्यादिवाक्येषु समानाभिधानश्रुत्या भावनायामन्वितस्य तस्य अन्तरङ्गत्वेन अशक्तौ दक्षिणापरिमाणाद्यङ्गान्तरबाधेन अस्यैव अनुग्राह्यत्वात् । किञ्च यत् कृतिसाध्यत्वेनानुष्ठेयतया प्रसक्तम्, तत्रैव यथाशक्त्युपबन्धः, न तु अननुष्ठेये कालादौ । अतश्च तद्वदेव अस्यापि न तन्न्यायविषयता, इति न प्रकृते यागे द्वित्वबहुत्वे । न च यजमानशब्दः पत्नीपरः, पुंस्येव प्रचुरप्रयोगेण शक्त्यवगमेन लक्षणायां प्रमाणाभावात्, यजमानेभ्य इति पुंलिङ्गस्य 'प्रास्मै' इत्यस्य मेष्यामिव निषिद्धत्वेन अगतिकव्यत्ययानुशासनाङ्गीकारानुपपत्तेश्च । अतश्च वाक्येन प्रकरणबाधात् यत्र 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्' 'एको द्वौ बहवो वा यजेरन्' इति आहत्यैव कुलायाहीनादिषु द्वित्वबहुत्वविधानम्, तत्रैव अस्योत्कर्षः । न चात्र तत्क्रतूपस्थापकाभावः, प्रतिपत्संबन्धेनैव सामान्यतः क्रतुसंबन्धेऽवगते निमित्तबलेन तद्विशेषोपस्थितौ बाधकाभावात् ।

मण्डन---‘ द्वियज्ञे प्रतिपद्विधिः । ’ १४.

शंकर--‘ द्विबहुप्रतिपत् तथा । ’ प्रकृते बाध्या ।

द्वित्वबहुत्वयुक्तं चाचोदनात् तस्य । ३।३।९। १७ ॥

‘युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्’ ‘एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः’ इति ज्योतिष्टोमे श्रूयते । एतत् द्वित्वबहुत्वयुक्तं मन्त्रजातं राजपुरोहितोभयकर्तृके कुलाययज्ञे बहुकर्तृके च अहीने अपकृष्यते । ज्योतिष्टोमे तस्य द्वित्वबहुत्वयुक्तकर्तृकत्वस्य अचोदनात् अविधानात् । तस्मात् ज्योतिष्टोमादपकर्षः । चशब्दो दृष्टान्तार्थः । यथा द्वादशोपसत्ता उत्कृष्यते तथा इदमपि उत्कृष्यते । इति सिद्धान्तः ।

पक्षेणार्थकृतस्येति चेत् । १८ ॥

पूर्वपक्षी आह । पक्षेण कदाचित् विकल्पेन अर्थकृतस्य अर्थात् प्राप्तस्य द्विबहुयजमानकत्वस्य ज्योतिष्टोमे संभवात् प्रतिपद्द्वयस्य नोत्कर्षः । एकस्य यजमानस्य कदाचित् दक्षिणादिसंपादनाशक्तौ एकत्वबाधेनापि द्विबहुयजमानकत्वं संभवेत् इति भावः । इति चेत् पूर्वपक्षी ब्रूयात् ।

न, प्रकृतेरेकसंयोगात् । १९ ॥

नेत्याह सिद्धान्ती । कुतः ? प्रकृतेः निखिलसोमप्रकृतेः ज्योतिष्टोमस्य एकसंयोगात् एकेनैव कर्त्रा संबन्धात् । ‘सोमेन यजेत’ इति उत्पत्तिविधिगतस्य कर्तुरेकत्वस्य बाधासंभवात् । तथा च ज्योतिष्टोमस्य एकमात्रकर्तृकत्वात् प्रतिपदोः उत्कर्ष एव इति । **के.**

* द्वित्वबहुत्वयुक्तं (३।३।९।१७–१९) इत्यधिकरणे तु यजमानस्य आत्मीयमेकत्वमपि अनुपादेयं इत्युक्तम् । **बाल. पृ. ९७.** * ‘द्वित्वबहुत्वयुक्तं चाचोदनात्तस्य’ इत्यधिकरणे य एकशेषः ‘पुमान् स्त्रिया’ इति, स लक्षणाशब्द एवेति भाष्यकारेणोक्तम् । **सोम. ६।१।५.**

* **द्विदेवत्याश्च**मसाः ऐन्द्रवायवादयः । **वि. ३।२।१३.** * **द्विदेवत्यानां** शेषाः आग्रयणस्थाल्यामुपनीताः, ततः पात्नीवतो गृह्यते । **भा. ३।२।१३।३३** । द्विदेवत्यानां ऐन्द्रवायवादीनां शेषाः आदित्यस्थाल्यां निक्षिप्यन्ते । ततोऽपि पुनः आग्रयणस्थाल्यामागच्छन्ति । ततश्च पात्नीवतस्य ग्रहणम् । **वा.** * **द्विदेवत्ये** आग्नावैष्णवादौ अग्नीषोमीयपुरोडाशधर्माणामतिदेशः, द्विदेवतात्वसामान्यात् । **भा. ८।३।१।१–२.**

* **द्विदेवत्यत्वव्यवहारो** मीमांसायाम् । ‘सर्वत्र शास्त्रे द्विदेवत्यत्वाभ्युपगमात् । तद्यथा चतुर्धाकरण-इन्द्रपीत–पूषप्रपिष्टभागविचारेषु सापेक्षाग्निदेवत्यादीनां ऐन्द्राग्न–अग्नीषोमीयादीनां आग्नेयादिशब्दैः केवलाग्न्यादिदेवताकैः असामर्थ्यादग्रहणं इति वक्ष्यति’ इति **वार्तिकम्** (पृ. ४२०) । **अत्र सुधा**- न केवलं याज्ञिकानां द्विदेवत्यत्वव्यवहारः किन्तु मीमांसायामपि । ‘आग्नेयं चतुर्धा करोति’ इत्याग्नेयशब्देन सापेक्षाग्निदेवत्ययोः ऐन्द्राग्नाग्नीषोमीययोः पुरोडाशयोः अग्रहणं ‘व्यवस्था वा’ (३।१।२७) इति सूत्रे वक्ष्यते । इन्द्रपीतसमासस्थेन इन्द्रशब्देन सापेक्षेन्द्रदेवत्यस्य ऐन्द्राग्नादेः सोमस्य अग्रहणं ‘एकस्मिन् वा देवतान्तरात्’ (३।२।४१) इति इन्द्रपीतविचारसिद्धान्तसूत्रे वक्ष्यते । पूषशब्देन सापेक्षपूषदेवत्यस्य ऐन्द्रापौष्णादेरग्रहणं ‘एकस्मिन्नेकसंयोगात्’ (३।३।३९) इति पूषप्रपिष्टभागविचारे वक्ष्यति । द्विदेवत्यानां दार्शपौर्णमासिकद्विदेवत्ययागप्रकृतिकत्वम् ‘ऐकार्थ्याद्वा०’ (८।१।२८) इति सूत्रे वक्ष्यते । ‘आशासाना मेधपतिभ्यां मेधम्’ इति अध्रिगुप्रैषगतमेधपतिशब्देन द्विवचनान्तमेधपतिशब्दवाच्यं अग्नीषोमाख्यदेवतारूपं अर्थद्वयं आश्रयिष्यते । ‘त्वं ह्यग्ने प्रथमो मनोता’ इति मनोताख्यो मन्त्रः अन्यदेवत्यपशौ ऊहितव्यो न वा इति संदेहमुपन्यस्य ‘ननु प्रकृतौ अन्यार्थोऽयं निगदः (अन्यायनिगदोऽयम्) अग्नीषोमौ हि प्रकृतौ देवता । अयमप्याग्नेयः । असमवेताभिधानात् अविकारेण प्रयोक्तव्यः’ इत्याशङ्किते ‘सत्यं अग्नीषोमौ देवता प्रकृतौ, तौ तु अग्निश्च सोमश्च’ इति भाष्यकृत् वक्ष्यति (भा. पृ. १९३८–३९) ‘मनोतायां तु वचनादविकारः स्यात्’ १०।४।४२ इत्यत्र ।

व्याकरणशास्त्रेऽपि द्विदेवत्यत्वव्यवहारोऽस्ति । ‘देवताद्वंद्वे च’ (पा० ६।३।२६) इत्यधिकृत्य ‘ईदग्नेः सोमवरुणयोः’ (२७) इति सोमशब्दे वरुणशब्दे च परभूते अग्निशब्दस्य देवताद्वंद्वनिमित्तं ईत्वं (अग्नीषोमौ अग्नीवरुणौ इति) स्मृतम् । मूर्धन्याधिकारे च ‘अग्नेः

स्तुत्स्तोमसोमाः’ (पा० ८।३।८२) इत्यत्र अग्निशब्दात् परस्य सोमशब्दस्य मूर्धन्यादेशेन षत्वस्मृतेः सोमशब्दस्य अग्निशब्दाद्भेदावगमात् अर्थात् द्वंद्वावगतिः। पूर्वपदप्रकृतिस्वराधिकारे ‘ उभे वनस्पत्यादिषु युगपत् ’ (पा० ६।२।१४०) इत्यनुवर्तमाने ‘ देवताद्वंद्वे च ’ (पा०६।२।१४१) इत्यनेन इन्द्रासोमौ इन्द्रावरुणौ इत्यादिषु उभयपदप्रकृतिस्वरत्वं उक्तम्। वृद्ध्यधिकारे च ‘ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ’ (पा० ७।३।१९) इत्यनुवर्तमाने ‘ देवताद्वंद्वे च ’ (पा० ७।३।२१) इति आग्नावैष्णवादिशब्दे उभयपदवृत्तिरुक्ता। ‘ आनङ् ऋतो द्वंद्वे ’ (पा० ६।३।२५) इत्यनुवर्तमाने ‘ देवताद्वंद्वे च ’ (पा० ६।३।२६) इत्यानङादेशः मित्रावरुणौ इत्युक्तः। इति। पृ. ६४७–४८.

* **द्विपत्नीकः** बहुपत्नीकश्चास्ति यजमानः। भा. ९।३।६।२०.

* **द्विपश्वादिविकृतौ** देवताऽनुसारेण मेधपतिशब्दस्य वचने उहः कर्तव्यः (मेधपतये मेधपतिभ्यां मेधपतिभ्यः इति यथायथम्)। भा. ९।३।१२।३३–४१.

* **द्विपशुकयागे** अध्रिगुप्रैषे एकधाशब्दस्य अभ्यासः ‘ एकधैकधा अनयोस्त्वचौ ’ इति। वि. ९।३।११,

* द्विपशुकयागे पाशमन्त्रयोः एकवचनान्तबहुवचनान्तपाशशब्दस्य द्विवचनान्तेन ऊहः। ९।३।४.

⧗ द्विपुरोडाशायां स्यादन्तरार्थत्वात्। १०।८।१८।६२ ॥

सोमात् प्राक् पौर्णमासी एकपुरोडाशा, सोमादूर्ध्वं द्विपुरोडाशा, अग्नीषोमीयपुरोडाशस्यापि सत्त्वात्। उपांशुयाजः पौर्णमास्यां भवति इत्यवगतम्। स च द्विपुरोडाशायां आग्नेयैन्द्राग्नपुरोडाशद्वयवत्यां स्यात् अन्तरार्थत्वात् अन्तरापदेन उक्तस्य द्वयोर्मध्यदेशस्य अर्थस्य द्विपुरोडाशायामेव संभवात्। ‘उपांशुयाजमन्तरा यजति’ इति हि श्रुतम्। एकपुरोडाशायां अन्तरापदार्थ एव नास्ति। इति सोमात् प्राक् एकपुरोडाशायां उपांशुयाजो न स्यात् इति पूर्वः पक्षः।

अजामिकरणार्थत्वाच्च। ६३ ॥

जामि आलस्यम्, जामिकरणं आलस्योत्पादनम्, अजामिकरणं आलस्योत्पत्तिर्यथा न स्यात् तथा करणम्, अजामिकरणार्थं पुरोडाशयोर्मध्ये उपांशुयाजः इत्युक्तम् ‘ जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ, उपांशुयाजमन्तरा यजति अजामित्वाय ’ इति वाक्ये। तदेतत् पुरोडाशद्वये संभवति। तस्मात् द्विपुरोडाशायां पौर्णमास्यां उपांशुयाजः न तु सोमात् प्राक् एकपुरोडाशायाम्। इति पूर्वपक्षे हेत्वन्तरम्।

तदर्थमिति चेत्। ६४ ॥

तदर्थम्, उपांशुयाजस्य तदर्थं पुरोडाशयोरन्तरालार्थत्वसिद्ध्यर्थं द्विपुरोडाशायामेव सोमोत्तरं पौर्णमास्यां उपांशुयाजः स्यात्। इति चेत्। सूत्रत्रयेणोक्तस्य पूर्वपक्षस्य अनुवादोऽयम्। विचित्रा हि सूत्रकारस्य कृतिर्भवति इति प्रवादः।

न, तत्प्रधानत्वात्। ६५ ॥

न द्विपुरोडाशायामेव पौर्णमास्यां उपांशुयाजः, किन्तु एकपुरोडाशायामपि। तत्प्रधानत्वात् पौर्णमासीप्रधानत्वात् उपांशुयाजस्य। अन्तरालं तु तस्य गुणः। तस्मात् असत्यपि अन्तराले एकपुरोडाशायामपि उपांशुयाजः कर्तव्यः इति सिद्धान्तः।

अशिष्टेन च संबन्धात्। ६६ ॥

अन्तरालस्य आवश्यकत्वे तु अशिष्टेन अविहितेन अन्तरालेन विहितस्य उपांशुयाजस्य संबन्धः कर्तव्यः स्यात्। न च विहितस्य अविहितेन संबन्धो युक्तः। तस्मात् एकपुरोडाशायामपि उपांशुयाजः कर्तव्यः। इति सिद्धान्ते युक्त्यन्तरम्।

उत्पत्तेस्तु निवेशः स्याद्, गुणस्यानुपरोधेनार्थस्य विद्यमानत्वाद्, विधानादन्तराऽर्थस्य नैमित्तिकत्वात्, तदभावेऽश्रुतौ स्यात्। ६७ ॥

अन्तरालस्य विधानं नास्तीति सिद्धान्तोक्तं तुशब्दो निरस्यति। अन्तराऽर्थस्य अन्तरालस्य ‘ अन्तरा यजति ’ इति वाक्येन नैमित्तिकत्वात् अपूर्वसाधनत्वेन विधानात् न अविधानम्। तस्य अन्तरालस्य गुणस्य अनुपरोधेन अविरोधेन अर्थस्य द्विपुरोडाशिकायाः पौर्णमास्या विद्य-

मानत्वात् उत्पत्तेः उत्पत्तिवाक्यादेव द्विपुरोडाशायां अन्तराले उपांशुयाजस्य निवेशः स्यात्। तदभावे अन्तरालस्य अभावे असंभवे तु अश्रुतौ अन्तरालवत्त्वेन अश्रुतायां एकपुरोडाशायामपि उपांशुः स्यात्। असंभवस्तु नास्ति द्विपुरोडाशायाः सत्त्वात्। तस्मात् नैकपुरोडाशायामुपांशुयाजः इति पुनः पूर्वपक्षी आह।

उभयोस्तु विधानात्। ६८॥

सिद्धान्ती आह ‘आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन्’ इति पौर्णमासीशब्देन उभयोः पौर्णमास्योः एकपुरोडाशायां द्विपुरोडाशायां च उपांशुयाजस्य विधानात् एकपुरोडाशायामपि स्यात्। उभे अपि हि ते पौर्णमास्यावेव।

गुणानां च परार्थत्वादुपवेषवद् यदेति स्यात्। ६९॥

गुणानां च परार्थत्वात् प्रधानार्थत्वात् गुणः अन्तरालं उपांशुयाजार्थं सत् एकपुरोडाशायां उपांशुयाजं निवर्तयितुं नार्हति। तस्मात् अन्तरालस्य गुणस्य शास्त्रं ‘यदा इति स्यात्’ यदा पौर्णमासी द्विपुरोडाशा, तदा अन्तराले इति स्यात्। उपवेषवत् यथा ‘उपवेषेण कपालान्युपदधाति’ इति यदा अमावास्यायां उपवेषः, तदा तेन इति गम्यते। पौर्णमास्यां तु उपवेषाभावेऽपि कपालोपधानमस्त्येव। तद्वत् द्विपुरोडाशाभावेऽपि उपांशुयाजः स्यादेव। तस्मात् एकपुरोडाशायामपि सः। इति सिद्धान्ती आह।

अनपायश्च, कालस्य लक्षणं हि पुरोडाशौ। ७०॥

एकपुरोडाशायामपि उपांशुयाजस्य अनपायः न अपायः अभावः। हि यस्मात् पुरोडाशौ कालस्य लक्षणम्। अन्तरालं उभाभ्यां लक्ष्यते ऐन्द्राग्नात् प्राक्, आग्नेयादुत्तरं चेति। तत्र ऐन्द्राग्नाभावेऽपि आग्नेयादुत्तरत्वेन लक्षितः उपांशुयाजकालः ज्ञायते एव। यथा शङ्खवेलायामागन्तव्यमित्युक्ते खेटखर्वरादौ शङ्खाभावेऽपि तदुपलक्षितायां वेलायामागम्यते। तस्मात् एकपुरोडाशायामपि आग्नेयोत्तरं उपांशुयाजः कर्तव्यः।

प्रशंसार्थमजामित्वम्, यथाऽमृतार्थत्वम्। ७१॥

यदुक्तं अजामिकरणार्थत्वात् इति, अत्रोच्यते। अजामित्वं उपांशुयाजस्य प्रशंसार्थं न विधानार्थम्। यथा ‘अमृतं वा आज्यं मर्त्यं हविः यदुपस्तृणाति अभिघारयति अमृताहुतिमेवैनां करोति’ इति अमृतार्थत्वं आज्यप्रशंसार्थं तद्वत्। तस्मात् सोमात् प्राक् एकपुरोडाशायामपि पौर्णमास्यां उपांशुयाजः कर्तव्यः इति सिद्धान्तः। **के.**

* **द्विबहुपत्नीकप्रयोगे** एकवचनान्तस्यैव मन्त्रस्य (‘पत्नीं संनह्य’ इति प्रैषमन्त्रस्य) प्रयोगोपपत्तेः न तत्रोहः। **भाट्ट.** ९।३।६.

⧗ द्विभागः स्याद् द्विकर्मत्वात्। १०।७।२०॥

अग्नीषोमीये पशौ मैत्रावरुणः द्विभागः स्यात्। शेषभक्षे द्वौ भागौ यस्य स द्विभागः स्यात्। अध्वर्युकर्म प्रैषः, होतृकर्म अनुवचनम्। ते द्वे कर्मणी यस्य स मैत्रावरुणः द्विकर्मा। द्विकर्मत्वात् स द्विभागः स्यात् इति पूर्वः पक्षः।

एकत्वाद् वैकभागः स्याद्, भागस्याश्रुतिभूतत्वात्। २१॥

वाशब्दः पूर्वपक्षं व्यावर्तयति। मैत्रावरुणः पशौ शेषभक्षे न द्विभागः स्यात्। किन्तु एकभागः एक एव भागो यस्य तादृशः स्यात्। मैत्रावरुणस्य एकत्वात् भागस्य च अध्वर्युभागस्य होतृभागस्य च मैत्रावरुणस्य अश्रुतिभूतत्वात् श्रुतिभूतत्वाभावात् अश्रुतत्वादित्यर्थः। केवलं चोदकेन प्राप्तिः, तत्रापि मैत्रावरुणस्य एकत्वात् द्वितीयं भागं चोदको न प्रापयति। तस्मात् पशुशेषभक्षे मैत्रावरुण एकभक्षः इति सिद्धान्तः। **के.**

* **द्विरात्राः**। व्युष्टिः, आङ्गिरसः, कापिवनः, चैत्ररथः इति द्विरात्रा अहीनाः द्विसुत्याकाः। तेषु सर्वेषु उत्तरमहः अतिरात्र इति स्थितम्। **कु.** १०।५।१०।४८ सूत्रम्. * **द्विरात्रस्य** द्वितीये अहनि षोडशी ग्रहो गृह्यते ‘उत्तरेऽहन् द्विरात्रस्य गृह्यते’ इति वाक्यात्। **वि.** १०।५।९, * **द्विरात्रे**, अङ्गिरसां द्विरात्राख्ये क्रतौ एव, नान्येषु द्विरात्रेषु इति परिसंख्यायते। इति वृत्तिकारमतम्। १०।५।१३, * द्विरात्रे चयनं कर्तुं शक्यते। १०।८।११.

* **द्विरात्रादयः** एकादशरात्रपर्यन्ताः अहीनाः। तत्र अहीनरूपद्वादशाहधर्मातिदेशः। **वि.** ८।२।५.

* **द्विरात्रादीनां** चोदकेन वैकल्पिक एवाग्निः। पुनर्वचनं

तु यदा अग्निः तदा गुणकामानां प्रवृत्तिः इति । **टुप्.** १०।८।११।२७. * **द्विरात्रादौ** अहर्गणे चोदकप्राप्तं कृष्णविषणाप्रासनं विहितं कण्डूयनमबाधितुं चरमे अहन्येव कर्तव्यम् । **वि.** ११।३।६. * द्विरात्रादौ द्वितीयादिरूपे एव अन्तिमे न पत्नीसंयाजान्तत्वम् । **भाट्ट.** ९।१।९ पृ. ६५.

* **द्विरात्राद्यहर्गणेषु** अहीनद्वादशाहगतमध्यदशाहस्य प्रथमद्व्यहादेर्विध्यन्तो ग्राह्यः । **भा.** १०।५।४।१२–१३.

* **द्विरात्रादिविकृतौ** अग्निचयनस्यातिदेशो भवति । अग्न्यतिग्राह्याधिकरणम् । **भा.** १०।८।११।२३–२८.

* **द्विरात्रादिविकृतिषु** द्वादशाहिकदशरात्रगतानां द्वितीयादीनामन्त्यत्वेऽपि यथाप्रकृति पत्नीसंयाजान्ततयैवानुष्ठानं इति पूर्वपक्षे नोहः, सिद्धान्ते तु द्वितीयतया पत्नीसंयाजान्तस्यापि इह अन्त्यतया सकलानुष्ठानं इति प्रयोगविकारात् ऊहः । **सोम.** ९।१।८.

* **द्विरात्रत्रिरात्रादयो** दीर्घसोमाः सोमावृत्त्या । दीर्घसोमे अधिषवणफलकयोः संतर्दनं कार्यम् । **वि.** ३।३।१६, * **द्विरात्रत्रिरात्रादीनां** द्वादशाहः अहीनरूपः प्रकृतिः । १०।५।४.

* **द्विरात्रत्रिरात्रादिविकृतिषु** द्वादशाहस्य आदितः क्रमेण (द्वितीयमहरारभ्य) अह्नः अह्नोः अह्नां प्रवृत्तिः । अवशिष्टानां तु लोपः । **वि.** १०।५।१.

द्विरात्रन्यायः । द्विरात्राद्यहर्गणेषु अहीनद्वादशाहगतमध्यमदशाहस्य प्रथमद्व्यहादेर्विध्यन्तो ग्राह्यः ॥

चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात् । १०।५।४।१२॥

भाष्यम्–– सन्ति द्विरात्रादयोऽहर्गणाः 'द्विरात्रेण यजेत' इत्येवमादयः । तेषु किं कृत्स्नस्य द्वादशाहस्य विध्यन्तः प्रवर्तते, उत प्रायणीयोदयनीयौ वर्जयित्वा दशरात्रस्येति । किं प्राप्तम् ? अविशेषात् कृत्स्नस्येति । **एवं प्राप्ते, ब्रूमः** । चोदनासु तासु प्रायणीयोदयनीययोः पूर्वत्वेन असंभवात् दशरात्रस्य विध्यन्तः प्रवर्तते । केन हेतुना ? लिङ्गेन विध्यन्तो नियम्येत । किं लिङ्गं भवति ? एवमाह 'यत्प्रथमं तद्द्वितीयं यद्द्वितीयं तत्तृतीयम्, जगतीमन्तर्गच्छति' इति । एवं ज्ञापयति, यत्प्रथमं द्विरात्रस्य, तद्द्वितीयं द्वादशाहस्य गायत्रम् । यद् द्वितीयं द्विरात्रस्य, तत्तृतीयं त्रैष्टुभम् । जगतीमन्तर्गच्छतीति षडहतृतीयं जागतमहः अन्तरीयमाणं दर्शयन् दशरात्रस्य प्रवृत्तिं दर्शयति । यत्प्रथममिति द्विरात्रस्य वादः, प्रकरणात् । तत्तृतीयमिति द्वादशाहस्य, द्विरात्रे तृतीयाभावात् । अपिच इदमपरं लिङ्गम्, गायत्रं प्रथममहस्त्रैष्टुभं द्वितीयं जगतीमन्तर्गच्छतीति, अन्तराये षडहतृतीयं जागतं दर्शयति । तस्मात् दशरात्रस्य प्रवृत्तिः ।

प्राप्तिस्तु रात्रिशब्दसंबन्धात् । १३ ॥

भाष्यम्–– द्विरात्रेण यजेतेति रात्रशब्दः । इहापि दशरात्र इति स एव । तदेतस्मात् प्रकृतिलिङ्गात् दशरात्रस्य विध्यन्तः इति प्राप्ते लिङ्गदर्शनम् ।

सोम— आद्योपादानापवादात् **संगतिः** । **सूत्रार्थस्तु**– द्विरात्रादिचोदनासु प्रायणीयोदयनीययोः अपूर्वत्वात् प्रकृतित्वासंभवात् लिङ्गेन मध्यमदशरात्रधर्मनियमः स्यादिति ।

वि— 'द्विरात्रादौ द्वादशाहप्रायणीयादितः क्रमः । आद्यन्तौ वर्जयित्वा वा, विशेषाभावतोऽग्रिमः ॥, द्वादशाहे द्वितीयस्य द्विरात्रे प्रथमत्वतः । जागतस्यान्तरायाच्च विध्यन्तो दशरात्रगः ॥' (जागतस्य उदयनीयस्येत्यर्थः) ।

भाट्ट–– द्विरात्रादिष्वहर्गणेषु सुत्यागणत्वसामान्यात् द्वादशाहस्य प्रवृत्तिरित्युक्तम् । अतश्च प्रायणीयोदयनीययोरपि द्वादशाहे फलवत्त्वेन धर्मग्राहकत्वात्तयोरपि गणनान्तर्गतत्वाविशेषात् द्विरात्रादिप्रकृतित्वम्, अतश्च 'प्रथमस्य प्रथमम्' इत्येवंक्रमेण स्थानसामान्यादपि प्रकृतिविकारभावनियमात् द्विरात्रादौ तृतीयादिप्रभृति द्वादशाहिकाहर्धर्माणां बाधः । इति प्राप्ते, प्रायणीयोदयनीयौ वर्जयित्वा मध्यमस्य दशरात्रस्य पृथक्संघातो दशरात्रसमाख्या च श्रूयते 'पृष्ठ्यषडहादारभ्यैव ऐन्द्रवायवाग्रं प्रथममहश्चतुर्थं छन्दोमं अविवाक्यं दशममहः' इत्यादिव्यवहारात् । तस्य च प्रयोजनान्तरासंभवात् द्विरात्राद्यहर्गणान्तराणां स्वमात्रप्रकृतित्वनियामकता । अत एव यत्र प्रयोजनान्तरसंभवः, यथा दशरात्रमध्येऽपि षडहस्य पृथक्संघातक्लृप्तौ । तस्या हि गवामयनादौ दूरस्थषडहस्य फलादिसंबन्धसिद्धिरेव प्रयोजनमिति न तया द्विरात्रादीनां स्वमात्रप्रकृतित्वनियमः ।

प्रकृते तु प्रयोजनान्तराभावात् वैयर्थ्यपरिहारार्थं सत्यपि धर्माणां प्रकृतौ अहर्मात्राङ्गत्वे विकृतौ गणत्वसामान्येन धर्मप्रदेशकता दशरात्रस्यैवेति विज्ञायते । अत एव प्राथम्ययोगाभावे प्रायणीयोदयनीययोर्नामातिदेशेन धर्मप्रेरकत्वेऽपि न क्षतिः । न चैवं दशरात्ररूपविकृतावेव दशरात्रस्य नामातिदेशविधया चोदनालिङ्गातिदेशविधयैव वा सार्थकत्वोपपत्तेः सर्वत्रातिदेशे प्रमाणाभावः । द्विरात्रे 'यत्प्रथमं तद् द्वितीयम्, यद्द्वितीयं तत्तृतीयम्, जगतीमन्तर्गच्छति' इति लिङ्गोपबृंहितात् रात्रान्तशब्दवत्त्वावान्तरसादृश्यविशेषादेव सार्वत्रिकत्वावगतेः । द्विरात्रे यत् प्रथममहः तत् द्वादशाहिकस्य द्वितीयस्याह्नो विकारः इति तदर्थात् । जगतीमन्तर्गच्छति त्यजतीत्यर्थः । प्रायणीयातिदेशे हि द्विरात्रे षडहद्वितीयस्य त्रिष्टुभस्यैव हानं स्यात्, न तु जागतस्य षडहतृतीयस्य । अत इदमप्यपरं लिङ्गम् । तथा द्विरात्रान्तरे 'गायत्रं प्रथमं त्रैष्टुभं द्वितीयम्' इत्यपि लिङ्गम् । प्रायणीयातिदेशे हि तस्य नानाच्छन्दस्कत्वात् नानाच्छन्दस्कं प्रथमं षडहप्रथमस्य च गायत्रत्वात् गायत्रं द्वितीयमिति वाच्यं स्यात् । अतो लिङ्गवशात् सार्वत्रिकत्वसिद्धिः । तेन द्विरात्रादौ चतुर्थप्रभृति द्वादशाहिकधर्माणां बाधः ।

मण्डन-- 'अहर्गणे स्युर्दशरात्रधर्माः ।'

शंकर-- 'दशाहो मध्यमो गणे ।'

* **द्विरात्रप्रकरणे** 'यत् प्रथममहः तद् द्वितीयम्, यद् द्वितीयं तत्तृतीयम्' इति श्रुतम् । द्विरात्रस्य यत् प्रथममहः, तत् द्वादशाहस्य द्वितीयम्, यच्च द्विरात्रस्य द्वितीयमहः, तत् द्वादशाहस्य तृतीयमहः इति तदर्थः । अनेन प्रकृतिविकारभाव उक्तः । **वि.** १०।५।४.

* **द्विवचनान्तेन** मेधपतिशब्देन बहुदेवत्ये पशौ एकवचनान्तस्य विकल्पः । **भा.** ९।३।१३।४१-४२.

* **द्विषाहस्रं** द्वितीयं चिन्वानश्चिन्वीतेति अग्नौ नैमित्तिकमेव, न नित्यम् । **भा.** ४।३।२।४.

* **द्विसामके** संसवगोसवादौ रथंतरबृहद्धर्माणां व्यवस्था । रथंतरे प्रयुज्यमाने तद्धर्माः प्रयोक्तव्याः, बृहति प्रयुज्यमाने बृहद्धर्माः इति । **भा.** ९।२।१७।४९-५०.

* 'पशुहिंसादिसंबन्धे यज्ञे तुष्यन्ति हि **द्विजाः** ।' 'शूद्रान्नभोजनेनापि तुष्यन्त्यन्ये द्विजातयः ।' **वा.** १।३।३।७ पृ. २०४. * **द्विजानां** ऋणत्रयापाकरणस्य नित्यता । **बिन्दु.** ६।२।११।३१.

* **द्विजत्वम्** । 'द्विर्ह वै यजमानो जायते, मिथुनादन्यत् जायते यज्ञादन्यत् । तद्यन्मिथुनाज्जायते, तदस्मै लोकाय जायते, अथ यद्यज्ञाज्जायते, तदमुष्मै लोकाय जायते' । **जैब्रा.** १।२५९.

* **द्वितीयमध्यायं** 'नानाकर्मलक्षणम्' इत्याचक्षते । **भा.** २।१।१।१ पृ. ३७२.

* **द्वितीयाध्यायस्य द्वितीये पादे** निश्चितविधेयत्वस्य गुणस्य क्व पूर्वत्रासंभवात् भेदकत्वम्, क्व वा फले विधानेन व्यवस्थाऽर्थत्वेन वा पूर्वत्र संभवात् अभेदकता, इति निर्णीतम् । **सु.** पृ. ८८५, * द्वितीयाध्यायस्य **तृतीये पादे** संदिग्धविधेयत्वस्य क्व विधेयत्वात् भेदकत्वम्, क्व वा तदभावात् अभेदकता इति वक्ष्यते । पृ. ८८५, * **द्वितीयाध्याये** अङ्गाङ्गित्वाद्यवधारणार्थत्वेन अनुष्ठानोपयोगित्वात् शास्त्रार्थरूपकर्मभेद एव विचार्यः, नानुपयोगी शास्त्रभेदः, अनुष्ठानपर्यवसायित्वात् मीमांसाशास्त्रस्य । प्राभाकरास्तु शास्त्रभेदमध्यायार्थमाचक्षते । पृ. ५४०. * द्वितीयाध्याये उत्पत्तिरूपा विधेरवस्था निरूपिता । **कणिका.** पृ. ४१२.

* **द्वितीयाध्यायार्थः** 'अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते भिन्नान्यभिन्नानि चेति' । **भा.** २।१।१।१ पृ. ३७१. * द्वितीयाध्यायार्थः । 'उपोद्घातः कर्मभेदमानं तस्यापवादगीः । प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः ॥' द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेव अपूर्वबोधकम्, अपूर्वसद्भावश्च इत्यादिकः कर्मभेदचिन्तोपयुक्तः उपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्मभेदः । तृतीये रथंतरादीनां कर्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः । **वि.** प्रस्तावनायां श्लो. १४ । 'मानाधीनस्य धर्मस्य द्वितीये भेद उच्यते ।' द्वितीयाध्यायारम्भे । * द्वितीयाध्यायार्थः । कर्मभेदाभेदवत् फलापूर्वभेदाभेदावपि लक्षणार्थौ इति । **वा.** २।२।१३।२८ पृ. ५६४. * द्वितीयाध्यायार्थः । तदिह षड्विधः

कर्मभेदो वक्ष्यते शब्दान्तरम्, अभ्यासः, संख्या, गुणः, प्रक्रिया (प्रकरणं), नामधेयं इति । तदेतत् नानाकर्मलक्षणं इत्यध्यायं आचक्षते । एतत्तात्पर्येण । अतोऽन्यत् उपोद्घातप्रसक्तानुप्रसक्तं चेति । **भा.** २।१।१।१ पृ, ३७२. * द्वितीयाध्यायार्थः । 'शब्दान्तरादिभिर्भेदो लक्षणार्थोऽभिधीयते ।' **वा.** २।२।१।१ पृ. ४६१.

* **द्वितीयाध्यायोत्तरं** तृतीयः । कुतः ? 'भेदो यावन्नावधृतः तावच्छेषशेषिभावो नास्ति' इति । **वा.** ७।१।१।१ पृ. १५२४.

* **द्वितीयादिपञ्चमान्तेन** अध्यायव्यूहेन उत्पत्तिविनियोगप्रयोगरूपविध्यंशनिरूपणपरेण कर्तव्यताविषयः कर्म साङ्गमनुष्ठेयं समधिगतम् । **कणिका.** पृ. ४२९.

* **द्वितीयतृतीयाध्याययोः** संबन्धः 'यस्माद्भेदमविज्ञाय न शक्यं शेषलक्षणम् । विज्ञातुमत एतस्य तदानन्तर्यमुच्यते ॥ भिन्नानां हि पदार्थानां शेषशेषित्वसंभवः । एकत्वे नापदिश्येत कः शेषः कस्य शेषिणः ॥ भेदानन्तरवक्तव्यं शेषलक्षणमेव च । प्रयोजकक्रमादीनां शेषत्वाधीनचिन्तनात् । अयमेव च संबन्धः संमतोऽध्याययोर्द्वयोः ॥' **वा.** ३।१।१।१ पृ. ६४८–४९.

* **द्वितीया** गुणभूतेऽपि भवति यथा 'सक्तून् जुहोति' 'मारुतं जुहोति' 'एककपालं जुहोति' इति । **भा.** २।१।४।११. * द्वितीया चतुर्थ्या बाध्यते । मृग्यमुदाहरणम् । **बाल.** पृ. १४४, * द्वितीया तद्धितेन बाध्यते । मृग्यमुदाहरणम् । पृ. १४४. * द्वितीया तावत् गुणभावं नैव ब्रवीति इति व्याख्यातं सक्त्वधिकरणे (२।१।४।१२) । **वा.** ३।१।७।१४ पृ. ७२१. * द्वितीया मन्त्रवर्णेन बाध्यते यथा उपांशुयाजे अग्नीषोमीययाज्यामन्त्रवर्णेन 'तावब्रूतां आज्यस्यैव नौ' इति । **बाल.** पृ. १४४. * द्वितीया विभक्तिः ईप्सिततमे भवति । **भा.** १०।१।७।१४.

* द्वितीया विभक्तिः । किं गुणकर्मणि द्रव्ये द्वितीया दृष्टेति यतो द्वितीयादर्शनात् (अग्निं संमार्ष्टि) इहापि सामान्यतोदृष्टेन गुणकर्मता ? नेति ब्रूमः । द्वितीया विभक्तिः कर्तुरीप्सिततमे स्मर्यते । **भा.** २।१।४।१० । इति चेत् पश्यसि द्वितीयादर्शनात् प्रधानभूतमत्र द्रव्यमिति । नैतदेवम् । गुणभूतेऽपि द्वितीया भवति । तथाहि दृश्यते 'सक्तून् जुहोति, मारुतं जुहोति' इति । ११. **वा**—परस्तु आह, 'अन्वयव्यतिरेकाभ्यामुपकारानुसारिता । शेषत्वस्य, द्वितीया तु प्राधान्यव्यभिचारिणी ॥' तन्नाम प्रमाणं युक्तम्, यदैकान्तिकम् । अनैकान्तिकी च प्राधान्ये द्वितीया, गुणभूतद्रव्योपदेशेऽपि दृष्टत्वात् 'सक्तून् जुहोति' इति । तथा 'प्रयाजशेषेण हवींष्यभिघारयति' इति अन्तरेणापि द्वितीयां आज्यप्राधान्यं दृष्टम् । अतो 'व्रीहीनवहन्ति' इत्यत्र उभयसंभवेऽपि उपकारदर्शनकृतमेव द्रव्यप्राधान्यम्, न द्वितीयाकृतम् । न च तत् संमार्गप्रोक्षणादिषु अस्ति, इति इहापि द्वितीयया द्रव्यमेव उपदिश्यतामिति ।

भा—न गुणभूतेऽपि द्वितीया । एवं हि अभियुक्ता उपदिशन्ति 'कर्मणि द्वितीया' 'कर्तुरीप्सिततमं कर्म' इति । न च लोके गुणभूते क्वचित् द्वितीयां पश्यामः । यदपि च 'तण्डुलानोदनं पच' इति, ओदनार्थं तण्डुलान् संस्कुरु इति ईप्सिता एव तण्डुलाः । 'बल्वजान् शिखण्डकान् कुरु' इति बल्वजा एव तेनाकारेण संबद्धा ईप्सिता इति तत्राभिप्रायः । लौकिकश्च प्रयोगः शब्दार्थपरिच्छेदे हेतुः, न वैदिकः । या लौकिके जुहोति इति प्रयोगे द्वितीया, शक्यते तत्र वक्तुं ईप्सिततमे एव स प्रयोग इति, 'तण्डुलानद्य जुहुधि' तण्डुलानद्य होमेन संबन्धय इति । लोके भवति हि बहुप्रकारा विवक्षा । अन्यायश्चानेकार्थत्वम् । तेन प्रधानभावेन सिद्धा सती द्वितीया गुणभावेन कल्प्येत । वेदे तु कथं द्वितीयानिर्दिष्टे गुणभावः इति ? द्वितीयानिर्देशात् प्राधान्यमेवावगच्छामः । १२ । **वा**—तिष्ठतु तावत् प्रयोगः । किं कारणम् ? 'आचारत्वात् प्रयोगो हि स्मृत्या सर्वत्र बाध्यते । विवक्षाऽनेकधा चात्र स्मरणे त्वेकरूपता ॥' यदि हि आचारस्य ऐकरूप्यं भवेत्, नैव स्मृतयः प्रयत्नेन धार्येरन् । स एव तु संकीर्णत्वात् अस्फुटः स्मरणेन प्रतिपाल्यते । स्मर्यते च द्वितीयायाः प्राधान्यमर्थः । 'कर्मणि द्वितीया', 'कर्तुरीप्सिततमं कर्म' इति । तथा लोकवेदयोः प्रयुज्यते 'घटं करोति', 'व्रीहीनवहन्ति' इति । यानि च लोके व्यभिचाराशङ्कास्थानानि तान्युदाहरति (भाष्ये) 'तण्डुलानोदनं पच', 'बल्वजान् शिख-

ण्डकान् कुरु', 'तण्डुलानद्य जुहुधि' इति। तण्डुलैः बल्वजैः इति च प्रयोक्तव्ये या द्वितीया प्रयुज्यते, तन्नूनं तृतीयासमानार्था सा इति गम्यते। तत्रोच्यते। '**सर्वे पाकादिसंबन्धे द्व्याकारास्तण्डुलादयः। प्राधान्यांशमुपादाय द्वितीया तत्र वर्त्स्यति॥**' यदा पदार्थान्तरभूतौदनशिखण्डकसाधनत्वेन तण्डुलबल्वजाः विवक्ष्यन्ते, तदा तृतीयाऽन्तपदभाजो भवन्ति। **यदा** तु भोजनयोग्यौदनावस्थापरिणतिरूपेण तण्डुलाः, मार्दवोत्पत्त्यर्थे च शिखण्डकाकारेण बल्वजा दृश्यन्ते। तथा वेदवाक्यावगतगुणभावाश्च ते द्रव्यसाधनके अग्निहोत्रे सुखण्डितास्तिष्ठन्तः रमणीयत्वात् कस्याश्चित् ब्राह्मण्याः स्वकर्मशोभादर्शनार्थं तण्डुलाः होमसंबन्धित्वेन अभिप्रेताः। सा एवं प्रेष्यति गुणकामा वा 'यजमान तण्डुलानद्य जुहुधि' इति, **तदा** द्वितीयाऽर्थभाक्त्वं भवति। भवति हि लोके बहुप्रकारा विवक्षेति। गुणभूतेऽप्यर्थे केनचित् कारणेन कश्चित् प्राधान्यांशो विवक्ष्यते, तथा प्रधानभूतेषु गुणांशः। कदाचिदुभौ, कदाचिन्नोभौ। न च यत् विवक्ष्यते, तत् शब्देनाभिधातव्यं इत्यस्ति प्रमाणम्। विवक्षासंपत्त्यर्थं तु लक्षणाद्युपायान्तराश्रयणम्, न स्वार्थत्यागः। तस्मात् प्राधान्यमेव द्वितीयाऽर्थः।

* द्वितीया विभक्तिः क्रियासंबन्धे भवति। कारकविभक्तिर्हि सा। कारकं क्रियाया एव भवति, न द्रव्यस्य। **भा.** १०।२।२८।६५, * द्वितीया विभक्तिः प्रधानविधिलक्षणम्। यथा 'रथंतरं गायति' 'बृहत् गायति' इति। ९।२।२।३. * 'प्रातिपदिकादुच्चरन्ती द्वितीया विभक्तिः प्रातिपदिकार्थो विशेषकः इत्याह' इत्युक्तं भाष्ये। **न्यामा.** एकादशाध्यायार्थविचारे. * **द्वितीयया** कर्मकारकविभक्त्या प्राधान्यमवगम्यते कर्मणः। वि २।१।३, * द्वितीयया (ग्रहं संमार्ष्टि) ग्रहस्य उद्देश्यतया प्रयोजनवत्तया च प्राधान्यं गम्यते। ३।१।७. * द्वितीयया देवताविधिः। 'देवताविधिरपि तद्धित– चतुर्थी– मन्त्रवर्ण– द्वितीया– अर्थवादभेदात् पञ्चविधः।' बाल. पृ. २२, * **द्वितीयायाः** ईप्सितानीप्सितकर्मणोः अनुगतं साध्यत्वं शक्यताऽवच्छेदकम्। पृ. ७५. * द्वितीयायाः उत्पाद्य–आप्य–विकार्य––संस्कार्यात्मकचतुर्विधकर्मसाधारण्यम्। सु. पृ. ९१३.

* द्वितीयायाः कर्मत्वमर्थः। तच्च क्रियाजन्यफलशालित्वम्। 'घटं पश्यति' इत्यत्र दर्शनजन्यज्ञाततायाः घटनिष्ठत्वात् लक्षणसमन्वयः। ननु एवं 'चैत्रो ग्रामं गच्छति' इत्यादौ चैत्रस्य कर्मत्वापत्तिः, क्रियाजन्यसंयोगशालित्वात्। किञ्च त्यजतिगच्छत्योः पर्यायत्वापत्तिः। इति चेत्। अत्र **नैयायिकाः**। परसमवेतत्वं क्रियाविशेषणम्, धात्वर्थताऽवच्छेदकत्वं फलविशेषणम्। परत्वं च द्वितीयाप्रकृत्यर्थापेक्षया। एवं 'चैत्रो ग्रामं गच्छति' इत्यादौ चैत्रसमवेतव्यापारजन्यधात्वर्थताऽवच्छेदकसंयोगशालितया ग्रामस्य कर्मता। शाब्दबोधोऽपि ग्रामसमवेतधात्वर्थताऽवच्छेदकसंयोगानुकूलग्रामान्यसमवेतव्यापारजनककृतिमान् चैत्रः इति। त्यजतेः विभागफलकव्यापारे शक्तिः इति नोक्तदोषः इत्याहुः।

तच्च कर्म द्विविधम्। 'कर्तुरीप्सिततमं कर्म' (पा. १।४।४९) 'तथायुक्तं चानीप्सितम्' (५०) इति व्याकरणात्। तत्र आद्यं चतुर्धा। उत्पाद्य–प्राप्य–विकार्य–संस्कार्यभेदात्। उत्पत्तिर्नाम येनाकारेण कारकं अभिधानोपात्तम्, तस्य असत एवोत्पादनम्। तस्यैव सतः अप्राप्तस्य प्रापणं प्राप्तिः। तद्गतदृष्टातिशयोत्पादनं विकृतिः। तस्यैव अदृष्टातिशयोत्पादनं संस्कारः इति। यथा यूपं छिनत्ति, घटं कुरुते, पयो दोग्धि, व्रीहीनवहन्ति, व्रीहीन् प्रोक्षति इति। एतदुक्तं **वाक्यपदीये** 'यदसज्जायते सद्वा जन्मना यत् प्रकाशते। तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्॥ प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादि भस्मवत्। किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥ क्रियाकृतविशेषाणां सिद्धिर्यत्र न लभ्यते। दर्शनादनुमानाद्वा तात्त्विकं तत्तु कथ्यते॥' इति। (चौखम्बामुद्रिते नोपलब्धमिदमस्माभिः। **के.**)

अनीप्सितमपि चतुर्विधम्। उदासीनम्, द्वेष्यम्, संज्ञान्तरैरनाख्यातम्, अन्यपूर्वकं च। यथा तृणं स्पृशति, विषं भुङ्क्ते, गां दोग्धि, विषमनुक्रुध्यति, अग्निमनुयजति इति च। अत्र ईप्सितत्वानीप्सितत्वयोः शक्तिद्वयं इति **सोमेश्वरः**। ईप्सितानीप्सितानुवृत्तिसाध्यत्वं न द्वितीयार्थो गौरवात्। न च सूत्रद्वयानर्थक्यम्। 'वारणार्थानामीप्सितः' (पा० १।४।२७) इति 'यवेभ्यो गां वारयति' इत्यत्र

यवानामीप्सितत्वेन अपादानतया ईप्सिततमे गवि द्वितीयाप्राप्त्यर्थत्वात् आद्यस्य, 'विषं भक्षयति' इत्यादौ द्वितीयस्यापि सार्थक्यात् ।

'अकथितं च' (पा० १।४।५१) । दुह्याच्यादिद्विकर्मकधातूनां अपादानत्वादिकारकैः असंभवदन्वयं धात्वर्थताऽवच्छेदकफलशालि व्याप्यमानं द्वितीयं कर्म । गां पयो दोग्धि, राजानं याचते वसुधाम्, अजां ग्रामं नयति । गोकर्मकदोहेन पयो भावयति इति बोधः । (पयःकर्मकदोहेन गां भावयति इति–) विपरीतं वा । अत्र धात्वर्थव्याप्यमानमेकं कर्म, व्याप्यव्याप्यमानं द्वितीयम् । अत एव 'तप्ते पयसि दध्यानयति' इत्यत्र द्वितीयकर्मापेक्षया पयसः कर्मत्वेनैव अन्वयः ।

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' (पा० १।४।५२) गत्यर्थकबुद्ध्यर्थकप्रत्यवसानार्थकानां शब्दकर्मकाणां अकर्मणां च शयनाद्यर्थकधातूनां अण्यतानां समभिव्याहारे यः कर्ता, स तेषां ण्यन्तानां समभिव्याहारे कर्म । गुरुं ग्रामं गमयति, शिष्यं शास्त्रं बोधयति, मन्त्रं यजमानं वाचयति, विष्णुं शाययति । अत्रापि व्याप्यमानत्वम् ।

'हृक्रोरन्यतरस्याम्' (पा० १।४।५३) हरणार्थकानां करणार्थकानां च समभिव्याहारे द्वितीया तृतीया च । शिष्येण शिष्यं वा भारं हारयति कारयति च । तस्मात् साध्यत्वं द्वितीयार्थः इति **पार्थसारथिः** ।

यत्र च द्वितीयाऽर्थस्य न साक्षात् क्रियाऽन्वयः तत्र उपपदविभक्तित्वम् । यथा 'अन्तराऽन्तरेणयुक्ते' (पा० २।३।४) त्वां मां च अन्तरा अन्तरेण वा हरिरस्ति । अत्र संबन्धे द्वितीयाया लक्षणा । उभयसंबन्ध्यन्तरालवर्ती हरिः इति बोधः ।

'कालाध्वनोरत्यन्तसंयोगे' (पा० २।३।५) कालाध्ववाचिपदसमभिव्याहृतद्वितीयायाः अत्यन्तसंयोगो व्याप्तिरर्थः । 'मासमधीते, क्रोशं पर्वतस्तिष्ठति' । मासाभिव्याप्तिविशिष्टमध्ययनम्, क्रोशाभिव्याप्तिविशिष्टपर्वतस्थितिः इति बोधः । आभिव्याप्तेः पर्वतसंबन्धित्वात् उपपदविभक्तित्वम् ।

'कर्मप्रवचनीययुक्ते द्वितीया' (पा० २।३।८) उपलक्षणाद्यर्थक– अनु–प्रति– पर्यादिसमभिव्याहृतकर्मप्रवचनीयसंज्ञकानां योगे द्वितीया । जपमनु प्रावर्षत्, नदीमन्ववसिता सेना, अनु हरिं सुराः, उप हरिं सुराः, वृक्षं प्रति परि अनु वा विद्योतते विद्युत्, भक्तो विष्णुं प्रति परि अनु वा, लक्ष्मीर्हरिं प्रति परि अनु वा, वृक्षंवृक्षं प्रति परि अनु वा सिञ्चति, हरिमभि वर्तते ।

'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' (पा० २।३।१२) अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तः चेष्टायां गम्यमानायाम् । ग्रामं ग्रामाय वा गच्छति । **मणि. पृ. १२९–१३२.**

* द्वितीयायाः त्यागप्रक्षेपांशविषयौपचारिकव्याप्यत्वाभिधानाख्यकर्मवाचित्वम् । **सु. पृ. ६३२.**

* **द्वितीयाऽन्तेन** ईप्सिततमं यत् साधनम्, तत् उच्यते । **भा. २।२।५।१४.** * द्वितीयान्तेन शब्देन नहि देवता उद्दिश्यते प्रमाणाभावात् । **टुप्. १०।१।७।१४ पृ. १८११.**

* **द्वितीयाऽन्तादिपदानां** तावत् क्रियापदं विना निराकाङ्क्षत्वाभावस्य उभयवादिसिद्धतया क्रियाप्रतिपादकपदस्य विशेष्यप्रतिपादकत्वस्य अवश्यम्भावात् । **रहस्य. पृ. ४१.**

* **द्वितीयाऽर्थस्तु** 'कर्मणि द्वितीया' (पा० २।३।२) इति सूत्रात् कर्मत्वम् । तदपि भावनायामेव अन्वेति । **अत्र विवदन्ते** । तत्र **नवीनतार्किकास्तावत्** (इत्याहुः इति परस्तात् दूरान्वयः) धात्वर्थानधिकरणत्वे सति धात्वर्थताऽवच्छेदकफलशालित्वं कर्मत्वम् । पच्यादिधात्वर्थो हि फलावच्छिन्नो व्यापारः, तदवच्छेदकीभूतफलस्य विक्लृत्यादेः देवदत्तवृत्तिव्यापारानधिकरणीभूतौदनवृत्तित्वात् ओदनादेः कर्मत्वं इति लक्षणसमन्वयः । गमनफलस्य संयोगस्य ग्रामे इव चैत्रेऽपि सत्त्वात् धात्वर्थानधिकरणत्वे सति इति, चैत्रस्य गमनरूपधात्वर्थाधिकरणत्वात् । गमनजन्यपूर्वदेशविभागशालिनि पूर्वदेशे गमनानधिकरणत्वविशिष्टधात्वर्थजन्यफलशालित्वस्य सत्त्वात् अतिव्याप्तिः । एवम् 'वृक्षात् भूमौ पर्णं पतति' इत्यत्र पतनक्रियाजन्यसंयोगविभागरूपफलाश्रययोः भूमिवृक्षयोः अतिव्याप्तिः । अतो धात्वर्थताऽवच्छेदकेति फलविशेषणम् । एवं च गमेः संयोगः एव, त्यजेर्विभागः एव (फलम्) । पतति-

स्पन्दत्यादेः नैव किञ्चित् फलं धात्वर्थताऽवच्छेदकं इति नोक्तातिव्याप्तिः । फलपदं च क्रियाजन्यफलपरम् । तेन धात्वर्थताऽवच्छेदकव्यापारत्वमादाय व्यापारे, अधोदेशमादाय अधोदेशावयवे च नातिव्याप्तिः । "पततेः अधोदेशसंयोगः फलम् । अत एव 'नरकं पतति' इत्यपि प्रयोगः" इति **केचित्** ।

ननु 'ग्रामं गमयति चैत्रो मैत्रम्' इत्यत्र मैत्रे कर्मत्वलक्षणस्य अव्याप्तिः, मैत्रस्य गमनरूपधात्वर्थाधिकरणत्वात् । **न च** 'सनाद्यन्ता धातवः' (पा० ३।१।३२) इति वचनात् णिजन्तस्य धातुसंज्ञात्वावगतेः णिजन्तगमिधात्वर्थस्य गमनानुकूलव्यापारस्य मैत्रे अभावात् नाव्याप्तिः, तदर्थताऽवच्छेदकस्य गमनाख्यफलस्य मैत्रे सत्त्वेन विशेष्यदलस्यापि सत्त्वात् इति **वाच्यम्** । तथात्वे ग्रामस्य कर्मत्वानुपपत्तेः । न च 'णिजन्तस्य धातुत्वेऽपि गमेरपि धातुत्वानपायात् ग्रामस्य तत्कर्मत्वोपत्तिः' तथात्वे 'पाचयति चैत्रो मैत्रेण' इत्यत्रापि मैत्रस्य कर्मत्वापत्तेः । न चेष्टापत्तिः, द्वितीयाऽन्तत्वापत्तेः । 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' (पा० २।४।५२) इत्यनेन सूत्रेण गत्यादीनां धातूनां अण्यन्तानां यः कर्ता, स ण्यन्तानां कर्म इत्यर्थकेन गत्यादिभिन्नधातुयोगे कर्मसंज्ञानिषेधेन तत्रापि इष्टापत्तेः कर्तुं अशक्यत्वात् । 'हृक्रोरन्यतरस्याम्' (पा०२।४।५३) इति सूत्रेण हारयतिकारयतिधातुयोगे विकल्पेन कर्मसंज्ञाविधानात् 'हारयति कारयति कटं भृत्येन, हारयति कारयति कटं भृत्यम्' इति प्रयोगद्वयावगतेः । तत्र भृत्ये धात्वर्थताऽवच्छेदकीभूतप्रयोज्यव्यापाररूपफलाश्रयत्वस्य सर्वदा सत्त्वेन कर्मत्वतदभावयोः वक्तुमशक्यत्वात् । **एतेन** स्वप्रकृत्यर्थभिन्नसमवेतक्रियाजन्यधात्वर्थताऽवच्छेदकफलशालित्वं कर्मत्वं **इत्यपास्तम्** । 'पाचयति चैत्रो मैत्रेण' इत्यादौ अतिव्याप्तेः । **इति चेत्, न** । तत्तत्क्रियाव्यक्तिभेदेन कर्मत्वानां भेदात् । इतरथा उभयकर्मजसंयोगस्थले चैत्रस्य स्वभिन्नमैत्रसमवेतकर्मजन्यसंयोगाश्रयत्वात् 'चैत्रो मैत्रं गच्छति' इत्यत्र चैत्रस्य कर्मत्वापत्तेः । अन्यथा मैत्रस्यापि क्रियासमानाधिकरणफलाश्रयत्वात् कर्मत्वापत्तिः । अतः तत्तत्क्रियान्तर्भावेनैव (णैव) लक्षणं निर्वाच्यम् । तथात्वे चैत्रनिष्ठक्रियायाः परसमवेतत्वाभावादेव तत्र नातिव्याप्तिः । ततश्च यत्क्रियाजन्यधात्वर्थताऽवच्छेदकफलशालि सत् यत् यत्क्रियानधिकरणम्, तत् तत्क्रियाकर्म इति विशिष्यैव कर्मत्वनिरुक्तिः । परसमवेतयत्क्रियाजन्यधात्वर्थताऽवच्छेदकफलशालि यत्, तत् तत्क्रियाकर्म इति वा निरुक्तिः । पच्यादिक्रियामादायैव लक्षणसमन्वयः स्पष्ट एव । 'चैत्रो मैत्रं गच्छति, मैत्रश्चैत्रम्' इत्यत्र तत्तत्कर्तृनिष्ठक्रियामादाय गमयति इत्यादौ च गमिक्रियामादाय ग्रामस्य तदनुकूलव्यापाररूपणिजर्थमादाय मैत्रस्य कर्मत्वं निर्वाच्यम् । 'घटं भावयति' इत्यादौ तु णिजर्थमादायैव, भूधातोरकर्मकत्वात् । पाचयति इत्यादौ च पच्यर्थमादायैव ओदनस्य, न तु अनुकूलव्यापारमादाय मैत्रस्य, उक्तसूत्रानुरोधात् । अत एव तत्र णिजर्थः अकर्मक एव । अथवा तस्यापि ओदन एव कर्म, विक्लृत्यनुकूलत्वाविशेषात् । एवं च हारयतिकारयतिनिरूपितकर्मत्वनिरुक्तौ तृतीयाऽन्तपदानभिधेयत्वमपि देयम् । तेन हरणादिकर्तुः पाक्षिककर्मत्वाविघातः । एवं गमिपतत्यादौ विवक्षा सप्तम्यन्तपदानभिधेयत्वं वा देयम् (परसमवेतगमिक्रियाजन्यफलशालित्वेन विवक्षितं यत्, तत् गमिक्रियाकर्म इति विवक्षा लक्षणे देया, परसमवेतगमिक्रियाजन्यफलशालित्वे सति सप्तम्यन्तपदानभिधेयत्वं गमिकर्म इति सप्तम्यन्तपदानभिधेयत्वं वा देयं इत्यर्थः) । तेन 'ग्रामे गच्छति, नरके पतति' इत्यादिप्रयोगस्यापि उपपत्तिः । न चैवं तत्तत्कर्मत्वानां भेदात् द्वितीयायाः शक्तिग्रहानुपपत्तिः, लाघवेन वृत्तित्वे अभावे च द्वितीयायाः शक्तेः । पदार्थान्तराणां अन्यलभ्यत्वेन तत्र शक्तिकल्पनायां गौरवात् । तथाहि । 'ग्रामं गच्छति' इत्यत्र द्वितीयार्थो वृत्तित्वं धात्वर्थताऽवच्छेदके संयोगे अन्वेति । तज्जनकं गमनं धात्वर्थ एव । (एवं द्वितीयार्थोभावोऽपि प्रतियोगितासंबन्धेन धात्वर्थ एव ।) ग्रामादिश्च प्रकृत्यर्थो द्विविधेऽपि द्वितीयार्थे । एवं च ग्रामनिष्ठाभावप्रतियोगिग्रामवृत्तिसंयोगजनकगमनानुकूलकृतिमान् इत्यादिः शाब्दबोधः । यदि तु गमनात्यन्ताभावोऽपि चैत्रे कालिकाव्याप्यवृत्तित्वात् आशङ्क्येत, तदा परसमवेतेत्यादि— अन्योन्याभावघटितलक्षणमादाय भेदो द्वितीयाऽर्थः । स च प्रतियोगितासमवायोभयघटितसामानाधिकरण्यसंबन्धेन

गमनान्वयी। ततश्च ग्रामनिष्ठभेदप्रतियोगिसमवेतग्रामवृत्तिसंयोगजनकगमनवान् इत्यादिः शाब्दबोधः। **वस्तुतस्तु** भेदाव्याप्यवृत्तित्वमते चैत्रे गमनवद्भेदस्य तुल्यत्वात् तद्वारणाय प्रकृत्यर्थो ग्रामो भेदे प्रतियोगितासंबन्धेन अन्वेति। भेदश्च अभावीयविशेषणतासमवायोभयघटितसामानाधिकरण्यसंबन्धेन गमने अन्वेति। ततश्च ग्रामप्रतियोगिकभेदवत्समवेतग्रामवृत्ति इत्यादिः शाब्दबोधः। अत एव आधेयत्वापरपर्यायवृत्तित्वार्थकसप्तमीतः वृत्तित्वार्थकद्वितीयायाः भेदः, भेदाद्यर्थस्य अधिकत्वात्। अयं चापरो विशेषः। यत् द्वितीयाऽर्थो वृत्तित्वं धात्वर्थतावच्छेदके फले एवान्वेति, सप्तम्यर्थस्तु वृत्तित्वं धात्वर्थे नामार्थे वा इति। एवं 'ग्रामस्य गन्ता' इत्यादौ कर्मणिषष्ठीस्थलेऽपि बोध्यम्। एवं 'चैत्रेण ग्रामो गम्यते' इत्यात्मनेपदेन फलं भेदश्च अभिधीयते। तत्र प्रथमाऽन्तपदोपस्थाप्यो ग्रामः प्रतियोगिताकत्वसंसर्गेण भेदान्वयी। स च धात्वर्थगमने सामानाधिकरण्यसंबन्धेन, स च धात्वर्थो गमनं पुनः आत्मनेपदार्थे फले जन्यत्वसंबन्धेन, तच्च आश्रयत्वेन नामार्थे ग्रामे। ततश्च चैत्रकर्तृक–ग्रामभिन्नसमवेतसंयोगजनकगमनजन्यसंयोगाश्रयो ग्रामः इत्येवं शाब्दबोधः। एवम् 'पक्व ओदनः' इत्यत्र कर्मकृत्प्रत्ययस्थलेऽपि। तत्र तु अयं विशेषः, कृदर्थः प्रतियोगी भेदः वृत्तित्वं आश्रयश्च। ओदनः अभेदेन प्रतियोगिनि, स च स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेन भेदे, स च सामानाधिकण्येन क्रियायाम्, सा च स्वजन्यफलद्वारा (फलवृत्तित्वसंबन्धेन) वृत्तित्वे, तच्च निरूपकत्वसंबन्धेन आश्रये, स च अभेदेन ओदने इति ओदनाभिन्नप्रतियोगिकभेदवृत्तिक्रियाजन्यफलनिष्ठाधेयतानिरूपकाश्रयाभिन्नः ओदनः इति विशिष्टबोधः। अनुभवानुसारेण व्युत्पत्तिवैचित्र्यस्य अदोषत्वात्।

ननु एवं भेदे प्रतियोगिनः प्रतियोगितामात्रेण वा अन्वयः, अन्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वेन वा ? नाद्यः वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य चैत्रेऽपि सत्त्वेन 'स्वं गच्छति चैत्रः' इति प्रयोगापत्तेः, अन्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभङ्गापत्तेश्च। नान्त्यः। 'जलं गच्छति' जलं इत्यत्र जलत्वावच्छिन्नप्रतियोगिताकभेदस्य जले अभावात्। **इति चेत्**–(न) धात्वर्थताऽवच्छेदकफलाश्रयत्वं यद्व्यक्तेः तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वेन प्रतियोग्यन्वयस्य वाच्यत्वात्। एवं च व्युत्पत्तिभङ्गभिया जलपदं जलविशेषे लाक्षणिकम्। तत् सिद्धं वृत्तित्वं भेदश्च द्वितीयार्थ इति। न चैवं तृतीयाऽन्तपदानभिधेयत्वादेरपि वाच्यत्वापत्तिः, तस्य अन्यलभ्यत्वेन वाच्यत्वे गौरवात्। 'कारयति कटं मैत्रम्' इत्यादिप्रयोगस्य इष्टत्वेन वाच्यतया प्रवेशे प्रयोजनविरहात्। भेदस्य अवाच्यत्वे 'स्वं गच्छति' इति प्रयोगापत्तिर्बाधिका। न तु अत्र तथा किञ्चित् बाधकम्। अतो न तस्य वाच्यत्वं इति दिक्।

एवं च यत्र एतादृशकर्मत्वबाधः तत्र 'घटं जानाति मैत्रः, इच्छति, कुरुते' 'घटस्य ज्ञाता' इत्यादौ सविषयपदार्थाभिधायिधातुयोगे द्वितीयाषष्ठ्योः विषयत्वे लक्षणा। घटविषयकज्ञानाश्रयो मैत्रः इति शाब्दबोधः। 'मैत्रेण ज्ञायते' इत्यादौ तु कर्मप्रत्ययेन विषयत्वं लक्ष्यते। मैत्राश्रितज्ञानविषयो घटः इति च बोधः। 'ज्ञातो घटः' इत्यादिकर्मकृत्सु तु विषये लक्षणा, तस्य च घटे अभेदान्वय इति द्रष्टव्यम्। नष्टः इत्यादौ प्रतियोगिनि। न तु अत्र परसमवेतत्वप्रवेशो वैयर्थ्यात्, 'स्वात्मानं जानामि' 'आत्मानमात्मना वेत्सि' इत्यादिप्रयोगाच्च। एवं अकथितकर्मादौ कर्मप्रवचनीययोगनिमित्तकद्वितीयायां च लक्षणैव। इत्याहुः (नवीनतार्किकाः इत्यस्य अत्रान्वयः)।

अत्रेदमवधेयम्। यदि फलावच्छिन्नो व्यापारो धात्वर्थः, तदा द्वितीयाऽऽद्यर्थवृत्तित्वस्य पदार्थैकदेशे संयोगादौ फले अन्वयात् एकदेशान्वयनिबन्धनो व्युत्पत्तिभङ्गः। न च चैत्रस्य नप्ता, चैत्रादन्यः इत्यादावपि तदाश्रयणम्, षष्ठ्याद्यर्थस्य परंपरासंबन्धस्य विशेष्ये एव अन्वयोपपत्तेः, पञ्चम्यर्थस्यापि प्रतियोगित्वादेः परंपरासंबन्धेन अन्वयाङ्गीकाराच्च। किञ्च। किमिदं फलस्य अवच्छेदकत्वम् ? न तावत् तत्तद्धातुशक्यताऽवच्छेदकत्वम्, विशिष्टशक्तौ प्रमाणाभावात्। 'चैत्रो ग्रामं गमयति मैत्रम्' इत्यादिणिजर्थरूपधात्वर्थस्य अवच्छेदकीभूते गमनरूपे फले अव्याप्तेः। अथ फले पृथगेव धातोः शक्तिः, तस्य च व्यापारे प्रकारत्वमेव अवच्छेदकत्वं **इति चेत्, न,**

तृतीयाऽऽद्यर्थकरणत्वादौ, पाचयति इत्यत्र णिजर्थविशेषणीभूते पाके च अतिव्याप्तेः। अतः स्वरूपसंबन्धात्मकं अवच्छेदकत्वं पदार्थान्तरमेव वा कल्प्यम्। तच्च धर्मिग्राहकप्रमाणेन यदाश्रये द्वितीया प्रामाणिकी, तत्रैव कल्प्यते नान्यत्र इति वाच्यम्। न च तत्र शाब्दव्यवहारातिरिक्तं किञ्चित् प्रमाणमस्ति। तद्वदेव वक्ष्यमाणविधया कर्मत्वादिकारकाणां अखण्डोपाधिरूपाणां द्वितीयादिवाच्यत्वकल्पनोपपत्तेः न आधेयत्वादेः अनेकव्युत्पत्तिकल्पनाऽऽपादिका वाच्यत्वकल्पना युक्ता समाश्रयितुम्। तथाहि। द्वितीयायास्तावत् वृत्तित्वे भेदे च शक्तिः इत्यनेकशक्तिकल्पना। धातोश्च फलावच्छिन्नव्यापारे एका, फले व्यापारे च नाना शक्तिः इति कल्पना। अस्मन्मते तु पूर्वोक्तविधया तत्तत्फलावच्छिन्नव्यापारवृत्तिपाकत्वगमनत्वादिकमेव तत्तद्धातुशक्यताऽवच्छेदकं इति न अनेकशक्तिकल्पना। पुनश्च भवन्मते फलस्य तत्त्वेन बोधे पूर्वदेशविभागस्यापि क्रियाजन्यत्वाविशेषात् 'पूर्वदेशं गच्छति' इति प्रयोगापत्तिः। संयोगत्वादिना बोधे वृक्षस्थितस्यैव सर्वस्य मूलदेशात् अग्रदेशं गच्छतः 'वृक्षं गच्छति' इति प्रयोगापत्तिः तत्तदवयवसंयोगनाशेन अवयविसंयोगानां नाशात् तया क्रियया जनिताग्रसंयोगेन अभिनवस्यैव अवयविसंयोगस्य उत्पत्तेः। नहि अवयविसंयोगः न धात्वर्थताऽवच्छेदकः, 'ग्रामं गच्छति' इति प्रयोगानापत्तेः। अतः तदुत्तरदेशसंयोगस्यैव फलत्वं वाच्यम्। उत्तरत्वं च तत्तत्क्रियापूर्वदेशघटितं इति अनन्तशक्तिकल्पना लक्षणा वा। न च तत्तत्फलानुभवबलादेव सा न दोषः, अनुभवस्य अनुमानादिनाऽपि संभवेन शाब्दत्वे एव विप्रतिपत्तौ धातुजन्यत्वे सुतरां प्रमाणाभावात्। इतरथा फलस्य धातुवाच्यत्वं द्वितीयावाच्यत्वं वा इति भवद्ग्रन्थे नानापक्षप्रतिपादनानुपपत्तेः। नहि 'घटमानय' इत्यत्र घटो धातुवाच्यः नामपदवाच्यो वा इति पक्षान् कश्चित् प्रतिपादयति। अत एव गमनत्वादिनैव क्रियायाः धातुतः अनुभवात् वस्तुतः तत्तत्फलावच्छिन्नक्रियावृत्तिगमनत्वादिकमेव तत्तद्धातुशक्यताऽवच्छेदकं इत्युक्तं प्राक्। तदेवं भवन्मते शक्त्यानन्त्यं तावत् स्फुटमेव। व्युत्पत्त्यानन्त्यमपि। 'ग्रामं गच्छति' इत्यत्र तावत् प्रातिपदिकार्थस्य ग्रामस्य तत्तत्संसर्गभेदेन वृत्तित्वे भेदे च अन्वयात् व्युत्पत्तिद्वयम्। पुनश्च अन्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभङ्गः, तदभङ्गाय वा ग्रामप्रातिपदिकेन ग्रामविशेषलक्षणा इति दोषः। द्वितीयाऽर्थस्य च भेदस्य निरुक्तसामानाधिकरण्यसंबन्धेन क्रियायाम्, वृत्तित्वस्य च साक्षात्संबन्धेन फले इति व्युत्पत्तिद्वयम्। 'स्वं गच्छति' इति प्रयोगवारणार्थं भेदो वा द्वितीयाऽर्थः समवायो वा, ग्रामस्य च तस्मिन् समवाये स्वप्रतियोगिकभेदवद्वृत्तित्वं संसर्गः, समवायस्य च साक्षात्संबन्धेन क्रियायामन्वयः इत्यस्यापि सुवचत्वेन विनिगमनाविरहश्च।

एतेन—— फलं भेदश्च द्वितीयाऽर्थः, आधेयत्वं फले प्रकृत्यर्थसंसर्गः, फलस्य च जनकत्वेन अवच्छेदकत्वेन वा व्यापारे अन्वयः, व्यापारमात्रं धात्वर्थः, तत्तद्धातुसमभिव्याहाराच्च द्वितीयायाः फलविशेषबोधकत्वं इत्यपास्तम्। अनेकशक्तिकल्पनादेः तदवस्थत्वात्। एवं 'ग्रामस्य गन्ता' इत्यादिकर्मणिषष्ठीस्थले शक्त्यनेकत्वं व्युत्पत्त्यनेकत्वं विनिगमनाविरहश्च इति बोध्यम्। 'ग्रामो गम्यते' इति कर्माख्याते च आत्मनेपदस्य फले भेदे च शक्त्यन्तरकल्पनम्, ग्रामस्य प्रथमाऽन्तपदोपस्थाप्यस्यापि आख्यातार्थे भेदे अन्वयकल्पनम्, तस्य भेदस्य प्रत्ययार्थस्यापि धात्वर्थव्यापारे अन्वयकल्पनम्, तस्य च व्यापारस्य धातूपस्थापितफलं प्रति विशेष्यभूतस्यापि पुनः जन्यत्वसंबन्धेन आत्मनेपदार्थे फले अन्वयकल्पनम्, तस्य फलस्य च आश्रयतासंबन्धेन प्रथमाऽन्तपदोपस्थाप्ये ग्रामे अन्वयकल्पनं इति दोषाः।

किञ्च ग्रामपदस्य आत्मनेपदस्य च न तावत् युगपदेव प्रकारतया विशेष्यतया च बोधजनकत्वं विरोधात्। विशेषणताऽवच्छेदकप्रकारकविशेषणनिश्चयस्य अनुदयेन विशिष्टवैशिष्ट्यबोधात्मकस्य अनुभूयमानस्य अपलापापत्तेश्च। नापि क्रमिकबोधद्वयजनकत्वम्, जनितान्वयबोधे नैराकाङ्क्ष्यात्। एकतरशाब्दबोधवेलायां इतरशाब्दबोधानुत्पत्तौ प्रतिबन्धकान्तरकल्पनाऽऽपत्तेश्च। एवं 'पक्व ओदनः' इत्यत्र कर्मकृत्स्थलेऽपि द्रष्टव्यम्।

यत्तु— भेदो न द्वितीयाऽर्थः अपितु आधेयत्वादिकमेव । न चैवं 'चैत्रश्चैत्रं गच्छति' इति प्रयोगापत्तिः 'आ कडारादेका संज्ञा' (पा० १।४।१) इति सूत्रेण एकसंज्ञाप्रयुक्तकार्यसत्त्वे संज्ञाऽन्तरप्रयुक्तकार्यनिषेधात् । प्रकृते च परत्वात् कर्तृसंज्ञाप्रयुक्तकार्यस्य आवश्यकत्वेन कर्मसंज्ञाप्रयुक्तद्वितीयाऽऽद्यनापत्तेः । अतो न तत्प्रयुक्तशक्त्यन्तरकल्पनाद्यापत्तिः इति—— **तन्न** । 'स्वं जानामि' 'चैत्रोऽहं स्वात्मानं जानामि' 'आत्मानमात्मना वेत्सि' इत्यादौ एकसंज्ञाऽवरोधेऽपि संज्ञान्तरप्रयुक्तकार्यदर्शनात् । न च शरीरमनोरूपावच्छेदकभेदमादाय तत्र असांकर्योपपादनम्, तथात्वे स्वपदप्रयोगानुपपत्तेः । 'चैत्रश्चैत्रं गच्छति' इति प्रयोगेऽपि शरीरप्रदेशान्तरावच्छिन्नात्मादिभेदकल्पनोपपत्तेश्च । इतरथा 'चैत्रो मैत्रं गच्छति' इति प्रयोगस्यापि अनापत्तेः (अनवच्छिन्नस्यात्मनो गमनासंभवात्) । वस्तुतः फलाश्रयत्वसत्त्वे चैत्रेऽपि द्वितीयाप्रसक्तौ सूत्रवशेनापि संज्ञान्तरप्रयुक्तकार्योपस्थितेः तत्प्रतिबन्धकत्वकल्पने तवापि गौरवस्य सत्त्वाच्च । मम तु अखण्डोपाधिरूपस्य कर्मत्वस्य परसमवेतक्रियाजन्यफलशालित्वसमनियतस्यैव कल्पनात्, चैत्रे तस्य अप्रसक्तत्वादेव न प्रतिबध्यप्रतिबन्धकभावकल्पना इति विशेषः । अतः उक्तयुक्त्या लाघवात् कर्मत्वं अखण्डोपाधिरूपमेव द्वितीयाऽर्थः । तच्च उक्तकर्मत्वलक्षणसमनियतमेव । तत्रैव गौकर्मकमानयनम्, ओदनकर्मकः पाकः, ग्रामकर्मकं गमनं इतिव्यवहारात् । तच्च धर्मिग्राहकप्रमाणेन ससंबन्धिकमेव कल्प्यते इति तस्य तत्तद्धात्वर्थनिरूपितत्वसिद्धिः । तत्तद्धात्वर्थस्तु तत्तत्फलावच्छिन्नव्यापारविशेषत्वसमनियताखण्डोपाधिरूपपाकत्वगमनत्वरूपशक्यताऽवच्छेदकधर्मावच्छिन्नो व्यापारविशेषः इत्युक्तमेव । तत्तद्धात्वर्थनिरूपिततत्तत्कर्मत्वानां भेदेऽपि भवन्मते आधेयत्वस्येव कर्मत्वस्यापि अखण्डस्य स्वीकारात् तस्य एकस्यैव शक्यताऽवच्छेदकत्वेन न अनेकशक्तिकल्पना । निरूपकीभूतधात्वर्थताऽवच्छेदकावच्छिन्नगमनाद्यन्वयवशाच्च 'चैत्रस्य घटः' इतिवत् कर्मत्वविशेषलाभः । अतश्च 'चैत्रश्चैत्रं गच्छति' 'चैत्रः पाचयति मैत्रम्' इत्यादिप्रयोगापत्तिशङ्कैव दुर्लभा । 'ग्रामे गच्छति कारयति चैत्रो मैत्रेण' इत्यादौ तु कर्मत्वाविवक्षायां अधिकरणत्वादिविवक्षया सप्तम्यादिप्रयोगोऽपि अविरुद्धः । एवं च द्वितीयायां एकैव शक्तिः । प्रातिपदिकार्थस्य च तृतीयादिसाधारण्येन सुबर्थे कर्मत्वादौ अन्वयात् एकैव व्युत्पत्तिः । तस्य च उद्देश्यत्वेन वा स्वनिरूपकधात्वर्थजनकत्वेनैव वा आख्यातार्थकृतौ अन्वयात् अपरा इति लाघवम् । एवं कर्मणिषष्ठीस्थलेऽपि । कर्माख्यातस्थले तु पूर्वोक्तनीत्या आख्यातेन कर्मत्वलक्षणायामपि प्रथमाऽर्थस्य पूर्वोक्तविधया (पाणिनिमतेन) प्रातिपदिकार्थस्य स्ववृत्तिकर्मत्वनिरूपकधात्वर्थजनकत्वसंसर्गेण कृतौ अन्वयः । (कात्यायनमतेन—) कर्मत्वस्य प्रथमाऽर्थत्वे तु स्वनिरूपकधात्वर्थजनकत्वसंसर्गेणैव । कर्मकृत्स्थले तु 'पक्व ओदनः' इत्यादौ पाकस्य कृत्प्रत्ययलक्ष्यायां कृतौ, तस्याश्च निरूप्यत्वसंसर्गेण तल्लक्ष्ये एव कर्मत्वे, तस्य च आधारत्वसंबन्धेन कृत्प्रत्ययार्थे कर्मणि, तस्य च अस्तीत्याख्यातार्थे इति वक्ष्यते । कर्मकृत्स्वपि 'पाककर्मीकृतः' इति विवरणानुरोधेन कारकान्वयानुरोधेन च कृतिलक्षणायाः वक्ष्यमाणत्वाच्च । अतश्च लाघवात् द्वितीयाऽर्थकर्मत्वस्य उक्तसंबन्धेन कृतौ एवान्वयः इति सिद्धम् ।

न च द्वितीयाऽर्थकर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थे एव अन्वयोऽस्तु इति **वाच्यम्** । धात्वर्थस्यापि कारकत्वेन भावनाऽन्वयस्य उपपादितत्वात् तत्साधारण्येन कारकत्वप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनाविशेष्यतासंबन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणं इति एकेनैव कार्यकारणभावेन कर्मत्वादीनामपि अन्वयोपपत्तौ तदनेकत्वे गौरवात् । धात्वर्थान्वयार्थे उपस्थितस्य भावनाविशेष्यत्वस्यैव कर्मत्ववृत्तिप्रकारतानिरूपकत्वकल्पनोपपत्तौ अनुपस्थितस्य धात्वर्थविशेष्यत्वस्य तत्कल्पनाऽनुपपत्तेश्च । 'काष्ठैरोदनं पचति' इत्यस्य 'काष्ठैः पाकैः ओदनं करोति' इति विवरणात्, विवरणवाक्ये च काष्ठादीनां कृञर्थे अन्वयावश्यकत्वेन पचति इत्यत्रापि तत्रैव अन्वयप्रतीतेश्च । तत् सिद्धं कर्मत्वादि अखण्डमेव द्वितीयार्थो भावनाऽन्वयी इति ।

यत्तु— न कर्मत्वं आश्रयत्वं वा द्वितीयाऽर्थः, तथात्वे आश्रयत्वत्वादेः गुरुभूतस्य शक्यताऽवच्छेदक-

त्वापत्तेः कर्मत्वादिरूपाखण्डोपाधिसत्त्वे प्रमाणाभावाच्च । अपि तु आश्रयस्यैव द्वितीयाऽर्थत्वम् । तस्य च धातूपात्ते फले अन्वयः । एवं करणादिरेव तृतीयाऽऽद्यर्थः । एवं च 'कर्तृकरणयोस्तृतीया' (पा० २।३।१८) 'कर्मणि द्वितीया' (पा० २।३।२) इत्याद्यनुशासनमपि संगच्छते इति कैश्चिदुक्तम्– **तन्न** । संबन्धवाचिषष्ठीस्थले प्रातिपदिकार्थस्य प्रत्ययार्थे संबन्धे भेदेन अन्वयाङ्गीकारात् इहापि व्युत्पत्त्यन्तरकल्पनागौरवपरिहारार्थं भेदसंबन्धबोधाय कर्मत्वादावेव द्वितीयादेः शक्तिकल्पनात् । न चैवम् 'ऐन्द्रं दधि' इत्यादौ तद्धितस्य देवताविशिष्टद्रव्यवाचिनोऽर्थे देवतायां इन्द्रप्रातिपदिकार्थस्य इन्द्रस्य अभेदेनापि अन्वयदर्शनात् व्युत्पत्त्यन्तरस्यापि आवश्यकत्वम्, तद्धितस्यापि देवतात्वविशिष्टद्रव्ये एव शक्त्यङ्गीकारेण तत्रापि इन्द्रस्य आधेयतासंबन्धेनैव अन्वयाङ्गीकारात् । **न च** एवं षष्ठ्यादौ सर्वत्र लाघवात् धर्मिण्येव शक्तिकल्पनात् अभेदान्वयेनैव सर्वत्र प्रकृत्यर्थप्रकारता अस्तु इति **वाच्यम्** । तथात्वे ग्रामाभिन्नो य आश्रयत्ववान् तदाधेयसंयोगजनकं गमनं इत्यादिशाब्दबोधापत्तेः (बोधोपपत्तेः इति तु मुद्रितम्) आश्रयत्वादिकं किंनिरूपितं इति जिज्ञासाया: अपरिहार्यत्वात् । अतो न धर्मी द्वितीयाऽर्थः, अपि तु आधेयत्वं कर्मत्वमेव वा अखण्डम् । उभयथाऽपि फलस्य व्यापारस्यैव वा निरूपकस्य शाब्दबोधे एव लब्धत्वात् न निरूपकजिज्ञासाऽऽपत्तिः । कर्मत्वत्वस्यापि च अखण्डस्य एकस्यैव शक्यताऽवच्छेदकत्वाङ्गीकारात् न गौरवम् । आश्रयत्वमेव च तत्तन्निरूपकभेदेन भिन्नं इति तवैव (आश्रयो द्वितीयाऽर्थः इति आश्रयत्वस्य शक्यताऽवच्छेदकत्वं वदतः) गौरवं इति दिक् ।

अत एव 'समर्थः पदविधिः' (पा० २।१।१) इति सूत्रे 'क्रियाकारकयोः संबन्धस्य द्वितीया वाचिका भवति' इति महाभाष्यं संगच्छते । एवंविधकर्मत्वबाधे तु सविषयकधातुसमभिव्याहारे तार्किकरीत्यैव विषयत्वादिकं द्वितीयाऽऽदिना लक्षयित्वा आख्यातेन च आश्रयत्वं लक्षयित्वा 'घटविषयकज्ञानाश्रयत्वं चैत्रीयम्' इति 'चैत्रो जानाति घटम्' इत्यत्र शाब्दबोधः । एवं कर्मषष्ठीकर्माख्यातकर्मकृत्स्वपि बोध्यम् । न तु इह परसमवेतत्वस्य आवश्यकता । अत एव 'स्वात्मानं जानामि' इत्यादि प्रयोगः । नहि अत्र मुख्यं कर्मत्वमस्ति क्रियाजन्यफलाभावात्, अपि तु विषयित्वे लक्षणा । साऽपि नानुशासनिकी, येन तदर्थमपि कर्मसंज्ञा प्रसज्येत । अपि तु 'गङ्गायां घोषः' इतिवत् सांप्रतिकी । अतश्च कर्मत्वाभावेन कर्मसंज्ञाया अभावात् न 'आ कडारादेका संज्ञा' (पा० १।४।१) इत्यस्य बाधः ।

ननु विभक्तौ लोके न लक्षणा 'सुपां कर्मादयोऽप्यर्थाः संख्याश्चैव तथा तिङाम् । प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥' इति कात्यायनवार्तिकविरोधात् । अत्र हि सुपां तिङां च कर्मत्वादि संख्याश्च एकत्वादिका: येन शास्त्रेण अर्थ इति प्रतिपाद्यते, तत्र अर्थनियमः प्रसिद्धः इति तृतीयचरणस्यार्थः । स च एकत्वे एकवचनमेव, कर्मणि द्वितीयैव इत्याकारक: । चतुर्थचरणे तु प्रकृत्यर्थापेक्षया प्रत्ययनियम: । स च 'कर्मण्येव द्वितीया, एकत्वे एव एकवचनम्' इत्याकारकः । उभयथाऽपि विभक्तेः अर्थान्तरे वारणात् न विभक्तौ लक्षणा । अत एव 'छन्दसि सुपां सुपो भवन्ति' इति लक्षणाप्रतिप्रसवरूपं व्यत्ययानुशासनं छन्दसि उपपद्यते । इतरथा लोकवदेव वेदेऽपि तदुपपत्तेः व्यत्ययानुशासनवैयर्थ्यापत्तिः । एवम् 'कर्मणि षष्ठी' इत्यादिलक्षणानुशासनस्यापि वैयर्थ्यं शक्यसंबन्धावगमस्य प्रमाणान्तरेणैव सिद्धेः । अतो न लोके विभक्तौ अनुशासनं विना क्वापि लक्षणा इति **चेत् । न ।** प्रातिपदिकादिष्विव विभक्तावपि लक्षणायां बाधकाभावात् उक्तवार्तिकस्य लक्षणायामपि अविरोधात् । तथाहि । अर्थनियमपक्षे तावत् कर्मणि द्वितीयैव न तु तृतीयाऽऽदिविभक्त्यन्तरं इति सजातीयशब्दान्तरव्यावृत्तावपि द्वितीयायाः अर्थान्तरे निवारणाभावस्य महाभाष्ये स्पष्टत्वात् । इतरथा निःसंख्येभ्यः अव्ययेभ्योऽपि सुपामनापत्तेः । एवं च करणत्वादौ तृतीयैव इत्यस्यापि नियमात् विभक्त्यन्तरार्थे विभक्त्यन्तरस्य परं न लोके लक्षणा, न तु विषयत्वादावपि । प्रत्ययनियमपक्षेऽपि प्रकृतकर्मत्वैकत्वादिरूपसुप्तिङर्थापेक्षयैव तन्नियमकरणात् अप्रकृतविषयत्वादिलक्षणायां न कोऽपि दोषः । स्पष्टं च इदमपि तत्रैव । अत एव 'जानाति' इत्यादितिङोऽपि

आश्रयत्वादौ लक्षणा इत्युक्तं प्राक् । एवं च छन्दसि व्यत्ययानुशासनमपि प्रकृतविभक्त्यन्तरार्थविषये प्रतिप्रसवरूपतया नासंगतम् । कर्मणि षष्ठी इत्यादिकं च लोकवेदसाधारण्येन । न चैवं लोके 'अक्षीणि मे प्रदर्शनीयानि, पादा मे सुकुमाराः' इत्यादिमहाभाष्योदाहृतप्रयोगेषु प्रतिप्रसवाभावात् प्रकृतद्वित्वे बहुवचनस्य प्रयोगानुपपत्तिः, तत्र अक्षित्वादिजातिविवक्षायां 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' (पा० १।२।५८) इति वचनेन प्रतिप्रसवात् । अतः सिद्धं विभक्त्यन्तरार्थभिन्ने विषयत्वादौ युक्तैव लक्षणेति । यदा तु 'सामान्यापेक्ष एव प्रत्ययनियमः' इति महाभाष्यकारीयं व्याख्यानान्तरं अभ्युपगम्यते, तदा कात्यायनीयं नियमद्वयमपि इदं शक्तिनियामकं निरूढलक्षणानियामकं च तस्याः शक्तितुल्यत्वात् । तथा च प्रकृते अप्रकृते वा अर्थे अनुशासनं विना न शक्तिः निरूढलक्षणा वा । सांप्रतिकलक्षणायास्तु न क्वापि प्रकृते अप्रकृते वा निषेधः ।

नचैवं अव्ययेभ्योऽपि संख्याभिन्नेऽर्थे सांप्रतिकलक्षणया सुबुत्पत्तेः 'अव्ययादाप्सुपः' (पा० २।४।८२) इति ज्ञापकबलादव्ययेषु सुबुत्पत्तिपक्षो महाभाष्यकारीयो न संगच्छते इति **वाच्यम्** । तस्य लाक्षणिकार्थाविवक्षायामपि शब्दसाधुत्वार्थमपि सुबुत्पत्तिः इत्येवं ज्ञापनार्थत्वात् । न चैवं छन्दसि व्यत्ययानुशासनवैयर्थ्यम्, तस्य निरूढलक्षणात्वज्ञापनार्थत्वात् निषिद्धत्वप्रतिप्रसवार्थत्वाच्च । तथाहि । सांप्रतिकी लक्षणा क्वचिन्नैव भवति । अत एव भट्टवार्तिके 'यत्र आर्षे लाक्षणिके अर्थे प्रयोगानुपपत्तिस्फुरणं विनाऽपि अर्थस्मरणम्, तत्र निरूढलक्षणा, यत्र तत्स्फुरणपूर्वकं काव्याद्याधुनिकप्रयोगः, तत्र सांप्रतिकी लक्षणा' इति लक्षणाभेदमुपपाद्य 'काश्चिन्नैवाप्रयोगतः' इत्यनेन प्रयोगाभावे न लक्षणा इत्युक्तम् । उदाहृतं च रूपं वस्त्रं इति । इतरथा मत्वर्थलक्षणया प्रयोगः केन वार्येत । अत एव एनां निषिद्धलक्षणा इत्याचक्षते । तस्याश्च वेदेऽपि प्रसक्तौ प्रतिप्रसवार्थं व्यत्ययानुशासनमिति । सर्वथा सिद्धम् 'घटं जानामि' इत्यादौ विषमत्वे लक्षणा इति । वस्तुतस्तु नात्र लक्षणा, मुख्यकर्मत्वस्यैव उपपत्तेः । तथाहि, ज्ञातो घट इत्यादिप्रतीत्या ज्ञानजन्या ज्ञेयनिष्ठा ज्ञाततापरनामविषयता फलम्, तच्छालित्वं च घट इति मुख्यकर्मत्वोपपत्तिः । न च भावकार्यस्य समवायिकारणजन्यत्वनियमात् भूतभाविस्थले च तदभावात् फलाभावः । ध्वंसस्य प्रामाणिकत्वे भावत्वस्य व्याप्यताऽवच्छेदककोटिप्रवेशवत् विषयताया अपि प्रामाणिकत्वे लघुना समवेतत्वेनैव कार्यत्वस्य विशेषणात् । अतश्च ध्वंसवदेव विषयताया अपि निमित्तकारणमात्रजन्यत्वमेव इत्यन्यत्र विस्तरः ।

एवं च परसमवेतत्वसिद्ध्यर्थम् 'स्वं जानाति' इत्यादौ शरीरमनोभेदकल्पनात् 'आ कडारादेका संज्ञा' इत्यस्याप्युपपत्तिः । अथवा परसमवेतत्वादिघटितलक्षणसमनियताखण्डोपाधिरूपकर्मत्वे शक्तिः, तद्बाधात्तु 'स्वं जानाति' इत्यादौ धात्वर्थताऽवच्छेदकफलशालित्वमात्रे विषयित्वमात्रे वा लक्षणा इति न विरोधः । 'चैत्रः स्वं गच्छति' इत्यादौ तु न लक्षणयाऽपि प्रयोगः, अप्रयोगेण निषिद्धलक्षणात्वात् इति ध्येयम् ।

तत् सिद्धं 'कर्मणि द्वितीया' इति सूत्रात् कर्मत्वं अखण्डोपाधिरूपं द्वितीयाऽर्थः आख्यातार्थान्वयी इति । उक्तं च तन्त्रवार्तिके 'विभक्तयो हि कारकशक्तिं निष्कृष्य अभिधाय क्रियां विशिंषन्ति' इति ।

न्यायसुधाकारस्तु 'कर्तुरीप्सिततमं कर्म' इति सूत्रात् ईप्सितकर्मत्वमेव द्वितीयार्थः । 'तथायुक्तं चानीप्सितम्' इतिसूत्रात् अनीप्सितत्वे निरूढलक्षणा इत्याह । तन्न । ईप्सितानीप्सितत्वरूपविशेषस्य प्रमाणान्तरलभ्यत्वेन लाघवात् कर्मत्वे एव शक्तेः । यथा चैवं सति न सूत्रद्वयवैयर्थ्यम्, तथा कौस्तुभे विचारः ।

तच्च कर्म चतुर्विधम्, उत्पाद्यं आप्यं विकार्यं संस्कार्यं चेति । घटं करोति, घटं जानाति, व्रीहीनवहन्ति, व्रीहीन् प्रोक्षति इत्युदाहरणानि । **पार्थसारथिस्तु**, साध्यत्वमेव द्वितीयाऽर्थः । आप्यकर्मादावपि तत्फलोपहितत्वेन साध्यता इत्याह । तदपि जन्यत्वत्वस्य शक्यताऽवच्छेदकत्वे गौरवात् उपेक्षितम् । शक्तताऽवच्छेदकं तु द्वितीयात्वं अमादिनिष्ठो व्यापको धर्मः । एवमग्रेऽपि ।

यानि तु अन्यानि द्वितीयाऽर्थानुशासनानि, तानि प्रचुरप्रयोगाभावात् लाक्षणिकानुशासनानि । तथाहि । दुह्

याच् पच् दण्ड् रुधि प्रच्छ् चि ब्रूञ् शासु (जि) मथि मुष् नीञ् हृञ् कृष् वह्–रूपधातुसमानार्थकधातूनां यत् कर्मकारकं तत्संबन्धिनः अपादानादिकारकत्वाविवक्षायाम् ‘ माषाणामश्नीयात् ’ इतिवत् धात्वर्थसंबन्धमात्रविवक्षायां संबन्धसामान्यवाचिषष्ठीप्राप्तौ ‘ अकथितं च ’ (पा० १।४।५१) इत्याद्यनुशासनेन भाक्तकर्मसंज्ञाकरणात् द्वितीयाऽऽदि यथा ‘ गां दोग्धि पयः’ इत्यादौ । अत्र च गोदोहनसंबन्धः एव द्वितीयाऽर्थः । स च निरूपकदोहनानुकूलत्वसंसर्गेण भावनायामेव अन्वेति, न तु धात्वर्थे व्युत्पत्त्यन्तरकल्पनाऽऽपत्तेः । तद्योगप्रतिपादकानुशासनं च संसर्गप्रतिपादनपरम् । गोः अपादानत्वविवक्षायां तु ‘ गोः पयो दोग्धि ’ इति पञ्चम्यन्तप्रयोगः । गोः पयोरूपकर्मकारकसंबन्धविवक्षायां तु षष्ठ्यन्तप्रयोगोऽपि । अत्र पयसः संबन्धसामान्येन धात्वर्थाद्यन्वयविवक्षायां पयसः कर्मत्वाभावात् तत्संबन्धिन्या अपि गोः न कर्मत्वं इत्येतदर्थम् ‘कर्मसंबन्धिनः ’ इति विशेषणम् । अत एव ‘ गां पयसो दोग्धि ’ इति न प्रयोगः । अतः तदा ‘ गोः पयो दोग्धि ’ इत्येव प्रयोगः । न च त्यजनोपसर्जनं त्याजनं दुहेरर्थः, तथा च धात्वर्थताऽवच्छेदकत्याजनाश्रयत्वात् मुख्यमेव गोः कर्मत्वम्, इति कथमत्र द्वितीयायाः संबन्धे लक्षणा इति वाच्यम् । तथा विवक्षायां मुख्यकर्मत्वेऽपि धात्वर्थसंबन्धसामान्यविवक्षायां आनुशासनिकद्वितीयायां संबन्धलक्षणोपपत्तेः । अत एव न ‘ अकथितं च ’ इत्याद्यनुशासनवैयर्थ्यम् । अत एव वस्तुतः अत्र अपादानत्वाख्य एव गोः संबन्धः संबन्धत्वेन रूपेण द्वितीयाऽर्थः इति बोध्यम् । अन्ये तु ‘अकथितं च’ इतिसूत्रवैयर्थ्यापत्तिभियैव पाचयति इत्यादिवत् दुहेरपि त्यजनं धात्वर्थताऽवच्छेदकं न भवत्येव इति क्व मुख्यकर्मत्वप्रसक्तिः इत्याहुः ।

एवं अकर्मकधातुयोगे ‘ देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञः ’ इत्यनुशासनात् ‘ कुरून् स्वपिति, मासमास्ते, गोदोहमास्ते, क्रोशमास्ते’ इत्यादौ द्वितीया । अत्र द्वितीयाऽर्थः अवच्छेदकत्वम् । तच्च देशस्य अध्वनश्च । कालभावयोश्च आधेयत्वं कालिकं साक्षात् भावनाऽन्वयि । एवम् ‘ अधिशीङ्स्थासां कर्म ’ (पा० १।४।४६) ‘ अभिनिविशश्च ’ (४७) ‘ उपान्वध्याङ्वसः ’ (४८) इत्याद्यनुशासनात् ‘ अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः ’ इत्यत्र द्वितीयाऽऽदेः आधेयत्वमर्थः, ‘ अभिनिविशते सन्मार्गम्’ इत्यत्र च । क्वचिन्न पापेऽभिनिवेशः । ‘ उपवसति अधिवसति अनुवसति आवसति वा वैकुण्ठं हरिः ’ इत्यत्र च । अभुक्त्यर्थस्य न ‘ वने उपवसति ’ । अत्र सर्वत्र आधेयत्वस्य स्वाश्रयकर्तृकत्वसंबन्धेन भावनायामन्वयः । एवं ‘ क्रुधद्रुहोरुपसृष्टयोः कर्म ’ (पा० १।४।३८) इति सूत्रात् ‘ शत्रुमभिक्रुध्यति अभिद्रुह्यति ’ इति द्वितीया । उपसृष्टयोः उपसर्गयुक्तयोः । अत्र उद्देश्यत्वं द्वितीयाऽर्थः साक्षात् संबन्धेन भावनाऽन्वयी । अकर्मकत्वाच्च न मुख्यकर्मत्वम् । एवम् ‘ उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ’ ‘ अभितः–परितः–समया– निकषा– हा–प्रतियोगेऽपि ’ ‘ अन्तराऽन्तरेणयुक्ते ’ (पा० २।३।४) इत्यनुशासनात् ‘ उभयतः कृष्णं गोपाः, सर्वतः कृष्णं गोपाः, धिक् कृष्णाभक्तम्, उपर्युपरि लोकं हरिः, अध्यधि लोकम्, अधोऽधो लोकम्, अभितः कृष्णम्, परितः कृष्णम्, ग्रामं समया, ग्रामं निकषा, हा कृष्णाभक्तम्, बुभुक्षितं न प्रतिभाति किञ्चित्, अन्तरा त्वां मां हरिः, अन्तरेण हरिं न सुखम्’ इत्यादौ उपपदयोगे तत्तल्लाक्षणिकार्थेषु द्वितीया । तत्र आद्ययोः प्रतियोगित्वं द्वितीयाऽर्थः । स च साक्षात्संबन्धेन नाम्नि एव अन्वेति उपपदविभक्तित्वात् इति बहवः । वस्तुतस्तु व्युत्पत्त्यन्तरकल्पनाऽऽपत्तेः तत्रापि भावनायामेव आक्षिप्तायां श्रुतायां वा अन्वयः । स च स्वनिरूपकोभयपार्श्वस्थितगोपवृत्तित्वेन इति उपपदार्थस्य संसर्गघटकत्वात् उपपदविभक्तित्वम् । एवम् ‘ अभितः कृष्णम्, परितः कृष्णम् ’ इत्यत्रापि द्रष्टव्यम् । ‘धिक् कृष्णाभक्तम् ’ इत्यत्र आधारत्वं तदर्थः । तस्य च स्वनिरूपकधिक्काराश्रयत्वसंसर्गेण तस्यामेवान्वयः । न चैवम् ‘ धिङ् मूर्ख ’ इति प्रथमाऽनापत्तिः, तत्र मूर्खस्य संबोधनद्वारा क्रियाऽन्वयेन धिक्कारघटितसंसर्गेण क्रियाऽन्वयविरहात् । ‘ उपर्युपरि लोकम् ’ इत्यादौ च निरूपितत्वं द्वितीया-

ऽर्थः ‘ लोकनिरूपितोपरितनत्वविशिष्टदेशनिरूपितोपरितनत्वविशिष्टतत्तद्देशस्थहरिकर्तृका क्रिया ’ इति शाब्दबोधः । ‘ उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः ’ इत्यादौ ‘ उपरिबुद्धीनां उत्तानबुद्धीनां उपरि ईश्वरबुद्धयश्चरन्ति ’ इति अर्थकरणेन आम्रेडितत्वाभावात् न द्वितीया । एवं ‘ ग्रामं समया , ग्रामं निकषा ’ इत्यत्रापि निरूपितत्वं द्वितीयाऽर्थः । तस्य च समयाऽऽदिपदवाच्यसामीप्यद्वारकः अन्वयः । ‘ हा कृष्णाभक्तम् ’ इत्यत्र विषयत्वं तदर्थः, हाशब्दार्थः खेदास्तित्वम्, तद्विषयकः खेदोऽस्तीत्यर्थः । ‘ बुभुक्षितम् ’ इत्यत्र च आधेयत्वं द्वितीयाऽर्थः, विषयत्वं च आख्यातार्थः, स्वरूपसंबन्धः प्रथमाऽर्थः । तथा च किञ्चिन्निष्ठप्रतिभाविषयत्वं बुभुक्षितवृत्त्यभावप्रतियोगिप्रतिभानिष्ठविषयितानिरूपितं (इदं ‘ यत् किञ्चित् प्रतिभाति तन्न बुभुक्षितम् ’ इति वचनव्यक्त्यङ्गीकारे बोध्यम्), किञ्चिन्निष्ठाभावप्रतियोगि वा प्रतिभाविषयत्वं बुभुक्षितवृत्तिप्रतिभानिष्ठविषयितानिरूपितम्, इति शाब्दबोधः । (इदं द्वितीयं तु ‘ यत् बुभुक्षितं प्रतिभाति तन्न किञ्चित् ’ इति वचनव्यक्त्यङ्गीकारे । अतः उभयत्र प्रतिभाविषयत्वं इत्ययं आख्यातार्थः । प्रतिभानिष्ठविषयितानिरूपितं इति धात्वर्थप्रतिभायाः आख्यातार्थविषयत्वे संसर्गमर्यादया लब्धोऽर्थः । सोऽपीह द्वितीयाऽर्थविषयत्वस्य आख्यातार्थविषयत्वे संसर्गतया भासते इति ज्ञेयम्) । अन्तराशब्दस्य मध्यवाचित्वात् त्वां मां इत्यत्र संबन्धित्वं द्वितीयाऽर्थः, तव मम च मध्ये इत्यर्थः । ‘ अन्तरेण हरिम् ’ इत्यत्र प्रतियोगित्वं द्वितीयाऽर्थः । तत्परं योग्यतत्तत्संबन्धावच्छिन्नं इति ध्येयम् ।

एवं कर्मप्रवचनीयसंज्ञकशब्दप्रयोगेऽपि द्वितीया तत्तदर्थेषु लाक्षणिकी । तथाहि । कर्मप्रवचनीयास्तावत् अनु उप प्रति परि अभि अधि सु अति अपि इत्यादयः (अप आ) । तत्र हेतुत्वसमानाधिकरणं लक्षणं अनोरर्थः । यथा जपमनु प्रावर्षत् , जपरूपहेतूपलक्षितं वर्षणं इत्यर्थः । अत्र द्वितीयाऽर्थः आधेयत्वम्, तस्य हेतुत्वे लक्षणत्वे च अन्वयः, तयोश्च निरूपकतासंसर्गेण वर्षणे, तस्य च कृतौ इत्येवं संसर्गः । (अत्र ‘ अनुर्लक्षणे ’ पा० १।४।८४ इति सूत्रम् । अथ ‘ तृतीयाऽर्थे ’ पा० १।४।८५ इति सूत्रात्–) एवं तृतीयाऽर्थश्च अनोरर्थः, नदीमनु अवसिता सेना । अत्र साहित्यरूपः तृतीयाऽर्थः अनोरर्थः, स्थितिर्धात्वर्थः, निरूपितत्वं द्वितीयाऽर्थः । नद्या सह संबध्य स्थिता इत्यर्थः । (‘ हीने ’ पा० १।४।८६) हीनत्वं च अनोरर्थः । ‘ अनु हरिं सुराः ’ हरेर्हीना इत्यर्थः । अत्र प्रतियोगित्वं द्वितीयाऽर्थः । हीनत्वं अधिकत्वं च उपार्थः (‘ उपोऽधिके च ’ पा० १।४।६७) । ‘ उप हरिं सुराः ’ । बोधः प्राग्वत् । अधिकत्वे सप्तमी वक्ष्यते । प्रति–परि–अनूनां च सामान्यतो लक्षणमर्थः । ‘ वृक्षं प्रति परि अनु वा विद्योतते चन्द्रमाः ’ । अत्र द्योतकत्वं प्रत्यादेरर्थः, आधेयत्वं द्वितीयाऽर्थः स्वाश्रयद्योतकत्वनिरूपकद्योतनानुकूलत्वं कृतौ संसर्गः । ‘ वृक्षनिरूपितद्योतनाश्रयत्वं चन्द्रवृत्ति ’ इति शाब्दबोधः । पूर्वं हेतुत्वसमानाधिकरणं लक्षणं अनोरर्थः इति सामान्यतो लक्षणार्थे अनोः पृथक् ग्रहणम् । एवं इत्थंभूताख्यानेऽपि एते त्रयः । ‘ भक्तोऽयं विष्णुं प्रति परि अनु वा ’ । इत्थंभूतः इत्यर्थः । विषयत्वं प्रत्ययार्थः, निरूपितत्वं द्वितीयाऽर्थः । भागेऽपि एते , ‘ लक्ष्मीः हरिं प्रति परि अनु वा ’ । हरेर्भाग इत्यर्थः । भागः स्वत्वं प्रत्ययार्थः, निरूपितत्वं द्वितीयाऽर्थः । वीप्सायां चैते, ‘ वृक्षंवृक्षं प्रति परि अनु वा सिञ्चति ’ । अत्र मुख्यकर्मत्वं यदा जलादेः, तदा ‘ जलं सिञ्चति ’ इति प्रयोगः । यदा तु वृक्षनिरूपितसंयोगाश्रयत्वं विवक्षितम्, (जलनिरूपितसंयोगाश्रयत्वमेव वृक्षेऽपि विवक्षितम्) तदा ‘ वृक्षं जलेन सिञ्चति ’ इति प्रयोगः । तदा तस्य मुख्यमेव कर्मत्वम् । यदा तु जले मुख्यकर्मत्वं विवक्षित्वा प्रत्यादेश्च लक्षणार्थत्वं अङ्गीक्रियते , तदा ‘ वृक्षं प्रति जलं सिञ्चति ’ इत्यपि प्रयोगः । न चैवं वीप्साऽभावेऽपि प्रत्यादेः कर्मप्रवचनीयसंज्ञात्वे ‘ ०वीप्सासु प्रतिपर्यनवः ’ (पा० १।४।९०) इत्यनुशासनवैयर्थ्यम्, प्रत्यादेः लक्षणार्थत्वाभावेऽपि आभिमुख्यादिरूपान्तरार्थकत्वे (रूपार्थान्तरकत्वे ?) वीप्सायां सत्यामेव कर्मप्रवचनीयसंज्ञा इत्येवंपरत्वात् । अत एव वीप्साया न प्रत्याद्यर्थत्वं द्विर्वचनेनैव लाभात् । अतश्च तत्र आभिमुख्यादिकं प्रत्याद्यर्थः, निरूपितत्वं द्वितीया-

ऽर्थः । एवं भागभिन्नेषु लक्षणादिषु अभिरपि कर्मप्रवचनीयसंज्ञः स्यात् ('अभिरभागे' पा० १।४।९१) 'हरिमभि वर्तन्ते भक्ताः, हरिमभि, देवंदेवमभि सिञ्चति '। एवं अधि परि अति सु अपि इत्यादीनामपि उदाहरणानि बोध्यानि। एवं 'कालाध्वनोरत्यन्तसंयोगे' (पा० २।३।५) अपि द्वितीया। 'मासमधीते, क्रोशमास्ते'। अत्र निरन्तरसंनिकर्षो द्वितीयाऽर्थः। स च साक्षात् संबन्धेनैव भावनाऽन्वयी। तदेवं तत्रतत्र लाक्षणिकानुशासनान्यपि द्रष्टव्यानि। मुख्यकर्मत्वसंभवे तु तदेव द्वितीयाऽर्थः। यत्र तु मुख्यस्य अमुख्यस्य वा विशेषणम् 'शुक्लमोदनं पचति, शुक्लां गां दोग्धि पयः' इत्यादौ, तत्र पदद्वयेन शुक्लगुणविशिष्टौदनकर्मत्वस्यैव लक्षणात् तस्य च भावनायामन्वयेऽपि 'गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति' इत्यनुशासनात् उपस्थितत्वात् विशेषणविभक्तिः शुक्लपदोत्तरं द्वितीया साधुत्वमात्रार्था, न तु अरुणैकहायन्यादिवत् विशेषणस्य पृथगेव भावनाऽन्वयः। तस्याः एककर्मत्वभङ्गापत्तेः। नापि शुक्लपदार्थस्य अभेदेन ओदनान्वयः, नामार्थस्य स्वोत्तरविभक्त्यर्थेन क्लृप्तान्वयस्य नामार्थान्तरेणान्वये व्युत्पत्त्यन्तरकल्पनाऽऽपत्तेः। अत एव भावनायाः एककर्मकत्वभङ्गभिया द्विकर्मकधातुस्थलेऽपि एकमेव कर्मत्वेन भावनाऽन्वयि। अपरं तु द्वितीयालक्षितकरणत्वादिनैव भावनाऽन्वयि। पाश्चात्त्यधात्वर्थान्वयस्तु कर्मत्वेनैव इति न धातोः द्विकर्मकत्वबाधः इति व्यक्तं कौस्तुभे। तत् सिद्धं सर्वत्र द्वितीयाऽर्थस्य भावनाऽन्वय इति।

(क्रियाविशेषणानि द्वितीयान्तानि)। **ननु** एवम् 'मृदु ओदनं पचति, स्तोकमोदनं पचति' इत्यादौ कर्मकारकविशेषणत्वात् द्वितीयोपपत्तावपि यत्र 'क्रियाविशेषणानां नपुंसकम्' इत्यनुशासनात् 'मृदु पचति, स्तोकं पचति' इत्यादि नपुंसकलिङ्गनिर्देशः, तत्र क्रियाविशेषणत्वात् अभेदसंबन्धेन क्रियान्वयेऽपि द्वितीयोत्पत्तौ प्रमाणाभावः। नहि किञ्चिदनुशासनं तत्रास्ति। साधुत्वार्थे तत्र द्वितीया इति चेत्, साधुत्वार्थे चतुर्थ्यादेरपि आपत्तेः। प्रथमाऽतिक्रमे कारणाभावेन प्रथमाया एव आपत्तेश्च। किञ्च नामार्थस्य स्वोत्तरविभक्त्यर्थे क्लृप्तान्वयस्य अभेदसंबन्धेनापि धात्वर्थान्वयाभ्युपगमे व्युत्पत्त्यन्तरकल्पनाऽऽपत्तिः। 'सुखं स्वपिति, सुखमास्ते, सुखं गच्छति' इत्यादौ अभेदान्वयानुपपत्तिश्च। न चात्र कर्मणि द्वितीया, धात्वर्थताऽवच्छेदकफलशालित्वस्य सुखे बाधात्, 'सुखमोदनं पचति' इत्यादौ द्विकर्मकताऽऽपत्तेश्च। अकर्मकस्वप्यादिकर्मत्वस्य अनुक्तिसत्त्वाच्च। सुखादेः कर्मत्वे 'सुखमोदनः पच्यते, स्तोकमोदनः पच्यते' इत्यादौ द्वितीयाऽनापत्तेश्च। कृद्योगे ओदनस्यैव षष्ठ्यापत्तौ 'सुखमोदनस्य पक्ता' इत्यादौ द्वितीयाऽनापत्तेश्च। अतः कथं क्रियाविशेषणानामन्वयः इति **चेत् । अत्र वैयाकरणाः** (इत्याहुः इति अग्रे अन्वयः). धात्वर्थीभूतफूत्कारादिव्यापारस्य फलं विक्लृत्तिरपि धात्वर्थः। तद्विशेषणं च स्तोकादिकं इति तस्य कर्मत्वात् तद्विशेषणस्य द्वितीयाऽन्तत्वम्। न च विक्लृत्त्यादिफलस्यैव क्रियाजन्यफलाश्रयत्वरूपमुख्यकर्मत्वाभावः, विक्लृत्तेरिव तदुत्पत्तेरपि 'विक्लृत्तिमुत्पादयन्ति' इति विवरणानुरोधेन धातुवाच्यत्वात् क्रियाजन्योत्पत्त्याश्रयत्वेन विक्लृत्तेरपि मुख्यकर्मत्वात् तद्विशेषणे द्वितीयोपपत्तेः। न चैवं 'विक्लृत्तिं पचति' इति प्रयोगापत्तिः, तस्याः धातुनैव उक्ततया उक्तार्थानामप्रयोगात्। अकर्मकधातुस्थलेऽपि धातुवाच्यफलस्य शरीरलाघवादेः सुखसाधनत्वात् सुखपदेन सुखसाधनं लक्षयित्वा तस्य द्वितीयाऽन्तत्वोपपत्तिः। न चैवं तस्य धातोः अकर्मकत्वानापत्तिः, स्वव्यधिकरणफलाश्रयकव्यापारवाचित्वाभावेन अकर्मकत्वोपपत्तेः। अतस्तस्य सकर्मकाकर्मकसाधारण्येन उत्पत्त्याश्रयरूपकर्मसत्त्वेऽपि न क्षतिः। अतो युक्तैव एतादृशकर्मणि सर्वत्र द्वितीया। अत एव तादृशविषये एव 'क्रियाविशेषणानां नपुंसकम्' इत्यादिना नपुंसकत्वम्। तच्च अनियतलिङ्गविषयम्। नियतलिङ्गानां तु तत्तल्लिङ्गत्वे सत्येव द्वितीयाऽन्तत्वम्। अत एव 'आदिं पचति' इत्यादि प्रयोगः। आदिभूता या विक्लृत्तिः, तज्जनको व्यापारः इत्यर्थः। **न च** तादृशकर्मकारकमादाय कर्मणि लकारः कृद्योगनिमित्तिका षष्ठी वा आपद्येत इति **वाच्यम्**। व्यापारव्यधिकरणधातुवाच्यमुख्यफलाश्रयरूपकर्मण्येव तयोः प्रवृत्तेः, उत्पत्तेः अमुख्यफलत्वेन तदाश्रये तयोरप्रवृत्तेः।

'लः कर्मणि च भावे चाकर्मकेभ्यः' (पा० ३।४।६९) 'कर्तृकर्मणोः कृति' (पा० २।३।६५) इत्यादिसूत्रेषु कर्मपदेन तादृशकर्मग्रहणस्यैव निर्णीतत्वात् । इतरथा सर्वेषामेव सकर्मकत्वेन 'अकर्मकेभ्यः' इति पदोपादानानुपपत्तेः । अतश्च 'स्तोकमोदनः पच्यते, स्तोकमोदनस्य पक्ता' इत्यादौ द्वितीयाऽन्तत्वोपपत्तिः । यत्र तु विधिवशात् धात्वर्थस्य करणत्वम्, तत्र तद्विशेषणे तृतीया । यथा 'ज्योतिष्टोमेन यजेत' इति । तत्र 'अतिसमीचीनं ज्योतिष्टोमेन यजेत' इति यद्विशेषणम्, न तत् धात्वर्थस्य, अपितु भावनायाः। अत एव सा प्रथमा न द्वितीया । इत्याहुः (वैयाकरणाः) तन्न । व्यापारव्यधिकरणधातुवाच्यमुख्यफलाश्रयरूपकर्मण्येव लकारषष्ठ्योः प्रवृत्तौ 'चैत्रेण आस्यते मासः, सुप्यते रात्रिः' इति कर्मलकारानापत्तेः । नहि तत्र तादृशं फलमस्ति । तथात्वे तस्य स्वाभाविकाकर्मकत्वानापत्तेः । धातूपात्तफलसमानाधिकरणव्यापारवाचित्वं हि भवन्मते अकर्मकत्वम् । अतस्तत्र तादृशफलाप्रसिद्धेः न द्वितीयाकर्मलकाराद्यापत्तिः । अत एव न परसमवेतक्रियाजन्यधात्वर्थताऽवच्छेदकीभूतफलशालित्वं कर्मत्वम्, नापि तत्समनियताखण्डोपाधिः कर्मत्वम् । तदभावेऽपि 'चैत्रो मासमास्ते' 'आस्यते मासः' इत्यादौ कर्मत्वावश्यकत्वेन व्यभिचारात् । अपितु तद्व्यापकं तत्समानाधिकरणमात्रं वा, अथवा किमित्याद्याकाङ्क्षापूरकत्वसमनियतमेव अखण्डोपाधिरूपं कर्मत्वम् । तच्च पचतीत्यादौ ओदनस्येव आस्यते इत्यादौ मासादेरपि अविशिष्टं इति युक्तमेव अत्र द्वितीयाऽऽदि । तच्च तत्तद्धातुसमभिव्याहारगम्यं इत्युक्तं कौस्तुभे । सुखादिरूपक्रियाविशेषणानां तु न किमित्याकाराकाङ्क्षापूरकत्वम्, अपितु कथमाकाङ्क्षापूरकत्वमेव। अत एव 'कथं पचति स्वपिति वा, सुखम्' 'कीदृशं पचति, स्तोकं मृदु वा' इत्यादिप्रश्नोत्तरभावोऽपि संगच्छते । अतो न तत्र कर्मत्वसंभवः । नापि तदनुरोधेन उत्पत्तेः फलस्य वा धातुवाच्यत्वकल्पनम्, अन्यलभ्यत्वात् तयोः । अत एव पाकत्वयागत्वादिनैव धातोः शक्तिः इत्युक्तं प्राक् ।

कथं तर्हि तत्र द्वितीयानियमः ? 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥' इत्यनुशासनात् इति गृहाण । अत्र ततोऽन्यत्रापि इति प्रतिपदोक्तात् अन्यत्र क्रियाविशेषणेऽपि इत्यर्थः । अत एव 'अन्यत्रापि दृश्यते' इत्युक्तम् । तदेतदाह 'अभितः परितः समया निकषा हा प्रति' इति अग्रिमस्य प्रतिपदोक्तपरतया भाष्यानारूढं व्याख्यानमपि असंगतं वैयर्थ्यापत्तेः । तस्मात् सिद्धं क्रियाविशेषणेषु द्वितीयामात्रानुशासनम् । अत एवात्र द्वितीयामात्रग्रहणात् न लकारषष्ठ्यौ । अतस्तेषामपि तात्पर्यानुरोधेन फलद्वारको धातूपात्तव्यापारद्वारकः साक्षादेव वा भावनायामन्वयः । सर्वथैव द्वितीयाऽन्तत्वम् । तत्र स्तोकं मृदु समीचीनं इत्यादौ द्वितीयाऽर्थो लक्षणया आश्रयित्वम् । स्तोकत्वादिकं च लक्षणया शक्त्यैव वा प्रातिपदिकार्थः । तदाश्रयित्वं च यदि फलसंबन्धे तात्पर्यम्, तदा स्वनिरूपकफलजनकव्यापारानुकूलत्वसंसर्गेण कृतौ अन्वेति । यदि व्यापारसंबन्धे, तदा स्वनिरूपकव्यापारानुकूलत्वसंसर्गेण, यदि तु भावनासंबन्धे तदा साक्षादेव इति विवेकः ।

एतेन 'भावनासंबन्धे प्रथमैव' इति परास्तम् । भावनायाः संबन्धविवक्षया 'आदिः पचति' इति प्रयोगापत्तेश्च । न चासौ इष्टः। भवद्ग्रन्थेऽपि अलेखनात् । ज्योतिष्टोमेन इत्यत्रापि न क्रियाविशेषणत्वम्, अपितु धात्वर्थस्य करणत्वेन भावनाऽन्वयवत् नामार्थस्यापि करणत्वेनैव अन्वयः। नामार्थो हि यद्यपि धात्वर्थ एव, तथापि धातुना विजातीययागत्वादिना बोधात्, नाम्ना च ज्योतीरूपस्तोमकत्वादिना बोधात् न पर्यायत्वम् । अभेदबोधस्तु अरुणैकहायनीवत् (पार्ष्ठिकः) इति वक्ष्यते । अत एव 'ज्योतिष्टोमेन इत्यत्र अभेदार्थिका तृतीया' इति तार्किकमतमपास्तम्, अभेदलक्षणायां प्रमाणाभावात्। 'धान्येन धनी' इत्यादावपि धनसंबन्धे धान्यस्य करणत्वोपपत्तेः अभेदलक्षणायाः क्वापि अदर्शनाच्च । करणत्वविवक्षाभावे एव च क्रियाविशेषणत्वनिमित्तिका द्वितीया 'स्वाहाकारं यजति' इतिवत् लौकिकवाक्ये न विरुध्यते । स्वाहाकारवाक्ये तु व्यत्ययानुशासनेन करणत्व-

लक्षणा । ‘ सुखं स्वपिति ’ इत्यादावपि जनकत्वं द्वितीयाऽर्थः । सुखजनकः स्वापः इत्यर्थः । यद्वा सुखपदं अनायासपरम् । द्वितीयाऽर्थः पूर्वकत्वम् । आयासाभावपूर्वकः स्वापादिः इत्यर्थः ।

सर्वथा सिद्धं सर्वत्र द्वितीयाऽर्थो भावनाऽन्वयी इति । भावना च लिङ्गानन्वयिपदोपस्थाप्या । तच्च तिङ्कृन्निपाताद्यपि । न तु प्रथमायामिव तिङाद्येव । अत एव ‘ओदनं पचति, ओदनं करिष्यन्, ओदनं भुङ्क्ते’ इत्यादौ सर्वत्र द्वितीयायाः भावनाऽन्वयः इति संक्षेपः । **रहस्य. पृ.** ६७–९१.

* द्वितीयाऽर्थः साध्यत्वमेव न साधनत्वं इति विचारः सक्त्वधिकरणे । **के.** २।१।४।१२.

* **द्वितीयादिश्रुतीनां** ‘व्रीहीन् प्रोक्षति’ इत्यादिवाक्येषु स्वशक्यताऽवच्छेदककर्मत्वत्वाद्यवच्छिन्नतात्पर्यकत्वं संमार्गाधिकरणादौ निर्णीतम् (कौस्तुभे)। **मुरारि. पृ.** ११६८.

* **द्वितीयाकृतमेव** प्राधान्यम् ‘ऐन्द्या गार्हपत्यमुपतिष्ठते’ इत्यत्र । **वा.** २।१।४।१२ **पृ.** ४१३.

* **द्वितीयाचतुर्थ्यौ** सत्यां भावनायां आत्मार्थे क्रियां कुरुतः, तृतीयाद्याश्च भावनायामेव सत्यां आत्मानं क्रियार्थमेव कुर्वन्ति । अथवा द्वितीया उद्भूतं शक्तिकर्म प्रतिपादयति, निष्ठा न्यग्भूतम् । न च द्वितीयाऽन्तं कारकं कारकान्तरेण संयुज्यते, उद्भूतशक्तित्वात् । **वा.** ९।१।२।२.

* **द्वितीयावाच्यत्वं** अनीप्सितत्वस्य सक्त्वधिकरणे निषिद्धम् । **सु. पृ.** १०८७.

* **द्वितीयाश्रवणात्** गार्हपत्यस्य ईप्सिततमत्वम्, ऐन्द्याश्च तृतीयाश्रुत्या करणत्वम् । **वा.** ३।३।७।१४ **पृ.** ८२५.

* **द्वितीयासंयोगात्** कर्मणः प्राधान्यं विज्ञायते, निष्कासस्य सप्तमीयोगात् गुणभावः । **भा.** ११।२।१६।६६.

* **द्वेधा** संभवे तादृशी प्रमाणगतिराश्रयणीया या प्रमाणान्तरं न बाधते । **वा.** ३।४।१।५.

* **द्वेषः** अप्रशस्तप्रत्ययाधीनोत्पत्तिः । **वा.** १।२।१।७ **पृ.** ११५. * द्वेषः अप्रीतिः । **सु. पृ.** १३५. * **द्वेषात्** ऋते विद्वान् न निवर्तते । **वा.** १।२।१।७ **पृ.** ११५.

* **द्वेषमन्त्रः** ‘योऽस्मान् द्वेष्टि, यं च वयं द्विष्मः’ इति कर्मसु नित्यः । **भा.** ६।८।८।२८.

* **द्वेष्यं** अनीप्सितं कर्म यथा ‘विषं भुङ्क्ते’ । **मणि. पृ.** १३०. * ‘**द्वेष्ये चाचोदनाद्** दक्षिणाऽपनयः स्यात्’ (१०।२।१६।४७) इत्यत्र दर्शादौ प्राकृतवैकृतदक्षिणासमुच्चयः उक्तः । **बाल. पृ.** १७७.

⧗ द्वेष्ये चाचोदनाद्दक्षिणाऽपनयः स्यात् । १०।२।१६।४७ ॥

दर्शपूर्णमासयोः ‘यदि पत्नीः संयाजयन् कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत्, तस्यैकहायनो गौर्दक्षिणा, तं स द्वेष्याय दद्यात्’ इति श्रूयते । द्वेष्ये च इदं दानं धर्ममात्रं न परिक्रयार्थं इति चशब्देन अन्वादिश्यते । द्वेष्यस्य ऋत्विजः अचोदनात् चोदनाऽभावात् । नहि द्वेष्यः ऋत्विक् कर्तुं शक्यते ‘ऋत्विगाचार्यौ नातिचरितव्यौ’ इति निषेधात् । परिक्रयार्थत्वे दानस्य स्वीकृते तु दक्षिणायाः चोदकप्राप्तस्य अन्वाहार्यस्यापि अपनयः स्यात् । तत्र चोदको बाध्येत । धर्ममात्रं एकहायनस्य दानं अनृत्विजे कस्मैचित् विप्राय दातव्यम् । इति सिद्धान्तः । **के.**

* **द्वेष्यसंप्रदानकदानस्य** अदृष्टार्थत्वमेव कपालाभिहोमनिमित्तकवैश्वानरेष्टौ । **भा.** १०।२।१६।४६.

* **द्वैपायनः** अनूढायां सत्यवत्यां पराशराज्जातः । पश्चादूढायां शंतनोः विचित्रवीर्यः । **सु. पृ.** १९१.

* **द्वैरशन्यात्** लिङ्गात् ऐकादशिनेषु पशुषु सौत्यस्य विध्यन्तः सुत्याकालत्वाच्च । **भा.** ८।१।७।१४.

* **व्यामुष्यायणानां** शैशिरादीनां एकतो द्वौ अन्यत एकं इति व्यवस्थया आर्षेयवरणम् । **संकर्ष.** ३।४।८.

ध.

⧗ **धटारोहणन्यायः । साहस्री.** ११९ । व्यवहारे दिव्यविशेषोऽयम् । अत्र याज्ञवल्क्यः– ‘तुलाधारणविद्वद्भिरभियुक्तस्तुलाऽऽश्रितः । प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः ॥’ सुवर्णकारप्रभृतिभिः प्रतिमानेन मृदादिना समीभूतः समीकृतः तुलामाश्रितः अधिरूढः अभियुक्तः अभियोक्ता वा दिव्यकारी रेखां कृत्वा येन

संनिवेशेन प्रतिमानसमीकरणदशायां शिक्यतले अवस्थितः तस्मिन् पाण्डुलेखेन अङ्कयित्वा अवतारितः तुलामभिमन्त्रयेत् 'त्वं तुले सत्यधामाऽसि पुरा देवैर्विनिर्मिता । तत् सत्यं वद कल्याणि संशयान्मां विमोचय ॥ यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय । शुद्धश्चेद् गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥' २।१००–१०२ ॥ (किञ्चिदपि ऊर्ध्वगमने शुद्धिः) । **के.**

* **धनम् ।** मध्यगं हीदं दंपत्योर्धनम् । **भा.** ६।१।४।१७.

* **धनार्जनं** न यागविधिभिराक्षिप्तम्, भोजनादिभिर्धनकार्यैरेव तस्याक्षिप्तत्वात् । धनार्जनस्य तु न कोऽपि विधिः । याजनाध्यापनादिविधयस्तु नियमार्थाः । **वि.** ६।१।८.

* **धनभिक्षा** यज्ञार्थं धनवताऽपि कर्तव्या, अपूर्वार्थत्वात् । **के.** ६।८।७।२६–२७.

* **धनवताऽपि** भृतिर्वननीया ज्योतिष्टोमे । **भा.** ६।८।७।२६–२७.

* **धनहीनस्यापि** कर्माधिकारः । अधिकारशब्दे अधिकरणम् । **भा.** ६।१।८।३९–४०.

⧗ **धनञ्जयन्यायः ।** यथाहुः–'नित्यबोधपरिपीडितं जगद्विभ्रमं तुदति वाक्यजा मतिः । वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनः ॥' इति । ('वासुदेवसहितो धनञ्जयः' इति संग्रहे पाठः) । **साहस्री.** २९४.

* **धनिकत्वं** निषादस्य संभवति । **के.** ६।१।१३।५१.

⧗ **धनुर्गुणन्यायः ।** अयं न्यायो यथा, कुटिलेऽपि धनुषि शूरा गुणं ज्यामारोपयन्ति, तद्वन्महान्तस्तु स्वभावतोऽतिकुटिलेऽपि जने गुणमारोपयन्तीति विषयेऽवतरति । उक्तं च सायणाचार्यैः 'आजन्मतोऽतिकुटिलेऽपि जने महान्तस्त्वारोपयन्ति हि गुणं धनुषीव शूराः' इति । **साहस्री.** ८९६.

* **धन्वनि** निरुदके कृताः प्रपाः परेषामुपकुर्वन्ति । **वा.** १।३।१।२ पृ. १६६.

* '**धर्मो**ऽपि च वृणोत्येव नरं संसारवर्तिनम् । न हि केवलपापेन देहेनाच्छाद्यते नरः ॥' **वा.** ३।४।१०।२९. * **धर्मः** अर्थत्वे सति चोदनागम्यः । ब्रह्मणि चैत्यवन्दनादौ घटादौ च अतिव्याप्तिव्यवच्छेदाय चोदनागम्यः इत्युक्तम् । विधिगम्ये अनर्थफलत्वेन अनर्थरूपे श्येनाद्यभिचारकर्मणि अतिव्याप्तिव्यवच्छेदाय अर्थः इत्युक्तम् । **वि.** १।१।२. * **धर्मः** (क्रमरूपः) चोदनालक्षण एव, न प्रत्यक्षादिप्रमाणकः । **भा.** ५।१।१।१ वर्णकं २ पृ. १२८९, * **धर्मः** जिज्ञासितव्यः । सोऽयं (पुरुषः) अविचार्य प्रवर्तमानः कश्चिदेवोपाददानो विहन्येत, अनर्थं च ऋच्छेत् । तस्माद्धर्मो जिज्ञासितव्यः । १।१।१।१ पृ. ११. * **धर्मः** द्वादशलक्षण्या व्युत्पाद्यः । **वि.** प्रस्तावना ११, * **धर्मः** नाम अपूर्वम्, अपूर्वस्यैव धर्मत्वात् । २।१।१. * **धर्मः** निःश्रेयसेन पुरुषं संयुनक्ति इति प्रतिजानीमहे । **भा.** १।१।२।२ पृ. ११. * **धर्मः** प्रत्यक्षानुमानयोरविषयः । **वि.** १।१।२, * **धर्मः** विधिनैव गम्यते, न प्रत्यक्षानुमानादिना । १।१।४. * **धर्मः** वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थः । यथा यागादिः । **मीन्या.** * **धर्मः** शब्दलक्षण इत्युक्तं चोदनालक्षणोऽर्थो धर्म इति । **भा.** १।३।१।१ पृ. १६०. * अस्मिन् शास्त्रे (मीमांसायाम्) जिज्ञास्यत्वेन **धर्मः** प्रमेयः प्रक्रान्तः । **वा.** २।१।१।१. पृ. ३७०.

* **धर्माः** (अङ्गानि) अपूर्वार्थाः इति स्थितं संनिपत्योपकारका आरादुपकारकाश्च प्रकरणेन प्रमाणेन । **टुप्.** ९।१।१।१ वर्णकं २. * **धर्माः** (अङ्गानि) अपूर्वनिमित्ताः अपूर्वप्रयुक्ताश्च । **भा.** ९।१।१।१ पृ. १६३८, * **धर्माः** (अङ्गानि) अपूर्वप्रयुक्ताः । ततो यथाप्रकरणं व्यवतिष्ठन्ते । ७।१।१।१ पृ. १५२४, * **धर्माः** अर्थप्रयुक्ताः । (यूपधर्माः परिधिधर्माः इत्यादौ । अर्थः फलम्) । १२।२।१०।२६. * **धर्माः** ये संनिपत्योपकारकाः तेऽपि अपूर्वार्थाः इति नवमे प्रतिपाद्यते ऊहसिद्धये । **टुप्.** ९।१।१।१ पृ. १६३८, * **धर्माः** (अङ्गानि) यत्र सादृश्यं तत्र प्राप्यन्ते, असति सादृश्ये नास्ति धर्मप्राप्तिः । ८।१।२।२ पृ. १५८५. * **धर्मं** केचित् बुद्धिगुणं मन्यन्ते केचिदात्मगुणम् । **बृहती.** पृ. २६. * **धर्मं** प्रति हि विप्रतिपन्ना बहुविदः केचिदन्यं धर्ममाहुः केचिदन्यम् । **भा.** १।१।१।१ पृ. १०. * **धर्मं** विषयी-

कृत्य चिन्त्यते । किमस्य न किञ्चित् प्रमाणमस्ति, किंवा प्रत्यक्षादिकमेव प्रमाणम्, उत चोदनैव, अथवा विकल्पः, अथवा समुच्चयः इति । तत्र शब्दस्य प्रमाणान्तरप्राप्ताप्रापकत्वेन स्वयमप्रमाणत्वात् प्रत्यक्षादीनां च असामर्थ्यात् अप्रमाणको धर्मः इत्येकः पक्षः । योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्यः इत्यपरः । जगद्वैचित्र्यार्थापत्त्या किमपि अदृष्टमस्ति इति सामान्येन प्रसिद्धो धर्मः चोदनया अग्निहोत्रादिविशेषरूपेण गम्यते, तस्मात् समुच्चयः इति पक्षान्तरम् । चोदनैव, सा च प्रमाणमेव इति सिद्धान्तः । तदिह चोदनैव प्रमाणम्, सा च प्रमाणमेव इति अवधारणद्वयं प्रतिज्ञायते । ...... चोदनालक्षणमात्रस्य धर्मत्वं मा भूत् इति अर्थशब्देन विशेष्यते । चोदनाशब्देन च प्रवर्तकं निवर्तकं च वाक्यमुच्यते । ततश्च विधेयवाक्यैः 'न हिंस्यात्' इत्यादिभिः अनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात् तद्व्यावृत्त्यर्थं य एव अर्थरूपेण प्रवर्तकवाक्यैर्लक्ष्यते तस्यैव धर्मत्वं वक्तुं अर्थग्रहणम् । भाष्ये च श्येनादिग्रहणं तत्साध्यहिंसादिलक्षणार्थम् । उपरिष्टात् 'हिंसा हि सा, सा च प्रतिषिद्धा' इति विवरणात् । शा. चोदनासूत्रे पृ. १८–२६ किञ्चित् किञ्चित्. * साक्षात् फलसाधनमात्रस्य धर्मत्वाभ्युपगमात् । यच्च फलपदेन सह संबध्यते तस्यार्थे धर्मं अपूर्वसाधनं च मन्यन्ते । वा. २।१।१।१ पृ. ३७३. * धर्मान् भाव्यमानं आकाङ्क्षति करणानुग्रहद्वारेण । टुप्. ९।१।१।१ पृ. १६३७.

धर्माद्वा स्यात् प्रजापतिः।१०।८।१७।५१॥ दर्शपूर्णमासयोः उपांशुयाजे प्रजापतिर्देवता स्यात् । उपांशुत्वरूपात् धर्मात् । उपांशुयाजस्तावत् उपांशुः, 'यत् किंचित् प्राजापत्यं यज्ञे क्रियते उपांश्वेव तत् क्रियते' इति वचनाच्च प्रजापतेरपि उपांशुत्वम् । तस्मात् प्रजापतिः स्यात् । इत्येकः पक्षः । वाशब्दः पक्षविशेषमाह ।

देवतायास्त्वनिर्वचनं तत्र, शब्दस्येह मृदुत्वम्, तस्मादिहाधिकारेण । ५२ ॥

तुशब्दः उपांशुयाजे प्रजापतिदेवताकत्वपक्षं व्यावर्तयति । तत्र 'प्रजापतिं मनसा यजेत्' इति वाक्ये देवतायाः प्रजापतेः अनिर्वचनं तूष्णींभावः धर्मः अवगम्यते । इह प्राजापत्यवाक्ये तु उपांशुत्वं नाम शब्दस्य मृदुत्वं अस्पष्टत्वं उक्तम् । न तूष्णीम्भाव उक्तः । किञ्च 'प्रजापतिं मनसा यजेत्' इत्यस्य विधेः 'तस्माद्यत् किंचित् प्राजापत्यं यज्ञे क्रियते उपांश्वेव तत् क्रियते' इति अनुवादसरूपः अर्थवादः । तस्मात् उपांशुयाजे न प्रजापतिः । किन्तु इह उपांशुयाजे अधिकारेण मुख्यत्वेन देवता ग्राह्या, अग्निः । इति द्वितीयः पक्षः ।

विष्णुर्वा स्याद्धौत्राम्नानादमावास्याहविश्च स्याद्धौत्रस्य तत्र दर्शनात् । ५३ ॥

उपांशुदेवता नाग्निः स्यात् इति वाशब्दार्थः । किं तर्हि ? विष्णुः स्यात् देवता । हौत्राम्नानात् । अमावास्यां प्रकृत्य 'इदं विष्णुर्वि चक्रमे, प्र तद्विष्णुः स्तवते वीर्येण' इति वैष्णवं हौत्रमाम्नायते । तस्मात् विष्णुः स्यादुपांशुयाजदेवता । किञ्च पौर्णमासीहविर्वत् अमावास्याहविश्च उपांशुयाजः स्यात् । तत्र अमावास्यायां वैष्णवस्य उपांशुयाजहौत्रस्य दर्शनात् । हौत्रमुक्तमेव ।

अपिवा पौर्णमास्यां स्यात् प्रधानशब्दसंयोगाद् गुणत्वान्मन्त्रो यथाप्रधानं स्यात् । ५४ ॥

उपांशुयाजे विष्णुर्देवता इति यदुक्तम्, तद् गृह्यते । अमावास्यायां उपांशुयाजः इति तु न गृह्यते । किन्तु सः पौर्णमास्यां स्यात्, 'आज्यस्य नौ उपांशु पौर्णमास्यां यजन्' इति प्रधानशब्दस्य पौर्णमासीशब्दस्य संयोगात् । ननु वैष्णवहौत्रमन्त्रौ अमावास्यायामुक्तौ तत् कथं उपांशुयाजः अमावास्यायां न स्यात् इति चेन्न, मन्त्रः गुणत्वात् यथाप्रधानं स्यात् । प्रधानं न यथामन्त्रं किन्तु मन्त्र एव यथाप्रधानं गुणत्वात् । तस्मात् नामावास्यायां उपांशुयाजः । सिद्धान्तपक्ष एवायम् ।

आनन्तर्यं च सांनाय्यस्य पुरोडाशेन दर्शयत्यमावास्याविकारे । ५५ ॥

अमावास्यायाः विकारे साकंप्रस्थायीये नाम यागे सांनाय्यस्य पुरोडाशेन आनन्तर्यं दर्शयति 'आज्यभागाभ्यां प्रचर्य आग्नेयेन पुरोडाशेन आग्नीध्रे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाह' इति श्रुतिः । अत्र हि आग्नेयात् पुरोडाशात् सांनाय्यस्य आनन्तर्यं दर्शितम्, न तु

उपांशुयाजस्य । तस्मात् अमावास्यायां नोपांशुयाजः । इति सिद्धान्तपक्षे हेत्वन्तरमुक्तम् ।

अग्नीषोमविधानात्तु पौर्णमास्यामुभयत्र विधीयते । ५६ ॥

पौर्णमास्यामेव उपांशुयाज इति पक्षं तुशब्दो व्यावर्तयति । 'उपांशुयाजमन्तरा यजति' इति वाक्येन अविशेषेण उपांशुयाजः उभयत्र पौर्णमास्याममावास्यायां च विधीयते । 'तावब्रूतामग्नीषोमौ ... उपांशु पौर्णमास्याम्' इति पौर्णमास्यां अग्नीषोमयोर्विधानात् अग्नीषोमदेवत्यः उपांशुयाजः पौर्णमास्याम्, मन्त्राम्नानात् वैष्णवः उपांशुयाजः अमावास्यायां इति देवताविकल्पः स्यात् । इति अन्यः पूर्वपक्षः ।

प्रतिषिध्यविधानाद्वा विष्णुः समानदेशः स्यात् । ५७ ॥

पौर्णमास्याममावास्यायां च उपांशुयाजः इतिपक्षं वाशब्दो व्यावर्तयति । प्रतिषिध्य अमावास्यां वर्जयित्वा पौर्णमास्यां उपांशुयाजस्य विधानात् । विष्णुः प्रजापतिना अग्नीषोमाभ्यां च समानदेशः स्यात् । तयोर्यो देशः पौर्णमासी स एव देशो विष्णोरपि । तस्मात् पौर्णमास्यामेव उपांशुयाजः तत्रैव च देवताविकल्पः इति सिद्धान्तवादी । 'आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन्' इति प्रकृत्य आम्नायते 'जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति' इति । अन्वञ्चौ पुरोडाशौ पौर्णमास्यामेव नामावास्यायाम् । तत्रैव चेदं वचनम् 'विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति । तस्मात् युक्तः सिद्धान्तः ।

तथा चान्यार्थदर्शनम् । ५८ ॥

तथा च अमावास्यायां उपांशुयाजाभावे अन्यार्थदर्शनं भवति । 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इति । अमावास्यायामुपांशुयाजसत्त्वे चतुर्दश आहुतयः स्युः, न त्रयोदश । तस्मादमावास्यायां नोपांशुयाजः । इति सिद्धान्तः । पञ्च प्रयाजाः, द्वौ आज्यभागौ, आग्नेयाग्नीषोमीयौ द्वौ, उपांशुयाज एकः, स्विष्टकृत्, त्रयोऽनूयाजाः, इति चतुर्दश आहुतयः पौर्णमास्याम् । अमावस्यायां तु आग्नेयः सांनाय्यं चेति द्वे इति विशेषः, उपांशुयाजश्च नास्ति इति त्रयोदश आहुतयः ।

न चानङ्गं सकृच्छ्रुतावुभयत्र विधीयेतासंबन्धात् । ५९ ॥

इतश्च नामावास्यायामुपांशुयाजः । अनङ्गं अङ्गभिन्नं प्रधानं उपांशुयाजः सकृत् पौर्णमास्यां श्रुतौ श्रवणे सति उभयत्र पौर्णमास्यां अमावास्यायां च न विधीयेत, सकृत् श्रवणे उभयत्र न स्यात् । असंबन्धात् प्रधानस्य प्रधानेन संबन्धाभावात् ।

गुणानां च परार्थत्वात् प्रधानेषु प्रवृत्तौ विधिलिङ्गानि दर्शयति । ६० ॥

गुणानां च परार्थत्वात् प्रधानेषु प्रवृत्तौ विधिलिङ्गानि दर्शयति ; न प्रधानानां अपरार्थत्वात् । कथम् ? 'अप्सुमन्तावाज्यभागौ यजति' 'एकादश प्रयाजान् यजति एकादशानुयाजान्' इति । उपांशुयाजश्च प्रधानम् । इति तस्य प्रवृत्तौ विधिलिङ्गं न स्यात्, इति तस्य अमावास्यायां न प्रवृत्तिः ।

विकारे चाश्रुतित्वात् । ६१ ॥

अमावास्याया विकारे साकंप्रस्थायीये उपांशुयाजस्य अश्रुतित्वात् अश्रवणात् अमावास्यायामपि नोपांशुयाजः । इदमुक्तम् 'आनन्तर्ये च' इति सूत्रे (५५) । तस्मात् पौर्णमास्यामेव उपांशुयाजः । तत्रैव च प्रजापतिः विष्णुः अग्नीषोमौ इति देवता विकल्पेन इति सिद्धान्तः । कौषीतकिब्राह्मणे तु अमावास्यामपि उपांशुयाज उक्तः । प्रकृतविचारस्तु शाखान्तरविषये, कृत्वाचिन्तया वा । के.

* धर्मस्य अग्निहोत्रादिलक्षणस्य प्रत्यक्षादिभिरनवगतस्य निमित्तं (ज्ञापकं) उपदेशः । 'तस्य ज्ञानमुपदेशः' । भा. १।१।५।५ पृ. २३.

⌛ धर्मस्यार्थकृतत्वाद् द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनाऽनुबन्धः समवायात् । ९।२। १२।३९ ॥

प्राकृतं व्रीहिषु प्रोक्षणं वाजपेये 'बार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपति' इति नीवारेषु भवति न वा । 'संस्थिते षडहे मध्वाशयेत् घृतं वा' इति मध्वाशने 'न बहु वदेत् नान्यं पृच्छेत् नान्यस्मै ब्रूयात्'

इति षडहधर्मा भवन्ति न वा। राजसूये 'नैर्ऋतं चरुं नखावपूतानां परिवृत्त्यै गृहे' इति नखेषु प्राकृतं मुसलोलूखलयोः प्रोक्षणं भवति न वा। चातुर्मास्येषु 'परिधौ पशुं नियुञ्जीत' इति परिधौ यूपधर्माः कर्तव्या न वा। 'न गिरागिरेति ब्रूयात् ऐरं कृत्वोद्गेयम्' इति इरापदे गिरापदधर्मो (आयीभावः) भवति न वा इति विचारे सिद्धान्तमाह। द्रव्यं च गुणश्च विकारश्च व्यतिक्रमश्च प्रतिषेधश्च तेषां समाहारः तस्मिन्। तत्र द्रव्ये नीवारादौ, गुणे मध्वशनादौ, विकारे नखेषु, व्यतिक्रमे यूपं व्यतिक्रम्य नियोजनसाधनतया विहिते परिधौ, प्रतिषेधे प्रतिषिध्य विहिते इरापदे च चोदनाऽनुबन्धः। चोद्यते इति चोदना चोद्यमानम्। तादृशस्य चोद्यमानस्य प्रोक्षणादेर्धर्मस्य अनुबन्धः अतिदेशः स्यात्। समवायात् प्राकृतधर्मस्य वैकृतेऽपि संबन्धात्। धर्मस्य प्रोक्षणादेः अर्थेन अपूर्वेण कृतत्वात् प्रयुक्तत्वात्। अपूर्वोत्पादकत्वस्य चोभयत्र समानत्वात्। तस्मात् प्रोक्षणादेः अतिदेशः इति सिद्धान्तः। के.

* धर्मस्यार्थकृतत्वात्०। फलचमसे सोमत्वाभावात् कथमनुच्छिष्टत्वं संभवति? न त्वेष दोषः, स्थानापत्त्या सोमधर्मलाभात्। वक्ष्यति हि 'धर्मस्यार्थकृतत्वात्' इति। वा. ३।५।२०।५३ पृ. १०२४, * धर्मस्य चोदनालक्षणत्वमुक्तम्। २।१।१।१ पृ. ३७०. * धर्मस्य प्रत्यक्षं तावत् अनिमित्तम्। सति इन्द्रियार्थसंबन्धे या पुरुषस्य बुद्धिर्जायते तत् प्रत्यक्षम्, भविष्यंश्चैषोऽर्थः, न ज्ञानकालेऽस्तीति। अतः प्रत्यक्षमनिमित्तम्। प्रत्यक्षपूर्वकत्वाच्च अनुमानोपमानार्थापत्तीनामपि अकारणत्वम्। अभावोऽपि नास्ति। भा. १।१।४।४. * धर्मस्य प्रमेयत्वेऽपि प्रत्यक्षयोग्यता नास्ति, प्रत्यक्षस्य वर्तमानमात्रविषयत्वात्। यस्तु धर्मः प्रत्यक्षस्य अत्यन्तमविषयः तत्र अनुमानादीनां का कथा। तस्मात् विधिनैव धर्मो गम्यते। वि. १।१।४.

⧗ धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्। १।३।१।१॥

'अष्टकाः कर्तव्याः' इत्यादयः स्मृतयः धर्मे प्रमाणं न वेति विचारे पूर्वपक्षमाह। धर्मस्य 'चोदनालक्षणोऽर्थो धर्मः' (१।१।२) इति लक्षितस्य शब्दमूलत्वात् वैदिकशब्दप्रमाणकत्वात् अशब्दं वैदिकशब्दभिन्नं स्मृतिः धर्मे अनपेक्षं स्यात् निर्मूलत्वान्नापेक्षितव्यम्। अनपेक्ष्यं इति तु भूयःसु भिन्नेषु पुस्तकेषु पाठः। अर्थस्तु न भिन्नः।

अपिवा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्। २॥

स्मृतयो धर्मे न प्रमाणं इति पूर्वपक्षं व्यावर्तयति अपिवाशब्दः। अनुमानं मानं प्रमाणं श्रुतिरूपमनुस्मृत्य प्रमाणत्वात् स्मृतिः धर्मे प्रमाणं स्यात्। कर्तृसामान्यात् वैदिककर्मानुष्ठानस्मृत्योः कर्तारः समानाः अभिन्नाः। समानकर्तृकत्वात् स्मृतिः प्रमाणम्। वेदेभ्य उपलभ्य तदर्थविशेषाः प्रतिपादिताः स्मृतिकारैः। तेन स्मृतीनां श्रुतिमूलकत्वमनुमीयते। तेन स्मृतीनां धर्मे प्रामाण्यमुपपन्नम्। तस्मात् स्मृतयः प्रमाणं इति सिद्धान्तः। के.

⧗ धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्। १।३।१।१॥

एवं तावत्कृत्स्नस्य वेदस्य प्रामाण्यमुक्तम्। अथेदानीं यत्र वैदिकं शब्दमुपलभन्ते, अथ च स्मरन्ति एवमयं पदार्थोऽनुष्ठातव्य एतस्मै प्रयोजनायेति, किमसौ तथैव स्यान्नेति भवति विचारणा। यथा 'अष्टकाः कर्तव्याः' 'गुरुरुपगन्तव्यः' 'तटाकं खनितव्यम्' 'प्रपाः प्रवर्तयितव्याः' 'शिखाकर्म कर्तव्यम्' इति। अत्र प्राभाकरेण संगतिलोभात् इत्थमधिकरणमुपवर्णितम्— अत्र सर्वेषामेव स्मृतिवाक्यानां यथासंभवं विध्यर्थवादमन्त्रैकवाक्यता प्रतीयते। तथाहि 'आचान्तेन कर्म कर्तव्यम्' 'दक्षिणाचारेण कर्तव्यम्' 'यज्ञोपवीतिना कर्म कर्तव्यम्' इत्यादिस्मृतिवाक्यानां वेदविहितसकलकर्मोद्देशेन आचमनादिविधानात् सकलविध्युद्देशैकवाक्यत्वम्। तथा 'प्रपाः प्रवर्तयितव्याः' इत्यादिस्मृतिवाक्यस्य 'स्थलयोदकं परिगृह्णन्ति' इति प्रपास्तावकार्थवादेन आकाङ्क्षया योग्यतया वा एकवाक्यता। एवं अष्टकाकर्मणो रात्रिदेवतत्वात् 'अष्टकाः कर्तव्याः' इति स्मृतिवाक्यस्यापि अष्टकाकर्मप्रतिपादकस्य 'यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्। संवत्सरस्य या पत्नी, सा नो अस्तु सुमङ्गली॥' इति मन्त्रेण रात्रिरूपदेवताप्रकाशनेन आकाङ्क्षया योग्यतया

वा एकवाक्यत्वम् । **ननु** 'यदि रक्षोभ्यो बिभियादेतया निशि यजेत' इति प्रत्यक्षवेदविहितस्यैव निशीष्टिरूपकर्मणो रात्रिकाले विहितस्य विद्यमानत्वात् तत्र कालप्रकाशनेनैव निराकाङ्क्षस्य कथं स्मृत्येकवाक्यत्वम् । **नैतत्**, प्रतिनन्दन्तीति मन्त्रलिङ्गविरोधात् । देवतां हि जनाः पूजादिभिः प्रतिनन्दन्ति, न तु कालम् । दृष्टार्थत्वाच्च । देवताप्रकाशने हि अनुष्ठेयार्थत्वं भवति, कालस्य च अननुष्ठेयत्वाददृष्टार्थत्वम् । कार्यप्रत्यासत्तेश्च साक्षात् यागशरीरसंपादकत्वेन देवता कार्यप्रत्यासन्नतरा, न कालः । अतो मन्त्रस्य देवताभूतरात्रिप्रकाशनेन रात्रिदेवताकाष्टकाकर्मप्रतिपादकस्मृत्येकवाक्यत्वमेव । न चैवं सति नित्यानित्यसंयोगविरोधादसंबन्धः, स्मृतिपरम्पराया अपि प्रवाहनित्यत्वेन संबन्धोपपत्तेः । स्मृतिश्च निर्मूलत्वादप्रमाणम् । अतश्च तदेकवाक्यतापन्नस्य त्रिविधस्यैव वेदस्य अप्रामाण्यमिति पूर्वः पक्षः ।

सिद्धान्तस्तु— आप्ततराणां मन्वादीनां भ्रान्तिविप्रलम्भाद्यसंभवात् अतीन्द्रियार्थविषयत्वेन च प्रत्यक्षादिमूलत्वानुपपत्तेः पारिशेष्यात् अनुमानसिद्धं वेदमूलत्वमेव । स च वेदः सर्वशाखासु केनापि अनधीयमानत्वेन नित्यानुमेय एव । अतो वेदमूलत्वात् स्मृतीनां तदेकवाक्यत्वेऽपि त्रिविधस्य वेदस्य प्रामाण्यमेवेति । तदेतदसंबद्धम् । किमत्र पूर्वपक्षी मन्वादिवाक्येषु अपूर्वकार्याभिधानं स्वीकुरुते न वा ? न तावत् स्वीकुरुते । यो हि पुंवाक्येषु क्रियाकार्याभिधानमपि नानुमन्यते, स निर्मूलेषु मन्वादिपुरुषवाक्येषु वक्तृज्ञानानुमानेनापि अर्थाप्रतिपादकेषु अपूर्वकार्याभिधानं वदन् आत्ममनोयोगवियुक्त एव प्रतिभाति । अथ न स्वीकुरुते, तदा कथमाचमनादिस्मृतीनां अकार्यार्थानां कार्यार्थवैदिकवाक्यैकवाक्यत्वम् । कथं च प्रपाः प्रवर्तयितव्याः इति स्मृत्या सह स्तुतिद्वारेण 'स्थलयोदकं परिगृह्णन्ति' इत्यर्थवादस्यैकवाक्यत्वम् ? कथं च अष्टकास्मृत्या सह वैदिकमपि निशीष्टिविषयं कार्यं परित्यज्य अव्यवहितकार्यसंबन्धलोभेन देवताभूतरात्रिप्रकाशनेन 'यां जना' मत्रस्य एकवाक्यत्वम् । तस्मात् त्रिविधस्यापि वेदस्य स्मृत्येकवाक्यत्वाभावात् निर्मूलत्वेन स्मृतेरप्रामाण्येऽपि न वेदस्याप्रामाण्यमिति पूर्वपक्षस्तावदनुपपन्नः । तथा नित्यानुमेयवेदमूलत्वेन सिद्धान्तोऽपि हृदयशून्यस्यैवावभाति । न हि वर्णमात्रं पदमात्रं वा वेदः, किन्तु नियतस्वरानुपूर्वीक्रमपौरुषेयं वाक्यम्, तत्रैव वेदशब्दप्रयोगात् । न च अनुच्चार्यमाणस्य नित्यानुमेयस्य वाक्यस्य एवंरूपत्वं संभवति, स्वरक्रमादीनामुच्चारणाधीनत्वात् । अत एव लिङ्गानुमेयाऽपि श्रुतिर्न वेदः । किं तर्हि ? लिङ्गवत् मन्त्रानुमानात् वेदसमानता । तेन यत् यावत् श्रुतार्थापत्त्या कल्प्यते, तत् सकलमनुपपद्यमानशब्दभागाध्ययनस्यैव तात्पर्यम् । तस्माद्वेद इव वेदः, न तु वेद इति स्थितिः । अथवा भवतु यथातथाऽपि वेदत्वम्, तथापि पौरुषेयाद्वचनात् 'एवमयं पुरुषो वेद' इत्यनुमीयते । वक्तृधीहेतुनिश्चयाच्च अर्थनिश्चयः इति भवतो दर्शनम् । स्मृतिवाक्ये च अर्थनिश्चयाय वक्तृधीहेत्वनुसंधाने क्रियमाणे न साक्षादर्थसमर्पको वेदो लभ्यते, किन्तु प्राक्तनस्मृतिकारवाक्यमेव । तस्यापि वक्तृधीहेतुनिश्चयावधारणपूर्वकत्वात् अर्थनिश्चयस्य स्मृतिकारान्तरवाक्यम्, तस्याप्येवमित्यन्धपरम्परायां व्यवस्थाहेत्वभावात् अप्रामाण्यमेव सिद्धान्तेऽपि स्मृतीनामिति यथावार्तिकमेव अधिकरणं प्रस्तूयते इति । अत्र हि चोदनासूत्रे धर्मे वेदः एव प्रमाणमिति प्रतिज्ञातम् । इदानीं मन्वादिस्मृतिविहितानामष्टकादिकर्मणां धर्मत्वेन त्रैवर्णिकपरिगृहीतानां प्रमाणभूतवेदानुपलम्भात् न वेदप्रमाणकः कृत्स्नो धर्मः, इत्याशङ्कायां किमष्टकाऽऽदयो धर्मा एव न भवन्ति, अथवा स्मृतिमूलभूतो वेदोऽस्ति, ततश्च धर्मा एव इति चिन्त्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । न तावदत्र स्मृतिमूलभूतो वेदः अद्यतनैः नानाशाखाऽध्येतृभिरुपलभ्यते । न चैतास्वेव शाखासु अद्यतनैरनुपलभ्यमानो मन्वादिभिरुपलब्ध इति संभावयितुमपि शक्यते । न च अनन्तासु शाखासु उत्सन्नैवासौ शाखेति कल्पना उपपत्तिमती, प्रमाणाभावात् । न च वेदैकप्रमाणत्वमेव धर्मस्य स्मृतिमूलशाखोच्छेदकल्पनायां प्रमाणम्, इह अष्टकाऽऽदीनां धर्मत्वस्यैव विवादास्पदत्वेन एतदधिकरणप्रसाध्यत्वात् । नापि नित्यानुमेयवेदमूलत्वम्, तस्य वेदत्वासंभवेन पूर्वमेव दूषितत्वात् । नापि अनेकशाखाविप्रकीर्णवेदमूलत्वम्, पठ्यमानशाखासु तथाभूतवेदानुपलम्भात् ।

किञ्च तथा सति विप्रकीर्णवेदापन्यासेनैव निर्विचिकित्सत्रैवर्णिकव्यवहारसिद्धौ स्मृतिनिबन्धनप्रयासवैयर्थ्याच्च । तदुक्तम् '**येन यत्नेन मन्वाद्यैरात्मवाक्यं प्रपाठितम् । कस्मात्तेनैव तन्मूलं चोदना न समर्पिता ॥**' इति । (वा. पृ. १६३) । अतो धर्मस्य वेदशब्दैकमूलत्वात् अविद्यमानमूलभूतवेदशब्दं अष्टकाऽऽदिकं धर्मत्वेन अनपेक्षितव्यम्, न भवत्येव धर्मः इत्येवं प्राप्ते, अभिधीयते—

अपिवा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् । २ ॥

अयमभिप्रायः— सर्वथा तावत् सन्निबन्धना मन्वादिस्मृतयः पूर्वविज्ञानपूर्विकाः । तत्र न तावत् स्मृतेर्भ्रान्तिविज्ञानपूर्वकत्वं संभवति । भ्रान्तिर्हि कल्प्यमाना न्यायाभासनिबन्धना वा वक्तव्या, दुःश्रुतशब्दनिबन्धना वा । न च सकलन्यायतत्त्ववेदिषु षडङ्गसकलवेदाध्यायिषु तथाविधानेकमुनिजनोपास्यमानेषु तदुभयमपि संभवति । नापि प्रत्यक्षाद्यनुभवपूर्वकत्वम्, तेषामतीन्द्रियविषयत्वाभावात् । नापि स्मृत्यन्तरपूर्वकत्वम्, तस्यापि स्मृत्यन्तरापेक्षत्वेन अव्यवस्थया अन्धपरम्परान्यायवदप्रामाण्यात् । तदुक्तम् '**योयो गृहीतो जात्यन्धः स स्वयं नोपलब्धवान् । स्वातन्त्र्येणागृहीते च प्रामाण्यं नावतिष्ठते ॥**' इति । (वा. पृ. १६२) । नापि विप्रलम्भपूर्वकत्वम्, नहि एकान्तेन सकलवेदव्यवहारिभिराप्तत्वेन अवधारितेषु परमधार्मिकेषु वानप्रस्थव्रतचारिषु तथाविधानेकमुनिप्रश्नानन्तरं धर्मशास्त्रप्रणयनप्रवणेषु निष्कारणं विप्रलम्भार्थमभिधानं शङ्कापदमपि अधिरोहति, सर्वशब्दव्यवहारोच्छेदप्रसङ्गात् । स च विप्रलम्भः अद्यापि वेदवेदाङ्गविद्भिस्त्रैवर्णिकैः असंख्यातैः नावधार्यते इति गरीयसी कल्पना । तच्च कल्पनीयं यत्र विरोधो न भवति, अदृष्टान्तरकल्पनं च नापतति । अतो वेदकारणकमेव पूर्वविज्ञानस्मृतेर्मूलभूतमिति कल्पनीयम् । तदुक्तम्– '**भ्रान्तेरनुभवाच्चापि पुंवाक्याद् विप्रलम्भनात् । दृष्टानुगुण्यसामर्थ्यात् चोदनैव लघीयसी ॥**' इति ।(वा.पृ.१६३) । ननु योग्यानुपलम्भात् वेदोऽपि मूलं न भवतीत्युक्तम् । मैवम्, विप्रकीर्णनानाशाखागतत्वेन अद्यतनानामुपलम्भयोग्यताऽभावात् । नहि अर्वाचीनैः सर्वा वेदशाखा अधीयन्ते, अधीत्य च मीमांस्यन्ते, येन नानाशाखासु क्वचित्प्रधानं क्वचिदङ्गं प्रतीत्य मीमांसया निर्णीय संकलय्य 'इदमनेनेत्थं कुर्यात्' इति प्रत्येतुं शक्यते । शक्नुवन्ति तु साङ्गसमस्तवेदाध्यायिनः तपःप्रभावाहितविज्ञानातिशयशालिनः करतलामलकमिव सकलवेदार्थतत्त्वं निरीक्षमाणा महर्षयो मन्वादय एव । न च स एव वेदः स्मृतिमूलतः संकलय्य किमिति तैर्नाध्यापित इति वक्तव्यम्, क्रमान्यत्वेन स्वाध्यायविनाशप्रसङ्गात् । **किञ्च**, नहि सर्वाः स्मृतयो विधिनिषेधश्रुतिमूला एव, अर्थवादमूलानामपि दर्शनात् । तथाहि 'प्राची हि देवानां दिक्' इत्येतदर्थवादमूला स्मृतिः 'न प्रतीचीशिराः शयीत' इति । न च एवम्भूतार्थवादाध्ययनेऽपि एवम्भूतनिषेधोन्नयनं अद्यतनानां संभवति । तेन मन्दबुद्धीनां लोकानामनध्ययनं पश्यन्तः अधीतवेदानामपि प्रमादबाहुल्येन विस्मरणमाशङ्कमाना नानाशाखासु क्रत्वर्थपुरुषार्थविधिनिषेधसंकीर्णं तत्तद्वाक्यमधीत्य मीमांसानिरुक्तकल्पनादिभिर्निर्णीय संकलय्य जगदुपकृतये स्वकीर्तिख्यापनाय च स्वनिबन्धनैर्मन्वादय एव वेदार्थमुपदर्शितवन्त इत्येषैव कल्पना ज्यायसीति । तेन भाष्येऽपि यदुक्तम् 'अथेदानीं यत्र न वैदिकं शब्दमुपलभन्ते' (१।३।१।१ पृ. १५९) इति, तदिदानीन्तनपुरुषाभिप्रायम् । 'अथ च स्मरन्ति' इति मन्वाद्यभिप्रायमिति । **प्रयोजनम्**— यदि पूर्वपक्षः, तदा अष्टकादयो नानुष्ठेयाः । सिद्धान्ते त्वनुष्ठेया इति । **सूत्रं तु** — य एव वेदाध्ययनस्य कर्तारस्त एव स्मृतिनिबन्धनानां मन्वादयः । अतो वेदार्थज्ञानवतां तेषां स्मृतिमूलान्तरेण अनुपपद्यमाना सती श्रुतिमूलत्वमेव अर्थापत्त्या कल्पयतीति । अनुमानवाचोयुक्तिस्तु पश्चान्मानसाम्येनेति न किञ्चिदनुपपन्नमिति । **तौता.**

* धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् (१।३।१।१) । ननु प्रकरणाम्नानादङ्गमित्यवगम्यते, सामर्थ्याद्विनियोगः इति । नैतदस्ति, उक्तमेवैतत् 'धर्मस्य०' इति, यदेतत् प्रकरणं लिङ्गं च उभयमप्येतत् अशब्दम् । भा. ३।३।७।१४ पृ. ८४४.

* **धर्माणां** अग्नीषोमीयपशुगतनिर्मन्थ्यगतानां इष्टकापाकार्थनिर्मन्थ्ये, दर्शपूर्णमासगतबर्हिराज्यगतानां च यूपावटावस्तरणार्थबर्हिषि यूपाञ्जनाज्ये च, नातिदेशः। भा. ७।३।७।१८.

⧗ **धर्माणामङ्गप्रधानसाधारण्यं इति बर्हिर्न्यायस्यापवादः** 'विकृतौ सर्वार्थः शेषः प्रकृतित्वात्' (३।८।१९।३५) इति। सु. ३।७ पृ. ८२.

* धर्माणां अपूर्वमेव प्रयोजकं निमित्तं च। भा. ९।१।१।१ पृ. १६४१, * धर्माणां अविरुद्धानां समुच्चयो वैश्यस्तोमे कण्वरथंतरे बृहद्रथंतरयोः। ९।२।१६।४८, * धर्माणां एकाहकाण्डपठितज्योतिरादिगतानामतिदेशः गवामयनगतज्योतिरादिषु। ७।४।३।१३–२०, * धर्माणां ऐष्टिकानामतिदेशः सोमे न भवति। ८।१।३।३–१०, * धर्माणां दार्शपूर्णमासिकानामतिदेशः अग्नीषोमीये पशौ। ८।१।५।१२, * धर्माणां दार्शपूर्णमासिकानामतिदेशः ऐन्द्राग्नादिषु। ८।१।४।११, * धर्माणां देवताप्रयुक्तत्वाभावः। ९।१।४।६–१०, * धर्माणां बृहद्रथंतरगतानामविरुद्धानां कण्वरथंतरे समुच्चयः। ९।२।१६।४७, * धर्माणां बृहद्रथंतरगतानां उभयसामके संसवादौ प्रकृतिवत् व्यवस्था। ९।२।१७।४८, * धर्माणां यूपीयानाम् 'उपशयो यूपो भवति' इति यूपशब्देन एकादशिनीगते उपशयाख्ये यूपे नातिदेशः। ७।३।१३।३३–३४, * धर्माणां व्यवस्था बृहद्रथंतरयोः तत्तत्सामगानकाले ज्योतिष्टोमे। ९।२।१७।४५–४६.

* **धर्मे** अनुमानोपमानार्थापत्तीनामपि अकारणत्वं प्रत्यक्षपूर्वकत्वात्। भा. १।१।४।४. * धर्मे अर्थवादाः क्रियास्तुतिद्वारा प्रमाणम्। के. १।२।१।१–१८, * धर्मे अलौकिकेऽपि प्रसिद्धपदसमभिव्याहारेण विधिवाक्यस्थपदानां व्युत्पत्तिः संभवति। १।१।२।२. * धर्मे गम्ये गमकं विधिवाक्यं प्रमाणम्। वि. १।१।२. * 'धर्मे चार्थे च कामे च नातिचरितव्या' एवं दानकाले संवादः क्रियते। भा. ६।१।३।१४। एवं हि स्मरन्ति 'धर्मे चार्थे च कामे च नातिचरितव्या' इति तया सह धर्मश्चरितव्यः सहापत्यमुत्पादयितव्यमिति। भा. ६।१।४।१७, ६।८।२।१८. * 'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्॥' इति जनमेजयस्य भारतश्रवणप्रवृत्तिः सिद्धा। सु. पृ. ४०. * धर्मे चोदनैव प्रमाणम्। (तस्य ज्ञानमुपदेशः। १।१।५।५) तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य प्रत्यक्षादिभिरनधिगतस्य उपदेशः ज्ञापकः। भा. १।१।५।५ पृ. २३. * धर्मे पुरुषबुद्धेः न प्रवेशः। के. १।१।२।२. * धर्मे प्रत्यक्षादि अनिमित्तम्। भविष्यंश्चैषोऽर्थः (वैदिकः) न ज्ञानकालेऽस्तीति। सतश्चैतदुपलम्भनं (प्रत्यक्षेण) नासतः। अतः प्रत्यक्षमनिमित्तम्। प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानार्थापत्तीनामप्यकारणत्वम्। अभावोऽपि नास्ति। न ह्येवं सति (उपदेशे धर्मस्य निमित्ते सति) प्रत्ययान्तरमपेक्षितव्यं पुरुषान्तरं वापि। भा. १।१।४।४. * धर्मे प्रमाणानि विधि–अर्थवाद–मन्त्र–नामधेय–स्मृति–शिष्टाचाररूपाणि षट्। मणि. पृ. १३. * धर्मे प्रमाणपरीक्षा कर्तव्या, अन्यथा सम्यक् मीमांसा न स्यात्। के. १।१।३।३. * धर्मे प्रामाण्यपरीक्षाऽधिकरणम्। निमित्तपरीष्ट्यधिकरणम्। भा. १।१।३।३. * धर्मे वेदः प्रमाणम्। मणि. पृ. ११.

* **धर्माङ्गताबोधकानि** प्रमाणानि श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान–समाख्यारूपाणि षट्। मणि. पृ. १३.

* **धर्मातिक्रमे**। अवश्यं कर्तव्ये अन्यतरधर्मातिक्रमे गुणधर्मः अतिक्रमितव्यः, (न प्रधानधर्मः) तथाहि प्रधानं अविगुणं कृतं भवति। वा. ३।३।२।९ पृ. ८१०.

* **धर्मातिदेशः** अविहितेतिकर्तव्यताकेषु सौर्यादिषु। भा. ७।४।१।१. * धर्मातिदेशः कार्यप्राप्तिपुरःसरः इष्टः। वा. ३।८।१६।३२. * धर्मातिदेशः नैयमिकाग्निहोत्रस्य अग्निहोत्रनाम्ना कौण्डपायिनामयनगताग्निहोत्रे। भा. ७।३।१।१–४, * धर्मातिदेशः सादृश्यविशेषेण नियतप्रकृतितः। ८।१।२।२, * धर्मातिदेशः सौमिकावभृथनाम्ना वरुणप्रघासगतावभृथे। ७।३।४।१३–१६.

* **धर्मातिदेशकं** नास्ति प्रायणीयमिति नाम द्वादशाहप्रथमाहविषयकं गवामयनगतप्रथमेऽहनि प्रायणीये। भा. ७।३।२।५.

* **धर्माधर्मौ ।** अथ किं नाम धर्मत्वं अधर्मत्वं वा ? न तावत् विहितक्रियात्वं निषिद्धक्रियात्वं वा तत्, विहितनिषिद्धद्रव्यादौ तदनापत्तेः । नहि फलार्थगुणानुष्ठातॄणां यज्ञे रजताद्यनुष्ठातॄणां च धार्मिकः अधार्मिकः इति व्यवहाराभावः । तथात्वे इन्द्रियकामाद्यधिकरणादौ शास्त्रसंगत्यनापत्तेश्च । तस्य धर्मत्वाभावे तज्जन्यादृष्टस्य धर्मत्वाभावेन कीर्तननाश्यत्वानापत्तेश्च । नापि क्रियात्वरहितं तत्, विवाहार्थानृतवचनादौ अभ्यनुज्ञाविधिविषये धर्मत्वापत्तेः, षोडशिग्रहणे अधर्मत्वापत्तेश्च । **इति चेन्न** । वेदबोधितश्रेयःसाधनताकत्वं धर्मत्वम्, तद्बोधितानिष्टसाधनताकत्वं अधर्मत्वं इत्येव तल्लक्षणोपपत्तेः । ज्योतिष्टोमकलञ्जभक्षणादीनां हि इष्टानिष्टसाधनता वेदबोधिता इति तत्र लक्षणसमन्वयः । अत्र वेदबोधितत्वं ब्रह्मस्वर्गनरकादावपि इत्युत्तरदलम् । अन्नविषभक्षणादेः इष्टानिष्टसाधनत्वेऽपि तस्य वेदबोधितत्वाभावात् आद्यम् । श्येने च इष्टसाधनताया एव वेदबोधितत्वात् धर्मत्वमेव । अनिष्टजनकत्वं तु श्येनफलस्य वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्मकाभिचारस्यैव । तस्यैव च वेदबोधितानिष्टसाधनताकत्वात् अधर्मत्वं न तु श्येनस्य इति व्यक्तं चतुर्थे । यत्र तु 'वैरिमरणकामो यजेत' इत्येवं विधिः तत्रापि विधिना इष्टसाधनताबोधनात् यागादेर्धर्मत्वमेव । न च तत्र यागस्यैव मरणानुकूलव्यापारत्वेन हिंसात्वात् 'न हिंस्यात्' इति निषेधविषयत्वम्, निषेधस्य रागप्राप्तहिंसोपजीवनेनापि उपपत्तौ विहिते अप्रवृत्तेः । न चैवं तादृशास्थले श्येनवत् परंपरयाऽपि प्रत्यवायानुत्पत्तेः शिष्टानां तत्र निष्कम्पप्रवृत्त्यापत्तिः 'परस्योत्सादनार्थं यत् (वा) तत् तामसमुदाहृतम्' (भ. गी. १७।१९) इत्यादिवाक्यपर्यालोचनया अभिचारजनकश्येनवत् अभिचारस्यापि कर्मणस्तामसत्वेन निन्दितत्वात् तदुन्नीतनिषेधबलेन फलार्थे विहितस्यापि तस्य अनिष्टजनकत्वेन अधर्मत्वस्यापि सत्त्वात् तदनापत्तेः । अत एव धर्मत्वाधर्मत्वयोः उपाधिरूपत्वात् सांकर्येऽप्यदोषः । यत्तु धर्मलक्षणे बलवदनिष्टाननुबन्धित्वस्यापि प्रवेशात् श्येनादौ च तदभावात् न धर्मत्वमिति । **तन्न** । तत्प्रवेशे प्रयोजनाभावात्, अनिष्टगतद्वेषौत्कट्यरूपस्य बलवत्त्वस्य प्राचीनकर्माधीनतया उक्तविधाननुबन्धित्वस्य श्येनेऽपि कदाचित् संभवाच्च । इतरथा श्येने सामग्र्यभावेन प्रवृत्त्यनापत्तेः । किञ्च श्येनादौ धर्मत्वाभावे तामसधर्मत्वकथनानुपपत्तिः । अतः उक्तलक्षणयोः युक्तस्तत्रापि समन्वयः । अभ्यनुज्ञाविधिना च दोषाभावमात्रस्यैव आक्षेपात् इष्टसाधनताऽनाक्षेपेण रागप्राप्तेष्टसाधनताकस्यापि अनृतवदनस्य वेदबोधितेष्टसाधनताकत्वाभावात् न धर्मत्वापत्तिः । षोडशिग्रहणे च निषेधेन नानिष्टसाधनताऽऽक्षेपः प्रमाणाभावात् गौरवाच्च । अपितु एतदभावेऽपि इतराङ्गैः क्रतुमहोपकारसिद्धिमात्रस्यैव तावन्मात्रेणैव पुरुषस्य निवृत्त्युपपत्तेः । अत एव तत्र प्रवृत्त्यर्थं विधिना फलाधिक्याक्षेपः । अतः तत्रापि नाधर्मत्वापत्तिः । वेदबोध्यत्वं च वेदातिरिक्तप्रमाणेन स्वातन्त्र्येण अबोध्यत्वे सति वेदबोध्यत्वम् । तेन तत्त्वसाक्षात्काररूपब्रह्मज्ञानस्य ब्रह्मविषयकसविलासाज्ञाननिवृत्तिरूपमोक्षजनकत्वस्य प्रमाणान्तरसिद्धस्य उपनिषद्बोध्यत्वेऽपि न तस्य धर्मत्वापत्तिः । यदाऽपि प्रपञ्चस्य सत्यत्वेन नाज्ञानकार्यत्वम्, मोक्षश्च एकविंशतिदुःखध्वंसादिरूपः तत्त्वज्ञानजन्यः इति मतमपि प्रामाणिकम्, तदा मोक्षजनकत्वस्य प्रमाणान्तरागम्यत्वात् तत्र धर्मत्वपरिहारार्थं वेदबोधितत्वं विहाय विधिबोधितत्वं देयम् । ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन प्रवर्तनाविषयत्वाभावात् न विधिबोध्यत्वम् । वस्तुतस्तु 'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इत्यादौ ज्ञानेऽपि धर्मशब्दप्रयोगात् तस्य धर्मत्वेऽपि न क्षतिः । न च तत्रत्यदर्शनशब्दो ध्यानपरः लक्षणायां प्रमाणाभावात्, ध्याने चित्तवृत्तिनिरोधरूपमुख्ययोगजन्यत्वासंभवाच्च । उपासनादिवच्च ज्ञानस्य धर्मत्वेऽपि ब्रह्मणो वेदबोधितश्रेयस्त्वावच्छिन्नसाधनताकत्वाभावेन धर्मत्वाभावात् धर्ममीमांसातो ब्रह्ममीमांसाया भेदोपपत्तिः । अस्तु वा ब्रह्मणि धर्मलक्षणस्य अतिव्याप्तिपरिहारार्थं पुरुषकृतिव्याप्यत्वं वेदबोधितश्रेयःसाधनताकत्वविशेषणम् । गुणस्यापि च आश्रयविशिष्टस्य कृतिव्याप्यत्वात् नाव्याप्तिः । ज्ञानस्यापि च स्वरूपेण कृतिव्याप्यत्वाभावेऽपि सम्यग्जरणादिवत् तदनुकूलमनःप्रणिधानादेः कृतिव्याप्यत्वेन परंपरया तदाविष्टस्य कृतिव्याप्यत्वोपपत्तेः नाव्याप्तिः । अत एव 'आत्मा वा अरे

द्रष्टव्यः' इति विधिप्रत्ययोऽपि एतदभिप्रायकः इत्यपि एतन्मते सुवचम्। असाधारणी वा कारणता लक्षणे प्रवेशनीया, तत्तल्लक्षणमेव धर्माधर्मपदशक्यताऽवच्छेदकम्। तस्य च क्रियातज्जन्यादृष्टसाधारण्येन एकयैव शक्त्या धर्माधर्मशब्दौ क्रियातज्जन्यादृष्टपरौ इति संक्षेपः। **रहस्य.** पृ, १-३.

* धर्माधर्मौ अदृष्टविशेषात्मकौ, न क्रियारूपौ। अत एव 'धर्मः क्षरति कीर्तनात्' इत्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धर्माधर्मशब्दस्य प्रयोगः, तथापि 'धर्मः स्वनुष्ठितः पुंसाम्' (विष्वक्सेनकथासु यः। नोत्पादयेद् यदि रतिं श्रम एव हि केवलः॥) इत्यादौ तज्जनकविहितनिषिद्धक्रियायामपि धर्माधर्मशब्दप्रयोगः। **रहस्य.** पृ. १, * धर्माधर्मौ द्वादशलक्षण्यां जैमिनिना अनुष्ठानोपयोगितया विचारितौ। पृ. १. * **धर्माधर्मयोः** अन्तःकरणवृत्तित्वात्। **शा.** १।१।५।५ पृ. ११४ पं. ३. * धर्माधर्मयोः विधि-अर्थवाद-मन्त्र-स्मृति-आचार-नामधेय-वाक्यशेष-सामर्थ्यरूपाणि अष्टौ प्रमाणानि प्रथमाध्याये निरूपितानि। **भाट्ट.** १।४।२०.

⌛ **धर्माधर्मग्रहणन्यायः।** व्यवहारे दिव्यविशेषोऽयम्। **संग्रहः.**। अत्र मिताक्षरा (याज्ञ. २।११३) धर्माधर्माख्यदिव्यविधिः पितामहेनोक्तः-'राजतं कारयेद् धर्ममधर्मं सीसकायसम्' इति प्रतिमाविधानम्। सीसकं वा आयसं वेति विकल्पः। पक्षान्तरमाह-'लिखेद् भूर्जे पटे वाऽपि धर्माधर्मौ सितासितौ। अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्॥ सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पधृक्। एवं विधायोपलिख्य पिण्डयोस्तौ निधापयेत्॥ गोमयेन मृदा वाऽपि पिण्डौ कार्यौ समं ततः। मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ (अभियुक्तेन अनुपलक्षितौ)॥ उपलिप्ते शुचौ देशे देवब्राह्मणसंनिधौ। आवाहयेत् ततो देवान् लोकपालांश्च पूर्ववत्॥ धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्।' (एतावत् सर्वं प्राड्विवाकेन कर्तव्यम्)। ततः अभिशस्तः अभिमन्त्रयेत् 'यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे। अशुद्धश्चेन्मम करे पाप आयातु धर्मतः॥' 'अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः। धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते॥ एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम्॥' इति।

* **धर्माधर्मत्वं** निःश्रेयसप्रत्यवायलक्षणम्। **बृहती.** पृ. २७.

* **धर्मार्थं** सेवकस्य शूद्रस्य विश्वजिति न देयत्वम्। **भा.** ६।७।५।६.

* **धर्मजिज्ञासा** इति 'धर्मशब्दः वेदार्थमात्रपरः'। **ऋजु.** पृ. १६. * धर्मजिज्ञासा 'को धर्मः कथंलक्षणः, कान्यस्य साधनानि, कान्यस्य साधनाभासानि, किंपरश्च' इति चतुर्विधा प्रथमसूत्रेण उपक्षिप्ता। सु. पृ. ५३५. * धर्मजिज्ञासा। धर्माय जिज्ञासा धर्मजिज्ञासा। धर्मज्ञानस्य धर्मार्थत्वात् धर्मस्यापि इच्छां प्रति प्राधान्यम्। अतो धर्मार्था जिज्ञासा। एवं च तादर्थ्यस्य प्रतीयमानत्वात् चतुर्थीसमास एवायम्। **ऋजु.** पृ. १३, * धर्मजिज्ञासा प्रारभ्यते, तत्त्वेन अपरिज्ञातोऽर्थः अनुष्ठीयमानोऽपि विहन्ति अनुष्ठातारं अधिकारसिद्धिं न प्रापयति। ज्ञात्वा च अनुष्ठितो निःश्रेयसेन अधिकारिणं योजयति इति। पृ. १५.

* **धर्मजिज्ञासाऽधिकरणं** अथातो धर्मजिज्ञासा इति। **भा.** १।१।१।१.

* **धर्मज्ञानं** शास्त्रात् स्वरूपप्रमाणसाधनप्रयोजनविचारद्वारेण। **मणि.** पृ. ५, * **धर्मज्ञानाय** शास्त्रमारम्भणीयम्। पृ. ५, * **धर्मज्ञानस्य** सामान्यतो जातस्य विशेषधर्मप्रकारकज्ञानेच्छाहेतुत्वम्। 'धर्मेण पापमपनुदति' इति वाक्येन सामान्यतो धर्मज्ञाने तदुत्तरं तदनुव्यवसाये धर्मज्ञानत्वसामान्यप्रत्यासत्त्या सकलधर्मज्ञानज्ञानम्, ततः तद्विषयकेच्छा इति क्रमेण सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकेच्छाप्रयोजकम्। सा चेच्छा सप्रमाणकं धर्मज्ञानं जायतां इत्याद्याकारिका तादृशेष्टसाधनताज्ञानजन्या च। तादृशज्ञानं च धर्मज्ञानत्वसामान्यलक्षणप्रत्यासत्त्या इति। पृ. २.

* **धर्मत्वं** न तावत् यागापूर्वोभयनिष्ठा जातिः, यागस्य क्रियेच्छाऽन्यतररूपतया क्रियात्वेन इच्छात्वेन च संकरात्। अतः अपूर्वनिष्ठैव सुखकारणताऽवच्छेदिका धर्मत्वं जातिः इति **नैयायिकाः**। अपूर्वमजानतामपि

यागादिकर्तरि धार्मिकोऽयं इति प्रयोगात् वेदबोधितेष्टसाधनत्वरूपः यागापूर्वोभयनिष्ठोपाधिरेव धर्मत्वं इति केचित् । वस्तुतस्तु अलौकिकश्रेयःसाधनत्वेन विहितक्रियात्वं विहितत्वं वा धर्मत्वम् । सोमादिषु अङ्गत्वेन विहितेषु अतिव्याप्तिवारणाय तृतीयान्तम् । अलौकिकत्वं च वेदतदुपजीविप्रमाणातिरिक्तप्रमाणागम्यत्वे सति प्रमितिविषयत्वम् । अनिष्टसाधनकलञ्जभक्षणादौ व्यभिचारवारणाय श्रेयःपदम् । अपूर्वे व्यभिचारवारणाय विहितेति । फलसाधनत्वेन विहितक्रियाद्रव्यगुणादीनां धर्मत्वम् । श्येनेऽपि हिंसात्वाभावात् धर्मत्वापत्तिरिष्टा । विवाहाद्यर्थमिथ्यावादस्य विधेयत्वेऽपि धर्मत्वं नास्ति, तस्य विवाहादिमात्रसाधनतया अलौकिकत्वाभावात् । उपनिषज्जन्यात्मज्ञानस्य अविद्यानिवृत्तिद्वारा मोक्षजनकस्य प्रमाणान्तरप्राप्तत्वात् न धर्मत्वम् । अस्तु वा तत्र धर्मत्वम् । मणि. पृ. ७–९. * धर्मत्वं निःश्रेयसहेतुत्वेनोक्तम् । अर्थत्वेन चोदनालक्षणं इत्युक्तम् । ऋजु. पृ. २७. * धर्मत्वं प्रवर्तकवेदवाक्यबोधितश्रेयःसाधनताकत्वम् । कु. १।१।२।२ । अलौकिकश्रेयःसाधनताकत्वमेव हि धर्मस्वरूपम् । १।१।२।४.

⧗ **धर्मधर्मिविरोधे च धर्मिणो बलवत्तराः इति न्यायेन** (वा. १।३।३।५) आचमनादीनां बलवत्त्वावगतेः । कौ. १।३।३।६ पृ. ३२.

* **धर्मप्रणिहितमनसो** रागाद्ययोगः । सु. पृ. १३९०.

* **धर्मप्रमाणानि** विध्यर्थवादमन्त्रनामधेयस्मृतिशिष्टाचाररूपाणि षट् । मणि. पृ. १३.

* **धर्मप्रमाणपरीक्षा** कर्तव्या । वि. १।१।३.

* **धर्मप्राप्तिः** (अङ्गप्राप्तिः) उपमानेन यत्र सादृश्यम्, तत्र धर्माः प्राप्यन्ते, असति सादृश्ये नास्ति धर्मप्राप्तिः । टुप्. ८।१।२।२ पृ. १५८५, * धर्मप्राप्तिः सर्वास्वेव विकृतिषु उपमानेन । १०।४।१।१ पृ. १९०७, * धर्मप्राप्तिः सादृश्यात् भवति, अलौकिकत्वात् धर्माणाम् । ९।१।५।९ पृ. १६५६. * **धर्मप्राप्तौ** साधनत्वमात्रं तन्त्रम्, न तु वाचनिकत्वम् । सोम. ९।२।१४.

* **धर्मभेदाच्च** संज्ञाव्यवस्था यथा ब्राह्मणः, परिव्राट्, वानप्रस्थः इति । भा. ८।२।५।२४, * धर्मभेदाच्च सत्रं अहीन इति संज्ञाव्यवस्था । ८।२।५।२४.

* **धर्मभेदकानि** प्रमाणानि शब्दान्तर–अभ्यास–संख्या–नाम–गुण–प्रकरणान्तराणि इति षट् । मणि. पृ. १३. (तत्र यजति–ददाति–जुहोति इति शब्दान्तरेण कर्मभेदः । २।२।१, ‘समिधो यजति, तनूनपातं यजति’ इत्यादि यजतिपदस्य अभ्यासेन प्रयाजभेदः । २।२।२, ‘तिस्र आहुतीर्जुहोति’ इति संख्यया कर्मभेदः । २।२।७, ‘अथैष ज्योतिः, अथैष विश्वज्योतिः, अथैष सर्वज्योतिः’ इति नामभेदेन (संज्ञाभेदेन) कर्मभेदः । २।२।८, ‘सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्’ इति गुणभेदेन कर्मभेदः । २।२।९, नित्याग्निहोत्रात् मासाग्निहोत्रस्य प्रकरणान्तरेण भेदः । २।३।११ । इति विस्तरे तत्रतत्र द्रष्टव्यम् । के.)

⧗ **धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् । ११।१।६।२८॥**

अग्निचयने ‘औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वाऽवहन्ति अत्र तदुपदधाति’ इत्यनेनोक्ते धर्ममात्रे अदृष्टमात्रफलके अवहनने तु दृष्टस्य तण्डुलनिष्पत्त्यादेः फलस्य अदर्शनात् शब्दार्थेन सकृत्कृतेनैव अपवर्गः समाप्तिः विरामः स्यात् । तस्मात् सर्वौषधावघातस्य नाभ्यासः इति सिद्धान्तः । तुशब्दः पूर्वाधिकरणोक्तात् तण्डुलनिष्पत्तिपर्यन्तमावर्त्यमानात् व्रीह्यवघातात् वैषम्यमाह । के.

* ‘धर्ममात्रे त्वदर्शनात् शब्दार्थेनापवर्गः स्यात्’ (११।१।६।२८) इत्यधिकरणे ‘औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वाऽवहन्ति अथैनदुपदधाति’ इत्यवघातस्य तण्डुलसाध्यपुरोडाशादिप्रयोजनाभावात् अदृष्टार्थत्वात् सकृदनुष्ठानं वक्ष्यते । सु. पृ. ६२६. * ‘धर्ममात्रे त्वदर्शनात् शब्दार्थेनापवर्गः स्यात्’ इत्यनेन न्यायेन (प्रयाजानां) सकृत्प्रयोगः प्राप्तः । भाष्यसंक्षेपः ११।१।७।२९.

⧗ धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् । २।१।४।९ ॥

‘ स्रुचः संमार्ष्टि ’ ‘ अग्निं संमार्ष्टि ’ ‘ पुरोडाशं पर्यग्नि करोति ’ इति श्रुतं संमार्जनं पर्यग्निकरणं च प्रधानकर्म गुणकर्म वा इति विचारे पूर्वपक्षमाह । धर्ममात्रे संमार्गपर्यग्निकरणादिरूपे सर्वस्मिन् कर्मणि कर्म स्यात् प्रधानकर्मत्वं स्यात् । दृष्टस्योपकारस्य अनिर्वृत्तेः । दृष्टोपकारकत्वं गुणकर्मलक्षणम्, तदत्र नास्ति इति संमार्गादीनां प्रधानकर्मत्वं स्यात् । प्रयाजवत् । यथा प्रयाजाः प्रधानकर्म दृष्टोपकारकत्वाभावात् तद्वत् ।

तुल्यश्रुतित्वाद्वेतरैः सधर्म स्यात् । १० ॥

पूर्वपक्षं वाशब्देन परिहरन् सिद्धान्तमाह । संमार्गादि धर्मजातं इतरैः अवघातादिभिः गुणकर्मभिः सधर्म समानधर्मकं स्यात् । गुणकर्मत्वमित्यर्थः । तुल्यश्रुतित्वात् यथा ‘ व्रीहीनवहन्ति ’ इति द्वितीयाश्रुतिः ईप्सिततमत्वार्था, तथा ‘ स्रुचः संमार्ष्टि ’ ‘ पुरोडाशं पर्यग्नि करोति ’ इयमपि द्वितीया । ईप्सिततमत्वाच्च संमार्गादि धर्मजातं गुणकमव, व्रीहिस्रुगादि द्रव्यं च प्रधानभूतं संस्कार्यत्वात् । इति सिद्धान्तः । अत्र सधर्मः सधर्मा इति पाठौ अन्यत्र । तथापि अनिच्प्रत्ययान्तः य—कु—गतः नपुंसकपाठ एव साधीयान् ।

द्रव्योपदेश इति चेत् । ११ ॥

पूर्वपक्षी आह । गुणभूतद्रव्योपदेशेऽपि ‘ सक्तून् जुहोति ’ इत्यादौ द्वितीयानिर्देशो दृश्यते । तथा स्रुचः पुरोडाशं इत्यादौ द्वितीयया निर्देशेऽपि गुणभूतत्वं स्यात्, ततश्च संमार्गादेः प्रधानकर्मत्वम् ।

‘अनैकान्तिकी च प्राधान्ये द्वितीया गुणभूतद्रव्योपदेशेऽपि दृष्टत्वात् सक्तून् जुहोति इति’ इति वार्तिकात् द्रव्योपदेशे इति सप्तम्यन्तं पदम् । ‘सक्तुद्रव्यस्य होमं प्रति साधनत्वेन गुणभूतस्य द्वितीयया उपदेशः कथम्’ इति कुतूहलात्तु द्रव्योपदेशः इति प्रथमान्तं पदम् । सुबोधिनीवृत्तेः कस्तूरिवृत्तेश्च प्रथमान्तमेव ।

न, तदर्थत्वाल्लोकवत्, तस्य च शेषभूतत्वात् । १२ ॥

‘सक्तून् जुहोति’ इति द्वितीया गुणभूतद्रव्योपदेशेऽपि दृश्यते इति यदुक्तं पूर्वपक्षिणा तन्न । सक्तूनां तदर्थत्वात् होमार्थत्वात् गुणभूतत्वं इति सत्यम् । द्वितीया तु तत्र लक्षणया करणत्वमाह इति द्वितीया न गुणभूते । तस्य स्रुक्पुरोडाशादेः शेषभूतत्वात् अदृष्टोपकारविशिष्टत्वेन संमार्गपर्यग्निकरणादिसाध्यत्वात् तत्र द्वितीया प्राधान्यमेव बोधयति । अदृष्टोऽपि संस्कारोऽस्तीत्यवगम्यते । लोकवत् । लोके यथा ग्रामान्तरादागतानां पुरुषाणां पर्यग्निकरणेन अदृष्ट उपकारः क्रियते इत्युच्यते तद्वत् । तस्मात् संमार्जनपर्यग्निकरणादि गुणकर्म, न प्रधानकर्म इति सिद्धान्तः । के.

⧗ धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् । २।१।४।९ ॥

‘ स्रुचः संमार्ष्टि ’ ‘ परिधीन् संमार्ष्टि ’ ‘ अग्नीन् संमार्ष्टि ’ ‘ पुरोडाशं पर्यग्नि करोति ’ इति श्रूयते । तत्र संदेहः किं पर्यग्निकरणं संमार्जनं च प्रधानकर्म, उत गुणकर्मेति । पूर्वाधिकरणे ‘ तानि द्वैधम् ’ इत्यभिधाय प्रधानकर्मगुणकर्मलक्षणं सूत्रद्वयेनोक्तम् । इदानीं क्वचित् विषयविशेषे संमार्गादौ प्रधानकर्मापवादः क्रियते । तत्रायं पूर्वपक्षिणोऽभिसंधिः । ‘यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात्’ इति प्रधानकर्मलक्षणमुक्तम् । न च स्रुगादिषु संमार्गादिजन्यचिकीर्षितो विध्यपेक्षितः कश्चिदुपकारो दृश्यते । अतो ‘ द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः ’ तथा ‘ भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते ’ इति न्यायेन स्रुगादिद्रव्याणामेव संमार्गादिरूपकर्मार्थत्वात् प्रयाजादिवत् प्रधानकर्मत्वमेवेति । **ननु** मा नाम अवहन्त्यादिवत् प्रमाणान्तरेण द्रव्यगतं चिकीर्षितमवगम्यताम्, तथापि द्वितीयाश्रुतिरेव ईप्सिततमार्थाभिधायिनी स्रुगादिगतमदृष्टं चिकीर्षितमवगमयिष्यतीति । **मैवम्**, स्यादेवं यदि द्वितीया ईप्सिततमत्ववाचिनी भवेत् । सा तु ‘ सक्तून् जुहोति ’ इत्यादिषु व्यभिचरतीति पूर्वाधिकरणे एवोक्तम्, तथापि स्मरणमपि ईप्सितानीप्सितसाधारणम् । तथाहि ‘ कर्तुरीप्सिततमं कर्म ’ (पा. १।४।४९) इति स्मर्यते ‘ तथायुक्तं चानीप्सितम् ’ (पा. १।४।५०) इत्यपि । तेन क्रियाजन्यत्वमेव

सर्वत्राव्यभिचारात् द्वितीयाऽर्थः । तत्प्रधानकर्मत्वेऽपि अविरुद्धमेव । ननु वाक्यान्तरक्लृप्तप्रयोजनमत्र स्रुगादिद्रव्यम्, अक्लृप्तप्रयोजनं च संमार्गादि कर्म । क्लृप्तप्रयोजनयोश्च संबन्धः, क्लृप्तप्रयोजनार्थत्वेनैव अक्लृप्तप्रयोजनं विधीयते इति युक्तम् । 'अपेक्षितविधेरनपेक्षितविधानं दुर्बलम्' इति न्यायेन दृष्टोपकाराभावेऽपि द्वितीयाया ईप्सिततमाभिधानमपि उक्तन्यायादेव क्लृप्तप्रयोजनस्रुगादिद्रव्यार्थत्वात् संमार्गादीनां (न) गुणकर्मत्वं संभवतीति । उच्यते, स्यादेवं यदि अक्लृप्ताधिकरणं विधिरनुमन्यते । स हि स्वरसतः साध्यस्य साधनमितिकर्तव्यतां च आकाङ्क्षत् तदुपायभूतं द्रव्यादिकमपि आकाङ्क्षति, तेन विना तदसिद्धेः । यत्तु द्रव्यगतं संस्कारादिकं दृष्टार्थद्रव्याकाङ्क्षया संबध्यमानं तदपि आकाङ्क्षोत्थापनेन अनुमन्यते । न च 'स्रुचः संमार्ष्टि' इत्यादिषु स्रुगादीनां व्रीहीणामिव दृष्टोपकारार्थमवघातादिषु संमार्गादिष्वपि अपेक्षा समस्ति । न च द्वितीयाश्रुतिबलेनैव स्रुगादीनां संमार्गादिषु आकाङ्क्षोत्थापनेन आकाङ्क्षया चाधिकारविधेरपि आकाङ्क्षोत्थापनेन अनुमतिरिति वक्तव्यम् । द्वितीयाश्रुतेः ईप्सितानीप्सितसाधारणत्वेन संमार्गस्य संस्कारकर्मत्वे प्रमाणाभावस्योक्तत्वात् । अतः सर्वथा संमार्गादीनां स्रुगादिपदार्थत्वे प्रमाणाभावात् द्रव्यचिकीर्षाऽभावेन धर्ममात्रमेवञ्जातीयकं संमार्गादि प्रयाजादिवत् प्रधानकर्मत्वेनैव विधीयते । इत्येवं प्राप्ते, अभिधीयते ।

तुल्यश्रुतित्वाद्वेतरैः सधर्म स्यात् । १० ॥

अयमभिप्रायः । भवेदेवं यद्यत्र द्वितीयाश्रुतिसमभिव्याहृतसंमार्गादिक्रियाऽपेक्षं स्रुगादि प्राधान्यं नाभिदध्यात् । सा हि 'कर्तुरीप्सिततमं कर्म' इत्यनुशासनात् 'ओदनं पचति' 'कटं करोति' इत्यादिप्रयोगदर्शनाच्च ईप्सिततमत्वलक्षणं स्रुगादीनां प्राधान्यमेवाभिधत्ते । तथा च सति विधेः सामान्येन अप्रतिपन्नशेषभावादीनां संमार्गादीनां स्रुगादिसमभिव्याहृतानां स्रुगादिगतमेव शेषित्वं वोधयतीति गुणकर्मत्वे द्वितीयाश्रुतिरेव प्रमाणमिति । ननु 'सक्तून् जुहोति' इत्यादिषु द्वितीया ईप्सिततमत्वलक्षणं प्राधान्यं व्यभिचरतीत्युक्तम् । मैवम् । तत्रापि ईप्सिततमत्वरूपप्राधान्याव्यभिचारात् । यत्तु करणत्वरूपं गुणत्वम्, तल्लाक्षणिकमेव । तदुक्तम् 'प्राधान्यमेव तत्रापि द्वितीया वदति स्वतः । विरोधात् तेन संबन्धो गुणभावस्तु लक्ष्यते ॥' इति । (वा. पृ. ४१०) । ननु मुख्यानभिधाने लक्षणा भवति । तदुक्तम् 'अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते ॥' इति । (वा. पृ. ३५४) । कथं पुनः सक्तुप्राधान्यं विरुध्यते, येन विरोधाद् गुणभावो लक्षणीयः । उच्यते, यस्य क्वचिदुपयोगो निर्वृत्तो भविष्यतीति अवधार्यते, तत्संस्कारार्थत्वात् कर्मप्राधान्यं प्रतिपद्यते । न च सक्तूनां भूतभाव्युपयोगः । तदुक्तम् 'भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते । सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित् ॥' इति । (वा. पृ. ४११) । अतो गुणभावलक्षणया सक्तुसाधनकहोमविधानमेवैतत् इति सिद्धम् । सा च लक्षणा मुख्यार्थतात्पर्यानुपपत्त्या भवति । इह मुख्यार्थपरत्वस्यैव असंभवाल्लक्षणेति । तेन ईप्सिततमत्वरूपप्राधान्याभिधायिद्वितीयाबलेन गुणकर्मत्वमेव संमार्गादीनामिति । ननु कर्मणि द्वितीया स्मर्यते । कर्मत्वं तु यथा ईप्सिततमस्य, तथा अनीप्सितस्याप्यविशिष्टम्, 'तथायुक्तं चानीप्सितम्' (पा. १।४।५०) इत्याद्यनुशासनाविशेषात् । अतः कथमीप्सिततमत्वमेव द्वितीयार्थः इति । उच्यते– न ह्यलौकिकं कर्मत्वरूपमत्र पाणिनिना अभिहितम्, किन्तु क्रियते इति व्युत्पत्त्या मनिप्रत्ययतोऽयं कर्मशब्दः । चेतनेन च तदेव क्रियते यदीप्सिततमम्, इच्छापूर्वकत्वात् क्रियायाः । अतस्तदेव मुख्यं कर्म । तेनोक्तम् 'कर्तुरीप्सिततमं कर्म' इति । अन्येषां तु अनीप्सितादीनां क्रियाव्याप्यत्वमात्रपरोऽयं कर्मशब्दो द्वितीयाप्रयोगार्थमेव पाणिनिना प्रयुक्तः इति विवेक्तव्यम् । अतः सिद्धं संमार्गादीनां गुणकर्मत्वमिति ।

यत्तु प्रभाकरेण ईप्सितानीप्सितसाधारणं क्रियाजन्यफलभागित्वमेव कर्मत्वं तदेव च द्वितीयाऽर्थ इत्युक्तम् । तत्र अपादानस्यापि विभागलक्षणस्य क्रियाजन्यफलभागित्वेन कर्मत्वप्रसङ्गः । अथ मतम्, चतुर्विधं हि कर्म उत्पाद्यम्, प्राप्तव्यम्, विकार्यम्, संस्कार्यं चेति । अतो नान्यत् कर्मत्वम्, किन्तु उत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपफलचतुष्टयभागित्वमेव । तदयुक्तम्, 'गां दोग्धि

गोपालकः' इत्यत्र उक्तोत्पत्त्याद्यन्यतमफलभागित्वाभावात् गोरकर्मत्वप्रसङ्गात् । तस्याश्च कर्मत्वम् 'अकथितं च' (पा० १।४।५१) इत्यनेन सूत्रेण सूत्रितम् । अथ दोहे दुग्धयुक्तावस्थाऽभावेन दुग्धवियुक्तावस्थाऽऽपत्त्या विकारकर्मत्वमेव गोरित्युच्यते, तर्हि 'नगराद्ग्रामं राजा गच्छति' इत्यत्रापि राजवियुक्तावस्थाऽऽपत्त्या नगरस्यापि कर्मत्वात् अपादानत्वं न स्यादिति यत्किञ्चिदेतत् ।

अत्र संमार्गस्य प्रधानकर्मत्वे गुणकर्मत्वे च अनुष्ठानाविशेषात् प्रकृतौ विचारप्रयोजनस्यादर्शनात् **भाष्यकारेण** विकृतौ वरुणप्रघासे प्रयोजनमुक्तम् । तत्र 'शमीमय्यः स्रुचो भवन्ति' इति विधीयमाना शमी प्रकरणेन प्रधानीभूतवरुणप्रघासार्था । तद्यदि प्रधानकर्मत्वं संमार्गस्य तदा तदर्थं प्रकृतिवत् नानावृक्षीया एव स्रुचः उत्पादयितव्याः, प्रधानाङ्गानामङ्गद्रव्याबाधकत्वात् । गुणकर्मत्वे तु प्रधानगृहीतानां शमीमयीनामेव कार्योपयोगात् तासामेव संमार्ग इति । तदेतत् वार्तिककारपादा नानुमन्यन्ते । अयं च तेषामभिसन्धिः, यथा 'बर्हिषि हवींष्यासादयति' इति प्रकृतौ प्रकरणेन प्रधानसंबन्धिना साङ्गप्रधानहविरासादनार्थम्, तथात्रापि स्रुङ्मात्रानुवादेन विधीयमाना शमी पूर्वपक्षेऽपि अङ्गप्रधानार्थैवेति । तदुक्तम् **'स्रुङ्मात्रमनुवादेन शमीमय्यादि चोदितम् । ज्ञायतेऽङ्गप्रधानार्थं पूर्वसिद्धान्तपक्षयोः ॥'** इति । (वा. पृ.४१३) । अथ प्रकृतावयं न्यायः, विकृतौ तु प्रधानमात्रसंगतिरेव अङ्गानाम्, तदा प्रयाजादिस्रुचामपि प्राकृतनानाजात्युत्पादनप्रसङ्गः । तदुक्तम् **'यदि प्रधानमात्रेण शमीमय्यादिसंगतिः। प्राकृत्यस्तु प्रसज्यन्ते प्रयाजादेः स्रुचस्ततः ॥'** इति । (वा.पृ.४१४) । किञ्च यदि प्रधानस्रुङ्मात्रसंबन्धोऽपि शम्या भवेत् तथापि यथा सौमिकी त्रिंशद्धस्तपरिमाणा महावेदिः अतिदेशप्राप्तदीक्षणीयादिसंबद्धदार्शपौर्णमासिकचतुर्हस्तवेदिकार्ये परिमाणानादरेण प्रसङ्गेन साधयति, तथा प्रधानार्थोपात्तशमीमयस्रुग्भिरेव जातिमनादृत्य आतिदेशिकनानावृक्षीयस्रुक्कार्यसिद्धेर्न तदर्थं नानावृक्षीयस्रुगुपादानमिति । अत्रैके समाधानमेवमभिदधति, सर्वत्र खलु अङ्गानां करणोपकारसंबन्धद्वारकार्ये अङ्गविधानं संभवति, तत्तु अपूर्वीयनिरूढकार्यत्वात् संनिहितपदार्थाश्रयत्वेनैवं अङ्गविधिर्व्यवतिष्ठते । विकृतौ तु प्रकृतिक्लृप्तकरणोपकारसंबन्धद्वारकार्यस्य अतिदेशप्राप्तत्वात्, इतरथा प्रकृतिवत् विकृतावपि तस्य अकल्पनीयत्वप्रसङ्गात् तस्मिन्नेव विधिरिति स्थितम् । तदेवं सति 'शमीमय्यः स्रुचो भवन्ति' इति विधीयमाना शमी प्रकरणेन प्रधानार्था सती प्रकृतिक्लृप्तप्रधानीयकरणोपकारसंबन्धद्वारकार्यमेव स्रुक्शब्दोपस्थापितमपेक्ष्यमाणा प्रकृतिप्राप्तपर्णताऽऽदिनानाजातीयस्रुङ्निराकाङ्क्षसंमार्गरूपं स्रुक्कार्यं परित्यज्य तत्रैव विधीयते इति युक्तम् । न च संमार्गस्रुचावपि प्रकृतौ प्रधानीयकरणोपकारकत्वम्, दीक्षणीयावाङ्नियमवत् स्रुचः संमार्ष्टीत्यनन्यगतिवाक्योपादानबलेन संमार्गापूर्वगृहीतत्वेन प्रधानापूर्वेण गृहीतत्वात् । अतो न तत्कार्ये शमीविधिरिति । तदर्थं नानाजात्युत्पादनमेव । बर्हिषां तु प्रकरणेन प्रधानापूर्वगृहीतत्वेऽपि अङ्गहविरासादनस्य च अङ्गापूर्वगृहीतत्वेन प्राकृतानां करणोपकारकार्ये विधानासंभवात् द्वयोरपि अङ्गप्रधानहविरासादनयोः आश्रयसाकाङ्क्षत्वात् वाक्यात् प्रकरणबाधेन युक्तमुपकारकतामात्रपुरस्कारेणोभयार्थत्वम् । न च 'वेद्यां बर्हिषि हवींष्यासादयति' इत्याश्रयनैराकाङ्क्ष्ये सति प्रकरणात् प्रधानहविरासादनसंबन्ध एव बर्हिषां नाङ्गहविरासादनसंबन्धः इति वक्तव्यम् । द्वयोरेकवाक्योपात्तयोर्वेदिबर्हिषोः युगपदङ्गप्रधानहविरासादनाश्रयत्वात् अविरोधेन समुच्चयेन समन्वयात् । विकृतौ तु प्राकृताङ्गसंबन्धोत्तरकालीनत्वात् वैकृताङ्गसंबन्धस्य नैराकाङ्क्ष्यमिति वैषम्यम् । न च अत्रापि वैकृतप्रधानापूर्वगृहीतत्वेऽपि शम्याः उपकारकतामात्रपुरस्कारेण उभयार्थत्वमिति वक्तव्यम् । वैकृतप्रकृतिक्लृप्तप्रधानीयकरणोपकारसंबन्धद्वारकार्याश्रयत्वस्य व्यवस्थितत्वात् संमार्गस्य प्रकृतिक्लृप्तप्रधानीयकरणोपकारसंबन्धिस्रुग्द्वारकार्यत्वासंभवस्य उक्तत्वात् दीक्षणीयावत् प्रधानापूर्वगृहीतत्वात् संमार्गस्रुचाम् । किञ्च वैकृतो हि शमीविधिः अतिदेशप्राप्तपर्णतामबाधमानो निविशते, तत्र प्रकरणानुरोधेन प्रधानीयस्रुक्प्रकृतिद्रव्यबाधेनैव उपपत्तौ नाङ्गस्रुक्प्रकृतिद्रव्यबाधनमप्युचितम् । नहि सौमिकमहावेद्युपदेशेन दीक्षणीयादिषु आतिदेशिकदार्शपौर्णमासिकवेदिबाधः परेणापि स्वीकर्तव्यः । तथा सति वेदिप्रसङ्ग-

दूषणानवकाशात् । अत एव ‘षड्भिर्दीक्षयति’ इत्यत्रापि अबाधसंभवे सति नातिदेशिकमन्त्रः षड्बाधकः । प्रकृतौ तु बार्हिषामङ्गप्रधानहविरासादनसंबन्धेऽपि न कस्यचिद्बाध इति । अतो न बर्हिषा साम्यम् । एवं सति स्रुग्रूपस्य नानाजातिकार्यस्य प्रकृतौ दर्शनात् यदि स्रुग्रूपपर्णताकार्येऽपि शम्याः विधिः, तथापि संमार्गस्रुचां न शमीमयीत्वम् । यतः अनारभ्याधीतायाः पर्णतायाः स्रुग्द्वारेण अङ्गप्रधानापूर्वगृहीतायाः पृथगेव अप्रधानापूर्वीयकरणोपकारसंबन्धिस्रुग्रूपद्वारकार्यकल्पनान्न प्रधानीयकरणोपकारसंबन्धिद्वारकार्यत्वम्, संमार्गीयस्रुग्रूपं पर्णताकार्यस्यापीति । किञ्च, विधेः औत्सर्गिकाव्यवहितभावार्थविषयत्वात् पर्णतां लक्षयित्वा तत्कार्यत्वेन स्वात्मनि लक्ष्यमाणे लक्षितलक्षणाप्रसङ्गाच्च स्रुक्कार्ये विधिरित्युच्यते । यद्यपि पर्णताकार्येऽपि विधिः, तथापि संमार्गस्रुग्वर्जनमेवेति न दोषः । तदुक्तम्— ‘यत्र ह्यङ्गप्रधानार्थ एक एवोपदेशविधिः, कार्यविधिरपि तत्र तथैव । यत्र पुनरुपदेशविधिभेदः, कार्यविधिरपि तत्र प्रकरणात् प्रधानस्यैवेति दर्शितम्– आनर्थक्यात्तदङ्गेष्विति’ । अस्यार्थः–– उपदेशविधिरिति ग्राहकोपदेशविधिः । स यत्राङ्गे च प्रधाने च यः संबन्धी पदार्थः, तस्मा एक एव ग्राहको भवति । विकृतावपि तत्र प्रकृतिक्लृप्तकरणोपकारसंबन्धद्वारकार्ये विधिः अङ्गप्रधानसाधारण एवेति । यथा प्रकृतौ दर्शपूर्णमासीयग्राहकाधिकारविधिगृहीतानां बार्हिषां कार्ये विकृतौ शरविधिः । अत एव प्रयाजादिषु स्रुचामपि शमीमयीत्वम्, तासामपि बर्हिर्वत् एकैकग्राहकापूर्वगृहीतानां उपकारकतापुरस्कारेण अङ्गप्रधानहोमरूपद्वारकार्यसंबन्धाविशेषात् । यत्र पुनरुपदेशविधिभेद इति, ग्राहकापूर्वभेदः । यथा ‘जुह्वा जुहोति’ ‘स्रुचः संमार्ष्टि’ इति, विकृतावपि तत्र संमार्गविधिः प्रकरणात् प्रधानस्यैव संमार्गस्रुचां संमार्गापूर्वगृहीतत्वेन प्रधानग्राहकाधिकारविधिसंबन्धाभावात् ।

ये तु यत्र ह्यङ्गप्रधानार्थ एक उपदेशविधिः इति अङ्गप्रधानसाधारणः एव विनियोगविध्यभिप्रायेण प्रचक्षते, तेषां प्रकृतौ पृथगाध्वर्यवचमसाख्यया ऋत्विक्समाख्यया च पृथगङ्गप्रधानसंबन्धिनि अध्वर्युकार्ये ऋत्विक्कार्ये च ‘यो होता सोऽध्वर्युः’ ‘ये यजमानास्त ऋत्विजः’ इति विकृतौ न होतृयजमानसंबन्धो भवेत् । ग्राहकोपदेशविधिगृहीतानां विकृतौ करणोपकारसंबन्धिद्वारकार्यगवेषणे विभिन्नसमाख्याकल्पितानामपि नानाकार्याणां प्रधानगृहीताध्वर्युसंबन्धेन प्रधानीयकरणोपकारकद्वारकार्यकल्पनमुचितमेव । नापि सौमिकवेदिदक्षिणान्यायेन, प्रसङ्गादेव प्रधानीयस्रुचां संमार्गसिद्धेर्न तदर्थं नानावृक्षीयस्रुगुपादानम् । प्रयोगप्राशुभावार्थे हि प्रयोगविधिः गुणानादरेणापि अन्यार्थानुष्ठितस्यापि अन्योपकारकत्वमनुमन्यते । तेन यस्यैव प्रयोगविध्याक्षिप्तं प्रयोगान्तःपतितमुपादानम्, तस्यैव उपादानप्रसङ्गविषयत्वम्, ‘सौमिकवेदिदक्षिणा’ इत्यादि ‘सौमिकवेदिदक्षिणयोः’ इत्यन्तो ग्रन्थो (नालिखियो ?) श्चैवंरूपत्वात् भवतु प्रसङ्गेनोपकारत्वम् । स्रुचां च द्रव्यार्जनवत्प्रयोगाद्बहिरेव क्रतुविध्यर्थमुपादानान्न प्रसङ्गन्यायविषयत्वमिति । किञ्च सन्त्येवाग्निहोत्रार्था द्विजातेरग्निहोत्रिणो नित्यं हि नानावृक्षीया प्रसङ्गा …… इति (?) । न च यजमानगृहावस्थितत्वात् तासां यज्ञदेशासंभवात् शमीमयीनां प्रसङ्ग एवेति वक्तव्यम्, केनापि आगन्तुककारणेन यज्ञदेशानयने सति प्रयोजनसंभवात् । अतः सूक्तं भाष्यकारेण स्रुगुदाहरणप्रयोजनमिति ।

अत्रोच्यते— योऽयं स्रुक्शब्दोपलक्षितकार्यद्वारेण उपकारसंबन्धिद्वारकार्याश्रयो विधिः, स किं प्रकृत्यवधारितविधिस्वरूपानुरोधेन ? कल्पनाभयेन वा ? तत्र न तावदाद्यः कल्पः, प्राकृताङ्गविधेरपूर्वीयपदार्थाश्रयत्वस्वीकारात् । अथाङ्गानां प्रकृतावेव करणोपकारसंबन्धिद्वारकार्यजनकत्वात्तत्रैव विधिरुचित इत्यवधारितम् । किन्तु प्रकृतौ प्रथमं करणोपकारस्य अक्लृप्तत्वात् विधेरपूर्वीयपदार्थमात्राश्रयत्वम्, विकृतौ प्रकृतिक्लृप्तस्य उपकारद्वारकार्यस्य अतिदेशप्राप्तेस्तत्रैव विधिरिति । मैवम् । चेतनप्रवर्तनात्मको हि विधिः । चेतनप्रवृत्तिश्च सर्वत्र पुरुषार्थसंबन्धविषयिणी । तदयं विधिः प्रवर्त्यपुरुषं प्रति प्रवृत्तिविषयस्य पुरुषार्थसंबन्धज्ञानमव्यवहितमेवापेक्षते । ननु परम्परासंबन्धात्, न । अपूर्वीयकरणोपकारसंबन्धिद्वारकार्यजनकत्वेऽप्यङ्गानां तद्द्वारेण परम्परापूर्वसंबन्धात् तत्परित्यज्य सर्वत्र पुरुषार्थीभूताधिकारापूर्वीयशब्दमात्रमपेक्ष-

माणो विधिः अपूर्वीयपदार्थविषय एवोचितः, द्वारकार्यस्य तु तन्निर्वाहकत्वम्। अतो नोचित एवायमौचित्यभ्रमो मन्दानामिति। **नापि द्वितीयः**, समभिव्याहारानुपपत्त्या हि लक्षणा भवति, यथा 'गङ्गायां घोषो वसति' इति। न चात्र स्रुक्पदार्थस्य शमीमयत्वसमभिव्याहारो नोपपद्यते। समभिव्याहृतपदार्थावगतविशिष्टार्थानुपपत्त्या तु यत् कल्पनीयं तल्लाक्षणिकम्। यथा 'पीनो दिवा न भुङ्क्ते' इत्यत्र रात्रिभोजनम्। कल्पनाभयेन तु लक्षणायां तस्यापि लाक्षणिकत्वप्रसङ्गः। तेन अपूर्वीयशमीसमभिव्याहारानुपपत्त्या प्रकृतिवदेव स्रुचामपि अपूर्वीयत्वं लक्ष्यताम्, तदतिरिक्तं तु करणोपकारादिकमत्रापि कल्पनीयमेवेति। किञ्च स्रुक्कार्ये शमीविधौ पदश्रुतेरप्यानर्थक्यं (?) तद्विकारबाहुल्ययोरसंभवात्। अथैतद्दोषपरिहारार्थमेवमभिधीयते। यत्तु प्रकृतिक्लृप्तकरणोपकारसंबन्धिद्वारकार्यसाधनस्रुक्पदार्थप्रधानप्रकृतित्वेनैव शमी विधीयते इति, तेन करणोपकारसंबन्धिद्वारकार्यपुरस्कारेण स्रुचां शमीविधिरित्युच्यते। ननु स्रुगर्थपरित्यागेन निकृष्ट एव कार्यविधिरिति, एवं तर्हि सुतरामेव न कार्यलक्षणा। यतः समभिव्याहारानुपपत्त्या हि लक्षणा भवति। न च शमीसमभिव्याहारः स्रुक्पदार्थस्य करणोपकारसंबन्धिद्वारकार्यलक्षणामन्तरेण नोपपद्यते। अपूर्वीयत्वमात्रलक्षणयैव प्रकृतिविकाराभावस्योपपन्नत्वादेव हि उद्देश्यगतविशेषणान्तरगतविवक्षा, तदा वाक्यभेदप्रसङ्गः स्यात्। अतो न कथञ्चिदपि लक्षितकार्याश्रये विधिः, किन्तु यथाप्रकृति विकृतावपि अपूर्वीयपदार्थाश्रय एवाङ्गविधिः। तथा च सति वाक्यप्रकरणसामञ्जस्यानुरोधेन बर्हिर्वत् अङ्गप्रधानार्थत्वेन शम्यादिविधिरिति बर्हिर्मुद्रार्थः। भवतु वा प्रकृतिक्लृप्तकरणोपकारसंबन्धिद्वारकार्याश्रयो वैकृतांशो विधिः, तथापि होमाभिनिर्वृत्तिसंमार्गरूपकार्यद्वयस्यापि प्रात्यात्मिककरणोपकारसंबन्धिद्वारकार्यत्वेन प्रकृतिक्लृप्तत्वात् स्रुक्कार्यमात्रस्यैव द्वारकार्यत्वमिति न संमार्गस्रुग्वर्जनम्। न चैकरूप्यमेव परद्वारकार्यविधेः, अङ्गप्रधानगतनानाविधर्त्विगादिकार्येषु यजमानादिविध्यभावप्रसङ्गात्। न च भिन्नापूर्वगृहीतत्वात् नैकविधिविषयत्वमिति वाच्यम्। यतः प्रकृत्यनवगतस्वरूपपर्यालोचनेन हि विकृतौ कार्याश्रयत्वस्वीकारः। तत्र च यथा व्रीह्यादिपदार्थानुवादेन विहितानामवघातादीनां करणोपकारसंबन्धिद्वारकार्यनिष्पादनेन प्रकृतौ अपूर्वीयत्वनिर्वाहावगमात् विकृतावपि तस्मिन्नेव कार्ये अङ्गविधिः, तथा अङ्गप्रधानस्य धारणहविरासादनादिपदार्थानुवादेन विहितानां बर्हिराद्यङ्गानामङ्गप्रधानहविषां भिन्नापूर्वगृहीतत्वेन तथाक्षिप्तसाधनस्यापि भिन्नापूर्वगृहीतत्वे सत्यपि वाक्यप्रकरणानुरोधार्थं अपूर्वोपकारकतासाधर्म्येण अङ्गप्रधानसाधारणहविरासादनमात्रस्यैव बर्हिषां अपूर्वीयनिर्वाहाय करणोपकारसंबन्धिद्वारकार्यत्वस्वीकारात् विकृतावपि अङ्गप्रधानसाधारणस्रुक्त्वानुवादेन विधीयमाना शमी संमार्गस्रुचा अङ्गापूर्वगृहीतत्वेऽपि अपूर्वोपकारकतासाधर्म्येण स्रुक्कार्यमात्रमङ्गप्रधानसाधारणं स्रुक्शब्दलक्षितं करणोपकारसंबन्धिद्वारकार्यमाश्रयिष्यति। न च प्रकृतौ अङ्गहविषां नाङ्गापूर्वगृहीतत्वम्, 'चतुर्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्गृह्णाति' इत्यादिवाक्यैश्चतुर्गृहीतजौहवाज्यस्य दीक्षणीयावाङ्नियमन्यायेन केवलप्रयाजार्थप्रतिपादकत्वात् तद्बलेन प्रयाजापूर्वेणैव गृहीतत्वात्। एतदुक्तं भवति प्रकृतावेव अङ्गविधेः कार्यद्वयपर्यन्तत्वमवगतम्। यत्र साधारणानुवादेन अङ्गविधिः, तत्र साधारणमेव द्वारकार्यम्। अङ्गप्रधानसाधारणानुवादेन पुनर्यत्राङ्गविधिः, तत्रोपकारकतासाधर्म्येण साधारणमेव द्वारकार्यमिति लक्षितकार्याश्रयत्वेऽपि बर्हिर्मुद्रार्थः। अथोच्यते, अङ्गप्रधानसाधारणे हविरासादनसंबन्धे बर्हिषां न साधारणानुवादमात्रप्रयोजनम्, किं तर्हि? अङ्गाकाङ्क्षापि। न चात्र सा समस्ति, प्राकृतजातिनिराकाङ्क्षत्वात् इत्युक्तमेवेति। **तदयुक्तम्**, अङ्गहविरासादनस्यापि लोकानुसारेणैव हविराश्रयार्हवत् किञ्चित्संनिहितद्रव्यनिराकाङ्क्षत्वेन असंबन्धप्रसङ्गात्। अथ लोकप्राप्तितो वैदिकप्राप्तेर्बलवत्त्वात् तद्बाधेनैव बर्हिः संबध्यते, तत् किमिदानीं आतिदेशिकप्राप्तेः औपदेशिकप्राप्तिर्न बलवती, यत औपदेशिकेन न बाध्येत। अथ लौकिकप्राप्तिः अनियताधारद्रव्यविषयत्वेन संदिग्धरूपत्वात् नाङ्गहविरासादनस्य नैराकाङ्क्ष्यम्। अतिदेशप्राप्तेस्तु नियतपर्णतादिविषयत्वात् सत्यपि दौर्बल्ये नैराकाङ्क्ष्यमेव संमार्गस्येति। तन्न, अतिदेशप्राप्तेर्निरन्तरं

औपदेशिकबाधदर्शनात् । यावदुपदेशो योग्यानुपलम्भो न भवति, तावत् संदिग्धत्वात् तस्यां चावस्थायां बलवदसंदिग्धप्रमाणेन बाध एवेति नास्ति बर्हिर्मुद्रानिःस्तरणम् । **किञ्च** यथा अङ्गप्रधानसाधारणानुवादेनापि विधीयमानस्य प्रकृतिलब्धसाधननिराकाङ्क्षे अङ्गे प्रदेशो न भवति, तावत् संदिग्धत्वात् तस्यां चावस्थायां बलवदसंदिग्धप्रमाणेन बाधात् 'ये यजमानास्त ऋत्विजः' 'यो होता सोऽध्वर्युः' इत्यत्र अङ्गकार्येषु प्राकृतऋत्विगध्वर्युनिराकाङ्क्षेषु यजमाने होतृसंबन्धो न स्यात् । तथा च सति वरणमानमनार्थत्वात् सैव (?) न स्यात्, 'विप्रतिषेधे करणं समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात्' इति न्यायविरोधः स्यात् । अतो यत्किञ्चिदेतदिति । अत एव आतिदेशिकबाधभयेनापि नोपदेशसंकोचः, तत्रापि अङ्गसंबन्धिनि ऋत्विगध्वर्युकार्ये बाधभयेनैव यजमानहोतृनिवृत्तिप्रसङ्गात् । सौमिकमहावेदिविधिस्तु दीक्षणीयाऽऽतिथ्यादेर्नेष्यते एव । 'चिकर्षया च संयोगात्' इत्यत्र महावेदिः सर्वाङ्गापि एतज्ज्योतिष्टोमार्थत्वस्यैव वार्तिककारपादैरुक्तत्वात् । वेदेरपि प्रसङ्गन्यायस्तु भाष्यकारोक्तप्रयोजनदूषणाय भाष्यकारमतेनैवोक्तः । न च तन्मतेऽपि अतिदेशबाधभिया महावेदिविधेर्दीक्षणीयाऽऽदिपरित्यागः, किन्तु क्वचित् बाधकत्वं क्वचित् बाधानपेक्षत्वं क्वचित् प्राप्तकार्याश्रयत्वमित्यादिविधिवैरूप्यभयेनैव । एवं 'षड्भिर्दीक्षयति' इत्यत्रापि नातिदेशबाधभयेन उपदेशसंकोचः । किन्तु प्राकृतषणमन्त्रकार्यासु दीक्षाऽऽदिषु वैकृतषणमन्त्रसंबन्धे 'द्वादश जुहोति' इति वैकृताभ्यस्ताः षड् जुहोतयः श्रूयन्ते । तत्र किं वैकृतैरेव मन्त्रैरभ्यासः क्रियताम्, प्राकृतैर्वा इति संदेहे उपदेशाभावेन कल्पनीयोऽयमभ्याससंबन्धः अतिदेशानुग्रहार्थं प्रकृतातिदिष्टमन्त्रषट्कस्यैव कल्प्यते । इह तु उपदेशतः एव स्रुङ्मात्रसंबन्धो नातिदेशबाधभिया संकोचमर्हतीति वैषम्यम् ।

यत्तु कैश्चित् 'यस्योभयं हविरार्तिमार्च्छेत्, ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्र विकृतौ अतिदेशप्राप्तस्य चतुर्मुष्टिनिर्वापस्य अन्यतरबाधेनोपपत्तौ नोभयबाधः इति मुष्टिमात्रबाधनमत्र दृष्टान्तत्वेन दर्शितम्, **तदयुक्तम्** । नहि तत्रौपदेशिको बाधः, किं तर्हि उभयाबाधे चतुर्मुष्टिव्रीहीणां पञ्चशरावौदनानिष्पत्तेः अर्थासंभवेन आवश्यके अन्यतरबाधे प्राथम्यात् संख्याऽनुग्रहेण मुष्टिमात्रबाधो युक्त एव । अत्र तु औपदेशिकत्वात् बाधस्य अतुल्यत्वमिति न किञ्चिदनुपपन्नमिति । **अथ** अङ्गानामेव आतिदेशिकी प्राप्तिः, अनङ्गानां तु संमार्गस्रुचां विकृतावपि औपदेशिकी, इतरथा पवमानेष्टेरपि अतिदेशप्रसङ्गः । तेन उपदेशयोस्तुल्यबलत्वात् दुर्बलातिदेशोपनीतप्रधानस्रुचामेव बाध इति । **मैवम्** । किमतिदिष्टाङ्गाक्षेपलभ्यत्वात् अङ्गानामौपदेशिकत्वम्, अथ संमार्गोद्देशेन विहितानां स्रुचां प्रकृतिविकृतिसाधारण एवोपदेशः इति । **न तावदाद्यः कल्पः**, अतिदेशाक्षेपलभ्यस्य अतिदेशतोऽपि जघन्यत्वेन सुतरां बाध्यत्वात् । **नापि द्वितीयः**, तथा च सति विकृतिश्रुतोऽपि प्रयाजोद्देशेन कृष्णलहोमः प्रकृतौ अप्रकृतावपि प्रसज्येत । न च पवमानेष्ट्यतिदेशप्रसङ्गः, प्रकृतावेव 'यदाहवनीये जुहोति' इति बर्हिर्निष्पन्नस्य आहवनीयस्य अङ्गत्वविधानात् विकृतावपि तथाभूतस्यैव तथा प्राप्तत्वात् । **अथोच्येत** आतिदेशकत्वेऽपि अस्ति प्राप्तिकालवैषम्यम्, यतः करणोपकारस्य अङ्गजन्यत्वेन प्रथमं संबन्धः, पश्चादङ्गाभिसंबन्धः । तत्र प्रथमप्राप्तहोमः स्रुङ्निराकाङ्क्षोऽयं शमीमयीविधिः न चरमभाविसंमार्गस्रुक्प्राप्तिकालमपेक्षते इति । **तदयुक्तम्** । तथा सति बर्हिर्विधिरपि ग्राहकप्रकरणाभ्यां प्रथमं प्राधानीयहविरासादनस्यैव प्राप्तत्वात् उपकारतामात्रेण चरमभाविनीमङ्गहविरासादनप्राप्तिं अतिलङ्घ्यात् (अतिलङ्घयेत्) बर्हिषां प्रधानमात्रसंबन्धः स्यात् । यथा च तत्र तथा अत्रापीति प्राप्तिकालवैषम्येऽपि च बर्हिर्मुद्रार्थः । विशेषतश्च अत्र प्राप्तिकालवैषम्यमपि न संभवति । यतो येन उपकारपृष्ठभावेन हि अङ्गसंबन्धो भवन् यथाभूतानामेव उपकारजननसामर्थ्यं प्रकृतौ अवगतम्, तथाभूतानामेव आतिदेशिकः संबन्धो वक्तव्यः । स्वाङ्गसहितस्यैव प्रकृतौ उपकारजनकत्वावगमात् सहैव प्राप्तेः । **एतदपि यत्किञ्चिदिति** । एतच्च सर्वं संमार्गस्रुचां दीक्षणीयावाङ्नियमवत् संमार्गापूर्वगृहीतत्वमभ्युपेत्योक्तम् । परमार्थतस्तु न एतत्संभवति, यतः अधिकारविधिसंनिधिश्रुतानामङ्गानां

प्रथममनभिव्यक्तस्वापूर्वाणामेव अधिकारविधिगृहीतत्वात् संमार्गस्रुचामपि अधिकारापूर्वीयत्वमेव । किञ्च एकवाक्योपात्तानां सर्वत्र एककार्यपरत्वव्युत्पत्तेः एकस्मिन्नेव 'स्रुचः संमार्ष्टि' इति वाक्ये संमार्गस्य प्रधानापूर्वपरत्वं स्रुचां संमार्गापूर्वपरत्वमिति व्युत्पत्त्यनुरोधादपि अयुक्तम् । तेन सर्वेषां प्रधानापूर्वपरत्वमेवेति ।

यत्तु स्ववाक्यस्था हि कार्यावगतिर्बलीयसीत्युक्तम् । तत् एकवाक्यगतसर्वपदार्थानां श्रुत्यनुसारेण एककार्यपरत्वाविरोधे सतीति द्रष्टव्यम् । दीक्षणीयायां तु 'आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणः' इति वाक्येन द्रव्यदेवताविशिष्टस्यैव दीक्षणीयायाः अधिकारापूर्वान्वयोत्तरकालं संभूयोपकारजननार्थं अपूर्वान्तराभिव्यक्तौ ज्ञातायां 'यावत्या वाचा कामयते, तावत्या दीक्षणीयायामनुब्रूयात्' इत्यनेन वाक्येन अन्तरङ्गलक्षणया अपूर्वान्वयमात्रपरेण युक्तं वाङ्नियमस्य तन्मात्रप्रतिष्ठितत्वम्, न चेह तथेति वैषम्यम् । एवं च सति संमार्गस्रुचामपि प्रधानापूर्वीयत्वात् होमस्रुचामपि अविशेषात् शमीमयीत्वमेवेति । यदपि प्रसङ्गन्यायनिराकरणार्थं स्रुचां प्रयोगात् बहिरुपादानं सौमिकवेदिवैधर्म्यमुक्तम्, तदयुक्तमुक्तम्, विकल्पासहत्वात् । तथाहि, यदेतत् प्रयोगानुपात्तानामपि नानावृक्षीयस्रुचां यज्ञदेशानयनम्, तत् किं संमार्गार्थेन प्रयोगविध्युक्तं संपातायातं वा ? पूर्वस्मिन् कल्पे वरुणप्रघासार्थानीतानां शमीमयीनां तत्रापि प्रसङ्गो दुर्वारः । एवमेव अग्निहोत्रोपात्तानां यजमानगृहवर्तिनीनामपि नानावृक्षीयस्रुचां वरुणप्रघासदेशसंमार्गानयनं संपातायातत्वं च निराकरणीयमित्यलमतिविस्तरेणेति । तस्मात् यथावार्तिकमेव स्रुगुदाहरणप्रयोजनमभिधीयते । तथाहि स्रुक्संमार्गस्य प्रकृतौ कपिञ्जलन्यायेन तिसृभिः स्रुग्भिः साधितत्वात् पात्रविवृद्धावपि प्रकृतौ पशुचातुर्मास्येषु तिस्र एव संमार्ष्टव्याः पूर्वपक्षे । सिद्धान्ते तु प्रयोजनवत्त्वेन सर्वा एव स्रुचः संमार्ष्टव्याः, संस्कारस्य प्रतिप्रधानावृत्तित्वात् । उदाहरणान्तरप्रयोजनानि तु वार्तिके एव सुगमानीति । सूत्रं तु–अवहन्त्यादिवत् द्वितीयाश्रुतेस्तुल्यत्वात् इतरैरवहन्त्यादिभिः संमार्गादिसमानधर्मं स्यात् गुणकर्मेत्यर्थः । तौता.

* धर्ममीमांसाशास्त्रं षोडशभिरध्यायैः षट्सप्तत्या पादैः सिद्धम् । संकर्ष. ४।४।१०.

* धर्ममोक्षसंबन्धि यत् तद्वेदप्रभवम्, यत्तु अर्थसुखविषयं तल्लोकव्यवहारपूर्वकं इति विवेक्तव्यम् । वा. १।३।१।२ पृ. १६६.

⧗ धर्मलक्षणम् । चोदनासूत्रम् ॥

चोदनालक्षणोऽर्थो धर्मः । १।१।२।२ ॥

भाष्यम्— स हि (धर्मः) निःश्रेयसेन पुरुषं संयुनक्ति इति प्रतिजानीमहे । तदभिधीयते । चोदनालक्षणोऽर्थो धर्मः । चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः । आचार्यचोदितः करोमि इति हि दृश्यते । लक्ष्यते येन, तत् लक्षणम्, 'धूमो लक्षणमग्नेः' इति हि वदन्ति । तया यो लक्ष्यते सोऽर्थः पुरुषं निःश्रेयसेन संयुनक्ति इति प्रतिजानीमहे । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टं इत्येवंजातीयकमर्थं शक्नोति अवगमयितुम्, नान्यत् किञ्चन इन्द्रियम् । (अत्र वैद्यनाथी– "नान्यत् किञ्च इति पदच्छेदः । तथा च शब्दस्यैव तादृशार्थबोधनसामर्थ्यम्, न तु तद्व्यतिरिक्तप्रमाणसामान्यस्य । तत्रैव हेतुः नेन्द्रियं इति । अथवा 'नान्यत्' समर्थमित्यर्थः । 'किञ्च' इति प्रश्नार्थे कुतः इत्यर्थः । 'नेन्द्रियम्' इति तु पूर्ववदेव हेतुः ।" इति । अथ 'नान्यत् किञ्चन इन्द्रियम्' इत्यत्र '**प्रदर्शनार्थमत्रोक्तमिन्द्रियं सूत्रकारवत् । नान्यत् किञ्चेति वा छेदः सामान्यार्थः प्रयुज्यते ॥**' (१।१।२।२ श्लो. १५) '**तदसामर्थ्यसिद्ध्यै च पुनरिन्द्रियकीर्तनम् । किञ्चेति मध्यमच्छेदो हेतुप्रश्ने प्रयुज्यते ॥**' १६ ॥ अत्र वार्तिके त्रेधा व्याख्यातम् । 'नान्यत् किञ्चन इन्द्रियम्' समर्थं इति । 'नान्यत् किञ्चन प्रमाणं समर्थं यथा इन्द्रियम्' इति । 'नान्यत् प्रमाणं समर्थम् । किञ्च कस्मात् इत्यर्थः, यस्मात् नेन्द्रियं समर्थम्, तस्मात् इन्द्रियपूर्वकत्वात् इतरस्य प्रमाणस्य न तत् समर्थम्' इति–के.) ।

ननु अतथाभूतमत्यर्थं ब्रूयात् चोदना, यथा यत्किञ्चन लौकिकं वचनम् 'नद्यास्तीरे फलानि सन्ति' इति । तत् तथ्यमपि भवति, वितथमपि भवतीति । उच्यते ।

विप्रतिषिद्धमिदमुच्यते 'ब्रवीति, वितथं च' इति । 'ब्रवीति' इति उच्यते 'अवबोधयति, बुध्यमानस्य निमित्तं भवति' इति । यस्मिंश्च निमित्तभूते सति अवबुध्यते, सोऽवबोधयति । यदि च चोदनायां सत्यां अग्निहोत्रात् स्वर्गो भवति इति गम्यते, कथमुच्यते 'न तथा भवति' इति । अथ न तथा भवतीति, कथमवबुध्यते । असन्तमर्थमवबुध्यते इति विप्रतिषिद्धम् । न च 'स्वर्गकामो यजेत' इत्यतो वचनात् संदिग्धमवगम्यते 'भवति वा स्वर्गो न वा भवति' इति । न च निश्चितमवगम्यमानं इदं मिथ्या स्यात् । यो हि जनित्वा प्रध्वंसते 'नैतदेवम्' इति, स मिथ्या प्रत्ययः । न च एष कालान्तरे पुरुषान्तरे अवस्थाऽन्तरे देशान्तरे वा विपर्येति, तस्मादवितथः (प्रत्ययः)। यत्तु लौकिकं वचनम्, तच्चेत् प्रत्ययितात् पुरुषात् इन्द्रियविषयं वा, अवितथमेव तत् । अथ अप्रत्ययितात् अनिन्द्रियविषयं वा, तावत् पुरुषबुद्धिप्रभवमप्रमाणम् । अशक्यं हि तत् पुरुषेण ज्ञातुम्, ऋते वचनात् । अपरस्मात् पौरुषेयात् वचनात् तदवगतमिति चेत्, तदपि तेनैव तुल्यम् । नैवंजातीयकेषु अर्थेषु पुरुषवचनं प्रामाण्यमुपैति, जात्यन्धानामिव वचनं रूपविशेषेषु । ननु अविदुषामुपदेशो नावकल्पते, उपदिष्टवन्तश्च मन्वादयः । तस्मात् पुरुषाः सन्तो विदितवन्तश्च । यथा चक्षुषा रूपमुपलभ्यते, इति दर्शनादेव अवगतम् । उच्यते । उपदेशा हि व्यामोहादपि भवन्ति, असति व्यामोहे वेदादपि भवन्ति । अपिच पौरुषेयात् वचनात् 'एवमयं पुरुषो वेद' इति भवति प्रत्ययः, न 'एवमयमर्थः' इति । विप्लवते हि खल्वपि कश्चित् पुरुषकृतात् वचनात् प्रत्ययः । न तु वेदवचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्ति । ननु सामान्यतोदृष्टं पौरुषेयं वचनं वितथमुपलभ्य वचनसाम्यात् इदमपि वितथमवगम्यते । न, अन्यत्वात् । नहि अन्यस्य वितथभावे अन्यस्य वैतथ्यं भवितुमर्हति, अन्यत्वादेव । नहि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुमर्हति । अपिच पुरुषवचनसाधर्म्यात् वेदवचनं वितथं इत्यनुमानं व्यपदेशात् अवगम्यते । प्रत्यक्षस्तु वेदवचनेन प्रत्ययः । न च अनुमानं प्रत्यक्षविरोधि प्रमाणं भवति ।

तस्मात् चोदनालक्षणोऽर्थः श्रेयस्करः । एवं तर्हि श्रेयस्करो जिज्ञासितव्यः, किं धर्मजिज्ञासया ? उच्यते । य एव श्रेयस्करः, स एव धर्मशब्देनोच्यते । कथमवगम्यताम् ? यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते । यश्च यस्य कर्ता स तेन व्यपदिश्यते । यथा पाचको लावक इति । तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते । न केवलं लोके, वेदेऽपि 'यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन्' इति यजतिशब्दवाच्यमेव धर्मं समामनन्ति । उभयमिह चोदनया लक्ष्यते, अर्थः अनर्थश्चेति । (अत्र वार्तिकानुसारेण न्यायरत्नाकरे उक्तम्—'भाष्यं चैवं योजनीयम् । उभयमिह चोदनया लक्ष्यते साध्यं साधनं च । साध्यमपि द्विविधं अर्थोऽनर्थश्च इति । श्लोवा. २२४ । बृहत्यां तु नेयं कष्टता स्वीकृता, किन्तु सरलतयैव अर्थोऽनर्थश्चेति उभयं चोदनया लक्ष्यते' इत्यर्थकत्वेनैवोक्तम् । के.) कोऽर्थः ? यो निःश्रेयसाय ज्योतिष्टोमादिः । कोऽनर्थः ? यः प्रत्यवायाय श्येनो वज्रः इषुः इत्येवमादिः । तत्रानर्थो धर्म उक्तो मा भूदित्यर्थग्रहणम् । कथं पुनरसौ अनर्थः । हिंसा हि सा । हिंसा च प्रतिषिद्धेति । कथं पुनरनर्थः कर्तव्यतया उपदिश्यते । उच्यते । नैव श्येनादयः कर्तव्या विज्ञायन्ते । यो हि हिंसितुमिच्छेत् तस्यायमभ्युपायः इति हि तेषामुपदेशः । 'श्येनेनाभिचरन् यजेत' इति हि समामनन्ति 'नाभिचरितव्यम्' इति ।

ननु अशक्तमिदं सूत्रं इमावर्थौ अभिवदितुम् । चोदनालक्षणो धर्मो नेन्द्रियादिलक्षणः अर्थश्च धर्मो नानर्थ इति । एकं हीदं वाक्यम्, तदेवं सति भिद्येत । उच्यते । यत्र वाक्यादर्थः अवगम्यते तत्रैवम् । तत्तु वैदिकेषु, न सूत्रेषु । अन्यतः अवगते अर्थे सूत्रं एवमर्थमिदं इत्यवगम्यते । तेन च एकदेशः सूत्र्यते इति सूत्रम् । तत्र भिन्नयोरेव वाक्ययोः इमौ एकदेशौ इत्यवगन्तव्यम् । अथवा अर्थस्य सतः चोदनालक्षणस्य धर्मत्वमुच्यते इत्येकार्थमेवेति ।

बृहती— सर्वविचाराणां प्रतिज्ञापूर्वकत्वात् तदभिधीयते । 'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः' इति । कार्येऽर्थे वेदस्य प्रामाण्यं दर्शयति 'तल्लक्षणो धर्मः'

इति वदन्। (न कार्यावगमं विना प्रवृत्तिरुपपद्यते। तेन कार्याभिधायकतयैव वचनस्य प्रवर्तकता। कार्याभिधायकेन च कार्यमेव लक्ष्यते। तेन कार्ये एव वेदः प्रमाणम्। चोदनालक्षणसूत्रेण चोदनालक्षणः कार्यरूप एवार्थो न सिद्धरूपः इति प्रतिज्ञातम्। तदनेन भाष्येण व्याख्यायते। धर्मशब्दश्च वेदार्थमात्रपरः)। कार्यरूप एवेति दर्शयति **‘चोदना हि भूतम्’** इति। यदि कार्ये एव चार्थे वेदस्य प्रामाण्यम्, कथं तर्हि भूताद्यर्थावगतिः मन्त्रार्थवादेषु। तेषामपि हि कार्यार्थतां द्वितीये पादे वक्ष्यते। तदुक्तम् **‘शक्नोति अवगमयितुम्’** इति। न च प्रमाणान्तरावगम्योऽयमर्थः इति **‘नान्यत् किंचनेन्द्रियम्’** इति दर्शयति। (भूतादिकोऽप्यर्थः कार्यान्वयित्वात् तेन रूपेण कार्य एव। तेन चोदनैव कार्यप्रतिपादकमेव वाक्यं भूतादिकमपि अवगमयितुं शक्नोति इति कार्यरूप एव वेदार्थः इति न प्रतिज्ञाहानिः)। **‘ननु अतथाभूतमपि अर्थं ब्रूयात् चोदना’** इति शब्दस्य अर्थासंस्पर्शितां वदन् प्रतिज्ञादोषमाह। कथं पुनः अर्थासंस्पर्शिता शब्दस्य ? उच्यते। अर्थसंस्पर्शि हि इष्यते प्रमाणम्। तस्य बाधकज्ञानोत्पत्तौ सत्यां पुनः प्रतिपक्षविज्ञानं तन्निमित्तमेवोत्पद्यते। शब्दे पुनः स्पष्टेऽपि बाधकज्ञाने पुनः शब्दनिमित्तमेव प्रतिपक्षविज्ञानमुदेति अङ्गुल्यग्रे हस्तियूथमिति। तथा न शुक्तिकारजतादिषु अन्यार्थस्य संभवः। तस्मात् अर्थासंस्पर्शित्वात् चोदनायाः **‘तल्लक्षणो धर्मः’** इति प्रतिज्ञा नोपपद्यते। उच्यते। अर्थं च अवबोधयति अर्थासंस्पर्शि च इति चित्रम्। यदि तावत् बाधकज्ञानावगम्यं अर्थासंस्पर्शित्वम्, नैव तत् प्रमाणजन्यम्। विशेषाग्रहणात् स्मृतिज्ञानं तत् इति प्रतिपादयिष्यामः। वेदे पुनः बाधकज्ञानाभावात् अर्थासंस्पर्शिताशङ्काऽपि नास्ति। ननु च सत्यपि बाधकज्ञाने लौकिकेषु वाक्येषु शब्दादेव ज्ञानमुत्पद्यते निमित्तभावात् अङ्गुल्यग्रे हस्तियूथशतमिति। तदद्धा परिहृतैव अर्थासंस्पर्शिताशङ्का [परिहासोऽयमुक्तः]। मैवम्। अनभिज्ञो भवान् बाध्यबाधकभावस्य। अङ्गुल्यग्रे हस्तियूथशतं इति प्रमाणान्तरदर्शनं अत्र बाध्यते, न पुनः हस्तियूथशतमिति (बाह्यं वस्तु)। तदिदमाह **‘विप्रतिषिद्धमिदमभिधीयते, ब्रवीति इति च वितथं च’** इति। अत एव **‘तच्चेत् प्रत्ययितात्’** इत्युक्तम्। प्रत्ययितस्य हि वचनं अव्यभिचारि प्रमाणान्तरपूर्वकं यत्रोपलभ्यमानविषयम्। यत्र तु द्वयं नास्ति, तत्र प्रमाणान्तरविपर्ययात् विपर्ययः। वाक्यार्थे पुनः उक्तो विपर्ययः। (योऽयं विपर्ययः नासौ वाक्यार्थे, किं तर्हि लिङ्गार्थे)। कस्मात् पुनः पौरुषेये वचसि प्रमाणान्तरविपर्ययात् विपर्ययः (न पुनः शब्दविपर्ययात्। अत्रोत्तरम्) ज्ञातं हि अर्थं परस्मै प्रतिपादयितुं पुरुषाः प्रयुञ्जते वाक्यानि। न च अप्रतीतोऽर्थो ज्ञातो भवति इति प्रमाणान्तरसंवादिना पौरुषेयेण वचनेन भवितव्यम्। (तेन विपर्ययोऽपि अनुमानस्यैव, न शब्दस्येति) तदिदमुक्तम् **‘अशक्यं हि तत् पुरुषेण ज्ञातुं ऋते वचनात्’** इति। (यत् पुरुषेण वाक्यं प्रयुज्यते, तत् प्रतीतार्थप्रतिपादनाय। न च प्रमाणान्तरं विना प्रतीतिरस्ति। तस्मात् प्रमाणान्तरसापेक्षं लौकिकं वचनमस्ति)। ननु अशक्यं हि तत् पुरुषेण ज्ञातुं ऋते प्रमाणान्तरात् इति वक्तव्ये ‘ऋते वचनात्’ इति कोऽभिप्रायः ? उच्यते। ननु च कार्यार्थत्वेऽपि पौरुषेयतैव वचसः प्राप्नोति इत्यस्य परिहारार्थमिदमुच्यते ‘ऋते वचनात्’ इति। (कः परिहारः ? अयमुच्यते, यदि चोदना कार्यमर्थं प्रतिपादयति तदा न पौरुषेयी। पुरुषा हि प्रमाणान्तरप्रतीतार्थप्रतिपादनाय वाक्यं प्रयुञ्जते। न च कार्यं प्रमाणान्तरप्रमेयम्। तेन तत्प्रतिपादकस्य न पौरुषेयत्वम् इति)। ननु च प्रमाणान्तरसंवादिता एवं न प्रदर्शिता भवति (वाक्यमेव एवंपरं इति मन्वानस्य चोद्यमिदम्)। बाढं प्रदर्शिता, सापेक्षत्वनिराकरणदर्शनात्। (सापेक्षत्वं निराक्रियमाणं दृश्यते यस्मात् वचनस्य, तस्मात् नान्तरीयकं अनपेक्षत्वं सिध्यतीत्यर्थः)। नान्तरीयकानपेक्षत्वसिद्ध्यर्थं तु विशेषोदाहरणम्। ननु ‘ऋते वचनात्’ इत्युक्तेऽपि अपरस्मात् पौरुषेयाद्वचनात् प्राप्नोत्येव पौरुषेयत्वं चोदनायाः। उच्यते। वचनादित्युक्ते प्राप्नोत्येव कार्येऽर्थे वचनस्य स्वातन्त्र्यम्। अतः पुरुषपरंपरायामपि न प्रमाणान्तरगोचरो धर्मः इति सिद्धम्। कथं पुनरिदं सिध्यति, पुरुषपरंपरोपदेशान्यथाऽनुपपत्त्या

किमपि उपलम्भकमस्ति इति शक्यते कल्पयितुम्, न स्वातन्त्र्यं वचनस्य । **नैतदेवम्, 'उपदेशो हि व्यामोहादपि भवति । असति व्यामोहे वेदादपि भवति '।** मूलद्वये संभवत्येतस्मिन् परिगणितप्रमाणव्यतिरिक्तं न प्रमाणान्तरमस्ति इति शक्यते वक्तुम् । अतः प्रमाणान्तरविपर्ययासंभवात् न स्वतश्चार्थासंस्पर्शिता शक्यते वक्तुं चोदनायाः । तस्मात् सुष्ठु प्रतिज्ञातं 'चोदनालक्षणोऽर्थो धर्मः' इति ।

किञ्च पुरुषवचनाद्विज्ञातोऽयमनेनार्थः इति निश्चयो भवति, न पुनः प्रमाणान्तरबुद्धिरुपजायते । तदुक्तम् "**अपि च पौरुषेयाद्वचनात् 'एवमयं पुरुषो वेद' इति भवति प्रत्ययः, न 'एवमयमर्थः'**" इति । किं वा अर्थान्तरावगतौ प्रमाणान्तरावगतिर्भवति ? बाढम्, अर्थानुसारि हि तदा प्रमाणमवकल्पते (किं अर्थावगत्यनुमानात् प्रमाणान्तरं शाब्दं इत्यवगतिर्भवति ? बाढं भवति, कारणभूतमर्थं उपस्थापयत् शाब्दं अनुमानात् प्रमाणान्तरं इत्यवकल्पते) । ननु 'वेद' इत्येतदपि कल्पनीयमेव, न, प्रसिद्धकारणत्वात् संविदः अप्रसिद्धमूलत्वाच्चार्थस्य ('वेद' इत्यपि वक्तृबुद्धिः कल्पनीया पौरुषेयाद्वाक्यात् । ततश्च तत्कल्पकतया किमिति प्रमाणान्तरं न भवति ? न, प्रसिद्धं हि कारणं वाक्यस्य वक्तृबुद्धिः, अतस्तत्कल्पना, कार्यतः कारणानुमानम् । अप्रसिद्धं च कारणं अर्थः । ततः तदवगतिर्नानुमानम्) । 'वेद' इत्येतदपि तावत् पुरुषवचनान्नावगतिर्भवति, विक्षेपस्य संभवात् चित्तानाम्, किमुतार्थे, तद्दर्शयति '**विप्लवते खल्वपि कश्चित् पुरुषकृतात् वचनात् प्रत्ययः**' इति (प्रतारकाः अन्यथा जानन्तोऽपि अन्यथा वाक्यानि प्रयुञ्जते । तथा प्रमादिनो दुष्टसामग्रीकाश्च अन्यवाक्यविवक्षायां अन्यदेव वाक्यमुच्चारयन्ति । तेषां वाक्यात् वक्तृबुद्धिरपि निश्चेतुं न शक्यते, दूरेणार्थः । वक्तृवचनान्नार्थावगतिः, विक्षेपस्य प्रतारणाशयप्रमादलक्षणस्य चित्तगस्य संभवात् । एतच्चोपलक्षणं उच्चारणदोषोऽपि द्रष्टव्यः । न तु वेदवचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्तीत्युक्तम्) ।

किमिदं सामान्यतोदृष्टम् ? द्विविधस्यापि निरस्तत्वात् । किमन्यदवशिष्यते, येन इदमुच्यते '**ननु सामान्यतोदृष्टम्**' इति । (द्विविधस्यापि प्रत्ययान्तरापेक्षित्व–अर्थासंस्पर्शित्वलक्षणस्य अप्रामाण्यहेतोर्निरस्तत्वात्) । सत्यमेवम् । किन्तु विषयान्तरे सामान्यतोदृष्टमनपास्तं मन्यते । 'विप्लवते खल्वपि कश्चित् पुरुषकृतात् वचनात्' इत्युक्तम्, तदा 'अन्यथैवार्थः अन्यथा शब्दाद्विज्ञानम्.' तदिदमुपपन्नार्थं भवति । [शङ्कते–] अस्यां किमुपपत्तौ प्रसक्ता खलु अर्थासंस्पर्शिता, शब्दस्य अशब्दत्वात् विप्लुतार्थवत् इति । [परिहरति–] सत्यम्, यदि विप्लुतौ शब्दादयथार्थत्वम्, अयथार्थस्य विषये शब्दादवगम्ये सति, नायथार्थात् । तदिदमुक्तं '**नान्यत्वात्**' इति । अत एवायथार्थत्वे हेतुः शब्दाविषये स्यात् । (यत्र विप्लवः, तत्र यदि शब्दात् अयथाभूतस्यार्थस्यावगमः स्यात् । किन्तु शब्दस्तत्र लिङ्गम्, तेन तत्र तस्य वक्तृबुद्धिव्यवस्थापकत्वम् । वक्तृबुद्धिमुखेन चार्थावगमः । तेन अयथाऽर्थत्वस्य वक्तृबुद्धिर्विषयः, न शब्दः) । अथापि शब्दादेव विप्लवः, तथापि एतदनुमानं नैवोपपद्यते । अदुष्टप्रतिज्ञापनसापेक्षं हेतुवचनं भवति । दुष्टश्चायं पक्षः, संविदः प्रत्यक्षत्वात् । तदिदमुक्तम् '**प्रत्यक्षस्तु वेदवचनात् प्रत्ययः**' इति । प्रतीतिः प्रत्ययः ।

ननु च नैव कार्यो धर्मः । कस्तर्हि ? गुणः । तथाच केचित् बुद्धिगुणं मन्यन्ते, केचिदात्मगुणम् । तस्मात् '**क्रियायाः प्रवर्तकं वचनम्**' 'चोदनालक्षणोऽर्थो धर्मः' इति वचनं च नोपपद्यते, अकार्यत्वाद्धर्मस्य । अतः तन्निराकरणाय चोदनालक्षणस्तत्र उपसंहारमुखेन उपन्यस्तवान् भाष्यकारः '**तस्माच्छ्रेयस्करो धर्मः**' इति । एवमपि कथं पुनर्निरासः ? शब्दार्थसंबन्धस्य लोकव्यवहारगम्यत्वात् । कार्ये चार्थे धर्मशब्दं लौकिकाः प्रयुञ्जते । '**यो यागमनुतिष्ठति**' इत्येवमादिना प्रदर्शिते अर्थशब्दस्य अन्वयप्रयोजनप्रदर्शनार्थं भाष्यकारेण '**उभयमिह चोदनया लक्ष्यते अर्थः अनर्थश्च**' इति । पुनरपि च प्रश्नपूर्वकमिदमुक्तम् '**कोऽर्थः ? यो निःश्रेयसाय ज्योतिष्टोमादिः । कोऽनर्थः ? यः प्रत्य-**

वायाय श्येनादिः' इति निःश्रेयसप्रत्यवायलक्षणं धर्माधर्मत्वमुक्तम्। एवं चोपदर्शयता चोदनालक्षणं इत्युक्तं भवति (उभयमपि अर्थानर्थत्वेन चोदनालक्षणमित्युक्तम्) तत्र यो निःश्रेयसाय तस्यैव प्रत्यवायहेतोर्मा भूत् इति इदं तर्हि अयुक्तं (तथाच सति अयुक्तम्, तदुक्तं तत्र यो निःश्रेयसाय तस्यैव धर्मता कथं नाम स्यात्, प्रत्यवायहेतोर्मा भूत् इति 'इदं तर्हि' इति पूर्वेण सह एकग्रन्थः)। **'कथं पुनः अनर्थः कर्तव्यतया उपदिश्यते'** इति (भाष्यं), कथं कर्तव्यतया अनुपदिश्यमानोऽर्थः चोदनालक्षणो भवति, कथं वा चोदनालक्षणस्य सतः धर्मत्वनिवृत्त्यर्थं अर्थशब्दान्वय उपपद्यते। (अयमत्राभिप्रायः। यत् किल चोदनालक्षणं तत् कर्तव्यतया उपदिश्यते। यच्च कर्तव्यतया उपदिश्यते न तदनर्थः। कर्तव्यताऽवगमादेव अनर्थत्वनिवृत्तेः। अथोच्येत, अनर्थ एव श्येनादिनियोगः, न तर्हि कर्तव्यतयोपदिश्यते। यच्च कर्तव्यतया नोपदिश्यते न तत् चोदनालक्षणम्। अतः चोदनालक्षणनिवृत्त्यर्थं अर्थग्रहणमिति। तन्नोपपद्यते। अचोदनालक्षणत्वेनैव व्यावृत्तिसिद्धेः। एतच्च अपेक्षाऽनुगुणं इति कृत्वा व्याख्यातम्)। पुनरपि च स्पष्टीकरोति **'नैव श्येनादयः कर्तव्यतया विज्ञायन्ते'** इत्युत्तरेण कर्तव्यतया च नोपदिश्यते चोदनालक्षणश्च इति संकटमिवोपलक्ष्यते। यदपि च **'कथं पुनरसौ अनर्थः'** इति प्रश्नमुल्लिख्य **'हिंसा हि सा, सा च प्रतिषिद्धा'** इत्युक्तम्, तदपि पूर्वापरविरुद्धम्। प्रत्यवायलक्षणं अनर्थत्वं उक्त्वा पुनः प्रतिषेधलक्षणमुक्तवान्, तस्मादसामञ्जस्यम्। अथ प्रतिषेधप्रत्यवाययोरपि अविरोधिता उच्यते, प्रत्यवायस्य प्रतिषेधहेतुत्वात्, **तदयुक्तम्**, नञर्थस्य अनन्यार्थत्वात्। नञर्थपर्यवसायी एव प्रतिषेधविधिः, न पुनः तदर्थस्य अन्यार्थतामवगमयितुं क्षमः। (नहि निषेधेन नञर्थस्याकरणे प्रत्यवायपरिहारार्थता। यदि नञ्विधिः नञर्थस्य प्रत्यवायपरिहारार्थतां गमयेत् ततो गम्येत अकरणे प्रत्यवाय इति। तदा चैतदपि सिध्येत् 'प्रतिषिद्धं प्रत्यवायाय' इति, न त्वेवमस्ति। इयं भाष्याक्षरयोजना– 'उभयमिह चोदनया लक्ष्यते, अर्थोऽनर्थश्चेति।' अर्थः अनिषिद्धफलः, अनर्थश्च निषिद्धफलः। 'कोऽर्थः ? यो निःश्रेयसाय' अनिषिद्धफलः 'ज्योतिष्टोमादिः'। 'कोऽनर्थः ? यः प्रत्यवायाय' निषिद्धफलः श्येनो वज्रः इषुः इत्येवमादिः। तत्र, अनर्थो धर्म उक्तो मा भूत् इति एवमर्थम् 'अर्थग्रहणम्। कथं पुनरसौ अनर्थः' इति औपादानिकीं फले प्रवृत्तिं मन्वानस्य चोद्यम्। हिंसा हि सा, सा च प्रतिषिद्धेति। कामिनां स्वतः फले प्रवृत्तत्वात् तदर्थितयैव कर्मणि प्रवृत्तेः न हिंस्यात् इति प्रतिषेधाविरोधात्। 'कथं पुनरनर्थः कर्तव्यतयोपदिश्यते' इति पूर्वोक्तमेव चोद्याभिप्रायं विवृणोति। 'उच्यते, नैव श्येनादयः कर्तव्यतया विज्ञायन्ते' इति नैव विधिना श्येनादयः कर्तव्याः इति प्रतिपाद्यन्ते, फलार्थितयैव प्रवृत्तेः। 'यो हि हिंसितुमिच्छेत् तस्यायमभ्युपायः इति हि तेषामुपदेशः' इति फले स्वयं प्रवृत्तेः तदिच्छयैव कर्मण्यपि प्रवर्तते इति भावः। एतदेव स्फुटीकरोति 'श्येनेनाभिचरन् यजेत' इति हि समामनन्ति नाभिचरितव्यं इति अभिचारे स्वतः प्रवृत्तिं दर्शयति)। (आक्षेपमिदानीं परिहरति– टीकाकारः–) अत्राह– अनिरूपितनियोगव्यापारस्य इदं चोद्यम्। कर्तव्यताविषयो नियोगः, न पुनः कर्तव्यतामाह। (न निरूपितः उपादानलक्षणो नियोगव्यापारो येन, तस्येदं चोद्यम्। यागकर्तव्यताऽनुष्ठानविषयो नियोगः, तेन नियोगः साध्यते, न तु नियोगो यागस्यानुष्ठानं ज्ञापयति)। कथं तर्हि कार्येऽर्थे प्रामाण्यं वेदस्येत्युक्तम् (यदि यागादेः कर्तव्यता न ज्ञाप्यते कथं तर्हि कार्येऽर्थे वेदस्य प्रामाण्यम्, कार्याप्रतिपादकत्वात्)। युक्तम्, तद्विषयत्वान्नियोगस्य (यद्यपि यागादेः कर्तव्यता न ज्ञाप्यते तथापि यागविषयो नियोगः कर्तव्यतया प्रतिपाद्यते इति कार्यप्रतिपादकत्वात् युक्तं कार्यं प्रति प्रामाण्यम्)। कोऽयं विषयविषयिभावः ? यस्मिन्नयं पुरुषो नियुज्यते स विषयः। (कर्मणि प्रेरकत्वात् नियोगस्य, कर्मणो विषयत्वं नियोगस्य च विषयित्वम्। तथाच विधित एव कर्मणि प्रवृत्तिः इति प्रश्नः। उत्तरं तु, यस्मिन्नर्थे पुरुषो नियुज्यते स विषयः इति नैव कर्मणि प्रेरकतया विषयिभावः। किं तर्हि ? यत्र कर्मणि पुरुषो नियुज्यते कार्यं बोध्यते इति कार्यबोधनमेव हि पुरुषस्य नियोजनम्।

कर्मणि यागादौ कर्मभूतो नियोगः प्रतीयते, न पुनः कर्मण्येव प्रेरयति । एतच्च अपूर्वाधिकरणे वक्ष्यामः) । तस्मान्नैव विधिः कर्तव्यतामाह । विषयतया तु उपादत्ते । कस्मात् ? यद्यदुपादीयते तत्तद्विधेयं इति तन्त्रव्यवहारः (न पुनः यद्यत् कर्तव्यतया ज्ञाप्यते तत्तत् विधेयं इति मीमांसासिद्धान्ते व्यवहारः) । यत्तु उपादानहेतुतां प्रतिपद्यते तदधिकृतौ कारणम् (अभिचारस्तावत् अधिकारिविशेषणतया अधिकारे कारणम् । यश्चोपादाने हेतुः नासावुपादेयः । तेन अभिचारे नौपादानिकी प्रवृत्तिरिति सिद्धम् । यतः एवं अधिकारनिमित्तभूतं वैधमुपादानं नास्ति अत एव 'न हिंस्यात्' इति प्रतिषेधोऽवतरति) तस्मात् अधिकारनिमित्तं (अभ्यभिचारं) अङ्गीकृत्य एतदुक्तम् 'हिंसा हि सा, सा च प्रतिषिद्धा' इति । उपादानगतो हि प्रतिषेधः क्रत्वर्थः स्यात् (प्रतिषेध्यायाः प्रवृत्तेः क्रतुप्रवृत्त्यधीनत्वेन क्रतुसंबन्धात्) नाधिकारगतः (स्वतन्त्रत्वात् तत्र प्रवृत्तेः) 'न हिंस्यात् भूतानि' इति च अधिकारगतोऽयं प्रतिषेधः पुरुषार्थश्च । तस्मादभिचारस्य अनर्थतां प्रतिपादयितुं क्षमः, नाग्नीषोमीयादेः क्रत्वर्थत्वात् । अथ कस्मान्नोभयार्थः प्रतिषेधोऽयम् 'न हिंस्याद्भूतानि' इति ? (उत्तरम्) न हि एकस्य विधेः प्रयोक्तृत्वाप्रयोक्तृत्वे भवतः । अथ क्रत्वर्थ एवायम् (प्रतिषेधः प्रयुक्तिलाघवात्) कस्मान्न भवति ? (उत्तरमाह—) प्रयोक्तृत्वाप्रयोक्तृत्वयोः प्रयोक्तृत्वं श्रौतं अनपेक्षावगमात् । अप्रयोक्तृत्वं तु वाक्यान्तरपर्यालोचनया अवगतम् । न च 'न हिंस्याद्भूतानि' इति वाक्यान्तरावगतिर्भवति अनारभ्यविधानात् (प्रथमं हि लिङादयः कार्यं बोधयन्ति, तच्चानुष्ठापकम् । संनिहिते अधिकारविधौ वाक्यान्तरगता लिङादयश्चानुवादका एव) तस्मात् अधिकारावगत एवायं प्रतिषेधः (नोपादानगतः) । भवति च चोदनालक्षणः (श्येनविनियोगः) तद्विषयत्वात् श्येनविधेः । तस्मात् 'उभयमिह चोदनया लक्ष्यते' इत्येवमादि उपपन्नार्थं भाष्यम् ।

'ननु अशक्तमिदं सूत्रम्' इति लौकिकवैदिकवाक्ययोर्विवेकप्रदर्शनार्थम् । अथवा अर्थस्य सतः इति यथावाक्यमपि एकार्थत्वं संभवति इति प्रदर्शयितुम् (विध्यावृत्तिलक्षणो वाक्यभेदो नास्ति । अन्वयभेदमात्रं तु भवत्येवेति) ।

वि-- 'विचारविषयो धर्मो लक्षणेन विवर्जितः । मानेन वाऽथवोपेतस्ताभ्यामिति विचिन्त्यते ॥, लौकिकाकारहीनस्य तस्य किं नाम लक्षणम् । मानशङ्का तु दूरेऽत्र प्रत्यक्षाद्यप्रवर्तनात् ॥, चोदनागम्य आकारो ह्यर्थत्वे सति लक्षणम् । अत एव प्रमाणं च चोदनैवात्र नो कुतः ॥'

अत्रैव **गुरुमतमाह**-- 'यद्वा जिज्ञास्यवेदार्थः किं मन्त्राद्यवबोधितः । सिद्धार्थोऽप्यथ विध्येकगम्यः कार्यार्थ एव वा ॥, सिद्धेऽपि पुत्रजन्मादौ व्युत्पत्तेरुपपत्तितः । मन्त्रादिगम्यसिद्धस्य वेदार्थत्वेऽपि का क्षतिः ॥, हर्षहेतुबहुत्वेन व्युत्पत्तिः पुत्रजन्मनि । दुर्लभा सुलभा कार्ये वेदार्थोऽतः स एव हि ॥' तस्मात् कार्यरूप एव वेदार्थः ।

भाट्ट— विचिचारयिषितस्य धर्मस्य अलौकिकत्वेन प्रत्यक्षविषयत्वायोगात् तन्मूलकस्यानुमानादेस्तत्र सुतरामप्रवृत्तेः । अत एव लक्षणस्याप्यसंभवान्न धर्मविचारो युक्तः । **इति प्राप्ते**, लौकिकप्रमाणानामप्रवृत्तावपि अलौकिकानामेकत्रिंशतस्तत्सहकृतविधेरेकस्यैव वा प्रमाणत्वसंभवात् अप्रामाण्यस्य परतस्त्वेऽपि प्रामाण्यस्य स्वतस्त्वात् सप्रमाणक एव धर्मः । अत एव वेदैकज्ञाप्येष्टानिष्टसाधनताकत्वे धर्माधर्मत्वे तथात्वे सति बलवदनिष्टाननुबन्धित्वं वा धर्मलक्षणम् । बलवदनिष्टाननुबन्धित्वे सति यददृष्टद्वारा फलकरणं अदृष्टभिन्नं च स धर्म इति यावत् । वस्तुतो निषिध्यमानत्वमधर्मत्वम्, विधीयमानत्वमात्रं धर्मत्वम् । तच्च कृतिव्याप्यकरणेतिकर्तव्यताप्रभृतिषु उपादेयतापरपर्यायः प्रेरणारूपविधिविषयताविशेषः । स च अस्त्येव आग्नेयप्रयाजद्रव्यदेवतानीचैस्त्वादिषु । नास्ति च फलनिमित्तकर्तृकालादिषु । 'पञ्चमे ब्रह्मवर्चसकामस्य' इत्यत्र फलाय विधीयमानस्य कालस्य धर्मत्वाभावेऽपि न क्षतिः, तदाश्रयस्योपनयनस्यैव धर्मत्वात् । अभिचारार्थमुपादेयस्य श्येनादेस्तु धर्मत्वमिष्टमेव, तामसधर्मत्वेन पुराणादिषु तद्गणनात् । विवाहानृतवदनस्य तु न विधिविषयत्वम् । षोडशिग्रहणस्यातिरात्रे तु न निषेधः, तत्रत्यलिङो दोषाभावक्रतुवैगुण्यानापादकत्वलक्षकत्वेन प्रवर्तनानिवर्तनयोः

अबोधात् । बोधे वा शुभाशुभफलाक्षेपकविधिनिषेधविषयत्वे धर्माधर्मत्वे । शुभपदं क्रतूपकारस्वर्गादिजनकादृष्टसाधारणम् । अशुभपदं दुःखजनकादृष्टक्रतुवैगुण्यसाधारणम् । अभ्यनुज्ञाविधिविषयस्तु न धर्मो नाप्यधर्मः । अत एव पूर्वसूत्रे धर्मपदेन यावत्षोडशलक्षणीगतविचारविषयो लक्ष्यते । अपौरुषेयवाक्यतात्पर्यविषयीभूतवाक्यार्थान्वयित्वस्य लक्ष्यताऽवच्छेदकत्वात् । सगुणनिर्गुणोपासनविधिशेषत्वादिना क्रतुविध्यपेक्षितसंसार्यात्मस्वरूपवदेव ब्रह्मणोऽपीह विचार्यत्वमिष्टमेव । लक्ष्यताऽवच्छेदककोटिनिविष्टवाक्यार्थे संसर्गात्मकत्वं वा विशेषणीयम् ।

मण्डन— ‘(आदौ,) द्वितीयसूत्रेण जिज्ञासां कुरुतेऽधुना ।। प्रमाणाभासरूपादीन् संकरेण निरूपयन् ।’

शंकर-- ‘धर्मे मानं च चोदना ।’ २. ‘धर्मोऽर्थश्चोदनागम्यः ।’ ३.

* **धर्मलक्षणा** कार्यलक्षणया बाध्यते । बाल. पृ. १४३.

* **धर्मविचारशास्त्रम्** ‘चोदनालक्षणोऽर्थो धर्मः’ इत्यारभ्य ‘अन्वाहार्ये च दर्शनात्’ इत्येतदन्तं जैमिनिप्रोक्तं सूत्रजातम् । वि. १।१।१, * धर्मविचारशास्त्रं साक्षात् अध्ययनविधिप्रयुक्तं इति भाट्टाः, अध्यापनविधिप्रयुक्तमध्ययनम्, तत्प्रयुक्तं धर्मविचारशास्त्रं इति प्राभाकराः । १।१।१, * **धर्मविचारशास्त्रस्य** ‘स्वाध्यायोऽध्येतव्यः’ इति विधिः प्रयोजकः । १।१।१. * **धर्मविरोधे** अङ्गप्रधानयोः प्रधानस्यैव धर्मानुग्रहः । भा. १२।२।९।२५.

धर्मविषयकप्रमाणपरीक्षाप्रतिज्ञा । निमित्तपरीष्ट्यधिकरणम् ॥

तस्य निमित्तपरीष्टिः । १।१।३।३ ॥

भाष्यम्— उक्तमस्माभिः चोदनानिमित्तं धर्मस्य ज्ञानमिति । तत् प्रतिज्ञामात्रेणोक्तम् । इदानीं तस्य निमित्तं परीक्षिष्यामहे किं चोदनैवेति, अन्यदपीति । तस्मात् न तावन्निश्चीयते चोदनालक्षणोऽर्थो धर्म इति । तदुच्यते ।

श्लोवा— ‘प्रतिज्ञाव्यतिरेकेण भाष्यकारेण यद्यपि । वक्ष्यमाणा स्वपक्षस्य युक्तिः पूर्वं निदर्शिता ॥ १ ॥ प्रतिज्ञामात्रमित्येतज्जैमिनेर्मतमुच्यते । वृत्तिकारोऽधिकं वाऽपि भूतादि द्वारमब्रवीत् ॥ २ ॥

बृहती— तस्य निमित्तपरीष्टिः इति हेत्वभिधानावसरः कथ्यते । कथं पुनः कार्येऽर्थे चोदनैव निमित्तम् ? अन्यस्य प्रत्यक्षादेरसंबन्धात् । कथमसंभवः (तदुत्तरसूत्रे वक्ष्यामः) ।

ऋजु-- चोदनालक्षणसूत्रेण श्रुत्यर्थाभ्यां वेदार्थस्वरूपम्, तत्र च प्रमाणं प्रतिज्ञातम् । तत्र किं स्वरूपं तावत् भेदाभेदरूपेण कथ्यताम्, उत प्रमाणप्रतिज्ञायां हेतुः इति संशये प्रधानत्वात् स्वरूपस्य, तदेव भेदाभेदाभ्यां कथनीयं इति प्राप्ते, भेदाभेदनिर्णयस्य अनपेक्षत्वसव्यपेक्षत्वात् प्रामाण्ये हेत्वनपेक्षत्वमधुना कथनीयं इति सूत्रेण कथ्यते । तथा च भाष्यम् ‘इदानीं तस्य निमित्तं परीक्षिष्यामहे’ इति । तस्मात् अनपेक्षत्वरूपप्रामाण्यहेत्वभिधानावसरकथनं सूत्रेण क्रियते इति ।

शा— अनेन सूत्रेण चोदनाख्यस्य निमित्तस्य परीक्षणं अस्मिन् पादे वक्ष्यमाणम् ‘अथातः शेषलक्षणम्’ ‘अथ विशेषलक्षणम्’ इतिवत् सुखग्रहणार्थमनुकीर्त्यते ।

चन्द्रिका-- अयमत्र सूत्रार्थः, तस्य धर्मस्य ज्ञाने यन्निमित्तं प्रमाणं चोदनाऽभिधानम्, तस्य परीष्टिः परीक्षा कर्तव्या इति । ‘इषु गतौ’ इत्यस्माद्धातोः ‘इषेरनिच्छार्थस्य’ इति युचि विहिते ‘परेर्वा’ इति क्तिन्युचोर्विकल्पस्मरणात् युज्विधौ पर्येषणा इति रूपं क्तिन्विधौ तु परीष्टिः इति रूपं सिध्यति । अत्र धर्मप्रमाणं परीक्ष्यं न वेति संदेहे, प्रमाणोपदेशेनैव प्रमेयसिद्धेः किं परीक्षया इति पूर्वः पक्षः । नात्र सिद्धवत् लक्षणप्रकथनमात्रं किन्तु विचारशास्त्रत्वादस्य सर्वथा प्रमाणपरीक्षा कर्तव्या इति सिद्धान्तः ।

वि-- ‘धर्मस्य ज्ञापकं मानं यदुक्तं चोदनात्मकम् । एतत् किं न परीक्ष्यं स्यात् किंवा सम्यक् परीक्ष्यताम् ॥, मानोपदेशान्मेयस्य सिद्धत्वात् किं परीक्षया ।, मैवं विचारशास्त्रेऽस्मिन् परीक्षोपेक्ष्यते कुतः ॥’

गुरुमतमाह-- ‘आदौ परीक्ष्यो वेदार्थश्चोदनामानताऽथवा ।, वेदार्थस्य प्रधानत्वात् प्रथमं तत्

परीक्ष्यताम् ॥, चोदनामानतैवात्र प्रथमं साध्यतां गता । अनपेक्षतया तस्य यतो मुख्यत्वमाश्रितम् ॥ '

भाट्टे-- इदं सूत्रं उत्तरसूत्रेण सह एकाधिकरणत्वेन स्वीकृतम् ।

मण्डन— ' निष्कृष्याध्यायतात्पर्यं ब्रवीति सुखसिद्धये । '

शंकर-- ' न तन्मानापरीक्ष्यता । ' अपरीक्ष्यता न किन्तु परीक्ष्यमेव तन्मानम् । ४.

* **धर्मवोचनं** नाम साम अनृक्कम् । **बाल. पृ. ७२.**

* **धर्मशब्दः** अपूर्ववाची इति गौतमीयाः । अपूर्वसाधनयागादिवाची इति मीमांसकाः । **बाल. पृ. १.** * **धर्मशब्देन** यः पुरुषं निःश्रेयसेन संयुनक्ति स उच्यते । **भा.** १।१।२।२, * य एव श्रेयस्करः स एव **धर्मशब्देनोच्यते** । यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते । तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते । १।१।२।२ पृ. १७–१८.

* **धर्मशास्त्रातिक्रमेण** यत् क्रियते न तस्य (शब्दप्रवृत्तेः) निमित्तत्वं स्यात् यथा शूद्रकृतस्याधानस्य न आहवनीयादिप्रयोगनिमित्तत्वम् । **वा.** २।३।२।३ पृ. ५८२.

* **धर्मसंहिताः** प्रायेण मनुगौतमवसिष्ठादिप्रणीताः समानेष्वर्थेषु वर्तन्ते । **वा.** १।३।८।२४ पृ. २५६.

* **धर्मसाधारण्यस्य** सप्तमाद्ये निषेत्स्यमानत्वेन... । **सु.** पृ. ६३४.

* **धर्मसूत्रं** गौतमीयं छन्दोगैरेव परिगृहीतम्, वासिष्ठं बह्वृचैरेव, शङ्खलिखितोक्तं वाजसनेयिभिरेव, आपस्तम्बीयबौधयनीये तैत्तिरीयैरेव प्रतिपन्ने । **वा.** १।३।७।१५ पृ. २४४, * **धर्मसूत्राणां** सर्वेषां वर्णाश्रमधर्मोपदेशित्वात् धर्माणां चैकरूपप्रायत्वात् परस्परसंवादित्वं युक्तम् । १।३।८।२७ पृ. २८५.

* **धर्मिकल्पनातो धर्मकल्पनैव वरं** इति न्यायः । **संग्रहः.**

⧗ **धर्मिकल्पनातो धर्मकल्पना वरीयसीति न्यायः** । धर्मकल्पनायाः श्रेष्ठत्वं च लाघवप्रयुक्तमिति । स्पष्टोऽयम् । **साहस्री.** ४२.

⧗ **धर्मिकल्पनातो धर्ममात्रकल्पना लघीयसी इति न्यायश्चेह बोध्यः ।** ङकारादयो हि धर्मिण एव त्वया पाठ्याः, मया तु उभयपठनीयस्य ईकारस्य कलत्वमात्रं कल्प्यमिति । **शब्दकौस्तुभः** १ अन्ते. * ननु वह्निनिष्ठा जातिः प्रमाणसिद्धा । तथा च ' **धर्मिकल्पनातः**' इति **न्यायात्** तस्या एव अवच्छेदकत्वं कल्प्यते न शक्तिः । **शक्तिवादे रुचिदत्तः** न्यायचिन्तामणिटीकाकारः.

⧗ **धर्मिभेदाद्धर्मभेदो लघीयान्** । भेदश्रुत्यवष्टम्भेऽपि ' धर्मि० यान् ' इति **न्यायेन** वागादीनां संभूय देहचालनादिहेतुसामान्यव्यापारसंभवात् न प्राणाख्यं पदार्थान्तरं कल्प्यम् (पूर्वपक्षे) । **न्यायनि.** २।४।५।९ ब्रसू..

* **' धवं च खदिरं च** द्वावानय ' इत्यादौ वाक्ये यथा क्रमाभिहितयोरपि धवखदिरयोर्द्वित्वान्वयः तथा समासेऽपि धवखदिराभ्यां स्मृत्यारूढाभ्यां द्वित्वान्वयसंभवः । **रत्न.** ६।१।५।२२ वर्णकं २, * **' धवखदिरावानय '** इति वाक्ये यथा युगपद्वचनताभावेऽपि चकारवशादेव इतरेतरयोगो गम्यते तथा ' धवखदिरौ ' इति चार्थे विधीयमानेन द्वंद्वेनैव तत्सिद्धेर्न युगपदभिधानं कल्प्यम् । ६।१।५।२२ वर्णकं २.

* **धातुः** (अभिधात्री श्रुतिः) द्विविधः भूवादिकः सनाद्यन्तश्च । **बाल. पृ. ४१.** * धातुः इति स्तरणचयः अभिधीयते । (स्तरणार्थां बर्हिर्मुष्टयः स्तरणचयः) यथा—लूनस्य बर्हिषः त्रिधातु पञ्चधातु वा इति सकलस्य स्तरणविधानात् । **वा.** ३।८।१७।३२, * धातुः यस्य कारकस्य अवान्तरव्यापारं प्राधान्येनाह, स कर्ता । ३।४।४।१३ पृ. ९१७. * **धातवः** अनेकार्थाः । ' क्रियावाचित्वमाख्यातुमेकैकोऽर्थो निदर्शितः । प्रयोगतोऽनुमातव्या अनेकार्था हि धातवः ॥ ' इति स्मृतिः । **सु.** पृ. ११३५. * धातवोऽपि भावनां न मुञ्चन्ति तथा चाहुः ' करोतिरर्थेष्विव सर्वधातून् ' इति । (विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरंदरोत्थः । नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥) **वा.** २।१।१।१ पृ. ३८०, * धातवो नामशब्दाश्च बहव एव प्रतिदेशं अर्थभेदेषु व्यवस्थिता दृश्यन्ते । तथा चोक्तम् ' शवतिर्गतिकर्मा कम्बोजेष्वेव दृष्टो विकारापन्नं आर्याः प्रयुञ्जते 'शवम्' इति

मृतशरीराभिधानात्' इत्यादि । १।३।४।८. * धातवः । प्रकृतयः एव एकेषु जनपदेषु प्रयुज्यन्ते, विकृतय एव एकेषु इत्युपक्रम्य निरुक्तकृता (प्रकृतय एवैकेषु भाष्यन्ते विकृतय एवैकेषु इति निरुक्तम् २।१।२ पृ. १२७) शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते, विकारमस्य आर्याः (आर्येषु इति मूले) भाषन्ते 'शवः' इति इत्युक्तम् । कम्बोजेष्वेव जनपदविशेषेषु शवतिर्धातुः गतिवाची दृष्टः । आर्यास्तु जनपदविशेषाः 'ऋदोरप्' इति अप्–प्रत्ययान्तत्वेन विकारापन्नं शवतिधातुं न गतौ प्रयुञ्जते, शवशब्देन मृतस्याभिधानात् । महाभाष्यकृता तु 'विकारापन्नमार्या भाषन्ते' इति पाठान्तरमुदाहृतम् । (पृ. २९) मुद्रितमहाभाष्ये सकैयटे तु 'विकारमेनमार्या भाषन्ते' इति पाठः । न केवलं शवतिरेव देशविशेषे व्यवस्थितः, किन्तु अन्येऽपि बहवो धातवो नामशब्दाश्च व्यवस्थिता एव दृश्यन्ते । प्राच्येषु हि जनपदेषु दातिर्धातुः लवनार्थो दृश्यते, लुनाति इत्यस्मिन्नर्थे द्यति इति प्रयोगात् । तमेव दात्रं इति ष्ट्रन्–प्रत्ययान्तत्वेन विकारापन्नं उदीच्याः प्रयुञ्जते । 'प्राच्येषु गच्छतीत्यर्थे मध्यमेषु च रंहतिः ('मध्यमेषु वरं हति' इति सुधापाठस्तु अशुद्धः) । हन्ततिश्च (हम्मतिश्च इति महाभाष्यपाठ एव अत्र ग्राह्यः) सुराष्ट्रेषु गमिस्त्वार्येषु भाष्यते ॥' सु. पृ. २०८, * धातवः यथा धात्वर्थं न व्यभिचरन्ति तथा भावनामपि । पृ. ५६५. * धातवः विचित्रशक्तयः प्रयोज्यप्रयोजकोभयव्यापारवचनत्वेन भावार्थाधिकरणे दर्शिताः। तेषां सहकारिकारणसंनिधानात् कदाचित् काचित् प्रसिद्धिव्यतिरेकेणापि शक्तिरभिव्यज्यते। वा. ३।४।११।३१ पृ. ९६८, * धातुं इक्श्तिबन्तं अर्थेऽपि क्वचित् प्रयुञ्जते यजिः यजतिः इति च । तत् शब्दे अभिहिते लक्षणया अर्थप्रतीतिः इत्यवगन्तव्यम् । २।१।१।१पृ. ३७९, * धातोः अनुवादता—'सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे । विधिशक्त्युपसंक्रान्ते स्याद्धातोरनुवादता ॥' १।४।२।३ पृ. ३२८. * धातोः उद्देश्यपरत्वे संभवति उपपदस्य अन्याय्यत्वात् । भाट्ट. ७।१।१. * धातोः एकस्य अर्थभेदेन सकर्मकत्वाकर्मकत्ववत् तत्पर्यायाणामपि तदव्याहतम् । मणि. पृ. १०९. * धातोः द्व्यर्थस्य भेदेनार्थे कथ्यमाने यागेन इति विशेषरूपं करणात्मना निष्कृष्टम्, इतरत्तु भावनात्मकं सामान्यरूपं शब्दान्तरे भावयेत् इति अनेन कथ्यते । वा. २।१।१।१ पृ. ३८०. * धातोः फलभावनाकरणवाचित्वे श्येनादिशब्दानां तत्सामानाधिकरण्यात् नामधेयता सिध्यति । सु. पृ. ६२१, * धातूनां अनेकार्थत्वात् । स्त्रीसंयुक्तस्य गमेः मैथुनवाचित्ववत् स्पर्शवाचिनोऽपि आलभतेः प्राणिसंयुक्तस्य यागवाचित्वकल्पना न विरुद्धा । पृ. ९३३. * धातूनां अस्ति अनेकार्थत्वम् । वा. ३।२।९।२५ पृ. ७८३. * धातूनां उत्पत्त्यादिरूपं फलं तदनुकूलो व्यापारश्च वाच्यः इति वैयाकरणाः । मणि. पृ. १०० । फलमेव धात्वर्थः । अनुकूलव्यापारः प्रत्ययार्थः इति मण्डनः । पृ. १०१ । व्यापार एव धात्वर्थः इत्यन्ये । १०२ । व्यापारो धात्वर्थः इति रत्नकोशकारः । १०७. * धातूनां विचित्रशक्तित्वम् 'कदाचिदभिधीयमानकर्मशक्त्याक्षिप्तप्रयोज्यव्यापारः स्वयमाक्षिप्तप्रयोज्यव्यापारो वा' इत्यादि भावार्थाधिकरणवार्तिके दर्शितम् । (वा. पृ. ३७७–७८) । सु. पृ. १५०५.

* 'धात्वर्थोऽपि यथाऽऽख्याते सत्त्वभूतः प्रतीयते । सत्त्वाभिधायिना नाम्ना तादृङ्नैवोपनीयते ॥' वा. २।३।११।२४ पृ. ६१६, * धात्वर्थोऽपि स्वयमितिकर्तव्यताकाङ्क्षः सन् गुणार्थमपि प्रस्थितामेतां (इतिकर्तव्यतां) ग्रहणसमर्थः सन् किमिति परित्यजेत् । ६।३।१६।४३ पृ. १०६९, * धात्वर्थः असत्त्वभूतः अत्र (मासं जुहोति) जुहोतिना विधेरुपनीयते । न च तादृशस्यैव द्रव्यभूतलिङ्गसंख्यायोग्यार्थाभिधायिभिः अग्निहोत्रादिपदैः अभिधीयमानत्वं इत्यप्रत्यभिज्ञानात् सोऽपि भिद्यते । २।३।११।२४ पृ. ६१६, * धात्वर्थ एव न भाव इत्युक्तम् । ३।४।४।१२ पृ. ९०३, * धात्वर्थः तदनुरक्ता च भावना सर्वत्र आख्याते विज्ञायते । २।१।१।१ पृ. ३७५, * धात्वर्थः तावत् प्रकृत्यैव साध्यात्मकः, विशेषतस्तु आख्यातगतेन धातुना उच्यमानः । स यदि फलसाधनत्वेन चोद्यते, ततः असिद्धरूपत्वात् तस्य साधनाकाङ्क्षायां सत्यां नामपदं गुणविधित्वेन नामधेयत्वेन वा उभयथाऽपि दृष्टेनैव तादर्थ्यं लभते । ...'साध्या-

त्मकोऽपि धात्वर्थो यदा नाम्नाऽभिधीयते । तदा द्रव्यवदेवासौ निष्पन्नात्मा प्रतीयते ॥' यद्यपि वस्तुस्वरूपेण धात्वर्थः साध्यः, तथापि नामपदेनोच्यमानो लिङ्गसंख्यायोगित्वात् सिद्धरूपोऽभिधीयते । अभिधानकृता च आकाङ्क्षोत्पत्तिः, न वस्तुकृता । तस्मात् युक्ता धातोरेव आकाङ्क्षा, न नाम्न इति । २।१।१।१ पृ. ३८८–८९. ❋ धात्वर्थः न क्रिया मीमांसकमते । **सोम.** ३।४।८ पृ. २६७. ❋ धात्वर्थः न फलमात्रम्, नापि व्यापारमात्रम्, त्यजिगम्योः पर्यायतापत्तेः । अतः फलव्यापारौ धात्वर्थः । **मणि.** पृ. १०४. ❋ धात्वर्थः पाकः–पक्तिः–पचनं इत्यादिशब्दैर्व्यवह्रियमाणो लिङ्गसंख्याकारकयोग्यः सिद्धस्वभावः । 'करोति' इति शब्देन व्यवह्रियमाणो लिङ्गसंख्याऽऽद्यपेतः साध्यस्वभावः । तत्र सिद्धस्वभावद्योतनाय यथा घञ्प्रत्ययादयो विहिताः, तथा साध्यस्वभावद्योतनाय आख्यातप्रत्ययविधिः । **वि.** २।१।१ वर्णकं २. ❋ **धात्वर्थाः** यस्यां भावनायां करणं भवन्ति, तस्यां ते वस्त्वन्तरनिरपेक्षाः पश्चात्तनं अरुणैकहायनीन्यायलभ्यं इतिकर्तव्यतासंबन्धं लभन्ते ; यस्यां पुनः गुणानां करणत्वम्, तस्यां धात्वर्थविशेषाद्विना करणत्वानुपपत्तेः साध्यभूतो धात्वर्थः अपरः अपेक्षितव्यः । नहि व्यापारसामान्यस्य गुणैरुत्पत्तिः शक्या । **वा.** ३।६।१६।४३ पृ. १०६९, ❋ **धात्वर्थमनुपनीय** गुणः स्वतन्त्रः इतिकर्तव्यतां ग्रहीतुं न शक्नोति, इति धात्वर्थमाश्रयति । ३।६।१६।४३ पृ. १०६९, ❋ धात्वर्थमुल्लङ्घ्य गुणाभिमुखं गच्छन्ती इतिकर्तव्यता न शक्नोति गन्तुं इति धात्वर्थमुखे तावत् पतति । ३।६।१६।४३ पृ. १०६९. ❋ धात्वर्थं प्रति भावनायाः विशेष्यत्वम् 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययः प्राधान्येन' इति स्मृतिवशादेव अविवादम् । अत एव न तस्य प्रत्ययार्थं प्रति प्रकारता । विशेष्यगामित्वे संभवति प्रकारगामित्वस्य अन्याय्यत्वात् । **रहस्य.** पृ. ४६–४७. ❋ 'अनूद्य चापि धात्वर्थं गुणः सर्वो विधीयते' । **वा.** १।४।३।४ पृ. ३३४, ❋ **धात्वर्थेनैव** भावनोपसर्जनधात्वर्थनिष्पत्त्यर्थत्वात् कारकाणां संबन्धसिद्धिः । २।१।१।१ पृ. ३८२, ❋ धात्वर्थेन फलकरणभूतेन अन्यथाऽनुपपत्त्या अपूर्वं भाव्यते । २।१।१।१ पृ. ३७६. ❋ धात्वर्थेन हि सा (करणापेक्षा) शीघ्रं निवर्त्यते । **वा.** २।२।११।२६ पृ. ५४९ । धात्वर्थस्य व्यापाररूपत्वात् साक्षात् कारकत्वोपपत्तेः भावनाऽवच्छेदकत्वोपपत्तेश्च शीघ्रं करणाकाङ्क्षानिवर्तकत्वम् । **सु.** पृ. ८४७, ❋ **धात्वर्थस्य** अनिष्पन्नस्य करणत्वायोगः । पृ. ७६७, ❋ धात्वर्थस्यैव करणत्वम् । **ननु** आख्यातस्य भावनावाचिनः फलपदान्वयेऽपि करणाकाङ्क्षायां नामार्थस्यापि करणत्वोपपत्तेः कथं धात्वर्थस्य करणत्वसिद्धिः ? **उच्यते** । धात्वर्थानुरक्तभावनावाचितया धात्वर्थसंबद्धानां स्वर्गोत्पादनाभिधायित्वात् प्रत्यासत्तेः धात्वर्थस्यैव करणत्वावगतिः इति । **ननु** एकप्रत्ययोपादानश्रुत्या धात्वर्थनिरपेक्षायाः भावनायाः विध्यन्वयात् स्वर्गादिपुरुषार्थफलत्वेऽवगते करणाकाङ्क्षायामपि निष्पन्नत्वेन अयोग्यत्वात् प्रत्यासन्नमपि धात्वर्थं भाव्यांशवत् करणांशादपि प्रच्याव्य नामार्थेनैव अन्वयावगमात् कुतो धात्वर्थस्य करणत्वम् ? **उच्यते** । प्रकृतिप्रत्ययपौर्वापर्यनियमात् शुद्धभावनाऽनवगतेः अनुष्ठानाशक्तेश्च धात्वर्थानुरक्ताया एव फलोद्देशेन विधीयमानत्वात् विधिगम्यत्वाच्च करणत्वस्य 'केन भावयेत् स्वर्गम्' इत्यपेक्षायां यागादिना इत्येवान्वयो युक्त इति । पृ. ५५१. ❋ धात्वर्थस्यैव करणत्वादिसंसर्गेण भावनायां प्रकारता इति मतम् । धातुलक्षितकरणत्वादेः भावनायां प्रकारता इति मतान्तरम् । **मुरारि.** (भा.) पृ. १४५०. ❋ धात्वर्थस्यैव भावनाकरणत्वं न द्रव्यगुणयोः । **मीन्या.** ❋ धात्वर्थस्य करणत्वेनैवान्वयः इति न नियमः 'दध्ना जुहोति' इत्यादौ साध्यत्वेनान्वयात् । 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादौ चाश्रयत्वेनान्वयात् । **मीन्या.** ❋ धात्वर्थस्य करणत्वप्रतिपत्तिः अपूर्वभावनायां प्रत्यासत्तेः । अतस्तेनैव फलकरणभूतेन अन्यथाऽनुपपत्त्या अपूर्वं भाव्यते । **वा.** २।१।१।१ पृ. ३७६. ❋ धात्वर्थस्य कर्तुः अवाच्यत्वे अशाब्दत्वापत्त्या वाक्यार्थानन्वयप्रसङ्गात् प्राधान्यासिद्धेः न धात्वर्थस्य साक्षात् पुरुषार्थत्वापत्तिः । **सु.** पृ. १३८४. ❋ धात्वर्थस्य कर्मत्वकरणत्वान्यतरसंसर्गेणैव सर्वत्र भावनायामन्वयः । **रहस्य.** पृ. ५३. ❋ धात्वर्थस्य कारकत्वेऽपि

तदवच्छिन्नाया भावनायाः निरूपणाशक्तेः विध्ययोगात् पदश्रुत्यैव धात्वर्थविधिः । सु. पृ. १००६. * धात्वर्थस्य च धर्माणां च नहि परस्परेण आकाङ्क्षा विद्यते । प्रत्ययार्थेन हि इतिकर्तव्यता आकाङ्क्ष्यते कर्तव्यं कथं इति । न यजिः कीदृशः इति । भा. ९।१।१।१ पृ. १६३९. * धात्वर्थस्य नित्यं करणभूतस्य न कदाचित् प्राधान्यं आख्यातेषु भावप्रधानत्वात् इति स्थितं भावार्थाधिकरणे । वा. ३।४।४।१२ पृ. ९०३, * 'धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि'। ३।४।४।१२ पृ. ९०२.

* धात्वर्थस्य भावनायां प्रकारत्वेन अन्वयः । प्रत्ययार्थप्राधान्यस्मृतेः संकोचे प्रमाणाभावात् । भावप्रधानमित्यस्य आख्यातार्थेषु अनेकेषु कस्य प्राधान्यं इत्यपेक्षिते भावपदवाच्यभावनाप्रधान्यं इत्यपेक्षितार्थविधायकत्वोपपत्तौ प्रत्ययार्थप्राधान्यस्मृतिसंकोचानुपपत्तेः । अतो निरुक्तस्मृतौ भावपदेन वैयाकरणपरिभाषितधात्वर्थस्य न ग्रहणं इत्युक्तमेव । न च प्रत्ययार्थप्राधान्यस्मृतेः सुबाद्यर्थलिङ्गसंख्यादेः प्रकृत्यर्थं प्रति प्रकारतया संकोचावश्यकत्वे यत्र करणत्वादौ प्रमाणान्तरेण प्रकृत्यर्थं प्रति प्राधान्यं प्रमितम्, तदनुवादमात्रतया भावनाविषयेऽपि बाधकाभावः (इति वाच्यम्)। 'प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन' इत्येकवचनश्रवणेन प्रत्ययार्थत्वसामानाधिकरण्येन प्रकृत्यर्थं प्रति प्राधान्यनियमात् सुबाद्यर्थलिङ्गसंख्यादीनां अप्राधान्येऽपि क्षतिविरहात् । वस्तुतस्तु लिङ्गसंख्यादीनामपि प्रत्ययार्थान्तराणां न प्रकृत्यर्थप्रकारता, अपितु समानाभिधानश्रुत्या करणत्वादिरूपप्रत्ययार्थान्तरं प्रत्येव इति वक्ष्यते । अतः सिद्धं धात्वर्थस्य भावनायां प्रकारतेति ।

धात्वर्थश्च क्वचित् शक्यार्थे एव प्रकारः, यथा 'सोमेन यजेत' इत्यादौ । क्वचित् लक्ष्यार्थे एव यथा 'अग्नीषोमीयं पशुमालभेत' इत्यादौ यागः । लक्ष्यार्थोऽपि क्वचित् शक्यार्थयुक्तः यथा 'पृष्ठैरुपतिष्ठते' इत्यादौ । आत्मनेपदानुरोधेन समीपस्थितिरूपशक्यार्थविशिष्टमभिधानम् । वस्तुतस्तु 'सोमेन यजेत' इत्यादौ तत्तद्विधिषु अपि विजातीययागत्वादिनैव लक्षणा इति शक्यार्थान्वयः अन्यत्रानुसंधेयः । तस्य च कृतौ संसर्गः नानुकूलत्वम्, 'पचति, पाकं करोति' इति पाककर्मत्वस्यैव विवरणबलेन संसर्गत्वप्रतीतेः । अत एव 'ओदनं पचति' इत्यादौ 'पाकेन ओदनं करोति' इति विवरणात् पाककरणत्वस्यापि प्रतीतेः तस्यापि संसर्गत्वम् । अतश्च कर्मत्वकरणत्वान्यतरसंसर्गेणैव सर्वत्र भावनायां धात्वर्थस्य अन्वयः । यद्यपि कृतिं प्रति पाकस्य करणत्वं बाधितं कृतिसाध्यत्वात् पाकादेः, तथापि स्वनिष्ठकरणत्वनिरूपकौदनोद्देश्यकत्वसंबन्धेन पाकस्य कृतावन्वयात् करणत्वस्यापि संसर्गघटकतया संसर्गत्वोपपत्तिः । अस्ति च ओदनस्यापि कृतौ उद्देश्यताऽऽख्या विषयता इति नैतादृशसंसर्गबाधः । तत्र च यत्र विध्यश्रवणम्, तत्र द्वितीयान्तपदाद्यश्रवणे 'पचति चैत्रः' इत्यादौ धात्वर्थस्य इष्टसाधनत्वाज्ञानेऽपि तस्य कर्मत्वमेव । आख्यातोपात्तभावनायाः करोत्यर्थतया तद्वदेव सकर्मकत्वनियमात् । अत एव अकर्मकधातुस्थलेऽपि आख्यातोपात्ताया भावनायाः सकर्मकत्वमेव । अत एव तस्याः तदाकाङ्क्षायाम् 'स्वास्थ्यकामः शयीत' इत्यादौ कामपदोपात्तस्वास्थ्यादेरेव कर्मत्वेन अन्वयः, स्वर्गकामपदेनेव लक्षणया स्वर्गादेः । धातुस्तु अकर्मक एव । अत एवात्र न भावनाकर्मणि द्वितीया । सा तु धात्वर्थकर्मण्येव । सकर्मकधातुस्थले यथा 'व्रीहीनवहन्ति' इत्यादौ । तत्र तेषां प्रथमतो भावनायां कर्मत्वेन अन्वयेऽपि पार्ष्ठिकं धात्वर्थेऽपि कर्मत्वम्, इति तेषां धातूनां सकर्मकत्वोपपत्तिः । अतो भावनायाः नित्यसकर्मकत्वात् 'पचति चैत्रः' इत्यादिनिरुक्तस्थले भावनायाः कर्माकाङ्क्षायां समानपदश्रुत्या धात्वर्थस्यैव कर्मत्वम् । लौकिकवाक्यत्वाच्च तस्य वैयर्थ्येऽपि न दोषः । वेदे तु विध्यन्तरैकवाक्यत्वादिना स्तावकत्वाद्यसंभवेन स्वाध्यायविध्यवगतप्रयोजनवत्त्वानुरोधेन लडादेरेव लेट्त्वं लेडर्थकत्वं वा लक्षणया परिकल्प्य भावनायाः स्वर्गादिभाव्यान्तरपरिकल्पनया धात्वर्थस्य तत्र करणत्वेन अन्वयः । विधेः प्रवर्तकत्वान्यथाऽनुपपत्त्या तत्समभिव्याहृतायां भावनायां इष्टभाव्यकत्वावश्यम्भावात् । 'घटं पटं चानय' इत्यादौ चकारं विना कर्मद्वयान्वयादर्शनात् करोतेरिव आख्यातोपात्तभावनाया अपि एककर्मकत्वनियमेन यागादेरपि तस्यां कर्मत्वानुपपत्तेश्च । अत एव यत्र विधिसमभिव्याहारस्य सत्त्वे असत्त्वे वा द्वितीया-

ऽऽदिना भाव्यान्तरं निर्दिष्टं यथा 'व्रीहीनवहन्यात्' 'ओदनं पचति' इत्यादौ, तत्र धात्वर्थस्य करणत्वमेव। यत्र तु तादृशस्थले अप्राप्तकरणान्तरसत्त्वम्, धात्वर्थस्य च प्रकरणादिना प्राप्तिः यथा 'गोदोहनेन पशुकामस्य प्रणयेत्' 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादौ तत्र आश्रयतया प्रकरणप्राप्तधात्वर्थानुवादमात्रम्। साधुत्वसिद्ध्यर्थं धातुः। न तु तदर्थस्य करणत्वेन अन्वयः, न वा आश्रयत्वेन, कर्मत्वातिरिक्तस्य आश्रयत्वस्य निर्वक्तुमशक्यत्वेन भावनायां इन्द्रियरूपकर्मावरुद्धायां होमस्यापि कर्मत्वेन अन्वये एककर्मकत्वभङ्गापत्तेः। अत एव अनेकोद्देश्यनिमित्तवाक्यभेदेऽपि एककर्मकत्वभङ्ग एव दूषकताबीजमुक्तं कौस्तुभादौ।

एककर्मकत्वं च न एककर्मत्वकत्वं एककर्मत्वाश्रयकर्मकत्वं वा 'सर्वेभ्यो दर्शपूर्णमासौ' 'घटान् आनय' इत्यादौ तदनापत्तेः। तत्र पुत्रादिवृत्तिकर्मत्वानां कर्मत्वाश्रयपुत्रादीनां वा अनेकत्वात्। नापि एककर्मत्वावच्छेदकत्वं 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ 'व्रीहीन् प्रोक्षति' इत्यादौ च तदनापत्तेः। तत्र पुत्रत्वपशुत्वादीनां तदपूर्वसाधनत्वानां च कर्मताऽवच्छेदकानां भेदात्। किन्तु एकबोधविषयकर्मत्वपर्याप्त्यधिकरणताऽवच्छेदकधर्मवत्त्वं इत्युक्तं कौस्तुभे। निरुक्तस्थलेषु च सर्वत्र कर्मत्वपर्याप्त्यधिकरणताऽवच्छेदकधर्माणां एकेन पदेन एकस्यैव समूहालम्बनात्मकस्य बोधस्य जननात् एककर्मकत्वोपपत्तिः। 'अध्वर्युयजमानौ वाचं यच्छतः' इत्यत्र च अध्वर्युत्वयजमानत्वयोः कर्मत्वादिकरणताऽवच्छेदकयोः एकबोधविषयत्वाभावात् द्विकर्मकत्वापत्तिः, अतः पर्याप्तीति। तत्र द्वंद्वोत्तरविभक्त्या देवतात्वादेरिव कर्मत्वादेरपि व्यासज्यवृत्तित्वावसायात् तत्पर्याप्त्यधिकरणताऽवच्छेदकधर्मस्य अध्वर्युयजमानोभयत्वस्य द्वंद्वजन्यैकबोधविषयत्वेन एककर्मत्वोपपत्तेः। उपपादितं चैतत् कौस्तुभादौ। एवं 'शुक्लं घटमानय' इत्यादौ शुक्लस्य घटे अभेदान्वयात् पदद्वयेन घटपदेनैव वा शुक्लगुणविशिष्टघटलक्षणात् एककर्मत्वोपपत्तिः। एवं 'घटं पटं चानय' इत्यादौ इतरेतरयोगार्थकचकाररूपतात्पर्यग्राहकानुरोधेन द्वितीयाऽन्तपदद्वये लक्षणया तदुपपत्तिः। यथा च एवं सति निमित्तद्वयस्थले उद्देश्यानेकत्वनिमित्तकवाक्यभेदस्य दूषकताबीजं एककर्मकत्वभङ्गापत्तिः, तथा कौस्तुभे व्यक्तम्। तत् सिद्धं यत्र द्वितीयाऽऽदिना भाव्यान्तरं भावनायां अन्वययोग्यमुपात्तम्, तत्र न धात्वर्थस्य कर्मत्वम्। यत्र तु तन्नोपात्तम्, धात्वर्थस्य च इष्टसाधनत्वं प्रमाणान्तरेण प्रमितम्, तत्र स्ववाक्यविधेयगुणान्तरसत्त्वे धात्वर्थस्य कर्मत्वमेव यथा 'दध्ना जुहोति' इत्यादौ। न चैवम् 'जुह्वा जुहोति' इत्यादौ जुहोतेः सकर्मकत्वात् कर्मान्तरावश्यम्भावेन भावनायाः द्विकर्मकत्वापत्तिः, सकर्मकस्यापि भावाख्याते इव कर्माविवक्षोपपत्तेः। एतादृशेऽपि विषये यदि तृतीयाऽन्तनामधेयश्रवणं तदा करणत्वमेव, यथा 'समे दर्शपूर्णमासाभ्यां यजेत' 'उच्चैः प्रवर्ग्येण' इत्यादौ। यत्र तु तादृशगुणश्रवणाभावः, तत्र धात्वर्थस्यैव कर्मत्वेन प्रयोजनान्तरार्थं अनुवादः यथा विद्वद्वाक्ययोः। तदभावे (प्रयोजनान्तराभावे) तु 'तनूनपातं यजति' इत्यादौ कर्मान्तरमेव करणत्वेन इत्यादि आकरे व्यक्तम्। यत्र तु नेष्टसाधनत्वं प्रमितम्, न वा स्ववाक्ये च उद्भिदादिवत् तृतीयाऽन्तनामधेयश्रवणं यथा 'सोमेन यजेत' 'अग्निहोत्रं जुहोति' इत्यादौ, तत्र स्ववाक्ये इष्टविशेषानवगमेऽपि विधिबलेन भावनायाः इष्टभाव्यकत्वावगमात् इष्टसामान्यस्यैव तत्र भाव्यत्वमङ्गीकृत्य धात्वर्थस्य करणत्वमेव। 'अग्निहोत्रम्' इत्यत्र द्वितीयाऽपि तत्र करणत्वलक्षणार्थैव इति सांप्रदायिकाः। एतादृशे विषये समानपदश्रुत्या भावनापेक्षितं कर्म धात्वर्थ एव सुतरां अग्निहोत्रं इति द्वितीयाऽन्तश्रवणे। न च इष्टसाधनत्वेन अज्ञातस्य कर्मत्वानुपपत्तिः, अनीप्सितकर्मत्वेन अन्वयोपपत्तेः। न च विधेः प्रवर्तकत्वव्याघातः, विध्यवगतेष्टभाव्यकत्वज्ञानस्य प्रवृत्तिं प्रति कारणत्वेऽपि शाब्दबोधं प्रति अकारणत्वात् तदभावेऽपि होमकर्मकभावनाशाब्दज्ञानोपपत्तेः। न च भाव्यत्वेन अन्वितस्य तस्य भाव्यान्तरानाकाङ्क्षत्वात् फलवाक्येऽपि स्वर्गसाधनत्वबोधानापत्तिः, साधनत्वेन अन्वितस्य अर्थात् विध्यनुरोधेन कृतिसाध्यत्वज्ञानवत् कृतिसाध्यत्वेन बुद्धस्यापि विध्यपेक्षाऽनुरोधेनैव इष्टविशेषसाधनतया वाक्यान्तरेण विश्वजिन्न्यायेन वा बोधोपपत्तेः। अतः 'उत्पत्तिवाक्ये धात्वर्थस्य कर्मत्वेनैव अन्वयः' इति

प्राभाकरोक्तमपि युक्तं इति **तर्करसिकाः** । सर्वथा सिद्धं धात्वर्थस्य कर्मत्वकरणत्वान्यतरसंसर्गेण भावनायां प्रकारता इति । **सांप्रदायिकास्तु** धातुना स्वार्थवृत्तिकर्मत्वकरणत्वान्यतरत् लक्षणया प्रतिपाद्यते । तस्यैव स्वनिरूपकत्व–स्वनिरूपकोद्देश्यकत्वान्यतरसंसर्गेण भावनायामन्वयः । न तु कर्मत्वादेरपि संसर्गत्वम् । तथात्वे 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति साहित्यरूपान्वयानुशासनवैयर्थ्यापत्तेः । नहि पदार्थानुशासनप्रवृत्तानां तेषां अन्वयानुशासकत्वं युज्यते । अतः कर्मत्वकरणत्वादिरूपान्वयोऽपि वृत्त्यैव पदार्थविधया भासते । अत एव ज्योतिष्टोमेन इति तृतीयाऽपि पदार्थविधया भासमानकरणत्वानुवादिका इति संगच्छते । विशेषणविशेष्ययोः प्रकारतया भासमानकारकत्वस्य औत्सर्गिकत्वात् इत्याहुः । तत् सिद्धं धात्वर्थस्य सर्वत्र भावनायां प्रकारता इति । सा परं आख्यातोपात्ता कृदाद्युपात्ता च लिङ्गानन्वयिनी इति वक्ष्यते । तेन वस्तुपदोपात्तायां भावनायां नान्वयः । **रहस्य. पृ. ५२–५७.**

* धात्वर्थस्य यथा करणत्वसाध्यत्वलक्षणरूपद्वयेन अन्वयो न संभवति, एवं विषयत्वकरणत्वरूपद्वयेनापि अन्वयो न संभवति न्यायसाम्यात् । **सोम. १।४।४ पृ. ६७.** * धात्वर्थस्य विषयत्वेन करणत्वेन च अन्वयमिच्छन्ति **प्राभाकराः** । तथाहि, प्रवृत्तिहेतुभूतकार्याभिधानं लिङादीनां व्युत्पन्नम् । प्रवृत्तिहेतुत्वं च विलक्षणकार्यस्यैव, कार्यसामान्यज्ञाने प्रवृत्त्यदर्शनात् । एवं च विशेषतः कार्यप्रतिपत्त्यर्थं अवच्छेदकापेक्षायां धात्वर्थः अवच्छेदकतया संबध्यते । यद्यपि धात्वर्थः साक्षात् कार्यमवच्छेत्तुं न क्षमते, तथापि यागकृतिसाध्यं अपूर्वं इत्येवं कृत्यवच्छेदद्वारा कार्यं अपूर्वं अवच्छेत्तुं शक्नोति इति धात्वर्थः अवच्छेदकत्वेन संबध्यते । अवच्छेदकत्वमेव विषयत्वम् । इति धात्वर्थस्य यागादेः लिङाद्यर्थे कार्ये प्रतिपत्त्यनुबन्धितया विषयत्वेन अन्वयः । तथा कार्यम्, कृतिसाध्यम्, भाव्यं इति पर्यायाः । ततश्च भाव्यरूपापूर्वोद्देशप्रवृत्ता या कृतिः सा भावना इत्युच्यते । सा च क्रियात्वात् करणमन्तरेण अनुपपन्ना इति कृतिसाध्यलक्षणकार्यस्य स्वनिष्पत्त्यर्थं स्वसाधनार्थप्रवृत्तकृतिरूपभावनामुखेन करणापेक्षायां धात्वर्थ एव उत्पत्त्यनुबन्धित्वेन करणतयाऽपि संबध्यते । परोद्देशप्रवृत्तकृतिसाध्यत्वं हि करणत्वम् । संभवति च धात्वर्थस्य अपूर्वोद्देशप्रवृत्तकृतिव्याप्यस्य करणत्वम् । तस्मात् धात्वर्थः विषयतया करणतया च अन्वीयते । इति । अत्र **पार्थसारथिमिश्राः** (शा. ६७–६८) । विषयभूतेन हि कथं करणवाचिनां नामधेयानां सामानाधिकरण्यम् । आर्थिकेन करणत्वेन सामानाधिकरण्यमिति चेत्, साध्यत्वमपि तर्हि आर्थिकमस्ति इति गुणविधिरपि विनैव मत्वर्थलक्षणया, विना च वैरूप्येण स्यात् इति समस्तमेव नामधेयप्रतिपादनं अनुपपन्नं स्यात् । अथ विषयत्वद्वारेण करणत्वपर एव शब्दः, ततः अन्यपरेण शास्त्रेण उपायमात्रत्वेनोपात्तं विषयत्वं न शास्त्रार्थः स्यात्, अतत्परत्वात् । अथ शब्द एव प्रथमं विषयतया अभिधाय पुनः करणतयाऽपि अभिधत्ते, कथं सकृदुच्चरितो द्विरभिदध्यात्, अभिधाने वा साध्यत्वमपि पुनरभिदधीत । नहि नियामकमस्ति द्विरेवाभिधत्ते न त्रिरिति । 'सकृत् प्रवृत्तायाः किमवगुण्ठनेन' इति न्यायात् । अतः करणत्वेनैवान्वयो वाच्यः, न विषयत्वेन इत्यास्तां तावत् । तस्मात् विषयत्वस्य शाब्दत्वे करणार्थकतृतीयान्तनामधेयसामानाधिकरण्यासंभवात् तन्निर्वाहाय करणत्वमेव शाब्दम् । **सोम. १।४।४ पृ. ६७–६८.** * धात्वर्थस्य सर्वस्य क्रियात्वम् । **मणि. पृ. १६७.** * धात्वर्थस्य सर्वत्र भावनायां प्रकारता । अस्य सिद्धिः 'आख्यातार्थः' इति बिन्दौ भाट्टरहस्यविभागे द्रष्टव्या । **के.** * **धात्वर्थानां** नामधेयत्वेन अवस्थितानि सामानाधिकरण्येन सर्वनामधेयानि, न भावनायाः । **वा. २।३।११।२४ पृ. ६१६.**

⌛ **धात्वर्थे पुनः स विधातव्यः संबन्धी इत्यनेन** न्यायेन क्रियाङ्गत्वसिद्ध्यर्थं विशेषणस्यापि विध्यापत्तेर्वाक्यभेदः । (संबन्धो हि विधीयमानः संबन्धिनं तावदाक्षिपेत् धात्वर्थे पुनः स विधातव्य एव संबन्धी, अन्यथा संबन्धस्यैव संबन्धी शेषः स्यात् न क्रियायाः' वा. २।२।५।१६ पृ. ५०२) । **सु. पृ. ७४३.**

* **धात्वर्थानवच्छिन्नभावनायाः** धर्मान्वयः संस्थाऽधिकरणे निराकरिष्यते । **सु. पृ. १२१६.**

✻ **धात्वर्थावच्छेदं** विना अनु-(अननु ?) ष्ठेयत्वात् (भावनायाः) फलान्वयो न संभवति । सुः पृ. ७०८.

✻ **धात्वर्थकरणिका** भावना यत्र चोद्यते, तत्र अंशत्रयेणैव समाप्यते । **वा.** २।२।११।२६ पृ. ५४९.

✻ **धात्वर्थकर्म** , भावनाकर्म । यद्धि यथाकथञ्चित् अपि धात्वर्थसिद्धौ सत्यां अनन्तरं नियमेनोत्पद्यते, तत् धात्वर्थस्वरूपप्रयुक्तत्वात् धात्वर्थकर्म । यत्तु अन्यप्रेरितेन पुंसा अनुष्ठितकर्मणि कदाचिदुत्पद्यते कुतश्चित् वा कारणान्न कदाचिदुत्पद्यते, तत् नियोगप्रयुक्तत्वात् नियोगस्य च भावनाविषयत्वात् भावनाकर्म । कर्मद्वयस्य अधिष्ठानान्यत्वनियमाभावेऽपि यदेव धात्वर्थं प्रति कर्मत्वम्, तदेव भावनां प्रति न भवति इति तयोर्भेदः । धात्वर्थसमाप्त्यनन्तरं नियमेन उत्पद्यमानत्वात् ओदनस्य धात्वर्थकर्मत्वेऽपि उद्देश्यत्वलक्षणेप्सिततमत्वस्य प्रयत्नाख्यभावनैकगोचरत्वात् ओदनमात्रोद्देशेन यदा प्रवर्तते, तदा एकस्यैव उभे प्रति कर्मता । सु. पृ. ५८५.

✻ **धात्वर्थविचारः** । अत्र वैयाकरणाः । भूवादिधातूनां उत्पत्त्यादिरूपं फलं तदनुकूलो व्यापारश्च वाच्यः । उत्पत्तिः प्राकट्यम् । फले शक्तिग्राहकश्च ' भू सत्तायाम् ' इत्यादिः सर्वोऽपि धातुपाठः । व्यापारे शक्तिग्राहकं च ' भूवादयो धातवः ' (पा० १।३।१) इति सूत्रम् । तच्च वाप्रकारेषु भ्वादिषु धातुसंज्ञां विधत्ते इति वाधातुवाच्यार्थवाचितां सर्वधातूनां सूचयति । वाधातोश्च गतिरूपव्यापार एव वाच्यः इति सर्वधातूनां व्यापारवाचित्वम् । न चैवम् 'बीजमङ्कुरीकरोति' इति प्रयोगापत्तिः, इष्टापत्तेः । अत्र फलानुकूले व्यापारे व्यापारजन्ये वा फले अनुकूलत्वजन्यत्वयोः संसर्गमर्यादया लभ्यत्वेन फले व्यापारे च शक्तिः । प्रत्ययार्थस्तु व्यापाराश्रयः फलाश्रयश्च इत्याहुः ।

कश्चित्तु ' भूवादयः ' इति सूत्रं कृतैकशेषादिशब्दत्रयकं सत्ताऽऽदिरूपफलवाचकभूप्रकाराः गतिवाचकवाप्रकाराः भ्वादिगणपठिताश्च धातवः इत्येतदर्थकं सत् फलवाचितां सर्वधातूनामाह इत्याह ।

अत्र **मण्डनः** । फलमेव धात्वर्थः । पचिगमित्यजिपतत्यादीनां विक्लित्ति-उत्तरदेशसंयोगपूर्वदेशविभाग-अधोदेशसंयोगादय एवार्थाः । अनुकूलव्यापारस्तु प्रत्ययार्थः । लडाद्यर्थवर्तमानत्वादिकं व्यापारे अन्वेति, समानपदोपात्तत्वात् । तेन व्यापारविरमे न पचतीति प्रयोगः फलानुत्पाददशायां व्यापारमात्रकाले पचतीति प्रयोगश्च । व्यापारविरमे ' पाको विद्यते, पच्यर्थो विद्यते ' इति प्रयोगस्तु ' विक्लित्तिर्वर्तते ' इतिवत् इष्ट एव । अत एव 'पाकं करोति' 'पाके व्याप्रियते' इति पाकात् पृथक्करणेन व्यापारविवरणम् । **न च** ' ग्रामो गमनवान् ' इति प्रयोगापत्तिः, उत्तरदेशसंयोगरूपफलस्य उभयनिष्ठत्वात् इति **वाच्यम्** । तथात्वेऽपि निरूपकत्वादिसंबन्धविशेषेण वर्तमानस्यैव फलस्य वाच्यत्वाङ्गीकारात् । अन्यथा आभिमुख्यसंबन्धेन संयोगानुकूलक्रियायाः ग्रामेऽपि सत्त्वात् व्यापारवाचित्वेऽपि तुल्यो दोषः । एवं विध्यर्थकृतिसाध्यत्वेष्टसाधनत्वादीनामपि व्यापारे एवान्वयः । तेन ' ओदनकामः पचेत् ' इत्यादौ ओदनसाधनत्वस्य कृतिसाध्यत्वस्य च व्यापारे एवान्वयः । **एतेन** फलस्य उपायगोचरकृतिसाध्यतया उपायस्य स्वगोचरकृत्यसाध्यत्वेन विधिवाच्येष्टसाधनत्वकृतिसाध्यत्वयोः पाके अन्वयात् तत्र प्रवृत्त्यनुपपत्तिः इति मणिकृदुक्तम् (गङ्गेशोपाध्यायोक्तम्) **अपास्तम्** । तदनुकूलव्यापारे प्रवृत्तेरिष्टत्वात् । **न चैवं** यजेत् दद्यात् जुहुयात् इत्यादिषु पर्यायत्वप्रसङ्गः । स्वत्वध्वंसरूपफलस्य एकत्वात् इति **वाच्यम्** । यजतेः स्वत्वध्वंसरूपफलवाचित्वात्, ददातेः परस्वत्वमात्ररूपफलवाचित्वात्, जुहोतेः प्रक्षेपरूपफलवाचित्वात् । तेन स्वत्वध्वंसरूपफलोपलक्षितदेवतोद्देश्यकद्रव्यत्यागः यजिवाच्यः, संकल्पितस्वीकरणपूर्वकपरस्वत्वापत्तिस्वस्वत्वध्वंसफलकद्रव्यत्यागः ददातिपदवाच्यः, देवतोद्देश्यकप्रक्षेपफलको द्रव्यत्यागः जुहोतिपदवाच्यः इति भेदः । **न च** देवतायै दानस्थले यजति इति प्रयोगापत्तिरिति **वाच्यम्** । देवतायाः असंप्रदानत्वेन तत्र ददातेर्लाक्षणिकत्वात् । एवं च अस्ति भवति विद्यते इत्यादेः फलमात्रप्रतीतिरुपपद्यते । करोतेश्च उत्पत्तिरूपफलवाचित्वम्, तदनुकूलव्यापारो यत्नरूपः प्रत्ययवाच्यः । एवं च न

करोतियतत्योः समानार्थकत्वम्, न वा यततेः सकर्मकत्वापत्तिः अनुप्रयोगश्च । एवं जानाति इत्यत्र विजातीयविषयता, इच्छति इत्यादावपि विजातीयविषयता, नश्यति इत्यत्र दर्शनाभावरूपफलमेव वाच्यम् । अतः सर्वधातूनां फले एव शक्तिः इत्याह ।

अन्ये तु व्यापार एव धात्वर्थः । न च उक्तदोषः, तत्तद्धातुसमभिव्याहृतद्वितीयाया एव संयोगादिरूपफलविशेषबोधकत्वाङ्गीकारादित्याहुः । **केचित्तु** पचतीत्यादौ फलजनकताऽवच्छेदकतया व्यापारसमुदायनिष्ठः अन्तिमव्यापारनिष्ठो वा वैजात्यं अखण्डोपाधिर्वा सिद्धः पच्याद्यर्थः। एवं च धातूपात्तव्यापाराश्रयस्य कर्तृतया तादृशव्यापारविवक्षायाम् 'चैत्रः पचति' 'काष्ठं पचति' इत्यादिः प्रयोगः । एवं करोतेर्व्यापारवाचित्वम् । न च यत्नजन्यत्वाजन्यत्वप्रतिसंधानात् पटाद्यङ्कुरयोः कृताकृतव्यवहारेण रोगेण स्पन्दमानेऽपि चैत्रे 'स्पन्दं करोति' इति अप्रयोगेण च करोतेः यत्नवाचित्वं इति **वाच्यम्** । करोतेर्यत्नार्थकत्वे, तस्य अकर्मकत्वेन करोतेरकर्मकत्वापत्तेः फलसमानाधिकरणव्यापारवाचित्वात् । उत्पत्तिरूपफलव्यधिकरणव्यापारवाचित्वेन ज्ञानादाविव अन्यकर्मत्वे तु यततेरपि सकर्मकत्वापत्तिः । एधांचक्रे इत्यादिवत् यततेः अनुप्रयोगापत्तिश्च । अतः करोतेः व्यापारसामान्यवाचित्वं इति वदन्ति । **अन्ये तु** करोतेर्यत्नवाचित्वम् । न चोक्तदोषः, विवक्षाऽविवक्षाभ्यां सकर्मकाकर्मकधात्वोः पच्यास्योरपि 'पचति' 'मासं आस्यते' इत्यादौ अतिप्रसङ्गेन नोक्तं सकर्मकत्वम्, किन्तु अविवक्षाविरहविशिष्टकर्माकाङ्क्षधातुत्वम् । तेन सकर्मके विशेषणाभावेन अकर्मकत्वस्य अकर्मकत्वविवक्षाऽसत्त्वेन च सकर्मकत्वस्य च अक्षतिः । आकाङ्क्षायाः शब्दवैचित्र्यकृतत्वात् एकस्य धातोः अर्थभेदेन सकर्मकत्वाकर्मकत्वे । एवं पर्यायाणामपि तत् अव्याहतम् । एवं अविवक्षाविरहविशिष्टकर्मद्वयाकाङ्क्षधातुत्वं द्विकर्मकत्वम् । तस्यापि एककर्मविवक्षणेन 'निशां निनाय' इत्यादिप्रयोगे न क्षतिः । अतः प्रयत्न एव करोत्यर्थः इत्याहुः ।

यत्तु जानाति नश्यति इत्यादौ व्यापार एव प्रत्ययार्थः । तस्य च धात्वर्थे अभेदेन अन्वयः । तेन ज्ञानाभिन्नो व्यापारः, नाशाभिन्नो व्यापार इत्यर्थः । इत्याह । **तत्** प्रकृतिप्रत्ययार्थयोः अभेदान्वयस्य अव्युत्पन्नत्वेन मूर्खदाम्भिकलिखितत्वेन उपेक्षणीयम् । **मणि.** पृ. १००–१०३.

अत्र **भाट्टरहस्यम्** । अथ कोऽयं धात्वर्थो नाम ? अत्र विवदन्ते बहवः । तत्र **मण्डनमिश्रास्तावत्** विक्लृत्यादिरूपं फलमेव धात्वर्थः । तदनुकूलफूत्कारादिरूपो व्यापारसङ्घस्तु सर्वोऽपि व्यापारत्वेन प्रत्ययार्थः । फलस्य च तं प्रति प्रकारत्वं इत्याहुः । **तन्न** । गमनजन्यसंयोगाश्रयो ग्रामः इति प्रयोगानापत्तेः, संयोगाख्यस्य फलस्य गमनरूपत्वेन तज्जन्यत्वाभावात्, 'गमनाश्रयो ग्रामः' इति प्रयोगापत्तेश्च । न च ल्युटो भावनावाचकत्वेन व्यापाराभिधानात् नैतादृशप्रयोगाद्यापत्तिः, 'गम्यर्थवान् ग्रामः' इति प्रयोगस्य एवमपि आपत्तेः । 'गम्यर्थजन्यसंयोगाश्रयो ग्रामः' इति प्रयोगानापत्तेश्च । स्वत्वध्वंसाख्यस्य फलस्य यजिपदार्थत्वे तस्यैव फलभावनाकरणत्वेन स्वर्गसाधनतापत्तेः, स्थायिनस्तस्मादेव स्वर्गोत्पत्त्युपपत्तौ अपूर्वकल्पनाऽनापत्तेश्च । अतो व्यापारमात्रं धात्वर्थः फलं च द्वितीयाऽर्थः इत्यन्ये । **तदपि न** । व्यापारत्वेन वाच्यत्वे सर्वधातूनां पर्यायत्वापत्तेः । क्रियात्वादिना विशेषरूपेण वाच्यत्वे त्यजिगम्योः पर्यायताऽऽपत्तेश्च । पूर्वदेशविभागानुकूला क्रिया त्यजेरर्थः । उत्तरदेशसंयोगानुकूला सैव गमेः । तद्यदि क्रियामात्रं धात्वर्थः फलसामान्यं च द्वितीयाऽर्थः, तदा तयोः पर्यायत्वापत्तिः । अतः उभयं फलं व्यापारश्च धात्वर्थः । उभयत्र च प्रत्येकं शक्तिः । नातः ओदनादिपदार्थस्य एकदेशान्वयशङ्का । तयोश्च जन्यजनकभावः संसर्गः । व्यापारविशेष्यकश्च बोधः । तत्रैव कर्मकारकातिरिक्तसर्वकारकाणामन्वयः, कर्मकारकस्य च फले । व्यापारश्च शरीरनिष्ठः फूत्कारादिः, आत्मनिष्ठः प्रयत्नादिश्च तत्त्वेन वाच्यः । अनुगतैकधर्मान्तरस्य निर्वक्तुमशक्तेः । न चैवं सर्वकारकव्यापाराणां तत्त्वेन वाच्यत्वे नानाऽर्थकत्वापत्तिः, इष्टापत्तौ वा सर्वकारकाणां प्रथमान्ततापत्तिः । नानाऽर्थकत्वेऽपि यत्कारकव्यापाराणां यदा विवक्षा, तदा तेषामेव बोधः तदादौ इव बुद्धिस्थस्य, तत्कारकस्यैव च तदा प्रथमाऽन्तत्वम् । अत एव 'स्थाली पचति'

इत्यादिप्रयोगोऽपि विवक्षायां संगच्छते । अतः सर्वोऽपि व्यापारो धात्वर्थः । आख्यातार्थस्तु यगादिविकरणस्थले कर्म शबादिविकरणस्थले च कर्ता । अकर्मकधातूत्तरयगादिविकरणस्थले च भावरूपो धात्वर्थ एव, 'लः कर्मणि' (पा० ३।४।६९) इत्याद्यनुशासनात् । सर्वेषां च धात्वर्थं प्रति योग्यसंबन्धेन गुणत्वम् । 'भावप्रधानमाख्यातम्' इति स्मृत्या (निरुक्तम्) भावपदवाच्यधात्वर्थस्य आख्यातार्थं प्रति प्राधान्योक्तेः । प्रत्ययार्थप्राधान्यस्मृतिस्तु सुबादिविषया इति वैयाकरणाः । तदपि न । फूत्कारत्वादेः 'पचति' इत्यतः अप्रतीतेः, अभासमानस्य शक्यताऽवच्छेदकत्वायोगात् । फूत्कारादिकं विनाऽपि चैत्रनिष्ठक्रियान्तरमादाय स्वतःसिद्धज्वालया जायमाने ओदने 'चैत्रः पचति' इति प्रयोगाच्च । तत्तद्व्यापारस्य तत्त्वेनतत्त्वेन अनुभवे 'यागः इच्छा ज्ञानं वा' इति वादिविप्रतिपत्त्यनुपपत्तेश्च । अतः अनुभूयमानं पाकत्वयागत्वादिकमेव तत्तत्फलोपधायकतावत् व्यापारवृत्त्यखण्डोपाधिरूपसामान्यं पच्यादिपदशक्यताऽवच्छेदकम् । तत्सत्त्वे 'पाकः पाकः' इत्याद्यनुगतप्रतीतिः प्रमाणम् । फलोपधायकताऽवच्छेदकतया शक्यताऽवच्छेदकतयैव वा तत्सिद्धिः । फलोपधायकव्यापारत्वादेः प्रमाणान्तरतो बोधः, न तु शाब्दबोधः । अत एव फलस्यापि न द्वितीयया बोधः । अखण्डोपाधिरूपकर्मत्वस्यैव तदर्थतायाः स्थापयिष्यमाणत्वात् । शक्तताऽवच्छेदकं च तत्तद्धातुत्वम् । पाकत्वादिकं च विक्लृत्तिजनकव्यापारवृत्त्येव, न तु तत्प्रयत्नादिवृत्त्यपि । 'पाकं करोति' इत्यादिना यत्नादेः पाकात् पृथक् विव्रियमाणत्वात् । न च घञादिसमभिव्याहृतधातोः फले एव शक्तिकल्पनात् पृथक् विवरणोपपत्तिः, अनेकशक्तिकल्पने व्यापारविषयकशक्तिप्रतिबन्धकल्पने वा गौरवात् । 'ग्रामो गमनवान्' इति प्रतीत्यापत्तिभयेन व्यापारप्रतीतेरपि आवश्यकत्वाच्च । अत एव विक्लृत्तिजनकव्यापारसमूह एव पाकपदार्थः, न तु तज्जनकयत्नादिरपि, तस्य पृथक् विव्रियमाणत्वेन पच्यर्थत्वाभावात् । अत एव 'तेजःसंयोगमात्रं पच्यर्थः, न तु विक्लृत्त्यनुकूलव्यापारसामान्यम्' इत्यपि प्रत्युक्तम् । अग्निसंयोगानुकूलकृत्यभाववत्यपि भक्तविक्लृत्त्यनुकूलावस्रावणकर्तरि 'पचति' इति प्रयोगात् । अत एव पाकात् पृथक् विव्रियमाणयत्नादेः भासमानस्य भानकारणजिज्ञासायां पारिशेष्यात् आख्यातार्थत्वमेव । तस्मिंश्च पाकादेः प्रकारत्वं प्रकृत्यर्थत्वादेव । एवं च प्रत्ययार्थप्राधान्यस्मृतिरपि न संकोचिता भवति । **रहस्य.** पृ. ४७–४९.

* **धात्वर्थविधानं** लिङा तावत् स्वपदेनोपात्तत्वात् श्रौतम् । **वा.** २।३।३।४ पृ. ५९३.

* **धात्वर्थविशेषाद्विना** भावना इतिकर्तव्यतां न शक्नोति ग्रहीतुम् । **वा.** ३।६।१६।४३ पृ. १०६९.

* '**धात्वर्थव्यतिरेकेण** यद्यप्येषा (भावना) न लक्ष्यते । तथापि सर्वसामान्यरूपेणैवावगम्यते ॥' सर्वत्र हि अधिश्रयणादौ 'करोति' इत्यपि सामान्यव्यापारांशः प्रतीयते । **वा.** २।१।१।१ पृ. ३८२.

* **धात्वर्थसत्ताविधानेन** उपसर्गार्थसत्ताविधानं बाध्यते । प्रत्ययेन हि श्रुत्या धात्वर्थस्य सत्ता उच्यते, विप्रकृष्टा उपसर्गार्थस्य सत्ता अर्थविप्रकर्षात् दुर्बला भवति । **भा.** १०।४।६।९.

* **धात्वर्थसामान्यं** भावना इत्येतदापन्नम्, सत्यं साध्यतया सामान्यम्, न तु गोत्वादिरूपेण । **वा.** २।१।१।१ पृ. ३८३.

* **धात्वादीनां** प्रत्ययभिन्नानां स्वरूपमात्राभिधायित्वं इत्यभिहितान्वयवादः । प्रत्यये अन्विताभिधानम् । वस्तुतस्तु अन्विताभिधानं क्वापि नास्ति । **बाल.**

* **धात्वावृत्तिलक्षणः** वाक्यभेदः । **बाल.** पृ. १८१.

* **धातूपसर्गयोरर्थः** अभिधानसामर्थ्यलभ्यत्वान्न विरुध्यते । **टुप्.** ७।३।१४।३६.

* **धातुप्रत्यययोः** सहप्रयोगनियमेऽपि अर्थभेदात् विध्यनुवादविभागोपपत्तिः । **सु.** पृ. ७७६.

* '**धातुलक्षितकरणत्वादेः** भावनायां प्रकारता' इति मतम् । करणत्वादिसंसर्गेण धात्वर्थस्यैव भावनायां प्रकारता इति च मतान्तरम् । **मुरारि.** (भा.) पृ. १४५०.

* **धातुवाच्यत्वमात्रात्** क्रियात्वासिद्धिः । 'गडि वदनैकदेशे', 'शकि शक्तौ', 'विशि अवयवे' इत्यादौ अक्रियायामपि धातुस्मृतेः गण्डादिशब्दाच्च क्रियाऽनव-

गतेः । तथापि प्रायेण धातूनां क्रियावाचित्वम् । सु. पृ. ८६२.

* **धातुसामानाधिकरण्यं** विना नामधेयत्वायोगः । सु. पृ. ३९६.

* **धातुसाम्यार्थं** (सप्तरात्रेषु दशरात्रेषु च) लौकिकं सोमपानम् । **भा.** ३।४।१२।३२ । वमनायैव हि तं पिबन्ति (तेन धातुवैषम्यनिवृत्तिः) । ३३.

* **धानाभिर्हारियोजनं** श्रीणाति ज्योतिष्टोमे । आसु धानासु प्रदेयधर्मा न कार्याः । **भा.** ९।४।१२।४५–५०. * **धानानां** सवनीयपुरोडाशेषु विद्यमानानामेव आश्विनपात्रे निधानं ज्योतिष्टोमे, न तु निधानार्थमपूर्वधानासंपादनम् । **के.** ३।८।१८।३३, **वि.** ३।८।१९. * **धानासु** अवघातस्य न बाधः इति भाष्यमतेन, मन्थे पेषणस्य न बाधः इति वार्तिकमतेन । **के.** १०।२।३४।७५. * धानासु पूर्वं हन्तिं कृत्वा पाकः कार्यः महापितृयज्ञे । तत्र हि हन्तिः पाकार्थो भविष्यति, न धानात्वं विहनिष्यते । **भा.** १०।२।३३।७४.

* **धानाऽऽदिषु** सवनीयेषु पुरोडाशशब्दो भाक्तः संनिहितेषु प्रयुक्तः ज्योतिष्टोमे । **भा.** ३।८।२२।४४.

⧗ **धान्याधिकरणम्** । शाक्यानामयने प्राकृतधान्यमसीतिमन्त्रगतधान्यपदस्य मांसशब्देन ऊहः ॥

गुणशब्दस्तथेतिं चेत् । ९।१।१३।३८ वर्णकं १ ॥

भाष्यम्—एवं वा । दर्शपूर्णमासयोरामनन्ति ‘ धान्यमसि धिनुहि देवान् इति दृषदि तण्डुलानावपति ’ इति । तत्र धान्यशब्दं प्रति संशयः किं समवेतवचनो न वेति । किं प्राप्तम् ? योऽयं गुणशब्द इव लक्ष्यते धान्यशब्दः, नासौ समवेतवचनः स्यात् । धान्यशब्दो हि धान्यमभिवदति, न तु धान्यमेवोप्यते । सतुषे हि धान्यशब्दो वर्तते । तण्डुलेष्वेव उप्यमानेषु धान्यप्रकाशनं क्रियते । तदसमवेतस्य प्रकाशने अदृष्टं यथा स्यादिति । तस्मात् विकृतिषु नोहितव्यमिति ।

न, समवायात् । ३९ ॥

भाष्यम्— नैतदेवम् । समवेतो हि धान्यशब्दार्थः । स हि तण्डुलेषु वर्तते तद्विकारत्वात् लक्षणया । यथा ‘काशिकेषु शालयो भुज्यन्ते’ ‘गावः पीयन्ते’ इति । श्रुत्युपादाने अदृष्टं कल्पयितव्यम्, इति लक्षणाशब्दः परिकल्प्यते । तस्मात् समवेतवचनः, विकारे चोहितव्य इति ।

प्रयोजनं अस्ति शाक्त्यानामयनं षट्त्रिंशत्संवत्सरम् । तत्रेदं समाम्नायते ‘ संस्थितेसंस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति तेषां तरसाः सवनीयाः पुरोडाशा भवन्ति ’ इति । तत्र अविकारेण ‘ धान्यमसि धिनुहि देवान् ’ इति प्रयोगः कर्तव्यः यथा पूर्वः पक्षः । यथा सिद्धान्तः, ऊहः कर्तव्यः, ‘मांसमसि धिनुहि देवान् ’ इति ।

टुप्— अत्र प्रयोजने चोद्यते । प्रकृतिशब्देन (धान्यशब्देन) विकाराः (तण्डुलाः) प्रकाशिताः प्रकृतौ लक्षणया, इहापि (शाक्यानामयने) चोदकः तथैव (लक्षणया प्रकृतिशब्देन मांसं) प्रापयति । तस्मात् मृगशब्देन मांसं प्रकाश्यं लक्षणया । नैतदेवम् । विकृतौ अर्थः चोदकेनातिदिश्यते । न शब्दो वाचकः इति अत्रैव (तृतीये पादे) वक्ष्यामः । स च अस्मदायत्ते प्रयोगे किमिति अवाचकेन प्रकाश्यते । प्रकृतौ (धान्यपदस्य) आम्नानसामर्थ्येन अवाचकेनापि शब्देन विकारप्रकाशनं कृतम् । तच्च (धान्यपदं इह) अर्थात् निवृत्तम्, न चोदकः प्रापयति । न च वचनमस्ति प्रकृत्या विकारः प्रत्याय्य इति । तस्मात् मांसशब्दस्यैव प्रयोगः । (परमार्थतस्तु मांसस्य अधिवापो नास्त्येव) ।

सोम— इदं च मांसस्याप्यधिवापोऽस्ति इति कृत्वाचिन्तया उक्तम् । वस्तुतस्तु पेषणार्थत्वादधिवापस्य मांसे च पेषणाभावात् तदर्थाधिवापः तन्मन्त्रश्च निवर्तते इति द्रष्टव्यम् ।

वि-- ‘ नोह्य ऊह्योऽथवा धान्यशब्दो, नासंगतोक्तितः ।, ऊह्यो लक्षणयाऽर्थस्य गोपानस्येव संगतेः ॥ ’ ‘ गावः पीयन्ते ’ इत्यत्र मुख्यवृत्त्यभावेऽपि नासमवेतार्थत्वं लोका वर्णयन्ति, किन्तु (गोशब्देन) दुग्धं लक्षयित्वा अर्थं समवेतमेव प्रतियन्ति, तद्वत् ।

भाट्ट-- एवं वा । दर्शपूर्णमासयोः ‘ धान्यमसि धिनुहि देवान् ’ इति मन्त्रः श्रुतः । स च ‘ धान्यमसीति

दृषदि तण्डुलानधिवपति ' इति वचनेन तण्डुलाधिवापे विनियुक्तः । तत्र धान्यशब्दः सतुषद्रव्यवचनः तण्डुलावस्थायां प्रयुज्यमानः धान्यत्वारोपेण स्तुत्यर्थः सवित्रादिपदवदेव असमवेतार्थः इति मांसेऽपि तदारोपेण प्रयोक्तव्यः। **इति प्राप्ते**, 'शालयो भुज्यन्ते' इति कार्ये प्रकृतिवाचकपदप्रयोगात् प्रयुक्तलक्षणोपपत्तेः असिपदाक्षिप्ततण्डुलरूपकर्तृसामानाधिकरण्याच्च लक्षणया धान्यशब्दः तण्डुलपरः सन् समवेतार्थक एव । ननु एवं समवेतार्थकत्वेऽपि मांसेऽपि लक्षणयैव धान्यशब्दप्रयोगोपपत्तेः नोहप्रसक्तिः। धान्यपदस्यैव प्रकृतौ तण्डुलस्मारकत्वात्, विकृतौ मांसस्मारकस्य प्रोक्षणादिवत् कथञ्चित् ऊहलक्षणाक्रान्तत्वेऽपि वा धान्यपदबाधेन मांसपदप्रक्षेपरूपसिद्धान्तानापत्तिः । यथैव हि प्रकृतौ अग्निपदेन शक्त्या अपूर्वसाधनीभूतां देवतां प्रकाशयेत् इति लिङ्गकल्पितश्रुत्या मन्त्रविनियोगात्, विकृतौ अग्निदेवत्यायां शक्त्या अग्निपदेनैव उक्तदेवताप्रकाशनोपपत्तेः न पदान्तरप्रक्षेपः । सत्यां गतौ प्राकृतवृत्तितद्वत्पदयोः बाधे प्रमाणाभावात् । अपि तु अन्यदेवत्यायामेव सः । तत्र शक्त्या अग्निपदेन तत्प्रकाशनानुपपत्तेः प्रकृतौ वृत्तिविवक्षासत्त्वात् । विकृतौ च वृत्तेर्व्यापारत्वेन तन्मुखेनैव अग्निपदरूपपदार्थप्राप्तेः न लक्षणया विना अग्निपदेन तत्प्रकाशनम् । अतस्तत्र प्राकृतशक्तिनिर्वाहार्थे सूर्यादिपदान्तरप्रक्षेप एव शरणम् । न तु अग्निदेवत्यायां विकृतौ। तथैव धान्यपदेन लक्षणया प्रदेयप्रकृतिभूतं प्रकाशयेत् इति गौणसामर्थ्यकल्पितश्रुत्या मन्त्रविनियोगात् विकृतावपि मांसे उपकारपृष्ठभावेन वृत्तेः तत्पृष्ठभावेन च धान्यपदस्य अतिदेशात् तदबाधाय धान्यपदेनैव मांसप्रकाशनोपपत्तेः न पदान्तरप्रक्षेपः । **इति चेत्** । सत्यं प्राकृतप्रकाशनरूपोपकारपृष्ठभावेन प्राकृतवृत्तिरूपव्यापारातिदेशः तत्पृष्ठभावेन च अग्न्यादिपदरूपपदार्थातिदेशः, इतरथा वृत्त्यनतिदेशे प्रकाशनपृष्ठभावेन अतिदिष्टस्य पदस्य विकृतौ लक्षणयाऽपि प्रकाशकत्वोपपत्तेः पदान्तरप्रक्षेपानापत्तिप्रसङ्गात् । तथापि प्राकृतपदनिष्ठप्राकृतवृत्तिरेव विकृतौ अतिदिश्यते, न तु वृत्तिमात्रम्, प्रमाणाभावात् । अत एव सौर्ये प्राकृतपदस्येव प्राकृतवृत्तेरपि बाधसत्त्वेऽपि सूर्यप्रकाशनकार्यानुरोधेनैव मन्त्रपदान्तरानुरोधात् सूर्यपदप्रक्षेपः । अतश्च धान्यप्रकृतित्वरूपशक्यसंबन्धरूपायाः प्राकृतलक्षणावृत्तेः मांसे बाधे संबन्धान्तररूपलक्षणावृत्तिकल्पने प्रमाणाभावात् धान्यपदस्य बाधावश्यम्भावे मांसप्रकाशनरूपकार्यानुरोधेन मन्त्रपदान्तरानुरोधादेव मांसपदप्रक्षेपः । अत एव न प्रकृतिवाचकमृगपदप्रक्षेपोऽपि । शक्तपदप्रक्षेपसंभवे अप्राकृतलक्षणया पदान्तरप्रक्षेपस्य अन्याय्यत्वात् । अतः शाक्यानामयने 'तरसमयाः सवनीयाः पुरोडाशा भवन्ति' इत्यत्र मांसे अधिवापे क्रियमाणे 'मांसमसि' इत्यूहितव्यम् ।

इदं च कृत्वाचिन्तया । तृतीये (३।८।२३ भाट्ट.) सवनीयोद्देशेन हविष्ट्वेनैव तरसविधानस्य स्थापितत्वात् । सत्यपि वा प्रदेयप्रकृतित्वे अर्थलोपेन तत्र अधिवापस्य चराविव बाधितत्वाच्च । विस्तरेण चैतत् न्यायसुधाकारमतनिरासपूर्वकं उपपादितं द्वितीये 'धर्ममात्रे तु कर्म स्यात्' (२।१।९ सू.) इत्यत्र कौस्तुभे ।

मण्डन—'ऊहं व्रजेद्धान्यमसीति वाक्यम् ।' १४.

शंकर——'तरसे धान्यशब्दगः ।' ऊहः । २१.

* **धान्याधिकरणप्रयोजन**भाष्ये तु सवनीयशब्दवद्वाक्योदाहरणमनादृत्यं इति परिहारसूचनार्थम् 'यथा' इत्याद्युक्तम् । सु. पृ. ६३९.

⌛ **धान्यपलालन्यायः** । यथतत् स्वरूपम् 'शास्त्राण्यधीत्य मेधावी ह्यभ्यस्य च पुनःपुनः । परमं ब्रह्म विज्ञाय ह्युल्कावत् तान्यथोत्सृजेत् ॥ ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः । पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥' इति पञ्चदश्यामुक्तम् । अयं न्यायः 'तस्यापत्यम्' (पा० ४।१।९२) इत्यादिसूत्रमहाभाष्येऽप्यभिहितः । **साहस्री**. २४०, * धान्यपलालन्यायः । यथा कश्चिद्धान्यार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात्, स यावदादेयं तावदादाय तुषपलालान्युत्सृजति । महाभाष्ये 'तस्यापत्यम्' इत्यत्र । **भूतिः**. पृ. २६८ परि. ७४.

* **धान्यशब्दः** सतुषे वर्तते । स हि तण्डुलेषु वर्तते तद्विकारत्वात् लक्षणया । यथा 'काशिकेषु शालयो भुज्यन्ते' 'गावः पीयन्ते' इति । **भा.** ९।१।१३।

३८-३९, * **धान्यशब्दस्य** दर्शपूर्णमासस्थपेषणमन्त्रगतस्य विकृतौ शाक्त्यानामयने 'मांसमसि' इति ऊहः । ९।१।१३।३८-३९ वर्णकं १.

* **'धा'प्रत्ययः** प्रकारवाची सन् एकवारं इत्यर्थम्, बहूनां सहभावं वा ब्रूते । कृष्णलेषु 'एकधा ब्रह्मण उपहरति' इत्यत्र तु सहभावमेव ब्रूते । **वि.** १०।२।४.

* **धाय्या** आग्निवारुण्याः इष्टेः क्रमे अतीते सौमारौद्रीणां अनागते मनोर्ऋचः सामिधेनीषु धाय्या इत्युच्यन्ते । तथा 'पृथुपाजाः, तं सबाधः' इति द्वे धाय्ये सामिधेनीषु कल्प्येते । **भा.** ३।२।७।२० पृ. ७७३, * काः पुनरेता धाय्याः नाम ? नास्य शब्दस्य प्रसिद्धिमुपलभामहे । उच्यते, सामिधेन्यो धाय्याः । कुतः ? एवं हि भगवतः पाणिनेर्वचनम् 'पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु' इति । अस्माद्वचनात् श्रुतिमनुमिमीमहे । विशिष्टासु अपि (सामिधेनीषु) वचनमुपपद्यते एव । ५।३।३।५. * **धाय्यानां** समिद्ध्यमानवतीसमिद्धवत्यन्तरालनिवेशः 'इयं वै समिध्यमानवती, असौ समिद्धवती, यदन्तरा तद्धाय्या' इत्यर्थवादप्रामाण्याधीनः । तत्र 'समिध्यमानो अध्वरे' इति समिध्यमानवती, 'समिद्धो अग्ने' इति समिद्धवती । अधिकरणं दर्शपूर्णप्रघट्टके । **के.**

* **धाय्याशब्दः** सामिधेनीषु निपात्यमानः तास्वेवेत्यवधारणात् नान्यासु धीयमानास्वपि धाय्याशब्दवाच्यत्वं भवति । **वा.** ३।७।१७।३७.

* **धाय्याशब्दिता** एव ऋचः मध्ये स्युः, अन्यास्तु आगन्तवः अन्ते स्युः, बादरायणमतात् । दर्शपूर्णमासयोः सामिधेनीविवृद्धौ षण्णामागमयितव्यानामृचामन्ते निवेशः । **रत्न.** ५।३।३।४-६. * **धाय्याशब्दितानां** ऋचां समिद्ध्यमानवतीसमिद्धवत्यन्तरालनिधानस्य अपेक्षितविधित्वसिद्ध्यै धाय्याशब्दस्य धीयमानवाचित्वनिपातनात् 'यत्रयत्र वै देवा यज्ञस्य छिद्रं निरजानंस्तद् धाय्याभिरपिदधुः तद्धाय्यानां धाय्यात्वम्' इत्यर्थवादात् छिद्रापिधाननिमित्तधाय्याशब्दकत्वावगतेः पृथुपाजवत्यादीनां सामिधेनीनामेव आवपनाख्यनिमित्तधाय्यात्वावधारणाविरोधः । **सु.** ३।७ पृ. ३८.

* **धाय्यासमाख्यत्वं** मनोर्ऋचाम् 'अग्निरुक्थे पुरोहितः' इत्याद्यानाम् (ऋसं. ८।२७।१) 'पृथुपाजा' इति द्वयोश्च (पृथुपाजाः, तं सबाधो) सामिधेनीषु प्रक्षेप्यानाम् । **सु.** पृ. ११११९.

* **धारणं** प्रयाजशेषस्य तत्पात्रं च न कर्तव्ये वाजपेयप्राजापत्यपशुषु अभिघारणार्थम् । **वि.** ४।१।१४.

⧗ धारणे च परार्थत्वात् । ९।४।७।२९॥

'धार्यो गतश्रिय आहवनीयः' इति पठ्यते । अयं धार्योऽग्निः यदा अनुगच्छति, तदा ज्योतिष्मतीष्टिः अनुगमनप्रायश्चित्तं कर्तव्यं न वा इति विचारे यथा पर्युक्षणं परिसमूहनं तृणावचयः इत्येवमादयः पदार्था धार्येऽग्नौ अहन्यहनि क्रियन्ते, तथा अनुगमने प्रायश्चित्तमपि क्रियेत इति प्राप्ते, उच्यते । धारणे अग्नेः कृते सति प्रायश्चित्तं न कर्तव्यम् । चकारेण 'प्रायश्चित्तं न विद्यते' इत्यनुकृष्यते । कुतो न कर्तव्यम् ? परार्थत्वात् । नहि तदा अग्निहोत्रार्थमुद्धरणं यस्मिन् काले भवत्यसौ गतश्रीः । तत्र अन्यार्थमुद्धृतोऽग्निः सर्वार्थे धार्यते । न च धारणे अग्निहोत्रार्थे अनुगमने प्रायश्चित्तं विहितम् । तस्मान्न तत्रेदं प्रायश्चित्तम् । 'त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यः' इति गतश्रीपदस्यार्थः उक्तः । प्राप्तश्रीर्वा गतश्रीः ।

क्रियार्थत्वादितरेषु कर्म स्यात् । ३० ॥

'आहितमाहवनीयमुत्सृजति अर्थायार्थाय अग्निं प्रणयति, नित्यो गतश्रियो धार्य आहवनीयः' इत्याम्नातम् । अत्र पूर्वपक्षिणा यदुक्तम् 'पर्युक्षणपरिसमूहनादिवत् होमात् प्रागग्नेर्धार्यस्य अनुगमने प्रायश्चित्तं कर्तव्यमिति' तत्राह सिद्धान्ती । इतरेषु प्रायश्चित्तादितरेषु पर्युक्षणादिषु क्रियार्थत्वात् संस्कारार्थत्वात् कर्म अनुष्ठानं स्यात् । इति प्रायश्चित्तस्य पर्युक्षणादिभ्यो वैलक्षण्यम् । तस्मात् धार्येऽग्नौ अनुगते ज्योतिष्मतीष्टिर्न कर्तव्या इति सिद्धान्तः । **के.**

* **धारणार्थमग्न्यन्वाधानं** दार्शपौर्णमासिकं सौमिकेषु ऐष्टिकेषु न कर्तव्यम् । सोमिकेन प्रसङ्गसिद्धत्वात् । **के.** १२।१।१२।२४-२८.

⧗ **धारणार्थत्वात् सोमेऽग्न्यन्वाधानं न विद्यते। १२।१।१०।१९ ॥**

सोमे दीक्षणीयाऽऽदिषु ऐष्टिकेषु कर्मसु चोदकप्राप्तं अग्न्यन्वाधानं न विद्यते, न कर्तव्यम्। धारणार्थत्वात्, विहृतस्य अग्नेः धारणार्थं तत्। सोमार्थेन च विहृतस्य तत् कृतम्। न च धृतस्य धारणम्। तस्मात् दीक्षणीयाऽऽदिषु अग्न्यन्वाधानं नास्ति इति सिद्धान्तः। **के.**

* **'धारयेद्वैणवं** दण्डं शुभे रौक्मे च कुण्डले। न जीर्णमलवद्वासा भवेच्च विभवे सति॥' इति स्नातकव्रतम्। **सु. पृ. १४७७.**

* **धाराग्रहाः** ऐन्द्रवायवमैत्रावरुणादयो ज्योतिष्टोमे। 'धारया गृह्णाति'। **वि. १०।५।१७.** * **धाराग्रहेभ्यः** पूर्वं अंशुग्रहः। (एकधनानामपां सादनं कृत्वा ततः दधि– अंशु– अदाभ्य– उपांशु– अन्तर्यामाः नाम ग्रहा गृह्यन्ते। तदनन्तरं धाराग्रहाः ऐन्द्रवायवादयो गृह्यन्ते)। **भा. ५।३।६।१५–१६.** * **धाराग्रहाणामेव** कामसंयोगः। इदंकामः एतं ग्रहं गृह्णीयात् इति। **वि. १०।५।१८.**

* **धारावाहिकेषु** ये कालातिरेकेण प्रामाण्यमाहुः ते निराकृताः। क्षणभेदस्य अवेद्यत्वात्। येऽपि तत्र तदाद्यदर्शनमेव प्रमाणमिति बौद्धा आहुः, तेऽपि सर्वेषां तुल्यत्वेन निराकृताः। **ऋजु. पृ. ८०.**

* **धारावाहिकज्ञानस्य** गृहीतविषयकस्य कथं प्रामाण्यम्, कालस्य षडिन्द्रियवेद्यत्वेन पूर्वक्षणविशिष्टघटस्य विषयीकरणेन तादृशस्य उत्तरज्ञानाविषयतया अनधिगतार्थविषयकत्वात्। **मणि. पृ. १३.**

* **धार्मिकः**। यो यागमनुतिष्ठति तं धार्मिक इति समाचक्षते। **भा. १।१।२।२ पृ. १७–१८.**

* **धार्यो** गतश्रियः (ग्रामणीः शुश्रुवान् राजन्यश्च) आहवनीयः। अत्र गतश्रीकत्रितयस्यैव अजस्रमाहवनीयधारणविधानम्। **संकर्ष. ३।२।५.** * **धार्येऽग्नौ** परिसमूहनं पर्युक्षणं तृणापचयः इत्येवमादयः पदार्थाः अहन्यहनि क्रियन्ते। चोदितानि हि तानि संस्कारार्थत्वेन, शक्यानि च, अकृतप्रयोजनानि च। अनुगमने तु ज्योतिष्मतीष्टिः प्रायश्चित्तं न कर्तव्यम्। (अधिकरणं अग्निचयनप्रघट्टके द्रष्टव्यम्।) **भा. ९।४।७।२९–३०.**

* **धावनं** दन्तानां ज्योतिष्टोमे संस्कारः न फलप्रयुक्तः। तत्र फलश्रुतिरर्थवादः। तच्च क्रत्वर्थं याजमानम्। **के. ४।३।१।१–३.**

* **धिष्ण्यानां** अग्नीनां विहरणं आग्नीध्रीयादेव, न औत्तरवेदिकात्। **संकर्ष. ३।२।१५,** * **धिष्ण्यानां** षण्णामग्नीनां सवनत्रये अग्निष्टोमसामकाले चेति चतुर्वारं विहरणात् चतुर्विंशतिर्धिष्ण्याग्नयः। **३।२।१६.**

* **धिष्ण्यव्याघारणसंपातेन** आज्येन पात्नीवतं श्रीणाति। **संकर्ष. ३।२।२०.**

* **धिष्ण्याग्निव्याघारणं** परिप्लुपात्रेण। **संकर्ष. ३।२।१९.**

* **धुरिसामानि** नाम 'गीतिविकारो गायत्रस्य धुरः' इति वचनात् गायत्रविकारात्मकानि धूर्गानशब्देनोच्यन्ते। **सोम. १०।५।३.**

* **धूर्गानं** एकत्रिके नाम यागे 'आवृत्तं धूर्षु स्तुवते' इत्यावृत्त्या विहितम्। तच्चैकस्यामृचि, न तृचे। **वि. १०।५।३.**

* **धूर्नामकानि** गायत्रगानविशेषात्मकानि सामानि। **कु. १०।५।३।१०.**

* **धूमो** बुद्धिविषयतामापन्नः अग्नेर्लिङ्गम्, न विद्यमानः। **भा. ८।१।१७।३३.** * '**यादृशस्य** हि धूमस्य गमकत्वावधारणा। स तादृक् बहुरल्पो वा वह्निं गमयति ध्रुवम्॥' **वा. ३।३।४।११ पृ. ८१६.**

* **धूमादिव्यक्तयो** हि सामान्येन उपाधिना अग्निसंबन्धव्याप्ता अग्निव्यक्तिमेव गमयति। **ऋजु. पृ. २३५.**

⧗ **धूल्यन्धकारधूमाभ्रविमुक्तगगनमिति न्यायः।** अयं वस्तुनः अतिशुद्धत्वविवक्षायामवतरति। यथा चोक्तम् 'निर्विकल्पं परं ब्रह्म निर्धूताखिलकल्पनम्। धूल्यन्धकारधूमाभ्रविमुक्तगगनोपमम्॥' इति। **साहस्री. ९११.**

* **धृतराष्ट्रस्य** अन्धस्य इज्या पाण्डुवर्जितैर्धनैः इति अनधिकृतक्रिया (धर्मव्यतिक्रमः)। **वा. १।३।३।७**

पृ. २०४ । अत्र सुधा पृ. १८५–८६ । धृतराष्ट्रस्य अन्धत्वेन अनधिकृतस्य यागकरणात् धर्मव्यतिक्रमः । अन्धस्य निरंशत्वेन धनाभावात् यागासंभवमाशङ्क्य 'तस्य वीरस्य विक्रान्तैः सहस्रशतदक्षिणैः । अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥' इति दर्शनात् पाण्डुवर्जितैः धनैः इत्युक्तम् । 'सुहृदश्चापि धर्मात्मा धनेन समतर्पयत्' इति च पाण्डुना धृतराष्ट्रादिभ्यः स्वार्जितधनसमर्पणात् नापहारः शङ्कनीयः । पाण्डुवर्जितधनोपजीवनं ज्येष्ठस्य धृतराष्ट्रस्य अनुचितं इति व्यतिक्रमान्तरं चानेनोक्तम् ।

वार्तिकम्— धृतराष्ट्रोऽपि व्यासानुग्रहात् आश्चर्यपर्वणि पुत्रदर्शनवत् क्रतुकालेऽपि दृष्टवानेव । शापानुग्रहसमर्था महर्षयः श्रूयन्ते । तत् यथैव तद्वचनात् असौ अन्धो जातो विज्ञायते, तथा यज्ञानुष्ठानवचनात् तावति काले दृष्टवान् इत्यर्थापत्त्या सुज्ञानम् । यद्वा 'यज देवपूजासंगतिकरणदानेषु' इति दानार्थ एवायं यजिर्भविष्यति, क्रतुफलसमानि च दानतपश्चरणादीन्यपि श्रूयन्ते, तत्कारणात् क्रतुक्रियोपचारः । पृ. २०८–०९.

* **धृतिः** । पादेषु अक्षराणि १२।१२।८।८।८।१६।८ उदा॰ 'अवर्मह इन्द्र॰' (ऋसं. १।१३३।६) । के.

* **धृतिमन्त्रेषु** 'इह धृतिः स्वाहा, इह विधृतिः स्वाहा' इत्यादिषु धृत्यादिशब्दानां चतुर्थ्यन्तपाठो न कर्तव्यः किन्तु यथासमाम्नानं प्रयोगः । संकर्ष. २।४।२१.

* **धेनुः** एका कृत्स्नस्य क्रतुदाक्षिण्यस्य कार्यं भवति भूर्नामके यागे । स च यागः 'अथैष भूर्वैश्वदेवः, त्रिवृदेव सर्वः, तस्य विश्ववत्यः (विश्वशब्दघटिताः) स्तोत्रीयाः, धेनुर्दक्षिणा' इति विहितः । के. १०।६।१४।५६–५८.

* **धेनुर्दक्षिणा** । 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य (अग्निष्टोमस्य) द्वादशशतं दक्षिणा' इति वाक्ये चशब्देन इतरेतरसहितस्य गवादिशब्दस्य दक्षिणाशब्दान्वयावगमात् समुदितानां गवादीनां एकदक्षिणात्वावगतेः 'धेनुर्दक्षिणा' इति विकृतौ (भूनामके एकाहे) विहिताया धेनोः समस्तदक्षिणाविकारत्वं दशमे (१०।३।१४।५६–५८) वक्ष्यते । सु. पृ. ७८६.

* **धेन्वादयः शब्दाः** उभयोः (गौः धयन्ती चेति) असाधारणवचना एव । शोणादय इव अनपेक्ष्य च पदान्तरं एते पदावस्थायामेव असाधारणमर्थं प्रतिपादयन्ति । केचित् पदान्तरमपेक्ष्य साधारणं प्रतिपादयन्ति । यथा शुक्लः पट इति । टुप्. १०।२।२९।६८.

⧗ **धेनुकिशोरन्यायः** । 'यथा धेनुः किशोरेण' । तद्यथा, कृष्णकिशोरा धेनुः इति । यद्यपि धेनुशब्दो गोधेन्वां दृष्टप्रवृत्तिः, तथापि अभिधानसामान्यात् अश्वधेन्वामपि भागी इति किशोरेण लिङ्गेन अश्वधेन्वां विज्ञायते । भागित्वात्तु नियम्येत 'गुणानामभिधानत्वात् संबन्धादभिधानवद् यथा धेनुः किशोरेण' । भा. ७।४।२।७.

⧗ **धेनुन्यायः** । भूसंज्ञकैकाहे औपदेशिकधेनुदक्षिणया आतिदेशिककृत्स्नक्रतुदक्षिणायाः बाधः ॥

तस्य धेनुरिति गवाम्, प्रकृतौ विभक्तं चोदितत्वात्, तत्सामान्यात् तद्विकारः स्याद्, यथेष्टिर्गुणशब्देन ।१०।३।१४।५६॥

भाष्यम्— इदमामनन्ति 'अथैष भूर्वैश्वदेवः, त्रिवृदेव सर्वः, तस्य विश्ववत्यः स्तोत्रीयाः, धेनुर्दक्षिणा' इति । (अत्र सत्याषाढः– 'भूः उक्थ्यः रथंतरसामा, भूतिकामो यजेत, धेनुर्दक्षिणा' इति । १७।३।२४ । बृहस्पतिसववत् शस्यमित्युक्तं आश्वलायनेन ९।५।१५) । अत्र संदेहः किं धेनुः गवां निवर्तिका, उत कृत्स्नाया दक्षिणायाः इति । तत्र इदं तावत् परीक्ष्यं किं प्रकृतौ विभक्तं दाक्षिण्यम्, उत समस्तमिति । ततः इदं तच्च संहत्य अधिकरणं क्रियते । किं प्रकृतौ विभक्तं दाक्षिण्यम्, धेनुर्गवां निवर्तिका, उत अविभक्तं कृत्स्नाया दक्षिणाया निवर्तिकेति । किं प्राप्तम् ? 'तस्य धेनुः' इति श्रूयमाणे ब्रूमः । धेनुर्गवां निवर्तिकेति । ततः एतत् तावत् विचार्यते प्रकृतौ विभक्तं दाक्षिण्यमिति । किमिदं विभक्तमिति ? गवादीनामेकैकं द्रव्यं दक्षिणेति । कथम् ? गौश्चाश्वश्चाश्वतरश्च दक्षिणा, इति प्रकृतौ गवादिभिर्दक्षिणाशब्दः प्रत्येकं परिसमाप्यते । निर्दिष्टा हि गवादयो न तेषां समुदायः । चशब्दः समुच्चयार्थो भवति, न तु समुच्चयस्य निर्देशकः । परपदविशेषणार्थे तु समुच्चयमुपादत्ते । यदि हि निर्दिशेत्, क्रियागुणैः समुच्चयः

संबध्येत । ‘समुच्चयः शोभनः, समुच्चयो द्रष्टव्यः’ इति यथा भवति एवम्, ‘च शोभनः’ ‘च द्रष्टव्यः’ इति वा भविष्यति ।

तथा, यथेह समुच्चेययोः षष्ठी भवति ‘धवखदिरयोः समुच्चयः’ इति, एवं धवः खदिरश्चेत्यत्राप्यभविष्यत् । न तु भवति । तस्मान्न चशब्दः समुच्चयं निर्दिशति । श्रुत्या निर्दिष्टेन चैकवाक्यता न्याय्या, न गवादिलक्षितेन समुदायेन । तस्मात् ‘गौर्दक्षिणा, अश्वो दक्षिणा’ इत्येवं संबन्धः । लक्षयित्वा हि गवादीन् तेषां दक्षिणात्वं विधीयते । तच्च गुणभूतं प्रतिप्रधानं भिद्येत । चशब्दश्चैवं समर्थितो भविष्यति, ‘गौर्दक्षिणा, अश्वश्च दक्षिणा’ इति । न गौरश्वादिसहितो गवादीनां वा समाहारः इति ।

यदा विभक्तं दाक्षिण्यम्, तदा प्राप्ता गौर्दाक्षिण्ये । पुनर्विशेषार्थमुच्चार्यते ‘धेनुर्दक्षिणा’ इति । याऽसौ गौर्दक्षिणा सा धेनुरिति । अन्यासां दक्षिणानामविकारेण यथाप्रकृतिभावेन चोदकानुग्रहो भविष्यति । शब्देनैव गव्येष गुण उच्यते, धेनुत्वं नाम । गौरेव हि धेनुर्नान्या । यथेष्टिर्गुणशब्देन । सौर्यं निर्वपेदिति सूर्यसंबन्धं कुर्यात् द्रव्यस्येति विवक्षिते निर्वपणाश्रयः एव प्रयोगः शब्देन निर्दिश्यते इति, सनिर्वपणकात् प्रयोगादनेन निर्वपणशब्देन ऐष्टिको विध्यन्तो नियम्यते । एवमिहापि गोर्गुणवचनेन धेनुशब्देन गोदक्षिणाविकारः क्रियते, नान्या दक्षिणा विक्रियते इति ।

टुप्-- तस्य धेनुरिति (सर्वं सूत्रम्)। (शाखान्तरवाक्यमङ्गीकृत्य चिन्त्यते यत्र गवादीनि द्रव्याणि [इति], ‘तस्य द्वादशशतम्’ इति च एकवाक्यभूतं श्रूयते । भाष्योक्तं संदेहं दर्शयति–) विकृतिसिद्ध्यर्थं प्रकृतिं तावन्निरूपयामः । यदि (प्रकृतौ) गवादयः प्रधानभूताः (दक्षिणां प्रति) ततः एकद्रव्यनिवर्तिका धेनुः (एकद्रव्यस्यैव निवर्तिका इति विग्रहः) । अथ दक्षिणा (प्रधानभूता ततः) कृत्स्नस्य दाक्षिण्यस्य निवर्तिका (धेनुः । पूर्वपक्षमाह–) गवादयोऽत्र प्रधानभूताः । (कुतः ?) ते अत्र निर्दिश्यन्ते । दक्षिणा तान् प्रति (एकैकमुद्दिश्य) विधीयते । ‘**चशब्दः समुच्चयार्थो भवति, न तु समुच्चयस्य निर्देशकः**’ (इति भाष्यस्य) कोऽभिप्रायः ? (केचिदाहुः प्रमाणान्तरसिद्धस्यार्थस्य अनुवादकोऽयं चशब्दः, न तु विधायक इति । अपरे पुनः द्योतकाः चादयः, न तु वाचकाः इति व्याचक्षते । तद्भ्रमापनोदनाय अर्थतत्त्वं वक्तुमाह–) शब्दास्तावत् द्विप्रकाराः, केचित् वाच्यम् (अर्थम्) स्वप्रधानमाहुः, नोपसर्जनत्वेन यथा ‘वृक्षौ’ इति वृक्षशब्दः स्वार्थवान् उच्चार्यते (स्वप्रधानभूतार्थवानित्यर्थः) केचित् (तु वाच्यमर्थम्) अन्योपसर्जनीभूतं ब्रुवते (न प्रधानभूतम्) यथा अत्रैव ‘वृक्षौ’ इति द्विवचनं प्रातिपदिकोपसर्जनं आत्मार्थं ब्रवीति द्विवचनार्थं द्वित्वमेव अजहत् (अजहदेव इत्यन्वयः) । एवं चशब्दः समुच्चयं ब्रुवन् (नियमेन शब्दान्तरात् पर उच्चार्यमाणः) परोपसर्जनत्वेन ब्रवीति, न स्वप्राधान्येन । तस्मात् यस्योपसर्जनं चशब्दः, सोऽत्र क्रियागुणाभ्यां संबध्यते । प्रधाने कार्यसंप्रत्ययात् सिद्धं इति । (‘इति अभिप्रायः भाष्यस्य’ इति अनुकृष्टेन अभिप्रायपदेन इतिशब्दस्यान्वयः । किं तत् प्रधानमित्यत आह–) ते च गवादयः । न चशब्दः समुच्चयस्य पर्यायवचनः । समुच्चयशब्दः (हि) समुच्चयं प्राधान्येन निर्दिशति, नान्यत्र गुणभावेन । (तच्च दर्शितं भाष्ये । एवं स्वमतेन व्याख्याय परमतं दूषयति । तत्रापि अनुवादपक्षं उपेक्ष्य द्योतकत्वपक्षं दूषयति–) चादयः स्वार्थस्य वक्तारः, न द्योतकाः । कथम् ? शब्दस्तावत् अदृष्टया शक्त्या अर्थमभिधत्ते । (तेन) स एव (चशब्दः समुच्चयाभिधायी कल्पयितुम्) न्याय्यः, एकशक्तिकल्पनात् । (अन्यथा शब्दान्तरस्य तदभिधायिता, चशब्दस्य च द्योतकत्वं इति शक्तिद्वयं स्यात्) । अपिच वृक्षशब्दे उच्चरिते वृक्षार्थः एव मनसि विपरिवर्तते, नान्यसहितः प्राक् (च-) शब्दोच्चारणात् । उच्चरिते तु चशब्दे इतरेतरयोगः प्रतीयते । यस्य चोच्चारणात् योऽर्थः प्रतीयते, स तस्यार्थः । गवादीनामुद्दिश्यमानानां विशेषणमविवक्षितम् । तस्मात् (गवाश्वाश्वतरादीनाम्) एकैकस्य दक्षिणया संबन्धः ।

सर्वस्य वा, क्रतुसंयोगादेकत्वाद् दक्षिणाऽर्थस्य, गुणानां कार्यैकत्वादर्थे, विकृतौ श्रुतिभूता स्यात्, तया समवायाद्धि कर्मभिः । ५७ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । सर्वस्य क्रतुदाक्षिण्यस्य निवर्तिका धेनुरिति प्रतिज्ञायते । तत्रैतद्वर्ण्यते समस्तं दाक्षिण्यमिति । किमिदं समस्तं दाक्षिण्यमिति ? न प्रतिद्रव्यं दक्षिणाशब्दः संबध्यते, गौर्दक्षिणा, अश्वो दक्षिणा, अश्वतरो दक्षिणा इति । कथं तर्हि ? गवादयो दक्षिणेति । नहि गवादीनुद्दिश्य दक्षिणासंबन्धो विधीयते, ये गवादयस्ते दक्षिणेति । तथाहि दक्षिणाशब्दो गवादीनां दक्षिणासंबन्धविधानार्थे यौगपद्येन अन्तर्णीतसंबन्धमभिवदन् बहुवचनान्तः स्यात्, गवादयो दक्षिणाः इति । यथा ‘अग्नीषोमौ देवते’ ‘प्राणापानावभिसमभवताम्’ इति । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । कथं तर्हि ? दक्षिणामुद्दिश्य गवादयो विधीयन्ते । का दक्षिणा ? गवादय इति । दक्षिणा नाम दक्षतेरुत्साहकर्मणः । दक्षिणा उत्साहिका, इति । एकः स गुणः । स च प्राधान्येन विवक्षितः । तद्विशेषणत्वेन गवादयः । गुणवचनानां च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, न द्रव्यवचनानामाश्रितगुणवशेन । यथा, ‘विश्वे देवा देवता’ इति । का पुनर्दक्षिणा ? गौश्चाश्वश्चाश्वतरश्चेति । दक्षिणाशब्दो दाने संबध्यते, ऋत्विग्भ्यो दक्षिणां ददातीति, न गवादयः । एको हि दक्षिणानामर्थः, ऋत्विजामानमनम् । सकृच्च आनतास्ते भवन्ति, भूय आनमनेन अर्थो नास्ति, गवादीनामपि गुणानामेकं कार्यं दक्षिणात्वम् । यदा समस्तं दाक्षिण्यम्, तदा विकृतौ भुवि तस्मिन् प्राकृतेऽर्थे धेनुः श्रुतिभूता । सा च प्राकृतं कार्यमभिनिर्वर्तयति । क्रतुसंयोगेन हि श्रूयते तस्य क्रतोर्धेनुर्दक्षिणा, इति । तस्मिन्निर्वृत्ते सर्वं चोदकप्राप्तमानुमानिकं निवर्तते । तया समवायाद्धि कर्मभिर्ऋत्विजः संबध्यन्ते श्रुतिभूतया । अपिच चशब्दश्रुत्या ससहायं गोद्रव्यमिति प्रतीयते । दक्षिणासंबन्धोऽस्य वाक्येन । श्रुतिश्च वाक्याद्बलीयसी । तस्मात् पूर्वं चयोगः, पश्चाद्दक्षिणासंबन्धः । इतरेतरयुक्ता दक्षिणात्वेन संबध्यन्ते गवादयोऽर्थाः । तस्मात् कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिका धेनुरिति ।

टुप्— **सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थगुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात् तस्मात् समवायो हि कर्मभिः ॥** (लिखितटुप्टीका पुस्तके एतादृशः सूत्रपाठः । किञ्चिदक्षरभेदेन एतादृश एव पाठः अनेकत्र दृश्यते । तथापि नासौ भाष्यानुसारी । टुप्टीकामूले तु नैव सूत्रं प्रायो व्याख्यायते । भाष्यानुसारी य–क्ष–पुस्तकानुसारी च पाठः प्रायोऽस्माभिः स्वीकृतः इति ज्ञेयम्– के.) इतरेतरयुक्ताः (गवादयः) दक्षिणां प्रति विधीयन्ते । कुतः ? संख्यासामर्थ्यात् (द्वादशशतसंख्योपादानसामर्थ्यादित्यर्थः) । यदि गवादीनुद्दिश्य दक्षिणा विधीयते (तथा सति) न संख्या दक्षिणां प्रति विधीयेत, वाक्यभेदप्रसङ्गात् (दक्षिणाशब्दस्य विरुद्धत्रिकद्वयापत्तेश्च) । यदि च गवादयः (संख्यां प्रति) प्रधानभूताः (तथा सति ‘तस्य’ इत्यत्र) तेषामिति बहुवचनं प्राप्नोति । किञ्च गवादीनां प्राधान्ये (सति विधेः) अदृष्टकल्पना प्राप्नोति अन्यत्राशेषभावात् (शेषभावात् इति मुद्रिते) गवादीनाम् । दक्षिणाप्राधान्ये (तु) नादृष्टम् (कल्प्यम्), ‘ऋत्विग्भ्यो दक्षिणां ददाति’ इति विहितत्वात् । अपिच गुणवचनोऽयम् (दक्षिणाशब्दः), स यदा द्रव्ये उपसर्जनीभूतः, तदा द्रव्यस्यैव यत् लिङ्गसंख्यम्, तत् लभते । इह च बहूनि द्रव्याणि (गवादीनि) तस्मात् बहुवचनेन भवितव्यम् (दक्षिणाः इति) । यदा तु स्वप्राधान्येन विवक्षितो गुणः, तदा द्रव्यस्य यत् लिङ्गसंख्यम्, तन्न लभते । भवितव्यं च गुणस्यापि (केनचित्) वचनेन, तस्मात् (प्राथम्यात्) ‘दक्षिणा’ इति एकवचनं युक्तम् । (तस्मात् कृत्स्ननिवर्तिका धेनुरिति) ।

चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् ।५८॥

भाष्यम्— यदुक्तं यथेष्टिर्गुणशब्देनेति, अत्रोच्यते । आग्नेयोपांशुयाजाग्नीषोमीयानां प्राकृतानां सौर्यार्यमणप्राजापत्यनैर्ऋतीनां चोदनानां न किञ्चिदेकं कार्यम्, यद्वैकृती चोदना आश्रयेत् । तत्र वक्ष्यते ‘एकस्य कर्मणो वैकृतं कर्म विध्यन्तं गृह्णाति’ इति । तत्र कस्य ग्रहीष्यतीति संदेहे युक्तो लिङ्गेन नियमः । इह तु अपदिष्टो हेतुः । गवादीनामेकं कार्यं दक्षिणात्वम् । तस्मिंश्च धेनुः श्रुतिभूता चोदकप्राप्तान् निवर्तयितुमर्हतीति ।

शा— गवामेव निवर्तिका धेनुर्नाश्वादीनाम् । इति प्राप्ते, अभिधीयते । ‘गवादीनां प्रधानत्वे दृष्टं

नास्ति प्रयोजनम् । ऋत्विगानमनार्था तु दक्षिणा सप्रयोजना ॥' तस्मात् समस्तगवादिनिवृत्तिः ।

सोम— वृत्ताधिकरणत्रयस्य करिष्यमाणबाधोपोद्घातत्वात् अध्यायसंगतिः, करिष्यमाणविचारस्य अवसरलक्षणा संगतिः । **सूत्रार्थस्तु**— तस्य धेनुरिति श्रुतधेनुः गवां निवर्तिका स्यात्, प्रकृतौ गवाश्वादीनां प्रत्येकमेव दक्षिणात्वस्य चोदितत्वात् । तत्रापि गोभिरेव सामान्यात्, यथा गुणशब्देन निर्वपत्यादिना सामान्यात् इष्टिः सौर्यादिः आग्नेयविकारः, तद्वदिति ।

वि— 'भूनाम्नि (यागे) धेनुर्बाधेत गाः किंवा कृत्स्नदक्षिणाम् ।, धेन्वा विशेषितत्वाद् गाः, दक्षिणैकत्वतोऽखिलाम् ॥'

भाट्ट--'अथैष भूर्वैश्वदेवः' इत्यनेन विहिते भूसंज्ञके एकाहे 'धेनुर्दक्षिणा' इत्याम्नातम् । सा किं अश्वादीनां निवर्तिका न वेति चिन्तायाम्, **यद्यपि** न मूलोक्तरीत्या गवाद्युद्देशेन प्रकृतौ दक्षिणात्वस्य 'गौश्चाश्वश्च' इत्यनेन विहितत्वात् उद्देश्यविशेषणस्य साहित्यस्य अविवक्षितत्वेन प्रत्येकं गवादीनां दक्षिणात्वावगतेः धेनुर्गवामेव स्थानापत्त्या निवर्तिकेति शङ्कितुं शक्यम्, गवादीनामप्राप्तत्वेन उद्देश्यत्वायोगात्, अनेकोद्देशे वाक्यभेदाच्च, दक्षिणात्वस्य आनतिकरत्वातिरिक्तस्य दुर्वचनत्वेन आनतेः फलरूपतया विधेयत्वायोगाच्च । अत एव गवादिद्रव्यविशिष्टं गोवृत्तिसंख्याविशिष्टं च दानमेव दक्षिणापदवाच्यानतिजनकत्वेन विधीयते । निरुक्तदानस्य च 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन ऋत्विगुद्देशेन विनियोगः । ऋत्विग्विशिष्टस्य वा तस्यानत्यर्थत्वेन विनियोगेनैव वा आनत्यर्थत्वस्य प्राप्ततया दानानुवादेन ऋत्विङ्मात्रविधिरित्यादि पूर्वमुक्तम् । **तथापि** 'गौश्चाश्वश्च' इत्यत्र गवादीनामानतिजनकत्वं प्रत्येकमेव, न तु व्यासज्यवृत्ति आग्नेयादिवत्, तथाकल्पने प्रमाणाभावात् । न च चशब्देन इतरेतरयोगप्रतीतेः परस्परसहितानां करणत्वावगतिः, तस्य समुच्चयप्रतिपादकत्वेनापि उपपत्तौ इतरेतरयोगाप्रतिपादकत्वात् । अतश्च योग्यताबलेन प्रत्येकमेव गवादीनां प्रकृतौ दक्षिणात्वम्, तेन दक्षिणोद्देशेन विधीयमानं विकृतौ धेनुत्वं विधेयसामर्थ्यानुसारात् 'गोद्वारेणैव निविशते इति नात्र कस्यापि बाधः । धेनुशब्दस्य गोमात्रवृत्तिगुणविशेषे गुणविशिष्टगव्येव वा शक्तित्वस्य स्थापितत्वात् । **इति प्राप्ते**, न तावत् गोरनुवादेन धेनुत्वविधिः, एकप्रसरताभङ्गापत्तेः । नापि दक्षिणानुवादेन धेनुत्वविधिः, तथात्वे एकत्वस्यापि अप्राप्ततया विधेयत्वे वाक्यभेदापत्तेः । अतोऽवश्यं दक्षिणादानोद्देशेन धेनुत्वैकत्वविशिष्टं गोद्रव्यमेव विधेयम् । तच्च यद्यपि प्रकृतौ गवादीनां प्रत्येकं दक्षिणादानसाधनता, तथापि त्रिवत्सवत् धेनुसाधनतया प्राकृतसर्वसाधनतानां बाधात् सर्वद्रव्यबाधकं भवेदेव । वस्तुतस्तु गवादिद्रव्याणां न प्रकृतौ प्रत्येकसाधनता, समुच्चयस्य 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालम्, त्वाष्ट्रं पात्नीवतम्' इत्यादिवदेकवाक्योपादानादेव सिद्धेः चशब्दवैयर्थ्यापातात् । अतश्च गवादीनां चशब्दबलेन इतरेतरयोगप्रतीतेर्व्यासज्यवृत्त्या एकसाधनताकत्वात् धेनुसाधनतया प्राकृतदक्षिणादानसाधनताबाधात् सर्वद्रव्यनिवृत्तिः । एतेन साधनताभेदपक्षे गोवृत्तिसाधनतैव अतिदेशतः पूर्वप्रवृत्त्यङ्गीकारेण धेनुत्वादिविशिष्टा विधीयते इति नान्यासां बाध इत्यपास्तम्, साधनताया अप्येकत्वेन गोद्रव्येण द्रव्यान्तरनिवृत्तेरावश्यकत्वात् ।

मण्डन--'धेनुः समस्तस्य निवर्तिका स्यात् ।'

शंकर--'धेनुर्गवां बाधिका स्यात् ।' गवां गवाश्वादीनामित्यर्थः ।

* उपहव्ये एकाहे 'अश्वः श्यामो (वो–भाष्ये) रुक्मललाटो दक्षिणा' इत्युक्तम् । तत्र दक्षिणाशब्दसंयोगात् **धेनुन्यायेन** कृत्स्नस्य क्रतुदाक्षिणस्य अश्वेन बाधः । वि. १०।३।१८.

धेनुवच्चाश्वदक्षिणा, सब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य । १०।३।१८।६५ ॥

उपहव्ये क्रतौ 'उक्थ्यो यज्ञः सप्तदशस्तोमो बृहत्पृष्ठः अश्वः श्यावो रुक्मललाटो दक्षिणा' 'स ब्रह्मणे देयः' इति श्रूयते । किमयमश्वः ब्रह्मभागमात्रस्य निवर्तकः, उत कृत्स्नस्य क्रतुदाक्षिण्यस्य इति विचारे कृत्स्नस्य निवर्तकः इति पूर्वाधिकरणसिद्धान्तन्यायेन उत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । अश्वदक्षिणा अश्वरूपा दक्षिणा कृत्स्नायाः प्राकृत्याः क्रतुदक्षिणाया निवर्तिका । धेनुवत् (१०।३।१४।

५६–५७)। ‘स ब्रह्मणे देयः’ इत्यनेन च पुरुषापनयः ब्रह्मभिन्नानां पञ्चदशानां ऋत्विक्पुरुषाणां अपनयः क्रियते। यथा हिरण्यस्य यथा शतकृष्णलचरौ शेषभक्षाणां हिरण्यात्मकानाम् ‘सर्वं ब्रह्मणे परिहरति’ इत्युक्तम् (१०।२।५।१९–२०) तद्वत्।

एके तु कर्तृसंयोगात् स्रग्वत्, तस्य लिङ्गविशेषेण। ६६॥

अनया अश्वदक्षिणया कृत्स्नक्रतुदक्षिणागता एके केचित् पदार्थाः ब्रह्मभागरूपा एव निवर्तेरन् न कृत्स्नक्रतुदक्षिणाया निवृत्तिः। कर्तृसंयोगात् कर्मकर्तुः ब्रह्मणः संबन्धात्। ‘स ब्रह्मणे देयः’ इति वाक्येन ब्रह्मसंबन्धज्ञानात्। एवं तस्य अश्वस्य कर्तृसंयोगात् लिङ्गविशेषेण कर्मकर्तृब्रह्मसंबन्धरूपविशेषलिङ्गेन एके केचित् पदार्था ब्रह्मभागरूपा एव निवर्तन्ते। स्रग्वत्। यथा दशपेये ‘स्रजमुद्गात्रे’ इत्युद्गातृभागस्यैव निवर्तिका स्रक्, न कृत्स्नायाः क्रतुदक्षिणायाः तद्वत्। इति पूर्वः पक्षः। तुशब्दः सिद्धान्तपक्षव्यावर्तकः।

अपिवा तदधिकाराद्धिरण्यवदविकारः स्यात्। ६७॥

पूर्वपक्षस्य सूत्रप्राप्तस्य व्यावृत्त्यर्थः अपिवाशब्दः। अयं श्यावोऽश्वः हिरण्यवत् शतकृष्णलचरुशेषभक्षविषयहिरण्यशकलैर्यथा इतरेषां त्रयाणामपि ऋत्विजां व्यावृत्तिः तथा विकारः स्यात् कृत्स्नक्रतुदक्षिणाया बाधकः स्यात्। तदधिकारात् दक्षिणाऽधिकारात्। दक्षिणाशब्देन दक्षिणामधिकृत्य अश्वसंबन्धः कृतः। तस्मात् कृत्स्नक्रतुदक्षिणाविकारः अश्वः इति सिद्धान्तः। के.

धेनुवत्सर्षभाधिकरणम्। द्यावापृथिव्यादौ धेन्वादिशब्दोपदिष्टगोद्रव्येण प्राकृताजद्रव्यस्य बाधः॥

औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात्। १०।२।२९।६९॥

भाष्यम्— क्वचित् श्रूयते (पशुविकृतौ) ‘द्यावापृथिव्यां धेनुमालभेत, मारुतं वत्सम्, ऐन्द्रमृषभम्’ इति। तदत्र संशयः किमजाः धेनुवत्सर्षभाः, उत गाव इति। किं प्राप्तम्? चोदकानुग्रहाय अजा इति। गुणनिमित्तास्ते शब्दाः। स गुणः चोदकेन प्राप्ते प्राकृते द्रव्ये आवेशयितव्यः। ननु गवि गुणमाहुः एते शब्दाः। सत्यं गवि आहुः, न तु गौरत्र प्रत्यक्षेण वचनेन चोदकेन वा। स एत्र गुणवचनो यद्यपि श्रुत्या गोऽधिष्ठानं गुणं वदति, वाक्येन आलम्भद्रव्यं आस्कन्दति, तथापि गोद्रव्यस्य अभावात् आलभतिवाक्यमेव गृह्यते न श्रुतिः। अपिच धानवयोवचना एते शब्दाः। गुणाश्च अमूर्तत्वात् न क्रियया संबध्यन्ते। द्रव्येण एषां संबन्धो भवति। चोदकप्राप्तं च द्रव्यम्। तेनैषां सामानाधिकरण्यम्। यथा ‘अवी द्वे धेनू ददाति’ ‘तस्य पुरुषी धेनुर्दक्षिणा’। तथा ‘अजर्षभस्याजिनमवस्तृणाति’ इति। धानवयोवचनः शब्दः तदेकवाक्यगतेनैव द्रव्येण संबध्यते। एवमिहापि चोदकप्राप्तेन द्रव्येण संभन्त्स्यते इति। तस्मात् अजाः धेनुवत्सऋषभाः इति। एवं प्राप्ते, ब्रूमः। औत्पत्तिके एतस्मिन् उत्पत्त्यैव जातिविशिष्टे गुणशब्दे द्रव्यतो विकारः स्यात्। द्रव्यमपि विकुर्यात्, न गुणमात्रम्। यदेतत् जातिविशिष्टं धानं वयश्च, न तत् अजपशुषु शक्यं कर्तुम्, गोपशुष्वेव तत् भवति। ननु अत्र यदपि स्यात् शक्यमावेशयितुम्, तदावेशयिष्यते, यन्न शक्यम्, तत् प्रमादिष्यते यथा अजा धेनुवत्सर्षभा इति। उच्यते। विस्पष्टस्तत्र अजशब्देन धेन्वादीनामेकवाक्यभावः। इह चोदकेन अजद्रव्यम्। चोदकश्च विरोधे सति नाजद्रव्यं प्रापयति। न च धेन्वादीनां द्रव्येण संबन्धः। कारकविभक्तिरेषा आलम्भेन संबन्धं करोति, गवि सा च श्रुतिः। द्रव्यसंबन्धो वाक्येन स्यात्, तच्च दुर्बलं श्रुतेः। तस्मिंश्च जातिविशिष्टे गुणे आलम्भसंयुक्ते सति न शक्यं अजाद्रव्येण भवितुम्। न च चोदकापेक्षया प्रत्यक्षा जातिः उत्स्रष्टुं शक्यते। तस्मात् गावो धेन्वादयो भविष्यन्तीति।

टुप्— औत्पत्तिके तु०॥ धेन्वादयः शब्दाः उभयोः (अपि वादिनोः गवादीनाम्) असाधारणवचनाः एव, शोणादय इव (नात्र विवादः) अनपेक्ष्यैव पदान्तरं एते (धेन्वादिशब्दाः) पदावस्थायामेव असाधारणमर्थं प्रतिपादयन्ति। (तेनामी गुणविशेषवचनाः) केचित् पदान्तरमपेक्ष्यैव (अर्थं प्रतिपादयन्ति) यथा शुक्लः पट इति। (तेन ते सामान्यगुणवचनाः।

यदि असाधारणगुणवाचित्वमविवादम्-) कथं तर्हि पूर्वः पक्षः ? (उत्तरम्) श्रुत्या धेनुशब्दो धाने (दुग्धदाने) एव वर्तते, गोद्रव्यं तु अस्य (आधारभूतम्) न शब्देनोक्तम्, नापि चोदकेन (केवलं लक्षणया गम्यते) अजद्रव्यं तु चोदकेन प्राप्नोति, तत्र आनुमानिकः शब्दो विद्यते। एवं पूर्वः पक्षः। सिद्धान्तस्तु, असाधारणगुणवचनोऽयं गोऽधिष्ठानमन्तरेण नैव गुणः संपादितो भवति ; तस्मात् (उक्तगुणविरोधात्) चोदकस्य बाधः। उत्तराधिकरणं अस्यैव प्रत्युदाहरणम्।

सोम— पूर्वत्र चोदकप्राप्तसंख्याद्रव्यपरिग्रहे सप्तदशशरावपरिमितचरुसंपादनाशक्त्या अवश्यम्भाविनि बाधे जघन्यत्वात् मुष्टेर्लोपः। इह तु चोदकप्राप्ताजद्रव्यपरिग्रहेऽपि धानादिगुणोपपत्तेः नावश्यम्भाविबाधः इत्युत्थितेः **संगतिः। सूत्रार्थस्तु**-- औत्पत्तिके स्वभावत एव द्रव्यविशेषगतगुणविधायके धेन्वादौ द्रव्यस्य विकारः स्यात् गवादिद्रव्यविशेषगतस्य धानादिगुणस्य अजादिद्रव्ये कर्तुमशक्यत्वादिति।

वि-- 'धेनुवत्सर्षभाश्छागे गवि वा, गुणकीर्तनात्। अजेऽतिदिष्टे स्यु, र्नैवं गोजात्येकगुणोक्तितः॥'

भाट्ट—'द्यावापृथिव्यां धेनुमालभेत, वायव्यं वत्सम्, ऐन्द्रमृषभम्' इत्यादौ आतिदेशिकस्य अजत्वस्य न बाधः, धेन्वादिशब्दानां धानादिगुणमात्रशक्तत्वेन अजत्वे सत्यपि उपपत्तेः। न च गव्येव धेन्वादिशब्दानां प्रयोगात् गोवृत्तिगुणेष्वेव शक्तिः, तन्मात्रवृत्तिगुणेषु वैजात्ये प्रमाणाभावेन गोरपि शक्यताऽवच्छेदककोटिप्रवेशो गौरवात्, 'अवी द्वे धेनू ददाति, अजमृषभम्' इत्यादौ अन्यत्रापि धेन्वादिशब्दप्रयोगाच्च। गव्येव प्रचुरप्रयोगात्तु गुणविशिष्टायां तस्यां निरूढलक्षणा पार्थादिशब्दवत् (त्रयाणां पृथापुत्रत्वेऽपि अर्जुने एव पार्थशब्दस्य निरूढा लक्षणा) पङ्कजशब्दस्य तु पद्मभिन्ने प्रयोगाभावात् पद्मे योगरूढिस्वीकारेऽपि अदोषः। अतश्च लक्षणायां प्रमाणाभावात् अतिदेशानुरोधेन निरुक्तगुणविशिष्टं अजद्रव्यमेव ग्राह्यम्। एवं प्राप्ते, पदान्तरसमभिव्याहाराभावे धेनुपदमात्रश्रवणे सर्वत्र गोवृत्तिधानादिगुणस्यैव प्रतीतेः धेन्वादिशब्दानां शोणादिशब्दवत् गोमात्रवृत्तिविजातीयधानादिगुणे एव शक्तिः। वैजात्यं च अश्वरूपमात्रवृत्तिरक्तत्वव्याप्यजातिशोणत्ववत् गोमात्रवृत्तिधानादिनिष्ठं अनुभवसिद्धम्। अस्तु वा उक्तयुक्त्या गुणविशिष्टगव्येव शक्तिः। अजादिपदसमभिव्याहारे तु धेन्वादिपदस्य लक्षणा। अतश्च गोरुपदिष्टगुणाक्षिप्तत्वात् उपदिष्टत्वादेव वा अजस्य बाधः।

मण्डन— 'नाजो धेन्वादिषु ग्राह्यः।'

शंकर-- 'धेन्वादावजबाधनम्।' ३०.

* **धेनुवत्सर्षभाधिकरणन्यायः** 'असाधारणगुणवचनोऽयम् (धेन्वादिशब्दः) अधिष्ठानमन्तरेणैव गुणः संपादितो भवति' इति। **टुप्. १०।२।२९।६९.**

* **धेनुवत्सर्षभ**शब्दोपदिष्टगोद्रव्येण द्यावापृथिव्यादौ प्राकृतस्याजद्रव्यस्य बाधः। **भा. १०।२।२९।६८.**

* **धेनुशब्देन** छागबाधः। धेनुशब्दो गोद्रव्यमन्तरेण नैव दृष्टः प्रयुज्यमानः। **टुप्. १०।४।२२।४४.**

* **धैष्ण्या** अपि व्याघारणार्थमुत्पन्नाः, न ते आज्यदोहसामगानकाले उपनिधेयाः गर्गत्रिरात्रे। **टुप्. ७।३।१२।३०.**

* **ध्रुवः ग्रहः** अनुपोप्ते साद्यते, अन्ये ग्रहाश्च उपोप्ते (उपोप्तं भूमेरुपरि मृन्मयं स्थण्डिलम्। अनुपोप्तं केवला भूमिः)। **भा. ३।६।९।३०.** * ध्रुवः ग्रहः ज्योतिष्टोमे प्रातःसवने गृह्यते। **वि. २।३।१.**

* **ध्रुवगोपः** ध्रुवं नाम सोमग्रहं गोपायति रक्षति स राजपुत्रः। **के.**

* **ध्रुवचमसाः** प्रकृतिभूताः। के पुनर्ध्रुवचमसाः ? ये शुक्रामन्थिप्रचारे सवनमुखीयाः। ऐन्द्रास्ते भवन्ति। तेषां प्रकृतिभूतं प्रदानम्, विकृतिभूतान्यन्यानि। **भा. ३।२।११।२९.**

* **ध्रुवा** (नाम स्रुक्) आज्यधारणे गुणभूता। **भा. ४।३।१।१.** * ध्रुवा वैकङ्कती। अत्र फलश्रुतिरर्थवादः, न फलप्रयुक्तता। सा च क्रत्वर्था आज्यधारणार्था। **के. ४।३।१।१.** * ध्रुवा हि देवतार्थद्रव्यान्तरावदानेऽपि उपस्तरणाभिघारणोपयोगित्वात् प्रत्यभिघारणमपेक्षते एव। तेन प्राक् स्विष्टकृतः परस्तादपि ध्रौवोपयोगः अस्ति ह्रस्वत्तेऽवत्ते प्रतिपूरयितव्या। ततः परं तु न किञ्चित्

कार्यं इति नार्थः प्रतिपूरणेन । **वा.** ३।५।१।१२. * **ध्रुवायाः** उपांशुयाजार्थाज्याधारत्वेऽपि असाधारण्याभावात् प्रधानकालविप्रकर्षाच्च प्रधानविप्रकर्षः । **सु. पृ.** ६२६. * ध्रुवाया एव (सकाशात्) स्विष्टकृते अवदीयते । **वा.** ३।५।१।४.

* **ध्रुवाऽऽज्यादिभिः** स्विष्टकृदादिशेषस्य नानुष्ठानम् । **वि.** ३।५।१.

* **ध्रुवाऽऽप्यायनं** वचनमन्तरा नोपपद्यते । **संकर्ष.** २।४।७.

* **ध्रौवमाज्यं** साधारणम् , दर्शयति च ‘ सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यम् ’ इति । साधारणं हि तत् , उपांशुयाजाय अन्येभ्यश्च प्रयोजनेभ्यः । यावदाज्येन यष्टव्यं तत्तदाज्यं प्रयोजयति । यस्ययस्य आज्यम् , तस्यतस्य एवं ग्रहीतव्यं संस्कर्तव्यं च (प्रत्यभिघारयितव्यम्) । **भा.** ३।५।१।६, * ध्रौवमेव आज्यं दर्शपूर्णमासयोः उपांशुयाजे द्रव्यम् । १०।८।१५।४७–४८, * **ध्रौवाज्यात्** सर्वसाधारणात् उपांशुयाजार्थे अपयातिते परिशिष्टं अन्यदेवतार्थं भवति । १२।१।१।५, * ‘ सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यम् ’ । तेन उपांशुयाजः **ध्रौवाज्यात्** । १०।८।१५।४७–४८.

* **ध्वंसः** नाभावरूपः, किन्तु चरमक्षणसंबन्ध एव नाशः । तस्योत्तरकालमेव नाशादनित्यत्वम् । अत एव ‘ नष्टो घटः ’ इति प्रतीतिः । नहि ‘ नाशोऽस्ति ’ इति कश्चित् प्रत्येति । अतो ध्वंसो नास्तीति केचित् । **मणि.** पृ. २९. * ध्वंसः । ‘ नास्तिता पयसो दध्नि प्रध्वंसाभाव इष्यते । ’ श्लोवा. अभावप्रामाण्यवादे २.

⧗ **ध्वजनिखननन्यायेन** तत्त्वबुद्धेर्दृढतामुत्पादयितुमपि शास्त्रे नास्तिक्यतन्निरसनाद्यवतारः । स्थूणानिखननन्यायसमानार्थक एवायम् । **सिद्धान्तदर्शने** निरञ्जनभाष्ये ३।४।२२.

* ‘ **ध्वजिनो** गच्छन्ति ’ ‘ छत्रिणो गच्छन्ति ’ इति लिङ्गसमवायात् शब्दप्रवृत्तिः । **भा.** ३।८।२२।४५.

* **ध्वनिः** नादः । न वाय्वात्मा तत्संयोगविभागात्मा वा नादः , किन्तु वायुगुणः शब्दविशेषो नादो ध्वनिरिति चोच्यते । **रत्नाकरः** स्फोटवादे श्लो. ३८. * **ध्वनयः** अर्थान्तरभूताः शब्दस्य द्रुतादिबुद्धिमपारमार्थिकीं कुर्वन्ति । वा. २।२।१।१ पृ. ४६५. * ध्वनयः नानादेशस्थाः युगपदागच्छन्तः इतरेतरनिरपेक्षा एव युगपत् संस्कारानारभन्ते श्रोत्रस्य । तत्संस्कारानुरोधाच्च एकमपि शब्दं अनेकमिव गृह्णाति । एकैकसंस्कारोपजननाच्छक्तेः । **बृहती.** पृ. २२८. * **ध्वनीनां** भेदः उभयवादिसिद्धः । **मणि.** पृ. १६८, * ध्वनीनां वर्णाभिव्यञ्जकानामेव अनित्यत्वाङ्गीकारात् । रथंतरादिगीतिरूपाणां तु ध्वनीनां नित्यताऽङ्गीकारः । पृ. १७०.

* **ध्वनिधर्माणां** असदृशेष्वपि वर्णेषु अभिव्यङ्ग्याभिव्यञ्जकत्वसंबन्धनिमित्तारोपदर्शनात् सादृश्यादिना केनचित् संबन्धेन आरोपो भवति इति ज्ञायते । **सु.** पृ. ५०८.

न.

[अत्र प्रथमं न–शब्देन स्वतन्त्रेण आरब्धा लघुसिद्धान्तादयो निवेशिताः । ततः परं नञ्–शब्दारब्धाः । ततः परं न्यायसुधाकारेण नहि इति निषेधार्थकमखण्डं पदमिति स्पष्टमेवोक्तत्वात् नहिशब्दारब्धाः निवेशिताः । तदनन्तरं नशब्दारब्धसामासिकपदघटिताः नकारारब्धाश्च निवेशिताः । के.]

* ‘ **नाग्निं मन्थेत्** अग्नीषोमीये पशौ ’ इति शतपथे । अयं विकृतिगतदृष्टार्थप्रतिपत्तिव्यतिरिक्तसंनिपातिक्रियानिषेधः । बाल. पृ. ३७.

⧗ **नाज्ञातविशेषणविशिष्टबुद्धिर्विशेष्यमुपसंक्रामति इति न्यायः** । यथा विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वान्न तदन्तरेण तत्सिद्धिः । नहि दण्डज्ञानं विना दण्डीति ज्ञानं संभवति , न चाज्ञातविशेषणं तद्विशेष्यं वशीकरोतीति तदर्थः । **साहस्री.** १८७.

⧗ **नातिरात्रे इत्यत्र नशब्दः प्रतिषेधार्थक एव, न पर्युदासार्थकः, न वा अर्थवादः ॥**

शिष्ट्वा तु प्रतिषेधः स्यात् । १०।८।३।६॥

भाष्यम्— आह । प्रथमेऽधिकरणे नशब्दः पर्युदासार्थः, द्वितीये तु अर्थवादार्थः । अथ किंलक्षणकः प्रतिषेध इति । लक्षणमुच्यते । शिष्ट्वा तु प्रतिषेधः स्यात् । यथा ‘ नातिरात्रे गृह्णाति षोडशिनम् ’ इति ।

न तत्र शक्यं वक्तुं पर्युदास इति । संबन्ध एव हि न स्यात्, अतिरात्रवर्जितातिरात्रे गृह्णाति षोडशिनमिति । नापि कस्यचिदर्थवादत्वेन संभवति। तस्मात् नञो गृह्णातीत्यत्र संबन्धः ।

ननु परस्परं विरुद्धौ विधिप्रतिषेधौ न संभवतः । उच्यते । वचनप्रामाण्यात् प्रतिषेधो विधिं बाधित्वा भविष्यति, विधिरपि प्रतिषेधम् । नान्या गतिरस्तीति पक्षे मिथ्याप्रत्ययः कल्पयिष्यते । तदा विधिर्यदा न प्रतिषेधः । तदा प्रतिषेधो यदा न विधिरिति । ननु सर्वदा विधिः प्रतिषेधश्च प्राप्नोति । उच्यते । उक्तमेतत् वचनप्रामाण्याद्विरोधाच्च मिथ्याप्रत्ययः प्रयोगचन एकं कल्पं गृहीत्वा न द्वितीयमपि गृह्णातीति । तस्मादन्यतरेण कल्पेन सिध्यतीति । ननु कल्पान्तरभावे वैगुण्यम् । अत्रोच्यते । सत्यं वैगुण्यम् । वैगुण्येऽपि तत्सिद्धिरेव वाक्यात् प्रमाणादवगम्यते । तस्माददोषः । यत्र पुनरन्या वचनव्यक्तिरस्ति वाक्यस्य, तत्र न विकल्पो भवति । यथा नानुयाजेषु येयजामहं करोतीति ।

टुप्— (प्रथमेऽधिकरणे पर्युदासः, द्वितीये अर्थवादः) तृतीये प्रतिषेधः । नहि तत्र पर्युदासो भवति । (तथाहि,) यदि 'अनतिरात्रे गृह्णाति' इति पर्युदासः स्यात्, तत्र विधानानर्थक्यम् (षोडशिनः) । अथ अषोडशिनम् (अतिरात्रे गृह्णाति) इति तथापि अयमेव (विधानानर्थक्यम्) दोषः । (तस्मात् प्रतिषेधः नञर्थः) ।

शा—– सामान्यविषये विधौ विशेषविषयो नञ् पर्युदासरूपेण विधेरेव वाक्यशेषः इत्युक्तम् (प्रथमे), अप्राप्तविषयस्तु नञ् अर्थवादः इति (उक्तं द्वितीये) । अथ कोऽयं प्रतिषेधो भवति इति तत उच्यते (इति संगतिः) ।

वि—'नातिरात्रे पर्युदासो वादो वाऽथ निषेधनम् ।, आद्योऽनुयाजव, न्मैवं विध्येकविषयत्वतः ॥ अत एवार्थवादोऽपि न युक्तः पशुसोमवत् (न तौ पशौ करोति, न सोमे इतिवत्) । निषेधः स्याद् विकल्पोऽत्र व्रीह्यादाविव युज्यते ॥'

भाट्ट—– यत्र तु तस्मिन्नेवार्थे प्रत्यक्षो विधिः तस्मिन् एव च निषेधः, यथा 'अतिरात्रे षोडशिनं गह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इति, तत्र विकल्पस्यावश्यकत्वात् प्रतिषेध एव । न तु पर्युदासः, लक्षणायां प्रमाणाभावात्। नाप्यर्थवादः प्राप्त्यभावात् । **न च** तत्र 'समिधो यजति' इतिवत् विधिना क्रतुसाद्गुण्यजनकत्वाक्षेपात्, निषेधेन च 'नानृतं वदेत्' इतिवत् क्रतुवैगुण्यजनकत्वाक्षेपात् एकस्यैव षोडशिग्रहणस्य क्रतुसाद्गुण्यवैगुण्यजनकत्वं विरुद्धमिति **वाच्यम्** । एतादृशविषये निषेधेन षोडशिग्रहणाभावेऽपि इतराङ्गैः क्रतुसाद्गुण्योत्पत्तिः इत्यस्यैवाक्षेपात् । विधिना च षोडशिग्रहणस्यापि क्रतुसाद्गुण्ये सहकारित्वमित्याक्षेपात् । अतश्च षोडशिग्रहणे प्रवृत्तिसिद्ध्यर्थं करणपक्षे फलभूमाऽपि कल्प्यते इति ध्येयम् । अत एव प्रथमतो विधिप्रवृत्त्या प्रतियोगिप्रसिद्धौ जातायाम्, निषेधेन निषेधे कृते पश्चात् विधेयस्य फलभूमकल्पनमिति विशेषः ।

मडण्न— 'शिष्टे नञ् प्रतिषेधार्थः ।'

शंकर— 'विकल्पः षोडशिन्युक्त ।' ४.

* **नातिरात्रे षोडशिन**मित्यादौ विकल्पः । **भाट्ट.** १०।८।३. * नातिरात्रे षोडशिनं गृह्णाति अयं क्रत्वर्थमात्रविषयकः प्रतिषेधः श्रौतः । **बाल.** पृ. ३२, * नातिरात्रे षोडशिनं गृह्णाति अयं क्रियाप्रतिषेधः प्रत्यक्षः । पृ. ३२, * नातिरात्रे षोडशिनं गृह्णाति अयं षोडशिग्रहनिषेधः विकृतिगत—उपदिष्ट—अदृष्टार्थसंनिपातिक्रियानिषेधः । पृ. ३७.

* **न अनङ्गं** प्रधानमुच्यमानं कस्मैचित् प्रयोजनाय कल्पते । **भा.** ७।४।२।९.

⌛ **नानुपहत्य भूतानि भोगः संभवति इति न्यायः** । यथा 'अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिः स परो धर्मस्तेन जीवामि जाजले ॥' इति महाभारतशान्तिपर्वीयवचनं संगच्छते । **साहस्री.** ५०.

⌛ **'नानुमिते ह्यसौ' इति न्यायः** । अनुमितप्रतिपत्तेरेव धारणप्रयोजकत्वादिकल्पनादोषः 'नानुमिते ह्यसौ' इति न्यायात् अनुमानस्य फलमुखत्वाच्च । **भाट्ट.** ४।१।१३ । 'श्रूयमाणस्य वाक्यस्य न्यूनाधिक-

विकल्पने । लक्षणावाक्यभेदादिदोषो नानुमिते ह्यसौ ॥' वा. १।४।२।३ पृ. ३२९.

* **नानुयाजेषु । ननु** अनुयाजभिन्नेषु इति पर्युदासाश्रयणे अनूयाजशब्देन नञः समासः स्यात् । 'नञ्' इति सूत्रेण नञ् सुबन्तेन समस्यते इत्यर्थकेन तस्य समासविधानात् । ततश्च 'न लोपो नञः' इति नशब्दे आद्यवर्णस्य नकारस्य लोपे परिशिष्टात् अकारात् 'तस्मान्नुडचि' इति नुडागमे सति अनश्वः इत्यादिवत् अननूयाजेषु इति स्यात् । **न च** पाणिनिना सूत्रकृता 'विभाषा' इत्यधिकृत्य तद्विधानात् समासाभावपक्षे नानूयाजेषु इति न दुष्यति इति **वाच्यम्** । कात्यायनेन वार्तिककृता 'वावचनानर्थक्यं स्वभावसिद्धत्वात्' (समर्थसूत्रे वार्तिकम्) इति विभाषाऽधिकारस्य प्रत्याख्यातत्वात् । विग्रहवाक्यसमासयोः भिन्नार्थकतया तदर्थप्रतिपादनाय तदुभयोः स्वभावसिद्धत्वात् विभाषाऽधिकारो व्यर्थः इति तदर्थः । वावचनपर्यायात्मकं विभाषावचनं हि समासेन विग्रहवाक्यस्य निवृत्तिर्मा भूत् इत्येवार्थं पाणिनिना कृतम् । विग्रहवाक्यस्य समासेन निवृत्तिश्च तयोरेकार्थत्वे प्रसज्येत । व्याससमासयोर्भिन्नार्थत्वे तु स्वार्थप्रतिपादनाय व्यासवाक्यप्रयोगावश्यम्भावात् तन्निवृत्तिः समासे न संभाव्यते । ततश्च व्याससमासयोरेकार्थत्वे सति समासेन व्यासवाक्यस्य निवृत्तौ प्रसक्तायां वावचनं कर्तव्यं स्यात् । तदानर्थक्यवचनात्तु कात्यायनस्य एकार्थत्वं व्याससमासयोः अनिष्टमवगम्यते । सति च तयोः भिन्नार्थत्वे तत्तदर्थप्रतिपादनाय व्याससमासयोः स्वभावसिद्धत्वात् विभाषावचनं (न) कर्तव्यं इत्युपपन्नम् । अत एव 'ऋद्धस्य राज्ञः पुरुषः' इत्यत्र समासो न प्रयुज्यते, भिन्नार्थत्वात् । विग्रहवाक्ये हि राजपदं ऋद्धपदान्वयसहिष्णु, समासवाक्ये तु न । ततश्च पदान्तरसहिष्णुत्वासहिष्णुत्वप्रयोजकं वैजात्यं तत्रानुभवसिद्धं इत्यस्ति व्याससमासयोर्भिन्नार्थत्वम् । अत एव च राजपुरुष इत्यत्र राज्ञोः पुरुष इति वा राज्ञां पुरुष इति वा द्वित्वबहुत्वयोरप्रतीतेः वृत्तौ एकत्वमौत्सर्गिकं इत्युपपन्नम् । **न च** नानूयाजेषु इत्यत्र समासाभावेऽपि पर्युदासः कुतो न प्रतीयते इति **वाच्यम्** । अब्राह्मणः इत्यादौ हि समासे पर्युदासो गम्यते इत्यत्र न विवादः । यच्च समासगम्यम्, तत् तदेकलभ्यं इत्यभ्युपेयम्, अन्यथा वाक्येनापि समासगम्यार्थप्रतीतौ तयोर्भिन्नार्थत्वानुपपत्तेः । अतः पर्युदासपक्षे समासप्रसङ्गात् अननूयाजेषु इति स्यात् । अतोऽत्र नञः प्रतिषेधार्थकत्वमेव युक्तम् । **इति चेत्, नैष दोषः** । नञः पर्युदासार्थकत्वेऽपि बाधकाभावात् । न च नञ्समासापत्तिः, तस्य विकल्पितत्वात् । पाणिनिना 'विभाषा' इत्यधिकृत्य तद्विधानात् । 'वावचनानर्थक्यम्' इति कात्यायनवचनं तु न्यायविरोधादुपेक्ष्यम् । अस्त्येव हि व्याससमासयोरैकार्थ्यम् । **न च** एवं सति 'ऋद्धस्य राज्ञः पुरुषः' इति विग्रहवाक्य इव समासेऽपि राज्ञः ऋद्धत्वविशेषणसहिष्णुत्वं स्यात् । तथा च 'ऋद्धस्य राजपुरुषः' इत्यपि स्यादिति **वाच्यम्** । न ह्येतावता व्याससमासयोर्भिन्नार्थत्वमायाति, प्रतिपाद्यभेदाभावात् । उभयत्रापि राजसंबन्धिपुरुषस्य प्रतिपाद्यस्य अनपायात् । नहि वाक्यत्वसमासत्वाभ्यां प्रतिपाद्यभेदोऽस्ति । यथा 'ब्राह्मणाः शतम्' 'ब्राह्मणानां शतम्' इत्यभिधानप्रकारभेदेऽपि शतसंख्याकब्राह्मणभोजनलक्षणप्रतिपाद्यभेदादर्शनात् । यदि च 'राज्ञः पुरुषः' इत्यादौ व्याससमासयोः प्रतिपाद्यभेदाभावेऽपि राजादिपदस्य ऋद्धपदादिविशेषणसहिष्णुत्वतदसहिष्णुत्वकृतवैजात्यकल्पनामात्रेण वैलक्षण्यमाश्रित्य तादृशवैलक्षण्यावच्छिन्नस्वस्वार्थप्रतिपादनाय वाक्यसमासयोः स्वभावसिद्धत्वात् समासेन वाक्यनिवृत्तेरप्रसक्तत्वात् तन्निवृत्त्यर्थो विभाषाधिकारः प्रत्याख्यायेत, तर्हि विभाषाऽधिकारात् प्राग्विहितेनापि समासेन वाक्यनिवृत्तिर्न स्यात् । 'अव्ययं विभक्ति' इत्यादिसूत्रपञ्चकानन्तरं हि विभाषाऽधिकारः क्रियते । ततश्च 'अव्ययं विभक्ति' इत्यादिभिर्विधीयमानेषु अधिहरि, उपकुम्भम्, यावच्छ्लोकं इत्यादिसमासैः वाक्यनिवृत्तिर्न स्यात् । इष्यते तत्र वाक्यनिवृत्तिः कात्यायनपतञ्जलिभ्याम् । तथा विभाषाऽधिकारस्य पश्चात् 'नित्यं क्रीडाजीविकयोः' इत्यतः नित्यग्रहणानुवृत्तौ 'उपपदमतिङ्' इति विहितेन 'घटकारः' इत्यादिसमासेनापि वाक्यनिवृत्तिर्न स्यात् । कात्यायनमते विभाषाऽधिकारापन्ननित्यग्रहणस्यापि प्रत्याख्याने तु तेन

वाक्यन्यावृत्तेरसंभवात् । अतो विभाषाधिकारप्रत्याख्यानमन्याय्यम् । इत्यसमासपक्षमाश्रित्य नानूयाजेषु इति पर्युदासाश्रयणं युज्यते । अस्तु वा विभाषाऽधिकारप्रत्याख्यानम् ; तथापि न दोषः । कात्यायनेन हि समासे विशेषणान्तरासहिष्णुविशिष्टशक्त्यात्मकं एकार्थीभावलक्षणं सामर्थ्यम्, असमस्तत्वे च तत्सहिष्णुपरस्परान्वितावयवपदशक्त्यात्मकं व्यपेक्षालक्षणं सामर्थ्यमाश्रित्य विशिष्टार्थविवक्षायां समासः, अन्यथा तु वाक्यं इत्यास्थितम्, पतञ्जलिना एवमेव व्याख्यातत्वात् । अत एव 'ऋद्धस्य राज्ञः पुरुषः' इत्यर्थे 'ऋद्धस्य राजपुरुषः' न भवति । समासस्य विशिष्टैकार्थप्रतिपादकतया तदेकदेशेन राजपदेन ऋद्धपदस्य अन्वयासंभवात् । 'पदार्थः पदार्थेन अन्वेति, न तु तदेकदेशेन' इति न्यायात् । अत एव 'राज्ञः पुरुषो देवदत्तस्य च' इत्यर्थेऽपि न राजपुरुष इति समासः । अत एव 'राज्ञो विराजते पुरुषः' इत्यादौ समस्यमानपदयोः पदान्तरव्यवधानेऽपि न समासः । एवंजातीयकस्थले विशिष्टैकार्थप्रतिपादनाशक्तेः स्वभावसिद्धत्वात् । 'उपकुम्भम्' इत्यादौ तु नित्य एव समासः । तत्र वाक्यतो विशिष्टैकार्थप्रतीत्यभावस्य स्वभावसिद्धत्वात् । अतः क्वचित् समासविधौ नित्यग्रहणमपि न कर्तव्यं इत्यादि महाभाष्यकैयटादौ स्पष्टम् । एवं च एकार्थीभावलक्षणसामर्थ्ये सति 'राजपुरुषः' इति समासः । व्यपेक्षालक्षणसामर्थ्ये तु 'राज्ञः पुरुषः' इति वाक्यमेव । तथा नानूयाजेषु इत्यत्रापि व्यपेक्षायां वाक्यमेवास्तु । न चैवं सति पर्युदासो न गम्येतेति वाच्यम् । नहि वाक्ये नञः पर्युदासार्थत्वं नास्ति 'नित्यः पटो न' इत्यत्र व्यभिचारात् । भूतले पटो नास्तीतिवत् प्रतिषेधार्थकत्वाश्रयणे तु उक्तरीत्या अष्टदोषदुष्टविकल्पापत्तिः । तस्मादिह पर्युदास एव आश्रयणीयः । अनूयाजानां तु भेदप्रतियोगित्वेन तेषां भेदप्रतियोगिताऽऽधारत्वविवक्षया सप्तमी । तथा च 'अनूयाजनिष्ठप्रतियोगिताकभेदवत्सु यजतिषु येयजामहं कुर्यात्' इति वचनव्यक्तिः । 'नार्षेयं वृणीते' इत्यत्रापि नञ् भेदवति वर्तते, आर्षेयवरणभिन्नं अङ्गजातं प्रकृतिवत् महापितृयज्ञे भवति इति फलति । वृणीते इत्याख्यातप्रत्ययस्तु साधुत्वार्थः, धातोः केवलस्य प्रयोगानर्हत्वात् । नानूयाजेषु इत्यत्रापि 'येयजामहं करोति' इत्यनुवादमात्रम् । कु. १०।८।१।४.

* 'नानुयाजेषु येयजामहं करोति' इत्यत्र पर्युदासः । पर्युदासन्यायः । भा. १०।८।१।१–४.

* **'नानृतं वदेत्'** अयं क्रत्वर्थपुरुषार्थोभयविषयकः प्रतिषेधः दर्शपूर्णमासयोः । बाल. पृ. ३३.
* 'नानृतं वदेत्' इति उपनयनकाले एव चास्य उपदेष्टारो भवन्ति । भा. ३।४।४।१२ पृ. ९०९.

* **'नान्यामाहुतिं पुरस्ताज्जुहुयात्** । यदन्यामाहुतिं पुरस्तात् जुहुयात् अन्यन्मुखं कुर्यात्, स्रुवेणाघारमाघारयति' इति । नान्यामाहुतिं पुरस्तात् जुहुयात् प्राकृतिकीभ्यः, एता हि आघारादिका आहुतयः सर्वेष्टीनां मुखम् । यदन्यामाहुतिं औपसदीं अग्न्यादिकां पुरस्तात् जुहुयात् अन्यन्मुखं कुर्यात् । तस्मात् स्रुवेणाघारमाघारयति । भा. १०।७।१४।४५ । 'नान्यामाहुतिं पुरस्ताज्जुहुयात्' आग्नेय्याः 'अग्निर्हि मुखम्' इत्यभिधाय 'यदन्यामाहुतिं पुरस्ताज्जुहुयात्' वैकृतीं 'अन्यन्मुखं कुर्यात्' आग्नेय्याः अग्निर्हि मुखम् 'स्रुवेणाघारमाघारयति' नान्यं यजते 'अग्निमनीकं सोमं शल्यं विष्णुं तेजनम्' इति । ४६.

कु— प्राकृतीभ्य आहुतिभ्यः अन्यां प्रधानभूताग्नेयाद्यौपसदाहुतिं प्राकृतीराहुतीरहुत्वा पुरस्तात् न जुहुयात्, किन्तु प्राकृतीः आघाराद्याहुतीः पुरस्तात् हुत्वैव औपसदाहुतीर्जुहुयात् । यदि प्राकृतीभ्य आहुतिभ्यः अन्यां औपसदाग्नेयाद्याहुतिं प्राकृतीराहुतीरहुत्वा पुरस्तात् जुहुयात् तदा अन्यत् यज्ञस्य मुखं कुर्यात् । तच्चानुचितम् । आघाराद्याहुतयो हि सर्वेष्टीनां मुखम् । तस्मात् स्रुवेण आघारमाघारयति । (इति श्रुत्यर्थः) । १०।७।१४।४५.

* **नान्यार्थत्वात्** । १२।१।१५।३२ ॥ शेषभक्षस्य द्रव्यप्रतिपत्त्यर्थत्वात् क्रतुयुक्तपुरुषसंस्कारार्थात् पयआदिव्रतात् अन्यार्थत्वात् न इडादिशेषभक्षः पयआदिव्रतेन निवर्त्यते इति सिद्धान्तः । सु. पृ. १५४५.

⧗ **नान्यदृष्टं स्मरत्यन्यः इति न्यायः।** यथा कस्यचिदुत्तरवृन्दस्य पूर्वस्माद्भिन्नतया पूर्वेणानुभूतस्योत्तरेणाऽस्मरणापत्तिस्तथा प्रकृतेऽयं न्यायः। **साहस्री.** १६.

* ‘ **नावान्तरक्रियायोगादृते** वाक्योपकल्पितात्। गुणद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रियाः॥’ (वा. पृ. ३३१)। **बाल.** पृ. १०.

⧗ **नाश्मनि स्यात्क्षुरक्रिया इति न्यायः।** अक्षरार्थः स्पष्टः। **साहस्री.** ८०४.

⧗ **नासाधितं करणं इति न्यायेन** ‘अग्निहोत्रं जुहोति’ इति द्वितीया फलभावनाकरणस्यापि यागस्य अर्थाक्षिप्तसाध्यत्वाभिप्राया इति प्राञ्चः। **कु.** १।४।४।४ पृ. ९५, * ‘यदेता इष्टका उपदधाति’ इत्यादौ द्वितीया तु ‘अग्निहोत्रं जुहोति’ इत्यादिवत् **‘नासाधितं करणम्’ इति न्यायेन** अर्थाक्षिप्तसाध्यत्वाभिप्राया।१।४।१७।१९.

* ‘ **नासोमयाजी** संनयेत्’ अयं कर्तृतो व्यवस्थारूपः प्रतिषेधः। **बाल.** पृ. ३४, * ‘नासोमयाजी संनयेत्’ अयं विधिप्राप्तः पुरुषार्थमात्रविषयकः पुरुषार्थश्रौतनिषेधः। पृ. ३३, * ‘नासोमयाजी संनयेत्’ अयं व्यक्तिनिषेधः प्रत्यक्षः क्रत्वर्थः। पृ. ३२. * ‘नासोमयाजी संनयेत्’ इति सांनाय्यं सोमादूर्ध्वमुत्कृष्यते। सांनाय्यविकारः आमिक्षाऽपि सोमादूर्ध्वमेव। **वि.** ५।४।८.

⧗ **नास्ति नष्टे विचार इति न्यायः।** यत्र प्राक्तनदुष्कृतजन्यपरिपाकप्राप्तानर्थपरंपरावशतः कुसङ्गनिलीनता प्रतीयते तत्रायमवतरतीति। तद्यथा ‘ भिक्षो कन्था श्लथा ते नहि शफरिवधे जालमश्नासि मत्स्यांस्तेऽमी मद्योपदंशा मधु पिबसि समं वेश्यया यासि वेश्याम्। दत्त्वाङ्घ्रिं मूर्ध्न्यरीणां तव किमु रिपवो भित्तिभेत्ताऽस्मि येषां चौरोऽसि द्यूतहेतोस्त्वयि सकलमिदं नास्ति नष्टे विचारः॥’ इति। **साहस्री.** ५५५.

* **नाश्रावयति** (अनुवषट्कारे) शाखाऽन्तरे इदम्। **संकर्ष.** २।३।१५.

* ‘ **नेक्षेतोद्यन्तमादित्यम्** ’ अयं पर्युदासविधिः पुरुषार्थः। **बाल.** पृ. २०. * ‘नेक्षेतोद्यन्तमादित्यम्’ इति प्रजापतिव्रते नञ्–ईक्षतिभ्यां ईक्षणाभावसंकल्परूपक्रियैव लक्षणया विधीयते। उद्यदादित्येक्षणाभावसंकल्पभावनैव उदये निमित्ते विधीयते। पर्युदासोऽयम्, न निषेधः। **भाट्ट.** ४।१।३. * ‘नेक्षेतोद्यन्तमादित्यम्’ इत्यादौ नञ्धात्वोरन्वये सति ईक्षणविरुद्धानीक्षणसंकल्पो विधेयः पर्युदासेन। **वि.** ६।२।५.

⧗ **नेष्टं परनिष्पत्तये इति न्यायः।** ‘मैत्रावरुणाय दण्डं प्रयच्छति’ इति द्वितीया तु ‘तथायुक्तं चानीप्सितम्’ इति भविष्यति। **शा.** ४।२।६। (नेष्टं॰ इति न्यायेन ईप्सिततमेन अन्यस्य अभिप्रेयमाणत्वायोगात् ‘ कर्मणा यमभिप्रैति ’ इति सूत्रे कर्मशब्देन अनीप्सितकर्मण एव विवक्षणीयत्वात् इति भावः। **सोम.**)

⧗ **नोदाहरणमादरणीयं इति न्यायं** अनुसृत्य दर्शपूर्णमासपदस्थाने ज्योतिष्टोमपदं निवेशितम् (कल्पतरौ)। **परिमल.** ३।३।९।१८ ब्रसू.

* **नोपदेशानर्थक्यस्य** एतत् सामर्थ्यम्, यत् अन्तरेण फलवचनं यागस्य प्रीतिः फलमवगम्येत। काममस्य आनर्थक्यं भवेत्, न जातुचित् सामर्थ्यमस्य जायते। **भा.** ६।१।१।३ पृ. १३५३.

⧗ ‘ **नोपादेयत्वमेवैकं कारणत्वेन संमतम्। विशेषणविवक्षायां कारणं हि महद् विधिः॥’ इति न्यायात्** (वा. १।३।३।७ पृ. २१२) विवक्षितविशेषणतया बहुत्वनियमस्य सिद्धता। **सु.** ३।७ पृ. २६.

* ‘ **न ऋतुं पृच्छेत् न नक्षत्रम्** ’ इत्यनेन सोमस्यैव कालानादरः। **भाट्ट.** ५।४।५.

⧗ **न ऋषीणामार्षेयाभावात्।** इत्यपि अधिकं सूत्रं यपुस्तके। परंतु तत् कुतूहले व्याख्यातं न दृश्यते। तदर्थस्तु ऋषीणामपि कर्मशास्त्राधिकारो नास्ति। आर्षेयाभावात्। आर्षेयाणि प्रवराः। गोत्रप्रवर्तकऋषीणां प्रवरा एव न सन्ति इति तेषां साङ्गकर्माधिकारो न संभवति। इति। **के.** ६।१।२।७.

⧗ ‘ **नैकदा त्रयाणां विवादः** ’ **इति न्यायात्** एकैकं प्रत्येव अनुमानं वाच्यम्। **चन्द्रिका.** पृ. ६२८.

⧗ **नैवाश्रितेषु गुणदोषविचारणा स्यात् इति न्यायः।** अयं पद्येनोपनिबद्धः, तथाहि ‘दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि मित्रावसानसमये विहितोदयो-

ऽपि । चन्द्रस्तथापि हरवल्लभतामुपैति नैवाश्रितेषु गुणदोषविचारणा स्यात् ॥' इति । **साहस्री.** ८९९.

⌛ **'नैव हि द्रव्यमात्रस्य तद्धितैर्देवतोच्यते । अस्य शब्दाभिधेयस्य विशेषस्यैव देवता ॥' इत्यनेन न्यायेन** अष्टाकपालपदार्थोऽपि तद्धितान्त एव शब्दान्तर्गतः । **सु.** पृ. ४६२ । 'नैव हि' इति श्लोकस्तु (वा. पृ. ५३३) वार्तिकस्थः । तदर्थस्तु तत्रैव ' विश्वे देवा देवता अस्याः इति हि न सर्वनाम्ना द्रव्यसामान्यमभिधीयते । किं तर्हि ? संनिहितो विशेषः । स एव व्यवहारक्षमो नानिरूपितं द्रव्यमात्रम् । अतः प्रातिपदिकेन योऽर्थ उपात्तः, स प्रमाणान्तरगम्यस्य द्रव्यविशेषस्य देवता इत्येतत् तद्धितेन श्रुत्यैवोच्यते ' इत्युक्तः । **के.**

⌛ **नैष स्थाणोरपराधो यदेनमन्धो न पश्यति इति न्यायात् ।** (निरुक्त. १।१६) **सनातनध. प्र.** प्रमाणप्र. ३६५. ❋ 'सृण्येव जर्भरी' इत्यादिमन्त्रेषु, सतः विद्यमानस्यैवार्थस्य तज्ज्ञानोपायभूतनिगमनिरुक्तव्याकरणाद्यध्ययनाभावे सति युक्तमविज्ञानम्, नैतावता तदर्थस्य असत्यत्वं वक्तुं शक्यम्, **नैष० इति न्यायात् । कु.** १।२।४।३९.

⌛ **न कदाचित् पवित्रं स्यात् गोक्षीरं श्वदृतौ धृतं इति न्यायः ।** असत्पात्रे सदुपदेशोऽपि व्यर्थतां यातीति भावः । **साहस्री.** ३३५.

⌛ **'न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः ' इति न्यायस्य** ' प्रत्ययस्थात् ' इति सूत्रे अमुत्र्वतः इति प्रयोगमुदाहरता भाष्यकृता अनादृतत्वात् । **वै. भू. सारदर्पणं** प्रथमश्लोके.

❋ ' न कलञ्जं भक्षयितव्यम् ' एवमुक्ते द्वयमापतति । यदि वा अभक्षणं कर्तव्यमिति, यदि वा भक्षणं न कर्तव्यमिति । यदि नञ्विशिष्टं भक्षणं कर्तव्यं इत्यभ्युपगम्यते ततः अभक्षं श्रुत्या तव्यो विदधाति, नञ् भक्षयतिविशेषणम् । तद्व्यापाराच्च कर्तव्यतया नञ् न संबध्यते । अथ नञर्थः कर्तव्यः, ततो वाक्येन विधानम् । भक्षयतिश्च नञ्विशेषणम् । तत्र कलञ्जादि न भक्षयितव्यं इति नियमः । **भा.** ६।२।५।१९. ❋ ' न कलञ्जं भक्षयेत् ' अयं रागप्राप्तपुरुषार्थमात्रविषयकः पुरुषार्थः श्रौतनिषेधः । **बाल.** पृ. ३३. ❋ 'न कलञ्जं भक्षयेत्' इत्यादौ नञर्थः प्रसज्यप्रतिषेध एव, न पर्युदासः । **के.** ६।२।५, ❋ ' न कलञ्जं भक्षयेत् ' इत्यादौ रागप्राप्तां प्रवृत्तिमनूद्य निषेधो विधीयते । ६।२।५. ❋ ' न कलञ्जं भक्षयेत् न लशुनं न गृञ्जनम् ' अयं पुरुषार्थो जातिनिषेधः । **बाल.** पृ. ३२.

⌛ **' न कार्यमन्यार्थं भवति ' इति न्यायात्** प्रयाजापूर्वं स्वप्रधानभूतं न प्रयोजनान्तरमपेक्षते । **रत्नमाला.** पृ. १३८.

⌛ शैवदीक्षाऽनन्तरं जीवत्वप्रेतत्वाभावेन स्वजात्याश्रमधर्माणां प्रयोजनाभावात् **' न कुर्यान्निष्फलं कर्म ' इति न्यायेन** विधिनिषेधनिरवकाशत्वेन... । **श्रीकर.** १।१।१ ब्रसू., ❋ सगुणेश्वरस्य उपासनेन परब्रह्मसाक्षात्कारायोगात् **' न कुर्यान्निष्फलं कर्म ' इति न्यायात्** वेदान्तश्रवणमननादिकमेव कर्तुं युक्तं इत्याशङ्कायाम् । ३।३।१ ब्रसू.

⌛ **' न कृतस्य गुणानुग्रहार्थं आवृत्तिरस्ति '** । कथं पाशुकाः प्रयाजाः तिष्ठति पशौ क्रियमाणाः सन्तः तस्य पुरोडाशस्योपकुर्वन्ति ? उक्तस्तत्र **न्यायः** ' न कृतस्य० ' इति । **भा.** १२।२।५।१५. (१२।१।१।१–६ इति पशुपुरोडाशाधिकरणन्यायोऽयम्) ।

⌛ **न केवला** (प्रकृतिः प्रयोक्तव्या) **इत्यादिन्यायेन** साधुत्वार्थमेकवचनमेव । **भूषणसार**–दर्पणे धात्वर्थनिर्णये कारिका २.

⌛ **न क्रियाकर्तृसंबन्धादृते संबन्धनं क्वचित् इत्यनेन न्यायेन** क्रियागर्भत्वात् सर्वसंबन्धानाम् । **सु.** पृ. ४६३. ❋ ऐन्द्रवायवमिति देवतासंबन्धि द्रव्यं प्रतीयते । स च संबन्धः ' न क्रिया० क्वचित् ' इत्यनेन न्यायेन क्रियया घटयितव्यः । सा च यागः, नान्या । **सोम.** २।२।६ पृ. १३७.

⌛ **न खलु धीमतां कश्चिदविषयो नाम इति न्यायः ।** अयमभिज्ञानशाकुन्तले चतुर्थेऽङ्के उक्तः । **साहस्री.** ७८०.

⌛ **न खलु प्रेम चलं सुहृज्जने इति न्यायः । साहस्री.** ९५२.

⧗ **न चान्यार्थं प्रकृतमन्यार्थं भवति इति न्यायः** । यथा नहि गोधा सर्पन्ती सर्पणादहिर्भवतीत्येवं प्रकृतेऽपि । **साहस्री.** ४२६.

* **न चार्थात्** कृतं चोदकेन प्राप्यते । **भा.** १२।१।१।३.

⧗ **'न चाविज्ञातलिङ्गानां** [न वाऽविज्ञात इति वार्तिके पाठः पृ. ८२०] **प्रक्रिया विनियोजिका' इति न्यायः** । (असीत्यस्य च सामर्थ्यं संनिधावुपसंहृतम् ॥ 'दब्धिर्नामाऽसि' इति अस्पष्टलिङ्गोऽयम् । न च ईदृशं सन्तं प्रकरणं विनियोक्तुं समर्थम् । अयं तु असिशब्दः युष्मदर्थविषयत्वात् संनिहितमभिमुखं वा अभिधत्ते नान्यम्) । **सु.** पृ. १२३०.

⧗ **न चाविहितमङ्गं भवति इति न्यायेन** नियतस्य (हीष् ऊर्क् ऊ इति—) निधनस्य अङ्गत्वात् समाम्नायात् साधारण्यतः प्राप्तस्यापि विध्यर्थवत्त्वोपपत्तिः । **सु.** पृ. ८७४. * निषेधवाक्यपर्यालोचनया भर्त्रनुज्ञानस्य प्रतिग्रहाङ्गत्वं वदद्भिः तदङ्गत्वेन तद्विधिपरत्वं वाक्यस्याश्रयणीयम् 'न चाविहितमङ्गं भवति' **इति न्यायात्** । **संस्कारकौस्तुभ.** दत्तक.

* **न चाश्रितगुणे** शक्यं तद्विरोधि गुणान्तरम्' । यत्र अनूद्यमान एव अवश्यं गुणोऽपि अनुवदितव्यः, तत्र नैरपेक्ष्यदर्शनात् आकाङ्क्षाऽधीनसंबन्धगुणान्तरविधानानुपपत्तिः । **वा.** १।४।२।३ पृ. ३३०.

* **न चैकः** शब्दः अनेकार्थो युक्तः । **भा.** १२।१।१।४.

* **न चैकं** प्रति विशिष्यते इति सर्वशाखोपसंहाराभिधानात् जैमिनेरपि पौर्वापर्यस्य बलाबलकारणत्वमनभिमतम् । **सु.** पृ. १४४. * न चैकं प्रति शिष्यते इति हि सर्वश्रुतीनां सर्वपुरुषान् प्रति प्रामाण्यात् अध्ययनवच्च स्मृतेरपि श्रुतिधारणसामर्थ्यात् । **वा.** १।३।२।३ पृ. १७०. * अध्ययनस्य उपनयनादीनां च शाखाऽन्तरन्यायेनैव अभेदावगमात् तदङ्गानामपि 'न चैकम्' इति **न्यायेनैव** दर्शपूर्णमासाद्यङ्गवत् सर्वपुरुषसाधारण्योपपत्तेः व्यवस्थायां प्रमाणाभावात् । **कौ.** १।३।७।१५ पृ. ९८–९९, * अन्यगृह्यविहितानां पार्वणस्थालीपाकादीनां शाखाऽन्तरन्यायेन अभेदावगमात् सर्वविषयत्वप्रतीतेः तदङ्गानामपि च दर्शपूर्णमासाद्यङ्गवदेव 'न चैकं०' इति न्यायेनैव सर्वविषयत्वप्रतीतेः न व्यवस्थाशङ्कोपपत्तिः । इति न्यायसुधाकारः । तन्त्र । १।३।७।१५ पृ. ९८. * पौर्वापर्यश्रवणमनाश्रित्य 'न चैकं प्रति शिष्यते' इत्यनेन न्यायेन सर्वपुरुषान् प्रति नित्यावस्थितसमस्तपाठ्यमानस्मर्यमाणवेदशाखायत्तज्ञानैः जिज्ञासुभिः आत्मीयशक्तिमात्रकारितपूर्वापरग्रहणविभागैः एकवाक्यगतपूर्वोत्तरवर्णपदवद्बलाबलमनपेक्ष्य मातापितृप्रणीतोपदेशवत् निर्विचिकित्समेव प्रामाण्यमभ्युपगन्तव्यम् (स्मृतीनाम्) । **वा.** १।३।२।३ पृ. १७८ । मातापितृप्रणीतोपदेशवत् पौर्वापर्यश्रवणमनाश्रित्य सर्वान् पूर्वश्राविणः पश्चाच्छ्राविणश्च पुरुषान् प्रति निर्विचिकित्समेव प्रामाण्यम् 'न चैकं प्रति शिष्यते' इति न्यायेन जिज्ञासुभिः अभ्युपगन्तव्यं इत्यन्वयः । **सु.** पृ. १४४. * सर्वशाखागतानां सौभरविशेषाणाम् 'न चैकं प्रति शिष्यते' इत्यनेन (न्यायेन) व्यवस्थया प्राप्तेः एकस्माच्च फलसिद्धेः समुच्चयायोगेऽपि विकल्पेन प्रयोगोपपत्तिः । (पूर्वपक्षे स्थित्वा) । **सु.** पृ. ८८२.

* **न च गुणानुग्रहार्थं** प्रधानावृत्तिर्युक्ता । **भा.** १२।१।१।४.

* **न च गुणवशवर्ति** प्रधानम् । **भा.** १२।१।१।४.

* **न च दृष्टे** सति अदृष्टकल्पना संभवति । **भा.** ११।२।१६।६६.

⧗ **'न च निमित्तं विधिरपबाधते' इति न्यायात्** न नियोगविशेषणस्य साध्यता नियोगस्य साध्यत्वमुपहन्ति, नियोगसाध्यत्वनिमित्तत्वात् नियोज्यविशेषणसाध्यस्य । (इति प्राभाकरो ब्रूते) । **कणिका.** पृ. ३२७.

⧗ **'न च भिक्षुको भिक्षुकात् याचते' इति न्यायात्** न विकृतेर्विकृतिरस्ति, विना वचनम् । **वैजयन्ती.** ३।८।८०.

* **न च भिक्षुका भिक्षुकादाकाङ्क्षन्ति** सत्यन्यस्मिन् प्रसवसमर्थे अभिक्षुके । **भा.** ८।३।५।११.

⌛ **‘न च यत् समित्संबन्धेन क्रियते तत् तनूनपात्संबन्धेन’ इत्यनेन न्यायेन** भेदेन श्रुता देवता ग्रहणसंबद्धा नोपपद्यते यदि ग्रहणं नाऽऽवर्तते इति प्रतिदेवतं सोमो ग्रहीतव्यः । (न्यायः भाष्यपङ्क्तिरियम् २।२।२।२ पृ. ४७२) । वा. २।२।६।१९ पृ. ५१९.

* **न च सकृदुच्चरितः**(शब्दः)शक्नोति अर्थद्वयं विधातुम् । **भा.** १२।१।१।४.

* **न च सुवन्तसंबन्धे** नञ्समासापत्तिः (नेक्षेतोद्यन्तं इत्यत्र), ‘ नानुयाजेषु ’ इतिवदुपपत्तेः । **भाट्ट.** ४।१।३.

* ‘ **न चतुस्त्रिंशदिति ब्रूयात्** ’ अयं लिङ् श्रौते प्रतिषेधे । **बाल.** पृ. ४०.

⌛ अत्र च विश्वसत्यत्वस्य पारमार्थिकस्य देवताऽधिकरणन्यायेन कल्पनीयतया तन्न्यायस्य च श्रुतिविरोधे अप्रवृत्तेः न प्रतिप्रसवार्थत्वं इति **‘ न चतुस्त्रिंशत् इति ब्रूयात् ’ इति न्यायोऽपि** न प्रसरति । **चतुर्ग्रन्थी.** चन्द्रिका पृ. ४३९.

⌛ **न चेदन्यं प्रकल्पयेत् प्रक्लृप्तावर्थवादः स्यादानर्थक्यात् परसामर्थ्याच्च । १०।८।४।७॥**

अग्निहोत्रे श्रूयते ‘ जर्तिलयवाग्वा वा जुहुयात्, गवीधुकयवाग्वा वा जुहुयात्, न ग्राम्यान् पशून् हिनस्ति नारण्यान् । अथो खल्वाहुः अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च, पयसाऽग्निहोत्रं जुहोति ’ इति । अत्र जर्तिलादियवागूद्वयस्य विधानात् अनाहुतिर्वै इति प्रतिषेधाच्च विकल्पः इति पूर्वपक्षः । ‘ पयसाऽग्निहोत्रं जुहोति ’ इत्येव विधिः इतरत् सर्वमर्थवादः इति सिद्धान्तः । ‘ अनाहुतिर्वै ’ इति भवेत् प्रतिषेधः न चेत् अन्यं विधिं पयोविधिं इदं वाक्यं प्रकल्पयेत् । प्रक्लृप्तौ पयोविधेः सिद्धौ तु अनाहुतिवचनं यवागूवचनं च अर्थवादः स्यात् आनर्थक्यात् स्वार्थे तात्पर्यशून्यत्वनिश्चयात् । जर्तिलगवीधुकयोः अनाहुतित्वं च परसामर्थ्यात् । परेण ‘ पयसाऽग्निहोत्रं जुहोति ’ इत्यनेन विधिना सह सामर्थ्यात् व्यपेक्षारूपसामर्थ्यात् एकवाक्यादित्यर्थः । ग्राम्यारण्यपशुयागापेक्षया जर्तिलगवीधुकयवाग्वोः प्रशस्तता, पयसस्तु सर्वापेक्षया प्राशस्त्यम् । तस्मात् पयसैव होतव्यं न यवाग्वा, नापि पशुना इति सर्वस्य एकवाक्यता । जर्तिलाः आरण्यमुद्गाः । गवीधुकाः तृणविशेषबीजानि (कसाड–कशाड इति कोङ्कणे भाषा) । **के.**

* ‘ न चेदन्यं प्रकल्पयेत्०’ **इत्यधिकरणे** ‘ अनाहुतिर्वै जर्तिलाश्च गवेधुकाश्च ’ इति निन्दया निषेधकल्पनां पूर्वपक्षयित्वा नहिनिन्दान्यायेन ‘ यत् पयसाऽग्निहोत्रं जुहोति ’ इति पयोविधिशेषत्वात् न निषेधकल्पना इति सिद्धान्तितम् । जर्तिलयवागून्यायः । **बाल.** पृ. ५७. * या निन्दा तन्मात्रपर्यवसायिनी, सा निषेधफला भवति । विधिपरा तु स्तुत्यर्था जायते तदुपपादनस्य दृष्टार्थत्वात् । यथा वक्ष्यति ‘ **न चेदन्यं प्रकल्पयेत्** प्रक्लृप्तावर्थवादः स्यात् ’ इति । **वा.** १।२।१।११.

* **न चेदन्येन शिष्टाः** (१।४।६।९) इति कथञ्चिदनुवादत्वे संभवति विशिष्टविधानानुपपत्तेः । **वा.** ३।५।१०।३१ पृ. १०६.

⌛ **न चेदन्येन शिष्टाः इति न्यायेन** अप्राप्तविशेषणस्यैव कल्प्यविशेषणविधिविधेयत्वेन... । **भाट्ट.** ६।५।६. * न चेदन्येन शिष्टाः इत्यनेन न्यायेन (१।४।६।९ जै.) येऽन्येन न विहिताः तान् विदधाति । **टुप्.** १२।१।१।३ पृ. २२१९. * न चेदन्येन शिष्टाः । यदि अन्येन वचनेन शिष्टा विहिता न भवन्ति गुणाः, तदा गुणविधिः न नामधेयम् । यथा ‘ आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति ’ इत्यादौ । यत्र पुनः अन्येन वचनेन शिष्टा गुणा भवन्ति, भवति तत्र नामधेयम् । यथा अग्निहोत्रं जुहोति इति । **के.** * (‘ एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन [त्रिवृदग्निष्टुता] यजेत ’ इत्यत्र–) अपूर्वकर्मविधित्वात् वाक्यभेदं विनैव यद्यपि सर्वमेव विधातुं शक्यम्, तथापि **‘ न चेदन्येन शिष्टाः ’ इति न्यायेन** यदप्राप्तं तदेव विधीयते, इतरत्तु प्राप्तमनूद्यते इति नातीवगौरवम् । **कौ.** २।२।१२।२६ पृ. २८९. * अस्ति चेह भावनयैव प्रत्यायितस्य कर्तुः विशेषणत्वशक्तिः इति नाभिधानमपेक्षते । सर्वत्र विशिष्टप्रत्ययेषु चैतदवस्थितम् ‘ न चेदन्येन शिष्टाः ’ इति । **वा.** १।४।४।१३ पृ. ९१६. * (एतस्यैव रेवतीषु वारवन्तीयं अग्निष्टोमसाम कृत्वा इत्यत्र–) कृत्वा-

शब्देनैव तदर्थविधौ 'न चेदन्येन शिष्टाः' इत्यनेन न्यायेन विशिष्टयागभावनाविध्ययोगापत्तेः ...। सु. पृ. ८६६.

* एतेनैव उत्कालबाधनं प्रत्युक्तम् । ब्राह्मणप्रकृतिवच्छब्दयोः तुल्यहेतुत्वेन किञ्चिद्वर्जनासंभवात् (व्यक्तिषु सामान्यशास्त्रप्रवृत्तिहेतोः ब्राह्मणशब्दस्य पदार्थेषु च अतिदेशशास्त्रप्रवृत्तिहेतोः प्रकृतिवच्छब्दस्य)। तथा च 'तद्वर्जं तु वचनप्राप्ते' इति (पूर्वपक्षम्) उक्त्वा '**न चोदनार्थकात्स्न्यात्**' इत्युत्तरं दास्यति । वा. ३।३।७। १४ पृ. ८६०.

* '**न तौ (आज्यभागौ) पशौ करोति**' अयं विकृतिगतः अतिदिष्टः आरादुपकारकक्रियानिषेधः। बाल. पृ. ३५–३६. * 'न तौ पशौ करोति, न सोमे' इति आज्यभागौ प्रकृत्य आम्नाते वाक्ये 'न सोमे' इति 'न तौ पशौ करोति' इत्यस्यार्थवादः । (सोमे तावत् नैवाज्यभागौ स्तः, पशौ अपि नैव तौ स्तः इति)। के. १०।८।२।५.

* **न तैरेव दर्भैः** प्रयोगान्तरमपि क्रियते । भा. ११।३।४।६.

* 'स्वेच्छया मरणं विप्रात्' इत्यादिना भविष्योत्तरे आत्मघात्यादीनुक्त्वा '**न तेषां स्नानसंस्कारौ**' इति संस्कारशब्देन दाहो निषिद्धः । अयं अपूर्वकर्मगतप्रतिपत्तिनिषेधः । बाल. पृ. ३७.

* एतौ च परिचोदनापरिहारौ सूत्रकार एव वक्ष्यति 'आरादपीति चेत्' (३।७।१।३) '**न तद्वाक्यं हि तदर्थत्वात्**' । ४ इति । वा. ३।४।५।१५ पृ. ९४७, * ननु 'न तद्वाक्यं हि तदर्थत्वात्' (३।७।१।४) इत्युत्तरं वक्ष्यति, तेन अग्नीषोमीयापूर्वप्रयुक्तत्वात् व्यवस्था स्यादिति । ३।६।१०।३१.

⧗ न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात् । ९।४।८।३१ ॥

अग्निहोत्रार्थे अग्नेरुद्धरणे 'वाचा त्वा होत्रा, प्राणेनोद्गात्रा, चक्षुषाऽध्वर्युणा, मनसा ब्रह्मणा, श्रोत्रेणाग्नीधा, एतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामि' इति मन्त्रः । सोऽयं मन्त्रः दर्शपूर्णमासार्थे अग्नेरुद्धरणे पठितव्यो न वेति विचारे, उद्धृते हि तस्मिन्नग्नौ पर्वणि सायं प्रतिपदि च प्रातः अग्निहोत्रमनुष्ठीयते एव । यदि तु मन्त्रो न पठ्येत अग्निहोत्राङ्गमुद्धरणं विगुणं स्यात् । तस्मात् दर्शपूर्णमासार्थेऽपि अग्नेरुद्धरणे स मन्त्रः पठनीयः इति पूर्वपक्षे सिद्धान्त उच्यते । दर्शपूर्णमासार्थमुत्पन्ने अग्नौ यस्य अग्निहोत्रं प्रवर्तते, तस्य परार्थे उद्धरणे मन्त्रस्य न चोदना न कर्म । मन्त्रो न कर्तव्यः । नहि तदग्निहोत्रार्थमुद्धरणम् । अप्राप्तकालत्वात् अग्निहोत्रार्थोद्धरणस्य यः कालः, तस्य दर्शाद्यर्थे उद्धरणे अभावात् । अधिवृक्षसूर्ये सायं उषसि च प्रातः अग्निहोत्रार्थमग्नेरुद्धरणं विहितम् । दर्शपूर्णमासार्थे तु पर्वणि प्रातरग्निहोत्रहोमे हुते पश्चात् अग्निमृद्धृत्य अन्वाधानं क्रियते । तथा च दर्शाद्यर्थे उद्धरणकाले अग्निहोत्रार्थोद्धरणकालस्याभावः । तस्मात् अग्निहोत्राग्न्युद्धरणमन्त्रः दर्शाद्यर्थोद्धरणे न पठनीयः इति सिद्धान्तः । तुशब्दः उत्सूत्रपूर्वपक्षव्यावृत्त्यर्थः । के.

* '**न दीक्षितस्यान्नमश्नीयात्**' अयं पर्युदासः इति पक्षः । बाल. पृ. १७, * 'न दीक्षितस्यान्नमश्नीयात्' इति निषेधे 'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । आकाश इव पङ्केन न स पापेन लिप्यते ॥' इति मनूक्तः अयं सामान्यरूपः निषिद्धविषयकः व्यावृत्तविषयः अभ्यनुज्ञाविधिः । पृ. १६.

⧗ न देवानां देवतान्तराभावात् । इति सूत्रं यपुस्तके वर्तते । कुतूहले च व्याख्यातम् । (६।१।२।६)। ननु अस्तु तर्हि स्वयंप्रभातविद्यानां अधिकारः । तत्राह । देवतानामपि नाधिकारः । देवताऽन्तराभावात् । नहि इन्द्रादिभ्योऽन्ये इन्द्रादयः सन्ति येभ्यो हविर्दीयेत । न च प्राक्कल्पवर्तिनां देवानां यजनं संभवति, अतीतत्वात् । तस्मात् देवतानामपि न कर्माधिकारः । के.

⧗ न देवताऽग्निशब्दक्रियमन्यार्थसंयोगात् । ६।३।५।१८ ॥

मुख्यद्रव्यापचारे प्रतिनिधिर्ग्राह्य इत्युक्तम् । तत्र अग्न्यादयो देवताश्च, आहवनीयादयः अग्नयश्च, मन्त्ररूपाः शब्दाश्च, प्रयाजादिरूपाः क्रियाश्च तेषां समाहारः देवताऽग्निशब्दक्रियम्, तत् प्रतिनिधिं नार्हति । देवतादीनां प्रतिनिधिर्न भवतीत्यर्थः । कुतः ? अन्यार्थसंयोगात् । अर्थः प्रयोजनम् । अन्यस्य देवतादेः अन्येन

अर्थेन प्रयोजनेन संयोगः स्यात् । स च प्रकृते कर्मणि असाधकम् । तस्मान्नैतेषां प्रतिनिधिः । 'अर्थशब्दो न्यायपरः । प्रतिनिधिसाधकात् न्यायात् अन्येन न्यायेन देवतादेर्युक्तत्वात् । प्रतिनिधिसाधकन्यायशून्यत्वात् इति तात्पर्यम् ।' इति **सुबोधिनी** । 'देवताश्च अग्नयश्च शब्दक्रिया मन्त्रोच्चारणं च तेषां त्रयाणां समाहारद्वंद्वः । देवतादि न प्रतिनिधानमर्हति । अन्यार्थसंयोगात् । अन्यस्य प्रतिनिधित्वाभावसाधकस्य न्यायस्य संयोगात् इति **कुतूहलम्** ।

देवतायां च तदर्थत्वात् । १९ ॥

देवताऽग्निशब्दक्रियाणां प्रतिनिधिर्नास्तीत्युक्तं पूर्वसूत्रे । तत्र देवतायां विशेष उच्यते । चकारः हेत्वन्तरसमुच्चयार्थः । देवतायां अग्न्यादिदेवतायां तदर्थत्वात् हविरुद्देश्यत्वात् । तत्र दर्शहविरर्थे सूर्यादौ योजिते वह्न्यादिशब्दे वा योजिते दर्शयागो न स्यात् । तस्मात् देवतायाः नास्ति प्रतिनिधिः । इति सिद्धान्तः ।

'देवता च तदर्थत्वात्' इति कुतूहले पाठः । देवता न प्रतिनिधानमर्हति । तदर्थत्वात् उद्देश्यतया विहिताया एव देवताशब्दार्थत्वात् । चकारः अनुक्तयुक्त्यन्तरसमुच्चयार्थः । देवतात्वं शब्दाधीनम् । ततश्च विहितदेवताविस्मरणेऽपि देवताऽन्तरं न प्रतिनिधातव्यम् । सदृशं हि प्रतिनिधातव्यम् । ततश्च मुख्यदेवताशब्दं स्मृत्वैव सदृशशब्दान्तरस्य उपादानं शक्यम् । मुख्ये च स्मृते किं प्रतिनिधानेन इति युक्त्यन्तरम् । इति सूत्रार्थः । **के.**

* 'न देवताऽग्निशब्दक्रियमन्यार्थसंयोगात्' इति षष्ठाधिकरणे कर्मणामदृष्टार्थत्वात् तस्य प्रतिनिधिना सिद्धौ प्रमाणाभावात् प्रतिनिध्यभावो वक्ष्यते । **सु. पृ. ६२१.** * पिण्डपितृयज्ञे उपस्थानमन्त्रः 'यदन्तरिक्षं पृथिवीमुत द्याम्०' इति । तत्र अविकारेण प्रयोगे गार्हपत्यपदस्थाने आहवनीयपदप्रक्षेपे प्राप्ते, नोभयमपि किन्तु गार्हपत्यपदलोपमात्रं कार्यं इति सिद्धान्तमुक्त्वा "अत एव 'न देवताऽग्निशब्दक्रियम्' इति षाष्ठो न्यायः संगच्छते" इत्युक्तं संकर्षे (१।२।१५)। **के.**

⧗ **न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते इति न्यायः** । ज्ञानी हि अकुशलं कर्म न द्वेष्टि, कुशले कर्मणि अनुशक्तो न भवति, समबुद्धित्वादिति भावः । **साहस्री. ५२१.**

⧗ **न धर्मवृद्धेषु वयः समीक्ष्यते इति न्यायः** । तथोक्तं मनुना 'न तेन वृद्धो भवति येनास्य पलितं शिरः । यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः ॥' इति । तन्मूलकोऽयं न्यायः । **साहस्री. ९५५.**

⧗ **न निमित्तं विधिरपबाधते इति न्यायः** । अप्राप्तांशपूरणेन यत् अवघातादेः नियमानुष्ठानप्रतिपादनम्, तदुपपत्तये तण्डुलादिगतं अदृष्टं कल्प्यमानं 'न निमित्तं०' इति न्यायेन न दृष्टार्थत्वं अबाधितं अधिकरोति । **तौता. २।१।३।६,** * 'न निमित्तं विधिरपबाधते' इति **न्यायात्** न मान्त्रवर्णिकसमिद्देवताबाधः वाक्यविहिततनूनपादादिदेवताभिः (पूर्वपक्षे इदमुक्तम्)। २।२।२।२.

* **'न पृथिव्यामग्निश्चेतव्यो** नान्तरिक्षे न दिवि' इति 'हिरण्यं निधाय चेतव्यम्' इत्यस्य विधेः शेषः । **भा. १।२।१।१८.**

⧗ **न प्रतिनिधौ समत्वात्** । (६।३।१४।३२) इति न्यायः । प्रतिनिधौ उपात्ते अपचरिते प्रतिनिधिसदृशमुपादेयं मुख्यसदृशं वा इति संदेहे प्रतिनिधेरुपात्तत्वेन शास्त्रपरिगृहीतत्वात् तादृशोपादाने प्राप्ते 'वचनात् त्वन्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य' (६।३।१३।३१) इति सूत्रात् अभावे, तत्सामान्येन, प्रतिनिधिः इति पदत्रयानुषङ्गेण प्रतिनिधौ उपात्ते तदभावे तत्सामान्येन प्रतिनिधिः नोपादेयः मुख्यावयवोपादित्सया उपात्तस्यापि प्रतिनिधेः अचोदितत्वेन इतरसाम्यात् इति षष्ठे वक्ष्यते । **सु. पृ. ५११.**

⧗ **न प्रतिनिधौ, समत्वात् । ६।३।१४।३२ ॥**

प्रतिनिधिः इति पदं पूर्वसूत्रादनुवर्तते । श्रुतद्रव्यस्यापचारे प्रतिनिधिना प्रयोगः प्रवृत्तः । अथ दैवात् प्रतिनिधिरपि विनष्टः । एवं सति प्रतिनिधौ अपचरिते सति तस्य प्रतिनिधिर्न भवति । न प्रतिनिधेः प्रतिनिधिः । समत्वात्, मुख्यप्रतिनिधेः प्रतिनिधिप्रतिनिधेश्च समत्वात् । यथैवासौ पूर्वः प्रतिनिहितः श्रुतचिकीर्षया, न प्रतिनिधिचिकीर्षया, एवमयमपि श्रुतचिकीर्षया, न प्रतिनिधि-

चिकीर्षया । तस्मान्न प्रतिनिधिसदृशमुपादेयम्, किन्तु मुख्यसदृशमेव अन्यदन्वेष्टव्यम् । इति सिद्धान्तः । इदं च यत्र प्रतिनिधिः साक्षान्न श्रुतः तद्विषयकम् । **के.**

* **न प्रत्यक्षविरुद्धमनुमानमुदेति** स्वकार्यं वा साधयति । **भा.** १।१।६।२०.

* **'न प्रथमयज्ञे प्रवृञ्ज्यात्'** अयं प्रकृतिगतः आरादुपकारकक्रियानिषेधः । **बाल.** पृ. ३५, * 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इत्यस्य 'अग्निष्टोमे प्रवृणक्ति' अयं पर्युदस्तप्रतिप्रसवविधिः । पृ. १६.

* **न प्राजापत्येन** पशुना अनिष्ट्वा इष्टकाः कारयेत् । **संकर्ष.** २।१।२९.

⌛ **'न बृहत्या वषट्कुर्यात्' इति अक्षरव्यूहनविध्यर्थवादः ॥**

सर्वपृष्ठायां 'व्यत्यासमन्वाह' इत्यादिना 'देवताभिर्व्यतिषजति' इत्यन्तेन द्वयोर्द्वयोर्ऋचोरन्योन्यं व्यतिषङ्गं विधाय 'इन्द्राय रथंतरायानुब्रूहीति रथन्तरस्यर्चमनूच्य बृहतः ऋचा यजेदिन्द्राय बार्हताय अनुब्रूहीति बृहतः ऋचमनूच्य रथंतरस्यर्चा यजेत्' इत्यादिना मध्ये विवृतम् । तत्रैव 'न बृहत्या वषट्कुर्यात्' इत्यपि प्रतिषिद्धम् । तत्र बृहतीशब्दस्य द्रव्यवचनत्वेन त्रिष्टुप्संयाज्याऽधिकरणन्यायेन बृहद्रथंतरयोरेव उपस्थितत्वेन तयोर्याज्यात्वप्रतिषेधात् विकल्पः। इति प्राप्ते, अक्षरसंख्याऽवच्छेदकधर्मविशेषस्य बृहतीपदवाच्यतया तस्यैव प्रदानकरणतावच्छेदकत्वप्रतिषेधोऽयम् । अनुवाक्याऽन्तिमाक्षरचतुष्टयस्य याज्यायामध्यूहनविधेरर्थवादमात्रम् । 'अनुष्टुभं च ह वा एतां संपादयति' इतिवत् । तथा च 'अभि त्वा शूर' इत्यारभ्य 'ईशानम्' इत्यन्तामनुष्टुभमनूच्य 'इन्द्र तस्थुषस्त्वामिद्धि हवामहे' इति पङ्क्त्या यजेत् । एवम् 'त्वामिद्धि' इत्यारभ्य 'त्वां काष्ठा' इत्यन्तामनुष्टुभमनूच्य 'स्वर्वतो अभि त्वा शूर नोनुम' इति पङ्क्त्या यजेत् इत्यर्थः । **संकर्ष.** ४।४।४.

* **'न ब्रह्मा सामानि गायति'** इति अग्न्याधेये सामगानं निषिध्यते । अयं अपूर्वकर्मगतः उपदिष्टः आरादुपकारकक्रियाप्रतिषेधः । **बाल.** पृ. ३६.

* **न ब्रूमः** एकस्योभयं प्रयोजनमभिनिष्पादयितुं सामर्थ्यं नास्तीति । **भा.** २।२।११।२५ पृ. ५४५.

⌛ **न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् । ६।७।२।३ ॥**

विश्वजिति सर्वस्वदाने भूमिर्न देया स्यात् । कुतः ? सर्वान् प्रति मनुष्यादिस्थावरान्तानां प्राणिनां संचरणजीवनाद्यर्थं भूमिः अविशिष्टा समाना । राज्ञा तु सा संरक्षणीया, न तु तां दातुमसौ समर्थः । तस्मात् महाभूमिः न देया । किंचित् क्षेत्रादिकं तु विशिष्टविधिना दातुं शक्यम् । सर्वान् प्राणिनः प्रति अविशिष्टत्वात् विश्वजिदादौ महाभूमिर्न देया स्यात् इति सिद्धान्तः । **के.**

* **'न वाऽर्थधर्मत्वात्** संघातस्य गुणत्वात् । ७।४।३।१७ । अत्र द्वादशशब्देन संख्यावाचिना अर्थादुक्तस्यापि संघातस्य फलसाधनीभूताहःशब्दोक्तयागविशेषणत्वेन गुणभूतत्वात् साधनत्वाभावेन धर्माग्राहकत्वात् न संघातकार्यापत्त्या धर्मप्राप्तिर्युक्ता इत्यर्थः । **सु.** पृ. ७३१.

* **'न वा ऋत्वभिधानादधिकानामशब्दत्वम्'** (७।४।२।१५) इति चोदकनामधेययोर्बलाबलपरीक्षायां ऐकाहिको धर्मः (पञ्चदशरात्रप्रथमाहे अग्निष्टुति) कर्तव्यः इत्युक्तम् । **भा.** १२।२।७।२२, * यद्यनन्तरं (आधानमात्रोत्तरं पवमानेष्टिभ्यः प्राक्) अग्निहोत्रादयः स्युः, यः पूर्वोक्तो न्यायः स विप्रतिषिध्येत **'न वा तासां तदर्थत्वात्'** (३।६।४।१२) इति । (न आधानमिष्टयङ्गम्, तासां पवमानेष्टीनां तदर्थत्वात् अग्निसंस्कारार्थत्वात् इति सूत्रार्थः) । ५।३।९।२५.

* **न वायवीयानवयवान्** शब्दे सतः प्रत्यभिजानीमः यथा पटस्य तन्तुमयान् । न वायवीयानवयवान् शब्दगतान् स्पृशामः । तस्मान्न वायुकारणकः शब्दः । **भा.** १।१।६।२२.

* **'न वायुक्रिये पृथगुदेशात्'** इत्यधिकरणे (२।४।५।९–१२ ब्र.) वायुप्राणयोः तत्त्वाभेदेपि अवान्तरवैलक्षण्यमुक्तम् । **आभरणम्.** ३।३।२४।४३ ब्रसू.

⧗ **‘ न विदुषामुपदेशो नावकल्पते ’ इति न्यायेन** उपदेशान्यथाऽनुपपत्त्या मन्वादेः पूर्वज्ञानकल्पना । **सु. पृ.** ११८.

⧗ **न विधौ परः शब्दार्थः इति न्यायः ।** दाप्त्वं दाप्शब्दत्वमेव । ‘ गुप्तिज् ’ इत्यादावपि सन्त्वावच्छिन्नः इत्येवार्थः , न तु नकारेत्संज्ञकः सः भवतीति ‘ न विधौ परः शब्दार्थः ’ इति न्यायात् । **भूतिः पृ.** ३२. * ‘ न विधौ परः शब्दार्थः ’ **इति न्यायात्** ‘ तिस्रोऽनुष्टुभः चतस्रो गायत्रीः करोति ’ इत्यत्र विधौ गायत्री शब्दो न गौणः । ‘ पृष्ठैरुपतिष्ठते ’ इत्यत्र तु विधावपि स्तोत्रविशेषवाचकस्य पृष्ठशब्दस्य स्तोत्रसाधनीभूतासु ऋक्षु गौणत्वं दृष्टम् । **कु.** ८।३।६।२२. * ‘ न विधौ परः शब्दार्थः ’ इति न्यायात् विधौ लक्षणा अयुक्ता । **तौता.** २।२।६।१७. * विधावेव हि लक्षणा दुष्यति (न तु विधिशेषेऽपि) **‘न विधौ परः शब्दार्थः’** इति न्यायात् । **कु.** १।२।३।२७. * विध्युद्देशस्य प्रधानत्वात् अप्राप्तविषयत्वेन ‘ न विधौ परः शब्दार्थः ’ इति न्यायाच्च न तत्र लक्षणा , किन्तु अर्थवादस्य गुणत्वात् अनुवादत्वेन लक्षणासहिष्णुत्वाच्च तत्रैव लक्षणा युक्ता । इति पूर्वपक्षः । **पराक्रमः.** २।२,३।१. * ‘ न विधौ परः शब्दार्थः ’ **इति न्यायविरोधात्** ‘ असपिण्डा या मातुरसपिण्डा च या पितुः ’ इत्यत्र पितृपदस्य गौण्या वृत्त्या प्रतिग्रहीतृपरता न युक्ता । **दमी. पृ.** ९२. * न विधौ परः शब्दार्थः । विधौ हि न परः शब्दार्थः प्रतीयते । **भा.** १।२।३।२९.

* **न वैदिकमर्थनिर्देशात्** । ७।३।१२।३१ ॥ यदपि वेदविहिताग्निकार्यसर्वार्थत्वं प्रकृतिविकृत्योः, तदपि ‘ अग्निमुपनिधाय स्तुवते ’ इत्युदाहृत्य विशये॰ न वैदिक॰ तथोत्पत्ति॰ इति निर्णीतत्वादविचार्यम् । **वा.** ३।७।१९।३९ **पृ.** ११०३.

* **न शास्त्रपरिमाणत्वात् ।** (१।३।३।६) **इति न्यायेन** पदार्थेयत्तानियमात् अधिकपदार्थकरणे च इयत्ताबाधापत्तेः । **सु. पृ.** १२४७.

* **‘ न संशयं प्रपद्येत** नाकस्मादप्रियं वदेत् । नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी ॥ ’ इति स्मार्तो निषेधः । **सु. पृ.** १३९३.

* **न सर्वस्मिन्निवेशात् ।** ३।३।१।७ ॥ न पाठमात्रेण वेदान्तरव्यपदेशो भवति । यत् येन वेदेन विधीयते तत् तेनैव प्रमाणेन क्रियते । ततश्च यस्यैव मन्त्रस्य यत्र विधानम्, स एव तेन व्यपदेक्ष्यते । **वा.** ऋग्वेदविहितानां यजुषां यजुर्वेदपाठमात्रेण उपांशुत्वे , यजुर्वेदविहितानां च ऋचां ऋग्वेदपाठमात्रेण उच्चैस्त्वे सति विधिविरोधात् दोषः स्यात् । सर्वस्मिंस्तु ऋग्जाते यजुर्जाते च ऋग्वेदविहिते उच्चैस्त्वनिवेशात् यजुर्वेदविहिते च उपांशुत्वनिवेशात् एकवेदविहितस्य धर्मद्वयसंबन्धाप्राप्तेः न दोषः इति सूत्रव्याख्या । **सु. पृ.** ११७४,

⧗ **न साहसमनारुह्य नरो भद्राणि पश्यति इति न्यायः ।** स्पष्टार्थोऽयम् । **साहस्री.** ९३९.

⧗ **न सेव्यः केवलो नृप इति न्यायः ।** (किन्तु अमात्योऽपि सेव्यः । अन्यथा विरोधी अमात्यः राजबुद्धिं विपरिवर्त्य केवलं राजसेवकं नाशयेदपि इति भावः । **के.**) **साहस्री.** ३९६.

⧗ **‘न स्वामिनि स्थिते कश्चिद् दासात् प्रार्थयते फलम् ।’** स्तुतशस्त्रयोः देवताप्रकाशनार्थत्वे तु देवतां प्रत्येव फलं प्रार्थ्येत ‘ न स्वामिनि॰ ’ **इति न्यायात् ।** **कु.** २।१।५।२६.

* **‘ न हिंस्यात् सर्वा भूतानि ’** अयं क्रियाप्रतिषेधः प्रत्यक्षः पुरुषार्थः । **बाल. पृ.** ३२, * ‘ न हिंस्यात् सर्वा भूतानि ’ अयं रागप्राप्तपुरुषार्थमात्रविषयकः पुरुषार्थः श्रौतनिषेधः । **पृ.** ३३, * ‘ न हिंस्यात् सर्वा भूतानि ’ अयं सामान्यप्रतिषेधः । पृ. ३३, * ‘ न हिंस्यात् सर्वा भूतानि ’ इत्यस्य ‘ गौरनुबन्ध्यः ’ इति बाधे प्रसक्ते ‘ अक्षता गोपशुश्चैव ’ इति प्रतिप्रसवरूपः प्रतिषेधः । पृ. ३३.

* **‘ न होतारं वृणीते ’** इति महापितृयज्ञे पर्युदासः, न विकल्पः । **के.** १०।८।१।१-४. * ‘ न होतारं वृणीते नार्षेयम् ’ इति पर्युदासः महापितृयज्ञे । **भा.** १०।८।१।१-४.

[इतः परं नञ्-शब्दारब्धाः लघुसिद्धान्तादयो निवेश्यन्ते]

* **नञ्** ‘नातिरात्रे’ इत्यत्र प्रतिषेधार्थकः । **के.** १०।८।३।६. * ‘अब्राह्मणमानय’ इत्यत्र **नञ्** ब्राह्मणपदं च अन्यस्य लक्षणार्थमुच्चार्येते क्षत्रियादेः, न स्वार्थम्। **टुप्.** १०।८।१।१ पृ. २०५७. * **नञश्च** एष स्वभावः, यत् स्वसंबन्धिप्रतिपक्षबोधकत्वम् । **मीन्या.** * नञः धात्वन्वयेन धात्वर्थाभावसंकल्पभावनाविधिः ‘न वारिस्थम्’ (आदित्यमीक्षेत) ‘एकादश्यां न भुञ्जीत’ इत्यादौ आवश्यकः । **भाट्ट.** ४।१।३. * नञः पर्युदासार्थत्वे समासनियमः । यथा–‘अब्राह्मणमाकारयति’ ‘अधर्मं करोति’ इति । **के.** १०।८।२. * नञः प्रधानान्वयस्य अभ्यर्हितत्वात् भावनाऽन्वयव्युत्पत्तेः, धात्वर्थाद्यन्वयस्य लक्षणादिभिया अनुपपत्तेः पर्युदासत्वायोगात् । **भाट्ट.** ४।१।३. * नञः प्रसज्यप्रतिषेधार्थत्वे समासो न भवति । यथा–‘न तौ (आज्यभागौ) पशौ करोति’ इति । **के.** १०।८।२. * नञः भावप्रत्ययसमभिव्याहृतस्य प्रकृत्यर्थमात्रवृत्तित्वविशिष्टप्रतियोगिताकाभावबोधकत्वव्युत्पत्तेः ‘पटे घटत्वं नास्ति’ इत्यत्र नञर्थस्य घटमात्रवृत्तित्वविशिष्टभावप्रत्ययार्थे धर्मे अन्वयः इति केचित् । **मणि.** पृ. १६१. * नञः लाघवेन अभावत्वेनैव वाचकता, न तु भेदत्वादिना, अनेकशक्तिकल्पनाऽऽपत्तेः। अत एव ‘तदन्यतद्विरुद्धतदभावेषु नञ्’ इत्यनुशासनमपि न वृत्तिपरम्, अन्यलभ्यत्वात् । **रहस्य.** पृ. १२२.

* **नञर्थः** प्रत्ययार्थेन संबध्यते । यदा तु तदन्वये किञ्चिद् बाधकम्, तदा अगत्या धात्वर्थेनान्वयः । बाधकं च द्विविधम् ‘तस्य व्रतम्’ इत्युपक्रमो विकल्पप्रसक्तिश्च । तत्र च पर्युदासाश्रयणम् । बाधकाभावे च निषेध एव नञर्थः । ‘नानुयाजेषु’ इत्यत्र विकल्पप्रसक्तिः । ‘पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्’ । उत्तरपदं चात्राव्यवहितोत्तरपदं प्रकृतिरित्यर्थः । ‘प्रतिषेधः स विज्ञेयः क्रियया सह यत्र नञ्’। क्रिया लिङ् । ‘नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः’ । तदन्य–तदभाव–तद्विरुद्धेषु नञ् । **मीन्या.** * नञर्थः प्रसज्यप्रतिषेध एव ‘न कलञ्जं भक्षयेत्’ इत्यादौ । ‘तस्य व्रतम्’ इत्युपक्रमबलात्तु ‘नेक्षेतोद्यन्तमादित्यम्’ इत्यादौ नञर्थः पर्युदासः । **के.** ६।२।५. * नञर्थो भावनाऽन्वयी । **मणि.** पृ. ११३.

* नञर्थो विचार्यते । घटो नास्ति इत्यादौ घटपदस्य घटप्रतियोगिकाभावे लक्षणा । नञ् तु उपसर्गवत् लक्षणातात्पर्यग्राहकः इति नास्त्येव नञर्थः इति **केचित्** । ‘तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥’ इत्युक्तेः षट्सु शक्तिः **इत्यन्ये** । अब्राह्मणः इत्यादौ सादृश्यम्, अपापं इत्यादौ अभावः, अघटः इत्यादौ तदन्यत्वम्, अनुदरा कन्या इत्यादौ अल्पता, अपशवः इत्यादौ अप्रशस्तता, अधर्मः इत्यादौ विरोधः नञर्थः इति श्लोकार्थः । संसर्गाभाव एव नञर्थः, न भेदः, ‘घटो न पटः’ इत्यादौ नञर्थभेदस्य अभेदातिरिक्तसंबन्धेन पटे अन्वयासंभवात् तद्भेदवति लक्षणाया आवश्यकत्वात् । अतः संसर्गाभाव एव नञर्थः **इत्यन्ये** ।

संसर्गाभावः अन्योन्याभावश्च नञर्थः । तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताकाभावत्वम्, तादात्म्यारोपजन्यप्रतीतिविषयाभावत्वम्, प्रतियोग्यवच्छेदकदेशकालावच्छेदेन प्रतियोगिसमानाधिकरणाभावत्वं वा अन्योन्याभावत्वम् । तदन्याभावत्वं संसर्गाभावत्वम् । आरोपश्च प्रत्यक्ष इव शाब्दोऽपि ग्राह्यः । तेन अतीन्द्रियप्रतियोगिकाभावे नाव्याप्तिः । अभावबुद्धौ प्रतियोग्यारोप एव नियामकः, न तु तदारोपसंबन्धो नियामकः, तत्संसर्गे गौरवात् । ‘घटो भविष्यति’, ‘नष्टः’ इत्यादौ प्रतीतिविषययोः प्रागभावध्वंसयोः नञर्थत्वायोगात् ‘कपाले घटो न’ इत्यादौ अत्यन्ताभावस्यैव प्रतीतेः । ‘अत्यन्ताभावान्योन्याभावावेव नञर्थौ, न संसर्गाभावत्वेन तस्य शक्तिः’ इति **पितृचरणाः** । एतेन पीतघटवति नीलघटो नास्ति इति (न ?) प्रयोगप्रत्ययौ, न वा घटवति ‘निलो घटो नास्ति’ इति प्रयोगः । तत्र च नञर्थान्वयिताऽवच्छेदकस्य प्रतियोगिताऽवच्छेदकत्वनियमः । ‘घटो नास्ति’ इत्यत्र घटत्वस्य उभयरूपत्वात् । ‘कम्बुग्रीवादिमान् नास्ति’ इत्यत्र कम्बुग्रीवादिमत्त्वमेव तथा । न च तस्य अन्वयिताऽवच्छेदक-

त्वेऽपि गौरवान्न प्रतियोगिताऽवच्छेदकत्वं इति **वाच्यम्**। उपस्थितस्यैव प्रतियोगितावच्छेदकत्वे लाघवात्। अननुप्रविष्टत्वेन गौरवाभावात्। अन्वयिताऽवच्छेदकता च पर्याप्तिसंबन्धेन बोध्या। तेन घटवति 'घटपटौ न स्तः' इति प्रत्ययप्रयोगौ, घटत्वपटत्वयोः अन्वयिताऽवच्छेदकत्वेऽपि तत्पर्याप्त्यनधिकरणत्वात्। द्वित्वस्यैव तादृशत्वेन प्रतियोगिताऽवच्छेदकत्वात् इति **केचित्**। **अन्ये तु** 'कम्बुग्रीवादिमान्नास्ति' इत्यत्र अन्वयिताऽवच्छेदकं न प्रतियोगिताऽवच्छेदकं गौरवात्। 'घटपटौ न स्तः' इत्यत्र अन्वयिताऽवच्छेदकमपि प्रतियोगिताऽवच्छेदकं प्रतीतिबलादित्याहुः।

अत्र च अभावाधिकरणभूतलादिप्रकारकाभावविशेष्यकबोधे अधिकरणप्रकारकप्रतियोगिविशेष्यकबोधसामग्री हेतुः। सा च सप्तम्यन्तभूतलादिपदसमभिव्याहारः। एवं अभावप्रकारकाधिकरणविशेष्यकबोधेऽपि। तेन 'भूतलं घटे' ('भूतले घटः') 'भूतले न घटः' 'चैत्रः पचति' 'न पचति चैत्रः' इत्यादिप्रयोगप्रत्ययाः। अन्यथा 'भूतलं न घटः' 'चैत्रो न पाककृतिः' इत्यत्र अधिकरणवाचिसप्तम्यन्तपदाभावेऽपि अत्यन्ताभावबोधः स्यात्। अत एव 'पृथिव्यां गन्धः, न जले' इत्यादौ गन्धविशेष्यक एव बोधः। **अन्ये तु** नञः अभावमात्रे शक्तिः। शक्यताऽवच्छेदकं च लाघवात् अभावत्वम्। अतो न अन्योन्याभावे लक्षणा। **न च** एवमपि घटपदात् नीलघटत्वप्रकारकप्रतीतौ घटपदलक्षणे वा अन्योन्याभावप्रकारकप्रतीत्यर्थं नञः लक्षणा आवश्यकी, अन्यथा 'न घटः' इत्यत्र अभावाप्रकारकप्रतीतौ 'घटः पटो न' इति प्रतीत्यनन्तरम् 'घटः पटो न वा' इति संशयः स्यात्, भिन्नप्रकारत्वेन अभावनिश्चयस्य अप्रतिबन्धकत्वात्। एवं वाक्ये प्रतिषेधस्थलेऽपि संसर्गाभावप्रतीत्यर्थं लक्षणा आवश्यकी इति **वाच्यम्**। प्रतियोग्यधिकरणवाचकपदयोः समानविभक्तिकत्वस्य अन्योन्याभावबोधहेतुत्वस्य, तयोः प्रथमादिविभक्तिकत्वस्य अत्यन्ताभावबोधे हेतुत्वस्य च कल्पनया लक्षणाया अभावात्। यद्वा नञ्समभिव्याहारे यत्पदार्थयोः आधाराधेयभावसंसर्गेण अन्वयः, तत्र अत्यन्ताभावप्रत्ययः। यत्र अभेदसंसर्गेण अन्वयः, तत्र अन्योन्याभावभानं इति व्युत्पत्तिः। तेन 'न पचति चैत्रः' इत्यत्र अत्यन्ताभावबोधः सुवचः। किञ्च अत्र अत्यन्ताभावबोधो न नियतः। कदाचित् अस्मादेव वाक्यात् 'पाकानुकूलकृतिमद्भिन्नः चैत्रः' इति अन्योन्याभावस्यापि बोधात्। अतः तादृशतात्पर्यज्ञानात् तादृशो बोधः इति न लक्षणा आवश्यकी इति। न चैवं प्रतिषेधपर्युदासयोः तुल्यत्वापत्तिः, इष्टापत्तेः। 'नानुयाजेषु' 'न होतारं वृणीते' इत्यत्र वाक्यभेद–करोत्यनुषङ्ग–विकल्पपरिहाराणां पर्युदासबीजत्वात्। 'न तौ पशौ' इत्यत्र पशुप्रकरणाभावस्य निषेधबीजत्वात्। एवं च समासे वाक्ये वा क्वापि न लक्षणा इति **केचित्**। **दीधितिकारास्तु** संसर्गाभावत्वं अन्योन्याभावत्वं च नञः शक्यताऽवच्छेदकं इति नञो नानाऽर्थत्वम्। तथापि अघटः इति समासे अन्योन्याभाववदुपस्थित्यर्थं नञो लक्षणा। अत एव प्रतिषेधापेक्षया पर्युदासो दुर्बलत्वेन गीयते। 'नानुयाजेषु' इत्यत्र प्रतिषेधेऽपि न विकल्पापत्तिः। अन्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यापि विशेषविधिनिषेधयोः विशेषनिषेधाभ्यनुज्ञाफलकत्वनियमस्य व्युत्पत्तिसिद्धतया विधिप्रतिषेधयोः उद्देश्यताऽवच्छेदकैक्ये विधेयप्रतिषेध्यताऽवच्छेदकैक्ये च विकल्पस्य युक्तत्वात्। यथा 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादौ 'न तौ पशौ करोति' इत्यत्र च। तत्रापि अतिदेशशास्त्रस्य पशूद्देशेन आज्यभागजन्योपकारविशेषविधिपरत्वेन विधिनिषेधयोः एकविषयत्वात्। 'नानुयाजेषु' इत्यत्र तदभावेन वैषम्यात्। अतोऽत्र पूर्वोक्तयुक्त्यैव पर्युदाससिद्धिः इत्याहुः। **केचित्तु** निषेधस्य प्रसक्तिपूर्वकतया इष्टसाधनत्वेन प्रमितस्य निषेधविषयत्वनियमः। एवं च विध्यर्थव्यतिरेकबोधकनिषेधेन अनिष्टसाधनत्वं निष्फलत्वं वा निषेधस्य बोध्यते इति उभयोः प्रामाण्यायोगात् व्रीहिशास्त्रयवशास्त्रयोरिव अंशतः पाक्षिकप्रामाण्याङ्गीकारेण विकल्पापत्त्या सामान्यविधेः विशेषविधिसमभिव्याहारेण तदितरपरत्वरूपपर्युदासाङ्गीकार इत्याहुः। **अत्रेदमाभाति**। सर्वत्र नञर्थस्य अन्वयिताऽवच्छेदकावच्छिन्न–प्रतियोगिताकत्वव्युत्पत्तिः,

अन्यथा नीलघटवति 'नेह घटः' इति अत्यन्ताभावव्यवहारस्य 'नीलघटो न घटः' इति अन्योन्याभावव्यवहारस्य च आपत्तिः। न च पदार्थैकदेशस्य घटत्वस्य कथमभावान्वयः? अभावस्यैव घटेन समं अन्वये घटत्वावच्छिन्नप्रतियोगितायाः संसर्गत्वात्। सा च विलक्षणप्रतियोगिताविशेषः इति केचित्। यत्रानुयोगितावाचकपदे सप्तमी, तत्र अत्यन्ताभावबोधः, यत्र प्रथमा तत्र अन्योन्याभावबोधः इति व्युत्पत्तिमाहुः। **परे तु** तादृशव्युत्पत्तेः 'न पचति चैत्रः' इत्यादौ अत्यन्ताभावप्रत्यये व्यभिचारात् एवं वाच्यम्—नञ्समभिव्याहाराभावे यत्पदार्थयोः आधाराधेयभावसंसर्गेण अन्वयः, तत्र अत्यन्ताभावप्रत्ययः। यत्र अभेदसंसर्गेण अन्वयः, तत्र अन्योन्याभावभानमिति। एवं च 'चैत्रः पचति' इत्यादौ आख्यातार्थयत्नस्य समवायेन चैत्रे भानम्। 'न पचति' इत्यत्र यत्नाभावः तत्संबन्धावच्छिन्न एव आधाराधेयभावनियामकस्वरूपसंबन्धेन चैत्रे भासते इति। एवं 'चैत्रस्य धनम्' (चैत्रस्य न धनं) इत्यत्रापि षष्ठ्यर्थस्वामित्वस्य धने निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावो विशेषणतया भासते। यदि तु स्वत्वं षष्ठ्यर्थः, तदा चैत्रनिरूपितस्वत्वाभावः आश्रयतासंबन्धेन भासते इति। एवं नञ्समभिव्याहाराभावे यादृशप्रतियोग्यनुयोगिवाचकपदयोः विरुद्धविभक्त्यर्थानवरुद्धयोः अभेदान्वयव्युत्पत्तिः, तत्समभिव्याहृतनञा अन्योन्याभावबोधः। अत एव समानविभक्तिकप्रतियोग्यनुयोगिवाचकसमभिव्याहृतनञ्पदजन्यबुद्धिविषयत्वं अन्योन्याभावलक्षणं इत्याहुः। **अन्ये तु** 'भूतले न घटः' 'घटो न पटः' इत्यत्र भूतलाधिकरणको घटप्रतियोगिकः अभावः, घटप्रतियोगिकभेदवान् पटः इति बोधः। यत्र तु 'घटो नास्ति' 'घटपटौ न स्तः' इति क्रियासमभिव्याहारः, तत्र लडर्थवर्तमानत्वेन नञर्थान्वयः, तत्रैव च भूतलाधेयत्वान्वयः। एकत्वान्वयस्तु प्रथमाऽन्तघटपदार्थे, तथा च भूतलवृत्तिवर्तमानत्वाभावाश्रयः एकत्वाश्रयो घटः, भूतलवृत्तिवर्तमानत्वाभाववन्तौ द्वित्वावच्छिन्नौ घटपटौ इति बोधः। एवं 'जातौ सत्ता नास्ति' इत्यत्र सत्ताऽभावः जातौ इति बोधः जात्याधेयः इति वा बोध इत्याहुः।

अत्र च सर्वत्र प्रातिपदिकार्थे नञर्थे घटपटादीनां अभेदातिरिक्तेन प्रतियोगित्वसंबन्धेन अन्वयः। निपातेषु भिन्नव्युत्पत्तिस्वीकारात् इति **केचित्**। घटपदस्य घटप्रतियोगिके लक्षणाङ्गीकारे न कोऽपि दोष इति दिक्। **मणि.** पृ. १५४-१५९.

* नञर्थपर्यवसायी एव प्रतिषेधविधिः। **बृहती.** पृ. २८.

⌛ **नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः इति न्यायः।** नञ्युक्तं इवयुक्तं च यत्किञ्चिद्दृश्यते, तत्र तस्माद्भिन्ने तत्सदृशे अधिकरणे द्रव्ये कार्यं विज्ञायते। हि यतस्तथा अर्थगतिरस्ति, तादृशस्यैवार्थस्य गतेर्लोके प्रतीतिरस्तीति भावः। तद्यथा 'अब्राह्मणमानय' इत्युक्ते ब्राह्मणसदृशं क्षत्रियमेव आनयति, नासौ लोष्टमानीय कृती भवतीति नञ्युक्तस्योदाहरणम्। न चायं न्यायः प्रसज्जकविषयः, तस्य निषेधपरत्वात्। तथोक्तं हरिणा—'उभौ नञौ समाख्यातौ पर्युदासप्रसज्जकौ। पर्युदासः सदृग्ग्राही प्रसज्जस्तु निषेधकृत्॥' इति। इवयुक्तोदाहरणं तु लोके प्रसिद्धमेव 'चन्द्रमिव मुखं पश्य' इत्यादि। अयम् 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इतिसूत्रमहाभाष्ये स्पष्टः। 'सुट् कात्पूर्वः' इतिसूत्रमहाभाष्ये तु अस्य न्यायस्य 'नञ्युक्तमिवयुक्तं च अन्यस्मिन् सदृशे कार्यं विज्ञायते' इति स्वरूपान्तरमुक्तं इति ज्ञेयम्। परिभाषेन्दुशेखरे लौकिकन्यायसिद्धपरिभाषात्वेन व्यवहृतोऽयं इति तत्रैव विस्तरः। **साहस्री.** ४४७.

* नञिवयुक्तोऽन्यसदृशे (नञ् इव)। 'अणोऽप्रगृह्यस्यानुनासिकः' (पा० ८।४।५७) इत्यण् पूर्वेण। अप्रगृह्यस्येति पर्युदासादचः एवानुनासिकः। नचाण्ग्रहणसामर्थ्यात् नञिवयुक्तन्यायस्य बाधः, तस्य पूर्वेणापि (इता णकारेण) उपपन्नत्वात्। **शब्दकौस्तुभः** २ शषसर्, हल्.

* नञ्टीकायामुक्तम् 'नोपादेयत्वमेवैकं कारणत्वेन संमतम्। विशेषणविवक्षायाः कारणं हि महद्विधिः॥' (वा. पृ. २१२। नञ्टीका तु १।३।७ सूत्रे 'न सुरां पिबेत्' इति नञ्विवरणपरं वार्तिकम्)। **बाल.** पृ. १३,
* नञ्टीकायां वार्तिककृता पुरुषार्थः श्रौतः क्रियानिषेधः

'न हिंस्यात् सर्वभूतानि' इत्युक्तः। पृ. ३२ (नञ्टीका १।३।७ सूत्रे).

* **नञ्-धातुपदयोर्**यदा संबन्धः तदा स्वार्थं हित्वा वस्त्वन्तरं लक्षयन्ति (तदा पर्युदासः)। वा. ४।१।३।३.

* **नञ्पदं** अभिधावृत्त्या प्रतिषेधं ब्रूते। प्रजापतिव्रतवाक्ये तु पर्युदासोऽर्थस्तस्य। **वि.** ४।१।३.

* **नञ्समासे** हि सति अव्ययपूर्वपदप्रकृतिस्वरत्वात् अहीनशब्दस्य आद्युदात्तत्वं स्यात् (अहीनः इति) मध्योदात्तस्तु अयं पठ्यते (अहीनः इति)। वा. ३।३।८।१६ पृ. ८६४.

* **नञ्संबन्धात्** 'यदनृतवदनेन उपकुर्यात् तन्न' इति वचनं व्यज्यते। तस्मात् दर्शपूर्णमासोपकाराय वदतो यदनृतं प्रसज्यते तत्प्रतिषेधो विधीयते। ततश्च यावत् कर्मार्थः संवादः तत्र सर्वत्र अनृतं वर्जनीयम्। वा. ३।४।४।१२ पृ. ९४१.

[इतः परं 'नहि' इति अखण्डेन पदेन आरभ्यमाणा लघुसिद्धान्ता निवेश्यन्ते। के.]

⌛ **नहि अकारणोत्कर्षः कार्यमनुविधत्ते।** स्वप्ने जागरे च उत्कृष्टकलधौतदर्शनात् उत्कृष्टं सुखम्, उत्कृष्टसर्पादिदर्शनाच्च उत्कृष्टं भयादि दृश्यते। विषयस्याकारणत्वे तदुत्कर्षानुविधानं कार्ये न स्यात्, 'नहि...धत्ते' **इति न्यायात्। अद्वैत.** १।१८।४४५.

* **नहि अगृहीतयोः** संबन्धिनोः संबन्धग्रहणं संभवति। रत्नाकर. अनुमानं श्लोवा. १४६.

* **नहि अनवगतविशेषणो** विशिष्टमवगच्छति। **कणिका.** पृ. ३२५.

* **नहि अनुपलम्भमात्रेण** नास्तीत्यवगम्य नष्टः इत्येव कल्पयन्ति। भा. १।१।६।२०.

* **नहि अन्यार्थात्** संनिहितात् अन्यत् संपादयितुं शक्यते। यथा 'भार्या राज्ञः पुरुषो देवदत्तस्य' इति न भार्याविशेषणार्थमुच्चरितेन राज्ञा पुरुषो विशेष्यते। रत्न. ५।३।१।२.

⌛ **नहि अयं स्थाणोरपराधो यदेनमन्धो न पश्यति इति न्यायः।** स्पष्टार्थः। **साहस्री.** ४१३.

⌛ **नहि अविद्वान् विहितोऽस्ति।** (ज्ञाते च वाचनं नह्यविद्वान् विहितोऽस्ति ३।८।८।१८) **इत्यनेन न्यायेन** यजमानस्येव ऋत्विजामपि अविदुषामनधिकारात्। **कौ.** १।२।४।३५. * नह्यविद्वान् विहितोऽस्ति इत्यवश्यं तावत् अग्नीधा आत्मीयाः पदार्थाः प्रागेव कर्मप्रक्रमादवगन्तव्याः। तत्र प्रैषः पिष्टपेषणन्यायेन अर्थं ज्ञापयितुमशक्नुवन् अदृष्टार्थो भवति। वा. १।२।४।३१-३ पृ. १४७.

* **नहि अशाब्देन** शाब्दस्यैकवाक्यता भवति। बाल. पृ. १३०.

* **नहि अष्टकृत्वः** एकं घटमानीय 'मद्गृहे सन्ति अष्टौ घटाः' इति व्यवहरन्ति। वि. १०।५।६.

* **नहि अस्ति** वचनस्यातिभारः। वि. ३।८।२.

⌛ **नहि आगमाः सहस्रं (अपि) घटं पटयितुमीशते।** क्षणिकस्य यागस्य यावत्कार्यारम्भं अवस्थानमपि सर्वप्रमाणविरुद्धं न कल्पयितुं शक्यम् 'नहि आगमाः' **इति न्यायात्।** कु. २।१।२।३.

⌛ **नहि आढ्ये वदान्येऽवतिष्ठमाने क्षुत्क्षामो भिक्षुको भिक्षुकान्तरं याचितुमर्हति।** ननु ऐकादशिनेषु दैक्षस्यैव विध्यन्तो न सवनीयस्य, तस्य स्वयमधर्मकत्वात्। **'नहि आढ्ये॰ मर्हति' इति न्यायात्। सोम.** ८।१।७.

* **'नहि' इति एतावतो** निषेधार्थत्वात्। सु. पृ. १०५६.

⌛ **'नहीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्' इति न्यायः।** अयं कालिदासकविना कुमारसंभवे (३।६३) व्यवहृतः। **साहस्री.** ७२८.

⌛ **नहि उपासना वस्तुतत्त्वमपेक्षते किं तर्हि यथावचनमनुष्ठेया इति न्यायः। ऐआसा.** ३।१।८.

⌛ **नहि एकमुदाहरणं योगारम्भं प्रयोजयति इति न्यायः।** 'नामि' इति सूत्रे (पा॰ ६।४।३) महाभाष्ये 'नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति' इत्युक्तम्। तच्च प्रकृतन्यायव्यञ्जकं इति ज्ञेयम्)। **साहस्री.** ४५०.

⌛ **नहि एकमेव सविशेषं निर्विशेषं च भवति इति न्यायः। अयं न्यायः अद्वैतकौस्तुभेऽभिहितः।** तत्र

हि– ‘ सत्यकामः सत्यसंकल्पः ’ ‘ अस्थूलमनण्वह्रस्वम् ’ इत्याद्युभयविधश्रुतिसंभवादुभयलिङ्गं ब्रह्मेति प्राप्ते, अभिधीयते। नोभयलिङ्गं ब्रह्म, एकस्य वस्तुनो द्वैरूप्यायोगात्। न ह्येकमेव सविशेषं निर्विशेषं च भवतीति युक्त्या इत्युक्तमिति। **साहस्री. ७५४.**

⌛ **नहि एकं किञ्चिज्जनकम्, सामग्री वै जनिका इति न्यायस्य** अन्यत्र व्यवस्थापितत्वात्। **संमतितर्क. भागः १ पृ. १२.**

⌛ **नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति इति न्यायः।** कण्ठीरवः सिंहः। कुरङ्गस्य मृगस्य शावः, शिशुरित्यर्थः। प्रतिभटः संमुखयुद्धकर्ता। अयं न्यायो बलवता सह निर्बलो नैव योद्धुं क्षमते इत्यर्थविवक्षायां प्रवर्तते। **साहस्री. ६७१.**

⌛ **नहि करकङ्कणदर्शनाय आदर्शापेक्षा इति न्यायः।** यथा प्रत्यक्षयोग्यं करे स्थितं कङ्कणं प्रत्यक्षेणैव गृह्यते, न तद्दर्शनाय आदर्शापेक्षा। एवं प्रत्यक्षसामग्रीसत्त्वे तयैव पदार्थप्रतीतिः, नानुमित्यादिसामग्र्यपेक्षेति विवक्षायामस्य प्रवृत्तिरिति। ‘नहि करिणि दृष्टे चीत्कारेण तमनुमिमते अनुमातारः’ इति वाचस्पत्युक्तमेतन्न्यायमूलकमेव। अनुमित्सायां तु तदपेक्षा, ‘प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः’ इति वाचस्पत्युक्तेरिति। **साहस्री. १६१.**

⌛ **‘नहि कर्मणि कर्मान्तरारम्भः’।** शिवोक्तकामिकाद्यागमानां यावज्जीवलिङ्गधारणविधायकत्वात् ‘नहि कर्मणि’ **इति न्यायेन** नित्यौपासनादिपौण्डरीकान्तश्रौतस्मार्तकर्मणां निरवकाशत्वात्। **श्रीकर. १।१।१ ब्रसू.**

⌛ **‘नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति’ इति न्यायः।** अयं भगवद्गीताषष्ठाध्यायचत्वारिंशच्छ्लोकोत्तरार्धरूपः, स्पष्टार्थः। **साहस्री. ७५८.**

⌛ **‘नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्’ इति न्यायः।** अयं श्रीमद्भगवद्गीतातृतीयाध्यायपञ्चमश्लोकपूर्वार्धरूपः पातञ्जले न्यायत्वेन न्यगद्यत। **साहस्री. ७२५.** * ‘नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥’ **इति स्मृत्युक्तन्यायेन** अवशेनापि जीवता पुरुषेण कर्म कर्तव्यमेव। **उपदेशसाहस्री** पद्य. १।८ **रामतीर्थ.**

⌛ **नहि कृतमुपकारं साधवो विस्मरन्ति इति न्यायः।** स्पष्टः। **साहस्री. ९८१.**

⌛ **नहि क्रियारहितं वाक्यमस्ति इति न्यायेन** ‘ धेनुर्दक्षिणा ’ इत्यत्र क्रियापदाध्याहारः आवश्यकः। **मुरारि. पृ. ११७८.**

* **नहि गमनसाधनस्य** रथस्य चक्राद्यङ्गेषु अन्यतमस्य वैकल्ये गमनसाधनत्वं भवति। **वि. ६।३।२.**

* **नहि गुणलोपेऽपि** मुख्यो लोपमर्हति। पवमानेष्टिषु अग्निहोत्रहवण्यभावेऽपि निर्वापो न लुप्यते। **वि. १०।२।२७.**

* ०**नहि तयोर्धर्मशास्त्रम्** (६।४।७।२५) इत्येवं सहितयोः (होमाभिषवयोः) निमित्तत्वात्। **वा. ३।५। १३।३९.**

⌛ **नहि त्रिपुत्रो द्विपुत्रः** (कथ्यते– संग्रहः) **इति न्यायः।** त्रित्वस्य द्वित्वव्यापकत्वेऽपि वाक्यस्य सावधारणत्वात् पुत्रत्रयवतः पुत्रद्वयवत्त्वेऽपि न तस्य द्विपुत्रशब्दवाच्यता। न्यूनसंख्याव्यवच्छेदकत्वेन त्रिशब्दस्य न यथा द्विपुत्रवाचकतेत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिरिति। **साहस्री. २९.**

* **नहि दग्धुकामस्य** उदकोपादानं असति दाहे अनर्थकं इति दहनशक्तिमस्य जनयेत्। **भा. ६।१।१।३ पृ. १३५३.**

* **नहि दुःखरूपं** तपो विना दुःखप्रदं पापं नश्यति। यथा पाटनमन्तरेण विषव्रणानां नोपशान्तिः। **वि. ३।८।४.**

⌛ **नहि दृष्टेऽनुपपन्नं इति न्यायः।** नहि प्रत्यक्षविषये प्रमाणान्तरान्वेषणमिति यत्र विवक्षा तत्रास्य प्रवृत्तिः। तथाहि– प्रत्यक्षस्य सर्वप्रमाणबाधकत्वात्, अनुपपत्तेरर्थापत्तिरूपतया व्यतिरेकानुमितिरूपतया वा प्रत्यक्षेण बाध्यत्वात् प्रत्यक्षविषये विरोधिन्याः अनुपपत्तेर्न संभव इति। **साहस्री. १६०.**

* **‘नहि दृष्टेऽनुपपन्नं नाम’**। लोके राजभृत्योऽपि सर्वजनदत्तधनादिकं स्वद्रव्यवत् परिगृह्य तदन्तर्यामिराजसमर्पणं करोतीति दृष्टम् । **श्रीकर.** ३।२।४० ब्रसू.

* **नहि दृष्टे संभवति** अदृष्टकल्पना न्याय्या । **बृहती.** पृ. २०८.

⧗ **नहि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुन्मज्जनं भवति ।** ‘अतो हलादेः’ इति सूत्रे अद्ग्रहणस्य न तावत् संध्यक्षरादिकं व्यावर्त्यम्, लघुग्रहणेनैव निरासात् । इत्–उत्–ऋतः परमवशिष्यन्ते अचेतीत्, अकोषीत्, अनर्तीत् इति । तेऽपि अन्तरङ्गेण गुणेनापहृताश्चेत् तर्हि व्यर्थं अद्ग्रहणं स्यात् । न च अकुटीत् अपुटीत् इत्यादौ उकारव्युदासाय तदिति वाच्यम् । तत्रापि अन्तरङ्गेण गुणेन वृद्धिबाधे सति गुणे ङित्त्वान्निषिद्धेऽपि वृद्धेरप्रवृत्तेः ‘नहि देवदत्तस्य०’ इति न्यायात् । **शब्दकौस्तुभ.** इको गुण.

* **नहि निन्दा निन्द्यं** निन्दितुं प्रयुज्यते किं तर्हि निन्दितादितरत् प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते, किन्तु इतरस्य विधिः (यथा अग्निहोत्रस्य ‘उदिते जुहोति, अनुदिते जुहोति’ इति कालद्वयस्य प्रत्येकं निन्दा)। **भा.** २।४।२।२१.

⧗ **नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुं इति न्यायः ।** यथा– तत्तद्विग्रहावच्छिन्नेशध्यानादिस्तुतये तदन्यविग्रहावच्छिन्नेशापकर्षवर्णनं केवलायां निन्दायां प्रयोजनाभावादुभयपरत्वे वाक्यभेदप्रसङ्गाच्च । अक्षरार्थस्तु स्पष्टः । अयमभिप्रायः—निन्दाऽर्थवादस्य तदितरस्य प्राशस्त्यविधानार्थमेव प्रवृत्तिर्न तु तस्य निन्दार्थम्, निन्दायां प्रयोजनाभाव इति । एवं मीमांसायां लोके च प्रसिद्धमुदाहरणान्तरमन्यत्र ज्ञेयमिति । **साहस्री.** १३७.

* ‘नहि निन्दा० स्तोतुम्’ इति न्यायः शाखान्तराधिकरणे प्रसङ्गादुक्तः । **बाल.** पृ. ५७. * ‘नहि निन्दा० स्तोतुम्’ इति न्यायेन ‘स्तेनं मनः, अनृतवादिनी वाक्’ इति निन्दया ‘हिरण्यं हस्ते भवति’ इति हिरण्यस्य स्तुतिः । **कौ.** १।२।१।११. * ‘नहि निन्दा० स्तोतुम्’। नहि स्तुतिनिन्दे नाम व्यवस्थिते । निन्दारूपासु स्तुतिषु, स्तुतिरूपास्वपि च निन्दासु विपर्ययदर्शनात् । यथा वक्ष्यति ‘नहि० ... स्तोतुम्’ इति । **वा.** १।२।१।७पृ. ११५. * ‘अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवेधुकाश्च’ इति । दशमे ‘अनाहुतिः’ इति निन्दया निषेधकल्पनां पूर्वपक्षयित्वा **‘नहि० स्तोतुम्’** इति शाखान्तराधिकरणे प्रसङ्गादुक्तेन न्यायेन ‘यत् पयसाऽग्निहोत्रं जुहोति’ इति पयोविधिशेषत्वात् न निषेधकल्पना इति सिद्धान्तितम् । **बाल.** पृ. ५७. * अजादिनिन्दा च **नहिनिन्दान्यायेन** विधेयगवाश्वस्तुत्यर्था । **कौ.** १।४।४।२६. * अत्र नहिनिन्दान्यायेन वैखानसप्रशंसार्थोऽयमर्थवाद इति केषांचित् समाधानमसाधु । **परिमल.** २।२।८।४४ ब्रसू. * ‘अनाहुतिर्वै जर्तिलाश्च’ इति निन्दा नहिनिन्दान्यायेन पयोविधिस्तुत्यर्थैव । **भाट्ट.** १०।८।४. * उदितानुदितहोमस्थले इव नहिनिन्दान्यायेन तत्तच्छ्रुतिस्मृत्यादिपठितशिवप्रसादनिषेधवचनानां अग्निहोत्रादिकर्मस्तुतिपरत्वेन अन्यथासिद्धत्वात् ... । पूर्वोक्तनहिनिन्दान्यायेन निषेधवचनानां तत्र तात्पर्याभावात् । **श्रीकर.** १।२।७ब्रसू. * ऋङ्निन्दाऽपि नहिनिन्दान्यायेन विधेयसामस्तुत्यर्थैव । **भाट्ट.** ९।२।७ पृ. ११२. * पञ्चमप्रयाजे ‘अग्न आज्यस्य व्यन्तु इति मन्त्रपाठं विनिन्द्य आज्यस्य हविषो व्यन्तु इत्येव ब्रूयात्’ इति कौषीतकिब्राह्मणे (३।४) विधानेऽपि नहिनिन्दान्यायेन विधेयस्तुतिमात्रार्थत्वेन द्वयोरपि सिद्धान्तसिद्धत्वात् । **संकर्ष.** २।२।९. * विहितजर्तिलादिनिषेधस्य ग्रहणाग्रहणवत् विकल्पार्थत्वात् विकल्पस्य च ‘पयसा जुहुयात्’ इति द्रव्यान्तरविधानादेव सिद्धेर्निषेधानर्थक्यात् नहिनिन्दान्यायेन पयोविधिस्तुत्यर्थतैव । **पराक्रमः.** ४९।१. * शाखाऽन्तरे पाथिकृतीष्टेः अतिपन्नेन पूर्णमासेन दर्शेन च समानतन्त्रतानिन्दा नहिनिन्दान्यायेन पथिकृत्त्वगुणगुणविधिप्रशंसार्थैव, न तु समानतन्त्रतानिषेधार्था । **कु.** १।३।७।१२. * शुद्धपृथिवीचयननिषेधः ‘हिरण्यं निधाय चेतव्यम्’ इत्यस्य विधेः नहिनिन्दान्यायेन स्तुत्यर्थो नित्यानुवादः वाङ्मनसयोरिव । **कौ.** १।२।३।१८. * सप्तशती (दुर्गा)- नवशतीमध्ये सप्तशतीनिन्दावचनं तु उदितानुदितहोमनिन्दाश्रुतिवत् नहिनिन्दान्यायेन नवशतीप्रशंसामात्रम् ।

व्रतराजः. * 'सैनमीश्वरा प्रदहः' इत्यादेः केवलवायुनिन्दायाः नहिनिन्दान्यायेन नियुत्वत्त्वगुणकवायुस्तुत्या तदेकवाक्यत्वम् ('वायवे नियुत्वते आलभेत' इत्यनेनैकवाक्यत्वम्)। **सोम.** १।२।१ पृ. ५ पं. १९. * ('अथापि ज्ञानप्रशंसा भवति अज्ञाननिन्दा च'। १।१७) 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' (१।१८) इत्यादि निन्दा तु 'नहिनिन्दान्यायेन' ज्ञानप्रशंसार्था इति निरुक्ते यास्काचार्यैः स्पष्टमेवाभिहितम्। **कु.** १।२।४।४३ पृ. ४८.

* **नहि निमन्त्रितो** विप्रादिः अभोजितः संतुष्यति, प्रत्युत शपत्येव। एतदेवाभिप्रेत्य उच्यते 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्ये इत्युक्त्वा न यजते' इति। **वि.** १०।१।१ वर्णकं ३.

⌛ **नहि प्रतिज्ञामात्रेणार्थसिद्धिः इति न्यायः।** यथा प्रतिज्ञामात्रकरणेन प्रतिज्ञातोऽर्थो न सिध्यति, किन्तु प्रयासान्तरमेवेति भावः। **साहस्री.** १४९.

* **नहि प्रत्यक्षदृष्टं** मुहूर्तमदृष्ट्वा पुनरुपलभ्यमानं प्रत्यभिजानन्तो विनष्टं परिकल्पयन्ति। **भा.** १।१।६।२०.

⌛ **नहि प्रत्यक्षविरुद्धं शास्त्रसहस्रेणापि बोधयितुं शक्यं इति न्यायः।** यथा न जलादेर्नवनीतजनकत्वादिकं बोध्यते इति। **साहस्री.** ९३२.

⌛ **नहि प्रमाणस्वरसात् प्रतीयमानं प्रयोजनानुसारेण परित्यक्तुमुचितं इति न्यायः। कु.** २।२।२ पृ. १५८.

⌛ **'नहि प्रयोजनापेतं वाक्यमुच्चार्यते क्वचित्।
प्रयोजनक्षमं नापि पदमाख्यातवर्जितम्॥'** (श्लोवा. १।१।७,३४६) नोदाहरणमिदम् (शुक्लो गौः) यथाश्रुतमादरणीयम्। यतः पदार्थानामस्ति परस्परं संबन्धः इत्येतावन्मात्रप्रतिपादनपरमिदं भाष्यम्, न तु पारमार्थिकम्। 'नहि० ... र्जितम्' इत्यादिवार्तिकप्रदर्शितन्यायात्। अतोऽत्रापि 'आनीयताम्' इत्यादिक्रियापदाध्याहारेणैव वाक्यपूरणम्। **वैद्यनाथी.** १।१।७।२५ पृ. ९६–९७.

⌛ **नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः इति न्यायः।** भारविश्लोकरूपोऽयम् (१।२)। **साहस्री.** ९६०.

* **नहि ब्राह्मणविशेषः** परिव्राजकादिरब्राह्मणो भवति। **मीन्या.**

⌛ **नहि भवति कुण्डं बदरं इति न्यायः।** आधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यं नहि भवति कुण्डं बदरमिति। **साहस्री.** ६९०.

⌛ **'नहि भिक्षुर्भिक्षुं याचते'।** साकं प्रस्थायीयस्य अमावास्याविकारत्वमेव, तत्र नित्यं सांनाय्यदर्शनात्। दाक्षायणयज्ञविकारत्वं तु नास्ति 'नहि भिक्षुर्भिक्षुं याचते' इति न्यायात्। **वैजयन्ती.** २।६।५३.

⌛ **नहि भिक्षुकोऽपि भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके इति न्यायेन** कारकाणि फलं त्यक्त्वा भावनायामेवान्वियन्ति इति मीमांसका मन्वते। **भूषणसारः** धात्वर्थनिर्णये का. १७. * **नहि भिक्षुको भिक्षुकं याचितुमर्हति सति अन्यस्मिन् अभिक्षुके इति न्यायः। साहस्री.**५८. * **'नहि भिक्षुको भिक्षुकान्तरं याचते' इति न्यायेन** शतोक्थ्यादौ तेषुतेषु अहःसु वाचनिकानि स्तोत्राणि ज्योतिष्टोमस्थान्येव कार्याणि। **भाट्ट.** ८।३।५. * **नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके।** यत्र चोत्पत्तिस्तत एवागमनं युक्तम्, न यत्रातिदिष्टाः। 'नहि भिक्षु०... अभिक्षुके'। **भामती.** ८।३।५।१०–११ ब्रसू. * उक्थ्यशब्दश्रवणमात्रेण प्रकृत्यनपेक्षज्योतिष्टोमगतानामेव प्रथमप्रतीतिः इति तद्विकारत्वमेव, न तत्सापेक्षद्वादशाहगतोक्थ्यविकारत्वम्। 'नहि भिक्षुकः' इति न्यायात्। **सोम.**८।३।५. * (ज्योतिष्टोमात्) यत्रोत्पन्नानि स्तोत्राणि तत एव वैकृतान्यपि आकाङ्क्षितुमर्हन्ति न द्वादशाहात्, 'नहि भिक्षुको० अभिक्षुके'। **रत्न.** ८।३।४।८–९.

⌛ **नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते इति न्यायः। भामती.** १।१।१ ब्रसू. पृ. ७४.

⌛ **नहि भुक्तवान् पुनर्भुङ्क्ते इति न्यायः।** उक्तश्चायम् 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (पा० ६।१।१२७) इतिसूत्रभाष्ये। **साहस्री.** ४८२.

⌛ **नहि मरुमरीचिसरसी क्रमशः शुष्यति इति न्यायः।** अयं भ्रान्तिविषयविवक्षायामवतरतीति स्पष्टः। **साहस्री.** ९२३.

⧗ **नहि मृगाः सन्तीति शालयो नोप्यन्ते इति न्यायः** । भामती. १।१।१ ब्रसू. पृ. ७४

⧗ **‘नहि मृता दग्धा च भार्या पुनः प्रसवायोद्भवति इति न्यायः** । प्रमाणतो निवृत्ता प्रमाणतो दग्धा सा अविद्या भूयः पुनः कथं प्रसूयेत जायेत । ‘ नहि मृता० द्भवति ’ तद्वदित्यर्थः । उपदेशसाहस्री. पद्य १।१८ रामतीर्थ (‘निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः’ इति मूलम्) ।

⧗ **नहि वरघाताय कन्यामुद्वहन्ति इति न्यायः** । संग्रहः ⁕ नहि वरघाताय कन्यावरणं इति न्यायः । संग्रहः ⁕ नहि वरघाताय कन्योद्वाहः । वि. १०।२।३२.

⧗ **नहि वस्तूनां स्वभावानुसारेण किञ्चिदुपासनं प्रवर्तते, किन्तु वचनानुसारेण इति न्यायः**। ऐआसा. ३।१।४.

⧗ **नहि विवाहानन्तरं वरपरीक्षा इति न्यायः** । व्यर्थत्वात् इति भावः । साहस्री. ३०९.

⧗ **नहि शाब्दमशाब्देन (अन्वेति) इति न्यायः** । इच्छागोचरत्वस्य मोक्षसाधारणत्वात् तत्रैव यज्ञादिविनियोगः कुतो न स्यादिति शङ्कानिरासाय अयं न्यायः प्रवर्तते । साहस्री. २३८.

⁕ **नहि** । ‘ सत्यम् , नहि कश्चिदत्र दोषः ’ इति वार्तिकम् (पृ. ३९९) । अत्र सुधा ‘ निषेधार्थे नहि इत्यखण्डं पदम् ’ इति । पृ. ६०९ । पूर्वपाठे तु ‘ नहि ’ इत्यखण्डं पदं इति च । पृ. ६१६.

⧗ **नहि सर्वः सर्वं जानाति इति न्यायः** । साहस्री. ४७८.

⧗ **नहि सर्वत्रानीशशक्तिः इति न्यायः** । अनीशस्य जीवस्य शक्तिः न सर्वत्र प्रवर्तते, परिमितत्वात् इत्यर्थः । साहस्री. ४७९.

⧗ **नहि सार्वभौमानन्दमनुभवन्राजा ग्रामाधिपतिसुखं तुच्छमपेक्षते इति न्यायः** । अयमधिकसुखसत्त्वे अल्पसुखत्यागविवक्षायामवतरतीति । तथा ह्युक्तम्– एवं मुमुक्षुरखण्डैकरसपरमानन्दमनुभवन् नान्यत्तुच्छसुखमपेक्षते इति तत्त्वानुसंधानटीकायामिति । साहस्री. ७६०.

⧗ **नहि सुतीक्ष्णाऽप्यसिधारा स्वयं छेत्तुमाहितव्यापारा इति न्यायः** । अयं कर्तारं विना करणस्य कार्याक्षमत्वविवक्षायां प्रवर्तते । साहस्री. २२१.

⧗ **नहि सुशिक्षितोऽपि बटुः स्वस्कन्धमारोढुं पटुः इति न्यायः** । आत्माश्रयस्य दोषत्वविवक्षायां स्पष्टोऽयम् । साहस्री. २२०.

⧗ **नहि सोपानत्के पादे पुनरप्युपानहं प्रतिमुञ्चति इति न्यायः** । साहस्री. ८७४.

⧗ **नहि स्थालानि संपन्नानि इति भुक्तवताऽपि पुनर्भोक्तव्यं इति न्यायः** । कल्पतरु. ३।२।२।७ ब्रसू.

⧗ **नहि स्वयमसिद्धः परं साधयति इति न्यायः**। नहि क्रियैव आत्मानं (क्रियां) कारयति अनिर्वर्तितायाः स्वरूपाभावात् इति । उपदेशसाहस्री. गद्य. १०५.

⧗ **नहि स्वल्पो दोषः अमितगुणाभिभावकः इति न्यायः** । साहस्री. ७७०.

⧗ **नहि स्वस्कन्धं स्वयमारोढुं शक्नोति इति न्यायः** । यत्र तु एकस्यैव कर्तृकर्मभावो लोकशास्त्रविरुद्धः प्रतीयते, तत्रायं प्रवर्तते इति । साहस्री. ५२३.

⧗ अवान्तरप्रकरणादेव निविदामपि सामिधेन्यङ्गत्वात् न व्यवधायकत्वम् **‘नहि स्वाङ्गं स्वव्यवधायकम्’ इति न्यायात्** । कु. ३।१।११।२१ अवतरणे, ⁕ अस्तु वा वस्त्वन्तरमपूर्वम्, तथापि व्यापारवत्त्वेन यागस्य साधनत्वं न तत् (अपूर्वं) व्याहन्तुमीष्टे ‘नहि स्वाङ्गं स्वव्यत्रघायकम्’ इति न्यायात् । २।१।२।३.

⧗ **‘नहि हस्तिनि दृष्टेऽपि तत्पदेनानुमेष्यते’ (अनुमा इष्यते । इति न्यायः)** । ‘प्रत्यक्षे श्रूयमाणे तु न विद्येतानुमानिकम् ।’ इति पूर्वार्धम् । वा. १।३।२।३ पृ. १७२.

[इतः परं नशब्दारब्धसामासिकपदघटिताः नकारारब्धाश्च लघुसिद्धान्तादयो निवेश्यन्ते ।]

⁕ **नकारोऽयं** निवृत्तिं ब्रवीति । सा च प्रवृत्तिमन्तरेण न संभवति । सा सामान्यशास्त्रेण वा भवेत् विशेषशास्त्रेण वा । टुप्. १०।८।१।१ पृ. २०५७.

⁕ **नक्षत्रं ऋतुं** च न प्रतीक्षेत यदि आधानसमनन्तरं सोमेन यक्ष्यमाणः स्यात् । ५।४।३।६ । प्रतीक्षा-

भावोऽयं आधानविषयकः– आधानस्य ऋत्वादि न प्रतीक्षेत इति सूत्रकारभाष्यकारौ । सोमविषयकः— सोमस्य ऋत्वादि न प्रतीक्षेत, इति वार्तिकं तन्त्ररत्नं च। के. * **नक्षत्राणि** आकाशे दृश्यमानानि । नक्षत्रेष्टिवाक्यशेषे अभिहितम् 'ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्योतींषि यन्नक्षत्राणि' इति । **वा.** ३।१।७।१३ पृ. ७०२.

* **नक्षत्रेष्टिषु** (नक्षत्रसत्रे) प्रधानोत्तरं नारिष्ठहोमाः कर्तव्याः, ततः 'अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्यादयः उपहोमाः कर्तव्याः । न तु ब्राह्मणतर्पणान्ते इति मीमांसासिद्धान्तः । याज्ञिकास्तु उपहोमान् कृत्वा नारिष्ठहोमान् कुर्वन्ति । **के.** ५।२।९।१७–१९.

* **नक्षत्रेष्ट्यादौ** उपदिष्टैरुपहोमादिभिः आतिदेशिकानां नारिष्ठहोमादीनां समुच्चयः । **भा.** १०।४।१। १–२.

* **नक्षत्रेष्ट्युपहोमन्यायः ।** उपहोमन्यायः द्रष्टव्यः। **भा.** ५।२।९।१७–२०.

* **नक्षत्रेष्टिन्यायः ।** नक्षत्रेष्ट्युपहोमन्यायः । उपहोमन्यायः । (५।२।९।१७–२०) दीक्षणीयायाः सावित्रहोमात् प्रागनुष्ठानं नक्षत्रेष्ट्युपहोमन्यायात् इति पूर्वपक्षे । **वृ.** ५।२।११।२२.

* **नक्षत्रसत्रे** प्रधानहोमाः 'अग्निर्नः पातु कृत्तिकाः' इत्यादियाज्यानुवाक्यापुरःसरं हूयन्ते । **वि.** ५।२।९.

* **नखेषु** प्राकृतोलूखलमुसलधर्मः प्रोक्षणं भवति राजसूये नैर्ऋते चरौ । **भा.** ९।२।१२।४०. * 'कृष्णानां व्रीहीणां नखनिर्भिन्नानाम्' इति नैर्ऋते चरौ । तत्र **नखेषु** प्रोक्षणोहोऽस्ति । **वि.** ९।१।२.

* **नखावपूतानां** नैर्ऋतश्चरुः राजसूये परिवृत्त्यै गृहे । **भा.** ९।२।१२।४०.

* **नखनिकृन्तनं** ज्योतिष्टोमे यजमानसंस्कारः। **भा.** ३।८।२।३–८, * नखनिकृन्तनं (ज्योतिष्टोमे) संस्कारः, न फलप्रयुक्तः, तत्र फलश्रुतिरर्थवादः तच्च क्रत्वर्थम् । ४।३।१।१–४.

* **नगरं** नैचाशाखं नाम । **भा.** १।२।४।३१–९.

* **नङ्क्ष्यति** इत्यत्र नाशो धात्वर्थः । वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं भविष्यत्वं प्रतियोगितासंबन्धेन धात्वर्थे अन्वेति । तेन वर्तमानप्रागभावप्रतियोग्युत्पत्तिककपालाधिकरणकनाशप्रतियोगी घटः इति बोधः । इति शिरोमणिः । **मणि.** पृ. २८.

⧗ **नटाङ्गनान्यायः ।** यथा रङ्गभूमौ ह्यागतां नटभार्यां योयो नटः पृच्छति कस्य भार्याऽसि सुश्रोणि, सा तंतं प्रति तवैवेति वदतीति प्रसिद्धम् । अयम् 'अजादेर्द्वितीयस्य' (पा० ६।१।२३) इतिसूत्रमहाभाष्येऽभिहितः । तद्यथा– 'व्यञ्जनानि पुनः नटभार्यावद्भवन्तीति । यथा नटानां स्त्रियो रङ्गगता योयः पृच्छति कस्य यूयं कस्य यूयमिति तंतं तवतवेत्याहुः, एवं व्यञ्जनान्यपि यस्ययस्याऽचः कार्यमुच्यते तंतं भजन्ते' इति । **साहस्री.** ३७०.

⧗ **नड्वलोदकं पादरोगः इति न्यायः ।** पादरोगनिमित्तमिति गम्यते । **साहस्री.** १९५.

⧗ **नदीक्षिताधिकरणम् ।** ज्योतिष्टोमे 'दीक्षितो न ददाति' इत्यादिवाक्यं पुरुषार्थदानादेः प्रतिषेधकं पर्युदासो वा ॥

दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात् । १०।८।७।१२ ॥

भाष्यम्— ज्योतिष्टोमे श्रूयते 'दीक्षितो न ददाति, न जुहोति, न पचति' इति । अत्रैषोऽर्थः सांशयिकः किं सर्वदानहोमपाकानां प्रतिषेधः, उत अक्रतुयुक्तानाम्, अथवा क्रतुयुक्तानामपि चोदकप्राप्तानां प्रतिषेधः अथवा पर्युदास इति । किं प्राप्तम् ? सर्वदानहोमपाकानां प्रतिषेधः । कुतः ? अविशेषात् । नास्ति विशेषवचनः शब्दः । तस्मात् सर्वेषां प्रतिषेध इति ।

अक्रतुयुक्तानां वा धर्मः स्यात्, क्रतोः प्रत्यक्षशिष्टत्वात् । १३ ॥

भाष्यम्— वाशब्दः पक्षं व्यावर्तयति । न सर्वेषां प्रतिषेधः । केषां तर्हि ? अक्रतुयुक्तानां धर्मः स्यात् । कुतः ? क्रतोः प्रत्यक्षशिष्टत्वात् । प्रत्यक्षं हि क्रतौ दानादीनां शासनमस्ति । तस्मात् प्रत्यक्षं वर्जयित्वा प्रतिषेधः स्यात् ।

तस्य वाऽप्यानुमानिकमविशेषात् । १४ ॥

भाष्यम्— अपिवा तस्य क्रतोर्यदानुमानिकं चोदकप्राप्तम्, तत् प्रतिषिध्यते । आनुमानिकं हि तत् न प्रत्यक्षम् । प्रत्यक्षश्रुतश्च प्रतिषेधः ।

अपितु वाक्यशेषत्वादितरपर्युदासः स्यात्, प्रतिषेधे विकल्पः स्यात् । १५ ॥

भाष्यम्— (अपि–) तुशब्दोऽवधारणायाम् । वाक्यशेषः स्यात् प्रतिषेधः । उक्तानामविशेषेण दानादीनां ज्यौतिष्टोमिकपर्युदासेन प्रतिषेधो वाक्यशेषः स्यात् । 'अहरहर्दद्यात्' इत्यस्य शेषः 'न दीक्षितः' इति । एवं होमपाकवाक्ययोरपि । असति पर्युदासे, प्रतिषेधे विकल्पः स्यात् । स चान्याय्यः इत्युक्तम् । तस्मात् पर्युदास इति ।

शा— सूत्रभाष्यकाराभ्यां पर्युदासत्वमुक्तम् । वस्तुतस्तु लक्षणापरिहाराय पर्युदासपक्षं परित्यज्य श्रुत्यर्थतृष्णया प्रतिषेधत्वमेव अङ्गीकृत्य क्रत्वर्थप्रतिषेधे विकल्पप्रसङ्गात् पुरुषार्थानामेव (दानपाकहोमानाम्) प्रतिषेधः क्रत्वङ्गतया विधीयते इत्येतदेव समञ्जसम् ।

सोम— पूर्ववत् विकल्पः इत्युत्थितेः **संगतिः** । **प्राभाकरैस्तु** पुरुषार्थानामपि न प्रतिषेधः विकल्पप्रसङ्गात् किन्तु पर्युदासः इति सिद्धान्तितम् ।

वि— 'दीक्षितो न ददातीति प्राप्तं सर्वं निषिध्यते । अतिदिष्टे पुमर्थे वा पुमर्थे वो, (वा उ) क्तितोऽग्रिमः ॥ उपदेशार्थवत्त्वाय मध्यमो, ऽन्त्यस्तु संनिधेः । एकवाक्यत्वलोभश्चेत् पुमर्थे पर्युदस्यताम् ॥'

भाट्ट— ज्योतिष्टोमे 'दीक्षितो न ददाति न जुहोति न पचति' इत्यादि श्रुतम् । तत्र किमयं सर्वेषामेव पुरुषार्थानां क्रत्वर्थानां चोपदिष्टानामतिदिष्टानां च होमादीनां प्रतिषेधः पर्युदासो वा, उतोपदिष्टवर्जं सर्वेषाम्, उत पुरुषार्थानामेव अग्निहोत्रहोमादीनाम् । इति **चिन्तायाम्**, अविशेषात् सर्वेषामेवेति प्राप्तौ विकल्पप्रसङ्गात् आहत्यविहितानां ग्रहादिहोमानां प्रतिषेधपर्युदासयोः अनुपपत्तेः तद्वर्जं सर्वेषामेव पर्युदासः, प्रतिषेधे विकल्पापत्तेः । **इति प्राप्ते**, ज्योतिष्टोमस्य अपूर्वत्वेन तत्रातिदेशिकहोमानामभावात्, तदङ्गभूतेष्टिपशुसंबन्ध्यातिदेशिकानां च 'न सोमे' इतिवत् प्रतिषेधपर्युदासानुपपत्तेः, कथञ्चित् उपपत्तावपि वा प्रतिषेधविकल्पापत्तेः, पर्युदासाङ्गीकारे च लक्षणाप्रसङ्गात् पुरुषार्थानामेव अग्निहोत्रादीनां प्रतिषेधः । न च तदाऽपि विकल्पापत्तिः, पुरुषार्थत्वेन प्राप्तानां क्रत्वर्थत्वेन प्रतिषेधात्, भिन्नविषयत्वेन विकल्पानापत्तेः । यत्र हि एकार्थावेव विधिप्रतिषेधौ यथा 'न तौ पशौ करोति' इत्यादौ, तत्र विकल्पः । यत्र तु पुरुषार्थो विधिः क्रत्वर्थो निषेधः, यथा स्त्रीगमनमांसभक्षणादेः पुरुषार्थः स्मार्तो विधिः, क्रत्वर्थश्च श्रौतः प्रतिषेधः, न च तत्र विकल्पः । तद्वत् प्रकृतेऽपीति **पार्थसारथिः** । प्रकरणान्तराधिकरणादौ वार्तिकस्वरसोऽप्येवम् । वस्तुतस्तु– सामान्यतः पुरुषार्थतया प्रसक्तस्यापि दीक्षितपुरस्कारेण क्रत्वर्थतया प्रतिषेधोऽपि तेन रूपेण यदि नैव प्राप्तिः, तदा प्रतियोगिप्रसिद्ध्यभावादेव न प्रतिषेधः । यदि तु तदर्थं प्राप्त्यङ्गीकारः, तदा तस्याः शास्त्रीयत्वावश्यम्भावात् 'न तौ पशौ करोति' इत्यादिवत् विकल्पो दुरुद्धर एव । न च मांसभक्षणादिप्रतिषेधतुल्यत्वम्, मांसभक्षणे तावत् यत्र क्रत्वर्थेडाभक्षणादौ विधिः, तत्र विहिते निषेधाप्रवृत्तेर्नैव निषेधः, तस्य रागप्राप्तमांसभक्षणविषयत्वेनापि उपपत्तेः । यस्तु श्राद्धे 'देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्' इत्यादौ च मांसभक्षणविधिः, सोऽभ्यनुज्ञाविधिमात्रम्, न तु अत्र मांसभक्षणस्य वस्तुतो वैधता । श्राद्धेऽपि दातुरभ्युदयः । भोक्तुस्तु ग्रहणश्राद्धभोजनवत् रागत एव प्रवृत्तिः । अतः क्वापि विहितमांसभक्षणप्रतिषेधाभावात् न तत्र विकल्पप्रसक्तिः । स्त्रीगमने तु **यद्यपि** 'ऋतौ भार्यामुपेयात्' इत्यत्र कालविशिष्टभार्यागमनस्यैव विधिः, न तु रागप्राप्तभार्यागमनानुवादेन कालमात्रविधिः, 'ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति' इति अगमने निन्दाश्रवणात्, **तथापि** गुणभूतकालानुरोधेन प्रधानभूतगमनावृत्तेः अन्याय्यत्वात् षोडशदिनात्मकऋतुकालमध्ये सकृदेकस्मिन् कस्मिंश्चिद्दिने त्रिषु वा दिनेषु गमनविधानेऽपि ऋतुदिनीयप्रवृत्तेः ऐच्छिकत्वात्, तस्याः क्रत्वर्थनिषेधेन निषेधेऽपि न विकल्पप्रसक्तिः । अत एव दैवादिना पञ्चदशदिनपर्यन्तमगमने षोडशेऽहनि

क्रतुप्रसक्तौ पुरुषार्थत्वात् गमनमेव क्रत्वर्थनिषेधोल्लङ्घनेनापि कार्यमिति **धर्मशास्त्रविदः** । सर्वथा यत्किञ्चिद्वैधनिषेधे विकल्प एवेति, प्रकृतेऽपि विकल्पप्रसङ्गो दुरुद्धरः ।

किञ्च, एवं यावज्जीववाक्येन दीक्षितस्यापि अग्निहोत्राकरणे प्रत्यवायबोधनात् क्रतुमध्ये तेनाकरणेऽपि प्रत्यवायपरिहारार्थं प्रायश्चित्तप्रतिहोमयोरापत्तिः । **एतेन** वैधक्रियानिषेधविकल्पः न तु तत्कारकनिषेधेऽपि । अत एव 'रात्रौ श्राद्धं न कुर्वीत' इत्यादौ श्राद्धानुवादेन रात्रिरूपाधिकरणनिषेधेऽपि न विकल्पः । अतः प्रकृतेऽपि अग्निहोत्राद्यनुवादेन दीक्षितकर्तृनिषेधः क्रत्वर्थतया विधीयते इति कारकनिषेधान्न विकल्प इति केषांचिदुक्तं **अपास्तम्** । एवमपि दीक्षितस्य प्रतिहोमाद्यापत्तेरनिवारणात् । **किञ्च**, कारकस्यापि दीक्षितादेर्नेच्छातः प्राप्तिः, अपि तु वैधी । अतस्तत्रापि विकल्पापत्तिरनिवार्यैव । अत एव यत्र कारकस्य कालादेराक्षेपतो यस्यकस्यचिदनियता प्राप्तिः, तत्र रात्रिविषये प्रवृत्तेः ऐच्छिकत्वात् तन्निषेधेऽपि न विकल्प इत्युक्तं तृतीये । यत्र तु कारकस्यापि दीक्षितादेः अदीक्षितसाधारण्येन समुच्चयेनैव वा यावज्जीवादिवाक्यतः प्राप्तिः, तत्र तत्प्राप्तेर्वैधत्वावश्यम्भावात् क्रत्वर्थे पुरुषार्थे एव वा तन्निषेधे विकल्पो दुष्परिहार एव । यदि चैतं नेष्यते, तदा वरणानुवादेन होतृरूपस्य कर्मकारकस्यैव निषेधात् तत्रापि विकल्पानापत्तिः । **किञ्च**, एवं नञर्थस्य न तावन्मुख्यविशेष्यता, आख्यातार्थमुख्यविशेष्यकत्वस्यैव सिद्धान्तात् । नापि दीक्षितादौ प्रतियोगितासंसर्गेणान्वयः, तस्य आख्यातातिरिक्तान्वये पर्युदासत्वापत्तेः । नापि दीक्षितप्रतियोगिकाभावस्य विषयतया कृतावन्वयः, अभावस्य कृतिविषयत्वानुपपत्तेः । अत एवमादिस्थले सर्वत्र दीक्षितकर्तृकाग्निहोत्रादिकृतिरेव अभावप्रतियोगिनी वाच्या । अतश्च विशिष्टक्रियानिषेधः एवायम्, फलतो विशेषणविषयत्वात्तु कारकनिषेधः इत्युच्यते । तत्र च कारकस्य नियतप्राप्तौ विकल्पः, अनियतप्राप्तौ तु ऐच्छिकत्वान्नेति विवेकः । अतः कथमपि प्रतिषेधे विकल्पस्य परिहर्तुमशक्यत्वात् सूत्रभाष्यन्यायसुधाकाराद्यभिप्रेतः पर्युदास एवायम् । स च दूरस्थैरपि अग्निहोत्रादिविधिभिर्वाक्यैकवाक्यतामभ्युपगम्य 'न दीक्षितोऽग्निहोत्रं जुहोति' इत्येवंरूपः । न तु संनिहितैरपि इष्टिपशुप्रकृतिवच्छब्दैः एकवाक्यतामङ्गीकृत्य होमादिवर्जं प्रकृतिवत् इत्येवंरूपः । तथात्वे होमत्वस्य भेदप्रतियोगिताऽवच्छेदकस्य औपदेशिकहोमसाधारण्येन तेषामपि पर्युदासे विकल्पस्य अनिवार्यत्वात् । आतिदेशिकहोमत्वे लक्षणाऽऽपत्तेः । **अस्मन्मते** तु होमत्वसामानाधिकरण्येन दीक्षितभिन्नकर्तृकत्वे विहिते, दीक्षितमात्रपुरस्कारेण होमाः प्रामाणिकाः तद्भिन्नहोममादाय तत् (निषेधवाक्यं) पर्यवस्यति, इति न लक्षणा । **न च** मन्मतेऽपि 'घटभिन्नं गृहस्थमानय' इत्यादौ घटस्य गृहस्थत्वप्रतीतिवत् होमवर्जं प्रकृतिवत् कुर्यादित्युक्ते प्राकृतहोमत्वस्यैव प्रतियोगिताऽवच्छेदकत्वप्रतीतेर्न लक्षणा इति वाच्यम्, तथापि दीक्षितपदश्रवणेन दीक्षितकर्तृकप्राकृतहोमत्वस्यैव प्रतियोगितावच्छेदकत्वापत्तेः, तादृशस्य चाप्रसिद्धतया निरुक्तपर्युदासानुपपत्तेः । न च दीक्षितकर्तृकत्वस्य प्रतियोगिताऽवच्छेदककोटिप्रवेशानङ्गीकारात् प्राकृतहोमत्वस्यैव तदङ्गीकारेण प्राकृतहोमभिन्नोद्देशेन दीक्षितकर्तृविधिः प्राकृतहोमादिषु तत्परिसंख्याफलको न विरुध्यते इति **वाच्यम्** । तथात्वे प्राकृतहोमादिभिन्नपदार्थेषु प्रयोजककर्तृतया दीक्षितप्राप्तावपि अध्वर्य्वादिबाधेन साक्षात् कर्तृत्वेन प्रतिप्रसवविधेरेवापत्तेः । प्राकृतहोमेषु च आध्वर्यवादीनामेव कर्तृत्वसिद्ध्यर्थं पर्युदासोपपत्तेर्न होमपरिसंख्यापत्तिः । न चेष्टापत्तिः । तथात्वे 'एतया पुनराधेयसंमितया इष्ट्या इष्ट्वा अग्निहोत्रं जुहोति' इति विधौ प्रकरणान्तरन्यायेन कर्मान्तरत्वापत्त्या कालविशिष्टकर्मान्तरविधाने गौरवापत्तेः । अतो विकल्पभिया निषेधे निवृत्ते पुरुषार्थाग्निहोत्राद्यनुवादेन अदीक्षिताधिकारकत्वस्यैव विधानरूपः पर्युदासः । तदा च पर्युदसनीयत्वेनोपस्थितत्वात् अग्निहोत्रस्य प्रकरणान्तरन्यायासंभवेन कर्मान्तरत्वानुपपत्तेः, तस्यैव अवभृथोत्तरं करणप्रसक्तौ अवध्यन्तरमात्रविधाने लाघवम् । अत एव अग्निहोत्राद्यङ्गकर्तृविधिः ज्योतिष्टोमप्रकरणे एतत्प्रयोजनक एव । अत एव दीक्षादशायां अग्निहोत्रहोमस्य न प्रतिहोमः इत्युक्तम् ।

मण्डन — ‘ पर्युदासेऽन्यता भवेत् । ’

शंकर–– ‘ दीक्षिते पर्युदासाः स्यु । ’ ८. ‘ निषेधा इति केचन । ’ ९.

❋ **नदीक्षिताधिकरणम् ।** (१०।८।७।१२–१५)। यदि च ‘ विकल्पप्रसक्त्यभावेऽपि प्रदेशान्तरस्थवाक्यशेषभावेन तदन्वयादपि विकल्पः पापीयान् ’ इति न्यायव्युत्पादनार्थे नदीक्षिताधिकरणं स्यात् तदा ... । **परिमल.** ३।३।१५।२६ ब्रसू.

⌛ **नद्यम्बुवेगन्यायः ।** अयं श्रीमद्भगवद्गीतायां विवृतः । तथाहि, ‘यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति । तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ ’ इति । **साहस्री.** ९२४.

❋ **नदीतरणार्थो** मन्त्रः ‘ देवीरापः० ’ इति । यदा अनेकस्रोतसं नदीं तरति, तदा मन्त्रस्य नावृत्तिः, किन्तु आदौ एव सकृन्मन्त्रः । ज्योतिष्टोमे । **के.** ११।४।१७।५०.

❋ **नदीसमुद्रदृष्टान्तेन** जीवभावनिवृत्तिपूर्वकशिवप्राप्तेरेव स्पष्टमुपदिष्टत्वात् । **श्रीकर**. ३।२।३१ ब्रसू.

⌛ **नदीसमुद्रन्यायः ।** अयं भगी. ८।८ श्लोकटीकायां नीलकण्ठेनोदाहृतः । तथाहि, अहमेव भगवान् सर्वात्मा वासुदेव इति सततमाचार्योपदेशं अनुध्यायन् तमेव नदीसमुद्रन्यायेन याति । हे पार्थ, तथा च श्रुतिः ‘यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान् पुण्यपापे विधूय परात्परं पुरुषमुपैति दिव्यम् ॥ ’ इत्युक्तम् । **साहस्री.** ९१६. ❋ नदीसमुद्रन्यायः । यथा नदी समुद्रश्च भिन्नौ, तथा जीवेश्वरौ भिन्नौ । **साहस्री.** ८१८. ❋ **नदीसमुद्रन्यायेन** पुरुषे कला विलीयन्ते । **न्यायनि.** ४।२।८ ब्रसू. ❋ अमूर्तशिवज्ञाननिष्ठानां इहैव शरीरे शिवज्ञानसामर्थ्येन पाशरूपाविद्यापटलं छित्त्वा **नदीसमुद्रवदविभागेन** शिवसायुज्यमुक्तिर्लभ्यते । **श्रीकर.** ४।२।१६ ब्रसू., ❋ आराधकाराध्यजीवब्रह्मणोर्नदीसमुद्रवत् परस्परस्वाभाविकभेदसत्त्वेऽपि मोक्षदशायां प्राप्यप्रापकत्वेन भेदाभेदव्यपदेशात् तदेव युक्तम् । ३।२।२६ ब्रसू., ❋ संसारदशायां नदीसमुद्रवत् स्वाभाविकजीवभावनिवृत्तिपूर्वकपरतत्त्वप्राप्तिः । ४।४।१३ ब्रसू.

⌛ **ननु वक्तृविशेषनिस्पृहा गुणगृह्या वचने विपश्चितः इति न्यायः ।** इति भारविः २।५ । **साहस्री.** ९६३.

❋ **नन्दान्तं क्षत्रियकुलं** इत्यादिः पौराणव्यवहारः । **मणि.** पृ. ४७.

❋ **नपुंसकं** स्त्री पुमान् इति द्रव्यविशेषा ह्येते । **भा.** ३।१।६।१२ पृ. ६८१. ❋ सर्वविकारानुवृत्तसत्त्वरजस्तमोगुणानुगतगुणत्वसामान्यं स्थितिशब्दितं **नपुंसकलिङ्गं** इति शाब्दिकमर्यादा । **पराक्रमः.** ६०।२.

❋ **नयनस्य** एकहायन्याः अक्षाभ्यञ्जनादि न प्रयोजकं ज्योतिष्टोमे । **के.** ४।१।१०।२५.

⌛ ‘ स्वमपीतो भवति ’ इति हि स्वरूपसंबन्धमेनमामनन्ति । स्वरूपसंबन्धस्य च अनपायित्वात् **नरनगरन्यायेन** संबन्धो घटते । **शांभा.** ३।२।२५ ब्रसू.

❋ **नरकपरिहारार्थोऽयं** प्रतिषेधः ‘यो ब्राह्मणायागुरेत्० ’ इत्यादिः । स च पुरुषगत एव नरकपातः संकीर्तितः, न तु क्रतुगतः । **वा.** ३।४।६।१७.

❋ **नरकप्राप्तिः** अनृतवदनात् भवति । ‘नानृतं वदेत्’ इत्यनेन प्रतिषेधात् । **वा.** ३।४।४।१३ पृ. ९११.

❋ **नरसिंहवत्** । ‘ अथवा नैव भिद्येते यागहोमौ परस्परम् । पूर्वापरौ हि सदृशौ तद्भागौ नरसिंहवत् ॥ ’ **वा.** ३।४।१४।४१ पृ. ९८३ । नरसिंहाख्यस्य एकस्यार्थस्य पूर्वापरौ भागौ मनुष्यपञ्चाननाभ्यां सदृशौ भेदभ्रान्तिं कुरुतः । **सु.** पृ. १५३७.

❋ ‘ **नर्मदोत्तरभागे तु** कर्तव्यं सिंहयुक्तके । कुलीरे संस्थिते भानावुपकुर्यात्तु दक्षिणे ॥ ’ बृहस्पतिः । इयं देशतः वाचनिकी व्यवस्था स्मार्ती । **बाल.** पृ. १८.

❋ **नलस्य** दमयन्ती (पत्नी) । **वा.** ३।४।१।९ पृ. ८९५.

❋ ‘**नव** त्रिवृन्त्यहानि भवन्ति ’ इति । अत्र चोदकप्राप्तानां द्वादशाहिकानां नानाऽह्नां त्रिवृत्ता विधीयते, न तु प्रथमस्य त्रिवृतोऽह्नोऽभ्यासः । **भा.** ८।३।२।३–५.

❋ **नवान्नप्रथमप्राशनप्रागभावविशिष्टवसन्तादिकाल**–जीवित्वस्यैव आग्रयणाधिकारिताऽवच्छेदकत्वेन बुभुक्षादेः

तद्घटकत्वे मानाभावात् इष्टिपरिमितनवान्नलाभेऽपि अप्रतिहतोऽधिकारः । **संकर्ष.** ३।१।१४.

⌛ **नववैधव्यमसह्यवेदनमिति न्यायः** । असह्या दुःसहा वेदना यस्मिन् तत्तथोक्तम् । विधवाया मृतभर्तृकाया भावो वैधव्यम् । नवं च तद्वैधव्यं चेति नववैधव्यम् । नवग्रहणं दुःसहत्वद्योतनार्थम् । अन्यत् स्पष्टमिति । **साहस्री.** ९५१.

* ‘**नवनीतमाज्यं** भवति’ इति प्राकृतं कार्यं लक्ष्यते प्रकृतिलिङ्गेन द्रव्यशब्देन । **भा.** १२।३।२।८. * नवनीतं ज्योतिष्टोमे दीक्षार्थाभ्यङ्गे । तत्स्तुतये च ‘घृतं देवानाम्, मस्तु पितृणाम्, निष्पक्वं मनुष्याणाम्’ इत्यनुवादः । **वि.** ३।४।७. * **नवनीतेन** अभ्यञ्जनं दीक्षाकालं सुखप्रचाराय स्नेहनार्थम् । **भा.** १०।४।६।१२, * नवनीतेन । यथा ‘नावनीतेन भङ्क्ते’ इति अचिरनिर्दग्धेनेति गम्यते । (सर्वघृतानां च नवनीतविकारत्वात् पुनःश्रुतेः अचिरनिर्दग्धनवनीतार्थता स्यात् । **वा.**) । १।४।९।१२ पृ. ३४५.

* **नवनीताभ्यञ्जनस्य** प्राकृतस्य अञ्जनाभ्यञ्जनाख्यसत्रोपदिष्टगौग्गुलवाभ्यञ्जनादिना समुच्चयः । **भा.** १०।४।६।१०–१२.

* **नवमे अध्याये** ऊहलक्षणं वर्तयिष्यामः । त्रिविधश्चोहः मन्त्रसामसंस्कारविषयः, स इह प्राधान्येन वक्ष्यते । अन्यदपि किञ्चित् उपोद्घातेन प्रसङ्गेन च । (उपकारातिदेशे सति ऊहोऽवकल्पते । शास्त्रातिदेशे सति ऊहाभावः) । **भा.** ९।१।१।१ पृ. १६३५ । ‘ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः । नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः ॥’ नवमाध्यायस्य **प्रथमे पादे** उपोद्घातपूर्वकमूहविचारारम्भः । तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः । अवघातमन्त्रादिषु अविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरुपोद्घातः । सवित्रश्विपूषशब्दानां विकृतिषु नास्त्यूहः । अग्निशब्दस्य अस्त्यूहः, इत्यादिकः ऊहविचारारम्भः । **द्वितीये** सपरिकरः सामोहः । **तृतीये** मन्त्रोहः । **चतुर्थे** मन्त्रोहप्रसङ्गापतितो विचारः । **वि.** प्रस्तावना श्लो. २१. * नवमे अध्याये प्रथमेऽधिकरणे ‘संनिपत्योपकारका ये धर्माः तेऽपि अपूर्वार्था इति प्रतिपाद्यते ऊहसिद्धये’ । **वा.** ९।१।१।१ पृ. १६३८. * नवमे (९।४।११) अभ्युदयेष्टौ (पशुकामेष्टौ) इज्यार्थत्वेन श्रपणानङ्गभूतयोरपि दधिपयसोः प्रणीतास्थानापत्त्या प्रणीताधर्मप्राप्तिः स्थापिता । **बाल.** पृ. १६९.

* **नवमाधिकरणपूर्वपक्षन्यायेन** मन्द्रादेः यज्ञभागधर्मता अवसीयते । **सु.** पृ. ११८२.

* **नवमाद्यन्यायेन** धर्मस्य कार्यप्रयुक्तत्वात् । **सु.** पृ. १३७९, * नवमाद्यन्यायेन मन्त्राणामपि अपूर्वगुणत्वावगतेः । पृ. १२५६. * नवमाद्यन्यायेन (व्रीहीन् प्रोक्षति इति) व्रीहिस्वरूपे आनर्थक्यापत्तेः अपूर्वसाधनत्वलक्षणाया आवश्यकत्वात् । **कौ.** ३।१।४।८ पृ. १४४. * पात्रप्रोक्षणविधिनैव उलूखलमुसलयोरपि प्रोक्षणं प्राप्तम्, तत्तु पूर्वाधिकरणन्यायेनैव **नवमाद्येन** उलूखलमुसलनिष्ठापूर्वसाधनत्वप्रयुक्तम् । **भाट्ट.** ९।१।२.

* **नवरात्रे** चयनाग्निः कर्तुं शक्यते । **भा.** १०।८।११।२३.

* **नशब्दः** प्रथमेऽधिकरणे (१०।८।१) पर्युदासार्थः (महापितृयज्ञे ‘न होतारं वृणीते नार्षेयम्’ ‘नानुयाजेषु’ इत्यत्र) । द्वितीये तु अर्थवादार्थः (‘न तौ–आज्यभागौ–पशौ करोति न सोमे’ इत्यत्र) । अथ किंलक्षणः प्रतिषेधः इति । (तृतीये अधिकरणे नशब्दः ‘नातिरात्रे षोडशिनं गृह्णाति’ इत्यत्र प्रतिषेधार्थः) । **भा.** १०।८।३।६, * नित्यो हि अस्य ‘नशब्दस्य’ सुबन्तसंबन्धेन समासः इति वार्तिककारो भगवान् कात्यायनो मन्यते स्म । ‘वावचनानर्थक्यं च स्वभावसिद्धत्वात्’ इति । नेति भगवान् पाणिनिः । स हि ‘विभाषा’ इति प्रकृत्य ईदृशं समासमुक्तवान् । सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम्, असद्वादित्वान्न कात्यायनस्य । १०।८।१।४ पृ. २०६१.

* ‘**नश्यति**’ इत्यत्र दर्शनाभावरूपफलमेव वाच्यम् । **मणि.** पृ. १०२.

⌛ **नष्टाश्वदग्धरथन्यायः** । यथा द्वौ रथिनौ कश्चित् ग्रामं प्रविश्य रथाभ्यामवतीर्य अश्वांश्च ताभ्यां मोचयित्वा स्वाभीष्टखट्वादौ निविष्टौ । ततो दैवेन अग्निना

दंदह्यमाने ग्रामे तयोरेकः पश्चादश्वान् निःसारयिष्यामीति धिया रथमादौ निःसारितवान्। परस्तु अश्वान्। तावता तस्मिन् स्थले दग्धे एकस्य अश्वा नष्टाः द्वितीयस्य रथो दग्धः। तौ च यथा अन्योन्याकाङ्क्षया हि एकं रथं कृत्वा स्वेष्टदेशं प्रापतुः, तथा अर्थवादविधिवाक्ये च इतरेतराकाङ्क्षया एकवाक्यतां प्राप्य प्रवृत्त्यादि जनयतः इति संक्षेपः। 'स्थानेऽन्तरतमः' (पा० १।१।५०) इतिसूत्रमहाभाष्येऽप्युक्तोऽयं न्यायः। तद्यथा—'संप्रयोगो वा नष्टाश्वदग्धरथवत्। अथवा नष्टाश्वदग्धरथवत् सह संप्रयोगो भवति। तद्यथा— तव अश्वो नष्टो ममापि रथो दग्धः उभौ संप्रयुज्यावहै' इति। **साहस्री.** १५५.

* **नष्टाश्वदग्धरथवत्** (दर्शपूर्णमासयोः प्रयाजादीनां च) परस्परनियमः सिद्धः। **वा.** ३।३।४।११. * 'नष्टाश्वदग्धरथवत् संबन्धः' इति **शा.**। यस्य रथिनो रथोऽस्ति अश्वा नष्टाः, यस्य चाश्वाः सन्ति रथो दग्धः, तयोरुभयोरपि यथा परस्परापेक्षया संबन्धः, एवं इरापदस्य गिरापदगीतेश्च संबन्धः सिद्धः इति। **सोम.** ९।१।१७. * उक्तयोः 'सोऽरोदीत्' इति च 'बर्हिषि रजतं न देयम्' इति च पदसंदर्भयोः लक्ष्यमाणनिन्दाद्वारेण **नष्टाश्वदग्धरथवत्** परस्परं समन्वयः। **भामती.** १।१।८ पृ. १०८. * गिरापदे पदान्तरोपदेशान्निवृत्ते यस्तद्गतो गीत्यंशः स गेयमपेक्षते, इरापदमपि सामसाध्ये स्तवे सामसंस्कार्यतामन्तरेण साधनीभवितुमशक्तं संस्कारकं सामांशमपेक्षते तयोः नष्टाश्वदग्धरथवत् संबन्धः। **शा.** ९।१।१७. * तस्मात्तदाकाङ्क्षायामुपनिपतितान्येतानि वाक्यानि स्वकार्यापेक्षाणि तदपेक्षितकरणोपकारलक्षणं कार्यमासाद्य निवृण्वन्ति च निर्वारयन्ति च प्रधानम्, सोऽयमनयोः नष्टाश्वदग्धरथवत्संयोगः। **भामती.** ३।३।१४।२५. * ननु ग्रहणार्थाया अपि देवताया यागापेक्षा वर्तते, यागादन्यत्र देवताया असंभवात्। 'सोमेन यजेत' इति यागस्यापि देवतापेक्षा विद्यते। तयोश्च नष्टाश्वदग्धरथवत् परस्परसंबन्धावश्यम्भावात्। इत्यत आह। **सोम** ८।१।९. * सोयं नष्टाश्वदग्धरथवत् संप्रयोगः (विध्युद्देशार्थपादयोः)। **वा.** १।२।१।७ पृ. ११५.

* **नष्टरूपी** अनुष्टुप्। पादेषु अक्षराणि ९।१०।१३ उदा० 'वि पृच्छामि पाक्या' (ऋसं. १।१२०।४)। **के.**

⌛ **नसिप्रोतबलीवर्दन्यायः**। यथा बलीवर्दा वृषभा नसि नासिकायां त्रिवृत्कृततन्तुदामभिः प्रोताः स्यूता नासिकाछिद्रस्यूतह्रस्वदामभिराधारभूतायां दीर्घायां तन्त्यां बद्धा इति यावत्, स्वस्वामिनो व्रीह्यादिगोणीर्वहन्ति, तथा ब्राह्मणक्षत्रियवैश्यशूद्रब्रह्मचारिगृहस्थवानप्रस्थयतय इतिनामात्मकदामभिर्वाक्तन्त्या विधिनिषेधात्मकवेदलक्षणायां बद्धा वेदलक्षणा दीर्घरज्जुः ब्राह्मणक्षत्रियादिरूपो योनिसंबन्धः, इन्द्रियाणि बलीवर्दाः, भगवदिच्छा स्तम्भः। एवं सति स्ववर्णाश्रमविहितकर्मभिरीश्वरस्य बलिं यज्ञादिलक्षणपूजां कुर्वन्तीति भावः। उक्तं च श्रीमद्भागवतप्रथमस्कन्धत्रयोदशाध्यायैकचत्वारिंशपद्ये 'यथा गावो नसि प्रोतास्तन्त्यां बद्धाश्च दामभिः। वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः॥' इति। **साहस्री.** ५९२.

⌛ '**नसोमन्यायः**' (१०।८।२।५)। आज्यभागौ 'न तौ पशौ करोति, न सोमे'। 'इह तु आधारत्वेन सोमः श्रूयते न संबन्धिमात्रतया (वाजपेयस्य इतिवत्)। न च परंपरासंबन्धे अस्त्याधारत्वं इति साक्षादेवायं सोमसंबन्धः प्रतीयते, स चाप्राप्त इति। तस्मात् अर्थवादार्थं सोमग्रहणम्'। **टुप्.** १०।८।२।५ पृ. २०६२.

* **नहुषस्य** परदाराभियोगात् धर्मव्यतिक्रमः। **वा.** १।३।३।७ पृ. २०३। इन्द्रे ब्रह्महत्याभयादपक्रान्ते नहुषः स्ववीर्येण इन्द्रपदमधिष्ठाय तद्भार्यां शचीं अभिगन्तुं यत्नं चकार। **सु.** पृ. १८५। अत्रोच्यते। नहुषेण परस्त्रीप्रार्थनानिमित्तानन्तरकालाजगरत्वप्राप्त्यैव आत्मनो दुराचारत्वं प्रख्यापितम्। **वा.** पृ. २०८। व्यतिक्रमेऽपि धर्मबुद्ध्या क्रियमाणस्याचारस्य व्यतिक्रमाभावात् न दोषः। **सु.** पृ. १९१.

[**नागृहीतविशेषणान्यायस्य** अक्षरभेदेन नानारूपत्वेऽपि अर्थानुसारेण एकत्रैव सर्वेषां निवेशः कृतोऽस्माभिः। तेन वर्णानुक्रमे क्वचित् अन्यथात्वं जातम्। **के.**]

⧗ **नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामति इति न्यायः ।** जातिरेव शब्दार्थ इति मीमांसकमतम् । तथाहि, व्यक्तीनामानन्त्यादेकव्यक्तौ शक्तिग्रहे व्यक्त्यन्तराबोधाच्च न व्यक्तौ शक्तिसंभवः । जातिविशिष्टायां व्यक्तौ शक्तिरित्युक्तौ तु नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायात् आवश्यकत्वाच्च जातावेव शक्तिरस्तु व्यक्तिबोधस्तु आक्षेपादित्यन्यत्र विस्तरः । **साहस्री.** ४६१.

* नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते । **मञ्जूषा.** प्रातिपदिकार्थ. पृ. ११०. * सर्वत्र हि अगृहीतविशेषणा विशिष्टबुद्धिर्न दृष्टा, न तु अनभिहितविशेषणा । **वा.** १।४।१।२ पृ. ३२६. * नागृहीते विशेषणे विशिष्टबुद्धिरुदेति । **न्यायकुसुमाञ्जलिः.** स्तबकः ३ पृ. १०५. * नहि अगृहीतविशेषणा विशिष्टे बुद्धिः । नहि अप्रतीते विशेषणे विशिष्टं केचन प्रत्येतुमर्हन्ति । **भा.** १।३।९।३३ पृ. ३०४ । प्रतीते विशेषणे विशिष्टः प्रतीयते । पृ. ३१८ पं. ४ । नागृहीतविशेषणा इति न्यायात् । **वा.** पृ. ३०४. * विभक्तिर्हि लिङ्गसंख्याप्रातिपदिकार्थानां श्रुत्यैव क्रियार्थतामाह । क्रिया साध्या साधनं तत्परिच्छेदकानि च लिङ्गसंख्यादीनपेक्षते । अतः सर्वविशेषणविशिष्टा क्रियैव विधीयते । तत्र प्रत्ययः पूर्वं विशेषणे व्याप्रीयतेऽन्यथानुपपत्त्या, नहि अगृहीतविशेषणा विशिष्टे बुद्धिः इति । **वा.** ४।१।५।१५. * अरुणाशब्दोऽरुणिमानं गुणमाचष्टे गुणिविषयतया प्रयुज्यमानस्यापि 'नागृहीतविशेषणा विशिष्टे बुद्धिः' इति न्यायेन गुणबोधकत्वात् । **वि.** ३।१।६. * नागृहीतविशेषणा विशेष्ये बुद्धिः । अथ प्रतीतिरप्रतीताऽपि प्रतीत्यन्तरव्यवस्थापिका, तर्हि प्रथमप्रतीतिरपि अव्यवस्थिताऽपि अर्थव्यवस्थापिका भविष्यतीति 'नागृहीत०...बुद्धिः' इति वचः कथं न परिप्लवेत । 'प्रतीतोऽर्थ' इति विशेष्यप्रतिपत्तौ प्रतीतिविशेषणानवगमेऽपि विशेष्यप्रतिपत्त्यभ्युपगमात् । **संमतितर्क.** भागः १ पृ. ८४. * आकृत्यधिकरणव्युत्पाद्येन 'नागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते' इति न्यायेन केवलगुणवाचको लक्षणया द्रव्येऽपि प्रयुज्यते । **कु.** ३।१।६।१२ पृ. २५४. * गीतिविशिष्टायामृचि एषः (रथंतरादिः) शब्दो दृष्टः । न चागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते । तस्मात् विशेषणं तावदभिधीयते । विशेषणप्रत्ययाच्च सहचरिते विशिष्टे प्रत्ययः । **भा.** ७।२।१।१३. * नागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते इति **न्यायेन** जात्यभिधानावश्यम्भावे तत एव व्यक्तेः प्रतीतिसिद्धेः अभिधेयत्वासंभवात् । **कु.** १।३।११।३१. * यदि तस्यामेव ऋचि सत्यां गीतौ सामप्रयोगः असत्यां चाप्रयोगः तदा **नागृहीतविशेषणान्यायः** । इह तु गीतिवियोगे ऋगेव सा नास्ति । तस्मादृगन्यत्वात् नात्र नागृहीतविशेषणान्यायः । इति शङ्का । **सोम.** ७।२।१. * यत्र न किञ्चित् प्राधान्यनियामकम्, तत्रैव घटत्वादौ नागृहीतविशेषणान्यायः इत्यादि कौस्तुभे (३।१।६।१२) स्पष्टम् । **भाट्ट.** ३।४।८ पृ. ३२१. * संस्कारविशेषाणामनेकत्वात् न नागृहीतविशेषणान्यायः । तेन उभयविशिष्टे उभयोपलक्षिते वा काष्ठविशेषे एव शक्तिरित्यन्ये । **कौ.** * अग्निष्टोमादिशब्दानां (शताग्निष्टोमं शतोक्थ्यं इ.) **नागृहीतविशेषणान्यायेन** संस्थामात्रवाचित्वात् ज्योतिष्टोमे निरूढलक्षणाङ्गीकारेऽपि । **भाट्ट.** ८।३।४. * अथ भावनाऽन्यप्रवृत्तिपक्षे नागृहीतविशेषणान्यायेन प्रवृत्तेर्नियतं प्रत्याय्यत्वात् जातिवत् सैव लिङः शक्त्या अस्तु, न तु आज्ञाऽऽदिः अनियतो व्यापारः ... इति चेत् । **भाट्टालंकारः.** २९. * आकृत्यधिकरणव्युत्पादितेन 'नागृहीतविशेषणान्यायेन' आद्यप्रवर्तनापरपर्यायाद्यानुष्ठानात्मकाद्यप्रयोगस्यैव प्रथमशब्दमुख्यार्थतया (न प्रथमयज्ञे प्रवृञ्ज्यात्) प्रथमप्रयोगाङ्गमेव प्रतिषेधः इति युज्यते । **कु.** ३।३।१७।२८. * क्रियाशक्तिरूपत्वात् कारकस्य क्रियां विना भावनाऽशक्तेर्वाच्यत्वाभ्युपगमे क्रियाविशिष्टस्यैव वाच्यत्वप्रसङ्गात् नागृहीतविशेषणान्यायेन क्रियाया एव वाच्यत्वावगतेः क्रियया कारकाक्षेपोपपत्तिमाशङ्क्य । **सु.** पृ. १४३१. * गायत्र्यादिशब्दानां चतुर्विंशत्याद्यक्षरसंख्यामात्रवाचित्वान्नागृहीतविशेषणान्यायेन लक्षणयाऽपि ऋक्षु प्रयोगोपपत्तेः तत्रापि न शक्तिः । **भाट्ट.** ८।३।६. * यूपादिशब्दानां तु संस्कारमपहाय क्वचिदपि प्रयोगाभावात् अगत्या संस्कारनिमित्तताऽङ्गीकरणम् । तत्रापि नागृहीतविशेषणान्यायेन

दृष्टादृष्टसंस्काररूपविशेषणेष्वेव शक्तिः, न तु तद्विशिष्टकाष्ठे इति केचित् । **कौ.** * षोडशिशब्देन नागृहीतविशेषणान्यायेन संस्थावचनेनापि तद्विशिष्टक्रतोरुपस्थापनेन ... । **भाट्ट.** १०।५।९ * द्रव्यकारकपक्षेऽपि निर्व्यापारस्य कारकत्वायोगात् शक्तिरहितस्य च व्यापारायोगात् शक्तिविशिष्टस्यैव कारकतया अभ्युपगन्तव्यत्वेन कारकाभिधानपक्षे **नागृहीतविशेषणान्यायात्** शक्तिमात्राभिधानापत्तेः श्रौतं द्रव्यशब्दसामानाधिकरण्यं न युज्यते । **सु.** पृ. १४४०. * यद्यपि तत्तत्संख्याकज्योतिष्टोमेऽपि (ज्योतिष्टोमपदस्य) प्रचुरप्रयोगोऽस्त्येव, तथापि नागृहीतविशेषणान्यायात् प्रचुरतया प्रयोगाच्च संस्थायामेव शक्तिः । ज्योतिष्टोमे तु निरूढलक्षणा प्रचुरप्रयोगात् । क्रत्वन्तरे तु (अग्निष्टोमातिरिक्ते) सांप्रतिकी (लक्षणा) काचित्कप्रयोगात् । **कौ.** २।३।१०।२२ पृ. ७२. * व्यक्तिविशिष्टाकृतिमार्गोऽपि (प्रत्युक्तः) 'नागृहीतविशेषणा०' इति न्यायात् व्यक्तेः प्रथमग्रहणप्रसङ्गात् । **वा.** १।३।९।३३ पृ. ३०४. * **नागृहीतविशेषणान्यायस्य** ('यद्वैतदविशेषेण स्थितं क्रमवशादुभौ । प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययाविति ॥' वा. पृ. ९०२) क्रमवशोक्तिसूचितस्य, 'उभौ' इत्यादिसूचितस्य च ' प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोः प्रत्ययार्थः प्राधान्येन' इति स्मरणस्य आख्यातेषु अपवादाभावोक्त्यर्थत्वेन अविशेषः । **सु.** पृ. १३७१. * नागृहीतविशेषणान्यायस्य लोकवेदाधिकरणव्युत्पाद्यस्य 'रथंतरमुत्तरयोर्गायति' इत्यादौ प्रयोजनं समस्त्येव । **कौ.**, * नागृहीतविशेषणान्यायस्य विषयाविषयनिरूपणम्, सर्वत्र तावत् अनेकार्थबोधके पदे एकत्र शक्तिः, अन्यत्र आक्षेपः इति अनेकशक्तिकल्पनापरिहाराय अवश्यमभ्युपेतव्यम् । तत्रापि च गुरुभूतेऽपि प्रधाने शक्तिः, तेन च अप्रधानानामाक्षेपः इत्युत्सर्गः । यत्रोभयोरपि प्राधान्यम्, तत्र नागृहीतविशेषणान्यायः । दुर्बलस्यापि प्रधानस्य अभ्यर्हितत्वात् । यथैव आख्यातस्य भावशब्दवाच्यायां भावनायामेव शक्तिः कर्तुस्त्वाक्षेपः, तथैव कृत्तद्धितमतुबन्तादीनां नामसंज्ञत्वात् विभक्तिवाच्यसंख्यान्वययोग्यस्य सत्त्वपदाभिधेयस्य द्रव्यस्यैव प्राधान्यात् तद्वाच्यत्वावगतेः न कृत्यादौ विशेषणे शक्तिः । अत एव न तत्र नागृहीतविशेषणान्यायः । किन्तु यत्र जातिव्यक्त्योः गुणद्रव्ययोर्वा तृतीयाद्वितीयाऽऽदौ सत्त्वतावधारणात् उभयोः प्राधान्यं तत्रैव सः । ३।१।६।१२ पृ. १५९.

* **नागृहीतविशेषणान्यायबलेन** कर्तृकर्मविशिष्टसंख्याबोधकता हेतुत्वेन विवक्षिता । **सु.** पृ. १४३७.

⌛ **नागोष्ट्रन्यायः** । नागेन अजगरेण वेष्टितमुष्ट्रं रक्षन् कश्चित् बाणैरजगरं जघान इति लौकिकी गाथा । तथा निषेधवाक्यानि बाधावधित्वेन आत्मानं रक्षन्ति अनाम्नानं बाधन्ते । **संग्रहः**.

* **नागरिकभाषाभिज्ञतया** यः ग्रामीणौ मातापितरावपि शुक्तवचनैरभिदधीत, स केन अन्येन वार्येत ? (शुक्तवचनैः निष्ठुरवचनैः) । 'परत्राविनयं कुर्वन् पितृभ्यां वार्यते सुतः । तयोरेवाविनीतस्य को भवेद्विनिवारकः ॥' **वा.** १।३।८।२७ पृ. २८५.

* **नाडिका** (घटिका) आकाशावयवविशेषातिक्रमफलकसूर्यादिगतिक्षणप्रचयात्मकस्य नाडिकादेः मुहूर्तादिवदेव नैपुण्येन स्वतः परिच्छेत्तुमशक्यत्वात् षष्ठ्याः पानीयपलानां यत्र घटीपूरणफलकघटीछिद्रोर्ध्वगतिक्षणप्रचयात्मिका नाडिका । **सु.** पृ. ९७२, * नाडिका नभःषष्टितमभागातिलङ्घनफलः सूर्यादिगतिप्रचयः इति क्रियातिरिक्तकालाभाववादिनः । पृ. ९७०.

* **नादः** नाम (वायवीय–) संयोगविभागा नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जयन्तः नादशब्दवाच्याः । **भा.** १।१।६।१७.

* **'नादवृद्धिपरा'** (१।१।६।१७) इति पाठपक्षे शब्दस्य वृद्धिः या उक्ता सा नादवृद्धिः परं विषयो यस्यास्तादृशी नादवृद्धिपरा ज्ञेया इति । एतत्पाठे प्रमाणं तु **न्यायरत्नाकरे** 'सूत्रं नादवृद्धिपरा इति' इत्युपन्यासः, 'वृद्ध्यसंभवात् नादवृद्धीतिसूत्रेण' इति च २२८ श्लोके ।

'नादवृद्धिः परा' इति पाठे तु परा पूर्वपक्षिणा प्रकृतिविकृतिभावोक्त्यनन्तरं उक्ता शब्दवृद्धिः नादवृद्धिः स्यात् । नेयं वृद्धिः शब्दस्य किन्तु नादस्येत्यर्थः । अत्र पाठे प्रमाणं तु 'तेन नादस्यैषा वृद्धिः न शब्दस्य' इति भाष्यमेव । अस्मिन्नेव पाठे भाष्यमिदमुपपद्यते नान्यपाठे । **बृहत्यां** ऋजुविमलायां च एवं सूत्रोपन्यासो-

ऽपि प्रमाणम्, कुतूहलवृत्तौ सूत्रोपन्यासो व्याख्या च स्पष्टैवात्र । **के.**

⌛ **नानार्थत्वात् सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् । १२।१।३।८॥**

सोमे अग्निष्टोमे यानि दर्शपूर्णमासप्रकृतीनि कर्माणि महावेद्यां वर्तन्ते, तेषां वेदिकर्म पृथक् स्यात् । वेदिः भेदेन कर्तव्या नानार्थत्वात् नानाविधः अर्थः प्रयोजनं ययोः वेद्योः तादृशत्वात् । दार्शपूर्णमासिकी हविरासादनार्था, सौमिकी तु प्रचारार्था । तत्र प्रसङ्गो न संभवति । तस्मात् सोमे दार्शपौर्णमासिकी वेदिः पृथक् कार्या इति पूर्वः पक्षः ।

अकर्म वा कृतदूषा स्यात् । ९ ॥

सोमे दार्शिक्याः वेदेः अकर्म । अग्निष्टोमे दार्शिकी वेदिः ऐष्टिककर्मकरणार्थं पृथक् न कर्तव्या । वाशब्देन पूर्वपक्षस्य व्यावृत्तिः । दार्शिकी वेदी सोमे कृता सती कृतदूषा स्यात् । कृता दूषा दूषणं यया सा कृतदूषा । कृतया दार्शिक्या वेद्या सौमिक्या वेदेः दूषणं स्यात् । तस्मान्न कर्तव्या इति सिद्धान्तः । **के.**

* नानार्थत्वात् सोमे० । सोमाङ्गभूतमहावेद्यैव ऐष्टिकहविरासादनादिकार्यस्य पृथगनुष्ठेयस्यापि अनुनिष्पादनात् तदङ्गभूतदार्शपूर्णमासिकवेदिनिवृत्तिः द्वादशे वक्ष्यते । कौ. २।१।५।१२ पृ. ८४.

⌛ **नानाऽहीनेषु प्रत्यहीनं चतुर्थे दिवसे षोडशिनो ग्रहणम् ॥**

चतुर्थेचतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत् । १०।५।१४।५५॥

भाष्यम्-- षोडशिनं प्रकृत्य आमनन्ति, 'चतुर्थेचतुर्थेऽहन्यहीनस्य गृह्यते' इति । अत्रैषोऽर्थः सांशयिकः किमेकस्मिन्नहीने चतुर्थे दिवसे षोडशी अभ्यसितव्यः, उतैकस्मादहीनादहीनान्तरे चतुर्थेऽहनि गृह्यते इत्येवमभ्यसितव्य इति । किं प्राप्तम् ? एकस्मिन्नभ्यसितव्य इति । कुतः ? अहीनस्यैकस्येत्युच्यते । नानाऽहीनेषु चेत् इष्यते, सा लक्षणा भवति । अस्मिन् पक्षे श्रुतिः । अपिच वीप्साऽऽनर्थक्यं नानाऽहीनेषु चेत् स्यात् । चतुर्थेऽहन्यहीनस्य एतावतैव तत् सिध्यति । एकस्मिंस्तु वीप्सा अर्थवती भवति । तस्मादेकस्मिन्नहीने अभ्यसितव्यः । भोजनवत् । यथा चतुर्थेचतुर्थेऽहनि देवदत्तो भुङ्क्ते इति चतुर्थे भुक्त्वा ततश्चतुर्थे गम्यते एकस्मिन् पक्षे इति । एवमिहापि द्रष्टव्यम् । तस्मादेकस्मिन्नहीने इति ।

अपिवा संख्यावत्त्वान्नानाऽहीनेषु गृह्यते पक्षवदेकस्मिन् संख्याऽर्थभावात् । ५६ ॥

भाष्यम्— नानाऽहीनेषु वा चतुर्थेऽहनि गृह्यते, एवं संख्यावद्ग्रहणं भवति, चतुर्थेऽहनि, इति । एकस्मिन्नहीने एकं चतुर्थमहः, अन्यदष्टमं भवति । यदुक्तं श्रुतिशब्दो भविष्यतीति, अहीने इति । भवति सा हि श्रुतिः । न च तया श्रुत्या किंचित् सिध्यति, चतुर्थस्याभावात् । असत्पक्षे लक्षणा, तया तु सिध्यति । अपिच, न लक्षणा । सामान्याभिप्रायमेकवचनम् । यदुक्तं वीप्साऽनर्थक्यमिति । न आनर्थक्यमापततीत्यशब्दार्थः कल्पनीयः । तस्मान्नानाऽहीनेषु ग्रहीतव्यः इति । पक्षवत् । यथा पञ्चम्यांपञ्चम्यां भुङ्क्ते इति पक्षान्तरं गम्यते । एवमिहापि द्रष्टव्यः । तस्मान्नानाऽहीनेषु ग्रहीतव्यः इति ।

भोजने तत्संख्यं स्यात् । ५७ ॥

भाष्यम्— यत्तु भोजनवदित्युक्तम्, अर्थात्तत् । तस्माच्चतुर्थादपि अन्यच्चतुर्थं तत्र कल्प्यते । चतुर्थादारभ्य यान्यहानि, तेषां चतुर्थमहीनस्य तदष्टमम् । शब्दलक्षणे कर्मणि शब्दाभिहितं गम्यते, न लोकाभिप्रायः । तस्माद्युक्तं भोनने लोकाभिप्रायानुष्ठानम् । अहीने तु शब्दाभिहितं गम्यते ।

सोम— षोडश्युत्तरे इतिवत् वीप्साया न विधेयत्वमित्युत्थितेः संगतिः । **सूत्रार्थस्तु**— चतुर्थेचतुर्थेऽहनि अहीनस्य गृह्यते इत्यत्र एकस्मिन्नेव अहीने अभ्यासेन ग्रहणं प्रतीयते, यथा 'देवदत्तः चतुर्थेचतुर्थे दिने भुङ्क्ते' इत्यत्र भोजनदिनापेक्षं चतुर्थत्वम्, तद्वदिहापि ग्रहणदिनापेक्षत्वात् चतुर्थस्य इति ।

वि-- 'किं चतुर्थेऽहन्यहीनस्य ग्रहो नानागतेषु वा ।, वीप्सैकवचनाभ्यां स्यादेकस्मिन्नेव स ग्रहः ॥, चतुर्थाष्टमताऽऽपत्तेर्नानाऽहीनेषु स ग्रहः । जात्येकवचनं वीप्सा न्यायप्राप्तानुवादिनी ॥'

भाट्ट— अष्टरात्रादिरूपे अहीने चतुर्थेऽहनि षोडशिनं गृहीत्वा पुनरपि चतुर्थाच्चतुर्थे अष्टमे ग्राह्यः। अन्यथा वीप्साऽनुपपत्तेः अहीनान्तराभिप्रायत्वे न्यायप्राप्तत्वेन वीप्सावैयर्थ्यापत्तेः । **इति प्राप्ते**, अहीनस्य चतुर्थेऽहनि ग्राह्यत्वेन श्रुतः षोडशी न तस्याष्टमे ग्रहीतव्यः । नहि तदहीनस्य चतुर्थम्, अपितु चतुर्थस्य, अतश्च चतुर्थपदानुरोधात् अहीनान्तराभिप्रायेण वीप्सा न्यायप्राप्तानुवादः । विधाने वाक्यभेदापत्तेः । अहीनस्य इत्येकवचनं तु सामान्याभिप्रायेण बहुत्वलक्षणार्थम् ।

मण्डन— ‘ चतुर्थवीप्सा खलु बह्वहीने । ’

शंकर–– ‘ चतुर्थवीप्सा अन्याहीने । ’ १५.

* **नानाकर्मलक्षणं** इति (द्वितीयं) अध्यायमाचक्षते । **भा.** २।१।१।१ पृ. ३७२.

* **नानाकार्यत्वान्न** विकल्पः । **भा.** ३।३।६।१२.

* **नानाछन्दस्के** गायत्रच्छन्दस इत्यादिपदघटितमन्त्रस्य विनियोगः । **भा.** ३।२।१८।४२–४३. * नानाछन्दस्के सोमे ऐन्द्रप्रदाने भक्षमन्त्रो नान्यत्र । कृत्वाचिन्ता । वि. ३।२।१९.

* **नानाजातीयेषु** (ऐकादशिनेषु) पशुषु सौत्रामण्यां च पाकभेदात् कुम्भीशूलवपाश्रपणीनां भेदः । **भा.** ११।४।१०।३७–३८.

* **नानात्वम्** । यद् यस्य ग्राह्यम्, गृहीते च तस्मिन् ग्राह्यान्तरावमर्शो नानात्वम् । **बृहती.** पृ. २२७ । न नानात्वं नाम अन्यदेव, किन्तु स्वभावत एव ये विलक्षणा अर्थाः, तेषु गृहीतेषु यदिदं वैलक्षण्यं विमृश्यते, तदिदं नानात्वम् । **ऋजु.** पृ. २२७.

⌛ **नानाप्रदानाधिकरणम्** । भिन्नगुणकदेवताभेदे प्रदानभेदः ॥

त्रीण्येतानि (इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेत्, इन्द्रायाधिराजाय, इन्द्राय स्वराजे इति) हवींष्यवदानैकत्वात् संप्रतिपन्नदेवताकत्वात् सहैव प्रदीयेरन् । **इति प्राप्ते**, विशेष्यस्यैकत्वेऽपि राजादिगुणभेदेन देवतापृथक्त्वात् अवदानादेर्वचनाद्यौगपद्येऽपि प्रदानानि भिद्येरन्नेव, एवं सति तिसृणामेवर्चां याज्यात्वमनुवाक्यात्वं च संगच्छते । **संकर्ष.** २।२।१५.

* ‘ **नानाबीजेष्वेकमुलूखलं विभवात्** ’ **इति न्यायः** । कृष्णाजिनास्तरणन्यायः । **भा.** ५।२।७।१३.

⌛ **नानाबीजेष्वेकमुलूखलं विभवात् । ५।२।७।१३ ॥**

राजसूये नानाबीजेष्टिः ‘ अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाम्, सोमाय वनस्पतये श्यामाकं चरुम्, सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाम्, रुद्राय पशुपतये गावीधुकं चरुम्, बृहस्पतये वाचस्पतये नैवारं चरुम्, इन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणाम्, मित्राय सत्याय आम्बानां चरुम्, वरुणाय धर्मपतये यवमयं चरुम् ’ इति । एषां व्रीहिश्यामाकादीनां अवहननं कर्तव्यं भवति । तत्र कृष्णाजिनं अवस्तरणाय, उलूखलं मुसलं च अवघाताय, शूर्पं च परावपणाय विवेकाय च उपयुज्यते । तदेतदुलूखलादिकं प्रतिबीजं भिद्यते, किंवा एकमेव क्रमेण उपकुर्यात् इति विचारे सिद्धान्तमाह । सूत्रे उलूखलशब्दः कृष्णाजिनोलूखलमुसलशूर्पाणां ग्राहकः । तथा च सूत्रार्थः नानाबीजेषु अवहननाद्यर्थमुलूखलं उलूखलादि एकमेव स्यात् न तु प्रतिबीजं पृथक् । विभवात् प्रभुत्वात् नानाजातीयानामपि बीजानां अवहननादेः करणे समर्थत्वात् ।

विवृद्धिर्वा नियमानुपूर्व्यस्य तदर्थत्वात् । १४ ॥

राजसूये नानाबीजेष्टौ कृष्णाजिनं उलूखलं मुसलं शूर्पं चैकमेव क्रमेण सर्वबीजानामवहननार्थं स्यात् इति सिद्धान्ते उक्ते पूर्वपक्षमाह । वाशब्दः पक्षव्यावृत्त्यर्थः । विवृद्धिः उलूखलादेः स्यात् । प्रतिबीजं भेदः स्यात् । नियमानुपूर्व्यस्य ‘ कृष्णाजिनमवस्तृणाति, तस्मिन्द् उलूखलमधिवर्तयति, तस्मिन् बीजान्यावपति, मुसलमादत्ते, अवहन्ति, शूर्पे उद्वपति, परापुनाति, विविनक्ति, पात्र्यां तण्डुलान् प्रस्कन्दयति, त्रिष्फलीकरोति ’ इति यत् नियमेन नियतत्वेन पदार्थानां आनुपूर्व्यं क्रमः उक्तः, तस्य तदर्थत्वात् तत्तदर्थपरत्वात् ते पृथक् पदार्थाः । ततश्च एकजातीयबीजस्य कृष्णाजिनास्तरणं कृत्वा अन्यजातीयबीजस्य तत् कर्तव्यम् । एवं अवहननाद्यपि । तच्च उलूखलादेर्भेदे सत्येव संभवति । तस्मात् प्रतिबीजं भिन्नमुलूखलादि इति पूर्वः पक्षः ।

अत्र **सुबोधिन्यां** नियमादानुपूर्व्यस्य इति पठित्वा आनुपूर्व्यस्य पाठक्रमस्य नियमात् प्रकृतौ क्लृप्तत्वात् इति व्याख्यातम् । तदर्थत्वात् इत्यस्य च उलूखलस्य हविरावापार्थत्वात् इत्यर्थ उक्तः । **कुतूहले** तु आनुपूर्व्यस्य पदार्थानुसमयेन अनुष्ठानक्रमस्य पाठेन नियमात् नियमनात् कृष्णाजिनास्तरणादिः पृथक् पदार्थः । कुतः ? तदर्थत्वात् 'कृष्णाजिनमास्तृणाति' इत्यादिपदैः तेषां पृथगेव अभिधेयत्वात् विधिभेदे पृथक्पदार्थत्वात् इति व्याख्यातम् । भाष्यं तु 'नियतं ह्यानुपूर्व्यं पाठकृतं सहत्वे सति उपपद्यते । पदार्थानां चानुसमयः । पृथक्पदार्थाश्च अधस्तरणादयः । यतीभावस्य (समापनस्य) पर्यवसानात् । अधस्तरणादेश्च पदैरभिधानात्' इति ।

एकं वाऽऽतण्डुलभावाद्धन्तेस्तदर्थत्वात् । १५ ॥

राजसूये नानाबीजेष्टौ उलूखलादि प्रतिबीजं भिन्नं इति पूर्वपक्षे सूत्रेण प्राप्ते सिद्धान्तमाह । वाशब्दः पूर्वपक्षव्यावर्तनाय । एकमुलूखलं कृष्णाजिनोलूखलमुसलशूर्पं एकमेव सर्वबीजार्थं स्यात्, न प्रतिबीजं भिन्नम् । हन्तेः इति पदस्य पूर्वत्र च परत्र च अन्वयः । हन्तेः अवहननपदार्थस्य आ तण्डुलभावात् तण्डुलभावपर्यन्तमेकत्वात् । हन्तेः कृष्णाजिनास्तरणमुपक्रमः फलीकरणान्तश्च तस्यैव शेषः । हन्तेस्तदर्थत्वात् अवहननस्य तण्डलनिष्पत्त्यर्थत्वात् । तथा च तावानेकः पदार्थः । तथा च प्रतिबीजं अवहननपदार्थकाण्डानुसमयः प्रवर्तते । तेन एकमेव उलूखलादि सर्वबीजानां पर्यायेण अवहननादि कर्तुं शक्नोति इति न विवृद्धिः । के.

* **नानाबीजेषु** कृष्णाजिनास्तरणादितण्डुलप्रक्षालननिनयनान्तेन अनुसमयः । कृष्णाजिनास्तरणन्यायः द्रष्टव्यः । भा. ५।२।७।१३–१५.

* **नानाबीजाधिकरणम्** । नानाबीजन्यायः द्रष्टव्यः । के.

* **नानाबीजाधिकरणन्यायस्य स्वरूपम्** 'सत्यपि विधिभेदे अवयवत्वेन विधानात् पदार्थान्यत्वं नास्ति' इति । के.

* **नानाबीजेष्टिरेवमाम्नाता तैत्तिरीयके** । 'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाम्, सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाम्, रुद्राय पशुपतये गावीधुकं चरुम्, बृहस्पतये वाचस्पतये नैवारं चरुम्, इन्द्राय ज्येष्ठाय पुरुडाशमेकादाशकपालं महाव्रीहीणाम्, मित्राय सत्याय आम्बानां चरुम्, वरुणाय धर्मपतये यवमयं चरुम्' इति ।

काठकसंहितायाम् (१५।५।७) 'अग्नये गृहपतये आशूनामष्टाकपालः, सवित्रे प्रसवित्रे सतीनामष्टाकपालः, सोमाय वनस्पतये श्यामाकश्चरुः, बृहस्पतये वाचस्पतये नैवारश्चरुः, इन्द्राय ज्येष्ठाय हायनानामेकादशकपालः, मित्राय सत्यस्य पतये आम्बानां चरुः, वरुणाय धर्मणस्पतये यवमयो द्वादशकपालः, रुद्राय पशुपतये गावीधुकश्चरुः' इति ।

मैत्रायणीये (२।६।१५) 'अग्नये गृहपतये आपतन्तानामष्टाकपालं निर्वपेत्, सोमाय वनस्पतये श्यामाकं चरुम्, सवित्रे प्रसवित्रे सतीनामष्टाकपालम्, बृहस्पतये वाचस्पतये नैवारं चरुम्, इन्द्राय ज्येष्ठाय हायनानामेकादशकपालम्, मित्राय सत्यस्य पतये नाम्बानां चरुम्, वरुणाय धर्मस्य पतये यवमयं चरुम्, रुद्राय पशुपतये गावीधुकं चरुम्' इति । अत्र आशवो व्रीहयः ये मासद्वयेनैव पच्यन्ते । गवीधुकाः तृणविशेषः । आम्बाः (आंबेमोहोर इति भाषा), सतीनां इति वर्तुलबीजानि । नाम्बाः आम्बाः एव । के.

⌛ **नानाबीजेष्टौ अन्त्यबीजसंबन्धिहविष्कृदाह्वानकाले एव वाग्विसर्गः ॥**

वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात् । ११।३।७।१७॥

भाष्यम्— राजसूये नानाबीजेष्टिः 'अग्नये गृहपतये आशूनामष्टाकपालं निर्वपेत्, सोमाय वनस्पतये श्यामाकं चरुम्, सवित्रे प्रसवित्रे सतीनामष्टाकपालम्' इति । 'नानाबीजेष्वेकमुलूखलं विभवात्' (५।२।७।१३) इत्युक्तम् । अतः तस्यां क्रमेणावहन्तिः क्रियते । प्रकृते च श्रूयते 'अपः प्रणेष्यन् वाचं यच्छति, तां सहविष्कृता विसृजति' इति । हविष्कृद्ग्रहणं च काललक्षणार्थं इत्युक्तम् 'तथाह्वानमपीति चेत्' (३।२।३।५) 'न कालविधिश्चोदितत्वात्' (३।२।३।६) इति । इह अनेको

हविष्कृदाह्वानकाल: । तत्र पूर्वैव विचारणा । किमन्त्ये प्रथमे वा हविष्कृत्काले वाग्विसर्गः कर्तव्य:, अथवा अन्त्ये एवेति । तथैव च पूर्वः पक्षः । प्राक् हविष्कृत्कालात् ये पदार्था:, तेषां वाग्यमो धर्मः, स बाध्येत यदि पूर्वस्मिन् वाग्विसर्गः क्रियते । अथोत्तरस्मिन्, ततो हविष्कृत्कालादूर्ध्वं ये पदार्था:, तेषां व्याभाषणकरणं धर्म:, तत् बाध्येत । तथैव चोत्तर: पक्ष: । व्याभाषणस्याश्रुतत्वात् शिष्टे च वाग्यमस्य अभिप्रवृत्तत्वात् इति । अधिकरणप्रदेशोऽयम् ।

सोम— बीजान्तरावहननस्य विभिन्नकालतया हविष्कृदाह्वानकालभेदः इति विशेषशङ्कया उत्थानात् संगतिः । सूत्रे तथा स्यात् प्रासनवत् अन्ते स्यादित्यर्थः ।

वि— ‘नानाबीजेषु यागेषु वाग्विसर्गश्च पूर्ववत् । शङ्किते तद्विधौ, न स्यादविधित्वे तदुत्तरम् ॥’ उत्तरं चरमे एव काले ।

भाट्ट— दर्शपूर्णमासयोः प्रणीताप्रणयनोत्तरं विहितस्य वाग्यमस्य ‘हविष्कृता वाचं विसृजति’ इति वचनेन हविष्कृदाह्वानकाले विसर्गः श्रुतः । नानाबीजेषु च व्रीहिश्यामाकादिरूपेषु एकप्रयोगवर्तिनानायागसाधनेषु कृष्णाजिनास्तरणादिफलीकरणान्तानां अनुसमयस्य स्थापितत्वात् हविष्कृदाह्वानकालप्राग्भाविकृष्णाजिनास्तरणादीनां वाग्यमाङ्गकत्वात् तदनुरोधेनात्रापि अन्ते एव वाग्विसर्गः। न च इह वाग्विसर्गस्य विहितत्वात् हविष्कृदाह्वानोत्तरभाविपूर्वबीजसंबन्धिपदार्थानां वाग्विसर्गाङ्गकत्वप्रतीतेः अन्ते तत्करणे तत्र तद्बाधापत्तिः, वाग्विसर्गस्य विहितत्वेऽपि आरादुपकारकत्वेन विधेयत्वापत्तेः, तस्य उत्तरपदार्थाङ्गत्वे प्रमाणाभावात् । वस्तुतस्तु नात्र वाग्विसर्गविधिः, रागतः प्राप्तत्वात्, अपि तु वाग्यमापेक्षितकालविधिसमर्पणमेवेत्युक्तम् । **न च** तथापि सकृदाहूताया एव तस्या आपत्नीसंयाजान्तं हविष्करणार्थमवस्थानेन सर्वावघातकरणोपपत्तेः आद्यबीजावघातसमये एव हविष्कृदाह्वानात्तदैव वाग्विसर्गापत्तिरिति **वाच्यम्**। आह्वानस्य सकृत्करणेऽपि तदुपलक्षितस्य मुसलादानकालस्य अन्त्यबीजावघातसमयेऽपि सत्त्वात् तदवधिकवाग्यमस्योपपत्तेः । आपत्नीसंयाजान्तं जघनेन गार्हपत्यं अवस्थिताया अपि तस्या उत्करदेशे अवघातार्थं पुनःपुनः आह्वानोपपत्तेश्च । वक्ष्यते चात एव अग्रे प्रतिसवनं सवनीयेषु हविष्कृदाह्वानभेदः । अतो वाग्यमानुकूलप्रयत्नावृत्तिः इति सिद्धम् ।

मण्डन-- ‘अन्त्ये बीजे वाग्यमस्य प्रहाणम् ।’

शंकर-- ‘नानाबीजे वाग्विसर्गे ।’ तन्त्रत्वम् ।

* **नानाबीजेष्टौ** उलूखलं पात्री च तन्त्रेण न तु नाना । कृष्णाजिनास्तरणादिप्रक्षालननिनयनान्तेनानुसमयः । **भा.** ५।२।७।१३–१५, * नानाबीजेष्टौ उलूखलं मुसलं शूर्पं चैकमेव । ५।२।७।१३. * नानाबीजेष्टौ एकमुलूखलं पर्यायेण । कृष्णाजिनास्तरणादिः फलीकरणान्तः एकः पदार्थः । शूर्पमुसलकृष्णाजिनानि तन्त्रेणैवोपकुर्वन्ति । **के.** ५।२।७।१३–१५. * नानाबीजेष्टौ द्रव्यभेदेन संस्कारावृत्तौ मन्त्रावृत्तिः । **वृ.** ११।४।१४।४४. * नानाबीजेष्टौ पेषणेऽपि ‘कृष्णाजिनास्तरणादिपेषणान्तेन अनुसमयः, तेषामपि पेषणविध्येकवाक्यतया एकपदार्थत्वात्’ । तथा च कृष्णाजिनं दृषत् उपलः तन्त्रेण एकः । **भाट्ट.** ५।२।७. * नानाबीजेष्टौ प्रतिबीजं अवघातमन्त्रस्यावृत्तिः राजसूये । नानाबीजन्यायः । **भा.** ११।४।१३।४३ (४६ के.).

* **नानाबीजेष्ट्यधिकरणम्** । नानाबीजन्यायः द्रष्टव्यः । **के.**

⌛ **नानाबीजन्यायः** । नानाबीजाधिकरणम् । नानाबीजेष्टिन्यायः । नानाबीजेष्टौ प्रतिबीजमवघातमन्त्रस्यावृत्तिः राजसूये ॥

द्रव्यान्तरे कृतार्थत्वात् तस्य पुनःप्रयोगान्मन्त्रस्य च तद्गुणत्वात् पुनःप्रयोगः स्यात् तदर्थेन विधानात् । ११।४।१३।४६ ॥

भाष्यम्— राजसूये नानाबीजेष्टिः ‘अग्नये गृहपतये आशूनामष्टाकपालं निर्वपेत्;, सोमाय वनस्पतये श्यामाकं चरुम्’ इत्येवमादिः । तस्यां अवहन्तिः समन्त्रकश्चोदकेन प्राप्यते । अत्रापि पूर्वेण न्यायेन सकृत् मन्त्रस्य प्रयोगः प्राप्तः । सर्वबीजानां वितुषीकरणं चिकीर्षितं तदभिसंधीयते इति । **तथा प्राप्ते, उच्यते** । द्रव्यान्तरे—बीजान्तरे पुनःप्रयोगः स्यान्मन्त्रस्य । कुतः ? कृतार्थत्वात् । पूर्वस्मिन् बीजे योऽवहन्तिः स कृतार्थः । संनिपत्योपकारी

हि सः । स च येन बीजेन संनिपतितस्तदेव संस्करोति । तदेव चेत् संस्करोति, उत्तरसंस्कारार्थं पुनः प्रयोक्तव्यः । तस्य पुनःप्रयोगान्मन्त्रस्यापि पुनःप्रयोगः । तद्गुणत्वात् । तस्यावहन्तेः स मन्त्रो गुणः, तदर्थेन विधानात् । तस्यापि असौ प्रतिकर्मावसायिना चोदकेन विहितः । तस्मात् प्रतिबीजं मन्त्रस्य आवृत्तिः ।

सोम—सूत्रार्थस्तु-- द्रव्यान्तरेषु मन्त्रस्य पुनःप्रयोगः स्यात् पूर्वस्मिन् बीजे कृतार्थस्यावघातस्य बीजान्तरे पुनःप्रयोगात् मन्त्रस्य प्रतिकर्मावसायिना चोदकेन तदर्थत्वेनापि विधानात् तद्गुणत्वात् इति ।

वि-- ‘नानाबीजेषु तन्मन्त्रः (अवघातमन्त्रः) सकृद्वाऽसकृ, दग्रिमः । विशेषाग्रहणा, न्मैवमवघातस्य भेदतः ॥’

भाट्ट— एवं तर्हि नानाबीजेष्वपि सत्यपि तण्डुलीभावभेदे सकृत्पठितमन्त्रस्य स्मृतेः सर्वावघातेषु उपकारकत्वोपपत्तेः नावृत्तिः । **इति प्राप्ते**, कृष्णाजिनास्तरणादिफलीकरणान्तेन अनुसमयस्योक्तत्वात् सकृन्मन्त्रपाठे तु असंबन्धिपरावपनादिपदार्थान्तरतन्मन्त्रादिना अवघातमन्त्रजन्यस्मृतेर्नाशात् आवृत्तिरेव तन्मन्त्रस्य ।

मण्डन--‘नानाबीजे पृथक्पृथक् ।’ अवघातमन्त्रः ।

शंकर—‘नानाबीजेषु तद्भिदा ।’ अवघातमन्त्रभेदः ।

* समन्त्रकप्रथममुष्टिनिर्वापेण ये संस्कृतास्तण्डुलाः तेभ्योऽन्ये मुष्ट्यन्तरनिर्वापेण संस्कार्याः । अतस्तत्संस्कारसिद्धये **नानाबीजन्यायेन** मन्त्रावृत्तिः । **के.** ११।४।१५.

* **नानाबीजवत् ।** यथा वा ‘सहावघ्नन्ति’ ‘सह पिंषन्ति’ इति क्वचित् नानाबीजेषु वचनात् सर्वाघातस्य एककालत्वात् ‘इतरमन्यः’ इति कर्त्रन्तरं प्राप्नोति । **रत्न.** ५।१।१३।२५.

⌛ **नानावृक्षरसन्यायः ।** उक्तं च महोपनिषदि ‘यथा पक्षी च सूत्रं च नानावृक्षरसा यथा । यथा नद्यः समुद्राश्च शुद्धोदलवणे यथा ॥ चोरापहार्यौ च यथा यथा पुंविषयावपि । तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ॥’ इत्यादि पूर्णप्रज्ञदर्शने प्रपञ्चितं माधवार्यैः । **साहस्री.** ८२२.

* **नानाशाखासु** विहिताग्निहोत्रादिकर्मणामैक्यम् । शाखाऽन्तराधिकरणम् । **वृ.** २।४।२।८–३०.

* **नान्तरीयकम् ।** यद्विना यन्नोपपद्यते तत् तस्य नान्तरीयकं इत्युच्यते । **के.**

⌛ **नान्तरीयकन्यायः ।** नान्तरीयमवश्यम्भावीत्यर्थः । यथा प्रतिबन्धकाभावे नान्तरीयककार्योत्पत्तिः अवश्यम्भाविनीत्यर्थं इत्युक्तम् । यथा च कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात् स यावत् आदेयं तावदादाय तुषपलालान्युत्सृजति । तथा कश्चित् मांसार्थी मत्स्यान् सकण्टकान् सशकलानाहरति नान्तरीयकत्वात् । स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजतीति, प्रकृतेऽप्येवमिति ‘स्वरितात्संहितायामनुदात्तानाम्’ (पा० १।२।३९) इतिसूत्रमहाभाष्ये उक्तोऽयम् । **साहस्री.** ६१९.

* **नापितकर्तृकत्वं** नित्यं केशश्मश्रुवपनस्येति नाध्वर्योः क्षुरग्रहणापत्तिः । **वा.** ३।८।२।४.

[इत उत्तरं **नामपदारब्धानि** सिद्धान्तवाक्यानि ‘नामिक्यः विभक्तयः’ इत्यन्तानि निवेश्य ततः परं **नामधेयपदारब्धानि** निवेशितानीति ज्ञेयम् । **के.**]

* **नाम** अतिदेशे प्रमाणम् । **मणि.** पृ. १३. * ‘नाम च व्यवहारार्थमर्थस्याभ्युपगम्यते ।’ **वा.** १।३।८।२६ पृ. २७७. * नाम धर्मभेदे प्रमाणम् । **मणि.** पृ. १३, * ‘सर्वमाख्यातजं नाम’ इति स्मृतिः । पृ. १११. * **नाम्ना** अतिदेशः अभिहितः (सप्तमस्य तृतीये पादे) । इदानीं आनुमानिकेन वचनेनातिदेश उच्यते । **वा.** ७।४।१।१ पृ. १५६९. * नाम्ना (द्वादशाहगतप्रथमाहविषयकप्रायणीयनाम्ना) गवामयने प्रथमेऽहनि न धर्मातिदेशः । **भा.** ७।३।२।५. * नाम्ना तत्र विशेषः प्रतीयते, यत्र कञ्चिद्विशेषमुपादाय नामानि प्रवर्तन्ते । **वा.** २।२।५।१५ पृ. ५००. * नाम्ना (अग्निहोत्रनाम्ना) धर्मातिदेशः कौण्डपायिनामयनगते अग्निहोत्रे । **भा.** ७।३।१।१–४. * ‘नाम्ना धात्वर्थमात्रं च संनिधाप्येत शक्तितः’ । सामानाधिकरण्येन हि सर्वनामधेयानि धात्वथर्धानां नामधेयत्वेन अवस्थितानि, न भावनायाः । **वा.** २।३।११।२४ पृ. ६१६. * नाम्ना

(अग्निहोत्रनाम्ना) नित्याग्निहोत्रधर्माणां कौण्डपायिनामयनगते अग्निहोत्रे अतिदेशः । **के.** ७।३।१।१–४. * नाम्ना (दर्शपूर्णमासगताज्यनाम्ना) पशुगतयूपसंबन्धिनि अञ्जनाज्ये धर्माणां नातिदेशः । **भा.** ७।३।७।१९, * नाम्ना (यूपनाम्ना) यूपसंस्काराणां यूपैकादशिनगते उपशये नातिदेशः । ७।३।१३।३३–३४, * नाम्ना (सर्वपृष्ठनाम्ना) षडहपृष्ठानां विश्वजिति सर्वपृष्ठे अतिदेशः । ७।३।३।६–११, * नाम्ना (अवभृथनाम्ना) सौमिकावभृथधर्माणां वरुणप्रघासावभृथे अतिदेशः । ७।३।४।१३–१६, * नाम्ना (वैष्णवनाम्ना) सौमिकातिथ्येष्टिगतवैष्णवधर्माणां राजसूये पूर्वत्रिकगतवैष्णवत्रिकपाले नातिदेशः । ७।३।६।१७, * **नाम्नः** अर्थवादगतस्य नातिदेशकत्वम् । **भाट्ट.**५।३।९. * नाम्नः । ज्योतिरादौ च ‘ एतेन सहस्रदक्षिणेन यजेत ’ इत्यादिगुणान्वयव्यापारेण ‘ एतेन ऋद्धिकामो यजेत ’ इत्यादिफलान्वयव्यापारेण च श्रुतस्यापि आख्यातस्य भेदाभेदयोरव्यापारात् तदन्वितस्यापि नाम्नोऽपि भेदकत्वं अविरुद्धम् । **सु.** पृ. ७१२, * नाम्नः पूर्वकर्मोपस्थापकत्वस्य पूर्वकर्मवाचित्वनिमित्तकत्वम् । आख्यातस्य च पूर्वकर्मविषयत्वं विना नाम्नः पूर्वकर्मवाचित्वानवधाणात् । पृ. ९५३. * नाम्नः प्रयोजनं तु सर्वत्र व्यवहार एव । नहि अन्तरेण नामधेयं ऋत्विग्वरणादिषु ‘अनेनाहं यक्ष्ये ’ इति आख्यानोपायो लघुः कश्चिदस्ति । **वि.** १।४।२.* **नाम्नां** कर्मभेदो गुणफलोपबन्धः संकल्पलाघवं च प्रयोजनम् । **मणि.** पृ. ५. * ‘नाम्नां द्विधैव संबन्धः सर्ववाक्येष्ववस्थितः । सामानाधिकरण्येन षष्ठ्या वा प्रतिपाद्यते ॥ ’ **वा.** २।२।९।२३ पृ. ५३६. * नाम्नां सप्रकारकप्रमितिजनकत्वेन प्रामाण्यम् । **मणि.** पृ. ११, * **नामसु** प्रातिपदिकार्थप्राधान्यम् । पृ. १०५.

* **नामातिदेशः** इत्यत्र नाम त्रिविधं कर्मनाम संस्कारनाम यौगिकं चेति । **वाल.** पृ. ११७–११९. * नामातिदेशः एकत्र मुख्यस्य हि नाम्नः अपरत्र गौणत्वे । न तु सर्वत्र प्रवृत्तिनिमित्तसत्त्वेन मुख्यत्वेऽपि । **भाट्ट.** ८।१।३ पृ. ५. * नामातिदेशः प्रबलः । यथा– अष्टरात्रैकदेशे प्रथमाहे विश्वजिति स्वतन्त्रैकाहविश्वजिन्नाम्ना तद्धर्मातिदेशात् सर्वस्वं दक्षिणा इति भाष्यम् । वार्तिककारस्तु द्वादशशतं इत्येव सिद्धान्तितवान् । **के.** ६।७।८.

* **नामार्थस्य** स्वोत्तरविभक्त्यर्थेन अन्वयः क्लृप्तः । **रहस्य.** पृ. ८६.

⧗ **नामार्थयोरभेदान्वय इति न्यायः ।** नामात्र ‘ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ’, ‘कृत्तद्धितसमासाश्च’ इति सूत्रद्वयलक्षितप्रातिपदिकापरपर्यायत्वेन गृह्यते । अर्थः, अभिधेयः, वाच्य इति पर्यायाः । तयोरभेदस्तादात्म्यसंबन्ध इति भावः । अत एव पुरोवर्तिपदार्थं दृष्ट्वा वाचकजिज्ञासया कोऽयमिति प्रश्ने देवदत्तोऽयमित्युत्तरम् । अत एव ‘ रामेति द्व्यक्षरं नाम मानभङ्गं पिनाकिनः । शौर्यभङ्गं रावणस्य मदभङ्गं तु वालिनः ॥ ’ इत्यादौ शब्दार्थयोरप्यभेदेन व्यवहारः । ‘ ओमित्येकाक्षरं ब्रह्म ’ इत्यादावपि अभेदेनैव निर्देशः । अत्र द्विधा नियमः नामार्थयोरभेद एवेति, अभेदो नामार्थयोरेवेति । आद्ये राज्ञः सुतस्य धनमित्यादौ व्यभिचारः । द्वितीये तु स्तोकं पचतीत्यत्र । **साहस्री.** ४६३.

* नामार्थयोः भेदेन अन्वयस्य विभक्त्यर्थद्वारकत्वात् । **सोम.** ६।१।१३. * नामार्थयोः भेदान्वयानुपपत्तिः । **मणि.** पृ. ११४. * **नामार्थानां** यत्र कारकत्वेन विभक्त्युपस्थाप्यत्वम्, तत्रैव परस्परासंबद्धानां आख्यातसंबन्धः, कारकाणां मिथः संबन्धाभावात् । **सोम.** ६।४।६ पृ. ४८५.

* **नामार्थधात्वर्थयोः** अभेदातिरिक्तसंबन्धेन अन्वयस्य अव्युत्पन्नत्वात् । **मणि.** पृ. ११०.

* **नामोपदेशः** सङ्घस्य व्यवहारार्थः । पौर्णमासी, अमावास्या, वैश्वदेवं पर्व इत्यादि । **के.** १।४।११.

* **नामैकदेशेन** नामोपलक्षणस्य लोके सिद्धत्वात् भीमसेनोपलक्षणभीमशब्दवत् । कणिका. पृ. ३९२.

⧗ **‘ नामैकदेशे नामग्रहणम् ’ इति न्यायः** एकप्रकरणकत्वादितात्पर्यग्राहकप्रमाणसत्त्वे एव । यथा ज्योतिष्टोमप्रकरणगते ‘वसन्तेवसन्ते ज्योतिषा यजेत ’ इति वाक्ये ज्योतिःशब्देन ज्योतिष्टोमस्य ग्रहणम् । **सना. ध. प्र.** विवाहप्रकाशः पृ. १९१. * नामैकदेशे नामग्रहणमिति

न्यायः । यथा– दत्तः–देवदत्तः, भामा–सत्यभामा, भीमः भीमसेन इत्यादि ज्ञेयम् । साहस्री. ६०१.

* **नामपदं** चाख्यातानुसारित्वात् यत्राख्यातं तत्र वर्तते । **वा.** ४।४।१।२, * नामपदम् । (निरूढानिरूढत्वेन द्विविधस्यापि नामधेयस्य विचारितत्वात् उत्तराधिकरणद्वया- (१।४।३–४)नर्थक्यमाशङ्कते–) ननु सर्वत्र द्विप्रकारमेव नामपदं सांविज्ञायिकं (रूढम्) यौगिकं च । उभयमपि च अधिकरणद्वयेन (१।४।१–२) प्रतिपादितम् । किमिदानीमवशिष्यते, येन पुनर्विचार्यते । उच्यते । यौगिकानामेव मत्वर्थलक्षणापरिहारेण अत्र चिन्ता (३) उत्तराधिकरणे तु (४) सांविज्ञायिकानां वाक्यभेदासंभवात् । (तथा च निरूढानि नामपदानि सांविज्ञायिकानि, अनिरूढानि च यौगिकानि इति भेदः । के.) । १।४।३।४ पृ. ३३२. * नामपदं सर्वं तावत् व्यक्त्याकृतिनिबन्धनम् । व्यक्तिवाचि तु यन्नाम, तदेकत्रैव वर्तते । देवदत्तादिवत् । **के.** * **नामपदानि** यान्युपादेयार्थानि तानि तावत् आख्यातपरतन्त्रत्वात् तदनुसारीणि सन्ति तद्वृत्तिं प्रतीक्षन्ते । ‘प्रायेणाख्यातसंबन्धि नामेष्टं पारतन्त्र्यभाक्’ । **वा.** २।२।२।२ पृ. ४६७. * **नामपदस्य** नहि आख्यातं वा कृत्यं वा अन्तरेण विधिशक्तिरस्ति । **सु.** पृ. ७७६. * नामपदस्य विधिशक्तिर्नास्ति । **वा.** १।४।२।३ पृ. ३३२.

* **नामप्रयोज्यनामार्थविशेष्यकनामार्थप्रकारकाभेदसंसर्गकबोधत्वावच्छिन्नं** प्रति एकाधिकरणवृत्तिप्रातिपदिकार्थताऽवच्छेदकनामद्वयसमभिव्याहारस्य द्वंद्वभिन्ननामद्वयसमभिव्याहारस्य वा तन्त्रत्वम् । **भाट्ट.** ६।१।१२.

* **नामयुक्तकर्मविधाने** सामानाधिकरण्यात् कदाचित् यज्यर्थाविशेषो नाम्ना निरूप्यते कदाचिन्नामार्थो यजिना । यो यत्र पूर्वतरप्रसिद्धार्थो भवति, स इतरं स्वविषये व्यवस्थापयति । यथा राजसूयेन इत्यत्र नाम यागायागविषयत्वेन उपप्लवमानं प्रकृतयागप्रसिद्धेन यजिना स्वविषयं नीयते । वा. २।२।३।३ पृ. ४७६.

⧗ **नाम–रूप–धर्मविशेष–पुनरुक्ति–निन्दाऽशक्ति–समाप्तिवचन–प्रायश्चित्ता–न्यार्थदर्शनाच्छाखाऽन्तरेषु कर्मभेदः स्यात् । २।४।२।८॥**

इह शाखाऽन्तराण्युदाहरणं काठकं कालापकं पैप्पलादकं इत्येवमादीनि । तत्र संदेहः किमेकस्यां शाखायां यत्किञ्चिदग्निहोत्रादि श्रूयते, तच्छाखाऽन्तरे पुनःश्रूयमाणं भिद्यते, उत न भिद्यते इति । पूर्वं प्रयोगभेदं प्रतिपाद्य इदानीं भेदापवादः क्रियते । अत्रायं पूर्वपक्षः । ‘एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यात्’ इति न्यायेन अभ्यासात् कर्मभेदः प्रतिपादित एव । स चाभ्यासोऽपि अविशिष्ट एव । न च शाखाऽन्तरे गुणफलाद्यर्थान्तर............र्था पुनश्रुतिर्भवेत् । तेन कर्मैव विधेयम् । तच्च विहितविधानासंभवात् कर्मान्तरमेवेति । न च कर्मैकत्वेऽपि भिन्नाध्येतृबोधनेनैव शाखाऽन्तरपुनःश्रुतेरर्थवत्त्वात् नाभ्यासाद्भेद इति वक्तव्यम् । प्रतिशाखमध्येतृभेदनियमे प्रमाणाभावात् । यद्यपि ‘स्वाध्यायमधीयीत’ इति स्वाध्यायगतमेकत्वं श्रूयते, स्वाध्यायशब्देन च स्ववेदशाखा अभिधीयते, तथापि सामर्थ्यतोऽर्थज्ञानार्थत्वेन प्राप्तस्य स्वाध्यायस्य अध्ययनेन संस्कारविधौ उद्देश्यत्वात्, उद्देश्यविशेषणस्य च ‘ग्रहं संमार्ष्टि’ इतिवत् अविवक्षितत्वात् एकस्य नानाशाखाऽध्ययनमविरुद्धम् । किञ्च, यदि एकस्य एकशाखाध्ययनमेव नियतं भवेत्, तदा वेदान्तरीयशाखाऽध्ययनमपि न प्राप्नोति । तथा च सति ‘वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् ॥’ (मनु. ३।२.) इति व्याहन्येत । तेन पुनःश्रुतेरनन्यार्थत्वात् अभ्यासात्तावत् भेदः । किञ्च यत्र एकस्यामेव शाखायां कथञ्चित् विच्छेदमात्रेण अनुपादेयं प्रति उपादानात् अग्निहोत्रादीनां कर्मान्तरत्वम्, तत्र शाखाऽन्तरेषु सुतरामेव बुद्धिविच्छेदादनुपादेयं फलं प्रति उपादानात् प्रकरणान्तरादपि कर्मभेदः । तथा काठकादिकर्मनामभेदादपि भेदः, एकत्रैवार्थे अनेकशब्दस्यान्याय्यत्वात् । तथा गुणादपि भेदः । एकस्यां शाखायामग्नीषोमीयमेकादशकपालमामनन्ति, अपरस्यां द्वादशकपालम् । तदुक्तम्– रूपात् इति । तथैकस्यां कारीरीवाक्यमधीयानास्तैत्तिरीया भूमिभोजनमाचरन्ति, अपरस्यां नेति । तदुक्तम्–धर्मविशेषात् इति । तथा कस्यांचित् उदितहोमनिन्दा, कस्यांचित् अनुदितहोमनिन्दा । तदुक्तम्–

निन्दावचनादिति । तथा प्रतिशाखं नानाधर्मान् संकलय्य न कश्चिद्विरोधात् अनुष्ठातुं शक्नोति, कर्मभेदे तु शक्नोतीति । तदुक्तम्—अशक्तेश्चेति । तथा कस्यांचित् अनुदितहोमव्यतिक्रमे प्रायश्चित्तमामनन्ति, कस्यांचित् उदितहोमव्यतिक्रमे । तदुक्तम्– प्रायश्चित्तविशेषादिति । तदत्र सर्वत्रैव परस्परविरोधात् पूर्वत्र असंभवद्गुणादेव भेदः । तेनात्राभ्यासप्रकरणान्तरसंज्ञागुणैर्भाष्योक्तपञ्चलिङ्गदर्शनैश्च शाखान्तरेषु कर्मभेद एवेति । **एवं प्राप्ते, अभिदध्महे ।**

एकं वा संयोगरूपचोदनाख्याविशेषात् ।९॥

अयमभिप्रायः । भवेदेवं यदि प्रत्यभिज्ञानसिद्धमत्र कर्मैकत्वं न भवेत् । तथाहि, शाखाऽन्तरेऽपि सैव संज्ञा, तदेव द्रव्यदैवतम्, ते एव गुणादयः, तदेव च फलम्, स एव धात्वर्थावच्छिन्नभावनाविषयविधिः । तदेवं प्रत्यभिज्ञासमूहसिद्धे कर्मैकत्वे···यद्यपि किञ्चिदधिकं न्यूनं वा प्रतीयेत, तथापि गोर्गडुनि जाते लाङ्गूले वा छिन्ने प्रत्यभिज्ञासिद्धमेकत्वं नोज्झति तथात्रापीति । तदुक्तम् ‘**सर्वत्र प्रत्यभिज्ञानात् संज्ञारूपगुणदिभिः । एककर्मत्वविज्ञानं न शाखास्वपगच्छति ॥**’ इति (वा.पृ.६३५)। न चान्यत् भेदकारणमस्ति । नन्वभ्यास एव भेदप्रमाणमित्युक्तम् । मैवम् । एकैका हि शाखा स्वाध्यायशब्दवाच्या प्रतिपुरुषं व्यवस्थाप्य अध्ययनविधिना प्रमाणीकृता । प्रमाणीभूतानेकवाक्य...... तः प्रतीयमानं कर्माभ्यासतो भिद्यते । न चोभयशाखागतं वाक्यमेकस्य प्रमाणम्, येनानर्थक्यभिया कर्म भिन्द्यात् । तदुक्तम् ‘**स्वाध्यायग्रहणेनैका स्वशाखा परिगृह्यते । एकार्थानां विकल्पश्च कर्मैकत्वे भविष्यति ॥**’ इति । (वा. पृ. ६३५)। ननु सामर्थ्यतः अर्थज्ञानार्थतया प्राप्तं स्वाध्यायमुद्दिश्य अध्ययनसंस्कारविधौ एकत्वमविवक्षितमित्युक्तम् । अतः कथमेकस्मिन् पुरुषे शाखाऽन्तरस्य अप्रामाण्यमित्युच्यते । स्यादेवं यदि अध्ययनविधेः प्राक् स्वाध्यायस्यार्थपरत्वनिश्चयो भवेत्, किन्तु लोकानुसारेण शक्त्यवधारणमात्रम् । अध्ययनविधितस्तु उच्चारणतात्पर्याधीनमर्थपरत्वमिति अर्थवादाधिकरणे एव प्रपञ्चितम् । तेन लोकानुसारेण शक्त्यवधारणे जातेऽपि उच्चारणतात्पर्यमन्तरेण स्वाध्यायस्य अर्थपरत्वानिश्चयान्न सामर्थ्यविनियुक्तस्वाध्यायोद्देशेन अध्ययनसंस्कारविधिः, किन्तु स्वाध्यायकर्मकस्यैव अध्ययनस्यार्थज्ञानं प्रति उपादीयमानत्वात् स्वाध्यायस्यापि उपादेयत्वमिति तद्गतमेकत्वं विवक्षितमेवेति एकैव शाखा एकस्याध्येतुः प्रमाणमिति नाभ्यासात् कर्मभेद इति । वेदान्तरीयशाखाऽध्ययनं तु वचनवशादेव । न चैवं वेदान्तरीयशाखावगताग्निहोत्रादिकर्मणां अभ्यासाद्भेदप्रसङ्गः, समुच्चयापादकवचनवशेन सुतरामभेदावगतेः । तथाहि, कर्मावबोधं प्रति तत्रापि उपादीयमान एव समुच्चीयते इत्येकः कर्मप्रयोगः । तद्गतसाहित्यार्थे त्रिवेदीमेलोद्भवे एकस्मिन्नेव कर्मणि वेदभेदेन समुच्चयावगमात् । एतेन प्रकरणान्तरगुणयोरपि भेदकत्वं प्रत्युक्तमेव । काठकादिसंज्ञा तु न कर्मणः, किन्तु कठेन प्रोक्तमिति प्रवचननिमित्ता हि सा । न च कर्म प्रोच्यते, किं तर्हि ? ग्रन्थ एव । भवतु वा कर्मणः संज्ञा, तथापि उत्पत्तिसंयोगिनी हि संज्ञा भेदिका । तदुक्तम् ‘ संज्ञा चोत्पत्तिसंयोगात् ’ इति । न चेयं तथेति न कर्मभेदिका । लिङ्गदर्शनानि तु सूत्रभाष्यवार्तिकानुसारेण कर्मैकत्वाविरोधेन व्याख्येयानि । तदुक्तम् ‘**तस्मात्तदेवेति मते न कर्म भिन्नं कथञ्चित्प्रतिशाखमिष्टम् । न कारणं सप्तममस्ति चान्यदतो यथोक्तैव तु भेदसिद्धिः ॥**’ इति । (वा. पृ. ६४६)। **प्रयोजनम्**—पूर्वपक्षे यथाशाखं व्यवस्थिताङ्गानुष्ठानम् । सिद्धान्ते तु सर्वशाखाविहिताङ्गानुष्ठानमिति । **सूत्रं तु**— एकमेव कर्मफलसंयोगात् द्रव्यदेवतधात्वर्थभावनाविषयविधिसंज्ञानामविशेषात् प्रत्यभिज्ञास्फुटत्वादित्यर्थः । **तौता.**

⌛ **नाम–रूप–धर्मविशेष–पुनरुक्ति–निन्दा–अशक्ति-समाप्तिवचन–प्रायश्चित्त–अन्यार्थदर्शनात् शाखाऽन्तरे कर्मभेदः स्यात् । २।४।२।८ ॥**

पूर्वग्रन्थेन शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तराणि षट् कर्मभेदकानि प्रमाणान्युक्तानि । उत्तराधिकरणे तु अन्यान्यपि कानिचित् भेदकारणानि आशङ्क्य निराकरोति । तत्र भेदकारणान्तरबोधकं पूर्वपक्षसूत्रमिदम् ।

तत्र नामभेदात् कर्मभेदः । काठकं एकं कालापकं अन्यत् । तस्मात् काठकं कठशाखोक्तमग्निहोत्रं कालापकाग्निहोत्रात् भिन्नं स्यात् । एकत्वे उभयत्र विधानानर्थक्यम् ।

रूपभेदात् कर्मभेदः । एकस्यां शाखायां अग्नीषोमीयमेकादशकपालमामनन्ति, अन्यस्यां द्वादशकपालम्। एवं भिन्नरूपत्वात् कर्मणो भेदः ।

धर्मविशेषात् कर्मभेदः। 'मारुतमसि मरुतामोजः।' इत्यादि कारीरेष्टिमन्त्रब्राह्मणं अधीयानाः तैत्तिरीयाः बोधायनसूत्रानुसारिणः भूमौ भोजनमाचरन्ति, बोधायनीयेभ्योऽन्ये तु तैत्तिरीयाः कारीरेष्टिमधीयाना अपि भूमिभोजनं नाचरन्ति । तस्मादेतादृशात् धर्मविशेषात् धर्मभेदात् कर्मापि भिद्यते ।

पुनरुक्तेः कर्मभेदः । अग्निहोत्रादि कर्म प्रतिशाखं प्रतिपाद्यते । कर्मैकत्वे तु इयं प्रतिशाखं पुनरुक्तिः नोपपद्येत। तस्मात् पुनरुक्त्या अभ्यासेन कर्मभेदः सिध्यति ।

निन्दया कर्मभेदः। 'उदिते होतव्यम्' इति प्रस्तुते अनुदितहोमः निन्द्यते 'प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् । दिवाकीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्॥' इति अनुदिते सूर्ये 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा' इत्यभिधानं अनृतं संपद्यते इत्यर्थः । अन्यस्यां तु शाखायां अनुदितहोमप्रस्तावे उदितहोमो निन्द्यते 'यदुदिते सूर्ये प्रातर्जुहुयात् । यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति । तादृगेव तत्' । अस्यायमर्थः– 'अग्निं वाव आदित्यः सायं प्रविशति । उद्यन्तं वाव आदित्यं अग्निरनु समारोहति' इति पूर्वमुक्तम् । अतो यजमानस्य गृहे सूर्यः अग्निं प्रविष्टः रात्रौ वसति । उदयकाले तु अग्निं विहाय गच्छति । ततश्च यथा अतिथये प्रद्रुताय वैमुख्येन गृहात् दूरात् गताय आहार्यमन्नं शून्याय आवसथाय अतिथिरहिते शून्ये गृहे सप्तम्यर्थे चतुर्थी। किंवा अतिथिशून्याय केवलायैव जडाय गृहाय दातव्यम्, तादृक् स उदितहोमः संपद्यते । इति । तस्मात् उभयनिन्दया उदितानुदितहोमौ भिन्नौ भवतः । एवं निन्दया कर्मभेदः ।

अशक्त्या कर्मभेदः । शतशो वेदशाखासु विहितानां भिन्नभिन्नानामङ्गानामेकस्मिन् कर्मणि उपसंहारे मनुष्यस्य न शक्तिः । कर्मभेदे तु कथंचित् संभवति ।

समाप्तिवचनभेदेन कर्मभेदः । मैत्रायणीशाखायां अग्निचयनमन्त्रसमाम्नाये अन्वारोहा नाम स्थण्डिलारोहणमन्त्रविशेषा अन्ते पठ्यन्ते। क्वचित् शाखायां तु न ते मन्त्राः सन्ति । तत्र अध्येतारो याज्ञिकाश्च इत्थं व्यपदिशन्ति अन्वारोहेषु मैत्रायणीयानामग्निः समाप्यते, इतरेषां तु अन्यत्र समाप्यते इति । तस्मादपि कर्मभेदः ।

प्रायश्चित्तभेदात् कर्मभेदः। केचित् उदितहोमव्यतिक्रमे प्रायश्चित्तमामनन्ति 'यस्याग्निहोत्रमहुतं सूर्योऽभ्युदियात्' इत्यादिना । एवं अनुदितहोमेऽपि । व्यृद्धत्वे हि प्रायश्चित्तम् । न च कर्मैकत्वे उभयथा व्यृद्धिः संभवति । तस्मात् कर्मभेदः ।

अथ अन्यार्थदर्शनं कर्मभेदकम् । यथा क्वचिच्छाखायां द्वादशाहसत्रे श्रूयते 'यदि पुरा दिदीक्षाणा एतमेव बृहत्सामानमुपेयुः उपेतं ह्येषां रथंतरम् । अथ यदि अदिदीक्षाणा रथंतरसामानमुपेयुः' इति । यदि पुरा पूर्वं दिदीक्षाणाः दीक्षावन्तः कृतप्रथमसोमाः स्युः, तदा एतमेव अतिरात्रं बृहत्सामानं उपेयुः । हि यस्मात् प्रथमसोमे रथंतरमेभिः प्रयुक्तम् । यदि तु अदिदीक्षाणाः अकृतप्रथमसोमाः, तदा रथंतरसामानमुपेयुः । 'न रथंतरसामानमकृत्वा बृहत्सामानमाहरेत्' इति नियमात्। तदिदं अनिष्टप्रथमसोमानामपि द्वादशाहसत्रवचनं प्रतिशाखं कर्मभेदमवगमयति। अथ **द्वितीयमन्यार्थदर्शनम्**। तैत्तिरीयके यूपैकादशिन्यां श्रूयते 'यत् पक्षसंमितां मिनुयात् कनीयांसं यज्ञक्रतुमुपेयात्, पापीयसी अस्यात्मनः प्रजा स्यात् । वेदिसंमितां मिनोति, ज्यायांसमेव यज्ञक्रतुमुपैति, नास्यात्मनः पापीयसी प्रजा भवति' इति। पक्षः अग्निचयनवेदेर्यः पक्षः, तं समशो दशधा विभज्य मध्ये अग्निष्ठं यूपं पार्श्वयोश्च पञ्चपञ्च इति एकादशयूपपङ्क्तिं यदि निखनेत् तथा कनीयांसं अल्पतरं यज्ञक्रतुं प्राप्नुयात्, किञ्च अस्य यजमानस्य आत्मनः सकाशात् पापीयसी दरिद्रतरा प्रजा भवति। तस्मात् वेदिसंमितां अग्निकवेदिपूर्वार्धतिर्यक्प्रमाणं दशधा समं विभज्य पूर्ववत् यूपैकादशिनीं मिनुयात्, तेन यज्ञादेः ज्यायस्त्वसिद्धिः । सेयं पक्षसंमितायाः निन्दा, वेदिसंमितायाश्च स्तुतिः शाखान्तरे कर्मभेदं गमयति । अथ **तृतीयमन्यार्थदर्शनम्**–ज्योति-

ष्टोमातिरात्रे 'द्वे संस्तुतानां विराजोऽतिरिच्येते' इति, शाखान्तरे तु 'तिस्रः संस्तुतानां विराजोऽतिरिच्यन्ते' इति श्रूयन्ते। संस्तुताः स्तोत्रियाः। विराट् इति एकमनेकं वा दशकं गृह्यते। सोऽयं द्वयोस्तिसृणां वा अतिरेकः शाखान्तरेषु कर्मभेदे एकः संभवति इति। अथ **चतुर्थम**न्यार्थदर्शनम्— सारस्वते सत्रे श्रूयते 'ये पुरोडाशिनः ते उपवसन्ति, ये सांनाय्यिनस्ते वत्सान् धारयन्ति' इति। ये यजमानाः पुरोडाशिनः अनिष्टप्रथमसोमतया केवलैन्द्राग्नपुरोडाशद्रव्यकदर्शेष्टिमन्तः। ये तु सांनाय्यिनः इष्टप्रथमसोमाः, ते वत्सान् धारयन्ति मातृसकाशं न गमयन्ति दोहाय। तदिदं अनिष्टप्रथमसोमानामपि सारस्वतसत्रदर्शनं कर्मभेदमवगमयति। अथ **पञ्चमम्**— उपहव्ये नाम सोमे 'अग्निष्टोमो रथंतरसामा, अश्वः श्यावो दक्षिणा' इत्येकस्यां शाखायां श्रुतम्, शाखान्तरे तु 'उपहव्य उक्थ्यो बृहत्सामा, अश्वः श्वेतो दक्षिणा' इति श्रुतम्। तच्च शाखाभेदेन कर्मभेदे एवोपपद्यते, न कर्मैक्ये। तदेवं नामादिभिः कारणैः शाखाऽन्तरे भिन्नासु शाखासु उक्तानां कर्मणां भेदः स्यात्।

एकं वा संयोगरूपचोदनाऽऽख्याऽविशेषात्। ९॥

नामरूपधर्मविशेषादिभिः अग्निहोत्रादिकर्मणां भेदः इति पूर्वपक्षं वाशब्दो व्यावर्तयति। नामादिभेदेन शाखाऽन्तरेषु न कर्मभेदः। किन्तु सर्वशाखाप्रत्ययं सर्वब्राह्मणप्रत्ययं च एकं कर्म संयोगस्य रूपस्य चोदनायाः आख्यायाश्च अविशेषात् अभेदात्। तत्र संयोगः प्रयोजनस्य। एकस्यां शाखायां अग्निहोत्रस्य कर्मणो यत् फलं स्वर्गः, तदेव अन्यस्यामपि शाखायामुद्दिष्टम्। एवमेकफलकत्वात् सर्वासु शाखासु एकमेवाग्निहोत्रं कर्मेति ज्ञायते। एवं सोमरसेन्द्रवाय्वादिद्रव्यदेवतात्मकस्य कर्मरूपस्य अभेदो भवति शाखाभेदेऽपि। एवं यजेत इति धात्वर्थानुरक्तभावनात्मिकायाः चोदनायाः सर्वशाखासु अविशेषः। ज्योतिष्टोमादिसमाख्यायाश्च शाखाभेदेऽपि न विशेषः। तस्मात् शाखाभेदेऽपि संयोगरूपचोदनाख्यानां भेदाभावात् शाखाभेदेऽपि अग्निहोत्रस्य कर्मणो न भेदः। एवं ज्योतिष्टोमादेरपि अभेदो ज्ञेयः। तथा च सर्वशाखाप्रत्ययमेकं कर्म।

न नाम्ना स्यादचोदनाऽभिधानत्वात्। १०॥

यदुक्तं पूर्वपक्षिणा काठककालापकादिनामभेदात् कर्मभेद इति तत्राह सिद्धान्ती। भिन्नेनापि ईदृशेन नाम्ना न कर्मभेदः स्यात्। अचोदनाऽभिधानत्वात्, चोदना कर्मोत्पत्तिवाक्यम्। तद्गतमभिधानं नामधेयं चोदनाभिधानम्। तादृशत्वाभावात् काठकादिनाम्नः। उत्पत्तिवाक्यगता संज्ञा कर्म भिनत्ति। काठकादिसंज्ञा तु नोत्पत्तिवाक्यगता। अतो न सा कर्म भेत्तुं शक्नोति। तथा च काठकादिनाम्ना न कर्मभेदः।

सर्वेषां चैककर्म्यं स्यात्। ११॥

काठकादिनाम्ना न कर्मभेद इत्यत्रैव हेत्वन्तरमाह। यदि शब्दभेदात् भेदो भवेत्, तर्हि शब्दैक्यात् कर्मैक्यं स्यात्। तथा च काठकशब्दैक्यात् काठकोक्तानां सर्वेषां अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमानां कर्मणां ऐककर्म्यं स्यात्। तच्चानिष्टम्।

कृतकं चाभिधानम्। १२॥

काठकादिनामभेदात् न कर्मभेदः इत्यत्रैव हेत्वन्तरमाह सिद्धान्ती। काठकादि अभिधानं कृतकं इदानीन्तनम्। यतःप्रभृति कठस्य प्रकृष्टं वचनं ततःप्रभृति काठकं इति नाम प्रवृत्तम्। न च कृतकेन अनादीनां कर्मणां भेदः कर्तुं शक्यते। तस्मात् न नाम्ना भेदः।

एकत्वेऽपि परम्। १३॥

रूपभेदात् कर्मभेदः इति यदुक्तं तत्रोत्तरमाह सिद्धान्ती। एकत्वेऽपि कर्मैकत्वे सत्यपि परमुत्तरं कर्मभेदकारणत्वेन पूर्वपक्षिणा उक्तं संभवति। कर्मैकत्वेऽपि वचनात् व्रीहियववत् विकल्पेन अग्नीषोमीयस्य पुरोडाशस्य एकादशकपालत्वद्वादशकपालत्वयोरुपपत्तिः। तस्मात् न रूपभेदादपि कर्मभेदः।

विद्यायां धर्मशास्त्रम्। १४॥

भूमिभोजनादिधर्मविशेषात् कर्मभेद इति यदुक्तं पूर्वपक्षिणा तत्रोत्तरमाह सिद्धान्ती। धर्मशास्त्रं कारीरीवाक्याध्ययनकाले भूमिभोजनादिव्रतोपदेशकं विद्यायाम्,

न कर्मणि । अध्ययनधर्मः एषः न कर्मधर्मः । अतो न तेन कर्मभेदः सेद्धुमर्हति ।

आग्नेयवत् पुनर्वचनम् । १५ ॥

पुनरुक्त्या कर्मभेदः इति यदुक्तं तत्रोत्तरमाह सिद्धान्ती । पुनर्वचनं शाखाऽन्तरे विहितस्य साङ्गस्य ज्योतिष्टोमादेः कर्मणः अन्यस्यां शाखायां पुनरुक्तिः विद्यमानापि आग्नेयवत् न कर्मभेदिका । 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इति पुनर्वचनं ऐन्द्राग्नस्तुत्यर्थत्वात् यथा न कर्मभेदस्य कारणं तद्वत् ।

अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् ।१६॥

पुनरुक्त्या कर्मभेदः इति यदुक्तं पूर्वपक्षिणा तत्र भङ्ग्यन्तरेणोत्तरमाह सिद्धान्ती । वाशब्दः प्रकारान्तरार्थः । अद्विर्वचनं नैव तत् द्विर्वचनम् । नैव सा पुनरुक्तिः । एकं पुरुषं प्रति पुनःपुनः कथने स्यात् पुनरुक्तिः । भिन्नं पुरुषं प्रति पुनर्वचने तु नैव सा पुनरुक्तिर्नाम । श्रुतिसंयोगाविशेषात् भिन्नैः पुरुषैः सह तत्तच्छाखायाः संयोगात् । श्रुतिसंयोगस्य भिन्नैः पुरुषैः सह तत्तच्छाखायाः संयोगस्य विशेषत्वात् । तस्मात् तत्तच्छाखासु अग्निहोत्रादिकर्मणः भिन्नं पुरुषं प्रति उक्तिः न द्विर्वचनं न द्विरुक्तिः न पुनरुक्तिः ।'तस्मात् तादृश्या पुनरुक्त्या न कर्मभेदः ।

वाक्यासमवायात् । १७ ॥

अत्र वार्तिकम् "अत्रान्तरे भाष्यकारस्य सूत्रं भ्रष्टम् 'वाक्यासमवायात्' इति । तदेवं व्याख्येयम्, 'नैकस्मिन् पुरुषे शाखान्तरवाक्यं समवैति' इति"। तथा च वाक्यस्य शाखाऽन्तरवाक्यस्य एकस्मिन् पुरुषे असमवायात् संबन्धाभावान्न पौनरुक्त्यम् । तस्मात् पौनरुक्त्याभावादेव पूर्वपक्षिणा यदुक्तं पुनरुक्त्या कर्मभेद इति तत् मूलत एव निरस्तम् ।

अर्थासंनिधेश्च । १८ ॥

अर्थ्यते प्रधानेन इति अर्थः अङ्गकाण्डम् । तस्य सर्वस्य अङ्गकाण्डस्य एकस्यां शाखायामसंनिधेः संनिधेरभावात् एकैकस्यां शाखायां केषांचिदेव अङ्गानां विधानात् सर्वासु शाखासु मिलित्वा एकैकं कर्म उच्यते इति सर्वशाखाप्रत्ययमेकं कर्म । इति सिद्धान्ते हेत्वन्तरपरं सूत्रम् । 'अथवा पौनरुक्त्यपरिहारार्थमेव सूत्रम् । तत्र नाम पुनरुक्तता भवति, यत्र पूर्वोक्तोऽर्थः तस्यैव पुंसः संनिहितो भवति । न तु इह शाखाऽन्तरगतस्य संनिधानं इत्यपुनरुक्तता' इति वार्तिकम् ।

न चैकं प्रति शिष्यते । १९ ॥

चशब्दः समुच्चये । शाखाभेदेषु एकस्यापि कर्मणः पुनःपुनरुक्तेः कर्मभेदः इति यदुक्तं पूर्वपक्षिणा तत् निरस्यति विधान्तरेण सिद्धान्ती । अग्निहोत्रादि कर्म प्रतिशाखं नैकमेव पुरुषं प्रति शिष्यते विधीयते । किन्तु अर्थिमात्रं प्रति सर्वशाखासु विधीयमानं एकमेकं पुरुषमुपतिष्ठते । तत्र एकस्य अनेकशाखाश्रवणात् पुनर्वचनतः प्रतिशाखं कर्मभेदे एकार्थत्वात् समुच्चयानुपपत्तौ विकल्पः स्यात् । ततो वरं प्रत्यभिज्ञया कर्मैक्ये सति शाखानामेव पुरुषव्यवस्थया तदाश्रयणं इति एकस्य अनेकशाखाऽध्ययनासंभवात् न पुनरुक्तिः ।

समाप्तिवच्च संप्रेक्षा । २० ॥

कर्मभेदहेतुं समाप्तिवचननिरासार्थमेव सूत्रम् । नहि प्रतिशाखं साङ्गोपाङ्गमेकैकं कर्म पठितम् । क्वचित् कानिचिदङ्गानि अन्यत्र ततो न्यूनानि वा अधिकानि वा पठ्यन्ते । तत्र यत्र यावत् पठितम्, तत्रैव तच्छाखायां तत् कर्म समापितम् । संप्रेक्षा उत्प्रेक्षा व्यपदेशोऽपि 'अत्रास्माकं कर्म समाप्यते' इत्येवंरूपः तत्र भवति । न च तावता तावदेव तत् कर्म इति निश्चेतव्यम् । ऐतरेयके हि द्वादशाहगतानि होतुरेव शस्त्राण्युक्तानि न मैत्रावरुणादीनाम् । न च तावता मैत्रावरुणादीनां शस्त्राणि नैव सन्तीति वक्तुं युक्तम् । तथाच यथा समाप्तिः अनियता तथा संप्रेक्षाऽपि अनियतैवेति क्रमप्राप्तम् । सर्वथाऽपि समाप्तिवत् संप्रेक्षाऽपि न कर्मभेदिकेति निश्चेतुं शक्यते । अत्र वार्तिकम्– असमाप्तिवत् इति वा च्छेदः । (न चैकं प्रति शिष्यते समाप्तिवत् इति सूत्रसंहितायां अकारप्रश्लेषेणापि विच्छेदसंभवः । इति सुधा.) ।

एकत्वेऽपि पराणि निन्दाऽशक्तिसमाप्तिवचनानि । २१ ॥

पूर्वपक्षिणा कर्मभेदकानि यानि उक्तानि तत्र निन्दाऽऽदित्रयं कर्मभेदाभेदयोः समानत्वात् नाहत्य भेदसाधक-

मित्याह सिद्धान्ती । पराणि पुनरुक्तेः परस्तात् पठितानि निन्दा च अशक्तिश्च समाप्तिवचनं चेति त्रीणि कर्मणामेकत्वेऽपि उपपन्नानि इति न भेदसाधकानि । तथाहि, नहि निन्दा निन्द्यं निन्दितुं प्रयुज्यते किं तर्हि निन्दितादितरत् प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते किन्तु इतरस्य विधिः । तत्र एकस्मिन् अग्निहोत्रहोमे प्रातःकालीने द्वौ कालौ विहितौ सूर्योदयात् प्राक् पश्चाच्चेति । तौ विकल्प्येते । अतो न कश्चित् विरोधः । **तथा** एकस्मिन्नपि वेदे असमर्थानां विहितं कृत्स्नमङ्गजातं उपसंहर्तुं अशक्तिः । समर्थानां तु सर्वशाखाभ्योऽपि आगमितमधिकं विधिं उपसंहर्तुं शक्तिरस्तीति । तेन एककर्मत्वेऽपि न विरुद्धमिति । **तथा** एकस्मिन्नपि कर्मणि किञ्चिद्वस्तु समाप्तमिति कृत्वा समाप्तिशब्दः प्रयुज्यते । यथा आध्वर्यवे समाप्ते हौत्रे वा 'संतिष्ठते अग्निष्टोमः' इति भवति । न च तावता सर्वोऽग्निष्टोमः समाप्तो भवति ।

प्रायश्चित्तं निमित्तेन । २२ ॥

निमित्तेन उदितानुदितकालातिक्रमेण यत् प्रायश्चित्तमुक्तं तेन कर्मभेदः सिध्यतीति यदुक्तं तस्य कः परिहार इति । आभाषान्तं सूत्रम् । अथवा निमित्तेन निमित्तविशेषेण प्रायश्चित्तं भविष्यति । न च तावता कर्मभेदसिद्धिः, कर्मैक्येऽपि संभवात् । इति सामान्यपरिहारसूत्रमिदम् ।

प्रक्रमाद्वा नियोगेन । २३ ॥

पूर्वपक्षोक्तकर्मभेदसाधकप्रायश्चित्तहेतोः विशेषरूपेण निरासमाह सिद्धान्ती । वाशब्दः उक्तसामान्यपरिहारवैलक्षण्यार्थः । नियोगेन वैकल्पिकानां पदार्थानां प्रयोगादौ एकतरनिर्धारणेनैव प्रयोगस्य प्रक्रमात् उपक्रमात् उदिते होष्यामीति निर्धार्य प्रक्रान्ते प्रातरग्निहोत्रहोमे उदयात् प्रागेवानुष्ठिते सति दोषः । एवं अनुदिते होष्यामीति प्रक्रम्य उदितहोमप्रयोगेऽपि । अत्र उभयथाऽपि प्रायश्चित्तविधानं कर्मैकत्वेऽपि उपपद्यते । तस्मात् प्रायश्चित्तविधानात् न कर्मभेदः ।

समाप्तिः पूर्ववत्त्वात् यथाज्ञाते प्रतीयेत । २४ ॥

'एकत्वेऽपि पराणि०' इति सूत्रे (२१) पराणि इति सामान्यतः परिहार्यत्वेन उपक्षिप्तानि । सिंहावलोकितन्यायेन पुनः समाप्तिं उपपादयति । समाप्तिः मैत्रायणीयानां अन्वारोहेषु अग्निसमाप्तिवचनम्, यथाज्ञाते यावत् पदार्थजातं तच्छाखायामाम्नातम्, तद्विषयतया प्रतीयते । पूर्ववत्त्वात् शब्दप्रयोगस्य तात्पर्यपूर्वकत्वात् । तात्पर्यं चात्र तच्छाखाविहितपदार्थजातसमाप्तिपरत्वम् । इति कर्मैकत्वेऽपि न विरोधः । 'समाप्तिवच्च संप्रेक्षा' (२०) इत्यत्र कर्मैकत्वे लिङ्गमुपपादितम्, इह तु कर्मैकत्वे विरोधः परिहृतः इत्यपौनरुक्त्यम् ।

लिङ्गमविशिष्टं सर्वशेषत्वान्नहि तत्र कर्मचोदना, तस्माद् द्वादशाहस्याहारव्यपदेशः स्यात् । २५ ॥

पूर्वपक्षोक्तं प्रथमं लिङ्गदर्शनं निराचष्टे । यत् लिङ्गमुक्तं अनिष्टप्रथमसोमानामपि द्वादशाहसत्रवचनमिति, तत् अविशिष्टं ममेव तवापि अनुपपन्नम् । कुतः ? सर्वशेषत्वात् ताण्डके सर्वशाखागतज्योतिष्टोमानुवादेन प्राथम्यविधानात् । नहि तत्र ताण्डके अपरस्यापि ज्योतिष्टोस्य चोदना उत्पत्तिरस्ति, येन तत्रत्यज्योतिष्टोममात्रविषयं प्राथम्यविषयं स्यात् । तस्मात् कर्मभेदपक्षेऽपि अनिष्टप्रथमसोमानां द्वादशाहे दर्शनस्य विरोधात् तत्परिहारार्थम् 'यदि पुरा द्वादशाहेन दिदीक्षाणाः, यदि पुरा द्वादशाहेन अदिदीक्षाणाः' इति चाध्याहारेण द्वादशाहस्य पक्षद्वयेऽपि आहारस्य अनुष्ठानस्य व्यपदेशः स्यात् ।

द्रव्ये चाचोदितत्वाद् विधीनामव्यवस्था स्यात्, निर्देशाद् व्यवतिष्ठेत, तस्मान्नित्यानुवादः स्यात् । २६ ॥

द्वितीयं लिङ्गदर्शनं निराह । द्रव्ये चयनाग्निरूपे वेदिसंमितत्वस्य अचोदितत्वात् चोदनाया अभावात् पक्षसंमितत्वस्य विधेः आर्थिकत्वेन, वेदिसंमितत्वस्य विधेः स्तुतिकल्पनया कल्पितस्य, रथाक्षान्तरालत्वस्य विधेश्च श्रौतत्वेन अव्यवस्था विधीनां स्यात् संभाव्येत । संभावनायां लिङ् । ननु रथाक्षान्तरालवाक्यस्य तर्हि क्वावकाशः ? तत्राह— निर्देशात् अनग्निचित्ये सर्वस्तोमादिक्रतौ यूपैकादशिन्याः निर्देशात् तत्र व्यवतिष्ठेत । तत्र तद्वाक्यस्य साकल्यम् । तस्मात् वेदिसंमितत्वरथाक्षान्तरालत्वयोर्विहितत्वात् पक्षसंमितायाः नित्यानुवादः स्यात् 'नान्तरिक्षे न दिवि' इतिवत् ।

विहितप्रतिषेधात् पक्षेऽतिरेकः स्यात् । २७ ॥

द्वित्रस्तोत्रियातिरेकरूपं तृतीयं लिङ्गदर्शनं निराचष्टे । अतिरात्रे विहितस्य षोडशिग्रहस्य पुनः प्रतिषेधात् पक्षे ग्रहणपक्षे तिसृणाम् अग्रहणपक्षे च द्वयोः अतिरेकः स्यात् । तथा च अतिरात्रकर्मणः अभेदेऽपि अतिरेकभेदः संभवति । तथाहि, षोडशिग्रहणपक्षे, बहिष्पमाने नव स्तोत्रिया ऋचः, चतुर्षु आज्यस्तोत्रेषु माध्यंदिने पवमाने च पञ्चदशस्तोमकत्वात् मिलित्वा पञ्चसप्ततिः, पृष्ठस्तोत्रेषु चतुर्षु, आर्भवे च पवमाने सप्तदशस्तोमकत्वात् पञ्चाशीतिः, अग्निष्टोमस्तोत्रे त्रिषु उक्थ्यपर्यायेषु षोडशिनि च एकविंशस्तोमकत्वात् पञ्चोत्तरं शतम्, अतिरात्रस्तोत्रेषु द्वादशसु पञ्चदशस्तोमकत्वात् अशीत्युत्तरं शतम्, रथंतरे नव । तत्र सर्वेषां मेलने (९+७५ +८५+१०५+१८०+९=४६३) त्रिषष्टयुत्तरशतचतुष्टयोपजननात् दशकेन भागे दत्ते तिस्रः अवशिष्यन्ते । षोडशिग्रहणाभावपक्षे तु एकस्याः षोडशिग्रहार्थायाः एकविंशतेः अगणने द्विचत्वारिंशदुत्तरचतुःशतोपजननात् दशकेन भागदाने द्वे अवशिष्येते इति ।

सारस्वते विप्रतिषेधात् यदेति स्यात् । २८ ॥

अनिष्टप्रथमसोमानामपि सारस्वतसत्रदर्शनं इति चतुर्थं मन्यार्थदर्शनं उच्छिनत्ति । सारस्वते सत्रे मित्रावरुणयोरयनाख्ये विप्रतिषेधात्, सर्वेषामेव ज्योतिष्टोमविकाराणां क्रतूनां अग्निष्टोमपूर्वकत्वेन ‘ये पुरोडाशिनः’ इति पुरोडाशदर्शनविरोधस्य कर्मभेदवादिमतेऽपि दुर्वारत्वात् सर्वैरेव तद्विरोधवारणाय ‘यदा’ इति पदं अध्याहर्तव्यं स्यात् । यदा पौर्णमास्यां पुरोडाशिनः, यदा अमावास्यायां सांनाय्यिनः इत्यर्थो वक्तव्यः । तथा च नेदमन्यार्थदर्शनं कर्मभेदसाधकम् ।

उपहव्ये प्रतिप्रसवः । २९ ॥

पञ्चममन्यार्थदर्शनं निरासाय सूत्रकारोऽनुवदति । प्रतिप्रसवः अप्रतिप्रसवः इति उभयथा छेदः । वार्तिकेन नञ्सहितः पाठः सूचितः इति सुधा. । प्रतिप्रसवः पुनर्विधानम् । उपहव्ये रथंतरबृहत्साम्नोः शाखाद्वयविहितयोः प्रकृतितः प्राप्तत्वात् कर्मभेदे तत्तच्छाखास्थोपहव्ये व्यवस्थया तत्तत्सिद्ध्यर्थं प्रतिप्रसवः पुनर्विधानं इति पूर्वपक्षी ब्रूते । अप्रतिप्रसवः प्रतिप्रसवाभावः पुनर्विधानानर्थक्यं इति सिद्धान्ती ब्रूते ।

गुणार्था वा पुनःश्रुतिः । ३० ॥

एवमाभाष्य उत्तरमाह । वाशब्दः शङ्कानिवृत्त्यर्थः । पुनःश्रुतिर्गुणार्था स्यात् । यदा रथंतरसामा तदा अश्वः श्यावो दक्षिणा, यदा बृहत्सामा तदा अश्वः श्वेतो रुक्मललाटः इति दक्षिणाविशेषरूपगुणार्था गुणविधानार्था पुनःश्रुतिः इति ।

प्रत्ययं चापि दर्शयति । ३१ ॥

सर्वशाखाप्रत्ययमेकं कर्म इत्यत्र प्रमाणमाह । चापि अपिच इति निपातसमुदायः पूर्वोक्तैः प्रमाणैः समुच्चयार्थः । सर्वास्वपि शाखासु एकस्यैव कर्मणः प्रत्ययं विधानं दर्शयति वेदः । मैत्रायणीयानां समिदादयः प्रयाजा न समाम्नायन्ते गुणास्तु श्रूयन्ते ‘ऋतवो वै प्रयाजाः समानीय होतव्याः’ इति । तथा येषां शाखिनां ‘कुटरुरसि’ इति अश्मादानमन्त्रो नाम्नातः तेषामपि ‘कुक्कुटोऽसि इत्यश्मानमादत्ते, कुटरुरसि इति वा’ इति । तस्मादेकं कर्म इति प्रतीमः ।

अपिवा क्रमसंयोगाद् विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत । ३२ ॥

अपिवाशब्दः प्रत्यवस्थानार्थः । शाखान्तरेषु कर्मभेद एव इति पूर्वपक्षी प्रतिपादयति । न प्रतिशाखं एकमेव कर्म । विधिशब्दः कर्मव्युत्पत्त्या विधेयपरः, एकस्यां इति पदे च वीप्सा विवक्षिता । एकैकस्यां शाखायां सर्वासु शाखासु इत्यर्थः । कर्मणां क्रमेण संयोगात् संबन्धात् विधिपृथक्त्वं विधेयपृथक्त्वं कर्मपृथक्त्वं व्यवतिष्ठेत । सर्वाङ्गोपसंहारे क्रियमाणे तु क्रमकालपरिमाणभेदापत्तिः । भेदे तु स्वशाखाविहितानामेव अङ्गानां पाठादिबोधितः क्रमः पूर्वाह्णादिकालः अङ्गपरिमाणं चानुगृहीतं भवति ।

विरोधिनां त्वसंयोगादैककर्म्ये तत्संयोगाद् विधीनां सर्वकर्मप्रत्ययः स्यात् । ३३ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति । ऐककर्म्ये सर्वशाखासु एककर्मत्वे सति विधीनां सर्वशाखास्थानां विधिपदोक्तानां विधेयानामङ्गानां तत्संयोगात् तेन एकेन कर्मणा संयोगावगतेः विरोधिनां पूर्वपक्षोक्तानां क्रमकालपरिमाणानां

असंयोगात् संयोगाभावात् सर्वप्रत्ययः सर्वशाखास्थानामङ्गानां एककर्माङ्गत्वप्रत्ययः स्यात् । तस्मात् सिद्धः शाखाऽन्तरे उत्पत्तिप्रयोगभेदवत् विनियोगभेदोऽपि । ततश्च सर्वशाखाप्रत्ययमेकं कर्म इति सिद्धान्तः । के.

* **नामलक्षणम्** 'येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि' (सूत्रम्)। येषां शब्दानां उत्पत्तौ उच्चारणोत्पत्तौ स्वे अर्थे प्रयुज्यमानानाम् (न तु लाक्षणिकादीनाम्) रूपमुपलभ्यते, यत् सकृदुत्पन्नं कालान्तरं तिष्ठति, न क्रियेव उत्पन्नमात्रं विनश्यति, तानि नामानि द्रव्यगुणशब्दाः । ... ते द्रव्यगुणशब्दा इति वक्तव्ये तानि नामानीति सूत्रितं अतो नामानीत्येषां पर्यायशब्दः । भा. २।१।१।३.

* **नामशब्दः** ईषदर्थे । सु. पृ. १३५. * **नामशब्दाः** धातवश्च बहवः प्रतिदेशं अर्थभेदेषु व्यवस्थिता दृश्यन्ते । तथा चोक्तम् 'शवतिर्गतिकर्मा कम्बोजेष्वेव दृष्टः, विकारापन्नं आर्याः प्रयुञ्जते 'शवम्' इति मृतशरीराभिधानम्, इत्यादि'। वा. १।३।४।९ पृ. २१७.

* **नामसंबन्धः** पदत्रयाद्विना नावकल्पते । वा. ३।१।७।१४ पृ. ७१०.

* **नामिनाम्नोः** संबन्धः औत्पत्तिक इत्युक्तम्। भा. ६।८।१०।४१.

* **नामिक्यः विभक्तयः** वृक्षः वृक्षौ वृक्षाः, शुक्लः शुक्लौ शुक्लाः इत्येवमादयः । भा. २।१।१।३.

* **नामधेयं** अग्निहोत्रशब्दः (१।४।३) पुनरुच्चार्यमाणो धर्मातिदेशकः कुण्डपायिनामयने । वा. ७।३।१।१, * नामधेयं अप्रसिद्धार्थे आख्यातवशं भवेत् । शा. ४।४।११. * नामधेयं अर्थवादस्थं न धर्मातिदेशकं इत्यष्टमे वक्ष्यामः । रत्न. ५।३।९।२१–२५. * नामधेयं 'आज्यम्' इति स्तोत्रविशेषस्य । के. १।४।२।३. * नामधेयं आदितस्तावत् आख्यातपरतन्त्रत्वात् नैव भेदाभेदयोर्व्याप्रियते । के. * नामधेयं कश्चिद् वेदभागः उद्भिद् बलभिद् इत्यादिः । के. * नामधेयं गोशब्दः यागस्य 'गवाभिचर्यमाणो यजेत'। वि. १।४।५. * नामधेयं ग्रहविशेषयोः अदाभ्यांशुशब्दौ । के. २।३।९।२०. * नामधेयं चित्रापदं यागविशेषस्य 'चित्रया यजेत पशुकामः' इति । वि. १।४।३. * नामधेयं चोदकात् बलीयः । कुतः ? प्रत्यक्षत्वात् । प्रत्यक्षं नामधेयम्, चोदकं तु आनुमानिकम् । भा. ७।४।३।१५ । नामधेयं श्रूयमाणं लक्षणया शक्नोति इतिकर्तव्यतामवगमयितुमात्मीयाम्। चोदकस्तु उपमितलक्षितप्रापणेन अवगमयति । टुप्. * नामधेयं दर्विहोमशब्दः कर्मणः, न गुणविधिः । भा. ८।४।१।१,५–९, * नामधेयं दर्विहोमशब्दः जुहोतिचोदनानाम्, न तु यजतिचोदनानाम् । ८।४।३।४, * नामधेयं दर्विहोमशब्दः स्मार्तानां स्थालीपाकादीनां वैदिकस्य च वास्तुहोमादेः । ८।४।२।२–३. * नामधेयं धर्मे प्रमाणम् । मणि. पृ. १३. * नामधेयं न 'आग्नेयोऽष्टाकपालः' इति आग्नेयादिशब्दाः, किंतु गुणविधयः। वि. १।४।७. * नामधेयं निरूढानिरूढत्वेन द्विविधम् । सु. पृ. ४३०. * नामधेयं बहिष्पवमानशब्दः स्तोत्रविशेषस्य । वि. १।४।३. * नामधेयं (तत्) यच्च यजमानतत्पुत्रादीनां नामग्रहणम्, यथा सुब्रह्मण्यायां 'देवदत्तो यजते' इत्यादि। स न मन्त्रः। वा. २।१।९।३४ पृ. ४३७. * नामधेयं यागस्य उद्भिदादिशब्दाः उद्भिद् बलभिद् विश्वजित् इति । वि. १।४।२. * नामधेयं यागपरिच्छेदकतया धर्मे प्रमाणम् । के. १।४।१. * नामधेयं यागविशेषस्य आघारशब्दः 'आघारमाघारयति'। भा. १।४।४।४. * नामधेयं यागविशेषस्य श्येनशब्दः । वि. १।४।५. * नामधेयं लक्षणया धर्माणां ग्राहकमुक्तम् । भा. ७।३।२।५, * नामधेयं वाजपेयशब्दः यागविशेषस्य । वाजपेयाधिकरणम् । १।४।५।६–८. * नामधेयं वैश्वदेवशब्दः चातुर्मास्यप्रथमपर्वणः । वि. १।४।११, * नामधेयं संदंशशब्दः यागविशेषस्य 'संदंशेनाभिचरन् यजेत' । १।४।५. * नामधेयं समित् तनूनपात् इत्यादयः शब्दाः । 'समिदादिशब्दकत्वात्तु यजीनां समिदादिशब्दाः वाचकाः (यागविशेषाणाम्) उपपद्यन्ते'। भा. ९।२।२०।६०. * नामधेयं स्तोत्रविशेषस्य पृष्ठशब्दः । वि. १।४।३.

* **नामधेयस्यापि** वेदत्वेन अंशत्रयान्तःपातावसायात् । (विधिः अर्थवादः मन्त्रः इत्यंशत्रयम् । तत्र कर्मपरिच्छेदकतया विधौ अन्तर्भावः)। सु. ३९४, * नामधेयस्य गुण-

फलोपबन्धोपयोगित्वेन अर्थवत्त्वं भविष्यति (इति चेन्न), विधित एव यागविशेषावधारणसिद्धेः गुणफलोपबन्धोऽपि सेत्स्यति इति । पृ. ३९४. * नामधेयस्य विध्यंशे करणे अन्तर्भावः । **वि.** १।४।१. * **नामधेयानां** कर्मभेदो गुणफलोपबन्धः संकल्पलाघवं च प्रयोजनम् । **मणि**. पृ. ५. * नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्त्वम् । **मीन्या.**

⌛ नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् । १।४।६।६ ॥

अस्ति वाजपेयो 'वाजपेयेन स्वाराज्यकामो यजेत' इति । तत्र गुणविधिः कर्मनामधेयमिति संदेहः । उद्भिदधिकरणे यौगिकशब्दानां मत्वर्थलक्षणादोषेण, चित्राऽधिकरणे च सांविज्ञायिकशब्दानां वाक्यभेददोषेण नामधेयत्वे व्युत्पादिते यौगिकसांविज्ञायिकशब्दयोरेव उदाहरणविशेषेषु अपवादमाशङ्क्य तत्प्रख्यतद्व्यपदेशाभ्यां तन्निराकरणे कृते, इदानीं उद्भिदधिकरणचित्राधिकरणसिद्धान्तहेत्वाक्षेपेण पुनः प्रत्यवतिष्ठते । अत्रायं पूर्वपक्षिणोऽभिसंधिः । सामानाधिकरण्येन हि गुणविधाने मत्वर्थलक्षणादोषो भवति, न तु वैयधिकरण्येन । तेनेह 'वाजपेयेन स्वाराज्यकामो यजेत' इति तन्त्रोच्चारितोऽयं यजिः 'यागेन स्वाराज्यं वाजपेयेन तु यागम्' इत्येवं संपत्स्यते, मत्वर्थलक्षणा च न भविष्यति । तदुक्तम् '**करणेषूपदिष्टेषु याऽर्थात् साध्यत्वकल्पना । तस्यां गुणविधानेन नास्ति मत्वर्थलक्षणा ॥**' इति । (वा. पृ. ३३७) । न च एवं सति विरुद्धत्रिकद्वयापत्तिलक्षणो वाक्यभेदोऽपि । यतो गुणत्वेन प्रधानत्वेन वा एकपदोपात्तस्य पुनरुपादाने पदावृत्तिलक्षणो वाक्यभेदो भवति । इह तु गुणप्रधानसाधारणरूपेण तन्त्रोच्चारितस्यैव उभयरूपप्राप्तेः न पदावृत्तिलक्षणो वाक्यभेदः । एवम् 'पञ्चदशान्याज्यानि' इत्यत्रापि तन्त्रोच्चारिताज्यपदोपनीतस्याज्यस्य स्तोत्र–पञ्चदशसंख्याऽन्वयसहिष्णुत्वात् कुतो वाक्यभेदः ? । एवं च सति उद्भिदधिकरणचित्राधिकरणोक्तमत्वर्थलक्षणावाक्यभेदयोरसंभवात् प्रसिद्धिबलवत्त्वेन प्रयोजनवत्तया च प्रवृत्तिविशेषकरत्वेन च गुणविधित्वमेव युक्तम् । तदुक्तम् 'करणेषूपदिष्टेषु' इति । **ननु** एवं सति उद्भिदादिवाक्यान्येव उदाहृत्य विचारयितुमुचितम्, वाजपेयोदाहरणं कुतः? **सत्यम्** । तान्यप्यत्रोदाहरणान्येव । किन्तु वाजपेयवाक्यमपि परिशोधितं भवति इत्येतदर्थमुदाहृतम् । तेन नामधेयत्वेन सिद्धान्त्यभिमतेषु पदेषु अवश्यं कस्यचिदुद्भिदादिषु वाजपेयलक्षणस्य गुणस्य श्रुतस्य अस्मदुक्तन्यायेन विधानमेव । इत्येवं प्राप्ते, अभिधीयते ।

ऐकशब्द्ये परार्थवत् । ८ ॥

अयमभिप्रायः । भवेदेवं यदि अत्रापि यजिपदावृत्तिलक्षणो वाक्यभेदो न भवेत् । तथाहि, 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यत्र यद्यपि यजिना गुणप्रधानसाधारणो यागरूपोऽर्थोऽभिहितः, तथापि न तद्रूपं वाक्यार्थान्वययोग्यम् । तेन वाक्यार्थान्वययोग्यं यद्रूपमस्य तत्परत्वमेव यज्युच्चारणस्य वक्तव्यम् । तच्च रूपं फलसंबन्धाय साधनत्वेन गुणरूपं तावदवश्याभ्युपेतव्यम् । एवं विधेयमुपादेयं च । न च तेन रूपेण गुणसंबन्धः संभवति, गुणस्यापि साधनत्वेनान्वयात् । ततश्च गुणसंबन्धाय साध्यत्वेन प्रधानरूपमपि वक्तव्यम् । एवमुद्देश्यमनुवाद्यं च । न चैकोच्चारणस्य विरुद्धगुणप्रधानाद्युभयपरत्वं संभवति इति यजिपदोच्चारणावृत्तौ पदावृत्तिलक्षणो वाक्यभेदो दुष्परिहर एव । यत्र पुनः प्रधानरूपपरं गुणरूपपरं वा एकमेवोच्चारणं नानापदार्थसंबन्धयोग्यम्, तत्रागृह्यमाणविशेषत्वात् भवतु तन्त्रत्वमुच्चारणस्य । यथा 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इत्यत्र द्रव्यगुणसंबन्धाय क्रयस्य प्रधानत्वेनैव तन्त्रोच्चारणम् । यथा च 'दशापवित्रेण ग्रहं संमार्ष्टि' इत्यत्र दशाग्रहसंबन्धाय संमार्गस्य गुणत्वेन तन्त्रोच्चारणमिति । तदुक्तम् '**तन्त्रत्वमैकरूप्येण भवेत्तुल्योपकारतः । उपकारान्यथात्वे तु भवत्यावृत्तिलक्षणम् ॥**' (वा. पृ. ३३८) इति । प्रसिद्ध्यादयश्च नामधेयत्वेऽपि अविशिष्टा एव । अतो वाजपेयादिपदानामपि नामधेयत्वमेवेति । **प्रयोजनं** पूर्वपक्षे वाजपेयशब्दस्य यवागूवचनत्वात् ओषधिद्रव्यत्वेन दार्शपूर्णमासिकविध्यन्तप्रवृत्तिः । सिद्धान्ते तु नामधेयत्वेन द्रव्यदेवताऽभावात् अव्यक्तचोदनात् सौमिकविध्यन्तप्रवृत्तिरिति । **भाष्यकारेण** पुनः सर्वनामधेयानामेव यथायथं गुणफलोपबन्धः प्रयोजनमुक्तम् । तदुक्तं भाष्य-

कारेण 'नामधेयमपि गुणफलोपबन्धेनार्थवत्' इति (भा. १।४।१।२ पृ. ३२६)। **सूत्रं तु--** ऐकशब्द्ये सुकृदुच्चरितशब्दाभिधेयत्वे परार्थवत् परसंबन्धवत् उद्देश्यत्वमनूद्यमानत्वं प्रधानत्वं च स्वार्थत्वेन उपादेयत्वं विधेयत्वं गुणत्वं चेति विरुद्धत्रिकद्वयापत्तिरेव सूत्रिता इति प्रतिपत्तव्यम्। **तौता.**

नामधेये गुणश्रुतेः स्याद् विधानमिति चेत्। १।४।५।६ ॥

'वाजपेयेन स्वाराज्यकामो यजेत' इति वाजपेयशब्दः किं गुणविधिः, कर्मनामधेयं वेति विचारे पूर्वपक्षमाह। नामधेये नामधेयत्वेन संभाविते वाजपेयादिशब्दे गुणश्रुतेः गुणस्य अन्नाख्यस्य वाजस्य श्रुतेः तस्यैव विधानं स्यात्।

तुल्यत्वात् क्रिययोर्न। ७॥

वाजपेयशब्दो गुणविधिः इति यदुक्तं पूर्वपक्षिणा तत् न। क्रिययोः वाजपेयशब्दलभ्ययवाग्वादिद्रव्यकायाः अस्या वाजपेयक्रियायाः दर्शपूर्णमासक्रियायाश्च तुल्यत्वात् तुल्यत्वप्रसङ्गात् 'सप्तदशदीक्षो वाजपेयः' 'सप्तदशोपसत्को वाजपेयः' इति दीक्षोपसद्दर्शनं नावकल्पेत। गुणविधित्वपक्षे अयं दोषः प्रसज्येत। तस्मान्न गुणविधिः।

अथवा न गुणविधिः। कुतः ? क्रिययोः वाजपेयक्रियायाः ज्योतिष्टोमक्रियायाश्च तुल्यत्वात् वाजपेये दीक्षाणामुपसदां च दर्शनमुपपद्यते। तस्मात् कर्मनामधेयम्।

ऐकशब्द्ये परार्थवत्। ८॥

हेत्वन्तरेण गुणविधिपक्षं निरस्यति। पूर्वसूत्रात् नेतिपदमनुवर्तते। 'यजेत' इति ऐकशब्द्ये सति तस्य परार्थवत् उच्चारणं न युक्तं इति सूत्राक्षरार्थः। यजेत इति अपूर्वविधित्वेन उपादेयत्वेन गुणत्वेन च अभिहितस्य यागस्य, परार्थवत् गुणविधानार्थवत् अनुवादत्वेन उद्देश्यत्वेन प्राधान्येन च अभिधानं न युक्तं विरुद्धत्रिकद्वयप्रसङ्गात् इति भावः। तस्मान्न वाजगुणविधिः। किन्तु कर्मनामधेयं वाजपेयशब्दः। **के.**

* सर्वेष्वेव कर्मनामधेयेषु अर्थसमन्वयेन अनुवादभूतो नामशब्दो वर्तते न लौकिकार्थतिरस्कारेण परिभाषामात्रेण वृद्धिगुणवत्। यथा अग्निहोत्रं श्येनः ज्योतिष्टोमः इति। एवं द्वादशाहः इति अर्थान्वयेन नामधेयं नार्थाभावेन। **भा. १०।६।१३।४१.**

* **नामधेयाधिकरणे** विधिस्तुतिस्मृतिवत् नामधेयत्वमपि प्रामाण्यद्वारं भवति वा न वा इति चिन्तयिष्यते। उद्भिदधिकरणं द्रष्टव्यम्। **सु. पृ. ११५.** * वार्तिककाराणां पदार्थोपस्थितेः पदशक्तिसाध्यत्वात् तदर्थं सर्वत्र पदाध्याहाराङ्गीकारेऽपि नामधेयान्वये व्युत्पत्त्यन्तराश्रयणमस्त्येव। तथा च स्वयमेव व्युत्पादितं **नामधेयाधिकरणे। अद्वैत.** २।२।६१०–६११

* **नामधेयाधिकरण – सिद्धान्ताभिधानार्थस्यापि** सूत्रस्य आवृत्त्या 'ततश्च अन्यथा क्रियाऽर्थत्वासंभवात् पारिशेष्यात् गुणविधिः' इत्यध्याहारेण एतदधिकरणपूर्वपक्षेऽपि योजना शक्या इति मत्वा तन्निरासार्थत्वेन अपिवाशब्दो व्याख्यातः। सु. पृ. ४०२. * आद्याधिकरणोक्त- (**नामधेयाधिकरणोक्त-**) उत्पत्तिशिष्टगुणविधि–नामधेयत्वरूपप्रकारद्वयस्य (वैश्वानराधिकरणे) अपवादात्। **कौ.** १।४।१२।१७.

* **नामधेयत्वं** गुणविधित्वेन बाध्यते निरूढेषु। **बाल.** पृ. १४५. नामधेयत्वं च निमित्तचतुष्टयात्। १ मत्वर्थलक्षणाभयात् उद्भिद् शब्दो नामधेयम् 'उद्भिदा यजेत पशुकामः'। २ वाक्यभेदभयात् चित्राशब्दो नामधेयम् 'चित्रया यजेत पशुकामः'। ३ तत्प्रख्यशास्त्रात् अग्निहोत्रशब्दो नामधेयम् 'अग्निहोत्रं जुहोति' 'समिधो यजति'। ४ तद्व्यपदेशात् श्येनशब्दो नामधेयम् 'श्येनेनाभिचरन् यजेत'। उत्पत्तिशिष्टगुणबलीयस्त्वात् 'वैश्वदेवेन यजेत' इति वैश्वदेवशब्दो नामधेयं इति केचित्। **के.** * नामधेयत्वं तत्प्रख्यशास्त्रात्। तत्र हि विधित्सितो गुणोऽन्यतः प्राप्तः अग्निर्देवता। मिश्रास्तु– यः शब्दो यत्र कर्मणि यद्गुणसंबन्धं बोधयति, स चेत् संबन्धः शास्त्रान्तरप्रतिपन्नः तदा तस्य शब्दस्य तन्नामधेयत्वं तत्प्रख्यशास्त्रात्। तच्च शास्त्रान्तरं विधिर्वा अर्थवादो वा। अग्निहोत्रशब्दे विधिः। वैश्वदेवशब्दे चार्थवादः। ज्योतिष्टोमशब्देऽपि अर्थवाद एव। **मीन्या.**

* **नामधेयत्वेन** गुणविधित्वं बाध्यते यौगिक–प्रसजद्वाक्यभेद–तत्प्रख्य–तद्व्यपदेशेषु । **बाल. पृ. १४५.**

* धातुसामानाधिकरण्यं विना **नामधेयत्वायोगः** । **सु. पृ. ३९६.**

* **नामधेयन्यायः** । नामधेयप्रामाण्याधिकरणम् । उद्भिदधिकरणं द्रष्टव्यम् । **भा.** १।४।१।१ वर्णकं १,२.

* **नामधेयपादः** नाम प्रथमाध्यायस्य चतुर्थः पादः । **के.** * **नामधेयपादे** (१।४) नामधेयानां धर्मप्रमोपयोगोऽस्ति न वा इति इह विचारार्थः । तत्सिद्ध्यर्थं च एषां विध्यादित्रयान्यतमान्तःपातोऽस्ति, उत नेति चिन्तनीयम् । **सु. पृ.** ३९३. * आद्येऽधिकरणे (**नामधेयप्रामाण्याधिकरणे**) गुणविधित्वनामधेयत्वरूपान्यतरप्रकारेण सर्वेषामुपपदानां प्रामाण्यं साधितम् । **कौ.** १।४।८।१० पृ. २३४.

* **नामधेयबलीयस्त्वं** चोदकनामधेययोर्विरोधे सिद्धान्तितं सप्तमान्त्ये । **सु. पृ. ४८१.**

* **नामधेयभेदात्** कर्मभेदः । **के.** २।१।१।१.

* अपूर्व**नामधेयसंयोगो** भेदहेतुः । **सु. पृ. ९४५.**

* **नायनशक्तिः** अङ्गुलिभिन्ना एकमपि भिन्नमिव गृह्णाति (चन्द्रादिकम्) । **बृहती. पृ. २२८.**

⌛ **नारिकेलजलन्यायः** । नारिकेले जलं कथमायातं इति न ज्ञायते तद्वत् । **संग्रहः.**

⌛ **नारिकेलफलाम्बुन्यायः** । यथा दृढावयवसंयोगवति नारिकेलफले कथं जलमायातमिति न तर्कगोचरतामेति, तथा आगता लक्ष्मीर्नैव लक्ष्यते । उक्तं च ‘आगता लक्ष्यते नैव नारिकेलफलाम्बुवत्’ इति । लक्ष्मीरिति शेषः । **साहस्री.** २६८.

* **नारिष्ठाधिकरणप्रतिपाद्यः न्यायः** ‘आगन्तुकानामन्ते निवेशः’ इति । **के.** ५।२।९।१७–२०.

* **नारिष्ठन्यायः** । उपहोमन्यायः इति बिन्दौ द्रष्टव्यम् । **के.** ५।२।९।१७–२०. * अभिषेचनीये चोदकप्राप्तमङ्गजातं **नारिष्ठन्यायेन** प्रथमं समाप्य पश्चात् विदेवनादयः कर्तव्याः इति पूर्वः पक्षः । **वि.** ५।२।१०.

* **नारिष्ठहोमः** प्रकृतौ प्रधानहोमादूर्ध्वं विहितः ‘नारिष्ठान् होमान् जुहोति’ इत्युक्तत्वात् ‘दश ते तनुवो यज्ञ यज्ञियाः’ इत्यादयस्तत्र मन्त्राः । **वि.** १०।४।१.

* **नारिष्ठहोमाः** सर्वेष्टिषु सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः । **भा.** ८।४।५।१८, * **नारिष्ठहोमेभ्यः** पराञ्चः उपहोमा नक्षत्रेष्टिषु । ५।२।९।१९, * **नारिष्ठहोमेऽपि** हि जुहोतिचोदना ‘नारिष्ठान् जुहोति’ इति । ८।४।५।१९, * **नारिष्ठहोमेषु** प्रकरणेन वषट्कारः प्राप्नोति तन्मन्त्रपदैरेकवाक्यत्वात् स्वाहाकारः । वाक्यं च प्रकरणात् बलीयः । ८।४।५।१७.

⌛ **नारिष्ठहोमादीनां आतिदेशिकानां नक्षत्रेष्ट्यादौ उपदिष्टैरुपहोमादिभिः समुच्चयः ॥**

प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं विकृताबधिकं स्यात् । १०।४।१।१॥

भाष्यम्— अस्ति अग्निः ‘य एवं विद्वान् अग्निं चिनुते’ इति । तत्र नक्षत्रेष्टिः ‘अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्, सोऽत्र जुहोति अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, अम्बायै स्वाहा, नितत्न्यै स्वाहा, अभ्रयन्त्यै स्वाहा, मेघयन्त्यै स्वाहा, वर्षयन्त्यै स्वाहा, चुपुणीकायै स्वाहा’ इति । सन्ति तु प्रकृतौ नारिष्ठहोमाः ‘नारिष्ठान् होमान् जुहोति’ इति । तत्र संशयः किं नारिष्ठहोमानां निवृत्तिः, अथवा अनिवृत्तिः समुच्चय इति ।

तथा श्येने श्रूयते ‘लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति’ इति । अस्ति प्रकृतौ ‘निवीतं मनुष्याणाम्, प्राचीनावीतं पितृणाम्, उपवीतं देवानाम्, उपव्ययते देवलक्ष्ममेव तत् कुरुते’ इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः किमुपवीतस्य निवृत्तिः, उत अनिवृत्तिः समुच्चय इति ।

तथा पृष्ठ्ये षडहे श्रूयते ‘मध्वाशयेत् घृतं वा’ इति । अस्ति तु प्रकृतौ ‘पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य’ इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः, किं तस्य निवृत्तिः उतानिवृत्तिः समुच्चयः इति । किं प्राप्तम् ? तस्य निवृत्तिरिति । प्रत्यक्षश्रुता उपहोमादयः चोदकप्राप्तानां आनुमानिकानां निवर्तका इति । अपिच प्रकृतिलिङ्गसंयोगो भवति जुहोति, निवीताः प्रचरन्ति, आशयेत् इति । यथा

'शरमयं बर्हिर्भवति' इति, शराः कुशान् निवर्तयन्ति । **एवं प्राप्ते , ब्रूमः ।** अनिवृत्तिः समुच्चय इति । कुतः ? प्रकृतिलिङ्गासंयोगात् । प्राकृतेन लिङ्गेन कार्येण संयोगः एषामुपहोमादीनां नास्ति । स हि प्रत्यक्षदर्शनेन वा भवति यथा ' नैवारश्चरुः ' इति । अभावे विधानेन वा भवति यथा 'जुहूषा वा एतर्हि वाग् भवति , यर्हि पृष्ठ्यः षडहः संतिष्ठते , न बहु वदेत् , नान्यं पृच्छेत् , नान्यस्मै प्रतिब्रूयात् , मध्वाशयेत् घृतं वा ' इति । विकारेण वा यथा ' नैर्ऋतश्चरुर्नखावपूतानाम् ' इति । स्वशब्देन वा भवति यथा ' परिधौ पशुं नियुञ्जीत ' इति । प्रतिषेधेन वा भवति यथा 'न गिरागिरेति ब्रूयात् , यद् गिरागिरेति ब्रूयात् आत्मानं तदुद्गाता गिरेत् , ऐरं कृत्वोद्गेयम् ' इति । अन्येन वा येनावगम्यते प्रकृतं कार्यं अभिनिर्वर्तयन्ति इति । तदिह न किञ्चिदपि अस्ति । न चैतावता निवृत्तिः, इदं प्रत्यक्षश्रुतमिदं चोदकेन प्राप्तमिति । प्रकृतिलिङ्गसंयोगे निवृत्तिर्भवति नान्यथा । **ननु** इदानीमेवोक्तं भवतीह प्रकृतिलिङ्गसंयोगः जुहोति , निवीताः प्रचरन्ति , आशयेत् इति । **उच्यते** । प्राकृतानां जुहोत्यादीनां जुहोत्याद्यन्तराणि इमानि विधीयन्ते । तत्र तावत् जुहोतिः अदृष्टार्थः, कथमसौ गम्येत प्राकृतस्यार्थे वर्तते इति । **तथा** उपवीतं अदृष्टार्थे कथं तस्य कार्ये निवीतं वर्तते इति गम्यते । **तथा** व्रतं वृत्त्यर्थम् , मध्वशनं घृताशनं च तस्मिन्नर्थे वर्तते इत्येतत् न ज्ञायते एव । तस्मान्नास्ति प्रकृतिलिङ्गसंयोगः । अथोच्यते , नैवोपहोमा जुहोत्यन्तरम् , प्राकृते होमे मन्त्रो विधीयते इति । तच्च न । विधायकस्याभावात् । 'सोऽत्र जुहोति' इति परिसमाप्ते वाक्ये केवलस्य मन्त्रस्य आम्नानम् , नास्ति वचनं एवं जुहोतीति । भिन्नान्येतानि वाक्यानि , 'सोऽत्र जुहोति' इति विधिवाक्यम् , 'अग्नये स्वाहा , कृत्तिकाभ्यः स्वाहा' इत्येवमादीनि मन्त्रवाक्यानि । तस्मात् न मन्त्रविधानार्थं जुहोतेः पुनःश्रवणम् । होमविधानार्थे श्रुतिर्विधायिका भवति , मन्त्रविधाने वाक्यम् । तस्मादपि न मन्त्रविधानम् । अतः समुच्चयः । उभयमपि प्रमाणेन प्राप्तम् , प्रत्यक्षश्रवणं प्रमाणम् , चोदकोऽपि प्रमाणम् । नानाकार्यत्वात् नैतयोर्विरोधः । तस्मात् यथा प्रयाजादीन् न बाधन्ते , एवं नारिष्ठहोमानपि न बाधेरन् । अत एवंजातीयकं कर्मसंस्कारं विकृतौ अधिकं स्यादिति ।

टुप्— ' निवीता ऋत्विजः ' इत्येतदनुदाहरणम् । कथम् ? ज्योतिष्टोमे उपवीताभावात् । न (हि) प्रत्यक्षेण , न (अपि) चोदकेन ज्योतिष्टोमे उपवीतम् (अस्ति । यस्य निवीतेन बाधसमुच्चयौ चिन्त्येयाताम्) । तत्प्रकृतिकश्च श्येनः , न दर्शपूर्णमासप्रकृतिकः । (ननु अङ्गानि ऐष्टिकानि , तेषु उपवीतं प्राप्नोति , निवीतमपि तेषु प्रधानादवतीर्णम् । इति युक्ता चिन्ता , अत आह—) 'आनर्थक्यात् तदङ्गेषु' इति न्यायोऽत्र नास्ति (येन अङ्गेषु निवीतमवतरेत्) । प्रधाने हि असंभवन् (धर्मः) अङ्गे अर्थात् क्रियते । संभवति चात्र प्रधाने एव निवीतम् । तस्मात् भिन्नविषयत्वात् निवीतोपवीतयोर्व्यवस्था (न बाधः समुच्चयो वा) । तत् (तस्मात्) अनुदाहरणमिदम् । उपहोमाद्येव (तु) उदाहरणम् । ननु उपहोमानां प्रत्यक्षविधानात् चोदक एव नास्ति नक्षत्रेष्टौ यथा गृहमेधीयस्य आज्यभागयोः प्रत्यक्षाम्नानात् । यथा च सोमस्य प्रत्यक्षविधानात् । उच्यते । सर्वास्वेव विकृतिषु उपमानेन धर्मप्राप्तिः । न च सोमस्य केनचित् (धर्मवता कर्मणा) सादृश्यमस्ति । तस्मात् सोमे ये एव धर्मा विधीयन्ते , ते एव भवन्ति , नान्ये इति । नक्षत्रेष्टावपि (तुशब्दार्थे अपिशब्दः) प्रथमं तावत् उपकारापेक्षा भवति , ततः सादृश्येन धर्मप्राप्तिः । न च अपूर्वमङ्गं उपकारवत् दृष्टम् । सादृश्यं चास्याः आग्नेयेन (अस्ति) । तत्र प्रकारा अनन्तराः (अव्यवहिताः) आग्नेये विद्यन्ते । ते च उपकारमन्तरेण न संभवन्ति । तस्मात् प्रकारादनन्तरं उपकारा विद्यन्ते । तान् गृह्णाति विकृतिः । इमे चोपहोमाः नोपकारपूर्वकाः । तस्मात् प्राकृतमङ्गजातं प्रवर्तते । गृहमेधीये तु दृष्टोपकारौ आज्यभागौ पुनः श्रूयेते , तौ शक्नुतो गृहमेधीयं निराकाङ्क्षीकर्तुम् । न च उपहोमानां श्रुत्याद्यभावात् स उपकारः शक्यते कल्पयितुम् । ननु श्रुत्याद्यभावात् अनङ्गत्वमेव उपहोमानां प्राप्नोति । उच्यते । सत्यं श्रुत्याद्यभावः (श्रुत्यादित्रयाभावः), किन्तु (प्राकृताङ्ग—) संदंशोपग्रहेण तेषां ग्रहणम् । (तथाहि ,) पूर्वेऽपि पदार्थाः

प्राकृताः श्रूयन्ते, (तथा) परेऽपि (प्राकृताः) मध्ये उपहोमाः तस्मात् तेषाम् (अपि आकाङ्क्षयैव) ग्रहणम्। (यत्रापि संदंशाभावः, तत्रापि क्रमादेव अङ्गत्वमिति)।

(पूर्वपक्षमाह–) जुहोतिशब्दसामान्यात् स्थानसामान्याच्च (इति प्रकृतिलिङ्गद्वयात्) नारिष्ठबाधः । **उच्यते** । नात्र बाधः । कुतः ? कार्यापत्त्यभावात् । प्रत्यक्षेण तावत् कार्यापत्तिर्नास्ति यथा नैवारश्चरुः इति व्रीहीणां कार्ये नीवारा वर्तन्ते । ननु शब्देनेयं कार्यापत्तिः (कथं प्रत्यक्षेणेत्युच्यते ?); नहि, (कथम् ?) नीवारप्रातिपदिकं नीवारान् ब्रवीति, तद्धितो विकारम्, चरुशब्दः चरुम्, बृहस्पतिशब्दः तस्य देवतासंबन्धम् । न केनचिच्छब्देन (व्रीहि-) कार्यापत्तिर्गम्यते । प्रत्यक्षेण त्ववगम्यते। (तथाहि) व्रीहयः पुरोडाशं निर्वर्तयन्ति, पुरोडाशो यागम्, एवं नीवाराः चरुं साधयन्ति, चरुश्च यागमिति (उभयेषामपि हविर्निर्वर्तकत्वं प्रत्यक्षम्)। न च अनुमानेन कार्यापत्तिः यथा नखावपूतानां चरुः इति । तत्र तुषकणविमोकं दृष्ट्वा फलम्, नूनं अवघातकार्ये वर्तते (नख–) अवपवनमिति (अवहन्यते अनेन इत्यवघातः उलूखलमुसलम् । अवपूयते अनेन इति अवपवनं नखाः)। न च प्रतिषेधेन कार्यापत्तिरनुमीयते यथा 'न गिरागिरेति ब्रूयात्' इति । ननु परस्परनिराकाङ्क्षं (इदम्) वाक्यद्वयं विधायक– (द्वय–) सद्भावात् 'ब्रूयात्, उद्गेयम्' इति (अतः कथमिह एकस्य कार्ये अपरस्य विधानमिति).। उच्यते । एवं सति वाक्यभेदः प्राप्नोति, विधायकशक्तिकल्पना च एकैकस्य (स्यात्) । तस्मात् गिरापदस्य प्रतिषिध्यमानस्य यत् कार्ये (साधनाकाङ्क्षम्) लक्ष्यते, तत्र इरापदं विधीयते । तस्मात् कार्यलक्षणार्थे गिरापदमुच्चार्यते, न प्रतिषेधार्थे वाक्यभेदादिदोषात् । न च (अपि) लक्षितलक्षणया कार्यापत्तिः यथा 'पृष्ठ्यः षडहः संतिष्ठते' इति । अत्र हि अभावः संस्था । (तेन च) अभावेन (संस्थाशब्दाभिधेयेन) प्रतिषेधो लक्षणया गम्यते, प्रतिषेधेन (च) लक्षणया कार्यम् (गम्यते)। कार्ये (च) मध्वशनघृताशने (विधीयेते) । नापि स्वशब्देन कार्यापत्तिः यथा 'परिधौ पशुं नियुञ्जन्ति' इति । तस्मात् पञ्चप्रकाराऽपि कार्यापत्तिः नास्ति उपहोमानां येन बाधेरन् । प्राकृतं येन वा केनचित् इति निरूपयन्ति (भाष्यमूले तु 'अन्येन वा येन अवगम्यते प्राकृतं कार्यमभिनिर्वर्तयन्ति' इति पङ्क्तिः । तस्या अयमनुवादो वार्तिके) इति कोऽयं ग्रन्थः ? (पञ्चकातिरिक्तकार्यापत्तिप्रमाणासंभवात् अनादरोक्तेन तु भाष्यम्। अथ नेदं होमान्तरम्, प्राकृते एव तु होमे मन्त्रविधानं इत्युच्यते, अत आह–) न च होमानुवादेन मन्त्रविधानम् । शुद्ध एव हि होमो विधीयते अनेन वाक्येन 'सोऽत्र जुहोति' इति (न तु अत्र मन्त्रग्रहणम्)। द्वितीयेन तु (वाक्येन) मन्त्राः (केवलाः पठिताः) अग्नये (स्वाहा), कृत्तिकाभ्यः (स्वाहा) इत्यादिना । तयोः (मन्त्रयोः) संबन्धः प्रकरणेन (भवति) न वाक्येन । तस्मात् नारिष्ठोपहोमयोः समुच्चयः ।

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् । २ ॥

भाष्यम्— अथ यदुक्तम् 'शरमयं बर्हिर्भवति' इति यथा शराः कुशान् निवर्तयन्ति एवमिहापीति । अत्रोच्यते । युक्तं शरमये । भवति हि तत्र प्रकृतिलिङ्गेन संयोगः बर्हिःशब्देन एवंविशिष्टं वा बर्हिर्भवति, शरा वा बर्हिषः कार्ये वर्तन्ते इति । इह तु प्रकृतिलिङ्गासंयोगः । तस्मात् विषमं बर्हिषेति ।

शा— **'सति प्राकृतकार्यत्वे भवेद् बाधो न चास्ति तत् । साधारणं न होमत्वं तस्योपस्थापनक्षमम् ॥'** सर्वसाधारणं हि होमत्वं न नारिष्ठकार्ये उपस्थापयितुमर्हति । तस्मादुभयेषां अभ्युच्चयः ।

वि—'नक्षत्रेष्ट्युपहोमादिर्नारिष्ठादेर्निवर्तकः। समुच्चितो वा, कार्यैक्यादाद्यो, ऽन्त्यो, ऽपूर्वभेदतः ॥'

भाट्ट–– 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इति नक्षत्रेष्टिं विधाय उपहोमाः समाम्नाताः । 'सोऽत्र जुहोति, अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, अम्बायै स्वाहा, दुलायै स्वाहा, नितत्न्यै स्वाहा, अभ्रयन्त्यै स्वाहा, मेघयन्त्यै स्वाहा, वर्षयन्त्यै स्वाहा, चुपुणीकायै स्वाहा' इति । प्रकृतितश्च 'नारिष्ठान् जुहोति' इति नारिष्ठहोमाः प्राप्ताः । ते किं उपहोमैर्बाध्यन्ते उत समुच्चीयन्ते इति चिन्तायाम् । नारिष्ठहोमानां प्रकृतौ प्रधानो-

त्तरकालत्वात् अत्र शब्दबलेन प्रधानोत्तरभाविनामेषां समानस्थानकत्वेन एककार्यजनकत्वावगतेः उपदिष्टैरुपहोमैः नारिष्ठहोमानां अतिदिष्टानां शरवत् बाधः इति प्राप्ते। शरा हि बर्हिःशब्दलक्षिते तत्कार्ये विहिताः युक्तं यत् तत्कार्यपृष्ठभावेन प्राप्स्यमानं बर्हिर्बाधन्ते, उपहोमास्तु नारिष्ठहोमकार्यापन्ना इत्यत्र न किंचित् प्रमाणमस्ति, प्रत्यक्षादेस्तावत् अदृष्टार्थेषु अप्रवृत्तेः। न च समानस्थानकत्वात् एककार्यत्वावगतिः, उपहोमवाक्ये अतिदेशप्रापितनारिष्ठकार्यस्य उपस्थापकपदाभावेन अनुद्देश्यत्वात् तदुद्देशेन उपहोमविध्यप्रतीतेः अतिदेशेन कार्यपृष्ठभावेन नारिष्ठानामपि प्राप्त्युपपत्तौ शरन्यायवैलक्षण्येन समानस्थानकत्वमात्रस्य अप्रयोजकत्वात्। **न च** उपहोमवाक्ये कर्मान्तरविधावेव प्रमाणाभावः, नारिष्ठानुवादेनैव मन्त्रविधानोपपत्तेः इति **वाच्यम्**। प्राप्तकर्मानुवादेन अनेकमन्त्रविधौ वाक्यभेदापादकगुणस्यैव भेदकत्वात्। एकं हीदं वाक्यं इतिकरणेन तैत्तिरीयशाखाम्नातेन मन्त्राणां जुहोतावेव अन्वयप्रतीतेः। अत एव स्वाहाकारान्तानां मन्त्राणां लिङ्गादेव नारिष्ठहोमेषु विनियोगप्रसक्तौ पुनर्विनियोगान्तरवैयर्थ्यप्रसङ्गादपि कर्मान्तरम्, तच्च एकवाक्योपादानावगतस्वाहाकारान्तमन्त्रसमुच्चयबलेन अनेकं आवृत्तं वा इत्यन्यदेतत्। न च तथापि उपदिष्टोपहोमैरेव विकृतेः निराकाङ्क्षत्वात् अतिदेशकल्पकत्वाभावेन नारिष्ठाप्राप्तिः। उपहोमानां अक्लृप्तोपकारकतया उपकारकाकाङ्क्षिण्या विकृत्या प्रथमं आतिदेशिकस्यैव ग्रहणेन नारिष्ठानां प्राप्त्युपपत्तेः। अत एव उपहोमादीनां वैकृतानां अन्यतराकाङ्क्षयैव ग्रहणं अनुपस्थितफलान्तरकल्पने गौरवात्। अत एव यत्र क्लृप्तोपकारकप्राकृताङ्गे पुनःश्रवणं विकृतिप्रकरणे, यथा गृहमेधीयाज्यभागादौ तत्रैव विकृतेः निराकाङ्क्षत्वापादनेन अतिदेशलोपः। यत्र वा संनिपत्योपकारकाङ्गसामग्रीपौष्कल्यम्। न तु अत्र द्वयमप्यस्ति। अतः उपहोमैः नारिष्ठानां न बाधः।

यत्तु अत्र **भाष्यकारेण** श्येने 'निवीता ऋत्विजः प्रचरन्ति' इत्याम्नातेन प्रयोगाङ्गभूतकर्तृसंस्कारकेण निवीतेन अतिदेशप्राप्तस्य सर्वकर्मार्थत्वेन विहितस्य चोपवीतस्य बाधमाशङ्क्य अदृष्टार्थत्वात् समुचय इति सिद्धान्तितम्। तदस्य अदृष्टार्थत्वे श्राद्धादावपि प्राचीनावीतेन सह उपवीतस्य समुच्चयापत्तेः यावज्जीवैकत्रिसूत्रनवतन्तुकयज्ञोपवीतधारणाश्रितप्रकारविशेषस्य उपवीतत्वनिवीतत्वादेः तत्तत्कर्माङ्गतया विहितस्य समुच्चयासंभवात् उपेक्षितम्।

यदपि 'संस्थिते षडहे मध्वाशयेत्' इति विहितमध्वशनेन प्राकृतपयोव्रतस्य तस्मिन्नहनि निवृत्तिमाशङ्क्य अदृष्टार्थत्वादेव समुच्चय इत्युक्तम्। तत् मध्वशनस्य देहवृत्त्यनर्हत्वेन पयोव्रतकार्यकारित्वानुपपत्तेः पूर्वपक्षोत्थानाभावात् सुत्यायां पयोव्रताभावाच्च उपेक्षितम्। अस्तु वा तदपि इहोदाहरणम्।

मण्डन-- 'उपहोमा न बाधन्ते।' नारिष्ठहोमान्।

शंकर— 'उपहोमैर्न नारिष्ठा बाध्याः।'

* **नारिष्ठहोमपूर्वकत्वं** दर्विहोमानाम्। **भा.** ८।४।५।२०.

* **नावनीतं** आज्यम्। पुराणनूतनयोः घृतयोर्नवनीतजन्यत्वे समानेऽपि योगरूढ्या नूतनमेव 'नावनीतम्' इति व्यवह्रियते। **वि.** १।४।१०.

⌛ **'नाशः कारणलयः' इति न्यायेन** प्रलयेऽपि प्रपञ्चस्य सदात्मकत्वेन स्थित्युपदेशात्। **श्रीकर.** २।२।२७ ब्रसू.

⌛ **नाशाधिकरणम्**। ६।४।२।२ ॥ इदमधिकरणम् 'दर्शपूर्णमासादौ स्विष्टकृदादिशेषकार्यार्थमवत्तस्य द्रव्यस्य नाशे शेषकार्यलोपः' इत्यत्र (**मीको.** पृ. २०७३) द्रष्टव्यम्।

* 'यस्य पुरोडाशौ क्षायतः इत्यत्र एकदेशक्षाणे तु **प्राक्तननाशाधिकरणन्यायेन** (६।४।२) आज्येन दग्धावशिष्टेन वा प्रयोगसमाप्तिमात्रम्। **भाट्ट.** ६।४।५.

* **नास्तिकैः** 'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविकेयं बृहस्पतिः ॥' इति अग्निहोत्रादीनां दृष्टार्थत्वमुक्तम्। **सु.** पृ. १३५.

* **निकान्तः** नितरां कान्तः नितान्तं प्रियः। 'वत्सनिकान्ता हि पशवः'। **के.** २।३।६।१६–१७.

* **निकायः** इति संघातः औत्तराधर्येणावस्थित उच्यते। स येषां ते निकायिनः। यथा साहस्राः

साद्यस्क्राः । **भा.** ८।१।१२।१९. * निकायः एकेन शब्देन युगपदुपादानलक्षणः संघः । सु. पृ. ८६०.

* **निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात्** (८।१।१२।१९) **इत्याष्टमिकन्यायात्** अतिदिष्टपूर्वाग्निष्टुद्धर्मकयागान्तरस्य पश्चर्थमनुष्ठानं इति सिद्धान्ते प्रयोजनम् । **कस्तूरि.** २।२।१२।२६.

⧗ निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात्। ८।१।१२।१९ ॥

निकायः इति संघात उच्यते । स येषां ते निकायिनः साहस्राः साद्यस्क्राश्च । तत्र निकायिनां मध्ये पूर्वस्य पूर्वं पठितस्य प्रवृत्तिः उत्तरेषु निकायिषु स्यात् । निकायित्वसामान्यात् । पुनरपि साहस्राणां सहस्रदक्षिणासामान्यात् साद्यस्क्राणां च सद्यस्करणसामान्यात् । ततश्च प्रथमः साहस्र उत्तरसाहस्राणाम्, प्रथमः साद्यस्क्रश्च उत्तरसाद्यस्क्राणां प्रकृतिः । **के.**

* निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् । साद्यस्क्राः साहस्राः इति च एकेन शब्देन युगपदुपादानलक्षणसंघाख्यनिकायवतां अग्निष्टुदादीनामेकाहानां निकायित्वावान्तरसामान्येन सुसदृशत्वात् पूर्वस्याग्निष्टुतो विध्यन्तः रेवत्यादियागेषु उत्तरेषु प्रवर्तते इति अष्टमे 'निकायिनाम्' इत्यत्र वक्ष्यमाणत्वांत् तदीयधर्मप्राप्तिः । सु. पृ. ८६०

* **निकायित्वं** सोमप्रकृतिलिङ्गम् । **बाल.** पृ. ११९.

* **निकृन्तनं** नखानां ज्योतिष्टोमे संस्कारो न फलप्रयुक्तः । तत्र फलश्रुतिरर्थवादः । तच्च क्रत्वर्थं यजमानार्थम् । **के.** ४।३।१।१–४.

⧗ ब्रह्मणः प्रधानत्वे अप्रधानत्वे वा ब्रह्मैव फलप्रदं इति श्रुतेरुपपत्तौ सत्यां **'निकृष्टे उत्कृष्टदृष्टिः कर्तव्या' इति लौकिको न्यायो** न बाधनीयः । **आभरणम्.** ४।१।४।५ ब्रसू.

⧗ निकृष्टदृष्टिर्नोत्कृष्टे इति लौकिको न्यायः । आदित्यादिदृष्टयो ब्रह्मण्येव कर्तव्याः, न तु ब्रह्मदृष्टिरादित्यादिषु । न चैवंविधे अवधृते शास्त्रार्थे निकृष्ट०... न्यायोऽपवादाय प्रभवति, आगमविरोधेन तस्यैवापोदितत्वात् । **भामती.** ४।१।४।५ ब्रसू.

* **निखननं** यूपधर्मः, औदुम्बरीधर्मश्च । **के.**

* **निगदः** । 'नितरां गद्यमानत्वान्निगदो ह्येष गद्यते ।' (तच्च परप्रत्यायनार्थत्वात् उच्चैष्ट्वम्) । **वा.** ६।२।५।१२ पृ. ७६२.

⧗ निगदो वा चतुर्थं स्याद्धर्मविशेषात् । २।१।१४।३८ ॥

अथ निगदा नाम किं यजूंषि ? उत यजुर्भ्योऽन्ये ? इति ऋक्सामयजुःशब्दपदार्थेषु निरूपितेषु निगदानामनुप्रसङ्गेनैव 'उच्चैर्निगदेन' इत्येवमादिवेदवाक्यगतनिगदपदार्थो निरूप्यते । अत्रायं पूर्वपक्षिणोऽभिसंधिः 'उपांशु यजुषा' इति यजुषामुपांशुधर्मशालित्वं प्रतीयते । अस्य च 'उच्चैर्निगदेन' इति विशेषः श्रूयते । स चास्य यजुष्ट्वे नोपपद्यते, विध्यनुवादयोरसंभवात् । विधित्वे सति 'उपांशु यजुषा' इति सामान्यशास्त्रप्राप्तमुपांशुत्वम् 'उच्चैर्निगदेन' इति विशेषशास्त्रेण बाधनीयम् । बाधश्च गत्यन्तरासंभवे भवेत् । तेन 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यत्र कौण्डिन्यगतब्राह्मणत्वस्य प्रमाणान्तरसिद्धत्वात् भवतु गत्यन्तरासंभवेन बाधः, यजुष्ट्वस्य प्रमाणान्तरसिद्धत्वात् 'शेषे यजुःशब्दः' इति लक्षणस्य ऋक्सामनिगदशेषपरत्वेनापि संभवात् त्रिभ्योऽन्यत्वेनैव उपपत्तेर्न बाधसंभवः । न च यजुष्ट्वेऽपि परसंबोधरूपत्वेन निगदानां अर्थप्राप्तमुच्चैष्ट्वम् 'उच्चैर्निगदेन' इत्यनूद्यते । यजष्ट्वे सति वाचनिकेनोपांशुत्वेन अर्थप्राप्तत्य उच्चैष्ट्वस्य बाधितत्वात् अनुवादासंभवात् । किञ्च, व्यपदेशभेदश्चापि अभियुक्तानां दृश्यते 'निगदा वर्तन्ते न यजूंषि, अथ यजूंषि न निगदाः' इति । अतो न यजूंषि निगदाः, किन्तु चतुर्थमेव निगदा इति मन्त्रजातमिति । एवं प्राप्ते, अभिधीयते ।

यजूंषि वा तद्रूपत्वात् । ४० ॥

अयमभिप्रायः, भवेदेवं यदि 'उच्चैर्निगदेन' इत्यत्र अनुवादो न संभवेत् । न च यजुष्ट्वे सति अर्थप्राप्तमुच्चैष्ट्वं उपांशुत्वविधिना बाधितत्वात् नानूद्यते इति वाच्यम् । उपांशुत्वविधेर्निगदेषु प्रवृत्त्यसंभवात् । तथाहि, 'अग्नीदग्नीन् विहर बर्हिस्तृणाहि' इत्येवंरूपा हि निगदाः । ते च परसंबोधनार्थत्वेन प्रयोगेषूच्चार्यमाणेषु स्वकार्यक्षमा

भवन्ति। अवयवव्युत्पत्तेश्च नितरां गद्यन्ते इति निगदाः। न च उपांशुत्वेन उच्चार्यमाणाः तथा भवन्ति। न चोपांशुविधेरपि अनन्यगतिः, तद्व्यतिरिक्तयजुर्विषयत्वेनैव चरितार्थत्वात्। अतोऽयमुपांशुविधिः निगदेतरयजुर्विषय एवेति न तेन बाधितत्वात् उच्चैस्त्वस्य संभवः। 'अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि' इत्यृचो यजूंषि सामानीत्येवमात्मके वेदे त्रिष्वेव ऋग्यजुःसामसु मन्त्रत्वमुपपन्नं भवति। निगदा अपि मन्त्रा एव। अतः अपादबद्धत्वात् अगीतित्वाच्च परिशेषसिद्धयजुर्लक्षणयोगात् यजूंष्येव निगदाः। उच्चैष्ट्वधर्मभेदश्चास्य परसंबोधनकार्यसामर्थ्यप्राप्तः एव स्तुत्यर्थमनूद्यमानः अनन्यत्वमापादयति। उपदेशभेदश्च ब्राह्मणपरिव्राजकन्यायेन धर्मभेदनिबन्धन एव। अतो यजूंष्येव निगदा इति। अत्र यद्यपि 'वेदो वा प्रायदर्शनात्' (३।३।१।२) इत्यत्र उपांशुत्वादीनां वेदधर्मत्वमाचक्षते, न जातधर्मत्वम्, तथापि तदीयपूर्वपक्षन्यायेन जातधर्मत्वमभ्युपगम्य सामान्यशास्त्रमयोग्यं विशेषविषये न प्रवर्तते एवेति तत्प्रतिपादनार्थोऽयं विचारः। तेन अयमेव सामान्यविशेषन्यायात् अस्य भेदो यत्सामान्यशास्त्रं प्रवृत्तियोग्यमपि विशेषशास्त्रदर्शनान्न प्रवर्तते। अत्र तु सामान्यशास्त्रं विशेषप्रवृत्त्ययोग्यत्वादेव न प्रवर्तते इति। **प्रयोजनम्**-- यजुष्ट्वे सति यजुर्भ्रंशनिमित्तम् 'भुवः स्वाहा' इति प्रायश्चित्तम्, अयजुष्ट्वे नेति। **सूत्रं तु**-- यजूंष्येव निगदाः। तद्रूपत्वात् प्रश्लिष्टपठितत्वेन यजूरूपत्वादित्यर्थः। **तौता.**

⧗ निगदो वा चतुर्थं स्याद्, धर्मविशेषात्। २।१।१३।३८॥

निगदो नाम मन्त्रः किं यजुरेव, उत भिन्नमेव ऋक्सामयजुर्भ्यः इति विचारे पूर्वपक्षमाह। वाशब्दः पक्षविशेषद्योतनार्थः। निगदो नाम चतुर्थं मन्त्रजातं स्यात्। 'उपांशु यजुषा, उच्चैर्निगदेन' इति धर्मविशेषात्। यजुर्मन्त्रधर्मात् उपांशुत्वात् भिन्नस्य धर्मस्य श्रवणात् निगदो न यजुः। न ऋक् न च साम इति निगदः चतुर्थमेव मन्त्रजातम्।

व्यपदेशाच्च। ३९॥

एतानि यजूंषि, एते निगदाः इति भिन्नेन शब्देन व्यपदेशाच्च निगदो न यजुः। चकारः हेतुसमुच्चयार्थः।

यजूंषि वा तद्रूपत्वात्। ४०॥

निगदो नाम ऋग्यजुःसामभ्यो भिन्नं मन्त्रजातं इति पूर्वपक्षं वाशब्देन परिहरन् सिद्धान्तमाह। निगदा यजूंषि स्युः, न भिन्नं मन्त्रजातम्। तद्रूपत्वात्। तस्य यजुषः यत् रूपं प्रश्लिष्टपाठः ऋक्सामविलक्षणत्वं चेति, तदेव रूपं निगदानामपि इति निगदा न यजुर्भिन्नाः।

वचनाद्धर्मविशेषः। ४१॥

सिद्धान्ती पूर्वपक्षहेतुं निरस्यति। यजुर्धर्मात् उपांशुत्वात् निगदानां उच्चैष्ट्वं धर्म उक्तः इति योऽयं धर्मविशेष उक्तः, स वचनात् स्यात्। वाचनिको धर्मभेदः न यजुर्भिन्नत्वं साधयितुं समर्थः। तस्मात् निगदा यजूंष्येव।

अर्थाच्च। ४२॥

निगदरूपा मन्त्राः यजूंष्येव, उच्चैष्ट्वं तु तेषां न केवलं वचनात्, किन्तु अर्थाच्च। पुरुषान्तरज्ञापनरूपात् प्रयोजनात् हेतोः तेषामुच्चैष्ट्वमुक्तम्। परसंबोधनार्थानां यजुषां उपांशुत्वं नोपकारि। तस्मात् यानि यजूंषि न परसंबोधनार्थानि तेषामुपांशुत्वम्, येषां तु यजुषां परसंबोधनार्थत्वम्, तेषां निगदत्वं उच्चैष्ट्वत्वं च। गदतिर्वचनार्थः पाठवचनः, निशब्दः प्रकर्षस्य वक्ता। प्रकर्षश्चात्र उच्चैस्त्वावच्छिन्नत्वम्। तस्मात् यजुर्विशेषा एव निगदाः।

गुणार्थो व्यपदेशः। ४३॥

निगदा नाम मन्त्रा यजुर्विशेषा एव। यत्तूक्तं पूर्वपक्षिणा यजूंषि निगदाः इति व्यपदेशभेदात् भेद इति तत्राह सिद्धान्ती, व्यपदेशः भिन्नो व्यपदेशो गुणार्थः प्रत्येतव्यः। उच्चैष्ट्वगुणार्थः गुणनिमित्तको व्यपदेशभेदः ब्राह्मणपरिव्राजकन्यायेन।

सर्वेषामिति चेत्। ४४॥

यदि उच्चैष्ट्वगुणाभिप्रायेण यजुषामेव केषांचित् निगदत्वं स्यात्, सर्वेषामपि निगदत्वं स्यात्। ऋचां साम्नां च उच्चैष्ट्वमेवोक्तं इति तेषामपि निगदत्वं स्यात् इति चेत् कस्यचिदाशङ्का।

न ऋग्व्यपदेशात् । ४५ ॥

यजुषामेव केषांचित् उच्चैष्ट्वेन गुणेन निगदत्वं स्यात्। ऋचां साम्नां च उच्चैष्ट्वेन निगदत्वं स्यात् इति यदुक्तं पूर्वपक्षिणा तन्न । ‘अयाज्या वै निगदाः, ऋचैव यजन्ति’ इति अयाज्यात्वेन निगदान् निन्दित्वा ऋचां व्यपदेशो विधानं कृतम् । नहि तमेव निन्दित्वा तस्यैव विधिरवकल्पते । तस्मात् न ऋचां उच्चैष्ट्वेऽपि निगदत्वप्रसङ्गः। अपादबद्धे गदतिर्वर्तते । अपादबद्धं हि वाक्यजातं गद्यमित्युच्यते । ऋक् च पादबद्धा । ततश्च निगदा नाम यजुर्विशेषा एव इति त्रिविधत्वमेव मन्त्राणाम् । **के.**

* **निगदा** नाम मन्त्राः न चतुर्थः प्रकारः, किन्तु यजुरन्तर्गता एव ते । परप्रत्ययनार्था मन्त्रा निगदाः । **के.** २।१।१३।३८–४५. * निगदा यजुर्भेदा एव । ते च ‘अग्नीदग्नीन् विहर’ इत्यादयः परसंबोधनरूपाः । **बाल.** पृ. ५८. * निगदाः याजुषाः । **वि.** २।१।१३. * ‘अयाज्या एव **निगदाः** ऋचैव यजतीति हि । निषिद्धमपि याज्यात्वं प्रशंसार्थमिहोदितम् ॥’ **वा.** ३।२।५।१२ पृ. ७६२. * यानि च यजूंषि उच्चैरुच्चार्यन्ते ते निगदाः । निशब्दः प्रकर्षस्य वक्ता गदतिर्गदनार्थः पाठवचनः । **भा.** २।१।१३।४२. * **निगदानां** उच्चैष्ट्वं धर्मः । **वि.** २।१।१३. * **निगदेषु** उपांशुत्वं उच्चैष्ट्वेन बाध्यते । **बाल.** पृ. १३२.

* **निगदाधिकरणम्** । गदतेः अपादबद्धाक्षरसमूहवाचकत्वात् निशब्दस्य च प्रकर्षवाचित्वात् उपांशुत्वाभावमात्रस्यैव प्रकर्षत्वात् अवयवयोगेन उपांशुत्वभिन्नस्वरप्रयुक्तापादबद्धमन्त्राक्षरत्वं निगदपदशक्यताऽवच्छेदकम् । अतो न ऋचि अतिव्याप्तिः । अतो न रूढत्वेन ज्योतिरादिपदवत् भेदकत्वं संज्ञायाः (निगद इति) । वस्तुतस्तु निगदत्वस्य अखण्डोपाधिरूपस्य यजुष्ट्वावान्तरव्याप्यस्यैव निगदपदशक्यताऽवच्छेदकत्वेन कल्प्यत्वात् मनुष्यब्राह्मणसंज्ञयोरिव व्याप्यव्यापकभावेन निगदयजुःसंज्ञयोः एकस्मिन्नप्युपपत्तेः न भेदकत्वापत्तिः । प्रयोजनं वाचःस्तोमे ‘सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसति’ इति विहिते शंसने निगदानां यजुष्ट्वेन शंसनम् । **कौ.** २।१।१४।४६.

⧗ **निगदाधिकरणम्** । निगदा नाम मन्त्राः यजुर्विशेष एव उच्चैष्ट्वधर्मवन्तः ॥

निगदो वा चतुर्थं स्याद्, धर्मविशेषात् । २।१।१३।३८॥

भाष्यम्-- निगदा न यजूंषि । कुतः ? धर्मविशेषात् । ‘उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा, उच्चैर्निगदेन’ इत्येष धर्मविशेषः। उच्चैर्निगदेन इत्यनूद्यते । यदि यजुषो निगदत्वं स्यात्, न च तस्योच्चैस्त्वं धर्मो दृश्येत । दृश्यते तु । तस्माच्चतुर्थं मन्त्रजातं निगदो नाम ।

वा-- शेषे यजुःशब्दः इत्येतद्व्यावर्तनार्थो वाशब्दः । चतुर्थं मन्त्रजातं निगदः स्यात्, धर्मान्यत्वात् । यदि तावत् ‘उच्चैर्निगदेन’ इति विधिः, ततो यजुर्धर्मबाधो मा भूदित्यर्थान्तरत्वम् । अथानुवादः स नैव प्राप्नोति व्यतिरेकेण विनेति भेदः ।

व्यपदेशाच्च । ३९ ॥

भाष्यम्-- व्यपदेशोऽपि भवति, यजूंषि वर्तन्ते, न निगदाः, निगदा वर्तन्ते, न यजूंषीति । तस्मादपि मन्त्रान्तरम् ।

यजूंषि वा, तद्रूपत्वात् । ४० ॥

भाष्यम्--यजूंष्येव निगदाः । कुतः ? तद्रूपत्वात्। तदेवैषां रूपम्, यद् यजुषाम्, प्रश्लिष्टपाठ ऋक्सामलक्षणविलक्षणता च ।

वा-- ‘अहे बुध्निय मन्त्रं मे गोपाय’ इति त्रिष्वेव मन्त्रत्वस्योपसंहारात्, वेदे च मन्त्रसामानाधिकरण्येन निगदशब्दप्रयोगात्, यजुष्ट्वापरित्यागेनैव च धर्मविशेषव्यपदेशभेदसिद्धेः, परिशेषसिद्धयजुर्लक्षणयोगाच्च यजूंष्येव निगदाः ।

वचनाद्धर्मविशेषः । ४१ ॥

भाष्यम्-- वचनात् प्रत्यायनसामर्थ्यात् । अस्ति हि पुरुषान्तरप्रत्यायनसामर्थ्यं केषांचिद् यजुषाम् ।

वा— न्यायप्राप्तोच्चैर्धर्मानुवादत्वज्ञानात् न विधानादिति व्याख्यातम् । यं तु एते अर्थं वदन्ति तमुपांशुत्वेन शक्नुयुर्वक्तुमिति वचनादित्युच्यते ।

अर्थाच्च । ४२ ॥

भाष्यम्— अस्ति च तैः पुरुषान्तरैः प्रत्यायितैः प्रयोजनम् । नोपांशूच्चार्यमाणाः पुरुषान्तरं प्रत्याययेयुः । तस्मात् धर्मविशेषोऽर्थवान् । यानि च यजूंषि उच्चैरुच्चार्यन्ते, ते निगदाः । कुतः ? निशब्दः प्रकर्षस्य वक्ता । यथा प्रकर्षेण रक्तं नितरां रक्तमित्युच्यते । गदतिर्गदनार्थः पाठवचनः । एष एव हि प्रकर्षः, यदुच्चैस्त्वावच्छिन्नत्वम् । ननु वाचनिको गुणो यजुषामुपांशुत्वम् । नेति ब्रूमः । गुणो नाम स भवति, यः स्वकार्ये कुर्वतामुपकारे वर्तते । न च परसंबोधनार्थानां यजुषामुपांशुत्वं साहाय्ये वर्तते । तद्धि स्वकर्मक्रियाविघातं करोति । तेन पुरुषान्तरसंबोधनार्थमुच्चैस्त्वं गुणः । इतरार्थे तु वचनं भविष्यति । इतराणि यानि यजूंषि न परसंबोधनार्थानि, तेषु उपांशुत्वं निवेक्ष्यते ।

वा— अस्ति च 'अग्नीत् अग्नीन् विहर' इत्यादिवचनेन अर्थः अन्यथा अनुष्ठानानुपपत्तेरिति धर्मविशेषप्राप्तिः । तथा च निगदशब्दावयवव्युत्पत्तिसिद्धिः । वाचनिकमपि च उपांशुत्वमनुपकारत्वेन अनङ्गत्वात् निगदव्यतिरिक्तयजुर्विषयं विज्ञायते ।

गुणार्थो व्यपदेशः । ४३ ॥

भाष्यम्— अथ यदुक्तं व्यपदेश इति, स चैकत्वेऽपि गुणतो भवति । यथा, 'इतो ब्राह्मणा भोज्यन्ताम्, इतः परिव्राजकाः' इति । एवमुच्चैस्त्वेन गुणेन तान्येव यजूंषि व्यपदिश्यन्ते निगदा इति ।

वा— ब्राह्मणपरिव्राजकवत् गुणेन व्यपदेशभेदः ।

सर्वेषामिति चेत् । ४४ ॥

भाष्यम्— यदि य उच्चैर्गद्यते स निगदः, ऋगपि निगदः प्राप्नोति ।

वा— अतिप्रसङ्गद्वारेण गुणस्य व्यपदेशनिमित्ततां व्यभिचारयति ।

न, ऋग्व्यपदेशात् । ४५ ॥

भाष्यम्— न ऋचो निगदा इति व्यपदिश्यन्ते । 'अयाज्या वै निगदा ऋचैव यजन्ति' इति पृथक्त्वनिमित्ता हि व्यपदेशा भवन्ति । उच्यते । व्यपदेशो लिङ्गम्, प्राप्तिरुच्यतामिति । अपादबद्धे गदतिर्वर्तते, अपादबद्धो हि गद्य इत्युच्यते ।

वा— न तावदतिप्रसङ्गोऽस्ति, निगदं निन्दित्वा ऋचो विधानात् । नहि तमेव निन्दित्वा तस्यैव विधिरवकल्पते । न च व्यभिचारित्वम् । गदतिवशेन यजुष्ट्वे सति धर्मविशेषस्य व्यपदेशभेदनिमित्तत्वात् ।

सोम— प्रयोजनं तु यजुष्ट्वे यजुर्भ्रेषप्रायश्चित्तम् 'सर्वाणि यजूंषि' इति वाचःस्तोमे पारिप्लवशंसने विनियोगश्च । यजुर्भेदे तु न तदुभयमिति । **सूत्रार्थस्तु**— निगदश्चतुर्थं मन्त्रजातं स्यादेव उच्चैस्त्वरूपधर्मविशेषात् इति ।

वि— 'प्रोक्षणीरासादयेति निगदस्त्रिविधाद् बहिः । यजुर्वोच्चैस्त्वधर्मस्य भेदादस्य चतुर्थता ॥, परप्रत्यायनार्थत्वादुच्चैस्त्वं यजुरेव सः । तल्लक्षणेन युक्तत्वात् त्रैविध्यमिति सुस्थितम् ॥'

भाट्ट— निगदसंज्ञकानां मन्त्राणां संज्ञाभेदात् 'उपांशु यजुषा । उच्चैर्निगदेन' इति विप्रतिषिद्धधर्मभेदाच्च भेदो यजुर्भ्यः । **इति प्राप्ते**, 'ऋचः सामानि यजूंषि' इति वेदे त्रयाणामेव मन्त्रभेदानां संकीर्तनात् 'मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजुः' (षब्रा. १-२) इति च लिङ्गात् निगदानां यजुष्ट्वमेव । संज्ञा तु ब्राह्मणपरिव्राजकन्यायेन अभेदेऽप्युपपन्ना । निगदत्वं च यजुष्ट्वावान्तरधर्मः । न तु नितरामुपांशुस्वरातिरिक्तस्वरेण गद्यमानत्वम् । 'नमः प्रवक्त्रे' इत्यादिनिगदेषु उपांशु पठ्यमानेष्वव्याप्तेः । न च धर्मभेदात् भेदः, विशेषविहितेन उच्चैस्त्वेन सामान्यविहितस्य उपांशुत्वस्य अन्यपरत्वावसायात् । 'उपांशु यजुषा' इत्यस्य वेदोपक्रमानुरोधेन यजुर्वेदविहितकर्ममात्रे उपांशुत्वविधायकत्वस्य वक्ष्यमाणत्वेन भवन्मतेऽपि संकोचस्यावश्यकत्वाच्च । न चैवमुपक्रमवशेन यजुःपदे वेदलक्षणावत् निगदपदेऽपि यजुर्वेदलक्षणापत्तेः एकस्मिन् कर्मणि धर्मद्वयविकल्पापत्तिः, 'वायोर्यजुर्वेदः' इत्युपक्रमस्य यजुःपदे एव लक्षणातात्पर्यग्राहकत्वात् । अन्यथा 'वायोर्निगदवेदः' इत्यपि किं नावक्ष्यत् । अतश्च 'उच्चैर्निगदेन' इति स्वतन्त्र एव निरर्थवादकोऽयमुच्चैस्त्वनियमविधिः विशेष-

विहितातिरिक्तनिगदोद्देशेन । तेषु हि परप्रत्यायनरूपकार्यवशेन उपांशुत्वनिवृत्तावपि मन्द्राद्यनेकस्वरप्राप्तौ उच्चैस्त्वनियमो नानुपपन्नः । अतो निगदभ्रेषेऽपि यजुर्भ्रेषनिमित्तप्रायश्चित्तम् । आश्विनादौ पारिप्लवशंसनं वा । १४.

मण्डन— ‘ यजुर्विशेषो निगदो न भिन्नः । ’ १३ (१४).

शंकर-- ‘ निगदानां यजुष्ट्वं स्यात् । ’ १६.

* **निगदाधिकरणे** नियमविधिलाघवानुसारात् ‘उपांशु यजुषा’ इति वाक्यं निगदातिरिक्तयजुर्विषयं इत्यङ्गीकृतम् । **रसायनम्**. पृ. ७५.

* नयविवेके वेदोपक्रमाधिकरणविषयवाक्यात् **निगदाधिकरण**विषयवाक्यभेदोऽभ्युपगतः । **पराक्रमः**. १८।२। यत्रानियमेनोपांशुत्वं प्राप्तम्, तत्र नियममात्रम् ‘ उपांशु यजुषा ’ इत्यनेन क्रियते निगदव्यतिरेकेष्वेव च यजुःषु येनकेनचित् स्वरेण कार्यसिद्धेः उपांशुत्वानियमप्राप्तिः इति तद्विषयमेव इदं वचनं (उच्चैर्निगदेन इति) अनुवादमात्रम् । ४०।२.

* **निगदपादः** संकर्षे ४।२।१–१९ । तत्र १ सामिधेनीषु ‘ त्रींस्तृचाननुब्रूयात् ’ इति त्रिस्त्रिरुक्ते प्रथमोत्तमे द्वौ तृचौ, ‘ अग्न आ याहि ’ इत्यादिश्च तृतीयः, २ सामिधेनीषु ‘सर्वाणि च्छन्दांसि अनुब्रूयात्’ इति गायत्रीत्रिष्टुब्जगत्य एव सर्वाणि च्छन्दांसि, ३ बहुयाजी नाम सोमयाजी एव, ४ निविदामनवानत्वं वाचनिकमेव, न संतानः, ५ वरणधर्मः ऊर्ध्वज्ञुत्वादिः होतुरेव न सर्वेषामृत्विजाम्, ६ प्रवरः होतुरेव पूर्वः अध्वर्योरुत्तरः, ७ आवाहननिगदे ‘ आवह देवान् ’ इति ऊह्यमानानां सर्वदेवानामेव वादः, ८ ‘ अग्निमग्न आवह ’ इति संबोध्योऽग्निः आहवनीयः, ९ ‘ अग्निं होत्रायावह ’ इत्युक्तोऽग्निः आहवनीयादन्यः, १० अग्निः स्विष्टकृत् गार्हपत्याधिष्ठाता देवताविशेष एव, ११ अग्नेः स्विष्टकृतः आवाहनं हव्यवहनार्थमेवेति तत्रैव ‘ अग्निं होत्राय ’ इति निगदः, १२ ‘स्वं महिमानमावह’ इति गार्हपत्यवादः, १३ ‘अतूर्तो होता तूर्णिर्हव्यवाट्’ इति आहवनीयवादः, १४ आहवनीयवादः ‘ आ चाग्ने देवान् वह ’ इति मन्त्रे, १५ ‘स्वाहाऽग्निं होत्राज्जुषाणा’ इति हविष्कृद्वादः, १६ ‘ अग्निर्होत्रेणेदं हविरजुषत ’ इति गार्हपत्यवादः, १७ स्विष्टकृद्याज्यानिगदे ‘ अयाडग्निरग्नेः ’ इति गार्हपत्यस्यैव वादः, १८ ‘ अग्निर्देवो होता देवान् यक्षत् ’ इति आहवनीयवादः, १९ ‘ अग्निर्होता वेत्तु ’ इति स्रुगादापननिगदे आहवनीयवादः । इत्यधिकरणशीर्षकाणि । **के.**

* **निगदरूपा** मन्त्रास्तु यजुषि अन्तर्भवन्ति परसंबोधनरूपाः । **बाल.** पृ. ५८.

* **निगमाः** अर्थज्ञानोपायः । **सु.** पृ. १११. * निगमाः दर्शपूर्णमासयोः । ‘ अयाडग्निरग्नेः प्रिया धामानि ’ इत्यादि अयाट्-निगमः, ‘ अग्निमग्न आ वह ’ इत्यादिः आवाहननिगमः, ‘ अग्नेरहमुज्जितिमनूज्जेषम् ’ इत्यादिः उज्जितिनिगमः, ‘ अग्निरिदं हविरजुषत ’ इत्यादिः जोषणनिगमः, ‘ स्वाहाग्निं स्वाहा सोमम् ’ इत्यादिः स्वाहाकारनिगमः । **वि.** १०।४।१४,२७. * निगमाः निघण्टवः शब्दकोशाः । **के.** १।३।७. * निगमाः पौरुषेयाः वेदमूलत्वात् प्रमाणम् । **वि.** १।३।७.

* **निगमानां** लोकमूलपदार्थज्ञानं प्रयोजनम् । **सु.** पृ. १२९. * **निगमेषु** अयाट्कारे उज्जित्यां स्वाहाकारे च देवतानिर्देशः विधिगतशब्देनैव । यथा ‘ आग्नेयोऽष्टाकपालः ’ इत्यत्र अग्निशब्देनैव, न तु शुच्यादिशब्देन । **के.** १०।४।१२।२३–२४. * निगमेषु अवभृथे स्विष्टकृद्यागीयेषु स्विष्टकृद्गुणकाग्नीवरुणयोरभिधानम् । **भा.** १०।४।१७।३४–३५, * निगमेषु आनुबन्ध्यवनस्पतियागयोः विधिगतोस्त्रावनस्पतिशब्दाभ्यामेव द्रव्यदेवतयोरभिधानम् । १०।४।१६।३२–३३.

* **निगमनिरुक्तव्याकरणानां** तत्रार्थवत्ता भविष्यति, न यत्र म्लेच्छैरप्यवगतः शब्दार्थः । अपि च निगमादिभिरर्थे कल्प्यमाने अव्यवस्थितः शब्दार्थो भवेत् । **भा.** १।३।५।१० पृ. २२७.

* **निगमनं** च प्रतिज्ञाया हेतोश्च पुनर्वचनम् । **भा.** ७।१।१।१२, * निगमनम् । ‘ अक्ताः शर्कराः, तेजो वै घृतम् ’ इत्यत्र अञ्जनसामान्येन वाक्यस्योपक्रमः, घृतेन विशेषेण निगमनम् । यथोपक्रमं च निगमयितव्यमेकस्मिन् वाक्ये । १।४।१३।२४.

* **निगमनत्वं** व्याप्तिविशिष्टवैशिष्ट्यहेतुकसाध्यविशिष्टपक्षप्रतिपादकवाक्यत्वम् । यथा वह्निव्याप्यधूमवत्त्वात् वह्निमान् इति । **मणि.** पृ. ४०.

* **निग्रह:** अपराधिनः 'शारीरो निग्रहो यत्र तत्र प्रत्येकमिन्नता' न समुदाये समाप्तिः । **वा.** ३।१।६।१२ पृ. ६९७.

* प्रकृतं दूषयितुं अशक्नुवतः तत्सिद्धान्तान्तरदूषणे निग्रहस्थानमापद्यते असाधकत्वात् । स हि वक्ष्यति 'दुष्यतु यदि दुष्यति, किं तेन दुष्टेन अदुष्टेन वा प्रकृतं त्वया साधितं भवति ? मदीयो वा पक्षो दूषितो भवति ?' इति । **भा.** १।१।५।५ पृ. ५१. * सिद्धान्तान्तरदूषणत्वात् **निग्रहस्थानम्** । **वा.** ३।१।६।१२ पृ. ६९४.

[इतः परं **नित्यशब्दस्य** प्रथमान्तस्य द्वितीयान्तस्य च नपुंसकस्य प्रथमं निवेशः, ततस्तादृशस्य पुंलिङ्गस्य, ततः लिङ्गमविचार्य तृतीयाऽऽदिसप्तमीविभक्त्यन्तस्य, ततः स्त्रीलिङ्गस्य, ततः समासघटकनित्यशब्दस्य निवेशः इति क्रमो ज्ञेयः । **के.**]

* नित्यमाच्छादनं वाजपेये 'दर्भमयं वासो भवति' इति विद्यमानेऽपि सूत्रमये वाससि । **भा.** ६।८।८।२८. * नित्यमृणत्रयापाकरणं ब्राह्मणक्षत्रियवैश्यानाम् । **वि.** ६।२।११. * नित्यमेव नैमित्तिकं यत्र संयोगपृथक्त्वम्, अग्निहोत्रहोमे दधि, अग्नीषोमीयपशोर्यूपे च खादिरः इति । **के.** ४।३।३।६–८, * नित्यं कर्म अग्निहोत्रं दर्शपूर्णमासौ इत्यादि । तच्च यथाशक्ति अनुष्ठेयं संभवे सकलाङ्गमेव, असंभवे तु विकलाङ्गमपि कर्तव्यम् । **वि.** ६।३।१. * नित्यं द्वेषमन्त्रस्य 'योऽस्मान् द्वेष्टि, यं च वयं द्विष्मः' इत्यस्य कर्मणि पठनं अद्विषन् अद्वेष्यमाणश्चापि कुर्यात् । **भा.** ६।८।८।२८. * नित्यं न अपररात्रे (पयोयवाग्वादि) व्रतं ज्योतिष्टोमे । **के.** ६।८।९।२९. * नित्यं न तावत् अर्थस्य (अर्थापत्तेः) प्रापकमस्ति उपायान्तरेणापि सुलभत्वात् । **वा.** २।३।३।४ पृ. ५८९.

⌛ **'नित्यं न भवनं यस्य, नित्यं चापि न भूतता । न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव ॥'** **इति न्यायात्** कर्म उत्पद्यमानमेव भवति करोतिश्च उत्पादनार्थः सकर्मकः । **कु.** २।१।२।२. (**वा.** २।१।१।१ पृ. ३७७ 'य एव हि प्रवृत्तभवनः संभावितभवनो वा अन्येन प्रयुज्यते, स एव क्रियमाणत्वेन अवधार्यते नान्यः । तथा च न कश्चित् खपुष्पमाकाशं वा कुर्वन्नुपलभ्यते' । इति न्यायश्लोकार्थः ।)

* नित्यं नैमित्तिकेन बाध्यते, प्राप्तबाधोऽत्र । **वा.** ३।३।७।१४ पृ. ८६०. * नित्यं नैमित्तिकेन बाध्यते, यथा दर्शपूर्णमासयोः सामिधेनीपाञ्चदश्यं नित्यं वैश्यनिमित्तकेन साप्तदश्येन वैश्यकर्तृके प्रयोगे । **बाल.** पृ. १३१. * नित्यं (तत्), यत् सत् अकारणं इति लोकप्रसिद्धं यथा गगनं आत्मा इत्यादि । **ऋजु.** पृ. २३५.

⌛ **'नित्यं विशिष्ट एवार्थे प्रत्ययो यत् प्रवर्तते । तत् पूर्वतरविज्ञातप्रकृत्यर्थविशेषणात् ॥'** **इत्यनेन न्यायेन**, अन्वितानभिधानेऽपि 'परश्च' इति प्रत्ययस्य प्रकृतिपरत्वस्मृतेः, वृद्धप्रयोगरूपाच्च आचारात्, स्वार्थाभिधाने प्रकृतिप्रत्ययक्रमस्य नित्यं विवक्षितत्वावगतेः, अवर्जनीया विशिष्टार्थावगतिः । **सु.** पृ. ७०८.

* नित्यं सामान्यरूपतया सावकाशत्वेन च दुर्बलम्, नैमित्तिकं तु विशेषरूपत्वनिरवकाशत्वाभ्यां प्रबलम् । तस्मात् वैश्यनिमित्तकं साप्तदश्यं नित्यस्य पाञ्चदश्यस्य बाधकम् । **वि.** ३।६।३. * नित्यं सोम–विद्या–प्रजं त्रैवर्णिकस्य । **भा.** ६।२।११।३०, * **नित्यानि** अग्निहोत्रादीनि कर्माणि । तानि यदि निमित्ते विधीयन्ते, नित्यत्वमेषां व्याहन्येत । तत्र नित्यत्वचोदना यावज्जीविकाद्या उपरुध्येरन् । ११।१।१।१ पृ. २०९८.

* **नित्यस्तु** स्यात् दर्शनस्य परार्थत्वात् । १।१।६।१८ ॥ शब्दो नित्यः स्यात्, दर्शनस्य उत्पत्त्यादिदर्शनस्य परार्थत्वात् ध्वनिविषयत्वात् इत्यर्थः । **मणि.** पृ. १७०. * नित्यः दधिग्रहो ज्योतिष्टोमे । **भा.** ४।४।५।८–११, * नित्यः दर्शपूर्णमासयोः प्रैषः 'प्रोक्षणीरासादय' इत्यादिः । ६।८।८।२८, * नित्यः न वैश्वानरो द्वादशकपालः चयने, किन्तु नैमित्तिकः । ४।४।६।१२–१३, * नित्यः न षट्चितिकः अग्निः, षष्ठी चितिः । ४।४।७।१४–१८, * नित्यः नैमित्तिकादन्यः । 'तस्मात् तत्रतत्र

अन्यत् नैमित्तिकात् नित्यः'। ४।३।२।४, * **नित्यः** पशौ संज्ञप्तहोमः 'यत् पशुर्मायुमकृतोरो वा पद्भिराहते। अग्निर्मा तस्मादेनसो विश्वस्मात् पात्वंहसः॥' इति मन्त्रेण कार्यः पशुना माय्वादौ कृते अकृतेऽपि वा। ६।८।८।२८, * **नित्यो** भक्षो ज्योतिष्टोमे विद्यमानेऽपि अन्यस्मिन् भोजने। 'पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैशस्य' इति। ६।८।८।२८, * **नित्यः** शब्दः। १।१।६।६–२३, * **नित्यः** सोमक्रयः ज्योतिष्टोमे स्वीयसोमवतोऽपि। ६।८।७।२६–२७.

⌛ **'नित्याः शब्दार्थसंबन्धा यथाऽवस्थितगामिनः' इत्यनेन न्यायेन** (वा. २।३।२।३ पृ. ५८२) नित्यानित्यसंयोगविरोधपरिहारार्थं राज्यशब्दस्य राजविहितकर्मवाचितया अभ्युपगन्तव्यत्वात्। सु. पृ. ९०७.

* **नित्यमर्थं** विकृत्य निविशते काम्यो गुणः श्रूयमाणः। भा. ३।६।१६।४२ पृ. १०६५, * **नित्येन** अनित्यस्य न संबन्धः। 'न चानित्यस्य कामस्य नित्यैरग्न्यादिकर्मभिः। कथञ्चिदपि संबन्धः साध्यसाधनरूपतः॥' वा. २।३।१२।२५. * **नित्येन** नैमित्तिकं असमानविधानम्। भा. ३।६।१४।३७. * **नित्येन** संबध्यते इतिकर्तव्यता, काम्ये तु अतिदेशेन। के. ३।६।१६।४३. * **नित्यस्य** उख्यस्याग्नेर्नित्यधारणाभावः। भा. १२।४।१०।३०–३१, * **नित्यस्य** उख्याग्नेः काम्येन भ्राष्ट्राद्यग्निना बाधः। १२।४।७। १७–२५. * **नित्यस्य** ऋतुकालगमनस्य पितृभक्त्या ब्रह्मचर्यव्रतग्रहणात् नैमित्तिकेन च व्रतेन बाधात् 'धर्ममात्रार्थमहं भार्यां परिणेष्यामि' इति परिभाष्य परिणीतायामगमनेऽपि अदोषः। (भीष्मस्य)। सु. पृ. १९२. * **नित्यस्य** स्वरूपयोग्यस्य फलावश्यम्भावः इति नियमः। मणि. पृ. ४५. * 'काम्यनैमित्तिकाभ्यां हि तथा **नित्यस्य** बाधनम्'। वा. ३।६।३।१० पृ. १०३३. * न कामसंयुक्तस्य धर्मा नित्यस्य भवितुमर्हन्ति। भा. ६।३।१।५. * **नित्ये** कर्मणि भाष्यकारः फलमिच्छति 'प्रधानादिदमन्यत् फलम्, एकदेशाङ्गयुक्तात् प्रधानात् फलं भविष्यति' इति वदन्। सूत्रकारो नित्ये इतिकर्तव्यतामिच्छति प्रयाजवत् (इष्ट्यावृत्तौ प्रयाजवदावर्तेताऽऽरम्भणीया ९।१।३४) इतिदृष्टान्तोपादानात् सिद्धवदङ्गत्वं दर्शयति। वा. ६।३।१।२. * **नित्ये** कर्मणि यथाशक्त्यनुष्ठातुरपि अधिकारः। यथाशक्त्यधिकरणम्। भा. ६।३। १।१–७. * **नित्ये** न फलसाधनत्वेन विधिः, किन्तु जीवनरूपनिमित्तसंयोगेन। वि. ६।३।२. * **नित्ये** प्रयोगे एकदेशेनापि अधिक्रियते। काम्ये तु कृत्स्नामितिकर्तव्यतां यः शक्नोति कर्तुम्, सोऽधिक्रियते इति षष्ठे (तृतीयपादे प्रथमद्वितीयाधिकरणयोः) स्थितम्। टुप्. ११।१।३।११. * **नित्ये** (कर्मणि) विधिसहकृतनिमित्ताक्षिप्तप्रत्यवायजनकाकरणप्रतियोगित्वज्ञाने जातेऽपि नाङ्गान्वयः, अनपेक्षितत्वात्। अपितु तदुत्तरं प्रधानकरणकभावनायाः भाव्यापेक्षायां पूर्वकृतपापक्षयस्य भाव्यत्वे अवगते (अङ्गान्वयः)। भाट्ट. ६।३।१ पृ. २५०. * **नित्येषु** अङ्गलोपसंभवेऽपि काम्येषु अङ्गलोपो न सोढुं शक्यः। वि. ६।३।२, * **नित्यानां** (कर्मणाम्) आहिताग्निना त्यक्तुमशक्यत्वात् ईषदङ्गलोपं सोढ्वाऽपि नित्येषु अधिकारोऽस्ति। ६।१।१०.

* **नित्यां** चिकीर्षां नैमित्तिकी चिकीर्षा बाधते। भा. १२।२।१३।३३.

* **नित्याकरणे** प्रत्यवायः प्रायश्चित्तं च। वि. ६।३।२.

* **नित्याग्निहोत्रस्य** काम्येन अग्निहोत्रेण प्रसङ्गसिद्धिः। बाल. पृ. १३२.

* **नित्याग्निहोत्रधर्माः** मासाग्निहोत्रे अतिदिश्यन्ते। के. ७।३।१।१.

⌛ **नित्यानित्ययोर्नित्यविधिर्बलवानिति न्यायः।** कृताकृतप्रसङ्गि नित्यम्। तद्विपरीतमनित्यम्। अत एव 'तुदति' इत्यादौ परादपि गुणात् नित्यत्वात् शप्रत्ययादिर्भवति। एवं लोकेऽपि व्यवहारः। साहस्री. ६३.

* **नित्यानित्ययोर्विरुद्धः** संबन्धः। भा. १०।८। १४।३९. * **नित्यानित्ययोः** संयोगाभावात्। वा. २।३। २।३ पृ. ५८३.

* असति प्रसङ्गे प्रतिषेधो **नित्यानुवादः** (यथा 'न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि' इति)। भा. १।२।२।१८. * **नित्यप्राप्तानुवादोऽयम्** 'नान्तरिक्षे न

दिवि' अग्निश्चेतव्यः इति । न सत्यां गतौ नित्यानुवादः । **के.** * यो निषेधः प्राप्तिं नापेक्षते, किन्तु स्वतःसिद्धैव निषेधरूपता शब्देन बोध्यते स नित्यानुवादः, यथा 'नान्तरिक्षे न दिवि' अग्निश्चेतव्यः इति, यथा वा 'न सोमं आज्येनाभिघारयति' इति । **के.** * यत्र अर्थवादत्वेन प्रतिषेधः तत्र नित्यानुवादो भवति । **टुप्.** ७।३। ८।२१ पृ. १५५९. * यथा सोमे गोऽश्वाश्वतरादीनां देयानां सत्रेऽपि प्राप्तौ 'न ह्यत्र गौर्दीयते न वासो न हिरण्यम्' इति केषांचिदेव निषेधः इतरदेयदानं कल्पयति इति पूर्वपक्षः । तत्रोत्तरमुक्तम् 'नित्यानुवादो न कल्पकः' इति । **के.** १०।२।११.

* निन्दोन्नीतस्य निन्द्यनिषेधस्य **नित्यानुवादत्वावगतिः** । **सु.** पृ. ९९८.

* **नित्यकर्मणः** विहिताकरणजन्यप्रत्यवायप्रागभावपरिपालनार्थत्वं निरस्य विधिबलात् पापक्षय एव फलं कल्प्यते इति व्यवस्थापितं सर्वशक्त्यधिकरणे (६।३।२) टुप्टीकातन्त्ररत्नयोः । **न्यायसुधाकृतस्तु** नित्यकर्मणः पापक्षयो न फलम्, किन्तु विहिताकरणजन्यप्रत्यवायप्रागभावपरिपालनमेव फलमित्याहुः । **सोम.** २।४।१. * **नित्यकर्मणां** विधिः यावन्निमित्तं नियतमनुष्ठानं नियतं फलं विना अनुपपन्नमिति अकाम्यमानमपि फलं अनुमन्यते । **बाल.** पृ. १७४, * **नित्यकर्मणि** अशक्याङ्गत्यागः षष्ठे स्थापितः । पृ. १५७, * **नित्यकर्मसु** नास्त्यनध्यायः । **के.** १२।३।७।१८–१९.

* **नित्यकाम्ययोः** पौर्वापर्यनैमित्तिकन्यायेन पूर्वबाधः । (यथा पाञ्चदश्यैकविंशत्यनुवचनयोः) । **टुप्.** ६।५।१९।५४.

* **नित्यकाम्यकर्मणोः** श्रुतस्य व्रीह्यादिद्रव्यस्यापचारे सामान्याक्षेपस्य वारयितुमशक्यत्वात् तत्सामान्यं कचिद्विशेषे पर्यवस्यति इति प्रमाणसद्भावात् अस्ति प्रतिनिधिः । **वि.** ६।३।४.

* **नित्यकाम्यनैमित्तिकानि** कर्माणि यथोपपत्तिकालानि । **भा.** ११।३।२।२.

* **नित्यकाम्यविवेकः** । '**दृष्ट्या वार्तिककारस्य विशेषः काम्यनित्ययोः । अङ्गसाकल्यवैकल्यलक्षणः प्रतिपाद्यते ॥**' १ ॥ केचित् किल नास्त्येव नित्यकाम्ययोर्वैषम्यं उभयत्रापि सकलाङ्गोपसंहारात् इति मन्यन्ते । एकदेशिभिश्च कैश्चित् अनतिप्रयत्नेन दुर्बलहेत्वभिधानात् तेषामेव प्रसरः स्थिरीकृतः । '**उभयेषां निरासेन सम्यङ् न्यायः प्रदर्श्यते । येन सिध्येत् स्फुटो भेदः कर्मणोः काम्यनित्ययोः ॥**' २ ॥ तत्र पूर्वपक्षः । '**अधिकारो हि सर्वत्र विनियोगानुसारतः । अन्यथा ह्यनिवार्या स्याच्छूद्रादेरप्यधिक्रिया ॥**' ३ ॥ सर्वत्र, न केवलं काम्ये अपितु नित्येऽपीत्यर्थः । यस्मिन् कर्मणि यत् अङ्गजातं श्रुत्यादिभिः स्मृत्या आचारेण वचननामधेयचोदनालिङ्गनिमित्तातिदेशेन च प्रापितम्, तदुपसंहारशक्तियुक्तस्यैव तत्राधिकारः इति तिर्यगधिकरणे (६।१।२) स्थापितम् । सामग्र्यधीनत्वात् फलसिद्धेः इतिकर्तव्यतायुक्तस्यैव च कारणस्य तत्त्वात् (करणत्वात्) समुच्चितानामङ्गानां उपसंग्रहणात्, अन्यथा हि अष्टविधदोषनिदानविकल्पापत्तेः । विकल्पितस्य च अननुष्ठेयत्वात् कुतो यथाशक्तिप्रयोगसिद्धिः । यदि च कतिपयाङ्गोपसंहारेऽपि फलसिद्धिः स्यात्, काम्येऽपि स्यात् अविशेषात् । **ननु** यावज्जीवादिवाक्येषु निमित्तश्रुत्या तस्मिन् सति अवश्यकर्तव्यत्वावगमात् अकरणे च तद्विरोधात् तद्बलेन अङ्गहीनस्यापि फलसाधनत्वावगमात् तथैवानुष्ठीयते । काम्ये तु एवं विरोधाभावात् सर्वाङ्गोपसंहारेण अनुष्ठानम् । **इति चेन्न** । निमित्तवशादपि अवश्यकर्तव्यत्वं अधिकारिण एव । सर्वशक्तियुक्तश्च अधिकारी, नान्यः । निमित्तवाक्ये सर्वेषामधिकारावगमात् तदनुसारेण अङ्गोपसंहारः । 'यो यावन्ति उपसंहर्तुं समर्थः, तस्य तावद्भिरेव फलसिद्धिः' इति यदि उच्येत, तर्हि काम्येऽपि स्वर्गकाममात्रस्य अधिकारावगतेः तथैवानुष्ठानप्रसङ्गः । यदि च निमित्तबलेन अङ्गसंकोचः स्यात्, ततः शूद्रस्य अनाहिताग्नेः आहिताग्नीनां च विद्याविरहिणां तद्व्यतिरिक्ताङ्गानुष्ठानशक्तिशालिनामपि अधिकारः स्यात् । तस्मात् सर्वाङ्गशक्तिः अधिकारिविशेषणमिति । अत एव पञ्चमाध्यायात् परं अधिकारनिरूपणम्, शक्त्यपेक्षत्वादधिकारस्य, शक्तेश्च शक्यरूपानुष्ठेयाधीननिरूपणत्वात्, तस्य च अध्यायपञ्चकेन अवधारणात् । तदुक्तम् 'कार्ये

ज्ञातेऽधिकारः स्यात्' इति। **एतेन** ज्ञाप्यज्ञापकभावं संबन्धं निराकृत्य अवसरलक्षणं अधिकारस्य आचक्षाणाः **निरस्ता वेदितव्याः**। तत् उभयत्रापि (नित्ये काम्ये च) सर्वाङ्गोपसंहारः इति।

'केचित्तु विषयीभावः करणीभावपूर्वकः।
काम्ये तेनाङ्गसाकल्यमाहुर्नित्ये विपर्ययम्॥' ४॥

'कार्यरूपं तावदपूर्वं प्रधानवाक्यार्थः' इति स्थितम्। तच्च कृत्यधीनात्मलाभम्, कृतिश्च एवंविधेषु पुरुषप्रयत्न एव। स च चेतनं कर्तारमपेक्षते। तस्य च कर्तृत्वमधिकारापेक्षम्। यो हि 'मदर्थमिदं कर्म, अहमत्र स्वामी' इति विजानाति, स तत् अनुतिष्ठति नान्यः। स च अधिकृतः इत्युच्यते। अधिकारश्च एवंविधेषु नियोज्यताऽपेक्षः। तद्धि कर्म तस्य स्वं भवति, यत् यस्य कार्यं साधयति। तेन 'ममेदं कार्यम्' इत्येवं कार्यमपेक्ष्य तत्साधने कर्मणि पुरुषस्य अधिकारावगमः। यश्च कार्यं स्वकीयत्वेन बुध्यते, स नियोज्यः। न च अपूर्वं कार्यं सुखदुःखपरिहारवत् कस्यचित् इच्छागोचरः। यतः प्रमाणान्तरेणैव तदर्थिनः कार्यत्वावगमात्तत्साधने कर्मणि अधिकारः स्यात्। अतो वचनेनैव 'अस्येदं कार्यम्' इति प्रतिपादयितव्यम्। तदेवं नियोज्यापेक्षं कार्यम्, स च अनुपादेयविशेषणविशिष्टः। तच्च (अनुपादेयविशेषणं) फलनिमित्तभेदेन द्विविधम्। तत्र फलमनुत्पन्नं न स्वरूपेण विशेषणीभवितुमर्हति इति स्वकामनामुखेन नियोज्यं विशिनष्टि। फलकामश्च स उच्यते, यः फलमात्मनः साधयितुमिच्छति। स च तदेव कार्यं बुध्यते, यत् स्वकामनाऽनुगुणमिति। ('ननु अपूर्वस्य फलं प्रति जनकत्वेन अन्वये विशेषणताऽऽपत्त्या नियोगः एव प्रधानं वाक्यार्थः इति सिद्धान्तासिद्धिः इति। अत आह– नियोगस्येति। प्रधानस्यापि नियोगस्य स्वसिद्ध्यर्थो यः फलकामनाविशिष्टनियोज्येन संबन्धः, तदर्थं फलानुकूल्यमास्थेयं स्वीकार्यमित्यर्थः'। उत्तरग्रन्थस्य इयं टिप्पणी–के.) नियोज्यस्य (नियोगस्य) फलानुकूल्यं प्रधानस्यापि स्वसिद्ध्यर्थविशिष्टनियोज्यसंबन्धार्थमास्थेयम्। तच्च कार्यं प्रयत्नसंपाद्यम्, प्रयत्नस्य अनवच्छिन्नस्य अनिरूपणात् तदवच्छेदकमपेक्षते। अवच्छेदकश्च प्रायेण भावार्थः, तस्यैव स्वरूपेण तत्संबन्धित्वात्। न खलु अलब्धपाकादिभावार्थविषयः प्रयत्नो लोके दृश्यते; कचिच्च शब्दवशेन द्रव्यदेवतासंबन्धादिः भावार्थनिर्वाहितप्रयत्नसंबन्धः अवच्छेदको भवति। तदेवं कार्यस्य कृत्यवच्छिन्नत्वात्, कृतेश्च भावार्थाद्यवच्छेदकमन्तरेण अप्रतीतेः कृतिप्रणाडिकया कार्यस्य भवति भावार्थादिः अवच्छेदकः। अवच्छेदकश्च विषयः इत्युच्यते। प्रतीत्यनुबन्धो हि विषयः। अनवच्छिन्नं च कार्यं प्रत्येतुमशक्यमिति तदवच्छेदकं तत्प्रतीत्यनुबन्धितया भवति विषयः। स च भावार्थः कामनाऽनुगुणस्य कार्यस्य विषयाभावात् पुरस्कृतकामोपायभावः शक्यः अभिगन्तुमिति उपायत्वेन रूपेण विषयीभवति। तदुपायता च निखिलाङ्गग्रामसंपादितोपकारस्य, इति अङ्गानुषङ्गव्यतिक्रमे समस्ताङ्गजन्याङ्गोपकारस्य असंपत्तेः उपायत्वाभावे विषयत्वाभावात् विषयिणोऽपि कार्यस्य अप्रतीतेः न तद्बलेन हीनाङ्गकर्मानुष्ठानं भवेत्। नित्ये तु नायं प्रकारः संभवति। नहि तत्र फलकामो नियोज्यः, येन अनुपायं कार्यं कार्यतया न बुध्येत। सिद्धविशेषणविशिष्टस्तु भावार्थावच्छिन्नमेव कार्यं प्रथममवगच्छति। प्रतीतसविषयककार्यस्तु कृतिं विना कार्याभावात् कृतेश्च अकरणिकाया असंभवात् करणमपेक्षमाणः संनिहितस्य भावार्थस्य विषयीभूतस्य करणतामुपकल्पयति। कथं पुनः कृतिनिवर्त्य एव भावार्थः तां प्रति करणं इति चेत्, तदवच्छिन्नायास्तस्याः तदपूर्वविशेषकृतित्वात् तथाविधस्य च लोके करणत्वप्रसिद्धेः। तथाहि, यथा छेत्तुः उद्यमननिपातनलक्षणया क्रियया परशुः व्याप्यमानोऽपि तामेव प्रति करणम्, तद्विषयायास्तस्याः द्वैधीभावफलत्वात्। नहि लोष्टविषये उद्यमननिपातने द्वैधीभावं फलतः [फलति फलतः] एवं यद्यपि कृत्या भावार्थो व्याप्यते, तथापि अपूर्वविशेषकृतित्वं तस्याः तद्विषयत्वाधीनं इति युक्त एव करणभावो भावार्थस्य। अपूर्वस्य तु उद्देश्यत्वात् कार्यत्वम्। तदेवं नित्ये विषयीभूतस्य भावार्थस्य पश्चात् करणत्वं इतिकर्तव्यतासाहित्यं च तस्य प्रतीयते, इति नाङ्गलोपेऽपि विषयाभावः, ततश्च विषयाधीनप्रतीतेः कार्यस्य विषयाविलये अविलयात् तत्साधने कर्मणि अधिकारप्रतीतेः तद्बलेन हीनाङ्गकमपि

कर्म अनुष्ठापयति नियोगः वैकृतः इव प्रत्याम्नातप्रतिषिद्धलुप्तार्थाङ्गव्यतिरिक्ताङ्गानुष्ठानं इति सिद्धः काम्यनित्यविशेषः ।

तदेतत् आपातकल्याणं सूक्ष्मन्यायदृष्ट्या निपुणं निरूप्यमाणं आरकूटायते । कथम् ? **'फलस्य विप्रकृष्टत्वादपूर्वानभिधानतः । तत्प्राधान्यप्रहाण्या च विषयत्वोपपत्तितः ॥ ५ ॥ समप्रधानभावेन स्वरूपस्यानपायतः । अप्रयोजकभावेन जातेष्टौ च प्रसङ्गतः ॥' ६ ॥** विप्रकृष्टं हि पदान्तरोपात्तं फलं भावार्थस्य, संनिकृष्टं तु स्वपदोपात्तमपूर्वम् । तत्र विप्रकृष्टेन प्रथमं साधनतया अन्वीय विप्रकृष्टतरैः वाक्यान्तरोपात्तैरङ्गैः संबध्य तदन्वितेन रूपेण स्वपदप्रतिपाद्यमपूर्वं पश्चादवच्छिनत्ति इति कः श्रुतिवाक्यबलाबलज्ञः अभिदधीत । यद्यपि कामोपायस्य कार्यस्य विषयीभवतो भावार्थस्य तत्साधनत्वमवश्यम्भावि, तथापि न तत् प्रथमं निरूपयितव्यम् । नहि येन विना यद् वस्तु नोपपद्यते, तन्निरूपणपुरःसरमेव तत् वस्तु प्रत्येतव्यम्, प्रतिपन्नेऽपि च वस्तुनि तदुपपादकं वस्तु पश्चादपि प्रतीयते एव धूमे इव धूमध्वजः । तेन प्रथमं पदश्रुत्या भावार्थमात्रविषयमपूर्वं प्रतिपद्य पश्चात् फलोपायभूतकार्यविषयत्वान्यथाऽनुपपत्त्या तत्साधनभावः तदुपपत्तये च अङ्गान्वयः प्रतीयते इति नास्ति अङ्गलोपे विषयविलोप इति । यदि च विप्रकृष्टप्रमाणकं चरमनिरूपणमपि साधनत्वमवश्यं भवति इति कृत्वा विषयकोटौ निवेश्येत, ततो नित्येऽपि विषयीभवतः तत्करणत्वावश्यम्भावात्, अङ्गोपेतस्य च तत्त्वात् तथैव विषयत्वं इति अङ्गाभावे विषयविलयः प्रसज्येत ।

यस्तु वदति नावश्यं नित्ये नियोगविषयस्य तत्करणत्वं अकरणभूतस्यापि नञर्थस्य नियोगविषयत्वदर्शनादिति, स वक्तव्यः काम्यनियोगविषयस्यापि नैकान्तिकं फलकरणत्वम्, द्रव्यदेवतासंबन्धस्य अकरणभूतस्यापि सौर्यादिवाक्येषु विषयत्वदर्शनादिति । स चेदेवमुक्तः प्रतिब्रूयात् 'अकरणभूतोऽपि द्रव्यदेवतासंबन्धः तदविनाभूतः तेन रूपेण विषयः' इति, प्रतिब्रूयादेनं एवं नञर्थस्यापि तदविनाभूतस्य तेनैव रूपेण विषयत्वमिति तुल्या चर्चा । तस्मात् यथा नित्येषु भावार्थमात्रे विषयीभूते पश्चात् करणत्वं इतिकर्तव्यता तु पश्चात् प्रतीयते, तथा काम्येष्वपि । **'श्रुत्या भावार्थमात्रस्य विषयत्वे निरूपिते । पश्चात् फलादिसंबन्धो वाक्यादेः संप्रतीयते ॥' ७ ॥**

एवं पदान्तरोपादानलक्षणस्तावत् एको विप्रकर्षः लक्षणानिमित्तश्चापरः । तथाहि, न स्वर्गकामशब्देन स्वर्गस्य साध्यत्वमभिधीयते । कामसंबन्धात्तु स्वर्गस्य साध्यत्वमनुमाय ततः स्वर्गसाधनत्वं यागस्य निरूपयितव्यं इति विप्रकर्षः । यत्र च द्रव्यदेवतासंबन्धो नियोगविषयः तत्र तस्य करणत्वानभ्युपगमात् अकरणीभूतस्य विषयत्वानुपपत्तेः एवं वक्तव्यम् 'करणीभूतयागसंपाद्यो द्रव्यदेवतासंबन्धो नियोगस्य विषयः, अङ्गाभावे च करणीभूतयागाभावात् तत्संपाद्यद्रव्यदेवतासंबन्धाभावेन विषयविलयः' इति । ततश्च द्रव्यदेवतासंबन्धेन यागमनुमाय तस्य च करणत्वं परिकल्प्य तत्संपाद्यद्रव्यदेवतासंबन्धस्य विषयत्वनिरूपणमिति विप्रकर्षः । विश्वजिदादौ च यत्र फलकामो नियोज्यो न श्रूयते, तत्र नियोज्यं कल्पयित्वा तत्संबन्धे यागस्य करणत्वं परिकल्प्य तादृशस्य विषयत्वं निरूपयितव्यं इत्यपि विप्रकर्षः । किञ्च तत्र नियोज्यापरिकल्पने निमित्तं तावत् न नियोगः, तस्य अप्रतिपन्नत्वात् । नहि अप्रतिपन्नं कल्पकं कल्पनाय कल्पते । अप्रतिपन्नश्चात्र नियोगः, विषयानिरूपणात् अविषयकार्यप्रतीत्यनुपपत्तेः । करणीभूतो हि यागो नियोगविषयः । न च अकल्पिते नियोज्ये फलकामे करणीभूनयागसिद्धिः । तत्सिद्धौ च नियोज्यसिद्धिः, तदधीना च करणीभूतयागसिद्धिः इति चक्रकमप्रतिष्ठितमापद्येत । तेन तत्र प्रथमं भावार्थमात्रविषयमपूर्वं प्रतीत्य ततो नियोज्यत्वादिकल्पनं इति अङ्गलोपविषयाविलयात् यथाशक्तिप्रयोगप्रसङ्गः । किञ्च, सोमादिषु साधनेषु स्ववाक्येषु श्रूयमाणेष्वपि तत्साध्यरूपेण विषयत्वमनभ्युपगम्य फलश्रवणबलेन तत्साधनरूपस्य विषयत्वमिच्छद्भिः स्वदर्शनानुरागः अतीवाविष्कृतः । कः खलु पदान्तरेभ्यः फलपदे विशेषः । तदधीनसिद्धित्वमिति चेन्न, व्याघातात् । स्यादेतत् । फलकामिनियोज्यसंबन्धबलेन हि यागस्य तत्साधनत्वानुपपत्त्या

तद्व्यतिरिक्तमपूर्वं सिध्यत् तदानुकूल्येन सिध्यतीत्यवश्यं तद्विषयस्य तत्साधनत्वेन भवितव्यमित्यस्ति पदान्तरेभ्यः फलपदस्य विशेषः । **तन्न**, व्याघातात् । यस्मात् क्षणिकस्य यागस्य फलसाधनत्वं नोपपद्यते । तस्मात् फलकामी न तत्कार्यतया बुध्यते, अपितु फलसाधनभूतयागविषयमपूर्वं बुध्यते इति कथमिदं परस्परं व्याहतं बुद्धिमन्तः अभिदधीरन् । कश्चित्तु निपुणंमन्यः प्रभाकरदर्शनं शिक्षयन् इदं ब्रह्मास्त्रमुत्सृजति 'नैव भावार्थस्य फलकरणभूतस्य विषयत्वम्, किं तर्हि फलकामस्य यत् कार्यं तत् तत्सामग्न्यवच्छिन्नमेव तेन प्रत्येतव्यम् । सामग्री च करणेतिकर्तव्यतारूपा तेन इतिकर्तव्यतालोपे विषयविलयः इति । न चैवं यागस्य अविषयत्वम्, सामग्न्यवच्छिन्नस्यापि तद्विशेषापरिज्ञाने साकाङ्क्षत्वात् । तेन स्वपदावगतो नियोगः पश्चात् यागेनावच्छिद्यते, न तु याग एव फलान्वितः अवच्छेदकः' इति । तस्यापि तदस्त्रं अयमेव ब्रह्मदण्डो ग्रसते 'फलस्य विप्रकृष्टत्वात्' इति । न खलु पदान्तरोपात्तफलाविनाभावप्रतीता तत्सामग्री स्वपदस्थात् यागात् पूर्वमेव अपूर्वमवच्छेत्तुं पारयति । यथा न यागः अपूर्वं विहाय फलेन प्रथमं संबध्यते । तथा अपूर्वमपि यागं विहाय फलसामग्न्या विप्रकर्षस्य तुल्यत्वादित्यलमनेन । प्रसिद्ध एव मार्गे दूषणान्तरमुच्यते । यदि च करणीभूतो यागो विषयः ततो नियोगस्य विषयाधीननिरूपणत्वात् अनिरूपिते च विषये तदधीननिरूपणाशक्तेः, नियोगप्रतिपत्तेः पूर्वमेव फलसाधनत्वं यागस्य निरूपयितव्यम् । निरूपिते तत्साधनभावं च यागं फलकामी कार्यतया बोद्धुमलमेव इति न नियोज्यसंबन्धानुपपत्त्या क्रियातिरिक्तकार्याभिधानकल्पनाबीजं लिङादीनां सिध्यतीति सर्वं भवदीयसिद्धान्तकोशसारभूतं अपूर्वाभिधानमुत्सन्नसंकथं जातम् । सिध्यतु वा अभिधानम्, न पुनः प्राधान्यं संभवति परार्थभूतवाक्यार्थविषयत्वात् अङ्गप्रधानोत्पत्तिनियोगवत् । यो हि साधिकारवाक्ये प्रधानभूतकार्याभिधायित्वेन प्रज्ञातानामपि लिङादीनां प्रयाजादिवाक्येषु विनियुक्तविषयतया प्राधान्यं विहाय लक्षणया गुणभूतकार्याभिधानमाश्रयति, स कथमन्यत्र अविदितप्रधानकार्याभिधानशक्तीनामेव अधिकारवाक्येषु विनियुक्तविषयत्वे सत्यपि प्रधानकार्याभिधानमाश्रयेत् । तेनापूर्वस्य प्राधान्यं विहीयते इति । किञ्च, उपपद्यते एव यागस्य अकरणभूतस्यापि विषयत्वम् । नियोगो हि फलसाधनम्, तस्य यागः स्वरूपेणैव विषयः इति किं नोपपद्यते । यद्युच्येत सत्यमपूर्वं फलसाधनम्, तत्तु न स्वरूपेण स्मृतिगोचरम्, भावार्थगोचरया तु तया साध्यम्, तयैव च कृत्या तद्गोचरया अपूर्वद्वारेण फलमपि साध्यते । तेन एकयैव कृत्या एकभावार्थगोचरया अपूर्वं फलं च साध्यते इति अपूर्वविषयस्य भावार्थस्य फलकरणत्वमवश्यम्भावीति । सत्यमेवं किन्तु अपूर्वकरणत्वनिरूपणपुरोधाने एव सति फलकरणत्वमुक्तं भवति, तत्करणत्वं विषयपुरःसरमिति विषयभूतस्य करणत्वप्रसङ्गः । अवश्यं च अपूर्वकरणत्वपुरःसरमेव क्रियायाः फलकरणत्वं निरूपयितव्यम्, अन्यथा कथं क्षणिकायास्तस्याः कालान्तरभाविनि फले साधनत्वं संभाव्येत । ननु अलब्धे द्वारे मा नाम संभूत्, लब्धे तु किमिति न संभवति । किमत्र द्वारं लब्धम् । किं तदपूर्वं तत्त्वान्तरं वा ? तत्त्वान्तरत्वे तावत् तत एव यागस्य करणत्वोपपत्तेः देयजलाञ्जलि अपूर्वं प्रसज्येत । अपूर्वद्वारेण तु फलसाधनत्वं अपूर्वसाधनत्वनिरूपणाधीननिरूपणम् । तद्धि तस्य द्वारमुच्यते यत् येन स्वफलोद्देशप्रवृत्तेन तत्सिद्ध्यर्थं अन्तरा साध्यते । तदेवं सत्यपि यद्यत्र करणीभूतस्य विषयत्वमुच्यते, ततः फलकरणत्वाधीनं नियोगविषयत्वम्, तदधीनं च नियोगं प्रति करणत्वम्, तदधीनं च फलकरणत्वमिति चक्रकं आपद्येत । किञ्च एवमङ्गलोपे विषयविलयं ब्रुवाणः प्रष्टव्यः किमङ्गविशिष्टस्य विलयत्वम्, उत तदुपलक्षितस्येति । किञ्चातः यदि तावदङ्गविशिष्टस्य, ततः सर्वेषामेव प्रयाजादीनामाग्नेयादीनां च समप्राधान्यं प्रसज्येत, गुणाधिकारवत् । यथा हि दधिविशिष्टहोमस्य इन्द्रियकामापूर्वसाधनत्वे दधिहोमयोरपि समप्राधान्यम्, न गुणप्रधानभावः, तद्वदिहापि स्यात् । अथ अङ्गोपलक्षितस्य यागस्वरूपस्य, तर्हि पुरोडाशद्वयोपलक्षितस्येव अन्तरालकालस्य अङ्गलोपेऽपि एकपुरोडाशापायेऽपि अनपायात् नास्ति अङ्गलोपे विषयविलयः । किञ्च एवं अपूर्वप्रयुक्तिः अपूर्वग्रहणं च अङ्गानां न स्यात् साधिकारो विधिप्रतिपन्नः सन् स्व-

संनिधिसमाम्नातान् प्रयाजादीन् स्वस्वानुवादशङ्कानिरुद्धनियोगान्तरविषयभावान् स्वार्थतया गृहीत्वा स्वगृहीतेष्वेव व्रीह्यादिषु द्वारभूतेषु स्वरूपातिक्रमेणैव स्वसाधनविशेषरूपे विनियुङ्क्ते । अङ्गसंबन्धात्तु प्राक् विषयाभावेन अप्रतिपन्ने नियोगे सर्वमिदं अजातपुत्रक्रीडनकमापद्यते । फलं करणं वा प्रयोजकं स्यादङ्गानाम् ।

'अप्रयोजकभावेन' इत्यस्य (षष्ठश्लोकस्थपदस्य) अपरा व्याख्या– फलसाधनरूपे भावार्थे नियोगेन संबध्यमाने 'अर्थाभिधानकर्म च' (४।१।११।२६) इत्यनेन न्यायेन तुषोपवापवत् कपालस्य अप्रयोजकं साङ्गस्य यागस्य अपूर्वं प्रसज्येत । ननु इष्टमेव काम्येषु विधेयप्रयोजकत्वम् । अत एव श्येनस्य अविधेयत्वादनर्थत्वम् । यद्यपि स्वविधिसिद्ध्यर्थमनुमीयेत, तथापि न विधेयत्वम् । यस्य विधिः स्वसिद्ध्यर्थं अनुष्ठानमाक्षिपति, तत् विधेयम्, न तु विधिसाधनमात्रम् । काम्येषु तु फलत एव अनुष्ठीयमानं कर्म विधिमपि साधयति इति न विधेयं इति । (अत्र अपरा व्याख्या समाप्तेति भाति । तथापि विचार्यम्) किमिदानीं अङ्गेषु अप्रयोजको विधिरिष्यते ? साङ्गस्य हि फलसाधनस्य विषयत्वोपगमे तादृशस्यैव फलप्रयुक्तस्य उपजीवनात् अङ्गप्रयोजको विधिः अङ्गानामपि स्यात् । ततश्च अग्नीषोमीयहिंसा विधेयत्वाभावात् निषेधगोचरः अनर्थः स्यात् । **अत्र कश्चित्** वैयात्यादेवमाह– मा भूत् अङ्गानां विधेयत्वम् । न चैतावता अग्नीषोमीयादेः निषेधप्रसङ्गः द्विविधस्यापि निषेधस्य असंभावनीयत्वात् । द्वेधा हि किञ्चित्फलोद्देशेन अनुष्ठीयमानं कर्म निषिध्यते फलपर्यन्तं वा साधनमात्रपर्यवसानं वा । तद्यथा सुखार्थं मदिरास्वादः प्रसक्त एव निषिध्यते नानेन सुखमवाप्तव्यम्, अकार्यं एतत्साध्यं सुखमिति । क्वचित् साधनमात्रं निषिध्यते, तद्यथा रोगार्तः तदुपशमार्थी तदुपकारके एव भेषजबुद्ध्या प्रवर्तमानो निषिध्यते 'मैवं कार्षीः, नेदं अस्योपशमसाधनम्' इति । तत्र न तावत् अग्नीषोमीये फलपर्यन्ते निषेधसंभवः । स्वर्गस्य निरतिशयसुखरूपस्य कार्यत्वेन सर्वजनविदितस्य अकार्यत्वाभिधाने प्रमाणान्तरविरोधप्रसङ्गात् । नापि साधनत्वनिषेधः, वचनविरोधात् । तस्मात् न निषेध्यत्वमिति । तदिदमतितुच्छं न निराकरणमपि प्रयोजयति । तथाहि, मदिरास्वादेन संपाद्यं सुखं प्रमाणान्तरेण कार्यं विदितमपि अकार्यमुच्यते वचनेन । तथा स्वर्गसुखमपि इति नोच्यते । प्रमाणान्तरं हि क्षिप्रमेव अग्रहणतया व्याख्यायते । तस्मात् अङ्गेष्वपि अप्रयोजकत्वमनिष्टमेव । तच्च आपद्येत अङ्गविशिष्टस्य विषयत्वे । **आह–** 'सत्यं अङ्गविशिष्टस्य विषयत्वे समप्राधान्यं अप्रयोजकत्वं च स्यात् । न तु तद्विशिष्टो विषयः, करणीभूतस्तु विषयः । तद्भावश्च अङ्गलोपे लुप्यात् इति अङ्गलोपे विषयविलयः इत्युच्यते, न तु अङ्गलोपे तस्यैव विषयत्वम् । तस्मात् अदोषः' इति । **नैतद्युक्तम्** । यदि अङ्गलोपे करणत्वं नास्ति, नित्येऽपि तर्हि हीनाङ्गस्य करणत्वं नास्ति इति अननुष्ठानं स्यात् ? अथ तत्र विधिना यावत् अङ्गं प्राप्यते, तदुपेतस्यैव करणत्वं भवति । तदितरत्रापि कियद्भिरङ्गैरुपेतस्य करणत्वं इत्यनवगमात् विधिगृहीतानामेव अङ्गानां संग्रहणात् यावन्ति अङ्गानि विधिना प्राप्यन्ते, तदुपेतस्यैव करणत्वं भवति इति नास्ति अङ्गलोपे विषयविलयः । **किञ्च** जातेष्टौ संवलिताधिकाराभ्युपगमात् करणीभूतस्यैव विषयत्वं इति न यथाशक्तिप्रयोगः स्यात् । ततश्च अङ्गसंपत्त्यर्थमेव उत्कर्षस्य वक्तुं शक्यत्वात् शेषिविरोधेन निमित्तस्वभावभङ्गार्थं आद्यमधिकरणमनर्थकं स्यात् । ननु तत्र निमित्तश्रवणबलात् अङ्गहानं स्यात्, न, श्रुतेऽपि निमित्ते नैमित्तिकमेव कर्तव्यम्, नान्यत् । करणीभूतभावार्थविषयं च कार्यं नैमित्तिकं इति कुतः अनीदृशस्यानुष्ठानम् । इत्यलमनेन करणीभूतविषयत्वेन । **'तदेतत् सर्वसिद्धान्तकोशसारधनं हरन् । को हि शङ्खनिधिं प्राज्ञः स्वगृहे स्थापयेत् स्वयम् ॥' ८ ॥** तस्मात् सर्वत्र नित्ये काम्ये च निखिलाङ्गोपसंहार इति ।

अत्राभिधीयते । **'निमित्तश्रवणान्नित्यं यथाशक्ति प्रयुज्यते । काम्यं च तदभावेन निखिलाङ्गसमन्वितम् ॥' ९ ॥** इह हि 'यावज्जीवमग्निहोत्रं जुहोति' इति यावच्छब्दानुबन्धात् जीवनं होमनिमित्तत्वेन अवगम्यते । निमित्तस्य च तत् रूपम्, यत् तस्मिन् सति नैमित्तिकमवश्यं कार्यम् । किमिदमवश्यं कार्य-

मिति ? अवश्यमेव कर्तारं अभिप्रेतेन फलेन योजयतीत्यर्थः । यथा चैतदेव कार्यत्वम्, तथा प्रतिपादितं विधिविवेके । अत एव एष सर्वेषामभिमतः प्रत्यवायपरिहारः प्रयोजनमवकल्पते । यदि हि अन्यथालक्षणं फलं स्यात्, ततः सर्वेषां फलसाधनत्वं श्रुतमुपरुध्येत । ननु च सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते ? न, तस्य मुमुक्षुभिरप्रार्थितत्वात् । प्रत्यवायपरिहारस्तु तैरपीष्यते एव । कथं तर्हि 'स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्' इति, **नन्वेवं** विश्वजित्यपि प्रत्यवायपरिहार एव फलं स्यात् । पापक्षयार्थस्य च नित्यत्वे वियुनैकत्रिकादीनामपि पापक्षयार्थानां नित्यत्वं स्यात् । तथा च यथाशक्तिप्रयोगः स्यात् । **उच्यते** । न तावत् विश्वजिति प्रत्यवायपरिहारः फलं प्रसज्यते गौरवात् । प्रत्यवायो हि न तावत् स्वरूपेण फलम्, अपुरुषार्थत्वात् । न च तत्प्रागभावः, तस्य स्वयमेव सिद्धत्वात् । न तद्ध्वंसः, उत्पन्नस्य दुःखस्य स्वयमेव विशरणात् । तेन प्रत्यवायहेतुभूतादृष्टप्रध्वंसः फलं कल्पयितव्यम् । ततश्च प्रत्यवायावच्छिन्नं तद्धेतुं निरूप्य तदभावः फलं कल्पयितव्यं इति गौरवम् । सुखस्य तु स्वयमेव साध्यत्वं सुकल्पमिति लाघवम् । तेन सुखरूपे तावत् साध्ये कल्पयितव्ये पशुपुत्रादिसुखविशेषापेक्षया अनवच्छिन्नसुखरूपस्य स्वर्गस्य सर्वान् प्रति अविशिष्टत्वादिति विशेष उच्यते । येऽपि जीवदधिकारं प्रयुक्तिकल्पनाभयात् अनिष्ट्वा कामाधिकारमिच्छन्ति, तैरपि प्रत्यवायनिवृत्तिकाममुत्सृज्य स्वर्गकामकल्पने अयमेव न्यायः समाश्रयितव्यः । विद्यन्ते हि तेषामपि दर्शने शंय्वधिकरणसिद्धान्तात् केचित् प्रत्यवायकरा निषिद्धाः अभ्युपगम्य एतदुच्यते, न तु जीवने अधिकारविशेषणे किञ्चित् गौरवम् । **ननु** निमित्ताधिकारे विधेः प्रयोजकत्वं कल्पयितव्यमिति तैरत्रापि विधेः फलसाधनत्वं कल्पयितव्यम्, इत्यविशेषः प्रत्युत प्रयोजकत्वमेव विधेः स्वाभाविकं अप्रयोजकत्वं तु अपवादः । किञ्च आख्याताार्थाविनाभावप्रतीतकर्तृत्ववत्त्वेनैव अजीवतस्तदनुपपत्तेः जीवनं प्रतिपन्नम् । तस्याधिकारिविशेषणत्वमेव केवलं कल्प्यम्, इतरत्र फलकामनास्वरूपमेव अन्यतः अप्रतिपन्नं कल्प्यमिति महाविशेष इति । प्रकृतमनुसरामः । तदेवं विश्वजिति तावत् स्वर्गः फलं यावज्जीवादिषु आवश्यकत्वात् पापक्षय इत्युक्तम् । यत्तु वियुनादीनामपि आवश्यकत्वं तत्फलत्वादिति, तन्न, आवश्यकानां पापक्षयः फलमुच्यते, न तत्फलानां आवश्यकत्वमिति । कः पुनरनयोर्विशेषः ? अयमस्ति विशेषः, यत् फलमवश्यमेव साधयति, तदावश्यकं नैमित्तिकं च तथा । वियुनादि तु नावश्यं फलं साधयतीति शब्दोऽस्ति, निमित्ताश्रवणात् । फलं तु सर्वेषामिष्टं नाम भवतु, फलसाधनत्वावश्यम्भावश्च अङ्गसंकोचनिमित्तमिति न यथाशक्ति प्रयोगप्रसङ्ग इति गभीरोऽयं न्यायमहाह्रदः । आह, कथं पुनरवश्यम्भावात् अङ्गसंकोच इति । उच्यते, अवश्यमेव अस्मिन् सति इदं कृतं फलं साधयति इति प्रतीयते । यदि तु अङ्गलोपे न साधयेत् अवश्यसाधनत्वं विरुध्येत । **ननु** अधिकारिणा कृतं अवश्यं साधयति इति वक्तव्यम्, इतरथा शूद्रादिकृतमपि साधयेत्, अकाले च । सर्वाङ्गशक्तश्च अधिकारी, इति अन्यादृशेन कृतं असाधनमिति । **तदुच्यते** । न तावत् शक्तिः अधिकारिविशेषणं संश्रूयते । सा अनुष्ठानोपदेशान्यथाऽनुपपत्त्या अशक्तस्य तदुपदेशासंभवात् कल्प्यते । तत्र यावत् प्रयोगविधिना श्रुत्यर्थाद्वा अनुष्ठाप्यते, तच्छक्तिः अधिकारिविशेषणम् । सा च स्ववाक्यनिमित्ताविरोधि अङ्गमनुष्ठापयति, इति यावन्ति अङ्गानि यदा अनुष्ठातुं शक्यन्ते, तावन्ति तदा अनुष्ठापयति । न चैवं अङ्गोपादानपरित्यागाभ्यां वैरूप्यं प्रसज्यते, 'यथाशक्ति कुर्यात्' इत्येवंविधैकरूपयैव वचोभङ्ग्या उभयसिद्धेः । एतच्च प्रयोगविध्यनुष्ठाप्येषु अङ्गेषु उच्यते । यद्धि 'कुर्यात्' इत्युच्यते, तत् 'यथाशक्ति' इत्युपपद्यते । यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि च उपजीव्यन्ते, यथा लोके अर्थार्जनादि, वेदे कालो विद्या अग्निश्च, तेषां स्वरूपेणैव अधिकारिविशेषणत्वं अमावास्यासंबन्धी द्रव्यवान् विद्यावान् अग्निमानिति । एतदुक्तं भवति, अङ्गं हि नाम विधिसंबन्धात् उपादीयते, निमित्तानुरोधात् त्यज्यते वा उभयानुग्रहार्थं वा शक्तं प्रति उपादीयते, अशक्तं प्रति त्यज्यते इति, नान्या गतिरस्ति । तत्र उभयानुग्रहस्तावत् साधीयान्, यदि संभवति । संभवश्च उपादेयेषु अङ्गेषु

‘यथाशक्ति व्रीहीन् संपादयेत् यथाशक्ति वा अवहन्यात्’ इति। आहवनीयादिस्वरूपं तु न अनेन विधिना उपादीयते। यद्यपि होमं प्रत्युपादीयते स्वरूपं तु नोपादीयते, तत्र यदि आहिताग्निः आहवनीये जुहुयात्, इतरश्च यत्रक्वचित् इति विधीयते, ततो वैरूप्यं प्रसज्येत। नच ‘यथाशक्ति आहवनीयं संपाद्य जुहुयात्’ इति उभयसाधारण्येन विधानं संभवति, आहवनीयादिसंपादनस्य अत्रार्थादपि व्रीह्यादिसंपादनवत् विधानात्। तेन आहवनीयमनादृत्यैव होममात्रमनुष्ठाप्येत, आहवनीयवन्तं वा अधिकृत्य आहवनीये होमः। तत्रानादरे सति आहवनीयविधेः अत्यन्तबाधप्रसङ्गात्। यावज्जीवशब्दस्य तदीयजीवनेऽपि कृतार्थत्वेन अत्यन्तपीडाऽभावात्, ‘अग्निमान् जीवन् जुहुयात्’ इत्येवमाश्रीयते। अनेन कालविद्यादयो व्याख्याताः। ननु एवं अङ्गान्तरेऽपि किमिति जीवनं नोपसंह्रियते ‘तच्छक्तिमान् जीवन्’ इति, शक्त्यपेक्षयाऽपि उपसंहारे तेषामत्यन्तविरोधाभावात्। तत्र निमित्तं वा अङ्गानुरोधेन किञ्चित् बाध्यते, अङ्गानि वा निमित्तानुरोधेन (बाध्यन्ते) इति चिन्तायाम्, प्रधानवाक्ये श्रुतत्वेन निमित्तं प्रथमं प्रधानमनुरुध्य प्रधानाविरोधेन अङ्गानि संबन्धयन्ति। काम्ये तु निमित्तवाक्यस्य कश्चित् विरोधो नास्ति इति अङ्गानि अपेक्षितानि उपसंह्रियन्ते इति निखिलाङ्गयुक्तस्यैव प्रयोगः। नित्ये तु यथोक्तेन न्यायेन विप्राग्निकालार्षेयवरणपरित्यागेन अन्येषामङ्गानां यथा शक्त्युपसंहारः इति सिद्धः काम्यनित्यविशेषः। **आह**, भवेदेवं यदि निमित्तानन्तरं नैमित्तिकेन अवश्यं भवितव्यम्, न तु तदस्ति। कारणपर्यायो हि निमित्तशब्दः। न चावश्यं कारणानि कार्यवन्ति, सत्यपि कारणे सहकारिव्यपेक्षया कार्यविलम्बदर्शनात्। **तदुच्यते**। कारणशब्दस्तावत् अनेकेषु अनेकविधेषु च भावेषु कार्यजननं निमित्तीकृत्य प्रवर्तमानो न तदतिवर्तितुमर्हति। न खलु उत्सृष्टस्रजं पुरुषं स्रग्विणमाचक्षते। यस्तु अकुर्वत्यपि मृत्पिण्डे घटकारणव्यपदेशः, स लक्षणयेति द्रष्टव्यम्। न च यावज्जीवादिशब्दस्य लक्षणाकारणमस्तीति मुख्यमेव जीवनादीनां निमित्तत्वम्, तादृशं च कार्याव्यभिचारीति भवत्येव नैमित्तिकस्य अवश्यम्भाव इति युक्त एव अङ्गसंकोच इति। ‘यस्य नैमित्तिकं कर्म विफलं तस्य तादृशः। अनुष्ठानं कुतः सिध्येद्यथाशक्ति कुतस्तराम् ॥’ १० ॥

कार्यस्य किं न फलापेक्षाऽस्ति स्वयमेव कार्यरूपत्वात्। विश्वजिदादावपि न फलापेक्षया स्वर्गः कल्प्यते, किन्तु कार्यस्य कृत्यधीनत्वात्, कृतेश्च कर्तृत्वाधिकारित्वप्रणाडिकया नियोज्यापेक्षत्वात्, तस्य च अविशिष्टस्य अनुपपत्तेः तद्विशेषणापेक्षायां स्वर्गः तद्विशेषणतया कल्प्यते, न फलतया। तथाविधस्य च तस्य तादर्थ्याधिकरणन्यायेन फलत्वं संपत्स्यते। नैमित्तिकेषु तु निमित्तस्यैव नियोज्यविशेषणस्य लब्धत्वान्न तद्विशेषणतया फलसिद्धिः। न च फलतया, अनपेक्षितत्वात्। भावनाया हि वाक्यार्थत्वे स्यात् भाव्यापेक्षा। भावनोपसर्जनस्य तु भाव्यरूपस्यापूर्वस्य वाक्यार्थत्वेन फलापेक्षा नास्तीति नैमित्तिकं कर्म विफलम्, इति यस्य दर्शनम्, तस्य मते तादृग्भूतस्य विफलस्य कर्मणः अनुष्ठानमेव न सिध्यति, प्रागेव तु यथाशक्त्यनुष्ठानम्। कार्यावगमात् प्रवृत्तिः, न फलमपेक्षते इति चेन्न, फलवत्त्वादृते कार्यत्वस्यैव असंभवात्। कृतिप्रधानं हि कार्यमुच्यते। न च सुखदुःखपरिहारतत्साधनव्यतिरिक्तं कृतेः प्रधानं भवितुमर्हति। **ननु** इदमनुमानं आगमविरुद्धमुखं नोत्पत्तुमर्हति। आगमेन हि अपूर्वस्य कार्यत्वमुच्यते। तत् कथमनुमानेन निराक्रियते। **सत्यम्**, प्रवृत्त एवागमोऽनुमानं निरुणद्धि, तत्प्रवृत्तिरेव तु पदार्थयोग्यत्वाधीना। न च असुखस्य अतत्साधनस्य वा अपूर्वस्य कृतिं प्रति प्राधान्ययोग्यताऽस्ति। एकशब्दवाच्यत्वात् अविरोध इति चेन्न, व्युत्पत्तिविरोधात्। **यदि** मन्येत एकेन हि प्रत्ययेन कृतिस्तत्प्रधानं च कार्यमुच्यते, अतस्तत्र योग्यत्वमकारणम्। यत्र तु अनन्वितौ स्मृतौ पश्चादन्वितौ अभिधेयौ, तत्र योग्यत्वं कारणमिति। **तन्न**, व्युत्पत्तिविरोधात्। अन्वयायोग्ययोर्हि अर्थयोरनेनैव शब्देन अन्वितौ अभिधेयाविति व्युत्पत्तिरेव असंभावनीया। तेन अयोग्यता भिन्नशब्दवाच्ययोः अन्वयं निरुणद्धि। एकशब्दवाच्ययोस्तु व्युत्पत्तिमपि। व्युत्पत्त्यवसरे नास्ति अयोग्यत्वमिति चेन्न, इतरत्रापि प्रसङ्गात्। **स्यादेतत्**। कामाधिकारे हि अपूर्वस्याभिधेयत्वं निरूप्यते। तत्र च

फलानुकूलत्वादस्त्येव कृतिप्राधान्ययोग्यत्वं अपूर्वस्येति । तन्न, एवं सति नैमित्तिकेऽपि फलं प्रसज्येत । यदा हि कामाधिकारे कार्यत्वनिर्वाहकत्वेन फलवत्त्वमङ्गीकृतम्, तदा नैमित्तिकेऽपि कार्यत्वाभ्युपगमेन तन्निर्वाहकं फलवत्त्वमपि नियोज्यवदङ्गीकर्तव्यम् । तदभावे नियोज्यत्वाभाव इव कार्यत्वस्यैव प्रविलयात् नानुष्ठानं सिध्यति नतरां यथाशक्त्यनुष्ठानम् । इत्यास्तां तावत् ।

ननु च **'निमित्तफलसंबन्ध एकवाक्येन युज्यते। उद्देश्यद्वयसंबन्धे वाक्यभेदः प्रसज्यते ॥' ११ ॥** निमित्तफलयोर्हि द्वयोरुद्देश्ययोः एकवाक्यसंबन्धासंभवात् प्रत्युद्देश्यं वाक्यपरिसमाप्तेः निमित्तवाक्ये दुरभ्युपगमं फलमिति । उच्यते । **'द्वाभ्यां विधेयसंबन्धे वाक्यभेदः प्रसज्यते । उद्देश्येन निमित्तेन विधेयस्य न संगतिः ॥' १२ ॥** विधेयस्य हि द्वाभ्यामुद्देश्याभ्यां संबन्धे वाक्यभेदो भवति, न चेह तथा, विधेयस्य कर्मणः फलेन संबन्धात्, तत्कर्तव्यतायाश्च निमित्तेन । न चैवं सति वाक्यभेदो भवति, साकाङ्क्षत्वात् । भवति हि अस्मिन् सति इदं कुर्यात् इत्युक्ते किमर्थमित्याकाङ्क्षा । तत्र एतदर्थमिति संबध्यमानं फलम्, न वाक्यं भिनत्ति। समानजातीयं हि उद्देश्यद्वयं वाक्यं भिनत्ति, न विजातीयम् । यथा 'यस्य पिता पितामहः सोमं न पिबेत्' इति निमित्तद्वयम् 'यः प्रजाकामः पशुकामः' इति फलद्वयम् । तस्मान्नास्ति वाक्यभेद इति । यत्तु भगवता मण्डनाचार्येण निमित्तस्य उद्देश्यत्वं वाक्यभेदपरिहारार्थं निराकृतम्, तत् विधेयं प्रति उद्देश्यभावाभिप्रायम्, वार्तिके बहुशो निमित्तस्य उद्देश्यत्वाभिधानात् इत्यलमतिविस्तरेण। तस्मात् सिद्धः काम्यनित्यविशेष इति । **'पार्थसारथिना सम्यग्विशेषः काम्यनित्ययोः । आचार्यमतमाश्रित्य न्यायलेशात्प्रदर्शितः ॥' १३ ॥ इति श्रीयज्ञात्मसूरिसुतपार्थसारथिसूरिविरचितायां न्यायरत्नमालायां नित्यकाम्यविवेकः ॥**

* **नित्यत्वमनित्यत्वं च** । कृताकृतप्रसङ्गि नित्यम्, तद्विपरीतमनित्यम् । अत एव तुदति इत्यादौ परादपि गुणात् नित्यत्वात् शप्रत्ययादिर्भवति । किञ्च ध्वंसाप्रतियोगित्वं नित्यत्वम्, ध्वंसप्रतियोगित्वमनित्यत्वमिति । किञ्च इदमनित्यत्वं त्रिविधं संसर्गानित्यत्वं परिणामानित्यत्वं प्रध्वंसानित्यत्वं चेति । तत्र स्फटिकस्य लाक्षाऽऽद्युपधाने स्वरूपतिरोधानेन पररूपाभासः, उपधानापगमे स्वरूपप्रतिभासात् परिणामाभावः इति संसर्गानित्यत्वम् । यथा च बदरीफलस्य श्यामतातिरोभावे लौहित्यस्याविर्भावः इति परिणामानित्यत्वम् । यथा च सर्वात्मना विनाश इति प्रध्वंसानित्यत्वमिति । एतत् त्रिविधानित्यत्वप्रतिक्षेपेण नित्यतां प्रतिपादयितुं पतञ्जलिराह– 'ध्रुवं कूटस्थं अविचालि अनपायोपजनविकारि अनुत्पत्ति अवृद्धि अव्यययोगि यत्, तत् नित्यम्' इति । तत्र ध्रुवं कूटस्थमिति संसर्गानित्यता परिहृता । अविचालि इति परिणामानित्यता परिहृता । अनपायेत्यादिना प्रध्वंसानित्यता परिहृता ।

अथवा तदपि नित्यम्, यस्मिन् तत्त्वं न विहन्यते । किं पुनस्तत्त्वम् ? तद्भावस्तत्त्वमिति । किञ्च प्रत्यवायजनकीभूताभावप्रतियोगित्वं नित्यत्वम्, यथा एकादश्यामुपोषणं नित्यमिति । किञ्च ध्वंसप्रागभावाप्रतियोगित्वं नित्यत्वम्, यथा गगनं नित्यम् । किञ्च अहरहर्जायमानत्वमपि नित्यत्वम्, यथा 'नित्यं कुमाराः क्रीडन्ति' इति । साहस्री. ६३.

⧗ **नित्यत्वाच्चानित्यैर्नास्ति संबन्धः । ६।७।४। ५ ॥**

अनित्यशब्दः यागकालपर्यन्तमप्राप्तस्य पश्चात् प्रयत्नेन कदाचित् प्राप्स्यमानस्य धनस्य निर्देशः । विश्वजिति यागे यथा अश्वा न देयाः तथा अनित्यान्यपि देयतया न संकल्पयितव्यानि इति चशब्दार्थः। विद्यमानसर्वस्वदानस्य नित्यत्वात् अवश्यकर्तव्यत्वेन उक्तत्वात् अनित्यैर्द्रव्यैः यागकाले नास्ति देयत्वेन संबन्धः । कदाचित्तु नैव लप्स्यन्ते । तस्मात् भविष्यत्काले लप्स्यमानत्वेन संभाव्यमानं नाद्यदेयत्वेन संकल्पयितुं शक्यते । विद्यमानं तु अशक्यं वर्जयित्वा सर्वं स्वं देयं इति सिद्धान्तः । के.

* **नित्यद्रव्यविशेषगुणः** द्रव्यान्तरसंयोगासमवायिकारणकः । मणि. पृ. १९.

⧗ **नित्यधारणे विकल्पो नह्यकस्मात् प्रतिषेधः स्यात् । १२।४।१०।३०॥**

नित्यधारणे उख्यस्याग्नेः नित्यं धारणे विकल्पः स्यात्

धार्यो वा न वेति । अकस्मात् विना कारणं प्राप्तं धारणं विना 'न प्रतिसमिध्येत्, यत् प्रतिसमिध्यति भ्रातृव्यमस्मै जनयति' इति श्रुत्या कृतः प्रतिषेधो नहि नैव स्यात् । प्रतिषेधात्तु धारणमप्यस्तीति गम्यते । तस्मात् नित्यधारणाधारणयोर्विकल्पः स्यात् इति पूर्वः पक्षः ।

नित्यधारणाद् वा प्रतिषेधो गतश्रियः । ३१ ॥

गतश्रियः नित्यधारणात् 'धार्यो गतश्रिय आहवनीयः' इति श्रुत्या गतश्रियः नित्यधारणविधानात् धारणं प्राप्तम् । एवं सति 'न प्रतिसमिध्येत्' इति श्रुत्या प्रतिषेध उपपद्यते । ततो न नित्यधारणं पृथगनुमेयम् । तस्मान्न विकल्पः किन्तु नित्यत्वेन अधारणमेव । इति सिद्धान्तः । **के.**

* **नित्यनैमित्तिकयोः** न समानविधित्वम् । सोमधर्मासमानविधित्वाधिकरणं द्रष्टव्यम् । **भा.** ३।६।९।३६.
* नित्यनैमित्तिकयोः पौर्वापर्यनैमित्तिकन्यायेन पूर्वबाधः । **टुप्.** ६।५।१९।५४.

* **नित्यनैमित्तिकोभयार्थं** दध्यादि, 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य जुहुयात्', 'खादिरे पशुं बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इति । **भा.** ४।३।३।५–७.

* **नित्यप्रयुक्तत्वं** नैमित्तिकानां नास्ति । **भा.** ४।३।२।४.

* **नित्यप्रयोगस्य** काम्ये अन्तर्गतत्वात् । **वा.** ६।३।१।१ पृ. १४०७.

* **नित्यस्थले** पापक्षयस्यैव भाव्यत्वम् 'धर्मेण पापमपनुदति' इत्यादिवाक्येभ्यः प्रतीयते । **भाट्ट.** ६।३।१.

* **निदानं** जलोदरस्य । न च कस्यांचित् वैद्यकसंहितायां लौकिकः अश्वप्रतिग्रहः निदानं श्रूयते, नापि प्रत्यक्षानुमानादिभिर्गम्यते । **वा.** ३।४।१०।२९ पृ. ९६२.

* **निद्रा** सनिद्रस्य मनसो दौर्बल्यात् । अचेतयन्नेव हि सुप्तम इत्युच्यते । **भा.** १।१।५।५ पृ. ३०.

* **निधनम्** । 'ज्योतिष्टोमे सौभरमुक्थ्यानां ब्रह्मसाम (ब्राह्मणाच्छंसिनः साम) विहितम् । ... (तत्र) हीष् इति वृष्टिकामाय निधनं कुर्यात्, ऊर्क् इत्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति । निधनमिति चान्या सामभक्तिरभिधीयते । **वा.** २।२।१३।२८ पृ. ५६३.
* निधनं उद्गातृप्रस्तोतृप्रतिहर्तृभिः सर्वैर्गातव्यः अन्तिमः सामावयवः । **के.** * निधनं नाम पञ्चभिः सप्तभिर्वा भागैरुपेतस्य साम्नः अन्तिमो भागः । **वि.** २।२।१३.

* **निधानार्थता** पुरोडाशशकलादीनाम् । 'ज्योतिष्टोमे पुरोडाशशकलं ऐन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे' । अत्र पुरोडाशादयः प्रकृता एव ग्राह्याः । **भा.** ३।८।१८।३४.

* **निनयनमन्तर्वेदि**, प्रणीतानामपां न प्रयोजकम्, किन्तु प्रतिपत्तिः । संयवनं तु प्रणयनस्य प्रयोजकम् । **के.** ४।२।५।१४–१५.

* अभिघारणस्य केवलहविःसंस्कारार्थत्वात् **निनयनकालीनपुरोडाशकपालन्यायेन** (४।१।११।२६) शेषोत्पादनाप्रयोजकत्वेऽपि धारणप्रयोजकत्वोपपत्तिः (पुरोडाशकपालन्याय एवायं निनयनकालीनेति अविवक्षितम्—के.) । **भाट्ट.** ४।२।१४.

⌛ **निनयनन्यायः** । दर्शपूर्णमासयोः प्रणीतानिनयनं प्रतिपत्तिकर्म ॥

उत्पत्त्यसंयोगात् प्रणीतानामाज्यवद् विभागः स्यात् । ४।२।५।१४ ॥

भाष्यम्— दर्शपूर्णमासयोराम्नायते, 'अपः प्रणयति आपो वै श्रद्धा, श्रद्धामेवाऽऽलभ्य यजते' इति । उभयत्र च प्रणीतानामुत्पन्नानां व्यापारः श्रूयते, 'प्रणीताभिर्हवींषि संयौति' इति, तथा 'अन्तर्वेदि प्रणीता निनयति' इति । तत्र संदेहः किमुभयमासां प्रयोजकं संयवनं निनयनं च, उत संयवनार्थानां निनयनं प्रतिपत्तिरिति । किं प्राप्तम् ? उत्पत्तिसंयोगो नासां केनचित् प्रयोजनेन । उभाभ्यामुत्पन्नानां संयोगः । तस्मान्न गम्यते विशेषः । अगम्यमाने विशेषे, उभयार्थानां विभागोऽयम्, कश्चिद्विभागः संयवने, कश्चिन्निनयने इति । आज्यवत् । यथा 'सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यम्' इति ।

टुप्— शुद्धाः (केनचिदपि प्रयोजनेन असंयुक्ताः) प्रणीता उत्पन्नाः कैमर्थ्याभिलाषिण्यो वाक्यद्वयेन ('प्रणीताभिर्हवींषि संयौति' 'अन्तर्वेदि प्रणीता

निनयति ’ इति) । संयवननिनयने प्रयोजने प्रतिनीयन्ते । तेन (उभयार्थत्वेन) उभयप्रयुक्ताः इति । ननु संयवने तृतीयानिर्देशात् गुणभावः (अतस्तदेव प्रणीतानां प्रयोजकम्) निनयने तु द्वितीयानिर्देशात् प्राधान्यम् (इति अप्रयोजकं निनयनम्) । उच्यते । वचनान्तरेण (अन्यत्र पूर्वम्) शेषभावे अवगते (सति, पश्चात्) अन्यत्र संयोगे (सति) भवति प्रतिपत्तिः । यथा स्विष्टकृत् । (किञ्च केवल–) संयवनार्थानां च तावतीनामेव ग्रहणं प्राप्नोति, यावतीभिः संयवनं निष्पद्यते, कुतोऽन्यत्र प्रसङ्गः । उभयप्रयुक्ताभिस्तु उभयं निर्वर्तयितव्यम् (तस्मादुभयप्रयुक्ताः इति । ननु ध्रौवाज्यवत् सर्वार्थत्वं गम्यते, तत् कथमुभयार्थत्वमुच्यते, तत्राह–) सर्वार्था इति पक्षो न कृतः, निष्प्रमाणकत्वात् । श्रुतवाक्येन (अङ्गाङ्गित्वे) संबन्धविशेषे अवगते प्रकरणात् सर्वार्थत्वम् (कल्प्यम् । तच्चायुक्तम्) । कल्प्यमानेऽपि प्रकरणसंबन्धात् तत्र च अन्यत्र च प्राप्ताः, पुनः (संयवननिनयनयोः–) वचनात् (अन्येभ्यः) परिसंख्यायेरन् । तस्मात् सर्वार्थ– (त्व)पक्षो दुःश्लिष्टः ।

संयवनार्थानां वा प्रतिपत्तिरितरासां तत्प्रधानत्वात् । १५ ॥

भाष्यम्–– संयवनार्थाः प्रणीताः । कुतः ? तृतीयानिर्देशात् । संयवने अपां गुणभावः, द्वितीयानिर्देशाच्च निनयने प्राधान्यम् । चिन्तायाः प्रयोजनं पुरोडाशाभावे प्रणीतानामभावः यथा पयस्यायाम् ।

टुप्— तृतीयासामर्थ्यात् संयवनार्थतैव (निनयनं तु प्रतिपत्तिः । यत्तु तावतीनामेव ग्रहणं प्राप्नोति इत्युक्तम् । तत्राह–) न तावन्मात्रं शक्यमुपकल्पयितुम् । सूक्ष्ममिदं द्रव्यम् (अवश्यम्) अतिरिच्यते । तस्मात् अतिरिक्तस्य प्रतिपत्तिः, न तु अतिरेचयितव्यं इति शास्त्रमस्ति । अतिरेकश्च अवश्यम्भावी । (कुतः ?) अल्पे हि गृह्यमाणे संयवनस्य अकृतत्वात् (सर्वपिष्टसंयवनस्य अकृतत्वसंभवात्) पुनः प्रणीतानां संस्कारः कर्तव्यः इति गौरवमपि । क्रमभ्रेषाच्च प्रायश्चित्तम् (प्रसज्येत) ।

शा— ‘ तत्रोत्पत्तावसंयोगात् कैमर्थ्यस्याभिलाषिणीः । स्वीकुर्वीते उभे तस्मादुभयार्थास्तदुच्यते ॥ हविःसंयवने तासां गुणभावस्तृतीयया । द्वितीयया निनयनं प्रतिपत्तिर्विधीयते ॥ ’

सोम— शाखाया उपयुक्तत्वात् प्रहरणस्य प्रतिपत्तित्वेऽपि निनीयमानानामपां अन्यत्रोपयुक्तत्वाभावात् निनयनं न प्रतिपत्तिः इति प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु** — उत्पत्तौ कार्यविशेषासंयोगात् प्रणीतानां ध्रौवाज्यस्येव अनेकत्र विभज्य विनियोगः स्यादिति ।

वि— ‘ प्रणीताभिस्तु संयौति वेद्यां निनयतीति किम् । अपां द्वे प्रापके किंवा हविःसंयवनं तथा ॥, अपः प्रणयतीत्युक्तेः समत्वादुभयार्थता ।, श्रुत्या संयवनार्थास्ताः निनीतेः प्रतिपत्तिता ॥ ’

भाट्ट— तत्रैव ‘ अपः प्रणयति ’ इत्यनेन विहितप्रणयनसंस्कृतानामपाम् ‘ प्रणीताभिर्हवींषि संयौति ’ इति वचनेन संयवनार्थत्ववत् अन्ते ‘ अन्तर्वेदि प्रणीता निनयति ’ इति निनयनार्थत्वेनापि विनियोगादुभयप्रयुक्तत्वम् । न च निनयनवाक्येऽपि द्वितीयानिर्देशात् प्रतिपत्तित्वाशङ्का, कुशलेनाध्वर्युणा यावत्संयवनोपयोगिनामेवापां प्रणयनेन शेषाभावात् प्रतिपत्तित्वानुपपत्तेः । अतः सक्तुन्यायेन निनयनस्य अर्थकर्मत्वात् प्रयोजकत्वम् । **इति प्राप्ते**, द्वितीयासंयोगादाकीर्णकराणां प्रतिपत्तिरेवेयम् । न च शेषाभावः, तस्यावर्जनीयत्वात् । अनन्यथासिद्धप्रतिपत्तेरेव धारणप्रयोजकत्वाच्च । अतः संयवनमेव प्रयोजकम् । अत्र च आग्नेयादिहविषः पाकत्वेनैव संयवनोद्देश्यता । तेन चर्वादावपि प्रणीता भवन्त्येव । अत एव अभ्युदितेष्टौ दधिपयसोरपि प्रणीता वक्ष्यन्ते । वस्तुतस्तु कपालं प्रति स्वोष्मजन्यपाकत्वेनेव पिण्डसंयवनत्वेनैव उद्देश्यता, अतिप्रसक्तधर्मेण तदङ्गीकारे प्रमाणाभावात् । दधिपयसोः प्रणीताधर्मास्तु कृत्वाचिन्तया । याज्ञिकास्तु चर्वादावपि प्रणीताः कुर्वन्ति । **प्रयोजनम्**– संयवनोत्तरं प्रणीतानाशे निनयनार्थं तदनुत्पत्तिः ।

मण्डन— ‘ अपां निनीतिः प्रतिपत्तिरेव ।’

शंकर— ‘प्रणीतानिनये तथा ।’ शाखावत् प्रतिपाद्यत्वम् ।

* अवघाते **निनयनन्यायस्तु** प्रतिपत्तित्वाभावादेव अनाशङ्क्यः । **कौ.** २।१।९.

* **निन्दा** । या तन्मात्रपर्यवसायिनी सा निषेधफला भवति । विधिपरा तु स्तुत्यर्था जायेत, तदुपपादनस्य दृष्टार्थत्वात् । **वा.** १।२।१।११. * **निन्दायाः** कस्याश्चित् तदितरस्तुतौ पर्यवसानम्, कस्याश्चित् विधिस्तुतिपूर्वकनिन्दाया अपि सहैव विधिस्तुतिभ्यामितरस्तुतौ पर्यवसानम् । यथा 'देवदत्तस्तावदतीव विद्वान्' इत्युक्त्वा 'न तस्य वृहस्पतिरपि समानः' इति च स्तुत्वा 'सोऽपि यज्ञदत्तमपेक्ष्य अविद्वाद्' इत्युक्तेः सर्वस्या अपि यज्ञदत्तस्तुतौ पर्यवसानम् । **पराक्रमः.** ४९।२.

* **निन्दाऽर्थवादः** निषेधरूपविध्येकवाक्यत्वात् । **सु.** पृ. ११७१.

* **निन्दापदवाच्यं** अप्राशस्त्यं नाम बलवदनिष्टानुबन्धित्वयोग्यता । अर्थवादेषु । **भाट्ट.** १।२।१ पृ. २२.

* **निपातः** अर्थद्योतकः । 'उपसर्गनिपातयोः ॥ तयोरर्थाभिधाने हि व्यापारो नैव विद्यते । यदर्थद्योतकौ तौ तु वाचकः स विचार्यते ॥' **वा.** १।३।९।३३ पृ. ३०६. * निपातः वाचकः इत्येकः पक्षः द्योतक इत्यपरः । द्योतकपक्षेऽपि विनियोजकश्रुतित्वाविघातः । **बाल.** पृ. ४१. * **निपातेन** तिङ्निपाताभिहितकर्तृत्वकर्मत्वयोः प्रथमा । **रहस्य.** पृ. ६४–६६. * **निपातस्य** उपपदार्थान्वयव्युत्पत्तिः सिद्धा । **भाट्ट.** ७।३।४.

* निपातातिरिक्तनामार्थाख्यातार्थयोः भेदान्वयासंभवः ।**मणि.** पृ. ११२.

* **निपातोपसर्गयोः** । 'क्रियते (अर्थनिर्णयः) संशयोत्पत्तेर्नोपसर्गनिपातयोः । तयोरर्थाभिधाने हि ... विचार्यते ॥' (निपातशब्दो द्रष्टव्यः) । **वा.** १।३।९।३१ पृ. ३०६. * **निपातोपसर्गाणां** स्वतन्त्रार्थाभिधायकत्वाभावात् । **सु.** पृ. ३३१, * **निपातोपसर्गेषु** लिङ्गसंख्याराहित्यं कारकराहित्यं च । पृ. १४४२.

* **निमन्त्रणं** अनिष्टजनकीभूताकरणप्रतियोगित्वानुमापकप्रवर्तकेच्छा । यथा श्राद्धादौ दौहित्रादेः प्रवर्तनम् । तच्च प्रमाणान्तरेणाभोजने प्रत्यवायावगमात् । **रहस्य.** पृ. १०. * निमन्त्रणं आज्ञापनं नीचस्य प्रवर्तनम् । **बाल.** पृ. ७५. * निमन्त्रणं आवश्यके श्राद्धादौ नियोगकरणम् । (आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् इति **सि. कौमुदी** । लिङर्थः ।) **मणि.** पृ. ११७.

* **निमित्तमनुपादेयं** तस्य कर्मभेदकत्वम्, उदाहरणं तु 'सत्रायागूर्य विश्वजिता यजेत' 'साम्युत्थाने विश्वजित्' इत्यादि । **वा.** २।३।१२।२५ पृ. ६१७. * निमित्तमुच्यते सप्तम्या वा यद्वृत्तेन वा यदिशब्देन वा । **टुप्.** ४।४।५।११. * निमित्तं च नाम तदुच्यते, यस्मिन् सति नैमित्तिकं भवत्येव । **कणिका.** पृ. ३३३. * निमित्तं देशः कालः फलं संस्कार्यं इत्यनुपादेयपञ्चकम् । **बाल.** पृ. ८८. * निमित्तं सप्तम्यन्तेनोच्यते यथा 'भिन्ने जुहोति' इति । यद्वृत्तेन वा 'यस्योभयम् (हविरार्तिमार्च्छति) इति । **टुप्.** ११।१।१।१ पृ. २०९८. * अनुपादीयमानं हि **निमित्तं** इत्युच्यते । यदि हि विधीयेत, निमित्तमेव तन्न स्यात् । यदि च यस्यापि निमित्तम्, सोऽप्युद्दिश्येत, तत्र द्वयोरुद्दिश्यमानयोः संबन्धः एव न स्यात् । **भा.** ६।४।४।१३. * यश्च भावप्रत्ययार्थः, स प्रातिपदिकस्य विशेष्ये वर्तमानस्य निमित्तम् । यच्च निमित्तं तत् विशेषणत्वात् मुख्यमभिधेयम्, लाक्षणिकं विशेष्यम् । **वा.** ३।१।६।१२ पृ. ६७४. * **निमित्तेन** पूर्वेण भवितव्यं उत्तरेण नैमित्तिकेन इति नैतन्नियोगतः । भवति हि भविष्यदपि हि निमित्तम् । यथा वर्षिष्यतीति कृषिगृहकर्मानुष्ठानम् । **भा.** २।३।१।२ पृ. ५७७. * **निमित्तस्य** अनुष्ठापकत्वाख्योद्देश्यत्वेऽपि ईप्सितत्वाख्योद्देश्यत्वाभावात् न यागस्य निमित्ताङ्गत्वम् । **भाट्ट.** ३।१।२, * निमित्तस्य क्रियान्वयिनोऽपि कारकत्वाभावात् नाङ्गत्वापत्तिः । ३।१।२. * निमित्तस्य दर्शपूर्णमासाभ्यां संबन्धो विधीयते, न कर्मान्तरम् 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति । **वि.** २।३।१३. * निमित्तस्य नानुष्ठापकत्वं (नैमित्तिके कर्मणि) अपितु विधिबोधितस्यैव अनुष्ठानस्य आवश्यकता बोधकत्वमात्रम् । तद्बोधस्य च फलं नैमित्तिकाकरणस्य प्रत्यवायजनकत्वबोधः । **भाट्ट.** ६।३।१ पृ. २५०, * निमित्तस्य विनियोगविधौ

एवान्वयः । ६।३।१ पृ. २५०, * निमित्तस्य विनियोगान्वयित्वं यावज्जीवाधिकरणे स्थापितम् । ६।५।१ पृ. २८४. * यत्संबन्धाच्च प्राक् निमित्तत्वमेव नोपजायते, भवति तत् **निमित्तस्यापि** विशेषणम्, यथा आर्त्यधिकरणे वक्ष्यते– मृष्यामहे हविषा विशेषणं इति । **वा.** २।३।१।१ पृ. ५७१. * **निमित्ताना**मनेकेषां युगपत् संनिपाते नैमित्तिकसाहित्यं युक्तम् । यथा– युगपत् अनेकचण्डालादिस्पर्शादौ नैमित्तिकस्य तन्त्रेण सकृदनुष्ठानम्, यथा वा युगपदनेकगृहदाहादौ । **भाट्ट.** ५।२।२, * निमित्तानां सर्वेषां ज्ञातानामेव नैमित्तिकप्रयोजकत्वं विज्ञानेश्वरादिभिः निरूपितम् । **समयमयूखः.** * **निमित्ते** प्राप्ते नैमित्तिकं कर्तव्यं भवति । **भा.** ६।४।४।१०,१२. * न च शक्यं **निमित्ते** सति नैमित्तिकेन न भवितुम् । **भा.** ३।२।१।१ पृ. ७४६.

⧗ **निमित्तानन्तरमेव नैमित्तिकमिति न्यायः ।** (स्पष्टोऽर्थः) । **साहस्री.** ५६८.

* **निमित्तानुरोधेन** अग्निहोत्रादिकर्मणां आवृत्तिः । **भा.** ६।२।८।२७–२८.

* **निमित्तापनये** तन्नाम अपनीयते यदपनेतुं शक्यते अन्यत्र च योजयितुम् । **वा.** ३।५।१८।४६.

* **निमित्तापाये** नैमित्तिकस्याप्यपायः । अकृतव्यूहाः पाणिनीयाः इति परिभाषायाः कैयटमतेन तात्पर्यमिदम् । लोकन्यायसिद्धश्चायमर्थः । तथाहि, लोके निमित्तं द्विविधं दृष्टम्, कार्यस्थितौ नियामकं तदनियामकं च । आद्यं यथा न्यायनये अपेक्षाबुद्धिः, तन्नाशे द्वित्वनाशाभ्युपगमात् । वेदान्तिनये प्रारब्धस्य विक्षेपस्थितिनियामकत्वं च प्रसिद्धमेव । द्वितीयं यथा, दण्डादि । तन्नाशेऽपि घटनाशादर्शनात् । शास्त्रे लक्ष्यानुरोधात् व्यवस्था । **प. शेखर.** पृ. २२७.

⧗ **निमित्तापाये नैमित्तिकस्याप्यपायः इति न्यायः ।** (निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायः) । यथा— 'चिद्धीदं सर्वम्, सद्धीदं सर्वम्, सर्वं खल्विदं ब्रह्म, ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतिभिः 'हरिरेव जगज्जगदेव हरिर्हरितोऽपि जगन्नहि भिन्नतनुः' इत्याद्याप्तोक्तिभिश्च इदं सर्वं ब्रह्मैव, ब्रह्मकार्यत्वात् । मृत्कार्यभूतो घटो मृद्यथा । इदं सर्वं ब्रह्मैव ब्रह्मण्यारोपितत्वात्, शुक्तिरजतवदित्यादियुक्तिभिर्मृदादिदृष्टान्तैश्च सम्यग्विचार्यमाणे सर्वं ब्रह्मैवास्तीत्येवं श्रुतिस्मृतियुक्तिदृष्टान्तानुभवैर्जगतो ब्रह्ममात्रत्वे सिद्धे जगतः कार्यत्वं निवृत्तम् । तन्निवृत्त्या ब्रह्मणोऽपि निमित्तापायेति न्यायेन कारणत्वं निवृत्तमेव भवतीति कश्चिद्वादी । **साहस्री.** ५३०.

* निमित्तापाये नैमित्तिकस्याप्यपायः । यथा ज्योतिष्टोमे रथंतरपृष्ठत्वे उपवती प्रतिपत्, बृहत्पृष्ठत्वे च अग्रियवती प्रतिपत् । गोसवसंसवयोस्तु पृष्ठं उभाभ्यामेव निष्पद्यते तत्र उपवत्यग्रियवत्योरुभयोरप्यपायः । **के.** १०।५।१६। ५९–६१.

⧗ **निमित्ताभावान्नैमित्तिकस्याप्यभावः इति न्यायेन** आत्मतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिः । **उप.साहस्री.** पद्य. १।१७ रामतीर्थः, * ननु न मोक्षार्थिनः ज्ञानेन प्रयोजनमस्ति, कृतकर्मणां संसारनिमित्तानां फलभोगानन्तरनाशे सति 'निमित्ता॰ भावः' **इति न्यायात्** अयत्नलभ्यत्वान्मोक्षस्य । पद्य. १।५ रामतीर्थः.

* **निमित्ताक्षिप्त**—प्रत्यवायजनकाकरणप्रतियोगित्वं प्रधाने एव, न तु साङ्गे । **भाट्ट.** ६।३।१ पृ. २५०.

* **निमित्तानुपूर्व्याच्च** नैमित्तिकानुपूर्व्ये क्रमानुरोधः । **भा.** ३।५।१३।३९.

* **निमित्तावृत्तौ** क्रत्वर्थानां नैमित्तिकानामावृत्तिः । **भा.** ६।२।९।२९, * निमित्तावृत्तौ गुर्वनुगमनादीनामावृत्तिः । ६।२।१०।३०. * निमित्तावृत्तौ नैमित्तिकस्याप्यावृत्तिः । यथा– यावज्जीवाग्निहोत्रे, यावज्जीवदर्शपूर्णमासयोश्च, 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादौ च । **वि.** ६।२।८–९. * **निमित्तजन्यदोषनाशफलसंवलितपुरुषार्थाधिकारविधिः** प्रत्यक्षविधिर्द्विविधः विहितातिक्रमनिमित्तकः निषिद्धाचरणनिमित्तकश्चेति । तत्राद्यो यथा 'योऽमावास्यां पौर्णमासीं वाऽतिपातयेत् अग्नये पथिकृते अष्टाकपालं निर्वपेत्' इत्यादि । निषिद्धाचरणनिमित्तको यथा 'यद्येकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयात्' इत्यादिः । **बाल.** पृ. १४, * निमित्त-

जन्यदोषनाशेतरफलसंवलितपुरुषार्थाधिकारविधिः ‘वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते’ इत्यारभ्य ‘यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव तेजस्वी’ इत्याद्यन्तः जातेष्टिविधिः। पृ. १५.

* **निमित्ततः** वाचनिको व्यवस्थितविकल्पो यथा ‘दन्तजाते एकाहः, अनुजातं अपत्यं यस्मात्तादृशे त्र्यहः, कृतचूडे चतुरहः, उपनीते दशाहः’ इति विरोधाधिकरणे वार्तिककृतोक्तः। **बाल.** पृ. १६०, * निमित्ततः वाचनिको व्यवस्थितविकल्पो यथा ‘दशाहं शावमाशौचं सपिण्डेषु विधीयते। अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा॥’ पृ. १६०, * निमित्ततः वाचनिकी व्यवस्था यथा ‘यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्’ इति। स्मार्तेऽपि ‘नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता। निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते॥’ इति मनुः। पृ. १९, * निमित्ततः विशेषग्रहणं वैश्यनिमित्तकसप्तदश्येन नित्यपाञ्चदश्यस्य प्रसङ्गसिद्धौ। पृ. १४७, * निमित्ततः व्यवस्थारूपः प्रतिषेधो यथा ‘स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके’ इति। पृ. ३५.

* यच्च यत् प्रतीत्य उपजायते तत्र तस्य **निमित्तत्वं** इत्यवधार्यते। **वा.** २।१।१।५ पृ. ३९२.

* **निमित्तत्वकारकत्वाभावेऽपि** अनुष्ठापकत्वसत्त्वात् भावनाऽन्वयः। **मणि.** पृ. ११३.

* **निमित्तत्वप्रयोजकत्वयोः** सिद्धसाध्यरूपता। निमित्तत्वं सिद्धं प्रयोजकत्वं साध्यम्। यस्मिन् विद्यमाने सति क्रियते, तन्निमित्तम्। यस्य सिद्ध्यर्थं क्रियते, तत् प्रयोजकम्। **वि.** ९।१।१ वर्णकं ३.

* प्राक् सिद्धिं विना **निमित्तत्वायोगात्**। **सु.** पृ. ९५६.

⧗ **निमित्तनैमित्तिकावृत्तिन्यायः**। ‘यावज्जीवं दर्शपूर्णमासाभ्यां यजेत’ यावच्छब्दः सामस्त्यं वदन् निमित्तत्वपक्षे पतितः ‘निमित्त० न्यायेन’ जीवनगतसामस्त्यस्य नैमित्तिकसंबन्धित्वेन प्राप्तत्वात् स्वार्थानुवादको भवति। **कौ.** २।४।१।२ पृ. १०२.

* **निमित्तनैमित्तिकभावस्तु** अनादित्वेऽपि शब्दार्थयोरिव इह (संबन्धेऽपि) अविरुद्धः। **वा.** ३।३।६।१३.

* **निमित्तफलयोरे**कत्रासंभवात्। कथमेकत्रासंभवः ? निमित्तफलयोरनुपादेयत्वात् ते प्रतिकर्म उपादीयेते। तत्र अन्यतरोपादाने कृतार्थत्वात् एकं प्रति उपादीयते। उभयोपादाने वाक्यभेदः। निमित्तस्य श्रुतत्वात् तत्प्रति उपादीयते। **वा.** ६।३।१।२ पृ. १४०८.

* **निमित्तभावश्च** नैव वचनात् भविष्यतीति। यद्धि येन प्रयुज्यते, भवति तत् तस्य निमित्तम्, यथा आरामपोषकस्य आरामो वेतनदाने प्रयोजको निमित्तं च। आरामे सति तस्मै वेतनं दीयते वेतनेन समर्थो भवति आरामं रक्षितुम्। **भा.** ९।१।१।१ वर्णकं २.

* **निमित्तभेदाच्च** नैमित्तिकभेदसिद्धिः। **वा.** ३।७।९।२४.

* **निमित्तरूपोद्देश्य**विशेषणस्यापि ईप्सितोद्देशविशेषणस्येव ग्रहैकत्वाधिकरणन्यायेन अविवक्षा। **भाट्ट**-६।४।६.

* **निमित्तविधिः** मन्त्रः नास्त्येव। **बाल.** पृ. ६५.

* **निमित्तविधिसरूपः** अर्थवादः ‘यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितः तस्या आवृश्च्यते यत् प्राजापत्यं दधिग्रहं गृह्णाति शमयत्येवैनाम्’। **बाल.** पृ. ५५.

* ‘पञ्चदश सामिधेनीरनुब्रूयात्’ ‘सप्तदश वैश्यस्य’ इति उभयत्रापि सामानाधिकरण्यादेकवाक्यत्वे कृते विनियोगे सति **निमित्तविशेषसंयोगात्** साप्तदश्यं बलीयो भवति। **वा.** ३।३।७।१४ पृ. ८४०.

* **निमित्तविशेषणम**विवक्षितम् ‘यस्योभयं हविरार्तिमार्च्छेत्’ इत्यत्रैव उभयत्वम्। **आचारमयूखः.** पृ. ५८. * निमित्तविशेषणमविवक्षितम्, यथा अभ्युदयेष्टौ ‘निरुप्तं हविरभ्युदेति’ इत्यनेन निरुप्तहविर्विशिष्टचन्द्रोदयो निमित्तमुक्तम्, तत्र निर्वापो विशेषणम्, तदविवक्षितम्, निर्वापात् प्रागपि चन्द्रोदये सति अभ्युदयेष्टिः कर्तव्या भवति। यथा वा– ‘यस्य सर्वाणि हवींषि नश्येयुः ... आज्येन... यजेत’ अत्र सर्वत्वं अविवक्षितम्, अवत्तमात्रस्य नाशेऽपि आज्यम्। **के.** ६।४।१,६।५।३ (विस्तरे द्रष्टव्यम्). * **निमित्तविशेषणाना**मविवक्षा

इति हविरार्त्यधिकरणे (६।४।९।२८-२९) सिद्धम् । वृ. ६।५।३।१३.

* **निमित्तसंपातो** यत्र भवति तत्र किं अन्यनिमित्तको भक्षः समुच्चीयते अथ विकल्प्यते अथवा बाध्यते इति विचारः । समुच्चयः सिद्धान्तः । वा. ३।५।१२।३३.

* **निमित्तसंयोगो** विशेषः प्रकरणं सामान्यम् । विशेषविधिना चाविशेषविधिर्बाध्यते । **भा.** ३।६।३।१०.

* **निमित्तसूत्रम्** । प्रथमपादार्थप्रतिज्ञा 'तस्य निमित्तपरीष्टिः'(१।१।३।३) इति सूत्रेण क्रियते । ग्रन्थकारपक्षे तु (शा.) निमित्तसूत्रस्य नातीव प्रयोजनम् । **सोम.** १।२।१ पृ. २. * येन विना निमित्तप्रतीतिर्न पर्यवस्यति तदेव **निमित्तस्वरूपान्तर्गतम्**, इतरत्तु प्रथमावगतमपि अनपेक्षितत्वात् अविवक्षितम् । **सोम.** ६।४।६ पृ. ४८५.

⧗ **निम्नगाप्रवाहन्यायः** । अन्यत्र प्रवृत्तस्य जन्मान्तरीयध्यानादिरूपचित्तप्रवाहस्य निम्नगाप्रवाहन्यायेन अन्यत्र नयने अतिक्लेशः । **संग्रहः.**

* निम्नगाप्रवाहन्यायः । यथा नदीप्रवाहपतिताः कीटाद्या आवर्तादावर्तान्तरमाशु व्रजन्तः शर्म न लभन्ते, तथा जन्मतो जन्म व्रजन्तो जीवाः स्वकर्मभ्रान्ताः सुखं नैव लभन्ते । उक्तं च पञ्चदश्याम् 'कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते । नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते ॥ व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम् । सत्कर्मपरिपाकान्ते करुणानिधिनोद्धृताः । प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम् ॥' इति । **साहस्री.** १५१.

* **निम्बत्वक्** चन्दनगन्धस्यैव अभिव्यञ्जिका, न तु गन्धान्तराणाम् । **कु.** १।१।६।१३.

* **नियतनिमित्तकं** नैमित्तिकं वैदिकं कर्म, यथा 'यावज्जीवमग्निहोत्रं जुहोति' 'वसन्तेवसन्ते ज्योतिषा यजेत' । **बाल.** पृ. ८५, * **नियतनिमित्तकः** नैमित्तिकपुरुषार्थाधिकारविधिः 'यावज्जीवमग्निहोत्रं जुहुयात्' इति । पृ. १४.

* **नियतपदक्रमा** हि मन्त्रा भवन्ति । **भा.** १।२।४। ३१-२.

* **नियमोऽपि** (यावज्जीविकाभ्यासरूपः) न कर्मधर्मः, कर्तृधर्मोऽसौ इत्युक्तम् 'कर्तुर्वा श्रुतिसंयोगात्' इति (२।४।१।२) । **भा.** ८।१।१३।२१, * नियमः कर्तव्यतयोपदिश्यते । यश्च कर्तव्यः स कल्याणोदयः । यो न कर्तव्यः स पापोदयः । ६।२।५।२०.

⧗ **नियमस्तु दक्षिणाभिः श्रुतिसंयोगात्** (वि. ३।७।१७) **इति न्यायः** । ऋत्विग्वाक्येन शुद्धवरणविधौ ऋत्विक्पदानर्थक्यापत्तेः एकेनैव च वरीतव्येन नैराकाङ्क्ष्यात् विकल्पेन अध्वर्य्वादिवाक्यानां वरीतव्यसमर्पकत्वापत्तेः ऋत्विग्विशिष्टविधौ तु 'नियमस्तु' इति न्यायेन अध्वर्य्वादीनामेव ऋत्विक्त्वावधारणात् वरीतव्यविशेषज्ञानसिद्धेः । **सु.** ३।७ पृ. २३.

⧗ **नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ।** ३।७।१७।३६ ॥

ज्योतिष्टोमे ऋत्विजः सप्तदश इति समधिगतं प्राक् । इदानीं कतमे ते सप्तदश इति चिन्त्यते । सप्तविंशतौ येकेचित् सप्तदश इति उत्सूत्रस्य पूर्वपक्षस्य निरासार्थः तुशब्दः । न अनियमः किन्तु नियम एव । स तु दक्षिणाभिः सह श्रुतीनां अग्नीदादिशब्दानां संयोगात् सामानाधिकरण्यरूपात् संबन्धात् अवगन्तव्यः । 'द्वादशशतं दक्षिणा' इति प्रस्तुत्य 'ऋत्विग्भ्यो दक्षिणां ददाति, प्रथममग्नीधे ददाति, ततो ब्रह्मणे, ततो होत्रे' इत्यादिना 'प्रतिहर्त्रे अन्ततः' इति दक्षिणावाक्ये 'ऋत्विग्भ्यः' इत्यनेन अग्नीधे ब्रह्मणे, इत्यादीनां सामानाधिकरण्यं श्रूयते । तेन चमसाध्वर्युवर्जिताः सप्तदशैव दक्षिणाभिः संबद्धाः श्रुताः । तस्मात् ते एव सप्तदश ऋत्विजो नाम ।

उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् । ३७ ॥

सिद्धान्ते हेत्वन्तरप्रतिपादनार्थं सूत्रम् । सत्रे 'ये ऋत्विजस्ते यजमानाः' इति ऋत्विजामेव यजमानत्वमुक्त्वा तेषाम् 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारम्, ततो होतारम्, ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीधं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा

पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वा आचार्यप्रेषितः' इति वाक्येन दीक्षायाः विधानात् तेषामेव ऋत्विक्त्वमवगम्यते । तस्मात् चमसाध्वर्युवर्जिता ब्रह्मादयः ऋत्विजः सप्तदशैव । चकारो हेत्वन्तरसमुच्चयार्थः । **के.**

* **नियमः** दर्शपूर्णमासतन्त्रगतदेवतान्यतमदेवतायाः उपांशुयाजे । **भा.** १०।८।१६।४९–५०. * 'नियमः परिसंख्या वा न व्यावर्त्याद् विनेष्यते । नित्यतामात्रकारी तु नियमः किं न लभ्यते ॥' **वा.** १।३।८।२७ पृ. २८२.

⧗ **नियमो बहुदेवते, विकारः स्यात् । ९।३।१३।४२॥**

'स एतान् पशून् आदित्येभ्यः कामायालभते' 'वैश्वदेवं धूम्रमालभेत' इत्यादयो बहुदेवत्याः पशवः । अग्नीषोमीये प्रकृतिपशौ अध्रिगुप्रैषे मेधपतिशब्दः एकवचनान्तो द्विवचनान्तश्च 'मेधपतिभ्यां मेधम्' 'मेधपतये मेधम्' इति । तौ च बहुदेवतेऽपि चोदकेन प्राप्तौ । तत्र किं द्विवचनान्तः ('मेधपतिभ्यो मेधम्' इति) बहुवचनान्तत्वेन ऊहितव्यः एकवचनान्तस्तु निवर्तते, किंवा उभावपि विकल्पेन निविशेते इति विचारे पूर्वपक्षमाह । बहुदेवते पशौ द्विवचनान्तस्यैव अतिदेशः इति नियमः । तत्र च विकारः बहुवचनान्तत्वेन ऊहः स्यात् इति ।

विकल्पो वा, प्रकृतिवत् । ४३ ॥

पूर्वपक्षं वाशब्देन व्यावर्तयन् सिद्धान्तमाह । सत्यं द्विवचनान्तो मेधपतिशब्दः ऊहितव्यः । एकवचनान्तस्यापि तु प्रकृतिवत् प्रकृतौ इव विकल्पः स्यात्, सोऽपि विकल्पेन प्रवर्तेत । गणाभिप्रायेण एकवचनं न विरुध्यते । तस्मात् द्वावपि विकल्पेन प्रवर्तेते इति सिद्धान्तः । **के.**

* नियमः वैदिकस्य वैदिकमेव निमित्तं इति । अस्य क्षामवत्यादौ व्यभिचारः । **पराक्रमः.** २२।२. * **नियमाश्च** मानसं कर्म । **भा.** १०।२।१८।४९. * **नियमेन** उपसंहार्यस्य उपसंहारविषये प्राप्तौ उपसंहारः विधिः । वाल. पृ. १७, * नियमेन तत्र चान्यत्र च प्राप्तौ परिसंख्याविधिः 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' । पृ. २६. * **नियमस्य** अन्याश्रितस्य अन्यार्थत्वे 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इत्युदाहरणम् । **सु.** पृ. ३२१. * नियमस्य अभिप्रवृत्तस्योत्सर्गे आचारविरोधः स्यात् । **भा.** ११।३।६।१४, * नियमस्य यावज्जीविकत्वस्य दार्शपौर्णमासिकस्य सौर्यादौ नातिदेशः । ८।१।१३।२०–२२.

* **नियमांशे** अपूर्वं अवघातस्य, स्वयं तु दृष्टफलकत्वान्नापूर्वजनकता । **वि.** २।१।३.

* **नियमादृष्टम्** । 'दृष्टे सत्यपि सर्वत्र नियमादृष्टमिष्यते । क्रत्वर्थे पुरुषार्थे च तत्संयोगपृथक्त्वतः ॥' **वा.** १।३।८।२७ पृ. २८३.

* **नियमादृष्टार्थेन** अत्यन्तादृष्टार्थं बाध्यते, अप्राप्तबाधः । **वा.** ३।३।७।१४ पृ. ८६०.

* **नियमापूर्वं** क्रियाकृतं न भवति । **वा.** २।१।१।१ पृ. ३७१. * नियमापूर्वम् । नियमस्य दृष्टफलकत्वाभावात् तज्जन्यमपूर्वमेव कल्पनीयम् । अवघातनियमजन्यं यथा । **के.** २।१।३.

* **नियमार्थः** एष वादः 'यदाहवनीये जुहोति' इति । अन्तरेणापि च वचनं आहवनीये होमः अन्यत्र च प्राप्तः । तदेतत् नियमशासनम् । **भा.** १२।२।१।३. * नियमार्थः क्वचिद्विधिः (६।३।४।१६) । 'सकलसोमधर्मासंभवे विकलान् सोमधर्मानुत्पादयेत् पूतीकगतान्' इति । वक्ष्यति हि 'नियमार्थ०' इति । **वा.** ३।६।१५।४०. * नियमार्थः तृतीयसवने व्याघारणे आज्यविधिः । **संकर्ष.** ३।२।१८. * अप्राप्तो विधीयमानो **न नियमार्थो** भवति । **वा.** ६।३।४।१६. * **नियमार्थाः** कर्तृदेशकालविषयः । **भा.** ४।२।९।२३–२४.

⧗ **नियमार्था गुणश्रुतिः । ३।६।१५।४०॥**

अग्निष्टोमे 'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इति सोमस्य प्रतिनिधिः पूतीको नाम साक्षात् श्रुत एव । स पूतीकः किं सोमेन समानविधानो न वेति विचारे नेति पूर्वपक्षे उत्सूत्रे प्राप्ते सिद्धान्तसूत्रमिदम् । गुणस्य यागगुणस्य पूतीकस्य श्रुतिः नियमार्था । सोमाभावे सोमसदृशे अनेकस्मिन् द्रव्ये प्राप्ते पूतीकस्य

नियमः कृतः, पूतीक एव सोमसदृशो ग्राह्यो नान्य इति। स च पूतीकः सोमत्वेनैव प्रतिनिधीयते न यागद्रव्यत्वेन। तस्मात् सोमेन समानविधानः पूतीकः। सर्वे सोमधर्माः क्रयादयः चोदकेन विनैव आदित एव पूतीकस्य विधीयन्ते इत्यर्थः। गुणश्रुतिः इत्यत्र पुनःश्रुतिरिति कुतूहले पाठः। अर्थस्तु स एव। **के.**

* **नियमार्था श्रुतिरिति** चेन्न, श्रुतिप्राप्तानां नियमेन निवर्तयितुमशक्यत्वात्। सर्व एव तावत् नियमः अन्यव्यावृत्तिफलत्वादन्याय्यः। तथापि तु यत्र अर्थाक्षिप्तावस्थानि वस्त्वन्तराणि भवन्ति तत्र एकश्रवणवशेन इतरन्निवर्तते। **वा.** २।२।१६।२८ पृ. ५६४. * नियमार्था श्रुतिर्भविष्यति। कोऽयं नियमः? अनियतस्य नियतता। **भा.** ४।२।९।२४। यत्पक्षे विधिमन्तरेण प्राप्नोति तत् श्रूयमाणं अनियतांशे प्रविशत् नियमोऽभिधीयते। **टुप्.**

* **नियमपरिसंख्ययोः** इतरपरिवर्जनाविशेषेऽपि यत्र प्रयोगे समादेरप्राप्तिः (समे यजेत) तत्रापि प्रापणस्य शास्त्रेण अकरणे विध्याक्षेपात् प्राप्नुवतो विषमादेः वर्जनालाभेन प्रथमोपस्थितत्वात् विधेयसमादिगततया प्रत्यासन्नत्वात् भावरूपत्वेन लघुशरीरत्वाच्च अप्राप्तांशपरिपूरणमेव फलम्, विषमादिनिवृत्तिस्तु तद्वैपरीत्यात् अप्राप्तांशपरिपूरणरूपनियमानुनिष्पादित्वाच्च न फलम्, परिसंख्यायां तु उभयोरपि नित्यप्राप्तत्वेन अप्राप्तांशपरिपूरणस्य फलत्वासंभवात् इतरपरिवर्जनमेव फलम्, एवं च 'समे एव यजेत' इति एवकारेण फलविवरणं अयोगव्यवच्छेदार्थम्, न तु परिसंख्यायामिव अन्ययोगव्यवच्छेदार्थमिति नियमपरिसंख्ययोः फलभेदात् अवर्जनीयः तृतीयो विधिप्रकारः। **सोम.** ४।२।९.

* **नियमपरिसंख्याविधी** प्रायेण विनियोगविषयावेव। **मणि.** पृ. ९९.

* **नियमविधानार्था** द्रव्येषु गुणश्रुतिः। 'वायव्यं श्वेतमालभेत' 'सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणाम्' 'नैर्ऋतं चरुं निर्वपेत् कृष्णानां व्रीहीणाम्' इत्यादौ। **भा.** ४।२।१०।२५.

* **नियमविधिः** अदृष्टार्थ एव। यथा– प्रकृतौ वैकल्पिकयोः बृहद्रथंतरयोः अदृष्टार्थयोः अन्यतरस्य क्वचिद्विकृतौ नियमः श्रूयते। **बाल.** पृ. २४, * नियमविधिः अवघातादिसंस्कारविधिः। **भा.** ४।२।११।२६, * नियमविधिः कर्तृदेशकालविधिः। 'अग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विक्' 'दर्शपूर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः' 'चातुर्मास्यानां यज्ञक्रतूनां पञ्च ऋत्विजः' 'पशुबन्धस्य यज्ञक्रतोः षड् ऋत्विजः' 'सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विजः' इति। 'समे दर्शपूर्णमासाभ्यां यजेत' 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति। 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति। **भा.** ४।२।९।२३–२४. * नियमविधिर्द्रव्यस्य 'सोमेन यजेत' इति। **वि.** ४।२।९. * नियमविधिः। 'नियमः पाक्षिके सति' यत्र तु प्रागवचनात् पाक्षिकी प्राप्तिः संभाव्यते, तत्र अप्राप्तिपक्षं पूरयन् यो विधिः प्रवर्तते, स नियन्तृत्वात् नियम इत्युच्यते यथा 'व्रीहीनवहन्ति' इति। तण्डुलनिष्पत्त्यर्थाक्षेपादेव तत्सिद्धेर्न तत्प्राप्तिमात्रं विधेः फलम्, किं तर्हि अप्राप्तांशपूरणम्। तदप्राप्तिपक्षे च तण्डुलैरुपायान्तराणि आक्षिप्येरन्। पूरणे तु सति या तेषां निवृत्तिः असौ अर्थात् न वाक्यात् न च तद्वारणं नियमः। **वा.** १।२।३।४ पृ. १५२. * नियमविधिः प्रतिप्रसवविधिना बाध्यते। **बाल.** पृ. १४४. * नियमविधिर्बलीयान्। **पराक्रमः.** ४०।२. * नियमविधिः यथा वाजपेये 'यजुर्युक्तं रथमध्वर्यवे ददाति' अत्र अध्वर्यवे एवेति। **वि.** १०।३।२०. * नियमविधिः वाजपेयादिविकृतौ वैकल्पिकानां प्राकृतानां मध्ये अन्यतमपुनःश्रुतौ। **भा.** १०।७।१६।५१–५७. * नियमविधिः वायव्यपशौ श्वेतगुणस्य 'वायव्यं श्वेतमालभेत'। **वि.** ४।२।१०. * **नियमविधिना** अपूर्वविधिर्बाध्यते। यथा 'उपांशु यजुषा' इति निगदेषु अपूर्वविधित्वापत्तेः यजुरन्तरेषु नियमविधिरेव। **बाल.** पृ. १४३, * नियमविधिना परिसंख्याविधिर्बाध्यते, यथा 'ऋतौ भार्यामुपेयात्' इति! पृ. १४३.

* **नियमविधिभेदाः** सर्वे। 'विधिरपि द्विविधः' इति बिन्दौ बालमीमांसाप्रकाशे द्रष्टव्यम्। **के.**

* **नियमविधिविवेचनं** मणिकृतम् 'विधिः त्रिविधः' इति बिन्दौ मणिग्रन्थे द्रष्टव्यम्। **के.**

* **नियमविधिसंभवे** अपूर्वविध्ययोगात् । **सोम.** ६।७।९.

* **नियमशासनं** यत्र अनियमप्रसङ्गः, तद्विषयो विज्ञायते । **भा.** १२।२।१।३.

* **नियमसंभवे** अनियमानुपपत्तिः । **सु.** पृ. ५२५.

* **नियामकं** न आनन्तर्यम् । **भा.** ३।१।१४। २४–२५.

* **नियुत्वद्वाक्यस्य** नियुत्वत्त्वगुणकवायुदेवताकश्वेतद्रव्यककर्मान्तरविधिपरत्वम् (एतमेव सन्तं वायवे नियुत्वते आलभेत इति)। **सोम.** १।२।१ पृ. ५.

* **नियोगः कार्याभिधायी लिङादिः ।** आचार्यादिवाक्येषु ‘देवदत्त समिधमाहर’ इत्यादिषु प्रवर्तमाने देवदत्ते पार्श्वस्थ एवमवधारयति ‘बुद्धिपूर्विकेयमस्य प्रवृत्तिः, यच्चाहं बुद्ध्वा प्रवृत्तस्तदयमपि मदविशेषात्, अहं च न क्रियामात्रात् प्रवृत्तः, नापि फलमात्रावगमात्, नापि फलसाधनत्वावगमात्, किन्तु कार्यावगमात् । स्तनपानादिकाऽपि क्रिया यावन्मया कार्यतया नावगता, तावदहं न प्रवृत्तः । न च या श्रेयःसाधनता सैव कार्यता । श्रेयः प्रति साधनत्वमन्यत्, अन्यच्च कृतिं पुरुषप्रयत्नं प्रति प्राधान्यं साध्यत्वलक्षणं कार्यत्वम्, क्लेशात्मनस्तु कर्मणः फलसाधनत्वानुविधायिनी कार्यता, इति मन्दा न भेदं प्रतिपन्नवन्तः । तथा सुखस्य फलसाधनतां विना कार्यावगतिरस्ति, अतः फलसाधनताऽतिरिक्तकार्यबोधात् प्रवृत्तिर्मम इति देवदत्तोऽपि तदवगमादेव प्रवर्तते इति कल्पयति । तदवगमश्चास्य शब्दानन्तरं भवन् शब्दनिबन्धन एवेति कार्याभिधायितां लिङ्शब्दस्य कल्पयति । तच्च कार्यं अन्वितमभिधेयं इति स्थिते ‘अग्निहोत्रं जुहुयात् स्वर्गकामः’ इत्यादिषु वाक्येषु षष्ठाद्यराद्धान्तानुसारेण स्वर्गकामपदेन नियोज्यतया स्वर्गकामः समर्पणीयः इति स्थितम् । यश्च कार्यमवबुध्यते स नियोज्यः । स्वर्गकामस्य च तस्मिन्नेव कार्ये बोद्धृतया अन्वयः, यदेव तस्य काम्यमानसाधनतामनुभवितुं क्षमते । न च क्रिया क्षणभङ्गिनी कालान्तरभाविनि फले हेतुर्भवति । तेन सा कार्यतया नियोज्येन सह नान्वीयते, यत्तु कालान्तरस्थायि कार्यम्, तदेव तेन सह अन्वयं गन्तुमर्हति, इति क्रियाऽतिरेकि मानान्तरावेद्यमेव लिङादयः कार्यमभिदधति । तच्च मानान्तरापूर्वत्वात् अपूर्वमित्युच्यते । **ननु** तस्यापि कार्यस्य कुतः सिद्धिः ? यागादेरिति चेत्, अनन्तरभाविता तर्हि फलस्य प्रसक्ता, क्रियाऽनन्तरभाविनस्तस्य फलहेतुत्वात् । **उच्यते** । अनन्तरभावित्वेऽपि तस्य न फलमनन्तरं भविष्यति, सहकारिण्यपेक्षया विलम्बनोपपत्तेः । न च सहकारिण्यपेक्षायां कारणभावहानिः । किं तत् सहकारि इति चेत्, देशकालादिकमिति ब्रूमः । न च तस्य विशेषज्ञानमन्तरेण किञ्चिद्दुष्यति । न च फलजनकतया गुणभावात् अपूर्वस्य वाक्यार्थत्वहानिः, स्वानुगुणनियोज्यलाभाय फलानुकूलताऽवलम्बनात् । यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति, तद्वदेतदपि । ततश्च अन्विताभिधाने स्थिते कार्याभिधायिता लोके नियोगस्य लिङादेरवगतेति । **ऋजु.** पृ. २८७–८८.

* **नियोगः** नियुज्यते अनेन इति व्युत्पत्त्या नियोगशब्दाभिधेयो लिङादिः । **ऋजु.** पृ. ९६. * **नियोगः** विधिः प्रेरणा शब्दभावना इत्येकोऽर्थः । **बाल.** पृ. ७५. * एकश्चायं **नियोगः** अनुबन्धभेदात् भिद्यते । **बृहती.** पृ. ९९. * न च कामाधिकारे नियोगो यागस्य कर्तव्यतां वदति, फलत एव कर्तव्यतासिद्धेः । **ऋजु.** पृ. २९, * यस्मिन्नर्थे पुरुषो नियुज्यते स विषयः इति नैव कर्मणि प्रेरकतया विषयिभावः । किं तर्हि ? यत्र कर्मणि पुरुषो नियुज्यते कार्यं बोध्यते इति । कार्यबोधनमेव हि पुरुषस्य नियोजनम् । एतदुक्तं भवति, कर्मणि यागादौ कार्यभूतो नियोगः प्रतीयते, न पुनः कर्मण्येव प्रेरयति । पृ. ३०. * विधवा**नियोगोऽपि** ब्रह्मचारिणोऽनुचितः । **सु.** पृ. १८५.

⌛ **‘नियोगेन विकल्पेन द्वे वा सह समुच्चिते । संबन्धः समुदायो वा विशिष्टा वैकयेतरा ॥’** (वा. १।३।९।३० पृ. २९३) **इत्यनेन न्यायेन** बहुप्रकारावचनव्यक्तीराशङ्क्य । **सु.** पृ. ७४२.

* **नियोगस्य** । प्रमाणान्तरावगम्येऽपि हि लौकिकेऽर्थे नैव नियोगस्य साध्यसाधनसिद्ध्यपेक्षा अवसीयते । **बृहती.** पृ. १५८.

* **नियोगापरपर्याय–** विधिविषयभूत– पुंव्यापारलाभात् । सु. पृ. ७९६.

* **नियोगवाक्यार्थमतोपन्यासः, तत्खण्डनं च (कणिका.)** । कार्याभिधायिता तावल्लिङादीनामवगता आचार्यवाक्येषु ‘माणवक समिधमाहर’ इत्यादिषु । तथाहि एतद्वाक्यश्रवणानन्तरं प्रवर्तमानं समिदाहरणे माणवकमुपलभ्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति, बुद्धिपूर्वेयं अस्य प्रवृत्तिः, स्वतन्त्रप्रवृत्तित्वात्, मदीयप्रवृत्तिवत् । यच्चाहं बुद्ध्वा प्रवृत्तस्तद्वदेवायं मदविशेषात् । अहं च न क्रियामात्रावगमात् नापि फलमात्रावगमात् नापि फलसाधनत्वावगमात्, किन्तु कार्यतावगमात् । न खल्वन्ततोऽर्भकः स्तनपानादिकामपि क्रियां कार्यतया यावन्नावगतवानस्मि न तावत् तस्यामपि प्रवृत्तः । न च या श्रेयःसाधनता सैव कार्यता, परस्परपरिहारस्थितिलक्षणविरोधाधारत्वात् । नह्यस्ति संभवः, यदेव समीहितं प्रति साधनत्वम्, तदेव कृतिं पुरुषप्रयत्नं प्रति साध्यत्वमिति । क्लेशात्मनस्तु कर्मणः फलसाधनताऽन्वयिनी कार्यता इति केचित् अभेदं प्रतीतवन्तः । तथा सुखस्य फलसाधनतां विना च कार्यताऽवगतिरस्ति । अतः फलसाधनताऽतिरिक्तकार्यताबोधात् प्रवृत्तिर्ममेति माणवकोऽपि तदवबोधादेव प्रवृत्त इति निश्चिनोति । तदवबोधश्चास्य आचार्यवचनानन्तरमुपजायमानः तन्निबन्धन एवेति कार्याभिधायितां शब्दस्य कल्पयति । तच्च कार्यमन्वितमभिधेयमिति स्थितौ सत्याम् ‘अग्निहोत्रं जुहुयात्स्वर्गकामः’ इत्यादिषु वाक्येषु षष्ठाद्यराद्धान्तानुसारेण स्वर्गकामपदेन नियोज्यतया स्वर्गकामः समर्पणीय इति स्थितम् । यश्च कार्यमवबुध्यते स नियोज्यः । स्वर्गकामश्च साध्यस्वर्गकामविशिष्टः । स च तस्मिन्नेव कार्ये नियोज्यतया अन्वेति, यदेव तस्य काम्योपायतामनुभवितुं शक्नोति । न च क्रिया क्षणभङ्गिनी कालान्तरभाविफलहेतुरिति न कार्यतया नियोज्येन सहान्वेति । यत्कालान्तरस्थायि कार्यम्, तदेव तेन सहान्वयं गन्तुमर्हतीति क्रियाऽतिरेकि मानान्तरावेद्यमेव लिङादयः कार्यमभिदधतीति । तच्च मानान्तरापूर्वतया अपूर्वमिति च कार्यतया अवगम्यमानं आत्मनि पुरुषं नियुञ्जानं नियोग इति च व्यपदिश्यते । न च क्रियाऽनन्तरं भवदपि देशकालादिसहकार्यपेक्षया अनन्तरमेव स्वर्गादि भावयति । न च फलजनकतया गुणभावादपूर्वस्य वाक्यार्थत्वहानिः, स्वानुगुणनियोज्यलाभाय फलानुकूलतावलम्बनात् स्वामिवत् । यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति, तथैतदपि । न चैवं वेदे एव व्युत्पत्तिः । लोकव्युत्पत्तेरेव वेदवाक्यानुसारेण अपूर्वपर्यन्तगमनात् । न च अनेकार्थाभिधायिता लिङादीनां न प्रतीयते । वदति हि माणवक आचार्यचोदितः प्रवर्तितः कार्यमवबोधित इति यावत् । न खल्वन्यथा चेतनः प्रवर्तयितुं शक्यते । यतस्तदेवं प्रैषादीनां लोके प्रतीतेः कार्यावबोधमन्तरेण च प्रवृत्त्यनुपपत्तेस्तद्गतस्य संबन्धग्रहः तदुपग्रहमपोह्य च वेदे पर्यवसानात् ।

ननु प्रैषादयोऽप्येवंवगम्यन्ते लोके, तत् कथं कार्याभिधायकत्वमेव लिङादीनाम् ? उपाधय एते, न तु शब्दार्थाः । ते एव चोपाधयः ये तटस्थाः प्रयोगदर्शनमात्राच्छब्दार्थं विशेषे व्यवस्थापयन्ति, यथा हरिपदाभिधेयस्य पशुत्वमुपाधिः । तथाहि । पशुत्वं तटस्थमेवाभिधानाविनिवेशादिति हरिपदार्थे इति हर्तृत्वं पशौ एव नियच्छति । एवं प्रैषादयोऽपि अभिधानाविनिवेशिन एव कार्यं विशेषे व्यवस्थापयन्ति, न पुनरभिधेया इति संबन्धग्रहणसंभवादुपपन्नं नियोगाभिधानं लिङादीनामिति । पृ. ५२–५३.

सत्यं कर्तव्यताभिधायिनो लिङादयः, कर्तव्यता तु क्रियाया एव, नापूर्वस्य, लोकाधीनावधारणत्वात् शब्दसामर्थ्यस्य । तस्या एव च कार्यतया प्रवृत्तिहेतुत्वेन स्वात्मनि मानान्तरेण विदितत्वात् । ननु अपूर्वस्य तस्य मानान्तरागोचरत्वात् कर्तव्यतामात्रविदितसंगतीनां लोके लिङादीनां स्वर्गकामपदसंबन्धात्, वेदे अपूर्वविशेषप्रतिलम्भ इति चेत् ? अस्तु तावत् अस्यैव तु कर्तव्यस्य लिङाद्यर्थता, न पुनः क्रियाया अपि लौकिक्या इति कुतस्त्यम् ? अनेकार्थत्वस्य अन्याय्यत्वात् । लक्षणस्यापि च कर्तव्यायां क्रियायां लौकिकस्य लिङादीनां प्रयोगस्योपपत्तेः अपूर्वकर्तव्यतानान्तरीयकत्वात् । क्रियाकर्तव्यतायाः असाधितायाः क्रियायाः तत्साधनत्वानुपपत्तेः,

लौकिकप्रयोगाविरोधात् । अपूर्वकर्तव्यतायास्तु लौकिकक्रियाकर्तव्यतानान्तरीयकत्वानुपलब्धेः वैपरीत्यानुपपत्तेः । अत्यन्तप्रयोगाभ्यासात् लाक्षणिकस्यापि वाचकत्वाभिमानात् अपूर्वाभिधाननियोगसिद्धिरिति चेत् ? ननु अनेकार्थत्वमन्याय्यं इत्येतदेव कुतः ? अनेकशक्तिकल्पनागौरवात् इति चेत् ? ननु अपूर्वमपि नैकविधप्रधानाङ्गवर्ति नानेति कथमैकार्थ्यं लिङः ? कृतिव्याप्यतायाः प्रवृत्तिनिमित्तस्य सर्वत्राविशेषात् रूपभेदेऽपि अपूर्वाणामेकशक्तिरस्या लिङः एकहायन्यादिशब्दवदिति चेत् ? हन्त भोस्तपस्विन्या क्रियया किमपराद्धम् ? यदस्यां कर्तव्यतारूपायां अभिधानाय कः पतिरिव लिङादिः शक्त्यन्तरमुत्कोचं रोचयते । शब्दसाम्येऽपि कर्तव्यताभेदात् अयमदोष इति चेत् ? न । भेदाभावात् ।

यदि मन्येत, यद्यपि कर्तव्यंताशब्दसाम्यं तथापि कृतिं प्रति ईप्सिततमता कर्तव्यता अपूर्वस्य तदुद्देशेन पुरुषप्रयत्नस्येति कृतेः प्रवृत्तेः । सैव च लिङादिप्रवृत्तिनिमित्तम् । न चैवंरूपा क्रियाकर्तव्यता, तस्या दुःखतया तां प्रति प्रधानभावानुपपत्तेः । ओदनाऽऽद्यर्थप्रवृत्तकृतिव्याप्यतालक्षणौदनादिहेतोः तस्याः कर्तव्यता, सा तु अन्यत्वान्न शक्त्यन्तरमन्तरेण लिङादिगोचर इति । तन्न । विशेषाभावात् क्रियाकर्तव्यतायाः । न खलु अपूर्वमुद्दिश्य कृतिः प्रवर्तितुमर्हति । सा हि पुरुषप्रयत्नः । स च इच्छानुशयीति तदेवोद्दिश्येत । यदिच्छाकर्म तदेव च तस्याः कर्म यत्सुखम्, सुखानुशयित्वादिच्छायाः । न च अपूर्वं सुखमिति कथमिष्टम् ? अनिष्टं चेत्, कथं तदुद्देशेन कृतेः प्रवृत्तिः ? शब्दात्तथावगतेः असुखमपि अनिष्टमपि अपूर्वं कृतिं प्रति प्रधानमिति चेत् ? तत्किं शब्दः अवगमयतीति अनग्निरप्यस्तु धूमः ? आनन्दस्वभावं वा विज्ञानम्, 'विज्ञानमानन्दम्' इति श्रुतेः । प्रमाणान्तरविरोधान्नैवमिति चेत् ? न । इहापि तस्य साम्यात् । समिदादिविषयस्य अपूर्वस्य अननुष्ठेयस्य अनुष्ठेयाधिकारापूर्वपरत्वेन कर्तव्यतात्वाभ्युपगमनात् । स्वर्गाद्यनुकूलत्वात् अपूर्वस्य असुखस्यापि इच्छाविषयत्वमिति कुतो मानान्तरविरोध इति चेत् ? न । क्रियायामपि समीहितसाधनतायाः तथाभावात् । नैमित्तिकनिषेधापूर्वयोश्च फलविरहिणोः तदनुपपत्तेः । एवं च नैमित्तिकनिषेधापूर्वयोः नापूर्वसिद्धिर्लिङादीनाम् । निमित्तवतो निषिध्यमानक्रियाकर्तुश्च सिद्धविशेषणावच्छिन्नस्य नियोज्यस्य क्रियाकर्तव्यताऽवगमाविरोधात् । प्रधानाङ्गग्रामसहभावस्य अशब्दार्थभूतकल्पितापूर्वद्वारेणापि उपपत्तेः । अपिच साध्यस्वर्गविशिष्टोऽपि नियोज्यः कस्मात् क्रियामेव नावैति कर्तव्याम् ? तस्याः आशुतरविनाशिनीत्वेन तदनुकूलत्वाभावात् ; तद्धि तदुत्पादानुकूलं यस्मिन् सति यदुत्पद्यते, नासति । न च आमुष्मिकं स्वर्गादि सति कर्मणि भवति चिरविनष्टे । तस्मिंस्तदुपपत्तेरिति चेत् ? किमिदानीमाग्नेयादिष्वपि न साधनत्वमधिकारापूर्वस्य, भाक्तो वा साधनभावस्तेषाम् ? नहि तस्य भाक्तत्वे इतिकर्तव्यतासंबन्धो घटते । न जातु उपचरितवह्निभावो माणवको दाहपाकयोरुपयुज्यते । तेषां च विषयत्वमेकम्, नाना च करणत्वं भवद्भिरभ्युपेयते । तयोर्भिन्नप्रस्थानोपधारूपत्वात् । प्रतिपत्त्यनुबन्धो हि विषयो यथाप्रतीति व्यवतिष्ठते । तत्रोच्चारिताश्च आग्नेयादयः 'दर्शपूर्णमासाभ्यां सर्गकामो यजेत' इति सकृदवगतेः तथैव विषयभावमनुभवन्ति इत्येकमेव एषामधिकारापूर्वं प्रति विषयत्वम् । उत्पत्त्यनुबन्धस्तु करणत्वम् । स च स्वरूपाधीनः, न प्रतिपत्त्यधीनः । स्वरूपं चैषामाग्नेयादीनाम् 'यदाग्नेयोऽष्टाकपालः' इत्यादिभ्यो अभिन्नभावमवगतमिति तदनुवर्तिनी साधनताऽपि भिन्नैव । न चैवं अन्योन्यनिरपेक्षाणामुपायभावः । यथाश्रुतकरणाधीनसिद्धित्वात् परमापूर्वस्य । बहूनि च अस्य करणानि श्रूयन्ते, इति नैकोपायसाध्यता भवितुमर्हति । अनेककरणसाध्यत्वं च एकस्या अपि क्रियाया लोकेऽपि दृष्टमेव । यथा अश्वेन दीपिकया खड्गपाणिभिरग्रेसरैः संचरते राजा प्रदोषे इति । अवान्तरव्यापारभेदादश्वादीनां साधनानां भेद इति चेत् ? इहापि उत्पत्त्यपूर्वाण्येव अवान्तरव्यापाराः । ते च प्रत्याग्नेयादि भिद्यन्ते इति समानम् । एवंच आज्यौषधसांनाय्येषु न संकरो धर्माणाम् । परमापूर्वप्रयुक्तत्वेऽपि अवान्तरव्यापारोत्पत्त्यपूर्वभेदेन साधनभावस्य भेदात् अपूर्वसाधननिवेशितत्वात् च तेषाम् । अन्यथा तदभेदे संकरप्रसङ्गात् । तस्मात् यथैव अधिकारापूर्वोत्पत्तिसमये आग्नेयादीनामसतामपि शब्दावगतसाधनभावानां

उत्पत्त्यपूर्वाणि अवान्तरव्यापाराः शक्तयो वा तथा, फलं प्रति अवगतसाधनभावायाः क्रियायाः अवान्तरव्यापारः शक्तिर्वा अपूर्वं भविष्यति । कथमन्यसमवेता अन्यस्य शक्तिः, असति वा व्यापारवती । अवान्तरव्यापार इति चेत् ? आग्नेयादीनामपि परमापूर्वसाधनानामवान्तरव्यापारेषु शक्तिषु वा उत्पत्त्यपूर्वेषु तुल्यत्वात् पर्यनुयोगस्य । अनपेक्षशब्दावगतसाधनभावानां आग्नेयादीनां असहभुवामन्यसमवेतान्यपि असमानकालान्यपि उत्पत्त्यपूर्वाणि व्यापाराः सामर्थ्यं वेति चेत् ? तत् किम् 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति लोकानुसारतः साध्यस्वर्गवैशिष्ट्येन क्रिया कार्या नावगम्यते, स्वविशेषणं वा साध्यरूपं प्रत्ययस्यानानुकूल्यम्, येन तद्घटनाय अवान्तरव्यापारः सामर्थ्यं वा क्रियाया नापूर्वमास्थीयेत ? फलसाधनसाधनं न फलसाधनं क्रियेत्यपि मिथ्या, फलप्रवृत्ताया एव तस्यास्तत्साधनत्वात् । यथा परमापूर्वसाधनप्रवृत्तानामाग्नेयादीनां उत्पत्त्यपूर्वसाधनत्वम्, सस्यागमोद्देशेन प्रवृत्तस्येव कृषिकर्मणो भूपाटनादिसाधनत्वम् । न च परमापूर्वं प्रति उत्पत्त्यपूर्वाणामेव साधनत्वम्, नाग्नेयादीनामिति सांप्रतम् । नहि 'दर्शपूर्णमासाभ्याम्' इति च 'यजेत' इति चोत्पत्त्यपूर्वाणामभिधानम्, अपि तु षण्णामाग्नेयादीनां कालविशेषसंबन्धेनोत्पन्नानां अनूदितानां समुदायिनाम् । न चैषामुत्पत्तिवाक्यान्येव यथास्वं उत्पत्त्यपूर्वाणि प्रति कारणत्वमधिगमयितुमीशते । अधिकारवाक्यसंनिधिसमाम्नातानां तदुत्पत्तिवाक्यानां अधिकारापूर्वप्रत्यभिज्ञाशङ्कया द्रागिव अपूर्वान्तरप्रत्ययाजननात् । उत्पन्नानूदितानां तु पश्चादाग्नेयादीनामधिकारापूर्वं प्रति अधिगतविषयकरणभावानामपरस्परं संभवतां तदनुपपत्तेः । तत्सिद्ध्यर्थमुत्पत्त्यपूर्वाणि कल्पितानि प्रत्ययवाच्यान्यपि कार्यरूपाण्यपि नाग्नेयादीनां साधनानां प्रधानं प्रति स्वकरणतामापादयितुमर्हन्ति । तैराग्नेयादिभिः परमापूर्वे जनयितव्ये अवान्तरव्यापारतया तत्कल्पनात् । तथैव च लिङर्थत्वव्यवस्थापनात् प्राधान्यानुपपत्तेः, प्रधानद्वयसंबन्धस्यैकत्र दुरधिगमत्वात् । तस्माद्यथा तव आग्नेयादीनामुत्पत्त्यपूर्वावान्तरव्यापाराणां परमापूर्वं फलं च एकक्रतिकर्म तथा विवृद्धं साध्यं प्रत्येक एव करणभावः, तथा ममापि अपूर्वावान्तरव्यापाराया एव क्रियाया अपि स्वर्गानुकूलतेति साध्यस्वर्गविशिष्टोऽपि शक्त एव क्रियाकर्तव्यतामवबोद्धुम् । न च यो यत्कामः स तदुपायमेव कार्यमवैति, नानुपायं इत्यस्य ऐकान्तिकत्वमिति निवेदयिष्यते । दर्शितं च **भावनाविवेके** । कर्तृसमीहितोपायस्य कर्तव्यताज्ञानालम्बनतायां फले चाप्रसङ्ग इत्युपरिष्टान्निवेदयिष्यते । तस्मान्न स्वर्गकामादिसंबन्धात् मानान्तरापूर्वाभिधानसिद्धिर्लिङादीनाम् ।

नापि लोके 'माणवक ! संध्यामुपास्व' इत्याचार्यवचनानन्तरं माणवकस्य प्रवृत्तिमुपलभ्य तस्याश्च कार्यावगमाधीनत्वात् संध्योपासनकर्मणश्च दुःखतया तदनुपपत्तेः तदतिरिक्ते कार्ये मानान्तरावेद्ये लिङादेः संगतिग्रहः इति चतुरस्रम् । क्रियाया एव कर्तव्यतोपपत्तेः । दुःखतया अनुपपत्तिरिति चेत् ? एवं तर्हि वरं तस्या एव हिताहितप्राप्तिपरिहारयोरन्यतरोपायतापरिकल्पनम्, तादृश्या एव तस्या आत्मनि प्रवृत्तिहेतोरुपलब्धेः । तदेतदपि अतिपेलवम् । तस्मात् मानान्तराविषयत्वेन अपदार्थत्वाच्च नैव वाक्यार्थत्वं नियोगस्यापूर्वस्येति सिद्धम् । **कणिका.** पृ. ५२–५३, ५५–६०.

* **नियोगविधिः** । 'गुरुनियोगात् अपतिः अपत्यलिप्सुः देवरात् गुरुप्रेरितात् ऋतुमती इयात्' इत्यागमः । **वा.** १।३।३।७ पृ. २०८, * **नियोगविधेरपि** एकापत्यविषयत्वात् अनेकोत्पादनानौचित्यम् । **सु.** पृ. १८५.

* **नियोगविधिवादः** । उपोद्घातभूतमन्विताभिधानं प्रसाध्य अपूर्वं कार्यं वेदवाक्यानामस्तीति साधयितुकामः पूर्वपक्षं तावदाह–'**ननु व्युत्पत्त्यपेक्षेषु शब्देष्वर्थाभिधायिषु । कथं मानान्तरावेद्यं कार्यमाहुर्लिङादयः ॥**' अपूर्वाधिकरणे लिङाद्यर्थः अपूर्वमित्युक्तम् । प्रमाणान्तरायोग्यं चापूर्वमिष्यते । यच्च प्रमाणान्तरायोग्यं तत्र संबन्धग्रहणमशक्यम्, संबन्धिग्रहणपूर्वकत्वात् । तस्य विशिष्टार्थव्यवहारदर्शनेन एतद्विषया शब्दशक्तिरनुमीयते । तदेव च संबन्धग्रहणम् । यच्च न प्रतीतौ तद्विषयो व्यवहारः अवसीयते, तदनवसायेन च तद्विषया बुद्धिरनुमीयते, तदनुमाने च कुतः शब्दस्य शक्तिः कल्प्यते । अपूर्वं च न प्रमाणान्तरगोचरः । न च शब्दादेव तदवगम्य संबन्धा-

वधारणम्, इतरेतराश्रयत्वात् । अवसितशक्तेरेव बोधकत्वात्, अवबोधकत्वादेव (च) शक्त्यवगमात् । **स्यान्मतम्**, लिङादेः शब्दस्यायं महिमा, यदनवसितशक्तिरपि स्वार्थमवगमयतीति । **तदिदमप्रमाणम्** । क्रियामात्रकार्यावबोधकत्वाङ्गीकारेण लिङादेर्लोकतो व्युत्पत्तिसंभवे शब्दान्तरवैलक्षण्येन अगृहीतसंबन्धस्यैव वाचकत्वकल्पनाऽनुपपत्तेः । वेदवाक्यात् अपूर्वकार्यावगतेरेवं कल्प्यते इति चेन्न । तस्या एवासिद्धत्वात् । क्रियैव कार्यतया वेदवाक्येभ्योऽवगम्यत इति व्युत्पत्तिबलेन प्रामाणिकम्, मनोरथमात्रविजृम्भितं तु अपूर्वं कार्यं प्रतीयते इति । तस्मादगृहीतसंबन्धो लिङादिः कथमपूर्वं कार्यमभिधत्ते । तथा च कथं वाक्यार्थः । अभिधेय एव ह्यर्थोऽभिभवति (?) एवम् '**शब्दान्तराण्यपि कथं तेनादृष्टेन कुत्रचित् । वदिष्यन्त्यन्वितं स्वार्थं व्युत्पत्तिपथदूरगम् ॥**' तस्मिन्नप्रतीयमाने तदन्वितस्याप्रतीतेः सूत्रसंबन्धावधारणानुपपत्तेः दूरनिरस्तं शब्दान्तराणां तदन्वितस्वार्थबोधकत्वमिति ।

राद्धान्तमुपक्रमते '**अत्रोच्यते यदा नाम वृद्धेनैकेन भाषिते । जलं चैत्राहरस्वेति चैत्र आहरते यदा ॥ तदा व्युत्पिसमानोऽन्यस्तत्रैवमवगच्छति ॥**' बुद्धिपूर्वा प्रवृत्तिरियमीदृशी । लिङादियुक्तवाक्यश्रवणात् प्रयोज्यवृद्धस्य विशिष्टार्थविषयां प्रवृत्तिं दृष्ट्वा व्युत्पित्समानो बालः एवमाकलयति, 'येयं स्वाधीना अस्य प्रवृत्तिः, सा मद्वद्बुद्धिपूर्विका' इति । पुनश्च तस्यायं विमर्शो जायते 'अहं बुद्ध्वा प्रवृत्तो यत् तदेषोऽपि, यस्याः प्रवृत्तेर्हेतुभूता बुद्धिः, सा यद्विषया सती मम प्रवृत्तिहेतुः, तद्विषयैवास्यापि' इति व्युत्पित्सोरनुमा जायते । तदेवमनुमानद्वयमेतत् 'वृद्धस्य स्वतन्त्रा प्रवृत्तिः धर्मिणी, बुद्धिपूर्विका इति साध्यो धर्मः । स्वतन्त्रप्रवृत्तित्वात् मदीयस्वतन्त्रप्रवृत्तिवत्' इति । तथा 'वृद्धस्य प्रवृत्तिहेतुभूता बुद्धिः धर्मिणी, यद्विषया बुद्धिर्मम प्रवृत्तिहेतुभूता, तद्विषयैवास्यापीति साध्यो धर्मः । प्रवृत्तिहेतुभूतबुद्धित्वात् मदीयप्रवृत्तिहेतुभूतबुद्धिवत्' । पुनश्च तस्यायं विमर्शः प्रवर्तते । पदस्य (यदस्य) तु शब्देन बोध्यते अनेन मम, मानान्तरेण तु यद्विषया सा बुद्धिः प्रवृत्तिहेतुभूता, तद्वत् स्वस्थानेन शब्देन बोध्यते, तद्भावे सति अवगमात् । मम तु मानान्तरेण तद् बोध्यते इत्ययमावयोर्विशेषः । येन यत् बुद्ध्वा प्रवृत्तिर्मम, तदस्थानेन शब्देन बोध्यते इति शब्दस्य प्रवृत्तिहेतुभूतार्थो बोधकतामवधारयति ।

पुनश्च कोऽसौ प्रवृत्तिहेतुभूतोऽर्थः शब्दाभिधेयः इति निर्धारयितुं स्वात्मनि प्रतिपन्नं प्रवृत्तिहेतुभूतमर्थमनुसंधत्ते– '**तत्र बुद्ध्वा प्रवृत्तोऽहं किं तावत् स्वयमन्यदा ॥**' शब्दनिरपेक्षः स्वयमहं प्रवर्तमानः किं बुद्ध्वा प्रवृत्तः इति जिज्ञासते । अन्यदेत्यनेन व्युत्पत्तितः प्रागवस्थोच्यते । अव्युत्पन्नेन बालेन यत् आत्मनि प्रतीतिकारणतया प्रतीतम्, तदेव व्युत्पन्नस्यापि तेन कल्प्यते, नान्यदित्यर्थः । तेन 'शब्द एव प्रवृत्तिहेतुभूतो विधिस्तद्व्यापारो वा' इति निरस्तं भवति । तयोर्बालेनात्मनि प्रवृत्तिकारणत्वेन दर्शनात् । अतिमन्दतया चेमौ पक्षौ न साक्षादुपन्यस्य निरस्तौ । तथाहि । लिङादिशब्दस्वरूपस्य प्रवर्तकत्वे सर्वे एव तच्छ्राविणो नियमेन प्रवर्तेरन्, न चैवं दृश्यते, कस्यचित् कदाचित् प्रवृत्तिः । लिङादिव्यापारस्य तु प्रवृत्तिहेतुत्वाश्रयणं देवाः प्रतिपद्यन्ताम् । पिशितचक्षुषो मानुषा वयं नेयतीं प्रमाणभूमिमवगाहितुं क्षमाः । शब्दभावना लिङादिव्यापाररूपा पुरुषप्रवृत्तिभवनानुकूला स्वज्ञापितकरणिका अर्थवादोदितप्राशस्त्यलक्षणा इतिकर्तव्यतायोगिनी प्रेरणाऽऽत्मिका कल्प्यते । स्वाध्यायाध्ययनविधिना हि सर्वे विधायकाः स्वाध्यायशब्दवाच्याः स्वात्मा च नियुज्यन्ते भावयेदिति । तत्र किमित्यपेक्षायां पुरुषप्रवृत्तिः संबध्यते । केनेत्याकाङ्क्षायां विधिज्ञानमेव योग्यतया करणत्वेन अङ्गीक्रियते । ज्ञाता हि शब्दभावना प्रवृत्तिं प्रसूते, योग्यतया एव अर्थवादसमुत्थप्राशस्त्यज्ञानं इतिकर्तव्यतांशे निविशते । अवसीदन्ती हि विधिशक्तिः प्राशस्त्यज्ञानेन उत्तभ्यते इति तस्याः पुरुषव्यापाररूपस्वर्गादिभाव्यावच्छिन्ना भावार्थकरणिका श्रौतस्मार्ताचारप्राप्तपदार्थावगमजनितकरणोपकारवती अर्थभावना समानप्रत्ययवाच्या विषयभूता । तत्र लिङादेस्तादृशो व्यापारो विद्यते इत्यत्र न किञ्चन

प्रमाणम् । लिङादिशब्दानन्तरभाविनी प्रवृत्तिरेव प्रमाणमिति चेन्न, तन्निबन्धनत्वेन प्रवृत्तेः अन्यत्रादृष्टत्वात् । तन्निबन्धना हि प्रवृत्तिर्दृष्टा । तदेव तां दृष्ट्वा शक्यमनुमातुम् । न पुनरप्रतिपन्नपूर्वकारणभावं (व–) शब्दव्यापारविशेषः । पृ. २५–२७.

लिङादिशब्द एव प्रमाणमिति साहसम्, अगृहीतसंबन्धस्य शब्दस्यावाचकत्वात् । अनवधारिते हि संबन्धिनि संबन्धबोधवैधुर्यात् । **यत् च** तत्र स्वाध्यायाध्ययनविधिना सर्वे विधायका आत्मा च नियुज्यन्ते, पुरुषं हि विधिः प्रेरयति यश्च येन प्रेर्यते ते अचेतना न युज्यन्ते न चाचेतनानां नियोज्यत्वमपि संभवति । अनियोज्यत्वे किं तन्न युज्यते । **तदप्यनुपपन्नम्** । शब्दभावनासु सर्वशब्दानां स्वतः एव सकर्तृत्वात् विनियोगानपेक्षणात् । अथ न पुरुषप्रेरणे विनियुज्यन्ते किं त्वर्थविबोधने । **तदपि न घटते** । तत्रापि नियोज्यानपेक्षायास्तुल्यत्वात् । अध्ययनविधेश्च अक्षरसंस्काररूपाध्ययनविधायकत्वाभ्युपगमः । **तथा चाहुः ‘द्रव्यादीनां पुनः कस्मिन् स्वाध्यायोऽन्तर्गतो भवेत् । संस्कार्यगणनायां च युक्तैवाक्षरसंस्क्रिया ॥ स्वाध्यायो हि स्फुटं कर्म साक्षात्संस्क्रियते हि सः ॥’** इति । संस्कारविधिश्च न संस्कार्यं नियुङ्क्ते प्रमाणान्तरावसितोपयोगस्य शेषित्वात् । संस्कारपर्यवसायी तु संस्कारविधिर्न संस्कार्यस्य कार्यं कल्पयेतेति । आत्मा चाध्ययनविधिना नियुज्यते विनियुज्यते वेति प्रतिपत्तिद्वयस्यापि असंभवात् अनुपपन्नम् । कथं च पुरुषप्रवृत्तिः तस्या भाव्या । न तावदनन्तरनिष्पत्तेः, विधिज्ञानस्य करणत्वाभावे अप्रसङ्गात् । क्रियाफलं हि तदा पुरुषप्रवृत्तिः स्यात् । न च क्रिया स्वफलप्रसवाय करणमपेक्षते, न च गमनं संयोगविभागारम्भे करणापेक्षम् । **स्यान्मतम्** । शब्दो विधिज्ञानं जनयित्वा तत्करणानुगृहीतः प्रेरणारूपं स्वव्यापारमारभते इति न करणत्वाभावः क्रियानिष्पत्तावेव करणत्वात् । **तदिदमलौकिकम्** । नहि कस्यचिद् वस्तुनः स्वज्ञानमुत्पादनहेतुः इति प्रतीतम् । एवं च अर्थवादोदितप्राशस्त्यस्यापि इतिकर्तव्यतात्वं विध्वस्तम् । योग्यतया हि तस्य तथाभावः । न च प्रेरणोत्पत्तौ शब्दकर्तृकायां करणीभूतज्ञानानुग्रहयोग्यता तस्य शक्यतेऽवगन्तुम् । पुरुषकर्तृकायां प्रवृत्तौ तस्य योग्यताऽवगमः:, (प्र–) शस्ते प्रवृत्तिदर्शनात् । **स्यान्मतम्** । अप्रशस्त(स्ते) पुरुषप्रवृत्त्यसंभवे प्रेरणैव नोपपद्यते । **तदसत्** न फलसंभवायत्ता क्रियानिष्पत्तिः क्रियानिष्पत्त्यायत्तैव फलसिद्धिरिति लोके प्रतीतम्, अत एव तस्मिन् पक्षे निष्फलेऽपि प्रेरणसिद्धेः प्रवृत्तिः स्यात् । अथ फलमपि इतिकर्तव्यतापदनिवेशि प्राशस्त्यवद् अतस्तदभावे प्रेरणा (न) निष्पद्यते इति चेत् । तर्हि फलमेवास्तु इतिकर्तव्यतांशपरिपूरकम्, किं प्राशस्त्येन । सत्यमेतत्, अस्ति तावत् तदपीति न त्यज्यते । एवं तर्हि अश्रुतप्राशस्त्ये तदपेक्षा मा भूत् । ततश्च तदपि देशादिकल्पनमघटमानं केवलस्य विधेः दर्विहोमवत् करणेतिकर्तव्यताकल्पना । कल्पनामात्रमेव, दर्विहोमवदिति च सिद्धो दृष्टान्तः । तत्र श्रौतद्रव्यदेवतास्मृत्याचारप्राप्ताचमनादीतिकर्तव्यतामात्रेण उपकारप्राप्तेरभिमतत्वात् । नहि एकस्यैव वस्तुनः अनुग्राहकता अनुग्राह्यता च स्वात्मन्युपपद्यते । अथ शब्दः प्रेरणां करोत्येव प्रवृत्तिस्तु न तावन्मात्रेण, किन्तु तज्ज्ञाने सति । एवं तर्हि ज्ञानफलमेव प्रवृत्तिरस्तु, न प्रेरणाफलम्, तस्मिन् सति भावात्, असति चाभावात् । तथा च सति शब्दभावना विधिरिति न सिद्धम् । किञ्च शब्दः अम्बरगुणः इति प्राप्यकारीन्द्रियवादिना अभ्युपेयं अन्यथा नभसः श्रोत्रभूतस्य, शब्दस्य च प्राप्त्यसंभवात् संयोगसमवाययोरन्यतरस्य प्राप्तिरूपत्वात् संयोगस्य अन्यतरकर्मजस्य उभयकर्मजस्य संयोगजस्य (च) द्रव्यत्वे शब्दस्य नभसा सहासंभवात् तस्य त्रैविध्यनियमात् पारिशेष्यात् समवायः प्राप्तिरित्याकाशगुणः शब्दः । न च तस्य व्यापारसंभवः, द्रव्याश्रितत्वाद्व्यापाराणाम् । कथं तर्हि शब्दस्याभिधानलक्षणो व्यापार आश्रीयते । यथा तत्, तथा श्रूयताम् । यत्तत् आत्मनि अर्थविषयज्ञानं शब्दविषयज्ञानानन्तरं जायते, तच्छब्दकर्त्रर्थतया यदा विवक्ष्यते, तदा तत् अभिधानमित्युच्यते । परस्थे व्यापारे भवत्येव कर्तृता परिस्पन्द इवात्मनः इति न कश्चिद्दोषः । कथं चासौ शब्दव्यापारः अर्थभावनाविषयः । एकप्रत्ययवाच्यत्वादिति चेत् । तदुक्तम्

‘विधिभावनयोश्चैकप्रत्ययग्राह्यता कुतः । धात्वर्थात् प्रथमं तावत् संबन्धोऽध्यवसीयते ॥’ इति । **तन्न** । प्रत्ययस्य भावनाऽभिधानमस्मिन्पक्षे दुर्घटं यतः । **ननु** च सर्वाख्यातानां भावनावचनता करोतिसामानाधिकरण्यात् अध्यवसीयते । तथाहि भवत्यर्थस्य कर्तुः प्रयोजकव्यापारो भावना । सैव च कृतिः । भाव्यमानस्य क्रियमाणत्वात् तस्य कृतिकर्मत्वात् । ‘किमकार्षीदपाक्षीत्, किं करोति पचति, किं करिष्यति पक्ष्यति’ इति प्रश्नोत्तरदर्शनात् । करोत्यर्थः सर्वाख्यातैरभिधीयते इति गम्यते । अन्यथा करोत्यर्थविषयप्रश्ने तदुत्तरानुपपत्तिः । तत्रापि सत्यामपि प्रकृतौ घञन्तादिषु करोत्यर्थानवबोधात्, आख्यातप्रत्ययसंनिधाने च तदवगमात् आख्यातानामेव सोऽर्थ इति निश्चीयते । **तदसत्** । किं करोतीत्यस्य प्रश्नस्य यद्ययमर्थः ‘यत् करोति तत् किम्’ इति तत्र चेत् पचतीत्युत्तरं स्यात्, तदा पाकं करोतीति स्यात् तस्मिन्नर्थे पचतीति वर्तते । तथा च सिध्येत् आख्यातानां करोत्यर्थता । न चैतदेवम् । अनवगते हि धातुवाच्ये व्यापारविशेषे तद्विशेषः एव एवं पृच्छयते, तत्र पचतीत्युत्तरम् । तथा च न सिध्यति धात्वर्थातिरिक्तकरोत्यर्थवचनता आख्यातानाम् । सर्वधात्वर्थाश्च कस्यचित् अभूतस्य भवने अनुकूलतां भजन्तः करोत्यर्थतामापन्नाः करोतिना प्रष्टुं निर्देष्टुं च शक्यन्ते इति तद्विषयप्रश्नोत्तरे एवैते । किञ्च, धातुवाच्यव्यापारविशेषविषयत्वेनापि प्रश्नोत्तरयोरुपपत्तौ तदतिरिक्तकरोत्यर्थवाचकता आख्यातानां न शक्यते वक्तुम् । अपिच सप्रयत्नक्रियेषु देवदत्तादिषु व्यापारभेदसंभवात् घटेतां प्रश्नोत्तरे व्यतिरिक्तकरोत्यर्थविषये, ‘किं करोति’ इति प्रश्ने गच्छतीति चोत्तरे गमनातिरिक्तव्यापाराभावात् अनुपपत्तिरेव स्यात् । धात्वर्थविशेषविषयत्वे तत्राप्युपपत्तिः । **अथ** संयोगविभागौ धात्वर्थः, परिस्पन्दस्तु विभक्त्यर्थ इति, तत्रापि धात्वर्थव्यतिरिक्तव्यापारसंभवात् नानुपपत्तिः । **तन्न** । परिस्पन्दस्यैव गमिवाच्यत्वात् केवले संयोगे विभागे वा गमेः प्रयोगः, स्थाणौ श्येनेन वियुक्ते संयुक्ते वा अप्रयोगात् । नापि द्वयोः, उत्पत्य निपतिते श्येने स्थाणौ प्रयोगप्रसङ्गात् । एकक्रियाक्षणजन्यौ संयोगविभागौ गमिवाच्याविति यद्युच्येत । **तर्हि** क्रियैवास्तु वाच्या किमसावुपाधिकोटौ निवेश्यते । एवं हि उपाधिसमाश्रयणगौरवमेव परिहृतं भवति । **अपिच** वृद्धव्यवहारात् शब्दार्थनिर्णयः । न चाख्यातानां भावनावचनत्वमन्तरेण कस्यचित् वृद्धव्यवहारस्यानुपपत्तिः । प्रश्नोत्तरे तु संबन्धज्ञानोत्तरकालभाविनी । अतो न तद्वशेन संबन्धिनिरूपणा । कर्त्रादिसंख्यामात्रवाचितया आख्यातप्रयोगोपपत्तौ नाधिकं वाच्यं शक्यं कल्पयितुम् । अपिच पाकं करोति देवदत्त इत्यत्र तावत् पच्यर्थं पाकशब्दो ब्रवीति, तदनुगुणं प्रयत्नं करोतिराचष्टे । आख्यातं तु केवलकर्तृसंख्यां वक्तीति सिद्धं तन्मात्रवाचित्वम् । अतः अन्यत्रापि तत्रैव वर्तते इति युक्तम्, एवं च ‘पचति देवदत्तः’ इत्यस्य यत् विवरणं पाकं करोतीति, तदप्यनुपपन्नम् । पचतीत्यत्र यः पुरुषप्रयत्नो यत्संबन्धेन पच्यर्थः साध्यभूतः, तं करोतिना प्रकृतिभूतेनोपादाय विवरणोपपत्तिः । यत्रापि प्रयोगः ‘गमनं करोति’ इति न प्रयत्नः अपरोऽस्ति, तत्रापि गमनस्य साध्यतां दर्शयितुं गौणः करोतिप्रयोगो द्रष्टव्यः, पक्षद्वयेऽपि तुल्यत्वात् । **यस्तु** देवदत्त ओदनं पचतीत्यादौ वृद्धव्यवहारे एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगात् आख्यातानां तदर्थतामाह । **स इत्थं** शिक्षयितव्यः । वत्स किं न वेत्सि ‘अनन्यलभ्यः शब्दार्थः’ इति । इह च प्रकृत्यर्थाक्षेपेणापि प्रयत्नप्रतिपत्त्युपपत्तेर्न शक्यते तद्वाचकता आख्यातानामाश्रयितुमिति । **ननु** प्राभाकरा अपि भावनावाचकतां कथमाख्यातप्रत्ययस्येच्छन्ति । **उच्यते** । न सर्वाख्यातप्रत्ययानां भावनावचनत्वमभ्युपेमः, किन्तु कार्याभिधायिनो लिङादयः कार्यस्य अन्यथा अनभिधानात् कृत्यभिधायिनः इष्यन्ते । कृतिसंबन्धि हि कार्यं कृत्यनभिधानेनाभिहितं स्यात् । नह्यस्ति संभवः कृतिश्च नाभिधीयते कार्यं च नाभि (अभि) धीयते इति । **अथ मतम्** । यथा दण्डीत्यत्र प्रत्ययेन दण्डो नाभिधीयते, अथ च तद्विशिष्टपुरुषप्रतीतिः । इत्येवमिहापि भवेदिति । **तन्न** । तत्रापि अप्रतीते दण्डे न तद्वति प्रत्ययः । अस्ति च तत्र प्रकृतिभूतो दण्डशब्दः, स च तस्य प्रत्याययिता । न चेह तथा संभवति, प्रकृतीनां पुरुषव्यापाराभिधाननियमात् । पुरुषो हि चेतनः कार्यं लिङादिभिरवबुध्यते,

न चासौ प्रकृतिसंबन्धि स्वयं कार्यं बोद्धुमलमिति तदीयकृत्यभिधानमेषितव्यम् । तस्य च कृतिः प्रयत्नरूपा, न च संबन्ध्यननुभवे तदभिधायिनः (अनुभवः) इति न दण्डिन्यायस्यायं विषयः । **स्यान्मतम्** । यथा लिङां (तिङां) कर्त्रादिसंख्यामात्रवचनता क्रियाऽऽक्षेपेण च कर्त्रादीनां प्रतीतिः, तथेहापि क्रिया प्रयत्नमाक्षिपति मा भूत्तस्य लिङ्वाच्यतेति । **तदसत्** । यद्यपि प्रकृत्यर्थभूतया क्रियया प्रयत्नः आक्षिप्यते । तथापि तदायत्तसिद्धिकृतया कथमपूर्वं गम्यते । प्रयत्नाभिधाने तदवच्छिन्नतया अभिधीयमानं तदायत्तसिद्धिकमवगम्यते, नान्यथा । न च कृत्यनवच्छिन्नं स्वरूपमात्रेण पूर्वमभिहितं कृतिमाक्षेप्तुमलम् । अवगतसंबन्धं हि वस्तु आक्षिप्यते । न च शब्दमन्तरेण अपूर्वस्य प्रयत्नसंबन्धावगमे कारणान्तरमस्ति । अतः कथं तत् प्रयत्नमाक्षिपेत् । तस्मादपूर्वकार्याभिधायिनां प्रयत्नाभिधानं अवश्याश्रयणीयमिति **विषयकरणीये** निपुणतरमुपपादितम्, इत्यलमतिप्रसङ्गेन । तत्र न क्रियामात्रं तावदहं बुद्ध्वा प्रवृत्तः, न चापि फलमात्रकम्, न क्रियाफलसंबन्धमात्रं वा । क्रियाफलयोः साध्यसाधनताऽवगमेऽपि न प्रवृत्तिरुपपद्यते । तृप्तिहेतोर्भोजने अतीते वर्तमाने वा अप्रवृत्तिर्भविष्यत्यपि तत्साधने सामुद्रविदाख्याते इवानुष्ठानाभावात् । पुरुषाशयावगमस्तु प्रवृत्तिहेतुतया नाशङ्कितोऽपि, स्वतन्त्रप्रवृत्तौ ब्युत्पित्सोर्दूरोत्सारितत्वात् । किन्तु कार्यतां बुद्ध्वा प्रवृत्तो ममेदं कार्यमिति प्रतीत्य अहं सर्वत्र प्रवृत्तः । तथाहि '**आस्तां तावत् क्रिया लोके गमनागमनादिका । अन्ततः स्तनपानादिस्तृप्तिकार्यपि या क्रिया ॥** (कारी अपि) **सा यावन्मम कार्येयमिति नैवावधार्यते । तावत् कदाऽपि मे तत्र प्रवृत्तिरभवन्नहि ॥**'

अत्रापर आह । सत्यं कार्यावगमादेव प्रवृत्तिः । इष्टसाधनतैव तु कार्यता, न परा काचित् । सैव प्रवृत्तिहेतुर्विधिरुच्यते तदाह '**अपेक्षितोपायतैव विधिरिष्टो मनीषिभिः । ततो ह्यध्यवसायादिर्वा कस्मान्नाभिधानतः ॥**' तथा '**पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः । प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥ कर्तुरिष्टाभ्युपाये हि कर्तव्यमिति लोकधीः । विपरीतं त्वकर्तव्यमिति तद्विषये ततः ॥**' (इति) । तत्र तावदिदमेव वक्तव्यम् । अतीतस्य वर्तमानस्य च इष्टसाधनताऽस्ति न च तत्कार्यतया अवसीयते, तेनान्या कार्यता अन्या चेष्टसाधनतेति । तथा च प्रवृत्तिरपि तन्मात्रावगमायत्ता न भवतीति । उपेक्ष्यैव तावत् तं फलसाधनताकार्यतयोर्भेदं विनिर्दिशति । फलसाधनता नाम या, सा नैव च कर्तव्या । '**कार्यता कृतिसाध्यत्वम्, फलसाधनता पुनः । करणत्वम्, फलोत्पादे भिद्येते ते परस्परम् ॥**' यद्यपि एकवस्तुनिवेशिता द्वयोः, तथापि स्वरूपभेदोऽस्त्येव । तदेव हि वस्तु फलं प्रति उपायभावात् फलसाधनमित्युच्यते, कृत्यधीनात्मलाभतया च कार्यमिति । किमिति इष्टाभ्युपायेष्वेव कर्तव्यताऽवगमोऽन्यत्र नेति, तत्राह '**किन्तु स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत् । फलसाधनता तत्र कारणं तेन कार्यता ॥ तद्भावभाविनी नित्यं तदात्मेव प्रतीयते ।**' स्वभावेन हि कर्माणि दुःखोत्पादहेतुभूतानि । तेषु कार्यत्वावगमः फलसाधनताऽवगमनिबन्धनः । कार्यता हि न कृत्यधीनसिद्धिमात्ररूपा, किन्तु कृतिं प्रति प्रधानभूतं सत् यत् तदधीनसत्ताकं तत् कार्यमुच्यते । तच्च कृतेः प्रधानम्, यत् अधिकृत्य कृतिः प्रवर्तते । न च दुःखं दुःखहेतुभूतं वा अधिकृत्य कृतेर्वृत्तिरुपपन्ना । नापि अदुःखं अदुःखहेतुं वा । किन्तु सुखं सुखहेतुं वा । तत्र न तावत् स्वयं सुखरूपं कर्म । सुखसाधनमपि चेन्न स्यात्, न तस्य कृतिं प्रति प्राधान्याभ्युपगमो घटते । अतः कर्मसु कार्यत्वावगमः फलसाधनताऽवगमनिबन्धनः, इति ज्ञापककोटिनिविष्टां फलसाधनतां कार्यता अनुरुध्यते, न त्वसौ तदात्मैव । तथा च असाधनस्यापि सुखस्यैवास्ति कार्यता । सुखं हि सर्वः कार्यतया अवैति, न तस्य फलसाधनतामपेक्षते । तेन साधनतोत्तीर्णकार्यताऽवगमेन मे प्रवृत्तिरिति निश्चित्य ब्युत्पित्समानः चैत्रं प्रवर्तमानं दृष्ट्वाऽनुमिनोति, चैत्रोऽपि कार्यबोधात् प्रवर्तते इति । चैत्रस्य प्रवृत्तिर्धर्मिणी कार्यबोधनपूर्विकेति साध्यो धर्मः । बुद्धिपूर्वकत्वे सति प्रवृत्तित्वात् मदीयप्रवृत्तिवदिति । लिङादयश्च प्रवृत्तिहेतुभूतार्थाभि-

धायिनः कार्यमेवाभिदधते, तस्यैव अवगतस्य प्रवृत्त्यनन्तरकारणत्वात्। इच्छा यद्यपि प्रवृत्तिहेतुः, तथापि सा लिङादिवाच्या न भवति, तदवगमस्य प्रवृत्तौ अनपेक्षितत्वात्। उत्पन्ना हि सा प्रवृत्तिकारणं नावगता। ननु एवमपि कथं लिङादीनां कार्ये व्युत्पत्तिरिति, अत आह **'शब्दान्तराणि स्वार्थेषु व्युत्पद्यन्ते यथैव हि। आवापोद्वापभेदेन तथा कार्ये लिङादयः॥'** लिङादियुक्तवाक्यश्रवणे तद्भावभाविन्या प्रवृत्त्या विशिष्टकार्यावगतिमनुमाय वाक्यस्य तावत् हेतुतामध्यवस्यति। तत्रापि कोऽर्थभागः केन शब्दांशेनाभिहितः इति विवेचने लिङाद्यावापेन कार्यावगतिदर्शनात्, तदुद्धारे चादर्शनात् ते एव कार्यावगतिं कुर्वन्तीति शब्दान्तरवत् लिङादीनां कार्यवाचकत्वव्युत्पत्तिसिद्धिः।

ननु लोकव्यवहारात् लिङादयो वाचकतया व्युत्पाद्यमानाः प्रैषादिष्वेव वाचकतया व्युत्पत्तिमर्हन्ति, तत्रैव तेषां प्रयोगदर्शनादिति। **'कार्यमेव हि कर्तॄणां ज्यायःसमकनीयसाम्। प्रवृत्त्यापेक्षया (त्यपे) भेदात् प्रैषादिव्यपदेशभाक्॥'** प्रवर्त्यपुरुषापेक्षया ज्यायसा वक्त्रा प्रतिपाद्यमानं कार्यं 'प्रैषः' इति व्यपदिश्यते। समेन आमन्त्रणम्, हीनेन अध्येषणमिति। प्रैषादिप्रतिपादका अपि च लिङादयः। **'कार्यमेव हि सर्वत्र प्रवृत्तावेककारणम्। प्रवृत्त्यव्यभिचारित्वाल्लिङाद्यर्थोऽवधार्यते॥'** प्रवृत्तिर्हि बालेन स्वात्मनि कार्यावगमपूर्विका प्रतिपन्ना इति सर्वपुरुषानपि प्रवर्तमानान् दृष्ट्वा कार्यविगममेव (कार्यावगममेव) बालः कल्पयतीति प्रेष्यादीनामपि प्रवृत्तिः कार्यावगमनिबन्धनेति। कर्तव्यमेव हि प्रैषादिव्यपदेशयोगीति सिद्धम्। वस्तुतस्तु प्रैषादीनामपि प्रवृत्तिव्यभिचारित्वात्, कार्यस्य च प्रवृत्तिषु सर्वासु हेतुभूतत्वात् प्रैषादिष्वपि लिङादीनां कार्यमेवार्थ इति निश्चीयते। केन पुनः प्रमाणेन बालः स्वयं कार्यमवगच्छति यतः प्रवर्तत इति अत आह–**'कृतिसाध्यं प्रधानं यत् तत् कार्यमवसीयते। तच्च मानान्तरेणापि वेद्यमोदनपाकवत्॥'** कृतौ सत्यां च भावादसत्यां चाभावादनुमानतः कृतिसाध्यता तावदवगम्यते। यदधिकृत्य कृतिः प्रवर्तते, तत् कृतिप्रधानम्। प्रयत्नश्च कृतिः। स च मानसप्रत्यक्षवेद्यः, इति विशिष्टे प्रयोजनताऽपि प्रयत्नस्य प्रत्यक्षवेद्यैव, तेन प्रत्यक्षानुमानाभ्यामवमन्यते। यथा च ओदनः पाकस्येति न किञ्चिदनुपपन्नम्। उपसंहरति **'एवं कार्यात्मकेऽप्यर्थे व्युत्पद्यन्ते लिङादयः। तदन्वितेषु स्वार्थेषु तथा शब्दान्तराण्यपि॥'**

एवमपि कथं मानान्तरावेद्यकार्यवाचिता लिङादीनामित्याशङ्क्य मीमांसामवतारयति **'संप्रधार्यमिदं त्वत्र तत् कार्यं किं क्रियात्मकम्। यद्वा तद्व्यतिरेकीति॥'** को नु निर्णय इत्यत्राह **'तत्र लोकानुसारतः। प्रमाणान्तरविज्ञेया क्रिया कार्येति यद्यपि। प्रतिभाति–।'** लोके हि लिङादियुक्तवाक्यश्रवणे विशिष्टक्रियाऽनुष्ठानदर्शनात् तद्विषया कार्यावगतिर्लिङादिभिः क्रियते इति युक्तम्, अवगतिप्रवृत्त्योरेकविषयत्वात्। नहि अन्यत् कार्यतया अवगम्य अन्यत्र बालः प्रवर्तते। किंच क्रियायां कार्यभूतायां लिङादियुक्तवाक्यप्रतिपाद्यमानायां शक्तिकल्पनालाघवं स्यादेव। तथाहि, धातुरेव कार्यभूतं स्वार्थं ब्रवीतु। तथा भूतार्थवाचिनस्तु धातोः परे लिङादयो भवन्तीत्याश्रयताम्। लिङादिश्रवणे तु तथाभूतार्थतया धातुः प्रयुक्तः इत्यवगम्य कार्यभूतधात्वर्थावगमः संपद्यते। यथा लिङादिभ्यो वर्तमानाद्यध्यवसायः। तेष्वपि वर्तमानेऽर्थे वर्तमानाद्धातोर्लडित्येव सूत्रार्थः। कर्त्रादिसंख्यामात्रवाचित्वमेव केवलं लडादीनामिव लिङादीनामप्यर्थ इति क्रियैव कार्यतया वेदेऽपि अवगम्यते इति यद्यपि विवेकसमर्थानामवगतिर्भवति। **'तथा वेदे, सिद्धान्तेऽवस्थिते सति। स्वर्गकामादयः कार्यो (कार्ये) नियोज्यत्वेन संगताः॥ स्वर्गकामादयः शब्दैर्वक्तव्या इत्यवस्थितम्।'** षष्ठाद्ये ह्येतदुक्तम्। लिङादिप्रयोगे तावत् कार्यावगतिरस्तीति निर्विवादम्। कृतिसाध्यं च कार्यं भवति। सति कर्तरि तस्यात्मलाभः। कर्तृलाभश्च स्वसंबन्धिकार्यविबोधे सति भवति, नान्यथा। तेन यद्यपि लोकानुसारेण क्रियाया एवं कार्यतया बोध्यमानाया वाक्यार्थत्वात् तदन्वयित्वाच्च इतरेषामिति, पदार्थानां कारकत्वात् ऋते चान्यस्य क्रियाऽन्वयित्वासंभवात् लोहितोष्णीषन्यायेन (३।८।४) विशेषण-

भूतस्वर्गकामनासमर्पणपरतया कर्तृविशेषणत्वेन स्वर्गकामस्यान्वयोऽवगम्यते, **तथापि** स्वसंबन्धिकार्यबोद्धृत्वेन एवान्वयो वर्णनीय इति नियोज्यसमर्पकत्वमेव आश्रीयते इति । एवमपि किमित्याह '**नियोज्यः सर्वकार्ये यः स्वकीयत्वेन बुध्यते ।**' तथापि किमित्याह '**स्वर्गादिः कामयोगाच्च साध्यत्वेनैव गम्यते ।**' साध्यविषया एव हि सर्वत्र कामना भवति, तेन तेन तत्संबन्धात् साध्यभूतं स्वर्गादि काम्यमानतया पुरुषं विशिनष्टि । '**तेन साध्यत्वपर्यन्तस्वर्गादीच्छाविशेषितः । तदेव शक्नुयात् कार्यं बोद्धुं यत् काम्यसाधकम् ॥**' **अत्र कश्चिदाह । यद्यपि** कामनायोगात् साध्यता स्वर्गादीनामवगम्यते, **तथापि** प्रकृतकार्यसाध्यत्वावगमो निष्प्रमाणक एव, अन्यसाध्यस्यापि साध्यत्वसंभवात् । न च यत् काम्यते, तस्यावश्यं साधनमस्ति । मनोरथपरंपराहृतचेतसो हि तन्नास्ति, यन्न कामनाविषयीभवति । न च तस्य सर्वस्य साधनं भवति । सर्वज्ञत्वमपि केचित्कामयन्ते न च तस्योपायसंभवः । **अथ** तदिच्छावतः अतत्साधने कर्तृता नोपपद्यते । **तन्न** । दृश्यन्ते हि ग्रामाभिगमनकामा हि यादृच्छिकीषु क्रियासु प्रवर्तमानाः । अपिच सर्वोऽभ्युपायार्थी एव पुरुषः, तथापि प्रायशः तद्विरोधिष्वेव इन्द्रियार्थेषु प्रवर्तमाना दृश्यन्ते । **अत्रोच्यते** । स्वर्गादिकं कामयमानस्य तदेव कार्यतया बोद्धुमवकल्पते । यदेव तस्य काम्यमानस्य सिद्ध्यनुगुणम् । अन्यथा हि तत्कामिना सता तत्कार्यतया अनवबुद्धं स्यात् । अपरित्यक्ततत्कामनासंबन्धो हि तत्साधनं कार्यतयाऽवबुध्यते । तस्मात् यत्कामिनो यत् कार्यतया उपदिश्यते तत् तस्य काम्यस्य साधकमिति नियोज्यकार्यान्वयानुपपत्त्यैव गम्यते । एवं सति किं फलमित्याह । '**लिङादिस्तत्र कार्यं चेत् क्रियामेवावबोधयेत् । समन्वयो नियोज्येन तदानीमेव हीयते ॥**' कथमित्याह '**क्रिया हि क्षणिकत्वेन न कालान्तरभाविनः । स्वर्गादेः साध्यमानस्य न शक्ता जननं प्रति ॥ इष्टस्याजनिका सा च नियोज्येन फलार्थिना । कार्यत्वेन न संबन्धमर्हति क्षणभङ्गिनी ॥**' कार्यविरोधि कर्मेति प्रमाणान्तरसिद्धम् । परिस्पन्दो हि उत्तरदेशसंयोगोदयापवर्गी इति आशुतरविनाशी । स्वर्गश्च नियतदेशान्तरकालान्तरभोगः । **ननु** प्रीतिमात्रवचनः स्वर्गः (स्वर्गशब्दः) इति षष्ठाद्ये साधितम्, प्रीतिसाधनेषु द्रव्येषु स्वर्गशब्दप्रयोगात् । न च तेषु स्वरूपनिबन्धन एव तत्प्रयोगः, प्रीत्यपगमे तदभावात् । न च तत्साधनवचनता तदनभिधाने घटते । तदभिधानाभ्युपगमे न तद्वाचकता एव, लक्षणया तत्साधने प्रयोगोपपत्तेः, तत्र शक्तिकल्पनापरिक्षयात् । अखण्डशब्दतया च दण्डिन्यायस्यासंभवात्, तदन्तर्गतस्य दण्डशब्दस्य दण्डप्रत्यायकत्वसंभवात् । प्रीतेश्च कर्मानन्तरभावित्वमपि संभवत्येव । **उच्यते**, न प्रीतिमात्रवचनतया ज्योतिष्टोमादिचोदनासु स्वर्गशब्दस्य प्रयोगोऽवगम्यते, अर्थवादेषु दुःखासंभिन्नचिरतरोपभोग्याभिलाषोपनेयप्रीतिश्रवणात् । तत्र यदि विध्युद्देशगतः स्वर्गशब्दः तथाविधप्रीतिपरप्रयोगतया वर्ण्यते, तदा अतिपरोक्षार्थवादपदानां वृत्तिराहता न भवेदिति तदानुगुण्येन तादृश्यामेव प्रीतौ स्वर्गशब्दः प्रयुक्त इति निश्चीयते । तथाऽवस्था नियतमेव देशान्तरभोग्या । अतो न कर्मानन्तरभाविनीति न तत्र कर्मणः आशुतरविनाशिनः साधनता अवकल्पते । यस्मिन् हि पूर्ववर्तिनि यत् निष्पाद्यते तत् तस्य साधनमिति लोकप्रतीतिः । **अत एव च** विनष्टस्यापि कर्मणः शास्त्रेण साधनत्वं बोध्यते इति ये ब्रुवते तेऽपि **निरस्ताः** । एवं चासौ आशुतरविनाशिनी क्रिया स्वर्गकामिना नियोज्येन सह कार्यतया संबन्धुं नार्हति, स्वर्गं प्रति साधनत्वानुपपत्तेः । '**तस्मान्नियोज्यसंबन्धसमर्थं विधिवाचिभिः । कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते ॥**'

ननु क्रियैव कार्यतयोच्यताम् । अस्तु सैव, स्वर्गसाधनतां कथमवलम्बिष्यते । उच्यते । वरं तस्या एव तदनुपपत्त्या चिरतरावस्थायिताकल्पना, न पुनः अदृष्टस्याश्रुतस्य तदतिरेकिणोऽर्थस्य कल्पना । यदि कर्मण एव शक्तिरवस्थायिनीत्यभ्युपगम्यताम् । **तदिदमुभयमपि** प्रमाणान्तरविरोधान्न कल्पनामर्हति । अविरोधि हि प्रतीतिसिद्ध्यर्थं कल्पयितुं शक्यम् । कर्मणश्चाशुतरनाशिनः चिरतरावस्थायिता प्रमाणान्तरनिरस्ता । शक्तिमति

चातीते शक्तिरप्यतीतेति प्रमाणान्तरसिद्धमिति न सापि स्थायिनी शक्या कल्पयितुम् । **अपि च** आश्रये निवृत्ते किमाश्रया शक्तिरवतिष्ठताम् । अस्तु सैव स्वर्गसाधनमाश्रितेति चेत्, नान्यदीया शक्तिरन्यत्र वर्तते, प्रमाणान्तरविरोधादेव । किञ्च शक्तिमति असति शक्तिः फलं न युक्तम् । शक्तिमत् हि साधनम्, न शक्तिः, अन्यथा शक्तित्वं न स्यात् । **ननु** यागादिक्रिया देवताऽऽराधनोपायभूता सती कार्यतया उच्यताम्, सा तत्प्रत्यासत्तिद्वारेण कालान्तरेऽपि फलं जनयितुमलमेव । देवता फलदानसमर्था कर्मभिराराध्यते । सा आराधिता प्रसीदति, प्रसन्ना च कर्तॄन् कालान्तरेऽपि फलेन योजयत्येव । **नैतदेवम् ।** यागादीनां देवताऽऽराधनहेतुत्वे प्रमाणाभावात् । नहि देवताऽऽराधनोपायहेतुभूतो याग इत्यत्र किञ्चित् प्रमाणमस्ति । **ननु** देवतापूजार्थ एव यजिः स्मर्यते । पूजा च सर्वा पूज्यमानार्था इत्यवगतम् । **उच्यते** । न स्मृतिः प्रमाणम्, स्मृतित्वादेव । प्रमाणान्तरापेक्षया च स्मृतीनामर्थवर्णनम्, तदनुवर्तित्वात् तासाम् । न च प्रमाणान्तरेण देवताऽऽराधनोपायता यागस्येत्युक्तम् । अतो देवतोद्देशेन द्रव्यत्यागो यागः इति गौणं देवतापूजात्मकत्वं अवगमयितव्यम्, पूजा अपि पूज्योद्देशेनैव हि प्रवर्तते इति । अपिच सा कर्मभिराराध्यते, या आराधनं प्रतिपद्यते । नानादेशगामिना पुरुषेण अनुष्ठीयमानयागात्मकपूजाऽवगमश्च देवताया इति प्रमाणान्तरविरुद्धमेव, तस्यानादित्वानुपपत्तेः । देवताऽधिकरणे च प्रपञ्चेनायं ग्रन्थो निरस्त इति नातीव यतितव्यम् । **अथापि स्यात्** पुरुषसंस्कारहेतुभूतैव क्रिया शब्देन कार्यतयोच्यते । तस्याश्च स्वर्गकामादिपुरुषसंबन्धात् पुरुषसंस्कारादेव कालान्तरे फलं भविष्यतीति । **तन्न** । पुरुषसंस्कारकत्वे प्रमाणाभावात् । नहि प्रमाणान्तरतः शब्दतो वा पुरुषसंस्कारहेतुता यागादीनामवसीयते इति कर्मण्यारम्भभाव्यत्वात् (१।१।४।२०) इत्यत्रोक्तम् । **ननु** क्रियैव कार्यतयोच्यताम्, फलसाधनता च तस्या एवाश्रीयताम्, तदन्यथानुपपत्त्या तु किञ्चिदपि अपरं तज्जन्यं फलोदयानुगुणं कालान्तरस्थायि आत्माश्रयं परिकल्प्यताम्, मा भूत् तस्य लिङादिवाच्यतेति । **उच्यते** । तद्धि तदनुपपत्त्या कल्प्यते, यत् यस्योपपादकम् । न च क्रियाजन्येनान्येन फलजनकेन कल्पितेन क्रियायाः साधनतोपपादिता भवति । नहि साधनसाधनं तस्य साधनं भवति । अवान्तरव्यापारो वा शक्तिर्वा तत्साधनतां निर्वाहयति । व्यापारयोगितयैव शक्तिमतां साधनता यतः । न च आत्मसमवायि अर्थान्तरं कर्मणामवान्तरव्यापारो नापि शक्तिरिति न तस्यार्थापत्तिगम्यता युक्ता । किन्तु अन्विताभिधाने स्थिते नियोज्यानुगुण्यात् शब्दवाच्यतैव उचिता इति सूक्तम् । ‘नियोज्यसंबन्धसमर्थकालान्तरस्थायि कार्यं क्रियाऽतिरिक्तं लिङादिभिरेवोच्यते’ इति ।

अत्रैषा प्रक्रिया चोदनासूत्रे कार्यार्थतया प्रतिपादिता। षष्ठाद्ये तस्यैव कार्यस्य स्वसंबन्धितया बोध्यः स्वर्गकामादिर्नियोज्य इति व्युत्पादितम् । तस्य च कार्यस्य नियोज्यविशेषणीभूतकाम्योत्पत्तिहेतुत्वमिति बादर्यधिकरणे राद्धान्तितम् । तच्च तथाभूतं क्रियारूपं न भवति, तस्याः फलसाधनत्वायोगात्, देवताऽऽराधनमुखेन तावत् फलसाधनता नास्तीति देवताधिकरणे व्युत्पादितम् । पुरुषसंस्कारमुखेन नास्तीति ‘कर्मण्यारम्भभाव्यत्वात्’ इत्यत्रोक्तम् । कर्मणस्तच्छक्तेर्वा स्थायिता नेतीति च अपूर्वाधिकरणे । नियोज्यान्वयमुखेन मानान्तरात् अपूर्वमात्मसमवायि कार्यं लिङादिभिरभिधीयते इति अनेकन्यायसाध्यम् । कार्यं च कृतिसाध्यम् । कृतिश्च पुंसां प्रयत्न एव । न चासौ भावार्थमर्थमन्तरेणास्तीति तत्संबन्ध(ध्य)नियोग एवोच्यते इति भार्थाधिकरणे स्थितम् । स च भावार्थः संबध्यमानस्तमवच्छिनत्तीति शब्दान्तराधिकरणे निर्णीतम् । विषयभूतश्च भावार्थः करणीभवतीति बादर्यधिकरणे एवोक्तम् । स्वकार्यसाधने भावार्थे पुरुषस्य ऐश्वर्यमिति तत्रैवोक्तम् ।

कालान्तरावस्थायिनः कार्यस्य नियोज्यान्वययोग्यतामाह–‘**तद्धि कालान्तरस्थानाच्छक्तं स्वर्गादिसिद्धये । संबन्धोऽप्युपपद्येत नियोज्येनास्य कामिना ॥**’ ननु ‘भाष्यकारः प्रत्ययार्थतया अपूर्वमित्याह न क्रियाऽऽदिभिन्नं कार्यमिति’ यो मन्यते तं प्रत्याह– ‘**क्रियादिभिन्नं यत् कार्यं वेद्यं मानान्तरैर्न तत् । अतो मानान्तरापूर्वमपूर्वमिति गीयते ॥**’ नन्वेवमपि अपूर्वं

वाक्यार्थः स्यात्, न नियोगः। नियोगश्च वाक्यार्थ इति प्राभाकराणामुल्लाप इत्यत्राह– ‘**कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ। नियोज्य इति मीमांसानिष्णातैरभिधीयते ॥**’ एवमपि कथं वाक्यार्थत्वमित्याह– ‘**कार्यस्यैव प्रधानत्वाद्वाक्यार्थत्वं च युज्यते। वाक्यं तदेव हि प्राह नियोज्यविषयान्वितम् ॥**’ उक्तं ह्येतत् यत् प्रधानतया प्रतिपाद्यते, तत् वाक्यार्थ इति, कार्यं च प्रधानतयोच्यते इति इह तस्यैव वाक्यार्थत्वम्। नियोज्यान्विताभिधानं च प्रायिकं आधानाध्ययनाङ्गप्रधानोत्पत्तिः, नियोगानां नियोज्यशून्यानां अभिधानाभ्युपगमात्। **विवरणकारा** हि आधानविषयमपि नियोगान्तरमिच्छन्ति। क्रतुनियोगप्रत्यभिज्ञानाभावात्, असंनिधाने हि तन्नियोगप्रत्यभिज्ञानं नोपपद्यते। नापि वर्णनादिविधिवत् अव्यभिचरितक्रतुसंबन्धात् तन्मुखेन प्रत्यभिज्ञोपपत्तिः, प्रागाधानात् आहवनीयादिशब्दानां अर्थापत्तिज्ञाने क्रतुसंबन्धानवगमात्। जुह्वादीनां तु आकृतिवचनत्वात् प्रागेव विनियोगात् प्रत्यभिज्ञासंभवः। **ननु** अग्नीनामपि साध्यत्वात् साध्यद्वयं कथमेकस्मिन् वाक्ये अन्वीयते। **उच्यते**। नियोग एव अत्रापि प्रधानं साध्यम्। अनीप्सितकर्मता तु अग्नीनां अनीप्सितकर्मत्वेऽपि तत्तदाधानजन्यं फलमग्निसमवायि तद्योगिनि आहवनीयादिशब्दे प्रयोगात्, आहवनीयादीनां च क्रतूपयोगित्वात्, तत्सिद्ध्यर्थतयैव पुरुषप्रवृत्त्युपपत्तेः अनुष्ठानलाभात् अलं प्रयोज्याभिधानेनेति। तथा अध्ययनविधौ अपि आचार्यकरणविधिप्रयुक्त्या एव अनुष्ठानलाभात् नियोज्यशून्याभिधानमिति स्थितम्। प्रधानोत्पत्तिनियोगा अधिकारनियोगाक्षिप्तस्वविषयानुष्ठानेनैव लब्धसिद्धयः, इति न तत्र नियोज्याभिधानान्वेषणम्। अङ्गोत्पत्तिनियोगा अपि विनियुक्तप्रयाजादिविषयत्वात् अधिकारनियोगा एव सिध्यन्तीति किं तेषु नियोज्यान्विताभिधानेन। कथं पुनः प्रयाजादिविधीनां विनियुक्तविषयत्वम्? **उच्यते**। साधिकारनियोगसंनिधौ प्रयाजादिवाक्यानि श्रुतानि, न तावत् स्वयागविषयनियोगान्तरमवगमयितुमीशते। अवघातादिवदनुवादकत्वसंभवात् किन्तु स्वरूपमात्रमेव योगस्य स्वपदार्थविशिष्टमुपपादयति, तच्च प्रयोजनाकाङ्क्षितया प्रयोजनीभूतेन साधिकारेण नियोगेनान्वीयते इति अधिकारवाक्यगत एव लिङ्शब्दः तदन्वितं स्वार्थमभिधत्ते। स चान्वयः प्रयाजादीनामैदमर्थ्यमात्रेण ग्राहकग्रहणमित्युच्यते। करणोपकाराकाङ्क्षस्य च अपूर्वस्य यत् करणोपकारकत्वपरिकल्पनं स प्रकरणव्यापार इति तत्र यत्तेषां करणोपकारजनकत्वकल्पनम्, तदौपादानिकम्। नास्ति तर्हि प्रयाजादिषु नियोगान्तरम्। न च नास्ति क्षणिकानां तेषां संभूयेतिकर्तव्यतात्वानुपपत्तिः, नियोगान्तरस्यावश्याश्रयणीयत्वात्। योऽसौ लिङादिः प्रागनुमानार्थतया शङ्कितः, स इदानीं नियोगान्तरमभिधत्ते। अत एव च अवघातादिवदेषां यज्यादिशब्दानामेव अङ्गवाक्यगतानामधिकारनियोगान्वितस्वार्थाभिधानं नाभ्युपगम्यते। तथाहि सति उत्पत्तौ एव अङ्गतया अङ्गस्वरूपस्यान्यतिरश्चीनत्वात् नियोगान्तरविषयता न स्यात्। उत्पत्तिदशायां तु अनन्यनिष्ठतयाऽभिधानात् युक्तं नियोगान्तरविषयत्वम्। कस्मात्पुनरन्यतिरश्चीनस्य नियोगान्तराविषयत्वम्, कार्यद्वयसंबन्धावगमानुपपत्तेः। नह्येकं वस्तु युगपत् कार्यद्वयसंबन्धि शक्यमवगन्तुम्। यच्च तत् नियोगान्तरं प्रयाजादिषु, तत् पश्चादभिधीयमानं अधिकारनियोगाङ्गतयैव शब्देनाभिधीयते। अन्यथा विषयद्वयविनियोगविरोधात्। इत्यलमतिप्रसङ्गेन।

ननु नियोगस्य काम्यमानफलसाधनत्वाभ्युपगमात् फलस्यैव प्राधान्यात् तस्यैव वाक्यार्थत्वमित्यत आह– ‘**आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये। कुर्वन् स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥**’ यत्तदपूर्वं कार्यम्, तस्य नियोज्यान्वयं विना कार्यत्वानुपपत्तिः, अनुष्ठानं विना तदसंभवात्, कर्त्रा च विना तदनुपपत्तेः। अधिकारिणा च विना कर्तुरभावात्, नियोज्यत्वं विना तदयोगात् अकामसाधने च नियोगानवगमात् इत्यात्मसिद्ध्यर्थमेव नियोगः काम्यमानफलसिद्धिहेतुत्वमवलम्बते स्वामिवत्। यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति, तथा नियोगोऽपि नियोज्यस्येति न प्राधान्यपदप्रच्युतिः। **ननु** नियोगस्य फलसाधनत्वात् तस्य च सेतिकर्तव्यताककरणनिबन्धनसिद्धित्वात् तदनुष्ठानान-

न्तरं नियोगसिद्धेः फलसिद्धिः स्यात्, अथानन्तरं नियोगो निष्पद्यते, तर्हि क्रियायामतीतायां कुतः तत्सिद्धिरित्याह– **‘विषयानुष्ठितौ सत्यां सिद्धो नहि विधिः फलम्। तदानीमेव कुरुते सहकारिण्यपेक्षया ॥’** एषा अत्र दर्शनस्थितिः प्रधानोत्पत्तिनियोगा अङ्गोत्पत्तिनियोगाश्च यथायथं संनिपत्योपकाराङ्गयुक्तस्वविषयमात्रानुष्ठानेनैव सिध्यन्ति। तत्र यान्यङ्गापूर्वाणि, तानि संभूय प्रधानोत्पत्त्यपूर्वेषु उपकुर्वन्ति, तस्माच्च परमापूर्वं निष्पद्यते। यान्यपि चाङ्गापूर्वाणि दीक्षणीयादीनां तेषामपि आरादुपकारकातिदेशिकाङ्गभाजां एकमुत्पत्त्यपूर्वम्, अपरमप्यङ्गापूर्वं प्रधानवत् वेदितव्यमिति। अनया दिशा सकलमूहनीयम्। इत्थं यद्यपि कर्मानुष्ठानानन्तरमेव विनियोगसिद्धिः, तथापि यत्फलस्यानन्तराभवनं तत् उपपत्त्या कल्प्यते, अस्ति किञ्चिद् अपेक्षणीयमपरम्, यदसंनिधेः फलं नोत्पद्यते इति। नन्वेवं सति फलहेतुता अपूर्वस्य बाध्येतेति अत्राह **‘सहकारिण्यपेक्षा च कारणत्वं न बाधते। मा वा बाधिष्ट सर्वत्र कार्ये पाकादिके यथा ॥’** तथेत्यर्थः। **‘अतः पुरुषकारश्च दैवं च फलसाधनम्।’** इत्याचार्याः, दैवमपूर्वमपेक्षणीयं सहकारि च पुरुषकारपदवेद्यम्। नन्वेवं भवतु काम्येषु अपूर्वकार्याभिधानं लिङादीनाम्, नित्यनैमित्तिकनिषेधाधिकारेषु कथं तेषु फलोदयं प्राभाकरा अनुमन्यन्ते। नहि फलं फलतयाऽन्वीयते, किन्तु अधिकारिविशेषणतया। लब्धे तु जीवनादौ अधिकारिविशेषणे किं फलान्वेषणेन। नच फलमन्तरेण प्रवृत्त्यसंभवः, स्वसंबन्धिकार्यावगममात्रायत्तत्वात् प्रवृत्तेः। निरपेक्षः शब्दात् फलमन्तरेणापि स्वसंबन्धिकार्यावगमः, तावन्मात्रस्य लोके प्रवृत्तिहेतुत्वावगमात्। कार्यावगमोत्पादनायैव फलमुपयुज्यते इत्युक्तम्। ननु यथा शब्दात्कार्यावगतिः तथा निष्फलत्वादनुमानेन अकार्यताप्रतीतिरपि इति कथं प्रवृत्त्युपपत्तिः? न। आगमविरोधेन अनुमानस्य आत्मलाभाभावात्। एतावानेव प्रमाणव्यापारः। यत् प्रवृत्तियोग्यार्थदर्शनम्। अन्यथा यदि कश्चित् कल्पिते फले न प्रवर्तते, तदा किं कर्तव्यं तेन फलोदयानभ्युपगमे च प्राच्यमार्गासंभवात् नित्यादिषु अपूर्वकार्याभिधानमप्रमाणकम्, तत्राह **‘एवं कामाधिकारार्थपर्यालोचनयोत्थिता। व्युत्पत्तिः सर्ववाक्यार्थप्रतिपत्तिनिबन्धनम् ॥’** उक्तमिदमन्यायश्चानेकार्थत्वमिति। तेन कामाधिकारे सिद्धे अपूर्वकार्याभिधायकत्वे नित्यादिष्वपि स एवार्थो विरोधाभावादाश्रीयते। नित्याधिकारानुगुण्येन तु क्रियाकार्यत्वाभिधानं काम्येष्वनुपपन्नमिति सर्वत्रापूर्वमेव वाक्यार्थः। नन्वेवं वेदादेव व्युत्पत्तिः स्थिता स्याद् इत्याशङ्क्य आह– **‘व्युत्पत्तिरिह कार्येऽर्थे व्यवहारानुसारिणी। किन्तु निर्धारणामात्रं वेदवाक्यविमर्शजम् ॥’** तत्रैतदेव तावत् वक्तव्यम्। न केवलं वेदे लोकव्यवहारादेव शब्दार्थावधारणम्, किन्तु प्रसिद्धार्थपदसंबन्धादपि पदार्थान्तरान्वययोग्यार्थाभिधायकत्वे स्थिते तदनुरूपार्थाभिधायकता निर्णीयते एव। एतच्च यववराहाधिकरणे व्युत्पादितम। (तत्र) व्यवहारत एव संबन्धावधारणादुभयथाऽपि व्यवहारदर्शनात् समा विप्रतिपत्तिरिति पूर्वः पक्षः। पदान्तरसंबन्धादपि पदान्तरार्थाध्यवसानं भवत्येव, तेन वैदिकवाक्यशेषान्वयार्हताऽऽलोचनेन दीर्घशूकाद्यर्थमेवेति राद्धान्तः। तथा त्रिवृच्छब्दे यूपाहवनीयादिषु शक्त्यवधारणात् लोकेऽपि चायं व्यवहारो बहुलमुपलभ्यते। तथा च सति वैदिकनियोज्यान्वययोग्यतया लिङादीनां अपूर्वकार्याभिधायकत्वनिर्णयो नानुपपन्नः। अयं चापरो विशेषो यत् लिङादियुक्तानां वाक्यानां कार्यार्थत्वं तत्तावद्वृद्धव्यवहारे एव सिद्धम्, किन्तु लिङादिप्रत्ययानां यद्वाचकता, तच्चापूर्वमित्येतावन्मात्रं वैदिकपदसंबन्धादवसीयते इति। एकदेशिनमधुना निराकर्तुमुपन्यस्यति। **‘व्यवहारत एवाहुर्व्युत्पत्तिमपरे पुनः। कार्ये मानान्तरावेद्ये क्रियाऽऽदिव्यतिरेकिणि ॥’** अस्यार्थः। केचित् एवमाहुः। लिङादियुक्तवाक्यश्रवणे प्रवृत्तिदर्शनात् कार्यावगतिनिबन्धनत्वात् प्रवृत्तेः, कार्यमात्रमेव तेषामर्थः। न क्रियादिरूपता, तस्यां शब्दस्य प्रवृत्त्यनुपयोगित्वात् इति क्रियानिष्कृष्टकार्याभिधायिता लौकिकव्यवहारादेव निर्णीयते इति। तदिदमयुक्तमिति प्रतिजानीते। **‘सितेतर इव त्वेष पक्षश्चित्तं न कर्षति। चन्द्रातपामलन्यायप्रवासमलिनीकृतः ॥’** कथमित्याह–**‘कार्यमानान्तरावेद्यैः पार्श्वस्थस्तन्निबन्ध-**

नम्। व्यवहारं कथकारं शब्दात् प्रागवबुध्यताम्॥ व्यवहारमविज्ञाय तन्निबन्धनतद्गता। प्रतिपत्तिः कथं ज्ञेया शब्दशक्तिः कथन्तराम्॥' इदमत्राकूतम्। यद्यपि कार्यमात्रमेव प्रवृत्त्युपयोगीति तावन्मात्रमेव शब्दार्थः, तथापि तस्य लोके क्रियागतस्यैव प्रवर्तकत्वदर्शनात् शक्यते क्रियाश्रितता प्रत्येतुम्। यथा कृतिमात्रस्य शब्दार्थत्वेऽपि व्यक्त्याश्रितताऽपि न प्रतिक्षिप्यते, तथा क्रियाश्रितत्वं प्रमाणान्तरप्रमितं न प्रतिक्षेपमर्हति। तेन क्रियाऽतिरिक्तकार्याभिधायि न प्रसिद्धम्। यदि परं तन्निबन्धनव्यवहारदर्शनमेव स्यात्, तदा तद्दर्शनात् तद्धेतुभूतप्रतिपत्त्यन्यथानुपपत्त्या अनुमानेन शब्दस्य वाचकत्वाध्यवसानं भवेत्। न चैतदस्ति, तस्य शब्दादन्यतः प्रागनवगमात् तन्निबन्धनव्यवहाराप्रतिपत्तिः। तदप्रतिपत्तौ च तद्धेतुभूतप्रतिपत्त्यनुमानान्न शक्तिकल्पनोपपत्तिः। तत्राकूतं विवृणोति **'कार्यप्रतीतिमात्रं च प्रवृत्तेरनुमीयताम्। किन्तु कार्या क्रियैवेह लोकदृष्ट्याऽवसीयते॥'** लोकप्रतीतं क्रियारूपत्वं च न शक्यते अपह्नोतुं इति कार्यमात्रार्थत्वे क्रियैव कार्यतया लिङाद्यर्थः इति निश्चीयते, न पुनः प्रमाणान्तरात् अपूर्वमिति। अन्ये पुनर्वेदार्थबोधकस्वार्थवचननिबन्धनप्रवृत्तिदर्शनेन अतीन्द्रिये कार्ये लिङादयो व्युत्पद्यन्ते इत्याहुः। यदि आचार्यवचनादपि क्रियैव कार्यतयाऽवगम्यते, तदा तस्याः स्वयं दुःखरूपत्वात् पुरुषार्थान्तरानुबन्धनं विना प्रवृत्त्यसंभवात् नियमेन सुखार्थिनः प्रवृत्तिर्न स्यात्, ततश्च संध्योपासनाऽऽदौ पुरुषार्थोऽस्ति। तस्मात् क्रियाऽतिरिक्तं कार्यं आचार्यवचनेभ्योऽवगम्यते इति। तान् प्रत्याह **'वेदार्थाचार्यवाक्येषु प्रवृत्तिर्याऽपि दृश्यते। तत्राप्येषैव संबन्धपरिज्ञानविधा भवेत्॥'** आचार्यवाक्यश्रवणादपि शिष्याणां या संध्योपासनादौ प्रवृत्तिः, तत्रापि बालः स्वविषयनिरूपितं क्रियाकार्यत्वावगममेव कारणत्वेन परिकल्पयेत्। फलं विना च तदनुपपत्तेः फलावगममपि संभावयेत्। व्युत्पत्त्यनुसारेण वेदार्थमपि प्रतिपद्यमानो नित्यनैमित्तिकाधिकारयोरपि फलं कल्पयेत्। स एवं बाल्यदशायां व्युत्पन्नः स्वयमाचार्यपदवीमारूढो वेदार्थं प्रतीत्य शिष्येभ्य उपदिशन् क्रियामेव कार्यतया प्रतिपादयेत् नापूर्वं कार्यम्। उपसंहरति **'तस्माल्लोकानुसारेण व्युत्पत्तिः कार्यमात्रके। तस्य त्वपूर्वरूपत्वं वेदवाक्यानुसारतः॥'**

एवमपूर्वकार्याभिधायित्वे सिद्धे चोदयति **'ननु लोकविरोधित्वं पक्षेऽस्मिन्नपि दृश्यते। सर्वदैव यतो लोके क्रिया कार्यैव गम्यते॥'** परिहरति **'भवेदेवं विरुध्येते कार्येऽपूर्वेऽपि लौकिके। प्रतिपत्तिवियोगौ चेत् क्रियाकार्यत्वगोचरौ॥'** यदि क्रियाकार्यत्वगोचरौ लौकिकत्वप्रतिपत्तिप्रयोगौ अपूर्वकार्याभिधायित्वपक्षाङ्गीकारे विरुध्येते, ततो लोकविरुद्धत्वं स्यात् अस्मत्पक्षस्य। न चैतदस्तीत्याह–**'अपूर्वं हि क्रियासाध्यं साधिता साधनं क्रिया। तस्मादपूर्वसाध्यत्वं क्रियासाध्यत्वसंगतम्॥ प्रमाणान्तरगम्यं हि लोकः शब्दैर्विवक्षति। क्रियाकार्यत्व एवातः प्रयोगो लक्षणाऽन्वितः॥'** प्रतिपत्तिप्रयोगौ हि नावश्यं श्रौतवृत्त्यनुसारिणावेव, लक्षणयाऽपि लोके दर्शनात्। तेन यद्यपि उक्तेन न्यायेन अपूर्वमेव कार्यं लिङादीनामभिधेयम्, तथापि तस्य क्रियाकार्यत्वाव्यभिचारात् तत्र लक्षणया तयोर्नानुपपत्तिः। क्रियासाध्यं तु अपूर्वम्, साधिता च सती क्रिया साधनं भवतीत्यपूर्वेण सह क्रियाकार्यत्वं नित्यसंबद्धमिति शक्यते तत् लक्षयितुम्। यत्तु श्रौतपदार्थे लोके लिङादि न प्रयुज्यते इति, तत्तस्यापूर्वात्मनः प्रमाणान्तराप्रतीतत्वात् प्रतीतविषयत्वाच्च लौकिकप्रयोगस्य। यद्येषा लक्षणा किमिति तर्हि लोको नावगच्छतीत्याह **'लक्षणाऽनभिमानं तु मुख्यार्थानवधारणात्। यत्तु मुख्यार्थकुशलास्तेषां लाक्षणिकत्वधीः॥'** इति। मुख्यमर्थमविदित्वा लाक्षणिकमपि अर्थं श्रौतमिव मन्यते; म्लेच्छा इव यववराहाद्यर्थम्। मुख्यार्थविवेकिनां तु परीक्षकाणां लाक्षणिकत्वधीरिति। उपसंहरति **'तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम्। वेदवाक्यं ब्रवीतीति संक्षेपोऽयमुदाहृतः॥'** ग्रन्थस्य कर्तुश्च संज्ञां प्रयोजनं चाह **'वाक्यार्थमातृकेयं प्रभाकरगुरुदर्शनानुसारेण। अनसूयुबोधनार्थं शालिकनाथेन संग्रथिता॥ रचिता सच्चरितानामनुग्रहं कर्तुकामेन। वाक्यार्थमातृकाया**

वृत्तिरियं शालिकेनैव ॥ ' इति श्रीशालिकनाथमिश्रकृतायां वाक्यार्थमातृकायां द्वितीयः परिच्छेदः (नियोगविधिवादः नाम, **प्रकरणपञ्चिका** पृ. २५–२७, १७२–१९६)।

* **नियोगशब्देन** क्रियाव्यतिरिक्तमपूर्वं कार्यतया आत्मनि पुरुषं नियुञ्जानमुच्यते। **ऋजु.** १।२।७।२५ पृ. २८८.

* **नियोजनं** उपाकरणानन्तरमेव इति यथाप्रकृति प्राजापत्यपशुषु अनुष्ठानम्। **भाट्ट.** ५।२।१. * नियोजनम् (अग्नीषोमीयस्य पशोः विकृतौ) औदुम्बरे श्रूयते। केवले च खादिरे प्रकृतौ 'खादिरे बध्नाति' इति। **भा.** १०।७।१८.६३. * नियोजनं पशोः उत्तरवेदिस्थे स्थविष्ठे परिधौ सौमिकेषु चातुर्मास्येषु। 'परिधौ पशुं नियुञ्जीत'। गुणविधिरयं न कर्मान्तरम्। **वि.** १०।३।३. * नियोजनं प्राकृतमनूद्य विहितेन परिधिना प्राकृतस्य यूपस्य बाधः सौमिकेषु चातुर्मास्येषु। **के.** १०।३।३।१८–२२. * नियोजनं यूपे पशुधर्मः। **भा.** ३।६।७।१८.

* **नियोजनादयः** उत्तरे संस्काराः उपाकरणे स्वीकृतेन क्रमेणैव कर्तव्याः न व्यत्यासेन, वाजपेये प्राजापत्यपशुषु सोऽयं प्रवृत्तिक्रमः। **के.** ५।१।५।८–१२.

⧗ **निरङ्कुशाः कवयः इति न्यायः।** अभियुक्तोक्तिरूपोऽयं स्पष्टः। **साहस्री.** ६२४.

* **निरवकाशेन** सावकाशं बाध्यते प्राप्तबाधोऽत्र। **वा.** ३।३।७।१४ पृ. ८६०.

* **निरवदानम्।** किमिदं निरवदानमिति ? निष्कृष्य तस्मादङ्गात् अवदानं निरवदानम्, द्विरवद्यतीति। **भा.** १०।७।२।६.

* **निरवसितः** वर्णाश्रमाचाररहितः। (भोजनपात्रात् बहिष्कृतः, यस्य भोजनपात्रे द्विजो न भुङ्क्ते स निरवसितः इत्यन्यत्रोक्तम्)। **सु.** पृ. १७२.

* **निरसनं** न लोहितादिप्रयोजकम् 'लोहितं निरस्यति' इति द्वितीयया तस्य प्रतिपत्तित्वावगमात्, किन्तु प्रतिपत्तिः अग्नीषोमीये पशौ। **के.** ४।१।१२।२७, * **निरसनस्य** लोपः लोहितस्याभावे नाशे वा। लोपनिमित्तं तु प्रायश्चित्तं भवत्येव अग्नीषोमीये पशौ। ४।१।१२।२७.

⧗ **निरस्तपादपे देशे एरण्डोऽपि द्रूमायते इति न्यायः।** यत्र बहुज्ञसज्जनदुर्लभत्वे अल्पज्ञादरस्तत्रायं प्रवर्तते। उक्तम्–' यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥' इति। **साहस्री.** ६४५.

* **निराकरणं** युक्तितो बाधनम्। **ऋजु.** पृ. १०२.

* **निराकाङ्क्षस्य** विधेः उपसंहारप्राबल्येन संकोचो न युक्तः। **पराक्रमः.** ४३।२, * निराकाङ्क्षस्य विधेः मन्त्रलिङ्गानुसारेण संकोचः इन्द्रपीताधिकरणे निराकृतः। ४३।१.

* **निराकारा** बुद्धिः इति मीमांसकाः। साकारा इति बौद्धाः। **के.**

* **निरालम्बनवादः। भाष्यम्— ननु** सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः। प्रत्ययस्य हि निरालम्बनता स्वभाव उपलक्षितः स्वप्ने। जाग्रतोऽपि स्तम्भ इति वा कुड्य इति वा प्रत्यय एव भवति, तस्मात् सोऽपि निरालम्बनः। **उच्यते।** स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यतीति स्वप्नेऽपि एवमेव सुपरिनिश्चिता आसीत् प्राक् प्रबोधानात्, न तत्र कश्चित् विशेष इति। **न।** स्वप्ने विपर्ययदर्शनात्। अविपर्ययाच्च इतरस्मिन्। तत्सामान्यादितरत्रापि भविष्यति इति चेत्। यदि प्रत्ययत्वात् स्वप्नप्रत्ययस्य मिथ्याभावः, जाग्रत्प्रत्ययस्यापि तथा भवितुमर्हति। अथ प्रतीतिः तथाभावस्य हेतुः, न शक्यते प्रत्ययत्वात् अयमन्य इति वक्तुम् (वदितुं इति बृहतीपाठः)। अन्यतस्तु स्वप्नप्रत्ययस्य मिथ्याभावो विपर्ययादवगतः। कुत इति चेत्, सनिद्रस्य मनसो दौर्बल्यात्, निद्रा मिथ्याभावस्य हेतुः स्वप्नादौ, स्वप्नान्ते च सुषुप्तस्याभाव एव। अचेतयन्नेव हि सुषुप्त इत्युच्यते। तस्मात् जाग्रतः प्रत्ययो न मिथ्येति। ननु जाग्रतोऽपि करणदोषः स्यात्। यदि स्यादवगम्येत। स्वप्नदर्शनकालेऽपि नावगम्यते इति चेत्, तत्र प्रबुद्धो ह्यवगच्छति निद्राऽऽक्रान्तं मे मन आसीदिति। पृ. २८–३०.

बृहती— ' ननु सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः ' कुतः तत्संप्रयुक्तत्वं अतत्संप्रयुक्तत्वं वा, येन विशेषेण प्रत्यक्षाप्रत्यक्षयोर्विशेष उपलभ्येत । पृ. ५३.

ऋजु— यदि परमार्थतः अर्थः स्यात् तदा संप्रयोगजं प्रत्यक्षं इति शक्यते वक्तुम् । सर्वप्रत्ययानां तु निरालम्बनत्वे पारमार्थिकाभावे नेदं सिध्यति इति प्रत्यक्षलक्षणाक्षेपेण संगतिरित्यर्थः ।

बृहती— कथं पुनः सर्व एव निरालम्बनः प्रत्ययः ? ' प्रत्ययस्य हि निरालम्बनता स्वभावः उपलक्षितः स्वप्ने ' । ननु च शुक्तिकायां रजतज्ञानम्, स्मरामीति प्रमोषात् स्मृतिज्ञानमुक्तम् । युक्तं रजतादिषु । तत्र हि शुक्तिकायां यत् भास्वरं रूपं चक्षुषा परिच्छिन्नम्, तत् रजतस्मृतेरुद्बोधकं इत्युपपद्येतापि । स्वप्नादिषु पुनः कस्यचित् अग्रहणात् अर्थान्तरे स्मृत्युद्बोधपरिहारः शक्य इव प्रतिभाति । तस्मात् वासनानिबन्धनमेवेदं ज्ञानजालं इति प्रतिपद्यामहे । सदृशदर्शनात् सदृशे अर्थान्तरे स्मृतेरुद्बोधः । स्वप्ने पुनः कस्यचिदग्रहणादित्युक्तम् । तस्मात् वासनैव निमित्तं इति लघ्वी कल्पना, नार्थान्तराश्रयणम्, अव्याप्तेः । अतः कुडयादिष्वपि ज्ञानं वासनानिमित्तमेव, न कुडयाद्यर्थनिमित्तं इति स्थितिः । **उच्यते** । कार्यसिद्ध्यर्थं हि कारणं कल्प्यते, न पुनः कार्यविनाशाय । स्वप्नादिषु बहिरवभासा संवित्, सा च बाह्यार्थमन्तरेण न संभवति । येन च विना यन्न संभवति तत् तस्य कारणम् । तस्मात् अर्थ एव कारणं इति युक्तं कल्पयितुम् । निरालम्बनता तु नैव संवेद्यते प्रत्यक्षावबोधेन । तस्मात् अक्षजं ज्ञानं न वासनानिमित्तं इत्युक्तम् । ननु स्वप्नोपलब्धं मिथ्या इति प्रतिबुद्धस्य ज्ञानमुत्पद्यते । न च मिथ्याभावस्य कारणकल्पना युक्ता । **ननु** च अकारणस्य मिथ्याप्रत्ययस्यापि उत्पादो न घटते । **सत्यं** न घटते, न तु अगत्यनुगुणं तत् । तदानुगुण्ये हि मिथ्याज्ञानतैव न स्यात् । (यद्यपि ज्ञानोत्पादाय कारणं कल्पनीयं तथापि अर्थ एव न कल्प्यः, किन्तु वासनामात्रम्) तस्मात् व्यामोहहेतवो मिथ्याप्रत्ययाः । व्यामोहनिबन्धनाश्च सांसारिक्यो वासनाः । अतो वासनानिबन्धनमेवेदं ज्ञानजालं इति तत्त्वविद्भिरुदितम् । (व्यामोहः अर्थशून्यत्वं मिथ्याप्रत्ययस्य हेतुः । वासनातो व्यामोहः, व्यामोहात् वासना इति अनादित्वात् बीजाङ्कुरवत् अदोषः) (सिद्धान्तमुपक्रमते–) ननु परिहृतमेतत् ' स्मरामीति ज्ञानशून्यानि स्मृतिज्ञानान्येतानि । ननु च स्मृतेः उद्बोधकारणाभावात् नैतत् संभवति इत्युक्तम् । तदसिद्धम् । स्वप्नादावपि हि चिन्ताऽदृष्टादिसंभवात् । स्वप्नेऽपि हि सुखदुःखमनुभूयते । सुखदुःखहेतुश्च अदृष्टम् । अतः अदृष्टहेतुकमेव स्वप्नादिज्ञानम्, किञ्चिच्चिन्तादिहेतुकं इत्युपपन्नं शुक्तिकादिज्ञानतुल्यत्वं स्वप्नविज्ञानस्य । तदिदमुक्तम् (यदिदमस्माभिरुच्यते अग्रहणात्मकः प्रमोषो मिथ्यात्वहेतुरिति तदेव भाष्यकारेणोक्तम्) ' स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यति ' । कथमनेन इदमुक्तम् ? (इत्थमुक्तं) निश्चितं अवच्छिन्नमित्यर्थः । कथं अवच्छिन्नोऽर्थः अनवच्छिन्नो भवति ? (ननु अग्रहणान्मिथ्यात्वे सर्वज्ञानानि मिथ्या स्युः, सर्वात्मना अर्थस्य केनचित् ज्ञानेन अग्रहणात् इति पृच्छति–) कथं तर्हि प्रबुद्धो मिथ्येति जानाति ? (उत्तरं) उक्तम्, स्मरामीति स्मृतिप्रमोषात् (स्मृतित्वापरामर्शात्) प्रत्यक्षसंमितं तत् । प्रतिबुद्धस्य च अपैति प्रत्यक्षाभिमानः (इन्द्रियदौर्बल्ये निश्चिते प्रत्यक्षानुपपत्तेः स्मृतित्वनिश्चयः) । अमुमेवार्थं (अग्रहणात्मको भ्रम इति) स्पष्टीकरोति– ' अथ प्रतीतिस्तथाभावस्य हेतुः, न शक्यते प्रत्ययादयमन्य इति वदितुम् ' । ' यदि प्रत्ययत्वात् ' इति च । नावगतिं मिथ्येति मन्यते । ' अन्यतो हि स्वप्नज्ञानस्य मिथ्याभावः ' इति प्रमोषनिमित्ततां दर्शयति । कुतः ? इन्द्रियदौर्बल्योपन्यासात् ' निद्राक्रान्तं मे मनः ' इत्यादिना । दौर्बल्यं च कार्याक्षमत्वम्, न कार्यान्तरोत्पत्तिसमर्थत्वं इत्युक्तम् । (पृ. ५३–५७)

श्लोवा-- (उत्तरग्रन्थस्य प्रयोजनमाह) ' प्रमाणत्वाप्रमाणत्वे, पुण्यपापादि, तत्फलम् । विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥ १ ॥ सर्वेषु लक्षणेष्वेवं स्वप्रमाणगणैः स्थितिः । वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥ २ ॥ कर्मभ्यः फल-

संबन्धः पारलौक्यैहलौकिके । सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु ॥ ३ ॥ तस्माद्धर्मार्थिभिः पूर्वं प्रमाणैर्लोकसंमतैः । अर्थस्य सदसद्भावे यत्नः कार्यः क्रियां प्रति ॥' ४ ॥

रत्नाकरः— यदि सर्वा बुद्धयो बाह्यार्थशून्याः स्वांशपर्यवसायिन्यो भवेयुः, ततो योऽयं (व्यवहारः), चोदना धर्मे प्रमाणम्, अन्यदप्रमाणम्, तत्संयोगजं प्रत्यक्षम्, अतत्संयोगजमाभासम्, ज्योतिष्टोमादि पुण्यम्, ब्रह्महत्यादि पापम्, तदुभयविलक्षणं अभ्युदयप्रत्यवायात्मकं तेषां फलम्, विधेरर्थः प्रवर्तनम्, अर्थवादस्य प्ररोचनमर्थः, मन्त्राणामनुष्ठेयप्रकाशनम्, नामधेयानां गुणफलविधानार्थत्वविचारः, आदिशब्दोपात्तश्च स्मृत्याचारप्रामाण्याप्रामाण्यविचारः, तथा शब्दान्तरश्रुतिलिङ्गश्रुत्यर्थादिभिः कर्मभेदशेषत्वक्रमनियमाः, वचनव्यक्तिभेदेन वाक्यार्थचिन्ता, कर्माणि कानिचित् आमुष्मिकस्वर्गफलकानि, कानिचित् अनियतफलानि, कानिचित् ऐहिकवृष्ट्यादिफलानि इत्यादिः व्यवहारः स सर्वः चोदनादीनामभावात् अयुक्तः स्यात् । अतः अवश्यं धर्मार्थिभिः पुरुषैः सुगताशीविषोपसृष्टमाहायानिकविषचिकित्सया बाह्यार्थसद्भावे लोकसंमतप्रमाणादौ बाधनेन यत्नः कर्तव्यः । क्रियां प्रति अनुष्ठानसिद्ध्यर्थमित्यर्थः । पृ. २१७–२१८.

श्लोवा— 'स्वप्नादिभोगवच्चापि योपभोगत्वकल्पना । तन्निवृत्त्यर्थमेवेह परमार्थे प्रयत्यते ॥ ११ ॥ नहि स्वप्नसुखाद्यर्थं धर्मे कश्चित् प्रवर्तते । यादृच्छिकत्वात् स्वप्नस्य तूष्णीमास्येत पण्डितैः ॥ १२ ॥ परमार्थफलावाप्तिमिच्छद्भिस्तेन यत्नतः । प्रतिपत्तिर्विधातव्या युक्तिभिर्बाह्यवस्तुषु ॥ १३ ॥ तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः । तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः ॥१४॥ तत्र बाह्यार्थशून्यत्वं तुल्यं तावद् द्वयोरपि । निवृत्त्याऽस्य, ततो ज्ञाने तद्वत् संवृतिकल्पना ॥१५॥ तस्मात् साधारणत्वेन तन्मूलत्वेन चाप्ययम् । बाह्यार्थसदसद्भावे यत्नो भाष्यकृता कृतः ॥'१६॥ ज्ञानापह्नववादिनोऽपि प्रथमं अर्थमपह्नुत्य निर्विषयज्ञानानुपपत्तेः ज्ञानमपह्नवते । तेन अर्थापह्नवः द्वयसाधारणत्वात् ज्ञानापह्नवस्य च तन्मूलस्य तन्निराकरणेनैव निराकरणसिद्धेः तदेव निराक्रियते इति । **रत्नाकरः**. निरालम्बनवादः पृ. २१७–२२१.

* **निरालम्बनवादे** बाह्यो विषयोऽपि नास्ति संविद्गता नीलाद्याकारा अपि न सन्ति । **बाल**. पृ. ६.

* **निरालम्बनवादनिरासेन** बाह्यार्थसद्भावः औत्पत्तिकसूत्रे एव भाष्ये उक्तः । **बाल**. पृ. ६.

* **निरालम्बनवादिनः** सर्वाणि बाह्यघटादिविषयकाणि सविकल्पकज्ञानानि मिथ्यार्थविषयकाणि बाह्यार्थविषयकज्ञानत्वात् स्वप्नप्रत्ययवत् । स्वप्नज्ञानानां हि बाह्यघटाद्याकारेण परिणतं ज्ञानमेव विषयः, न घटादि, तदानीमभावात्, मनःप्रत्यासत्त्यभावात्, स्वशिरश्छेदनादीनामसंभवाच्च । अतस्तत्र ज्ञानरूपात्मैव विषयः । एवं सर्वज्ञानानां इति दृष्टान्तेन न किञ्चिदपि ज्ञानं प्रमा इत्याहुः । **तन्न** । स्वप्नप्रत्ययानां आत्मविषयकत्वासिद्ध्या दृष्टान्तासिद्धेः । किञ्च 'नीलोऽयम्' इत्यादिसविकल्पकानां आत्मविषयकत्वे 'नीलोऽहम्' इत्याकारत्वापत्तिः । अत इदं बाह्यविषयकम् । बाधकाभावेन च प्रमैव । **मणि**. पृ. २३–२४.

* **निरिष्टकम्** । इष्टान्निर्गताः निरिष्टाः, कुत्सिता निरिष्टाः निरिष्टकाः । पुनःप्रयोगानर्हा इत्यर्थः । **वि**. ११।३।१२ । नितरामिष्टमनेन इति निरिष्टं निरिष्टमेव निरिष्टकम्, एकस्मिन् कर्मणि उपयुक्तमित्यर्थः । निरिष्टकानामपि ऋत्विजां देशस्य च पुनरुपादानं शिष्टा न निवर्तयन्ति । **सोम**. * **निरिष्टकेन पुनःक्रियां शिष्टा नाचरन्ति** । निरिष्टकेन शिष्टा यागं नाचरन्ति । **भा**. ११।३।१२।३३.

* **निरिष्टकोपदेशः** । निष्क्रान्तं इष्टं इच्छा विनियोगाकाङ्क्षा यस्मात् तत् निरिष्टकम् । उपयुक्तमिति यावत् । एकत्रोपयुक्तस्य अन्यत्रोपयोगविधिः निरिष्टकोपदेशः । **कु**. ४।२।१४।२९.

* **निरुक्तं वेदाङ्गम्** । पौरुषेयमपि अविच्छिन्नपारंपर्येणानुवर्तनात् वेदमूलकत्वाच्च प्रमाणम् । **वि**. १।३।७.
* निरुक्तं वेदार्थाधिगमोपायः । वा. १।२।४।४ पृ. १५६,
* **निरुक्तेन** तावत् लोकव्यवहारप्रसिद्धान्येव पदानि

तद्गतक्रियानिमित्तशब्दप्रयोगभाक्त्वेन निरुच्यन्ते । १।३।५।१० पृ. २२८. * **निरुक्तस्य** लोकमूलपदार्थज्ञानं प्रयोजनम् । सु. पृ. १२९. * निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः कल्पयितव्यः यथा ‘ सृण्येव जंर्भरी ’ इत्यादौ । भा. १।२।४।४१.

⧗ निरुप्ते स्यात्, तत्संयोगात् । ६।५।३।१२ ॥

चन्द्राभ्युदितेष्टिः, हविषि निरुप्ते स्यात् हविर्निर्वापानन्तरं चद्रोदये सति स्यात् । तत्संयोगात् । ‘ यस्य हविर्निरुप्तं पुरस्तात् चन्द्रमा अभ्युदेति ’ इति निर्वापसंयोगेन इष्टेरुक्तत्वात् इति पूर्वः पक्षः ।

प्रवृत्ते वा, प्रापणान्निमित्तस्य । १३ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन निरस्यन् सिद्धान्तमाह । अकाले कर्मणि प्रवृत्ते एव चन्द्रोदये सति इष्टिरेषा स्यात् । निमित्तस्य चन्द्रोदयस्य प्रापणात् प्राप्तत्वात् । चन्द्रोदयो हि निमित्तम् । तच्चेत् निर्वापात् प्राक् जातम्, तदा निमित्तसत्त्वात् नैमित्तिकं कर्तव्यमेव ।

लक्षणमात्रमितरत् । १४ ॥

यदि निर्वापात् प्रागपि प्रवृत्तमात्रे दर्शकर्मणि चन्द्रोदये सति अभ्युदयेष्टिः स्यात् तदा ‘ यस्य हविर्निरुप्तम् ’ इति निर्वापसंयोगः किमर्थमिति चेत्, आह सिद्धान्ती । इतरत् निरुप्तमिति पदम्, लक्षणमात्रं कर्मारम्भस्य । कर्मारम्भं लक्षयति निरुप्तमिति पदम् । कर्मारम्भश्च निर्वापात् प्रागेव भवति ।

तथा चान्यार्थदर्शनम् । १५ ॥

तथाच निर्वापात् प्रागपि प्रवृत्तमात्रे दर्शकर्मणि चन्द्रोदये सति अभ्युदितेष्टिः स्यात् इत्यत्र अन्यार्थदर्शनं भवति ‘ स यदि अगृहीतं हविरभ्युदियात् तदा एषैव व्रतचर्या ’ इति । तस्मात् प्रवृत्तमात्रे कर्मणि चन्द्रोदये सति अभ्युदितेष्टिः इति सिद्धान्तः । अगृहीतं हविः अभिलक्ष्य स चन्द्रः यदि उदियात्, तदा निर्वापोत्तरं या व्रतचर्या उक्ता, एषैव कर्तव्या इति श्रुत्यर्थः । **के.**

* **निरूढानि** नाम पदानि सांविज्ञायिकानि इत्युच्यन्ते, तेषां चिन्ता तद्व्यपदेशाधिकरणे । **के.**

* **निरूढादयः** पशवः सोमात् प्रागपि कर्तव्याः । **रत्न.** ५।४।८।२५.

⧗ निरूढादिष्वपि शालामुखीयो भवति ॥

वरुणप्रघासेषु प्राजहितादेव उत्तरवेदेः प्रणयनवत् निरूढपशावपि संभवान्न शालामुखीयो भवेत् । इति प्राप्ते, प्रकृतौ शालामुखीये सौमिकस्य कस्यापि कार्यस्याभावात् पाशुककार्यार्थमेव तदुपादानेन पश्वङ्गत्वाच्चोदकलब्धः शालामुखीयो निरूढादिष्वपि स्यादेव । **संकर्ष.** ३।२।२२.

* **निरूढपशुः** अग्नीषोमीयस्य विकारः । सत्याषाढसूत्रे तु वैपरीत्यं स्वीकृतम् । **के.** * **निरूढपशौ** असत्यपि दीक्षिते दण्डसंपादनस्य दण्डदानं प्रयोजकम् । तस्मात् मैत्रावरुणसंस्कारार्थं दण्डदानमर्थकर्म । **वि.** ४।२।६.

* **निरूढपश्वादौ** दीक्षासोमक्रयाभावेऽपि दण्डदानानुष्ठानं तस्य प्रैषानुवचनप्रयुक्तत्वात् नानुपपन्नम् । **भाट्ट.** ४।२।६. * **निरूढपश्वादिषु** आग्नीषोमीयादिविकारेषु (वेदिः) कर्तव्या । **वा.** ३।७।४।९.

⧗ निरूढपशुबन्धे होतृमैत्रावरुणयोर्द्वयोर्वरणम् ॥

‘ द्वितीयमस्याश्रावयति द्वौ ह्यत्र होतारौ होता च मैत्रावरुणश्च ’ इति दैक्षेऽहन्येव श्रुतं उक्तन्यायेन द्वयोरेवेदं वरणान्तरं सोमधर्मः । इति प्राप्ते, द्वावित्यनेन तृतीयहोत्रभावस्य हेतुकरणात् अत्रेतिपदेन योग्यतया निरूढपशुबन्धः एवोच्यते इति तत्र अस्योत्कर्षः । **संकर्ष.** ३।४।१३.

* **निरूढा लक्षणा** निरूढशक्तितुल्ययोगक्षेमत्वात् न मुख्यार्थे तात्पर्यानुपपत्तिप्रतिसंधानमपेक्षते । **कु.** ३।१।६।१२ पृ. २५७. * **‘निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।’** इह केषुचिदर्थेषु अभिधानवदेव लक्षणाशक्तिरपि अनादिकालप्रवृत्तत्वेन (प्रवृत्तिकत्वेन इति कुतूहले पृ. २५७ पाठः) निरूढाः यथा शुक्लादिषु । **वा.** ३।१।६।१२ पृ. ६८३.

* **निरूढलक्षणया** अनिरूढलक्षणा बाध्यते, उदाहरणं मृग्यम् । **बाल.** पृ. १४३.

* **निर्गुणं** पुनर्वचनं परिसंख्यापकं भवति । **भा.** ११।२।१२।५१.

* **निर्णेजकधौतगर्दभारूढवस्त्रपरिधानं** अनाचारः उदीच्यानां दाक्षिणात्यानां च । **वा.** १।२।३।७ पृ. २०४.

* **कम्बलनिर्णेजनवत्** एतद्भविष्यति । निर्णेजनं हि उभयं करोति कम्बलशुद्धिं पादयोश्च निर्मलताम् । **भा.** २।२।११।२५ पृ. ५४५.

* **निर्दिष्टस्य** हि प्रतिनिर्देशकं सर्वनाम । सर्वनामप्रातिपदिकस्य निर्दिष्टप्रतिनिर्देशकत्वशक्तिः । **टुप्.** १२।१।१।१.

* **निर्देशः** दर्शपूर्णमासयोः चतुर्धाकृतस्याग्नेयपुरोडाशस्य ‘इदं ब्रह्मणः’ इत्यादिना क्रियते । कृष्णलेषु तु ब्रह्मण एव सर्वस्य समर्पणीयत्वान्न निर्देशः कर्तव्यः, विभागोऽपि तत्र नास्त्येवेति । **के.** १०।२।७।२२.

* ‘आसीना जपति’ इति स्त्रीलिङ्गपदसमभिव्याहारेण ‘**निर्देशादन्यः**’ **इतिन्यायेन** बाधितः अध्वर्युकर्तृकत्वोत्सर्गः, तादृक्पदाभावात् गर्गरस्य बिलं विष्यति इत्यत्र अनुवर्तते । **वैजयन्ती.** १।७।२५.

⧗ निर्देशात्तु विकल्पे यत् प्रवृत्तम् । ६।३।१२।२८ ॥

अग्नीषोमीये पशौ खादिरः पालाशो रौहितकश्च यूपो विकल्पेन श्रुतः । खदिरगुणकश्च प्रयोगः आरब्धः । तत्र च खदिरो विनष्टः । एवं सति खदिरस्य प्रतिनिधिर्ग्राह्यः । स च खदिरसदृश एव अन्वेष्टव्यः । विकल्पे सति यत् प्रवृत्तम्, यमुदिश्य प्रयोगः प्रवृत्तः तत्सदृश एव प्रतिनिधिरुपादेयः, न तु वैकल्पिकं द्रव्यं प्रतिनिधिर्भवति । निर्देशात् मुख्यद्रव्यवाचकशब्देन मुख्यसदृशस्यापि कतिपयावयवानुवृत्तिद्वारा निर्दिष्टत्वात् निर्देशसंभवात् । वैकल्पिकस्य तु न तथा निर्देशः शक्यः । तस्मात् खदिरापचारे कदरः नाम श्वेतखदिरः, व्रीह्यपचारे नीवाराश्च ग्राह्याः । इति सिद्धान्तः ।

अशब्दमिति चेत् । २९ ॥

पूर्वपक्षी यदि ब्रूयात् अशब्दं खदिरसदृशं शब्दवत्त्वात्तु वैकल्पिकमेव ग्राह्यं इति । नास्ति प्रतिपादकः शब्दो यस्य तत् अशब्दं इति बहुव्रीहिः । इति चेत् ।

नानङ्गत्वात् । ३० ॥

यत् पूर्वपक्षिणा उक्तम्, तन्न । अनङ्गत्वात् खदिरसंकल्पयुक्ते प्रयोगे वैकल्पिकस्य पलाशादेः अङ्गत्वाभावात् न तस्य ग्राह्यता । किन्तु खदिरसदृश एव कदरो ग्राह्यः । सदृशस्य साक्षात् मुख्यशब्दावाच्यत्वेऽपि गौण्या वृत्त्या मुख्यसदृशः मुख्यशब्देन बोध्यते एव । तस्मात् प्रतिनिधिः मुख्यसदृश एव, न वैकल्पिकं द्रव्यम् । **के.**

⧗ निर्देशात्तु विकृतावपूर्वस्यानधिकारः । ३।८।१६।३२ ॥

अग्नीषोमीये पशौ ‘बर्हिषा यूपावटमवस्तृणाति’ इति ‘आज्येन यूपमनक्ति’ इति च श्रुतम् । तत्र यूपावटस्तरणबर्हिषि बर्हिर्धर्माः यूपाञ्जनाज्ये च आज्यधर्माः कर्तव्याः इति पूर्वपक्षे उत्सूत्रे प्राप्ते सिद्धान्तयति । तुशब्देन पूर्वपक्षव्यावृत्तिः । निर्देशात् विकृतौ प्राकृतकार्यमुखेनैव धर्माणां अतिदेशात् विकृतौ अग्नीषोमीये पशौ अपूर्वस्य अप्राकृतस्य यूपावटस्तरणबर्हिषः यूपाञ्जनाज्यस्य च यः संस्कारः, तस्य अनधिकारः, न अधिकारः, नानुवृत्तिः, नातिदेशः । तथा चात्र लौकिकं असंस्कृतमेव बर्हिः आज्यं च ग्राह्यं इति सिद्धान्तः । **के.**

* निर्देशात्तु विकृतौ (३।८।१६।३२) **इत्यधिकरणन्यायस्य स्वरूपम्** ‘क्लृप्तोपकारकाङ्गसंभवे कल्पनागौरवापादकाक्लृप्तोपकारकाङ्गानां नाकाङ्क्षा’ इति । **सु.** पृ. ६३४, * निर्देशात्तु विकृतौ इत्यत्र बर्हिराज्याधिकरणस्य (१।४।७) प्रयोजनं स्पष्टीकरिष्यते । पृ. ४६५, * निर्देशात्तु विकृतौ इत्यत्र ‘बर्हिषा यूपावटमवस्तृणाति’ इति अप्राकृतयूपावटस्तरणाख्यकार्यार्थबर्हिरर्थत्वं प्राकृतानां बर्हिर्धर्माणां अस्ति नास्तीति चिन्तायाः प्राकृतवैकृताङ्गप्राप्तिपौर्वापर्यचिन्ताधीनत्वात् धर्मसाधारण्यशास्त्रातिदेशयोश्च सप्तमदशमाद्ये निषेत्स्यमानत्वेन तदभिप्रायपूर्वपक्षायोगात्, प्रत्यक्षत्वेन प्राग्वैकृताङ्गप्राप्तेः पश्चादतिदिश्यमानेन ‘बर्हिर्लुनाति’ इत्यादिशास्त्रेण सर्वप्राकृतवैकृतबर्हिरनुवादेन लवनादिधर्मविधिसंभवात् यूपावटस्तरणबर्हिषोऽपि धर्मवत्ता इति पूर्वपक्षिते क्लृप्तोपकाराङ्गसंभवे कल्पनागौरवापादकाक्लृप्तोपकाराङ्गानाकाङ्क्षणात् विकृतौ प्राकृतानामङ्गानां पूर्वनिर्देशात् नापूर्वस्य वैकृतस्य

यूपावटस्तरणबर्हिष: प्राकृतधर्मविधौ अधिकारः इति सिद्धान्तो वक्ष्यते । तेन प्राकृतानामङ्गानां वैकृतेभ्यः प्राक् प्राप्तिः स्यास्यति । पृ. ६३४.

* **निर्देशाद्वाऽन्यदागमयेत्** (६।४।१।२) इति सिद्धान्तसूत्रे प्रक्षेपात् प्राक् द्व्यवदानस्य नाशदोषापहारेषु पुरोडाशान्तरोत्पादनं वक्ष्यते । **सु.** पृ. १५३३. * निर्देशाद्वाऽन्यदागमयेत् । यदि च निर्वापवेलायामेव यागनिर्वृत्तिर्भवेत्, तथा सति तदुत्तरकालं नाशदोषापहारेषु द्रव्यान्तरं नोपादीयेत, तत्र ‘निर्देशाद्वा०’ इत्यादि विरुध्यते । **वा.** ३।४।१४।४१ पृ. ९८३.

* ‘**निर्देशाद्वा वैदिकानां स्यात्**’ (१२।२।१।३) इत्यत्र **वक्ष्यमाणेन** अग्नीनां लौकिकवैदिकसर्वार्थत्वनिरासन्यायेन द्रढयति । **सु.** ३।७ पृ. ४०. * निर्देशाद्वा वैदिकानां स्यात् । यदि तावत् पुरुषार्था अपि (अग्नयः) इत्यभिप्रायः, स क्रत्वर्थत्वादयुक्तः । तथा द्वादशे वक्ष्यति “ निर्देशाद्वा० ’ इति । **वा.** ३।७।१९।३९ पृ. ११०२ । यदि च लौकिककार्यापेक्षया सर्वार्थत्वमभिधीयते, ततो ‘विहारो०’ (१२।२।१।१) इत्युक्त्वा ‘निर्देशाद्वा०’ (३) इत्यत्र निर्णीतत्वादविचार्यम् । पृ. ११०३.

⌛ निर्देशाच्छेषभक्षोऽन्यैः, प्रधानवत् । ६।४।३।४ ॥

दर्शपूर्णमासयोः शेषस्य यागावशिष्टस्य हविषः भक्षः प्राशित्र–चतुर्धाकरण–शंयुवाककालीनः अन्यैः ऋत्विग्भ्यो भिन्नैः कर्तव्यः । इडाभक्षे एव यजमानपञ्चमानां ऋत्विजाम् ‘यजमानपञ्चमा इडां भक्षयन्ति’ इति निर्देशात् । इतरभक्षेषु ते परिसंख्याताः । तस्मात् अन्यैः भक्षो भक्षयितव्यः । प्रधानवत् यथा द्व्यवदाननाशे अन्यः पुरोडाशः प्रधानार्थः, तथा इडान्यभक्षे ऋत्विग्भ्योऽन्ये स्युः । इति पूर्वः पक्षः ।

सर्वैर्वा, समवायात् स्यात् । ५ ॥

पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन व्यावर्तयन् सिद्धान्तमाह । सर्वैः प्रकृतैरेव ऋत्विग्यजमानैः सर्वो भक्षो भक्षणीयः स्यात्, नान्यैः । समवायात् प्रकृते कर्मणि यजमानपञ्चमानामेव ऋत्विजां समवायात् संबन्धात् । यागासंबद्धानां यागीयभक्षणं न युक्तमिति भावः । सर्वैः इडादिसर्वभक्षैः ऋत्विजः युज्यन्ते इति पूरणीयम् । समवायात् कर्मकरत्वेन संबन्धात् इति सुबोधिनी । सर्वैः इत्यस्य स्थाने सर्वे इति कुतूहले पाठः । सर्वे भक्षणं ऋत्विग्भिरेव कर्तव्यं स्यात् । समवायात् यागे तेषामेव क्लृप्तत्वात् इति तदर्थः ।

निर्देशस्य गुणार्थत्वम् । ६ ॥

‘यजमानपञ्चमा इडां भक्षयन्ति’ इति निर्देशः इडाभिन्नभक्षपरिसंख्यार्थः इति यत् पूर्वपक्षिणा उक्तम्, तत्परिहारार्थं सिद्धान्तसूत्रम् । यजमानरूपो यो यागस्य गुणः तस्य भक्षे प्राप्त्यर्थः निर्देशः, न परिसंख्यार्थः । निर्देशस्य गुणार्थत्वम्, निर्देशो गुणार्थः न परिसंख्यार्थः । गुणार्थत्वात् इति पञ्चम्यन्तः पाठः कुतूहले ।

प्रधाने श्रुतिलक्षणम् । ७ ॥

पूर्वपक्षिणा प्रधानवत् इति दृष्टान्त उक्तः । तद्वैलक्षण्यप्रदर्शनार्थं सिद्धान्तसूत्रम् । प्रधाने यत् द्व्यवदानमात्रं निर्दिश्यते, तत् श्रुतिलक्षणं अनन्यथासिद्धावदानवाक्यप्रमाणकम् । तस्मात् तत् स्यात् परिसंख्यार्थम् । ‘यजमानपञ्चमा इडां भक्षयन्ति’ इति वचनं तु भक्षे यजमानस्य अप्राप्तत्वात् विधानार्थमेव । अतो न तत् परिसंख्यार्थम् ।

अश्ववदिति चेत् । ८ ॥

पूर्वपक्षी शङ्कते । अश्ववत् अश्वमेधवत् । अश्वमेधे बहुत्वात् पशूनां सर्वशेषभक्षणे ऋत्विजो म्रियेरन्, तस्मान्न तत्र सर्वशेषभक्षणम् । तद्वदन्यत्रापि न सर्वशेषभक्षणनियमः इति चेत् पूर्वपक्षी ब्रूयात् । अत्र अर्थवत् इति, पूर्ववत् इति च पाठः । तस्यापि अश्ववत् इत्येवार्थः ।

न, चोदनाविरोधात् । ९ ॥

सिद्धान्ती आह । न अश्वमेधे सर्वं भक्षयिष्यन्ति । तत्र पशूनां बहुत्वात् सर्वभक्षणे ऋत्विजो म्रियेरन् । ततश्च ‘अश्वमेधेन यजेत’ इति चोदनया विरोधः स्यात् । ऋत्विङ्मरणे अश्वमेधसमाप्तेरभावात् । तस्मात् अश्वमेधे सर्वभक्षणाभावो युक्तः । दर्शपूर्णमासयोस्तु तादृशदोषासंभवात् सर्वे शेषभक्षाः ऋत्विग्भिरेव भक्षणीयाः नान्यैः इति सिद्धान्तः । **के.**

* **निर्धनस्याप्यधिकारो** यागे । **के.** ६।१।८। ३९-४०.

⌛ **निर्धनमनोरथन्यायः** । अयं पद्येनोपनिबद्धः । यथा ‘ उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः । हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव ॥ ’ इति । **साहस्री.** ८०५.

* **निर्धयन्तः** निःशेषं पिबन्तः । **के.**

* **निर्धारणं** जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणम् । **रहस्य. पृ.** १५५.

* **निर्मन्थ्यः** अग्निचयनगतेष्टकापाकार्थः मन्थनसाध्यः शास्त्रीयधर्मरहितः लौकिकोऽग्निः । **के.** १।४।९।१२, * निर्मन्थ्यः अग्नीषोमीयपशुगतः सधर्मकः शास्त्रीयसंस्कारसहितोऽग्निः । ७।३।७।१९. * **निर्मन्थ्याः** अग्नयः सोमे चत्वारः । **संकर्ष.** ३।४।१६. * **‘ निर्मन्थ्येन** इष्टकाः पचन्ति ’ इति निर्मन्थ्यशब्दः पङ्कजादिशब्दवत् योगरूढः । अग्निचयने सद्य एव लौकिकमथनेन जातः अचिरनिर्मथितः । तेन इष्टकाः पच्यन्ते । **वि.** १।४।१०. * **निर्मन्थ्ययोः** अग्निचयनगतेष्टकापाकार्थस्य अग्नीषोमीयपशुगतस्य च प्रकृतिविकारभावो नास्ति इति नास्ति धर्मातिदेशः । **के.** ७।३।७।१९.

⌛ **निर्मन्थ्याधिकरणम्** । अग्निचयने पठितः ‘ निर्मन्थ्येनेष्टकाः पचन्ति ’ इति निर्मन्थ्यशब्दो यौगिकः । (निर्मन्थ्यन्यायस्तु एतद्भिन्नार्थकः) ॥

तथा निर्मन्थ्ये । १।४।९।१२ ॥

भाष्यम्— अग्निचयने ‘ निर्मन्थ्येनेष्टकाः पचन्ति ’ इति संस्कृते दर्शनात् संस्कारशब्दो निर्मन्थ्य इति । असंस्कारेऽपि दृश्यते ‘ निर्मन्थ्यं आनय ओदनं पक्ष्यामः ’ इति । निर्मन्थनयोगात् पूर्ववत् यौगिक इति संस्थितम् । प्रयोजनम् , संस्कारनिमित्ते संस्कृतेन इष्टकाः पक्तव्याः । जातिशब्दे यथोपपन्नेन । यौगिके अचिरनिर्मथितेन । यथा ‘ नावनीतेन भुङ्क्ते ’ इति अचिरनिर्दग्धेन इति गम्यते ।

वा—– निर्मन्थ्येऽपि पूर्वाधिकरणवत् जातिसंस्कारनिमित्तपक्षौ उद्धाव्य अनन्तरेण यौगिकत्वं साधनीयम् । ‘ वैद्युताश्माभिघातोत्थ- सूर्यकान्तादिजन्मनाम् । निवृत्तौ चरितार्थः सन् निर्मन्थ्योऽभिनवः कथम् ॥ ’ ‘ लोके कमार्थलक्षणम् ’ (११।१।४।२६) इति अशब्दार्थेनापि व्यवहारात् भवेत् अचिरनिर्दग्धघृतप्रतीतिः । सर्वघृतानां च नवनीतविकारत्वात् पुनःश्रुतेः अचिरनिर्दग्धनवनीतार्थता स्यात् । इह तु शब्दप्रमाणके अन्यक्रियाजनितनिवृत्तिमात्रचरितार्थो निर्मन्थ्यशब्दः चिरविशेषोपादानासमर्थः कथमचिरनिर्मथितविषयः कल्प्यते । नहि अत्र अचिरत्वमपि योगे अन्तर्गतम् , क्रियायोगमात्रनिमित्तत्वात् । तस्मादसदेतत् । नैष दोषः । **‘ पाकेनाग्नेरुपात्तत्वाद् विशेषणपरा श्रुतिः । तच्च पाकाङ्गभूतत्वात् तद्देशादौ करिष्यते ॥ ’** यथैव लोहितोष्णीषादिविधिषु विशेष्याणां प्राप्तत्वात् विशेषणपरत्वम् , एवमिहापि विशेष्यानुवादेन विशेषणभूता क्रियैव पाकाङ्गत्वेन विधीयते । अङ्गानां च प्रधानेन एकदेशकालकर्तृकत्वं वक्ष्यते (११।२।१) । तेन अचिरनिर्मथितेन अदूरनिर्मथितेन अनन्यकर्तृनिर्मथितेन इति वक्तव्ये प्रदर्शनार्थमचिरग्रहणम् ।

सोम— सूत्रे प्रोक्षणीष्विव इति तथाशब्दार्थः ।

वि—– ‘ रूढिर्योगो योगरूढिर्वा निर्मन्थ्यस्य वर्तनम् । आद्यौ पूर्वव, दन्त्योऽचिरजातेर्नावनीतवत् ॥ ’

भाट्ट—– ‘ निर्मन्थ्येनेष्टकाः पचन्ति ’ इत्यत्र निर्मन्थ्यशब्दस्य पूर्ववत् संस्कारवाचित्वे ‘ निर्मन्थ्यमानय पक्ष्यामः ’ इति लौकिकप्रयोगेण निरस्ते , मथनकर्मत्वस्य पाकसाधनीभूताग्नौ अभावेन मथनप्रयोज्यत्वस्य पाकनवनीतादावपि सत्त्वेन अतिप्रसङ्गात् अरणिप्रयोज्याग्नित्वव्याप्यजातिवाचित्वे **प्राप्ते** , मथनप्रयोज्यत्वयोगेनैव उपपत्तौ रूढिकल्पने प्रमाणाभावात् अतिप्रसङ्गस्य पाकादावपि प्राचीनप्रयोगाभावेनैव अबोधकत्वोपपत्तेः निराकर्तुं शक्यत्वात् नवनीते वाच्यत्वस्यापि वक्तुं शक्यत्वाच्च यौगिक एव निर्मन्थ्यशब्दः । एवं च ‘ निर्मन्थ्येनेष्टकाः पचन्ति ’ इति अग्नेः पाकसामर्थ्यादेव प्राप्तत्वात् मथनमात्रविधिः इति तस्यापि प्रयोगमध्ये करणं सिद्धान्ते प्रयोजनम् ।

मण्डन— ‘ निर्मन्थ्ये योगनियमः । ’

शंकर–– 'निर्मन्थ्यमपि तद्वत् स्यात् ।' पदं यौगिकम् । १०.

⧗ **निर्मन्थ्यादिषु चैवम् । ७।३।७।१९॥**
अग्नीषोमीये पशौ धर्मवान् निर्मन्थ्योऽग्निराम्नातः । अग्निचयने 'निर्मन्थ्येनेष्टकाः पचन्ति' इत्याम्नातम् । तथा दर्शपूर्णमासयोः बर्हिः आज्यं च सधर्मकमाम्नातम्, पशौ च 'बर्हिषा यूपावटमवस्तृणाति' इति 'आज्येन यूपमनक्ति' इति च विहितम् । तत्र अधिकरणातिदेशमाह । यथा वैष्णवशब्दे न धर्मातिदेशकता, एवं निर्मन्थ्यादिषु निर्मन्थ्य–बर्हिराज्यशब्देष्वपि न धर्मातिदेशकता । अग्निचयनगतनिर्मन्थ्यशब्दः पशुगतनिर्मन्थ्यधर्मान् न गृह्णाति । पशुगतौ बर्हिराज्यशब्दौ दर्शपूर्णमासगतबर्हिराज्यधर्मान् न गृह्णीतः । ततश्च निर्मन्थ्यबर्हिराज्यशब्दाः न धर्मातिदेशका इति सिद्धान्तः । चकारः पूर्वसिद्धान्तसादृश्यबोधकः । **के.**

⧗ **निर्मन्थ्यन्यायः ।** अग्निचयनादिप्रकरणस्था निर्मन्थ्यादिशब्दाः अग्नीषोमीयादिगतनिर्मन्थ्यादिधर्माणां न ग्राहकाः ।

निर्मन्थ्यादिषु चैवम् । ७।३।७।१९॥

भाष्यम्— पशौ अग्नीषोमीये धर्मवान् निर्मन्थ्योऽग्निराम्नातः 'साध्या वै देवाः' इत्यारभ्य । अग्नौ श्रूयते 'निर्मन्थ्येनेष्टकाः पचन्ति' इति । तथा दर्शपूर्णमासयोः बर्हिराज्ये धर्मवती, पशौ श्रूयते 'बर्हिषा यूपावटमवस्तृणाति' इति, 'आज्येन यूपमनक्ति' इति । तत्र संदेहः किं निर्मन्थ्यादयः शब्दाः धर्माणां ग्राहकाः, नेति । तत्र अधिकरणातिदेशः क्रियते । निर्मन्थ्यादिषु चैवं यथा वैष्णवशब्दे । अत्रापि अयं यौगिको निर्मन्थ्यशब्दः सद्यो निर्मथितमग्निमाह । तथा बर्हिः आज्यं इति द्रव्यशब्दौ । ते त्रयोऽपि स्वार्थं विधाय कृतार्था भवन्ति, धर्मान् ग्रहीतुं न शक्नुवन्ति । तस्मात् न ग्राहकाः ।

सोम–– पूर्वन्यायातिदेशात् **संगतिः ।** पशौ 'अग्नेर्जनित्रमसि इत्यभिमन्थनशकलं निदधाति' इत्यादिना निर्मन्थ्यस्य धर्मा आम्नाताः । तथा दर्शपूर्णमासयोः आज्यस्य उत्पवनादयः बर्हिषश्च लवनादयो धर्मा आम्नाताः । तृतीये (३।८।१६) 'बर्हिषा यूपावटमवस्तृणाति' इत्यत्र बर्हिर्धर्मा लवनादयः पशौ चोदकप्राप्ताः अङ्गप्रधानसाधारणा अपि अप्राकृतकार्यत्वान्न भवन्ति इत्युक्तम् । इह तु बर्हिःशब्दस्य आतिदेशकत्वाभावात् । धर्मा न भवन्ति इत्युच्यते इति विवेकः ।

वि— 'निर्मन्थ्येनेष्टकापाके बर्हिषाऽवटसंस्कृतौ । अतिदेशो न वा, ऽऽद्योऽस्तु धर्मार्थे, तन्न पूर्ववत् ॥' पूर्वाधिकरणोक्तवैष्णवशब्दवत् नातिदेशः ।

भाट्ट— अग्नौ 'निर्मन्थ्येनेष्टकाः पचन्ति' इति । पशौ 'बर्हिषा यूपावटमवस्तृणाति' 'आज्येन पशुमनक्ति' इति च श्रुतम् । ततः पूर्ववदेव निर्मन्थ्यशब्दो मन्थनक्रियाविधायकत्वेन गौणत्वायोगात् न पाशुकानां मथनधर्माणां अतिदेशार्थः । बर्हिराज्यशब्दौ च द्रव्यविधित्वात् न दार्शपूर्णमासिकबर्हिराज्यधर्मातिदेशार्थौ । **न च** त्रिकपालस्य नामातिदेशेन धर्मप्राप्त्यभावेऽपि ऐष्टिकधर्मातिदेशेन निराकाङ्क्षत्वात् न गौणत्वाङ्गीकारः, प्रकृते तु धर्माकाङ्क्षयैव गौणत्वाङ्गीकारात् नामातिदेशोपपत्तिः इति **वाच्यम्** । लोकतोऽपि मथनादिधर्मलाभेन श्रुत्यर्थत्यागे प्रमाणाभावात् । ६.

मण्डन— 'निर्मन्थ्यशब्दोऽप्यतिदेशको न ।'

शंकर–– निर्मन्थ्ये नातिदेशः स्यात् ।'

* **निर्मन्थ्यशब्दः** अग्निचयनगतः पशुगतः पशुगतनिर्मन्थ्यधर्मान् न गृह्णाति । **के.** ७।३।७।१९.

* **निर्युक्तिकप्रवादस्य** हेयत्वात् । **मणि.** पृ. १२.

* **निर्वपणं** प्रोक्षणं अवहननं इत्येवमादयः औषधधर्माः । **भा.** ३।१।४।७. * **निर्वपणे** प्रयोजनं हविष्याणामावापनम् । **भा.** ११।४।१४।४४.

* **निर्वपणादयः** व्रीहीणामेव धर्माः, उत्पवनादयः आज्यस्यैव, दोहनादयः सांनाय्यस्यैव इति धर्माणां व्यवस्था । **के.** ३।१।४।७–१०.

⧗ **निर्वपणलवनस्तरणाऽऽज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् । ११।४।१४।४७ ॥**
दर्शपूर्णमासयोः 'चतुरो मुष्टीन्निर्वपति' इति निर्वपणे 'देवस्य त्वा' इति मन्त्रः, दर्भाणां लवने छेदने 'बर्हिर्देवसदनं दामि' इति मन्त्रः, वेद्यां बर्हिषः स्तरणे 'ऊर्णाम्रदसं त्वा' इति मन्त्रः, आज्यग्रहणे 'धाम-

नामासि’ इति मन्त्रः, तस्य किं सकृत्प्रयोगः, उत आवृत्तिः इति विचारे पूर्वपक्षमाह । निर्वपणं निर्वापः, लवनं दर्भाणां छेदनम्, स्तरणम्, आज्यग्रहणं च तेषु एकद्रव्यवत् व्रीहिष्विव मन्त्रस्य सकृत् प्रयोगः स्यात् । प्रयोजनैकत्वात् फलस्य एकत्वात् । निर्वपणे हविष्याणां व्रीहीणां शूर्पे आवापनं फलम् । लवने वेदिस्तरणयोग्यस्य बर्हिषः संपादनम् । स्तरणे वेद्याच्छादनम् । आज्यग्रहणे यागयोग्यस्य आज्यस्योपादानम् । एवं फलैकत्वात् मन्त्रस्य सकृत्प्रयोगः स्यात् इति ।

द्रव्यान्तरवद् वा स्यात् तत्संस्कारात् । ४८ ॥

सिद्धान्तमाह । द्रव्यान्तरवत् नानाबीजवत् स्यात् । प्रतिमुष्टि प्रतिलवनं प्रत्यास्तरणं प्रत्याज्यग्रहणं च तत्संस्कारात् तत्तत्संस्कारार्थं मन्त्रस्य आवृत्तिः स्यात् इति । **के.**

* **निर्वपणशब्देन** ऐष्टिको विध्यन्तो नियम्यते ‘सौर्यं चरुं निर्वपेत्’ इत्यत्र । **भा.** १०।३।१४।५६.

* **निर्वपतिचोदना** इष्टिलक्षणभूता । **वि.** १०।२।१५.

* **निर्वपतिवदेव** प्रकृतिलिङ्गसादृश्येन प्राकृतपरिव्याणातिदेशसिद्ध्यर्थं अस्मिन् (सवनीययूपस्य) परिव्याणे त्रिवृत्त्वानुवादः । **भाट्ट.** ४।४।९.

* **निर्वपतिशब्दः** श्रूयमाणो दर्शपूर्णमासविध्यन्तं नियमयति पुनःश्रवणात् । **टुप्.** १०।७।९।२५. * **निर्वपतिशब्देन** दार्शपौर्णमासिकविध्यन्तसंयोगिना लिङ्गेन तदीयो विध्यन्तः प्रसज्यते ‘सौर्यं चरुं निर्वपति’ इत्यत्र । **भा.** ८।१।२।२.

* **निर्वापः** अग्नीषोमीयपुराडाशस्य पूर्वं कार्यः पश्चात् उपांशुयाजाज्यनिर्वापः, पौर्णमास्यां पाठक्रमस्य मुख्यक्रमात् बलीयस्त्वात् । **के.** ५।१।८।१५, * निर्वापः अध्वरकल्पायां पूर्वं बार्हस्पत्यस्य चरोर्धर्माः, ततः सारस्वतस्याज्यस्य औपदेशिकमुख्यक्रमापेक्षया आतिदेशिकपाठक्रमस्य बलवत्त्वात् ।५।१।१०।१७–१८. * निर्वापः अध्वरकल्पायां प्रथमं आग्नावैष्णवस्य ततो बार्हस्पत्यचरोः, वैकृतमुख्यक्रमानुरोधात् । **भाट्ट.** ५।१।१०, * निर्वापः अवशिष्टः तूष्णीं कर्तव्यः अर्धनिरुप्ते चन्द्राभ्युदये सति । **भा.** ६।५।५।१८–२०, * निर्वापः गार्हपत्यात् पश्चिमे देशे अग्निष्ठे नाम शकटे प्रकृतौ । ज्योतिष्टोमेऽपि ऐष्टिको निर्वापः तत्रैव कर्तव्यः, न हविर्धानशकटयोः । **वि.** १२।१।७. * निर्वापः चतुःसंख्याविशिष्ट एकः पदार्थः । **के.** ५।२।३।४. * निर्वापः दर्शपूर्णमासयोः चतुर्भिर्मुष्टिभिर्भवति ‘चतुरो मुष्टीन् निर्वपति’ इति विधेः वाजपेये सप्तदशशरावे चरौ तु चतुर्भिः कुडवैः शरावपूरणं कार्यम् । वस्तुतस्तु शरावैरेव साक्षात् सप्तदशभिर्निर्वापः कर्तव्यस्तथैव श्रवणात् । **के.** १०।२।२८।६५–६८. * निर्वापः पशुपुरोडाशस्य सवनीयपुरोडाशानां सौम्यचरोश्च हविर्धानशकटाभ्यां भिन्ने शकटे, न तु हविर्धानशकटयोरन्यतरस्मिन् । **भा.** १२।१।७।१४–१६, * निर्वापः प्रातःकालिकस्य यागत्रयस्य अध्वरकल्पायाम् ‘पुरा वाचः प्रवदितोर्निर्वपेत्’ । **के.** ११।२।४।१९, * निर्वापः वैकृतीभ्य एव देवताभ्यः अभ्युदितेष्टौ दर्शप्रवृत्त्युत्तरं निर्वापात् प्रागपि चन्द्राभ्युदये । **भा.** ६।५।४।१६–१७, * निर्वापः संनिपत्योपकारी । ११।४।१४।४५, * **निर्वापं** उदयनीयसंबन्धिनं प्रति प्रायणीयनिष्कासो गुणभूतः । निष्कासे निर्वापः । ज्योतिष्टोमे । ११।२।१६।६७–६९. * **निर्वापेण** अग्निहोत्रहवणी बाध्यते पवमानेष्टिषु । अत्र अङ्गं प्रधानेन बाध्यते । **बाल.** पृ. १३२. * **निर्वापात्** प्रागपि दर्शप्रवृत्त्युत्तरं चन्द्रोदये अभ्युदितेष्ट्यनुष्ठानम् । **भा.** ६।५।३।१२, * **निर्वापस्य** चतुर्मुष्टिसमुदायेनानुसमयः । ५।२।३।४–५, * निर्वापस्य देशः, ‘अपरेण गार्हपत्यं प्रागीषं अनः अवस्थितं भवति, तस्य दक्षिणचक्रमारुह्य अनसोऽधि निर्वपति’ इति । १२।१।७।१५. * निर्वापस्य न बाधः पवमानेष्टिषु अग्निहोत्रहवण्यभावेऽपि । गुणलोपन्यायः । **के.** १०।२।२७।६४, * **निर्वापयोः** आग्नेयाग्नीषोमीययोः पदार्थानुसमयः दर्शपूर्णमासयोः । ५।२।२।४–५, * **निर्वापे** अंशतः कृते ततश्चन्द्रोदयज्ञाने, शेषनिर्वापः तूष्णीमेव कर्तव्यो न प्राकृतीभ्यो देवताभ्यो नापि वैकृतीभ्यः । ६।५।५।१८–२०, * निर्वापे ‘अग्नीषोमाभ्याम्’ इत्यत्र ‘देवस्य त्वा०’ इत्यादेः ‘जुष्टं निर्वपामि’ इत्यस्य च अग्निमन्त्रस्थपूर्वोत्तरभागयोरनुषङ्गः कर्तव्यः, तेन मन्त्रवाक्यपूरणं भवति । २।१।१६।४८. * निर्वापे

चतुर्मुष्टिसमुदायः एकः पदार्थः इति समुदायानुसमयः । **भा.** ५।२।३।४–५. * निर्वापे दर्शपूर्णमासादौ 'चतुरो मुष्टीन् निर्वपति' तत्र प्रतिमुष्टि 'अग्नये जुष्टं निर्वपामि' इति मन्त्रावृत्तिः । **के.** ११।४।१४।४४.

⧗ निर्वापे मुष्टिपरिमाणं अध्वर्योरेव ॥

निर्वापे चतुर्मुष्टिपरिमाणस्यापि अनियमेन यस्यकस्यचित् मुष्टौ **प्राप्ते**, अस्माद्राशेर्मुष्टिमादत्स्वेति प्रेरितस्य चैत्रादेः स्वमुष्टिपरिमितस्यैव आदानदर्शनात् अध्वर्योरेव मुष्टिः । **संकर्ष.** १।४।११.

* निर्वापे वाजपेये नैवारस्य सप्तदशशरावस्य चरोर्निर्वापे चतुःसंख्यानुग्रहः मुष्टिलोपश्च कर्तव्यः (कुडवादिभिश्चतुर्भिः शरावं पूरयित्वा निर्वापः एवं सप्तदशवारम्) । **के.** १०।२।२८।६४–६७.

* **निर्वापानुष्ठानं** आधाने पवमानेष्टिषु अग्निहोत्रहवणीलोपेऽपि केनचित् पात्रेण । **भा.** १०।२।२७।६३.

* **निर्वापावघातादयः** पुरोडाशधर्माः । **वि.**५।१।८.

* **निर्वापादिधर्माः** चित्रायागे चतुर्थपञ्चमयोर्हविषोः सारस्वतयोर्मध्ये सरस्वत्याः प्रथमं ततः सरस्वतः, 'प्र णो देवी' इति स्त्रीदेवताया याज्याऽनुवाक्ययोः प्रथमं हौत्रकाण्डे पाठात् । 'पीपिवांसं सरस्वतः' इति पुंदेवतायाः पश्चात् पाठात् । **वि.** ५।१।७. * **निर्वापादिधर्माणां** व्यवस्थितविषयता । सा च दृष्टार्थेषु प्रत्यक्षेण अदृष्टार्थेषु तु श्रुत्या । उत्पवनादयः आज्यस्यैव धर्माः न व्रीहिधर्माः, अवघातादयो व्रीहीणामेव धर्माः नाज्यस्येति । **के.** ३।१।४।७–१०.

* **निर्वापालम्भन्यायः** । आलम्भनिर्वापन्यायः द्रष्टव्यः । यदि विशेषणमिष्यते ततो दार्शपौर्णमासिकनिर्वापालम्भन्यायेन कर्तव्यतावचनेन लिङ्गेन विशेष्टव्यम् । तद्धि अकर्माङ्गभूतेभ्यो दाशतयेभ्यः (मन्त्रेभ्यः) निवृत्तम्, अत एव विशेषणम् । ('आग्नेय्या आग्नीध्रमुपतिष्ठते' इत्यादौ । **वा.** ३।२।८।२१ पृ. ७७५.

* **निर्वापोत्तरं** अध्वर्युणा प्रचरणीहोमादयः अग्नीत्प्रैषात् प्राकृतनाः सौमिकाः पदार्थाः आदौ न कर्तव्याः, किन्तु आदौ ऐष्टिकाः प्रोक्षणादयः अलंकरणात् प्राकृतनाः कर्तव्याः, ततः सौमिकाः । **के.** ५।१।१३।२५–२६.

* **निर्वापकाले** 'अग्नये दास्ये' इति यजमानस्य मन्त्रोच्चारणं तु देवतोद्देशेन त्यक्ष्यमाणत्वसंकल्पनात् यथेष्टविनियोज्यत्वलक्षण–स्वत्वनिवृत्तिरूपत्यागात्मकयागार्थम् । **सुधातात्पर्यम्.** पृ. १५३४.

⧗ **निर्वापन्यायः** । निर्वापमन्त्रन्यायः । दर्शपूर्णमासयोः निर्वाप– बर्हिर्लवन– वेदिस्तरण– आज्यग्रहणेषु प्रतिनिर्वापादि तत्तन्मन्त्रस्यावृत्तिः ॥

निर्वपणलवनस्तरणाऽऽज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् । ११।४।१४।४७॥

भाष्यम्— दर्शपूर्णमासयोः, चतुरो मुष्टीन्निर्वपति इति । तस्य मन्त्रः 'देवस्य त्वा' इति । तत्रैव च दर्भाणां लवनमन्त्रः 'बर्हिर्देवसदनं दामि' इति । तथा स्तरणमन्त्रः 'ऊर्णाम्रदसं त्वा स्तृणामि' इति । आज्यग्रहणमन्त्रः, 'धामनामासि' इति । तेषु **संदेहः** किं मन्त्रस्य सकृत्प्रयोगः, अथवा प्रतिमुष्टि प्रतिदानं प्रतिधातु प्रतिग्रहणं च आवृत्तिरिति । किं प्राप्तम् ? निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् । निर्वपणादिषु एकद्रव्यवत् स्यात्, सकृत्प्रयोग इत्यर्थः । कुतः ? प्रयोजनैकत्वात् । तत्रतत्र एकं प्रयोजनम् । निर्वपणे तावत् हविष्याणां आवापनम् । लवने वेदिस्तरणयोग्यस्य बर्हिष उपसादनम्, स्तरणे वेद्याच्छादनम् । आज्यग्रहणे यागयोग्यस्य आज्यस्योपादानम् । यावता प्रयोजनं तत् चिकीर्षितम्, तदर्थो मन्त्र इत्युक्तम् ।

द्रव्यान्तरवद्वा स्यात्, तत्संस्कारात् । ४८ ॥

भाष्यम्— द्रव्यान्तरवत् वा स्यात्, नैकद्रव्यवत् । भेदः स्यादित्यर्थः । कुतः ? तत्संस्कारात् । ये व्रीहयः एकेन मुष्टिना निरुप्तास्ते संस्कृताः । संनिपत्योपकारित्वात् निर्वापस्य । द्वितीयो मुष्टिरपि अन्यान् व्रीहीन् संस्करोति । तत्र यदि मन्त्रो न प्रयुज्येत, मन्त्रकृतेन संस्कारेण तेषां वर्जनं स्यात् । एवं सर्वत्र । तस्मात्तत्रतत्र मन्त्रस्यावृत्तिः ।

सोम— पूर्वस्य प्रत्युदाहरणमात्रत्वेन पूर्वतरशेषत्वात् तेन संगतिः । **सूत्रार्थस्तु**— निर्वपणादिषु एकद्रव्यकावघातवत् सकृत् प्रयोगः स्यात् चतुर्मुष्टिनिर्वापादेः एकप्रयोजनतया युगपत् चिकीर्षितत्वात् इति ।

वि— 'निर्वापादिषु तन्मन्त्राः सकृद् भेदेन वा–, ऽग्रिमः । द्रव्यकर्मैक्यतो, मैवं संस्कारस्य पृथक्त्वतः ॥'

भाट्ट— दर्शपूर्णमासयोश्चतुर्मुष्टिपरिमितस्य विहितनिर्वापस्य 'देवस्य त्वा' इत्यादिर्मन्त्रः । तथा 'अयुङ्गायुङ्गान् मुष्टीन् लुनाति' इति विहितस्य लवनस्य 'बर्हिर्देवसदनं दामि' इति । तथा 'त्रिधातु पञ्चधातु वा वेदिं स्तृणाति' इति विहितस्य स्तरणस्य 'ऊणाम्रदसं त्वा स्तृणामि' इति । 'चतुर्जुह्वां गृह्णाति' इति विहितस्य आज्यग्रहणस्य 'शुक्रं त्वा शुक्रायाम्' इति मन्त्रः समाम्नातः । ते किं प्रतिमुष्ट्यादि निर्वापाद्यावृत्तौ आवर्तन्ते, न वा इति **चिन्तायाम्**, न तावदत्र निर्वापादिभेदः संख्यायाः मुष्ट्यादिवृत्तित्वेन प्रतीतेः, अभ्यासमात्रं तु निर्वापादेः । अतश्च अवघातमन्त्रवदनावृत्तिः । **इति प्राप्ते**, युक्तमवघाते संस्कार्यद्रव्यस्यैकत्वात् ते एव हि व्रीहयः प्रतिप्रहारमवहन्यन्ते, अतस्तत्र सकृदेव युक्तो मन्त्रः । प्रकृते तु संस्कार्यद्रव्यभेदात् सत्यपि निर्वापादिकर्मैक्ये प्रत्यभ्यासं मन्त्रभेदः । न च निर्वपणलवनाज्यग्रहणादिषु संस्कार्यभेदेऽपि स्तरणस्य द्वितीयया वेदिसंस्कारार्थत्वात् बर्हिर्धातूनां च तत्र गुणभूतत्वेन कथं संस्कार्यभेदः ? **शतपथब्राह्मणे** 'बर्हिः स्तृणाति' इति विधौ बर्हिषोऽपि स्तरणसंस्कार्यत्वावगतेः । बर्हिषः 'बर्हिषि हवींष्यासादयति' इति वचनेन हविरासादने उपयुक्तत्वाच्च । यत्तु 'वेद्यां हवींष्यासादयति' इति वचनम्, तत् वेदेरपि परंपरया हविराधारत्वात् नानुपपन्नम् । न च वेदिबर्हिषोर्विकल्पाशङ्का, 'वेदिरसि बर्हिषे त्वा स्वाहा' इति मन्त्रवर्णेन वेदेः बर्हिरर्थत्वस्य अवगमेन विकल्पापादकसाक्षादाधारताविधायकत्वानुपपत्तेः । अत एव त्रिधातु पञ्चधातु वा इत्यत्र बर्हिष एव संस्कार्यता । वेदिमिति सप्तम्यर्थे । अस्तु वा संयोगपृथक्त्वात् स्तरणस्य बर्हिःसंस्कारकत्ववत् वेदिसंस्कारकत्वमपि, वेदिबर्हिषोश्च परस्परसंस्कारे परस्परगुणत्वस्यापि सत्त्वात्, विकल्पासंभवेन 'वेद्यां हवींष्यासादयति' इत्यस्य परंपरासंबन्धानुवादकत्वम् । वेदेर्गुणत्वाच्च 'वेदिरसि' इति मन्त्रवर्णस्योपपत्तिः । संस्कार्यत्वाच्च 'योषा वै वेदिः तामनग्नां करोति' इति स्तरणार्थवादस्यापि उपपत्तिः । सर्वथा बर्हिषोऽपि संस्कार्यत्वादस्ति स्तरणेऽपि संस्कार्यभेदः । न च प्रत्यभ्यासं संस्कार्यभेदेऽपि सकृत्पठितमन्त्रजन्यस्मृतेरविच्छेदात् अवघातमन्त्रवत् अनावृत्त्यापत्तिः । उक्तमन्त्रेषु सर्वत्र युष्मच्छब्दसंबुद्ध्यादिश्रवणेन लिङ्गात्तादृशप्रणाड्या अपूर्वसाधनीभूतयुष्मदर्थविषयनिर्वापादि–प्रकाशनार्थत्वेन मन्त्रविध्यवगतेः, तादृशस्मृत्या युष्मदर्थाविषयीभूतनिर्वापादिविषयसंस्काराजननात् । अतस्तत्र मन्त्रावृत्तिरेव । एवं च स्तरणे बर्हिषो गुणत्वेऽपि मन्त्रस्य विशेषणीभूतयुष्मदर्थभूतधातुप्रकाशनार्थत्वेन विनियोगात् मन्त्रावृत्तिरित्यपि शक्यं वक्तुम् ।

मण्डन— 'निर्वापादौ पृथङ्मन्त्रः ।' १५.

शंकर— 'प्रतिमुष्टि स निर्वापे ।' स मन्त्रः । १५.

* त्वापदनिर्देशस्य आत्मन एव कण्डूजनितचित्तविक्षेपनिवृत्तिद्वारा संस्कार्यत्वात् तस्य चैकत्वेन **निर्वापन्यायानुपपत्तेः । भाट्ट. ११।४।१६.**

* **निर्वापबर्हिर्लवन**वेदिस्तरणाज्यग्रहणेषु प्रतिनिर्वापादि तत्तन्मन्त्रस्यावृत्तिः दर्शपूर्णमासयोः । **के.** ११।४।१४।४४.

* **निर्वापमन्त्रे** 'अग्नये जुष्टम्' इत्यत्र सौर्यादिविकृतौ 'सूर्याय जुष्टम्' 'इन्द्राग्निभ्यां जुष्टम्' इत्याद्यूहः कर्तव्यः, कर्मसमवेतदेवतावाचकत्वात् । **वि.** ९।१।१३. * निर्वापमन्त्रे ऐन्द्राग्नैकादशकपाले ऐन्द्राग्नपदस्योहः । **के.** ९।३।१।१–८, * निर्वापमन्त्रे चित्रेष्टिगते तद्देवतापदोहः । ९।३।१।१–८, * निर्वापमन्त्रे 'देवस्य त्वा' इत्यादौ ऐन्द्राग्नादिविकृतावपि सवितृ–अश्वि–पूषशब्देषु नोहः किंतु तत्र अविकृत एव मन्त्रः । ९।१।१२।३६–३७, * निर्वापमन्त्रे सांग्रहणीष्टौ विश्वदेवपदोहः । ९।३।१।१–८.

* **निर्वापमन्त्रार्थः** । देवस्य सवितुः प्रसवे– देवेन सवित्रा यजमानेन प्रसूते उदिते वा सवितरि । अश्विनोर्बाहुभ्यां परिक्रयमभिप्रेत्य यजमानयोर्दंपत्योर्बाहुभ्याम् । अश्विनौ हि तौ अग्न्याधेये अश्वदानेन, अशितवन्तौ वा तद्यज्ञफलमश्नुवाते । तद्बाहू इति स्वौ बाहू व्यपदिशति । देवताध्वर्य्वोर्वा अश्विनोः एतौ बाहू इति । पूषणं तु यजमानमेव मन्यते पुष्णातेः । **भा.** ९।१।११।३७. * निर्वापमन्त्रार्थः । 'निर्वापेण अग्नये सेवनार्हं यथा भवति तथा तान् करोमि' इति । **सु. पृ. १५२६.**

* **निर्वापमन्त्रन्यायः** । निर्वापन्यायः द्रष्टव्यः । **के.** ११।४।१४. * यदा तु एककाले एव एकानेकाङ्गविषयं कण्डूयनम्, तदा स्मृत्यविच्छेदात् (मन्त्रस्य) अनावृत्तिः । न च तदाऽपि त्वापदयुक्तत्वात् **निर्वापमन्त्रन्यायेन** (११।४।१४।४७–४८) तत्तदङ्गभेदेन आवृत्तिः, अङ्गानामुपयुक्तत्वाभावेन असंस्कार्यत्वात् त्वापदेन तन्निर्देशानुपपत्तेः । **भाट्ट.** ११।४।१६.

⌛ **निर्वापमन्त्रस्थोऽग्निशब्दः समवेतवचनो विकृतौ ऊहितव्यः ॥** इदमधिकरणं 'ऊहः अग्निशब्दस्य विकृतौ निर्वापमन्त्रे' (**मीको.** भागः ३ पृ.१२२५–२६) इत्यत्र द्रष्टव्यम् ।

* **निर्वापवेलायां** 'एतस्यै दास्यामि' इत्येतावन्मात्रं संकल्प्य त्यागः केवलः क्रियते न यागः । **वा.** ३।४।१४। ४१ पृ. ९८३.

* **निर्विकल्पकं** ज्ञानम् । प्रकारताविशेष्यताऽऽदिविषयतारहितं ज्ञानं निर्विकल्पकम् । तत् विशेषणविशेष्यभावानापन्नघटघटत्वादिविषयकम् । इन्द्रियसंयोगानन्तरं अविविक्तसामान्यव्यक्तिभागस्य व्यक्तिमात्रगोचरज्ञानस्य जायमानत्वात् । " तच्च प्रत्यक्षम्' 'किञ्चिद्भासते' इति प्रतीतेः, 'अश्वोऽप्ययं न तथा पूर्वं प्रतीतः' इति प्रतीतेश्च " इति **केचित्** । विशिष्टज्ञानरूपसविकल्पकस्य विशेषणज्ञानं विना उत्पत्त्यसंभवात् अनुमानगम्यं इत्यन्ये । विशेष्यविशेषणेन्द्रियसंनिकर्षस्य विशिष्टज्ञानहेतुतया विशेषणज्ञानस्य विशिष्टज्ञाने न हेतुत्वं इति **केचित्** । तत् सिद्धं घटत्वनीलपीतादिनानाधर्मविषयकं निर्विकल्पकम् । **मणि.** पृ. २०–२१. * **निर्विकल्पकेन** यत् स्वलक्षणं बाह्यार्थरूपं प्रतीयते, तत् विकल्पप्रत्ययस्य परिच्छेद्यं न भवति । आलम्बनं तु भवति इति बौद्धाः । **ऋजु.** पृ. ४०. * **निर्विकल्पकस्य** भ्रमप्रमोभयबहिर्भूतत्वमेव आकरे व्यक्तम् । अस्तु वा तस्यापि प्रमात्वम् । **मणि.** पृ. ११.

⌛ **निर्विमर्शा हि भीरवः इति न्यायः ।** भीरवः भयशीलाः पुमांसो निर्विमर्शाः निर्विचाराः भवन्ति परिणाममविचार्य कार्यं कुर्वन्ति इति भावः । **साहस्री.** ७३०.

⌛ नहि सामान्यशास्त्रस्य विशेषविषयत्वमिदानीं कल्प्यम् '**निर्विशेषं न सामान्यम्**' इति **न्यायेन** विशेषविषयत्वस्यापि क्लृप्तत्वात् । **सोम.** १।३।२ पृ. २३.

* **निर्व्यापारस्य** कर्मत्वायोगात् । **सु.** पृ. ५५७, * निर्व्यापारस्य प्रयोज्यत्वायोगात् । पृ. ५६२.

* **निलीयते:** दर्शनाभावानुकूलक्रिया अर्थः । **मणि.** पृ. १४०.

* **निवर्तना** निषेधः प्रतिषेधः इत्येकोऽर्थः । तत्र नञो निवर्तनायां शक्तिरुक्ता तद्भूताधिकरणवार्तिके 'विधायकैरसंयुक्तो नहि नञ् प्रतिषेधकः ।' पृ. ३०८ । 'विधिना युज्यते यत्र न हन्यात् न पिबेदिति । ३१४ । तत्राभावार्थता नैव स्वयं पुंसो रुणद्धि हि । ३१५ ।' इति । अत्र नञो निवर्तनायां शक्तिरुक्ता । नञ्टीकायां तु (न सुरां पिबेत् इति नञ्विवरणपरे वार्तिके १।३।३।७ पृ. २१२–२१३) 'प्रतिषेधविधिपरो हि विधायकः' इत्यादौ 'प्रत्ययावृत्तिलक्षणवाक्यभेदप्रसङ्गः' इत्यन्ते ग्रन्थे (वा. पृ. २१२।८–१०) विधायकपदेन लिङ एव प्रतिषेधार्थता इत्यपि पक्ष उक्तः । **बाल.** पृ. ७८.

* **निवर्तनात्वं** प्राचां मते निवृत्तिजनकव्यापारत्वादिरूपं भिन्नं बोध्यम् । **रहस्य.** पृ. १७.

⌛ **निवातस्थितदीपन्यायः** । यथा निवातस्थले स्थापितो दीपो निश्चलो भवति, तथा शमप्राप्तं चित्तमपि निश्चलं भवतीत्यर्थः । उक्तं च वादसुधायाम्– 'निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत्' इति । श्रीमद्भगवद्गीतायामपि 'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥' इति (भगी. ६।१९) । **साहस्री.** ६३७.

* **निवारणारूपा** शब्दभावना 'प्रतिषेधाख्यशब्दभावनानिरूपणम्' इति बिन्दौ द्रष्टव्या । **के.**

⌛ **निविदामनवानत्वं वाचनिकमेव, न संतानः ॥** सामिधेन्युत्तरं पठ्यमानानां निविदामपि अग्निसमिन्धनार्थत्वात् संतानविधिः प्रवृत्त्या कार्यापत्त्या च तत्रापि प्रवर्तते । सामिधेनीनां स्वरूपे सन्तानस्यानर्थक्यात् अग्निसमिन्धनद्वारा दार्शिकापूर्वसाधनत्वस्य उद्देश्यताऽव-

च्छेदकत्वाच्च । अत एव 'द्वयं वा इदं सर्वं छन्दस्कृतं चाछन्दस्कृतं च तेन सर्वेणाग्निं स्तावानि' इति श्रुत्या ऋचामनृचां चैकधर्मावच्छिन्नत्वं बोध्यते । तेन यवेषु प्रोक्षणमिव निवित्स्वपि संतानः स्यात् । इति प्राप्ते, ऋमैकनियामिकायाः प्रवृत्तेः इह अप्रवृत्तेः एकप्रकरणे कार्यापत्त्यभावात् 'सामिधेनीभिरिष्ट्वा निविद्भिरुपस्तुत्य' इति कार्यभेदश्रवणात्, स्तुत्यर्थत्वे वा शूरत्वचित्रत्वादिगुणभेदेन रथंतरबृहतोरिव स्तुतिवैलक्षण्येन द्वारभेदात्, 'तासां सप्तपदानि समस्यावस्येत् अश चत्वार्यथ चत्वारि' इत्येवं प्रतिनियतनिर्देशेन धर्मभेदविधानाच्च न निविदां संतानः । **संकर्ष. ४।२।४.**

* निविदां सामिधेन्युत्तरं पठ्यमानानां संतानो न कार्यः । **संकर्ष. ४।२।४.**

* निवीतं आचार्यातिथ्यादिमनुष्यविषये कर्मणि । **के. ३।४।१.**

⧗ निवीतमिति मनुष्यधर्मः, शब्दस्य तत्प्रधानत्वात् ।३।४।१।१॥

'निवीतं मनुष्याणाम्' इति दर्शपूर्णमासप्रकरणगतं वाक्यम् । 'निवीतं इति' निवीतं मनुष्याणां इति मनुष्यधर्मः स्यात् । शब्दस्य उक्तवाक्यस्य तत्प्रधानत्वात् मनुष्यप्रधानत्वात् । सूत्रयज्ञोपवीतात्मकस्य वा वस्त्रात्मकस्य वा निवीतं कण्ठलम्बिततया धारणं मनुष्याणां कर्मणि उपकारकं विधीयते । इति पूर्वः पक्षः ।

अपदेशो वा,ऽर्थस्य विद्यमानत्वात् । २ ॥

'निवीतं मनुष्याणाम्' इति मनुष्यधर्मत्वेन विधिः इति पूर्वपक्षं सूत्रेण प्राप्तं वाशब्देन व्यावर्तयन् सिद्धान्तमाह । अपदेशः ज्ञायमानस्य वचनमिदं अनुवादः, न विधिः । अर्थस्य मनुष्याणां कर्मसु निवीतस्य विद्यमानत्वात् लोकसिद्धत्वात् ।

विधिस्त्वपूर्ववत्त्वात् स्यात् । ३॥

'निवीतं मनुष्याणाम्' इत्ययं नार्थवादः किन्तु विधिः । अपूर्ववत्त्वात् यत् नियमेन निव्यातव्यमिति नियमो विधीयते । अनुवादः पूर्ववान् भवति, अयं तु न पूर्ववान् । पूर्वं निवीतं न विहितम् । अपूर्ववत्त्वात् विधिः स्यात् इति पुनः पूर्वपक्षः ।

स प्रायात् कर्मधर्मः स्यात् । ४ ॥

'निवीतं मनुष्यधर्मः' अयं विधिर्भवतु, परन्तु न मनुष्यधर्मः, किन्तु कर्मधर्मः स्यात् । प्रायात् । प्रकृत्यैव कर्मप्रायेषु धर्मेषु उच्यमानेषु एतदभिधीयते । तस्मात् विधिः सन् कर्मधर्मः दर्शपूर्णमासधर्मः इति अन्यः पक्षः ।

वाक्यशेषात् । ५ ॥

'निवीतं मनुष्यधर्मः' इत्यस्य वाक्यशेषः आध्वर्यवं इति समाख्या । तस्मात् कर्मधर्मत्वेऽपि अध्वर्युणा निवीतं कर्तव्यम् । आध्वर्यवं इति वाक्यशेषात् । इति अपरः पक्षः ।

तत्प्रकरणे यत्, तत्संयुक्तमविप्रतिषेधात् । ६ ॥

तत्प्रकरणे तयोः दर्शपूर्णमासयोः प्रकरणे यत् मनुष्यधर्मत्वेन संभवति अन्वाहार्यकर्मादि, तत्संयुक्तं तेन कर्मणा संयुक्तं निवीतं स्यात् । एवं प्रकरणेन वाक्येन च अविप्रतिषेधात् प्रतिषेधाभावात् उपपन्नम् । इति अन्यः पक्षः ।

तत्प्रधाने वा, तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् । ७ ॥

'निवीतं मनुष्याणाम्' इति न प्रकरणे निविशते, किन्तु तत्प्रधाने मनुष्यप्रधाने कर्मणि निवीतं स्यात् । तुल्यवत् । वतिः स्वार्थे । तुल्यं प्रसंख्यानात् आम्नानात् । 'उपवीतं देवानाम्' इति दैवे कर्मणि प्रकृते दर्शपूर्णमासयोः उपवीतं विदधाति, 'प्राचीनावीतं पितृणाम्' इति पितृप्रधाने कर्मणि प्राचीनावीतं विदधाति, 'निवीतं मनुष्याणाम्' इत्यपि मनुष्यप्रधाने आतिथ्यादौ कर्मणि निवीतं विधास्यति । इतरस्य मनुष्यग्रहणस्य तदर्थत्वात् निवीतसंबन्धार्थत्वात् तेनैव सह एकवाक्यता भविष्यति न प्रकृतेन । तस्मात् प्रकरणं बाधित्वा आतिथ्ये निविशते निवीतम् । 'इतरस्य निवीतवाक्यस्य अतिथिपूजादिरूपमनुष्यप्रधानकर्मार्थत्वं पूर्ववाक्यद्वयवत्' इति कुतूहलम् । 'इतरस्य प्राचीनावीतस्य उपवीतस्य च तदर्थत्वात् पितृदेवत्यदेवदेवत्यकर्मार्थत्वात् निवीतस्यापि मनुष्यदेवत्यकर्मार्थत्वं इति **कस्तूरिरङ्गाचार्याः** । इतरस्य मनुष्याणामिति षष्ठ्यन्तस्य तदर्थत्वात् प्रकरणादिनिरपेक्षमानुष-

कर्मप्रधानार्थत्वात् इति **सुबोधिनी** ।

अर्थवादो वा, प्रकरणात् । ८ ॥

वाशब्दः ' निवीतं मनुष्याणाम् ' इत्यत्र विधिपक्षं व्यावर्तयति । निवीतवाक्यम् ' उपव्ययते ' इत्यस्य विधेः अर्थवादः । प्रकरणात् दार्शपूर्णमासिकोपव्यानविध्यर्थवादत्वे सत्येव प्रकरणानुग्रहात् । अप्रकरणात् इति वा छेदः । अप्रकरणं बुद्धौ अपरिवृत्तिः । आतिथ्यादिकर्मणः अत्र श्रुत्यादिप्रमाणषट्कासंस्पर्शेन बुद्धौ अनारोहात् इत्यर्थः ।

विधिना चैकवाक्यत्वात् । ९ ॥

' निवीतं मनुष्याणाम् ' इति न विधिः । ' उपव्ययते देवलक्ष्ममेव तत् कुरुते ' इत्यनेन विधिना एकवाक्यत्वात् । निवीतं अयोग्यं देवकर्मणि, मनुष्याणां हि तत् । प्राचीनावीतं पितॄणाम्, न देवानां कर्मणि । उपवीतं देवकर्मणि योग्यम्, तस्मात् उपव्यातव्यम् । इति उपवीतस्तुत्यर्थः निवीतप्राचीनावीतयोरनुवादः । तस्मात् निवीतवाक्यं उपवीतविधेरर्थवादः इति सिद्धान्तः । **के.**

* निवीतं केचित् गलवेणिकाबन्धं स्मरन्ति केचित् पुनः परिकरबन्धम् । तत्र गलवेणिकाबन्धो युद्धादन्यत्र न प्राप्नोति, परिकरबन्धस्तु सर्वकर्मसु अव्यग्रताकरत्वात् प्राप्तः । **वा.** ३।४।१।२. * ' निवीतं मनुष्याणाम् ' इत्यत्र प्रतीयमानं निवीतं वासोविषयम्, न तु त्रिवृत्सूत्रविषयम् । वस्त्रस्य च निवीतं सौकर्याय प्राप्तम् । **वि.** ३।४।१, * ' निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानाम् ' इदं निवीतं प्राचीनावीतं च उपवीतार्थवादः न तु उत्कृष्य विधिः । ३।४।१, * निवीतं श्येने ऋत्विजां सर्वेषां विहितम् ' निवीता ऋत्विजः प्रचरन्ति ' । १०।४।१. * निवीतं हि मनुष्याः प्रायशः स्वार्थं कुर्वन्ति । **भा.** ३।४।१।२, * ' **निवीता** ऋत्विजः प्रचरन्ति ' इति ऋत्विग्विशेषाभावात्, सर्वेषां च संनिधानात्, सर्वे ऋत्विजो निवीता भवन्ति श्येने । ११।१।३।१६. * **निवीतेन** उपदिष्टेन अतिदिष्टस्य उपवीतस्य समुच्चयः श्येने । **वि.** १०।४।१.

निवीताधिकरणम् । दर्शपूर्णमासप्रकरणे श्रुतं निवीतप्राचीनावीतवाक्यं उपवीतविधेरर्थवादः ॥

निवीतमिति मनुष्यधर्मः, शब्दस्य तत्प्रधानत्वात् । ३।४।१।१॥

भाष्यम्— दर्शपूर्णमासयोराम्नातम् ' निवीतं मनुष्याणाम्, प्राचीनावीतं पितृणाम्, उपवीतं देवानाम्, उपव्ययते देवलक्ष्ममेव तत् कुरुते ' इति । ' निवीतं मनुष्याणाम् ' इत्यत्र संदेहः किमयं विधिः, उतार्थवादः इति । यदा विधिः, तदा किमयं पुरुषधर्मः, उत कर्मधर्मः ? अथ यत् प्रकरणे मनुष्याणाम्, तत्र विधिः, उत मनुष्यप्रधाने कर्मणि निविशते इति । किं प्राप्तम् ? विधिः मनुष्यधर्मश्चेति । यदि विधिः, एवमपूर्वमर्थं विदधत् अर्थवान् भवति, इतरथा अर्थवादमात्रमनर्थकम् । विधिश्चेत् पुरुषधर्मः । ' निवीतं मनुष्याणाम् ' इति पुरुषप्रधानो निर्देशः । कथमवगम्यते ? नात्र मनुष्या विधीयन्ते । मनुष्याणां निवीतं विधीयते । न चाविहितमङ्गं भवति । यदि मनुष्या अपि विधीयेरन्, वाक्यं भिद्येत । तस्मान्निवीतं मनुष्याणामुपकारकम् । ननु प्रकरणात् दर्शपूर्णमासयोरुपकारकम्, प्रकरणाद्धि वाक्यं बलवत्तरम् । अपिच गुणभूतेषु मनुष्येषु कारकसंबन्धस्य विवक्षितत्वात् तृतीया भवेत् । षष्ठी त्वेषा संबन्धलक्षणा । तत्र गुणभूतेषु मनुष्येषु मनुष्यग्रहणं नैव कर्तव्यं स्यात् । मनुष्यैरेव तत् क्रियमाणं क्रियेत । मनुष्यप्रधानपक्षे तु कर्तव्यम् ।

वा—स एव (प्रासङ्गिकानन्तरचिन्ताद्वयेन असंगतिशङ्कानिरासार्थप्रासङ्गिकसमाप्त्या यः प्रकृतो बुद्धिस्थीकृतः सः ' स एव ' इत्युक्तः । शुद्धमनुष्यातिथ्याङ्गत्वपक्षयोर्वा प्रकरणात् उत्कर्षात् पक्षान्तरेषु च अनुत्कर्षात् उत्कर्षानुत्कर्षफलत्वं ' स एव ' इत्यनेनोक्तम्) श्रुत्यादित्रितयस्य प्रकरणेन सह विरोधाविरोधविचारः । तत्र ' निवीतं मनुष्याणाम् ' इत्यत्रैते पक्षा भवन्ति, किमयं शुद्धमनुष्यधर्मः कर्मयुक्तमनुष्यधर्मः अथवा शुद्धकर्मधर्मः, अथवा प्रकरणे यन्मनुष्यप्रधानं कर्म अन्वाहार्यपचनादि, तस्य धर्मः, उताप्रकरणे या मनुष्यपूजाऽऽतिथ्यात्मिका, तस्यां निवेशः इति । यौ तु विध्यर्थवादपक्षौ, तौ शेषलक्षणे अनौपयिकौ प्रमाणलक्षणविषयत्वात् विधिवन्निगदार्थवादमध्ये च निर्णीतत्वादिह नैवोपन्यसनीयौ । यस्तु

भाष्यकारेणोपन्यासः कृतः, स कृत्वाचिन्तान्यायेनेति द्रष्टव्यम् । नहि विधित्वमनभ्युपेत्य मनुष्यधर्मादिपक्ष उपपद्यते इति । विधिरिति कृत्वा प्रथमं प्रस्तुत्य पश्चात् लक्षणानुरूपं विचार्य अन्ते पूर्वावस्थितमेव अर्थवादत्वमुपसंहरिष्यति । परेष्वपि अधिकरणेषु एतद्यथासंभवं योजयितव्यम् । तत्र 'विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम्' इत्यनेनैव तावद्विधिः । अहीनाद्यधिकरणन्यायेन च षष्ठीश्रुत्या मनुष्यधर्मः । तेषां स्वत्वेन तत्प्रतीयते, न मनुष्यास्तदङ्गत्वेन । गुणविभक्तिनिर्देशाभावात् । अर्थादेव च तत्प्राप्तौ सत्यां नैव मनुष्यग्रहणं क्रियेत । कृतं चैतत् । अतोऽपि मनुष्यधर्म इत्यवगच्छामः ।

अपदेशो वाऽर्थस्य विद्यमानत्वात् । २ ॥

भाष्यम्-- अपदेश इति ज्ञायमानस्य वचनम् । स एष न विधिः, अनुवाद एषः । कुतः ? अर्थस्य विद्यमानत्वात् । प्राप्त एवार्थः, यन्निवीतं मनुष्याणाम् । निवीतं हि मनुष्याः प्रायशः स्वार्थे कुर्वन्ति । तस्मादनुवादः ।

वा-- निवीतं केचित् गलवेणिकाबन्धं स्मरन्ति । केचित्पुनः परिकरबन्धम् । तत्र गलवेणिकाबन्धो युद्धादन्यत्र न प्राप्नोति । परिकरबन्धस्तु सर्वकर्मसु अव्यग्रताकरत्वात् प्राप्त इति तदाश्रयणेनानुवादमाह । स तु किंप्रयोजन इत्युत्तरत्र वक्ष्यते ।

विधिस्त्वपूर्ववत्त्वात् स्यात् । ३ ॥

भाष्यम्— विधिरेव भवेत्, तथा प्रयोजनवान् । इतरथा वादमात्रमनर्थकम् । पूर्ववाननुवादो भवति । अयं त्वपूर्वः, यन्नियमेन निव्यातव्यमिति ।

वा--विधिरेवायम् । कुतः ? पूर्ववत्त्वात् हि अनुवादो भवेत् अत्यन्तप्राप्तावित्यर्थः । न चायं अत्यन्तप्राप्तः । तेन विनाऽपि अव्यग्रतायाः शक्यत्वात् । कण्ठबन्धः पुनः प्रायेण अप्राप्त एवेत्यस्ति नियमविधेरवकाशः ।

स प्रायात् कर्मधर्मः स्यात् । ४ ॥

भाष्यम्— यदुक्तं विधिरिति, एतद् गृह्यते । यत्तु मनुष्यधर्म इति, तन्नानुमतम् । क्रतुधर्मोऽयं प्रकरणात् । प्रकृत्यैव हि कर्मप्रायेषु धर्मेषूच्यमानेषु एतदभिधीयते । तस्मात् कर्मधर्मः ।

वा— सति विधित्वे कर्मधर्मप्रायप्रदेशाम्नानात् कथंभावसंस्पर्शात् कर्मधर्मः ।

वाक्यशेषत्वात् । ५ ॥

भाष्यम्-- निवीतं मनुष्याणामित्यस्य वाक्यशेषः समाख्या, आध्वर्यवमिति । यदि दर्शपूर्णमासयोः शेषः ततोऽध्वर्युणा कर्तव्यम् । तत्र समाख्या अनुग्रहीष्यते ।

वा— द्वेधा संभवे तादृशी प्रमाणगतिराश्रयणीया, या प्रमाणान्तरं न बाधते । यजुर्वेदाम्नानाच्च निवीतादेः आध्वर्यवसमाख्योपबद्धं वाक्यम् । तत्र यदि कर्मधर्मोऽयम्, ततः कर्तृविशेषापेक्षायां सत्यां समाख्यया अध्वर्युनियमात् समाख्या अर्थवती भविष्यति । मनुष्यधर्माणां तु न समाख्या नियामिकेति वक्ष्यामः । तत्रासौ बाध्येत । इतरथा अनुग्रहीष्यते । तस्मादपि कर्मधर्मः ।

तत्प्रकरणे यत्, तत्संयुक्तमविप्रतिषेधात् । ६ ॥

भाष्यम्-- उच्यते । प्रकरणात् समाख्यानाच्च कर्मधर्मो विज्ञायते । वाक्यात् मनुष्यधर्मः । तस्मादुत्कर्षमर्हति । नेति ब्रूमः । प्रकरणे एवाभिनिविशमानस्य मनुष्यप्रधानता अवकल्पिष्यते । कथम् ? यत् दर्शपूर्णमासयोर्मनुष्यप्रधानम्, तत्र निवेक्ष्यते अन्वाहार्यकर्मणि । प्रकरणं चैवमनुग्रहीष्यते, वाक्यं च ।

वा-- प्रथमं तावत् मनुष्यधर्मबलीयस्त्वेन कर्मधर्मत्वं निराकरोति । तथाहि सुखं सूचितः पक्षः परिग्रहीष्यते । श्रुत्या हि प्रकरणसमाख्ये बाधित्वा मनुष्यधर्म एव प्राप्नोति । तदुच्यते । सर्वानुग्रहार्थमयं पक्षोऽस्तु । मनुष्याणामिति तत्प्रधानकर्मव्यतिरेकजनिता षष्ठी न निवीतं गृह्णाति । तदपि च प्रकरणात् अन्वाहार्यदानादि प्रतीयते नान्यत् । अत एष वाक्यार्थः 'यदिह मनुष्याणां कर्म, तत्र निव्यातव्यम्' इति ।

तत्प्रधाने वा, तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् । ७ ॥

भाष्यम्— नैतदस्ति, प्रकरणे निवेशः इति । मनुष्यप्रधाने कर्मणि निवीतं स्यादातिथ्ये । कुतः ? तुल्यवत्प्रसंख्यानात् । तुल्यानि चैतानि प्रसंख्यायन्ते । यत्तावत् 'उपवीतं देवानामुपव्ययते' इति, तत् प्रकृतयोर्दर्शपूर्णमासयोरुपवीतं विदधाति । यत्, प्राचीनावीतं

पितॄणामिति, तत्, पितृप्रधाने कर्मणि प्राचीनावीतं विदधाति । यदप्येतत्, निवीतं मनुष्याणामिति, तदपि आतिथ्ये निरपेक्षं विदधाति । **कथं गम्यते** मनुष्यप्रधाने विदधातीति, मनुष्याणामिति षष्ठ्यन्तेन संबन्धात्, मनुष्याणामेव प्राप्नोति, न मनुष्यप्रधाने । **उच्यते** । मनुष्याणां कल्प्यमाने फलं कल्पनीयम् । मनुष्यप्रधाने पुनः षष्ठी भविष्यति, संबन्धश्चैवमवकल्पिष्यते, फलं चैवं न कल्पनीयम् । तदुक्तम्, समेषु वाक्यभेदः स्यादिति । न तु मनुष्यप्रधानेन सह एकवाक्यतां प्राप्तम्, पुनः प्रकृताभ्यां दर्शपूर्णमासाभ्यामेकवाक्यतां यास्यति । नहि द्वौ संबन्धौ एकस्मिन् वाक्ये विधीयेते । भिद्येत हि तथा वाक्यम् । इतरस्य मनुष्यग्रहणस्य निवीतसंबन्धार्थत्वात् तेनैव सहैकवाक्यता भविष्यति प्रत्यक्षेण शब्देन । तदेकवाक्यतया चार्थवत्त्वे सति न प्रकृतेनैकवाक्यता अवकल्प्यते । तस्मात् प्रकरणं बाधित्वा आतिथ्ये निवेक्ष्यते इति ।

वा—— प्रकरणरहितमनुष्यप्रधानो वा स्यात् । कुतः ? 'तुल्यवद्धि प्रसंख्यानं दृश्यतेऽस्मिन्विधित्रये । तस्मान्नरप्रधाने स्यात् पितृदेवप्रधानवत् ॥' यथैव 'उपवीतं देवानाम्' 'प्राचीनावीतं पितॄणाम्' इति च परस्परनिरपेक्षदेवपितृप्रधानकर्मण्येष विधिः एवं तद्बुद्ध्यनुवृत्तेर्मनुष्याणामित्यपि तत्प्रधानकर्म प्रत्येष्यामः । कथं गम्यते इति पृष्टे **मनुष्याणामिति षष्ठ्यन्तेन संबन्धात्**—— इत्येतावति उत्तरे दत्ते **मनुष्याणामेव प्राप्नोति इति** पुनश्चोदयति । अथवा समस्त एव चैकः प्रश्नः । सत्यमेवं प्राप्नोति । फलकल्पनाप्रसङ्गगौरवात्तु परित्यज्यते । तस्मात् तदीयकर्मव्यतिरेकादेव षष्ठी । तत्संबद्धस्य निवीतस्य नासंबद्धफलकल्पना भविष्यति । मनुष्यग्रहणं च तत्प्रधानकर्मप्रतिपत्त्यर्थमिति नानुपात्तसंबन्धापत्तिः । न च तस्मिन् सति प्रकृतैकवाक्यता घटते ।

अर्थवादो वा, प्रकरणात् । ८ ॥

भाष्यम्— नैतदस्ति, विधिः, स च मनुष्यप्रधाने कर्मणीति । मनुष्याणामिति मनुष्यसंबन्धोऽत्र श्रूयते, न मनुष्यप्रधानेन कर्मणा संबन्धः । मनुष्यप्राधान्ये च सति फलं कल्पनीयम् । आतिथ्यकर्मणा तु अनिर्दिष्टेन अप्रकृतेन अनुमेयेन संबध्येत । तत्र को दोषः ? प्रकरणादुत्कृष्येत संभवंस्तत्र । कथं संभव इति चेत् ? अर्थवाद एषः । स प्रकृतं स्तुवन् प्रकरणे संभविष्यति, विधिः सन् उत्कृष्येत । तस्मान्न विधिर्मनुष्यप्रधाने कर्मणीति ।

वा— सर्वथा नात्र एकोऽपि पक्षो निर्दोषः । प्रकरणसंबन्धे वाक्यसंबन्धबाधात्, अन्वाहार्यादिसंबन्धे वाक्यभेदात् प्रकरणस्य च विशेषकत्वानुपपत्तेः आतिथ्यादिसंबन्धोऽपि अत्यन्तनिर्मूल एव । षड्भिरपि श्रुत्यादिभिरसंस्पर्शात् मनुष्यसंबन्धेन तदनुमीयते, तच्च न युक्तम्, तस्या अपि षष्ठ्याः निवीतपदसंबन्धिव्यतिरेकजनितत्वप्रतीतेः । नहि अनुपात्तसंबन्धिव्यतिरेकैः (अनुपात्ताः संबन्धिनो येषां संबन्धाख्यानां व्यतिरेकाणाम्, तैः इति विग्रहः) विभक्तयः उत्पद्यन्ते । तस्मात् मनुष्यार्थतैव प्राप्नोति । तत्रापि च प्रकरणसमाख्याबाधफलकल्पनाप्रसङ्गः । सति च गत्यन्तरे न युक्तं तदाश्रयणम् । अस्ति च औदुम्बराधिकरणसिद्धमर्थवादत्वं गतिः ।

विधिना चैकवाक्यत्वात् । ९ ॥

भाष्यम्— इतश्च न विधिः । कुतः ? विधिनैकवाक्यत्वात् 'उपव्ययते देवलक्ष्ममेव तत्कुरुते' इत्येष विधिः । अनेनास्य सह एकवाक्यता भवति । यदीतरोऽपि विधिः स्यात् वाक्यं भिद्येत । नहि विधेर्विधेश्च एकवाक्यता भवति, वचनव्यक्तिभेदात् । तत्रैकवाक्यतारूपं बाध्येत । किमेकवाक्यतारूपम् ? निवीतं मनुष्याणामिति प्राप्तानुवादः । प्राप्तस्य किमर्थेन पुनर्वचनम् ? उपवीतस्तुत्यर्थेन । कथमुपवीतस्तुतिः ? निवीतमयोग्यं देवकर्मणि दर्शपूर्णमाससंज्ञके, मनुष्याणां हि तत् । तथा प्राचीनावीतं पितॄणाम्, न देवकर्मणि । उपवीतं तु तत्र योग्यम् । तस्मादुपव्यातव्यमिति । यथा यादृशोऽस्य वेषस्तादृशो नटानाम्, यादृशो देवदत्तस्य तादृशो ब्राह्मणानामिति देवदत्तवेषप्रशंसार्थमितरवेषसंकीर्तनम् । एवमिहापि उपव्यानस्तुत्यर्थेन निवीतसंकीर्तनम् । नास्त्यत्र विधायकः शब्दो निवीतं मनुष्याणां कर्तव्यमिति । आतिथ्यप्रयोगवचनं तस्य कर्तव्यताविधायकमिति चेत्, नैतदेवम् । स्तुत्यर्थेन अर्थवत्त्वे सति न शक्यं कल्प-

यितुम् । परोक्षं हि तदानर्थक्यपरिजिहीर्षया कल्प्येत । परिहृते तु आनर्थक्ये इह पुनर्न किंचित् कल्पनीयम् । तस्मादर्थवादः । एवं च वाक्येन अविरुद्धं प्रकरणमर्थवद्भवति ।

वा— ‘ उपन्ययते ’ इत्यनेन च विधिना एकवाक्यत्वं निवीतप्राचीनावीतयोर्दृश्यते । तच्चानुवादद्वारेण स्तुतौ सत्यामवकल्पते न विधौ । नहि अङ्गाङ्गित्वरहितयोरुभयोः स्वतन्त्रयोः परस्परासंबद्धयोर्विधीयमानयोरेकवाक्यता भवति, वचनव्यक्तिभेदात् । अन्या हि प्रधानविधेस्तावन्मात्रोपसंहारिणी वचनव्यक्तिः, अन्या च स्तुतेः पराङ्गभावानुगतरूपा । न चात्र विधायको दृश्यते । स यदि वा अध्याहर्तव्यः अथवा आतिथ्यादिगतस्यापि अङ्गत्वाय परिकल्प्येत । न च तत्कल्पनं युक्तम्, अविहितस्यानङ्गत्वात्, अनङ्गस्य च प्रयोगवचनेनाग्रहणात् । वक्ष्यति हि ‘ न चाविहितमङ्गं भवति ’ इति । तत्र अङ्गत्वात् विधिः, विधेश्च अङ्गत्वं कल्प्येत इतीतरेतराश्रयत्वं प्राप्नोतीति । प्रत्यक्षेण च विधिना यथाकथञ्चिदेकवाक्यतायां संभवन्त्यां न परोक्षैकवाक्यता युक्ता । तथा सति च अनेकादृष्टकल्पना स्यात् । तस्मादौचित्येन स्तुतिः । यथा निवीतप्राचीनावीते मनुष्याणां पितॄणां च प्रशस्ते, तथोपवीतं देवानामिति । लोकेऽपि चैवं दृश्यते यथा वसिष्ठस्यारुन्धती, यथा शशाङ्कस्य रोहिणी, यथा नलस्य दमयन्ती, तथा देवदत्तस्य यज्ञदत्तेति । विपर्ययेण वा स्तुतिरिति । तयोः पितृमनुष्यविषयत्वेन देवान् प्रति अयोग्यत्वात् उपवीतमेव देवानां प्रशस्तम् । अतश्च देवकर्मणि दर्शपूर्णमासाख्ये तदेव कर्तव्यमिति ।

शा-- क्रत्वाचिन्तेयम् ।

सोम--यद्यपि अत्रापि प्रकरणस्य श्रुत्यादिविरोधाविरोधविचार एव क्रियते, तथापि अत्र प्रकरणेन क्रत्वर्थत्वं प्रायेण प्रतिपाद्यते इति पादान्तरत्वमित्याहुः । **सूत्रार्थस्तु**- ‘ निवीतं मनुष्याणाम् ’ इति वाक्ये निवीतं मनुष्यधर्मो विधीयते, षष्ठ्यन्तमनुष्यशब्दस्य तत्प्राधान्यावगमकत्वादिति ।

वि--- ‘ निवीतं तु मनुष्याणां विधिर्वैषोऽर्थवादकः । अपूर्वत्वात् प्रकरणान्नुः क्रतोर्वा विधीयते ॥, प्राप्तं निवीतं मर्त्येषु प्रायेणैतस्य दर्शनात् ।, उपवीतविधावेकवाक्यत्वादर्थवादता ॥ ’

भाट्ट— दर्शपूर्णमासयोः ‘ निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुते ’ इति श्रुतम् । तत्र सर्वोऽप्ययम् ‘ उपव्ययते ’ इत्यस्य उपवीतविधेः शेषः, न तु स्वतन्त्रो विधिरित्यौदुम्बराधिकरणेनैव स्थितम् । यदा विधिः, तदा क्रत्वाचिन्तया निवीतवाक्ये विचारः । तत्र प्रकरणात् शुद्धक्रतुधर्मः, मनुष्यग्रहणं तु संबन्धसामान्यवाचिन्या षष्ठ्या अर्थप्राप्तकर्तृत्वाख्यसंबन्धानुवादादविरुद्धमिति **आद्यः पक्षः** । मनुष्यग्रहणस्य वैयर्थ्यापत्तेः षष्ठ्या अङ्गाङ्गिभावसंबन्धपरत्वावसायात् निवीतस्य मनुष्याभिलषितफलजनकत्वाङ्गीकारात् शुद्धमनुष्यधर्मः षष्ठीश्रुत्या प्रकरणबाधादिति **द्वितीयः** । अबाधेनोपपत्तौ बाधायोगात्, फलकल्पनाऽऽपत्तेश्च, संनिपत्योपकारकत्वलाभाच्च, प्रकरणसहकृतया तया जञ्जभ्यमानमन्त्रवत् क्रतुयुक्तपुरुषधर्म इत्यपरः । अत्र पूर्वपक्षत्रयक्रमो मूले अन्यथाकृतोऽपि अनुक्तिसहत्वादुपेक्षितः । **सिद्धान्तस्तु** प्राचीनावीतवैषम्यापत्तेः तत्समभिव्याहारात्मकवाक्यानुरोधात् षष्ठ्याः मनुष्यसंप्रदानकप्राकरणिकान्वाहार्यदानपाकादिपदार्थोपकारकत्वरूपसंबन्धपरत्वावसायात् उक्तविधसंबन्धेन मनुष्यार्थत्वम् । संभवति हि प्राचीनावीतस्यापि पितृदेवत्यप्राकरणिकप्रोक्षणीशेषनिनयनाङ्गत्वात् पित्रुद्देश्यकप्राकरणिककर्माङ्गत्वम् । अतस्तत्समभिव्याहारात् अस्यापि तत् । एवंच आध्वर्यवसमाख्याऽपि अनुगृहीता भवति । इतरथा तस्याः गुणभूतकर्तृप्राप्तावेव नियामकत्वस्य वक्ष्यमाणत्वात् क्रतुयुक्तपुरुषधर्मत्वे तदनुपपत्तेः । न च भवन्मतेऽपि दानस्य याजमानत्वात् कथं समाख्योपपत्तिः, निवीतस्य आरादुपकारकत्वेन अध्वर्युकर्तृकेनापि तेन दानोपकारसिद्धेः । पाकाद्यर्थत्वमेव वा अङ्गीक्रियतामिति न दोषः । अतः सर्वप्रमाणाबाधात् प्राकरणिकमनुष्योद्देशककर्माङ्गमित्येव सिद्धान्तः । यत्तु मूले पक्षान्तरं सिद्धान्तत्वेन उपन्यस्तम्, तथाहि ‘ वाक्यादयं शुद्धमनुष्यप्रधानकातिथ्यादिकर्माङ्गतया विधिः । न च तदुपस्थापकाभावः, मनुष्यपदस्य लक्षणया सनकादिमनुष्यपरत्वेन

तत्प्रधानकस्य हन्तकारातिथ्यादेरुपस्थितिसंभवात् । अत एव न फलकल्पनाऽपि ' इति तत् वाक्याबाधस्य अस्मन्मतेऽपि उपपादितत्वात्, सनकादिपरत्वस्य तेन च आतिथ्याद्युपस्थिते: अव्यभिचरितत्वाभावेन वक्तुमशक्यत्वात्, प्रकरणसमाख्ययोर्बाधे प्रमाणाभावात्, क्त्वाचिन्तात्वेन च सिद्धान्तनियमस्य अनावश्यकत्वात् अस्य पक्षस्य वार्तिककृता क्लिष्टत्वाभिधानाच्च उपेक्षितम् । अतः प्राकरणिकमनुष्यप्रधानककर्माङ्गत्वमेव सिद्धान्तः । वस्तुतस्तु नायं विधिः वाक्यभेदापत्तेः, अपितु उपवीतविधिरेव शेषः प्राचीनावीतवत् । यथा च निवीतप्राचीनावीते तत्तत्प्रधानकत्वसंबन्धेन मनुष्यपितृसंबन्धिनी उचिते, तथा उपवीतमपि देवसंबन्धितया, अतस्तदेव दर्शपूर्णमासयोः प्रशस्तमिति स्तुतिः । अथवा ते तत्रतत्र वक्ष्यमाणवचनात् प्रशस्ते, अत्र तु दैवत्वादुपवीतमेवेति स्तुतिः ।

मण्डन— ' स्तुतिर्निवीतं विहितोपवीतेः । '

शंकर— ' निवीतं न विधेयं स्यात् । ' १. ' विधौ तत् पुंप्रधानके । ' २.

* **निवीतोपवीतयोः** समुच्चयः श्येने । **के.** १०।४।१।१-२ वर्णकं १.

* **निवीतपादः** तृतीयाध्यायस्य चतुर्थः पादः । **कु.** १।४।७।८.

* **निवीतसंकीर्तनं** निवीतवाक्ये उपवीतस्तुत्यर्थम् । **के.** ३।४।१।८.

* **निवृत्तिः** निषेधसिद्धा । **सु.** पृ. ४, * निवृत्तिर्वा, कर्मभेदात् । (८।१।१४।२४) यथा तु विकृतौ चमस एव भविष्यति (न गोदोहनम्) तथा अष्टमे वक्ष्यति ' निवृत्तिर्वा ' इति । **वा.** ३।६।३।१० पृ. १०३७.

* **निवृत्तेः** निषेधकार्यायाः प्रवृत्तिपूर्वकत्वनियमः । **सु.** पृ. १०४१.

* **निवेशनः** संगमनः इति मन्त्रः गार्हपत्योपस्थाने वचनात् विनियोक्तव्यः, न तु लिङ्गात् इन्द्रोपस्थाने । ऐन्द्रीन्यायः । **भा.** ३।२।२।३-४.

* **निशब्दः** प्रकर्षस्य वक्ता यथा प्रकर्षेण रक्तं नितरां रक्तमित्युच्यते । **भा.** २।१।१३।४२.

⧗ **निशीष्टिन्यायः** । निशियज्ञे अमावास्यातन्त्रेण प्रसङ्गसिद्धिः ॥

निशियज्ञे प्राकृतस्याप(प्र)वृत्तिः स्यात् प्रत्यक्षशिष्टत्वात् । १२।२।५।१४ ॥

भाष्यम्— इदं श्रूयते ' अग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेत्, यो रक्षोभ्यो बिभीयात् ' इति । पुनरपि तत्रैव ' अमावास्यायां निशि यजेत ' इति । तस्मिन् किं अमावास्यातन्त्रं प्रसज्यते, उत नेति चिन्तायाम्, पक्षः परिगृह्यते, निशियज्ञे प्राकृतस्य अप(प्र)वृत्तिरिति । अस्मिन् निशियज्ञे प्राकृतस्य अमावास्यातन्त्रस्य अप (प्र)वृत्तिः न प्रसज्यते । कुतः ? प्रत्यक्षशिष्टत्वात्, प्रत्यक्षशिष्टा इयमिष्टिः, ' अग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेत्, यो रक्षोभ्यो बिभीयात् ' इति । किमतः ? ततः एवं विज्ञायते स्वतन्त्रा इयमुत्पन्ना न कस्यचित् कर्मणस्तन्त्रमध्ये । यथा पशुपुरोडाशः ' अग्नीषोमीयस्य वपया प्रचर्य, अग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपति ' इति । यथा च वैष्णवो वैश्वदेवस्य ' यदघोऽवमृद्येत् यच्च स्फ्य आश्लिष्येत्, तद् विष्णव उरुक्रमायावद्येत् ' इति । (अवदानकाले स्रुचः अधोभावे यत् अवमृदितं संलग्नं स्यात् यत् किञ्चित् स्फ्ये आश्लिष्टं स्यात्, तत् विष्णवे इत्यादि इत्यर्थः) ननु ' अमावास्यायाम् ' इति आमावास्यस्य कर्मणो मध्ये श्रुता, न अमावास्याशब्दः कर्मवचनः, किं तर्हि ? कालवचनः । काले श्रुतिः कर्मणि लक्षणा, श्रुतिश्च लक्षणातो न्याय्या । न चेत् कस्यचित् कर्मणो मध्ये श्रूयते, कस्य तन्त्रं ग्रहीष्यते । तस्मात् स्वतन्त्रा ।

कालवाक्यभेदाच्च तन्त्रभेदः स्यात् । १५ ॥

भाष्यम्— कालभेदात् वाक्यभेदाच्च । कालभेदस्तावत् अमावास्यायां रात्रौ निशियज्ञः, प्रतिपदि अहनि आमावास्यम् । कालभेदेन वैगुण्यात् नामावास्यातन्त्रं निशियज्ञस्य उपकर्तुमर्हति । कथं तर्हि पाशुकाः प्रयाजाः तिष्ठति पशौ क्रियमाणाः सन्तः, तस्य पुरोडाशस्योपकुर्वन्ति ? उक्तस्तत्र न्यायः ' न कृतस्य गुणानुग्रहार्थमावृत्तिरस्ति ' इति । इह पुनः अकृतमामावास्यम् । तस्मात् अवैगुण्याय स्वतन्त्रं कर्तव्यम् । **वाक्यभेदाच्च** । भिन्नदेशे

चैते वाक्ये ‘अमावास्यायां यजेत’ ‘अमावास्यायां निशि यजेत’ इति । एकं दर्शपूर्णमासप्रकरणे, एकं काम्यासु इष्टिषु । किमतः ? यदि समानदेशे स्याताम्, ततः ‘अमावास्यायां यजेत’ इति योऽसौ आमावास्ये कर्मणि काल उपात्तः, तस्मिन्नेव च निशियज्ञः चोदितः, इति गम्येत । तत्र अमावास्यातन्त्रमध्ये एव विहितः स्यात् । अथ पुनर्देशभेदे सति यथा ‘अमावास्यायां यजेत’ इत्युपात्तः कालः उपादेयत्वेन चोद्यते, एवमिहापि । न च तुल्यकालत्वे प्रसङ्गो भवति यथा वैकृत्यः इष्टयः दर्शपूर्णमासाभ्यां तुल्यकाला अपि सत्यः, न दार्शपौर्णमासिकं तन्त्रमुपजीवन्ति । तस्मात् तन्त्रभेदः ।

वेद्युद्धननव्रतं विप्रतिषेधात् तदेव स्यात् । १६ ॥

भाष्यम्— किमेष एवोत्सर्गः सर्वं तन्त्रं भिन्नम् ? न खलु । वेद्युद्धननं व्रतं च स्यात् तदेव यत् दर्शार्थे वेदेरुद्धननं कृतम्, तेन उद्धतायाः पुनरुद्धनने नहि किञ्चित् कार्यमस्ति, केवलं कृतदूषणं भवेत् । व्रतं च उपेतमनुत्सृष्टं पुनरुपेतुमशक्यम् । उपेयमानं च पिष्टपेषणवत् अकिञ्चित्करं स्यात् । तस्मात् एतदुभयमपि तदेव प्रसज्यते ।

तन्त्रमध्ये विधानाद् वा तत्तन्त्रा, सवनीयवत् । १७ ॥

भाष्यम्— तत्तन्त्रा वा निशीष्टिः स्यात् । अमावास्यातन्त्रा इयम्, न स्वतन्त्रा । कुतः ? तन्त्रमध्ये विधानात् । अमावास्यातन्त्रमध्ये इयं विहिता ‘अमावास्यायां निशि निर्वपेत्’ इति । ननु कालवचनोऽयं अमावास्याशब्दो न कर्मवचनः इत्युक्तम् । सत्यं कालवचनः, स तु कालस्तन्त्रमध्ये । तत्र विधीयमाना तन्त्रमध्ये विहिता भवति सवनीयवत् । तद्यथा सवनीयाः पुरोडाशाः न तावत् पशुकर्म उद्दिश्य विधीयन्ते, अथ च पशुतन्त्रमध्ये विहिता भवन्ति । यस्मिन् स्थाने विहिताः तत् स्थानं पशुतन्त्रमध्ये इति । इयमपि तन्त्रमध्ये पतिता चेत् सवनीयवदेव न स्वतन्त्रा भवितुमर्हति ।

वैगुण्यादिध्माबर्हिर्न साधयेदग्न्यन्वाधानं च यदि देवताऽर्थम् । १८ ॥

भाष्यम्— अत्राह, किमेष एवोत्सर्गः सर्वममावास्यातन्त्रं निशीष्ट्यर्थं साधयतीति, न खलु । इध्माबर्हिर्न साधयेत् । कुतः ? वैगुण्यात् । इध्मः अग्निसमिन्धनार्थः स प्रतिपदि आहृतः अमावास्यायां निशि वर्तमानस्य निशियज्ञस्य अग्निसमिन्धनं न साधयेत् । बर्हिरपि वेदिस्तरणार्थम् । ते यदि प्रसज्येयाताम्, विगुणो निशियज्ञः स्यात् । तस्मात् भेदेन ते कर्तव्ये । अग्न्यन्वाधानं च यदि देवताऽर्थम् । यदि देवतापरिग्रहार्थं अग्न्यन्वाधानम्, तदपि भेदेन कर्तव्यम् । प्राकृतेन अग्न्यन्वाधानेन अमावास्यादेवताः परिगृहीताः, न च रक्षोघ्नोऽग्निः (रक्षोहाऽग्निः) । तत्परिग्रहार्थमपि अग्निधारणार्थम्, ततः प्राकृतेनैव धारितत्वात् अग्नेः, न कर्तव्यम् । देवतापरिग्रहार्थता वाक्यशेषे श्रूयते ‘ममाग्ने वर्चो विहवेष्वस्तु’ इति पूर्वमग्निं परिगृह्णाति, देवता एव तत्पूर्वेद्युः परिगृहीताः, श्वोभूते यजते इति ।

सोम— सवनीयपशोः सवनीयपुरोडाशानां च एकसौमिकप्रयोगवचनपरिगृहीतत्वात् पाशुकस्य पुरोडाशेषु प्रसङ्गसंभवेऽपि भिन्नप्रयोगवचनग्राह्यनिशीष्टौ न दार्शिकाङ्गप्रसङ्गः इत्युत्थितेः **संगतिः । ननु** आधानानन्तरं यदा पौर्णमास्याः पूर्वमेव अमावास्या प्राप्नोति, तदा तस्यां न दर्शतन्त्रप्रवृत्तिः, दर्शपूर्णमासयोः पूर्णमासोपक्रमत्वेन तदा दर्शे कर्मानुष्ठानानुपपत्तेः । ततश्च तस्यां निशीष्ट्यनुष्ठानसंभवात् निशीष्टिकालस्य प्रवृत्तामावास्यातन्त्रत्वनियमः अनुपपन्नः । न च प्रकृत्यनारम्भे निमित्तादिवशात् आपतन्त्या विकृतेरपि अननुष्ठानं इत्यत्र प्रमाणमस्ति, येन निशीष्ट्यनुष्ठानं दर्शपूर्णमासोपक्रमात् पूर्वं न संभवेत्, तथा सति सोमात् पूर्वं सांनाय्याग्नीषोमीयरूपप्रकृत्यनुष्ठानाभावादेव तद्विकाराणामननुष्ठाने सति सोमादूर्ध्वमेव तेषामनुष्ठानसिद्धेः तत्सिद्ध्यर्थस्य ‘सांनाय्याग्नीषोमीयविकारा ऊर्ध्वं सोमात् प्रकृतिवत्’ इति पाञ्चमिकाधिकरणस्य (५।४।८।२५) वैयर्थ्यप्रसङ्गात् । इति **चेत्**, एवमपि दर्शपूर्णमासोपक्रमानन्तरं यदा निशीष्ट्यनुष्ठानम्, तदा तन्त्रमध्यपातनियमावश्यम्भावः । **न च** एवं एकस्या एव निशीष्टेः दर्शपूर्णमासोपक्रमात् पूर्वं क्रियमाणायाः तन्त्रित्वम्, तदनन्तरं क्रियमाणायाः प्रसङ्गित्वमिति वैरूप्यं स्यात् इति

वाच्यम् । नित्यायाः प्रकृतेः तन्त्रिण्या एव काम्यनैमित्तिकविकृतिसंनिपाते सति प्रसङ्गित्वस्य वक्ष्यमाणत्वेन उक्तवैरूप्यस्य अदोषत्वात् इत्याहुः ।

वि––‘ निशियज्ञें दर्शतन्त्रं नोतास्त्येत, न्न दर्शगे । तन्त्रमध्ये विध्यभावा, दस्त्यर्थात् तद्विधानतः॥ ’

भाट्ट— काम्येष्टिकाण्डे ‘ अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत् यो रक्षोभ्यो बिभीयात् ’ इति यागं विधाय तस्य ‘ अमावास्यायां निशि यजेत ’ इत्यनेन कालो विहितः । कालद्वयविशिष्टप्रयोगविधानाच्च न वाक्यभेदः । तदिह निशीष्टौ दार्शिकं तन्त्रं प्रसज्यते न वेति **चिन्तायाम्**, पशुपुरोडाशवत् तन्त्रमध्ये पाठाभावान्न प्रसङ्गः । नहि अत्र प्रकरणमस्ति, येन तन्त्रमध्यपाठः शङ्क्येत । नाप्यमावास्याशब्दस्य कर्मवचनत्वाद्वाक्येनैव तन्त्रमध्यपातः, तस्य ‘ अमावास्यायामपराह्णे ’ इतिवत् कालवाचित्वेन कर्मलक्षणानुपपत्तेः । न च शब्देन तन्त्रमध्यपातानवगमेऽपि दर्शप्रयोगस्य नियमेन दिवाऽऽरब्धत्वात् रात्रौ क्रियमाणाया अस्यास्तन्त्रमध्यपातावश्यम्भावः, अपराह्णपर्वप्रतिपत्संधौ रात्रिकालीनामावास्यायामन्वाधानपूर्वदिने क्रियमाणाया अस्यास्तत्तन्त्रमध्यपातावश्यम्भावनियमाभावात् । अतोऽवश्यं साङ्गाया एव प्रयोगविधानान्नास्यां प्रसङ्गः । **इति प्राप्ते**, तन्त्रमध्यपातनियमाभावेऽपि ‘ सर्वत्र प्रकृतौ विकृतौ वा अङ्गविधिषु अन्यत उपकारालाभे अङ्गानि कुर्यात् ’ इत्येवमेव लाघवेन विधिकल्पनात् निशीष्टावपि यदैव तन्त्रमध्यपातस्तदैव प्रसङ्गः । न च एवमपि निशीष्टौ पूर्वकृतान्वाधानादिपदार्थप्रसङ्गेऽपि करिष्यमाणप्रयाजादिजन्योपकारस्य अन्यतः अलाभात्तदंशे न प्रसङ्गो वैपरीत्यापत्तिर्वेति **वाच्यम्** । निशीष्ट्यर्थे क्रियमाणप्रयाजादिजन्यापूर्वाणां तत्परमापूर्वेणैव तद्ब्राह्मणतर्पणान्ते उत्पन्नेन नाशावश्यम्भावेन वैपरीत्यकल्पनाऽनुपपत्तेः । अतो दर्शप्रयोगविधानादवश्यानुष्ठाप्यानां तेषामेवोपजीवनेन निशीष्टिप्रयोगविधिर्लाघवेन दर्शब्राह्मणतर्पणान्ते एव स्वपरमापूर्वोत्पत्तिमनुमन्यते । अतश्च युक्त एव तत्र कादाचित्कोऽपि प्रसङ्गः । आवश्यकश्चायमग्निप्रणयनव्रतोपायनाग्न्यन्वाधानाद्यंशे भवतोऽपि । यानि तु इध्माबर्हिःप्रभृतीनि अशक्यप्रसङ्गानि, तानि त्वावर्तन्ते एव । नचैवं विकृत्यन्तराणामपि सौर्यादीनां दर्शार्थान्वाधानस्य प्रातरेव कृतत्वेन तत्तन्त्रमध्यपातावश्यम्भावात् प्रसङ्गापत्तिः, सौर्यादिप्रधानेषु आतिदेशिकस्यापि प्रातःकालस्य सत्त्वेन अङ्गगुणविरोधन्यायेन बाधानुपपत्तेः दर्शाद्यर्थान्वाधाने एव तद्बाधस्यौचित्येन विकृतिकरणोत्तरमेव दर्शपूर्णमासारम्भात् प्रसङ्गानापत्तेः । न च एवमपि यत्र साकमेधादौ आद्येष्टावेव अग्निप्रणयनं कृतम्, तत्रेतरेष्ट्यादौ प्रयाजादिप्रसङ्गापत्तिः, तत्र पूर्वेष्टिप्रयोगस्य समाप्तावपि वचनात् तेष्वेवाग्निषु उत्तरेष्टिकरणेऽपि प्रसङ्गानापत्तेः । अत एव तादृशस्थले उत्तरेष्टिषु प्रणयनस्य बाधः एव । व्रतोपायनं तु तत्र सर्वत्र प्रत्येकमेव, इतरथा व्रतविसर्गस्य समन्त्रकस्य विहितस्य सर्वान्ते करणेन आद्येष्टिपरमापूर्वस्यापि सर्वान्ते एवोत्पत्तौ प्रयाजादिजन्यापूर्वाणां सत्त्वेन उत्तरेष्टिषु तेषां प्रसङ्गापत्तेः । **कल्पसूत्रकारास्तु** आदौ व्रतोपायनमन्ते च व्रतविसर्गं कुर्वन्ति ।

मण्डन—‘ निशीष्टिर्दर्शतन्त्रा स्यात् सामिधेन्यादिकं विना । ’

शंकर—‘ निशीष्टिश्च प्रसङ्गिनी । ’

* **निशीष्ट्यर्थस्य** आतिदेशिकस्य प्रयाजादेः दर्शार्थेन औपदेशिकेन प्रयाजादिना प्रसङ्गबाधः । (दार्शिकप्रयाजाद्यनुष्ठानात् निशीष्ट्यर्थप्रयाजाद्यनुष्ठानं पृथक्कर्तव्यमित्यर्थः) । बाल. पृ. १३३.

***निशीष्टिन्यायोऽप्यत्र** नास्ति । तत्र हि प्रक्रान्ते दर्शे कतिपयैः पदार्थैः कृते, सति निमित्ते नैमित्तिकीष्टिरापतति । साऽपि तन्त्रमध्ये पतत्येव । **टुप्.** १२।२।१२।३०.

* **निशियज्ञस्य** यदङ्गतन्त्रं तस्य अमावास्यातन्त्रेणैव प्रसङ्गसिद्धिः निशि क्रियमाणस्य दर्शकर्मतन्त्रमध्यपातित्वात् । ततश्च व्रतोपायन–अग्निप्रणयन–वेद्युद्धननादीनां प्रसङ्गः । यानि तु इध्माबर्हिःप्रभृतीनि अशक्यप्रसङ्गानि, तानि आवर्तन्ते एव । **भाट्ट.** १२।२।५.

⧗ **निशियज्ञे प्राकृतस्याप्रवृत्तिः स्यात्, प्रत्यक्षशिष्टत्वात् । १२।२।५।१४ ॥**

‘ अग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेत् यो रक्षोभ्यो बिभीयात् ’ इति ‘ अमावास्यायां निशि यजेत ’ इति च

श्रुतम् । अस्मिन् निशियज्ञे प्राकृतस्य अमावास्यातन्त्रस्य अप्रवृत्तिः प्रवृत्तिर्न स्यात् । प्रत्यक्षशिष्टत्वात् निशियज्ञस्य स्वातन्त्र्येण विधानात् । तस्मात् स्वतन्त्रा निशीष्टिः । इति पूर्वः पक्षः । अपवृत्तिः इति वा पाठः । तत्र अपवृत्तिः निवृत्तिः इत्यर्थात् अप्रवृत्तिः इत्येव तात्पर्यम् । भापुस्तके तु मूले ‘ अपवृत्तिः न प्रसज्यते ’ इति मुद्रितम् । तत्र ‘ न प्रसज्यते ’ इत्युक्त्या अप्रवृत्तिः इत्येव पाठः स्पष्टो भवति ।

कालवाक्यभेदाच्च तन्त्रभेदः स्यात् । १५ ॥

कालवाक्यभेदात् अमावास्यातन्त्रात् निशीष्टितन्त्रस्य भेदः स्यात् । कालभेदस्तावत् अमावास्यायां रात्रौ निशियज्ञः प्रतिपदि अहनि अमावास्यायागः । वाक्यभेदोऽपि भिन्नदेशे चैते वाक्ये ‘अमावास्यायां यजेत ’ ‘ अमावास्यायां निशि यजेत ’ इति । तस्मात् तन्त्रभेदः स्यात् ।

वेद्युद्धननव्रतं विप्रतिषेधात् तदेव स्यात् । १६ ॥

यद्यपि अमावास्यायागतन्त्रं निशीष्टितन्त्रं च भिन्नमेव, तथापि वेद्युद्धननं वेद्या उद्धननं व्रतं च तदेव स्यात् । तयोर्न भेदः । पुनः करणे विप्रतिषेधात् । तस्मात् अमावास्याऽर्थे कृताभ्यां ताभ्यां निशीष्टौ प्रसङ्गसिद्धिः, इतरत्तु सर्वं भिन्नम् । इति पूर्वः पक्षः ।

तन्त्रमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् । १७ ॥

निशीष्टिः तत्तन्त्रा तस्या अमावास्यायाः तन्त्रमेव तन्त्रं यस्याः सा तत्तन्त्रा स्यात् न स्वतन्त्रा । तन्त्रमध्ये अमावास्यायास्तन्त्रस्य मध्ये निशीष्टेः विधानात् ‘ अमावास्यायां निशि निर्वपेत् ’ इति । सवनीयवत् यथा सवनीयाः पुरोडाशाः न पशुकर्म उद्दिश्य विधीयन्ते, तथापि पशुतन्त्रमध्ये विहिता भवन्ति इन्ति तत्तन्त्रास्ते तद्वत् । तस्मात् निशीष्टिः न पृथक्तन्त्रा । इति सिद्धान्तः ।

वैगुण्यादिध्माबर्हिर्न साधयेदग्न्यन्वाधानं च यदि देवताऽर्थम् । १८ ॥

निशीष्टिः यद्यपि न स्वतन्त्रा किन्तु अमावास्यातन्त्रा, तथापि इध्माबर्हिः न साधयेत् । अमावास्यायागार्थः प्रतिपदि आहृतः इध्मः अमावास्यायां निशि वर्तमानस्य निशियज्ञस्य अग्निसमिन्धनं न साधयेत् । वेदिस्तरणार्थं बर्हिरप्येवम् । तस्मात्ते भेदेन कर्तव्ये, अन्यथा वैगुण्यात् निशियज्ञस्य वैगुण्यप्रसङ्गात् । अग्न्यन्वाधानं च यदि देवताऽर्थे देवतापरिग्रहार्थं स्यात्, तदा तदपि भेदेनैव कार्यम् । यदि तु अग्न्यन्वाधानं अग्निधारणार्थमेव, ततो न भेदेन कार्यम् । तस्मात् सामान्यतः निशीष्टौ अमावास्यातन्त्रं प्रसज्यते । केषुचित्तु अंशेषु इध्माबर्हिरादिषु भेदः इति सिद्धान्तः । **के.**

* निशियज्ञे सामिधेन्योऽपि सन्ति । **संकर्ष.** २।४।३.

* **निशियज्ञाधिकरणम् ।** निशीष्टिन्यायः द्रष्टव्यः । **के.**

* **निश्चयश्च** ‘ अयमेव ’ इति सावधारणोऽनुभवः । **ऋजु.** पृ. ९४. * **निश्चयस्य** समानप्रकारकस्यैव संशयादिविरोधित्वम् । **मणि.** पृ. २८.

* **निषादस्य** घनिकत्वं संभवति । **के.** ६।१।१३।५२.

* **निषादानाम्**, कूटं (मृगबन्धनयन्त्रम्) द्रव्यं तेषामेवोपकारकम् । स्वमेव तन्निषादानाम् । **भा.** ६।१।१३।५२.

* **निषादेष्ट्याम्** ‘ कूटं दक्षिणा ’ इति विहिते ये एवैतेन व्यवहरन्ति, तेभ्य एवार्थतत्त्वं ज्ञात्वा दीयते । के. ६।१।१३।५२.

⧗ निषादरथकारयोरपि आर्षेयवरणमस्ति ॥

निषादस्थपतेः रथकारस्य च संकरजातित्वेन ऋषिसंततित्वाभावात् नार्षेयवरणम् । इति प्राप्ते, साक्षात् ऋष्यपत्यत्वस्य त्रैवर्णिकेष्वप्यभावात् परंपरया तत्संबन्धे च अविच्छिन्नपारंपरिकतत्तद्वंश्यस्मृतिव्यतिरिक्तप्रमाणाप्रसरात् तस्याश्च तेष्वपि अविशिष्टत्वात् सर्वस्यैव जगतः ऋषिवंश्यतायाः पुराणेषु कथनाच्च स्यादेव तेषामपि आर्षेयवरणम् । **संकर्ष.** ३।४।६.

* **निषादस्थपतिः** न त्रैवर्णिकः किन्तु धनिको निषादः । तस्य च तात्कालिकाचार्योपदेशादिना विद्यां संपाद्य रौद्रयागाधिकारः । **के.** ६।१।१३।५१–५२.

* **निषादस्थपतेरपि** आर्षेयवरणम् । सर्वस्यैव जगतः ऋषिवंश्यतायाः पुराणेषु कथनात् । **संकर्ष.** ३।४।६.

* **निषादस्थपतेः** रौद्रेष्ट्यामेवाधिकारः, साऽपि लौकिके-

ऽग्नौ, रथकारस्य च आधानमात्रे अधिकारः नोत्तरकर्मसु इति मीमांसकाः । के. ६।१।१२–१३।४४–५२.

* **निषादस्थपत्यधिकरणम्** । निषादस्थपतिन्यायः द्रष्टव्यः । के. * **निषादस्थपत्यधिकरणे** लक्षणाऽऽपत्त्या तत्पुरुषापेक्षया कर्मधारयस्य प्राबल्यमुक्तम् । मणि. पृ. १४९. * षष्ठीसमासात् कर्मधारयो बलीयान् इति **निषादस्थपत्यधिकरणे** वक्ष्यते । वि. ३।३।१६.

* **निषादस्थपत्यधिकरणन्यायेन** अदृष्टकल्पनादेः फलमुखत्वात् । भाट्ट. ४।१।१४, * निषादस्थपत्यधिकरणन्यायेन अदृष्टार्थत्वापत्तावपि लक्षणाया अन्याय्यत्वात् । १०।५।८, * निषाद०न्यायेन काललक्षणापेक्षया परिसंख्याया अदोषत्वात् । इति प्राप्ते । १०।६।४. * निषाद०न्यायेन फलमुखगौरवस्यादोषत्वात् । शब्दकौ. इको गुणवृद्धी, * निषाद०न्यायेन लक्षणाऽपेक्षया कर्मान्तरविधेरेव न्याय्यत्वात्, पूषा प्रविष्टभागः इत्यत्र । भाट्ट. ३।३।१३, * निषाद०न्यायेन श्रूयमाणवाक्ये वाक्यभेदाभावेन पाठगम्यानेकवाक्यकल्पनस्यादोषत्वात् । ५।१।१, * गुदेनोपयजति इति तृतीयया गुदस्य करणत्वावगमात् **निषाद० न्यायेन** लक्षणाऽनुपपत्तेः उपयाजानामर्थकर्मत्वावसायात् इत्यादि प्राप्ते । १२।४।४, * 'दीर्घसोमे संतृद्येत्' इत्यत्र 'निषाद०न्यायेन' कर्मधारयस्यैव न्याय्यत्वात् दीर्घश्चासौ सोमश्च इति कर्मधारय एवाङ्गीक्रियते इति प्राप्ते । ३।३।११, * दृष्टार्थत्वावश्यकत्वे निषाद०न्यायेन सप्तमीश्रुत्या प्रकरणाच्च तदीयनिर्वापानुवादेन पुरोडाशकपालवत् प्रायणीयनिष्कासो विधीयते । ११।२।१५, * न च प्रतिपत्त्यपेक्षत्वात् दृष्टार्थत्वलाभाय 'तेनावभृथं यन्ति' इत्यत्र द्वितीयाऽर्थलक्षणायामपि न दोषः, निषाद० न्यायेन लक्षणाऽनुपपत्तेः । ४।२।८, * 'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इत्यादौ किं सोमाभावे पूतीकत्वेन रूपेण पूतीकानां विधानम्, उत प्रतिनिधिविधया पूतीकगतसोमावयवानां नियम इति चिन्तायाम्, प्रतिनिधिनियमे पूतीकपदस्य तद्गतसोमावयवे लक्षणाऽऽपत्तेरभावे विधिरेवायम् । न च नियमविधिलाघवानुरोधेन तदङ्गीकरणमपि अदोषः, निषाद०न्यायेन अपूर्वविधिगौरवस्य फलमुखत्वात् । ६।३।१३. * 'सुप्तिङन्तं पदम्' इत्यत्र निषाद०न्यायेन कर्मधारयाश्रयणेन प्रत्ययग्रहणपरिभाषया तदन्तविधौ सुबन्ततदाद्यभिन्नो योऽन्तः, स पदसंज्ञको भवति इत्यर्थः । भूतिः. पृ. ११९.

* **निषादस्थपत्यधिकरणन्यायस्य** स्वरूपं तु 'तत्पुरुषात् कर्मधारयो बलीयान्' इति । बाल. पृ. ९३.

* प्रयाजशेषन्यायेन योन्यां गायति इत्यादिसप्तम्याः प्राधान्यलक्षणा इत्यपास्तम् । **निषादस्थपत्यधिकरणन्यायविरोधेन** प्राचीनप्रयाजशेषन्यायस्यापभ्रंशितत्वात् । भाट्ट. ९।२।२. * कैश्चित् तृतीयाया एव (प्रयाजशेषेण हवींष्यभिघारयति) द्वितीयाऽर्थे लक्षणामङ्गीकृत्य विजातीयानेकोद्देश्यकत्वाच्च न वाक्यभेदः इत्युक्तम्, तदपि न **निषादस्थपत्यधिकरणविरोधस्य** तादवस्थ्यात् । भाट्ट. ४।१।१४.

* **निषादस्थपत्यादौ** सामानाधिकरण्यात् श्रुत्या लक्षणा बाध्यते । बाल. पृ. १४१.

⌛ निषादस्थपतीष्टिः लौकिकेष्वग्निषु स्यात्, न संस्कृतेषु ॥

स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत् तादर्थ्याच्चापवृज्येत । ६।८।३।२०॥

भाष्यम्-- अस्ति स्थपतीष्टिः 'एतया निषादस्थपतिं याजयेत्' इति । तत्र संदेहः किमाधानसंस्कृतेष्वग्निषु स्यात्, उत लौकिकेष्विति । किं प्राप्तम् ? संस्कृतेष्विति । कथम् ? 'यदाहवनीये जुहोति' इत्येवमादिवचनात् । ननु शूद्रस्य आहवनीयाभावान्नास्ति तस्य श्रुतिरिति । उच्यते । सा हि आहवनीयं प्रयोजयेत् । यथा प्रयाजानश्रुतान् प्रयोजयति । एवं चोदकसामर्थ्यादिति । तादर्थ्याच्चापवृज्येत । स्थपतीष्ट्यर्थं च आहिता अग्नयः । तस्यामपवृक्तायां अपवृज्येरन् । धारणं हि तेषां दृष्टकार्यमाम्नातम्, अतिक्रान्ते कार्ये न स्यादिति ।

टुप्— (भाष्यकारेण चोदकः सामर्थ्यात् आहवनीयं प्रयुङ्क्ते, तत्र स्थपतीष्टिः इत्युक्तम्) अत्र चोदयन्ति । चोदकेन अग्नयः संस्कृतास्तस्यां प्राप्येरन्, स च (चोदकः) यत् तस्याम् (इष्टौ) न विद्यते (नोपदिश्यते) तत् (एव) प्रापयति, विद्यन्ते च तत्राग्नयः (उपदेशेनैव 'यदाहवनीये जुहोति' इति । अतः

चोदकसामर्थ्यात् इति भाष्योक्तमयुक्तम् । परिहरति–) 'यदाहवनीये' इत्यनारभ्यवादः प्रकृत्यर्थः खादिरवत्, न सर्वार्थः । खादिरता (हि) स्रुवस्य विधीयते (स्रुवश्च प्रकृतावेव उपदिष्टः । आहवनीयोऽपि होमोद्देशेन प्रकृतावेव उपदिष्टः इति स्थपतीष्टौ चोदकेनैव प्राप्नुयात् इति युक्तमेव भाष्यमिति) त्रैवर्णिकानां येषु कर्मसु अधिकारः, न तेषु आहवनीयादिविधिप्रयुक्तिः । कस्मात् ? अग्निमत्त्वात् तेषाम् (त्रैवर्णिकानाम्) सामर्थ्यादग्निमत्त्वम् । कामश्रुतयः तेषामाधानश्रुतिं कल्पयन्ति (अन्यथाऽनुपपत्त्या) । विद्यन्ते हि तेषामाधानश्रुतयः, (याभिः अन्यथाऽनुपपत्तिः क्षीयते) । तच्च (आधानम्) अग्निप्रयुक्तम्, न क्रतुप्रयुक्तम् । एवं तु (सति स्थपतीष्टिः विध्यन्तरसंपादित–) अग्निमतो निषादस्थपतेरभावात् (स्वयं च) अग्निसाध्यत्वात् अग्निं प्रयुङ्क्ते, अग्नयोऽपि आधानं सामर्थ्यात् (प्रयुञ्जते) अत इदमाधानं स्थपतीष्टिप्रयुक्तम् । अतस्तदर्थम् । सा तेन आधानेन अग्निभिश्च तद्वती । इतरेण आधानेन ब्राह्मणादयो नित्यं अग्निमन्तः । (तदेवं स्थपतीष्ट्यन्यथाऽनुपपत्त्या वसन्तादिवाक्यविहिताधानव्यतिरिक्तं आधानान्तरं स्वार्थमेव प्रयुङ्क्ते ।) अतस्तदपवर्गे अपवृज्येत । (किमर्थमिदमपवर्गाभिधानम्, तदाह–) यदि तादर्थ्यान्नापवृज्येत, अग्निमत्त्वात् (स्थपतिः) समर्थः इति इतरैरपि कर्मभिः अधिकारः स्यात् (इति मन्दधियः संभावयेयुः, तद्भ्रमापनुत्तये अपवर्गाभिधानम्) ।

अपिवा लौकिकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् । २१ ॥

भाष्यम्— अपिवेति पक्षव्यावृत्तिः । लौकिकेष्वग्निषु स्यात्, न संस्कृतेषु । कुतः ? आधानस्यासर्वशेषत्वात् । सर्वकर्मशेषभूता अग्नयः । तदङ्गमाधानम्, न कर्माङ्गम् । श्रुत्यादीनामभावात् न कर्मप्रयुक्तता आधानस्य, वाक्यसामर्थ्याच्च अग्निप्रयुक्तत्वम् । यच्च दर्शपूर्णमासप्रयुक्तम्, तच्चोदकेन प्राप्यते, न द्रव्यप्रयुक्तम् । तस्माल्लौकिकेष्वग्निषु स्थपतीष्टिरिति ।

टुप्— आधानं अनङ्गत्वात् (दर्शाद्यनङ्गत्वात्) न चोदकेन प्राप्यते, न च स्थपतीष्टिप्रकरणे आम्नायते । अतो नौपदेशिकम्, नातिदेशिकम् । लौकिकस्तु अग्निः (अङ्गं भवति) । स च आचारतः प्राप्नोति । 'तस्मिन् गृह्याणि' (इति गौतमस्मरणात् ५।८) गृहाय हितानि इत्यर्थः (गृहशब्दश्च दंपत्योर्वर्तते । अतस्तदधिकारं कर्म गृह्यमुच्यते । तत्र येषु नाहवनीयः, तेषु सर्वेषु लौकिकोऽग्निरङ्गम् । तस्मिन् गृह्याणि इत्यादिग्रन्थः तन्त्ररत्नमिति भाट्टदीपिका) ।

सोम—(उपनयने आधानासंभवेऽपि) इह आधानं संभवति इति पूर्ववैषम्येण प्रत्यवस्थानात् **संगतिः** । **सूत्रार्थस्तु**– स्थपतीष्टिः यथा प्रयाजं प्रयोजयति, एवमग्न्याधेयमपि प्रयोजयेत् । एवं सति अग्निमत्त्वात् इतरेष्वपि कर्मसु अधिकारः स्यात् इति कस्यचित् शङ्का स्यात् इति मत्वा आह–– तादर्थ्याच्चापवृज्येत इति । तेन आधानस्य संस्कारापवर्गात् अग्निमत्त्वाभावात् न कर्मान्तरेष्वधिकार इति ।

वि— 'स्थपतीष्टिर्वैदिकेऽग्नौ लौकिके वा, ऽऽद्य आक्षिपेत् । आधानमिष्टि, रन्त्यः स्यादवैधेनाग्न्यसंस्कृतेः ॥'

भाट्ट— निषादेष्टेः दर्शपूर्णमासविकृतित्वादतिदेशेन आहवनीयादिप्राप्तौ तेषामाधानाधीनत्वात् असत्यपि तस्य स्वतन्त्राधानविधौ निषादेष्टिरेव अस्याधानं प्रयोजयेत् । इति प्राप्ते, सत्यपि तस्य अग्निजनकाकाङ्क्षत्वे जनकीभूतस्याधानस्य ब्राह्मणादिकर्तृकत्वेनैव उत्पन्नत्वात् निषादकृतेनाग्निनिष्पत्तौ प्रमाणाभावात् प्रकृतौ परप्रयुक्ताग्न्युपजीवनेन इहाहवनीयादिप्राप्तेरेवाभावाच्च न तेषु सा । विद्यायास्तु तद्व्यतिरेकेण निषादेष्टेरेव असंभवात्तदुपायस्य लौकिकत्वेन आक्षेपोपपत्तिरिति वैषम्यम् । तेन आहवनीयाद्यनाक्षेपकत्वेऽपि 'यत्र क्वचन होष्यन् स्यात् पञ्चभूसंस्कारान् कृत्वा लौकिकाग्निं प्रतिष्ठापयेत्' इति स्मृतिवचनेन अग्न्यन्तराभावे होममात्रोद्देशेन लौकिकाग्निविधानात् तमेव तद्देशे स्थापयित्वा तेष्विष्टिः कार्या । यत्तु 'तस्मिन् गृह्याणि' इति गौतमवचनं लौकिकाग्निप्रापकत्वेन तन्त्ररत्ने उदाहृतम्, तत् गौतमस्मृतौ तच्छब्देन स्मार्ताग्नेरेव परामर्शात्

निषादेष्टेश्च गृह्यत्वाभावादुपेक्षितम् । नहि गृहशब्दवाच्यदंपत्योर्हितमिति व्युत्पत्त्या अस्यापि गृह्यपदवाच्यत्वम्, अभियुक्तप्रसिद्धया गृह्यपदस्य गृह्यसूत्रोक्तकर्मस्वेव रूढत्वेन योगस्याप्रयोजकत्वात् । इतरथा गृह्यत्वापत्तेः ।

मण्डन—'यागं कुर्याल्लौकिकेऽग्नौ निषादः ।' ४.

शंकर—'स्थपतीष्टिस्तथैव स्यात् ।' तथैव उपनीतिवत् लौकिकेऽग्नौ । ४.

* **निषादस्थपतीष्ट्यादौ** आहिताग्नित्वस्य अनतिदेशः । राजत्वादेस्तु कर्तृविशेषणत्वात्, तस्य च प्रकृतौ अङ्गत्वात् विकृतौ अतिदेशः इष्ट एव । **भाट्ट.** ८।१।४ पृ. ८.

⌛ **निषादस्थपतिन्यायः** । रौद्रे चरौ निषादजातीयस्य स्थपतेरधिकारः ॥

स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् । ६।१। १३।५१ ॥

भाष्यम्—'वास्तुमध्ये रौद्रं चरुं निर्वपेत्, यत्र रुद्रः प्रजाः शमयेत्' इत्येतामिष्टिं प्रकृत्य उच्यते 'एतया निषादस्थपतिं याजयेत्' इति । निषादस्थपतिं प्रति संदेहः किं अधिकृतानां अन्यतमः, उत अन्य एवेति । अन्यतमः इति ब्रूमः । स हि समर्थः विद्वत्त्वात् अग्निमत्त्वाच्च । अन्यः अविद्वत्त्वात् अनग्नित्वात् असमर्थः इति । ननु निषादस्थपतिशब्दः तत्र नोपपद्यते । उच्यते । न नोपपद्यते, निषादानां स्थपतिः इति षष्ठीसमासो भविष्यति श्रेष्ठो निषादानाम् । तस्मात् अधिकृताधिकारं एतच्छास्त्रमिति । **एवं प्राप्ते, ब्रूमः ।** निषादः एव स्थपतिर्भवितुमर्हति । कस्मात् ? शब्दसामर्थ्यात् । निषादं हि निषादशब्दः शक्नोति वदितुं श्रवणेनैव । निषादानां तु स्थपतिं लक्षणया ब्रूयात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा । अथोच्यते, नैष दोषः । निषादशब्दो निषादवचन एव । षष्ठी संबन्धस्य वाचिकेति । तन्न । षष्ठ्यश्रवणात् । नात्र षष्ठीं शृणुमः । आह, लोपसामर्थ्यात् षष्ठ्यर्थोऽवगम्यते इति । सत्यमवगम्यते । न तु लोपेन । केन तर्हि ? निषादशब्दलक्षणया । तस्याश्च दौर्बल्यं इत्युक्तम् । समानाधिकरणसमासस्तु बलीयान् । तत्र हि स्वार्थे शब्दौ वृत्तौ भवतः । द्वितीया च विभक्तिः तन्त्रेण उभाभ्यां संबध्यते । तेन द्वितीयानिर्दिष्टो निषादो गम्यते । तत्र षष्ठ्यर्थं कल्पयन् अश्रुतं गृह्णीयात् । तस्मात् निषाद एव स्थपतिः स्यात् ।

टुप्— (सिद्धान्तमाह–) कर्मधारयोऽयम्, न षष्ठीतत्पुरुषः । (कुतः ?) एवं (हि सति) पदद्वयम् (अपि) स्वार्थवृत्तम् (भवति), इतरथा (षष्ठीसमासे) निषादशब्दो लक्षणया स्थपतौ अध्यारोपितः स्यात् (किमिति लक्षणा इत्यत आह–) सामानाधिकरण्यसमासप्रतिपत्त्यर्थम् । (नीलोत्पलसमासेऽपि) उत्पलशब्दस्यापि तदेवाधिकरणम् (प्रतिपाद्यम्) नीलशब्दस्यापि (तदेव) अतः (ऐकाधिकरण्यात् एकार्थीभावलक्षणम्) सामर्थ्यम् (सिध्यति), सामर्थ्याच्च समासः । षष्ठीसमासे च (ऐकाधिकरण्यसिद्ध्यर्थम्) लक्षणा (आश्रयितव्या) । अन्यथा (यदि च निषादशब्देन निषाद एवोच्यते, स्थपतिशब्देन च स्थपतिरेव अर्थान्तरभूत उच्यते, ततः) भिन्नाधिकरणत्वात् सामर्थ्याभावः, सामर्थ्याभावाच्च समासाभावः । तस्मात् (समाससिद्ध्यर्थम्) निषादशब्देन स्थपतिं यावत् गतव्यं इत्येषा लक्षणा । न चात्र षष्ठी विद्यते, अनुपलभ्यमानत्वात् । लुप्ता (षष्ठी विद्यते) इति चेत्, उच्यते । यदि अत्र अश्रवणेन (कारणेन) लोपः (षष्ठ्याः कल्प्यते, ततः) स्यादयः (शब्दाः) लुप्ताः इति किमिति न कल्प्यते (अश्रवणाविशेषात्) । तस्मात् लोपे नास्ति प्रमाणम् । ततो राजपुरुष इत्यत्रापि राजा चासौ पुरुषश्च इतीदृशो विग्रहः कर्तव्यः । तत्रापि षष्ठी अश्रवणादेव नास्ति । किन्तु स्वस्वामिसंबन्धात् (राजपुरुषयोः, राजशब्दे) षष्ठ्यर्थमध्यारोप्य तदा (षष्ठीसमासवेलायाम्) समासो भवति । राज्ञः पुरुषः इति (विग्रह–) वाक्यं अर्थप्रदर्शनार्थम् (स्पष्टीकरणार्थमिति यावत्) । तस्मात् स्थपतिशब्दे या (द्वितीया–) विभक्तिः, सा इतरत्र (निषादशब्दे) अनुषज्यते (निषादं स्थपतिं इति) अन्यस्याः (षष्ठ्याः) अश्रवणात् । अथवा समुदायात् (समस्तात् निषादस्थपतिशब्दात्) उत्पन्नत्वात् (द्वितीया विनैव अनुषङ्गेण) उभयत्रापि द्रष्टव्या । ('तस्मा-

न्नान्यो निषादार्थात् स्थपतिर्लक्षणाभयात् । भवेन्निषाद एवासौ स्थपतिः शब्दशक्तितः ।। ’)

लिङ्गदर्शनाच्च । ५२ ।।

भाष्यम्-- लिङ्गं दृश्यते ‘कूटं दक्षिणा’ इति निषादस्य द्रव्यं दर्शयति । कूटं हि निषादानामेव उपकारकं नार्याणाम् । एवं स्वमेव तत् निषादानामिति ।

शा-- ‘ऐन्द्रं वास्तुमयं चरुं निर्वपेत्’ इति प्रकृत्य श्रूयते ‘एतया निषादस्थपतिं याजयेत्’ इति । तत्र ‘**पक्षद्वयेऽपि शब्दोऽयं योगादेव प्रवर्तते । तत्र षष्ठीसमासत्वे विदुषः स्यादधिक्रिया ।। आहिताग्नेश्च, यदि तु कर्मधारय इष्यते । अनाहिताग्नेरज्ञस्य प्रसज्येताधिकारिता ।। तेन षष्ठीसमासोऽयमिति प्राप्तेऽभिधीयते । निषादपदमेवं तु स्थपतौ लक्षणां व्रजेत् ।। नहि षष्ठी श्रुता, येन तत्संबन्धी विधिर्भवेत् । निषादपदमेवातः षष्ठ्यर्थं लक्षयेदिदम् ।। कर्मधारयपक्षे तु न काचिदपि लक्षणा । निषाद एव स्थपतिरतः श्रुत्या प्रतीयते ।। तेन श्रुतिबलादङ्गोऽनाहिताग्निश्च सन्नपि । निषाद एव स्थपतिः कर्मण्यत्राधिकारभाक् ।।**’

सोम--पूर्ववैषम्येण प्रत्यवस्थानात् संगतिः । निषादो नाम ब्राह्मणात् शूद्रायामुत्पन्नः । स तु शूद्रधर्मयुक्तः । अत एव **आपस्तम्बाचार्यैः** ‘हविष्कृदाधाव इति शूद्रस्य’ इत्ययं निषाद एव शूद्रशब्देन व्यवहृतः । एवं च शूद्रयाजनस्य निषिद्धत्वात् अतिक्रान्तनिषेधानामेव याजकत्वं बोध्यम् ।

वि--‘द्विजः स्थपतिरन्यो वा, द्विजः षष्ठीसमासतः ।, कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत् ।।’

भाट्ट-- ‘रौद्रं वास्तुमध्ये चरुं निर्वपेत्’ इति प्रक्रम्य ‘एतया निषादस्थपतिं याजयेत्’ इति श्रुतम् । तत्र यद्यपि निषादः स्थपतिर्यस्य इति बहुव्रीहौ पदद्वयेऽपि अन्यपदार्थलक्षणा इति स नाश्रीयते । तथापि निषादानां स्थपतिः इति षष्ठीतत्पुरुषे तदभावात्, विद्याऽऽक्षेपशक्तिकल्पनाभिया कर्मधारयाङ्गीकारेण स एवाश्रीयते । न च तत्रापि पूर्वपदे निषादसंबन्धिनि लक्षणा, कारणाभावात् । यद्यपि हि क्लृप्तावयवार्थयोगेनैव उपपत्तौ न समासे विशिष्टार्थशक्तिकल्पना प्रामाणिकी **तथापि** कर्मधारये अभेदस्येव षष्ठीतत्पुरुषादावपि स्वस्वामिभावादिभेदसंबन्धस्य संसर्गविधयैव भानोपपत्तेः लक्षणायामनुपपत्त्यभावः । न च नैयायिकवत् अस्माकं नामार्थयोरभेदान्वय एव इत्यत्र प्रमाणमस्ति । राजा पुरुषोऽस्ति इत्यादौ सर्वत्र नामार्थस्य विभक्त्यर्थे, तस्य च आख्यातार्थे अन्वयाङ्गीकारेण परस्परान्वयस्य समासातिरिक्ते क्वापि अप्रसक्तत्वात् । अतः समासे एव प्रसक्तस्य तस्य संसर्गविधयैव भानोपपत्तेः न लक्षणा । इति **प्राप्ते**, समानाधिकरणपदस्थले राजा पुरुषोऽस्ति इत्यादौ क्रियाऽन्वयोत्तरं पार्ष्ठिकान्वयस्य अभेदसंबन्धेनैवानुभवात् राज्ञः पुरुषोऽस्ति इत्यादौ व्यधिकरणपदस्थले च भेदसंबन्धेनैव अनुभवात् लाघवेन नामप्रयोज्यतदर्थान्वयबोधस्य अभेदविषयकत्वमेव इति नियमकल्पनात् स्वस्वामिभावादिसंबन्धस्य षष्ठीतत्पुरुषादौ संसर्गविधया भानानुपपत्तेः अवश्यं पूर्वपदे स्वार्थसंबन्धिलक्षणामङ्गीकृत्य तस्य उत्तरपदार्थे अभेदेनान्वयः इत्यङ्गीकार्यम् । अत एव नामप्रयोज्यनामार्थविशेष्यकनामार्थप्रकारकाभेदसंसर्गकबोधत्वावच्छिन्नं प्रति एकाधिकरणवृत्तिप्रातिपदिकार्थताऽवच्छेदकनामद्वयसमभिव्याहारस्य द्वंद्वभिन्ननामद्वयसमभिव्याहारस्य वा तन्त्रत्वं इत्यपि बोध्यम् । तेन धवखदिरौ, नीलघटौ इत्यादौ नाभेदबोध इत्यपि बोध्यम् । न चैवं समासे संबन्धिनः अभेदेन अन्वयात् विग्रहे च राज्ञः पुरुष इत्यत्र षष्ठ्यर्थसंबन्धस्य भेदेनान्वयात् वृत्तिवाक्ययोः भिन्नार्थत्वापत्तेः एकविधानेन इतरनिवृत्त्यनापत्तौ विभाषासूत्रवैयर्थ्यापत्तिः इति वाच्यम् । एकतरबोधे इतरबोधस्य आवश्यकत्वेन अर्थैक्याभिप्रायात् । अतश्च षष्ठीतत्पुरुषे लक्षणाऽऽपत्तेः निषादश्चासौ स्थपतिश्च इति कर्मधारय एवायम् । तेन तावद्विषये विद्यामाक्षिप्य अनाहिताग्नेरपि निषादस्यैवाधिकारः । अत एव ‘कूटं दक्षिणा स्वं हि तन्निषादानाम्’ इति लिङ्गमपि संगच्छते । तत्र च परप्रयुक्तोपजीवित्वात् आहवनीयाद्यनाक्षेपेऽपि ‘यत्र क्वचन होष्यन् स्यात् स पञ्चभूतसं-(भूसं-) स्कारान् कृत्वा लौकिकाग्निं प्रतिष्ठापयेत्’ इति स्मृतिवचनेन अग्न्यन्तराभावे होममात्रोद्देशेन

लौकिकाग्निविधानात् तमेव तत्तद्देशे स्थापयित्वा तस्मिन् इष्टिः कर्तव्या इति ध्येयम् ।

मण्डन-- ' स्थपतिस्तु निषादः स्यात् । '

शंकर-- ' स्थपतेश्च निषादस्य । ' अधिक्रिया रौद्रेष्टौ ।

अत्र ' वास्तुमध्ये रौद्रं चरुम् ' इति **भाष्यम्** । ' ऐन्द्रं वास्तुमयं चरुम् ' इति **शा.** । ' वास्तुमयं वास्तुशाकबीजप्रकृतिकम् ' इति **सोम.** । ' वास्तुशाकः वास्तुकं चन्दनबथुआ (इति उत्तरापथे) चन्दनबटवा (इति दक्षिणापथे) इति **अमरटीकायाम्** । ' वास्तुमयं रौद्रं चरुम् ' इति , ' वास्तुशब्दः किञ्चित्प्रकृतिकद्रव्यविशेषमाह ' इति च **विस्तरः** ।

* चशब्देन ब्रह्मलोक इत्यत्र **निषादस्थपतिन्यायोऽपि** कर्मधारयसमासग्रहणे सूचितः । **श्रीकर.** १।३।१५ **ब्रसू.**, * **निषादस्थपतिन्यायेन** शूद्रस्य औपनिषदब्रह्मवाक्यश्रवणाधिकारोऽस्तीत्याशङ्क्य निराकरोति । १।३।३६ **ब्रसू.** * ' ऊकालः ' इत्यत्र **निषादस्थपतिन्यायेन** क्लृप्तसमाहारद्वंद्वे अपरनिमित्तकत्वेन अन्तरङ्गत्वस्य बाधकत्वकल्पनायामेव दीर्घनिर्देशः उपपद्यते । **भूतिः.** पृ. १७०. * ननु शूद्राणामपि पुराणश्रवणादिना ज्ञानोत्पत्तेः निषादस्थपतिन्यायेन महावाक्यग्रहणाधिकारसंभवात् । **श्रीकर.** १।३।३४ **ब्रसू.** * यत्तु व्रीहित्वाद्यवच्छिन्नोद्देशेनैव प्रोक्षणादिविधिः शाब्दबोधे लक्षणाया अनङ्गीकारात्, पश्चात्तु निषादस्थपतिन्यायेन प्रोक्षणादिविशिष्टव्रीहीणां वाक्यान्तरकल्पनया अपूर्वार्थकत्वकल्पनं इत्युक्तं तन्न । **भाट्ट.** ९।१।१, * व्रीह्यादीनां आनर्थक्यपरिहारार्थं प्रोक्षणादिविशिष्टव्रीहीणामेव कल्पितवाक्यान्तरेण यागार्थत्वस्य अपूर्वार्थत्वस्यैव वा बोधोपपत्तौ निषादस्थपतिन्यायेन व्रीहिपदे यवादिसाधारण्येन अपूर्वसाधनत्वलक्षणायां प्रमाणाभावात् । ९।१।१.

* **निषादस्थपतिपदे** तत्पुरुषबहुव्रीह्यपेक्षया लक्षणाऽभावलाघवेन कर्मधारयः अङ्गीकृतः । अङ्गीकृतं च फलमुखं अध्ययनप्रयुक्तं गौरवं इत्याहुः । **मणि.** पृ. १५२.

* **निषादस्थपतिशब्दस्य** षष्ठीतत्पुरुषे कृते त्रैवर्णिकोऽपि संभवति तादृशः । कर्मधारये कृते तु निषादजातीयो धनिकः सः । तत्पुरुषाच्च कर्मधारयः प्रबलः । तथा च निषादजातीयस्यैव रौद्रयागाधिकारः । **के.** ६।१।१३।५१-५२.

* **निषिद्धस्य** प्रतिप्रसवविधिः, यथा ग्रहणे सूतकेऽपि श्राद्धविधिः ' स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ' इति अयं स्मार्तः । श्रौतोऽपि ' न हिंस्यात् सर्वभूतानि ' इति निषिद्धस्य ' अग्नीषोमीयं पशुमालभेत ' ' वायव्यं श्वेतमालभेत ' इति । **बाल.** पृ. १६.

* **निषिद्धाचरण**जन्ययज्ञवैगुण्यपरिहारार्थम् ' भूर्भुवः स्वः स्वाहेत्याहवनीये जुहुयात् ' । **वि.** १२।३।५.

* **निषिद्धद्रव्यस्य** प्रतिनिधित्वाभावः । **भा.** ६।३।६।२०.

* **निषेधः** अकर्तव्यत्वप्रतिपादनात्मकः । **सु.** पृ. ८, * निषेधः । अननूदितनिषेधायोगः । पृ. १३८०. * निषेधः अनृतवदनस्य क्रतुशेषः दर्शपूर्णमासयोः । **वि.** ३।४।८. * निषेधः जर्तिलयवाग्वादेः पयोहोमविध्यर्थवादः । अग्निहोत्रे । **भा.** १०।८।४।७. * निषेधः प्रवर्ग्यस्य अनूचानव्यतिरिक्तकर्तृके अग्निष्टोमप्रथमप्रयोगे एव । **वि.** ३।३।१७. * **निषेधाः** अनर्थहेतुकर्मणः सकाशात् पुरुषस्य निवृत्तिकरत्वेन पुरुषार्थानुबन्धिनः । **मीन्या.** * **निषेधेन** स्वविषये अनिष्टसाधनत्वाक्षेपः क्रियते । **भाट्ट.** ३।४।८ पृ. ३१८. * **निषेधस्य** अन्यार्थाश्रितस्य, अन्यार्थत्वे ' तदहर्मांसमैथुने वर्जयेत् ' इति दर्शपूर्णमासप्रकरणाधीतो निषेध उदाहरणम् । **सु.** पृ. ३२१, * निषेधस्यापि विधिवत् वाक्यार्थरूपा भावना विषय एव, न तु धात्वर्थस्यैव विषयिणी । पृ. २०१, * निषेधस्य प्राप्तविषयत्वनियमः । पृ. १०४१, * निषेधस्य प्राप्त्यपेक्षत्वात् दुर्बलाया अपि प्राप्तेः निषेधेन अत्यन्तबाधायोगः दशमाधिकरणपूर्वपक्षसूत्रे वक्ष्यते (१०।८।१।१) । पृ. १३१८, * निषेधस्य फलं निषेध्यानिष्टासंयोगः । पृ. २६४, * क्रत्वर्थत्वपुरुषार्थत्वपक्षयोः द्वयोरपि श्रौतस्य निषेधस्य क्रतुवैगुण्यपरिहारफलकत्वम् । पृ. १३९५. * **निषेधेषु** नरकाद्भीतस्याधिकारः, न तु स्वर्गकामिनः । **वि.** ६।२।५. * निषेधेषु निवर्तना वाक्यार्थः । **मीन्या.**

* **निषेधातिक्रमे** पुरुषस्य प्रत्यवायः । कलञ्जन्यायः द्रष्टव्यः । **के.** ६।२।५।२०–२१.

* **निषेधानुमितस्य** अश्रुतपदप्रयोगस्य विकृतौ निवेशः । **संकर्ष.** ४।३।१९.

* **निषेधानुवादः** कार्यापत्तिप्रमाणम् । **बाल.** पृ. ८.

* **निषेधफलं** प्रदर्शनमात्रेणैव संबध्यते न विधिफलवत् कामपदोपबन्धं अपेक्षते । नहि कश्चित् संत्यक्तव्यमर्थं कामयते । **वा.** ३।४।६।१७.

* **निषेधफलविधिः** अर्थवादः ‘ तस्माद् ब्राह्मणाय नावगुरेत ’ इति निषेधे ‘ यो ब्राह्मणायावगुरेत् तं शतेन यातयात् ’। तृतीये शंय्वधिकरणे । **बाल.** पृ. ५३.

* **निषेधविध्यर्थवादो** यथा ऐतरेयब्राह्मणे ‘ हिरण्यकशिपावासीन आचष्टे ’ इति होतृकर्तृकस्य क्रत्वर्थस्य ‘ पुत्रकामा हाप्याख्यापयेरन् ’ इति च पुरुषार्थस्य शौनःशेपाख्यानविधेः वाक्यशेषे ‘ नियोक्तारं न विविदुः ’ ‘ विशसितारं न विविदुः ’ इति शामित्रकर्त्रलाभोक्त्या ‘ मह्यमपरं शतं दत्त , अहमेनं विशसिष्यामि ’ इति च लोभात् प्रवृत्त्युक्त्या शामित्रे दोषावगतेः निन्दया तन्निषेधः कल्प्यते । यद्यपि चात्र ‘ न हिंस्यात् ’ इति सामान्यनिषेधः ऋत्विजां स्वाधिकारिकः पराधिकारिकेण सामाख्यानिकेन कर्तृत्वमात्रतया ऋत्विजः स्पृशताऽपि अबाधितः प्रवृत्तोऽस्ति । अत एव तृतीये (३।७।१३।२८–२९) ‘ शमिता च शब्दभेदात् ’ इत्यधिकरणे वार्तिककृता उक्तम् ‘ अत एवार्त्विज्यं निन्दति ’ इति , तथापि विशेषनिषेधः दोषविशेषार्थत्वेन अर्थवानेव इति । **बाल.** पृ. ५७.

⧗ **निषेध्यबोधाद्धिनिषेध्यबाध इति न्यायः ।** निषेध्यज्ञानान्निषेध्यस्य बाधो भवति , नान्यथेत्यर्थविषयेऽस्य प्रचार इति शंकरविजये । **साहस्री.** ८९३.

* **निष्कासः** नाम आमिक्षायाः पात्रलिप्तः कियांश्चित् भागः । स्थालीलिप्तः ओदनस्य भागश्च (खरपुडी इति भाषायाम्) । **के.** * निष्कासः पात्रलग्नः शेषः । **सोम.** ७।३।४. * निष्कासः प्रायणीयस्य उदयनीयनिर्वापार्थः ज्योतिष्टोमे । **भा.** ११।२।१६।६६–६८. * निष्कासः लेपः । ‘ वारुण्या निष्कासेन तुषैश्चावभृथमवयन्ति ’। वारुणी आमिक्षा । **वि.** ७।३।४. * निष्कासः वरुणप्रघासावभृथे , अर्थकर्मणा ह्यस्य गुणभूतस्य संयोगो विज्ञायते । **भा.** ११।२।१५।६५.

⧗ **निष्कासस्यावभृथे तदेकदेशत्वात् पशुवत् प्रदानविप्रकर्षः स्यात् । ११।२।१५।६३॥**

वरुणप्रघासेषु ‘ वारुण्या निष्कासेन तुषैश्च अवभृथमभ्यवयन्ति ’ इति श्रूयते । वारुणी वरुणदेवताका आमिक्षा , तस्याः निष्कासः भाण्डलिप्तो भागः । एतद्वचनोक्तस्य अवभृथे निष्कासस्य प्रदानविप्रकर्षः स्यात् । आवापस्थाने आमिक्षाया एको भागः यवपिष्टमयमेषसहितः प्रदत्तः । निष्कासरूपस्य तु भागस्य विप्रकर्षेण समिष्टयजुरूर्ध्वं विहारे एव प्रदानं कर्तव्यम् । अवभृथशब्दस्तु भक्त्या अनुवादमात्रम् । निष्कासस्य तस्या आमिक्षाया एव एकदेशत्वात् । पशुवत् । ‘ वपया प्रातःसवने चरन्ति , पुरोडाशेन मध्यंदिने , अङ्गैस्तृतीयसवने ’ इति पशोर्भागानां यथा कालतो विप्रकर्षो भवति तद्वत् । इति पूर्वः पक्षः ।

अपनयो वा प्रसिद्धेनाभिसंयोगात् । ६४ ॥

सिद्धान्तमाह । वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । निष्कासस्य पूर्वस्मात् कर्मणः सकाशात् अपनयः कर्तव्यः । अवभृथाख्ये अपूर्वे एव कर्मणि निष्कासस्य विनियोगः स्यात् । प्रसिद्धेन अवभृथशब्देन निष्कासस्य अभिसंयोगात् संबन्धात् , तादृशसंबन्धस्य वचनेनोक्तत्वात् । तथा च निष्कासादेः न प्रदानविप्रकर्षः किन्तु कर्मान्तरोपदेशोऽयम् ।

प्रतिपत्तिरिति चेत् । ६५ ॥

पूर्वपक्षी शङ्कते । निष्कासस्य आमिक्षाशेषत्वात् उपयुक्तशेषत्वात् अवभृथगमनं पतिपत्तिः स्यात् , नार्थकर्म इति चेत् ।

न , कर्मसंयोगात् । ६६ ॥

सिद्धान्ती उत्तरमाह , न प्रतिपत्तिः । कुतः ? कर्मसंयोगात् अर्थकर्मणा हि अस्य गुणभूतस्य निष्कासस्य संयोगात् संयोगविज्ञानात् निष्कासेन इति तृतीयासामर्थ्यात् । तस्मात् कर्मान्तरोपदेशः इति सिद्धान्तः । **के.**

* **निष्कासावभृथाधिकरणम्** । अवभृथधर्मैककर्मान्तरस्य० (मीको. भाग: २ पृ. ७०३–७०५) इत्यत्र द्रष्टव्यम् । के. ११।२।१५।६३–६६.

⧗ **निष्कासावभृथन्याय:** । अवभृथस्य वरुणप्रघासगतस्य तुषनिष्कासद्रव्यकत्वम् ॥

द्रव्यादेशे तद्द्रव्य: श्रुतिसंयोगात् पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् । ७।३।५।१७ ॥

भाष्यम्— वारुणप्राघासिकोऽवभृथ: सौमिकात् अवभृथात् धर्माणां ग्राहक: इत्युक्तम् । तत्रेदं चिन्त्यते । किं पुरोडाशद्रव्यकोऽसौ , उत तुषनिष्कासद्रव्यक इति । किं प्राप्तम् ? पुरोडाशद्रव्यक इति । कुत: ? नाम्ना पुरोडाश: प्राप्यते । ननु प्रत्यक्षश्रुतं तुषनिष्कासम् । सत्यं प्रत्यक्षश्रुतम्, न तु शक्यते विधातुम् । अवभृथोऽत्र विधीयते 'अवभृथं यन्ति' इति । यदि तुषनिष्कासं अपरं विधीयेत, ततो वाक्यं भिद्येत, अवभृथं यन्ति, तच्च तुषनिष्कासेन इति । तुषनिष्कासश्रवणमिदानीं किमर्थम् ? अनर्थकम्, संबन्धाभावात् । एवं प्राप्ते, **ब्रूम:** । द्रव्यादेशे तद्द्रव्य: । द्रव्यादेशे एतस्मिन् 'तुषनिष्कासेन अवभृथं यन्ति' इति, तद्द्रव्य: स्यात् तुषनिष्कासद्रव्य: । कुत: ? श्रुतिसंयोगात् । तुषनिष्कासं प्रत्यक्षश्रुतम्, पुरोडाशस्तु आनुमानिक: अतिदेशेन प्राप्यते । ननु पुरोडाशोऽपि प्रत्यक्षश्रुतो नाम्ना । यद्यपि प्रत्यक्षश्रुत:, सामान्येन तु प्राप्यते । तुषनिष्कासं तु विशेषेण । बाध्यते च सामान्यं विशेषेण । अपि च लक्षणया पुरोडाशो गम्यते, श्रुत्या तुषनिष्कासम् । श्रुतिलक्षणयोश्च श्रुतिर्न्याय्या । तस्मात् तुषनिष्कासद्रव्यक: इति । अथ यदुक्तं न संबध्यते अवभृथेन तुषनिष्कासम्, वाक्यभेदप्रसङ्गादिति । **तत्र ब्रूम:** । यदि अवभृथं विहाय तुषनिष्कासं विधीयेत ततो वाक्यभेद: स्यात् । तुषनिष्कासद्रव्यकोऽपूर्व: अवभृथश्चोद्यते । तथा सगुणकर्मविधानमविरुद्धम् । अविधीयमाने च तुषनिष्कासे तद्ग्रहणमनर्थकमेव स्यात् । तस्मात् तुषनिष्कासद्रव्यक: । पुरोडाशस्तु अनादेशे तत्प्रकृतित्वात् । यदि अत्र प्रत्यक्षश्रुतं न द्रव्यं स्यात् तत: पुरोडाश: तत्प्रकृतित्वात् स्यात् । अत्र तु प्रत्यक्षश्रुतं तुषनिष्कासम्, तस्मान्न पुरोडाश: ।

शा— 'अपूर्वकर्मविधिनाऽनेकेषामपि चोदनात् । अन्यथा तुषनिष्कासपदानर्थक्यदोषत: ॥ तद्विशिष्टविधिस्तेन पुरोडाशस्य बाधनम् । श्रुत्या हि तुषनिष्कासं विशेषेण च चोद्यते ॥' अवभृथशब्देन तु गौणेन सर्वावभृथधर्मसाधारणेन च पुरोडाशस्य प्राप्ति: , तस्मात्तस्य बाध: ।

सोम— पूर्वोक्तकर्मान्तरप्रसङ्गात् इदम् । तुषनिष्कासशब्दस्य मुख्यत्वात् विशेषविषयत्वेन निरवकाशत्वात्, गौणेन धर्मान्तरे सावकाशेन अवभृथशब्देन प्राप्तस्य पुरोडाशस्य बाधात् न तस्य द्रव्यत्वम् । **सूत्रार्थस्तु**— द्रव्यस्य तुषनिष्कासस्य आदेशे तदेव द्रव्यं ग्राह्यं श्रुतिसंयोगात् । द्रव्योपदेशाभावे हि सौमिकावभृथप्रकृतित्वात् तत: पुरोडाशप्राप्ति: इति ।

वि— 'तत्र द्रव्यं पुरोडाशस्तुषनिष्कासकावुत ।, प्राप्तोऽवभृथशब्देन पुरोडाशोऽतिदेशत: ॥ तुषनिष्कासयोरत्र साक्षाच्छ्रुत्युपदेशत: । अतिदेशप्रापितस्य पुरोडाशस्य बाधनम् ॥'

भाट्ट— अतिदेशेऽपि च न तदीयद्रव्यस्य एककपालस्य अतिदेश: । औपदेशिकेन विशेषविहितेन च तुषनिष्कासद्रव्येण लाक्षणिकस्य सामान्यविहितस्य अतिदेशप्राप्तस्य द्रव्यस्य बाधात् । (७।३।४।१२–१६ इत्यत्रैव एतदन्तर्भूतमन्ते) ।

मण्डन— 'साक्षाच्छ्रुतं द्रव्यमिह प्रदेयम् । '

शंकर— 'तद्द्रव्यं न पुरोडाश: । '

* अनुवषट्कारयागस्य प्रतिपत्तिकर्मत्वेऽपि **निष्कासावभृथवाजिनयागन्यायेन** इतिकर्तव्यताऽऽकाङ्क्षायां सोमजन्ययागत्वसादृश्येन अतिदेशोपपत्ते: । कौ. ३।२। १६।३८ पृ. २९७.

* **निष्कासशब्द:** शेषवचन एव, यत् उखायां लग्नं तदनेनोच्यते । भा. ११।२।१६।६७.

* **निष्केवल्यं** शंसति इति शस्त्रं प्रधानकर्म न गुणकर्म । भा. २।१।५।१३–२९.

* **निष्क्रय:** परकीयस्य द्रव्यस्य मूल्यार्पणेन आत्मसात्करणम् । के.

* **निष्ठान्ते** पुनर्नास्ति भावना । **वा.** ९।१।२।२.

* **निष्पक्वं** शिरसि प्रक्षेप्तुं ईषद्विलीनं नवनीतम् । **वि.** ३।४।७.

* **निष्प्रयोजनं** सप्रयोजनेन बाध्यते यथा निगदेषु उच्चैस्त्वेन 'उपांशु यजुषा' इति प्राप्तमुपांशुत्वम् । **बाल.** पृ. १३२.

* **निष्फलत्वं** काम्यस्य अङ्गवैकल्ये । वि. ६।३।२.

⧗ **नीरक्षीरन्यायः ।** यत्र सत्यासत्यविवेचनं तत्रास्य प्रवृत्तिः । यथा जलदुग्धे संमिश्रिते न प्रतीयेते, तथा तथ्यं ब्रह्म, वितथं मिथ्याभूतमज्ञानादि, ते च सम्यङ्मिलिते तादात्म्यं प्राप्ते स्तो न प्रतीयेते । यथा संमिश्रिते नीरक्षीरे हि इदं नीरमिदं क्षीरमिति पृथक्कर्तुं केऽपि पक्षिणो विना हंसं न शक्नुवन्ति, तथा चेदं तथ्यमिदमतथ्यमिति ज्ञातुं विवेकज्ञं परमहंसं विना न कोऽपि शक्नोति पण्डित इति भावः । उक्तं च 'क्षीरं ब्रह्म जगच्च नीरमुभयं तद्योगमभ्याहतं दुर्भेदं त्वितरेतरं चिरतरं सम्यग्विभक्तीकृतम् । येनाशेषविशेषदोषलहरीमासेदुर्षीं शेमुर्षीं सोऽयं शीलवतां पुनाति परमो हंसो द्विजात्यग्रणीः ॥' **साहस्री.** १२५.

* **नीलमुत्पलम्** । कथं तर्हि भवत्यत्र संबन्धो नीलमुत्पलमिति ? उच्यते । भवति न तु श्रुतिलक्षणः, किन्तु वाक्यलक्षणः । उत्पलशब्दसंनिधाने तदपेक्षी नीलशब्दः तेनैकवाक्यतामभ्युपगच्छन् अजहत्स्वार्थवृत्तिः उत्पलविशेषाभिधानपरः उच्चार्यमाणः संबन्धमभ्युपैति । **भा.** ३।१।६।१२ पृ. ६८८.

⧗ **नीलेन्दीवरन्यायः ।** यथा 'नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याऽधरे पाणौ पद्मधिया मधूककुसुमभ्रान्त्या तथा गण्डयोः । लीयन्ते कबरीषु बान्धवजनव्यामोहजातस्पृहा दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि रक्षिष्यसि ॥' इति । **साहस्री.** २०९.

* '**नीलोत्पलवनेष्वद्य** चरन्तश्चारुसंरवाः । नीलकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः ॥' पुरुषकृतः पदसंघातोऽयम् । ('रामाः कौक्षेयसंवीताः कादम्बा इव शोभनाः' इत्युत्तरार्धं न्यायरत्नमालायाम्) । **भा.** १।१।७।२४ पृ. ९५.

* **नीलीरोगाद्युपहतेन्द्रियस्य** चक्षुरस्त्येवेति परैर्दृश्यते, परेण तु नीयमानमुपलभ्य न पश्यतीति ज्ञायते । **वा.** १।२।४।३१ पृ. १४५.

* **नीवाराः** प्रतिनिधिभूताः व्रीहिभिः समानविधानाः । **भा.** ३।६।१४।३७–३८. * नीवाराः यदा 'इन्द्राय मरुत्वते नैवारमेकादशकपालं निर्वपेत्' इत्यादौ प्रकृतिद्रव्यत्वेनैव विहिताः, तदा सदनकरणमन्त्रे 'व्रीहीणां मेध' इत्यत्र 'नीवाराणां मेध' इत्यूहः कर्तव्यः । नीवाराणां प्रतिनिधित्वे तु नोहः इति नवमेऽधिकरणे वक्ष्यते । **के.** ९।३।१।१–२. * नीवाराः व्रीहीणां प्रतिनिधिः । **वि.** ६।३।११. * **नीवारैरपि** आग्नेयोऽष्टाकपाल इति इयं चोदना संपादयितुं शक्यते । **वा.** ६।३।४।१५. * नीवारैः (व्रीहिस्थानीयैः) योऽपि यागं कुर्यात् तेनापि चोदितमेव कृतम् । **भा.** ६।३।३।१२, * **नीवाराणां** व्रीहीणां च न प्रकृतिविकारभावः । ३।६।१४।३९. * नीवाराणां व्रीहिप्रतिनिधित्वे सदनकरणमन्त्रे व्रीहिशब्दस्यानूहः । **वि.** ९।३।९, * **नीवारेषु** जातितो व्रीहिशब्दार्थत्वाभावेऽपि आकारतो व्रीहिशब्दार्थत्वेन प्रोक्षणावघातादिविधयः साक्षादेव नीवारेषु प्रवर्तन्ते । ३।६।१४. * नीवारेषु प्राकृतव्रीहिस्थानापन्नेषु व्रीहिकार्याणामनुष्ठानम् । 'प्राकृतव्रीह्यादिस्थानापन्नेषु' इत्यत्राधिकरणम् । **भा.** ९।२।१२।३९, * नीवारेषु व्रीहित्वेन परिच्छिन्ना व्रीहिव्यक्तयः सन्ति, तासामर्थेन व्रीहिधर्माः क्रियन्ते । ३।६।१४।३८.

* **नीवारादिप्रतिनिधिष्वपि** मुख्यधर्मानुष्ठानं दर्शपूर्णमासादौ । **के.** ३।६।१४।३७–३९.

* '**नृणामकृतचूडानामशुद्धिर्नैशिकी** स्मृता ।' इयं निमित्ततो वाचनिकी व्यवस्था स्मार्ती । **बाल.** पृ. १९.

⧗ **नृपनापितपुत्रन्यायः ।** यत्र अतिनिन्द्येऽपि स्वकीये अतिरम्यताबुद्धिविवक्षा तत्रायमवतरतीति । यथा, इत्थं हि किल लौकिकी गाथा– कस्यचिन्नृपस्य भृत्यो नापित आसीत्, स कदाचित् प्रातरुत्थाय सर्वं पुरमन्विष्यातीव सुन्दरो बालो मे दर्शनाय त्वया अत्रानेय इति नृपेणाज्ञप्तः, स तु नापितो राजाज्ञां श्रुत्वा अखिलपुरमन्विष्य दृष्ट्वाऽपि च तत्रतत्रातिरम्यान् बालान् स्वसुत-

तुल्यान्न मत्वा तानपहाय स्वसुतमेव उपशान्तानलाङ्गाराभं काणं खल्वाटं कृशह्रस्वबाहुजङ्घं स्थूललम्बोदरं राजवेश्मनि नीत्वा राज्ञे निवेदयामास राजन् आनीतोऽयं अतिरम्यतमो बालः। दृष्ट्वा च तं कुरूपं नापितपुत्रं राजा उपहासं मयि कृतवानयं खल इति मत्वा चुकोप, उवाच च– अरे मूर्ख किमिदमिति। नापितश्च कुपितं राजानं ज्ञात्वा कृताञ्जलिपुटो भूत्वोवाच, राजेन्द्रमौले! तव चरणमुपलभे, नायमुपहासः किन्तु मे मनसीत्थमेव निश्चयः– मत्पुत्रसदृशो रम्यस्त्रिलोक्यामपि नास्ति, तव नगरस्य का कथेति। राजा च सत्यमीदृश्येव रागग्रहगृहीतचित्तदशेति कोपं तत्याजेति। तथा, यथा अतिकुरुपेऽपि स्वसुते रागातिशयवशान्नापितस्य सर्वोत्तमत्वधीः तथा केषाञ्चिदाधुनिकपाषण्डिमतानुयायिमन्दधियां प्राक्तनजन्मकुसंस्कारप्रयुक्तरागातिशयवशात् कस्मिंश्चिदतिक्षुद्रेऽपि मते सर्वोत्तमत्वधीः परिहृत्य च सनातनश्रौतस्मार्तपौराणिकोत्तममतानीति न्यायसंगतिरिति। **साहस्री.** ७९.

* **नेत्रे संमील्य हसति,** मुखं व्यादाय स्वपिति इति उपसंख्यानात् समानकर्तृत्वमात्रवाचित्वं क्त्वाप्रत्ययस्य। सु. पृ. ८६७.

* **नेत्रद्वयाञ्जनं** साङ्गमेकपदार्थः। तेन अनेकयजमानके अहीने एकत्र नेत्रद्वयेऽपि अञ्जनं कृत्वा यजमानान्तरे तत् कार्यम्। **भाट्ट.** ५।२।३.

* **नेमाधिकरणम्।** पिकनेमाधिकरणम्। **भा.** १।३।५।१०.

* **नेमशब्दः** अर्धवाची अनार्यप्रसिद्धेरेव। **के.** १।३।५।१०.

* **नेष्टा** नाम ऋत्विक् अध्वर्योः पुरुषः। तृतीयवर्गस्थोऽयम्। अयं तृतीयी तृतीयांशभाक् चतस्रो गाः लभते। **वि.** ३।७।१७.

* **नेष्ट्रीया** इति समाख्यानात् कर्म ज्ञायते। **भा.** ३।७।२०।४१.

* **नैचाशाखं** नाम नगरम्। **भा.** १।२।४।३१–९.

* **नैमित्तिकमतुल्यत्वात्०** (३।६।१३।३६) इति नैमित्तिकाधिकरणसिद्धान्तहेतुपरशब्देन ‘अतुल्यत्वात्’ इत्यनेन द्विरुक्त्यापादकं विध्ययौगपद्यमेव विवक्षितम्। **रसायनम्.** पृ. १५६.

⧗ **नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्। ३।६।१३।३६॥**

क्षत्रियस्य वैश्यस्य च अग्निष्टोमे यजमानस्य सोमचमसस्थाने फलचमसः एव भवति। ये तु मानं क्रयः उपावहरणं अभिषवः इत्यादयः सोमधर्माः, तेषामपि किं फलचमसार्थेषु नैयग्रोधादिफलेष्वपि समानमेव विधानम्, उत चोदकेनैव प्राप्तिः इति संदेहे सिद्धान्तसूत्रमिदम्। नैमित्तिकं राजन्यवैश्यनिमित्तेन निर्वृत्तं फलचमसद्रव्यं सोमेन असमानविधानं स्यात् सोमेन सह समानं विधानं यस्य, तादृशं न स्यात्। क्रयादीनां धर्माणां विधानं सोमस्येव फलचमसस्य साक्षात् न स्यात्। कुतः? अतुल्यत्वात्, फलचमसस्य सोमेन तुल्यत्वाभावात् सोमो नित्यः, फलचमसो नैमित्तिकः। अतो धर्मा अपि क्रयादयः सोमे नित्याः, फलचमसे तु न तथा किन्तु चोदकेन स्युः। **के.**

* ननु फलचमसे सोमत्वाभावात् कथमनुच्छिष्टत्वं संभवतीति। न त्वेष दोषः, स्थानापत्त्या सोमधर्मलाभात्। वक्ष्यति हि **नैमित्तिकमतुल्यत्वाद**समानविधानं स्यात् इति। **वा.** ३।५।२०।५३ पृ. १०२४.

* नैमित्तिकमेव नित्यमपि क्वचित् यत्र संयोगपृथक्त्वं अग्निहोत्रहोमे दधि अग्नीषोमीयपशोर्यूपे खादिरश्च। **भा.** ४।३।३।५–७.

⧗ **नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत। ९।२।५।२३॥**

अग्निष्टोमे ‘यद्योन्यां गायति तदुत्तरयोर्गायति’ इति श्रूयते। तत्र योनिभूतायाः ऋचः परस्तात् तच्छन्दस्के एव केचित् द्वे ऋचौ गृहीत्वा जायमाने तृचे साम गेयम्, उत उत्तरानामको यो ग्रन्थः छन्दोगानां प्रसिद्धः, तत्र पठिता ऋक् उत्तरा नाम। एवं च उत्तराग्रन्थे पठितयोर्द्वयोः ऋचोः योनिवत् गेयं इति विचारे सिद्धान्तमाह। नैमित्तिकम् ‘तद्योन्यां तदुत्तरयोर्गायति’ इति वचनप्राप्तं उत्तरात्वं आनन्तर्यात् उत्तरासंज्ञकग्रन्थपाठेन अव्यवहितयोः अनन्तरत्वात् प्रतीयेत। एवं च

'उत्तरयोर्गायति' इति उत्तराशब्दः संख्यावाचकः इति पूर्वपक्षी मन्यते, तन्न। किन्तु उत्तराग्रन्थपठिते योनेः उत्तरभूते एव ऋचौ उत्तराशब्देन ग्राह्ये इति सिद्धान्तः।

ऐकार्थ्याच्च तदभ्यासः। २४ ॥

अग्निष्टोमे 'उत्तरयोर्गायति' इति उत्तराशब्देन उत्तराग्रन्थपठिते एव द्वे ऋचौ ग्राह्ये। तादृशे एव च तृचे तस्य रथंतरादिसाम्नः अभ्यासः तदभ्यासः स्यात्। तृचशब्दस्य ऐकार्थ्यात् एकार्थत्वस्य उपपन्नत्वात्। एकग्रन्थपठिते ऋक्त्रये तृचशब्दः समञ्जसो भवति। न तु अन्यत्रान्यत्र पठितासु तिसृषु ऋक्षु। तस्मात् उत्तराशब्देन उत्तराग्रन्थपठितयोरेव ग्रहणं इति सिद्धान्तः। के.

⧗ **'नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात्' (३।६।३।१० जै.) इत्यनेन न्यायेन** काम्योऽग्निर्नित्यस्य विकारको भविष्यति। **भा.** १२।४।७।१७.

⧗ **नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात्। ३।६।३।१०॥**

पूर्वोक्तस्यापवादस्यापवादोऽयम्। दर्शपूर्णमासप्रकरणे 'गोदोहनेन पशुकामस्य प्रणयेत्' इति, अग्नीषोमीये पशौ यूपं प्रकृत्य 'बैल्वो ब्रह्मवर्चसकामस्य' इति च श्रूयते। नित्याग्निहोत्रार्थं दर्शे सांनाय्यार्थं च यस्मिन् पात्रे गौर्दुह्यते तत् पात्रं गोदोहनं नाम। तत्र गोदोहनं बिल्वश्च किं प्रकृतौ निविशते, विकृतौ वा इति संदेहे प्रकृतेः चमसाख्येन पात्रेण खदिरादिना च निराकाङ्क्षत्वात् अव्यवहितपूर्वेण न्यायेन विकृतौ निवेशः इति उत्सूत्रे पूर्वपक्षे प्राप्ते सिद्धान्तयति सूत्रम्। तुशब्दः अपवादस्यापवादसूचकः। नैमित्तिकं पशुकामेन निमित्तेन निर्वृत्तं गोदोहनं प्रकृतौ दर्शपूर्णमासयोः तद्विकारः चमसविकारः चमसस्य बाधकं स्यात्। संयोगविशेषात् नित्यनैमित्तिकसंयोगभेदात् सामान्यविशेषसंयोगभेदाच्च। चमसो नित्यः, गोदोहनं नैमित्तिकम्। प्रकरणं सामान्यम्, निमित्तं च विशेषः। नैमित्तिकेन नित्यं विशेषेण च सामान्यं बाध्यते। एवं पशौ अपि यूपे खादिरपालाशरौहितकाः सामान्येनोक्ताः, बिल्वो विशेषविहितः काम्यत्वान्नैमित्तिकश्च। तस्मात् गोदोहनं बिल्वश्च प्रकृतौ एव निविशेते न विकृतौ। के.

* नैमित्तिकं नित्येन असमानविधानम्। **भा.** ३।६।१३।३६. * नैमित्तिकं नित्यात् प्रबलम्। 'असंजातविरोधं हि नित्यं सर्वं विधीयते। नैमित्तिकं तु तदभ्यासविषयत्वाद्विरुध्यते॥' 'किञ्च प्रयोगसामान्ये नित्यं सर्वं विधीयते। नैमित्तिकं विशेषे तु तस्मात् तद् बलवत्तरम्॥' वा. ३।६।३।१० पृ. १०३३. * नैमित्तिकं प्रकृतौ निविशते। **भा.** ३।६।३।१०.

* **नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात्। ३।३।१२।३३॥** वाशब्दः पूर्वपक्षोक्तस्य हेतोः प्रतिज्ञायाश्च व्यावृत्त्यर्थः। नैमित्तिकशब्दः प्रथमप्रयोगनिमित्तत्वसिद्धान्तप्रतिज्ञार्थः। कर्तृसंयोगात् इत्यस्य प्रथमशब्दस्य प्रयोगे एव कर्तृसंयोगोपपत्तेः इत्यर्थः। लिङ्गस्येति यज्ञशब्दसामानाधिकरण्याख्यस्य लिङ्गस्य इत्यर्थः। तन्निमित्तत्वात् प्रथमप्रयोगनिमित्तकत्वात् इत्यर्थः। (इति **सुधासंक्षेपः** प्रकृतसूत्रगतः)।

* नैमित्तिकं हि कर्म स्वरूपमात्रे न समवैति, किन्तु यस्मिन् प्रयोगे निमित्तमुपजनितं तस्मिन्नेव प्रयोगे। ततश्च प्रयोगान्तरे क्रियमाणे नास्ति साद्गुण्यम्। **सोम.** ६।५।१८.

⧗ **नैमित्तिकानि न नित्यत्वप्रयुक्तानि ॥**

नैमित्तिके विकारत्वात् क्रतुप्रधानमन्यत् स्यात्। ४।३।२।४॥

भाष्यम्— अस्ति ज्योतिष्टोमे नैमित्तिकम् 'बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य' इति। तथा अग्नौ नैमित्तिकम् 'साहस्रं प्रथमं चिन्वानश्चिन्वीत, द्विसाहस्रं द्वितीयं, त्रिसाहस्रं तृतीयम्' इति। तथा दर्शपूर्णमासयोः श्रूयते 'गोदोहनेन पशुकामस्य प्रणयेत्, कांस्येन ब्रह्मवर्चसकामस्य, मार्तिकेन प्रतिष्ठाकामस्य' इत्येतानि नैमित्तिकानि। तेषु संदेहः किमेतान्येव नैमित्तिकानि नित्यार्थे, उत अन्यत् तत्र नित्यार्थे, इति।

किं प्राप्तम्? एतान्येवेति। कुतः? अत्र ब्रह्मसामादिभिरवश्यं भवितव्यम्। चोदितानि हि तानि, संनिहितानि साधनानि आकाङ्क्षन्ति। न चैषां सन्ति

विहितानि साधनानि । समीपतश्च नैमित्तिकानि उपनिपतन्ति । तैः प्रकृतैः संनिहितैरेतानि निराकाङ्क्षीक्रियन्ते इत्येतन्न्याय्यम् । कथम् ? नैमित्तिकं हि संनिहितं वाक्यादवगम्यते, नान्यत् श्रूयते । यावांश्च श्रुतस्योत्सर्गे दोषः तावानेव अश्रुतकल्पनायाम् । आह, ननु निमित्तार्थानि तानि प्रकृतानि । उच्यते । नैष दोषः । अन्यार्थमपि प्रकृतमन्येन संबध्यते । यथा शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च । एवमिहापि द्रष्टव्यम् । अथवा अस्त्येवात्र अवान्तरवाक्यम् । यथा गोदोहनेन प्रणयेत्, इति । तदकामसंबद्धं गोदोहनेन प्रणयनं प्रापयति । न च शक्यं श्रुतमुत्स्रष्टुम् । योऽप्ययं पशुकामस्येति शब्दः, स पशुकामसंबन्धं शक्नुयात् कर्तुम्, नावान्तरवाक्यस्यार्थं निवारयितुम् । न च गम्यमानं विना कारणेन अविवक्षितमिति शक्यं वदितुम् । भवन्ति च द्विष्ठानि वाक्यानि । यथा श्वेतो धावति, अलम्बुसानां यातेति । तस्मात् नैमित्तिकान्येव नित्यार्थे भवितुमर्हन्तीति । एवं प्राप्ते, ब्रूमः । नैमित्तिके श्रूयमाणे क्रत्वर्थमन्यत् स्यादिति । कुतः ? विकारत्वात् । विशेषे श्रुतत्वादित्यर्थः । विशेषे हि तत्र नैमित्तिकं श्रूयते । तदसति तस्मिन् विशेषे, न भवितुमर्हति । यदुक्तमवश्यकर्तव्यानीति । नैष दोषः । अवश्यं कर्तव्यत्वात्करिष्यन्ते । यत्तु नान्यदेषां विहितं साधनमिति, सामान्यविहितं भविष्यतीति न दोषः । किं तत् ? अभीवर्तो ब्रह्मसाम, अष्टादशमन्त्रगतोऽग्निः, वारणं प्रणयनपात्रम् । अथ यदुक्तम्, संनिहितैः प्रकृतैर्नैमित्तिकैर्ब्रह्मसामादीनि संभन्त्स्यन्ते इति । नेति ब्रूमः । नहि बार्हद्गिरादीनां प्रकरणम् । अथोच्येत, प्रकृतैः स्तोत्रादिभिः संबध्यन्ते इति । एतदपि नोपपद्यते । यद्यपि प्रकृतानि नित्यानि स्तोत्रादीनि, तथापि वाक्येन निमित्तसंयोगे श्रूयन्ते बार्हद्गिरादीनि । वाक्यं च प्रकरणाद्बलीयः ।

यदुक्तम्, संनिधानात् वाक्यादवगतोऽयमर्थ इति, नैवंजातीयको वाक्यार्थः सामान्यपदार्थे बाधितुमर्हति । निमित्तसंयोगे हि बार्हद्गिरादीनामर्थवत्ता । तस्मात् तत्रतत्र अन्यन्नैमित्तिकात् नित्य इति । अथ यदुक्तम्– अवान्तरवाक्येन गोदोहनमपि प्रापितं न शक्यमुत्स्रष्टुम्, ऋते कारणादविवक्षितं कल्पयितुम् । द्विष्ठं हि तद्भवतीति । उच्यते । कारणादविवक्षितम् । किं कारणम् ? नहीदं युगपद्भवति, परिपूर्णेन चार्थाभिधानं अवान्तरवाक्येन चेति । कथम् ? प्रणयतीति प्रपूर्वे नयतौ विधिविभक्तिः स्वपदगतमर्थं श्रुत्या विदधाति । प्रणयनादिसंबन्धमपि गोदोहनादि श्रुत्या, वाक्येन च । यस्तु फलस्य गोदोहनादेश्च संबन्धः स हित्वा श्रुत्यर्थं केवलेन वाक्येन । अथ प्रणयनस्य गोदोहनादिसंबन्धम्, गोदोहनादेश्च फलेन संबन्धं विदधातीत्युच्यते । तन्न । द्व्यर्थाभिधानात् भिद्येत नितरां वाक्यम् । न चैतन्न्याय्यम् । यत्तु श्वेतो धावतीत्येवमादि, भवेत्तत्र विशेषानवगमादुभयार्थावगतिः । इह तु गम्यते विशेषः कमिपदोच्चारणम् । स इह श्रौतो मन्येत । यदि गोदोहनादेः क्रियासंबन्धो विवक्ष्यते, कमिपदं प्रमादो भवेत् । न चायं प्रमादः । न चावान्तरवाक्यार्थे विवक्षिते कमिपदसंबन्धोऽवकल्पते । तस्मान्न द्विष्ठं वाक्यम् । गोदोहनादिकमिसंबन्ध एव अत्राभिधीयते, न नित्यकार्ये भवितुमर्हतीति । एवं सर्वत्र ।

टुप्— क्रत्वर्थानि चमसादीनि अदृष्ट्वा पूर्वः पक्षः । केचित्तु आहुः फलचमसमनालोच्य (अनादृत्य) पूर्वपक्षः (कृत्वाचिन्तेत्यर्थः । पूर्वपक्षमाह–) यद्यपि गोदोहनादीनि फलार्थानि (श्रुतानि) तथापि (संनिहितत्वात्) विपरिवर्तमानानि, तान्येव (अनुषङ्गेण संबध्यमानानि) क्रत्वर्थान्यपि । अथवा (विनैव अनुषङ्गेण) प्रकरणेन गृह्यन्ते । (विनाऽपि कृत्वाचिन्तया वचनमपि दृष्ट्वैव पुनः पूर्वपक्षद्वयमाह–) 'अथवा गोदोहनेन प्रणयेत्' इति 'गोदोहनेन पशुकामस्य' इति (च) वाक्यात् (उभयस्मात्) द्वावपि अर्थौ गम्येते क्रत्वर्थता पुरुषार्थता च । अथवा पशुकामपदाविवक्षया 'गोदोहनेन प्रणयेत्' इति श्रुत्यनुग्रहेण पूर्वः पक्षः । एवं प्राप्ते, ब्रूमः नैमित्तिके विकारत्वात् इति । यत् यस्मिन् विकारे (विशेषे इति मुद्रिते पाठः) श्रूयते, तत् तस्मिन् सत्येव भवितुमर्हति (नासति) अतो विना फलेन न युज्यते । सन्ति च चमसादीनि (फलादिभिः) असं-

युक्तानि तानि (प्रणयनादेः साधनानि) भविष्यन्ति । कामपदत्यागात् हि (भवता) श्रुत्यर्थोऽनुगृह्यते । नासौ परमार्थः श्रुत्यर्थः । ‘ **नैवंजातीयको वाक्यार्थः सामान्यपदार्थं बाधितुमर्हति**’ (इति भाष्यं व्याचष्टे–) ‘ अपः प्रणयति ’ इत्यस्य सामान्येन या पात्राकाङ्क्षा , न तां गोदोहनवाक्यं समर्थं निवर्तयितुम् । कथम् ? फलसाधनत्वेन निराकाङ्क्षं गोदोहनं कथं तस्य पात्राकाङ्क्षां निवर्तयेत् । तस्मात् सामान्याकाङ्क्षायां अबाध्यमानायां चमसेन सह (प्रणयनम्) संभन्त्स्यते । न च द्विष्ठानि (द्व्यर्थानि) वाक्यानि , (किन्तु) एक एवार्थो वाक्यस्य । (इयांस्तु श्वेतो धावति इत्यादौ–) एकस्य (वक्तुः) विवक्षा श्वेतगुणो धावति (श्वेतगुणो निर्णेजको धावति) निर्णेनेक्ति (वासांसि इति) अपरस्य विवक्षा श्वा इतो धावति (द्रुततरं गच्छति) इति । बार्हद्गिरादीनि द्वादशाहिकानि इहोदाहरणम् । (भाष्यकारेण तु ज्यौतिष्टोमिकानि बार्हद्गिरादीनि उदाहृतानि , तत् अनादरोक्तम् । ज्योतिष्टोमे हि नौधनं ब्रह्मसाम–) ।

शा-- ‘ **ब्राह्मणेन निमित्तेन बार्हद्गिरमिति श्रुतम् । मृन्मयं च प्रतिष्ठायां नित्ये स्यातामतो न ते ॥** ’ तस्मात् अन्यत् नित्यार्थम् ।

सोम— फलार्थत्वेऽपि क्रत्वर्थत्वात् पर्णताऽऽदेः फलश्रुतिरर्थवादः इत्युक्तमयुक्तं इति प्रत्यवस्थानात् (आक्षेपिकी) संगतिः । **सूत्रार्थस्तु--** निमित्ते सति ततोऽन्यदेव क्रत्वर्थं स्यात् । नैमित्तिकस्य विकारत्वात् विशेषश्रुतत्वात् असति विशेषे तदयोगात् इति । नैमित्तिकग्रहणं च न्यायसाम्यात् काम्यस्याप्युपलक्षणम् ।

वि-- ‘ मृन्मये प्रणयेत् कामी नित्येऽप्येतदुतेतरत् ।, आकाङ्क्षा संनिधिश्चास्ति तस्मान्नित्येऽपि मृन्मयम् ॥, कामार्थत्वादयोग्यत्वं सामान्यविहितेन च । आकाङ्क्षाया निवृत्तत्वान्नित्यार्थमितरद् भवेत् ॥ ’

भाट्ट-- काम्यं गोदोहनादि कामाभावे नित्यप्रयोगे उपस्थितत्वेऽपि न ग्राह्यम् । तथा ‘ बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात् , पार्थुरश्मं राजन्यस्य , रायोवाजीयं वैश्यस्य ’ इति ब्राह्मणाद्यधिकारकत्वे निमित्ते द्वादशाहसंबन्धिब्रह्मसामस्तोत्रोद्देशेन विहितम् (द्वादशाहपदेन भाष्योक्तं ज्यौतिष्टोमिकत्वं निरस्तम्) बार्हद्गिरादि नैमित्तिकं च निमित्ताभावे अनुलोमाधिकारके प्रयोगे न ग्राह्यम् , निमित्ताभावेऽप्यनुष्ठाने निमित्तसंबन्धस्य वैयर्थ्यापत्तेः । **न च** कामाभावे तत्साधनानुष्ठाने फलानुत्पत्तावपि क्रतुसाद्गुण्योपपत्तेर्न कश्चिद्विरोध इति **वाच्यम्** । तस्य क्रत्वर्थत्वे प्रमाणाभावेन तदनुष्ठाननैयत्ये प्रमाणाभावात् । क्रत्वपेक्षायाश्च अर्थाक्षिप्तयत्किञ्चित्साधनग्रहणेऽपि निवृत्त्युपपत्तेः । अत एव प्रबलप्रमाणेनाङ्गत्वे अवगतेऽपि प्राकृताङ्गानां विकृत्यङ्गत्ववदस्यापि नित्यप्रयोगार्थत्वमित्यपास्तम् । यदा तु कामनिमित्तसंबन्धरहितं वारणाभीवर्ताद्याम्नातमेव , तदा कः प्रसङ्गः काम्यनैमित्तिकग्रहणस्य । यत्र तु तन्नाम्नातम् , तत्रार्थाक्षिप्तस्य यस्यकस्यचित् ग्रहणम् । सिद्धोऽप्ययमर्थः प्रयोज्यत्वरूपप्रयोजनकथनार्थमुच्यते इति न विरोधः ।

मण्डन— ‘ नित्ये गोदोहनं नहि । ’

शंकर-- ‘ काम्यनैमित्तिके नित्ये ’ (न इत्यनुवर्तते) ।

* नैमित्तिकानि । नित्यकाम्यनैमित्तिकानि कर्माणि यथोपपत्तिकालानि । तेषां वसन्ते आहितेनाग्निना कार्यम् । **भा.** ११।३।२।२.

* **नैमित्तिकोऽर्थः** निमित्ते प्राप्ते कर्तव्यो भवति । **भा.** ६।२।८।२८, * नैमित्तिको देवताऽपनयः दर्शेऽभ्युदितेष्टौ । ६।५।१।१–९, * नैमित्तिकः फलचमसः, स सोमधर्मान् गृह्णाति । ३।६।१३।३६, * नैमित्तिको वा काम्यो वा नित्यमर्थं विकृत्य निविशते । १०।३।५।३२, * नैमित्तिको वा नित्यो वा नित्यमर्थं विकृत्य निविशते । यथा अक्ष्यामये मुद्गौदनभोजनं निवातशय्या चेति । १०।५।२४।८१, * नैमित्तिकः वैश्वानरो द्वादशकपालश्चयने , न नित्यः । ४।४।६।१२–१३. * नैमित्तिकः सन् अदोषनिर्घातार्थः क्रत्वर्थः अधिकारविधिः, यथा– अश्वप्रतिग्रहेष्टिः जञ्जभ्यमानमन्त्रोक्तिश्च । **बाल.** पृ. १४, * **नैमित्तिकेन** नित्यस्य बाधः, यथा वैश्यस्य सामिधेनीसाप्तदश्येन पाञ्चदश्यस्य । पृ. १३२. * **नैमित्तिकात्** काम्यं बलवत् ‘ आसन्नपुरुषार्थत्वात् विप्रकृष्टफलात् तथा । बलवत् शीघ्रकारित्वात् काम्यं नैमित्ति-

कादपि ॥ ’ वा. ३।६।३।१० पृ. १०३३. * नैमित्तिकान्नित्यं दुर्बलम् । वि. ३।६।३. * नैमित्तिकात् नित्यार्थमन्यत् । भा. ४।३।२।४. * **नैमित्तिकस्य** काम्येन बाधः वैश्यसामिधेनीसाप्तदश्यस्य एकविंशतित्वेन प्रतिष्ठार्थेन । **बाल. पृ.** १३३. * नैमित्तिकस्य नित्यस्य च न समानविधित्वम् । **भा.** ३।६।१३।३६, * नैमित्तिकस्य निरवकाशतया नित्यबाधकत्वं वक्ष्यते । **भाट्ट.** ६।५।१ पृ. २८७. * नैमित्तिकस्य फलापेक्षा न भवति । यथा गृहदाहनिमित्तिकाया इष्टेः । यथा वा सत्रसमापननिमित्तकस्य पृष्ठशमनीयस्य । **के.** १०।२।१२।४०-४१, * **नैमित्तिकाना**मनित्यार्थत्वम् । **वि.** ४।३।२, * नैमित्तिकानामपि कामवचनेन पुनर्विधाने काम्यताऽपि । **संकर्ष.** ३।१।१६, * नैमित्तिकानां क्रत्वर्थानां निमित्तावृत्तौ आवृत्तिः । **भा.** ६।२।९।३०, * नैमित्तिकानां नित्यप्रयुक्तत्वं नास्ति । यथा ज्योतिष्टोमे ‘ बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य ’ इति नैमित्तिकमेव । अग्नौ च प्रथमं साहस्रं द्वितीयं द्विषाहस्रं तृतीयं त्रिषाहस्रं चिन्वीतेति नैमित्तिकमेव । दर्शपूर्णमासे च ‘ गोदोहनेन पशुकामस्य प्रणयेत्, कांस्येन ब्रह्मवर्चसकामस्य, मार्तिकेन प्रतिष्ठाकामस्य’ इति नैमित्तिकमेव । ४।३।२।४. * नैमित्तिकानां पाथिकृतादीनां कर्मणां निमित्तानुसारेणानुष्ठानम्, न तत्र पाठक्रमो नियामकः । **सोम.** ५।३।१२. * नैमित्तिकानां प्रायश्चित्तानां यथानिमित्तं समुच्चयः । **के.** १२।३।६।१७.

⧗ नैमित्तिके तु कार्यत्वात् प्रकृतेः स्यात् तदापत्तेः । १०।२।३०।७०॥

‘ वायव्यं श्वेतमालभेत भूतिकामः ’ इति श्रूयते । अत्र श्वेतगुणकः कश्चिदालब्धव्यः उक्तः, स कः इति विचारे सिद्धान्तमाह । नैमित्तिके गुणनिमित्तके श्वेतशब्दे श्रूयमाणे प्रकृतेः सकाशात् प्राप्तस्य अजस्यैव पशोः ग्रहणं स्यात् । कार्यत्वात् अजे एव श्वेतगुणस्य संपादयितुं शक्यत्वात् । तदापत्तेः तस्य अजस्यैव श्वेतगुणेन परिच्छेद्यत्वोपपत्तेः । तस्मात् वायव्यः श्वेतः अज एव नान्यः पशुः इति सिद्धान्तः । पूर्वसूत्रे अजभिन्नः पशुरुक्तः अत्र तु अज एवोच्यते इति पूर्ववैषम्यार्थस्तुशब्दः । **के.**

* ‘नैमित्तिके तु कार्यत्वात् प्रकृते स्यात्तदापत्तेः’ **इत्यधिकरणे** वायव्यादिपशौ उपदिष्टश्वेतगुणस्य प्राकृताजादिजातेश्च समुच्चय उक्तः । **बाल.** पृ. १७७.

⧗ नैमित्तिके तु प्रकृतौ तद्विकारः संप्रयोगविशेषात् । (३।६।३।१०) इति तृतीयाधिकरणवक्ष्यमाणन्यायमाह-(‘ पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकम् ’ पुरुषार्थसिद्ध्यर्थो हि सर्वः प्रयासः इति तत्प्रत्यासन्नं वस्तु बलीयो भवति । वा. १।४।११।२१)। **सु.** पृ. ४८८.

⧗ नैमित्तिके पुनराधाने श्रुतदक्षिणया सामान्यविहितैकादिदक्षिणाया बाधः ॥

अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्यात्, वाक्यसंयोगात् ।१०।३।५।३०॥

भाष्यम्— अस्ति पुनराधानम्, निमित्ते श्रूयते । भाग्ययशःश्रीकामानां पुनरादधीत । ‘ योऽग्नीनाधाय भाग्यज्यानिं पुत्रज्यानिं वा जीयेत, स पुनरादधीत ’ इति । तत्र श्रूयते ‘ पुनरुत्स्यूतं वासो दक्षिणा, पुनरुत्सृष्टोऽनड्वान् ’ इति । तथा, आधाने दक्षिणा- ‘ एका देया षड् देया द्वादश देयाश्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयम् ’ इति । तत्र संशयः किं पुनराधानेऽग्न्याधानदक्षिणानामनिवृत्तिः, समुच्चयः, अथाग्न्याधेयदक्षिणानां निवृत्तिरिति । किं प्राप्तम् ? अग्न्याधेयस्य नैमित्तिके पुनराधेये दक्षिणादानमधिकं स्यात् । प्राकृतीनामनिवृत्तिः, समुच्चय इति । कुतः ? एकस्मिन् वाक्ये उभय्यो दृश्यन्ते । ‘ उभयीर्ददाति, आग्न्याधेयिकीश्च पुनराधेयिकीश्च ’ इति । तस्मादनिवृत्तिः, समुच्चय इति ।

शिष्टत्वाच्चेतरासां यथास्थानम् । ३१ ॥

भाष्यम्-– इदं पदोत्तरं सूत्रम् । कथं चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य समुच्चयो भविष्यति । अत्रोच्यते । शिष्टत्वादितरासाम्, प्राकृतीनां वचनप्रामाण्यात् यथास्थानं समुच्चयो भविष्यतीति । प्रत्यक्षं हीदं शासनम्, आग्न्याधेयिकीर्दत्त्वा पुनराधेयिकीर्ददातीति । तस्मान्न बाधः प्राकृतीनां समुच्चय इति ।

विकारस्त्वप्रकरणे हि काम्यानि । ३२ ॥

भाष्यम्-- तुशब्दः पक्षं व्यावर्तयति, न समुच्चयः, विकार इति । कुतः ? काम्यं ह्येतत् पुनराधेयं श्रूयते । तदसति प्राकृते प्रकरणे, आम्नानमवकल्पते, न सति । यत्तत्रोच्यते वैकृतम्, तत् प्राकृतं बाधते इत्यर्थः । काम्यो वा नैमित्तिको वाऽर्थो नित्यमर्थं विकृत्य निविशते । यथा अक्ष्यामये मुद्गौदनभोजनं निवातशय्या चेति, नित्यं शय्यासनं भोजनं च विकरोति । प्रत्यक्षं हि वैकृतम् । आनुमानिकं च प्राकृतम् । तस्मात् वैकृतेन बाध्यते । अथ यदुक्तम्, वचनप्रामाण्यात् प्राकृत्यो भविष्यन्तीति । अत्रोच्यते । ता उभयीर्ददातीति नात्र विधिविभक्तिरस्ति । वर्तमानापदेशोऽयम् । प्रमाणान्तरमादाय अयमर्थः प्रापितः । उभयीर्दक्षिणा ददाति, आग्न्याधेयिकीः पौनराधेयिकीश्च । अग्न्याधेये आग्न्याधेयिकीः, पुनराधेये पौनराधेयिकीः । तदेतत् भूतानुवादमात्रम् । तस्मात् प्राकृतीनां निवृत्तिरिति ।

टुप्-- (सिद्धान्तमाह-) पुनरुत्सृष्टोऽनड्वान् इत्येतस्मात् वाक्यात् समुच्चयो न गम्यते, समुच्चयशब्दाभावात् (तस्मात् बाधः) । ननु 'ता उभयीर्ददाति' इति समुच्चयः श्रूयते । उच्यते । अर्थवादोऽयम् (न विधिः) । 'अप्रकरणे हि काम्यानि' इत्यस्य सूत्रावयवस्य अयं (भाष्य-) ग्रन्थः, तत् (काम्याम्नानम्) **असति प्राकृते प्रकरणे पुनरुत्सृष्टाम्नानं** यदि भवेत्, ततो न बाधेत आधानदक्षिणाम्, अप्रकरणान्तरत्वात् (उभयोरपि तुल्यप्रकरणत्वेन बाधासंभवात्) । असति तु आधानप्रकरणाम्नाने यत् तत्र नैमित्तिकम् (पुनरुत्सृष्टत्वादि) विधीयते तत् प्राकृतं नित्यं बाधमानमेव निविशते काम्याम्नानम् । (अत्र आनन्दाश्रमीयात् भूयान् भेदः) ।

शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते । ३३ ॥

भाष्यम्-- इतश्च प्राकृतीनां निवृत्तिः । कुतः ? निवृत्त्याशङ्कादर्शनात्, शङ्कते हि निवृत्तेरिति गम्यते । कथम् ? उभयत्वं हि श्रूयते । यद्वैकृतीर्ददाति दक्षिणा उभय्योऽपि तेन दक्षिणाः प्रत्ता भवन्ति । ननु उभय्योऽपि प्रदीयन्ते, यत उभय्योऽपि प्रत्ता भवन्तीत्याह । अग्न्याधेयिकीः अग्न्याधेये, पुनराधेयिक्यः पुनराधेये । तस्मात् प्राकृतीनां निवृत्तिरिति ।

सोम--पूर्वत्र यथा 'द्वादश जुहोति' इति वचनानुसारेण समुच्चयः, एवमिहापि वचनादेव समुच्चयः इत्युत्थितेः **संगतिः** । **सूत्रार्थस्तु**--अग्न्याधेयस्य नैमित्तिके गुणविकारे पुनराधेयदक्षिणादानम् 'उभयीर्ददाति' इति वाक्यसंयोगात् प्राकृतीभ्यः अधिकम्, न तु निवर्तकं इति । (तस्मात् पुनराधेये पुनराधेयिक्य एव दक्षिणा देयाः । अग्न्याधेयिक्यस्तु प्रथमाधाने एवेति भाष्यादिग्रन्थसिद्धान्तः) ।

वि-- 'एकादिना समुच्चेयं पुनर्निष्कृत इत्यदः । बाधकं वा, समुच्चेयमुभयीरित्युदीरणात् ॥, आधानदक्षिणोपेतमुभयीरित्यनूद्यते । ददातीत्यविधायित्वात् कार्यैक्याद् बाधकं भवेत् ॥' ('उपदिष्टं अतिदिष्टस्य बाधकम्' इत्यधिकरणस्य न्यायः) ।

भाट्ट-- 'भाग्ययशःश्रीकामानां पुनरादधीत' इति श्रुतम् । तथा 'योऽग्नीनाधाय भाग्यजानिं पुत्रजानिं वा जीयेत, स पुनरादधीत' इति च । अत्र प्रकरणात् पुनःशब्दयोगाच्च नाधानानन्तरम्, अपितु तस्यैव पुनःप्रयोगः काम्यो नैमित्तिकश्च । तत्र काम्यवाक्ये द्वन्द्वोपात्तत्वात् 'अध्वर्युयजमानौ वाचं यच्छतः' इतिवन्नानेकोद्देश्यता । नैमित्तिकवाक्ये तु जानिशब्दो हानिपरः जीयेत प्राप्नुयात् इत्यर्थः । अनुषङ्गेण वाक्यद्वयाङ्गीकारेऽपि न दोषः । पुनःप्रयोगावान्तरप्रकरणे च 'पुनरुत्स्यूतं वासो दक्षिणा, पुनरुत्सृष्टोऽनड्वान्' इति श्रुतम् । अत्रापि प्राप्तदक्षिणानुवादेन अनेकविधानानुपपत्तेर्वाक्यभेद इष्ट एव । पुनरुत्स्यूतं पाटितं सीवनेन कृतसंधानम्, पुनरुत्सृष्टः भग्नः सन् कृतसंधानः । अनयोश्च न्यायतो विकल्पे प्राप्ते वचनादिना समुच्चय इति ध्येयम् । वस्तुतस्तु अतिदेशप्राप्तेः पूर्वमेव अनेकविशिष्टैकदक्षिणाविधानान्न कश्चिद्दोषः । आधाने च 'एका देया षट् देयाः' इत्यादिना दक्षिणाऽन्तरमाम्नातम् । तदिह काम्यनैमित्तिकप्रयोगविशेषपुरस्कारेण विहितया दक्षिणया सामान्यविहिताया एकादिदक्षिणाया बाधः । न च 'दशभिः क्रीणाति' इतिवत् 'उभयीर्ददाति

अग्न्याधेयिकीः पुनराधेयिकीश्च ' इति वचनेन समुच्चयविधानादबाधः, अस्य पुनरुत्स्यूतादिवाक्यशेषतया तत्स्तावकत्वेन समुच्चयविधायकत्वे वाक्यभेदात् । न च ' उपरि हि देवेभ्यो धारयति ' इतिवत् सिद्धवन्निर्देशान्यथाऽनुपपत्त्यैव विध्यन्तरकल्पना । कथञ्चिदपि प्राप्तिसत्त्वे ' यज्ञोपवीती हि देवेभ्यो दोहयति ' इतिवत् कल्पकत्वानुपपत्तेः । अस्ति हि आद्येऽग्न्याधेयप्रयोगे तासां नैमित्तिकादौ चान्यासां दानेनोभयोः प्रयोगभेदेन समुच्चयप्राप्तिः । अतस्तदादायैव स्तुत्युपपत्तेर्विध्यन्तराकल्पनात् बाध एव युक्तः । ' दशभिः क्रीणाति ' इत्यादौ तु नैवमिति विशेषः । अत एव ' यद्द्वैकृतीर्ददाति उभयोरपि तेन दक्षिणाः प्रत्ता भवन्ति ' इति लिङ्गमप्युपपद्यते ।

मण्डन-- ' प्राग्दक्षिणा नो पुनरादधातौ । '

शंकर— ' पुनर्निष्कृत एव च । ' रथः दक्षिणा ।

⧗ नैमित्तिके विकारत्वात् क्रतुप्रधानमन्यत् स्यात् । ४।३।२।४ ॥

दर्शपूर्णमासयोः ' गोदोहनेन पशुकामस्य प्रणयेत् ' ' कांस्येन ब्रह्मवर्चसकामस्य ' इत्यादिना अपां प्रणयनादौ गोदोहनादिपात्रं नैमित्तिकं श्रूयते । किमिदं नैमित्तिकं नित्यार्थेऽपि स्यात्, उत नित्यार्थे अन्यत् इति विचारे इदं नैमित्तिकमेव नित्यार्थे स्यात् इति उत्सूत्रे पूर्वपक्षे सिद्धान्तसूत्रमिदम् । नैमित्तिके पश्वादिफलनिमित्तके गादोहनादौ श्रूयमाणे सति क्रतुप्रधानं क्रत्वर्थं नित्यमित्यर्थः, अन्यत् वारणचमसरूपं पात्रं स्यात् । गोदोहनादेर्नैमित्तिकस्य चमसविकारत्वात् । तस्मात् गोहनादि कामनानिमित्तकं न नित्यम् । क्रतुप्रधानं इत्यत्र क्रतुसाधनं इति **कुतूहले** पाठः । स च प्राचीनपुस्तकस्थाक्षरवाचनभेदात् संजातः सन् उत्तरकालं पाठभेद एव संपन्नः । **के.**

* **नैमित्तिकी** चिकीर्षा नित्यां चिकीर्षां बाधते । सत्यां हि नित्यायां सा भवति । अतस्तामबाधमाना नैवोत्पद्यते । यदि न बाध्येत अनर्थकं स्यात् वैकृतं विधानम् । **भा.** १२।२।१३।३३, * नैमित्तिकी वैश्वानरेष्टिः चयने । ' यो वै संवत्सरं उख्यमभृत्वा अग्निं चिनुते... वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत् ' इति । ४।४।६।१२-१३, * नैमित्तिकी षष्ठी चितिः प्रतिष्ठार्था । ४।४।७।१४-१८.

* **नैमित्तिकीनामिष्टीनामनुष्ठाने पाठक्रमो न नियामकः,** यथानिमित्तमनुष्ठानम् । वि. ५।३।१२.

* **नैमित्तिकाधिकरणं** श्वेताधिकरणं वा । १०।२।३०।६९ । अत्रत्यो न्यायस्तु ' यत्र साधारणगुणवचनः, तत्र चोदको न बाध्यते ' इति । इदम् ' अंश्वदाभ्ययोः ' इत्यत्र द्रष्टव्यम् । **टुप्.** १०।२।२९।६८. (नैमित्तिकमतुल्यत्वात् । ३।६।१३।३६ इदमपि नैमित्तिकाधिकरणं **रसायने** तथोक्तत्वात् । पृ. १५६.) ।

* **नैमित्तिकार्थे** नित्यार्थे च दध्यादि । ' दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुयात् ' ' खादिरे बध्नाति, खादिरं वीर्यकामस्य यूपं कुर्वीत ' । संयोगपृथक्त्वन्यायः । **भा.** ४।३।३।५-७.

* **नैमित्तिकपञ्चशरावयागो** दर्शाङ्गः । **भा.** ६।४।१०।३०-३१.

* **नैमित्तिकप्रतिपदोः** ' युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः ' इति ज्योतिष्टोमात् कुलायादौ उत्कर्षः । **भा.** ३।३।९।१७-१९.

* **नैमित्तिकप्रायश्चित्तानां** समुच्चयः । वि. १२।३।६.

* **नैमित्तिकयागाः** ' अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्, यो दर्शपूर्णमासयाजी सन् अमावास्यां वा पौर्णमासीं वाऽतिपातयेत् ' इत्यादयः । तत्र पाठक्रमापेक्षैव नास्ति । निमित्तजनने तन्नैमित्तिकं कर्तव्यम् । वि. ५।३।१२.

* **नैमित्तिकशास्त्राणि** नित्यशास्त्रप्रवृत्त्यनन्तरभावीनि । **रसायनम्.** पृ. १५६. * **नैमित्तिकशास्त्राणां** हि अयमर्थः ' निमित्तोपजननात् प्राक् अन्यथा कर्तव्योऽपि क्रतुः, निमित्ते सति अन्यथा कर्तव्यः ' इति । **शा.** ६।५।१९.

* **नैमित्तिकसाप्तदश्यादेः** प्रकृत्यर्थता । **भा.** ३।६।४।११-१३ पृ. १०३७.

* **नैयायिकाः** अनुमाननिरूपणस्य जगन्निर्मातृपुरुषधौरेयसिद्धिः प्रयोजनमिति वदन्ति । जन्यकृत्यजन्यं द्व्यणुकं सकर्तृकं कार्यत्वात् इत्यनुमानेन तत्सिद्धिरिति ।

मणि. पृ. ४२–४३. * नैयायिकास्तु यत्र शक्यलक्ष्ययोः उभयोरपि प्राधान्यम् ‘ काकेभ्यो दधि रक्ष्यताम् ’ इत्यत्र तत्रैव अजहत्स्वार्था लक्षणा इत्याहुः । **बाल.** पृ. १४२. * नैयायिकाः । प्रमायां गुणः भ्रमे दोषश्च कारणम् । प्रामाण्यं अप्रामाण्यं च परतः उत्पद्यते एवं ज्ञानान्तरेण गृह्यते । अर्थक्रियादिज्ञानेषु अगत्या स्वतः प्रामाण्यं गृह्यते इत्यङ्गीक्रियते । **मणि.** पृ. १४. * नैयायिकाः प्रमाणयोर्द्वयोर्द्वयोः सामग्र्योः एकविषयत्वेन विरोधे अन्योन्यप्रतिबन्धात् प्रमाणसंप्लव एव ज्ञानानुत्पत्तिलक्षणः इति वदन्ति । **बाल.** पृ. १३४. * नैयायिकाः शक्तिः ‘ अस्मात् पदात् अयमर्थो बोद्धव्यः इत्याकारिका ईश्वरेच्छा ’ इति वदन्ति । **मणि.** पृ. ७४, * नैयायिकाः संसर्गः विशेषणविशेष्यसमभिव्याहारगम्यत्वात् संसर्गमर्यादया लब्धः इति मन्यन्ते । पृ. १७३, * **नैयायिकैः** प्राचीनैः वायुप्रत्यक्षाभावेऽपि तन्निष्ठस्पर्शस्य प्रत्यक्षत्वं अङ्गीकृतम् । पृ. १६.

* **नैयायिकमते** संसर्गो वाक्यार्थः । **बाल.** पृ. ७३.

* ‘ **नैर्ऋतं** चरुं नखावपूतानाम् ’ इति राजसूये । नखेषु मुसलोलूखलधर्मः प्रोक्षणं कर्तव्यम् । **वि.** ९।२।१२. * ‘ **नैर्ऋतं** चरुं निर्वपेत् कृष्णानां व्रीहीणाम् ’ इत्यत्र कृष्णवर्णस्य विधिः, नानुवादः । **भा.** ४।२।१०।२५. * **नैर्ऋते** चरौ ‘ कृष्णानां व्रीहीणां नखनिर्भिन्नानाम् ’ इति नखेष्वपि अस्ति प्रोक्षणोहः, अपूर्वस्य प्रयोजकत्वात् । **वि.** ९।१।२. * **नैर्ऋतीषु** इष्टकासु चयने इष्टकाधर्मा न कर्तव्याः, स्थण्डिलनिर्वर्तकत्वाभावात् । **संकर्ष.** २।१।११.

* **नैर्ऋतचरुविहितकृष्णव्रीहिभिः** प्राकृतयवबाधः । **भा.** १०।७।१९।६४–७१.

* ‘ **नैवारं** चरुमुपदधति ’ (अग्निचयने) इत्यस्य स्थण्डिलनिर्वृत्त्यौपयिकयथाश्रुतचरूपधानविधानेन निराकाङ्क्षस्य ‘ बृहस्पतेर्वा एतदन्नं यन्नीवाराः ’ इत्युपधानरूपगुणकर्मानन्वयिदेवतासंबन्धप्रतिपादक–वाक्यशेषानुसारेण यागविधायकत्वं नाङ्गीक्रियते संयुक्तस्त्वर्थशब्देन० (२।३।७।१८) इत्यधिकरणे । **पराक्रमः.** ४४।५. * **नैवारस्य** सप्तदशशरावस्य चरोर्निर्वापे चतुःसंख्यानुग्रहः मुष्टिलोपश्च । (चतुर्भिः कुडवादिभिः शरावं पूरयित्वा निर्वापः । एवं सप्तदशवारम्) वाजपेये । **भा.** १०।२।२८।६४–६७.

* **नैवारचरोः** चितौ उपधानार्थता । चरूपधानाधिकरणम् । **भा.** २।३।७।१८. * **नैवारचरौ** प्रकृतिभूतनीवारेषु दार्शिकव्रीहिधर्माणां प्रोक्षणादीनामूहः कर्तव्यः । **वि.** ९।२।१२.

* **नैष्ठिकब्रह्मचारिणा** अपत्योत्पादनं अनाचारः । **वा.** १।३।३।७ पृ. २०३.

⧗ **नोपसर्जनन्यायः** । ‘ प्रधानं यत् प्रकृतं तदेव सर्वनाम परामृशति नोपसर्जनम् ’ इति नोपसर्जनन्यायः । **परिमल.** ३।३।१।१ ब्रसू., * ननु **नोपसर्जनन्यायो** न सर्वनाम्ना परामर्शे प्रवर्तते । ‘ अथ शब्दानुशासनं केषां शब्दानाम् ’ इति महाभाष्यदर्शनात्, ‘ सर्वनाम्नाऽनुसंधिर्वृत्तिच्छन्नस्य ’ इति वामनसूत्राच्च इति शङ्कते । ३।३।१।१ ब्रसू. * उपलक्षणे हि **नोपसर्जनन्यायबाधः** स्यात् । **कल्पतरुः.** ३।३।१।१.

* **नौधसं साम** ‘ तं वो दस्म मृतीषहं० ’ इति तृचे गीयते । **वि.** १।४।३, * **नौधसं** साम बृहतीपङ्क्तिरूपऋग्द्वयात्मके सूक्ते प्रग्रथनेन तृचात्मके गीयते, तच्च माध्यंदिने पृष्ठस्तोत्रेषु तृतीयम् । ९।२।६ वर्णकं २.

⧗ **नौनाविकन्यायः** । यथा यत्रोद्वाह्योद्वाहकभावस्तत्रायं प्रवर्तते । न चेदृशस्थले अन्योन्याश्रयदोषोऽवतरतीति । (उद्वाह्या नौः, उद्वाहकः नाविकः । उद्वाह्यत्वापेक्षमुद्वाहकत्वम्, उद्वाहकापेक्षं चोद्वाह्यत्वम्) । **साहस्री.** २१९.

⧗ **न्यग्रोधक्षेत्रन्यायः** । न्यग्रोधः क्षेत्रं इति । **भा.** ११।१।८।३८ । प्रकृतिरियं (स्वभावोऽयं) लोके यथा– ‘ न्यग्रोधतले स्थातव्यम् ’ इति प्रथमे एव न्यग्रोधेऽवतिष्ठते । **टुप्.**

⧗ **न्यग्रोधबीजन्यायः** । स्वल्पमपि सूक्ष्ममपि वस्तु सुपात्रधृतं यत्र बहुशो विस्तृतं भवेत्तत्रायं प्रवर्तते । यथा न्यग्रोधबीजं स्तोकमपि सुक्षेत्रे उप्तं सत् बहुविस्तीर्णतां याति, तथा प्रकृतेऽपि । **साहस्री.** ९८३.

* **न्यग्रोधस्तिभीः**– न्यग्रोधाङ्कुरान् न्यंग्रोधफलानि वा क्षत्रियसोमे फलचमसार्थमाहरन्ति । **वा.** ३।५।१९।४७.

* **न्यग्रोधस्तिभिनी** । न्यग्रोधमुकुलम् (नैयग्रोधं फलं) राजन्यवैश्ययोः, सोमस्य स्थाने न्यग्रोधस्तिभिन्यो ग्राह्याः । वि. ३।५।१९.

* **न्यङ्कुसारिणी** बृहती । पादेषु अक्षराणि ८।१२।८।८ उदा० 'ईजानमिद् द्यौ' (ऋसं. १०।१३२।१) । के.

* **न्यायः** आगमविरोधे कार्यक्षमो न भवति । **वा.** ३।४।४।१३ पृ. ९३८. * न्यायश्च स्मृतितो दुर्बलः। **सोम.** ९।२।८. * न्यायस्तु क्वचित् क्वचिदाश्रीयते (क्वचिन्नाश्रीयते चेत्यर्थः) । **कैयटः.** ६।१।१०२. * न्यायः नीयते प्राप्यते अनेन इति । **कु.** १।३।८।१४ । नीयते इति न्यायः कर्मणि घञ् । 'घञबन्ताः पुंसि' (लिङ्गानुशासनम्) इति नित्यपुंलिङ्गता । १।३।९।२३. * न्यायः व्याख्याप्रकारः । **सु.** पृ. १४२६. * गृहीतव्याप्तिको **न्यायः** । अगृहीतव्याप्तिकश्च दृष्टान्तः इति भेदः । **तत्त्वप्रकाशिका** शेखर-भूतिटीका । पृ. २२७. * **न्यायाः** नाम जैमिनिप्रोक्तानि धर्माधर्मनिर्णायकानि अधिकरणानि । **वि.** प्रस्तावना श्लो. ६. * न्यायाः । सर्वे लौकिका दृष्टान्ताः लौकिक्यः कथाश्च (दामव्यालकटाद्याः) न्यायत्वेन उदाहर्तुं शक्यन्ते । **संग्रहः.** * **न्यायेन** (कूपखानकन्यायेन) समाहितं कैश्चित्, तन्न मङ्गलस्य विघ्नध्वंसादिप्रयोजकत्वस्य अनुमितश्रुत्यादिबोधितत्वेऽपि आत्मनामोच्चारणजन्यदुरितध्वंसप्रयोजकत्वस्य अप्रसक्तेः इति । **भूतिः.** पृ. २. * लौकिकेन **न्यायेन** भावनातः प्राप्तत्वात् (कर्तुः) कारकानभिधानमवगतम्, तदपि अनुगतं सूत्रैर्भविष्यति । **वा.** ३।४।४।१३ पृ. ९२६. * **न्यायस्य** स्वयमप्रमाणतया अर्थापत्तिकल्प्यवचनापेक्षत्वम् । **सु.** ३।७ पृ. १०. * **न्यायगम्यः** ऊहः । तल्लक्षणं तु "प्राकृतस्थानपतितपदार्थान्तरकार्यतः । ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः ॥' इति माधवीयनवमाद्ये । कार्यमुपकारः । कार्यतः उपकारार्थे इत्यर्थः । **बाल.** पृ. १२६, * न्यायगम्यः **जात्योः** समुच्चयो यथा– सोमक्रये गवाजादीनाम् । 'क्रयणेषु तु विकल्पः स्यात्' (१२।४।३) इति न्यायोऽत्र । **द्रव्ययोर्यथा** आधाने संभाराणाम्, दर्शपूर्णमासयोश्च परिधीनाम् । 'संख्यायुक्तेषु तु समुच्चयः' (१२।३।१४) इति न्यायोऽत्र । **गुणयोर्यथा** अरुणयैकहायन्या इत्यत्र आरुण्यस्य एकहायन्येकसंख्यायाश्च अन्योन्यनियमात् ; 'ऐककर्म्यान्नियमः स्यात्' (३।१।६) इत्यरुणान्यायोऽत्र । **क्रिययोर्यथा** दर्शपूर्णमासयोः प्रयाजानुयाजादीनाम् । 'अङ्गानां तु शब्दभेदात्' (११।१।२) इति न्यायः । एवं संनिपातिक्रयसमुच्चयः । अत्र 'क्रयणेषु तु०' (१२।४।३) इति न्यायः । एवं नैमित्तिकक्रत्वङ्गप्रायश्चित्तक्रियासमुच्चयः । अत्र 'समुच्चयस्त्वदोष०' (१२।३।६) इति न्यायः । **जातिद्रव्ययोः** यथा एकहायनीपिङ्गाक्षीशब्दाभ्यामुक्तस्य द्रव्यस्य गोपदोक्ताया जातेश्च । अत्र अरुणाधिकरणन्यायः । **जातिगुणयोः** यथा 'अरुणया गवा क्रीणाति' इत्यत्र गोत्वारुण्ययोः । अत्र अरुणाधिकरणन्यायः । **जातिक्रिययोर्यथा** 'निर्मन्थ्येनेष्टकाः पचन्ति' इत्यत्र मथनक्रियायाः पाकाक्षिप्तायाश्चाग्नित्वजातेः । अत्र अरुणान्याय एव । **द्रव्यगुणयोर्यथा** एकहायनीपिङ्गाक्षीशब्दोक्तद्रव्यस्य आरुण्यस्य च । अरुणान्यायोऽत्र । **द्रव्यक्रिययोर्यथा** निर्मन्थ्यशब्दोक्तद्रव्यस्य मथनक्रियायाश्च । अरुणान्याय एवात्र । **गुणक्रिययोर्यथा** 'लोहितवसना ऋत्विजः प्रचरन्ति' इत्यत्र वसनशब्दोक्तपरिधानक्रियायाः लौहित्यस्य गुणस्य च । अरुणान्याय एव । **जातिद्रव्यगुणानां** यथा गोत्वजाति–एकहायनीद्रव्य–आरुण्यगुणानाम् । अरुणान्यायः । (अथ जातिद्रव्यक्रियाणां जातिगुणक्रियाणां द्रव्यगुणक्रियाणां जातिद्रव्यगुणक्रियाणां चोदाहरणानि ऊह्यानि) एते न्यायगम्यसमुच्चयभेदाः पञ्चदश क्रत्वर्थजात्यादिविषया उक्ताः । अथ पुरुषार्थजात्यादिविषयाणि पञ्चदशोदाहरणानि उच्यन्ते––(१) **जात्योः** पुरुषार्थयोः न्यायगम्यः समुच्चयो यथा–'तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा । दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥' मनुः ३।२६७ । अत्र व्रीहियवैः इति द्वंद्वोपात्तं समुच्चितं जातिद्वयं प्रकृतश्राद्धाश्रितं फले विधीयते । एवं मूलफलेनेति । (२) **द्रव्ययोर्यथा**– 'भक्ष्यभोज्यैस्तु संस्कृतैः' 'रागखाण्डवचोष्यैश्च' 'दत्तैस्तु मासं प्रीयन्ते श्राद्धेषु पितरो

पूर्ण आरचि

नृणाम् ' (मार्कण्डेयः) । अत्र द्रव्याणामेव द्वंद्वोपात्तानां प्रकृतश्राद्धाश्रितानां समुच्चय उक्तः । (३) **गुणयोर्यथा**– ' स्निग्धमुष्णं च यो दद्यादग्निष्टोमफलं लभेत् ' इति वायुपुराणे । (४) **क्रिययोर्यथा**– ' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' अत्र यजिरूपैकशब्दोपादानात् आग्नेयादीनां साहित्यं फले विवक्षितम् । अत्र न्यायः एकादशाद्यमधिकरणम् । (५) **जातिद्रव्ययोर्यथा**– ' संवत्सरं तथा गव्यं पयः पायसमेव च ' इति पद्मपुराणे । अत्र एकवाक्योपादानं न्यायः । (६) **जातिगुणयोर्यथा**– ' खादिरं वीर्यकामस्य यूपं कुर्वीत ' अत्र खादिरत्वं जातिः एकत्वं च गुणः । एकपदोपादानन्यायः । (७) **जातिक्रिययोः** उदाहरणं मृग्यम् । (८) **द्रव्यगुणयोः** यथा– ' गोदोहनेन पशुकामस्य प्रणयेत् ' इत्यत्र गोदोहनद्रव्यस्य एकत्वगुणस्य च समुच्चयः । एकपदोपादानन्यायोऽत्र । (९) **द्रव्यक्रिययोः** उदाहरणं मृग्यम् । (१०) **गुणक्रिययोः** यथा– ' ज्योतिष्टोमेन स्वर्गकामो यजेत' अत्र यागस्य एकत्वस्य च । एकवाक्योपात्तत्वं न्यायोऽत्र । (११–१५) इतरोदाहरणानि अन्वेष्याणि । एवं न्यायगम्याः समुच्चयाः त्रिंशत् उक्ताः । पृ. १६६–१७०, ✻ न्यायगम्यः व्यवस्थितविकल्पः यथा ' स्रुवेणावद्यति, स्वधितिनावद्यति, हस्तेनावद्यति ' इति । अत्र न्यायतो व्यवस्थोक्ता ' अर्थाद्वा कल्पनैकदेशत्वात् ' इत्यत्र । स्मार्ते च ' प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा । ग्रहणान्तिकम् ' इति । अयं स्मृतिवादे वार्तिककृता उक्तः । ' वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । सामर्थ्याश्रमयोग्यत्वमङ्गीकृत्यैतदुच्यते ॥' इति । पृ.१५८. ✻ **न्यायगम्याः** विकल्पभेदाः विकल्पशब्दे द्रष्टव्याः । **बाल**. पृ. १५८. ✻ न्यायगम्याः समुच्चयाः समुच्चयशब्दे द्रष्टव्याः । **के**. (**बाल**. १६८)

✻ **न्यायनिरूपणात्मिका** मीमांसा । **बाल**. पृ. २.

✻ **न्यायपदार्थः** क इति चेत् । अत्र ऐतरेयब्राह्मणमुदाह्रियते । ' स होवाच शुनःशेपः (अजीगर्तम्) यः सकृत् पापकं कुर्यात् कुर्यादेनत्ततोऽपरम् । नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतं इति ' । ३३।५।४ । **सायणः**–शौद्रात् न्यायात् नीचजातिसंबन्धिनः क्रूरादाचरणात् नापागाः अपगतो न भवसि इति । तथा च न्यायः आचरणम्, रीतिः, पद्धतिः इत्यर्थः । **के**. ✻ न्यायपदार्थः । ' तस्याश्च सर्वगामित्वं तन्न्यायत्वात् प्रतीयते ' इति वार्तिकम् (१।३।४।८) । अत्र **सुधा**– तस्मिन् सर्वगामित्वे न्यायः युक्तिः यस्याः शक्तेरस्ति सा तन्न्याया तद्भावस्तन्न्यायत्वं इति । पृ. २०७ । एतेन न्यायः युक्तिः इत्यर्थः । मीमांसासूत्रेष्वपि अनेकवारं न्यायशब्दः प्रयुक्तः । तत्र च सर्वत्र युक्तिः इत्येवार्थः प्रतीयते । ✻ न्यायपदार्थः । न्यायो नाम निर्णयः, निर्णयपत्रं प्राड्विवाकस्य । परार्थानुमानात्मकप्रतिज्ञादिपञ्चकमेव न्यायपदार्थः । स एव च प्राड्विवाकस्य निर्णयपत्रं नाम । इयांस्तु विशेषः यत् न्याये शरीरलाघवं सूत्रात्मकत्वं च । निर्णयपत्रे तु शरीरगौरवं भाष्यात्मकत्वं चेति । परंतु न्यायः निर्णयः प्रतिज्ञादिपञ्चकं इति पर्यायाः । रीतिः, प्रकारः इत्ययमपि न्यायपदस्यार्थः । **के**. ✻ न्यायपदार्थः ' वृषाकपेः तन्न्यायमेति ' । **ऐब्रा**. ३०।६।५ । अत्र **सायणः**– ' वृषाकपेः एतन्नामकस्य सूक्तस्य न्यायं प्रकारं एति प्राप्नोति । विग्रह एवात्र तन्न्यायः ' इति । एतेन न्यायः रीतिः, पद्धतिः इत्यर्थः ।

✻ **न्यायप्राप्तबाधकत्वेनो**पपन्नस्य वाक्यस्य नः श्रौतनिषेधबाधकत्वम् । **श्राद्धमयूखः**. पृ. ७३.

✻ **न्यायविदः** योगजधर्मप्रत्यासत्तिं तृतीयामाहुः । तत्तु योगिषु मानाभावेन असुन्दरम् । **मणि**. पृ. २९. ✻ ' **न्यायविद्भिरिदं** चोक्तं धर्मादौ बुद्धिमाश्रिते । व्यवहारोऽनुमानादेः कल्प्यते न बहिःस्थिते ॥' १६८ ॥ **श्लोवा**. निरालम्बने.

✻ **न्यायविस्तरस्य** धर्मज्ञानोपयोगित्वं मनुनाऽप्युक्तम् । **सु**. पृ. १३०.

✻ **न्यायव्युत्पादनं** अनुष्ठानार्थम् । **सु**. पृ. १५०६.

✻ **न्यायशास्त्रे** (मीमांसायां) पूर्वपक्षाशङ्कां विना प्रत्युदाहरणानर्थक्यापत्तिः । पृ. ९५९.

⧗ **' न्यायसिद्धं न सर्वत्र ' इति न्यायः ।** ' ज्ञापकसिद्धं न सर्वत्र ' इत्यत्र ज्ञापकेति न्यायस्याप्युपलक्षणम् । न्यायज्ञापकसिद्धानामपि केषाञ्चित् कथनं

अन्येषामनित्यत्वबोधनाय । प० शेखर. पृ. ३३१ परि० १२५.

* **न्यूङ्खाः** प्रणवाः । शस्त्रविशेषे तेषां पाठः । तत्र च त्रैस्वर्यमेव । **वि.** ९।२।८ वर्णकं ३. * न्यूङ्खाः शस्त्रेषु मन्त्रविशेषाः । **भाट्ट.** ९।२।७ वर्णकं ३ । न्यूङ्खस्वरूपं **आश्वलायन** आह --' द्वितीयं स्वरं ओकारं त्रिमात्रमुदात्तं त्रिः । ७।११।२ ॥ तस्यतस्य चोपरिष्टात् अपरिमितान् पञ्च वा अर्धौकारान् अनुदात्तान् । ३ ॥ उदात्तस्य तु त्रीन् । ४ ॥ अस्यार्थः, प्रथमादेः ऋक्पादस्य द्वितीयं स्वरं ओकारं कुर्यात् त्रिवारम् । प्रत्येकं च ओकारं त्रिमात्रं उदात्तं च कुर्यात् । तस्यतस्य च ओकारस्य उपरिष्टात् अपरिमितान् याज्ञिकपद्धत्या पञ्चैव वा अर्धमात्रिकान् अनुदात्तान् ओकारान् कुर्यात् । परन्तु तत्र उत्तमस्य तृतीयस्य ओकारस्य उपरिष्टात् त्रीनेव अर्धौकारान् अनुदात्तान् ब्रूयात् । इति । सोऽयमेतावान् षोडशौकारसमुदायरूपः एको न्यूङ्खः । उदाहरणं च तत्रैव यथा, ' आपो रेवतीः क्षयथा हि वस्वः ' इति ऋक्पादः प्रथमः प्रातरनुवाकस्थः । तत्र षडहस्य चतुर्थे अहनि प्रातरनुवाके एवं न्यूङ्खः, " आपोऽऽऽ ॐ॒ ॐ॒ ॐ॒ ॐ॒ ॐ॒, ओऽऽऽ ॐ॒ ॐ॒ ॐ॒ ॐ॒ ॐ॒, ओऽऽऽ ॐ॒ ॐ॒ ॐ॒ " एतावत् पठित्वा ' रेवतीः क्षयथा हि वस्वः ' इति पादशेषं पठेत् इति । अत्र ' आपो ' इत्यस्मात् परस्तात् ' रेवतीः ' इत्यस्मात् प्राक् यत् पठ्यते स सर्वः न्यूङ्खः नाम । तथा च विशिष्टपद्धत्या पठ्यमानः षोडशसंख्याकौकारसमुदायः न्यूङ्खः । **के.**

* **न्यूनस्य** अधिकार्थविषयत्वकल्पने गौणत्वदोषः इत्यत्रोदाहरणम् ' सृष्टीरुपदधाति ' ' प्राणभृत उपदधाति ' इति । अत्र सृष्ट्यादिशब्दवन्त एव मन्त्रा उच्यन्ते इति न्यूनस्य गौण्या असृष्ट्यादिशब्दवतामपि मन्त्राणां ग्रहणेन अधिकार्थत्वे गौणत्वं दोषः । स तु अगत्या अङ्गीक्रियते । **बाल.** पृ. ३, * न्यूनस्य अधिकार्थविषयत्वकल्पने लक्षणा इत्यत्रोदाहरणम् ' सोमेन यजेत ' इति । (अत्र सोमशब्दः सोमद्रव्यमात्रवचनः सन् ' सोमवता ' इति मत्वर्थमधिकं लक्षयति) । पृ. ३, * न्यूनस्य अधिकार्थविषयत्वकल्पने वाक्यभेदप्रसङ्ग इत्यत्र ' सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः ' इत्युदाहरणम् । अत्र हि पूर्वपक्षानुसारेण स्वर्गकामपदाध्याहारे ब्रह्मवर्चसस्य स्वर्गस्य चोभयविधाने वाक्यभेदप्रसङ्गः । पृ. ३.